श्रीमद्भागवतमहापुराणम्

'गूढार्थदीपिनी' संस्कृतटीकायुतम्



सततचिन्तनवीतभयामया हरिदयाऽऽगतया सुधिया मया ।
इयमनन्तगले ग्रथिताऽर्पिताऽमुकुलिता स्त्रगिवात्र विराजताम् ॥

टीकाकारः
आचार्य श्रीराममूर्तिशास्त्री पौराणिकः

विद्याभवन प्राच्यविद्या ग्रन्थमाला — ६६

श्रीमद्भागवत-महापुराणम्

गूढार्थदीपिनीटीकासहितम्

प्रथमो भागः

[प्रथमस्कन्धतो नवमस्कन्धपर्यन्तः]



टीकाकारः सम्पादकश्च

आचार्य पं० श्रीराममूर्तिशास्त्री पौराणिकः

लब्धावकाश-पुराणविभागाध्यक्षः

काशीस्थ गोयनका संस्कृत महाविद्यालयस्य

प्रकाशक :—

चौखम्बा विद्याभवन

वाराणसी २२१००१

प्रकाशक
चौखम्बा विद्याभवन
(भारतीय संस्कृति एवं साहित्य के प्रकाशक तथा वितरक)
चौक (बनारस स्टेट बैंक भवन के पीछे)
पो० बा० नं० १०६९, वाराणसी २२१००१
दूरभाष : ३२०४०४

द्वितीय संस्करण १९९३
१-२ भाग सम्पूर्ण ५००-००

अन्य प्राप्तिस्थान
चौखम्बा सुरभारती प्रकाशन
के० ३७/११७, गोपालमन्दिर लेन
पो० बा० नं० ११२९, वाराणसी २२१००१
दूरभाष : ३३३४३१

*


चौखम्बा संस्कृत प्रतिष्ठान
३८ यू. ए., बंगलो रोड, जवाहरनगर
पो० बा० नं० २११३
दिल्ली ११०००७
दूरभाष : २३६३९१

मुद्रक
ओजो मुद्रणालय
वाराणसी



निगमकल्पतरोर्गलितं फलं शुकमुखादमृतद्रवसंयुतम्।
पिबत भागवतं रसमालयं मुहुरहो रसिका भुवि भावुकाः॥

श्रीमतां त्यागमूर्तीनां स्वामिनां तत्त्वदर्शिनाम् ।
मण्डलेश्वरमुख्यानां गणेशानन्दधीमताम् ॥
विश्वविख्यातकीर्तीनां श्रेयसे तत्कराब्जयोः ।
श्रीमद्भागवतं साक्षादादरादर्पयाम्यहम् ॥—(पौराणिकः)



चतुर्धामपीठाधीश्वराणां त्यागमूर्तीनामनन्तश्रीविभूषितानामाचार्यचरणानां
श्रीश्रीगणेशानन्दस्वामिनां महामण्डलेश्वराणाम्
आशीर्वचनम् ।


श्रद्धेया भक्तिरसिकाः,

विदितमस्तु तत्रभवतां यत् चिरकालानन्तरं सम्प्रति शिक्षाह्रासयुगेऽपि पण्डितप्रवरैः भवता श्रीराममूर्तिशास्त्रिपौराणिकैः श्रीमद्भागवतमहापुराणोपरि काचिदभिनवा हृद्या भव्या अन्वर्थाभिधायिनी गूढार्थदीपिनी संस्कृतटीका विरचिता ।

इयं नितान्तं सरला सरसा साधारणजनसुबोध्येति नैतादृशी टीकाऽद्यावधि दृष्टिपथमानीतेति दर्शं दर्शं श्रावं श्रावं च मे हृदयं गद्गदायते मानसकमल प्रफुल्लायते च । इयं टीका कठिनांशगर्भितमपि दुरूहस्थलं सरलप्रसतमपद्धत्या स्फुटयति पूर्वापरसङ्गतिं बोधयति । प्रासङ्गिकमापतितं विरोधं च परिहरति ! अनया संस्कृतसमाजस्य महानुपकारो भविष्यतीति दृढं विश्वसिमि । इमे शास्त्रिणः सात्त्विकाः सरलस्वभावाश्च । एषां जीवनं भागवतमयमेव । अनवरतं श्रीमद्भागवतस्याध्ययनाध्यापनलेखनव्याख्यानप्रवचनादिभिरमूल्यसमयं सार्थकं कुर्वन्तः स्वकीयं जीवनं सफलीकुर्वन्ति । कलिकालकवलिते रागद्वेषाक्रान्तपरिसरेऽस्मिन् युगे महनीया एतादृशा विद्वांसो नोपलभ्यन्ते । किं बहुना, धन्यवादार्हाश्चेमे महानुभावाः, एतेषां दीर्घायुष्याय काशीविश्वेश्वरं प्रार्थये ।

गणेशानन्द–गिरिः
(महामण्डलेश्वरः)


—वन्दे गुरुपरम्पराम्



राजमान्य श्री १०८ श्री पंडित श्रीवंशीधरजी महाराज,
भावार्थदीपिकाप्रकाशटीकाकर्ता।


श्रीधरस्वामिटीकायाः रहस्योद्घाटने क्षमाः।
श्रीश्रीवंशीधराचार्याः स्मर्यन्ते सादरं बुधैः॥

—वन्दे गुरुपरम्पराम्



श्रीमद्भागवताचार्यः पारम्पर्यक्रमागतः ।
श्रीनारायणदत्तोऽयं नाम्ना भागवती बुधा ॥

—वन्दे गुरुपरम्पराम्



सनाढ्यवंशोद्भवराममूर्तिःपौराणिकोऽध्यापनलब्धकीर्तिः ।
काश्यां वसन्नेष चकार टीकां सतां कृते भागवतेऽतिरम्याम् ॥

वन्दे गुरुपरम्पराम्—



श्रीमद्भागवतध्यानाध्यापनेऽविरतं रतः ।
साम्प्रत प्रवयाश्चित्रे राममूर्तिर्विराजते ॥

उप-राष्ट्रपति, भारत
नई दिल्ली

VICE-PRESIDENT
INDIA
NEW DELHI - 110011

जुलाई 7, 1989



संदेश

मुझे यह जानकर खुशी हुई कि श्री राममूर्ति शास्त्री पौराणिक जी ने "श्रीमदभागवत महापुराण पर संस्कृत में टीका की है ।

मैं पुस्तक की सफलता की कामना करता हूं ।

शंकर दयाल शर्मा
(डा० शंकर दयाल शर्मा)

आचारवान् निखिलशासनकार्यदक्षः ।
शक्त्या नयेन च निरस्तविपक्षपक्षः ॥ १ ॥
भूसंस्कृतेः प्रतिनिधि र्जयतु प्रणेता ।
न्यायप्रियोऽयमुपराष्ट्रपति र्विजेता ॥ २ ॥
श्रीशंकरदयालोऽयं शर्मा शर्माभिलंकृतः ।
उपराष्ट्रपदे तिष्ठन् शतं जीव्यादनामयः ॥ ३ ॥

(पौराणिकः)

प्रो॰ वि॰ वेङ्कटाचम्‌ल
कुलपतिः
सम्पूर्णानन्द संस्कृत विश्वविद्यालययर
वाराणसी—२२१००२



सदसि बुधसमाजे स्वीयवैदुष्यतो यो
जटिलविषयमाराद् बोधयन् प्रौढशक्त्या।
कुलपतिरिह सम्यग् दर्शनेषु प्रवीणो
जयतु जयतु विद्वन्मण्डलेष्वग्रगण्यः॥

विविधशिक्षितदीक्षितवीक्षणादविरतं निरतो मृदुशासने।
सदसि वाक्पटुरेष नयप्रियः कुलपतिर्भवतां लभतां यशः॥
शास्त्रानुशीलने दक्षो निष्पक्षो न्यायवर्तने।
काश्यां विराजते श्रीमान् मेधावी वेङ्कटाचलम्॥ (पौराणिकः)

दर्शनादिसकलसंस्कृतवाङ्मयपारावारीणानां लब्धराष्ट्रियपुरस्काराणां
काशीस्थविद्वन्मूर्धन्यानां सम्पूर्णानन्दसंस्कृतविश्वविद्यालय
कुलपतीनां श्रीमतां वि॰ वेङ्कटाचलमहाभागानां

शिवसङ्कल्पः

पुराणविद्यासु लब्धवर्णैः वाराणसेयैः पौराणिकधुरीणैः पण्डितश्रीराममूर्तिशास्त्रिभिः स्वोपज्ञा गूढार्थदीपनीसंज्ञा काचिदभिनवा व्याख्या श्रीमद्भागवतस्य सरलसुकुमारापि प्रौढा, नव्यापि भव्या प्रकाशपदवीमुपनीयते सामग्र्येणेति महानयं प्रहर्षस्य विषयो भवेद्धार्मिकजनानां समेषां पवित्रभारतवर्षवासिनाम्।

विद्यते खलु विशिष्टः समुत्कर्षः सर्वविद्यासु तत्तद्विद्यासम्प्रदायस्य। अत एव विस्पष्टाक्षरमजोघुष्यत भगवद्गीताभाष्ये श्रीशङ्करभगवत्पादैः भारतीयधर्मदर्शनमर्यादापालनचणैराचार्यधुरन्धरैः। असम्प्रदायवित् सर्वशास्त्रार्थविदपि मूर्खवदेव उपेक्षणीय इति। अत एवेदं व्याख्यानं श्रीमद्भागवतप्रवचनसत्सम्प्रदायानुगतैः पौराणिकाग्रणीभिः प्रणीतं विद्वज्जनसमादरभाजनं भवेदिति विश्वसिमः।

तस्यास्य नवीनव्याख्यानस्य प्रणेतारः पुराणस्वाध्यायेनैव कालं नयन्तः सम्प्रत्यायुषोऽशीतितमे वर्षे प्रतिष्ठिता इति श्रुत्वा मोमुदीत्यन्तरङ्गम्। दशमीस्थत्वमात्रेणैव पुरुषः प्रतीक्ष्यो भवतीत्याह स्म मनुर्मानवधर्मोपदेशे मार्गदर्शी महर्षिः। तत्रापीमे शास्त्रिणः चरमे वयसि वर्तमानाः साम्प्रतमपि यदा स्वाध्यायप्रवचनपरायणाः प्रतितिष्ठन्ति, तदा किमु वक्तव्यमेतेषां प्रतीक्ष्यत्वविषये, व्याख्यानस्यैतस्य उपादेयतामन्तरेण वा?

अस्ति कापि नितान्तरमणीया चर्चा तैत्तिरीयोपनिषदि ऋषिसंसदि प्रवृत्ता मानवश्रेयःसाधनसम्बन्धिनी। तत्र मन्महे सिद्धान्तपक्षत्वेन प्रस्तूयते गोत्रेण मौद्गल्यस्य नाकाभिधानस्य कस्यापि महर्षिपुङ्गवस्य मतमित्थं—स्वाध्यायप्रवचन एव मानवश्रेयोमार्गस्य निदानं निधानं चेति। तत्रत्योऽयं वाक्यसंदर्भः—

सत्यमिति सत्यवचा रथीतरः। तप इति तपोनित्यः पौरुशिष्टिः। स्वाध्यायप्रवचने एवेति नाको मौद्गल्यः। तद्धि तपः तद्धि तपः।

अत एव स्वाध्यायप्रवचनात्मके तपसि प्रतिष्ठितानां पुराणेषु निष्णातानां श्रीराममूर्तिशास्त्रिणामिदं पौराणिकसम्प्रदायशुद्धं व्याख्यानं श्रीमद्भागवतार्थजिज्ञासूनां श्रीशुकाचार्यमुखगलितभागवतरसपिपासूनां च कल्पिष्यत उपकाराय महत इति दृढं प्रतीमः।

कामं सन्ति लोके अनन्तपारा विद्याः प्राचीना अर्वाचीनाश्च उच्चावचविषयाः। कामं चैता विभक्ताः परापराभेदेन प्राचीनैर्मनीषिमूर्धन्यैः। कामं च तत्रापरासु विद्यासु महीयन्ते शास्त्राणि, उत्तमाधिकारविषयतया प्रष्ठे स्थाप्यन्ते च। कामं तत्र पुराणानि गण्यन्ते पृष्ठतः। तथापि वेदार्थोपवृंहणरूपत्वेन, महाजनोपकारप्रागल्भ्येन चास्ति पुराणानामपि विशिष्टं शिष्टजनमान्यं किमपि स्थानमिति न तिरोहितमभिज्ञानाम्। प्रसिद्धं हीदं वैयासिकं वचनम्—

इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्।
बिभेत्यल्पश्रुताद्वेदो मामयं प्रहरिष्यति ॥ इति।

प्रसिद्धश्चायमाभाणकः पण्डितेषु—

काणादं पाणिनीयं च सर्वशास्त्रोपकारकम्।
पुराणं धर्मशास्त्रं च सर्वलोकोपकारकम् ॥ इति।


समस्तेषु च पुराणेषु मुकुटायते श्रीमद्भागवतम्, यत्र विद्यावतामप्यग्निपरीक्षा भवतीत्यनुश्रूयते। यच्चेदं श्रीमद्भागवतस्य लोकोत्तरं माहात्म्यम्, तत्र पुनः स्पष्ट एव हेतुः पुराणमिदं पदे पदे भगवतः कल्याणगुणगणानेवोपवर्णयतीति।

अतश्चान्ते इदमेव प्रार्थयामहे यदिमं महता परिश्रमेण धनव्ययेन च प्रकाश्यमानं ग्रन्थं श्रद्धाधनाः सज्जना भूयिष्ठं समाद्रियन्तामिति। इदं चाशास्महे, एतत्पुराणसारगोपिकागीतवचनमुखेन, यत् सर्वे भक्तजनाः भगवतः श्रीमन्नारायणस्य अनन्तकल्याणगुणगणपुण्यसोपानेन यथाक्रमं समारोहन्तु समुच्छ्रितं निःश्रेयसपदमिति—

तव कथामृतं तप्तजीवनं कविभिरीडितं कल्मषापहम्।
श्रवणमङ्गलं श्रीमदाततं भुवि गृणन्ति ते भूरिदा जनाः ॥

वाराणसी
५-९-१९८९
(ऋषिपञ्चम्याम्)

वि० वेङ्कटाचलम्
कुलपतिः,
सम्पूर्णानन्द-संस्कृतविश्वविद्यालयस्य



श्रीशौ वन्दे

मधुररसमूर्त्तये नमः

गुणगणान् विततान् भुवि दूरतो
यदि निशम्य तदन्तिकमागतः ।
करुणया तदभीष्टमपूरयद्
बुधजनैः करुणापतिरीर्यते ।।
शान्तो दान्तस्तितिक्षुश्च गृहस्थोऽप्यमलाशयः ।
काश्यां विभ्राजते श्रीमान् त्रिपाठी करुणापतिः ।।
मृदुस्वभावो निष्ठावान् सदाचारपरायणः ।
हिताशंसी जनानां यो दृश्यतां शरदां शतम् ।।
(पौराणिकः)

काशीस्थविद्वत्परम्परागतशास्त्रानुशीलनशिक्षणाध्यवसायिनां धर्मावनाचार-
पालनानवरतनिरतानामुत्तरप्रदेशसंस्कृत-अकादम्या अध्यक्षाणां
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयकुलपतिचराणां काशीस्थ
सकलविद्वत्समाजसम्मान्यानां पण्डितप्रवराणां
श्रीमतां करुणापतित्रिपाठिमहाभागानां ।

शुभाशंसनम्

अये श्रीमद्भागवतसरोजमकरन्दपानलुब्धा मिलिन्दा माधवभक्तिरसिकाः सहृदयाः, जानन्त्येव भवन्तो यच्छ्रीमद्भागवतमहापुराणं न किल महापुराणाख्यानमात्रम् । एतद्धि वैष्णवमतानुयायिनां, विशेषतश्च शुद्धाद्वैतमतानुयायिनां, वल्लभवेदान्तिनामचिन्त्यभेदाभेद-वादिनां, लीलागानमत्तानां महाप्रभुचैतन्यप्रतिपादितभक्तिसिद्धान्तानुसारिणामन्येषां कृष्ण ललितभक्तिभक्तानां मते, उपनिषद्,—ब्रह्मसूत्र—श्रीमद्भगवद्गीतावत्ततोऽप्यधिकमादरास्पदं चतुर्थं प्रस्थानम् ।

एतस्य मधुररसमाधुर्यभरितस्य निर्माणे प्रेरणादायिका या सम्प्रदायप्रसिद्धा श्रुतिपरम्परया मान्यतामागता, तस्या वर्णनं प्रस्तावनायाः प्रथमे एव पृष्ठे गूढार्थदीपिनीकारेण निर्दिष्टम् । अतोऽस्य महापुराणस्य किमप्यभिनवं भक्तिमार्गे वैशिष्ट्यमिति । सर्वैराध्यात्मिकभक्तिमार्गा-नुसारिभिरुररीकृतम् ।

एतस्य मधुररस-माधुरीजुष्टस्य श्रीमद्भावगतमहापुराणस्य विषये ख्यातिर्विद्यते—

विद्यावतां भागवते परीक्षे—ति । इदमपि सर्वे जानन्ति यदस्मिन् आनन्दकन्दगोपीवल्लभलीलाप्रधाने महापुराणे बहुत्र गूढार्था येषामभिज्ञानं न सुगमम् । ह्यष्टोका व्याख्याश्चैतस्य पूर्वविद्भिर्विहिता । तासु श्रीधरीव्याख्या श्रीधरस्वामिपादैर्निर्मिता सर्वतः प्रामाणिकीति भागवतमर्मज्ञैरुद्घोष्यते । महाप्रभुवल्लभाचार्येणापि दशमस्कन्धमादाय रचिता "सुबोधिनी" टीकाऽपि महनीया किन्तु साऽपि साम्प्रदायिकी वल्लभवेदान्तराद्धान्तपोषिका । इयमेव साम्प्रदायिकी कथा विजयध्वजतीर्थस्य महापण्डितस्य व्याख्यासन्दर्भे यत्र-तत्र दृश्यते । महाप्रभुश्रीचैतन्यानुयायिभिश्च" षट्-सन्दर्भो (भागवतसन्दर्भो वा) लघुभागवतम् "बृहद्भागवतम्" इत्यादिग्रन्थैर्व्याख्यां कुर्वाणै यद्यपि श्रीधरीटीकां प्रति महती श्रद्धा सूचिता तथापि तेषां व्याख्यानं सर्वदा सर्वथा च न साम्प्रदायिकदृष्टिरहितम् ।

श्रीमन्तो राममूर्तिशास्त्रिणो बहुभिवर्षैः श्रीमद्भागवतस्य सरलतमपद्धतया प्रौढ्याऽध्यापनं मननचिन्तनपूर्वकं प्रकुर्वन्ति । नूनं ते पौराणिकाः पुराणकथाकोविदाः । श्रीमद्भागवतस्य महापुराणस्य गूढार्थप्रकाशने कृतश्रमाः । सत्यामपि प्रमाणिक्यां श्रीधरीव्याख्यायां तथापि सर्वा गूढग्रन्थयोऽनुद्घाटिता असौ व्याख्याऽपि यत्र तत्र प्रतीकार्थगूढार्थमिश्रिता वर्तते । अतः यदा कदाचिन्न सुवोध्या ।

मयाऽस्य महापुराणस्य गूढार्थदीपिन्या व्याख्याया दशमस्कन्धस्य सूक्ष्मेक्षिकयाऽवलोकनं कृतम् । इमे भागा अवश्यमेव हृदयावर्जका सत्प्रयासैर्विहिता इति समुद्घोषणे न सङ्कोचः ।

मन्य इयं गूढार्थदीपिनी व्याख्या स्वकीयैर्विशेषगुणैर्भागवतरसिकानां तोषाय कल्पते ।

नाहं श्रीमद्भागवतमहापुराणमर्मज्ञः । परन्तु कृष्णभक्तः कृतानेकश्रीमद्भागवतसप्ताहादिपारायणो वृद्धश्च ।

नूनमियं टीका महापुराणस्य गूढार्थानुद्धाटयन्ती सरलभावपूर्णशब्दैर्लीलारसं मुखरयन्ती श्रीकृष्णभक्तिभावं पाठकमनःसु समुद्बोधयन्ती भागवतपुराणरसिकान् सन्तर्पयन्ती संस्कृतविद्वन्मण्डले समुचितं समादरमधिगमिष्यतीति ।

वै० २०४६ तमे संवत्सरे
पौषे शुक्लायां पुत्रदैकादश्याम्

शुभाशंसी
त्रिपाठिकरुणापतिः
कुलपतिचरः सं० सं० वि० विद्यालस्य वाराणसीस्थस्य
अध्यक्षश्च उत्तरप्रदेशसंस्कृत—अकादम्याः

[न हि स्वात्मारामं विषयमृगतृष्णा भ्रमयति]

स्वात्माराम



प्राच्या वाच्य ज्ञान-विज्ञानपूर्णो
धन्योऽनन्यो लोकमान्यो वदान्यः।
श्रीमान् धीमान् शीलवानात्मनिष्ठः
सीतारामो राजते काशिकायाम् ॥
सीतारामचतुर्वेदो लोकवेदपथानुगः।
धीरो जनप्रियो वाग्मी मोदतां शरदां शतम् ॥
(पौराणिकः)

आच्यावाच्यनिखिलविद्याविशारदानां सामाजिक-
जनतानेतृत्वसम्पादनकुशलानां विविधोपाधि-
भूषितानां विपश्चिदपश्चिमानां श्रीमतां
सीतारामचतुर्वेदमहाभागानां

संस्तवः

पण्डितप्रवरेण विद्वद्वरेण्येन श्रीमद्राममूर्तिशास्त्रिपौराणिकमहाभागेन महदायासमासाद्य श्रीमद्भागवतमहापुराणस्य या सहृदयहृद्या गूढार्थदीपिनी टीका संसृष्टा, सा मया सुप्रीतेन मनसाऽवधानेन चेतसा समवलोकिता सम्यगनुशीलिता च। सुदीर्घकालानन्तरं निलिम्पवाण्यां श्रीमद्भागवतस्येमां सुललितां सरसां सरलां सर्वबोध्यां टीकां सुसमीक्ष्य मे हृदयं भृशं समुल्लसितम्। विभिन्नासु देशीयभाषासु प्रभूतमात्रायां बह्व्यः सुविशदाष्टीकाः प्रकाशिताः प्रचारिताश्च सन्ति; किन्तु ताः सर्वास्तु सामान्यार्थप्रतिपादिका एव। श्रीमद्भागवतस्य समाधिभाषायाः काऽपि सरला सर्वबोध्या गूढार्थप्रकाशिनी टीका समुपलब्धा नाऽसीत्, संस्कृतभाषायां देशीयभाषासु वा।

गूढार्थजिज्ञासुभिस्तत्त्वान्वेषिभिर्मनीषिभिस्तु सर्वत्र सर्वदा सर्वथा च गूढार्थविकाशिका सरला सर्वबोध्या टीकैव मृग्यते। न केवलं भारते वर्षे, विदेशेष्वपि सरला संस्कृतटीकैव सर्वैर्विमृग्यते। तेषां सर्वेषां भगवद्गुणानुरागिणां सततस्वाध्यायशीलानां गूढार्थान्वेषिणां सुकृतीनां विदुषां कृते गूढार्थदीपिनीयं टीका सर्वथा सफला सुफला सौभाग्यफला सकलार्थफला परमार्थफला च भविष्यतीति मे निःसंशया ध्रुवा मतिः।

परमभागवतानां श्रीमद्भागवतरसलोलुपानां वैष्णवानां कथावाचकानाञ्च समाजेषु गूढार्थदीपिनीयं टीका सुप्रतिष्ठिता समादृता सुसेव्या च भविष्यतीति मे सुनिश्चितो विश्वासः।

सर्वजनकल्याणभावितायाः गूढार्थदीपिन्या विधातारं सर्वथाभिनन्दनीयमभिवन्दनीयं धन्यवादार्हं श्रीमद्राममूर्तिशास्त्रिमहाभागं 'समाराध्य' तेषां सुदीर्घजीवितस्य मंगलकामनां विधाय तं पुष्कलं सन्दधामि।

विजयादशमी (सोमवासरः) संवत् २०४६

काशीनिवासी-मुजफ्फरनगरस्थः
(सीतारामचतुर्वेदी)
एम०ए०, बी०टी०, एल०एल०बी०
(साहित्याचार्यः)
वेदपाठी-भवन, पञ्चमुखी महादेव मार्ग,
मुजफ्फरनगर–२५१ ००२

पीयूषपाणिकविराजश्रीव्रजमोहनदीक्षितमहाभागानां

शुभाशंसनम्

विषम - रोग - निदान - निवारणे
यशसि लब्धपदोऽप्रतिमो भुवि ।
मधुरवाक् कविराजपदे स्थितो
विजयतां व्रजमोहनदीक्षितः ॥-(पौराणिकः)



विदितवेदितव्यानां तत्रभवतां समेषामपि विदुषां श्रुतिपथमायाति चिरकालतो यत् "विद्यावतां भागवते परीक्षा" विद्यावरेण्यानां मेधाविनां प्रखरप्रतिभाया परीक्षास्थलं श्रीमद्भागवतमासीत् ।

यत्र तत्र बुद्धिवैशद्यं वर्चस्वञ्च प्रकटीकृतं महर्षिण व्यासेन श्रीमद्भागवते । यानि दुरूहाणि जटिलकठिनानि स्थलानि सन्ति तेषां, पारं यातुं मर्म ज्ञातुं कोऽपि टीकाकारोऽद्यावधि तथा समर्थो नाभूद्येनं तत्कुक्षिनिक्षिप्तं रहस्यं मतिमतां सरलतया बुद्धिगम्यं भवेत् ।

परमभागवतानां तपःपूतान्तःकरणानां श्रीमतां राममूर्तिशास्त्रिपौराणिकानां पञ्चाशद्वर्षेभ्योऽप्यधिकः कालो व्यतीतः श्रीमद्भागवतस्यानुशीलनेऽध्यापने चान्तेवासिनाम् । एतेषां शतशः शिष्याः प्रशिष्याश्च एभ्योऽधीत्य सम्यक् श्रावयन्तः यत्र तत्र मनोहारिणीं श्रीमद्भागवतीं कथां यशो वर्द्धयन्त्येतेषां रञ्जयन्ति च मनांसि श्रोतॄणाम् ।

अनेनानुभवशालिना श्रीमद्भागवतमर्मज्ञेन विद्वच्छिरोमणिना कृतेयं गूढार्थदीपिनी नाम्नो टीका हस्तामलकवद्विषयबोधञ्जनयति । सर्वाणि मर्मस्थलानि न केवलं स्पष्टीकृतानि, अपितु सरलानि सर्वबुद्धिगम्यानि विहितानि धीमता विदुषा ।

एतेषामभिनवं साफल्यं स्मारं स्मारम्मुदमावहति मदीयञ्चेतः ।

टीकातीव सरसा सुलभा च कृता पुराणविद्भिः विद्वद्भिः श्रीराममूर्तिशास्त्रिपौराणिकैः । काठिन्यं यत्र प्रतीयते हि विदुषां तेषां समेषां सम्यक् पथप्रदर्शिनी गूढार्थप्रतिपादिकातीव सरला विद्यावताम्मतिमतां मनोमोदिनी, धन्या मान्या च सुग्रथितार्थबहुला सुतरां हि रहस्योद्घाटने क्षमा ।

प्रार्थये वाराणसीपुरपतिं भगवन्तं विश्वनाथमेतेषां दीर्घायुष्याय पूर्णस्वास्थ्याय च कामये कामनासिद्धिम् ।

धन्यवादार्हाः सम्मानार्हाश्चेमे भागवतस्वरूपास्तान् हृदाऽभिनन्दन् विरमति ।

व्रजमोहनदीक्षितः
२५-६-८६

व्रजविलासः
धूपचण्डी, वाराणसी

उत्तर-प्रदेश संस्कृत-अकादमी

रमेशचन्द्र रस्तोगी
निदेशक

संस्कृत-भवनम्
नया हैदराबाद,
लखनऊ २२६ ००७

श्रद्धास्पदीभूताः श्रीमन्तः शास्त्रिमहाभागाः, पत्रांक—१५२९१

यथासमयं भवतां पत्रं प्राप्तम्। श्रीमद्भागवतमहापुराणोपरि श्रीराममूर्तिशास्त्रि-पौराणिकैरभिनवा काचन टीका विरचिता। सेयं शीघ्रमेव प्राकाश्यमेष्यतीति श्रुत्वा प्रसीदतितमां मदीयमन्तःस्वान्तं नितान्तम्। स्तुत्योऽयं भवतां प्रयासः। अस्य लेखकाः प्रकाशकाश्च धन्यवादार्हाः। किं बहुना, साभिवादनमयं विरमति।

(हिन्दीभाषायां लिखितस्य निदेशकपत्रस्य संस्कृतेऽनुवादः)

भवदीय,
रमेशचन्द्र रस्तोगी

विविधशास्त्रविदां विदुषां सतां कृतिषु वीक्ष्य नितान्तपरिश्रमम्।
विपुलदेयधनेन पुरस्कृता विजयतां भुवि सेयमकादमी[1]॥
(पौराणिकः)

---

१. अकात् श्रमजन्यक्लेशात् हेतोः तन्निवार्यं यया अमी विद्वांसः पुरस्कृताः सेयमकादमी विजयतामित्यन्वयः। अकात् इति ल्यब्लोपे पञ्चमी।

लेखकः श्रीगजास्योऽस्या वावदूका सरस्वती ।
पौराणिको निमित्तं च पाठकाः पुण्यभागिनः ॥

(पौराणिकः)

गूढार्थदीपिनी-टीका

धनञ्जये हाटकसंपरीक्षा महारणे शस्त्रभृतां परीक्षा ।
विपत्तिकाले गृहणीपरीक्षा विद्यावतां भागवते परीक्षा ॥

माङ्गलिक-श्लोकाः

कृष्णातीरे कोकिलाकेलिकीरे गुञ्जापुञ्जे देवपुष्पादिकुञ्जे।
कम्बुग्रीवौ क्षिप्रबाहू चलन्तौ राधाकृष्णौ मङ्गलं मे भवेताम् ॥१॥
अतसीकुसुमोपमेयकान्तिर्यमुनाकूलकदम्बमध्यवर्ती ।
नवगोपवधूदुकूलशाली वनमाली वितनोतु मङ्गलानि ॥२॥

(गर्ग सं०)

मङ्गलं भगवान् कृष्णो मङ्गलं तत्कथामृतम्।
मङ्गलं चास्य वक्तारः श्रोतारश्चापि मङ्गलम् ॥३॥
मङ्गलं मङ्गलं जाग्रन्मङ्गलं मङ्गलं स्वपन्।
एवं जपन्नवाप्नोति मङ्गलायतनं हरिम् ॥४॥

कुर्वन्ति शान्ति विबुधाः प्रहृष्टाः क्षेमं प्रकुर्वन्ति पितामहाद्याः।
स्वस्ति प्रयच्छन्ति मुनीन्द्रमुख्या गोविन्दभक्ति वहतां नराणाम् ॥१५॥
शुभा ग्रहा भूतपिशाचयुक्ता ब्रह्मादयो देवगणाः प्रसन्नाः।
लक्ष्मीः स्थिरा तिष्ठति मन्दिरे च गोविन्दभक्ति वहतां नराणाम् ॥१६॥
गङ्गागयानैमिषपुष्कराणि काशी प्रयागः कुरुजाङ्गलानि।
तिष्ठन्ति देहे कृतभक्तिपूर्वं गोविन्दभक्ति वहतां नराणाम् ॥१७॥

(पद्म पुराणोत्तरखण्डे १२९-अध्याये १५–१७)

आर्ता विषण्णाः शिथिलाश्च भीता घोरेषु च व्याधिषु वर्तमानाः।
सङ्कीर्त्य नारायणशब्दमात्रं विमुक्तदुःखाः सुखिनो भवन्ति ॥८॥

लक्ष्मीः कौस्तुभपारिजातक-सुरा-धन्वन्तरिश्चन्द्रमा
धेनुः कामदुघा सुरेश्वरगजो रम्भा च देवाङ्गनाः।
अश्वः सप्तमुखो विषं हरिधनुः शंखोऽमृतं चाम्बुधेः
रत्नानीति चतुर्दश प्रतिदिनं कुर्वन्तु नो मङ्गलम् ॥

प्रह्लादनारदपराशरपुण्डरीकव्यासाम्बरीशशुकशौनकभीष्मदाल्भ्यान् ।
रुक्माङ्गदार्जुनवसिष्ठविभीषणादीन् पुण्यानिमान् परमभागवतान् स्मरामि ॥

॥ श्रीमद्भागवत-पाठविधिः ॥

दन्तधावनपूर्वकं कृतस्नानः शुचिर्भूत्वा प्राङ्मुख उपविश्य चन्दनादिना कृततिलकः सन्ध्योपासनं कृत्वा पुनः त्रिराचम्य स्वस्तिवाचनपूर्वकं श्रीकृष्णं प्रणमेत् ।

तदनु षोडशोपचारैः पञ्चोपचारैर्वा गन्धपुष्पधूपदीपनैवेद्यैः वासुदेवं व्यासं शुकं श्रीमद्भागवतपुराणं च सादरं सम्पूजयेत् । ततः पाठारम्भात् प्राक् ॐ नमो भगवते वासुदेवाय इति द्वादशाक्षरमन्त्रम् ॐ क्लीं कृष्णाय गोविन्दाय गोपीजनवल्लभाय स्वाहा इति गोपालमन्त्रं वाऽष्टोत्तरशतं जपेत् । पश्चादेवं विनियोगं कुर्यात् ।

विनियोगः

ॐ अस्य श्रीभागवताख्यस्तोत्रमन्त्रस्य नारद ऋषिः बृहती छन्दः श्रीकृष्णः परमात्मा देवता, ब्रह्मबीजं भक्तिः शक्तिः, ज्ञानवैराग्ये कीलकम् । मम श्रीमद्भगवत्प्रसन्नताप्राप्त्यर्थं पाठे विनियोगः ।

ऋष्यादिन्यासः

ॐ नारदर्षये नमः शिरसि । ॐ बृहतीच्छन्दसे नमः मुखे । ॐ श्रीकृष्णपरमात्मने नमः हृदि । ॐ ब्रह्मबीजाय नमः गुह्ये । ॐ भक्तिशक्तये नमः पादयोः । ॐ ज्ञानवैराग्यकीलकाय नमः, नाभौ । श्रीमद्भगवत्प्राप्त्यर्थं पाठसम्बन्धिविनियोगाय नमः सर्वाङ्गे ।

अङ्गन्यासः

ॐ क्लां हृदयाय नमः । ॐ क्लीं शिरसे स्वाहा । ॐ क्लूं शिखायै वषट् । ॐ क्लैं कवचाय हुम् । ॐ क्लौं नेत्रत्रयाय वौषट् । ॐ क्लः अस्त्राय फट् ।

करन्यासः

ॐ क्लाम् अङ्गुष्ठाभ्यां नमः । ॐ क्लीं तर्जनीभ्यां नमः ॐ क्लूं मध्यमाभ्यां नमः । ॐ क्लैम् अनामिकाभ्यां नमः । ॐ क्लौं कनिष्ठिकाभ्यां नमः । ॐ क्लः करतलकरपृष्ठाभ्यां नमः

अथ ध्यानम्

शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं
विश्वाधारं गगनसदृशं मेघवर्णं शुभाङ्गम् ।
लक्ष्मीकान्तं कमलनयनं योगिभिर्ध्यानगम्यं
वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम् ॥१॥

सप्ताह-पारायणस्य विश्रामस्थलानि

सप्ताहे पाठनियमं शृणु शौनक संयतः।
मनुकर्दमसंवादपर्यन्तं प्रथमेऽहनि ॥ १ ॥
ऋषभाख्यानपर्यन्तं द्वितीये दिवसे वदेत्।
तृतीये दिवसे कुर्यात्सप्तस्कन्धपूरणम् ॥ २ ॥
कृष्णाविर्भावपर्यन्तं चतुर्थेऽहनि वाचयेत्।
रुक्मिण्युद्वाहपर्यन्तं पञ्चमेऽह्नि वदेत्सुधीः ॥ ३ ॥
श्रीहंसाख्यानपर्यन्तं षष्ठेऽह्नि वाचयेत्सुधीः।
सप्तमे दिवसे कुर्याच्छ्रीभागवतपूरणम् ॥ ४ ॥
कौशिकी-संहिता

मासिक-पारायणक्रमः

मासश्रवणपक्षे तु नित्यमध्यायधूर्जटिम्।
पञ्चाध्यायीं पठेद्विद्वान् समाप्तिदिवसेऽन्तिमाम् ॥ ५ ॥
पाठं कुर्वन्न विरमेद् यावदध्यायपूरणम्।
विरामे च तदध्यायं पुनरादित आरभेत् ॥ ६ ॥
भौमार्किवर्जिता वारा भानि ध्रुवमृदूनि च।
शुभयोगे तिथौ लग्ने कथारम्भः प्रशस्यते ॥ १ ॥
नित्यायां च कथायां च पुराणानां मुनीश्वर।
द्वादशीं वर्जयेत् प्राज्ञः सूत-सूतकसंभवात् ॥ २ ॥
सप्ताहे न निषेधोऽस्ति प्राहुरेवं पुराविदः-(पद्मपुराणम्)
मलमासं च शुक्रास्तं तथाऽस्तं गुरुचन्द्रयोः।
गुर्वादित्यं क्षयतिथिं सर्वथा परिवर्जयेत् ॥-(कौशिकी संहिता ५।८)

अस्याश्रोतृन् प्रति व्यासस्य स्वोच्छ्वासमाक्रोशः

दारिद्र्यदुःखज्वरदाहितानां मायापिशाचीपरिमर्दितानाम्।
संसारसिन्धौ परिपातितानां क्षेमाय वै भागवतं प्रगर्जति ॥१॥

तद्यथा

आजन्ममात्रमपि येन शठेन किञ्चित्
चित्तं विधाय शुकशास्त्रकथा न पीता।
चाण्डालवच्च खरवत् बत तेन नीतं
मिथ्या स्वजन्म जननीजनिःदुःखभाजा ॥२॥

जीवञ्शवो निगदितः स तु पापकर्मा
येन श्रुतं शुककथावचनं न किञ्चित् ।
धिक् तं नरं पशुसमं भुवि भाररूप
मेवं वदन्ति दिवि देवसमाजमुख्याः ॥३॥

यैर्न श्रुतं भागवतं पुराणं नाराधितो यैः पुरुषः पुराणः ।
हुतं मुखे नैव धरामराणां तेषां वृथा जन्म गतं नराणाम् ॥४॥

इदं शरीरं शतसन्धिजर्जरं पतत्यवश्यं परिणामदुर्वहम् ।
किमौषधं पृच्छसि मूढ दुर्मते निरामयं भागवतामृतं पिब ॥५॥

श्रीमद्भागवतस्य मननीयाः महत्वपूर्णकतिपयश्लोकाः

बिले बतोरुक्रमविक्रमान् ये न शृण्वतः कर्णपुटे नरस्य ।
जिह्वाऽसती दार्दुरिकेव सूत न चोपगायत्युरुगायगाथाः ॥
भारः परं पट्टकिरीटजुष्टमप्युत्तमाङ्गं न नमेन्मुकुन्दम् ।
शावौ करौ नो कुरुतः सपर्यां हरेर्लसत्काञ्चनकङ्कणौ वा ॥
बर्हायिते ते नयने नराणां लिङ्गानि विष्णोर्न निरीक्षतो ये ।
पादौ नृणां तौ द्रुमजन्मभाजौ क्षेत्राणि नानुव्रजतो हरेर्यौ ॥
जीवञ्शवो भागवताङ्घ्रिरेणुं न जातु मर्त्योऽभिलभेत यस्तु ।
श्रीविष्णुपद्या मनुजस्तुलस्या श्वसन् शवो यस्तु न वेद गन्धम् ॥
तदश्मसारं हृदयं बतेदं यद्गृह्यमाणैर्हरिनामधेयैः ।
न विक्रियेताथ यदा विकारो नेत्रे जलं गात्ररुहेषु हर्षः ॥

(भा. २ स्क. ३ अ. २०-२४)

यथा यथाऽऽत्मा परिमृज्यतेऽसौ मत्पुण्यगाथाश्रवणाभिधानैः ।
तथा तथा पश्यति वस्तु सूक्ष्मं चक्षुर्यथैवाञ्जनसंप्रयुक्तम् ॥
क्वचिद् रुदन्त्यच्युतचिन्तया क्वचिद्धसन्ति नन्दन्ति वदन्त्यलौकिकाः
नृत्यन्ति गायन्त्यनुशीलयन्त्यजं भवन्ति तूष्णीं परमेत्य निर्वृताः ॥
वाग् गद्गदा द्रवते यस्य चित्तं रुदत्यभीक्ष्णं हसति क्वचिच्च ।
विलज्ज उद्गायति नृत्यते च मद्भक्तियुक्तो भुवनं पुनाति ॥

मदालसाया अलर्कं प्रति राजधर्मोपदेशः

वत्स—

धरामरान् पर्वसु तर्पयेथाः समीहितं बन्धुषु पूरयेथाः ।
हितं परस्मै हृदि चिन्तयेथा मनः परस्त्रीषु निवर्तयेथाः ॥

वत्स—

सदा मुरारिं हृदि चिन्तयेथास्तद्ध्यानतोऽन्तः षडरीन् जयेथाः
मायां प्रबोधेन निवारयेथा ह्यनित्यतामेव विचिन्तयेथाः ।

वत्स—

अर्थागमाय क्षितिपान् जयेथा यशोऽर्जनायार्थमपि व्ययेथाः ।
परापवादश्रवणाद् बिभीथा विपत्समुद्राज्जनमुद्धरेथाः ॥

वत्स—

राज्यं कुर्वन् सुहृदो नन्दयेथाः साधून् रक्षंस्तात यज्ञैर्यजेथाः ।
दुष्टान् निघ्नन् वैरिणश्चाजिमध्ये गोविप्रार्थे वत्स मृत्युं व्रजेथाः ॥

(मार्कण्डेयपुराणम्) २६।३६-३७।३८-४१

राजकन्याभिः सह विहारान्ते महर्षिसौभरेरन्तिमविचारधारा

मनोरथानां न समाप्तिरस्ति वर्षायुतेनापि तथाब्दलक्षैः ।
पूर्णेषु पूर्णेषु मनोरथामुत्पत्तयः सन्ति पुनर्नवानाम् ॥ १ ॥
पद्भ्यां गता यौवनिनश्च जाता दारैश्च संयोगमिताः प्रसूताः ।
दृष्टाः सुतास्तत्तनयप्रसूतिं द्रष्टुं पुनर्वाञ्छति मेऽन्तरात्मा ॥ २ ॥
द्रक्ष्यामि तेषामिति चेत्प्रसूतिं मनोरथो मे भविता ततोऽन्यः ।
पूर्णेऽपि तत्राप्यपरस्य जन्म निवार्यते केन मनोरथस्य ॥ ३ ॥
आमृत्युतो नैव मनोरथानामन्तोऽस्ति विज्ञातमिदं मयाद्य ।
मनोरथासक्तिपरस्य चित्तं न जायते वै परमार्थसङ्गि ॥ ४ ॥

(मार्कण्डेय पुराणम्)

कृतान्तस्य दूती जरा कर्णमूले
समागत्य वक्तीति लोकाः शृणुध्वम् ।
परस्त्रीपरद्रव्यवान्छां त्यजध्वम्
भजध्वं रमानाथपादारविन्दम् ॥ १ ॥

श्रीमङ्गलमूर्तये नमः

प्रस्तावना

विदाङ्कुर्वन्तु तत्रभवन्तो भवन्तो यत्कलिकालकवलितेऽस्मिन्नवनीतले नानाविध-दुर्वासनावासितान्तःकरणानां जीवानां निरतिशयसुखशान्तिप्राप्त्यर्थं किमुत्तमं साधनमिति गवेषणायामूहापोहपूर्वकमिदमेव निश्चीयते यत्साक्षाद्भगवतः कलावतारस्य बादरायणस्य निर्दिष्टो मार्ग एवानुसरणीयः, 'महाजनो येन गतः स पन्थाः' इति न्यायात्।

श्रूयते दृश्यतेऽनुभूयते चैतत् यत् सप्तदश पुराणानि ब्रह्मसूत्राणि निर्मायापि तस्य हृदि सन्तोषो न समजनि। तदा सरस्वतीतीरस्थे विविक्ते स्वाश्रमे समासीनो व्यासो भूयो भूयो मनसीदं चिन्तितवान्। अहो मया निर्व्यलीकेन हृदा श्रुनयोऽग्नयो गुरवश्च सम्मानितास्तेषामनुशासनं च गृहीतम्। भारतव्यपदेशेन तत्र तत्र स्थले सप्रसङ्गमाम्नायार्थोऽपि दर्शितः। यत्र च वर्णानामाश्रमाणां स्त्रीशूद्राणां चानुष्ठेयाः नानाविधा धर्माः सोपपत्तिकं वर्णिताः। यैरनुष्ठितैर्मनुष्याणामैहिकं पारलौकिकं च सर्वविधं कल्याणं सम्पद्यते। अथापि मे देहगतो जीवात्मा असम्पन्न इवाभाति न च प्रसीदतीति कोऽत्र हेतुरिति खिद्यतस्तस्य व्यासस्याश्रमे देवर्षिर्नारद इतस्ततो लोकेषु पर्यटन्नकस्मादागमत्।

तमवलोक्य हर्षविकसितमना व्यासो यथोचितमर्घ्यपाद्यादिभिः तं सम्यगपूजयत्। आन्तरिकचिन्ताकुलं महर्षिव्यासं तदनर्हं विलोकयन् सन् पृष्टवान् नारदः? महर्षे! ते शारीरो मानसो वात्मा तेन शरीरेण मनसा च परितुष्यति कच्चित्। ते शरीरं मनश्च प्रसन्नं वर्तते नवेति। त्वया सर्वार्थपरिबृंहितं सर्वशास्त्रमूर्धन्यं महदद्भुतं महाभारतं कृतं सनातनं ब्रह्म च करामलकवत् अधिगतमनुभूतं च। अथापि त्वमकृतार्थ इवात्मानं शोचसीति किमेतत् नैतत्त्वय्युज्यते। निशम्यैतत् भगवता व्यासेनोक्तं भगवन् त्वदुक्तं सर्वं सत्यमेव नात्र सन्देहः अथापि ममात्मा न परितुष्यतीति यदत्र मयि न्यूनत्वं तत्साधिकारं विचार्यतां निराक्रियतां च।

देवर्षिणोक्तं सर्वं कृत्वाऽपि यन्मुख्यतया वर्णनीयं वस्तु वर्तते तत्तु त्वया नोपवर्णितं येनैवासौ तवात्मा न तु तुष्यति। भारतादिषु यथा धर्मादयोऽर्था विशिष्टविधया निरूपितास्तथा भगवतो वासुदेवस्य महिमा तच्चरित्रं च नैव वर्णितम्। भगच्चरितातिरिक्तं यत् किञ्चिदपि वर्ण्यते लिख्यते श्रूयते च तत्सर्वमपार्थं परमार्थशून्यं बुद्धेरस्थैर्यकरं चेति सर्वनिगमागमसम्मतम्। न्यूनत्वमपि त्वयि तावदिदमेव। अतो लीलाप्रधानं भगवच्चरितमेव समाधिना बुद्धिविषयीकृत्य तदेव मुख्यविधया वर्ण्यताम्। तदैव न्यूनत्वस्य पूर्णता मनस्तोषश्च जायते। इत्यपरितोषकारणं निरूप्य नारदो व्यासाय चतुःश्लोकीभागवतोपदेशं कृतवान्।

भगवल्लीलाप्रधानमिदमेव मुख्यं पुराणं न तथाविधमन्यत् पुराणमस्तीति निर्विवादम्। किञ्चेदं भागवतं भगवतः साक्षात् वाङ्मयी मूर्तिरस्ति। स्वधाम गच्छता भगवतोद्धवप्रार्थनया भक्तावलम्बनायेदमाविष्कृतं स्वकीयं यत् दिव्यं तेजस्तदत्रैव न्यधायि। अस्य श्रव-

णात् ध्यानात् पाठाच्च भगवानयासेन हृद्गतः सन् दुर्वासनां निरस्य सद्य एवाविर्भवतीत्यनुभवसिद्धम्। प्रेतोद्धारार्थं गयाश्राद्धमपि न तथाविधमकिञ्चित्करं चेति गोकर्णस्तम्भीकृतेन भगवता भास्करेण श्रीमद्भागवतान्मुक्तिरिति स्पष्टतयाऽस्यैव नामनिर्देशपूर्वकं सडिण्डिममुद्घोषः कृत इति सर्वैंविदितमेव।

अखिलनिगमागमेषु पुराणेषु किं बहुना सर्वविधवाक्प्रबन्धेषु च इदं मूर्धन्यं शिरोमणिभूतं तिलकायमानं चेति न केषाञ्चिदपि तिरोहितमस्ति। अस्याध्ययनादध्यापनाच्च अध्येतृणामध्यापकानां च हृदि सततमेतादृशी भक्तिसरिता प्रवाहिता भवति यस्यां निमग्ना भक्तजना एतत्प्रपञ्चं शरीरं च विस्मरन्तो हृदि ब्रह्मानन्दमनुभवन्ति। योगसूत्रादिषु मनो निरोधोपायाः प्रकारान्तरेण वर्णिता अपि विषयदूषितान्तःकरणैः पामरजनैः स्वायत्तीकर्तुमशक्या एवेति। भागवतकथाश्रवणकाले तु मनोनिरोधः स्वयमेवानायासेन जायते स्वीयं चाञ्चल्यं च परित्यज्य मनः सद्य एवात्मनिष्ठं भवति। चेष्टयाप्यन्यत्र गन्तुं न शक्नोतीत्यनुभवसिद्धम्। कीदृगस्य वैशिष्ट्यं महत्त्वं चेति स्वयमेव विचारयन्तु पदे-पदेऽनुभवन्तु च।

अस्य भाषासौष्ठवमर्थगाम्भीर्यं शैली च यथाप्रकरणं क्लिष्टा क्लिष्टतरा क्लिष्टतमा चेति गुरुपरम्परासरणिमन्तरा शास्त्रपारङ्गतैर्विद्वद्भिरपि यथातथं बोधविषयीकर्तु न शक्यते। अत एवात्र विषये "विद्यावतां भागवते परीक्षा" इति चिरकालादयमुद्घोषः श्रूयते स चाक्षरशः सत्यमेव न केनचित्तार्किकेणाप्येतदन्यथा कर्तुं शक्यते।

अस्योपरि पूर्वाचार्यैर्महत्त्वपूर्णा विविधा व्याख्याः कृतास्ताः सर्वा अपि प्रायः स्वस्वसम्प्रदायानुसारिण्य एवेति। केवलं श्रीधरस्वामिनामेव टीका सर्वटीकातिशायिनी यथार्थतत्त्वाव बोधिकेति। अत्र विषये श्रीधरः सकलं वेत्ति श्रीनृसिंहप्रसादतः' इति परम्परागता सूक्तिरपि साधीयसी। अथापि कुत्रचित्स्थलेषु एभिः स्वामिनामुपर्याक्षेपः कृतः स च सर्वथाऽनर्गलो निर्मूलश्चेति। श्रीधरस्वामिनामभिप्रायस्तु न कैश्चिदपि याथातथ्येन ज्ञातुं शक्यते। आचार्यश्रीवंशीधरशर्मणैव स्वीयटीकायां तत्तद्गम्भीरस्थलेषु तट्टीकायाः स्वपाण्डित्यबलेन प्रौढ्या सन्तोषजनकः सरलपद्धत्या भाव आविष्कृतः स च सर्वसम्मतः। विद्वन्मूर्धन्येन वैष्णवाचार्येण श्रीश्रीजीवगोस्वामिनाऽपि यथाप्रकरणं तट्टीकायाः प्रतीकान्युद्धृत्य सादरं चमत्कृतिजनकः सुस्पष्टतया भावः स्फुटीकृतः। विश्वनाथचक्रवर्तिनापि तत्तत्स्थलेषु स्वामिचरणैरित्युक्त्वा महानादरः सूचितः। अन्यैरपि पूर्वाचार्यैः सम्यक्तया अस्याः टीकाया हृदाऽभिनन्दनं कृतम्।

विजयध्वजतीर्थस्य वैदुष्यं व्याख्यानं च लोकोत्तरमपूर्वं चेति निर्विवादमित्यहं मन्ये, किन्तु सम्प्रदायाकृष्टचेतसा रागद्वेषाक्रान्ततया तैः कुत्रचित्स्थलेषु प्रकरणविरुद्धमपि व्याख्यानं कृतं तच्च शोभनं न प्रतिभाति। यथा चतुर्थस्कन्धे तपःकर्तुमुद्यतान् प्रचेतसो दृष्ट्वा तत्सङ्कल्पसिद्धये भगवत्प्राप्तये च योगादेशाख्यं रुद्रगीतं तेभ्य उपदिष्टवान् भगवान् शिवः। तत्रैकं पद्यमायाति तत्र ध्यानं देयम्—

'स्वधर्मनिष्ठः शतजन्मभिः पुमान् विरिञ्चितामेति ततः परं हि माम्'

इति पद्यस्य व्याख्यानं कुर्वता तीर्थेन प्रसङ्गात्प्राप्तमपि अस्मत्पदवाच्यं श्रीशिवमुपेक्ष्य मां श्रियमेतीति व्याख्यातं तच्च भोजनकाले सैन्धवमानयेति कथनेऽश्वानयनवत्प्रतिभाति। अत्रिसमक्षं

मूर्तित्रयेण प्रत्यक्षीभूय भगवता स्पष्टतयोक्तं 'यद्वै ध्यायति ते वय'मिति । यदेकं जगदीश्वराख्यं तत्त्वं भवान् ध्यायति ते वयं त्रयोऽपि तदेकं तत्त्वं नास्माकं भेदोऽस्तीति तैर्विस्मृतं किम् ? कीदृशं साम्प्रदायिकं रूढवादिनां विदुषामन्तःकरणं भवतीति सुधियः स्वयमेव विभावयन्तु । आचार्यश्रीवंशीधरशर्मणाऽस्योपरि टिप्पणीं कुर्वता स्पष्टमेव लिखितम्—अत्र तीर्थेन यदुक्तं तदसार्वत्रिकत्वादचारुवत् भातीति ।

अस्तु प्रकृतपुराणोपरि पूर्वाचार्यैर्महत्त्वपूर्णा बह्व्यो व्याख्याः कृतास्ताः सर्वा अपि दुरूहा गम्भीराः क्लिष्टतमाश्चेति साधारणतया न सर्वेषां बोधगम्या इति विचार्य अस्माभिर्गुरुपरम्परा-सरणिमनुसृत्य प्रौढ्यासमग्रमेतत्पुराणं गुरुमुखादधीत्य अध्यापयित्वा च भगवत्प्रेरणया सर्व-साधारणाय '**गूढार्थदीपिनी**' व्याख्या कृता सरलपद्धत्या । अस्या आश्रयणेन गम्भीरमप्येतत्पुराणं करामलकवत् भविष्यतीति मे दृढो विश्वासः । अत्रत्यानां गूढग्रन्थीनामपि स्फुटीकरणाय सप्रमाणं साधिकारः सन्तोषजनकः प्रयासः कृत इति ।

अस्य व्याख्याने सर्वप्रथमं स्वरचितपद्येन अध्यायसारांशः स्पष्टीकृतः । गूढार्थदीपिनी श्लोकस्थक्लिष्टपदानां टिप्पणी सर्वत्रैव विहिता । तथा च क्लिष्टपद्यानां विशेष्यविशेषणपुरःसरं खण्डान्वयरीत्या सरलतमव्याख्या कृता । कतिपयप्रयोगाणां संदेहनिराकरणाय व्याकरणरीत्या साधुत्वम् । केषाञ्चित्सन्दिग्धशब्दानां याथातथ्येन सुस्पष्टार्थावगमाय मेदिन्यादिकोषाणां प्रमाणत्वेनोपन्यासः । पूर्वापरग्रन्थे प्रकरणवशादागतितस्य विरोधस्य परिहारः । गुरुपरम्परागत मूलपाठस्य श्रीधरीयटीकानुसारेण संशोधनम् । सर्वसाधारणानां स्पष्टप्रतिपत्तये प्रायः सन्धयोऽत्र न कृताः । यत्र कुत्रचिदागतानां पुनरुक्तीनामपि युक्तयुक्त्या समाधानम् । महता परिश्रमेण सूक्ष्मेक्षिकया संशोधने कृतेऽपि दृष्टिभ्रमात्प्रूफसम्बन्धिन्योऽशुद्धयो जाता एवेति 'गुणगृह्या वचने विपश्चितः' इति वचनात् ताः सर्वा अपि विद्वद्भिः संशोधनीयाः सोढव्याश्च । कतिपय-गुरुपरम्परागतचित्राणामपि अत्र यथास्थानं सन्निवेशः कृतः ।

मुद्रणकार्यस्यापि सौष्ठवात् चित्ताकर्षकत्वाच्च भगवत्प्रतिमास्थानीयं सर्वाङ्गसुन्दरमेतत् शुद्धसंस्करणं सर्वैरपि संस्कृतानुरागिभिर्विद्वद्भिश्छात्रैश्च श्रद्धयाऽभिनन्दनीयमादरणीयं चेति ।

अन्ते सर्वैरेवानुक्षणमिदमनुचिन्तनीयं यन्मानुषं जन्म दुर्लभं नश्वरं च भगवत्कृपयै-वेतल्लब्धं न स्वपुरुषार्थबलेनेति । किमर्थमेतत् विषयभोगार्थं भगवत्प्राप्त्यर्थं वा । नाद्यः पूर्वपक्षः शूकरादिनिकृष्टयोनिष्वपि तत्संभवात् । उत्तरपक्ष एव साधीयान् सर्वसम्मतश्च । तत्र भगवत्प्राप्त्युपायाः शास्त्रेषु बहुधा वर्णिताः सन्ति किन्तु ते सर्वेऽपि मलिनान्तःकरणानां दुष्करा दुःसाध्याश्चेति सरलोपायस्तु भक्तिरेव । 'भक्त्या कृष्णः पुरःस्थितः' 'भक्त्या मामभिजानाति' गीतोक्तेश्च । सा च भक्तिः श्रीशुकेन भागवते स्थापिता । अतो भक्तिः भागवतस्य सेवनाद-नायासेन हृद्गता भवतीति निर्विवादम् ।

किञ्च निषेकादारभ्य मृत्युपर्यन्तास्तनोर्नवावस्था वर्णितास्तत्र जरावस्था तु मृत्युसन्नि-हितत्वेन प्रायश्चित्तावस्था कथ्यते । अस्यां तु 'गृहीत इव केशेषु मृत्युना धर्ममाचरेत्' इति वचनात् सततं धर्मानुष्ठानमेव कर्तव्यम् । परोद्वेजकं कर्म नाचरणीयम् । क्वचिदपि कस्य-चिदनिष्टं न चिन्तनीयम् । ज्ञाताज्ञातानां सर्वविधपापानां स्मारं स्मारं प्रायश्चित्तं विधातव्यम् ।

पूर्वावस्थायां यैर्यैर्मानवैः सह शत्रुबुद्ध्या संघर्षः कृतः। अपमानजनिता तेषां कृते कटुतमशब्दावलिः प्रयुक्ता। अभियोगादिना च ये ये दण्डभाजः कृताः तेषां सर्वेषां समक्षं गत्वा सानुनयं सन्धिप्रस्तावं पुरस्कृत्य क्षमायाचनपूर्वकं तेषां प्रसन्नता सम्पादनीया। पुराणोक्तदिशाऽयं प्रायश्चित्तविधिरनुसरणीयः। अत्र विषये लज्जा संकोचश्च न कार्यः। अन्यथा प्रायश्चित्ताकरणे 'मूर्खे वा पण्डिते वापि समवर्ती यमः स्मृतः' इति ब्रह्माण्डोक्तेः विद्वांसोऽपि यथाकर्मदोषं दण्डभाजो भविष्यन्तीति नात्र संदेहः। 'ध्रुवं स वै प्रेत्यनरकानुपैति' इत्युक्तेः। प्रायश्चित्तेप्सुभिः प्रतिदिनं सन्ध्यावन्दन'पूर्वकं श्रीमद्भागवतस्यैकाध्यायपाठस्तु अवश्यमेव कर्तव्यः सर्वविधपापप्रायश्चित्तपूर्वकं भगवत्प्रीतये इति सङ्कल्प्य।

अस्य पुराणस्य प्रतिवर्षं धर्मानुरागिभिः सप्ताहरूपेण कथा प्रवर्त्यते श्रूयते च। स्वकीयं जीवनं च सफलीक्रियते। ज्ञाताज्ञातसर्वविधपापानां प्रायश्चित्तं क्रियते। यत्र क्वापि निकृष्टयोनौ पतितानां पितॄणामासप्तमकुलमुद्धारश्च क्रियत इति सर्वं शोभनमेव। किन्तु सप्ताहवाचकानां कृतेऽस्मद्गुरुचरणैः परम्परागतं यन्निगदितं पद्यद्वयं तदवधानपूर्वकं श्रुत्वा सश्रद्धमाचरणीयम्। भक्तैर्भागवतोपरि तन्निमित्तीकृत्य यत्किमपि द्रव्यजातं समर्प्यते तत्सर्वं भगवद्द्रव्यं भवतीत्यस्य सर्वांशेनोपभोगो न कर्तव्योऽन्यथा दुर्गतिरवश्यंभाविनीत्येतदस्मत्कृतसाप्ताहिककथाया भूमिकायां द्रष्टव्यम्। वृन्दावनीया सत्यघटनेयम्। अत्र विषये पद्यद्वयं प्रमाणत्वेनोपन्यस्यते तद्यथा--

भक्तैः समर्पितं द्रव्यं श्रीमद्भागवतोपरि।
तद्द्रव्यं भगवद्द्रव्यं सर्वभुक् दुर्गतिं व्रजेत्॥

तस्य विनियोगश्चेत्थं कार्यः

एको भागो गुरूणां स्यात् द्वितीयस्त्वतिथेः कृतः।
तृतीयो देवपूजार्थं चतुर्थेन स्वपोषणम्॥

प्रभूतद्रव्ये तु अन्नसत्रे विद्यालये अतिथिभवने भारतीयवेषस्थकर्मनिष्ठच्छात्राणां वृत्तिदाने वापीकूपतडागादौ च एतद्धनविनियोगकरणमनन्तफलदं भवति प्रच्छन्नपापानामपि समूलमुन्मूलनं भवति। कर्मदोषवशान्निकृष्टयोनौ पतितानां यातनामनुभवतां समस्तपितॄणामुद्धारश्च भवति। भगवत्कृपया ते सर्वेऽपि वैकुण्ठलोकं प्राप्य दिव्यसुखमनुभवन्तः शाश्वतीं शान्तिं लभन्ते।

अन्ते पुनरपि भागवतमहत्त्वं स्मारयन् मङ्गलमयं भगवन्नाम चिन्तयन् मान्यान् सभाजयन् बुधजनान् हर्षयन् जिज्ञासूनाकर्षयन् भक्तजनान् सन्तोषयन् गुरूजनानभिवादयन्— स्वीयं वक्तव्यं च समापयन् विरमति।

राममूर्तिशास्त्री पौराणिकः

श्रीमङ्गलमूर्तये नमः

माहात्म्यसहित--श्रीमद्भागवतस्य विषयानुक्रमणिका

अध्याये—विषयाः

१. श्रीमद्भागवतस्य महत्त्ववर्णनपूर्वकं नारदस्य सनकाद्यैः समागमः तथा नारदद्वारा भक्तेस्तत्पुत्रयोर्ज्ञानवैराग्ययोश्च वृत्तान्तवर्णनम् ।

२ भक्तेर्महत्त्वं प्रदर्श्य ज्ञानवैराग्ययोर्जागरणार्थमाकाशवाण्या सत्कर्मणो निर्देशः । सनकादिद्वारा तद्व्याख्या श्रीमद्भागवतालापः ।

३. गङ्गाद्वारसमीपे सनकादिद्वारा सप्ताहकथारम्भः, कथाश्रवणवर्जितानां कटुशब्दैर्घोरनिन्दा, सर्वसाधनेभ्यः सप्ताहस्य महत्त्ववर्णनम् । कथास्थले ज्ञानवैराग्याभ्यां सह भक्तेः प्रादुर्भावः ।

४. कथासमाप्तौ भगवतोऽपि प्रादुर्भावः समन्ततो जयजयारावः, चूर्णलाजाप्रसूनानां विपुला वृष्टिः, । आत्मदेवचरितम् तत्र धुन्धुकारिणो गोकर्णस्य च जन्म । गोकर्णोपदेशात् पितुर्वनगमनं तत्र भागवतदशमस्कन्धपाठात् तन्मुक्तिश्च ।

५. धुन्धुकारिणो दुराचारात् वेश्याभिः क्रूरतापूर्वकं वधः, तद्दोषात्तस्य महाप्रेतत्वप्राप्तिः गोकर्णद्वारा सप्ताहकथातस्तदुद्धारश्च ।

६. श्रीमद्भागवतसप्ताहश्रवणविधिः, सप्ताहश्रोतॄणां नानाविधनियमोपनियमानां वर्णनम् । अन्ते च सूतशौनकसंवादेन श्रीमद्भागवतमहत्त्ववर्णनपूर्वकं माहात्म्यसमाप्तिः ।

प्रथम-स्कन्धे

अध्याये—विषयाः

१. आरम्भे मङ्गलाचरणं श्रीमद्भागवतस्य श्रेष्ठत्वं नैमिषारण्ये शौनकादीनां सूतं प्रति षट् प्रश्नाश्च ।

२. सूतोक्तिः, चतुर्णां प्रश्नानामुत्तरम् । भगवत्कथोपदिष्टश्रवणकीर्तनयोर्मोक्षप्रदत्वं सर्वापेक्षया भक्तेर्महत्त्वं च ।

३. शेषप्रश्नद्वयस्योत्तरम् नामकर्मनिर्देशपूर्वकं भगवतश्चतुर्विंशत्यवताराणां संक्षेपतो वर्णनम् ।

४. वक्तुः श्रोतुश्च महत्त्ववर्णनपूर्वकं व्यासस्यापरितोषे सति तदाश्रमे नारदस्यागमनम् ।

५. नारदव्याससंवादे भगवच्चरितस्य सोपपत्तिकं महत्त्ववर्णनं नारदद्वारा स्वकीयपूर्वजन्मवृत्तान्तकथनं च ।

६. सर्पदंशात् नारदस्य मातुर्मरणं साधनद्वारा हृदि भगवत्स्फूर्तिः देहत्यागपूर्वकं ब्रह्मणः सकाशात् पुनर्जन्मग्रहणम् ।

७. नारदोपदेशेन व्यासद्वारा श्रीमद्भागवतरचना परीक्षिजन्मप्रस्तावे अश्वत्थाम्ना द्रौपदीपुत्राणां वधः अर्जुनद्वारा तन्निग्रहश्च ।

८. उत्तरागर्भे ब्रह्मास्त्रतः परीक्षिद्रक्षणं, कुन्तीद्वारा श्रीकृष्णस्तुतिः युधिष्ठिरस्य हृदि महाननुतापश्च ।

अध्याये—विषयाः

९. युधिष्ठिरादीनां रणभूमौ भीष्मसमीपे गमनं तत्र विविधधर्मानुपदिश्य श्रीकृष्णस्तवनपूर्वकं भीष्मस्य ब्रह्मणि लयश्च ।

१०. युधिष्ठिरं राज्ये संस्थाप्य श्रीकृष्णस्य द्वारकागमनं मार्गे कुरुस्त्रीभिः महत्त्वपूर्णं तस्य स्तवश्च ।

११. श्रीकृष्णस्य द्वारकायां प्रवेशः तत्रत्यैः सोल्लासमभिनन्दनं ततः पत्नीनामन्तःपुरे तस्य प्रवेशश्च ।

१२. परीक्षिज्जन्मोत्सवः तत्र ज्योतिर्विद्भिः जन्माङ्गस्य भाविफलादेशवर्णनम् ।

१३. विदुरोक्त्या धृतराष्ट्रस्य गान्धार्या सह हिमालयगमनं तद्देहत्यागं श्रुत्वा युधिष्ठिरस्य शोकः नारदद्वारा तन्निवारणं च ।

१४. अपशकुनबाहुल्यदर्शनेन चिन्ताव्यग्रस्य युधिष्ठिरस्य समीपे द्वारकातोऽर्जुनस्यागमनं तद्विषये नानाविकल्पप्रश्नाश्च ।

१५. श्रीकृष्णमुद्दिश्य अर्जुनस्य नानाविधं विलापं यदुकुलस्य संहारं कृष्णतिरोधानं राष्ट्रे कलेराक्रमणं च श्रुत्वा पाण्डवानां हिमालये प्रस्थानम् ।

१६. परीक्षितो राज्याधिकारः दिग्विजये क्वचित् भूमिधर्मसंवादश्रवणम् तत्र तत्प्राप्तिश्च ।

१७. परीक्षिद्धर्मसंवादः कलेर्निग्रहः राष्ट्रात्तस्य निष्कासनादेशः, निवासाय कतिपयस्थानदानम् ।

१८. मृगयां गतस्य राज्ञः शमीकाश्रमे गमनं तत्र समाधिस्थस्य मुनेर्गले मृतसर्पं निधाय स्वपुरागमनम् । श्रुत्वा दृष्ट्वा च तत्कुमारः शृङ्गी राजानं शशाप ।

१९. आमरणानशनं सङ्कल्प्य राज्ञो गङ्गातटे निवासः, तत्र ऋषीणां श्रीशुकस्य चागमनं म्रियमाण पुरुषस्य कर्तव्याकर्तव्यविषये राज्ञः प्रश्नाश्च ।

द्वितीय—स्कन्धे

अध्याये—विषयाः

१. राज्ञः प्रश्नोत्तरे अष्टाङ्गयोगमाश्रित्य धारणाध्यानप्रसंगे भगवतो विराड्रूपे मनोधारणावर्णनम् ।

२. धारणाविदः पुंसोऽन्तर्हृदये भगवतः सूक्ष्मरूपं ध्यानविषयीकृत्य सद्योमुक्तिक्रममुक्तिद्वारा सुगमतया प्राणोत्क्रमणप्रकारस्य वर्णनम् ।

३. विविधकामनासिद्धये पृथक् पृथक् देवोपासनावर्णनं किन्तु भगवत्सेवानुरक्तानामिन्द्रियाणां प्रशंसनं तद्विमुखानां निन्दनं च ।

४. सूतोक्तिः । राज्ञः सृष्टिविषयकप्रश्ने ब्रह्मनारदसंवादोपक्रमः मङ्गलाचरणपूर्वकमुत्तरदाने शुकद्वारा कथारम्भश्च ।

५. तपश्चरतो ब्रह्मणः समीपे नारदगमनं तत्सम्बन्धी प्रश्नः । ब्रह्मद्वारा तत्त्वोत्पत्तेः ब्रह्माण्डनिर्माणस्य वर्णनं च ।

६. पुरुषसूक्तेन भगवतो विराट्पुरुषस्य वैभववर्णने तस्य सर्वात्मकत्वं दृढीकृतम् ।

७. वराहादारभ्य श्रीकृष्णपर्यन्तं नानावताराणां नामनिर्देशपूर्वकं तच्चरित्रवर्णनं नानाविभूतीनां देवमायाविदां कतिपयभक्तानां च नामोल्लेखश्च ।

अध्याये विषया:—

८. जीवेशयोर्देहसम्बन्धमाक्षिपता राज्ञा पुराणसम्बन्धिनो नानाविषयकाः प्रश्नाः।

९. शुकोक्तिः, ब्रह्मणे वैकुण्ठलोकस्य दर्शनम्, तत्र भगवता सृष्ट्यादिसामर्थ्यं तद्बन्धनिवृत्त्यर्थं च चतुःश्लोकीभागवतोपदेशः।

१०. महापुराणस्य दशलक्षणनि विराट्पुरुषविग्रहे इन्द्रियतदधिष्ठातृदेवानामाविर्भावः। विदुरमैत्रेयसंवादोपक्रमश्च । टीकाश्लोके तृतीयतो इति कार्यम्।

तृतीय-स्कन्धे

अध्याये—विषयाः

१. धृतराष्ट्रं परित्यज्य तीर्थाटनं कुर्वतो विदुरस्य यमुनातटे उद्धवेन समागमः बन्धूनां कुशलप्रश्नश्च ।

२. श्रीकृष्णवियोगार्दितेनोद्धवेन भगवन्मूर्तेः सौन्दर्यातिशयद्योतनपूर्वकं तस्य बाललीलावर्णनम् ।

३. मथुराद्वारकासम्बन्धिलीलानां संक्षेपतो वर्णनं विवाहादिचरितं यदूनां प्रभासक्षेत्रे प्रस्थानम् ।

४. यदुकुलसंहारवर्णनम्, उद्धवायोपदिष्टज्ञानस्य प्राप्तये भगवत्संकेतेन विदुरस्य गंगातटे मैत्रेय-समीपे गमनम् ।

५. विदुरप्रश्नानुसारेण मैत्रेयद्वारा सृष्टिक्रमः महदादितत्त्वानामुत्पत्तिः तैर्हरेःस्तुतिश्च ।

६. चिच्छक्तिप्रवेशाज्जडतत्त्वानामपि सृष्टिकर्तृत्वसामर्थ्यं तैः विराड्देहोत्पत्तिः तत्राध्यात्मादविभागश्च।

७. निर्गुणस्य भगवतः स्वतस्तृप्तस्य सदान्यतः निवृत्तस्य कथं गुणक्रियादिसम्बन्धः कथं वा चिक्रीडिषेति प्रश्नस्य प्रौढ्या समाधानं पुनरपि विदुरस्य विविधाः प्रश्नाश्च ।

८. शेषसनकादिसंवादः विष्णोर्नाभिकमलाद् ब्रह्मोत्पत्तिः स च तमन्विष्यापि यदा नापश्यत्तदा समाधि-द्वारा तस्य हृदि भगवत्साक्षात्कारः ।

९. ब्रह्मद्वारा भगवत्स्तुतिः सृष्टिकर्तृत्वरूपसायथ्र्यंप्रदानं च ।

१०. काललक्षणवर्णनपूर्वकं प्राकृतादिभेदेन दशविधसर्गवर्णनम् ।

११. परमाण्वादिद्विपरार्द्धपर्यन्तं महाकालस्वरूपम् । तेनैव वर्षकल्पादे मानवर्णनं मनुष्यदेवादीनामायुषो वर्णनं च।

१२ सनकादिरुद्रमरीच्यादिसरस्वतिवेदादीनामुत्पत्तिवर्णनपूर्वकं शतरूपायाः मनोश्च जन्म ततो मिथुनसृष्टेः सर्गवृद्धिः ।

१३. ब्रह्मणो नासाविवरादाविर्भूतवराहद्वारा पृथिव्या उद्धारः । ऋषिभिः कृता भगवतः स्तुतिः ।

१४. दितिकश्यपयोर्मिथः संवादः । आग्रहवशात् सायं पत्न्यां गर्भस्थापनम् ।

१५. वैकुण्ठवर्णनं तत्र गतानां सनकादीनां मार्गावरोधात् जयविजययोः शापः भगवतो दर्शनं च :

१६. ब्राह्मणमहत्त्ववर्णनपूर्वकं भगवत्कृतं सनकादीनां सान्त्वनम् शापानुमोदनं पार्षदयोरधःपतनं च ।

१७. हिरण्यकशिपुहिरण्याक्षयो जन्मकाले महोत्पाताः हिरण्याक्षदिग्विजयः योद्धुं तस्य वरुणसमीपे गमनं च ।

अध्याये—विषयाः

चतुर्थ-स्कन्धे

अध्याये—विषयाः

अध्याये—विषयाः

४. सत्याः स्वेच्छयैव यज्ञे गमनं तत्र शिवभागादर्शनादपमानाच्च दक्षं निर्भर्त्स्य योगद्वारा शरीरत्यागश्च ।

५. नारदात् सत्या देहत्यागमाकर्ण्य शिवेन रुषा वीरभद्रमुत्पाद्य तद्वारा यज्ञविध्वंसो दक्ष वधश्च कारितः ।

६. ब्रह्मणा सह देवानां कैलासगमनम् तच्छोभावर्णनम्, नन्दालकनन्दयोर्महत्त्वम् ब्रह्मद्वारा शिवस्तुतिः यज्ञपूर्तये प्रार्थना च,

७. शिवस्य वरप्रदानम् दक्षाय जीवनदानम् यज्ञे विष्णोः प्रादुर्भावः, दक्षादिभिः सर्वैः पृथक्-पृथक् पद्यैः विष्णुस्तुतिश्च ।

८. प्रतिसर्गवर्णने ध्रुवचरितारम्भः । तत्र सुरुचेर्वाग्बाणैर्विद्धस्य ध्रुवस्य वृन्दावनगमनम्, तत्र नारदो-पदेशेन कठोरतपस्या च ।

९. ध्रुवस्य भगवत्साक्षात्कारः स्तुतिः वरप्राप्तिः पुर्यां प्रत्यागमनं राज्याभिषेकश्च ।

१०. ध्रुवस्य भ्रमिपत्न्या सह विवाहः कल्पवत्सरौ पुत्रौ । अन्यस्यामुत्कलनामा पुत्रः स्वभ्रातुरुत्तमस्य यक्षकृतं वधं श्रुत्वा कुपितस्य ध्रुवस्य यक्षैः सह भीषणसंग्रामः, यक्षाणां वधः । पुनस्तैर्माया प्रयोगश्च । मुनिभिः शुभाशंसनम् ।

११. स्वायंभुवमनुना आगत्य सामोपदेशेन ध्रुवस्य सान्त्वनाप्रदानम्, युद्धविरामश्च ।

१२. यक्षवधान्निवृत्ताय ध्रुवाय कुबेरस्य वरप्रदानम्, बदरिकाश्रमे तस्य तपश्चरणम्, पार्षदानीतं विमान-मारुह्य ध्रुवलोकगमनम् ।

१३. ध्रुवस्य वंशः, तत्रोत्पन्नस्याङ्गस्य राज्ञः स्वपुत्रवेनस्य दुराचारेण राज्यं त्यक्त्वा वनाय गमनम् ।

१४. अराजकभयात् पितृराज्येऽभिषिक्तस्य वेनस्य नास्तिकत्वात् ऋषिभिः हुङ्कारेणैव तस्य वधः, तदूरुमथनात् निषादोत्पत्तिश्च ।

१५. पुनश्च मथ्यमानाभ्यां वेनभुजाभ्यां मिथुनोत्पत्तिः पृथुः अर्चिश्च उभयो विवाहः, पृथो राज्याभिषेकश्च ।

१६. मुनिभिः प्रेरितैः सूतमागधवन्दिभिः भाविचरित्रप्रकाशनपूर्वकं श्रीपृथोः स्तवनम् ।

१७. क्षुत्पीडितप्रजानां प्राणरक्षणार्थमन्नं दातुं ग्रस्तबीजां पृथ्वीं हन्तुमुद्यतस्य पृथोस्तया प्रार्थनापूर्वकं स्तवनम् ।

१८. पृथ्वीवचनात् पृथोरारम्य सर्वैरेव तत्तज्जातिषु प्रधानं वत्सं तथा पात्रादीन् कल्पयित्वा पृथ्वीदोहनं-कृतमीष्टसिद्धिश्च प्राप्ता ।

१९. स्वकीयेऽश्वमेधयज्ञे पाखण्डवेषं विधाय अश्वहर्तारमिन्द्रं हन्तुं प्रवृत्तस्य पृथोर्ब्रह्मणा आगत्य निवारणं यज्ञान्निवृत्तिश्च ।

२०. यज्ञे विष्णो प्रादुर्भावः पृथोः शिक्षणं वरप्रदानं च द्वयोः परस्परं सन्धिश्च कारितः ।

२१. महासत्रसभायां विष्णुर्भक्तिं पुरस्कृत्य प्रजायै पृथो धर्मोपदेशः ।

२२. पृथो राज्यभवने सनकादीनामागमनम् । सिंहासनासीन् तान् विधिवत् संपूज्य भवेऽस्मिन् क्षेमः केनाञ्जसा भवेदिति पृथुप्रश्ने सनत्कुमारेण विविधसाधनैः सह अङ्गाङ्गिभावेन मुख्यविधया पराभक्तेरेव साधनत्वं दृढीकृतम् ।

अध्याये—विषयाः

२३. पृथोर्वनगमनं तत्र वानप्रस्थाश्रमे तपश्चर्यापूर्वकं योगधारणया त्यक्तदेहस्य पृथोश्रितायां दग्धतनोः पत्न्याश्च सहैव विष्णुलोकगमनम् ।

२४. पृथोर्वंशः, पृथोः पौत्रपुत्रात् प्राचीनबर्हिषः तुल्यनामव्रता दश प्रचेतसौ जाताः तेषां रुद्रेण समागमः तत्कृतो रुद्रगीतोपदेशश्च ।

२५. प्राचीनबर्हिषो नारदेन संवादः कूटकथाप्रसङ्गेन पुरञ्जनोपाख्यानारम्भः ।

२६. मृगयार्थं पुरञ्जनस्य वनगमनम् तत्पत्न्याः प्रणयकोपः अनुनयविनयादिना तस्याः सान्त्वनाप्रदानम् ।

२७. पुरञ्जनस्य राजधान्यां चण्डवेगस्याक्रमणम्, कालकन्याचरितम्, तस्या उत्पाताश्च ।

२८ पुरञ्जनस्य पुरध्वंसे चिन्ताकुलत्वं भयादिना विविधयातनाभोगः स्त्रीसंगात् जन्मान्तरे स्त्रीत्वापत्तिः । अविज्ञातनाम्नः सख्युरुपदेशान्मुक्तिश्च ।

२९. पुरञ्जनोपाख्यानस्य आध्यात्मिकत्वे तात्पर्यम् । नारदोपदेशात् प्राचीनबर्हिणो मुक्तिश्च ।

३०. जलमध्ये तपः कुर्वतां दशप्रचेतसां विष्णुदर्शनं वरप्राप्तिः वृक्षपालितया वार्क्ष्या मारिषाकन्यया सह विवाहः तेभ्यः सकाशात् दक्षोत्पत्तिः ।

३१. दक्षे राज्यभारं न्यस्य प्रचेतसां वनगमनम्, तत्र नारदोपदेशात् तेषां मुक्तिश्च ।

पञ्चम-स्कन्धे

अध्याये—विषयाः

१. मनुपुत्रस्य प्रियव्रतस्य चरितम् राज्यं परित्यज्य मन्दरद्रोण्यां नारदात् ज्ञानमाप्नुवन् प्रियव्रतो ब्रह्मणा राज्ये नियुक्तः ।

२. प्रियव्रतपुत्रस्य आग्नीध्रस्य चरितम्, तस्य पूर्वचित्त्यामप्सरसि नाभिकिंपुरुषादिनवपुत्रोत्पत्तिः ।

३. आग्नीध्रपुत्रस्य नाभेश्चरितम् । पुत्रार्थं यज्ञं कुर्वतो नाभेः श्रद्धया प्रसन्नो दत्तवरश्च भगवान् तस्य मेरुदेव्यां भार्यायामृषभदेवरूपेणावतीर्णः ।

४. राज्येऽभिषिक्तस्य ऋषभस्य इन्द्रदत्तायां जयन्त्यां पत्न्यां शतपुत्रोत्पत्तिः तेषां ज्येष्ठो भरतः यन्नाम्ना भारतं व्यपदिशन्ति ।

५. ऋषभस्य ब्रह्मर्षिसभायां ज्ञानोपदेशः स्वयमवधूतवेषेण एकाकी परिभ्रमन् आजगरं व्रतमाश्रितः सन् शयान एवाश्नाति पिबति स्वयमागताः सिद्धीरपि नाभ्यनन्दत् ।

६. एवमृषभस्य देहः यदृच्छया विचरन् दक्षिणकर्णाटकान् देशान् प्राप्तः कुटकाचलोपवने अग्निना सह वनं दहन् निरिन्धनाग्निरिव स्वयमदृश्योऽभूत् ।

७. भरतस्य राज्याभिषेकः पञ्चजन्या सह विवाहः पञ्चपुत्रोत्पत्तिः पुत्रेषु राज्यं समर्प्य गण्डकीतटे तपसा गायत्रीमन्त्रेण सूर्योपासना ।

८. भरतस्य मृगशावके तीव्रासक्त्या मृगयोनौ जन्म, शालग्रामतीर्थे गण्डकीजलमध्ये शरीरत्यागश्च ।

९. भरतस्य ब्राह्मणकुले जन्म, तत्र जडवदाचरणं कुर्वन् धान्यक्षेत्राणि रक्षन् स बलिदानार्थं पुरोहितेनानीतः भद्रकाल्या तद्रक्षणं च ।

अध्याये—विषयाः

१०. कदाचित् शिविकावाहने नियुक्तस्य भरतस्याध्यात्मग्रथितं वचो निशम्य ब्रह्मज्ञानिनं मत्वाऽपराध-भीतस्य पादयोः पतितस्य रहूगणस्य क्षमायाचनम् ।

११. रहूगणं प्रति जडभरतस्य ज्ञानोपदेशः संसारमिथ्यात्ववर्णने मनोवृत्तीनां वर्णनम्, तन्निग्रहश्च ।

१२. रहूगणप्रश्नानामुत्तरं स्वकीयपूर्वजन्मवृत्तान्तकथनं सत्संगमहिमा च ।

१३. भवाटवीवर्णनम् । रहूगणसन्देहनिवारणम् ।

१४. भवाटवीरूपकस्य स्पष्टतया व्याख्यानम् ।

१५. भरतवंशे राज्ञो गयस्य महत्त्ववर्णनम् ।

१६. भूगोलवर्णने द्वीपवर्षादिमानलक्षणपूर्वकं सुमेरौ लोकपालानामष्टपुरीणां वर्णनं च ।

१७. मेरोश्चतुर्दिशं गङ्गावतरणम् । इलावृतखण्डे च रुद्रद्वारा संकर्षणंस्तवनम् ।

१८. भद्राश्वादिषु षट्सु वर्षेषु पृथक्-पृथक् स्वेष्टदेवानामाराधनम् ।

१९. किंपुरुषे भारते च यथाक्रममुपास्योपासकत्ववर्णनम् । भारतस्य श्रेष्ठत्वम् । उपद्वीपवर्णनं च ।

२०. प्लक्षादिषड्द्वीपशैलादीनां स्थितिः लोकालोकपर्वतस्यान्तर्बहिर्मानादिवर्णनम् ।

२१. खगोलवर्णनप्रसंगे तत्तद्राशिषु भ्रमतो रवेर्मन्दादिभेदेन तन्मानस्य गतेश्च वर्णनम् ।

२२. चन्द्रशुक्रादिग्रहाणामुत्तरोत्तरं स्थानस्य गतेश्च इष्टानिष्टफलानां च वर्णनम् ।

२३. नक्षत्रमण्डलाश्रयीभूतस्य शिशुमारचक्रस्य वर्णनम् ।

२४. रवेरधस्तात् राह्वादीनां स्थितिस्तथा भूगर्भे अतलादिसप्तविलस्वर्गाणां वर्णनम् ।

२५. पातालादधस्तात् भगवतः शेषस्य स्थितिः यतो रुद्रस्य प्रादुर्भावः शेषस्य महत्त्ववर्णनं च ।

२६. भुवोऽधस्तात् सलिलादूर्ध्वं विविधनरकाणां वर्णनम् । नास्तिकानां पापिनां च यथादेशं यमदूतै दंण्डविधानम् ।

षष्ठ—स्कन्धे

अध्याये—विषयाः

१. प्रायश्चित्तोपक्रमे, अजामिलोपाख्यानम् विष्णुदूतयमदूतयोः संवादश्च ।

२. विष्णुदूतद्वारा नाममाहात्म्यवर्णनपूर्वकं भागवतधर्मनिरूपणम् । याम्यपाशान्मुक्तस्याजामिलस्य योगसाधनया विमानद्वारा विष्णुलोकगमनम् ।

३. यमराजयमदूतसंवादे वैष्णवोत्कर्षवर्णनपूर्वकं नामगर्भितधर्मस्य तात्त्विकरूपम् ।

४. प्रचेतसो दक्षोत्पत्तिः सृष्टिवृद्ध्यर्थं तस्य हंसगुह्यस्तोत्रेण भगवदाराधना भगवद्दर्शनं, वरं प्राप्य पञ्चजनकन्यया असिक्न्या सह दक्षस्य विवाहः ।

५. नारदस्य कूटवाक्योपदेशः हर्यश्वशबलाश्वसंज्ञकदक्षपुत्राणां संसाराद्विरक्तिः । नारदाय दक्षस्य शापश्च ।

६. दक्षस्य षष्टिकन्यानां पृथक्-पृथक् वंशवर्णनम् । यत्रादितिसुतात् त्वष्टुः सन्निवेशः विश्वरूपश्चेति पुत्रद्वयोत्पत्तिः ।

अध्याये—विषयाः

७. इन्द्रद्वारा गुरोरवज्ञया देवानां पराभवः। ब्रह्मणो मन्त्रात् पौरोहित्ये विश्वरूपस्य वरणं च।

८. विश्वरूपद्वारा इन्द्राय नारायणकवचोपदेशः तत्प्रभावात् शत्रून् जित्वा त्रैलोक्यलक्ष्मीप्राप्तिः।

९. यज्ञे विश्वरूपस्य वधः, वृत्रासुरस्योत्पत्तिः तद्भयात् देवकृता विष्णुस्तुतिः वरप्राप्तिश्च।

१०. देवानां दधीचेः सकाशात्तदस्थियाचनं ततो वज्रनिर्माणं दानवैः सह देवानां युद्धं च।

११. संग्रामे इन्द्रमुद्दिश्य वृत्रस्य भक्तिज्ञानवैराग्यसंवलितानां वीरोचितानां हृदयोद्गाराणां महत्त्वपूर्णवर्णनम्।

१२. वृत्रवचसा प्ररितस्य इन्द्रस्य तेन सह भीषणयुद्धं तत्र वज्रेण शिरश्छेदात् वृत्रस्य वधः।

१३. ब्रह्महत्याभयादिन्द्रस्य मानससरोवरे प्रवेशः, ततोऽश्वमेधेन पापमुक्तस्य तस्य पुनरिन्द्रपदावाप्तिः।

१४. वृत्रासुरस्य पूर्वजन्मवृत्तान्तमाश्रित्य चित्रकेतोरुपाख्यानम्। अङ्गिरःप्रसादेन प्राप्ते पुत्रे सपत्नीभिर्विषेण मारिते सति सस्त्रीकस्य चित्रकेतोरत्यन्तं शोको विलापश्च।

१५. साङ्गिरोनारदेन तत्त्वज्ञानोपदेशात् चित्रकेतोः शोकनिवारणम्।

१६. मृतपुत्रमाहूय तद्द्वारा राज्ञः प्रबोधकरणम्। नारदप्रदत्तसंकर्षणमन्त्रविद्याप्रभावात् चित्रकेतोर्विद्याधरत्वप्राप्तिः भगवतः शेषस्य दर्शनं च।

१७. कैलासे मुनिसमायामासीनस्य पार्वत्या सह भगवतः शिवस्य व्यङ्ग्यपूर्वकमुपहासकरणात् चित्रकेतोरसुरयोनौ जन्मप्राप्तिः।

१८. अदितेरवशिष्टवंशवर्णनम्। पुंसवनव्रतप्रभावात् दितेगर्भात् मरुद्गणोत्पत्तिः।

१९. साङ्गोपाङ्गं पुंसवनव्रतस्य विधिवर्णनम्।

सप्तम-स्कन्धे

अध्याये विषयाः

१. नारदयुधिष्ठिरसंवादे सनकादीनां भगवद्धाम्नि प्रवेशवारणात् जयविजययोः शापात् दैत्ययोनौ जन्मग्रहणम्।

२. प्रजापीडनार्थं हिरण्यकशिपोः स्वसैनिकेभ्य आदेशः। बालरूपयमोक्त्या दित्यादीनां शोकनिवारणम्।

३. हिरण्यकशिपोस्तपसा तोषिताद्विधेरनेकवराणां याचनम्।

४. वरं प्राप्य महेन्द्रपुर्यामधिकारः प्रह्लादजन्म तद्गुणानां वर्णनं च।

५. हिरण्यकशिपोः प्रह्लादेन सह संवादः तत्र मन्यते साधु किं भवान् इति दैत्य प्रश्ने विष्णुप्रशंसापूर्वकं हरिशरणागतिरित्युत्तरे तदवधार्थमुद्योगवैफल्यात् पुनस्तस्य गुरुकुले प्रेषणम्।

६. गुरोः परोक्षे पाठशालायां दैत्यबालकेभ्यः प्रह्लादस्य भक्तिज्ञानगर्भितो धार्मिकोपदेशः।

७. मातृगर्भस्थस्य प्रह्लादस्य देवर्षिनारदमुखान्महत्त्वपूर्णोपदेशश्रवणम्।

८. प्रह्लादवधार्थं स्तम्भताडनम्। ततो गर्जनापूर्वकं साटोपं नृसिंहस्य प्रादुर्भावः हिरण्यकशिपोर्वधः। ब्रह्मादिदेवैः पृथक्-पृथक् पद्यैः नृसिंहस्तुतिः।

९. भगवत; कोपशान्तये ब्रह्मणा प्रेरितस्य प्रह्लादस्य भक्तिज्ञानादिगर्भितो विस्तृतः स्तवः।

१०. प्रह्लादनृसिंह संवादः। प्रह्लादस्य राज्याभिषेकः। भगवतोऽन्तर्धानम्। रुद्रकृतं त्रिपुरदहनं च।

११. नृणां सनातनो धर्मः, वर्णधर्माः, स्त्रीधर्माः तथा तेषां वृत्तयश्च वर्णिताः ।

१२. ब्रह्मचर्यवानप्रस्थाश्रमयोर्धर्माः योगिनां देहत्यागे तत्त्वानां तत्तत्कारणेषु यथातथं लयक्रमश्च ।

१३. संन्यासधर्मवर्णनम् । प्रह्लादस्यावधूतेन सह संवादः । तत्र ज्ञानिनां परावस्थाया वर्णनम् ।

१४. गृहस्थस्य पुण्यकर्मणां संग्रहेणं वर्णनम् । देशकालादिभेदेन तेषां फलानन्त्यं च ।

१५. गृहस्थानां कृते मोक्षसम्बन्धिधर्माणां निरूपणम् । नारदस्य पूर्वजन्मवृत्तं च ।

सप्तमस्कन्धारम्भे टीकायास्तृतीयश्लोके 'वैषम्यं वारयन्' इति योजनीयम्

अष्टम-स्कन्धे विषयाः

अध्याये—

१. स्वायम्भुवादिमन्वन्तरचतुष्टयवर्णनम् । मनोस्तपसि विघ्नकारिणामसुराणां यज्ञावतारद्वारा वधः ।

२ गजेन्द्रोपाख्याने गजग्राहयुद्धवर्णनम् । गजेन्द्रस्य भगवच्छरणागतिः ।

३. गजेन्द्रद्वारा भगवत्स्तवः । गजस्य ग्राहात् ग्राहस्य शापाच्च विमोक्षणम् ।

४. गजग्राहयोः पूर्वजन्मचरिते शापकारणम् । द्वयोरुद्धारश्च ।

५. रैवतचाक्षुषमन्वन्तरवर्णनम् । चाक्षुषमन्वन्तरेऽजितावतारचरितम् । दुर्वाससः शापात् निःश्रीकैः देवैः सह ब्रह्मणा कृतं भगवतः स्तवनं च ।

६. भगवदादेशेन देवानामसुरैः सह सन्धिकरणम् अमृतप्राप्तये समुद्रमन्थनार्थमुद्योगः ।

७. समुद्रमन्थनारम्भः । मन्थनोद्भूतहालाहलविषभयेन भीतैः देवैः स्तुत्या प्रसादितस्य शिवस्य जगत्कल्याणार्थं विषपानम् ।

८. समुद्रात् चतुर्दशरत्नानामुत्पत्तिः । लक्ष्म्याः प्रादुर्भावः । तया भगवति वृते सति सुधाकलशं बिभ्रतो धन्वन्तरेराविर्भावः । दैत्यैर्बलादमृतकलशे गृहीते सति भगवतो मोहिनीरूपधारणम् ।

९. दैत्यवञ्चनपूर्वकं भगवता देवानाममृतपानम् । राहोः शिरश्छेदः । भगवतः पूर्वरूपधारणं च ।

१०. देवासुरसंग्रामः । तत्र मायार्दितानां देवानां मध्ये प्रकटीभूय भगवतां रक्षणं मायानिवारणं च ।

११. संग्रामे बलेस्तथा जम्भादिदैत्यानां विनाशः ब्रह्मणा प्रेषितस्य नारदस्य सान्त्वनावचनेन युद्ध-विरामः । शुक्रद्वारा बले संजीवनं च ।

१२. शिवस्य प्रार्थनया पुनः मोहिनीरूपधारणम् तस्या महत्त्वख्यापनार्थं शिवस्य मोहः ।

१३. अवशिष्टानां षड्विधानां भाविसप्तमन्वन्तराणा नामग्राहं यथाक्रममनुवर्णनम् ।

१४. मन्वादीनां षण्णां पृथक् पृथक् कर्मनिरूपणम् ।

१५. विश्वजित्संज्ञकयागेन बलेः स्वर्गाधिपत्यं गुरोर्मन्त्रोपदेशेन देवनां स्वर्गात् पलायनं च ।

१६. पुत्रदुःखेन शोचन्त्या अदितेः शोकनिवारणार्थं देवविजयार्थं च कश्यपद्वारा पयोव्रतोपदेशः ।

१७. व्रतसन्तुष्टस्य हरेः प्रादुर्भावः । अदित्यै वरदानम् । अदितिद्वारास्तुतिः । अदितिगर्भस्थभगवतोजसो ब्रह्मकृता स्तुतिश्च ।

१८. अदित्यां भगवतो वामनस्य प्रादुर्भावः। मुनिभिरुपनीतस्य तस्य बलेर्यज्ञशालायां गमनम्। तत्र सर्वैः समादृतः। यथेच्छमस्मत्तो गृहाणेति बलेः प्रार्थना च।

१९. बलिवामनसंवादः। पदत्रयपरिमितभूमियाचनम्। शुक्राचार्यद्वार तन्निषेधश्च।

२०. बलिना सङ्कल्पपूर्वकं पदत्रयपरिमितभूमिदानम्। भगवतो विराड्रूपप्रदर्शनं च।

२१. ब्रह्मणा विराण्मूर्तेर्भगवतः पादपूजनम्। युद्धात् दैत्यानां निवारणम्। गरुडद्वारा पाशैर्बलिबन्धनं च।

२२. देहसमर्पणात् भगवतस्तृतीपादस्य पूर्तिः। बलेः प्रशंसनं वरदानं च।

२३. प्रह्लादसहितस्य बलेः सुतललोकगमनम्। वामनस्योपेन्द्रपदेऽभिषेकश्च।

२४. मत्स्यावतारचरिते राजर्षेः सत्यव्रतस्य कथा। प्रलयदर्शनम्। भगवतो मत्यावतारस्य स्तवनम्।

अध्यायारम्भेऽयं टीकाया श्लोकः च्युतः सयोजनीयः

चतुर्विंशे महामत्स्यक्रीडनं वामनोपमम्।
मत्स्यः सत्यव्रतायाऽदान्मात्स्यं ज्ञानमनुत्तमम्॥

नवम–स्कन्धे विषयाः

अध्याये—

१. सूर्यवंशवर्णने वैवस्वतमनोः पुत्रस्य स्त्रीत्वप्राप्तिः पुनः शिवप्रसादात् मासपर्यायेणोभयविधरूपस्य प्राप्तिः।

२. प्रषध्र कवि-करूषधृष्टनृगनरिष्यन्तदिष्टानां यथातथं वंशवर्णनम् मरुत्तस्य महत्त्ववर्णनपूर्वकं तृणबिन्दोर्वंशे विशालादिभूपानां वर्णनम्।

३. मनुपुत्रशर्याते, सुकन्यायाश्च्यवनेन मुनिना सह विवाहः। वृद्धस्य तस्याश्विनीकुमारात् यौवनत्वस्य प्राप्तिः रैवतकन्याया उपाख्यानं च।

४. मनुपुत्रनभगचरित्रवर्णनेऽम्बरीषोपाख्यानम्। तत्र दुर्वाससः कृत्याप्रयोगे चक्रात्पलायनं भगवत्समीपे गमनं च।

५. भगवदादेशेन दुर्वाससोऽम्बरीषसमीपे गमनम्। अम्बरीषद्वारा चक्रस्तुत्या मुनेस्तायनिवृत्तिः। अम्बरीषस्य भगवल्लोक प्राप्तिश्च।

६. अम्बरीषवंशवर्णनप्रसंगे इक्ष्वाकुवंशे राज्ञो मान्धातुश्चरितम् सौभरेरुपाख्यानं च।

७. मान्धातृवंशारम्भे त्रिशंकोरुपाख्यानम्। हरिश्चन्द्रचरिते तत्पुत्रस्य रोहितस्य चरितम्। विश्वामित्र द्वारा हरिश्चन्द्राय दिव्यज्ञान प्रदानम्।

८. रोहितवंशे राज्ञः सगरस्य चरितम्। तत्राश्वमेधीयाश्वस्येन्द्रद्वाराऽपहरणम्। सगरस्य षष्टिसहस्रपुत्रा अश्वान्वेषणे कपिलाक्षेपात् दग्धाः अंशुमता पौत्रेण कपिलस्तुतिः, अश्वानयनं च।

९. गङ्गानयनार्थं भगीरथस्य कठोरतपस्या भूतले गङ्गावतरणं। जलस्पर्शमात्रेण भस्मीभूतसगरपुत्राणामुद्धारः। राज्ञः सौदासस्य खट्वाङ्गस्य च चरितम्।

१०. भगवतः श्रीरामस्य परममङ्गलमयं चरितम् ।

११. श्रीरामस्य यज्ञारम्भः । लोकापवादात् सीतापरित्यागः । वाल्मीकेराश्रमे कुशलवयोर्जन्म । सीताया भूविवरे प्रवेशः । अयोध्यावासिभिः सह भगवतो रामस्य स्वलोकगमनम् ।

१२. रामपुत्रात् कुशादारभ्य सुमित्रान्तपर्यन्तानामिक्ष्वाकुवंशीयनृपाणां वंशवर्णनम् ।

१३. निमिवंशवर्णने यज्ञप्रसंगे गुरोः शापात्तस्य देहपरित्यागः देहमन्थनात् कुमारोत्पत्तिः । स च जनकः वैदेहः मिथिल इति नामभिः प्रसिद्धः एतद्वंशे सर्वेऽपि नृपा योगिनः गृहेऽपि जीवन्मुक्ता आसन् इत्यस्य वंशस्य वैशिष्ट्यं वर्णितम् ।

१४. सोमवंशवर्णने बुधस्योत्पत्तिः । तस्मात् मनुकन्यायामिलायां जातस्य पुरूरवस उपाख्यानम् । तत्रोर्वश्याऽप्सरसा सह तस्य विहारः । गन्धर्वसाहाय्येनाग्निस्थालीप्रभावात् तस्मादेव त्रेतारम्भे वेदत्रय्या प्रादुर्भावः ।

१५. उर्वशीगर्भात् षट् पुत्रा आसन् । एतद्वंशपरम्परायां गाधेः कन्यायाः सत्यवत्या ऋचीकेन सह विवाहः । अब्रह्मण्यक्षत्रियकुलविनाशे जामदग्न्यपरशुरामचरितं तत्र जमदग्नेः कामधेनुहरणात् सहस्रार्जुनवधश्च ।

१६. प्रायश्चित्तार्थं परशुरामस्य तीर्थयात्रातः आश्रमे प्रत्यावर्तनम् । रेणुकाचरितप्रसंगे सहस्रार्जुन पुत्रद्वारा जमदग्नेर्वधः । तद्दुःखपराभूतपरशुरामद्वारा क्षत्रियाणां संहारः विश्वामित्रवंशवर्णन च ।

१७. पुरूरवसः पुत्रस्य आयोर्वंशवर्णनप्रसंगे नहुषादिनृपाणां वंशवर्णनम् ।

१८. नहुषस्य यत्यादयः कृत्यन्ता षट्पुत्रा आसन् । यतिर्विरक्तः । पितुर्नहुषस्येन्द्राण्या धर्षणादजगरत्व-प्राप्तिः । ययातेर्नृपत्वे शर्मिष्ठादेवयानीचरितम् ।

१९. परिहासमुखेन देवयान्यै स्वचरितोपमं वस्तोपाख्यानं श्रावयित्वा ययातेर्वनगमनम् । तत्र भगवदा-राधनतस्तल्लोकप्राप्तिः ।

२०. पूरोर्वंशवर्णने दुष्यन्तशकुन्तलोपाख्यानम् । तत्पुत्रभरतस्य चरितम् । भरद्वाजोत्पत्तिश्च ।

२१. भरतवंशवर्णने रन्तिदेवोपाख्यानम् । मुद्गलात् मिथुनोत्पत्तिः । तत्र दिवोदासः पुमान् ।अहल्या कन्या चाभवत् । शरद्वतोऽपि मिथुनमभूत् । तत्र कुमारः कृपः । कन्या कृपी च सा द्रोणपत्न्यभवत् ।

२२. दिवोदासादिनृपाणां वंशवर्णनम् । तत्र शन्तनुप्रभृतीनाम् ऋक्षवंशे पाण्डवादीनामुत्पत्तिश्च ।

२३. अनुद्रुह्युतुर्वसुयदूनां वंशवर्णनम् । शशबिन्दोस्तथा ज्यामघस्य राज्ञो वर्णनं च ।

२४. महत्त्वपूर्णं यदुवंशवर्णनम् । तत्र भगवतः श्रीकृष्णस्यावतारोपक्रमः अन्ते तन्महत्त्वबोधकानां पद्याना-मनुवर्णनम् ।

॥ इति विषयानुक्रमणिका समाप्ता ॥

ॐ नमो भगवते वासुदेवाय

श्रीमद्भागवतमाहात्म्यम्

अथ प्रथमोऽध्यायः

सच्चिदानन्दरूपाय विश्वोत्पत्त्यादिहेतवे । तापत्रयविनाशाय श्रीकृष्णाय वयं नुमः ॥ १ ॥

यं प्रव्रजन्तमनुपेतमपेतकृत्यं द्वैपायनो विरहकातर आजुहाव ।
पुत्रेति तन्मयतया तरवोऽभिनेदुस्तं सर्वभूतहृदयं मुनिमानतोऽस्मि ॥ २ ॥

नैमिषे सूतमासीनमभिवाद्य महामतिम् । कथामृतरसास्वादकुशलः शौनकोऽब्रवीत् ॥ ३ ॥

शौनक उवाच

अज्ञानध्वान्तविध्वंसकोटिसूर्यसमप्रभ । सूताख्याहि कथासारं मम कर्णरसायनम् ॥ ४ ॥

भक्तिज्ञानविरागाप्तो विवेको वर्धते महान् । मायामोहनिरासश्च वैष्णवैः क्रियते कथम् ॥ ५ ॥

श्रीगणेशं नमस्कृत्य वाग्देवीं नारदं गुरून् ।
श्रीभागवतमाहात्म्ये कुर्वेऽहं टिप्पणीं शुभाम् ॥१॥
आदौ भागवतोत्कर्षं सनकाद्यैः समागमः ।
नारदस्य तथा भक्तेः संवादश्चात्र वर्ण्यते ॥२॥

हेतवे कारणाय । तापत्रयम् आध्यात्मिकम् आधिदैविकं आधिभौतिकम् चेति । श्रीकृष्णाय श्रीकृष्णं प्रसादयितुम् । तुमुन्नर्थे चतुर्थी । नुमः स्तुमः । णु स्तुतौ धातुः । स्तुतेरपि नमसीऽन्तर्गतत्वात्तथात्वेन निर्देशः ॥ १ ॥ प्रव्रज्य संन्यस्य गच्छन्तं यं विरहकातरः द्वैपायनो व्यासः हे पुत्र इति प्लुतस्वरेण आजुहाव आहूतवान् तदा तन्मयतया शुकरूपतया तरवः अभिनेदुः उत्तरं ददुः तं मुनिं श्रीशुक मानतोऽस्मीति सम्बन्धः । कथंभूतम् । अनुपेतम् । मामुपनयस्वेति गुरुसमीपमनुपसन्नम् । एकाकिनं वा पुनश्च । अपेतकृत्यम् । अपेतानि कृत्यानि यस्य । कर्ममार्गे अप्रवर्तमानं नैष्ठिकत्वात् । तन्मयेत्यत्र हेतुः । सर्वभूतहृदयम् । सर्वभूतानां प्राणिनां हृत् अन्तःकरणम् अयते योगबलेन प्रविशतीति तथाभूतम् । उत्तरं ददुरित्यस्य तात्पर्यम् । वयं स्थावराः अस्माकं फलस्वरूपा बहवः पुत्रा जायन्ते नश्यन्ति च न वयं शोचामः । भवांस्तु जङ्गमः ज्ञानिनां शिरोमणि; भगवतः कलावतारश्च अथापि शोचति इत्याश्चर्यम् नैतत् त्वयि उपयुज्यते इति भावः ॥२॥ आसीनं सिंहासने इति शेषः । महामतिं विषयवैरस्येन भगवन्निष्ठ बुद्धित्वात् । कथैव अमृतरसः तस्य आस्वादने कुशलः चतुरः । शुनकस्यापत्यं शौनकः । यद्वा । शौनः सर्वविवेकवान् इत्युक्तेरन्यापेक्षयाऽस्य प्राधान्यात् प्रश्नकर्तृत्वमुपयुज्यते अत्र पक्षे स्वार्थे कः ॥ ३ ॥ हे सूत तद्विशेषणम् । अज्ञानमेव ध्वान्तमन्धकारः तस्य विध्वसने कोटिसूर्यैः समा प्रभा यस्य तत्सम्बुद्धौ । अत्र आदित्यो यूप इतिवत् प्राशस्त्यमात्रं विवक्षितम् । केचित् तु अत्र असंभवदोषात्सूर्यकोटि इति पाठं प्रकल्प्य सूर्यस्य सूर्यकान्तमणेः कोटिरग्रभाग तेन समेत्युक्तं तत्तु समीचीनं न प्रतिभाति पुराणशैली-विरुद्धत्वात् यथाश्रुतपाठानङ्गीकाराच्च । कथासारं भगवच्चरितम् । कर्णयोः रसायनं महौषधं दुर्वासना-निवर्तकत्वात् । प्रियं वा ॥ ४ ॥ भक्त्यादीनाम् आप्तः यथार्थः । माया नामरूपात्मिका तत्र मोहः

इह घोरे कलौ प्रायो जीवश्चासुरतां गतः । क्लेशाक्रान्तस्य तस्यैव शोधने किं परायणम् ॥६॥

श्रेयसां यद्भवेच्छ्रेयः पावनानां च पावनम् । कृष्णप्राप्तिकरं शश्वत्साधनं तद्वदाधुना ॥ ७ ॥

चिन्तामणिर्लोकसुखं सुरद्रुः स्वर्गसम्पदम् । प्रयच्छति गुरुः प्रीतो वैकुण्ठं योगिदुर्लभम् ॥ ८ ॥

सूत उवाच

प्रीतिः शौनक चित्ते ते ह्यतो वच्मि विचार्य च । सर्वसिद्धान्तनिष्पन्नं संसारभयनाशनम् ॥९॥
भक्त्योघवर्धनं यच्च कृष्णसंतोषहेतुकम् । तदहं तेऽभिधास्यामि सावधानतया शृणु ॥१०॥
कालव्यालमुखग्रासत्रासनिर्णाशहेतवे । श्रीमद्भागवतं शास्त्रं कलौ कीरेण भाषितम् ॥११॥
एतस्मादपरं किंचिन्मनःशुद्ध्यै न विद्यते । जन्मान्तरे भवेत्पुण्यं तदा भागवतं लभेत् ॥१२॥
परीक्षिते कथां वक्तुं सभायां संस्थिते शुके । सुधाकुम्भं गृहीत्वैव देवास्तत्र समागमन् ॥१३॥
शुकं नत्वाऽवदन्सर्वे स्वकार्यकुशलाः सुराः । कथासुधां प्रयच्छस्व गृहीत्वैव सुधामिमाम् ॥१४॥
एवं विनिमये जाते सुधा राज्ञा प्रपीयताम् । प्रपास्यामो वयं सर्वे श्रीमद्भागवतामृतम् ॥१५॥
क्व सुधा क्व कथा लोके क्व काचः क्व मणिर्महान् । ब्रह्मरातो विचार्यैवं तदा देवाञ्जहास ह१६
अभक्तांस्तांश्च विज्ञाय न ददौ स कथामृतम् । श्रीमद्भागवती वार्ता सुराणामपि दुर्लभा॥१७॥
राज्ञो मोक्षं तथा वीक्ष्य पुरा धातापि विस्मितः । सत्यलोके तुलां बद्ध्वाऽतोलयत्साधनान्यजः१८
लघून्यन्यानि जातानि गौरवेण इदं महत् । तदा ऋषिगणाः सर्वे विस्मयं परमं ययुः ॥१९॥
मेनिरे भगवद्रूपं शास्त्रं भागवतं कलौ । पठनाच्छ्रवणात्सद्यो वैकुण्ठफलदायकम् ॥२०॥
सप्ताहेन श्रुतं चैतत्सर्वथा मुक्तिदायकम् । सनकाद्यैः पुरा प्रोक्तं नारदाय दयापरैः ॥२१॥

आसक्तिः तस्य निरासः निवृत्तिः ॥ ५ ॥ असुरताम् असुरभावम् । शोधने क्लेशनिवारणे परायणमुत्तम साधनं किम् ॥ ६ ॥ श्रेयसां श्रेयःसाधनानां मध्ये यत् श्रेयः मुख्यम् । पावनानां शुद्धिहेतूनाम् मध्ये । शश्वत् अव्यवहितं च यत् तत् वदेत्यन्वयः ॥ ७ ॥ सुरद्रुः कल्पवृक्षः 'द्रुद्रुमागमाः' इत्यमरः । प्रीतः सन् प्रयच्छति ददाति । चिन्तामणिः[1] ॥ ८ ॥ निष्पन्नं निर्णीतम् ॥ ९ ॥ ओघः प्रवाहः ॥१०॥ काल एव व्यालः सर्पः तस्य मुखग्रासात् यः त्रासः तस्य निर्णाशहेतवे निवृत्तये । कीरेण श्रीशुकेन । श्रीराधिकाया लीलाशुक एव शुकरूपत्वेन अवतीर्णः अतः कीरत्वोपचारः । 'कीरशुकौ' इत्यमरः ॥ ११ ॥ एतस्मात् श्रीमद्भागवतात् । जन्मान्तरे पूर्वजन्मनि ॥१२॥ परीक्षिते चतुर्थ्यन्तम् ॥१३।१४॥ स्ववस्तुना परवस्त्वादानं विनिमयः ॥१५॥ ब्रह्मणा शिवेन रातः दत्तः कृपाविषयीकृतः इति ब्रह्मरातः श्रीशुकः । हेत्युपेक्षायाम् ॥१६।१७॥ अजः ब्रह्मा । साधनानि मोक्षोपयोगीनि वेदान्तादानि ॥१८॥ गौरवेण सर्व-

---

१. यस्य कान्तिलवस्पृष्टं कांस्यं ताम्रमयस्त्रपु ।
पाषाणादिकमन्यद्वा सर्वं भवति काञ्चनम् ॥१॥
चिन्तामणिः स विज्ञेयो मुनिभिः सिद्धिसाधनः । इति ब्रह्मोत्तरखण्डे ।

यद्यपि ब्रह्मसम्बन्धाच्छ्रुतमेतत्सुरर्षिणा । सप्ताहश्रवणविधिः कुमारैस्तस्य भाषितः ॥२२॥

शौनक उवाच

लोकविग्रहयुक्तस्य नारदस्यास्थिरस्य च । विधिश्रवे कुतः प्रीतिः संयोगः कुत्र तैः सह ॥२३॥

सूत उवाच

अत्र ते कीर्तयिष्यामि भक्तियुक्तं कथानकम् । शुकेन मम यत्प्रोक्तं रहः शिष्यं विचार्य च॥२४॥

एकदा हि विशालायां चत्वार ऋषयोऽमलाः । सत्सङ्गार्थं समायाता ददृशुस्तत्र नारदम् ॥२५॥

कुमारा ऊचुः

कथं ब्रह्मन्दीनमुखः कुतश्चिन्तातुरो भवान् । त्वरितं गम्यते कुत्र कुतश्चागमनं तव ॥२६॥

इदानीं शून्यचित्तोऽसि गतवित्तो यथा जनः । तवेदं मुक्तसङ्गस्य नोचितं वद कारणम् ॥२७॥

नारद उवाच

अहं तु पृथिवीं यातो ज्ञात्वा सर्वोत्तमामिति । पुष्करं च प्रयागं च काशीं गोदावरीं तथा ॥२८॥

हरिक्षेत्रं कुरुक्षेत्रं श्रीरङ्गं सेतुबन्धनम् । एवमादिषु तीर्थेषु भ्रममाण इतस्ततः ॥२९॥

नापश्यं कुत्रचिच्छर्म मनस्संतोषकारकम् । कलिनाधर्ममित्रेण धरेयं बाधिताऽधुना ॥३०॥

सत्यं नास्ति तपः शौचं दया दानं न विद्यते । उदरम्भरिणो जीवा वराकाः कूटभाषिणः॥३१॥

मन्दाः सुमन्दमतयो मन्दभाग्या ह्युपद्रुताः । पाखण्डनिरताः सन्तो विरक्ताः सपरिग्रहाः॥३२॥

तरुणीप्रभुता गेहे श्यालको बुद्धिदायकः । कन्याविक्रयिणो लोभाद्दम्पतीनां च कल्कनम् ॥३३॥

आश्रमा यवनै रुद्धास्तीर्थानि सरितस्तथा । देवतायतनान्यत्र दुष्टैर्नष्टानि भूरिशः ॥३४॥

न योगी नैव सिद्धो वा न ज्ञानी सत्क्रियो नरः । कलिदावानलेनाद्य साधनं भस्मतां गतम्॥३५॥

अट्टशूला जनपदाः शिवशूला द्विजातयः । कामिन्यः केशशूलिन्यः सम्भवन्ति कलाविह ॥३६॥

श्रेष्ठत्वेन गाम्भीर्येण च ॥१९।२०।२१॥ तस्य तस्मै नारदाय ॥२२॥ अत्र युक्तस्येत्येव पाठः न तु मुक्तस्य 'नारदः कलहप्रियः' इति गर्गसंहितोक्तेः । विधिश्रवणे ॥२३॥ रहः एकान्ते ॥२४॥ ऋषयः सनकादयः । विशालायां बदरिकाश्रमे । विशालेन नृपतिना यतस्तप्तं पुरा तपः ।

अतो विशाला सा प्रोक्ता बदरीवनमेदिनी ॥२५।२६॥ शून्यं कर्तव्यशून्यम् । मुक्तसंगस्य परिग्रहशून्यस्य तव इदमन्तर्ग्लान्यादि उचितं नास्ति अतः कारणं वदेत्यन्वयः ॥२७।२८॥ हरिक्षेत्रं हरिद्वारम् । इतस्ततः यत्र तत्र ॥ २९ ॥ शर्म सुखम् । 'शर्मशातसुखानि च' । इत्यमरः । अधर्मेत्यत्र षष्ठीसमासो बहुव्रीहिर्वा । धरा कर्मभूमिः बाधिता आक्रान्ता ॥ ३० ॥ शौचं पवित्रता आचारो वा । वराकाः तुच्छप्रकृतिकाः । कूटभाषिणः मिथ्याभाषिणः । 'कूटमनृततुच्छयोः' ॥ ३१ ॥ मन्दा आलस्ययुक्ताः । उपद्रुता विघ्नैराक्रान्ता ॥३२॥ कल्कनं कलहः । तीर्थानि रुद्धानीति लिङ्गव्यत्ययेनान्वयः । नष्टानि कृतानीति शेषः ॥३४॥ कलिरेव दावानलः वनाग्निस्तेन ॥३५॥ जनपदाः देशाः अट्टशूलाः अन्नविक्रयिणः । द्विजातयः ब्राह्मणाः शिवशूलाः वेदविक्रयिणः । केशशूलिन्यः भगविक्रयिणः । तथा च अट्टमन्नमिति प्रोक्तं शिवो वेदः प्रकीर्तितः । केशो भग इति ज्ञेयः शूलो विक्रय उच्यते ॥ इति ॥ ३६ ॥

एवं पश्यन् कलेर्दोषान् पर्यटन्नवनीमहम् । यामुनं तटमापन्नो यत्र लीला हरेरभूत् ॥३७॥
तत्राश्चर्यं मया दृष्टं श्रूयतां तन्मुनीश्वराः । एका तु तरुणी तत्र निषण्णा खिन्नमानसा ॥३८॥
वृद्धौ द्वौ पतितौ पार्श्वे निःश्वसन्तावचेतनौ । शुश्रूषन्ती प्रबोधन्ती रुदती च तयोः पुरः॥३९॥
दशदिक्षु निरीक्षन्ती रक्षितारं निजं वपुः । वीज्यमाना शतस्त्रीभिर्बोध्यमाना मुहुर्मुहुः ॥४०॥
दृष्ट्वा दूरादगतः सोऽहं कौतुकेन तदन्तिकम् । मां दृष्ट्वा चोत्थिता बाला विह्वला चाब्रवीद्वचः॥४१॥

बालोवाच

भो भोः साधो क्षणं तिष्ठ मच्चिन्तामपि नाशय । दर्शनं तव लोकस्य सर्वथाघहरं परम् ॥४२॥
बहुधा तव वाक्येन दुःखशान्तिर्भविष्यति । यदा भाग्यं भवेद्भूरि भवतो दर्शनं तदा ॥४३॥

नारद उवाच

कासि त्वं काविमौ चेमा नार्यः काः पद्मलोचना: । वद देवि सविस्तारं स्वस्य दुःखस्य कारणम्

बालोवाच

अहं भक्तिरिति ख्याता इमौ मे तनयौ मतौ । ज्ञानवैराग्यनामानौ कालयोगेन जर्जरौ ॥४५॥
गङ्गाद्याः सरितश्चेमा मत्सेवार्थं समागताः । तथापि न च मे श्रेयः सेवितायाः सुरैरपि ॥४६॥
इदानीं शृणु मद्वार्तां सचित्तस्त्वं तपोधन । वार्ता मे विततास्त्यस्ति तां श्रुत्वा सुखमावह॥४७॥
उत्पन्ना द्रविडे साहं वृद्धिं कर्णाटके गता । क्वचित्क्वचिन्महाराष्ट्रे गुर्जरे जीर्णतां गता ॥४८॥
तत्र घोरकलेर्योगात्पाखण्डैः खण्डिताङ्गका । दुर्बलाहं चिरं याता पुत्राभ्यां सह मन्दताम् ॥४९॥
वृन्दावनं पुनः प्राप्य नवीनेव सुरूपिणी । जाताहं युवती सम्यक्प्रेष्ठरूपा तु साम्प्रतम ॥५०॥
इमौ तु शयितावत्र सुतौ मे क्लिश्यतः श्रमात् । इदं स्थानं परित्यज्य विदेशं गम्यते मया ५१
जरठत्वं समायातौ तेन दुःखेन दुःखिता । साहं तु तरुणी कस्मात्सुतौ वृद्धाविमौ कुतः ॥५२॥
त्रयाणां सहचारित्वाद्वैपरीत्यं कुतः स्थितम् । घटते जरठा माता तरुणौ तनयाविति ॥५३॥
अतः शोचामि चात्मानं विस्मयाविष्टमानसा । वद योगनिधे धीमन् कारणं चात्र किं भवेत्॥५४

अवनीं पृथ्वीं पर्यटन् परिभ्रमन् । यमुनाया इदं यामुनं यमुनासम्बन्धि तटमापन्नः प्राप्तोऽस्मि ॥३७॥ हे मुनीश्वराः । निषण्णा आसीना ॥३८।३९॥ वीज्यमाना व्यजनविषयीक्रियमाणा ॥४०॥ कौतुकेन कुतूहलेन ॥ ४१।४२।४३।४४ ॥ जर्जरौ वृद्धौ सचित्तः स्थिरचित्तः सन् । सच्चिन्त इत्यपपाठः ॥४७॥ कर्णाटके देशे । जार्णतां ह्रासताम् ॥४८॥ दुर्बला प्रचाराभावात् । खण्डितानि अङ्गानि श्रवणादीनि यस्याः सा । पुत्राभ्यां ज्ञानवैराग्याभ्यां सह मन्दतां न्यूनतां याता प्राप्ता ॥४९॥ नवीनेव अभिनवैव । इव शब्द एवार्थे ॥५०॥ श्रमात् अन्तरलत्या-धिक्यात् ॥५१।५२॥ इति एव नियमः ॥५३॥ विस्मयेन वैपरीत्येन आविष्टं व्याप्तं मानसं यस्याः

नारद उवाच

ज्ञानेनात्मनि पश्यामि सर्वमेतत् तवानघे । न विषादस्त्वया कार्यो हरिः शं ते करिष्यति ॥५५॥

सूत उवाच

क्षणमात्रेण तज्ज्ञात्वा वाक्यमूचे मुनीश्वरः ॥५६॥

नारद उवाच

शृणुष्वाऽवहिता बाले युगोऽयं दारुणः कलिः । तेन लुप्तः सदाचारो योगमार्गस्तपांसि च ॥५७॥
जना अघासुरायन्ते शाठ्यदुष्कर्मकारिणः । इह सन्तो विषीदन्ति प्रहृष्यन्ति ह्यसाधवः ।
धत्ते धैर्यं तु यो धीमान् स धीरः पण्डितोऽथवा ॥५८॥
अस्पृश्यानवलोक्येयं शेषभारकरी धरा । वर्षे वर्षे क्रमाजाता मङ्गलं नापि दृश्यते ॥५९॥
न त्वामपि सुतैः साकं कोऽपि पश्यति साम्प्रतम् । उपेक्षितानुरागान्धैर्जर्जरत्वेन संस्थिता॥६०॥
वृन्दावनस्य संयोगात्पुनस्त्वं तरुणी नवा । धन्यं वृन्दावनं तेन भक्तिर्नृत्यति यत्र च ॥६१॥
अत्रेमौ ग्राहकाभावान्न जरामपि मुञ्चतः । किंचिदात्मसुखेनेह प्रसुप्तिर्मन्यतेऽनयोः ॥६२॥

भक्तिरुवाच

कथं परीक्षिता राज्ञा स्थापितो ह्यशुचिः कलिः । प्रवृत्ते तु कलौ सर्वसारः कुत्र गतो महान्॥६३॥
करुणापरेण हरिणाप्यधर्मः कथमीक्ष्यते । इमं मे संशयं छिन्धि त्वद्वाचा सुखितास्म्यहम् ॥६४॥

नारदउवाच

यदि पृष्टस्त्वया बाले प्रेमतः श्रवणं कुरु । सर्वं वक्ष्यामि ते भद्रे कश्मलं ते गमिष्यति ॥६५॥
यदा मुकुन्दो भगवान् क्ष्मां त्यक्त्वा स्वपदं गतः । तद्दिनात्कलिरायातः सर्वसाधनबाधकः॥६६॥
दृष्टो दिग्विजये राजा दीनवच्छरणं गतः । न मया मारणीयोऽयं सारङ्ग इव सारभुक्॥६७॥
यत्फलं नास्ति तपसा न योगेन समाधिना । तत्फलं लभते सम्यक्कलौ केशवकीर्तनात् ॥६८॥
एकाकारं कलिं दृष्ट्वा सारवत्सारनीरसम् । विष्णुरातः स्थापितवान्कलिजानां सुखाय च॥६९॥

सा ॥ ५४ ॥ हे अनघे पापनिवर्तिके । शं सुखम् ॥५५।५६॥ अवहिता सावधाना । तपांसि च लुप्तानीति योज्यम् ॥५७॥ अद्य इदानीं कलौ । असुरायन्ते असुरवत् आचरन्ति । अत्र अघेत्यपपाठः । शाठ्यं दुष्कर्म च कर्तुं शीलं तेषां ते । धीरः धैर्यगुणसम्पन्नः पण्डितः विवेकवांश्च भवति ॥५८॥ शेषस्यापि भारकरी पापबाहुल्यात् वर्षे वर्षे प्रतिवर्षमुत्तरोत्तमित्यर्थः । मङ्गलं पुण्यं कर्म च ॥५९॥ सुतैः साकं सह । अनुरागान्धैः विषयासक्तैः । जर्जरत्वेन श्रवणाद्यङ्गानां शैथिल्यात् ॥६०।६१॥ इमौ ज्ञानवैराग्यौ । प्रसुप्तिरस्तीति लोको मन्यते ॥६२॥ महान् सारः वस्तूनां सारांशः कुत्रः गतः नष्ट इत्यर्थः ॥६३॥ कथमीक्ष्यते कलिधर्मस्यावश्यंभावित्वात् ॥ ६४ ॥ हे भद्रे ! कश्मलं मनोव्यग्रता ॥६५॥ क्ष्मां पृथ्वीम् । गतः गन्तुमुद्यतः । साधनानां मोक्षसम्बन्धिनां बाधको नाशकः ॥ ६६ ॥ यथा सारंगो भ्रमरः सारग्राही भवति तथा अहमपि भवेयम् ॥ ६७ ॥ सारमाह यत्फलमिति ॥६८॥ एक आकारो गुणो यस्मिन् । सारवत्सु पदार्थेषु यः सारः तस्य नीरसो वैफल्यं यस्मादिति कलिविशेषणम् । 'आकारस्तु गुणे मूर्तौ' इति कोशात् । गुणस्तु कलेर्दोषनिधे राजन्नस्ति ह्येको महान् गुणः ।

कुकर्माचरणात्सारः सर्वतो निर्गतोऽधुना । पदार्थाः संस्थिता भूमौ बीजहीनास्तुषा यथा ॥७०॥

विप्रैर्भागवती वार्ता गेहे गेहे जने जने । कारिता कणलोभेन कथासारस्ततो गतः ॥७१॥

अत्युग्रभूरिकर्माणो नास्तिका रौरवा जनाः । तेऽपि तिष्ठन्ति तीर्थेषु तीर्थसारस्ततो गतः ॥७२॥

कामक्रोधमहालोभतृष्णाव्याकुलचेतसः । तेऽपि तिष्ठन्ति तपसि तपःसारस्ततो गतः ॥७३॥

मनसश्चाजयाल्लोभाद्दम्भात्पाखण्डसंश्रयात् । शास्त्रानभ्यसनाच्चैव ध्यानयोगफलं गतम् ॥७४॥

पण्डितास्तु कलत्रेण रमन्ते महिषा इव । पुत्रस्योत्पादने दक्षा अदक्षा मुक्तिसाधने ॥७५॥

न हि वैष्णवता कुत्र सम्प्रदायपुरःसरा । एवं प्रलयतां प्राप्तो वस्तुसारः स्थले स्थले ॥७६॥

अयं तु युगधर्मो हि वर्तते कस्य दूषणम् । अतस्तु पुण्डरीकाक्षः सहते निकटे स्थितः ॥७७॥

सूत उवाच

इति तद्वचनं श्रुत्वा विस्मयं परमं गता । भक्तिरूचे वचो भूयः श्रूयतां तच्च शौनक ॥७८॥

भक्तिरुवाच

सुरर्षे त्वं हि धन्योऽसि मद्भाग्येन समागतः । साधूनां दर्शनं लोके सर्वसिद्धिकरं परम् ॥७९॥

जयति जगति मायां यस्य कायाधवस्ते वचनरचनमेकं केवलं चाकलय्य ।
ध्रुवपदमपि यातो यत्कृपातो ध्रुवोऽयं सकलकुशलपात्रं ब्रह्मपुत्रं नतास्मि ॥ ८० ॥

इति श्रीपद्मपुराणे उत्तरखण्डे श्रीमद्भागवतमहात्म्ये भक्तिनारदसमागमो नाम प्रथमोऽध्यायः ॥ १ ॥

कीर्तनादेव कृष्णस्य मुक्तसङ्गः परं व्रजेत् ॥ इति ॥६९।७०।७१।७२॥ कामादिभिः व्याकुलं चेतो येषां ते ॥७३।७४॥ कलत्रेण स्त्रिया सह ॥७५।७६॥ सहते तत्कृतमपराधं क्षमते ॥७७।७८।७९॥ कयाधुः प्रह्लादमाता कयाधोरपत्यं पुमान् कायाधवः प्रह्लादः यस्य ते वचनरचनं वचनोपदेशम् आकलय्य श्रुत्वा विचार्येत्यर्थः जयति मायां जयति जितवान् । भूतार्थे लट् । यस्य तव कृपातः ध्रुवोऽपि ध्रुवपदं यातः तं ब्रह्मपुत्रं नारदं त्वां नतास्मीत्यन्वयः । कश्चिन्मूलम् । सकलानां कुशलानां मोक्षसाधनानां पात्रमुपदेष्टारम् । मायां विषयासक्तिम् ॥ ८० ॥

इति श्रीपद्मपुराणे उत्तरखण्डे श्रीमद्भागवतमाहात्म्ये भक्तिनारदसमागमो नाम प्रथमोऽध्यायः ॥१॥

●

द्वितीये ज्ञानवैराग्यबोधार्थं व्योमभाषया ।
सत्कर्मोक्तं कुमारैस्तन्नारदायोपदिश्यते ॥१॥

अथ द्वितीयोऽध्यायः

नारद उवाच

वृथा खेदयसे बाले अहो चिन्तातुरा कथम् । श्रीकृष्णचरणाम्भोजं स्मर दुःखं गमिष्यति ॥१॥
द्रौपदी च परित्राता येन कौरवकश्मलात् । पालिता गोपसुन्दर्यः स कृष्णः क्वापि नो गतः ॥२॥
त्वं तु भक्तिः प्रिया तस्य सततं प्राणतोऽधिका । त्वयाऽऽहूतस्तु भगवान् याति नीचगृहेष्वपि ॥३॥
सत्यादित्रियुगे बोधवैराग्यौ मुक्तिसाधकौ । कलौ तु केवला भक्तिर्ब्रह्मसायुज्यकारिणी ॥४॥
इति निश्चित्य चिद्रूपः सद्रूपां त्वां ससर्ज ह । परमानन्दचिन्मूर्तिः सुन्दरीं कृष्णवल्लभाम् ॥५॥
बद्ध्वाऽञ्जलिं त्वया पृष्टं किं करोमीति चैकदा । त्वां तदाऽऽज्ञापयत्कृष्णो मद्भक्तान् पोषयेति च
अङ्गीकृतं त्वया तद्वै प्रसन्नोऽभूद्धरिस्तदा । मुक्तिं दासीं ददौ तुभ्यं ज्ञानवैराग्यकाविमौ ॥७॥
पोषणं स्वेन रूपेण वैकुण्ठे त्वं करोषि च । भूमौ भक्तविपोषाय छायारूपं त्वया कृतम् ॥८॥
मुक्तिं ज्ञानं विरक्तिं च सह कृत्वा गता भुवि । कृतादिद्वापरस्यान्तं महानन्देन संस्थिता ॥९॥
कलौ मुक्तिः क्षयं प्राप्ता पाखण्डामयपीडिता । त्वदाज्ञया गता शीघ्रं वैकुण्ठं पुनरेव सा ॥१०॥
स्मृता त्वयापि चात्रैव मुक्तिरायाति याति च । पुत्रीकृत्य त्वयेमौ च पार्श्वे स्वस्यैव रक्षितौ ॥११॥
उपेक्षातः कलौ मन्दौ वृद्धौ जातौ सुतौ तव । तथापि चिन्तां मुञ्च त्वमुपायं चिन्तयाम्यहम् १२
कलिना सदृशः कोऽपि युगो नास्ति वरानने । तस्मिंस्त्वां स्थापयिष्यामि गेहे गेहे जने जने ॥१३॥
अन्यधर्मांस्तिरस्कृत्य पुरस्कृत्य महोत्सवान् । तदा नाहं हरेर्दासो लोके त्वां न प्रवर्तये ॥१४॥
त्वदन्विताश्च ये जीवा भविष्यन्ति कलाविह । पापिनोऽपि गमिष्यन्ति निर्भयं कृष्णमन्दिरम् ॥१५॥
येषां चित्ते वसेद्भक्तिः सर्वदा प्रेमरूपिणी । न ते पश्यन्ति कीनाशं स्वप्नेऽप्यमलमूर्तयः ॥१६॥
न प्रेतो न पिशाचो वा राक्षसो वासुरोऽपि वा । भक्तियुक्तमनस्कानां स्पर्शने न प्रभुर्भवेत् ॥१७॥
न तपोभिर्न वेदैश्च न ज्ञानेनापि कर्मणा । हरिर्हि साध्यते भक्त्या प्रमाणं तत्र गोपिकाः ॥१८॥
नृणां जन्मसहस्रेण भक्तौ प्रीतिर्हि जायते । कलौ भक्तिः कलौ भक्तिर्भक्त्या कृष्णः पुरः स्थितः
भक्तिद्रोहकरा ये च ते सीदन्ति जगत्त्रये । दुर्वासा दुःखमापन्नः पुरा भक्तविनिन्दकः ॥२०॥
अलं व्रतैरलं तीर्थैरलं योगैरलं मखैः । अलं ज्ञानकथालापैर्भक्तिरेकैव मुक्तिदा ॥२१॥

सूत उवाच

इति नारदनिर्णीतं स्वमाहात्म्यं निशम्य सा । सर्वाङ्गपुष्टिसंयुक्ता नारदं वाक्यमब्रवीत् ॥२२॥

कश्मलात् दुःखात् ॥१।२।३।४।५।६।७।८।९॥ पाखण्ड एव आमयो रोगः तेन पीडिता आक्रान्ता । क्षयं वैकुण्ठस्थानं वा । 'क्षि निवासे' इत्यस्मात् ॥१०।११।१२।१३।१४।१५॥ कीनाशं यमम् ॥१६।१७॥ साध्यते वशीक्रियते ॥१८।१९॥ सीदन्ति क्लिश्यन्ति ॥२०।२१।२२

भक्तिरुवाच

अहो नारद धन्योऽसि प्रीतिस्ते मयि निश्चला। न कदाचिद्विमुञ्चामि चित्ते स्थास्यामि सर्वदा।२३।
कृपालुना त्वया साधो मद्बाधा ध्वंसिता क्षणात्। पुत्रयोश्चेतना नास्ति ततो बोधय बोधय।२४।

सूत उवाच

तस्या वचः समाकर्ण्य कारुण्यं नारदो गतः। तयोर्बोधनमारेभे कराग्रेण विमर्दयन् ॥२५॥
मुखं संयोज्य कर्णान्ते शब्दमुच्चैः समुच्चरन्। ज्ञान प्रबुध्यतां शीघ्रं रे वैराग्य प्रबुध्यताम्।२६।
वेदवेदांतघोषैश्च गीतापाठैर्मुहुर्मुहुः। बोध्यमानौ तदा तेन कथंचिच्चोत्थितौ बलात् ॥२७॥
नेत्रैरनवलोकन्तौ जृम्भन्तौ सालसावुभौ। बकधत्पलितौ प्रायः शुष्ककाष्ठसमाङ्गकौ ॥२८॥
क्षुत्क्षामौ तौ निरीक्ष्यैव पुनः स्वापपरायणौ। ऋषिश्चिन्तापरो जातः किं विधेयं मयेति च।२९।
अहो निद्रा कथं याति वृद्धत्वं च महत्तरम्। चिन्तयन्निति गोविन्दं स्मारयामास भार्गव॥३०॥
व्योमवाणी तदैवाभून्मा ऋषे खिद्यतामिति। उद्यमः सफलस्तेऽयं भविष्यति न संशयः ॥३१॥
एतदर्थं तु सत्कर्म सुरर्षे त्वं समाचर। तत्ते कर्माभिधास्यन्ति साधवः साधुभूषणाः ॥३२॥
सत्कर्मणि कृते तस्मिन् सनिद्रा वृद्धतानयोः। गमिष्यति क्षणाद्भक्तिः सर्वतः प्रसरिष्यति।३३।
इत्याकाशवचः स्पष्टं तत्सर्वैरपि विश्रुतम्। नारदो विस्मयं लेभे नेदं ज्ञातमिति ब्रुवन् ॥३४॥

नारद उवाच

अनयाऽऽकाशवाण्यापि गोप्यत्वेन निरूपितम्। किं वा तत्साधनं कार्यं येन कार्यं भवेत्तयोः।३५।
क्व भविष्यन्ति सन्तस्ते कथं दास्यन्ति साधनम्। मयात्र किं प्रकर्तव्यं यदुक्तं व्योमभाषया।३६।

सूत उवाच

तत्र द्वावपि संस्थाप्य निर्गतो नारदो मुनिः। तीर्थं तीर्थं विनिष्क्रम्य पृच्छन्मार्गे मुनीश्वरान्।३
वृत्तान्तः श्रूयते सर्वैः किंचिन्निश्चित्य नोच्यते। असाध्यं केचन प्रोचुर्दुर्ज्ञेयमिति चापरे।
मूकीभूतास्तथान्ये तु कियन्तस्तु पलायिताः ॥३८॥
हाहाकारो महानासीत्त्रैलोक्ये विस्मयावहः। वेदवेदान्तघोषैश्च गीतापाठैर्विबोधितम् ॥३९॥
भक्तिज्ञानविरागाणां नोदतिष्ठत्त्रिकं यदा। उपायो नापरोऽस्तीति कर्णे कर्णेऽजपञ्जनाः ॥४०॥
योगिना नारदेनापि स्वयं न ज्ञायते तु यत्। तत्कथं शक्यते वक्तुमितरैरिह मानुषैः ॥४१॥
एवमृषिगणैः पृष्टैर्निर्णीयोक्तं दुरासदम् ॥४२॥

॥२३-२७॥ पलितौ श्वेतकेशौ ॥२८॥ क्षुधा क्षामौ क्षीणौ ॥२९॥ हे भार्गव शौनक ॥३०।३१॥ साधून् साधकान् भूषयन्ति बोधयन्ति उपदेशद्वारा ॥३२।३३॥ इदं सत्कर्म न ज्ञातमिति ब्रुवन् सन् ॥३४॥ तयोः ज्ञानवैराग्ययोः ॥ ३५ ॥ व्योमभाषया आकाशवाण्या ॥३६।३७।३८।३९।४०॥ एवं निर्णीय दुरासदं दुष्प्रापं सत्कर्मेत्युक्तम् ॥४१।४२॥

ततश्चिन्तातुरः सोऽथ बदरीवनमागतः। तपश्चरामि चात्रेति तदर्थं कृतनिश्चयः ॥४३॥
तावद्ददर्श पुरतः सनकादीन्मुनीश्वरान्। कोटिसूर्यसमाभासानुवाच मुनिसत्तमः ॥४४॥

नारद उवाच

इदानीं भूरिभाग्येन भवद्भिः सङ्गमोऽभवत्। कुमारा ब्रुवतां शीघ्रं कृपां कृत्वा ममोपरि।४५।
भवन्तो योगिनः सर्वे बुद्धिमन्तो बहुश्रुताः। पञ्चहायनसंयुक्ताः पूर्वेषामपि पूर्वजाः ॥४६॥
सदा वैकुण्ठनिलया हरिकीर्तनतत्पराः। लीलामृतरसोन्मत्ताः कथामात्रैकजीविनः ॥४७॥
हरिः शरणमेवं हि नित्यं येषां मुखे वचः। अतः कालसमादिष्टा जरा युष्मान्न बाधते ॥४८॥
येषां भ्रूभङ्गमात्रेण द्वारपालौ हरेः पुरा। भूमौ निपतितौ सद्यो यत्कृपातः पुरं गतौ ॥४९॥
अहो भाग्यस्य योगेन दर्शनं भवतामिह। अनुग्रहस्तु कर्तव्यो मयि दीने दयापरैः ॥५०॥
अशरीरगिरोक्तं यत्तत्किं साधनमुच्यताम्। अनुष्ठेयं कथं तावत्प्रब्रुवन्तु सविस्तरम् ॥५१॥
भक्तिज्ञानविरागाणां सुखमुत्पद्यते कथम्। स्थापनं सर्ववर्णेषु प्रेमपूर्वं प्रयत्नतः ॥५२॥

कुमारा ऊचुः

मा चिन्तां कुरु देवर्षे हर्षं चित्ते समावह। उपायः सुखसाध्योऽत्र वर्तते पूर्व एव हि ॥५३॥
अहो नारद धन्योऽसि विरक्तानां शिरोमणिः। सदा श्रीकृष्णदासानामग्रणीर्योगभास्करः।५४।
त्वयि चित्रं न मन्तव्यं भक्त्यर्थमनुवर्तिनि। घटते कृष्णदासस्य भक्तेः संस्थापना सदा ॥५५॥
ऋषिभिर्बहवो लोके पन्थानः प्रकटीकृताः। श्रमसाध्याश्च ते सर्वे प्रायः स्वर्गफलप्रदाः ॥५६॥
वैकुण्ठसाधकः पन्थाः स तु गोप्यो हि वर्तते। तस्योपदेष्टा पुरुषः प्रायो भाग्येन लभ्यते ॥५७॥
सत्कर्म तव निर्दिष्टं व्योमवाचा तु यत्पुरा। तदुच्यते शृणुष्वाद्य स्थिरचित्तः प्रसन्नधीः ।५८।
द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथापरे। स्वाध्यायज्ञानयज्ञाश्च ते तु कर्मविसूचकाः ॥५९॥
सत्कर्मसूचको नूनं ज्ञानयज्ञः स्मृतो बुधैः। श्रीमद्भागवतालापः स तु गीतः शुकादिभिः ॥६०॥
भक्तिज्ञानविरागाणां तद्घोषेण बलं महत्। व्रजिष्यति द्वयोः कष्टं सुखं भक्तेर्भविष्यति ॥६१॥
प्रलयं हि गमिष्यन्ति श्रीमद्भागवतध्वनेः। कलेर्दोषा इमे सर्वे सिंहशब्दाद् वृका इव ॥६२॥
ज्ञानवैराग्यसंयुक्ता भक्तिः प्रेमरसावहा। प्रतिगेहं प्रतिजनं ततः क्रीडां करिष्यति ॥६३॥

नारद उवाच

वेदवेदान्तघोषैश्च गीतापाठैः प्रबोधितम्। भक्तिज्ञानविरागाणां नोदतिष्ठत्त्रिकं यदा ॥६४॥

॥४३–४४॥ हे कुमारा! यूयं वदत आम् निश्चये ॥४५॥ पूर्वेषां मरीच्यादीनां सृष्टेरादित्वात्। पञ्चहायनैः पञ्चवर्षैः संयुक्ताः ॥४६॥ कथाश्रवणमात्रमेव एकं मुख्यं जीवनं येषां ते अतएव भगवल्लीलामृतरसेन उन्मत्ता आनन्दिताः एवं कथेत्यनेन न पुनरुक्तिः। वैकुण्ठो भगवानेव निलयः स्थानं येषां ते ॥४७।४८।४९।५०।५१॥ स्थापन च कथं भवेदिति योज्यम् ॥५२।५३।५४॥ चित्रमाश्चर्यं न मन्तव्यम् ॥५५।५६।५७।५८॥ कर्मविसूचकाः कर्मबोधकाः ॥५९।६०।६१।६२।६३।६४॥

श्रीमद्भागवतालापात्तत्कथं बोधमेष्यति । तत्कथासु तु वेदार्थः श्लोके श्लोके पदे पदे ॥६५॥
छिन्दन्तु संशयं ह्येनं भवन्तोऽमोघदर्शनाः । विलम्बो नात्र कर्तव्यः शरणागतवत्सलाः ॥६६॥

कुमारा ऊचुः

वेदोपनिषदां साराज्जाता भागवती कथा । अत्युत्तमा ततो भाति पृथग्भूता फलाकृतिः ॥६७॥
आमूलाग्रं रसस्तिष्ठन्नास्ते न स्वाद्यते यथा । स भूयः सम्पृथग्भूतः फले विश्वमनोहरः ॥६८॥
यथा दुग्धे स्थितं सर्पिर्न स्वादायोपकल्पते । पृथग्भूतं हि तद्द्रव्यं देवानां रसवर्धनम् ॥६९॥
इक्षूणामपि मध्यान्तं शर्करा व्याप्य तिष्ठति । पृथग्भूता च सा मिष्टा तथा भागवती कथा ॥७०॥
इदं भागवतं नाम पुराणं ब्रह्मसम्मितम् । भक्तिज्ञानविरागाणां स्थापनाय प्रकाशितम् ॥७१॥
वेदान्तवेदसुस्नाते गीताया अपि कर्तरि । परितापवति व्यासे मुह्यत्यज्ञानसागरे ॥७२॥
तदा त्वया पुरा प्रोक्तं चतुश्लोकसमन्वितम् । तदीयश्रवणात्सद्यो निर्बाधो बादरायणः ॥७३॥
तत्र ते विस्मयः केन यतः प्रश्नकरो भवान् । श्रीमद्भागवतं श्राव्यं शोकदुःखविनाशनम् ॥७४॥

नारद उवाच

यद्दर्शनं च विनिहन्त्यशुभानि सद्यः श्रेयस्तनोति भवदुःखदवार्दितानाम् ।
निःशेषशेषमुखगीतकथैकपानाः प्रेमप्रकाशकृतये शरणं गतोऽस्मि ॥७५॥
भाग्योदयेन बहुजन्मसमर्जितेन सत्सङ्गमं च लभते पुरुषो यदा वै ।
अज्ञानहेतुकृतमोहमदान्धकारनाशं विधाय हि तदोदयते विवेकः ॥७६॥

इति श्रीपद्मपुराणे उत्तरखण्डे श्रीमद्भागवतमाहात्म्ये कुमारनारदसंवादो नाम द्वितीयोऽध्यायः ॥ २ ॥

तत्कथासु भागवतकथासु वेदस्य अर्थः वाच्यार्थः भगवान् श्रीकृष्णः प्रतिपदं प्रतिश्लोकं च वर्तते ॥६५।६६॥ फलाकृतिः फलरूपा ॥ ६७ ॥ मूलतः आरभ्य अग्रपर्यन्तमास्ते । स एव रसः फलरूपेण पृथक् भूतः विश्वस्य मनो हरति आकर्षतीति तथा ॥६८॥ तत् द्रव्यं घृतम् । रसवर्धनं तृप्तिकरं भवति॥६९॥ मध्यान्तम् आदिमध्यान्तम् । सा शर्करा ॥७०॥ ब्रह्मणा वेदेन सम्मितं तुल्यम् ब्रह्म सम्यक् मितं ज्ञातं येनेति वा ॥७१॥ सुस्नाते पारं गते ॥७२।७३॥ निर्बाधः मनस्तोपात् । तत्र श्रीमद्भागवते ॥७४॥ येषां भवतां दर्शनम् भवःदुखं संसारदुःखं जन्ममरणादिरूपं तदेव दवोऽग्निः तेन अर्दितानां पीडितानां पुसां श्रेयो मोक्षाख्यं तनोति तेषां भवतां शरणं गतोऽस्मीत्यन्वयः । किमर्थम् । प्रेमप्रकाशकृतये भगवति प्रेमसम्पादनार्थम् । निःशेषं यथा स्यात्तथा शेषमुखेन गीता या कथा तस्या एकमेव मुख्यं पानं येषां ते तत्सम्बुद्धौ हे कुमाराः । दव इति 'टुदु उपतापे धातुः ॥७५॥ बहुजन्मसु समार्जितेन सञ्चितेन भाग्योदयेन यदा सत्संगमं लभते तदा विवेकः उदयते इत्यन्वयः किं कृत्वा । अज्ञानमेव हेतुः तेन कृतो यो मोहो मदश्च स एवान्धकारस्तस्य नाशं विधाय ॥ ७६ ॥

इति पद्मपुराणे उत्तरखण्डे श्रीमद्भागवतमाहात्म्ये कुमारनारदसंवादो नाम द्वितीयोऽध्यायः ॥२॥

अथ तृतीयोऽध्यायः

नारद उवाच

ज्ञानयज्ञं करिष्यामि शुकशास्त्रकथोज्ज्वलम् । भक्तिज्ञानविरागाणां स्थापनार्थं प्रयत्नतः ॥१॥
कुत्र कार्यो मया यज्ञः स्थलं तद्वाच्यतामिह । महिमा शुकशास्त्रस्य वक्तव्यो वेदपारगैः ॥२॥
कियद्भिर्दिवसैः श्राव्या श्रीमद्भागवती कथा । को विधिस्तत्र कर्तव्यो ममेदं वदतामितः ॥३॥

कुमारा ऊचुः

शृणु नारद वक्ष्यामो विनम्राय विवेकिने । गङ्गाद्वारसमीपे तु तटमानन्दनामकम् ॥४॥
नानाऋषिगणैर्जुष्टं देवसिद्धनिषेवितम् । नानातरुलताकीर्णं नवकोमलवालुकम् ॥५॥
रम्यमेकान्तदेशस्थं हेमपद्मसुसौरभम् । यत्समीपस्थजीवानां वैरं चेतसि न स्थितम् ॥६॥
ज्ञानयज्ञस्त्वया तत्र कर्तव्यो ह्यप्रयत्नतः । अपूर्वरसरूपा च कथा तत्र भविष्यति ॥७॥
पुरःस्थं निर्बलं चैव जराजीर्णकलेवरम् । तद् द्वयं च पुरस्कृत्य भक्तिस्तत्रागमिष्यति ॥८॥
यत्र भागवती वार्ता तत्र भक्त्यादिकं व्रजेत् । कथाशब्दं समाकर्ण्य तत्त्रिकं तरुणायते ॥९॥

सूत उवाच

एवमुक्त्वा कुमारास्ते नारदेन समं ततः । गङ्गातटं समाजग्मु कथापानाय सत्वराः ॥१०॥
यदा यातास्तटं ते तु तदा कोलाहलोऽभ्भूत् । भूर्लोके देवलोके च ब्रह्मलोके तथैव च ॥११॥
श्रीभागवतपीयूषपानाय रसलम्पटाः । धावन्तोऽप्याययुः सर्वे प्रथमं ये च वैष्णवाः ॥१२॥

भृगुर्वसिष्ठश्च्यवनश्च गौतमो मेधातिथिर्देवलदेवरातौ ।
रामस्तथा गाधिसुतश्च शाकलो मृकण्डुपुत्रात्रिजपिप्पलादाः ॥१३॥
योगेश्वरौ व्यासपराशरौ च छायाशुको जाजलिजह्नुमुख्याः ।
सर्वेऽप्यमी मुनिगणाः सहपुत्रशिष्या स्वस्त्रीभिराययुरतिप्रणयेन युक्ताः ॥१४॥

वेदान्तानि च वेदाश्च मन्त्रास्तन्त्राः समूर्तयः । दशसप्तपुराणानि षट् शास्त्राणि तथाऽऽययुः ॥१५॥
गङ्गाद्याः सरितस्तत्र पुष्करादिसरांसि च । क्षेत्राणि च दिशः सर्वा दण्डकादिवनानि च ॥१६॥

तृतीये ज्ञानवैराग्यभक्तीनामात्मतुष्टये ।
गङ्गातटे कुमारेस्तज्ज्ञानयज्ञः प्रवर्तितः ॥१॥

यूयं वदत आम् निश्चयेन । इतः एतस्माद् हेतोः ॥१।२।३।४।५॥ हैमपद्मानि स्वर्णवर्णकमलानि तैः सुगन्धितम् ॥६।७।८।९॥ कथापानाय लोकानां कथारसपानार्थम् । तादर्थ्ये चतुर्थी । समं सह ॥१०।११॥ रसलम्पटाः रसास्वादने चतुराः ॥१२॥ देवरातो याज्ञवल्क्य । रामः परशुरामः । गाधिसुतः विश्वामित्रः । शाकलो मुनिः । अत्रिजः दत्तात्रेयः ॥ १३ ॥ योगेश्वरः वामदेवः ॥१४॥ समूर्तयः मूर्तिमन्तः । षट् शास्त्राणि गौतम-कणाद-कपिल-पतञ्जलिव्यासजैमिनिप्रणीतानि । ततदधिष्ठातृ-

नगादयो ययुस्तत्र देवगन्धर्वदानवाः । गुरुत्वात्तत्र नायातान्भृगुः सम्बोध्य चानयत् ॥१७॥
दीक्षिता नारदेनाथ दत्तमासनमुत्तमम् । कुमारा वन्दिताः सर्वैर्निषेदुः कृष्णतत्पराः ॥१८॥
वैष्णवाश्च विरक्ताश्च न्यासिनो ब्रह्मचारिणः । मुखभागे स्थितास्ते च तदग्रे नारदः स्थितः ॥१९॥
एकभागे ऋषिगणास्तदन्यत्र दिवौकसः । वेदोपनिषदोऽन्यत्र तीर्थान्यत्र स्त्रियोऽन्यतः ॥२०॥
जयशब्दो नमःशब्दः शङ्खशब्दस्तथैव च । चूर्णलाजाप्रसूनानां निक्षेपः सुमहानभूत् ॥२१॥
विमानानि समारुह्य कियन्तो देवनायकाः । कल्पवृक्षप्रसूनैस्तान् सर्वास्तत्र समाकिरन् ॥२२॥

सूत उवाच

एवं तेष्वेकचित्तेषु श्रीमद्भागवतस्य च । माहात्म्यमूचिरे स्पष्टं नारदाय महात्मने ॥२३॥

कुमारा ऊचुः

अथ ते वर्ण्यतेऽस्माभिर्महिमा शुकशास्त्रजः । यस्य श्रवणमात्रेण मुक्तिः करतले स्थिता ॥२४॥
सदा सेव्या सदा सेव्या श्रीमद्भागवती कथा । यस्याः श्रवणमात्रेण हरिश्चित्तं समाश्रयेत् ॥२५॥
ग्रन्थोऽष्टादशसाहस्रो द्वादशस्कन्धसम्मितः । परीक्षिच्छुकसंवादः शृणु भागवतं च तत् ॥२६॥
तावत्संसारचक्रेऽस्मिन् भ्रमतेऽज्ञानतः पुमान् । यावत्कर्णगता नास्ति शुकशास्त्रकथा क्षणम् २७
किं श्रुतैर्बहुभिः शास्त्रैः पुराणैश्च भ्रमावहैः । एकं भागवतं शास्त्रं मुक्तिदानेन गर्जति ॥२८॥
कथा भागवतस्यापि नित्यं भवति यद्गृहे । तद्गृहं तीर्थरूपं हि वसतां पापनाशनम् ॥२९॥
अश्वमेधसहस्राणि वाजपेयशतानि च । शुकशास्त्रकथायाश्च कलां नार्हन्ति षोडशीम् ॥३०॥
तावत्पापानि देहेऽस्मिन्निवसन्ति तपोधनाः । यावन्न श्रूयते सम्यक् श्रीमद्भागवतं नरैः ॥३१॥
न गङ्गा न गया काशी पुष्करं न प्रयागकम् । शुकशास्त्रकथायाश्च फलेन समतां नयेत् ॥३२॥
श्लोकार्धं श्लोकपादं वा नित्यं भागवतोद्भवम् । पठस्व स्वमुखेनैव यदीच्छसि परां गतिम् ॥३३॥
वेदादिर्वेदमाता च पौरुषं सूक्तमेव च । त्रयी भागवतं चैव द्वादशाक्षर एव च ॥३४॥
द्वादशात्मा प्रयागश्च कालः संवत्सरात्मकः । ब्राह्मणाश्चाग्निहोत्रं च सुरभिर्द्वादशी तथा ॥३५॥
तुलसी च वसन्तश्च पुरुषोत्तम एव च । एतेषां तत्त्वतः प्राज्ञैर्न पृथग्भाव इष्यते ॥३६॥

रूपेण ॥ १५ ॥ गुरुत्वात् ॥१७।१८।१९।२०॥ चूर्णं हरिद्राकर्पूरादि । निक्षेपो वृष्टिः ॥२१॥ देवनायका इन्द्रादयः प्रसूनैः पुष्पैः तान् सर्वान् श्रोतॄन् समाकिरन् आच्छादयामासुः ॥२२।२३।२४।२५।२६।२७॥ भ्रमावहैः भ्रमोत्पादकैः । विचित्रशास्त्रसंश्रुत्या जायते निश्चितं भ्रमः ।

सर्वशास्त्रफलाधिक्यान्मुक्त्यै भागवतं वरम् ॥२८।२९।३०।३१॥ न गङ्गादीनामपकर्षे तात्पर्यमपि तु विधेयं स्तोतुम् ॥३२।३३॥ वेदादिः ओंकारः । 'ओङ्कारो वै प्रथमा वाक्' इति श्रुतेः । वेदमाता गायत्री ॥ ३४ ॥ द्वादशात्मा मासभेदेन द्वादशमूर्तिमान् सूर्यः ॥ ३५ ॥ पुरुषोत्तमः मासः ॥ ३६ ॥

यश्च भागवतं शास्त्रं वाचयेदर्थतोऽनिशम् । जन्मकोटिकृतं पापं नश्यते नात्र संशयः ॥३७॥
श्लोकार्धं श्लोकपादं वा पठेद् भागवतं च यः । नित्यं पुण्यमवाप्नोति राजसूयाश्वमेघयोः॥३८॥
उक्तं भागवतं नित्यं कृतं च हरिचिन्तनम् । तुलसीपोषणं चैव धेनूनां सेवनं समम् ॥३९॥
अन्तकाले तु येनैव श्रूयते शुकशास्त्रवाक् । प्रीत्या तस्यैव वैकुण्ठं गोविन्दोऽपि प्रयच्छति॥४०॥
हेमसिंहयुतं चैतद् वैष्णवाय ददाति च । कृष्णेन सह सायुज्यं स पुमाँल्लभते ध्रुवम् ॥४१॥

आजन्ममात्रमपि येन शठेन किंचिच्चितं विधाय शुकशास्त्रकथा न पीता ।
चाण्डालवच्च खरवद् बत तेन नीतं मिथ्या स्वजन्म जननीजनिदुःखभाजा ॥४२॥
जीवच्छवो निगदितः स तु पापकर्मा येन श्रुतं शुककथावचनं न किंचित् ।
धिक् तं नरं पशुसमं भुवि भाररूपमेवं वदन्ति दिवि देवसमाजमुख्याः ॥४३॥

दुर्लभैव कथा लोके श्रीमद्भागवतोद्भवा । कोटिजन्मसमुत्थेन पुण्येनैव तु लभ्यते ॥४४॥
तेन योगनिधे धीमन् श्रोतव्या सा प्रयत्नतः । दिनानां नियमो नास्ति सर्वदा श्रवणं मतम्॥४५॥
सत्येन ब्रह्मचर्येण सर्वदा श्रवणं मतम् । अशक्यत्वात्कलौ बोध्यो विशेषोऽत्र शुकाज्ञया ॥४६॥
मनोवृत्तिजयश्चैव नियमाचरणं तथा । दीक्षां कर्तुमशक्यत्वात् सप्ताहश्रवणं मतम् ॥४७॥
श्रद्धातः श्रावणे नित्यं माघे तावद्धि यत् फलम् । तत् फलं शुकदेवेन सप्ताहश्रवणे कृतम् ॥४८॥
मनसश्चाजयाद्रोगात्पुंसां चैवायुषः क्षयात् । कलेर्दोषबहुत्वाच्च सप्ताहश्रवणं मतम् ॥४९॥
यत् फलं नास्ति तपसा न योगेन समाधिना । अनायासेन तत् सर्वं सप्ताहश्रवणे लभेत्॥५०॥
यज्ञाद् गर्जति सप्ताहः सप्ताहो गर्जति व्रतात् । तपसो गर्जति प्रोच्चैस्तीर्थान्नित्यं हि गर्जति॥५१॥
योगाद् गर्जति सप्ताहो ध्यानाज्ज्ञानाच्च गर्जति । किं ब्रूमो गर्जनं तस्य रे रे गर्जति गर्जति॥५२॥

शौनक उवाच

साश्चर्यमेतत्कथितं कथानकं ज्ञानादिधर्मान् विगणय्य साम्प्रतम् ।
निःश्रेयसे भागवतं पुराणं जातं कुतो योगविदादिसूचकम् ॥५३॥

नश्यते नष्टं भवति ॥३७।३८।३९।४०।४१॥ येन शुक कथा न पीता तेन स्वजन्म मिथ्या नीतमित्यन्वयः । कथंभूतेन । जनन्या या जनिः जन्म तस्या अपि दुःखं दुःखितं कलङ्कितं भजति करोतीति तथा तेन ॥ ४२ ॥ जीवच्छवः जीवन्मृतकः । देवसमाजे मुख्या ये इन्द्रादयः ते एवं वदन्तीत्यन्वयः ॥४३।४४।४५॥ विशेषः सप्ताहरूपः ॥४६।४७॥ अत्र माघसाहचर्यात् श्रावणे इत्येव पाठ न तु श्रवणे । निमित्ते सप्तमी च । तथा च श्रावणमासनिमित्तं यत् स्नानादिजनितं फलं तत्सप्ताह श्रवणे कृतम् इत्यन्वयः ॥४८।४९।५०॥ यज्ञादित्यादिषु सर्वत्र ल्यब्लोपे पञ्चमी । यज्ञमालक्ष्य । रे रे इति वीप्सया सर्वान् सम्बोध्य गर्जति मच्छरणं यूयमागच्छत अस्मादधिकं किमप्यन्यत् साधनं नास्तीति अस्य डिण्डिमघोषः ॥५१।५२॥ विगणय्य तुच्छीकृत्य । योगोऽष्टाङ्गः । वेदनं वित् ज्ञानम् आदिपदेन वैराग्यादि

सूत उवाच

यदा कृष्णो धरां त्यक्त्वा स्वपदं गन्तुमुद्यतः । एकादशं परिश्रुत्याप्युद्धवो वाक्यमब्रवीत् ॥५४॥

उद्धव उवाच

त्वं तु यास्यसि गोविन्द भक्तकार्यं विधाय च । मच्चित्ते महती चिन्ता तां श्रुत्वा सुखमावह ॥५५॥
आगतोऽयं कलिर्घोरो भविष्यन्ति पुनः खलाः । तत्सङ्गेनैव सन्तोऽपि गमिष्यन्त्युग्रता यदा ॥५६॥
तदा भारवती भूमिर्गोरूपेयं कमाश्रयेत् । अन्यो न दृश्यते त्राता त्वत्तः कमललोचन ॥५७॥
अतः सत्सु दयां कृत्वा भक्तवत्सल मा व्रज । भक्तार्थं सगुणो जातो निराकारोऽपि चिन्मयः ॥५८॥
त्वद्वियोगेन ते भक्ताः कथं स्थास्यन्ति भूतले । निर्गुणोपासेन कष्टमतः किंचिद् विचारय ॥५९॥
इत्युद्धववचः श्रुत्वा प्रभासेऽचिन्तयद्धरिः । भक्तावलम्बनार्थाय किं विधेयं मयेति च ॥६०॥
स्वकीयं यद्भवेत्तेजस्तच्च भागवतेऽदधात् । तिरोधाय प्रविष्टोऽयं श्रीमद्भागवतार्णवम् ॥६१॥
तेनेयं वाङ्मयी मूर्तिः प्रत्यक्षा वर्तते हरेः । सेवनाच्छ्रवणात्पाठाद्दर्शनात्पापनाशिनी ॥६२॥
सप्ताहश्रवणं तेन सर्वेभ्योऽप्यधिकं कृतम् । साधनानि तिरस्कृत्य कलौ धर्मोऽयमीरितः ॥६३॥
दुःखदारिद्र्यदौर्भाग्यपापप्रक्षालनाय च । कामक्रोधजयार्थं हि कलौ धर्मोऽयमीरितः ॥६४॥
अन्यथा वैष्णवी माया देवैरपि सुदुस्त्यजा । कथं त्याज्या भवेत्पुम्भिः सप्ताहोऽतः प्रकीर्तितः ॥६५॥

सूत उवाच

एवं नगाहश्रवणोरुधर्मे प्रकाश्यमाने ऋषिभिः सभायाम् ।
आश्चर्यमेकं समभूत्तदानीं तदुच्यते संशृणु शौनक त्वम् ॥६६॥
भक्तिः सुतौ तौ तरुणौ गृहीत्वा प्रेमैकरूपा सहसाऽऽविरासीत्
श्रीकृष्ण गोविन्द हरे मुरारे नाथेति नामानि मुहुर्वदन्ती ॥६७॥
तां चागतां भागवतार्थभूषां सुचारुवेषां ददृशुः सदस्याः ।
कथं प्रविष्टा कथमागतेयं मध्ये मुनीनामिति तर्कयन्तः ॥६८॥
ऊचुः कुमारा वचनं तदानीं कथार्थतो निष्पतिताऽधुनेयम् ।
एवं गिरः सा ससुता निशम्य सनत्कुमारं निजगाद नम्रा ॥६९॥

भक्तिरुवाच

भवद्भिरद्यैव कृतास्मि पुष्टा कलिप्रणष्टापि कथारसेन ।
क्वाहं तु तिष्ठाम्यधुना ब्रुवन्तु ब्राह्मा इदन्तां गिरमूचिरे ते ॥७०॥

साधनानां संग्रहः तेषां सूचकं अपवादकम् । 'सूच्' पैशुन्ये धातुः ॥५३।५४॥ सुखमावह प्रापय ममेति शेषः ॥ ५५ ॥ उग्रतां क्रूरताम् ॥५६।५७।५८।५९॥ प्रभासे क्षेत्रे ॥६०।६१।६२।६३॥ दुःखादीनां प्रक्षालनाय निवारणाय । धर्मः सप्ताहरूपः ॥६४।६५॥ नगाहः सप्ताहः तस्य श्रवणमेव उरुर्महान् धर्मः तस्मिन् ॥ ६६।६७ ॥ भागवतस्य अर्थः वाच्यार्थः भगवान् श्रीकृष्णः तं भूषयति अलङ्करोतीति तथाभूताम् । यद्वा । भागवता भक्ताः तेषामर्थं परमार्थं भूषयतीति ॥६८।६९॥ ब्रह्मण इमे पुत्राः ब्राह्मा

भक्तेषु गोविन्दसरूपकर्त्री प्रेमैकधत्री भवरोगहन्त्री ।
सा त्वं च तिष्ठस्व सुधैर्यसंश्रया निरन्तरं वैष्णवमानसानि ॥७१॥
ततोऽपि दोषाः कलिजा इमे त्वां द्रष्टुं न शक्ताः प्रभवोऽपि लोके ।
एवं तदाज्ञावसरेऽपि भक्तिस्तदा निषण्णा हरिदासचित्ते ।७२॥
सकलभुवनमध्ये निर्धनास्तेऽपि धन्या निवसति हृदि येषां श्रीहरेर्भक्तिरेका ।
हरिरपि निजलोकं सर्वथातो विहाय प्रविशति हृदि तेषां भक्तिसूत्रोपनद्धः ॥७३॥
ब्रूमोऽद्य ते किमधिकं महिमानमेवं ब्रह्मात्मकस्य भुवि भागवताभिधस्य ।
यत्संश्रयान्निगदिते लभते सुवक्ता श्रोतापि कृष्णसमतामलमन्यधर्मैः ॥७४॥

इति श्रीपद्मपुराणे उत्तरखण्डे श्रीमद्भागवतमाहात्म्ये भक्तिकष्टनिवर्तनं नाम तृतीयोऽध्यायः ॥ ३ ॥

अथ चतुर्थोऽध्यायः

सूत उवाच

अथ वैष्णवचित्तेषु दृष्ट्वा भक्तिमलौकिकीम् । निजलोकं परित्यज्य भगवान् भक्तवत्सलः ॥ १ ॥
वनमाली घनश्यामः पीतवासा मनोहरः । काञ्चीकलापरुचिरोल्लसन्मुकुटकुण्डलः ॥ २ ॥
त्रिभङ्गललितश्चारुकौस्तुभेन विराजितः । कोटिमन्मथलावण्यो हरिचन्दनचर्चितः ॥ ३ ॥
परमानन्दचिन्मूर्तिर्मधुरो मुरलीधरः । आविवेश स्वभक्तानां हृदयान्यमलानि च ॥ ४ ॥
वैकुण्ठवासिनो ये च वैष्णवा उद्धवादयः । तत्कथाश्रवणार्थं ते गूढरूपेण संस्थिताः ॥ ५ ॥
तदा जयजयारावो रसपुष्टिरलौकिकी । चूर्णप्रसूनवृष्टिश्च मुहुः शङ्खरवोऽप्यभूत् ॥ ६ ॥

ब्रह्मपुत्राः कुमारा इदन्तां वक्ष्यमाणप्रकाराम् । इदमो भाव इदन्तातामित्येकपदम् अहन्तावत् ॥७०।७१॥ ततः तस्मात् कारणात् । दोषाः पाखण्डादयः ॥७२॥ उपनद्धः बद्धः । 'णह बन्धने धातुः । मालिनी वृत्तम् ॥७३॥ ब्रह्मात्मकस्य वेदरूपस्य । यस्य संश्रयात् सम्बन्धात् निगदिते भागवते वाच्यमाने सति श्रोतापि कृष्णसमतां लभते । अन्यधर्मैं अलं न किञ्चित्प्रयोजनमित्यर्थः ।

इति श्रीपद्मपुराणे उत्तरखण्डे श्रीमद्भागवतमाहात्म्ये भक्तिकष्टनिवर्तनं नाम तृतीयोऽध्यायः ।

चतुर्थे श्रीहरेरादौ प्रादुर्भावः कथास्थले ।
आत्मदेवप्रसंगेन गोकर्णाख्यानमुच्यते ॥ १ ॥

अथ अलौकिकी भक्तिं दृष्ट्वा भगवान् भक्तानां हृदयानि आविवेशेति चतुर्थेनान्वयः । तस्य चतुर्दशविशेषणानि । आपादलम्बिनी माला वनमाला प्रकीर्तिता' । काञ्ची क्षुद्रघण्टिका तस्याः कलापैः[1] समूहैः रुचिरः । लसत् शोभमानं मुकुटं कुण्डले च यस्य । त्रिभङ्गेन कट्यादित्रिषु वक्रीभावेन ललितः मनोहरः । हरिचन्दनं श्रीखण्डं तेन चर्चितो भूषितः ॥१।२।३।४।५॥ आरावः ध्वनिः । चूर्णं हरिद्रादि ।

---

१. 'कलापः संहतौ बर्हे' इत्यमरः ।

तत्सभासंस्थितानां च देहगेहात्मविस्मृतिः । दृष्ट्वा च तन्मयावस्थां नारदो वाक्यमब्रवीत् । ७ ।

अलौकिकोऽयं महिमा मुनीश्वराः सप्ताहजन्योऽद्य विलोकितो मया ।
मूढाः शठा ये पशुपक्षिणोऽत्र सर्वेऽपि निष्पापतमा भवन्ति ॥ ८ ॥
अतो नृलोके ननु नास्ति किंचिच्चित्तस्य शोधाय कलौ पवित्रम् ।
अघौघविध्वंसकरं तथैव कथासमानं भुवि नास्ति चान्यत् ॥ ९ ॥
के के विशुद्ध्यन्ति वदन्तु मह्यं सप्ताहयज्ञेन कथामयेन ।
कृपालुभिर्लोकहितं विचार्य प्रकाशितः कोऽपि नवीनमार्गः ॥१०॥

कुमारा ऊचुः

ये मानवाः पापकृतस्तु सर्वदा सदा दुराचाररता विमार्गगाः ।
क्रोधाग्निदग्धाः कुटिलाश्च कामिनः सप्ताहयज्ञेन कलौ पुनन्ति ते ॥११॥
सत्येन हीनाः पितृमातृदूषकास्तृष्णाकुलाश्चाश्रमधर्मवर्जिताः ।
ये दाम्भिका मत्सरिणोऽपि हिंसकाः सप्ताहयज्ञेन कलौ पुनन्ति ते ॥१२॥
पञ्चोग्रपापाश्छलछद्मकारिणः क्रूराः पिशाचा इव निर्दयाश्च ये ।
ब्रह्मस्वपुष्टा व्यभिचारकारिणः सप्ताहयज्ञेन कलौ पुनन्ति ते ॥१३॥
कायेन वाचा मनसापि पातकं नित्यं प्रकुर्वन्ति शठा हठेन ये ।
परस्वपुष्टा मलिना दुराशयाः सप्ताहयज्ञेन कलौ पुनन्ति ते ॥१४॥

अत्र ते कीर्तयिष्यामि इतिहासं पुरातनम् । यस्य श्रवणमात्रेण पापहानिः प्रजायते ॥१५॥
तुङ्गभद्रातटे पूर्वमभूत् पत्तनमुत्तमम् । यत्र वर्णाः स्वधर्मेण सत्यसत्कर्मतत्पराः ॥१६॥
आत्मदेवः पुरे तस्मिन् सर्ववेदविशारदः । श्रौतस्मार्तेषु निष्णातो द्वितीय इव भास्करः॥१७॥
भिक्षुको वित्तवाँल्लोके तत्प्रिया धुन्धुली स्मृता । स्ववाक्यस्थापिका नित्यं सुन्दरी सुकुलोद्भवा
लोकवार्तारता क्रूरा प्रायशो बहुजल्पिका । शूरा च गृहकृत्येषु कृपणा कलहप्रिया ॥१९॥

शंखरवः शंखध्वनिः ॥ ६ ॥ देहगेहयोः आत्मनामात्मीयानां च विस्मरणमभूत् ॥७।८।९॥ कोऽपि अश्रुतपूर्वः ॥१०।११॥ परोत्कर्षासहनं मत्सरः तद्वान् मत्सरी । पित्रा सहिता माता पितृमाता तस्या दूषकाः । मध्यमपदलोपी समासः अन्यथा द्वन्द्वे तु 'आनङ् ऋतो द्वन्द्वे' इति पूर्वपदस्यानङ् स्यादित्यवधेयम् ॥१२॥

ब्रह्मघ्नश्चैव गोघ्नश्च स्वर्णस्तेयी च मद्यपः ।
तत्संसर्गी पञ्चमश्च ह्युग्रपापाः प्रकीर्तिताः ॥ १ ॥

उग्रपापाः महापापिनः । 'अर्श आद्यजन्तः । छलं वञ्चनम् । छद्म कपटम् । न्यूनाधिक्येन वस्तुदानं छलम् । न्यूनदानम् अधिकग्रहणम् । छलपदार्थः ।

मनस्यन्यत् वचस्यन्यत् कर्मण्यन्यत् विधाय च ।
क्रियते यन्नरे कर्म कैतवं तत्प्रकीर्तितम् ॥

इति कपटपदार्थः 'कपटोऽस्त्री व्याजदम्भोपधयश्छद्मकैतवे इत्यमरः । ब्रह्मस्वं ब्राह्मणधनम् ॥ १३।१४।१५ ॥ तुङ्गभद्रा नदी दक्षिणदेशस्था । पत्तनं विशालनगरम् ॥ १६।१७ ॥ वित्तवानपि भिक्षुकः प्रियाऽपि तत्समैव ॥ १८ ॥ लोकवार्ता स्तुतिनिन्दारूपा ॥ १९ ॥

एवं निवसतोः प्रेम्णा दम्पत्यो रममाणयोः । अर्थाः कामस्तयोरासन् सुखाय गृहादिकम् ॥२०॥
पश्चाद्धर्मः समारब्धस्ताभ्यां संतानहेतवे । गोभूहिरण्यवासांसि दीनेभ्यो यच्छतः सदा ॥२१॥
धनार्धं धर्ममार्गेण ताभ्यां नीतं तथापि च । न पुत्रो नापि वा पुत्री ततश्चिन्तातुरो भृशम् ।२२।
एकदा स द्विजो दुःखाद् गृहं त्यक्त्वा वनं गतः । मध्याह्ने तृषितो जातस्तडागं समुपेयिवान् ।२३।
पीत्वा जलं निषण्णस्तु प्रजादुःखेन कर्शितः । मुहूर्तादपि तत्रैव संन्यासी कश्चिदागतः ॥२४॥
दृष्ट्वा पीतजलं तं तु विप्रो यातस्तदन्तिकम् । नत्वा च पादयोस्तस्य निःश्वसन् संस्थितः पुरः २५

यतिउवाच

कथं रोदिषि विप्र त्वं का ते चिन्ता बलीयसी । वद त्वं सत्वरं मह्यं स्वस्य दुःखस्य कारणम् ।२६।

ब्राह्मण उवाच

किं ब्रवीमि ऋषे दुःखं पूर्वपापेन संचितम् । मदीयाः पूर्वजास्तोयं कवोष्णमुपभुञ्जते ॥२७॥
मद्दत्तं नैव गृह्णन्ति प्रीत्या देवा द्विजातयः । प्रजादुःखेन शून्योऽहं प्राणांस्त्यक्तुमिहागतः ।२८।
धिग्जीवितं प्रजाहीनं धिग्गृहं च प्रजां विना । धिग्धनं चानपत्यस्य धिक्कुलं संततिं विना ॥२९॥
पाल्यते या मया धेनुः साः वन्ध्या सर्वथा भवेत् । यो मया रोपितो वृक्षः सोऽपि वन्ध्यत्वमाश्रयेत्
यत्फलं मद्गृहायातं तच्च शीघ्रं विनश्यति । निर्भाग्यस्यानपत्यस्य किमतो जीवितेन मे ।३१।
इत्युक्त्वा स रुरोदोच्चैस्तत्पार्श्वे दुःखपीडितः । तदा तस्य यतेश्चित्ते करुणाभूद्गरीयसी ॥३२॥
तद्भालाक्षरमालां च वाचयामास योगवान् । सर्वं ज्ञात्वा यतिः पश्चाद्विप्रमूचे सविस्तरम् ३३

यतिरुवाच

मुञ्चाज्ञानं प्रजारूपं बलिष्ठा कर्मणो गतिः । विवेकं तु समासाद्य त्यज संसारवासनाम् ॥३४॥
शृणु विप्र मया तेऽद्य प्रारब्धं तु विलोकितम् । सप्तजन्मावधि तव पुत्रौ नैव च नैव च ॥३५॥
संततेः सगरो दुःखमवापाङ्गः पुरा तथा । रे मुञ्चाद्य कुटुम्बाशां संन्यासे सर्वथा सुखम् ॥३६॥

ब्राह्मण उवाच

विवेकेन भवेत् किं मे पुत्रं देहि बलादपि । नो चेत्त्यजाम्यहं प्राणांस्त्वदग्रे शोकमूर्च्छितः ।३७।
पुत्रादिसुखहीनोऽयं संन्यासः शुष्क एव हि । गृहस्थः सरसो लोके पुत्रपौत्रसमन्वितः ॥३८॥
इति विप्राग्रहं दृष्ट्वा प्राब्रवीत् स तपोधनः । चित्रकेतुर्गतः कष्टं विधिलेखविमार्जनात् ॥३९॥
न यास्यसि सुखं पुत्राद् यथा दैवहतोद्यमः । अतो हठेन युक्तोऽसि ह्यर्थिनं किं वदाम्यहम् ॥४०॥
तस्याग्रहं समालोक्य फलमेकं स दत्तवान् । इदं भक्षय पत्न्यै त्वं ततः पुत्रो भविष्यति ॥४१॥

अर्था धनादयः कामाः अभिलषितपदार्थाः ॥२०॥ यच्छतः दत्तः, तौ इति कर्तृपदमध्याहार्यम् ॥२१।२२।२३॥ निषण्णः आसीनः ॥२४॥ पादयोः पादौ नत्वा । कर्मणि षष्ठी ॥२५।२६॥ कवोष्णम् ईषदुष्णम् उपभुञ्जते पिबन्ति ॥२७।२८॥ प्रजाहीनं पुत्रहीनम् ॥२९।३०।३१॥ गरीयसी महती ॥३२।३३।३४।३५॥ अङ्गो नाम राजा तस्य पुत्रो वेनः ॥३६।४०॥ इदमाम्रफलं पत्न्यै त्वं भक्षय । ण्यन्तम् ॥ ४१ ॥

सत्यं शौचं दया दानमेकभक्तं तु भोजनम् । वर्षावधि क्रिया कार्या तेन पुत्रोऽतिनिर्मलः ॥४२॥
एवमुक्त्वा ययौ योगी विप्रस्तु गृहमागतः । पत्न्याः पाणौ फलं दत्त्वा स्वयं यातस्तु कुत्रचित् ॥४३॥
तरुणी कुटिला तस्य सख्यग्रे च रुरोद ह । अहो चिन्ता ममोत्पन्ना फलं चाहं न भक्षये ॥४४॥
फलभक्षेण गर्भः स्याद्गर्भेणोदरवृद्धिता । स्वल्पभक्ष्यं ततोऽशक्तिर्गृहकार्यं कथं भवेत् ॥४५॥
दैवाद् धाटी व्रजेद् ग्रामे पलायेद् गर्भिणी कथम् । शुकवन्निवसेद् गर्भस्तं कुक्षेः कथमुत्सृजेत् ॥४६॥
तिर्यक् चेदागतो गर्भस्तदा मे मरणं भवेत् । प्रसूतौ दारुणं दुःखं सुकुमारी कथं सहे ॥४७॥
मन्दायां मयि सर्वस्वं ननान्दा संहरेत्तदा । सत्यशौचादिनियमो दुराराध्यः स दृश्यते ॥४८॥
लालने पालने दुःखं प्रसूतायाश्च वर्तते । वन्ध्या वा विधवा नारी सुखिनी चेति मे मतिः ॥४९॥
एवं कुतर्कयोगेन तत्फलं नैव भक्षितम् । पत्या पृष्टं फलं भुक्तं भुक्तं चेति तयेरितम् ॥५०॥
एकदा भगिनी तस्यास्तद्गृहं स्वेच्छयाऽऽगता । तदग्रे कथितं सर्वं चिन्तेयं महती हि मे ॥५१॥
दुर्बला तेन दुःखेन ह्यनुजे करवाणि किम् । साब्रवीन्मम गर्भोऽस्ति तं दास्यामि प्रसूतितः ॥५२॥
तावत्कालं सगर्भेव गुप्ता तिष्ठ गृहे सुखम् । वित्तं त्वं मत्पतेर्यच्छ स ते दास्यति बालकम् ॥५३॥
षाण्मासिको मृतो बाल इति लोको वदिष्यति । तं बालं पोषयिष्यामि नित्यमागत्य ते गृहे ॥५४॥
फलमर्पय धेन्वै त्वं परीक्षार्थं तु साम्प्रतम् । तत्तदाचरितं सर्वं तथैव स्त्रीस्वभावतः ॥५५॥
अथ कालेन सा नारी प्रसूता बालकं तदा । आनीय जनको बालं रहस्ये धुन्धुलीं ददौ ॥५६॥
तया च कथितं भर्त्रे प्रसूतः सुखमर्भकः । लोकस्य सुखमुत्पन्नमात्मदेवप्रजोदयात् ॥५७॥
ददौ दानं द्विजातिभ्यो जातकर्म विधाय च । गीतवादित्रघोषोऽभूत्तद्द्वारे मङ्गलं बहु ॥५८॥
भर्तुरग्रेऽब्रवीद्वाक्यं स्तन्यं नास्ति कुचे मम । अन्यस्तन्येन निर्दुग्धा कथं पुष्णामि बालकम् ॥५९॥
मत्स्वसुश्च प्रसूताया मृतो बालस्तु वर्तते । तामाकार्य गृहे रक्ष सा तेऽर्भं पोषयिष्यति ॥६०॥
पतिना तत्कृतं सर्वं पुत्ररक्षणहेतवे । पुत्रस्य धुन्धुकारीति नाम मात्रा प्रतिष्ठितम् ॥६१॥
त्रिमासे निर्गते चाथ सा धेनुः सुषुवेऽर्भकम् । सर्वाङ्गसुन्दरं दिव्यं निर्मलं कनकप्रभम् ॥६२॥

एकभक्तं सकृद्भोजनम् ॥४२।४३॥ तस्य आत्मदेवस्य तरुणी भार्या ॥४४।४५॥ घाटी स्याच्चौरमण्डली । शुकवत् व्यासपुत्रवत् षोडशवर्षपर्यन्तम् ॥४६।४७॥ मन्दायाम् अशक्तायाम् । सर्वस्वं सम्पूर्णधनं ननान्दा भर्तुर्भगिनी संहरेत् नयेत् नेष्यतीत्यर्थः ॥४८।४९॥ ईरितं कथितम् ॥५०।५१।५२॥ मत्पतेः मम भर्त्रे यच्छ

आ चतुर्थात् भवेत्स्रावः पातः पञ्चमषष्ठयोः ।
अतः ऊर्ध्वं प्रसूतिः स्यात् दशाहं सूतकी भवेत् ॥१॥

देहि । द्रव्येण सर्वे वशाः ॥५३॥ क्व ते पुत्र इति लोकैः पृष्टा अहं मृतं वदिष्यामि लोकोऽपि तथा वदिष्यतीति षाण्मासिक इति ॥५४।५५॥ बालकं प्रसूता जनयामास । रहस्ये ऐकान्ते ॥५६॥ तया धुन्धुल्या ॥५७॥ जातकर्म संस्कारम् ॥५८॥ स्तन्यं दुग्धम् ॥ ५९ ॥ आकार्य आहूय आनीय वा । अर्भम् अर्भकं बालम् ! 'अर्भ बाल्ये धातुः ॥६०।६१॥ त्रिमासे भगिनीसंकेतात् मासत्रये व्यतीते सति धेन्वै फलमर्पितमिति प्रतीयते । केचित्तु विजातीयसन्ततिप्रभावात् गौर्द्वादशे मासे प्रसूतेत्याहुः यद्वा । धुन्धुकारीजन्मतः

दृष्ट्वा प्रसन्नो विप्रस्तु संस्कारान् स्वयमादधे । मत्वाऽऽश्चर्यं जनाः सर्वे दिदृक्षार्थं समागताः ६३
भाग्योदयोऽधुना जात आत्मदेवस्य पश्यत । धेन्वा बालः प्रसूतस्तु देवरूपीति कौतुकम् ॥६४॥
न ज्ञातं तद्रहस्यं तु केनापि विधियोगतः । गोकर्णं तं सुतं दृष्ट्वा गोकर्णं नाम चाकरोत् ।६५।
कियत्कालेन तौ जातौ तरुणौ तनयावुभौ । गोकर्णः पण्डितो ज्ञानी धुन्धुकारी महाखलः ॥६६॥
स्नानशौचक्रियाहीनो दुर्भक्षी क्रोधवर्धितः । दुष्परिग्रहकर्ता च शवहस्तेन भोजनम् ॥६७॥
चौरः सर्वजनद्वेषी परवेश्मप्रदीपकः । लालनायार्भकान् धृत्वा सद्यः कूपे न्यपातयत् ॥६८॥
हिंसकः शस्त्रधारी च दीनान्धानां प्रपीडकः । चाण्डालाभिरतो नित्यं पाशहस्तः श्वसङ्गतः ।६९।
तेन वेश्याकुसङ्गेन पित्र्यं वित्तं तु नाशितम् । एकदा पितरौ ताड्य पात्राणि स्वयमाहरत् ७०
तत्पिता कृपणः प्रोच्चैर्धनहीनो रुरोद ह । वन्ध्यत्वं तु समीचीनं कुपुत्रो दुःखदायकः ॥७१॥
क्व तिष्ठामि क्व गच्छामि को मे दुःखं व्यपोहयेत् । प्राणांस्त्यजामि दुःखेन हा कष्टं मम संस्थितम्
तदानीं तु समागत्य गोकर्णो ज्ञानसंयुतः । बोधयामास जनकं वैराग्यं परिदर्शयन् ॥७३॥
असारः खलु संसारो दुःखरूपी विमोहकः । सुतः कस्य धनं कस्य स्नेहवाञ्ज्वलतेऽनिशम् ॥७४।
न चेन्द्रस्य सुखं किंचिन्न सुखं चक्रवर्तिनः । सुखमस्ति विरक्तस्य मुनेरेकान्तजीविनः ॥७५॥
मुञ्चाज्ञानं प्रजारूपं मोहतो नरके गतिः । निपतिष्यति देहोऽयं सर्वं त्यक्त्वा वनं व्रज ॥७६॥
तद्वाक्यं तु समाकर्ण्य गन्तुकामः पिताब्रवीत् । किं कर्तव्यं वने तात तत्त्वं वद सविस्तरम् ॥७७।
अन्धकूपे स्नेहपाशे बद्धः पङ्गुरहं शठः । कर्मणा पतितो नूनं मामुद्धर दयानिधे ॥७८॥

गोकर्ण उवाच

देहेऽस्थिमांसरुधिरेऽभिमतिं त्यज त्वं जायासुतादिषु सदा ममतां विमुञ्च ।
पश्यानिशं जगदिदं क्षणभङ्गनिष्ठं वैराग्यरागरसिको भव भक्तिनिष्ठः ॥७९॥

धर्मं भजस्व सततं त्यज लोकधर्मान् सेवस्व साधुपुरुषाञ्जहि कामतृष्णाम् ।
अन्यस्य दोषगुणचिन्तनमाशु मुक्त्वा विष्णोः कथारसमहो नितरां पिब त्वम् ॥८०॥

त्रिमासे निर्गते सति ॥ ६२ ॥ आदधे चकार ॥ ६३ ॥ इति कौतुकं पश्यतेति योज्यम् ॥ ६४ ॥ विधियोगतः दैवबलात् ॥६५।६६॥ दुष्टा ये प्रतिग्रहाः तेषां कर्ता ग्रहीता । ते च ब्रह्माण्डोक्ता द्रष्टव्याः । तिलधेनुर्गजो वाजी प्रेतान्नमजिनं मणिः । सुरभिः सूर्यमाना च दुष्टाः सप्त प्रतिग्रहाः । मणिः शालग्रामः । शवहस्तेन साधनेन श्मशाने भुङ्क्ते इति तथा देशान्तरीयव्यवहारः । यद्वा । 'सव्यहस्तेन भोजनः इति पाठोऽपि क्वचित् । सव्यहस्तेन वामहस्तेन भोजनमस्ति अस्येति मत्वर्थीयोऽच्प्रत्ययः । 'वामहस्तेन यद्भुक्तं मांसतुल्यं स्मृतं बुधैः' इति स्मृते वामहस्तभोजननिषेधात् ॥६७।६८॥ श्वभिः कुक्कुरैः संगतः सहितः ॥ ६९ ॥ पित्र्यं पितृसंबन्धि ॥७०।७१॥ व्यपोहयेत् निवारयेत् ॥७२।७३।७४।७५।७६। ७७॥ कर्मणा अन्धकूपे पतित इत्यन्वयः॥७८।७९॥लोकधर्मान् काम्यधर्मान् काम्यन्ते इति कामा विषयाः

एवं सुतोक्तिवशतोऽपि गृहं विहाय यातो वनं स्थिरमतिर्गतषष्टिवर्षः ।
युक्तो हरेरनुदिनं परिचर्ययासौ श्रीकृष्णमाप नियतं दशमस्य पाठात् ॥८१॥

इति श्रीपद्मपुराणे उत्तरखण्डे श्रीमद्भागवतमाहात्म्ये विप्रमोक्षो नाम चतुर्थोऽध्यायः ॥ ४ ॥

अथ पञ्चमोऽध्यायः

सूत उवाच

पितर्युपरते तेन जननी ताडिता भृशम् । क्व वित्तं तिष्ठते ब्रूहि हनिष्ये लत्तया न चेत् ॥ १ ॥
इति तद्वाक्यसंत्रासाज्जनन्या पुत्रदुःखतः । कूपे पातः कृतो रात्रौ तेन सा निधनं गता ॥ २ ॥
गोकर्णस्तीर्थयात्रार्थं निर्गतो योगसंस्थितः । न दुःखं न सुखं तस्य न वैरी नापि बान्धवः ॥ ३ ॥
धुन्धुकारी गृहेऽतिष्ठत् पञ्चपण्यवधूवृतः । अत्युग्रकर्मकर्ता च तत्पोषणविमूढधीः ॥ ४ ॥
एकदा कुलटास्तास्तु भूषणान्यभिलिप्सवः । तदर्थं निर्गतो गेहात्कामान्धो मृत्युमस्मरन् ॥ ५ ॥
यतस्ततश्च संहृत्य वित्तं वेश्म पुनर्गतः । ताभ्योऽयच्छत्सुवस्त्राणि भूषणानि कियन्ति च ।६।
बहुवित्तचयं दृष्ट्वा रात्रौ नार्यो व्यचारयन् । चौर्यं करोत्यसौ नित्यमतो राजा ग्रहीष्यति ॥७॥
वित्तं हृत्वा पुनश्चैनं मारयिष्यति निश्चितम् । अतोऽर्थगुप्तये गूढमस्माभिः किं न हन्यते ॥८ ॥
निहत्यैनं गृहीत्वार्थं यास्यामो यत्र कुत्रचित् । इति ता निश्चयं कृत्वा सुप्तं सम्बद्ध्य रश्मिभिः ९
पाशं कण्ठे निधायास्य तन्मृत्युमुपचक्रमुः । त्वरितं न ममारासौ चिन्तायुक्तास्तदाभवन् ।१०।
तप्ताङ्गारसमूहांश्च तन्मुखे हि विचिक्षिपुः । अग्निज्वालातिदुःखेन व्याकुलो निधनं गतः॥११॥
तं देहं मुमुचुर्गर्ते प्रायः साहसिकाः स्त्रियः । न ज्ञातं तद्रहस्यं तु केनापीदं तथैव च ॥१२॥
लोकैः पृष्टा वदन्ति स्म दूरं यातः प्रियो हि नः । आगमिष्यति वर्षेऽस्मिन् वित्तलोभविकर्षितः ॥१३
स्त्रीणां नैव तु विश्वासं दुष्टानां कारयेद् बुधः । विश्वासे यः स्थितो मूढः स दुःखैः परिभूयते १४
सुधामयं वचो यासां कामिनां रसवर्धनम् । हृदयं क्षुरधाराभं प्रियः को नाम योषिताम् ।१५।

तेषां तृष्णामासक्तिम् । विष्णोः कथा रसमहो इत्येव पाठः प्रशस्तः ॥ ८० ॥ वशतः आग्रहतः वनं यातः गतः । तत्र अनुदिनं हरेः परिचर्यया युक्तः असौ आत्मदेवः दशमस्य पाठात् श्रीकृष्णमापेत्यन्वयः ।

इति श्रीपद्मपुराणे उत्तरखण्डे श्रीमद्भागवतमाहात्म्ये विप्रमोक्षो नाम चतुर्थोऽध्यायः ।

पञ्चमे धुन्धुकारी तु वेश्याभिर्मारितो निशि ।
भ्रमन्तं प्रेतरूपेण गोकर्णस्तं व्यमोचयत् ॥ १ ॥

उपरते मृते सति तेन धुन्धुकारिणा । लत्तया पादप्रहारेण ॥१।२॥ योगसंस्थितः योगमाश्रित्य स्थितः ॥३॥ पण्यवधूभिः वेश्याभिः वृतः संयुक्तः । तासां पोषणे विमूढा आसक्ता धीः बुद्धिः यस्य सः ॥४॥ कुलटाः पुंश्चल्यः ॥ ५ ॥ वेश्म स्वगृहम् ॥ ६ ॥ वित्तचयं धनराशिम् ॥ हृत्वा आच्छिद्य । अर्थगुप्तये धनरक्षणाय ॥ ८ ॥ सुप्तं धुन्धुकारिणम् ॥९।१०।११।१२॥ ता वदन्ति स्म अवदन् ॥ १३ ॥ अप्यर्थे तु शब्दः । मृतानामपि ॥ १४ ॥ रसवर्धनं प्रीतिकरम् । क्षुरधारासदृशम् ॥ १५ ॥ याता अन्यत्र

संहृत्य वित्तं ता याताः कुलटा बहुभर्तृकाः । धुन्धुकारी बभूवाथ महान् प्रेतः कुकर्मतः ॥१६॥
वात्यारूपधरो नित्यं धावन् दशदिशोऽन्तरम् । शीतातपपरिक्लिष्टो निराहारः पिपासितः॥१७॥
न लेभे शरणं क्वापि हा दैवेति मुहुर्वदन् । कियत्कालेन गोकर्णो मृतं लोकादबुध्यत ॥१८॥
अनाथं तं विदित्वैव गयाश्राद्धमचीकरत् । यस्मिंस्तीर्थे तु संयाति तत्र श्राद्धमवर्तयत् ॥१९॥
एवं भ्रमन् स गोकर्णः स्वपुरं समुपेयिवान् । रात्रौ गृहाङ्गणे स्वप्तुमागतोऽलक्षितः परैः॥२०॥
तत्र सुप्तं स विज्ञाय धुन्धुकारी स्वबान्धवम् । निशीथे दर्शयामास महारौद्रतरं वपुः ॥२१॥
सकृन्मेषः सकृद्धस्ती सकृच्च महिषोऽभवत् । सकृदिन्द्रः सकृच्चाग्निः पुनश्च पुरुषोऽभवत् २२
वैपरीत्यमिदं दृष्ट्वा गोकर्णो धैर्यसंयुतः । अयं दुर्गतिकः कोऽपि निश्चित्याथ तमब्रवीत् ॥२३॥

गोकर्ण उवाच

कस्त्वमुग्रतरो रात्रौ कुतो यातो दशामिमाम् । किं वा प्रेतः पिशाचो वा राक्षसोऽसीति शंस नः

सूत उवाच

एवं पृष्टस्तदा तेन रुरोदोच्चैः पुनः पुनः । अशक्तो वचनोच्चारे संज्ञामात्रं चकार ह ॥२५॥
ततोऽञ्जलौ जलं कृत्वा गोकर्णस्तमुदैरयत् । तत्सेकहतपापोऽसौ प्रवक्तुमुपचक्रमे ॥२६॥

प्रेत उवाच

अहं भ्राता त्वदीयोऽस्मि धुन्धुकारीति नामतः । स्वकीयेनैव दोषेण ब्रह्मत्वं नाशितं मया ।२७।
कर्मणो नास्ति संख्या मे महाज्ञाने विवर्तिनः । लोकानां हिंसकः सोऽहं स्त्रीभिर्दुःखेन मारितः
अतः प्रेतत्वमापन्नो दुर्दशां च वहाम्यहम् । वाताहारेण जीवामि दैवाधीनफलोदयात् ॥२९॥
अहो बन्धो कृपासिन्धो भ्रातर्मामाशु मोचय । गोकर्णो वचनं श्रुत्वा तस्मै वाक्यमथाब्रवीत् ३०

गोकर्ण उवाच

त्वदर्थं तु गयापिण्डो मया दत्तो विधानतः । तत्कथं नैव मुक्तोऽसि ममाश्चर्यमिदं महत् ॥३१॥
गयाश्राद्धान्न मुक्तिश्चेदुपायो नापरस्त्विह । किं विधेयं मया प्रेत तत्त्वं वद सविस्तरम्॥३२॥

प्रेत उवाच

गयाश्राद्धशतेनापि मुक्तिर्मे न भविष्यति । उपायमपरं कंचित्त्वं विचारय साम्प्रतम् ॥३३॥
इति तद्वाक्यमाकर्ण्य गोकर्णो विस्मयं गतः । शतश्राद्धैर्न मुक्तिश्चेदसाध्यं मोचनं तव ॥३४॥
इदानीं तु निजं स्थानमातिष्ठ प्रेत निर्भयः । त्वन्मुक्तिसाधकं किंचिदाचरिष्ये विचार्य च।३५।
धुन्धुकारी निजस्थानं तेनादिष्टस्ततो गतः । गोकर्णश्चिन्तयामास तां रात्रिं न तदध्यगात् ।३६।

गताः ॥ १६ ॥ वात्यारूपं वायवीयरूपम् ॥ १७ ॥ गृहरक्षित्रोः ॥ १८ ॥ अवर्तयत् आवृत्त्या अकरोत् ॥१९।२०।२१॥ इन्द्रो नरेन्द्रः न तु सुरपतिः ॥२२।२३॥ प्रेतादीनां भेदो यथा—

भूतः क्रियाविहीनः स्यात्प्रेतस्तु महतो ह्यघात् ।
पिशाचः सूतिकास्पर्शी राक्षसो जीवहिंसकः ॥१॥ इति कर्मविपाकात्

॥२४॥ संज्ञामात्रं ध्वनिमात्रम् । 'अज्ञातार्था तु या वाणी संज्ञामात्रं तदुच्यते । हेति दुःखे ॥ २५ ॥ उदैरयत् तमुद्दिश्य चिक्षेप ॥२६।२७॥ कर्मणः पापकर्मणः विवर्तिनः निमग्नस्य ॥ २८ ॥ फलोदयात् फलप्राप्तिमाश्रित्य जीवामीत्यन्वयः । ल्यब्लोपे पञ्चमी ॥२९।३०।३१॥ तत् साधनं त्वं वद ॥ ३२ ॥ तत् तस्मात् अपरमुपायं साधनम् ॥३३।३४।३५॥ तां रात्रिं तद्रात्रौ

प्रातस्तमागतं दृष्ट्वा लोकः प्रीत्या समागताः। तत्सर्वं कथितं तेन यज्जातं च यथा निशि३७
विद्वांसो योगनिष्ठाश्च ज्ञानिनो ब्रह्मवादिनः। तन्मुक्तिं नैव तेऽपश्यन् पश्यन्तः शास्त्रसंचयान्
ततः सर्वैः सूर्यवाक्यं तन्मुक्तौ स्थापितं परम्। गोकर्णः स्तम्भनं चक्रे सूर्यवेगस्य वै तदा ॥३९॥
तुभ्यं नमो जगत्साक्षिन् ब्रूहि मे मुक्तिहेतुकम्। तच्छ्रुत्वा दूरतः सूर्यः स्फुटमित्यभ्यभाषत।४०।
श्रीमद्भागवतान्मुक्तिः सप्ताहे वाचनं कुरु। इति सूर्यवचः सर्वैर्धर्मरूपं तु विश्रुतम् ॥४१॥
सर्वेऽब्रुवन् प्रयत्नेन कर्तव्यं सुकरं त्विदम्। गोकर्णो निश्चयं कृत्वा वाचनार्थं प्रवर्तितः ॥४२॥
तत्र संश्रवणार्थाय देशग्रामाज्जना ययुः। पङ्ग्वन्धवृद्धमन्दाश्च तेऽपि पापक्षयाय वै ॥४३॥
समाजस्तु महाञ्जातो देवविस्मयकारकः। यदैवासनमास्थाय गोकर्णोऽकथयत्कथाम् ॥४४॥
स प्रेतोऽपि तदायातः स्थानं पश्यन्नितस्ततः। सप्तग्रन्थियुतं तत्रापश्यत्कीचकमुच्छ्रितम् ॥४५॥
तन्मूलच्छिद्रमाविश्य श्रवणार्थं स्थितो ह्यसौ। वातरूपी स्थितिं कर्तुमशक्तो वंशमाविशत् ४६
वैष्णवं ब्राह्मणं मुख्यं श्रोतारं परिकल्प्य सः। प्रथमस्कन्धतः स्पष्टमाख्यानं धेनुजोऽकरोत्।४७।
दिनान्ते रक्षिता गाथा तदा चित्रं बभूव ह। वंशैकग्रन्थिभेदोऽभूत्सशब्दं पश्यतां सताम् ।४८।
द्वितीयेऽह्नि तथा सायं द्वितीयग्रन्थिभेदनम्। तृतीयेऽह्नि तथा सायं तृतीयग्रन्थिभेदनम् ॥४९॥
एवं सप्तदिनैश्चैव सप्तग्रन्थिविभेदनम्। कृत्वा स द्वादशस्कन्धश्रवणात्प्रेततां जहौ ॥५०॥
दिव्यरूपधरो जातस्तुलसीदाममण्डितः। पीतवासा घनश्यामो मुकुटी कुण्डलान्वितः ॥५१॥
ननाम भ्रातरं सद्यो गोकर्णमिति चाब्रवीत्। त्वयाहं मोचितो बन्धो कृपया प्रेतकश्मलात्५२
धन्या भागवती वार्ता प्रेतपीडाविनाशिनी। सप्ताहोऽपि तथा धन्यः कृष्णलोकफलप्रदः ॥५३॥
कम्पन्ते सर्वपापानि सप्ताहश्रवणे स्थिते। अस्माकं प्रलयं सद्यः कथा चेयं करिष्यति॥५४॥
आर्द्रं शुष्कं लघु स्थूलं वाङ्मनःकर्मभिः कृतम्। श्रवणं विदहेत्पापं पावकः समिधो यथा ।५५।
अस्मिन् वै भारते वर्षे सूरिभिर्देवसंसदि। अकथाश्राविणां पुंसां निष्फलं जन्म कीर्तितम् ।५६।
किं मोहतो रक्षितेन सुपुष्टेन बलीयसा। अध्रुवेण शरीरेण शुकशास्त्रकथां विना ॥५७॥
अस्थिस्तम्भं स्नायुबद्धं मांसशोणितलेपितम्। चर्मावनद्धं दुर्गन्धं पात्रं मूत्रपुरीषयोः ॥५८॥
जराशोकविपाकार्तं रोगमन्दिरमातुरम्। दुष्पूरं दुर्धरं दुष्टं सदोषं क्षणभङ्गुरम् ॥५९॥

अत्यन्तसंयोगे द्वितीया। तत् मुक्तिसाधनं न अध्यगात् न निश्चितवान् ॥३६॥ तं गोकर्णम् ॥३७।३८।३९।४०। सप्ताहे सप्ताहनिमित्तं श्रीमद्भागवतस्य वाचनं कुरु ॥ ४१ ॥ सुकरं सुखेन 'सुकरं सुन्दरं सुखे' इति भट्टोक्तेः ॥ ४२ ॥ तत्र कथामण्डपे। तेऽपि ययुरिति योज्यम् ॥४३।४४॥ उच्छ्रितमत्युच्चं कीचकं वंशम् ॥४५।४६॥ धेनुजः गोकर्णः ॥४७॥ ह स्फुटम् चित्रमाश्चर्यम् ॥४८।४९।५०॥ दाम माला ॥५१॥ कश्मलं दुःखम् ॥५२॥ धन्या प्रशंसार्हा ॥५३।५४॥ आर्द्रं ज्ञानपूर्वकम्। शुष्कं अज्ञानपूर्वकम्। लघु कीटपतङ्गघातादि। स्थूलं चतुष्पदवधादि। श्रवणं भागवतश्रवणं कर्तृपदम्। समिधः काष्ठानि ॥५५।५६॥ कथां विना मोहतः स्नेहात् रक्षितेन शरीरेण किं प्रयोजनं न किमपीत्यर्थः ॥५७॥ शरीरं वर्णयति त्रिभिः। चर्मणा अवनद्धम् आच्छादितम् ॥५८॥ जरा शोकयोः विपाकः

कृमिविड्भस्मसंज्ञान्तं शरीरमिति वर्णितम् । अस्थिरेण स्थिरं कर्म कुतोऽयं साधयेन्न हि ।६०।
यत्प्रातः संस्कृतं चान्नं सायं तच्च विनश्यति । तदीयरससम्पुष्टे काये का नाम नित्यता ।।६१।।
सप्ताहश्रवणाल्लोके प्राप्यते निकटे हरिः । अतो दोषनिवृत्त्यर्थमेतदेव हि साधनम् ।।६२।।
बुद्बुदा इव तोयेषु मशका इव जन्तुषु । जायन्ते मरणायैव कथाश्रवणवर्जिताः ।।६३।।
जडस्य शुष्कवंशस्य यत्र ग्रन्थिविभेदनम् । चित्तं किमु तदा चित्तग्रन्थिभेदः कथाश्रवात् ।।६४।।
भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः । क्षीयन्ते चास्य कर्माणि सप्ताहश्रवणे कृते ।।६५।।
संसारकर्दमालेपप्रक्षालनपटीयसि । कथातीर्थे स्थिते चित्ते मुक्तिरेव बुधैः स्मृता ।।६६।।
एवं ब्रुवति वै तस्मिन् विमानमागमत्तदा । वैकुण्ठवासिभिर्युक्तं प्रस्फुरद्दीप्तिमण्डलम् ।।६७।।
सर्वेषां पश्यतां भेजे विमानं धुन्धुलीसुतः । विमाने वैष्णवान् वीक्ष्य गोकर्णो वाक्यमब्रवीत् ६८

गोकर्ण उवाच

अत्रैव बहवः सन्ति श्रोतारो मम निर्मलाः । आनीतानि विमानानि न तेषां युगपत्कुतः ।।६९।।
श्रवणं समभागेन सर्वेषामिह दृश्यते । फलभेदः कुतो जातः प्रब्रुवन्तु हरिप्रियाः ।।७०।।

हरिदासा ऊचुः

श्रवणस्य विभेदेन फलभेदोऽत्र संस्थितः । श्रवणं तु कृतं सर्वैर्न तथा मननं कृतम् ।
फलभेदस्ततो जातो भजनादपि मानद ।।७१।।

सप्तरात्रमुपोष्यैव प्रेतेन श्रवणं कृतम् । मननादि तथा तेन स्थिरचित्ते कृतं भृशम् ।।७२।।
अदृढं च हतं ज्ञानं प्रमादेन हतं श्रुतम् । संदिग्धो हि हतो मन्त्रो व्यग्रचित्तो हतो जपः ।।७३।।
अवैष्णवो हतो देशो हतं श्राद्धमपात्रकम् । हतमश्रोत्रिये दानमनाचारं हतं कुलम् ।।७४।।

फलमशक्तता तेन आर्तम् । आतुरं खिन्नम् । दुर्धरं धर्तुमपि अशक्यम् । दुष्टं निन्दितम् । दोषैः वातपित्रादिभिः सहितम् । क्षणेन भङ्गुरो नाशो यस्य तत् ।।५९।। कृम्यादि संज्ञा अन्ते यस्य तत् । स्थिरं कर्म धर्मादि भगवदाराधनं वा ।। ६० ।। संस्कृतं दैनिकसंस्कारेण भुक्तम् ।। ६१ ।। दोषनिवृत्यर्थं पापनिराकरणाय एतदेव भागवतश्रवणमेव साधनम् । हि मुख्यार्थे ।।६२।६३।। ग्रन्थिः अहङ्कारलक्षणः । वासनारूपी वा ।। ६४ ।। संशया असंभावनाविपरीतभावनारूपाः ।। ६५ ।। संसार एव कर्दमः जन्ममरणादिलक्षणः तस्य आलेपो योगः तस्य प्रक्षालने निवारणे पटीयसि अतिशयेन समर्थे कथातीर्थे ।।६६।। प्रस्फुरत् चतुर्दिक्षु तेजोमण्डलं यस्य तत् ।।६७।। भेजे प्राप्तवान् आरुरोहेत्यर्थः ।।६८।। युगपत् एतत्समकालमेव ।।६९।। हे हरिप्रियाः ।।७०।७१।।भजनात् श्रद्धावैगुण्यात् ।।७२।। अदृढम् अपक्वम् । श्रुतं शास्त्रश्रवणम् ।।७३।। व्यग्रं विन्तया व्यग्रं चित्तं यस्मिन् तथाभूतो जपः । अपात्रं सत्पात्ररहितम् ।।७४।।

विश्वासो गुरुवाक्येषु स्वस्मिन्दीनत्वभावना। मनोदोषजयश्चैव कथायां निश्चला मतिः॥७५॥
एवमादि कृतं चेत्स्यात्तदा वै श्रवणे फलम् । पुनः श्रवान्ते सर्वेषां वैकुण्ठे वसतिर्ध्रुवम् ॥७६॥
गोकर्ण तव गोविन्दो गोलोकं दास्यति स्वयम् । एवमुक्त्वा ययुः सर्वे वैकुण्ठं हरिकीर्तनाः॥७७॥
श्रावणे मासि गोकर्णः कथामूचे तथा पुनः। सप्तरात्रवतीं भूयः श्रवणं तैः कृतं पुनः ॥७८॥

कथासमाप्तौ यज्जातं श्रूयतां तच्च नारद ॥७९॥

विमानैः सह भक्तैश्च हरिराविर्बभूव ह। जयशब्दा नमः शब्दास्तत्रासन् बहवस्तदा ॥८०॥
पाञ्चजन्यध्वनिं चक्रे हर्षात्तत्र स्वयं हरिः। गोकर्णं तु समालिङ्ग्याकरोत्स्वसदृशं हरिः॥८१॥
श्रोतॄनन्यान् घनश्यामान् पीतकौशेयवाससः। किरीटिनः कुण्डलिनस्तथा चक्रे हरिः क्षणात्८२
तद्ग्रामे ये स्थिता जीवा आश्वचाण्डालजातयः। विमाने स्थापितास्तेऽपि गोकर्णकृपया तदा
प्रेषिता हरिलोके ते यत्र गच्छन्ति योगिनः। गोकर्णेन स गोपालो गोलोकं गोपवल्लभम् ।

कथाश्रवणतः प्रीतो निर्ययौ भक्तवत्सलः ॥८४॥

अयोध्यावासिनः पूर्वं यथा रामेण सङ्गताः। तथा कृष्णेन ते नीता गोलोकं योगिदुर्लभम्॥८५॥
यत्र सूर्यस्य सोमस्य सिद्धानां न गतिः कदा। तं लोकं हि गतास्ते तु श्रीमद्भागवतश्रवात् ।८६।

ब्रूमोऽत्र ते किं फलवृन्दमुज्ज्वलं सप्ताहयज्ञेन कथासु संचितम् ।
कर्णेन गोकर्णकथाक्षरो यैः पीतश्च ते गर्भगता न भूयः ॥८७॥
वाताम्बुपर्णाशनदेहशोषणैस्तपोभिरुग्रैश्चिरकालसंचितैः ।
योगैश्च संयान्ति न तां गतिं वै सप्ताहगाथाश्रवणेन यान्ति याम् ॥८८॥

इतिहासमिमं पुण्यं शाण्डिल्योऽपि मुनीश्वरः। पठते चित्रकूटस्थो ब्रह्मानन्दपरिप्लुतः ॥८९॥

आख्यानमेतत्परमं पवित्रं श्रुतं सकृद् वै विदहेदघौघम्।
श्राद्धे प्रयुक्तं पितृतृप्तिमावहेन्नित्यं सुपाठादपुनर्भवं च ॥९०॥

इति श्रीपद्मपुराणे उत्तरखण्डे श्रीमद्भागवतमाहात्म्ये गोकर्णमोक्षवर्णनं नाम पञ्चमोऽध्यायः ॥ ५ ॥

अश्रोत्रिये स्वाध्यायशून्ये ॥७५।७६॥ वसतिः निवासः ॥७७।७८।७९।८०।८१॥ श्रोतॄन् तथाभूतान् चक्रे इत्यन्वयः। पीते कौशेयवाससी येषां तान् ॥८२॥ श्वादीन् श्वपचादीन् अभिव्याप्य सर्वेऽपि ॥८३॥ स सहार्थे ॥८४।८५।८६॥ फलवृन्दं फलसमूहम् । अक्षरः पदमात्रमपि लक्षणया अक्षरशब्दस्य पदमात्रे शक्तिः। पीतः श्रुतः ॥८७॥ वातादीनामशनेन यत् देहशोषणं तैः ॥८८॥ अघौघं पापसमूहं विदहेत् भस्मीकुर्यात्। श्राद्धे पार्वणादौ। सुपाठात् शुद्धपाठात् न तु द्रुतगत्या। अपुनर्भवं मोक्षं च जावहेत् प्राप्नुयात्। आख्यानं कर्तृपदम् ॥९०॥

इति श्रीपद्मपुराणे श्रीमद्भागवतमाहात्म्ये धुन्धुकारिमोक्षवर्णनं नाम पञ्चमोऽध्यायः ॥ ५ ॥

अथ षष्ठोऽध्यायः

कुमारा ऊचुः

अथ ते सम्प्रवक्ष्यामः सप्ताहश्रवणे विधिम्। सहायैर्वसुभिश्चैव प्रायः साध्यो विधिः स्मृतः॥१॥
दैवज्ञं तु समाहूय मुहूर्तं पृच्छच यत्नतः। विवाहे यादृशं वित्तं तादृशं परिकल्पयेत्॥२॥
नभस्य आश्विनोर्जौ च मार्गशीर्षः शुचिर्नभाः। एते मासाः कथारम्भे श्रोतृणां मोक्षसूचकाः॥३॥
मासानां विप्र हेयानि तानि त्याज्यानि सर्वथा। सहायाश्चेतरे तत्र कर्तव्याः सोद्यमाश्च ये॥४॥
देशे देशे तथा सेयं वार्ता प्रेष्या प्रयत्नतः। भविष्यति कथा चात्र आगन्तव्यं कुटुम्बिभिः॥५॥
दूरेहरिकथाः केचिद् दूरेचाच्युतकीर्तनाः। स्त्रियः शूद्रादयो ये च तेषां बोधो यतो भवेत्॥६॥
देशे देशे विरक्ता ये वैष्णवाः कीर्तनोत्सुकाः। तेष्वेव पत्रं प्रेष्यं च तल्लेखनमितीरितम्॥७॥
सतां समाजो भविता सप्तरात्रं सुदुर्लभः। अपूर्वरसरूपैव कथा चात्र भविष्यति॥८॥
श्रीभागवतपीयूषपानाय रसलम्पटाः। भवन्तश्च तथा शीघ्रमायात प्रेमतत्पराः॥९॥
नावकाशः कदाचिच्चेद्दिनमात्रं तथापि तु। सर्वथागमनं कार्यं क्षणोऽत्रैव सुदुर्लभः॥१०॥
एवमाकरणं तेषां कर्तव्यं विनयेन च। आगन्तुकानां सर्वेषां वासस्थानानि कल्पयेत्॥११॥
तीर्थे वापि वने वापि गृहे वा श्रवणं मतम्। विशाला वसुधा यत्र कर्तव्यं तत्कथास्थलम्॥१२॥
शोधनं मार्जनं भूमेर्लेपनं धातुमण्डनम्। गृहोपस्करमुद्धृत्य गृहकोणे निवेशयेत्॥१३॥
अर्वाक्पञ्चाहतो यत्नादास्तीर्णानि प्रमेलयेत्। कर्तव्यो मण्डपः प्रोच्चैः कदलीखण्डमण्डितः॥१४॥
फलपुष्पदलैर्विष्वग्वितानेन विराजितः। चतुर्दिक्षु ध्वजारोपो बहुसम्पद्विराजितः॥१५॥

षष्ठे भागवतस्यास्य सप्ताहश्रवणे विधिः।
साङ्गोपाङ्गं यथाशास्त्रं संक्षेपेणात्र वर्ण्यते॥१॥

अथ मङ्गलार्थे। वसुभिः अष्टभिः सहायैः सहायकैः। यद्वा। वसुभिः धनैः सहायकैश्च। प्रायः बाहुल्येन पूर्णरूपेणेत्यर्थः। 'प्रायो बाहुल्यतुल्ययोः' इति मेदिनी॥१।२॥ नभस्य भाद्रपदः। ऊर्जः कार्तिकः। शुचिः आषाढः। नभाः श्रावणः॥ ३॥ हे विप्र इति पाठः साधुः न तु विग्रहे इति। मासानां मासेषु यानि हेयानि तानि सप्ताहेऽपि त्याज्यानि। सहायाः सहायकाः॥ ४॥ वार्ता समाचारः॥ ५॥ तेषां च तेषामपि यतो बोधो भवेत् अतः वार्ता प्रैष्येति योज्यम्॥ ६॥ इति वक्ष्यमाणप्रकारेण ईरितं कथितम्॥७।८॥ भागवतमेव पीयूषं अमृतं तस्य पानाय। भवन्तो रसलम्पटाः रसविशेषज्ञाः सन्ति अतो यूयं शीघ्रमायात आगच्छतेति योज्यम्॥९॥ सर्वथा सर्वप्रकारेण सर्वकार्यं परित्यज्येत्यर्थः॥१०॥ आकारणम् आह्वानम्॥११।१२॥ शोधनं पञ्चगव्यादिना। मार्जनं मलाद्युत्सारणम्। धातुः गैरिकादिः तेन मण्डनम् अलङ्करणम्। मडि भूषायां धातुः। गृहोपस्करं गृहोपकरणम्। निवेशयेत् स्थापयेत्॥१३॥ पञ्चाहतः पञ्चदिनात् अर्वाक् पूर्वम् आस्तीर्णानि भूम्याच्छादनानि कटविष्टरादीनि प्रमेलयेत् सम्पादयेत्। प्रोच्चैः उच्चतरः॥ १४॥ वितानं मण्डपाच्छादनम्। 'पञ्चवर्णं' वितानं स्यान्मण्डपाच्छादनाय च

ऊर्ध्वं समैव लोकाश्च कल्पनीयाः सविस्तरम् । तेषु विप्रा विरक्ताश्च स्थापनीयाः प्रबोध्य च
पूर्वं तेषामासनानि कर्तव्यानि यथोत्तरम् । वक्तुश्चापि तदा दिव्यमासनं परिकल्पयेत् ॥१७॥
उदङ्मुखो भवेद्वक्ता श्रोता वै प्राङ्मुखस्तदा । प्राङ्मुखश्चेद् भवेद्वक्ता श्रोता चोदङ्मुखस्तदा १८
अथवा पूर्वदिग्ज्ञेया पूज्यपूजकमध्यतः । श्रोतॄणामागमे प्रोक्ता देशकालादिकोविदैः ॥१९॥
विरक्तो वैष्णवो विप्रो वेदशास्त्रविशुद्धिकृत् । दृष्टान्तकुशलो धीरो वक्ता कार्योऽतिनिःस्पृहः २०
अनेकधर्मविभ्रान्ताः स्त्रैणाः पाखण्डवादिनः । शुकशास्त्रकथोच्चारे त्याज्यास्ते यदि पण्डिताः २१
वक्तुः पार्श्वे सहायार्थमन्यः स्थाप्यस्तथाविधः । पण्डितः संशयच्छेत्ता लोकबोधनतत्परः ॥२२॥
वक्त्रा क्षौरं प्रकर्तव्यं दिनादर्वाग्व्रताप्तये । अरुणोदयेऽसौ निर्वर्त्य शौचं स्नानं समाचरेत् ॥२३॥
नित्यं संक्षेपतः कृत्वा संध्याद्यं स्वं प्रयत्नतः । कथाविघ्नविघाताय गणनाथं प्रपूजयेत् ॥२४॥
पितॄन् संतर्प्य शुद्ध्यर्थं प्रायश्चित्तं समाचरेत् । मण्डलं च प्रकर्तव्यं तत्र स्थाप्यो हरिस्तथा ॥२५॥
कृष्णमुद्दिश्य मन्त्रेण चरेत्पूजाविधिं क्रमात् । प्रदक्षिणनमस्कारान् पूजान्ते स्तुतिमाचरेत् २६
संसारसागरे मग्नं दीनं मां करुणानिधे । कर्ममोहगृहीताङ्गं मामुद्धर भवार्णवात् ॥२७॥
श्रीमद्भागवतस्यापि ततः पूजा प्रयत्नतः । कर्तव्या विधिना प्रीत्या धूपदीपसमन्विता ॥२८॥
ततस्तु श्रीफलं धृत्वा नमस्कारं समाचरेत् । स्तुतिः प्रसन्नचित्तेन कर्तव्या केवलं तदा ॥२९॥
श्रीमद्भागवताख्योऽयं प्रत्यक्षः कृष्ण एव हि । स्वीकृतोऽसि मया नाथ मुक्त्यर्थं भवसागरे ३०
मनोरथो मदीयोऽयं सफलः सर्वथा त्वया । निर्विघ्नेनैव कर्तव्यो दासोऽहं तव केशव ॥३१॥
एवं दीनवचः प्रोच्य वक्तारं चाथ पूजयेत् । सम्भूष्य वस्त्रभूषाभिः पूजान्ते तं च संस्तवेत् ३२
शुकरूप प्रबोधज्ञ सर्वशास्त्रविशारद । एतत्कथाप्रकाशेन मदज्ञानं विनाशय ॥३३॥
तदग्रे नियमः पश्चात्कर्तव्यः श्रेयसे मुदा । सप्तरात्रं यथाशक्त्या धारणीयः स एव हि ॥३४॥
वरणं पञ्चविप्राणां कथाभङ्गनिवृत्तये । कर्तव्यंस्तैर्हरिजपो द्वादशाक्षरविद्यया ॥३५॥
ब्राह्मणान् वैष्णवांश्चान्यांस्तथा कीर्तनकारिणः । नत्वा सम्पूज्य दत्ताज्ञः स्वयमासनमाविशेत्

विष्वक् समन्ततः । बहुसम्पद्भिः कलाकौशलादिना विविधरचनाभिः ॥ १५ ॥ ऊर्ध्वं वक्तुरग्रे न तु मण्डपोपरि सप्त पङ्क्तयः कार्याः तथा सति दोषश्रवणात् । समासनात् पुण्यहानिरुच्चाच्च निरयं व्रजेत् इति संहितोक्तेः ॥१६॥ यथोत्तरमुत्तरोत्तरं योग्यतानुसारेण ॥ १७ । १८ ॥ पूज्यो मुख्यः पूजको गौणः तयोर्मध्ये पूर्वदिशैव ज्ञेया श्रोतॄणां कृते शास्त्रे सैव प्रोक्ता देशकालविशेषज्ञैः ॥ १९ ॥ विशुद्धिः संदेहनिवारणम् । अतिनिस्पृहः । 'अति सर्वत्र वर्जयेत्' इत्युक्तेः । इच्छति शती सहस्रं सहस्री लक्ष्मीहते इतिवत् तादृशी स्पृहा न कार्येति तात्पर्यम् ॥ २० ॥ स्त्रैणाः स्त्रीलम्पटाः । विभ्रान्ताः निर्णेतुमसमर्थाः ॥ २१ । २२ ॥ दिनात् प्रारम्भदिनात् अर्वाक् पूर्वम् । व्रताप्तये व्रतपूर्तये अन्यथा मध्ये क्षौरकरणे व्रतवैगुण्यं स्यात् । 'उदयात् प्राक् चतस्रस्तु घटिका अरुणोदयः' इति कालमाधवे ॥२३ । २४॥ संप्रयत्नतः श्रद्धातः । मण्डलं सर्वतोभद्राख्यम् ॥ २५ ॥ चरेत् कुर्यात् ॥ २६ ॥ कर्माण्येव ग्राहाः ते गृहीतानि आकृष्टानि अङ्गानि यस्य तम् ॥ २७।२८।२९।३०।३१।३२। ३३।३४ ॥ हरिजपः इति पाठः प्रशस्तः । विद्यया मन्त्रेण ॥ ३५ ॥ स्वयं श्रोता ॥ ३६ ॥

लोकवित्तधनागारपुत्रचिन्तां व्युदस्य च । कथाचित्तः शुद्धमतिः स लभेत्फलमुत्तमम् ॥३७॥
आसूर्योदयमारभ्य सार्धत्रिप्रहरान्तकम् । वाचनीया कथा सम्यग्धीरकण्ठं सुधीमता ॥३८॥
कथाविरामः कर्तव्यो मध्याह्ने घटिकाद्वयम् । तत्कथामनु कार्यं वै कीर्तनं वैष्णवैस्तदा ॥३९॥
मलमूत्रजयार्थं हि लध्वाहारः सुखावहः । हविष्यान्नेन कर्तव्यो ह्येकवारं कथार्थिना ॥४०॥
उपोष्य सप्तरात्रं वै शक्तिश्चेच्छृणुयात्तदा । घृतपानं पयः पानं कृत्वा वै शृणुयात्सुखम् ॥४१॥
फलाहारेण वा भाव्यमेकभुक्तेन वा पुनः । सुखसाध्यं भवेद्यत्तु कर्तव्यं श्रवणाय तत् ॥४२॥
भोजनं तु वरं मन्ये कथाश्रवणकारकम् । नोपवासो वरः प्रोक्तः कथाविघ्नकरो यदि ॥४३॥
सप्ताहव्रतिनां पुंसां नियमाञ्छृणु नारद । विष्णुदीक्षाविहीनानां नाधिकारः कथाश्रवे ॥४४॥
ब्रह्मचर्यमधः सुप्तिः पत्रावल्यां च भोजनम् । कथासमाप्तौ भुक्तिं च कुर्यान्नित्यं कथाव्रती ॥४५॥
द्विदलं मधु तैलं च गरिष्ठान्नं तथैव च । भावदुष्टं पर्युषितं जह्यान्नित्यं कथाव्रती ॥४६॥
वृंताकं च कलञ्जं च दग्धमन्नं मसूरिका । पलांडुं लशुनं हिंगुं मूलकं गृंजनं तथा ॥४७॥
नालिकामूलकूष्मांडं नैवाद्याद्यः कथा व्रती । द्विपाचितं सूतकान्नं भूमिजं लवणं तथा ॥४८॥
कामं क्रोधं मदं मानं मत्सरं लोभमेव च । दम्भं मोहं तथा द्वेषं दूरयेच्च कथाव्रती ॥४९॥
वेदवैष्णवविप्राणां गुरुगोव्रतिनां तथा । स्त्रीराजमहतां निन्दां वर्जयेद्यः कथाव्रती ॥५०॥
रजस्वलान्त्यजम्लेच्छपतितात्रात्यकैस्तदा । द्विजद्विड्वेदबाह्यैश्च न वदेद्यः कथाव्रती ॥५१॥
सत्यं शौचं दयां मौनमार्जवं विनयं तदा । उदारमानसं तद्वदेवं कुर्यात्कथाव्रती ॥५२॥
दरिद्रश्च क्षयी रोगी निर्भाग्यः पापकर्मवान् । अनपत्यो मोक्षकामः शृणुयाच्च कथामिमाम्
अपुष्पा काकवन्ध्या च वन्ध्या या च मृतार्भका । स्रवद्गर्भा च या नारी तया श्राव्या प्रयत्नतः
एतेषु विधिना श्रावे तदक्षयतरं भवेत् । अत्युत्तमा कथा दिव्या कोटियज्ञफलप्रदा ॥५५॥
एवं कृत्वा व्रतविधिमुद्यापनमथाचरेत् । जन्माष्टमीव्रतमिव कर्तव्यं फलकाङ्क्षिभिः ॥५६॥
अकिंचनेषु भक्तेषु प्रायो नोद्यापनाग्रहः । श्रवणेनैव पूतास्ते निष्कामा वैष्णवा यतः ॥५७॥
एवं नगाहयज्ञेऽस्मिन् समाप्ते श्रोतृभिस्तदा। पुस्तकस्य च वक्तुश्च पूजा कार्यातिभक्तितः॥५८॥

व्युदस्य त्यक्त्वा । 'असु क्षेपणे धातुः ॥ ३७ ॥ धीरकण्ठमिति क्रियाविशेषणम् । धीरो मध्यमस्वरः ॥ ३८ । ३९ ॥ हविष्यान्नं तण्डुलश्यामाकादि ॥ ४० ॥ उपोष्य उपवासं कृत्वा ॥ ४१ ॥ एकभुक्तेन सकृद्भोजनेन ॥ ४२।४३ ॥ विष्णुदीक्षा विष्णुमन्त्रदीक्षा । कथाश्रवे कथाश्रवणे ॥ ४४ ॥ अधः सुप्तिः भूमिशयनम् । भुक्तिं भोजनम् ॥४५॥ भावदुष्टं मनोदूषितम् ॥४६॥ कलंजं लम्बायमान फलविशेषः (शलगम) केचित् निष्पावः मटरसंज्ञकः ॥ ४७ ॥ मूलं रक्तकंदः नैव अद्यात् न भक्षयेत् । 'अद भक्षणे धातुः ॥४८॥ यस्य सूतकं भवेत् तस्यान्नम् । पल्वलोऽल्पजलाशयः ॥४९।५०।५१॥ म्लेच्छाः चाण्डालादयः पतिताः गोघातिनः । व्रात्याः संस्कारहीनाः द्विजद्विट् ब्राह्मणद्वेषी । वेदबाह्याः जैनाः नास्तिका वा तैः सह ॥ ५२ ॥ आर्जवं सरलता ॥ ५३।५४ ॥ अपुष्पा रजोधर्मरहिता काकवन्ध्या सकृत्प्रसूता । वन्ध्या सामान्यतया पुत्राभाववती । शेषं स्पष्टम् ॥ ५५ ॥ श्रावे श्रवणे कृते

प्रसादतुलसीमाला श्रोतृभ्यश्चाथ दीयताम् । मृदङ्गतालललितं कर्तव्यं कीर्तनं ततः ॥५९॥
जयशब्दं नमःशब्दं शङ्खशब्दं च कारयेत् । विप्रेभ्यो याचकेभ्यश्च वित्तमन्नं च दीयताम्॥६०॥
विरक्तश्चेद्भवेच्छ्रोता गीता वाच्या परेऽहनि । गृहस्थश्चेत्तदा होमः कर्तव्यः कर्मशान्तये॥६१॥
प्रतिश्लोकं तु जुहुयाद्विधिना दशमस्य च । पायसं मधु सर्पिश्च तिलान्नादिकसंयुतम् ॥६२॥
अथवा हवनं कुर्याद्गायत्र्या सुसमाहितः । तन्मयत्वात्पुराणस्य परमस्य च तत्त्वतः ॥६३॥
होमाशक्तौ बुधो हौम्यं दद्यात्तत्फलसिद्धये । नानाच्छिद्रनिरोधार्थं न्यूनताधिकताख्ययोः ॥६४॥
दोषयोः प्रशमार्थं च पठेन्नामसहस्रकम् । तेन स्यात्सफलं सर्वं नास्त्यस्मादधिकं यतः ॥६५॥
द्वादश ब्राह्मणान् पश्चाद्भोजयेन्मधुपायसैः । दद्यात्सुवर्णं धेनुं च व्रतपूर्णत्वहेतवे ॥६६॥
शक्तौ पलत्रयमितं स्वर्णसिंहं विधाय च । तत्रास्य पुस्तकं स्थाप्यं लिखितं ललिताक्षरम् ॥६७॥
सम्पूज्यवाहनाद्यैस्तदुपचारैः सदक्षिणम् । वस्त्रभूषणगन्धाद्यैः पूजिताय यतात्मने ॥६८॥
आचार्याय सुधीर्दत्त्वा मुक्तः स्याद्भवबन्धनैः । एवं कृते विधाने च सर्वपापनिवारणे ॥६९॥
फलदं स्यात् पुराणं तु श्रीमद्भागवतं शुभम् । धर्मकामार्थमोक्षाणां साधनं स्यान्न संशयः ॥७०॥

कुमारा ऊचुः

इति ते कथितं सर्वं किं भूयः श्रोतुमिच्छसि । श्रीमद्भागवतेनैव भुक्तिमुक्ती करे स्थिते ॥७१॥

सति । ॥ ५६।५७ ॥ अकिञ्चनाःपरिग्रहशून्याः । नास्ति किञ्चन वस्तुमात्रं येषां ते तथोक्ताः ॥ ५८ ॥ नगाहयज्ञे सप्ताहयज्ञे ॥ ५९।६०।६१।६२ ॥ विधिमाह प्रतिश्लोकमिति । विधानं तु तन्त्रोक्तं यथा ।

ब्रह्मस्तुति समुच्चार्य पूर्वार्द्धहवनं चरेत् ।
वेदस्तुति पठित्वादावुत्तरार्द्धाहुतिं चरेत् ॥ १ ॥
प्रत्यध्यायं समाप्तौ च मन्त्राष्टकमुदीरयेत् ।

ॐ विष्णवे नमः । ॐ नारायणाय नमः । ॐ ब्रह्मणे नमः । ॐ शिवाय नमः । ॐ वासुदेवाय नमः । ॐ प्रद्युम्नाय नमः ॐ अनिरुद्धाय नमः । ॐ संकर्षणाय नमः । तिलाः कृष्णतिलाः अन्नं यवादिः आदिना शर्करादिग्रहः तैः सहितम् ॥ ६३ ॥ अथवा गायत्रीमन्त्रेण हवनं कुर्यात् । तत्र हेतुः । परमस्य सर्वोत्कृष्टस्य अस्य पुराणस्य तत्त्वतः वस्तुतः तन्मयत्वात् गायत्रीस्वरूपत्वात् ॥ ६४ ॥ हौम्यं होमीयद्रव्यम् तद् यथा—

पयो दधि यवागूश्च सर्पिरोदनतण्डुलाः ।
तैलमापश्च सोमश्च व्रीहयश्च यवास्तिलाः ॥ १ ॥

इत्याश्वलायनसूत्रभाष्ये । नानाच्छिद्राणि नानाविघ्नाः तेषां निरोधार्थं तथा पठनकाले या न्यूनता अधिकता च तत्संज्ञकयोः दोषयोः प्रशमार्थं च विष्णुनामसहस्रकं पठेदित्युत्तरेणान्वयः । अस्मात् हरिनाम्नः ॥ ६४।६५।६६ ॥ मधु मिष्टान्नं पायसं पयसि भवं क्षीरान्नम् ॥ ६७ ॥ शक्तौ सामर्थ्ये सति पलत्रयमितं तत्प्रमाणं द्विनन्दचन्द्रमाषात्मकं (१९२) सिंहासनं विधाय तत्र भागवतं स्थापनीयं पुनश्च सुधीः यजमानः आचार्याय दत्त्वा भवबन्धनैः मुक्तः स्यादिति त्रयाणामेकान्वयः । तत्र स्वर्णं षोडशमाषकम् इत्युक्तेः स्वर्णशब्दः षोडशमाषसंख्यावाचकः तथा च चतुःषष्टि-

सूत उवाच

इत्युक्त्वा ते महात्मानः प्रोचुर्भागवतीं कथाम् । सर्वपापहरां पुण्यां मुक्तिभुक्तिप्रदायिनीम् ॥७२॥
शृण्वतां सर्वभूतानां सप्ताहं नियतात्मनाम् । यथाविधि ततो देवं तुष्टुवुः पुरुषोत्तमम् ॥७३॥
तदन्ते ज्ञानवैराग्यभक्तीनां पुष्टता परा । तारुण्यं परमं चाभूत्सर्वभूतमनोहरम् ॥७४॥
नारदश्च कृतार्थोऽभूत्सिद्धे स्वीये मनोरथे । पुलकीकृतसर्वाङ्गः परमानन्दसम्भृतः ॥७५॥
एवं कथां समाकर्ण्य नारदो भगवत्प्रियः । प्रेमगद्गदया वाचा तानुवाच कृताञ्जलिः ॥७६॥

नारद उवाच

धन्योऽस्म्यनुगृहीतोऽस्मि भवद्भिः करुणापरैः । अद्य मे भगवाँल्लब्धः सर्वपापहरो हरिः ॥७७॥
श्रवणं सर्वधर्मेभ्यो वरं मन्ये तपोधनाः । वैकुण्ठस्थो यतः कृष्णः श्रवणाद्यस्य लभ्यते ॥७८॥

सूत उवाच

एवं ब्रुवति वै तत्र नारदे वैष्णवोत्तमे । परिभ्रमन् समायातः शुको योगेश्वरस्तदा ॥७९॥

तत्रायर्यौ षोडशवार्षिकस्तदा व्यासात्मजो ज्ञानमहाब्धिचन्द्रमाः ।
कथावसाने निजलाभपूर्णः प्रेम्णा पठन् भागवतं शनैः शनैः ॥८०॥
दृष्ट्वा सदस्याः परमोरुतेजसं सद्यः समुत्थाय ददुर्महासनम् ।
प्रीत्या सुरर्षिस्तमपूजयत्सुखं स्थितोऽवदत्संश्रृणुतामलां गिरम् ॥८१॥

श्रीशुक उवाच

निगमकल्पतरोर्गलितं फलं शुकमुखादमृतद्रवसंयुतम् ।
पिबत भागवतं रसमालयं मुहुरहो रसिका भुवि भावुकाः ॥८२॥

धर्मः प्रोज्झितकैतवोऽत्र परमो निर्मत्सराणां सतां वेद्यं वास्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनम् ।
श्रीमद्भागवते महामुनिकृते किं वा परैरीश्वरः सद्यो हृद्यवरुध्यतेऽत्र कृतिभिः शुश्रूषुभिस्तत्क्षणात् ॥८३॥
श्रीमद्भागवतं पुराणतिलकं यद्वैष्णवानां धनं यस्मिन् पारमहंस्यमेवममलं ज्ञानं परं गीयते ।
यत्र ज्ञानविरागभक्तिसहितं नैष्कर्म्यमाविष्कृतं ।
तच्छृण्वन् प्रपठन् विचारणपरो भक्त्या विमुच्येन्नरः ॥८४॥

माषात्मकं पलमुच्यते तस्य त्रयेण उक्तसंख्या भवति ॥६८।६९।७०॥ साधयति सम्पादयतीति साधनं सम्पादकं भवति ॥७१।७२।७३।७४।७५॥ पुलकीकृतानि रोमाञ्चितानि सर्वाणि अङ्गानि यस्य सः॥७६॥ तान् सनकादीन् ॥७७॥ मे मया ॥७८॥ हे तपोधनाः ॥७९।८०॥ व्यासात्मजः श्रीशुकः कथावसाने सति शनैः शनैः भागवतं पठन् तत्र कथास्थले आययौ इत्यन्वयः । कथंभूतः । ज्ञानमेव महाब्धिः तस्मादुद्भूतः चन्द्रमा इति ज्ञानप्रकाशकः ॥८१॥ सदस्याः तं शुकदेवं दृष्ट्वा सद्यो झटिति समुत्थाय सिंहासनं ददुः सुरर्षिः नारदस्तम् अपूजयत् स च सुखपूर्वकं स्थितः सन् अमलां मधुरां गिरमवदत् तां यूयं संश्रृणुतेत्यन्वयः

स्वर्गे सत्ये च कैलासे वैकुण्ठे नास्त्ययं रसः। अतः पिबन्तु सद्भाग्या मा मा मुञ्चत कर्हिचित् ।८५।

सूत उवाच

एवं ब्रुवाणे सति बादरायणौ मध्ये सभायां हरिराविरासीत् ।
प्रह्लादबल्युद्धवफाल्गुनादिभिर्वृतः सुरर्षिस्तमपूजयच्च तान् ॥८६॥
दृष्ट्वा प्रसन्नं महदासने हरिं ते चक्रिरे कीर्तनमग्रतस्तदा ।
भवो भवान्या कमलासनस्तु तत्रागमत्कीर्तनदर्शनाय ॥८७॥
प्रह्लादस्तालधारी तरलगतितया चोद्धवः कांस्यधारी
वीणाधारी सुरर्षिः स्वरकुशलतया रागकर्तार्जुनोऽभूत् ।
इन्द्रोऽवादीन्मृदङ्गं जयजयसुकराः कीर्तने ते कुमारा
यत्राग्रे भाववक्ता सरसरचनया व्यासपुत्रो बभूव ॥८८॥
ननर्त मध्ये त्रिकमेव तत्र भक्त्यादिकानां नटवत्सुतेजसाम् ।
अलौकिकं कीर्तनमेतदीक्ष्य हरिः प्रसन्नोऽपि वचोऽब्रवीत्तत् ॥८९॥
मत्तो वरं भागवता वृणुध्वं प्रीतः कथाकीर्तनतोऽस्मि साम्प्रतम् ।
श्रुत्वेति तद्वाक्यमतिप्रसन्नाः प्रेमार्द्रचित्ता हरिमूचिरे ते ॥९०॥
नगाहगाथासु च सर्वभक्तैरेभिस्त्वया भाव्यमिति प्रयत्नात् ।
मनोरथोऽयं परिपूरणीयस्तथेति चोक्त्वान्तरधीयताच्युतः ॥९१॥
ततोऽनमत्तच्चरणेषु नारदस्तथा शुकादीनपि तापसांश्च ।
अथ प्रहृष्टाः परिनष्टमोहाः सर्वे ययुः पीतकथामृतास्ते ॥९२॥
भक्तिः सुताभ्यां सह रक्षिता सा शास्त्रे स्वकीयेऽपि तदा शुकेन ।
अतो हरिर्भागवतस्य सेवनाच्चित्तं समायाति हि वैष्णवानाम् ॥९३॥

॥८२॥ निगमेत्यादिपद्यद्वयस्य व्याख्या प्रथमस्कन्धस्य प्रथमाध्याये द्रष्टव्या ॥८३।८४॥ तिलकं मूर्धन्यम् । परमहंसैः ज्ञानिभिः प्राप्यं पारमहंस्यं परं ज्ञानं ब्रह्मात्मैकत्वलक्षणम् गीयते । नैष्कर्म्यम् ईश्वरार्पणद्वारा कर्मणां बन्धमोचकत्वं च आविष्कृतं प्रकटीकृतम् । तदेतत् सर्वं शृण्वन् भक्त्यैव विमुच्येत न केवलं ज्ञानेनेति भक्तेः प्राधान्यं दर्शितम् ॥ ८५ ॥ सत्ये सत्यलोके । नास्तीति भोग्यभूमित्वात् । हे सद्भाग्याः भाग्यस्य श्रेष्ठत्वं तावत् कथाश्रवणमेव अन्यथा दुर्भाग्यमेवेति ध्वनितम् । वीप्सेति कथनं हेयत्वबुद्धिनिरासाय ॥८६॥ बदरीणां समूहो बादरं बदरिकाश्रमः अयनमाश्रयः स्थानं यस्य स बादरायणः व्यासः तस्यापत्यं पुमान् बादरायणिः श्रीशुकः तस्मिन् ब्रुवाणे सति सुरर्षिः नारदः तम् अपूजयत् तान् प्रह्लादींश्च अपूजयत् सत्कृतवान् । फल्गुनी नक्षत्रं तत्र भवः फाल्गुनः अर्जुनः ॥ ८७ ॥ महदासने महासने सिंहासने स्थितं ते हरिं दृष्ट्वा ते कीर्तनं चक्रिरे इत्यन्वयः—महदित्यत्र आत्वाभाव आर्षः । यद्वा । महत् कीर्तनमित्यत्रान्वेति । महत् महत्त्वपूर्णमित्यर्थः । कमलासनो ब्रह्मा ॥८८॥ कांस्यं झल्लरी झांझेति प्रसिद्धम् । सुकराः जयजयेति शब्दोच्चारिणः । अग्रे सर्वेषामग्रे सरसरचना सरसविवेचनम् ॥ ८९ ॥ सुतेजसां तारुण्यवतां तेषां भक्त्यादीनां त्रिकं तत्र तत्रैव सभामध्ये ननर्तेत्यन्वयः ॥ ९० ॥ हे भागवताः ॥९१॥

दारिद्र्यदुःखज्वरदाहितानां मायापिशाचीपरिमर्दितानाम् ।
संसारसिन्धौ परिपातितानां क्षेमाय वै भागवतं प्रगर्जति ॥९४॥

शौनक उवाच

शुकेनोक्तं कदा राज्ञे गोकर्णेन कदा पुनः । सुरर्षये कदा ब्राह्मैश्छिन्धि मे संशयं त्विमम् ॥९५॥

सूत उवाच

आकृष्णनिर्गमात्त्रिंशद्वर्षाधिकगते कलौ । नवमीतो नभस्ये च कथारम्भं शुकोऽकरोत् ॥९६॥
परीक्षिच्छ्रवणान्ते च कलौ वर्षशतद्वये । शुद्धे शुचौ नवम्यां च धेनुजोऽकथयत्कथाम् ॥९७॥
तस्मादपि कलौ प्राप्ते त्रिंशद्वर्षगते सति । ऊचुरूर्जे सिते पक्षे नवम्यां ब्रह्मणः सुताः ॥९८॥
इत्येतत्ते समाख्यातं यत्पृष्टोऽहं त्वयाऽनघ । कलौ भागवती वार्ता भवरोगविनाशिनी ॥९९॥

कृष्णप्रियं सकलकल्मषनाशनं च मुक्त्येकहेतुमिह भक्तिविलासकारि ।
सन्तः कथानकमिदं पिबतादरेण लोके हि तीर्थपरिशीलनसेवया किम् ॥१००॥
स्वपुरुषमपि वीक्ष्य पाशहस्तं वदति यमः किल तस्य कर्णमूले ।
परिहर भगवत्कथासु मत्तान् प्रभुरहमन्यनृणां न वैष्णवानाम् ॥१०१॥
असारे संसारे विषयविषसङ्गाकुलधियः क्षणार्धं क्षेमार्थं पिबत शुकगाथातुलसुधाम् ।
किमर्थं व्यर्थं भो व्रजत कुपथे कुत्सितकथे परीक्षित्साक्षी यच्छ्रवणगतमुक्त्येककथने ॥१०२॥
रसप्रवाहसंस्थेन श्रीशुकेनेरिता कथा । कण्ठे सम्बध्यते येन स वैकुण्ठप्रभुर्भवेत् ॥१०३॥
इति च परमगुह्यं सर्वसिद्धान्तसिद्धं सपदि निगदितं ते शास्त्रपुञ्जं विलोक्य ।
जगति शुककथातो निर्मलं नास्ति किंचित्पिब परसुखहेतोर्द्वादशस्कन्धसारम् ॥१०४॥

नगाहगाथासु सप्ताहकथासु । 'सप्तैते कुलपर्वताः' इत्युक्तेः तथेति तथाऽस्तु इत्युक्त्वा ॥ ९२ ॥ 'ततोऽनमत्तच्चरणारविन्दयो ऋषिः इति प्राचीनपाठः प्रशस्तः । पीतं कथामृतं यैस्ते तथाभूताः ॥९३॥ हरिः भक्तानां चित्तं समायाति विराजते ॥ ९४ ॥ दारिद्र्यं निर्धनता दुःखं रोगादिजन्यं ज्वरस्तापः आध्यात्मिकादिः तैः दग्धानाम् । माया अविद्याशक्तिः सैव पिशाची तया परिमर्दितानां देहाध्यासत्वेन जन्ममरणादिसङ्कटमापन्नानाम् अत एव संसारे पातितानां सर्वेषां क्षेमाय प्रगर्जति गर्जनापूर्वकं सर्वानाह्वयति मत्समीपं यूयमागच्छतेति ॥९५॥ ब्रह्मणः इमे पुत्राः ब्राह्माः तैः ब्राह्मैः सनकादिभिः कदा उक्तम ॥९६॥आकृष्णेति कृष्णगमनादारभ्य त्रिंशद्वर्षादधिकं काले गते सति नभस्ये भाद्रपदे ॥९७॥ शुचौ आषाढे शुद्धे शुक्ले पक्षे । धेनुजो गोकर्णः ॥९८॥ ऊर्जे कार्तिके सिते शुक्ले पक्षे ब्रह्मणः सुताः सनकादयः ऊचुः ॥९८॥ भवरोगो जन्ममरणादिरूपः ॥ १०० ॥

हे सन्तः । इदं कथानकं यूयमादरेण पिबत शृणुतेत्यर्थः । कथंभूतम् । तस्य चत्वारि विशेषणानि कृष्णेति । लोके हि तीर्थपरिशीलनं तीर्थभ्रमणं तस्य सेवया च किं प्रयोजनं न किमपि । कथायां तु सर्वतीर्थानां निवासात् । 'सर्वाणि तीर्थानि वसन्ति तत्र' इत्युक्तेः । मुक्तेरेकमेव हेतु मुख्यं कारणम् । विलासः उत्कर्षः ॥ १०१ ॥ स्वपुरुषं स्वदूतम् । कथासु मत्तान् भक्तान् परिहर दूरतस्त्यज अन्यनृणां

एतां यो नियतया शृणोति भक्त्या यश्चैनां कथयति शुद्धवैष्णवाग्रे ।
तौ सम्यग्विधिकरणात्फलं लभेते याथार्थ्यान्न हि भुवने किमप्यसाध्यम् ॥१०५॥

इति श्रीपद्मपुराणे उत्तरखण्डे श्रीमद्भागवतमाहात्म्ये श्रवण-
विधिकथनं नाम षष्ठोऽध्यायः ॥ ६ ॥

समाप्तमिदं श्रीमद्भागवतमाहात्म्यम्

हरिः ॐ तत्सत्

पापिनां प्रभुः दण्डकर्ता न तु भक्तानाम् ॥ १०२ ॥ भो मानवाः असारे साररहिते अस्मिन् संसारे शुककथा भागवती कथैव अनुपमसुधा तां यूयं पिवत शृणुत । कथंभूताः । विषय शब्दादिः स एव विषं तस्य संगेन आकुला विक्षिप्ता धीर्येषां ते । कुपथे कुमार्गे व्यर्थं निष्फलं किमर्थं व्रजत । यत् यतः श्रवणेन गता प्राप्ता या मुक्तिः तस्या एककथने मुख्योपदेशे सति परीक्षित् साक्षी अभूत् श्रणणेनैव तस्य मुक्तिर्जातेति निर्विवादम् । कथंभूते । कुकथे । कुत्सिता विषयसम्वन्धनी कथा यस्मिन् ॥ १०३ ॥ रसप्रवाहः भक्तिप्रवाहः ईरिता कथिता कण्ठे सम्बध्यते कण्ठीक्रियते । स वैकुण्ठः प्रभुः स्वामी यस्येति तथाभूतो भक्तश्रेष्ठो भवतीत्यर्थः । ॥ १०४ ॥ शास्त्रपुञ्जं शास्त्रसमूहम् । निर्मलं चित्त शोधकम् । परसुखं मोक्षसुखं तदर्थं द्वादशस्कन्धा एव सारः सर्वशास्त्रसारांशः तं पिव श्रोत्रेन्द्रियेणेत्यर्थः ॥ १०५ ॥ एतां भागवतीं कथाम् । शुद्धवैणवाग्रे देवतान्तरानिन्दके । विधिकरणात् सप्ताहश्रवणात् । याथार्थ्यात् वस्तुतः जगति किमपि असाध्यमप्राप्यं वस्तु नास्तीत्यर्थः ।

माहात्म्यश्रवणाद्भक्तिः भक्त्या कृष्णो हृदि स्थितः ।
अतः सदैव माहात्म्यं श्रोतव्यं श्रद्धया बुधैः ॥ १ ॥

माहात्म्यश्रवणाद्यस्य संसिद्धि मुन्योऽगमन् ।
तं भक्तवत्सलं देवं भूयो भूयो नमाम्यहम् ॥ २ ॥

इति श्रीपद्मपुराणे उत्तरखण्डे श्रीमद्भागवतमाहात्म्ये पण्डितप्रवरश्रीराममूर्तिशास्त्रिपौराणिक-विरचितायां टिप्पण्यां श्रवणविधिकथनं नाम पष्ठोऽध्यायः ।

बदायूमण्डले जातः सनाढ्यकुलभूषणः ।
चक्रे पौराणिकश्चात्र टिप्पणीं सुगमामिमाम् ॥

समाप्तमिदं श्रीमद्भागवतमाहात्म्यम्
हरिः ॐ तत्सत् श्रीकृष्णार्पणमस्तु ।

* श्रीगणेशाय नमः *

श्रीमद्भागवतम्

प्रथमः स्कन्धः

अथ प्रथमोऽध्यायः

जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट्
तेने ब्रह्म हृदा य आदिकवये मुह्यन्ति यत्सूरयः ।
तेजोवारिमृदां यथा विनिमयो यत्र त्रिसर्गोऽमृषा
धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परं धीमहि ॥ १ ॥

गूढार्थदीपिनी

आरम्भे श्रीगणाध्यक्षं सर्वाराध्यं विनायकम् ।
लेखनीशक्तिवृद्ध्यर्थं भूयो भूयो नमाम्यहम् ॥ १ ॥
व्यासं वैयासकिं शेषं कुमारं नारदं गुरून् ।
नत्वा श्रीवैष्णवाचार्यान् कुर्वेऽहं टिप्पणीं शुभाम् ॥ २ ॥
दुर्गमो दुस्तरश्चायं श्रीमद्भागवताम्बुधिः ।
सेतुरूपामतः कुर्वे सतां गूढार्थदीपिनीम् ॥ ३ ॥
अर्थेषु पाठेषु पदेषु भावेष्वन्यत्र ये क्वापि च सन्दिहानाः ।
तोषाय तेषां रचिताऽतिभव्या गूढार्थदीपिन्यवलोकनीया ॥ ४ ॥

प्रथमे मङ्गलं चास्य श्रेष्ठत्वं सर्वशास्त्रतः ।
नैमिषे शौनकादीनां प्रश्नषट्कं निरूप्यते ॥ १ ॥

इह खलु भगवान् वेदव्यासो नानापुराणब्रह्मसूत्रादिभिश्चित्ततुष्टिमलभमानो नारदोपदेशाद्भगवद्गुणवर्णनप्रधानं श्रीमद्भागवतं प्रारिप्सुस्तद्विघ्नविनाशाय मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्ते वीरपुरुषका आयुष्मत्पुरुषकाश्चाध्येतारो भवन्तीति भाष्योक्तेरेतत्प्रतिपाद्यपरदेवतानुस्मरणलक्षणं मङ्गलमाचरति जन्माद्यस्येति । इदं पद्यं शतार्थबोधकं क्लिष्टतमं चेति सम्प्रदायानुरोधेन सरलपद्धत्या

किञ्चित् किञ्चिद् व्याख्यायते, तथाहि–वयं परं प्रकृतेः परं परमात्मानं श्रीकृष्णं धीमहि ध्यायेम। कथंभूतं परम् ? सत्यं कालत्रयाबाध्यं नित्यविग्रहमित्यर्थः। पुनः कथंभूतम् ? स्वेन धाम्ना तेजसा सदा निरस्तकुहकम्। निरस्तं दूरीकृतं कुहकं मायालक्षणं कपटं यस्मिन् तम्। यद्वा। कुहकमज्ञानम्। कुहका[1] मायाविनो दैत्या वा निरस्ता येन। यद्वा। सदेत्येकं पदम्। सतां भक्तानाम् आ समन्तात् निरस्तः कुहकः मायिकप्रपञ्चः येन तम्। सत्यत्वे हेतुः। यत्र यस्मिन् परस्मिन् मृषा मिथ्याभूतोऽपि त्रिसर्गः[2] त्रयाणां मायागुणानां सर्गो भूतेन्द्रियदेवतारूपः अमृषा सत्य इव भाति तं धीमहीति सम्बन्धः। मिथ्याभूतसत्यत्वे दृष्टान्तमाह–तेजोवारिमृदां यथा विनिमयः। अन्यस्मिन् अन्यप्रतीतिर्विनिमयः। तेजसि वारिबुद्धिः मरीचितोये प्रसिद्धा। मृदि काचादौ वारिबुद्धिः वारिणि च काचादिबुद्धिरिति यथातथं विवेचनीयम्। किञ्च यतः परमात्मनः सकाशात् अस्य विश्वस्य जन्मादि जन्मस्थितिभङ्गं भवति तं धीमहि। कथंभूतात् यतः ? अर्थेषु आकाशादिकार्येषु अन्वयात् सम्बन्धात्। अकार्येभ्यः खपुष्पादिभ्य इतरतः तद्व्यतिरेकात् तदभावाच्च। किञ्च योऽभिज्ञः सर्वज्ञस्तं धीमहि। स्वेनैव तेजसा राजते शोभते इति स्वराट् यः स्वराट् तं धीमहि। यः आदिकवये ब्रह्मणे हृदा मनसा संकल्पमात्रेणैव ब्रह्म वेदं तेने उपदिष्टवान् तं धीमहीति योजना कार्या। यदिति लुप्तसप्तम्यन्तं पदं यत् यस्मिन् ब्रह्मणि वेदे सूरयो ब्रह्मादयोऽपि मुह्यन्ति। अत्र तत्सत्त्वे तत्सत्त्वमिति लक्षणात् कार्यसत्त्वे कारणसत्त्वमन्वयः कार्याभावे कारणाभावश्च व्यतिरेकः। प्रकृते च परमेश्वरस्य सद्रूपकारणत्वेन आकाशादिकार्यसत्त्वे तत्सत्ताया अपि दृश्यमानत्वादन्वयः। खपुष्पादिकार्याभावे तत्र तत्सत्ताया अप्यभावात् खपुष्पं सत् इति प्रयोगादर्शनाद् व्यतिरेकश्चेति लक्षणसमन्वयः। अत्र स्वरूपलक्षणं सत्यं परमिति। तटस्थलक्षणं जन्मादीति। यत्स्वरूपान्तर्गतं सदितरव्यावृत्ततया लक्ष्यं बोधयति तत्स्वरूपलक्षणम् यथा गोः सास्नाश्रृङ्गादि। यत्स्वरूपानन्तर्गतं सदितरव्यावृत्ततया लक्ष्यं बोधयति तत्तटस्थलक्षणम्। यथा गोरलङ्कारविशेषादि देवदत्तस्य गृहे काकादि वा। प्रकृते च सत्यं ज्ञानमनन्तं ब्रह्मेति परमेश्वरस्वरूपमेव सत् असत्प्रपञ्चव्यावृत्ततया लक्ष्यं बोधयतीति स्वरूपलक्षणं सम्पद्यते। जगज्जन्मादि तु तटस्थलक्षणं नहि तत्सर्वदास्ति प्रलयादिकाले तदभावात्। अतः स्वरूपानन्तर्गतं सत् आकाशादिव्यावृत्ततया लक्ष्यं बोधयतीति तत् तटस्थलक्षणं सम्पद्यते इति संक्षेपः॥ १॥

धर्मः प्रोज्झितकैतवोऽत्र परमो निर्मत्सराणां सतां
वेद्यं वास्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनम्।
श्रीमद्भागवते महामुनिकृते किं वा परैरीश्वरः
सद्यो हृद्यवरुध्यतेऽत्र कृतिभिः शुश्रूषुभिस्तत्क्षणात्॥ २॥

इदानीं श्रीमद्भागवतस्य काण्डत्रयविषयकसर्वशास्त्रेभ्यः श्रेष्ठत्वं दर्शयति–अत्र श्रीमति सुन्दरे भागवते परमो धर्मो[3] निरूप्यते इति क्रियाशेषः। कथंभूतो धर्मः ? प्रोज्झितकैतवः। प्रकर्षेण उज्झितं त्यक्तं कैतवं

१–'कुह' विस्मापने इत्यस्मात् 'क्वन् शिल्पिसंज्ञयोः' इत्यौणादिकः क्वन् प्रत्ययः। कुहयन्ते मायया विस्मापयन्तीति कुहकाः।

२–तमःसर्गः पञ्चतन्मात्रापञ्चकं भूतपञ्चकं च। रजःसर्गः ज्ञानेन्द्रियपञ्चकं कर्मेन्द्रियपञ्चकं च। सत्त्वसर्गः इन्द्रियाधिष्ठातृ-देवताः मनश्चेति विभागः।

३–ध्रियतेऽधःपतन् पुरुषोऽनेनेति धर्मः। धारयतीति धरो भगवान्, स मीयते ज्ञायतेऽनेनेति वा धर्म इति। (वंशीधरी)

फलाकाङ्क्षारूपं कपटं यस्मिन् सः। प्रशब्देन मोक्षाकाङ्क्षापि निरस्ता केवलमीश्वराराधनरूपभक्तिलक्षणो धर्मो निरूप्यते इति तात्पर्यम्। केषां धर्मः ? सतां भागवतानाम्। अत्र हेतुः। निर्मत्सराणां परोत्कर्षा-सहनं मत्सरः, तद्रहितानाम्। किञ्च अत्र भागवते वास्तवं परमार्थरूपं वस्तु यद् ब्रह्म तद् वेद्यं सुगमतया ज्ञातुं शक्यमित्यर्थः। यद्वा। वस्तुनोऽयमंशो वास्तवो जीवः। वस्तुन इयं शक्तिः वास्तवी माया। वस्तुन इदं कार्यं वास्तवं[1] जगच्च, तत्सर्वं वस्तु ब्रह्मस्वरूपमेव वेद्यं न ततः पृथगिति जगति ब्रह्मदृष्टिः कर्तव्येति वाक्यार्थः। कथंभूतं वस्तु। शिवदं शिवं परमानन्दं ददाति विषयसुखं द्यति खण्डयतीति वा श्लिष्टोऽर्थः। पुनश्च; आध्यात्मिकादितापत्रयस्य उन्मूलनं निवर्तकं च। कथंभूते भागवते ? महामुनिकृते। महामुनिः श्रीनारायणस्तेन प्रथमं संक्षेपतः कृते चतुःश्लोकीरूपे। पश्चात् व्यासेन विशदीकृत्य प्रकटीकृते च। अन्य-शास्त्रेषु आक्षिपन् अस्य वैशिष्ट्यं दर्शयति किं वेति-परैः अन्यैः शास्त्रैः तदुक्तसाधनैर्वा ईश्वरः सद्यो झटिति हृदि किं वा अवरुध्यते स्थिरीक्रियते नैव। वा शब्दः कटाक्षे। कथञ्चिद् विलम्बेनेत्यर्थः। अत्र शुश्रूषुभिः श्रोतुमिच्छद्भिः कृतिभिः पुण्यात्मभिः तत्क्षणादवरुद्धयते इत्यस्य वैशिष्ट्यम्। अत्र धर्म इति कर्मकाण्डतः। निर्मत्सराणामित्यधिकारितः। वेद्यमिति ज्ञानकाण्डतः। महामुनिकृते इति कर्तृतः। किं वेति देवता काण्डतश्चास्य श्रेष्ठत्वं प्रतिपादितम्। पद्येऽस्मिन् अत्रेति पदस्य त्रिरुक्तिरवधारणार्था। अत्रैव धर्मो नान्यत्र; अत्रैव वस्तु वेद्यं नान्यत्र, अत्रैव अवरुद्धयते नान्यत्रेति। अथवा। न विद्यते त्रपा कीर्तनादिषु लोकलज्जा येषां ते अत्रपाः शुकसनकादयस्तान् रमयति ते रमन्तेऽत्रेति वा इति अत्रपरम इत्येकं पदम्। पुनश्च त्रायते इति त्रः न विद्यते त्रो रक्षको यस्मात् तत् अत्रम् अत्रं च तद्वस्तु इति अत्रवस्तु इत्येकं पदमतो न पुनरुक्ति-दोषः। अत्र निर्मत्सरो भागवतोऽधिकारी भगवान् श्रीकृष्णो विषयः दुःखनिवृत्तिपूर्वकपरमानन्दावाप्तिश्च प्रयोजनं विषयप्रयोजनयोः प्रतिपाद्यप्रतिपादकभावसम्बन्धश्चेत्यनुबन्धचतुष्टयं चात्र बोद्धव्यम्। पद्यद्वये शार्दूलविक्रीडितं नाम छन्दः ॥ २ ॥

निगमकल्पतरोर्गलितं फलं शुकमुखादमृतद्रवसंयुतम्।
पिबत भागवतं रसमालयं मुहुरहो रसिका भुवि भावुकाः ॥ ३ ॥

सर्वश्रेष्ठत्वादेवास्य केवलं न श्रवणमपि तु सर्वशास्त्राणां फलस्वरूपमिदमतः परमादरेण सदा सेव्यमित्याह—निगमेति। हे भावुकाः[2] कल्याणेच्छवः तत्रापि हे रसिका रसविशेषविज्ञाः। रसं रसस्वरूप-मिदं भागवतं नाम फलम् आलयम् आमरणं मुहुः पिबत। कस्य फलम् ? निगमो वेदः; स एव कल्पवृक्ष-स्तस्य फलम्। कल्पो दानसमर्थश्चासौ तरुरिति विग्रहः। कथंभूतं फलम् ? अमृतद्रवसंयुतम्। अमृतं परमानन्दः स एव द्रवो रसस्तेन संयुतं परिपूर्णम्। यद्वा। अमृतं मोक्षमपि द्रावयति शिथिलीकरोतीति अमृतद्रवो भक्तिरसस्तेन संयुतम्। पुनः कीदृक्। शुकमुखादहो भुवि गलितमित्यलभ्यलाभः। यद्वा। रस-मालयम् इत्येकं पदम्। रस आनन्दो मीयते प्राप्यतेऽनया इति रसमा सरस्वती तस्या आलयम्। रसैर्मीयते ज्ञायते इति रसमा सरस्वती सापि लीयतेऽस्मिन्निति वा। अत्र रूपवान् घट इतिवत् रसवत् फलमिति वक्तुं नोचितं यतो हि त्वगष्ठ्यादेर्हेयांशस्याभावादत्र मतुपा विनैव रसं फलमिति सामानाधिकरण्यं

१– वास्तवश्च वास्तवी च वास्तवं च तेषामेकवद्भावो वास्तवम्,
त्रयाणां समाहारद्वन्द्वे 'नपुंसकमनपुंसकेन'–इत्येकशेषः।

२––'भावुकं भविकं भव्यम्' इत्यमरात् भावुकमस्ति प्राप्यत्वेन येषां ते भावुकाः मत्वर्थीयोऽच्प्रत्ययः।

विशेष्यविशेषणभाव इत्यर्थः, रसतादात्म्यविवक्षया रसवत्त्वस्याविवक्षणात् । तत्र केवलं फलमित्युक्तेस्तस्य पानासंभवो हेयांशप्रसक्तिश्च भवेत् तन्निवृत्त्यर्थं रसमित्युक्तम् । रसमित्युक्तेऽपि गलितस्य तस्य पातुमशक्यत्वात्फलमित्युक्तमत उभयमुक्तम् । द्रुतविलम्बितं छन्दः ॥ ३ ॥

नैमिषेऽनिमिषक्षेत्रे ऋषयः शौनकादयः । सत्रं स्वर्गाय लोकाय सहस्रसममासत ॥ ४ ॥

त एकदा तु मुनयः प्रातर्हुतहुताग्नयः । सत्कृतं सूतमासीनं पप्रच्छुरिदमादरात् ॥ ५ ॥

ऋषय ऊचुः

त्वया खलु पुराणानि सेतिहासानि चानघ । आख्यातान्यप्यधीतानि धर्मशास्त्राणि यान्युत ॥६॥

यानि वेदविदां श्रेष्ठो भगवान् बादरायणः । अन्ये च मुनयः सूत परावरविदो विदुः ॥७॥

वेत्थ त्वं सौम्य तत्सर्वं तत्त्वतस्तदनुग्रहात् । ब्रूयुः स्निग्धस्य शिष्यस्य गुरवो गुह्यमप्युत ॥८॥

तत्र तत्राञ्जसाऽऽयुष्मन् भवता यद्विनिश्चितम् । पुंसामेकान्ततः श्रेयस्तन्नः शंसितुमर्हसि ॥९॥

प्रायेणाल्पायुषः सभ्य कलावस्मिन् युगे जनाः । मन्दाः सुमन्दमतयो मन्दभाग्या ह्युपद्रुताः॥१०

ब्रूहि नः श्रद्दधानानां येनात्मा सम्प्रसीदति ॥११॥

अनिमिषो [1] विष्णुस्तस्य क्षेत्रे नैमिषे नैमिषारण्ये ऋषयः सत्रं बहुकर्तृयागमुद्दिश्य आसत उपविविशुः । यद्वा आसत [2] अकुर्वत । किमर्थम् । स्वर्गायलोकाय इत्येकं पदम् । स्वः स्वर्गे गीयते इति स्वर्गायो विष्णुः कर्मणि घञ् उरुगाय इतिवत् तस्य लोकाय । यद्वा स एव लोको भक्तानां निवासस्थानम् तस्मै तत्प्राप्तये इत्यर्थः । सहस्रं समा अनुष्ठानकालो यस्य तत् सहस्रसमं सहस्रवर्षसमाप्यं सत्रम् । भारते तु द्वादशवार्षिके इत्युक्तमतो द्वाभ्यां बिन्दुभ्यामधिका दश द्वादशेति समासेन स विरोधः परिहरणीयः । नैमिषे इत्यत्र तालव्यो मूर्धन्यश्च षकारः । आद्ये तपोभूमिनिर्माणार्थं ब्रह्मणा प्रक्षिप्तस्य चक्रस्य नेमिः शीर्यते शीर्णीभूय पतति यत्र तन्नेमिशं ततः स्वार्थेऽण् । अन्त्ये निमेषमात्रेणेदं दानवं बलं निहतमतो नैमिषम् । तीर्थस्तु ऋषिसेव्यफला वृक्षा निमिषास्तेषामिदं क्षेत्रमित्याह । निमिषमहर्षेस्तपोभूमित्वाद्वा नैमिषम् ॥ ४ ॥ प्रातः सायं च हुता एव हुतास्तर्पिता अग्नयो यैस्ते मुनयः सूतं तु इदं वक्ष्यमाणं पप्रच्छुः । तुर्वैलक्षण्ये तस्याग्निकुण्डसमुद्भूतत्वात् । यद्वा हुतेति अर्हार्थे क्तः । हूयते इति हुतं होमद्रिव्यं घृतादि तेन ॥ ५ ॥ 'अघं दुःखे च पापे' चेति कोशात् न विद्यते अघं यत्सम्पर्कात् तत्सम्बुद्धौ हे अनघ दुःखनिवर्तक । गुरुमुखात् अधीतानि शिष्येभ्यो व्याख्यातानि च । उत अपि यानि अन्यानि तान्यपीति योज्यम् ॥ ६ ॥ विदां ज्ञानिनां श्रेष्ठो बादरायणो [3] व्यासो यानि वेद अन्ये च यानि विदुः तत्सर्वं त्वं जानासीत्युक्तेरणान्वयः । तदनुग्रहात् व्यासानुग्रहात् । स्निग्धस्य श्रद्धालोः उत एव ब्रूयुरेव । परावरे सगुणनिर्गुणे ब्रह्मणी विदन्तीति ॥ ७ ॥ ८ ॥ तत्र तत्र पुराणादिषु । एकान्ततो मुख्यं प्रथमान्तात् तसिः यत् श्रेयः श्रेयःसाधनं तत् अञ्जसा सारल्येन नोऽस्मान् शंसितुं कथयितुमर्हसि । हे आयुष्मन् इत्यायुषो वृद्धिं संचारयन्ति ॥ ९ ॥ तत्रापि उपद्रुता रोगाक्रान्ताः ॥ १० ॥ भूरीणीति

१–'निमिषोऽनिमिषः स्रग्वी' इति सहस्रनामपाठात् ।

२–सर्वेषामेव धातूनामन्तर्भूतकृञर्थता । सा वाच्या प्रत्ययार्थेन ह्यवं भाट्टादयो जगुः । इति नियमात् ।

३–बदरीणां समूहो बादरं तदुपलक्षितमयनं निवासस्थानं बदरिकाश्रमो यस्य सः ।

सूत जानासि भद्रं ते भगवान् सात्वतां पतिः । देवक्यां वसुदेवस्य जातो यस्य चिकीर्षया ॥१२॥
तन्नः शुश्रूषमाणानामर्हस्यङ्गानुवर्णितुम् । यस्यावतारो भूतानां क्षेमाय च भवाय च ॥१३॥
आपन्नः संसृतिं घोरां यन्नाम विवशो गृणन् । ततः सद्यो विमुच्येत यद्बिभेति स्वयं भयम् ॥१४॥
यत्पादसंश्रयाः सूत मुनयः प्रशमायनाः । सद्यः पुनन्त्युपस्पृष्टाः स्वर्धुन्यापोऽनुसेवया ॥१५॥
को वा भगवतस्तस्य पुण्यश्लोकेड्यकर्मणः । शुद्धिकामो न शृणुयाद्यशः कलिमलापहम् ॥१६॥
तस्य कर्माण्युदाराणि परिगीतानि सूरिभिः । ब्रूहि नः श्रद्दधानानां लीलया दधतः कलाः ॥१७॥
अथाख्याहि हरेर्धीमन्नवतारकथाः शुभाः । लीला विदधतः स्वैरमीश्वरस्यात्ममायया ॥१८॥
वयं तु न वितृप्याम उत्तमश्लोकविक्रमे । यच्छृण्वतां रसज्ञानां स्वादु स्वादु पदे पदे ॥१९॥
कृतवान् किल वीर्याणि सह रामेण केशवः । अतिमर्त्यानि भगवान् गूढः कपटमानुषः ॥२०॥
कलिमागतमाज्ञाय क्षेत्रेऽस्मिन् वैष्णवे वयम् । आसीना दीर्घसत्रेण कथायां सक्षणा हरेः ॥२१॥
त्वं नः सन्दर्शितो धात्रा दुस्तरं निस्तितीर्षताम् । कलिं सत्त्वहरं पुंसां कर्णधार इवार्णवम् ॥२२॥
ब्रूहि योगेश्वरे कृष्णे ब्रह्मण्ये धर्मवर्मणि । स्वां काष्ठामधुनोपेते धर्मः कं शरणं गतः ॥२३॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां प्रथमस्कन्धे नैमिषीयोपाख्याने प्रथमोऽध्यायः

सार्द्धम् । भूरीणि बहूनि शास्त्राणि । यत् सारं वस्तु तत् विभागशः शस् आर्षः ॥११॥ अङ्ग हे सूत! सातिः सुखार्थ. सौत्रो धातुः सातयतीति ण्यन्तात्तस्मात् क्विपि सात् परमात्माऽस्ति उपास्यत्वेन एषामिति मतुपि सात्वन्तो भक्तास्तेषां पतिः यस्य कार्यस्य भूभारहरणादेः तत् नः अनुवर्णितुम् वर्णयतेरदन्तपाठसामर्थ्यात् णिज्विकल्पे तदभावपक्षे इदं रूपम् ॥ ११ ॥ यस्येति अर्द्धम् । भूतानां प्राणिनां पालनाय समृद्धये च ॥ १३ ॥ संसृतिः संसारम् आपन्नः प्राप्तः । गृणन् उच्चारयन् । ततः संसृतेः सकाशात् । यत् यतो नाम्नः भयं मृत्युरपि ॥ १४ ॥ प्रशमः शान्तिः अयनं मार्गो येषां ते । उपस्पृष्टाः सेविताः सन्तः । स्वर्धुनी गङ्गा तस्या आपस्तु अनुसेवया शनैः शनैः कालान्तरेण न तु सद्यः इति मुनीनामुत्कर्षो व्यञ्जितः ॥ १५ ॥ पुण्यः पावनः श्लोको यशो यस्य ईड्यानि स्तुत्यानि कर्माणि यस्य स चासौ स च तस्य । यद्वा । पुण्यश्लोकैर्युधिष्ठिरादिभिः ईड्यानि कर्माणि यस्य । मलानि दुर्वासनाः ॥ १६ ॥ उदाराणि परमानन्ददातॄणि सूरिभिर्नारदादिभिः । कला नानामूर्तीः दधतस्तस्य नोऽस्माकम् ॥ १७ ॥ अथेति- प्रश्नान्तरे । स्वैरं यथेच्छम् ॥ १८ ॥ उद्गच्छति निवर्तते तमोऽज्ञानं यस्मात्स उत्तमः तथाभूतः श्लोको यशो यस्य तस्य । उत्तमैर्नारदादिभिः श्लोक्यते स्तूयते वा । विक्रमे चरिते अन्ये तृप्यन्तु नाम वयं तु नेति तुशब्दस्यान्वयः । यत् विक्रमजातं पदे पदे प्रतिपदं सुप्तिङन्तात्मकम् । स्वादु स्वादु रुचिजनकं भवति । यद्वा । स्वादुतोऽपि अमृतादपि स्वादु अतीवमधुरं भवति ॥ १९ ॥ वीर्याणि चरितानि यानि कृतवान् तानि वदेति क्रियाशेषः । गूढः प्रच्छन्नैश्वर्यः अत एव कपटानां मायाश्रितानां नरदारकवत्प्रतीयमानः । यद्वा कपटं युद्धप्रार्थनालक्षणं मानुषेषु जरासन्धादिषु यस्य सः । गड्वादित्वात्सप्तम्याः परनिपातः । मर्त्याननतिक्रान्तानि कालियदमनादीनि ॥ २० ॥ दीर्घसत्रेण निमित्तेन सक्षणा लब्धावसराः

॥ २१ ॥ अर्णवं निस्तितीर्षतां कर्णधारो नाविक इव कलिं रागद्वेषादिसंकुलं ससारं तर्तुमिच्छतां नोऽस्माकं धात्रा त्वं दर्शित इत्यन्वयः। सत्त्वहरं धैर्यादिगुणहरम् ॥ २२ ॥ धर्मः वर्मवत् कवचवत् रक्षणीयो यस्य तस्मिन् धर्मवर्मणि। काष्ठां नित्यधाम गोलोकम्। षट्प्रश्नसंग्रहश्लोकः—

किं श्रेयः ? शास्त्रसारः कः ? स्वावतारप्रयोजनम्।

किं कर्म ? केऽवताराश्च ? धर्मः कं शरणं गतः ?॥

इत्येते सूतमुद्दिश्य षट् प्रश्ना मुनिभिः कृताः।

एषामुत्तराणि सप्रसङ्गं यथाप्रकरणं श्रीमद्भागवतमेव संक्षेपतस्तु चतुर्णां द्वितीयेऽध्याये शेषस्य तृतीये चेति ज्ञेयम् ॥ २३ ॥

इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धे गूढार्थदीपिन्यां प्रथमोऽध्यायः।

अथ द्वितीयोऽध्यायः

व्यास उवाच

इति संप्रश्नसंहृष्टो विप्राणां रौमहर्षणिः। प्रतिपूज्य वचस्तेषां प्रवक्तुमुपचक्रमे ॥१॥

सूत उवाच

यं प्रव्रजन्तमनुपेतमपेतकृत्यं द्वैपायनो विरहकातर आजुहाव।
पुत्रेति तन्मयतया तरवोऽभिनेदुस्तं सर्वभूतहृदयं मुनिमानतोऽस्मि ॥२॥
यः स्वानुभावमखिलश्रुतिसारमेकमध्यात्मदीपमतितितीरषतां तमोऽन्धम्।
संसारिणां करुणयाऽऽह पुराणगुह्यं तं व्याससूनुमुपयामि गुरुं मुनीनाम् ॥३॥

द्वितीये प्रश्नषट्के तु चतुर्णामुत्तरं वदन्।
महत्त्वं भगवद्भक्तेराह तच्छ्रवणादिभिः ॥१॥

रोमहर्षणिः[१] रोमहर्षणपुत्र उग्रश्रवा नाम सूतः। प्रतिपूज्य अभिनन्द्य उपचक्रमे प्रारेभे ॥१॥ प्रव्रजन्तं संन्यस्य गच्छन्तं यं व्यासः कातरोऽधीरः सन् हे पुत्र इति प्लुतस्वरेण आहूतवान् तदा तन्मयतया तरवोऽपि प्रतिध्वनिमिषेण हे पुत्र इति प्रयुत्तरं ददुस्तं मुनिं श्रीशुकमानतोऽस्मीति संबन्धः। अनुपेतम् एकाकिनम्। पुनश्च अपेतकृत्यं निवृत्तिमार्गस्थम्। सर्वभूतानां हृद् अन्तःकरणमयते योगबलेन प्रविशतीति तथा भूतं तम्। अत्र अप्लुतेति सूत्रेऽवैदिक इतिशब्दो गृहीतोऽस्य साक्षाद्वेदरूपत्वादत्राप्लुतत्वं न भवति किन्तु प्लुतत्वमेवातः सन्धिरार्ष इति श्रीधराभिप्रायः॥ २ ॥ अन्धं गाढं तमः संसाराख्यमतितितीरषतामतितर्तु-

---

१—रोमाणि हर्षयाञ्चक्रे श्रोतॄणां यः स्वभाषणैः। कर्मणा प्रथितस्तेन रोमहर्षणसंज्ञया॥ इतिकूर्मोक्तेः।

नारायणं नमस्कृत्य नरं चैव नरोत्तमम् । देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥४॥
मुनयः साधु पृष्टोऽहं भवद्भिर्लोकमङ्गलम् । यत्कृतः कृष्णसंप्रश्नो येनात्मा सुप्रसीदति ॥५॥
स वै पुंसां परो धर्मो यतो भक्तिरधोक्षजे । अहैतुक्यप्रतिहता ययाऽऽत्मा सम्प्रसीदति ॥६॥
वासुदेवे भगवति भक्तियोगः प्रयोजितः । जनयत्याशु वैराग्यं ज्ञानं यत्तदहैतुकम् ॥७॥
धर्मः स्वनुष्ठितः पुंसां विष्वक्सेनकथासु यः । नोत्पादयेद्यदि रतिं श्रम एव हि केवलम् ॥८॥
धर्मस्य ह्यापवर्ग्यस्य नार्थोऽर्थायोपकल्पते । नार्थस्य धर्मैकान्तस्य कामो लाभाय हि स्मृतः ॥९॥
कामस्य नेन्द्रियप्रीतिर्लाभो जीवेत यावता । जीवस्य तत्त्वजिज्ञासा नार्थो यश्चेह कर्मभिः ॥१०॥
वदन्ति तत्तत्त्वविदस्तत्त्वं यज्ज्ञानमद्वयम् । ब्रह्मेति परमात्मेति भगवानिति शब्द्यते ॥११॥
तच्छ्रद्दधाना मुनयो ज्ञानवैराग्ययुक्तया । पश्यन्त्यात्मनि चात्मानं भक्त्या श्रुतगृहीतया ॥१२॥
अतः पुम्भिर्द्विजश्रेष्ठा वर्णाश्रमविभागशः । स्वनुष्ठितस्य धर्मस्य संसिद्धिर्हरितोषणम् ॥१३॥
तस्मादेकेन मनसा भगवान् सात्वतां पतिः । श्रोतव्यः कीर्तितव्यश्च ध्येयः पूज्यश्च नित्यदा ।१४।
यदनुध्यासिना युक्ताः कर्मग्रन्थिनिबन्धनम् । छिन्दन्ति कोविदास्तस्य को न कुर्यात्कथारतिम् १५

मिच्छतां संसारिणां करुणया यः पुराणगुह्यमाह [१] तं व्याससूनुमुपयामि शरणं व्रजामि । कथंभूतम् ? स्वानुभवम् असाधारणप्रभावम् । कुतः ? अध्यात्मम् आत्मतत्त्वं दीपयति प्रकाशयतीति तथा । एकमद्वितीयम् । ऊर्ध्वरेफा विकल्प्यन्ते छन्दोभंगभयादिह ॥ ३ ॥ नरं नारायणमित्यत्रान्वेति । जयति संसारमनेनेति जयो ग्रन्थः[२] भारतादिस्तम् । अत्र क्त्वाप्रत्ययेनैवाऽऽनन्तर्ये सिद्धे तत इति वक्तुर्विशेषणं कार्यम् । तन्यते विस्तार्यते ग्रन्थोऽनेनेति ततो वक्ता । तनोतेर्निष्ठान्तं रूपम् ॥ ४ ॥ हे मुनयः लोकमङ्गलं यथा भवति तथाऽहं पृष्टः । यत् यस्मात् येन प्रश्नेन । आत्मा मनः ॥ ५ ॥ वै एवार्थे । अहैतुकी निष्कामा । अप्रतिहता निर्विघ्ना । अधः कृतमक्षजम् इन्द्रियजन्यं ज्ञानं येन यस्माद्वा अधोक्षजो भगवान् ॥ ६ ॥ प्रयोजितः कृतः । हेतुरनुमानादितर्कस्तदगोचरं तर्काविषयं यत् ज्ञानमात्मसाक्षात्काररूपं तच्च जनयतीत्यन्वयः आशु साधनानुसारेण ॥ ७ ॥ पुंसां पुंभिः कर्तरि षष्ठी । सुशब्दः श्रद्धाद्योतनार्थः विषूची । रक्षार्थं सर्वतः प्रसरन्ती पार्षदलक्षणा सेना यस्य सः विष्वक्सेनः । रतिमनुरागम् ॥ ८ ॥ अपवर्गप्रयोजनीभूतस्य धर्मस्य अर्थः भोग्यपदार्थः स्वर्गादिः अर्थाय फलाय नोपयुक्तो भवति । धर्मैकप्रयोजनस्य धनस्य कामो विषयभोगः फलाय न । तदस्य प्रयोजनमित्यर्थे 'स्वर्गादिभ्यो यः' इतिस्वार्थिकाणन्तात् यः प्रत्ययः ॥ ९ ॥ लाभः फलं न किन्तु यावता देहनिर्वाहो भवेत् तावानेव । कर्मभिः कृत्वा यः केवलं जीवेत् स नार्थः किन्तु तत्त्वजिज्ञासैव ॥१०॥ यत् अद्वयं ज्ञानं तत्तत्त्वमित्यन्वयः । शब्द्यते शब्दतः कथ्यते ॥ ११ ॥ तत् तत्त्वं मुनय आत्मनि हृदये पश्यन्तीत्यन्वयः । कीदृक् आत्मानं श्रीकृष्णरूपम् । श्रुतेन पुराणादि-श्रवणेन प्राप्तया ॥ १२ ॥ विभागशः शस् आर्षः । संसिद्धिः फलम् ॥ १३ ॥ एकेन निश्चलेन । नित्यदेति प्रत्येकमन्वेति । दा आर्षः । सात्वतां यदूनाम् ॥ १४ ॥ यस्य भगवतः अनु अनु ध्यानं

१–विशेषणं विशेष्येणेति बाहुलकात् विशेष्यस्यापि पुराणशब्दस्य पूर्वनिपातः ।

२–अष्टादशपुराणानि रामस्य चरितं तथा ।
जयेति नाम चैतेषां प्रवदन्ति मनीषिणः ॥ इति भविष्ये ।

शुश्रूषोः श्रद्दधानस्य वासुदेवकथारुचिः । स्यान्महत्सेवया विप्राः पुण्यतीर्थनिषेवणात् ॥१६॥
शृण्वतां स्वकथां कृष्णः पुण्यश्रवणकीर्तनः । हृद्यन्तःस्थो ह्यभद्राणि विधुनोति सुहृत्सताम् ॥१७॥
नष्टप्रायेष्वभद्रेषु नित्यं भागवतसेवया । भगवत्युत्तमश्लोके भक्तिर्भवति नैष्ठिकी ॥१८॥
तदा रजस्तमोभावाः कामलोभादयश्च ये । चेत एतैरनाविद्धं स्थितं सत्त्वे प्रसीदति ॥१९॥
एवं प्रसन्नमनसो भगवद्भक्तियोगतः । भगवत्तत्त्वविज्ञानं मुक्तसङ्गस्य जायते ॥२०॥
भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः । क्षीयन्ते चास्य कर्माणि दृष्ट एवात्मनीश्वरे ॥२१॥
अतो वै कवयो नित्यं भक्तिं परमया मुदा । वासुदेवे भगवति कुर्वन्त्यात्मप्रसादिनीम् ॥२२॥

सत्त्वं रजस्तम इति प्रकृतेर्गुणास्तैर्युक्तः परः पुरुष एक इहास्य धत्ते ।
स्थित्यादये हरिविरिञ्चिहरेति संज्ञाः श्रेयांसि तत्र खलु सत्त्वतनोर्नृणां स्युः ॥२३॥

पार्थिवाद्दारुणो धूमस्तस्मादग्निस्त्रयीमयः । तमसस्तु रजस्तस्मात्सत्त्वं यद् ब्रह्मदर्शनम् ॥२४॥
भेजिरे मुनयोऽथाग्रे भगवन्तमधोक्षजम् । सत्त्वं विशुद्धं क्षेमाय कल्पन्ते येऽनु तानिह ॥२५॥
मुमुक्षवो घोररूपान् हित्वा भूतपतीनथ । नारायणकलाः शान्ता भजन्ति ह्यनसूयवः ॥२६॥
रजस्तमःप्रकृतयः समशीला भजन्ति वै । पितृभूतप्रजेशादीन् श्रियैश्वर्यप्रजेप्सवः ॥२७॥
वासुदेवपरा वेदा वासुदेवपरा मखाः । वासुदेवपरा योगा वासुदेवपराः क्रियाः ॥२८॥

यदनुध्या सैवासिः खड्गस्तेन युक्ताः कोविदाः कर्म छिन्दन्ति तस्य कथायां रतिमित्यन्वयः । ग्रन्थिमहङ्कारं निबध्नाति दृढीकरोति कर्मविशेषणम् ॥ १५ ॥ पुण्यतीर्थं गङ्गादि तस्य नियमेन सेवनम् तस्मात् महतां सेवा भवति तया च श्रद्धावान् भवति तस्य च श्रोतुमिच्छा भवति शुश्रूषोश्च वासुदेवकथायां रुचिः स्यादित्यन्वयः ॥ १६ ॥ सतामन्तःस्थः सन् हृदि यानि अभद्राणि कामादिवासनास्ता विधुनोति नाशयति । पुण्ये पुण्यप्रापके श्रवणकीर्तने यस्य ॥१७॥ अभद्रेषु पापेषु । भागवतं पुराणं भक्ता वा तेषां । नैष्ठिकी निश्चला । सर्वाभद्रनाशस्य ज्ञानोत्तरकालत्वात्प्रायग्रहणम् ॥ १८ ॥ रजस्तमोभ्यां भावा उत्पन्ना ये तैरेतैरनाविद्धम् अनाक्रान्तं चेतः सत्त्वे स्थितं सत् प्रसीदति शान्तं भवति ॥ १९ ॥ विज्ञानमनुभवः । ॥ २० ॥ हृदयग्रन्थिरहङ्कारः । आत्मनि हृदये सर्वत्र कर्मकर्तरि लट् ॥ २१ ॥ अतो वै अत एव । आत्मप्रसादिनीं मनःसंशोधिनीम् ॥ २२ ॥ एक एव अस्य विश्वस्य स्थितिः पालनं तदाद्यर्थं संज्ञा नामानि धत्ते । तत्र तेषां मध्ये श्रेयांसि भुक्तिमुक्तिरूपाणि फलानि सत्त्वतनोर्वासुदेवादेव [1] स्युः । हरेति सुप्सुपेति योगविभागात्समासः ॥ २३ ॥ पार्थिवात् पृथिवीविकारात् दारुणः काष्ठात् धूमः श्रेष्ठः तस्मादग्निः श्रेष्ठो यथा तथा तमसो रजः श्रेष्ठं तस्माच्च सत्त्वं श्रेष्ठं यत् सत्त्वं ब्रह्मणो दर्शनं बोधकं भवति । त्रयीमय आहवनीयादिरूपः ॥ २४ ॥ अथो अतो हेतोः अग्रे पुरा । विशुद्धसत्त्वमूर्तिम् । तान् मुनीन् येऽनुसरन्ति तेऽपि क्षेमाय मोक्षाय कल्पन्ते योग्या भवन्ति ॥ २५ ॥ अनसूयवो देवतान्तरनिन्दारहिताः । कला मूर्तीः ॥ २६ ॥ पितृभूतादिभिः समानशीलाः । श्रिया सह ऐश्वर्यं प्रजाश्च ईप्सन्तीति तथा ॥ २७ ॥ पराः प्रतिपादकाः योगा योगशास्त्राणि ॥ २८ ॥

१–अस्य विशेषविवरणमस्मत्कृतसाप्ताहिककथायां द्रष्टव्यम् ।

वासुदेवपरं ज्ञानं वासुदेवपरं तपः । वासुदेवपरो धर्मो वासुदेवपरा गतिः ॥२९॥
स एवेदं ससर्जाग्रे भगवानात्ममायया । सदसद्रूपया चासौ गुणमय्याऽगुणो विभुः ॥३०॥
तया विलसितेष्वेषु गुणेषु गुणवानिव । अन्तःप्रविष्ट आभाति विज्ञानेन विजृम्भितः ॥३१॥
यथा ह्यवहितो वह्निर्दारुष्वेकः स्वयोनिषु । नानेव भाति विश्वात्मा भूतेषु च तथा पुमान् ॥३२॥
असौ गुणमयैर्भावैर्भूतसूक्ष्मेन्द्रियात्मभिः । स्वनिर्मितेषु निर्विष्टो भुङ्क्ते भूतेषु तद्गुणान् ॥३३॥
भावयत्येष सत्त्वेन लोकान् वै लोकभावनः । लीलावतारानुरतो देवतिर्यङ्नरादिषु ॥३४॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां प्रथमस्कन्धे नैमिषीयोपाख्याने द्वितीयोऽध्यायः

ज्ञानं वेदान्तशास्त्रम् । तपः चान्द्रायणादि । धर्मो धर्मशास्त्रम् । गम्यते इति गतिः स्वर्गादिलोकः ॥२९ स एव मायया हेतुभूतया इदं विश्वं ससर्ज । स्वयं तु निर्गुणः । सदसद्रूपया कार्यकारणरूपया ॥३०॥ तया मायया विलसितेषु उद्भूतेषु गुणेषु आकाशादिषु जीवेषु वा अन्तः प्रविष्टः सगुण इव आभाति । विजृम्भितः परिपूर्णः ॥ ३१ ॥ यथा एकोऽपि वह्निः स्वयोनिषु काष्ठेषु निहितो नाना भाति तथा भूतेषु प्राणिषु पुमान् ईश्वर इत्यन्वयः ॥ ३२ ॥ असौ भगवान् भावैस्तत्त्वैर्भूतादिभिः निर्मितेषु भूतेषु चतुर्विधेषु प्रविष्टः सन् तत्तद्विषयान् भुङ्क्ते जीवान् भोजयतीत्यर्थः । अन्तर्भावितण्यर्थः ॥३३॥ एष वै एष एव लोकान् भावयति पालयति तथा तान् भावयति उत्पादयतीति भावनः । देवादिषु ये लीलावतारास्तेषु अनुरक्तः सन् ॥ ३४ ॥ एवमत्र चतुर्णां प्रश्नानामुत्तराणि । तेषां संग्रहश्लोकः—

कृष्णभक्तिः परं श्रेयः शास्त्रसारश्च सैव हि ।
प्रयोजनं सतो रक्षा कर्म सृष्ट्यादिलक्षणम् ॥
अवतारा असंख्येया धर्मो भागवते स्थितः ।
चतुर्णामत्र शेषस्य तृतीये तूत्तरं कृतम् ॥

इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धे गूढार्थदीपिन्यां द्वितीयोऽध्यायः ।

अथ तृतीयोऽध्यायः

सूत उवाच

जगृहे पौरुषं रूपं भगवान् महदादिभिः । संभूतं षोडशकलमादौ लोकसिसृक्षया ॥१॥
यस्याम्भसि शयानस्य योगनिद्रां वितन्वतः । नाभिह्रदाम्बुजादासीद् ब्रह्मा विश्वसृजां पतिः॥२॥

तृतीये श्रीहरेर्मुख्याश्चतुर्विंशतिसंख्यकाः ।
अवताराः क्रमेणोक्ता नानालीलोपबृंहिताः ॥१॥

आदौ पौरुषं पुरुषावतारम् । संभूतं संजातम् । महद् महत्तत्त्वम् । एकादशेन्द्रियाणि पञ्चभूतानि चेत्येवं षोडश कला यस्मिन् तद् ॥१॥ यस्य नाभेः सकाशाद् ब्रह्मा आसीत् स भगवानिति पूर्वेणान्वयः ।

यस्यावयवसंस्थानैः कल्पितो लोकविस्तरः। तद्वै भगवतो रूपं विशुद्धं सत्त्वमूर्जितम् ॥३॥

पश्यन्त्यदो रूपमदभ्रचक्षुषा सहस्रपादोरुभुजाननाद्भुतम्।
सहस्रमूर्धश्रवणाक्षिनासिकं सहस्रमौल्यम्बरकुण्डलोल्लसत् ॥४॥

एतन्नानावताराणां निधानं बीजमव्ययम्। यस्यांशांशेन सृज्यन्ते देवतिर्यङ्नरादयः ॥५॥
स एव प्रथमं देवः कौमारं सर्गमास्थितः। चचार दुश्चरं ब्रह्मा ब्रह्मचर्यमखण्डितम् ॥६॥
द्वितीयं तु भवायास्य रसातलगतां महीम्। उद्धरिष्यन्नुपादत्त यज्ञेशः सौकरं वपुः ॥७॥
तृतीयमृषिसर्गं च देवर्षित्वमुपेत्य सः। तन्त्रं सात्वतमाचष्ट नैष्कर्म्यं कर्मणां यतः ॥८॥
तुर्ये धर्मकलासर्गे नरनारायणावृषी। भूत्वाऽऽत्मोपशमोपेतमकरोद् दुश्चरं तपः ॥९॥
पञ्चमः कपिलो नाम सिद्धेशः कालविप्लुतम्। प्रोवाचासुरये सांख्यं तत्त्वग्रामविनिर्णयम् ॥१०॥
षष्ठमत्रेरपत्यत्वं वृतः प्राप्तोऽनसूयया। आन्वीक्षिकीमलर्काय प्रह्लादादिभ्य ऊचिवान् ॥११॥
ततः सप्तम आकूत्यां रुचेर्यज्ञोऽभ्यजायत। स यामाद्यैः सुरगणैरपात्स्वायम्भुवान्तरम् ॥१२॥
अष्टमे मेरुदेव्यां तु नाभेर्जात उरुक्रमः। दर्शयन् वर्त्म धीराणां सर्वाश्रमनमस्कृतम् ॥१३॥
ऋषिभिर्याचितो भेजे नवमं पार्थिवं वपुः। दुग्धेमामोषधीर्विप्रास्तेनायं स उशत्तमः ॥१४॥
रूपं स जगृहे मात्स्यं चाक्षुषोदधिसंप्लवे। नाव्यारोप्य महीमय्यामपाद्वैवस्वतं मनुम् ॥१५॥

योगनिद्रां समाधिरूपाम्। विश्वसृजां प्रजापतीनाम् ॥ २ ॥ अवयवसंस्थानैः करचरणाद्यवयवविन्यासैः। विस्तरः विस्तारः। अशब्देऽपि बाहुलकात् घनभावः। ऊर्जितं सर्वतो बलवत् ॥ ३ ॥ अदो रूपं योगिनः पश्यन्तीत्यन्वयः। अदभ्रचक्षुषा ज्ञानचक्षुषा। मौलिर्मुकुटम्। सहस्रमपरिमितानि यानि पादादीनि तैरद्भुतम् ॥४॥ एतत् आदिनारायणरूपम्। निधीयतेऽस्मिन् इति निधानं लयस्थनाम्। बीजमुद्गमस्थानम्। यस्यांशो ब्रह्मा तस्यांशो मरीच्यादिस्तेन ॥ ५ ॥ यः रूपं जगृहे स एव । कुमाराणां सनत्कुमारादीनामयं सर्गःकौमारस्तम्। ब्रह्मा ब्राह्मणो भूत्वा। अत्र प्रथमादिशब्दैः निर्देशमात्रक्रमो नत्वाविर्भावक्रमः ॥ ६ ॥ वाराहावतारमाह-अस्य विश्वस्य भवाय क्षेमाय द्वितीयं सौकरं वपुः उपादत्त गृहीतवान् ॥ ७ ॥ नारदावतारमाह—सात्वतं तन्त्रं नारदपञ्चरात्रम्। आचष्ट उक्तवान्। नैष्कर्म्यं बन्धमोचकत्वम् ॥८॥ नरनारायणावतारमाह तुर्ये चतुर्थे धर्मस्य कला भार्या मूर्तिनाम्नी तस्याः सर्गे पुत्रत्वे ऋषी भूत्वा आत्मोपशमो मनोनिग्रहः। दुश्चरं कठोरम् ॥ ९ ॥ कपिलावतारमाह। विलुप्तं नष्टम्। आसुरये एतन्नाम्ने ब्राह्मणाय। ग्रामः समूहः ॥१०॥ दत्तात्रेयावतारमाह। अनसूयया वृतः प्रार्थितः षष्ठमपत्यत्वं प्राप्तः। आन्वीक्षिकीमात्मविद्याम्। अन्वीक्ष्यते आत्मा अनया तामधिकृत्य कृताम् ॥११॥ यज्ञावतारमाह—रुचेः आकूत्यां पत्न्यां यज्ञो भगवान् जातः। स च यज्ञः स्वस्यैव पुत्राः यामसंज्ञकदेवगणास्तैः सह अन्तरं मन्वन्तरम् ॥१२॥ ऋषभावतारमाह—नाभेः सकाशात् मेरुदेव्यां पत्न्याम् ऋषभो जातः। उरुक्रमो महापराक्रमः। धीराणां परमहंसानां वर्त्म पारमहंस्यमार्गम् ॥ १३ ॥ पृथ्वतारमाह—पृथोरिदं पार्थिवं वपुः भेजे प्राप्तः। हे विप्राः। इमां पृथ्वीम् ओषधीः सर्ववस्तूनि अदुग्ध। 'बहुलं छन्दस्यमाङ् योगेऽपि' इत्यडभावः। अयमवतारः उशत्तमः कमनीयतमः। 'वश् कान्तौ' इत्यस्मात् शत्रन्तात्तमप् ॥ १४ ॥ मत्स्यावतारमाह—चाक्षुषमन्वन्तरे यः संप्लवः एकीभावः

सुरासुराणामुदधिं मथ्नतां मन्दराचलम् । दध्रे कमठरूपेण पृष्ठ एकादशे विभुः ॥१६॥
धान्वन्तरं द्वादशमं त्रयोदशममेव च । अपाययत्सुरानन्यान्मोहिन्या मोहयन् स्त्रिया॥१७॥
चतुर्दशं नारसिंहं बिभ्रद्दैत्येन्द्रमूर्जितम् । ददार करजैर्वक्षस्येरकां कटकृद्यथा ॥१८॥
पञ्चदशं वामनकं कृत्वागादध्वरं बलेः । पदत्रयं याचमानः प्रत्यादित्सुस्त्रिविष्टपम् ॥१९॥
अवतारे षोडशमे पश्यन् ब्रह्मद्रुहो नृपान् । त्रिःसप्तकृत्वः कुपितो निःक्षत्रामकरोन्महीम् ॥२०॥
ततः सप्तदशे जातः सत्यवत्यां पराशरात् । चक्रे वेदतरोः शाखा दृष्ट्वा पुंसोऽल्पमेधसः ॥२१॥
नरदेवत्वमापन्नः सुरकार्यचिकीर्षया । समुद्रनिग्रहादीनि चक्रे वीर्याण्यतः परम् ॥२२॥
एकोनविंशे विंशतिमे वृष्णिषु प्राप्य जन्मनी । रामकृष्णाविति भुवो भगवानहरद्भरम् ॥२३॥
ततः कलौ सम्प्रवृत्ते सम्मोहाय सुरद्विषाम् । बुद्धो नाम्ना जिनसुतः कीकटेषु भविष्यति ॥२४॥
अथासौ युगसन्ध्यायां दस्युप्रायेषु राजसु । जनिता विष्णुयशसो नाम्ना कल्किर्जगत्पतिः ॥२५॥
अवतारा ह्यसंख्येया हरेः सत्त्वनिधेर्द्विजाः । यथाविदासिनः कुल्याः सरसः स्युः सहस्रशः ॥२६॥
ऋषयो मनवो देवा मनुपुत्रा महौजसः । कलाः सर्वे हरेरेव सप्रजापतयस्तथा ॥२७॥
एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम् । इन्द्रारिव्याकुलं लोकं मृडयन्ति युगे युगे ॥२८॥
जन्म गुह्यं भगवतो य एतत्प्रयतो नरः । सायं प्रातर्गृणन् भक्त्या दुःखग्रामाद्विमुच्यते॥२९॥
एतद्रूपं भगवतो ह्यरूपस्य चिदात्मनः । मायागुणैर्विरचितं महदादिभिरात्मनि ॥३०॥
यथा नभसि मेघौघो रेणुर्वा पार्थिवोऽनिले । एवं द्रष्टरि दृश्यत्वमारोपितमबुद्धिभिः ॥३१॥

प्रलयस्तस्मिन् । महीमयी । स्वार्थे मयट् ॥ १५ ॥ कूर्मावतारमाह मथ्नतां सताम् । कमठः कच्छपः ॥ १६ ॥ धन्वन्तरिमोहिन्यवतारद्वयमाह—द्वादशमं रूपं बिभ्रत् । त्रयोदशमं बिभ्रदित्युत्तरेणान्वयः । अन्यानसुरान् मोहयन् सुरानपाययत् सुधामिति शेषः ॥ १७ ॥ ऊर्जितं बलिष्ठं । रूपं बिभ्रत् करजैर्नखैर्वक्षसि विषये । एरका निर्ग्रन्थितृणं पटेरा इति ॥ १८ ॥ वामनकं रूपम् । ह्रस्वार्थे कन् । तृतीयं विष्टपं लोकं स्वर्गं ग्रहीतुमिच्छुः सन् । याचमानः हेतौ शानच् ॥ १९ ॥ त्रिगुणितान् सप्तकृत्वः एकविंशतिवारान् । त्रिरित्यत्र सुच्प्रत्ययः ॥ २० ॥ २१ ॥ अतः परमष्टादशे । वीर्याणि चरितानि ॥ २२ ॥ वृष्णिषु यदुषु । भरं भारम् ॥ २३ ॥ संमोहाय अनधिकारित्वाद्वेदमार्गच्यावनाय । कीकटेषु गयाप्रदेशे ॥ २४॥ अथ द्वाविंशे जनिता जनिष्यते ॥ २५ ॥ अविदासिनोऽशोष्यात् सरसः कुल्याः क्षुद्रनद्यः । 'दसु' उपक्षये, णिनिः ॥ २६ ॥ एते पूर्वोक्ता द्वाविंशतिः । चकारात् हरिहयग्रीवयोर्ग्रहणम् एवं चतुर्विंशतिः । अन्येऽपि बहवः । मृडयन्ति सुखयन्ति । अत्र केचिदंशतः केचित्कलातः कृष्णस्तु भगवान् स्वयं परिपूर्णैश्वर्यः आविष्कृततत्सर्वशक्तित्वात् ।[1] ॥ २७ ॥ २८ ॥ गृणन् कीर्तयन् भवति स दुःखग्रामात् संसारात् । ग्रामः समूहः ॥ २९ ॥ चिदात्मनो जीवस्य एतद्रूपं स्थूलशरीरं भगवतो मायागुणैरात्मनि कल्पितम् आत्मस्थाने शरीरं कृतमित्यर्थः ॥ ३० ॥ यथाऽदृश्ययोरपि नभोऽनि-

१—नचैतावताऽन्येषामपूर्णत्वं शङ्कनीयं सर्वज्ञत्वसर्वशक्तिमत्त्वेऽपि तेषां यथोपयोगमेव शक्तीनामाविर्भावादन्यासां तिरोहितत्वाच्च सर्वेषां पूर्णत्वं सुस्थिरमेवेत्यवधेयम् ।

अतः परं यदव्यक्तमव्यूढगुणबृंहितम् । अदृष्टाश्रुतवस्तुत्वात् स जीवो यत्पुनर्भवः ।।३२।।

यत्रेमे सदसद्रूपे प्रतिषिद्धे स्वसंविदा । अविद्ययाऽऽत्मनि कृते इति तद् ब्रह्मदर्शनम् ।।३३।।

यद्येषोपरता देवी माया वैशारदी मतिः । सम्पन्न एवेति विदुर्महिम्नि स्वे महीयते ।।३४।।

एवं जन्मानि कर्माणि ह्यकर्तुरजनस्य च । वर्णयन्ति स्म कवयो वेदगुह्यानि हृत्पतेः ।।३५।।

स वा इदं विश्वममोघलीलः सृजत्यवत्यत्ति न सज्जतेऽस्मिन् ।
भूतेषु चान्तर्हित आत्मतन्त्रः षाड्वर्गिकं जिघ्रति षड्गुणेशः ।।३६।।
न चास्य कश्चिन्निपुणेन धातुरवैति जन्तुः कुमनीष ऊतीः ।
नामानि रूपाणि मनोवचोभिः सन्तन्वतो नटचर्यामिवाज्ञः ।।३७।।
स वेद धातुः पदवीं परस्य दुरन्तवीर्यस्य रथाङ्गपाणेः ।
योऽमायया सन्ततयानुवृत्त्या भजेत तत्पादसरोजगन्धम् ।।३८।।
अथेह धन्या भगवन्त इत्थं यद्वासुदेवेऽखिललोकनाथे ।
कुर्वन्ति सर्वात्मकमात्मभावं न यत्र भूयः परिवर्त उग्रः ।।३९।।

इदं भागवतं नाम पुराणं ब्रह्मसम्मितम् । उत्तमश्लोकचरितं चकार भगवानृषिः ।।४०।।

निःश्रेयसाय लोकस्य धन्यं स्वस्त्ययनं महत् । तदिदं ग्राहयामास सुतमात्मवतां वरम् ।।४१।।

सर्ववेदेतिहासानां सारं सारं समुद्धृतम् । स तु संश्रावयामास महाराजं परीक्षितम् ।।४२।।

ल्योर्नीलं नभः धूसरोऽनिल इत्यादि दृश्यत्वधर्मं आरोपितो भवति एवं द्रष्टरि आत्मनि दृश्यत्वादिधर्मकं शरीरमारोपितमित्यन्वयः । अबुद्धिभिः अल्पबुद्धिभिः । अत्राल्पार्थे नञ् 'तदन्यत्वं तदल्पता' इति कारिकोक्तेः ।। ३१ ।। अतः स्थूलात्परं यत् सूक्ष्मं रूपं तदप्यारोपितमित्यनुषङ्गः । कथंभूतम् ? अपरिणतैः सूक्ष्मैर्गुणकार्यैः इन्द्रियतन्मात्रैः बृंहितं रचितम् । यत् यतः सूक्ष्मात्पुनर्जन्म संभवति स जीवः जीवोपाधिः । किं च अदृष्टम् अश्रुतं च तत् । अतिसूक्ष्मतया दुर्वितर्क्यमित्यर्थः ।। ३२ ।। यत्र यदा इमे स्थूलसूक्ष्मरूपे प्रतिषिद्धे भवतः तत् तदैव ब्रह्मसाक्षात्कारो भवति । कृतेऽध्यस्ते ।। ३३।। यदि माया उपरता भवेत् वैशारदी मतिः स्यात् तदैव जीवः सम्पन्नः परिपूर्णो भवति । ततश्च स्वे महिम्नि स्वरूपानन्दे महीयते विराजते ।। ३४ ।। अजनस्य जन्मरहितस्य । स्म साश्चर्यम् । हृत्पतेरन्तर्यामिणः ।। ३५ ।। स वै स एव । इन्द्रियषड्वर्गविषयं जिघ्रति दूरादेव गृह्णाति नतु सज्जते लिप्तो भवति । अस्मिन् विश्वस्मिन् । यतः षडिन्द्रियनियन्ता ।। ३६ ।। अस्य धातुरीश्वरस्य ऊतीर्लीलाः कोऽपि जन्तुर्देहाभिमानी न जानाति । संतन्वतो विस्तारयतः ।। ३७ ।। पदवीं स्वरूपम् । दुरन्तममितम् । सन्ततया निरन्तरया । गन्धं माधुर्यमनुभवेत् ।।३८।। हे भगवन्तः । भगवदनुरागिणः भवन्तः । इह लोके सर्वात्मकं सम्पूर्णम् आत्मभावं मनोवृत्तिम् । उग्रो दुःसहः । परिवर्तो जन्ममरणप्रवाहः ।।३९।। इदमिति सार्द्धम् । ब्रह्मसंमितं वेदतुल्यम् । यद्वा । ब्रह्म सम्यक् मीयते ज्ञायतेऽनेन । कर्मणि क्तः । महत् सर्वश्रेष्ठम् ।। ४० ।। नवनीतमिव यत् सारं सारं वस्तु तदेवेदम् ।। ४१ ।। स तु शुकः । प्रायेण मृत्युपर्यन्तमनशनव्रतेन । 'प्रायो मरणा-

प्रायोपविष्टं गङ्गायां परीतं परमर्षिभिः। कृष्णे स्वधामोपगते धर्मज्ञानादिभिः सह ।।४३।।
कलौ नष्टदृशामेष पुराणार्कोऽधुनोदितः। तत्र कीर्तयतो विप्रा विप्रर्षेर्भूरितेजसः ।।४४।।
अहं चाध्यगमं तत्र निविष्टस्तदनुग्रहात् । सोऽहं वः श्रावयिष्यामि यथाधीतं यथामति ।।४५।।

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां प्रथमस्कन्धे नैमिषीयोपाख्याने तृतीयोऽध्यायः ।

नशने' इति मेदिनी ॥ ४२ ॥ ४३ ॥ तत्रेति सार्द्धम् । हे विप्राः । विप्रर्षेः श्रीशुकात् तत्र कीर्तयत. सतः तत्र निविष्ट इत्यन्वयभेदात्तत्रपदावृत्तिर्न दोषाय ॥ ४४ ॥

इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धे गूढार्थदीपिन्यां तृतीयोऽध्यायः ।

अथ चतुर्थोऽध्यायः

व्यास उवाच

इति ब्रुवाणं संस्तूय मुनीनां दीर्घसत्रिणाम् । वृद्धः कुलपतिः सूतं बह्वृचः शौनकोऽब्रवीत् ।।१।।

शौनक उवाच

सूत सूत महाभाग वद नो वदतां वर। कथां भागवतीं पुण्यां यदाह भगवाञ्छुकः ।।२।।
कस्मिन् युगे प्रवृत्तेयं स्थाने वा केन हेतुना । कुतः सञ्चोदितः कृष्णः कृतवान् संहितां मुनिः।।३।।
तस्य पुत्रो महायोगी समदृङ् निर्विकल्पकः। एकान्तमतिरुन्निद्रो गूढो मूढ इवेयते ।।४।।
दृष्ट्वानुयान्तमृषिमात्मजमप्यनग्नं देव्यो ह्रिया परिदधुर्न सुतस्य चित्रम् ।
तद्वीक्ष्य पृच्छति मुनौ जगदुस्तवास्ति स्त्रीपुम्भिदा न तु सुतस्य विविक्तदृष्टेः ।।५।।
कथमालक्षितः पौरैः संप्राप्तः कुरुजाङ्गलान् । उन्मत्तमूकजडवद्विचरन् गजसाह्वये ।।६।।
कथं वा पाण्डवेयस्य राजर्षेर्मुनिना सह। संवादः समभूत् तात यत्रैषा सात्वती श्रुतिः ।।७।।

तुर्ये वक्तुस्तथा श्रोतुर्महत्त्वं प्रोच्य तन्मुनेः ।
मनोग्लानिमपाकर्तुं वर्ण्यते नारदागमः ।।१।।

बह्वृचः ऋग्वेदी । 'मुनीनां दशसाहस्रं योऽन्नदानादिपोषणात् । अध्यापयति विप्रर्षिरसौ कुलपतिः स्मृतः' ॥ १ ॥ यत् यां कथां तां वदेत्यन्वयः ॥ २ ॥ इयं कथा । कुतः केन ? सार्वविभक्तिकस्तसिः । कृष्णद्वैपायनो व्यासः ॥ ३ ॥ निर्विकल्पकः निरस्तभेदः । एकान्ता भगवन्निष्ठा मतिर्यस्य । मूढोऽज्ञ इव न तु मूढः ।।४।। आत्मजं शुकमनुयान्तम् ऋषिं व्यासमनग्नमपि दृष्ट्वा जले क्रीडन्त्यो देव्योऽप्सरसः ह्रिया वासांसि परिदधुः सुतस्य नग्नस्यापि ह्रिया न दधुः तच्चित्रमाश्चर्यं वीक्ष्य मुनौ पृच्छति सति ता जगदुरित्यन्वयः । विविक्ता निर्विकारा ॥ ५ ॥ कुरुजाङ्गलान् देशान् । उन्मत्तेति । लोकचेष्टावैपरीत्ये तन्मनोरञ्जकताराहित्ये उद्योगशून्ये च क्रमेण दृष्टान्तत्रयम् । एतेन तस्य जीवन्मुक्तावस्था सूचिता । गजसाह्वये हस्तिनापुरे ॥ ६ ॥ पाण्डवेयस्य पाण्डववंशजस्य परीक्षितः । शुभ्रादित्वाद् ढक् । सातयति सुखयतीति

स गोदोहनमात्रं हि गृहेषु गृहमेधिनाम् । अवेक्षते महाभागस्तीर्थीकुर्वंस्तदाश्रमम् ॥८॥
अभिमन्युसुतं सूत प्राहुर्भागवतोत्तमम् । तस्य जन्म महाश्चर्यं कर्माणि च गृणीहि नः ॥९॥
स सम्राट् कस्य वा हेतोः पाण्डूनां मानवर्धनः । प्रायोपविष्टो गङ्गायामनादृत्याधिराट्श्रियम् ॥१०॥

नमन्ति यत्पादनिकेतमात्मनः शिवाय हानीय धनानि शत्रवः ।
कथं स वीरः श्रियमङ्ग दुस्त्यजां युवैषतोत्स्रष्टुमहो सहासुभिः ॥११॥
शिवाय लोकस्य भवाय भूतये य उत्तमश्लोकपरायणा जनाः ।
जीवन्ति नात्मार्थमसौ पराश्रयं मुमोच निर्विद्य कुतः कलेवरम् ॥१२॥

तत्सर्वं नः समाचक्ष्व पृष्टो यदिह किञ्चन । मन्ये त्वां विषये वाचां स्नातमन्यत्र छान्दसात् ॥१३॥

सूत उवाच

द्वापरे समनुप्राप्ते तृतीये युगपर्यये । जातः पराशराद्योगी वासव्यां कलया हरेः ॥१४॥
स कदाचित् सरस्वत्या उपस्पृश्य जलं शुचि । विविक्तदेश आसीन उदिते रविमण्डले ॥१५॥
परावरज्ञः स ऋषिः कालेनाव्यक्तरंहसा । युगधर्मव्यतिकरं प्राप्तं भुवि युगे युगे ॥१६॥
भौतिकानां च भावानां शक्तिह्रासं च तत्कृतम् । अश्रद्दधानान्निःसत्त्वान् दुर्मेधान् ह्रसितायुषः ॥१७॥
दुर्भगांश्च जनान् वीक्ष्य मुनिर्दिव्येन चक्षुषा । सर्ववर्णाश्रमाणां यद्दध्यौ हितममोघदृक् ॥१८॥
चातुर्होत्रं कर्म शुद्धं प्रजानां वीक्ष्य वैदिकम् । व्यदधाद् यज्ञसन्तत्यै वेदमेकं चतुर्विधम् ॥१९॥

सात् परमात्मा स विषयतया अस्या अस्तीति सात्वती भागवती संहिता ॥ ७ ॥ गोदोहनमात्रकालमवेक्षते प्रतीक्षते । तीर्थीकुर्वन् पवित्रीकुर्वन् ॥ ८ ॥ नोऽस्मभ्यं । गृणीहि कथय ॥ ९ ॥ अधिराट्श्रियं चक्रवर्तिपदम् । प्रायेण[1] मृत्युपर्यन्तानशनेन ॥ १० ॥ अङ्ग हे सूत ! हेति प्रसिद्धम् । आनीय समर्प्य यस्य पादनिकेतं पादपीठम् । युवा एव स वीरः प्राणैः सह श्रियं राज्यलक्ष्मीं कथं त्यक्तुमैच्छत् ? 'एषृ' गतौ इत्यस्मात् ॥ ११ ॥ ये जनास्ते भवाय समृद्धये । अतोऽसौ निर्विद्य विरज्यापि । पराश्रयं परेणामुपकारि ॥ १२ ॥ समाचक्ष्व कथय । स्नातं पारङ्गतम् । छान्दसात्[2] वैदिकवाक्यात् अन्यत्र विना ॥ १३ ॥ कृतयुगापेक्षया तृतीये द्वापरे । तत्रापि तस्य युगस्य द्वापरस्य पर्यये समाप्तिकाले सन्धावित्यर्थः । उपरिचरवसुकन्या वासवी सत्यवती तस्यां योगी व्यासः ॥ १४ ॥ उपस्पृश्य आचम्य आसीनो बभूवेति शेषः ॥ १५ ॥ परावरेति त्रिकम् । परावरज्ञः त्रिकालज्ञ. स ऋषिः सर्ववर्णाश्रमाणां यत् हितं तद्दध्याविति तृतीयेनान्वयः । व्यतिकरं नाशं वीक्ष्य । भावानां शरीरादीनाम् । तत्कृतं कालकृतम् । रंहो वेगः । सत्त्वं धैर्यम् । ह्रसितमल्पम् । अमोघदृक् सत्यसंकल्पः ॥ १६ ॥ १७ ॥ १८ ॥ शुद्धं शुद्धिकरम् । शुद्धशब्दाद्

१—अयनम् आयः प्रकृष्ट आयः प्रायः मरणम् । भावे घञ् । मरणार्थमुपविष्टः, इति बुधरञ्जनी ।

२—इदं तु ब्राह्मणक्षत्रिययोर्बृहस्पतीन्द्रयोराहुतिदानसमये चरुवपरीत्येनोपचारत उक्तम् । वस्तुतस्तु छन्दोभिर्वेदैः स्तुतः इति छान्दसोऽग्निस्तमतति सातत्येन गच्छति प्राप्नोतीति हे छान्दसात् हे सूत । अनि अत्रेति पदच्छेदः । तथा च अत्र वाचां विषये त्वां स्नातम् मन्ये । कथभूतम् अनि । अ आदौ नीत्यक्षरं यस्य तत् निष्णातमित्यर्थः । 'अ आदावधिक्षेपवर्जनामन्त्रणेषु च' इति कोशात् । ,ब्राह्मण्यांक्षत्रियाज्जातः सूत इत्यभिधीयते' इत्युक्तलक्षणो नायं सूतः किन्तु अग्निकुण्डसमुद्भूतः इति(वंशीधरी)

ऋग्यजुःसामाथर्वाख्या वेदाश्चत्वार उद्धृताः । इतिहासपुराणं च पञ्चमो वेद उच्यते ।।२०।।
तत्रर्ग्वेदधरः पैलः सामगो जैमिनिः कविः । वैशम्पायन एवैको निष्णातो यजुषामुत ।।२१।।
अथर्वाङ्गिरसामासीत् सुमन्तुर्दारुणो मुनिः । इतिहासपुराणानां पिता मे रोमहर्षणः ।।२२।।
त एत ऋषयो वेदं स्वं स्वं व्यस्यन्ननेकधा । शिष्यैः प्रशिष्यैस्तच्छिष्यैर्वेदास्ते शाखिनोऽभवन् ।।
त एव वेदा दुर्मेधैर्धार्यन्ते पुरुषैर्यथा । एवं चकार भगवान् व्यासः कृपणवत्सलः ।।२४।।
स्त्रीशूद्रद्विजबन्धूनां त्रयी न श्रुतिगोचरा । कर्मश्रेयसि मूढानां श्रेय एवं भवेदिह ।
इति भारतमाख्यानं कृपया मुनिना कृतम् ।।२५।।
एवं प्रवृत्तस्य सदा भूतानां श्रेयसि द्विजाः । सर्वात्मकेनापि यदा नातुष्यद्धृदयं ततः ।।२६।।
नातिप्रसीदद्धृदयः सरस्वत्यास्तटे शुचौ । वितर्कयन् विविक्तस्थ इदं प्रोवाच धर्मवित् ।।२७।।
धृतव्रतेन हि मया छन्दांसि गुरवोऽग्नयः । मानिता निर्व्यलीकेन गृहीतं चानुशासनम् ।।२८।।
भारतव्यपदेशेन ह्याम्नायार्थश्च दर्शितः । दृश्यते यत्र धर्मादि स्त्रीशूद्रादिभिरप्युत ।।२९।।
तथापि बत मे दैह्यो ह्यात्मा चैवात्मना विभुः । असम्पन्न इवाभाति ब्रह्मवर्चस्यसत्तमः ।।३०।।
किं वा भागवता धर्मा न प्रायेण निरूपिताः । प्रियाः परमहंसानां त एव ह्यच्युतप्रियाः ।।३१।।
तस्यैवं खिलमात्मनं मन्यमानस्य खिद्यतः । कृष्णस्य नारदोऽभ्यागादाश्रमं प्रागुदाहृतम् ।।३२।।
तमभिज्ञाय सहसा प्रत्युत्थायाऽऽगतं मुनिः । पूजयामास विधिवन्नारदं सुरपूजितम् ।।३३।।

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां प्रथमस्कन्धे नैमिषीयोपाख्याने चतुर्थोऽध्यायः ।

'तत्करोति'—इति णिजन्तादच् । चतुर्भिः होतृभिर्निर्वर्त्तमनुष्ठितं कर्म चातुर्होत्रम्[1] । सन्तत्यै परम्परा-विच्छेदाय ।। १९ ।। उद्धृताः पृथक् कृताः ।। २० ।। साम गायतीति सामगः । उत अप्यर्थे ।।२१।। अथर्वे-संज्ञकानि अङ्गिरसा दृष्टानि अनुष्ठितानि प्रकरणानि आङ्गिरसानि तेषाम् । दारुण इति अभिचारादि-प्रयोगज्ञानात् ।। २२ ।। व्यस्यन् विभक्तवन्तः । स्यते रूपम् । शाखिनः शाखावन्तः ।। २३ ।। एवं तथा ।। २४ ।। स्त्रीति सार्द्धम् । बन्धवोऽधमाः । कर्मरूपे श्रेयसि । एवं कृत्वा ।। २५ ।। एवमिति युग्मम् । सर्वात्मकेन सर्वात्मनाऽपि श्रेयसि इत्यत्रान्वेति । स्वार्थे कः । वितर्कयन् चित्तासन्तुष्टौ हेतुं विचारयन् ।। २६ ।। २७ ।। निर्व्यलीकेन निष्कपटभावेन । छन्दांसि मानितानि अन्ये च मानिता इति लिङ्गव्यत्य-येनान्वयः ।।२८।। व्यपदेशेन व्याजेन । आम्नायो वेदः । यत्र स्त्र्यादिभिरनुष्ठेयम् ।। २९ ।। दैह्यः देहे भव आत्मा जीव आत्मना स्वरूपेण विभुः पूर्णोऽपि असत्तम. असन्तुष्ट इव । ब्रह्मवर्चस्विनां मध्ये । यद्वा । ब्रह्मवर्चसी अपि ब्रह्मतेजः सम्पन्नोऽपि ।। ३० ।। प्रायेण प्राधान्येन ।। ३१ ।। खिलं न्यूनम् । कृष्णस्य व्यासस्य । प्रागुदाहृतं सरस्वतीतीरस्थम् ।। ३२ ।। विधिं ब्रह्माणमिव । वच्छब्देन समासो वा विधिपूर्व-कम् । सहसा झटिति ।। ३३ ।।

इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धे गूढार्थदीपिन्यां चतुर्थोऽध्यायः ।

१—होता उद्गाता अध्वर्युः ब्रह्मा इति चत्वारः ।

अथ पञ्चमोऽध्यायः

सूत उवाच

अथ तं सुखमासीन उपासीनं बृहच्छ्रवाः । देवर्षिः प्राह विप्रर्षिं वीणापाणिः स्मयन्निव ॥१॥

नारद उवाच

पाराशर्य महाभाग भवतः कच्चिदात्मना । परितुष्यति शारीर आत्मा मानस एव वा ॥२॥

जिज्ञासितं सुसंपन्नमपि ते महदद्भुतम् । कृतवान् भारतं यस्त्वं सर्वार्थपरिबृंहितम् ॥३॥

जिज्ञासितमधीतं च यत्तद् ब्रह्म सनातनम् । अथापि शोचस्यात्मानमकृतार्थ इव प्रभो ॥४॥

व्यास उवाच

अस्त्येव मे सर्वमिदं त्वयोक्तं तथापि नात्मा परितुष्यते मे ।
तन्मूलमव्यक्तमगाधबोधं पृच्छाम हे त्वाऽऽत्मभवात्मभूतम् ॥५॥
स वै भवान् वेद समस्तगुह्यमुपासितो यत्पुरुषः पुराणः ।
परावरेशो मनसैव विश्वं सृजत्यवत्यत्ति गुणैरसङ्गः ॥६॥
त्वं पर्यटन्नर्क इव त्रिलोकीमन्तश्चरो वायुरिवात्मसाक्षी ।
परावरे ब्रह्मणि धर्मतो व्रतैः स्नातस्य मे न्यूनमलं विचक्ष्व ॥७॥

पञ्चमे सर्वधर्मेभ्यो विशिष्टं हरिकीर्तनम् ।
तुष्टये प्राह देवर्षिः स्ववृत्तं चापि पूर्वजम् ॥१॥

अथ पूजनान्तरम् । देवर्षिः स्मयन्निव तं विप्रर्षिं व्यासं प्राहेत्यन्वयः । बृहच्छ्रवा महायशाः । इवेत्यनेन विषादानर्हता सूचिता ॥ १ ॥ हे व्यास ! भवतः शारीरः शरीराभिमानी मानसः मनोऽभिमानी आत्मा जीवश्च तेनात्मना शरीरेण मनसा च परितुष्यति कच्चिदिति प्रश्ने । भवतः शरीरं मनश्च प्रसन्नं वर्तते इत्येतावद्विवक्षितम् ॥ २ ॥ जिज्ञासितं ज्ञातुमिष्टं यत् तत् सुसम्पन्नं सम्यक् ज्ञातं अपि शब्दादनुष्ठितं च । यत् यतः । परिबृंहितं परिपूर्णम् । महत् ग्रन्थतः अद्भुतमर्थतः ॥ ३ ॥ यत् नित्यं ब्रह्म वेदरूपं तत् त्वया शब्दतोऽधीतम् अर्थतो विचारितं च । शोचसि तत्किमर्थमिति शेषः ॥ ४ ॥ हे नारद । तस्य अपरितोषस्य मूलं कारणं त्वा त्वां पृच्छाम । आत्मभवो ब्रह्मा तस्यात्मनो देहाज्जातम् अत एव अगाधेति योज्यम् ॥ ५ ॥ यः संकल्पमात्रेण गुणैः कृत्वा इद विश्वं सृजति स उपासितः अतः समस्तगुह्यं वेदैवेत्यन्वयः । वै एवार्थे । परें ब्रह्मादयः अवरेऽस्मदादयस्तेषां सर्वेषाम् ईशः नियन्ता ॥ ६ ॥ त्वमर्क इव सर्वदर्शी वायुरिवान्तश्चरः आत्मेव साक्षी अतः परे ब्रह्मणि धर्मतो योगेन अवरे शब्दाख्ये व्रतैर्नियमादिभिर्निष्णातस्य मे यत् न्यूनं[1] न्यूनतां तदतिशयेन विचक्ष्व विचार्य

१–भावप्रधानो निर्देशः ।

श्रीनारद उवाच

भवतानुदितप्रायं यशो भगवतोऽमलम्। येनैवासौ न तुष्येत मन्ये तद्दर्शनं खिलम् ॥८॥
यथा धर्मादयश्चार्था मुनिवर्यानुकीर्तिताः। न तथा वासुदेवस्य महिमा ह्यनुवर्णितः ॥९॥

न यद्वचश्चित्रपदं हरेर्यशो जगत्पवित्रं प्रगृणीत कर्हिचित्।
तद्वायसं तीर्थमुशन्ति मानसा न यत्र हंसा निरमन्त्युशिक्क्षयाः ॥१०॥
तद्वाग्विसर्गो जनताघविप्लवो यस्मिन् प्रतिश्लोकमबद्धवत्यपि।
नामान्यनन्तस्य यशोऽङ्कितानि यच्छृण्वन्ति गायन्ति गृणन्ति साधवः॥११॥
नैष्कर्म्यमप्यच्युतभाववर्जितं न शोभते ज्ञानमलं निरञ्जनम्।
कुतः पुनः शश्वदभद्रमीश्वरे न चार्पितं कर्म यदप्यकारणम् ॥१२॥
अथो महाभाग भवानमोघदृक् शुचिश्रवाः सत्यरतो धृतव्रतः।
उरुक्रमस्याखिलबन्धमुक्तये समाधिनानुस्मर तद्विचेष्टितम् ॥१३॥
ततोऽन्यथा किञ्चन यद्विवक्षतः पृथग्दृशस्तत्कृतरूपनामभिः।
न कर्हिचित्क्वापि च दुःस्थिता मतिर्लभेत वाताहतनौरिवास्पदम् ॥१४॥

कथयेत्यर्थः ॥७॥ येनैव अवर्णितेन यशसा असौ आत्मा न तुष्येत अतस्ते दर्शनं ज्ञानं खिलं न्यूनमपूर्णं मन्ये॥८॥ यथा भारते तथा। चकारात् साधनानि च ॥९॥ यद्वचो ग्रन्थरूपं हरे यशः चरितं न प्रगृणीत न प्रतिपादयेत् तत्काकतीर्थम् उच्छिष्टान्नादिगर्ततुल्यमुशन्ति मन्यन्ते। यत्र ग्रन्थे काकतीर्थे वा मानसाः सात्त्विकमनसो हंसा यतयः श्लेषेण मानससरोवरस्था हंसा मरालाश्च न रमन्ते। कथंभूता यतयो हंसाश्च। उशिक्क्षयाः। उशिक्[1] कमनीयं ब्रह्म पद्मखण्डं च क्षयो निवासो येषां ते। कथंभूतं यशः। जगदेव पविर्वज्रं तस्मात् त्रायते जगपिवतीति जगत्पः कालस्तस्मात् वित्रायते वा। यद्वा जगत्पान्ति तत्त्वोपदेशेनेति जगत्पाः शुकसनकादयस्तैर्विशेषेण त्रायते वर्धते इति जगत्पवित्रम् ॥ १० ॥स चासौ वाग्विसर्गः वाचः प्रयोगः गीतगोविन्दादिः। जनताया अघं विप्लावयति नाशयतीति तथा। यस्मिन् वाग्विसर्गे अबद्धवत्यपि काव्यगतदोषयुक्तेऽपि प्रतिश्लोकं भगवन्नामानि भवन्ति। यत् यानि गृणन्ति उपदिशन्ति ॥ ११ ॥ निरञ्जनम् अविद्यानिवर्तकं निष्कर्मणो मोक्षस्य साधनभूतमपि ज्ञानं भक्तिवर्जितं चेदलमत्यर्थं न शोभते यदा तदा कर्म कुतः शोभते। कीदृक्। शश्वत् साधनकाले फलकाले च दुःखरूपम्। किञ्च यत्काम्यं यदपि अकारणम् अकाम्यं च कर्म माप्यर्पितं च तच्च कुतः इत्यन्वयः ॥ १२ ॥ अथो अतः उरुक्रमस्य महापराक्रमस्य भगवतः तद्विविधं चेष्टितमनुस्मर स्मृत्वा च वर्णय यतो भवान् अमोघदृक् सत्यसंकल्पः। श्रवो यशः ॥१३॥ ततो भगवद्विचेष्टितात् पृथग्दृशोऽत एव अन्यथा प्रकारान्तरेण विवक्षतः पुंसः विवक्षाकृतरूपादिभिर्दुःस्थितां चञ्चला मतिः क्वापि विषये आस्पदं प्रतिष्ठां स्थिरतां न लभेत। वायुना आहता घूर्णिता नौकेव। कर्हि-

---

१– 'वशकान्तौ' इत्यस्मात् औणादिकः किच्चप्रत्ययः। कित्वात्सम्प्रसारणे प्रातिपदिकसंज्ञोत्तरं 'चोः कुः' इति कुत्वे च उशगिति रूपं सिध्यति।

जुगुप्सितं धर्मकृतेऽनुशासतः स्वभावरक्तस्य महान् व्यतिक्रमः ।
यद्वाक्यतो धर्म इतीतरः स्थितो न मन्यते तस्य निवारणं जनः ॥१५॥

विचक्षणोऽस्यार्हति वेदितुं विभोरनन्तपारस्य निवृत्तितः सुखम् ।
प्रवर्तमानस्य गुणैरनात्मनस्ततो भवान् दर्शय चेष्टितं विभोः ॥१६॥

त्यक्त्वा स्वधर्मं चरणाम्बुजं हरेर्भजन्नपक्वोऽथ पतेत्ततो यदि ।
यत्र क्व वाभद्रमभूदमुष्य किं को वार्थ आप्तोऽभजतां स्वधर्मतः ॥१७॥

तस्यैव हेतोः प्रयतेत कोविदो न लभ्यते यद्भ्रमतामुपर्यधः ।
तल्लभ्यते दुःखवदन्यतः सुखं कालेन सर्वत्र गभीररंहसा ॥१८॥

न वै जनो जातु कथंचनाव्रजेन्मुकुन्दसेव्यन्यवदङ्ग संसृतिम् ।
स्मरन्मुकुन्दाङ्घ्र्युपगूहनं पुनर्विहातुमिच्छेन्न रसग्रहो यतः ॥१९॥

इदं हि विश्वं भगवानिवेतरो यतो जगत्स्थाननिरोधसम्भवाः ।
तद्धि स्वयं वेद भवांस्तथापि वै प्रादेशमात्रं भवतः प्रदर्शितम् ॥२०॥

त्वमात्मनाऽऽत्मानमवेह्यमोघदृक् परस्य पुंसः परमात्मनः कलाम् ।
अजं प्रजातं जगतः शिवाय तन्महानुभावाभ्युदयोऽधिगण्यताम् ॥२१॥

चिदित्येव पाठो युक्तः कदाचिदिति स्वामिव्याख्यानात् ॥१४॥ जुगुप्सितं निन्द्यं काम्यादि कर्म धर्मार्थमुपदिशतस्तव महानयं व्यतिक्रमोऽन्यायः अनुचितं जातमित्यर्थः । यस्य तव वाक्यतोऽयमेव मुख्यो धर्म इति स्थितः इतरो दृढविश्वासी जनस्तस्य काम्यकर्मादेः सकाशात् निवारणं न मन्यतेऽतस्तस्य मोक्षो दुर्घटः ॥ १५ ॥ कश्चिदेव विचक्षणो निवृत्तिस्वभावः सुखं वेदितुमर्हति न पुनरनात्मा प्रवृत्तिस्वभावः अतस्तस्य कृते विभोश्चरितं दर्शय वर्णयेत्यर्थः । प्रवर्तमानस्य विषयासक्तस्य । ततोभवान्[1] पूज्यस्त्वम् । अतो मध्यमपुरुषो नानुपपन्नः । विचक्षणो भवानित्यन्वयो वा ॥ १६ ॥ अपक्वः अपक्ववासन एव यदि ततो भजनात् भ्रश्येत् म्रियेत वा । यत्र वा वा नीचयोनावपि अमुष्य भक्तस्य किमभद्रं भवेन्नेत्यर्थः । अभजताम् अभजद्भिस्तु कर्तरि षष्ठी को वा अर्थः प्राप्तः न कोऽपीत्यन्वयः ॥ १७ ॥ उपर्यधः लोकेषु । तत् विषयसुखं तु अन्यतः प्राचीनकर्मणः सकाशात् । गभीरमलक्ष्यं रंहो वेगो यस्य तेन ॥१८॥ अङ्ग हे व्यास ! मुकुन्दसेवी जनः अन्यवत् कर्मनिष्ठवत् । संसृतिं जन्ममरणरूपाम् जातु कदाचिदपि । उपगूहनम् आलिङ्गनसुखम् । रसग्रहः भक्तिरसग्राही । रसेन रसमूर्तिना भगवता गृह्यते आकृष्यते वा ॥ १९ ॥ स तु अस्मात् इतरः पृथक् । इव एवार्थे । वेद वै वेदैव । प्रदेश एकदेशः । स्वार्थेऽण् । यद्वा इतरः इतर इव जीव इव यः प्रतीयते सोऽपि भगवानित्यन्वयो वा । स्थानं पालनम् ॥ २० ॥ अमोघा यथार्था दृक् दृष्टि र्ज्ञानं यस्य तत्सम्बुद्धौ हे अमोघदृक् सर्वज्ञ । त्वम् आत्मानं परमात्मनः कलामंशभूतमवेहीत्यन्वयः । अजमेव जगतः

१–इतराभ्योऽपि दृश्यन्ते इति प्रथमान्तात्तसिल् तत्रभवानितिवत् ।

इदं हि पुंसस्तपसः श्रुतस्य वा स्विष्टस्य सूक्तस्य च बुद्धदत्तयोः ।
अविच्युतोऽर्थः कविभिर्निरूपितो यदुत्तमश्लोकगुणानुवर्णनम् ।।२२।।
अहं पुरातीतभवेऽभवं मुने दास्यास्तु कस्याश्चन वेदवादिनाम् ।
निरूपितो बालक एव योगिनां शुश्रूषणे प्रावृषि निर्विविक्षताम् ।।२३।।
ते मय्यपेताखिलचापलेऽर्भके दान्तेऽधृतक्रीडनकेऽनुवर्तिनि ।
चक्रुः कृपां यद्यपि तुल्यदर्शनाः शुश्रूषमाणे मुनयोऽल्पभाषिणि ।।२४।।
उच्छिष्टलेपाननुमोदितो द्विजैः सकृत्स्म भुञ्जे तदपास्तकिल्बिषः ।
एवं प्रवृत्तस्य विशुद्धचेतसस्तद्धर्म एवात्मरुचिः प्रजायते ।।२५।।
तत्रान्वहं कृष्णकथाः प्रगायतामनुग्रहेणाश्रृणवं मनोहराः ।
ताः श्रद्धया मेऽनुपदं विश्रृण्वतः प्रियश्रवस्यङ्ग ममाभवद्रुचिः ।।२६।।
तस्मिंस्तदा लब्धरुचेर्महामुने प्रियश्रवस्यस्खलिता मतिर्मम ।
ययाहमेतत्सदसत्स्वमायया पश्ये मयि ब्रह्मणि कल्पितं परे ।।२७।।
इत्थं शरत्प्रावृषिकावृतू हरेर्विश्रृण्वतो मेऽनुसवं यशोऽमलम् ।
संकीर्त्यमानं मुनिभिर्महात्मभिर्भक्तिः प्रवृत्ताऽऽत्मरजस्तमोऽपहा ।।२८।।
तस्यैवं मेऽनुरक्तस्य प्रश्रितस्य हतैनसः । श्रद्दधानस्य बालस्य दान्तस्यानुचरस्य च ।।२९।।

शिवाय आत्मना स्वयमेव प्रजातमवेहि । तत् तस्मात् हरेरम्युदयश्चरित्रमधिकं निरूप्यताम् ॥ २१ ॥ तपः-श्रुतादीनामिदमेव अविच्युतोऽर्थः मुख्यं फलम् । किं तत् । गुणानुवर्णनमिति यत् । श्रुतम् अध्ययनम् । स्विष्टं यागादि । सूक्तमध्यापनम्।[1] बुद्धदत्तयोः ज्ञानदानयोः ॥ २२ ॥ पुरा पूर्वकल्पे । गतजन्मनि । दास्याः सकाशादभवम् । स चाहं शुश्रूषणे नियुक्तः । प्रावृषि चातुर्मास्ये । निर्विविक्षताम् निवेशमेकत्र वासं कर्तुमिच्छताम् ।।२३।। ते मुनयः यद्यपि तुल्यदृष्टयस्तथाऽपि मयि अर्भके वाले कृपां चक्रुरित्यन्वयः । चापलं चपलता । क्रीडनकानि क्रीडासाधनानि ।।२४।। उत्कृष्टं शिष्टम् उच्छिष्टमिति निरुक्तात् उच्छिष्टाः उत्कृष्टाः गुरुभोजनतोऽवशिष्टलेपाः पाकभाण्डस्था ओदनादयस्तान् । न तु भुक्तावशिष्टं भोजनपात्रस्थमन्नम् । 'नोच्छिष्टं' कस्यचिद् दद्यात् । उच्छिष्टभोजिनः श्वानः इति तन्निषेधात् । स्म प्रजायते इत्यत्रान्वेति ।।२५।। अङ्ग हे मुने ! अन्वहं प्रतिदिनम् मे स्वाभाविकी या श्रद्धा तया ताः कथा विशृण्वतो मम भगवति रुचिरभवत् एवं ममेत्यस्य न पौनरुक्त्यम् । श्रवो यशः ॥ २६ ॥ तस्मिन् भगवति अस्खलिता स्थिरा मतिरभवदित्यनुषङ्गः । यया मत्या एतत् सदसत् स्थूलसूक्ष्मशरीरद्वयं स्वाविद्यया मयि कल्पितं न वस्तुतः इति तत्क्षणमेव अपश्ये अपश्यम् तङार्षः । कथंभूते । परे ब्रह्मणि तदंशरूपे मयि 'ममैवांशो जीवलोके इति गीतोक्तेः ।।२७।।[2] ऋतू ऋतुद्वयं मासचतुष्टयम् । अनुसवं त्रिकालं श्रृण्वतो मे भक्तिः प्रवृत्ता । रजस्तमसी अपहन्तीति तथा ।।२८।। तस्येति द्वयम् । प्रश्रितस्य विनीतस्य मे ममोपरि कृपया भगवता उदितं प्रोक्तं ज्ञायतेऽनेनेति ज्ञानं ज्ञानसाधनं शास्त्रं यत् भागवतम् तत् अन्ववोचन् उपदिष्टवन्तः। गमिष्यन्तः जिगमिषवः

१—बुद्धीत्यपाठः श्रुतादयो भावे निष्ठा इति स्वामिव्याख्यानात् ।
२—अत्यन्तसंयोगे द्वितीया ।

ज्ञानं गुह्यतमं यत्तत्साक्षाद्भगवतोदितम् । अन्ववोचन् गमिष्यन्तः कृपया दीनवत्सलाः ।।३०।।
येनैवाहं भगवतो वासुदेवस्य वेधसः । मायानुभावमविदं येन गच्छन्ति तत्पदम् ।।३१।।
एतत्संसूचितं ब्रह्मंस्तापत्रयचिकित्सितम् । यदीश्वरे भगवति कर्म ब्रह्मणि भावितम् ।।३२।।
आमयो यश्च भूतानां जायते येन सुव्रत । तदेव ह्यामयं द्रव्यं न पुनाति चिकित्सितम् ।।३३।।
एवं नृणां क्रियायोगाः सर्वे संसृतिहेतवः । त एवात्मविनाशाय कल्पन्ते कल्पिताः परे ।।३४।।
यदत्र क्रियते कर्म भगवत्परितोषणम् । ज्ञानं यत्तदधीनं हि भक्तियोगसमन्वितम् ।।३५।।
कुर्वाणा यत्र कर्माणि भगवच्छिक्षया सकृत् । गृणन्ति गुणनामानि कृष्णस्यानुस्मरन्ति च ।।३६।।
नमो भगवते तुभ्यं वासुदेवाय धीमहि । प्रद्युम्नायानिरुद्धाय नमः सङ्कर्षणाय च ।।३७।।
इति मूर्त्यभिधानेन मन्त्रमूर्तिममूर्तिकम् । यजते यज्ञपुरुषं स सम्यग्दर्शनः पुमान् ।।३८।।
इमं स्वनिगमं ब्रह्मन्नवेत्य मदनुष्ठितम् । अदान्मे ज्ञानमैश्वर्यं स्वस्मिन् भावं च केशवः ।।३९।।

त्वमप्यदभ्रश्रुत विश्रुतं विभोः समाप्यते येन विदां बुभुत्सितम् ।
आख्याहि दुःखैर्मुहुरर्दितात्मनां संक्लेशनिर्वाणमुशन्ति नान्यथा ।।४०।।

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां प्रथमस्कन्धे नारदव्याससंवादे पञ्चमोऽध्यायः ।

गुह्यतमम्[१] ।।२९।।३०।। येन भागवतेनैव । अनुभावं प्रभावम् । तत्पदं वैकुण्ठम् ।।३१।। भावितं समर्पितं कर्मेति यत् एतदेव चिकित्सितं[२] तन्निवर्तकमौषधम् ।। ३२ ।। हे सुव्रत सत्यसंकल्प । येन घृतादिद्रव्येण आमयो रोगो जायते तदेव आमयकारणभूतं द्रव्यं घृतादि चिकित्सितं द्रव्यान्तरैः पुटितं सत् आमयं न पुनाति न शोधयति न निवर्तयति अपितु पुनात्येव ।।३३।। परे ब्रह्मणि कल्पिताः सन्तः आत्मविनाशाय मोक्षाय।। ३४।। यत् निष्कामं कर्म तदधीनं ज्ञानं भवति ।। ३५ ।। यत्र यदा शिक्षया यत्करोषि-इति गीतोपदेशेन कर्माणि कुर्वाणा भवन्ति तदा गृणन्ति उच्चारयन्ति ।। ३६ ।।[३] तुभ्यं नमो धीमहि कुर्वीमहि ।। ३७ ।। इति इत्थं पूर्वोक्तमूर्तिवाचकमन्त्रेण मन्त्रे मूर्तिर्यस्य तं प्राकृतमूर्तिरहितं यः पूजयति स सम्यक् आत्मानं परमात्मानं च पश्यतीत्यर्थः ।। ३८ ।। स्वनिगमं स्वोपदेशम् । अवेत्य ज्ञात्वा ।। ३९ ।। हे अदभ्रश्रुत बहुश्रुत । विभोः श्रीकृष्णस्य विश्रुतं यश आख्याहीत्यन्वयः । येन बुभुत्सितं बोद्धुमिच्छा समाप्यते । यत् यतः जीवानां क्लेशशान्तिमन्यथा प्रकारान्तरेण न उशन्ति न मन्यन्ते ।।४०।।

इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धे गूढार्थदीपिन्यां पञ्चमोऽध्यायः

१–ज्ञानप्रधानं गुह्यं तन्मिश्रितभक्तिप्रधानं गुह्यतरं केवलं पराभक्तिप्रधानं शास्त्रं गुह्यतममिति तृतीयकोटौ तमप्प्रत्ययः ।

२–चिकित्साशब्दात् तत्करोतीति णिजन्तात् क्तः । ३–अन्तः करणचतुष्टयाधिष्ठातृरूपेण चतुर्मूर्तये ।

अथ षष्ठोऽध्यायः

सूत उवाच

एवं निशम्य भगवान् देवर्षेर्जन्म कर्म च । भूयः पप्रच्छ तं ब्रह्मन् व्यासः सत्यवतीसुतः ॥१॥

व्यास उवाच

भिक्षुभिर्विप्रवसिते विज्ञानादेष्टृभिस्तव । वर्तमानो वयस्याद्ये ततः किमकरोद्भवान् ॥२॥

स्वायंभुव कया वृत्त्या वर्तितं ते परं वयः । कथं चेदमुदस्राक्षीः काले प्राप्ते कलेवरम् ॥३॥

प्राक्कल्पविषयामेतां स्मृतिं ते सुरसत्तम । न ह्येष व्यवधात् काल एष सर्वनिराकृतिः ॥४॥

नारद उवाच

भिक्षुभिर्विप्रवसिते विज्ञानादेष्टृभिर्मम । वर्तमानो वयस्याद्ये तत एतदकारषम् ॥५॥

एकात्मजा मे जननी योषिन्मूढा च किङ्करी । मय्यात्मजेऽनन्यगतौ चक्रे स्नेहानुबन्धनम् ॥६॥

साऽस्वतन्त्रा न कल्पाऽऽसीद्योगक्षेमं ममेच्छती । ईशस्य हि वशे लोको योषा दारुमयी यथा ॥७॥

अहं च तद्ब्रह्मकुले ऊषिवांस्तदवेक्षया । दिग्देशकालाव्युत्पन्नो बालकः पञ्चहायनः ॥८॥

एकदा निर्गतां गेहाद् दुहन्तीं निशि गां पथि । सर्पोऽदशत् पदा ऽऽस्पृष्टः कृपणां कालचोदितः ॥९॥

तदा तदहमीशस्य भक्तानां शमभीप्सतः । अनुग्रहं मन्यमानः प्रातिष्ठं दिशमुत्तराम् ॥१०॥

स्फीताञ्जनपदांस्तत्र पुरग्रामव्रजाकरान् । खेटखर्वटवाटीश्च वनान्युपवनानि च ॥११॥

चित्रधातुविचित्राद्रीनिभभग्नभुजद्रुमान् । जलाशयाञ्छिवजलान्नलिनीः सुरसेविताः ॥१२॥

चित्रस्वनैः पत्ररथैर्विभ्रमद्भ्रमरश्रियः । नलवेणुशरस्तम्बकुशकीचकगह्वरम् ॥१३॥

षष्ठे मातुर्मृतिं दृष्ट्वा नारदः काननं गतः ।
कृष्णस्फूर्तिं सकृत्प्राप्य ब्रह्मणो जन्म लब्धवान् ॥१॥

तं नारदम् ॥१॥ विप्रवसिते[1] परदेशं गते सति । आदेष्टृभिः उपदेशकर्तृभिः ।२। हे स्वायम्भुव नारद ! ते परं वयः उत्तरमायुः । वर्तित व्यतीतम् । उदस्राक्षीः त्यक्तवानसि ॥३॥ कथं न व्यवधात् न खण्डितवान् । यत् एष कालः सर्वस्य निराकृतिर्विस्मृतिर्यस्मात् सः तथाभूतः ॥४॥ अकारषम् । ऊर्ध्वरेफा विकल्प्यन्ते छन्दोभङ्गभयादिह इति विश्वनाथचक्रवर्ती ॥५॥ एकोऽहमेवात्मजो यस्याः सा । अनुबन्धनं दृढबन्धनम् ॥६॥न कल्पा न समर्था । योगक्षेमं निर्वाहम् । हि यतः वशे वर्तते । योषा काष्ठपुत्तलिका इव ॥७॥ऊषिवान् वासं कृतवान् । तदवेक्षया स्नेहनिवृत्तिप्रतीक्षया । अप्यर्थे चकारः ॥८॥ दुहन्तीं दोग्धुं । हेतौ शतृप्रत्ययः । नुमार्षः । आ ईषदर्थे ॥९॥ तन्मातृमरणम् । प्रातिष्ठं प्रस्थानं कृतवान् ॥१०॥ स्फीतानिति चतूष्कम् । स्फीतान् समृद्धान् जनपदानतिक्रम्य यातः सन् महद्विपिनं वनमद्राक्षमिति चतुर्थेनान्वयः । तत्र उत्तरदिशि । खेटः कर्षकग्रामः खर्वटः पर्वतीयग्रामः वाटीः पुष्पवाटिकाः इभः हस्ती । भुजाः शाखाः । शिवं शीतलम् । नलिनीः पुष्करिणीः । कीदृशीः । पत्ररथैः पक्षिभिर्हेतुभूतैर्विभ्रमद्भिर्भ्रमरैः श्रीः शोभा यासां ताः । नलेति वनविशेषणम् । नलादीनां स्तम्बैः समूहैर्गह्वरं दुर्गमम् । वेणुरच्छिद्रवंशः कीचकः सच्छिद्रः ।

१–भावे क्तः सम्प्रसारणाभावः आर्षः विप्रोषिते इति स्यात् ।

एक एवातियातोऽहमद्राक्षं विपिनं महत् । घोरं प्रतिभयाकारं व्यालोलूकशिवाजिरम् ॥१४॥
परिश्रान्तेन्द्रियात्माहं तृट्परीतो बुभुक्षितः । स्नात्वा पीत्वा ह्रदे नद्या उपस्पृष्टो गतश्रमः ॥१५॥
तस्मिन्निर्मनुजेऽरण्ये पिप्पलोपस्थ आस्थितः । आत्मनाऽऽत्मानमात्मस्थं यथाश्रुतमचिन्तयम् ॥१६
ध्यायतश्चरणाम्भोजं भावनिर्जितचेतसा । औत्कण्ठ्याश्रुकलाक्षस्य हृद्यासीन्मे शनैर्हरिः ॥१७॥
प्रेमातिभरनिर्भिन्नपुलकाङ्गोऽतिनिर्वृतः । आनन्दसंप्लवे लीनो नापश्यमुभयं मुने ॥१८॥
रूपं भगवतो यत्तन्मनःकान्तं शुचापहम् । अपश्यन् सहसोत्तस्थे वैक्लव्याद् दुर्मना इव ॥१९॥
दिदृक्षुस्तदहं भूयः प्रणिधाय मनो हृदि । वीक्षमाणोऽपि नापश्यमवितृप्त इवातुरः ॥२०॥
एवं यतन्तं विजने मामाहागोचरो गिराम् । गम्भीरश्लक्ष्णया वाचा शुचः प्रशमयन्निव ॥२१॥
हन्तास्मिञ्जन्मनि भवान्न मां द्रष्टुमिहार्हति । अविपक्वकषायाणां दुर्दर्शोऽहं कुयोगिनाम् ॥२२॥
सकृद्यद्दर्शितं रूपमेतत्कामाय तेऽनघ । मत्कामः शनकैःसाधुःसर्वान् मुञ्चति हृच्छयान् ॥२३॥
सत्सेवयाऽदीर्घया ते जाता मयि दृढा मतिः । हित्वाऽवद्यमिमं लोकं गन्ता मज्जनतामसि ॥२४॥
मतिर्मयि निबद्धेयं न विपद्येत कर्हिचित् । प्रजासर्गनिरोधेऽपि स्मृतिश्च मदनुग्रहात् ॥२५॥

एतावदुक्त्वोपरराम तन्महद् भूतं नभोलिङ्गमलिङ्गमीश्वरम् ।
अहं च तस्मै महतां महीयसे शीर्ष्णाऽवनामं विदधेऽनुकम्पितः ॥२६॥

'व्यालो दुष्टगजे सर्पे' इति मेदिनी । अजिरं क्रीडाङ्गणम् । भयस्यापि प्रतिपक्षिरूपेण भयजनकः आकारो यस्य तम् । ॥११।१२।१३ १४॥ आत्मा देहः । ह्रदे घट्टे उपस्पृष्टः कृताचमनः । 'ह्रदो घट्टे गाधजले । इति धरणिः ॥१५॥ उपस्थे अश्वत्थमूले उपविष्टोऽहम् आत्मना मनसा हृदिस्थं परमात्मानमचिन्तयमित्यन्वयः । ॥१६॥ भावेन प्रेम्णा वशीकृतं यच्चेतस्तेन ध्यायतो मे हृदि शनै र्हरिराविरासीदित्यन्वयः । अश्रुकलायुक्ते अक्षिणी यस्य । कला विन्दवः ॥१७॥ प्रेम्णोऽतिभरेण आधिक्येन प्रकटितरोमाञ्चानि अङ्गानि यस्य सः । निर्वृतः सुखी । सम्प्लवे प्रवाहे । उभयमात्मानं परं च ॥१८॥ कान्तं प्रियम् । शुचेति टावन्तः । वैक्लव्यात् व्याकुलत्वात् उत्तस्थे[1] ॥१९॥ प्रणिधाय स्थिरीकृत्य । तद्रूपम् । विषयातुर इव अहम् अवितृप्तोऽभवमिति क्रियाशेषः ॥२०॥ विजने एकान्ते गिराम् अगोचरो भगवानाह आकाशवाणी अभूदित्यर्थः । शुचः शोकोद्गारान् । दर्शनं विना शान्तिर्नस्यादिति द्योतनायेवशब्दः ॥२१॥ हन्तेति सानुकम्पसंबोधने । कषाया वासनाः । कुशब्दः ईषदर्थे न तु कुत्सायाम् ॥२२॥ सकृत् एकवारम् एतस्मिन् रूपे कामाय रुच्युत्पादनाय । मां कामयते मत्कामः । हृच्छयान् विषयवासनाः ॥२३॥ अदीर्घया अल्पीयस्या । अवद्यं निन्द्यम् लोकं देहं दासीपुत्ररूपम् । मत्पार्षदतां गन्तासि गमिष्यसि ॥२४॥ प्रजानां सर्गे सृष्टौ निरोधे प्रलयेऽपि निबद्धेयं मतिः प्राग्जन्मस्मृतिश्च न विपद्येत न नश्येदित्यन्वयः ॥२५॥ तत्प्रसिद्धं महद्भूतं ब्रह्म विरराम तूष्णीमास ।

१—अत्र परस्मैपदपाठोऽयुक्तः समाधिव्युत्थानस्यानूर्ध्वकर्मत्वात् 'उदोऽनूर्ध्वकर्मणि' इत्यात्मनेपदम्, मुक्तावुत्तिष्ठते इतिवत् ।

नामान्यनन्तस्य हतत्रपः पठन् गुह्यानि भद्राणि कृतानि च स्मरन् ।
गां पर्यटंस्तुष्टमना गतस्पृहः कालं प्रतीक्षन् विमदो विमत्सरः ॥२७॥

एवं कृष्णमतेर्ब्रह्मन्नसक्तस्यामलात्मनः । कालः प्रादुरभूत् काले विद्युत् सौदामनी यथा ॥२८॥
प्रयुज्यमाने मयि तां शुद्धां भागवतीं तनुम् । आरब्धकर्मनिर्वाणो न्यपतत् पाञ्चभौतिकः ॥२९॥
कल्पान्त इदमादाय शयानेऽम्भस्युदन्वतः । शिशयिषोरनुप्राणं विविशेऽन्तरहं विभोः ॥३०॥
सहस्रयुगपर्यन्त उत्थायेदं सिसृक्षतः । मरीचिमिश्रा ऋषयः प्राणेभ्योऽहं च जज्ञिरे ॥३१॥
अन्तर्बहिश्च लोकांस्त्रीन् पर्येम्यस्कन्दितव्रतः । अनुग्रहान्महाविष्णोरविघातगतिः क्वचित् ॥३२॥
देवदत्तामिमां वीणां स्वरब्रह्मविभूषिताम् । मूर्च्छयित्वा हरिकथां गायमानश्चराम्यहम् ॥३३॥
प्रगायतः स्ववीर्याणि तीर्थपादः प्रियश्रवाः । आहूत इव मे शीघ्रं दर्शनं याति चेतसि ॥३४॥
एतद्ध्यातुरचित्तानां मात्रास्पर्शेच्छया मुहुः । भवसिन्धुप्लवो दृष्टो हरिचर्यानुवर्णनम् ॥३५॥
यमादिभिर्योगपथैः कामलोभहतो मुहुः । मुकुन्दसेवया यद्वत् तथाऽऽत्माद्धा न शाम्यति ॥३६॥
सर्वं तदिदमाख्यातं यत्पृष्टोऽहं त्वयानघ । जन्मकर्मरहस्यं मे भवतश्चात्मतोषणम् ॥३७॥

सूत उवाच

एवं संभाष्य भगवान्नारदो वासवीसुतम् । आमन्त्र्य वीणां रणयन् ययौ यादृच्छिको मुनिः ॥३८

कीदृशम् । नभसि हार्दाकाशे लिङ्गं मूर्तिर्यस्य । अथापि सन्निहितमपि न लिङ्ग्यते न ज्ञायते इत्यलिङ्गम् । अवनामं प्रणामम् । ईश्वरं सर्वनियन्तृ ॥२६॥ विमदो मदरहितः अहं पार्षदो भविष्यामीति मत्सररहितश्च जातोऽस्मि मत्सदृशो नान्य इति ॥२७॥ सुदामा नाम कश्चित् स्फटिकपर्वतस्तस्यैकदेशे भवा यथा विद्युत् तथा सहसा कालो मृत्युः प्रादुरभूत् । काले स्वावसरे ॥२८॥ तां तनुं प्रति भगवतैव प्रयुज्यमाने मयि नीयमाने सति प्रारब्धकर्मणो निर्वाणमवसानं यस्य सः ॥२९॥ इदं विश्वमुपसंहृत्य उदन्वतः समुद्रस्य जले शयाने श्रीनारायणे तन्नाभिपद्मे शयनं कर्तुमिच्छो विभोर्ब्रह्मणोऽनु प्राणं निःश्वासेन सहाऽहम् अन्तर्मध्यं प्रविष्टोऽभूत् ॥३०॥ पर्यन्तेऽवसाने नाभिकमलादुत्थाय सिसृक्षतः ब्रह्मणः प्राणेभ्य इन्द्रियेभ्योऽहं नारदः जज्ञे ऋषयश्च जज्ञिरे इति वचनव्यत्ययेनान्वयः । मिश्राः प्रभृतयः ॥३१॥ अस्खलितमखण्डितं ब्रह्मचर्यंव्रतं यस्य सोऽहं पर्येमि पर्यटामि ॥३२॥ देवेन[1] श्रीकृष्णेन दत्ताम् । स्वराः सप्त निषादादयस्त एव ब्रह्म तेन मूर्च्छयित्वा आलापवतीं-कृत्वा स्वराणामारोहावरोहक्रमेण ॥३३॥ वीर्याणि चरितानि । तीर्थं गङ्गा । श्रवो यशः ॥३४॥ मात्रा विषयास्तेषां भोगेच्छया मुहुर्व्याकुलचित्तानां लीलानुवर्णनमिति यत् एतदेव प्लवो दृष्टः ॥३५॥ आत्मा मनः सेवया यद्वत् यथा शाम्यति तथा यमादिभिर्नेत्यन्वयः । अद्धा साक्षात् ॥३६॥ यत् पृष्टः तदिदमपरितोषकारणमाख्यातमित्यन्वयः ॥३७॥ उपरिचरवसोः कन्या वासवी सत्यवती तत्पुत्रं व्यासम् आमन्त्र्य पृष्ट्वा रणयन्

१—"श्रीकृष्णदेवो भगवान् स्वरब्रह्मविभूषिताम् ।
कल्पादौ दत्तवान् वीणामृषये नारदाय वै ।" लिङ्गपुराणे ।

अहो देवऋषिर्धन्यो यत्कीर्ति शार्ङ्गधन्वनः। गायन्माद्यन्निदं तन्त्र्या रमयत्यातुरं जगत् ॥३९॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां प्रथमस्कन्धे नारदव्याससंवादे षष्ठोऽध्यायः ।

वादयन् । यदृच्छया चरतीति यादृच्छिकः । नरे परमेश्वरे भवं नारं ज्ञानं तद्ददातीति । यद्वा नरेषु जीवेषु भवं नारमज्ञानं तद्द्यति खण्डयतीति नारं नरसमूहं दयते पालयतीति वाज्ञानोपदेशेनेति नारदशब्दार्थो विवेचितः। ॥३८॥ यत् यतः माद्यन् कृष्णावेशेन हृष्यन् तन्त्र्या वीणया इदं जगत् आनन्दयतीत्यन्वयः। अत्र अहो देवऋषिर्धन्यो इत्येव पाठः प्राचीनः इति गुरुचरणाः ॥३९॥

इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धे गूढार्थदीपिन्यां षष्ठोऽध्यायः ।

अथ सप्तमोऽध्यायः

शौनक उवाच

निर्गते नारदे सूत भगवान् बादरायणः। श्रुतवांस्तदभिप्रेतं ततः किमकरोद्विभुः ॥१॥

सूत उवाच

ब्रह्मनद्यां सरस्वत्यामाश्रमः पश्चिमे तटे। शम्याप्रास इति प्रोक्त ऋषीणां सत्रवर्धनः ॥२॥

तस्मिन् स्व आश्रमे व्यासो बदरीषण्डमण्डिते। आसीनोऽप उपस्पृश्य प्रणिदध्यौ मनःस्वयम्॥३॥

भक्तियोगेन मनसि सम्यक् प्रणिहितेऽमले। अपश्यत् पुरुषं पूर्वं मायां च तदपाश्रयाम् ॥४॥

यया सम्मोहितो जीव आत्मानं त्रिगुणात्मकम्। परोऽपि मनुतेऽनर्थं तत्कृतं चाभिपद्यते ॥५॥

सप्तमे नृपजन्मादि वक्तुमस्त्रोपसंहृतिः।
द्रौपद्याः पुत्रनाशाच्च वर्ण्यते द्रौणिनिग्रहः ॥१॥

तदभिप्रेतं नारदाभिप्रायम् । ब्रह्मर्षिसेवितत्वात् ब्रह्मनदी तस्याम् । सामीप्ये सप्तमी । शम्या गदाकारो यज्ञायुधं प्रास्यते प्रक्षिप्यते यस्मिन् देशे स शम्याप्रासः[1] इति सुबोधिनी । सत्रं यज्ञफलं वर्धयतीति । ॥ २ ॥ षण्डः समूहः । प्रणिदध्यौ निश्चलीचकार । उपस्पृश्य आचमनं कृत्वा ॥ ३ ॥ प्रणिहिते निश्चले । तस्य भगवतः अप अपरः पृष्ठभाग एवाश्रयो यस्यास्ताम् ॥ ४ ॥ यया मायया । परोऽपि गुणत्रयात्पृथग्भूतोऽपि त्रिगुणात्मकं शरीरं मन्यते । तत्कृतं शरीरकृतमनर्थं जन्ममरणादिलक्षणं क्लेशं च प्राप्नोति

१–शमिनः शमदमादिसम्पन्ना मुनय आ समन्तात् प्रकर्षेण आसते निवसन्त्यत्रेति वा ।

अनर्थोपशमं साक्षाद् भक्तियोगमधोक्षजे। लोकस्याजानतो विद्वांश्चक्रे सात्वतसंहिताम् ॥६॥
यस्यां वै श्रूयमाणायां कृष्णे परमपूरुषे। भक्तिरुत्पद्यते पुंसः शोकमोहभयापहा ॥७॥
स संहितां भागवतीं कृत्वाऽनुक्रम्य चात्मजम्। शुकमध्यापयामास निवृत्तिनिरतं मुनिः ॥८॥

शौनक उवाच

स वै निवृत्तिनिरतः सर्वत्रोपेक्षको मुनिः। कस्य वा बृहतीमेतामात्मारामः समभ्यसत् ॥९॥

सूत उवाच

आत्मारामाश्च मुनयो निर्ग्रन्था अप्युरुक्रमे। कुर्वन्त्यहैतुकीं भक्तिमित्थम्भूतगुणो हरिः ॥१०॥
हरेर्गुणाक्षिप्तमतिर्भगवान् बादरायणिः। अध्यगान्महदाख्यानं नित्यं विष्णुजनप्रियः ॥११॥
परीक्षितोऽथ राजर्षेर्जन्मकर्मविलायनम्। संस्थां च पाण्डुपुत्राणां वक्ष्ये कृष्णकथोदयम् ॥१२॥

यदा मृधे कौरवसृञ्जयानां वीरेष्वथो वीरगतिं गतेषु।
वृकोदराविद्धगदाभिमर्शभग्नोरुदण्डे धृतराष्ट्रपुत्रे ॥१३॥
भर्तुः प्रियं द्रौणिरिति स्म पश्यन् कृष्णासुतानां स्वपतां शिरांसि।
अपाहरद्विप्रियमेव तस्य तज्जुगुप्सितं कर्म विगर्हयन्ति ॥१४॥
माता शिशूनां निधनं सुतानां निशम्य घोरं परितप्यमाना।
तदारुदद्बाष्पकलाकुलाक्षी तां सान्त्वयन्नाह किरीटमाली ॥१५॥
तदा शुचस्ते प्रमृजामि भद्रे यद् ब्रह्मबन्धोः शिर आततायिनः।
गाण्डीवमुक्तैर्विशिखैरुपाहरे त्वाऽऽक्रम्य यत्स्नास्यसि दग्धपुत्रा ॥१६॥

॥ ५ ॥ अजानतो लोकस्यार्थे संहितां भागवतीम्। उपशमं निवर्तकम् विद्वान् व्यासः ॥ ६ ॥ वै एवार्थे ॥ ७ ॥ अनुक्रम्य संशोध्य ॥ ८ ॥ वै अवधारणे। कस्य वा हेतोः। एतां संहिताम् ॥ ९ ॥ ग्रन्थिरेव ग्रन्थो निवृत्तो येषां ते निरहङ्काराः। ग्रन्थेभ्यो निर्गता वा। अहैतुकीं निष्कामाम्। उरुक्रमे महापराक्रमे भगवति ॥ १० ॥ आक्षिप्ता आकृष्टा। अध्यगात् अधीतवान्। विष्णुजनेति। षष्ठीतत्पुरुषो बहुव्रीहिर्वा ॥ ११ ॥ जन्म च कर्माणि च विलायनं मोक्षश्च तेषां समाहारद्वन्द्वः। संस्थां महाप्रस्थानम् कथायाः उदयं उत्तरोत्तरमाविर्भावः यथा स्यात्तथेति क्रियाविशेषणम्।१२। [1]यदेति त्रिकम्। सृञ्जयाः पाण्डवाः वीरगतिं स्वर्गम्। कृष्णा द्रौपदी। यदा द्रौणिः अश्वत्थामा कृष्णासुतानां शिरांसि अपाहरत् इत्येव पाठः। छित्त्वा नीतवान् तदा तन्माता अरुदत् तां सान्त्वयन् किरीटमाली अर्जुन आहेति तृतीयेनान्वयः। वृकोदरेण आविद्धा प्रक्षिप्ता या गदा तस्या आघातेन भग्नौ ऊरुदण्डौ यस्य तथाभूते दुर्योधने सति। इति एवं कृत्वा तस्य दुर्योधनस्य प्रियं स्यात् किन्तु तस्य विप्रियमेव प्रतिकूलमेव जातम् यतो हर्षविषादाभ्यां तन्मृत्योर्योगात् शत्रुपुत्रनाशाद्धर्षः वंशनाशाच्च विषादः। अश्रुकलाभिर्विन्दुभिर्व्याप्ते अक्षिणी यस्या साः। किरीटं मुकुटं मलते धारयतीति तथा। मल मल्ल धारणे धातुः ॥१३।१४।१५॥ यत् यदा शिरः विशिखैर्बाणैरुपाहरे त्वत्समीपमानयामि तदा ते शुचः शोकाश्रूणि मार्जयामीत्यन्वयः। यत् शिरः आक्रम्य आसनं

१–यकारघटित एव पाठः समीचीनः श्रीधरसम्मतश्च नतु पकारघटितः। विपूर्वकलपधातुर्विलापे स्यात्। 'विलापः परिदेवनम्' इति कोशात्।

इति प्रियां वल्गुविचित्रजल्पैः स सान्त्वयित्वाऽच्युतमित्रसूतः ।
अन्वाद्रवद्दंशित उग्रधन्वा कपिध्वजो गुरुपुत्रं रथेन ॥१७॥
तमापतन्तं स विलक्ष्य दूरात् कुमारहोद्विग्नमना रथेन ।
पराद्रवत्प्राणपरीप्सुरुर्व्यां यावद्गमं रुद्रभयाद् यथाऽर्कः ॥१८॥

यदाऽशरणमात्मानमैक्षत श्रान्तवाजिनम् । अस्त्रं ब्रह्मशिरो मेन आत्मत्राणं द्विजात्मजः ॥१९॥
अथोपस्पृश्य सलिलं संदधे तत्समाहितः । अजानन्नुपसंहारं प्राणकृच्छ्र उपस्थिते ॥२०॥
ततः प्रादुष्कृतं तेजः प्रचण्डं सर्वतोदिशम् । प्राणापदमभिप्रेक्ष्य विष्णुं जिष्णुरुवाच ह ॥२१॥

अर्जुन उवाच

कृष्ण कृष्ण महाबाहो भक्तानामभयङ्कर । त्वमेको दह्यमानानामपवर्गोऽसि संसृतेः ॥२२॥
त्वमाद्यः पुरुषः साक्षादीश्वरः प्रकृतेः परः । मायां व्युदस्य चिच्छक्त्या कैवल्ये स्थित आत्मनि॥
स एव जीवलोकस्य मायामोहितचेतसः । विधत्से स्वेन वीर्येण श्रेयो धर्मादिलक्षणम् ॥२४॥
तथायं चावतारस्ते भुवो भारजिहीर्षया । स्वानां चानन्यभावानामनुध्यानाय चासकृत् ॥२५॥
किमिदं स्वित्कुतो वेति देवदेव न वेद्म्यहम् । सर्वतोमुखमायाति तेजः परमदारुणम् ॥२६॥

श्रीभगवानुवाच

वेत्थेदं द्रोणपुत्रस्य ब्राह्ममस्त्रं प्रदर्शितम् । नैवासौ वेद संहारं प्राणबाध उपस्थिते ॥२७॥
न ह्यस्यान्यतमं किञ्चिदस्त्रं प्रत्यवकर्शनम् । जह्यस्त्रतेज उन्नद्धमस्त्रज्ञो ह्यस्त्रतेजसा ॥२८॥

सूत उवाच

श्रुत्वा भगवता प्रोक्तं फाल्गुनः परवीरहा । स्पृष्ट्वापस्तं परिक्रम्य ब्राह्मं ब्राह्माय सन्दधे॥२९॥

विधाय त्वम् ॥१६॥ इति मधुरमृदुभाषणैः । अच्युत एव मित्रं सारथिश्च यस्य सः । अन्वाद्रवत् अन्वधावत् । दंशितो धृतकवचः ॥१७॥ यावद्गमं यावद्गन्तुं शक्यं तावत् उर्व्यां पराद्रवत् पलायितवान् । प्राणपरीप्सुः प्राणान् प्राप्तुमिच्छुः[1] अर्क इति पाठः प्रशस्तः ॥१८॥

ब्रह्मशिरो ब्रह्मास्त्रम् । आत्मा त्रायतेऽनेन इति आत्मत्राणं स्वरक्षणोपायम् । वाजिनोऽश्वाः । द्विजेत्यनेन अदूरदर्शिता सूचिता ॥१९॥ उपस्पृश्य आचम्य । तत् ब्रह्मास्त्रं संदधे धनुषि संयुयोज ॥२०॥ ततोऽस्त्रात्प्रादुर्भूतम् । जिष्णुरर्जुनः हेत्याश्चर्ये ॥२१॥ संसृतेर्हेतोः अपवर्गः मोचकः । वृजो वर्जने घञ् ।२२। व्युदस्य दूरीकृत्य कैवल्ये । स्वार्थे ष्यञ् आत्मनि स्वरूपे ॥२३॥ यः स्थितः स एव त्वमित्यन्वयः । श्रेयः पुरुषार्थं चतुष्टयम् ॥२४॥ स्वानां ज्ञातीनां भक्तानां च ॥२५॥ स्वित् वितर्के । कुतो वा आयातम् ॥२६॥ उपस्थिते प्राप्ते सति तेन प्रदर्शितं प्रयुक्तम् । संहारमुपसंहारम् ॥२७॥ अस्य ब्रह्मास्त्रस्य प्रत्यवकर्शनं निवर्तकम् । अस्त्रज्ञस्त्वम् । उन्नद्धमुत्कटम् अस्त्रतेजो जहि॥२८॥ फल्गुनी नक्षत्रं तत्र भवः फाल्गुनोऽर्जुनः । तं श्रीकृष्णम् ।

१–अत्र वामनपुराणोक्ता कथानुसन्धेया । विद्युन्माली नाम कश्चन राक्षसः शिवभक्तः आसीत् । स च प्रसन्नाच्छिवात्सौवर्णं विमानं प्राप्यार्कस्य पृष्ठतो भ्राम्यन् रात्रिं विलोपितवान् । लोकहितं चिकीर्षुरर्कस्तद्विमानं पातयामास । ततः कुपिते रुद्रे भयादर्कः पलायमानो वाराणस्यां पतन् लोलार्कनाम्ना विख्यातो बभूवेति ।

संहृत्यान्योन्यमुभयोस्तेजसी शरसंवृते । आवृत्य रोदसी खं च ववृधातेऽर्कवह्निवत् ॥३०॥
दृष्ट्वास्त्रतेजस्तु तयोस्त्रींल्लोकान् प्रदहत्ततः[1] । दह्यमानाः प्रजाः सर्वाः सांवर्तकममंसत ॥३१॥
प्रजोपप्लवमालक्ष्य लोकव्यतिकरं च तम् । मतं च वासुदेवस्य सञ्जहारार्जुनो द्वयम् ॥३२॥
तत आसाद्य तरसा दारुणं गौतमीसुतम् । बबन्धामर्षताम्राक्षः पशुं रशनया यथा ॥३३॥
शिबिराय निनीषन्तं दाम्ना बद्ध्वा रिपुं बलात् । प्राहार्जुनं प्रकुपितो भगवानम्बुजेक्षणः ॥३४॥
मैनं पार्थार्हसि त्रातुं ब्रह्मबन्धुमिमं जहि । योऽसावनागसः सुप्तानवधीन्निशि बालकान् ॥३५॥
मत्तं प्रमत्तमुन्मत्तं सुप्तं बालं स्त्रियं जडम् । प्रपन्नं विरथं भीतं न रिपुं हन्ति धर्मवित् ॥३६॥
स्वप्राणान् यः परप्राणैः प्रपुष्णात्यघृणः खलः । तद्वधस्तस्य हि श्रेयो यद्दोषाद् यात्यधः पुमान् ३७॥
प्रतिश्रुतं च भवता पाञ्चाल्यै शृण्वतो मम । आहरिष्ये शिरस्तस्य यस्ते मानिनि पुत्रहा ॥३८॥
तदसौ वध्यतां पाप आततायात्मबन्धुहा[2] । भर्तुश्च विप्रियं वीर कृतवान् कुलपांसनः[3] ॥३९॥
एवं परीक्षता धर्मं पार्थः कृष्णेन चोदितः । नैच्छद्धन्तुं गुरुसुतं यद्यप्यात्महनं महान् ॥४०॥
अथोपेत्य स्वशिबिरं गोविन्दप्रियसारथिः न्यवेदयत् तं प्रियायै शोचन्त्या आत्मजान् हतान्॥४१॥

तथाऽऽहृतं पशुवत्पाशबद्धमवाङ्मुखं कर्मजुगुप्सितेन ।
निरीक्ष्य कृष्णापकृतं गुरोः सुतं वामस्वभावा कृपया ननाम च ॥४२॥

उवाच चासहन्त्यस्य बन्धनानयनं सती । मुच्यतां मुच्यतामेष ब्राह्मणो नितरां गुरुः ॥४३॥
सरहस्यो धनुर्वेदः सविसर्गोपसंयमः । अस्त्रग्रामश्च भवता शिक्षितो यदनुग्रहात् ॥४४॥

ब्राह्माय ब्रह्मास्त्रमुपसंहर्तुम् ॥२९॥ उभयोर्ब्रह्मास्त्रयोः । संवृते वेष्टिते । संहृत्य संघट्टनं कृत्वा । यथा प्रलये उपरि अर्कः अधस्तात् संकर्षणमुखानलस्तद्वत् ॥३०॥ तयोःद्रौण्यर्जुनयोः । ततस्तेन सांवर्तकं प्रलयाग्निम् ॥३१॥ उपप्लवं कष्टम् । व्यतिकरं नाशम् । मतं द्वयोराकर्षणरूपम्॥३२॥गौतमवंशजा गौतमी कृपी द्रोणपत्नी ॥३३॥ शिविरं सेनागारम् । प्रकुपित इत्यत्र इवेति योज्यं बहिरेव कुपितो नत्वन्तः ॥३४॥अनागसो निरपराधान् ।ब्रह्मबन्धुं ब्राह्मणाधमम् ॥३५॥मत्तं मद्यादिना । प्रमत्तमसावधानम् । उन्मत्तं ग्रहवाताहिना । जडमुद्योगरहितम् ॥३६॥ अघृणो निर्दयः । यत् यतः । दोषात् प्रायश्चित्तरहितात् । अधो नरकम् ॥३७॥ मम शृण्वतः सतः पाञ्चाल्यै द्रौपद्यै प्रतिश्रुतं प्रतिज्ञातम् शिरः आहरिष्ये आनेष्यामि इति ॥३८॥यत् यस्मात् असौ पापः पापी अर्श आद्यजन्तः । तत् तस्मादित्यन्वयः । आत्मबन्धून् सुतान् हतवान् । कुलं पंसयति नाशयतीति कुलपांसनः ॥३९॥ यद्यपि आत्महनं पुत्रहन्तारं तथापि नेत्यन्वयः । यतो महान् धर्मज्ञः ॥४०॥ आत्मजान् शोचन्त्यै तमश्वत्थामानम् ॥४१॥ तथा अपमानेन आनीतम् कर्मणः स्वकृतस्य कुकर्मणः जुगुप्सया निन्दया अवाङ्मुखमधोमुखम् । कृष्णा द्रौपदी । वामो मृदुः । अपकृतमपकारिणम् । क्विबन्तम् ॥४२॥ असहन्ती ।'सह मर्षणे आघृषीयः । नितरां सर्वदा ॥४३॥ विसर्गोऽस्त्रप्रक्षेपः उपसंयमः

१–प्रदहत्ततः इत्येव पाठः श्रीधरसम्मतः ततस्तेनेति व्याख्यानात् ।
२–"आत्मबन्धुः सुतस्तोकः पुत्रोऽङ्गज उदाहृतः" इत्यभिधानात् ।
३–'पसि' नाशने ल्युः । पृषोदरादित्वाद्दीर्घः ।

स एष भगवान् द्रोणः प्रजारूपेण वर्तते । तस्यात्मनोऽर्धं पत्न्यास्ते नान्वगाद्वीरसूः कृपी ।।४५।।
तद्धर्मज्ञ महाभाग भवद्भिर्गौरवं कुलम् । वृजिनं नार्हति प्राप्तुं पूज्यं वन्द्यमभीक्ष्णशः ।।४६।।
मा रोदीदस्य जननी गौतमी पतिदेवता । यथाहं मृतवत्साऽऽर्ता रोदिम्यश्रुमुखी मुहुः ।।४७।।
यैः कोपितं ब्रह्मकुलं राजन्यैरकृतात्मभिः । तत्कुलं प्रदहत्याशु सानुबन्धं शुचार्पितम् ।।४८।।

सूत उवाच

धर्म्यं न्याय्यं सकरुणं निर्व्यलीकं समं महत् । राजा धर्मसुतो राज्ञ्याः प्रत्यनन्दद्वचो द्विजाः ।।४९।।
नकुलः सहदेवश्च युयुधानो धनञ्जयः । भगवान् देवकीपुत्रो ये चान्ये याश्च योषितः ।।५०।।
तत्राहामर्षितो भीमस्तस्य श्रेयान् वधः स्मृतः । न भर्तुर्नात्मनश्चार्थे योऽहन् सुप्ताञ्शिशून् वृथा५१
निशम्य भीमगदितं द्रौपद्याश्च चतुर्भुजः । आलोक्य वदनं सख्युरिदमाह हसन्निव ।।५२।।

श्रीकृष्ण उवाच

ब्रह्मबन्धुर्न हन्तव्य आततायी वधार्हणः । मयैवोभयमाम्नातं परिपाह्यनुशासनम् ।।५३।।
कुरु प्रतिश्रुतं सत्यं यत्तत्सान्त्वयता प्रियाम् । प्रियं च भीमसेनस्य पाञ्चाल्या मह्यमेव च ।।५४।।

सूत उवाच

अर्जुनः सहसाऽऽज्ञाय हरेर्हार्दमथासिना । मणिं जहार मूर्धन्यं द्विजस्य सहमूर्धजम् ।।५५।।
विमुच्य रशनाबद्धं बालहत्याहतप्रभम् । तेजसा मणिना हीनं शिबिरान्निरयापयत् ।।५६।।
वपनं द्रविणादानं स्थानान्निर्यापणं तथा । एष हि ब्रह्मबन्धूनां वधो नान्योऽस्ति दैहिकः ।।५७।।
पुत्रशोकातुराः सर्वे पाण्डवाः सह कृष्णया । स्वानां मृतानां यत्कृत्यं चक्रुर्निर्हरणादिकम् ।।५८।।

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां प्रथमस्कन्धे द्रौणिनिग्रहो नाम सप्तमोऽध्यायः ।।७।।

उपसंहारः । सरहस्यः सकीलकः । ग्रामः समूहः ।।४४।। आत्मनो देहस्य । सा भर्तारं नान्वगात् नानुमृता । यतो वीरसूः पुत्रवती । तन्निषेधात् ।।४५।। गुरोः सम्बन्धि कुलं कर्तृ भवद्भिर्हेतुभूतैर्वृजिनं दुःखं प्राप्तुम् । ।।४६।। गौतमी गौतमवंशजा कृपी । मृतवत्सा मृतपुत्रा ।।४७।। शुचार्पितं शोकाकुलं ब्रह्मकुलं कर्तृ तत्कुलं राजन्यकुलं कर्म सपरिवारं प्रदहति । अकृतात्मभिः क्रूरचित्तैः ।।४८।। हे द्विजाः शौनकादयः । राज्ञ्या द्रौपद्याः । प्रत्यनन्दत् अनुमोदितवान् नकुलादयश्च प्रत्यनन्दन्निति वचनव्यत्ययेनान्वयः । निर्व्यलीकं निष्कपटम् । समं पक्षपातशून्यम् । युयुधानः सात्यकिः ।।४९।५०।। अमर्षितो जातक्रोधः । किन्तु वृथैव शिशून् अहन् अतस्तस्य वध एव ।।५१।५२।। आम्नातं कथितम् ।।५३।। यत् प्रतिश्रुतं प्रतिज्ञातम् । पाञ्चाल्या द्रौपद्याः । मह्यं मम च ।।५४।। हार्दं हृद्गताभिप्रायम् । मूर्धनि भवं मूर्धन्यम् । मूर्धजाः केशाः ।।५५।। तेजसा ब्रह्मतेजसा मणिना च । निरयापयत् वहिर्निःसारितवान् ।।५६।। वपनं शिरोमुण्डनम् । धनापहरणम् ।।५७।। निर्हरणं पारलौकिकं यत्कृत्यं तच्चक्रुरित्यन्वयः । कृष्णया द्रौपद्या ।।५८।।

इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धे गूढार्थदीपिन्यां सप्तमोध्यायः ।

अथाष्टमोऽध्यायः

सूत उवाच

अथ ते संपरेतानां स्वानामुदकमिच्छताम्। दातुं सकृष्णा गङ्गायां पुरस्कृत्य ययुः स्त्रियः ॥१॥
ते निनीयोदकं सर्वे विलप्य च भृशं पुनः। आप्लुता हरिपादाब्जरजःपूतसरिज्जले ॥ २ ॥
तत्रासीनं कुरुपतिं धृतराष्ट्रं सहानुजम्। गान्धारीं पुत्रशोकार्तां पृथां कृष्णां च माधवः ॥३॥
सान्त्वयामास मुनिभिर्हतबन्धूञ्छुचार्पितान्। भूतेषु कालस्य गतिं दर्शयन्नप्रतिक्रियाम् ॥४॥
साधयित्वाऽजातशत्रोः स्वं राज्यं कितवैर्हृतम्। घातयित्वाऽसतो राज्ञः कचस्पर्शक्षतायुषः ॥५॥
याजयित्वाऽश्वमेधैस्तं त्रिभिरुत्तमकल्पकैः। तद्यशः पावनं दिक्षु शतमन्योरिवातनोत् ॥६॥
आमन्त्र्य पाण्डुपुत्रांश्च शैनेयोद्धवसंयुतः। द्वैपायनादिभिर्विप्रैः पूजितैः प्रतिपूजितः ॥७॥
गन्तुं कृतमतिर्ब्रह्मन् द्वारकां रथमास्थितः। उपलेभेऽभिधावन्तीमुत्तरां भयविह्वलाम् ॥८॥

उत्तरोवाच

पाहि पाहि महायोगिन् देवदेव जगत्पते। नान्यं त्वदभयं पश्ये यत्र मृत्युः परस्परम् ॥९॥
अभिद्रवति मामीश शरस्तप्तायसो विभो। कामं दहतु मां नाथ मा मे गर्भो निपात्यताम् १०॥

सूत उवाच

उपधार्य वचस्तस्या भगवान् भक्तवत्सलः। अपाण्डवमिदं कर्तुं द्रौणेरस्त्रमबुध्यत ॥११॥
तर्ह्येवाऽथ मुनिश्रेष्ठ पाण्डवाः पञ्च सायकान्। आत्मनोऽभिमुखान् दीप्तानालक्ष्यास्त्राण्युपाददुः१२
व्यसनं वीक्ष्य तत्तेषामनन्यविषयात्मनाम्। सुदर्शनेन स्वास्त्रेण स्वानां रक्षां व्यधाद्विभुः॥१३॥
अन्तःस्थः सर्वभूतानामात्मा योगेश्वरो हरिः। स्वमाययाऽऽवृणोद् गर्भं वैराट्याः कुरुतन्तवे१४॥

द्रौण्यस्त्रादुत्तरागर्भे रक्षणं च परीक्षितः।
कुन्तीस्तुतिर्नृपग्लानिरित्येतत्स्पष्टमष्टमे ॥ १ ॥

ते पाण्डवाः सकृष्णाः कृष्णसहिताः। संपरेतानां मृतानाम्। उदकं तिलोदकम्। स्वानां स्वेभ्यः। शेषे षष्ठी ॥१॥ निनीय दत्वा। हरिपादाब्जरजोभिः पूता या सरित् गङ्गा तस्या जले स्नाताः ॥२॥ तत्रेति द्वयम्। तत्र गङ्गातटे। सहानुजं भीमादिसहितं कुरुपतिं युधिष्ठिरम्। मुनिभिर्द्वारभूतैः। अप्रतिक्रियाम् अपरिहार्याम् ॥३॥४॥ साधयित्वेति द्वयम्। अजाता दुर्योधनादयः शत्रवो यस्य। दुर्योधनादयः सर्वे त्वजाता जज्ञिरे घटात्। इति तीर्थोक्तेः। कितवैर्वञ्चकैः दुर्योधनादिभिः। कचस्पर्शेन केशाकर्षणेन क्षीणमायुर्येषां तान्। कल्पकाः सामग्र्यः। त्रिभिरिति त्रिगुणदक्षिणादानात्। 'मन्युर्यज्ञे हरे' ॥५॥६॥ आमन्त्र्येति द्वयम्। आमन्त्र्य पृष्ट्वा। शैनेयः शिनेः पौत्रः सात्यकिः। अभिधावन्तीं सम्मुखमागच्छन्तीम् उपलेभे ददर्श॥७॥८॥त्वत् त्वत्तोऽन्यं न। यत्र लोके ॥९॥ तप्तम् आयसं लोहमयं शल्यं यस्य। कामं यथेच्छ मां दहतु न तु मे गर्भं इति प्रार्थना ॥१०॥ उपधार्य श्रुत्वा। इदं विश्वम् ॥११॥ उपाददुः जगृहुः ॥१२॥ व्यसनं दुःखम्। न भगवतोऽन्यो विषय आत्मनि येषाम् ॥१३॥ वैराट्या विराटपुत्र्याः

यद्यप्यस्त्रं ब्रह्मशिरस्त्वमोघं चाप्रतिक्रियम् । वैष्णवं तेज आसाद्य समशाम्यद् भृगूद्वह ॥१५॥
मा मंस्था ह्येतदाश्चर्यं सर्वाश्चर्यमयेऽच्युते । य इदं मायया देव्या सृजत्यवति हन्त्यजः ॥१६॥
ब्रह्मतेजोविनिर्मुक्तैरात्मजैः सह कृष्णया । प्रयाणाभिमुखं कृष्णमिदमाह पृथा सती ॥१७॥

कुन्त्युवाच

नमस्ये पुरुषं त्वाऽऽद्यमीश्वरं प्रकृतेः परम् । अलक्ष्यं सर्वभूतानामन्तर्बहिरवस्थितम् ॥१८॥
मायाजवनिकाच्छन्नमज्ञाधोक्षजमव्ययम् । न लक्ष्यसे मूढदृशा नटो नाट्यधरो यथा ॥१९॥
तथा परमहंसानां मुनीनाममलात्मनाम् । भक्तियोगविधानार्थं कथं पश्येम हि स्त्रियः ॥२०॥
कृष्णाय वासुदेवाय देवकीनन्दनाय च । नन्दगोपकुमाराय गोविन्दाय नमो नमः ॥२१॥
नमः पङ्कजनाभाय नमः पङ्कजमालिने । नमः पङ्कजनेत्राय नमस्ते पङ्कजाङ्घ्रये ॥२२॥

यथा हृषीकेश खलेन देवकी कंसेन रुद्धातिचिरं शुचार्पिता ।
विमोचिताहं च सहात्मजा विभो त्वयैव नाथेन मुहुर्विपद्गणात् ॥२३॥

विषान्महाग्नेः पुरुषाददर्शनादसत्सभाया वनवासकृच्छ्रतः ।
मृधे मृधेऽनेकमहारथास्त्रतो द्रौण्यस्त्रतश्चास्म हरेऽभिरक्षिताः ॥२४॥

विपदः सन्तु नः शश्वत्तत्र तत्र जगद्गुरो । भवतो दर्शनं यत्स्यादपुनर्भवदर्शनम् ॥२५॥
जन्मैश्वर्यश्रुतश्रीभिरेधमानमदः पुमान् । नैवार्हत्यभिधातुं वै त्वामकिञ्चनगोचरम् ॥२६॥
नमोऽकिञ्चनवित्ताय निवृत्तगुणवृत्तये । आत्मारामाय शान्ताय कैवल्यपतये नमः ॥२७॥

उत्तराया अन्तः सन् गर्भमावृतवान् । तन्तवे वंशविस्ताराय ॥१४॥ भृगुवंश्यानाम् उद्वहः श्रेष्ठः भृगूद्वहः । हे शौनक ! तेजः तेजोरूपं सुदर्शनचक्रम् अमोघमनिष्फलम् । प्रतीकाररहितं च ॥१५॥ एतत् ब्रह्मास्त्रशमनम् । मा मंस्थाः मा मन्यस्व । इदं जगत् ॥१६॥ ब्रह्मपदमत्र ब्रह्मास्त्रपरमेकदेशन्यायेन । कृष्णया द्रौपद्या च सह । पृथा कुन्ती ॥१७॥ नमस्य इति त्रयम् । अज्ञा अहं केवलं त्वां नमस्यामि । यथा नटस्तथा मूढदशा पुंसा त्वं न लक्ष्यसे । किं बहुना मुनीनां मुनिभिरपि त्वं न लक्ष्यसे । तृतीयार्थे षष्ठी । अतस्तेषामर्थे जातं त्वां वयं कथं पश्येमेत्यन्वयः । कथंभूतं त्वाम् । मायैव जवनिका व्यवधानपटी तया आच्छन्नमत एवालक्ष्यम् ॥१८॥१९॥२०॥ कृष्णायेति स्पष्टम् ॥२१॥२२॥ यथा कंसेन[1] हिंसकेन चिरं रुद्धा शोकाकुला देवकी विमोचिता तथैव त्वयाऽहं किं विमोचिता नेत्यर्थः किन्तु अहं मुहुः शीघ्रं सात्मजा च विमोचितेत्यन्वयः ॥२३॥ विषात् भीमाय दत्तात् विषाक्तमोदकात् लाक्षाभवनात् पुरुषादा हिडिम्बादयो राक्षसाः तेषां दर्शनात् द्यूतसभायाः क्रमेणार्थाः । मृधे प्रतियुद्धम् । अभितो रक्षिता आस्म अभवाम । अस्तेर्लङ् ॥२४॥ तत्र तत्र सर्वत्रेत्यर्थः । शश्वत् सदा । यत् यासु विपत्सु । नास्ति पुनः संसारदुःखस्य दर्शनं यस्मात् । अपुनर्भवः मोक्षो वा ॥२५॥ श्रुतं शास्त्रम् । एधमानो वर्धमानः । अभिधातुं नामानि वक्तुमपि । अकिञ्चनाः परिग्रहशून्यास्तेषां दृष्टिगोचरम् ॥२६॥ निवृत्ता गुणवृत्तयो विषयभोगाः अवस्था वा यस्मात् । पतये दात्रे ॥२७॥

---

१. 'कसि' हिंसायां धातुः ।

मन्ये त्वां कालमीशानमनादिनिधनं विभुम् । समं चरन्तं सर्वत्र भूतानां यन्मिथः कलिः ॥२८॥

न वेद कश्चिद्भगवंश्चिकीर्षितं तवेहमानस्य नृणां विडम्बनम् ।
न यस्य कश्चिद्दयितोऽस्ति कर्हिचिद् द्वेष्यश्च यस्मिन् विषमा मतिर्नृणाम् ॥२९॥

जन्म कर्म च विश्वात्मन्नजस्याकर्तुरात्मनः । तिर्यङ्नृर्षिषु यादःसु तदत्यन्तविडम्बनम् ॥३०॥

गोप्याददे त्वयि कृतागसि दाम तावद् या ते दशाश्रुकलिलाञ्जनसंभ्रमाक्षम् ।
वक्त्रं निनीय भयभावनया स्थितस्य सा मां विमोहयति भीरपि यद्बिभेति ॥३१॥

केचिदाहुरजं जातं पुण्यश्लोकस्य कीर्तये । यदोः प्रियस्यान्ववाये मलयस्येव चन्दनम् ॥३२॥
अपरे वसुदेवस्य देवक्यां याचितोऽभ्यगात् । अजस्त्वमस्य क्षेमाय वधाय च सुरद्विषाम् ॥३३॥
भारावतारणायान्ये भुवो नाव इवोदधौ । सीदन्त्या भूरिभारेण जातो ह्यात्मभुवार्थितः ॥३४॥
भवेऽस्मिन् क्लिश्यमानानामविद्याकामकर्मभिः । श्रवणस्मरणार्हाणि करिष्यन्निति केचन ३५॥

शृण्वन्ति गायन्ति गृणन्त्यभीक्ष्णशः स्मरन्ति नन्दन्ति तवेहितं जनाः ।
त एव पश्यन्त्यचिरेण तावकं भवप्रवाहोपरमं पदाम्बुजम् ॥३६॥
अप्यद्य नस्त्वं स्वकृतेहित प्रभो जिहाससि स्वित्सुहृदोऽनुजीविनः ।
येषां न चान्यद्भवतः पदाम्बुजात्परायणं राजसु योजितांहसाम् ॥३७॥

के वयं नामरूपाभ्यां यदुभिः सह पाण्डवाः । भवतोऽदर्शनं यर्हि हृषीकाणामिवेशितुः ॥३८॥

ईशानं नियन्तारम् । यतस्त्वत्तो निमित्तभूतादेव भूतानां मिथः कलहो भवति न तु स्वतस्त्वपि वैषम्यम् ॥२८॥ नृणां विडम्बनमनुकरणमीहमानस्य कुर्वतस्ते कश्चिन्न वेद । यस्मिन् त्वयि विषमा निग्रहानुग्रहरूपा मतिः भ्रान्तिर्भवति ॥२९॥ आत्मनः परमात्मनस्ते तिर्यगादिषु यज्जन्मादि तदत्यन्तं सर्वथा विडम्बनं लीलामात्रम् । क्रमेण वराहरामवामनमत्स्यावताराः । नृ[1] ऋषिषु इति पदच्छेदः ॥३०॥ त्वयि कृतागसि कृतापराधे सति गोपी यशोदा यावत् दाम रज्जुमाददे तावत् या ते दशा सा मां विमोहयति । कीदृशस्य । अश्रुमिश्रिताञ्जने संभ्रमे भयावेशयुक्ते अक्षिणी यस्मिंस्तत् वक्त्रमधः कृत्वा स्थितस्य । यत् यस्मात् भीरपि ॥ ३१ ॥ युधिष्ठिरस्य कीर्तये यदोर्वंशे जातमित्यन्वयः । प्रियस्येत्युभयोर्विशेषणम् ॥३२॥[2] अर्भत्वं बालत्वं भवानभ्यगात् । अस्य जगतः ॥३३॥ नाव इव दैत्यानां भूरिभारेण क्लिश्यन्त्या भुवः । आत्मभुवा ब्रह्मणा ॥३४॥ अविद्या अज्ञानं ततः काम इच्छा ततः कर्माणि करिष्यन् कर्तुं जातः इत्यन्वयः ॥ ३५ ॥ ये जनास्तव ईहितं चरितं गृणन्ति कीर्तयन्ति अभिनन्दन्ति च ते एव पदाम्बुजं पश्यन्तीत्यन्वयः । भवप्रवाहोपरमं संसारनिवर्तकम् ॥३६॥ स्वकृतं भक्तकृत्यं सेवादिकम् ईहितमपेक्षितं स्वीकृतं येन तत्सम्बुद्धौ । अपि किम् अद्य नोऽस्मान् जिहासि येषामन्यत्परायणं शरणं नास्ति । योजितं प्रापितमंहो दुःखं यैः ॥३७॥ यर्हि अदर्शनं तर्हि के वयं न केऽपीत्यन्वयः यथा इन्द्रियाणामीशितुर्मुख्यस्य

१—'ऋति सवर्णे ऋ वा' इति पूर्वपरयोर्ऋ आदेशः ।
२—अयमेव पाठः प्रशस्तः ।

नेयं शोभिष्यते तत्र यथेदानीं गदाधर । त्वत्पदैरङ्किता भाति स्वलक्षणविलक्षितैः ॥३९॥
इमे जनपदाः स्वृद्धाः सुपक्वौषधिवीरुधः । वनाद्रिनद्युदन्वन्तो ह्येधन्ते तव वीक्षितैः ॥४०॥
अथ विश्वेश विश्वात्मन् विश्वमूर्ते स्वकेषु मे । स्नेहपाशमिमं छिन्धि दृढं पाण्डुषु वृष्णिषु ४१॥
त्वयि मेऽनन्यविषया मतिर्मधुपतेऽसकृत् । रतिमुद्वहतादद्धा गङ्गेवौघमुदन्वति ॥४२॥

श्रीकृष्ण कृष्णसख वृष्ण्यृषभावनिध्रुग्राजन्यवंशदहनानपवर्गवीर्य ।
गोविन्द गोद्विजसुरार्तिहरावतार योगेश्वराखिलगुरो भगवन्नमस्ते ।.४३॥

सूत उवाच

पृथयेत्थं कलपदैः परिणूताखिलोदयः । मन्दं जहास वैकुण्ठो मोहयन्निव मायया ॥४४॥
तां बाढमित्युपामन्त्र्य प्रविश्य गजसाह्वयम् । स्त्रियश्च स्वपुरं यास्यन् प्रेम्णा राज्ञा निवारितः४५
व्यासाद्यैरीश्वरेहाज्ञैः कृष्णेनाद्भुतकर्मणा । प्रबोधितोऽपीतिहासैर्नाबुध्यत शुचार्पितः ॥४६॥
आह राजा धर्मसुतश्चिन्तयन् सुहृदां बधम् । प्राकृतेनात्मना विप्राः स्नेहमोहवशं गतः ॥४७॥
अहो मे पश्यताज्ञानं हृदि रूढं दुरात्मनः । पारक्यस्यैव देहस्य बह्व्यो मेऽक्षौहिणीर्हताः॥४८॥
बालद्विजसुहृन्मित्रपितृभ्रातृगुरुद्रुहः । न मे स्यान्निरयान्मोक्षो ह्यपि वर्षायुतायुतैः॥४९॥
नैनो राज्ञः प्रजाभर्तुर्धर्मयुद्धे वधो द्विषाम् । इति मे न तु बोधाय कल्पते शासनं वचः ॥५०॥

प्राणस्यादर्शने निर्गते सति न किञ्चित् नामरूपादिकं तद्वत् ॥३८॥ तत्र त्वयि गते तथा नेयम् । स्वलक्षणैरसाधारणचिह्नैर्वज्राङ्कुशादिभिः ॥ ३९ ॥ तव वीक्षितैर्दर्शनैः इमे एधन्ते वर्धन्ते । स्वृद्धाः समृद्धाः । वीरुधो लताः । उदन्वान् समुद्रः ॥४०॥ पाण्डुवंशीयाः पाण्डवाः । वृष्णिवंशीया यादवाः । दृढं गाढम् ॥४१॥ यथा गङ्गा ओघं स्वप्रवाहं समुद्रे उद्वहति नयति एवं मे मतिस्त्वयि रतिं प्राप्नोतु । तातङ्कुदेशः ॥४२॥ अत्र दश सम्बोधनैः दशेन्द्रियाणि मयि मनस्तु त्वयि । कृष्णस्य अर्जुनस्य सखे ! । ऋषभः श्रेष्ठः । अवनिद्रुहो भूम्यर्थद्रोहकर्तारो ये तेषाम् । अनपवर्गमक्षीणम् ॥४३॥ कलपदैः मधुरपदैः । उदयो महिमा । परिणूतः[1] स्तुतः ॥४४॥ यत्प्रार्थितं तद्बाढमित्यङ्गीकृत्य राजभवनं चागत्य पश्चात्कालान्तरे तां कुन्तीम् अन्याश्च सुभद्राद्याः स्त्रीः पृष्ट्वा स्वपुरं यास्यन् जिगमिषुः कृष्णो राज्ञा निवारित इत्यन्वयः ॥४५॥ ईहाज्ञैः अभिप्रायमजानद्भिः । शुचार्पितः शोकाकुलः ॥४६॥ हे विप्राः शौनकादयः । प्रकृतेरयं प्राकृतोऽविवेकस्तद्युक्तेन आत्मना चित्तेन ॥४७॥ पारक्यस्य परकीयस्य श्वसृगालादिभक्ष्यस्य देहस्वार्थे मे मया अक्षौहिण्यः[2] ॥४८॥ बालादीनां[3] द्रुहो घातकस्य मे । अयुतायुतैः कोटिभिः ॥४९॥ द्विषां वधे एनः पापं न भवतीति शासनं शिक्षारूपं वचः बोधाय संतोषाय न कल्पते उपयुक्तं न

१—णू स्तवने धातुः तौदादिको दीर्घान्तः ।

२—अक्षौहिण्याः प्रमाणं तु खागाष्टैकद्विकैर्गजैः ।
रथैरेतैर्हयैस्त्रिघ्नैः पञ्चघ्नैश्च पदातिभिः ॥
२१८७० गजाः । २१८७० रथाः । ६५६१० अश्वाः । १०९३५० पदातयः । सर्वसंकलनया २१८७०० । संख्या भवति ।

३—बाला अभिमन्युप्रभृतयः । द्विजा द्रोणादयः । सुहृदः शल्यादयः । मित्राणि कर्णादयः । पितरो भीष्मादयः । भ्रातरो दुर्योधनादयः । गुरवो द्रुपदादयः ।

स्त्रीणां मद्धतबन्धूनां द्रोहो योऽसाविहोत्थितः। कर्मभिर्गृहमेधीयैर्नाहं कल्पो व्यपोहितुम् ॥५१॥
यथा पङ्केन पङ्काम्भः सुरया वा सुराकृतम्। भूतहत्यां तथैवैकां न यज्ञैर्मार्ष्टुमर्हति ॥५२॥
इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां प्रथमस्कन्धे कुन्तीस्तुतिर्युधिष्ठिरानुतापो नामाष्टमोऽध्यायः८

भवति ॥५०॥ मया हता बन्धवः पतिपुत्रादयो यासाम्। गृहमेधीयैर्गृहाश्रमविहितैः कर्मभिः व्यपोहितुं दूरीकर्तुं न समर्थः ॥५१॥ यथा च सुराकृतमपावित्र्यं बह्व्या सुरया न मृज्यते तथा एकामपि भूतहत्यां यज्ञैर्मार्ष्टुं शोधयितुं नार्हति ॥५२॥

इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धे गूढार्थदीपिन्यामष्टमोऽध्यायः।

अथ नवमोऽध्यायः

सूत उवाच

इति भीतः प्रजाद्रोहात् सर्वधर्मविवित्सया। ततो विनशनं प्रागाद् यत्र देवव्रतोऽपतत् ॥१॥
तदा ते भ्रातरः सर्वे सदश्वैः स्वर्णभूषितैः। अन्वगच्छन् रथैर्विप्रा व्यासधौम्यादयस्तथा ॥२॥
भगवानपि विप्रर्षे रथेन सधनंजयः। स तैर्व्यरोचत नृपः कुबेर इव गुह्यकैः ॥३॥
दृष्ट्वा निपतितं भूमौ दिवश्च्युतमिवामरम्। प्रणेमुः पाण्डवा भीष्मं सानुगाः सह चक्रिणा ॥४॥
तत्र ब्रह्मर्षयः[1] सर्वे देवर्षयश्च सत्तम। राजर्षयश्च तत्रासन् द्रष्टुं भरतपुङ्गवम् ॥५॥

नवमे बाणशय्यास्थो भीष्मो धर्माननुपादिशत्।
स्तुवन्कृष्णं पुनस्तस्मिन् विलीनोऽभूदितीर्यते ॥१॥

इति युधिष्ठिरः। द्रोहात् संहारात्। ततो हस्तिनापुरतः विशेषेण नश्यन्ति पापानि यत्रेति विनशनं कुरुक्षेत्रम्। देवस्य श्रीकृष्णस्येव व्रतं ब्रह्मचर्यं यस्य सः देवव्रतो भीष्मः। विवित्सेति विन्दते रूपम्। ते भीमादयोऽपि सन्तः श्रेष्ठा अश्वा येषु तैः रथैः ॥२॥ भगवानपि अन्वगच्छदिति पूर्वेणान्वयः। गुह्यकैः यक्षैः। हे विप्रर्षे शौनक ! ॥३॥ दिवः स्वर्गात् च्युतम् ॥४॥ तत्र तदा पुंगवं श्रेष्ठं भीष्मम्। आसन्

१–कर्मज्ञानोभयपरा विप्रा ब्रह्मर्षयः स्मृताः।
कर्मगौणा ज्ञानपरा विप्रा देवर्षयः स्मृताः॥
तपश्चर्यां पुरस्कृत्य यथाशास्त्रं प्रजावनम्।
ये क्षत्रियाः प्रकुर्वन्ति ते तु राजर्षयः स्मृताः॥ इति संहितोक्तेः।

पर्वतो नारदो धौम्यो भगवान् बादरायणः । बृहदश्वो भरद्वाजः सशिष्यो रेणुकासुतः ।।६।।
वसिष्ठ इन्द्रप्रमदस्त्रितो गृत्समदोऽसितः । कक्षीवान् गौतमोऽत्रिश्च कौशिकोऽथ सुदर्शनः ।।७।।
अन्ये च मुनयो ब्रह्मन् ब्रह्मरातादयोऽमलाः । शिष्यैरुपेता आजग्मुः कश्यपाङ्गिरसादयः ।।८।।
तान् समेतान् महाभागानुपलभ्य वसूत्तमः । पूजयामास धर्मज्ञो देशकालविभागवित् ।।९।।
कृष्णं च तत्प्रभावज्ञ आसीनं जगदीश्वरम् । हृदिस्थं पूजयामास माययोपात्तविग्रहम् ।।१०।।
पाण्डुपुत्रानुपासीनान् प्रश्रयप्रेमसङ्गतान् । अभ्याचष्टानुरागास्रैरन्धीभूतेन चक्षुषा ।।११।।
अहो कष्टमहोऽन्याय्यं यद्यूयं धर्मनन्दनाः । जीवितुं नार्हथ क्लिष्टं विप्रधर्माच्युताश्रयाः ।।१२।।
संस्थितेऽतिरथे पाण्डौ पृथा बालप्रजा वधूः । युष्मत्कृते बहून् क्लेशान् प्राप्ताऽतोकवती मुहुः ।।१३।।
सर्वं कालकृतं मन्ये भवतां च यदप्रियम् । सपालो यद्वशे लोको वायोरिव घनावलिः ।।१४।।
यत्र धर्मसुतो राजा गदापाणिर्वृकोदरः । कृष्णोऽस्त्री गाण्डिवं चापं सुहृत्कृष्णस्ततो विपत् ।।१५।।
न ह्यस्य कर्हिचिद्राजन् पुमान् वेद विधित्सितम् । यद्विजिज्ञासया युक्ता मुह्यन्ति कवयोऽपि हि ।।१६।।
तस्मादिदं दैवतन्त्रं व्यवस्य भरतर्षभ । तस्यानुविहितोऽनाथा नाथ पाहि प्रजाःप्रभो ।।१७।।
एष वै भगवान् साक्षादाद्यो नारायणः पुमान् । मोहयन्मायया लोकं गूढश्चरति वृष्णिषु ।।१८।।
अस्यानुभावं भगवान् वेद गुह्यतमं शिवः । देवर्षिनारदः साक्षाद् भगवान् कपिलो नृप ।।१९।।

आगताः । अत्रास्धातुर्गत्यर्थकः ।।५।। पर्वतादय आसन्निति पूर्वेण अन्ये च आजग्मुरित्युत्तरेणान्वयः । रेणुकासुतः परशुरामः ।।६।। कौशिको विश्वामित्रः । पर्वतादयः सुदर्शनान्ताः सप्तदश ऋषयः ।। ७ ।। ब्रह्मरातः शुकः । आङ्गिरसो बृहस्पतिः ।।८।। अष्टौ वसवस्तेषु उत्तमो ज्ञानी भीष्मः । समेतान् समागतान् तान् उपलभ्य दृष्ट्वा । देशेत्युक्तेः देशकालानुसारम् शयान एव मनसा वाचा च पूजयामासेत्यर्थः ।।९।। [1]मायया कृपया उप नेत्रसमीपे आनीतः श्रीविग्रहो येन तं श्रीकृष्णम् ।।१०।। प्रश्रयो विनयः । सम्यक् गतान् समीपे प्राप्तान् । अनुरागास्रैः प्रेमाश्रुभिः । अभ्याचष्ट ददर्श अभ्यभाषत च । चक्षेरुभयार्थकत्वात् तन्त्रेणोभयं विवक्षितम् ।।११।। धर्मेति संबोधनम् । क्लिष्टं क्लेशपूर्वकम् ।।१२।। अतोकवती पुत्ररहिता यथा तथा बालप्रजा सपुत्रा अपि क्लेशान्प्राप्तेत्यन्वयः ।।१३।। यद्वशे कालवशे वर्तन्ते ।।१४।। कृष्णोऽर्जुनः अस्त्री धन्वी । ततस्तत्रापीत्याश्चर्यम् ।।१५।। विधित्सितं कर्तुमिष्टम् । यत् यस्य कृष्णस्य ।।१६।। इदं सुखदुःखादि दैवतन्त्रं दैवाधीनम् । व्यवस्य निश्चिनु । लोट् । ल्यबन्ते तु व्यवसायेति स्यात् । तस्येश्वरस्य अनुविहितोऽनुगतः सन् । हि गतौ कर्तरि क्तः । वृष्णिषु यदुषु ।। १७ ।। १८ ।। अनुभावं प्रभावम् ।।१९।।

१–'माया दम्भे कृपायां च' इति कोशः ।

यं मन्यसे मातुलेयं प्रियं मित्रं सुहृत्तमम्। अकरोः सचिवं दूतं सौहृदादथ सारथिम् ॥२०॥
सर्वात्मनः समदृशो ह्यद्वयस्यानहंकृतेः। तत्कृतं मतिवैषम्यं निरवद्यस्य न क्वचित् ॥२१॥
तथाप्येकान्तभक्तेषु पश्य भूपानुकम्पितम्। यन्मेऽसूंस्त्यजतः साक्षात्कृष्णो दर्शनमागतः ॥२२॥
भक्त्याऽऽवेश्य मनो यस्मिन् वाचा यन्नाम कीर्तयन्। त्यजन् कलेवरं योगी मुच्यते कामकर्मभिः २३

स देवदेवो भगवान् प्रतीक्षतां कलेवरं यावदिदं हिनोम्यहम्।
प्रसन्नहासारुणलोचनोल्लसन्मुखाम्बुजो ध्यानपथश्चतुर्भुजः ॥२४॥

सूत उवाच

युधिष्ठिरस्तदाकर्ण्य शयानं शरपञ्जरे। अपृच्छद् विविधान् धर्मानृषीणां चानुशृण्वताम् ॥२५॥
पुरुषस्वभावविहितान् यथावर्णं यथाश्रमम्। वैराग्यरागोपाधिभ्यामाम्नातोभयलक्षणान् ॥२६॥
दानधर्मान् राजधर्मान् मोक्षधर्मान् विभागशः। स्त्रीधर्मान् भगवद्धर्मान् समासव्यासयोगतः ॥२७॥
धर्मार्थकाममोक्षांश्च सहोपायान् यथा मुने। नानाख्यानेतिहासेषु वर्णयामास तत्त्ववित् ॥२८॥
धर्मान् प्रवदतस्तस्य स कालः प्रत्युपस्थितः। यो योगिनश्छन्दमृत्योर्वाञ्छितस्तूत्तरायणः ॥२९॥

तदोपसंहृत्य गिरः सहस्रणीर्विमुक्तसङ्गं मन आदिपूरुषे।
कृष्णे लसत्पीतपटे चतुर्भुजे पुरःस्थितेऽमीलितदृग्व्यधारयत् ॥३०॥

यं[1] मातुलेयं मन्यसे अस्येति पूर्वेणान्वयः। अथ चार्थे॥२०॥ निरवद्यस्य रागादिशून्यस्य अस्य भगवतः। तत्कृतं नीचोच्चकर्मकृतं वैषम्यं मम योग्यमयोग्यं वेति नास्ति ॥२१॥ तथापि समत्वेऽपि। एकान्तेषु अनन्यभक्तेषु अनुकम्पितम् अनुकम्पाम्। भावे क्तः। असून् प्राणान् ॥२२॥ काम्यन्ते इति कामा विषयास्तेषां निमित्तभूतैः कर्मभिः पुण्यपापात्मकैः ॥२३॥ यावदिदं शरीरं हिनोमि त्यजामि तावदुत्तरायणपर्यन्तं मां प्रतीक्षतां मत्प्रतीक्षां करोतु। प्रार्थनायां लोट्। यद्वा। मां प्रति ईक्षतां पश्यतु मम दृष्टिगोचरः सन्नत्रैव तिष्ठतु। प्रसन्नहासेन अरुणलोचनाभ्यां च उल्लसन्मुखाम्बुजं यस्य।[2] चतुर्भुजः ॥२४॥ तत् सानुकम्पं वाक्यम्। शरपञ्जरे वाणशय्यायाम् ॥२५॥ पुरुषेति त्रयम्। स्वभावैः सात्त्विकादिभिः। यथावर्णं वर्णधर्मान्। यथार्थेऽव्ययीभावः। आम्नातं क्रमेण कथितम् उभयं निवृत्तिप्रवृत्तिरूपं लक्षणं येषां तान्। समासः संक्षेपः व्यासो विस्तरस्तयोरौचित्येन। यथा यथावत् ॥२६।२७।२८॥ छन्दमृत्योः स्वेच्छामृत्योर्यो वाञ्छितोऽभीष्टः स काल इत्यन्वयः। अत्र धर्मानित्येव पाठः समीचीनः बहुधर्मकथनात् ॥२९॥ तदा उत्तरायणे प्राप्ते सति। भीष्मः गिर उपसंहृत्य विरम्य कृष्णे मनो व्यधारयदित्यन्वयः। विमुक्तसङ्गं निर्वासनं सत्। अमीलितदृगिति संमुखस्थत्वेन नेत्रनिमीलनस्यानौचित्यादित्यर्थः। सहस्रं समीपस्थान् रथिनो

१—मातुल्या देवक्या अपत्यमित्यर्थे स्त्रीभ्यो ढक्। मातुलस्यापत्यमित्यर्थे तु वृद्धादपत्ये फिञ एव सत्त्वात् मातुलायनिः स्यादित्यवधेयम्।

२—भगवतो द्विभुजत्वेऽपि भीष्मोपास्यमूर्तेश्चतुर्भुजत्वात्तथात्वेन निर्देशः।

विशुद्धया धारणया हताशुभस्तदीक्षयैवाशु गतायुधव्यथः ।
निवृत्तसर्वेन्द्रियवृत्तिविभ्रमस्तुष्टाव जन्यं विसृजञ्जनार्दनम् ॥३१॥

श्रीभीष्म उवाच

इति मतिरुपकल्पिता वितृष्णा भगवति सात्वतपुङ्गवे विभूम्नि ।
स्वसुखमुपगते क्वचिद्विहर्तुं प्रकृतिमुपेयुषि यद्भवप्रवाहः ॥३२॥
त्रिभुवनकमनं तमालवर्णं रविकरगौरवराम्बरं दधाने ।
वपुरलककुलावृताननाब्जं विजयसखे रतिरस्तु मेऽनवद्या ॥३३॥
युधि तुरंगरजोविधूम्रविष्वक्कचलुलितश्रमवार्यलंकृतास्ये ।
मम निशितशरैर्विभिद्यमानत्वचि विलसत्कवचेऽस्तु कृष्ण आत्मा ॥३४॥
सपदि सखिवचो निशम्य मध्ये निजपरयोर्बलयो रथं निवेश्य ।
स्थितवति परसैनिकायुरक्ष्णा हृतवति पार्थसखे रतिर्ममास्तु ॥३५॥

नयति पालयतीति तथा ॥३०॥ भीष्मो जन्यं देहं विसृजन् त्यजन् जनार्दनं तुष्टावेत्यन्वयः । कथंभूतः । विषयचिन्तनमशुद्धधारणा देवचिन्तनं शुद्धधारणा साक्षाद्भगवच्चिन्तनं विशुद्धधारणा तया हतमशुभं प्रारब्धं[1] कर्म यस्य । तस्येक्षया कृपादृष्ट्यैव गतायुधव्यथ इत्येव पाठः प्रशस्तः । निवृत्तः वृत्तीनां विषयान्तरेषु विभ्रमः भ्रमणं यस्य ॥ ३१ ॥ इतः परमेकादशभिः पुष्पिताग्रावृत्तैर्भगवच्चरणेषु पुष्पाञ्जलिं समर्पयति भीष्मः इतीति ।

इति ममायुःसमाप्तौ आगते भगवति मत्पार्श्वे दातुं न किञ्चिदित्यतो मतिरेवोपायनत्वेन उपकल्पिता समर्पिता । वितृष्णा निष्कामा सती । क्व । सात्वतां यदूनां श्रेष्ठे भगवति । विशिष्टः सर्वातिशायी भूमा महत्त्वं यस्य तस्मिन् । क्वचित् सृष्ट्यादिसमये । यतः प्रकृतेः सकाशात् सृष्टिपरम्परा प्रचलति ॥ ३२ ॥ एवंभूतं वपुर्दधाने विजयसखे मे अनवद्या शुद्धा रतिरस्तु विजयोऽर्जुनः कीदृशं, वपुः।कमनं कमनीयमतिसुन्दरं, त्रिलोकस्यः कमनमभिलाषो यत्रेति वा ।प्रातः कालिकै रवेःकिरणैरिव[2]गौरवरेऽतिपीतेऽम्बरे यत्र । अलककुलैः केशसमूहैः ॥३३॥ मम आत्मा मनः कृष्णेऽस्तु । कीदृशे । तुरगरजोभिर्धूम्रवर्णा विष्वञ्च इतस्ततश्चलन्तो ये कचास्तैर्लुलितैर्विकीर्णैः स्वेदविन्दुभिरलङ्कृतमास्यं यस्य तस्मिन् । पुनश्च । निशितैः तीक्ष्णैः विभिद्यमानेव न तु भिन्ना त्वक् यस्य । विलसत् त्रुट्यदिव न तु त्रुटितम् । यद्वा । विभिदि विगतभेदे । अमाना निरुपमा त्वक् श्रीविग्रहो यस्य तस्मिन् । अत एवाखण्डतया विलसच्छोभमानं च कवचं यस्येत्यर्थो व्याख्येयः ॥ ३४ ॥ उभयोः सेनयोर्मध्ये रथं निवेश्य स्थितवति । परस्य शत्रोःदुर्योधनस्य । अक्ष्णा कालदृष्ट्या । पार्थोऽर्जुनः ।

१–भगवत्प्राप्तिप्रतिबन्धकीभूतम् ।
२–'गौरोऽरुणे सिते पीते' इत्यभिधानम् ।

व्यवहितपृतनामुखं निरीक्ष्य स्वजनवधाद् विमुखस्य दोषबुद्धया ।
कुमतिमहरदात्मविद्यया यश्चरणरतिः परमस्य तस्य मेऽस्तु ॥३६॥
स्वनिगममपहाय मत्प्रतिज्ञामृतमधिकर्तुमवप्लुतो रथस्थः ।
धृतरथचरणोऽभ्ययाच्चलद्गुर्हरिरिव हन्तुमिभं गतोत्तरीयः ॥३७॥
शितविशिखहतो विशीर्णदंशः क्षतजपरिप्लुत आततायिनो मे ।
प्रसभमभिससार मद्वधार्थं स भवतु मे भगवान् गतिर्मुकुन्दः ॥३८॥
विजयरथकुटुम्ब आत्ततोत्रे धृतहयरश्मिनि तच्छ्रियेक्षणीये ।
भगवति रतिरस्तु मे मुमूर्षोर्यमिह निरीक्ष्य हता गताः सरूपम् ॥३९॥
ललितगतिविलासवल्गुहासप्रणयनिरीक्षणकल्पितोरुमानाः ।
कृतमनुकृतवत्य उन्मदान्धाः प्रकृतिमगन् किल यस्य गोपवध्वः ॥४०॥
मुनिगणनृपवर्यसंकुलेऽन्तःसदसि युधिष्ठिरराजसूय एषाम् ।
अर्हणमुपपेद ईक्षणीयो मम दृशिगोचर एष आविरात्मा ॥४१॥

॥ ३५॥ य आत्मविद्यया गीतोपदेशेन अर्जुनस्य अहं हन्तेत्यादि कुमतिमहरत् तस्य परमस्य परमेश्वरस्य चरणयोर्मे रतिरस्तु । कथंभूतस्य । व्यवहिता किञ्चिद्दूरे स्थिता या पृतना कौरवसेना तस्या मुखमिव मुखं प्रधानमग्रे स्थितं भीष्मादिकं निरीक्ष्य दोषबुद्धया पापभयेन विमुखस्य ॥ ३६ ॥ स्वनिगमेति युग्मकम् [1]स्वनिगमं स्वप्रतिज्ञां त्यक्त्वा मत्प्रतिज्ञाम्[2] ऋतम्[3]ऋतरूपाम् सत्याम् अधि अधिकां कर्तुं सहसाऽवतीर्णः धृतचक्रः सन् मां हन्तुमभ्ययात् सम्मुखमधावत् यथा सिंहो गजं स मुकुन्दः मे गतिर्भवतु इत्युत्तरेणान्वयः। एतदावेशेनैव चलन्ती गौः पृथ्वी यस्मात् गतं पतितमुत्तरीयं पीताम्बरं च यस्य तथाभूतः । किञ्च मे शितविशिखैस्तीक्ष्णवाणैर्हतोऽपि अविशीर्णकवचः क्षतजपरिप्लुते भूप्रदेशेऽभिससार स मुकुन्द इत्यन्वयः। क्षतजं रक्तम् ॥ ३७।३८ ॥ कथंभूते भगवति । विजयोऽर्जुनस्तस्य रथः कुटुम्बवद्रक्षणीयो यस्य तस्मिन् । आत्तं गृहीतं तोत्रं प्रतोदो चाबुक इति येन तस्मिन् । धृताश्च ये हयानां रश्मयस्ते सन्ति हस्ते यस्य तस्मिन् । व्रीह्यादित्वादिनिः। ये हतास्ते सरूपं[4] तत्समानं रूपं गताः ॥३९॥ ललितगत्यादिभिरात्मीयैस्तदीयैर्वा कृत उरुर्मानोऽत्यादरो यासां याभिर्वा ता गोप्यः यस्य प्रकृतिं स्वरूपमगमन् तस्मिन् मे रतिरस्तु इति योजना । उन्मदेन प्रेमोन्मादेन विवशाः । विलासो भ्रूभङ्गादिः ॥ ४० ॥ राजसूये अन्तः सदसि सभामध्ये एषां मुनिगणादीनामीक्षणीयः सन् अर्हणमग्रपूजामुपपेदे स एष आत्मा परमात्मा श्रीकृष्णः मम दृष्टिगोचरः सन् आविः प्रकटो वर्तते अहो मे भाग्यम् ॥ ४१॥ तम् इमम् अजं श्रीकृष्णं सम्यग् अधिगतोऽस्मि

१—अशस्त्र एव साहाय्यं करिष्यामीति ।
२—अहं श्रीकृष्णं शस्त्रं ग्राहयिष्यामीति ।
३—ऋतमित्यजहल्लिङ्गं क्रियाविशेषणं वा ।
४—अयमेव पाठः श्रीधरसम्मतः ।

तमिममहमजं शरीरभाजां हृदि हृदि धिष्ठितमात्मकल्पितानाम् ।
प्रतिदृशमिव नैकधार्कमेकं समधिगतोऽस्मि विधूतभेदमोहः ॥४२॥

सूत उवाच

कृष्ण एवं भगवति मनोवाग्दृष्टिवृत्तिभिः । आत्मन्यात्मानमावेश्य सोऽन्तःश्वास उपारमत् ॥४३॥
सम्पद्यमानमाज्ञाय भीष्मं ब्रह्मणि निष्कले । सर्वे बभूवुस्ते तूष्णीं वयांसीव दिनात्यये ॥४४॥
तत्र दुंदुभयो नेदुर्देवमानववादिताः । शशंसुः साधवो राज्ञां खात्पेतुः पुष्पवृष्टयः ॥४५॥
तस्य निर्हरणादीनि सम्परेतस्य भार्गव । युधिष्ठिरः कारयित्वा मुहूर्तं दुःखितोऽभवत् ॥४६॥
तुष्टुवुर्मुनयो हृष्टाः कृष्णं तद्गुह्यनामभिः । ततस्ते कृष्णहृदयाः स्वाश्रमान् प्रययुः पुनः ॥४७॥
ततोयुधिष्ठिरो गत्वा सहकृष्णो गजाह्वयम् । पितरं सान्त्वयामास गान्धारीं च तपस्विनीम् ॥४८॥
पित्रा चानुमतो राजा वासुदेवानुमोदितः । चकार राज्यं धर्मेण पितृपैतामहं विभुः ॥४९॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां प्रथमस्कन्धे युधिष्ठिरराज्यप्रलम्भो नाम नवमोऽध्यायः ॥९॥

प्राप्तोऽस्मि । कथंभूतम् । कल्पितानां तेषां हृदि अधिष्ठितम् । यथा एकमेवार्कं प्रतिदृश[1]मनेकधा भातं तद्वत् ॥४२॥ आत्मनि परमात्मनि श्रीकृष्णे अन्तरेव विलीनः श्वासो यस्य स भीष्मः उपारमत् श्रीकृष्णे लीनोऽभूत् देहमजहाच्च ॥ ४३ ॥ निष्कले शुद्धे ब्रह्मणि श्रीकृष्णे संपद्यमानं लीयमानम् । वयांसि पक्षिण इव । दिनात्यये रात्रौ ॥४४॥ तत्र तदा राज्ञां मध्ये ये साधवस्ते प्रशशंसुः । खात् आकाशात् ॥४५॥ हे भार्गव शौनक ! सम्यक् परं श्रीकृष्णमितस्य प्राप्तस्य निर्हरणादीनि पारलौकिककृत्यानि ॥ ४६ ॥ गुह्यै रतर्क्यमहिमभिः कृष्णेत्यादिनामभिः ॥ ४७ ॥ पितरं धृतराष्ट्रम् । तपस्विनीं सन्तापवतीम् । तप् संन्तापे इत्यस्मात् ॥ ४८ ॥ पित्रा धृतराष्ट्रेण अनुमतोऽनुज्ञातः पितृपितामहादागतं राज्यम् ॥ ४९॥

इति श्रीद्भागवते महापुराणे प्रथमस्कन्धे गूढार्थदीपिन्यां नवमोऽध्यायः ।

१–टावन्तेन वीप्सार्थेऽव्ययीभावः ।

अथ दशमोऽध्यायः

शौनक उवाच

हत्वा स्वरिक्थस्पृध आततायिनो युधिष्ठिरो धर्मभृतां वरिष्ठः ।
सहानुजैः प्रत्यवरुद्धभोजनः कथं प्रवृत्तः किमकारषीत्ततः ॥१॥

सूत उवाच

वंशं कुरोर्वंशदवाग्निनिर्हृतं संरोहयित्वा भवभावनो हरिः ।
निवेशयित्वा निजराज्य ईश्वरो युधिष्ठिरं प्रीतमना बभूव ह ॥२॥
निशम्य भीष्मोक्तमथाच्युतोक्तं प्रवृत्तविज्ञानविधूतविभ्रमः ।
शशास गामिन्द्र इवाजिताश्रयः परिध्युपान्तामनुजानुवर्तितः ॥३॥

कामं ववर्ष पर्जन्यः सर्वकामदुघा मही । सिषिचुः स्म व्रजान् गावः पयसोधस्वतीर्मुदा ॥४॥
नद्यः समुद्रा गिरयः सवनस्पतिवीरुधः । फलन्त्योषधयः सर्वाः काममन्वृतु तस्य वै ॥५॥
नाधयो व्याधयः क्लेशा दैवभूतात्महेतवः । अजातशत्रावभवन् जन्तूनां राज्ञि कर्हिचित् ॥६॥
उषित्वा हास्तिनपुरे मासान् कतिपयान् हरिः । सुहृदां च विशोकाय स्वसुश्च प्रियकाम्यया ॥७॥
आमन्त्र्य चाभ्यनुज्ञातः परिष्वज्याभिवाद्य तम् । आरुरोह रथं कैश्चित्परिष्वक्तोऽभिवादितः ॥८॥
सुभद्रा द्रौपदी कुन्ती विराटतनया तथा । गान्धारी धृतराष्ट्रश्च युयुत्सुर्गौतमो यमौ ॥९॥

दशमे द्वारकां गच्छन् न्यस्य राज्ये युधिष्ठिरम् ।
कृष्णो मार्गे कुरुस्त्रीभिः संस्तुतोऽभूदितीर्यते ॥१॥

युधिष्ठिरः आततायिनो राज्ञो हत्वा राज्ये कथं प्रवृत्तः । ततः प्रवृत्त्यनन्तरं च किमकार्षीदित्यन्वयः । कथंभूतान् । स्वस्य युधिष्ठिरस्य रिक्थे धने स्पर्धन्ते ये तान् । स्वरिक्थाय स्पृत् संग्रामो वा येषां तान् । प्रत्यवरुद्धं पुनः प्राप्तं भोजनं राज्यभोगो येन सः । हेति संबोधने । वंश एव दवो वनं तस्माज्जातो यः क्रोधरूपोऽग्निस्तेन निर्दग्धं वंशं संरोहयित्वा[1] परीक्षिद्रक्षणेन अङ्कुरितं कृत्वा । यतो भवभावनः सृष्टिवर्धनः ॥२॥ प्रवृत्तं यद् विज्ञानं तेन निवृत्तो विभ्रमोऽहंकर्तेत्येवंरूपो मोहो यस्य सः । इन्द्र इव गां शशास । गां भूमिं स्वर्गं च । अजितः श्रीकृष्णः उपेन्द्रश्च । परिधिः समुद्रः ऊर्ध्वं दिङ्मण्डलं च तत्पर्यन्ताम् । अनुवर्तितः सेवितः । श्लेषोऽयम् ॥३॥ऊधः क्षीराशयस्तद्वत्यो गावः व्रजान् गोष्ठानि सिषिचुः॥४॥तस्य युधिष्ठिरस्य राज्ये ओषधयः यवाद्याः अन्वृतु ऋतौ ऋतौ कामं यथेष्टं फलन्ति स्मेत्यत्र योज्यम् ॥५॥ आधयो मनोव्यथाः । क्लेशास्त्रिविधतापाः तानेवाह दैवेत्यादि॥६॥उषित्वेति द्वयम् । स्वसुः सुभद्रायाः।तं युधिष्ठिरम् आमन्त्र्य पृष्ट्वा तेन अनुज्ञातो दत्ताज्ञश्च तं युधिष्ठिरम् अभिवाद्य ॥७॥८॥ सुभद्रेति द्वयम् । विराटतनया

१—क्त्वाऽपि च छन्दसि इति नियमात् ल्यप् न ।

वृकोदरश्च धौम्यश्च स्त्रियो मत्स्यसुतादयः । न सेहिरे विमुह्यन्तो विरहं शार्ङ्गधन्वनः ॥१०॥
सत्सङ्गान्मुक्तदुस्सङ्गो हातुं नोत्सहते बुधः । कीर्त्यमानं यशो यस्य सकृदाकर्ण्य रोचनम् ॥११॥
तस्मिन्न्यस्तधियः पार्थाः सहेरन् विरहं कथम् । दर्शनस्पर्शसंलापशयनासनभोजनैः ॥१२॥
सर्वे तेऽनिमिषैरक्षैस्तमनुद्रुतचेतसः । वीक्षन्तः स्नेहसम्बद्धा विचेलुस्तत्र तत्र ह ॥१३॥
न्यरुन्धन्नुद्गलद्बाष्पमौत्कण्ठ्याद्देवकीसुते । निर्यात्यगाराज्ञोऽभद्रमिति स्याद्बान्धवस्त्रियः ॥१४॥
मृदङ्गशङ्खभेर्यश्च वीणापणवगोमुखाः । धुन्धुर्यानकघण्टाद्या नेदुर्दुन्दुभयः समम् ॥१५॥
प्रासादशिखरारूढाः कुरुनार्यो दिदृक्षया । ववृषुः कुसुमैः कृष्णं प्रेमव्रीडास्मितेक्षणाः ॥१६॥
सितातपत्रं जग्राह मुक्तादामविभूषितम् । रत्नदण्डं गुडाकेशः प्रियः प्रियतमस्य ह ॥१७॥
उद्धवः सात्यकिश्चैव व्यजने परमाद्भुते । विकीर्यमाणः कुसुमै रेजे मधुपतिः पथि ॥१८॥
अश्रूयन्ताशिषः सत्यास्तत्र तत्र द्विजेरिताः । नानुरूपानुरूपाश्च निर्गुणस्य गुणात्मनः ॥१९॥
अन्योन्यमासीत्संजल्प उत्तमश्लोकचेतसाम् । कौरवेन्द्रपुरस्त्रीणां सर्वश्रुतिमनोहरः ॥२०॥

स वै किलायं पुरुषः पुरातनो य एक आसीदविशेष आत्मनि ।
अग्रे गुणेभ्यो जगदात्मनीश्वरे निमीलितात्मन्निशि सुप्तशक्तिषु ॥२१॥

उत्तरा । युयुत्सुः धृतराष्ट्राद्वैश्यायां जातः । गोतमः कृपः । मत्स्यसुता सत्यवती ॥९॥१०॥ सत्सङ्गादिति द्वयम् । सकृदपि आकर्ण्य यस्य यशोऽपि हातुं बुधो नोत्सहते तस्य विरहं पार्थाः कथं सहेरन्नित्यन्वयः । बुधः कीदृशः । सतां सङ्गात् मुक्तो दुःसंगो येन सः । पार्थाः कीदृशाः । दर्शनादिभिस्तस्मिन् श्रीकृष्णे न्यस्ता संलग्ना धीर्येषां ते । रोचनं रुचिकरम् ॥११॥१२॥ तं श्रीकृष्णमनुगतानि चेतांसि येषां ते । ह हर्षार्थे ॥१३॥ अगारात् निर्याति निर्गच्छति सति उद्गलत् स्रवत् वाष्पमश्रुवृन्दं न्यरुन्धन् नेत्रेष्वेव स्तम्भितवत्यः अभद्रं नो स्यादित्येतदर्थम् ॥१४॥ मृदङ्गादयः दश वाद्यभेदाः समं[1] युगपत् ॥१५॥ कुसुमैः कुसुमानि ववृषुः वा । प्रेमादिपूर्वकमीक्षणं यासां ताः ॥१६॥ दाम माला । गुडाका[2] निद्रा तस्या ईशो विजेता जितनिद्रः अर्जुन इत्यर्थः । ह हर्षे ॥१७॥ मधूनां[3] यादवगोत्रविशेषाणां पतिः मधुपतिः श्रीकृष्णः ॥१८॥ गुणात्मनः सगुणस्य अनुरूपा आशीर्वादाः ॥१९॥ उत्तमश्लोको भगवान् । अन्योन्यं परस्परम् संजल्पः संवादः । सर्वेषां श्रुतिमनसी हरति आकर्षतीति श्लेषेण श्रुतिर्वेदो वा तासामपि ॥२०॥ वै स्मरणे किल प्रसिद्धे । अविशेषे प्रपञ्चातीते आत्मनि स्वस्वरूपे यः एक पुरुषः आसीत् स एवायं श्रीकृष्ण इत्यन्वयः । कदा । गुणेभ्यः अग्रे गुणक्षोभात् पूर्वं तथा निशि प्रलये च । तत्स्वरूपम् । निमीलितात्मन्निति लुप्तसप्तम्यन्तं पदम् । जातावेकवचनं च निमीलितात्मसु तथा च जगतामात्मनि अन्तर्यामिणि ईश्वरे निमीलितेषु लीनेषु आत्मसु

१–अयमेव पाठः प्रशस्तः ।

२–निद्रा गुडाका संप्रोक्ता । गुडा वक्रा आसमन्तात्केशा यस्येति वा ।

३–मधुभोजदशार्हार्हकुक्कुरान्धकवृष्णयः इति यादवभेदाः ।

स एव भूयो निजवीर्यचोदितां स्वजीवमायां प्रकृतिं सिसृक्षतीम् ।
अनामरूपात्मनि रूपनामनी विधित्समानोऽनुससार शास्त्रकृत् ॥२२॥
स वा अयं यत्पदमत्र सूरयो जितेन्द्रिया निर्जितमातरिश्वनः ।
पश्यन्ति भक्त्युत्कलितामलात्मना नन्वेष सत्त्वं परिमार्ष्टुमर्हति ॥२३॥
स वा अयं सख्यनुगीतसत्कथो वेदेषु गुह्येषु च गुह्यवादिभिः ।
य एक ईशो जगदात्मलीलया सृजत्यवत्यत्ति न तत्र सज्जते ॥२४॥
यदा ह्यधर्मेण तमोधियो नृपा जीवन्ति तत्रैष हि सत्त्वतः किल ।
धत्ते भगं सत्यमृतं दयां यशो भवाय रूपाणि दधद्युगे युगे ॥२५॥
अहो अलं श्लाघ्यतमं यदोः कुलमहो अलं पुण्यतमं मधोर्वनम् ।
यदेष पुंसामृषभः श्रियः पतिः स्वजन्मना चङ्क्रमणेन चाञ्चति ॥२६॥
अहो बत स्वर्यशसस्तिरस्करी कुशस्थली पुण्ययशस्करी भुवः ।
पश्यन्ति नित्यं यदनुग्रहेषितस्मितावलोकं स्वपतिं स्म यत्प्रजाः ॥२७॥
नूनं व्रतस्नानहुतादिनेश्वरः समर्चितो ह्यस्य गृहीतपाणिभिः ।
पिबन्ति याः सख्यधरामृतं मुहुर्व्रजस्त्रियः सम्मुमुहुर्यदाशयाः ॥२८॥

जीवेषु सत्सु य एकः सः । पुनः सुप्तशक्तिषु शक्तिलय एव जीवलयः ॥२१॥स एव भूयः प्रकृतिमनुससार । किमर्थम् । अनामरूपे आत्मनि जीवे रूपनामनी विधातुमिच्छन् । कीदृशीम् प्रकृतिम् । निजवीर्येण कालशक्त्या प्रेरिताम् स्वांशभूतानां जीवानां मोहिनीं च । किञ्च कर्माणि विधातुं शास्त्राणि वेदांश्च यः कृतवान् स इत्यन्वयः॥२२॥वै एवार्थे।अत्र कर्मभूमौ सूरयो यस्य पदं स्वरूपमङ्घ्रिं वा पश्यन्ति स एवायम् । केन । भक्त्या उत्कलितेन द्रवीभूतेन निर्मलेन आत्मना चेतसा । ननु निश्चितमेष एव सत्त्वमन्तःकरणं परिमार्ष्टुं शोधयितुं निर्वासनीकर्तुमर्हति न योगादयः । कथंभूताः सूरयः । निर्जितात्प्राणाद्धेतोर्जितेति योज्यम् । पञ्चम्यन्तम् ॥२३॥ वै एवार्थे । हे सखि । य एक आत्मनो लीलया अनायासेन संकल्पमात्रेण जगत्सृजति किन्तु तत्र न सज्जते न लिप्तो भवति स एवायमित्यन्वयः । कथंभूतः । गुह्येषु उपनिषत्सु च अनुगीता सती कथा यस्य सः । कैः । गुह्यवादिभिः रहस्योद्घाटनकुशलैः ॥२४॥ तमोऽज्ञानं तेन व्याप्ता धीर्येषां ते । तत्र तदा । विशुद्धसत्त्वतः रूपाणि दधत् भगादीनि धत्ते प्रकटयति । भवाय भूत्यै । ऋतं सूनतवाक्यम्॥२५॥ यत् यस्मादेष ऋषभः श्रेष्ठः श्रियः पतिः जन्मना यदोः कुलं चङ्क्रमणेन परिभ्रमणेन चकाराज्जन्मना च मधोर्वनं मथुरामण्डलं च अञ्चति पूजयति सत्करोति ॥२६॥ अहो बतेति अत्याश्चर्ये । कौ पृथिव्यां शेते इति कुशं जलं तदेव स्थलं यस्याः सा कुशस्थली द्वारका । कुशं जलम् इति हैमः । यत्प्रजाः यत्रत्याः प्रजाः स्म साश्चर्यं स्वपतिं श्रीकृष्णं पश्यन्ति । कीदृशम् अनुग्रेहषितमनु[1] ग्रहेच्छा तेन स्मितावलोकौ यस्य तम् ॥२७॥ अस्येति कर्तरि शेषे षष्ठी अनेन । हे सखि ! अनेन श्रीकृष्णेन

१–ईषेर्दीर्घोपधात् क्तः । इष्यतेर्वा क्तः ।

या वीर्यशुल्केन हृताः स्वयंवरे प्रमथ्य चैद्यप्रमुखान् हि शुष्मिणः ।
प्रद्युम्नसाम्बाम्बसुतादयोऽपरा याश्चाहृता भौमवधे सहस्रशः ॥२९॥

एताः परं स्त्रीत्वमपास्तपेशलं निरस्तशौचं बत साधु कुर्वते ।
यासां गृहात्पुष्करलोचनः पतिर्न जात्वपैत्याहृतिभिर्हृदि स्पृशन् ॥३०॥

एवंविधा गदन्तीनां स गिरः पुरयोषिताम् । निरीक्षणेनाभिनन्दन् सस्मितेन ययौ हरिः ॥३१॥
अजातशत्रुः पृतनां गोपीथाय मधुद्विषः । परेभ्यः शङ्कितः स्नेहात्प्रायुङ्क्त चतुरङ्गिणीम् ॥३२॥
अथ दूरागतान् शौरिः कौरवान् विरहातुरान् । संनिवर्त्य दृढं स्निग्धान् प्रायात्स्वनगरीं प्रियैः॥३३
कुरुजाङ्गलपञ्चालान् शूरसेनान् सयामुनान् । ब्रह्मावर्तं कुरुक्षेत्रं मत्स्यान् सारस्वतानथ ॥३४॥
मरुधन्वमतिक्रम्य सौवीराभीरयोः परान् । आनर्तान् भार्गवोपागाच्छ्रान्तवाहो मनाग्विभुः ।३५
तत्र तत्र ह तत्रत्यैर्हरिः प्रत्युद्यतार्हणः । सायं भेजे दिशं पश्चाद् गविष्ठो गां गतस्तदा ॥३६॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां प्रथमस्कन्धे नैमिषीयोपाख्याने श्रीकृष्णद्वारकागमनं नाम दशमोऽध्यायः ॥१०॥

गृहीतपाणिभिः पत्नीभिर्नूनमयं समर्चितः । यतो हि ता दुर्लभतमम् अधरामृतं पिबन्ति । अन्य यदाशया यन्निविष्टचित्ताः सत्यः केवलं संमुमुहुर्न तु तत्प्रापुः ॥ २८ ॥ या इति द्वयम् । वीर्यशुल्केन शुष्मिणो[1] मत्तान् चैद्यप्रमुखान् शिशुपालादीन् प्रमथ्य या हृता याश्च अपरा भौमासुरवधे सति आनीतास्ता एताः सर्वा अपि स्त्रीत्वमेव साधु कुर्वते इत्युत्तरेणान्वयः । यासां गृहाद् जातु कदाचिदपि भगवान् नापैति नापयाति । व्याहृतिभिर्मधुरवचनैः पारिजातादीनामाहरणैर्वा यासां हृदि स्पृशन् आनन्दयन् सन् । प्रद्युम्नादयः सुता यासां ताः । पेशलं स्वातन्त्र्यम् ॥ २९।३०।३१ ॥ गोपीथाय रक्षणाय । गोपीथो रक्षणे प्रोक्त इति निरुक्तिः । पृतनां सेनाम् ॥ ३२ ॥ शौरिः श्रीकृष्णः कौरवान् पाण्डवान् । प्रियैः उद्धवादिभिः सह ॥ ३३ ॥ कुर्विति द्वयम् । कुर्वादिदेशानतिक्रम्य आनर्तान् द्वारका-प्रदेशान् उपागादित्युत्तरेणान्वयः । मनाक् ईषत् श्रान्ताश्वः । मरुर्निरुदको देशः । धन्वो ऽल्पोदकः । परान् परतः स्थितान् । हे भार्गव शौनक यामुनान् यमुनातीरस्थान् । सौराष्ट्रः सुराष्ट्रदेशः । आभीरः कुन्तीपुरदेशः ॥ ३४।३५ ॥ तत्र तत्र देशे तत्रत्यैर्जनैः । प्रत्युद्यतार्हणः निवेदितोपायनः । पश्चाद्दिशं पश्चिमां दिशं भेजे प्राप्तः । तदा गोभिः स्वाश्रयैः किरणैः तिष्ठतीति गविष्ठः सूर्यः गां जलं प्रविष्टः अस्तं गतः । यद्वा । गविष्ठः भूमिष्ठः सन् गां जलाशयं गतः पश्चाद्दिशं सायं सन्ध्यां भेजे उपासितवान् ।

इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धे गूढार्थदीपिन्यां दशमोऽध्यायः ।

१–'शुष्मी गोपतिमत्तयोः' इति मेदिनी । ।

अथैकादशोऽध्यायः

सूत उवाच

आनर्तान् स उपव्रज्य स्वृद्धाञ्जनपदान् स्वकान्। दध्मौ दरवरं तेषां विषादं शमयन्निव ॥१॥

स उच्चकाशे धवलोदरो दरोऽप्युरुक्रमस्याधरशोणशोणिमा।
दाध्मायमानः[1] करकञ्जसम्पुटे यथाब्जषण्डे कलहंस उत्स्वनः ॥२॥

तमुपश्रुत्य निनदं जगद्भयभयावहम्। प्रत्युद्ययुः प्रजाः सर्वा भर्तृदर्शनलालसाः ॥३॥
तत्रोपनीतबलयो रवेर्दीपमिवादृताः। आत्मारामं पूर्णकामं निजलाभेन नित्यदा ॥४॥
प्रीत्युत्फुल्लमुखाः प्रोचुर्हर्षगद्गदया गिरा। पितरं सर्वसुहृदमवितारमिवार्भकाः ॥५॥

नताः स्म ते नाथ सदाङ्घ्रिपङ्कजं विरिञ्चवैरिञ्च्यसुरेन्द्रवन्दितम्।
परायणं क्षेममिहेच्छतां परं न यत्र कालः प्रभवेत्परप्रभुः ॥६॥
भवाय नस्त्वं भव विश्वभावन त्वमेव माताथ सुहृत्पतिः पिता।
त्वं सद्गुरुर्नः परमं च दैवतं यस्यानुवृत्त्या कृतिनो बभूविम ॥७॥

एकादशे स्तुतः कृष्णस्तत्रत्यैराविशत्पुरीम्।
मिलित्वा बन्धुभिः सार्द्धं स्वप्रियाश्चाप्यतोषयत् ॥१॥

स श्रीकृष्णः। स्वृद्धान् समृद्धान्। दरवरं शङ्खश्रेष्ठं दध्मौ वादितवान्। दर्शनं विना विषादशान्तेरभावादिवेत्युक्तम् ॥ १ ॥ भगवता दाध्मायमानः अतिशयेन वाद्यमानः स दरः शंखः उच्चकाशे अत्यन्तं शुशुभे इत्यन्वयः। कथंभूतः। अधरस्य शोणेन रक्तगुणेन शोणिमा यस्य सः। पुनश्च। करकमलयोः सम्पुटे वर्तमानः। यथा अब्जषण्डे कमलसमूहे उत्स्वनो मधुरस्वनः राजहंसः शोभन्ते तथा। षण्डशब्दो मूर्धन्य एव ॥ २॥ जगद्भयस्य कालस्यापि भयमावहति प्रापयतीति तथा तम्। भर्तुर्दर्शने लालासा उत्कण्ठा यासां ताः। प्रत्युघ्ययुः नेतुं जग्मुः ॥ ३ ॥ तत्रेति द्वयम्। तत्र श्रीकृष्णे रवेर्दीपमिव आदृताः सादरा उपनीतवलयः समर्पितोपायनाः प्रजा अवितारं रक्षितारं श्रीकृष्णं प्रोचुः यथाऽर्भकाः पितरमित्युत्तरेणान्वयः। उत्फुल्लं विकसितम् ॥ ४।५ ॥

तदेवाह पञ्चभिः। हे नाथ। ते अङ्घ्रिपङ्कजं नताः स्म। कीदृशम्। क्षेमं संसारान्मोक्षमिच्छतां पुंसां परं परायणं परमं सहायकम्। किञ्च। परेषां ब्रह्मादीनां प्रभुरपि मारणे समर्थोऽपि कालः यत्र न प्रभवेत् न समर्थो भवेत् तत्ते इत्यन्वयः। विरिञ्चो ब्रह्मा वैरिञ्च्यास्तत्पुत्राः सनकादयः तदादिभिर्वन्दितम् ॥ ६ ॥ भवाय[2] क्षेमाय। नोऽस्माकम्। भावनः पालकः। अनुवृत्त्या सेवया। कृतिनः

१—ध्माधातोर्यङ्लुगन्तात्कर्मणि शानच्।
२—भवः क्षेमे च संसारे इति मेदिनी।

अहो सनाथा भवता स्म यद्वयं त्रैविष्टपानामपि दूरदर्शनम् ।
प्रेमस्मितस्निग्धनिरीक्षणाननं पश्येम रूपं तव सर्वसौभगम् ॥८॥
यर्ह्यम्बुजाक्षापससार भो भवान् कुरून्मधून् वाथ सुहृद्दिदृक्षया ।
तत्राब्दकोटिप्रतिमः क्षणो भवेद् रविं विनाक्ष्णोरिव नस्तवाच्युत ॥९॥

इति चोदीरिता वाचः प्रजानां भक्तवत्सलः । शृण्वानोऽनुग्रहं दृष्ट्या वितन्वन् प्राविशत्पुरीम्॥१०
मधुभोजदशार्हार्हकुकुरान्धकवृष्णिभिः । आत्मतुल्यबलैर्गुप्तां नागैर्भोगवतीमिव ॥११॥
सर्वर्तुसर्वविभवपुण्यवृक्षलताश्रमैः । उद्यानोपवनारामैर्वृतपद्माकरश्रियम् ॥१२॥
गोपुरद्वारमार्गेषु कृतकौतुकतोरणाम् । चित्रध्वजपताकाग्रैरन्तः प्रतिहतातपाम् ॥१३॥
सम्मार्जितमहामार्गरथ्यापणकचत्वराम् । सिक्तां गन्धजलैरुप्तां फलपुष्पाक्षताङ्कुरैः ॥१४॥
द्वारि द्वारि गृहाणां च दध्यक्षतफलेक्षुभिः । अलंकृतां पूर्णकुम्भैर्बलिभिर्धूपदीपकैः ॥१५॥
निशम्य प्रेष्ठमायान्तं वसुदेवो महामनाः । अक्रूरश्चोग्रसेनश्च रामश्चाद्भुतविक्रमः ॥१६॥
प्रद्युम्नश्चारुदेष्णश्च साम्बो जाम्बवतीसुतः । प्रहर्षवेगोच्छशितशयनासनभोजनाः ॥१७॥

कृतार्थाः ॥ ७ ॥ भवता हेतुभूतेन वयं सनाथाः स्मः । यत् यतः तव रूपं पश्यामः । कीदृशम् त्रैविष्टपानां देवानामपि दूरदर्शनं दुर्दर्शनम् । पुनश्च । प्रेमपूर्वकं स्मितं, स्निग्धं सरसं निरीक्षणं च यस्मिन् तथाभूतमाननं यस्मिंस्तत् । बहुव्रीहिगर्भितबहुव्रीहिः । सर्वेषु अङ्गेषु सौभगं निरतिशयसौन्दर्यं यस्मिन् ॥ ८ ॥ भो अम्बुजाक्ष ! यर्हि यदा भवान् कुरून् हस्तिनापुरं मधून् नन्दव्रजं[1] न तु मथुराम् अपससार अपहाय जगाम तत्र तदा तव नः त्वदीयानामस्माकम् एकोऽपि क्षणः कोटिवर्षतुल्योऽभवदित्यन्वयः । यद्वा । तवेति द्वितीयार्थे षष्ठी त्वां विनेति तीर्थः ॥९॥ १० ॥ पुरीं वर्णयति पञ्चभिः । मध्वादयः सप्त यादवभेदाः । भोगवतीनाम नागपुरी ॥११॥ आत्मनः श्रीकृष्णस्य । सर्वेषु ऋतुषु वसन्तादिषु सर्वविभवाः पुष्पफलादिसम्पदः येषा ते तथाभूताः पुण्यवृक्षादयो येषु तैः उद्यानादिभिर्वृता युक्ता ये पद्माकराः सरांसि तैः शोभा यस्यास्ताम् । उद्यानेति क्रमेण फलपुष्पक्रीडाप्रधानानि ॥ १२ ॥ गोपुरं नगरद्वारम् । कृतानि कौतुकेन उत्सवेन हेतुना तोरणानि बन्दनमालिका[2] यस्यां ताम् । गरुडादिचिह्नाङ्किता ध्वजा जयप्रदयन्त्राङ्किताः पताका इति भेदः । प्रतिहतो निरस्तः ॥ १३ ॥ सम्यक् मार्जितानि महामार्गादीनि यस्याः । उप्तामितस्ततो विकीर्णाम् । रथ्या इतरमार्गाः ॥ १४ ॥ द्वारि द्वारि प्रतिद्वारम् बलिभिः पूजाद्रव्यैः ॥ १५ ॥ निशम्येति सार्द्धत्रयम् । प्रेष्ठं प्रियतमं श्रीकृष्णमायान्तं निशम्य वसुदेवादयो हृष्टाः सन्तः रथैः तं प्रत्युज्जग्मुः अग्रे नेतुं ययुरिति चतुर्थेनान्वयः । कथंभूताः । प्रहर्षवेगेन आनन्दोद्रेकेण उच्छशितानि सहसा परित्यक्तानि शयनादीनि यैस्ते । सुमङ्गलं स्वस्तिवाचनं तत्सहितैः । आदृताः सादराः । साध्वसं हर्षोद्वेगः त्वरा वा । अत्र उच्छ्वसितेत्यपपाठः शश प्लुतगतौ

१–भगवता प्रतिज्ञातं यद् व्रजं प्रत्यागमनं तदत्रैव सूचितमित्यवधेयम् ।
२–'तोरणोऽस्त्री बहिर्द्वारं तथा बन्दनमालिका' इति कोशात् ।

वारणेन्द्रं पुरस्कृत्य ब्राह्मणैः ससुमङ्गलैः । शङ्खतूर्यनिनादेन ब्रह्मघोषेण चादृताः ।
प्रत्युज्जग्मू रथैर्हृष्टाः प्रणयागतसाध्वसाः ॥१८॥

वारमुख्याश्च शतशो यानैस्तद्दर्शनोत्सुकाः । लसत्कुण्डलनिर्भातकपोलवदनश्रियः ॥१९॥
नटनर्तकगन्धर्वाः सूतमागधवन्दिनः । गायन्ति चोत्तमश्लोकचरितान्यद्भुतानि च ॥२०॥
भगवांस्तत्र बन्धूनां पौराणामनुवर्तिनाम् । यथाविध्युपसङ्गम्य सर्वेषां मानमादधे ॥२१॥
प्रह्वाभिवादनाश्लेषकरस्पर्शस्मितेक्षणैः । आश्वास्य चाश्वपाकेभ्यो वरैश्चाभिमतैर्विभुः ॥२२॥
स्वयं च गुरुभिर्विप्रैः सदारैः स्थविरैरपि । आशीर्भिर्युज्यमानोऽन्यैर्वन्दिभिश्चाविशत्पुरम् ।२३।
राजमार्गं गते कृष्णे द्वारकायाः कुलस्त्रियः । हर्म्याण्यारुरुहुर्विप्र तदीक्षणमहोत्सवाः ॥२४॥
नित्यं निरीक्षमाणानां यदपि द्वारकौकसाम् । नैव तृप्यन्ति हि दृशः श्रियोधामाङ्गमच्युतम्।२५।
श्रियो निवासो यस्योरः पानपात्रं मुखं दृशाम् । बाहवो लोकपालानां सारङ्गाणां पदाम्बुजम् २६

सितातपत्रव्यजनैरुपस्कृतः प्रसूनवर्षैरभिवर्षितः पथि ।
पिशङ्गवासा वनमालया बभौ घनो यथार्कोडुपचापवैद्युतैः ॥२७॥

इति धातुनिर्देशात् ॥ १६ १७ १८ ॥ वारमुख्या[1] नर्तक्यो वेश्याः अपि यानैः प्रत्युज्जग्मुः अभिमुखं जग्मुः । लसद्भिः कुण्डलैर्निर्भाता ये कपोलास्तैः श्रीः शोभा यासां ताः ॥ १९॥ सूताः पौराणिकाः प्रोक्ता मागधा वंशशंसकाः । वन्दिनस्त्वमलप्रज्ञाः प्रस्तावसदृशोक्तयः । गायन्ति चकारात्स्मरन्ति च ॥ २० ॥ भगवान् तत्र तदा बन्धूनां वसुदेवादीनाम् आश्वपाकेभ्यः श्वपाकं चाण्डालमभिव्याप्य सर्वेषां पौराणां च यथाविधि यथोचितं सङ्गम्य मिलित्वा आश्वास्य च मानमादधे सम्मानं चकारेति द्वयोरन्वयः । कैः । प्रह्वादिभिः वरैरभीष्टदानैश्च प्रह्वत्वं शिरसा नतिः । अभिवादनं वाचा नतिः ॥२१।२२॥ गुरुभिः पितामहादिभिः अन्यैरनुक्तैश्च । पुरं द्वारकाम् ॥ २३ ॥ हे विप्राः ! राजमार्गम्[2] । तस्य कृष्णस्येक्षणे महानुत्साहो यासां ताः । हर्म्याणि गृहोपरिभागान् (अटारियां) ॥ २४ ॥ दृशौ नैव तृप्यन्ति अतः आरुरुहुरिति योज्यम् । अच्युतं कीदृशम् । श्रियः सौन्दर्यस्य धाम स्थानभूतमङ्गं यस्य तम् । ओको निवासस्थानम् ॥ २५ ॥ यस्य मुखं दृशां निवासः कथंभूतम् । पानपात्रं सौन्दर्यामृत-पानाय पात्रम् । सारं श्रीकृष्णं गायन्तीति सारङ्गा भक्ताः । तमच्युतमिति पूर्वेणान्वयः ॥ २६ ॥ भगवान् पथि बभौ इत्यन्वयः । सितातपत्रं श्वेतच्छत्रं व्यजने च तैरुपस्कृतोऽलङ्कृतः । युगपत्स-

---

१–वारे द्वारे मुखं यासां ताः । पृषोदरादित्वान्मुखस्य मुख्यादेशः । यद्वा वराणां समूहो वारं तदेव मुख्यं प्रधानं यासां ताः ।

२–यस्मिन् मार्गे प्रगच्छन्ति पुरुषाः सचतुष्पदाः । अवारिता अहोरात्रं राजमार्गः स उच्यते इति कात्यायनः ।

प्रविष्टस्तु गृहं पित्रोः परिष्वक्तः स्वमातृभिः। ववन्दे शिरसा सप्त देवकीप्रमुखा मुदा ॥२८॥
ताः पुत्रमङ्कमारोप्य स्नेहस्नुतपयोधराः। हर्षविह्वलितात्मानः सिषिचुर्नेत्रजैर्जलैः ॥२९॥
अथाविशत्स्वभवनं सर्वकाममनुत्तमम्। प्रासादा यत्र पत्नीनां सहस्राणि च षोडश ॥३०॥

पत्न्यः पतिं प्रोष्य गृहानुपागतं विलोक्य संजातमनोमहोत्सवाः।
उत्तस्थुरारात्सहसाऽऽसनाशयात् साकं व्रतैर्व्रीडितलोचनाननाः ॥३१॥

तमात्मजैर्दृष्टिभिरन्तरात्मना दुरन्तभावाः परिरेभिरे पतिम्।
निरुद्धमप्यास्रवदम्बु नेत्रयोर्विलज्जतीनां भृगुवर्य वैक्लवात् ॥३२॥

यद्यप्यसौ पार्श्वगतो रहोगतस्तथापि तस्याङ्घ्रियुगं नवं नवम्।
पदे पदे का विरमेत तत्पदाच्चलापि यच्छ्रीर्न जहाति कर्हिचित् ॥३३॥

एवं नृपाणां क्षितिभारजन्मनामक्षौहिणीभिः परिवृत्ततेजसाम्।
विधाय वैरं श्वसनो यथानलं मिथो वधेनोपरतो निरायुधः ॥३४॥

मुदितैरर्कादिभिर्यथा घनः शोभते तद्वत्। घनः कृष्णस्योपमानम्। अर्कश्छत्रस्य। नक्षत्राणि पुष्पवृष्टेः। चन्द्रः चामरयजनयोः। चापं वनमालायाः विद्युत्तेजः पिशङ्गवाससोः अभूतोपमेयम्[1] ॥ २७ ॥ परिष्वक्त आलिङ्गितः। सप्तेत्युपलक्षणमष्टादशापि ॥ २८।२९ ॥ सर्वे कामा अभिलषितपदार्था यस्मिंस्तत्। अनुत्तमं सर्वोत्तमम्। चकारादष्टोत्तरशताधिकानि ॥ ३० ॥ देशान्तरे उषित्वा गृहानुपागतं पतिमारात् दूरादेव विलोक्य आसनादाशयाच्च सहसा झटित्येवोत्तस्थुरित्यन्वयः तत्र आसनादुत्थानं देहेन तत्तु प्रसिद्धमेव। आशयादन्तःकरणादुत्थानं दर्शनोत्कण्ठात्यागरूपम्। व्रतैः साकमिति हास्य-क्रीडावर्जनादिनियमाः तेभ्योऽपि उत्तस्थुः तेपि त्यक्ताइत्यर्थः। उत्सव आलिङ्गनस्पृहा ॥ ३१ ॥ हे भृगुवर्य शौनक ! तमायान्तं पतिं दर्शनात्पूर्वम् अन्तरात्मना मनसा तदनन्तरं दृष्टिभिः ततः समीपभागत-मात्मजैः पुत्रद्वारा आलिङ्गितवत्यः। दुरन्तभावा अगाधस्नेहाः। निरुद्धमपि अम्बु अश्रु आस्रवत् ईषत्सुस्राव। वैक्लवात् पारवश्यात् ॥ ३२ ॥ रहोगतः सन् सदा समीपस्थः तथापि प्रतिक्षणं नवनवायमानमेव भवति अतस्तत्पदात्का विरमेत न कापीत्यन्वयः ॥ ३३ ॥ परिवृत्तं सर्वतः प्रसृतं तेजः प्रभावो येषां तेषां मिथोवधेन उपरराम यः स रेभे इत्युत्तरेणान्वयः। कूटः समूहः। प्राकृतः स्त्रीवश्यः। ॥ ३४।३५ ॥ दाम वन्धनसाधनभूता रज्जुः तदुल्लङ्घ्य वर्तते इत्युद्दामो निर्वन्धनः त्यक्तमयादिवन्धनो अगाध इत्यर्थः यो भावः प्रेमा तस्य पिशुनः सूचकः योऽमलः निष्कपटो वल्गुहासः सुन्दरहासः क्रीडावलोकश्च ताभ्यां निहतो मदनः जगद्विजयी कामोऽपि संमुह्य चापमजहात् ता एवं

१—यदि घनस्योपरि सूर्यविम्वमुभयतश्चन्द्रौ सर्वतो नक्षत्राणि मध्ये च मिलितं चापद्वयं स्थिरं विद्युत्तेजश्च यदि भवेत्तर्हि स घनो यथा भाति तथा हरिर्बभाविति भावः

स एष नरलोकेऽस्मिन्नवतीर्णः स्वमायया । रेमे स्त्रीरत्नकूटस्थो भगवान् प्राकृतो यथा ।।३५।।
उद्दामभावपिशुनामलवल्गुहासव्रीडावलोकनिहतो मदनोऽपि यासाम् ।
सम्मुह्य चापमजहात्प्रमदोत्तमास्ता यस्येन्द्रियं विमथितुं कुहकैर्न शेकुः ।।३६।।
तमयं मन्यते लोको ह्यसङ्गमपि सङ्गिनम् । आत्मौपम्येन मनुजं व्यापृण्वानं यतोऽबुधः ।।३७।।
एतदीशनमीशस्य प्रकृतिस्थोऽपि तद्गुणैः । न युज्यते सदाऽऽत्मस्थैर्यथा बुद्धिस्तदाश्रया ।।३८।।
तं मेनिरेऽबला मूढाः स्त्रैणं चानुव्रतं रहः । अप्रमाणविदो भर्तुरीश्वरं मतयो यथा ।।३९।।

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां प्रथमस्कन्धे नैमिषीयोपाख्याने श्रीकृष्णद्वारकाप्रवेशो-नामैकादशोऽध्यायः ।।११।।

प्रमावाः पत्न्यो यस्येन्द्रियं मनः क्षोभयितुं न शेकुस्तं श्रीकृष्णमित्युत्तरेणान्वयः । कुहकैः हावभाव-कटाक्षादिभिः । केचित्तु अकारप्रश्लेषेण अमदनः शिवोऽपीति व्याचक्षते तत्तु भगवत्पत्नीनां महत्त्वं ख्यापयितुं कौतुकवशान्माहेश्वरी लीलेयं न तु तन्मोहनमुपयुज्येत, मोहिनीचरित्रे भगवतैव स्वैरं[1]-शब्दोपादेन तन्निराकृतत्वादित्यवधेयम् । आत्मौपम्येन स्वदृष्टान्तेन सङ्गिनं विषयासक्तं मन्यते । व्यापृण्वानं[2] पारजातार्थं व्यापारवन्तम् ॥ ३६।३७ ॥ तद्गुणैः रागद्वेषादिभिर्न युज्यते एतदेशेशस्य ईशनमैश्वर्यम् । यथाऽऽत्माश्रयाऽपि बुद्धिः आत्मस्थैरानन्दादिभिर्नेत्यन्वयः । सदा कदाचिदपि ॥ ३८ ॥ यथा यथा तासां मतयः कल्पनास्तथा तथा स्त्रैणं स्त्रीलम्पटं रह एकान्ते अनुव्रतं स्ववशवर्तिनं च मेनिरे । यतः अप्रमाणविदः स्वरूपानभिज्ञाः ॥ ३९ ॥

इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धे गूढार्थदीपिन्यामेकादशोऽध्यायः ।

१—यन्मे स्त्रीरूपया स्वैरं मोहितोऽप्यङ्ग मायया भा ८ स्कं अ० १२-३८ । स्वैरं स्वेच्छया ।
२—पृ प्रीतौ स्वादिः चानश् ।

अथ द्वादशोऽध्यायः

शौनक उवाच

अश्वत्थाम्नोपसृष्टेन ब्रह्मशीर्ष्णोरुतेजसा । उत्तराया हतो गर्भ ईशेनाजीवितः पुनः ।।१।।
तस्य जन्म महाबुद्धेः कर्माणि च महात्मनः । निधनं च यथैवासीत्स प्रेत्य गतवान् यथा ।।२।।

द्वादशे वर्ण्यते सम्यक् परीक्षिज्जन्म सोत्सवम् ।
तत्र विप्रैर्मुदा तस्य भाविवृत्तं च सूचितम् ।।१।।

उपसृष्टेन प्रक्षिप्तेन । ब्रह्मशीर्ष्णा ब्रह्मास्त्रेण ।।१।। तस्येति द्वयम् । स परीक्षित् प्रेत्य देहं त्यक्त्वा गतवान् कं लोकमिति शेषः तदिदं सर्वम् । यदि मन्यसे तर्हि नोऽस्माकं ब्रूहीत्यन्वयः ।

तदिदं श्रोतुमिच्छामो गदितुं यदि मन्यसे । ब्रूहि नः श्रद्दधानानां यस्य ज्ञानमदाच्छुकः ॥३॥

सूत उवाच

अपीपलद्धर्मराजः पितृवद् रञ्जयन् प्रजाः । निःस्पृहः सर्वकामेभ्यः कृष्णपादाब्जसेवया ॥४॥
सम्पदः क्रतवो लोका महिषी भ्रातरो मही । जम्बूद्वीपाधिपत्यं च यशश्च त्रिदिवं गतम् ॥५॥
किं ते कामाः सुरस्पार्हा मुकुन्दमनसो द्विजाः । अधिजह्रुर्मुदं राज्ञः क्षुधितस्य यथेतरे ॥६॥
मातुर्गर्भगतो वीरः स तदा भृगुनन्दन । ददर्श पुरुषं कंचिद्दह्यमानोऽस्त्रतेजसा ॥७॥
अङ्गुष्ठमात्रममलं स्फुरत्पुरटमौलिनम् । अपीच्यदर्शनं श्यामं तडिद्वाससमच्युतम् ॥८॥
श्रीमद्दीर्घचतुर्बाहुं तप्तकाञ्चनकुण्डलम् । क्षतजाक्षं गदापाणिमात्मनः सर्वतोदिशम् ।
परिभ्रमन्तमुल्काभां भ्रामयन्तं गदां मुहुः ॥९॥
अस्त्रतेजः स्वगदया नीहारमिव गोपतिः । विधमन्तं संनिकर्षे पर्यैक्षत क इत्यसौ ॥१०॥
विधूय तदमेयात्मा भगवान् धर्मगुब् विभुः । मिषतो दशमास्यस्य तत्रैवान्तर्दधे हरिः ॥११॥
ततः सर्वगुणोदर्के सानुकूलग्रहोदये । जज्ञे वंशधरः पाण्डोर्भूयः पाण्डुरिवौजसा ॥१२॥
तस्य प्रीतमना राजा विप्रैर्धौम्यकृपादिभिः । जातकं कारयामास वाचयित्वा च मङ्गलम् ॥१३॥
हिरण्यं गां महीं ग्रामान् हस्त्यश्वान्नृपतिर्वरान् । प्रादात्स्वन्नं च विप्रेभ्यः प्रजातीर्थे स तीर्थवित्
तमूचुर्ब्राह्मणास्तुष्टा राजानं प्रश्रयान्वितम् । एष ह्यस्मिन् प्रजातन्तौ पुरूणां पौरवर्षभ ॥१५॥

यस्य यस्मै परीक्षिते । शेषे षष्ठी ॥२।३॥ प्रजा अपत्यस्थानीयाः अपीपलत् अपालयत् । कामेभ्यः ऐहिकामुष्मिकेभ्यः ॥४॥ सम्पद इति द्वयम् । सुराणामपि स्पृहा येषु ते कामाः भोगा किं राज्ञो मुदमधिजह्रुः कृतवन्तः नैवेत्यन्वयः । इतरे स्रक्चन्दनादयो मुदं न कुर्वन्ति तद्वत् । स्पृहैव स्पार्हः स्वार्थेऽण् ॥५।६॥ मातुरिति सार्द्धचतुष्कम् । हे भृगुनन्दन शौनक । स्फुरन् पुरटस्य सुवर्णस्य मौलिः मुकुटं यस्येति । व्रीह्यादित्वादिनिः । दृश्यते इति दर्शनं रूपं यस्य । 'अपीच्यं त्वतिसुन्दरे' इत्यभिधानात् । क्षतजवत् रक्ते अक्षिणी यस्य । रक्षार्थं स्वयं भ्रमन्तं गदां च भ्रामयन्तम् । उल्कस्याङ्गारस्येवाभा यस्य । यद्वा । उल्कायाः निर्गतज्वालायाः इव आभा यस्य गोपतिः सूर्यः । विधमन्तं नाशयन्तम् । एवंभूतं पुरुषं दृष्ट्वा असो क इति पर्यैक्षत वितर्कितवान् ॥७।८।९।१०॥ तत् अस्त्रतेजः विधूय निरस्य । धर्मं गोपायतीति धर्मगुप् धर्मगुपो राजानो वा तेषां प्रभुः । मिषतः पश्यतः सतः ॥११॥ सर्वे गुणा एव उदर्काः उत्तरफलानि यस्मिन् । अनुकूलैरुच्चैर्ग्रहैः सहिते उदये लग्ने । वंशधरः वंशप्रवर्तकः तमुत्प्रेक्षते । ओजसा सामर्थ्येन पाण्डुरिवेति ॥१२॥ जातकं कर्म । मङ्गलं पुण्याहम् ॥१३॥ तीर्थं शास्त्रं पात्रं वा वेत्तीति । प्रजातीर्थे[1] पुत्रोत्पत्तिपुण्यकाले । वरान् दक्षिणाः । वरो वै दक्षिणा इति श्रुतेः । स्वन्नं मिष्टान्नम् प्रादात् नालच्छेदात्पूर्वम् ॥ १४ ॥ तमूचुरित्यर्द्धम् । प्रश्रयो विनयः ॥ १५ ॥

१—'पुत्रे जाते व्यतीपाते दत्तं भवति चाक्षयम्' इति स्मृतेः ।

दैवेनाप्रतिघातेन शुक्ले संस्थामुपेयुषि । रातो वोऽनुग्रहार्थाय विष्णुना प्रभविष्णुना ॥१६॥
तस्मान्नाम्ना विष्णुरात इति लोके बृहच्छ्रवाः । भविष्यति न संदेहो महाभागवतो महान् ॥१७॥

युधिष्ठिर उवाच

अप्येष वंश्यान् राजर्षीन् पुण्यश्लोकान् महात्मनः । अनुवर्तिता स्विद्यशसा साधुवादेन सत्तमाः

ब्राह्मणा ऊचुः

पार्थ प्रजाविता साक्षादिक्ष्वाकुरिव मानवः । ब्रह्मण्यः सत्यसंधश्च रामो दाशरथिर्यथा ॥१९॥
एष दाता शरण्यश्च यथा ह्यौशीनरः शिबिः । यशो वितनिता स्वानां दौष्यन्तिरिव यज्वनाम्२०
धन्विनामग्रणीरेष तुल्यश्चार्जुनयोर्द्वयोः । हुताश इव दुर्धर्षः समुद्र इव दुस्तरः ॥२१॥
मृगेन्द्र इव विक्रान्तो निषेव्यो हिमवानिव । तितिक्षुर्वसुधेवासौ सहिष्णुः पितराविव ॥२२॥
पितामहसमः साम्ये प्रसादे गिरिशोपमः । आश्रयः सर्वभूतानां यथा देवो रमाश्रयः ॥२३॥
सर्वसद्गुणमाहात्म्य एष कृष्णमनुव्रतः । रन्तिदेव इवोदारो ययातिरिव धार्मिकः ॥२४॥
धृत्या बलिसमः कृष्णे प्रह्लाद इव सद्ग्रहः । आहर्तैषोऽश्वमेधानां वृद्धानां पर्युपासकः ॥२५॥
राजर्षीणां जनयिता शास्ता चोत्पथगामिनाम् । निग्रहीता कलेरेष भुवो धर्मस्य कारणात् ।२६।
तक्षकादात्मनो मृत्युं द्विजपुत्रोपसर्जितात् । प्रपत्स्यत उपश्रुत्य मुक्तसङ्गः पदं हरेः ॥२७॥
जिज्ञासितात्मयाथात्म्यो मुनेर्व्याससुतादसौ । हित्वेदं नृप गङ्गायां यास्यत्यद्धाऽकुतोभयम् ।२८।
इति राज्ञ उपादिश्य विप्रा जातककोविदाः । लब्धापचितयः सर्वे प्रतिजग्मुः स्वकान् गृहान्।२९।
स एष लोके विख्यातः परीक्षिदिति यत्प्रभुः । गर्भे दृष्टमनुध्यायन् परीक्षेत नरेष्विह ॥३०॥

एष इति सार्द्धद्वयम् । पुरूणां भवतां प्रजाविस्तारनिमित्ते शुक्ले निर्दोषे गर्भपिण्डे संस्थामुपेयुषि नाशं प्राप्ते सति हि यस्मात् एष बालो विष्णुना रातो दत्तः रक्षितः तस्मादित्यन्वयः । श्रवः कीर्तिः ॥१६।१७॥ अपिस्विदिति प्रश्ने । हे सत्तमाः ! साधूनां सतां वादाः प्रशंसावाक्यानि यस्मिंस्तेन यशसा अनुवर्तिष्यते किं न वा ॥१८॥ हे पार्थ ! प्रजानामविता रक्षकः । मानवो मनुपुत्रः संधा प्रतिज्ञा ॥१९॥ औशीनरः उशीनरपुत्रः । दौष्यन्तिः दुष्यन्तपुत्रो भरतः ॥२०॥ द्वयोः अर्जुनकार्तवीर्ययोः । दुर्धर्षः दुःसहः । दुस्तरोऽनुल्लङ्घितशासनः ॥२१॥ विक्रान्तः पराक्रमी । कर्तरि क्तः । तितिक्षुः क्षमावान् ॥२२॥ पितामहो ब्रह्मा । साम्ये सर्वत्र द्वेषाभावे ॥२३॥ सर्वैः पूर्वोक्तैः सद्गुणैर्यन्माहात्म्यमुत्कर्षस्तदर्थं कृष्णमनुव्रतः । तादर्थ्ये सप्तमी । 'चर्मणि द्वीपिनं हन्तीति' वत् ॥२४॥ गृह्णातीति ग्रहो भक्तिः सती भक्तिर्यस्य स तथोक्तः इति तीर्थः । आहर्ता कर्ता ॥२५॥ धर्मस्य च कारणात् । उत्पथः पाखण्डमार्गः ॥२६॥ द्विजपुत्रः शमीकपुत्रः शृङ्गी तेन उपसर्जितात् प्रेरितात् । मृत्युमुपश्रुत्य विरक्तः सन् पदं प्राप्स्यति ॥२७॥ जिज्ञासितं विचारितं निर्णीतमात्मनो यथार्थस्वरूपं येन सः इदं शरीरम् । अद्धा निश्चयेन । निर्भयं पदम् ॥२८॥ जातके ज्योतिःशास्त्रे निपुणाः । लब्धा अपचितिः पूजा दक्षिणा यैस्ते ॥२९॥ नरेषु परीक्षेत विचारयेत्

स राजपुत्रो ववृधे आशु शुक्ल इवोडुपः । आपूर्यमाणः पितृभिः काष्ठाभिरिव सोऽन्वहम् ॥३१॥
यक्ष्यमाणोऽश्वमेधेन ज्ञातिद्रोहजिहासया । राजाऽलब्धधनो दध्यावन्यत्र करदण्डयोः ॥३२॥
तदभिप्रेतमालक्ष्य भ्रातरोऽच्युतचोदिताः । धनं प्रहीणमाजह्रुरुदीच्यां दिशि भूरिशः ॥३३॥
तेन सम्भृतसम्भारो धर्मपुत्रो युधिष्ठिरः । वाजिमेधैस्त्रिभिर्भीतो यज्ञैः समयजद्धरिम् ॥३४॥
आहूतो भगवान् राज्ञा याजयित्वा द्विजैर्नृपम् । उवास कतिचिन्मासान् सुहृदां प्रियकाम्यया ३५
ततो राज्ञाभ्यनुज्ञातः कृष्णया सह बन्धुभिः । ययौ द्वारवतीं ब्रह्मन् सार्जुनो यदुभिर्वृतः ॥३६॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां प्रथमस्कन्धे नैमिषीयोपाख्याने परीक्षिज्जन्माद्युत्कर्षो नाम द्वादशोऽध्यायः ॥ १२ ॥

अतः परीक्षित् [1]इत्यन्वर्थं नाम जातम् ॥३०॥ अत्र इवद्वयं क्रमेण यथातथार्थे । शुक्ले शुक्लपक्षे स प्रसिद्ध उडुपश्चन्द्रो यथा काष्ठाभिः कलाभिरापूर्यमाणो वर्धते तथा स परीक्षित् पितृभिर्युधिष्ठिरादिभिश्चतुष्षष्टिकलाभिरापूर्यमाणोऽन्वहं वर्धते इत्यन्वयः ॥३१॥ ज्ञातिद्रोहो वधजन्यपातकम् । अन्यत्र विना । राजा युधिष्ठिरः यक्ष्यमाणो यष्टुमिच्छन् ॥३२॥ तस्य युधिष्ठिरस्य अभिप्रेतमभिप्रायम् 'आलक्ष्य ज्ञात्वा । उदीच्यां दिशि मरुत्तस्य राज्ञो यज्ञे प्रहीणं त्यक्तं सुवर्णपात्रादिकमाजह्रुः आनीतवन्तः ॥३३॥ तेन आनीतधनेन । संभृतसंभारः सम्पादितसामग्रीकः । त्रिभिरिति । त्रिगुणदक्षिणादानादेकस्यैव यज्ञस्य त्रित्वं ज्ञेयमिति ॥३४॥ आहूतेति पद्यद्वयं प्रक्षिप्तं प्रस्थानस्य पूर्वमेवोक्तत्वात् ।

इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धे गूढार्थदीपिन्यां द्वादशोऽध्यायः ।

अथ त्रयोदशोऽध्यायः

सूत उवाच

विदुरस्तीर्थयात्रायां मैत्रेयादात्मनो गतिम् । ज्ञात्वागाद्धास्तिनपुरं तयावाप्तविवित्सितः ॥१॥

विदुरोक्त्या वनं यातो धृतराष्ट्रस्त्रयोदशे ।
तन्मृत्यौ भूपतेः शोको नारदेन निवार्यते ॥१॥

आत्मनो जीवस्य गति गम्यं श्रीकृष्णम् गतिं स्वरूपं वा । तया आत्मगत्या अवाप्तं प्राप्तं

१—परिपूर्वादीक्षते, 'हसृरुहियुषिभ्य' इत्यौणादिकसूत्रे ईक्षतेर्ग्रहणाभावेऽपि बाहुलकादित्प्रत्यये हरित् सरिदादिवत् परीक्षिच्छब्दः सिद्ध्यति ।

यावतः कृतवान् प्रश्नान् क्षत्ता कौषारवाग्रतः । जातैकभक्तिर्गोविन्दे तेभ्यश्चोपरराम ह ॥२॥
तं बन्धुमागतं दृष्ट्वा धर्मपुत्रः सहानुजः । धृतराष्ट्रो युयुत्सुश्च सूतः शारद्वतः पृथा ॥३॥
गान्धारी द्रौपदी ब्रह्मन् सुभद्रा चोत्तरा कृपी । अन्याश्च जामयः पाण्डोर्ज्ञातयः ससुताः स्त्रियः ॥४॥
प्रत्युज्जग्मुः प्रहर्षेण प्राणं तन्व इवागतम् । अभिसंगम्य विधिवत् परिष्वङ्गाभिवादनैः ॥५॥
मुमुचुः प्रेमबाष्पौघं विरहौत्कण्ठ्यकातराः । राजा तमर्हयांचक्रे कृतासनपरिग्रहम् ॥६॥
तं भुक्तवन्तं विश्रान्तमासीनं सुखमासने । प्रश्रयावनतो राजा प्राह तेषां च शृण्वताम् ॥७॥

युधिष्ठिर उवाच

अपि स्मरथ नो युष्मत्पक्षच्छायासमेधितान् । विपद्गणाद्विषाग्न्यादेर्मोचिता यत् समातृकाः ॥८॥
कया वृत्त्या वर्तितं वश्चरद्भिः क्षितिमण्डलम् । तीर्थानि क्षेत्रमुख्यानि सेवितानीह भूतले ॥९॥
भवद्विधा भागवतास्तीर्थभूताः स्वयं विभो । तीर्थीकुर्वन्ति तीर्थानि स्वान्तस्थेन गदाभृता ॥१०॥
अपि नः सुहृदस्तात बान्धवाः कृष्णदेवताः । दृष्टाः श्रुता वा यदवः स्वपुर्यां सुखमासते ॥११॥
इत्युक्तो धर्मराजेन सर्वं तत् समवर्णयत् । यथानुभूतं क्रमशो विना यदुकुलक्षयम् ॥१२॥
नन्वप्रियं दुर्विषहं नृणां स्वयमुपस्थितम् । नावेदयत्सकरुणो दुःखितान् द्रष्टुमक्षमः ॥१३॥
कंचित्कालमथावात्सीत्सत्कृतो देववत्सुखम् । भ्रातुर्ज्येष्ठस्य श्रेयस्कृत्सर्वेषां प्रीतिमावहन् ॥१४॥
अबिभ्रदर्यमा दण्डं यथावदघकारिषु । यावद्दधार शूद्रत्वं शापाद् वर्षशतं यमः ॥१५॥

विवित्सितं प्राप्तुमिष्टं येन सः । 'विद्लृ लाभे' इत्यस्मात् ॥१॥ क्षत्ता[1] दासीपुत्रो विदुरः । कुषारोः पुत्रः कौषारवो मैत्रेयः । तेभ्यः प्रश्नेभ्य उपरतोऽभूत् । ह तृप्तौ । च एवार्थे ॥२॥ तमिति सार्द्धद्वयम् । तं बन्धु विदुरमागतं दृष्ट्वा सर्वेऽपि प्रत्युज्जग्मुः सम्मुखमाजग्मुः । युयुत्सुः धृतराष्ट्राद्वैश्यायां जातः । सूतः सञ्जयः । शारद्वतः कृपः । कृपी द्रोणपत्नी । ज्ञातयः ज्ञातिभार्याः । अन्याश्च जामयोऽन्तःपुरस्त्रियः । प्राणमागतं तन्वः करचरणादय इव ॥३।४॥ अभिसङ्गम्य मिलित्वा । कातराः परवशाः । वाष्पौघम् अश्रुप्रवाहम् ॥५॥ राजेत्यर्द्धम् । कृत आसनस्य परिग्रहः स्वीकारो येन तं विदुरम् ॥६॥ शृण्वतां सताम् ॥७॥ अपीति प्रश्ने । युष्माकं पक्षपातच्छायया समेधितान् वर्धितान् नोऽस्मान् अपि किम् । यत् यस्मात् ॥८॥ चरद्भिः विचरद्भिः वो युष्माभिः इत्यर्थे अव्ययमेतत् । वृत्त्या जीविकया । वर्तितं निर्वाहः कृतः ॥९॥ स्वान्तं हृदयम् । तीर्थीकुर्वन्ति पवित्रीकुर्वन्ति ॥१०॥ अपि किम् क्वापि दृष्टाः श्रुता वा । स्वपुर्यां द्वारकायाम् ॥११॥ इत्युक्तो विदुरः ॥१२॥ अप्रियं स्वयमुपस्थितं भवत्येव प्रारब्धवशादतो नावेदयदित्यन्वयः ॥१३॥ देववत्सत्कृतः सुखमवात्सीदित्यन्वयः । भ्रातुर्धृतराष्ट्रस्य श्रेयस्कृत् तत्त्वमुपदिशन् सन् । आवहन् सम्पादयन् ॥१४॥ शापात् माण्डव्यशापात् यावत् शूद्रत्वं दधार

१–'क्षत्ता शूद्रात्क्षत्रियाजे भुजिष्यातनयेऽपि स्यात्' इति मेदिनी ।

युधिष्ठिरो लब्धराज्यो दृष्ट्वा पौत्रं कुलंधरम् । भ्रातृभिर्लोकपालाभैर्मुमुदे परया श्रिया ॥१६॥
एवं गृहेषु सक्तानां प्रमत्तानां तदीहया । अत्यक्रामदविज्ञातः कालः परमदुस्तरः ॥१७॥
विदुरस्तदभिप्रेत्य धृतराष्ट्रमभाषत । राजन्निर्गम्यतां शीघ्रं पश्येदं भयमागतम् ॥१८॥
प्रतिक्रिया न यस्येह कुतश्चित्कर्हिचित्प्रभो । स एव भगवान् कालः सर्वेषां नः समागतः॥१९॥
येन चैवाभिपन्नोऽयं प्राणैः प्रियतमैरपि । जनः सद्यो वियुज्येत किमुतान्यैर्धनादिभिः ॥२०॥
पितृभ्रातृसुहृत्पुत्रा हतास्ते विगतं वयः । आत्मा च जरया ग्रस्तः परगेहमुपाससे ॥२१॥
अहो महीयसी जन्तोर्जीविताशा यया भवान् । भीमापवर्जितं पिण्डमादत्ते गृहपालवत् ॥२२॥
अग्निर्निसृष्टो दत्तश्च गरो दाराश्च दूषिताः । हृतं क्षेत्रं धनं येषां तद्दत्तैरसुभिः कियत् ॥२३॥
तस्यापि तव देहोऽयं कृपणस्य जिजीविषोः । परैत्यनिच्छतो जीर्णो जरया वाससी इव ॥२४॥
गतस्वार्थमिमं देहं विरक्तो मुक्तबन्धनः । अविज्ञातगतिर्जह्यात्स वै धीर उदाहृतः ॥२५॥
यः स्वकात्परतो वेह जातनिर्वेद आत्मवान् । हृदि कृत्वा हरिं गेहात्प्रव्रजेत्स नरोत्तमः ॥२६॥
अथोदीचीं दिशं यातु स्वैरज्ञातगतिर्भवान् । इतोऽर्वाक्प्रायशः कालः पुंसां गुणविकर्षणः ॥२७॥

एवं राजा विदुरेणानुजेन प्रज्ञाचक्षुर्बोधितो ह्याजमीढः ।
छित्त्वा स्वेषु स्नेहपाशान् द्रढिम्नो निश्चक्राम भ्रातृसंदर्शिताध्वा ॥२८॥

तावत् अर्यमा नाम सूर्यः पापिषु दण्डमभिभ्र दित्यन्वयः ॥१५॥ पौत्रं परीक्षितम् कुलंधरं वंशप्रवर्तकम् । लोकपाला इन्द्रादयस्तत्सदृशैः ॥१६॥ तदीहया गार्हीयचेष्टया प्रमत्तानां प्रमत्तैरविज्ञातः । कर्तरि षष्ठी । अत्यक्रामत् व्यतीतः । परमैर्ब्रह्मादिभिरपि दुर्लङ्घ्यः ॥१७॥ तत् कालातिक्रमणम् । ज्ञात्वा । इदं शिरसि आगतं भयं मृत्युरूपम् ॥१८॥ यस्य प्रतिक्रिया प्रतीकारो नास्ति स एष विनाशकालः इत्यन्वयः ॥१९॥ येन कालेन अभिपन्नो ग्रस्तोऽयं जनः । अन्यैर्वियुज्येतेति किमुत वक्तव्यम् ॥२०॥ वयो यौवनं । आत्मा देहश्च । तथापि त्वं परगेहं शत्रुगृहमुपाससे प्रतीक्षसे जीवनार्थमिति धिक् धिक् ॥२१॥ भीमेन अपवर्जितं[1] सावज्ञं दत्तं पिण्डं ग्रासरूपं श्वेव आदत्ते भुङ्क्ते ॥२२॥ येषां विनाशाय त्वया अग्निर्निसृष्टः प्रक्षिप्तः । लाक्षाभवने विषदानाद्या अनेकेऽपराधाश्च कृताः तद्दत्तान्नैरसुभिः प्राणधारणैः कियत्प्रयोजनं लज्जाकरत्वान्मृतिरेव गरीयसी अतो निर्गम्यतामित्यन्वयः ॥२३॥ तस्यापि एवं दैन्यमनुभवतोऽपि अनिच्छतोपि तव देहः परैति अपगच्छति[1] यतो जरया जीर्णः ॥२४॥ गतः स्वार्थो धर्मादिपुरुषार्थो यस्मात्तमिमं देहं यो जह्यात्स वै स एव धीर इत्यन्वयः । क्व गत इति न केनापि विज्ञाता गतिर्यस्य स तथाभूतः सन् ॥३५॥ परतोऽन्योपदेशाद्वा जातनिर्वेद उत्पन्नवैराग्यः । नरोत्तमः अन्यथा नराधमः ॥२६॥ अथ अतः स्वैः पाण्डवैरपि । इतोऽर्वाक् इतोऽनन्तरं कलिकालः गुणान् धैर्यादीन् विकर्षति आच्छिनत्तीति गुणविनाशक एष्यतीति ॥२७॥ एवं विदुरेण बोधितो राजा धृतराष्ट्रः स्वेषु पुत्रेषु स्नेहपाशान् छित्त्वा गृहान्निश्चक्रामेत्यन्वयः । द्रढिम्नः दृढतरान् । आजमीढः

१—भीमापवर्जितमित्येव पाठः श्रीधरसम्मतः ।

पतिं प्रयान्तं सुबलस्य पुत्री पतिव्रता चानुजगाम साध्वी ।
हिमालयं न्यस्तदण्डप्रहर्षं मनस्विनामिव सत्सम्प्रहारः ॥२९॥
अजातशत्रुः कृतमैत्रो हुताग्निर्विप्रान्नत्वा तिलगोभूमिरुक्मैः ।
गृहं प्रविष्टो गुरुवन्दनाय न चापश्यत्पितरौ सौबलीं च ॥३०॥

तत्र सञ्जयमासीनं पप्रच्छोद्विग्नमानसः । गावल्गणे क्व नस्तातो वृद्धो हीनश्च नेत्रयोः ॥३१॥

अम्बा च हतपुत्राऽऽर्ता पितृव्यः क्व गतः सुहृत् । अपि मय्यकृतप्रज्ञे हतबन्धुः स भार्यया ।
आशंसमानः शमलं गङ्गायां दुःखितोऽपतत् ॥३२॥

पितर्युपरते पाण्डौ सर्वान्नः सुहृदः शिशून् । अरक्षतां व्यसनतः पितृव्यौ क्व गतावितः ॥३३॥

सूत उवाच

कृपया स्नेहवैक्लव्यात्सूतो विरहकर्शितः । आत्मेश्वरमचक्षाणो न प्रत्याहातिपीडितः ॥३४॥

विमृज्याश्रूणि पाणिभ्यां विष्टभ्यात्मानमात्मना । अजातशत्रुं प्रत्यूचे प्रभोः पादावनुस्मरन् ॥३५॥

सञ्जय उवाच

नाहं वेद व्यवसितं पित्रोर्वः कुलनन्दन । गान्धार्या वा महाबाहो मुषितोऽस्मि महात्मभिः ॥३६॥

अथाजगाम भगवान्नारदः सहतुम्बुरुः । प्रत्युत्थायाभिवाद्याह सानुजोऽभ्यर्चयन्निव ॥३७॥

युधिष्ठिर उवाच

नाहं वेद गतिं पित्रोर्भगवन् क्व गतावितः । अम्बा वा हतपुत्राऽऽर्ता क्व गता च तपस्विनी॥३८

अजमीढवंशोद्भवः । अध्वा निवृत्तिमार्गः ॥२८॥ सुबलस्य पुत्री गान्धारी साध्वी सुशीला च हिमालयं प्रयान्तं पतिमनुजगाम चकारात्कुन्ती चानुजगामेत्यवधेयम् । महाभारते तथैवोक्तत्वात् । न्यस्तदण्डानां त्यक्तभूतद्रोहाणां प्रहर्षो यस्मिस्तम् । केषां क इव शूराणां सत्सम्प्रहारो युद्धमिव । पतिव्रता[1] ॥२९॥ कृतं मित्रं सूर्यदेवताकं सन्ध्यावन्दनादि कृत्यं येन सः । युधिष्ठिरः रुक्मैः सुवर्णैः । गुरूणां पूज्यानां धृतराष्ट्रादीनाम् । पितरौ विदुरधृतराष्ट्रौ । चात्कुन्तीं च ॥३०॥ तत्रेति सार्द्धम् । तत्र गृहे हे गावल्गणे ! गवल्गणपुत्र सञ्जय । नेत्रयोः नेत्राभ्याम् । तृतीयार्थे षष्ठी । तातः धृतराष्ट्रः अम्बा गान्धारी ॥३१॥ अकृतप्रज्ञे मन्दमतौ मपि शमलमपराधमाशङ्कमानः । भार्यया सह ॥३२॥ उपरते मृते सति । यौ अरक्षतां तौ इतः स्थानात् । व्यसनतः विविधकष्टतः ॥३३॥ आत्मेश्वरं धृतराष्ट्रमपश्यन् । स्नेहवैक्लव्यात् अतिपीडित इत्यन्वयः । वैक्लव्यं विकलता । सूतः सञ्जयः ॥३४॥ आत्मना बुद्धया आत्मानं मनः विष्टभ्य स्थिरीकृत्य । प्रभोः धृतराष्ट्रस्य ॥३५॥ पित्रोर्विदुरधृतराष्ट्रयोः व्यवसितं निश्चितम् । मुषितो वञ्चितोऽस्मि मन्निद्रासमये ते गता इत्यर्थः । महात्मभिरिति वहुवचनं गान्धार्यपेक्षया ॥३६॥ तुम्बुरुर्नाम गन्धर्वः । इवेति शोकाधिक्यात् ॥३७॥ नाहमिति सार्द्धम् । अपारे

१—पत्युः शुश्रूषैव व्रतं यस्याःसा व्यधिकरणबहुव्रीही मध्यमपदलोपी समासः ।

कर्णधार इवापारे भगवान् पारदर्शकः । अथाबभाषे भगवान्नारदो मुनिसत्तमः ॥३९॥

मा कंचन शुचो राजन् यदीश्वरवशं जगत् । लोकाः सपाला यस्येमे वहन्ति बलिमीशितुः ।

स संयुनक्ति भूतानि स एव वियुनक्ति च ॥४०॥

यथा गावो नसि प्रोतास्तन्त्यां बद्धाः स्वदामभिः । वाक्तन्त्यां नामभिर्बद्धा वहन्ति बलिमीशितुः४१

यथा क्रीडोपस्कराणां संयोगविगमाविह । इच्छया क्रीडितुः स्यातां तथैवेशेच्छया नृणाम् ॥४२॥

यन्मन्यसे ध्रुवं लोकमध्रुवं वा न चोभयम् । सर्वथा न हि शोच्यास्ते स्नेहादन्यत्र मोहजात् ॥४३॥

तस्माज्जह्यङ्ग वैक्लव्यमज्ञानकृतमात्मनः । कथं त्वनाथाः कृपणा वर्तेरंस्ते च मां विना ॥४४॥

कालकर्मगुणाधीनो देहोऽयं पाञ्चभौतिकः । कथमन्यांस्तु गोपायेत्सर्पग्रस्तो यथा परम् ॥४५॥

अहस्तानि सहस्तानामपदानि चतुष्पदाम् । फल्गूनि तत्र महतां जीवो जीवस्य जीवनम् ॥४६॥

तदिदं भगवान् राजन्नेक आत्माऽऽत्मनां स्वदृक् । अन्तरोऽनन्तरो भाति पश्य तं माययोरुधा ॥४७॥

सोऽयमद्य महाराज भगवान् भूतभावनः । कालरूपोऽवतीर्णोऽस्यामभवाय सुरद्विषाम् ॥४८॥

शोकार्णवे नाविक इव भवानेव पारदर्शकः भगवान् सर्वज्ञश्च अतो ब्रूहीति वाक्यशेषः । तपस्विनी सन्तापयुक्ता ॥३८॥ कञ्चन कमपि जनं मा शुचः मा शोचीः[1] । आर्षः । यत् यस्मात् जगत् ईश्वराधीनम् ॥३९॥ बलिमाज्ञां च पालयन्ति । स एव भूतानि प्राणिनः संयुनक्ति संयोजयति वियुनक्ति च वियोजयति ॥४०॥ यथा गावो बलीवर्दा नसि नासिकायां दामभिः क्षुद्ररज्जुभिः प्रोताः पुनर्दीर्घतन्त्यां बद्धा ईशितुः स्वामिनो बलिं भारं वहन्ति तथा भूतानि नामभिः क्षुद्ररज्जुस्थानीयैर्देवदत्तादिभिः प्रोताः पुन दीर्घतन्तिरूपायां वाक्तन्त्यां विधिनिषेधलक्षणायां बद्धानि परमेश्वरस्य आज्ञां पालयन्तीत्यर्थः ॥४१॥ उपस्कराणां क्रीडासाधनानाम् विगमो वियोगः । तथा नृणामपि संयोगवियोगो स्यातामित्यन्वयः ॥४२॥ यत् यदि लोकं जनं ध्रुवं जीवरूपेण । अध्रुवं देहरूपेण । न चोभयं, शुद्धब्रह्मरूपेण । सर्वथा त्रिष्वपि पक्षेषु स्नेहादन्यत्र ते धृतराष्ट्रादयो न शोच्याः स्नेह एव केवलं शोकहेतुः सचाज्ञानमूलत्वात् त्याज्य एवेत्यर्थः ॥४३॥ यतः शोकोऽज्ञानमूलकस्तस्माद्धेतोः । अङ्ग हे राजन् ! कथं वर्तेरन् जीवेयुरिति आत्मनो वैक्लव्यं मनोविकलतां जहीत्यन्वयः ॥४४॥ कालो गुणक्षोभकः । कर्मादिष्टम् । कथं गोपायेत न कथमपि । सर्पोऽजगरः । अपरं रक्षितुं न समर्थः ॥४५॥ अहस्तानि अन्नादानि पश्वादीनि वा सहस्तानां मनुष्यादीनां कृष्यादिरूपेण । चतुष्पदामपदानि तृणादीनि । महतां तपस्विनां फल्गूनि स्वल्पफलादीनि जीवनं जीवनसाधनम् । एवं जीवस्य मनुष्यादेः सर्वोऽपि जीवोऽन्नाद्येव अधिकारिभेदेन जीवनसाधनमिति वास्तवोऽर्थः नतु पामराणामिव जीवहिंसायां तात्पर्यम् ॥४६॥ तदिम् अहस्तादिरूपं जगत् स्वदृक् स्वप्रकाशस्वरूप एको भगवानेव न ततः पृथक् मायया बहुधा भातीति तं पश्येत्यन्वयः । कथंभूतः । आत्मनां जीवानामात्मा । पुनश्च । अन्तरोऽन्तः भोक्तृरूपः । अनन्तरो बहिश्च भोग्यरूपश्च स एव नान्यः कश्चन ॥ ४७ ॥ भावनः पालकोऽपि । अभवाय नाशाय कालरूपः सन् ॥४८॥

---

[1] शुचिर् पूतीभावे इत्यस्माद्वा ।

निष्पादितं देवकृत्यमवशेषं प्रतीक्षते । तावद् यूयमवेक्षध्वं भवेद् यावदिहेश्वरः ॥४९॥
धृतराष्ट्रः सह भ्रात्रा गान्धार्या च स्वभार्यया । दक्षिणेन हिमवत ऋषीणामाश्रमं गतः ॥५०॥
स्रोतोभिः सप्तभिर्या वै स्वर्धुनी सप्तधा व्यधात् । सप्तानां प्रीतये नाना सप्तस्रोतः प्रचक्षते ॥५१॥
स्नात्वानुसवनं तस्मिन् हुत्वा चाग्नीन् यथाविधि । अब्भक्ष उपशान्तात्मा स आस्ते विगतैषणः॥५२
जितासनो जितश्वासः प्रत्याहृतषडिन्द्रियः । हरिभावनया ध्वस्तरजःसत्त्वतमोमलः ॥५३॥
विज्ञानात्मनि संयोज्य क्षेत्रज्ञे प्रविलाप्य तम् । ब्रह्मण्यात्मानमाधारे घटाम्बरमिवाम्बरे ॥५४॥
ध्वस्तमायागुणोदर्को निरुद्धकरणाशयः । निवर्तिताखिलाहार आस्ते स्थाणुरिवाचलः ॥५५॥
तस्यान्तरायो मैवाभूः संन्यस्ताखिलकर्मणः ॥५६॥
स वा अद्यतनाद् राजन् परतः पञ्चमेऽहनि । कलेवरं हास्यति स्वं तच्च भस्मीभविष्यति ॥५७॥
दह्यमानेऽग्निभिर्देहे पत्युः पत्नी सहोटजे । बहिः स्थिता पतिं साध्वी तमग्निमनुवेक्ष्यति ॥५८॥
विदुरस्तु तदाश्चर्यं निशाम्य कुरुनन्दन । हर्षशोकयुतस्तस्माद् गन्ता तीर्थनिषेवकः ॥५९॥
इत्युक्त्वाथारुहत्स्वर्गं नारदः सहतुम्बुरुः । युधिष्ठिरो वचस्तस्य हृदि कृत्वाऽजहाच्छुचः ॥६०॥
इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां प्रथमस्कन्धे नैमिषीयोपाख्याने त्रयोदशोऽध्यायः ॥१३॥

अवशेषं यदुकुलक्षयम् । भवेत् वर्तेत । तावत्कालं प्रतीक्षध्वम् ॥४९॥ चात्कुन्त्या सह । दक्षिणेन दक्षिणस्यां दिशि । एनवन्तमव्ययम् । आश्रमं सप्तस्रोतो नाम गतोऽभूदिति द्वयोरन्वयः । या वै प्रसिद्धा स्वर्धुनी गङ्गा सा नाना पृथक् पृथक् सप्तधा आत्मानं व्यधादित्यन्वयः ॥५०।५१॥ अनुसवनं त्रिकालम् । एषणास्त्रिस्रः लोकवित्तपुत्ररूपा विगता निवृत्ता यस्मात्सः । आस्ते आसीत् भूते लट् ॥ ५२ ॥ जितासन इति त्रयम् । प्रत्याहृतानि विषयेभ्य आकृष्टानि षडिन्द्रियाणि येन सः । भावनया धारणया ध्वस्ता रज आदयो मला यस्य । क्रमेणासनप्राणायामप्रत्याहारधारणाध्यानानि सूचितानि ॥५३॥ समाधिमाह—विज्ञानेति । आत्मानं मनो विज्ञानात्मनि बुद्धौ संयोज्य तं विज्ञानात्मानं क्षेत्रज्ञे जीवे संयोज्य तं क्षेत्रज्ञं च आधारभूते ब्रह्मणि संयोज्य स्थाणुरिव अचल आस्ते आसीदित्युत्तरेणान्वयः । यथा घटाकाशो महाकाशे प्रविलाप्यते तद्वत् ॥ ५४ ॥ ध्वस्तो मायागुणानामुदर्क उत्तरफलं वासना यस्य । आहारा अब्भक्षणादयः ॥ ५५ ॥ तस्येत्यर्द्धम् । तस्य धृतराष्ट्रस्य ॥ ५६ ॥ अद्यतनादह्नः परतः पूर्वस्मिन् पञ्चमेऽहनि हास्यति जहौ । भूते लट् । तच्च भस्मसादभूत् 'परः स्यात्पूर्वपरयोः' इति निरुक्तिः ॥५७॥ अग्निभिः योगाग्निना सह गार्हपत्यादिभिः सहोटजे पर्णशालासहिते पत्युर्देहे दह्यमाने सति तदैव दावानले प्रवृत्ते पत्नी गान्धारी तं पतिमनु अग्निं दावानलं प्रविष्टा साध्वी कुन्ती चेति महाभारते उक्तमतो न विरोध, इत्यवधेयम् ॥ ५८ ॥ निशाम्य दृष्ट्वा सुगत्या हर्षः मृत्युना च शोकस्ताभ्यां युक्तः । तीर्थनिषेवकः तीर्थानि सेवितुम् । 'तुमुन्ण्वुलौ' इति भविष्यति ण्वुल् । गन्ता ययौ ॥५९॥ शुचः शोकान् । अजहात् तत्याज । आरुहत् । 'कृमृदृरुहिभ्यश्छन्दसि' इति च्लेरङ् ॥६०॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां प्रथमस्कन्धे गूढार्थदीपिन्यां त्रयोदशोऽध्यायः ।

अथ चतुर्दशोऽध्यायः

सूत उवाच

सम्प्रस्थिते द्वारकायां जिष्णौ बन्धुदिदृक्षया। ज्ञातुं च पुण्यश्लोकस्य कृष्णस्य च विचेष्टितम् ।।१।।
व्यतीताः कतिचिन्मासास्तदा नायात्ततोऽर्जुनः। ददर्श घोररूपाणि निमित्तानि कुरूद्वहः ।।२।।
कालस्य च गतिं रौद्रां विपर्यस्तर्तुधर्मिणः। पापीयसीं नृणां वार्तां क्रोधलोभानृतात्मनाम् ।।३।।
जिह्मप्रायं व्यवहृतं शाठ्यमिश्रं च सौहृदम्। पितृमातृसुहृद्भ्रातृदम्पतीनां च कल्कनम् ।।४।।
निमित्तान्यत्यरिष्टानि काले त्वनुगते नृणाम्। लोभाद्यधर्मप्रकृतिं दृष्ट्वोवाचानुजं नृपः ।।५।।

युधिष्ठिर उवाच

सम्प्रेषितो द्वारकायां जिष्णुर्बन्धुदिदृक्षया। ज्ञातुं च पुण्यश्लोकस्य कृष्णस्य च विचेष्टितम् ।।६।।
गताः सप्ताधुना मासा भीमसेन तवानुजः। नायाति कस्य वा हेतोर्नाहं वेदेदमञ्जसा ।।७।।
अपि देवर्षिणाऽऽदिष्टः स कालोऽयमुपस्थितः। यदाऽऽत्मनोऽङ्गमाक्रीडं भगवानुत्सिसृक्षति ।।८।।
यस्मान्नः सम्पदो राज्यं दाराः प्राणाः कुलं प्रजाः। आसन् सपत्नविजयो लोकाश्च यदनुग्रहात् ।।९।।
पश्योत्पातान्नरव्याघ्र दिव्यान् भौमान् सदैहिकान्। दारुणान् शंसतोऽदूराद् भयं नो बुद्धिमोहनम्१०

चतुर्दशे नृपोऽरिष्टान्यर्जुनं च हतप्रभम्।
वीक्ष्य तेनैव कृष्णस्य तिरोधानममन्यत ।।१।।

सम्प्रस्थित इति द्वयम्। जिष्णौ अर्जुने। बन्धवो वसुदेवादयः। चकारादभिप्रायं च। कतिचित् सप्त। घोररूपाणि भयङ्कराणि। निमित्तानि उत्पातान्। उद्वहः कुलपालकः युधिष्ठिरः ॥१॥२॥ कालस्येति त्रयम्। काले त्वनुगते। तुर्विलक्षणे। पूर्वतो विलक्षणे दोषबहुले काले कलिकाले अनुक्रमात् गते प्राप्ते सति नृपो निमित्तानि दृष्ट्वा अनुजं भीममुवाचेत्यन्वयः। विपर्यस्ता विपरीता ऋतुधर्मा यस्मिंस्तस्य। रौद्रां भयावहाम्। वार्तां जीविकाम्। क्रोधादियुक्त आत्मा मनो येषां तेषाम्। व्यवहृतं व्यवहारम्। कल्कनं कलहादि। प्रकृतिं स्वभावम्। अत्यरिष्टानि[1] अत्यन्तमशुभानि। सर्वत्र द्वितीयान्तानां दृष्ट्वेत्यनेन सम्बन्धः ॥३॥४॥५॥ सम्प्रेषित इति द्वयम्। इदमनागमनकारणम्। अञ्जसा[2] तत्त्वेन न वेद न जानामि। वेति वितर्के ॥६॥७॥ अपि किम्। यत् यदा आत्मनः क्रीडाप्रधानमङ्गम् उत् ऊर्ध्वं वैकुण्ठं प्रति सिसृक्षति नेतुमिच्छति स काल इत्यन्वयः। अङ्गं त्यक्तुमिच्छतीति न व्याख्येयम् 'आदायान्तरधात्' इत्यग्रिमग्रन्थविरोधात्। यद्वा अङ्गं पृथिवीं त्यक्तुमिच्छति। 'यस्य पृथिवी शरीरम्' इति श्रुतेः ॥ ८ ॥ यस्मान्नः सम्पदादय आसन् लोकाश्च वशीकृताः शत्रुविजयश्च आसीत् स भगवानिति पूर्वेणान्वयः ॥ ९ ॥

१–अरिष्टं पापाशुभयोः इत्यभिधानात्।
२–अञ्जसेत्यव्ययं तत्त्वशीघ्रार्थयोः।

ऊर्वक्षिबाहवो मह्यं स्फुरन्त्यङ्ग पुनः पुनः। वेपथुश्चापि हृदये आराद् दास्यन्ति विप्रियम् ॥११॥
शिवैषोद्यन्तमादित्यमभिरौत्यनलानना । मामङ्ग सारमेयोऽयमभिरौति ह्यभीरुवत् ॥१२॥
शस्ताः कुर्वन्ति मां सव्यं दक्षिणं पशवोऽपरे । वाहांश्च पुरुषव्याघ्र लक्षये रुदतो मम ॥१३॥
मृत्युदूतः कपोतोऽयमुलूकः कम्पयन्मनः । प्रत्युलूकश्च कुह्वानैर्विश्वं वै शून्यमिच्छतः ॥१४॥
धूम्रा दिशः परिधयः कम्पते भूः सहाद्रिभिः । निर्घातश्च महानासीत् साकं च स्तनयित्नुभिः॥१५॥
वायुर्वाति खरस्पर्शो रजसा विसृजंस्तमः । असृग् वर्षन्ति जलदा बीभत्समिव सर्वतः ॥१६॥
सूर्यं हतप्रभं पश्य ग्रहमर्दं मिथो दिवि । सुसंकुलैर्भूतगणैर्ज्वलिते इव रोदसी ॥१७॥
नद्यो नदाश्च क्षुभिताः सरांसि च मनांसि च ।न ज्वलत्यग्निराज्येन कालोऽयं किं विधास्यति १८
न पिबन्ति स्तनं वत्सा न दुह्यन्ति च मातरः । रुदन्त्यश्रुमुखा गावो न हृष्यन्त्यृषभा व्रजे॥१९
दैवतानि रुदन्तीव स्विद्यन्ति ह्युच्चलन्ति च । इमे जनपदा ग्रामाः पुरोद्यानाकराश्रमाः ॥२०॥
भ्रष्टश्रियो निरानन्दाः किमघं दर्शयन्ति नः ॥२१॥

अदूरात् त्वरितं भयं शंसतः सूचयत उत्पातान् पश्येत्यन्वयः । बुद्धिमोहनं बुद्धिभ्रंशकरम् ॥ १० ॥ दैहिकानाह अङ्ग हे भीम ! ऊर्वादयो[1] वामाः मह्यं मां खेदयितुम् । तुमुन्नर्थे चतुर्थी । वेपथुः कम्पः आरात् अविलम्बं विप्रियं दुःखम् ॥११॥ भौमानाह शिवा सृगाली उद्यन्तम् उद्यत्सूर्याभिमुखं रौति क्रोशति । अनलवद् उद्गिरज्ज्वालायुक्तमाननं यस्याः सा । अयं सारमेयः श्वा मामभिलक्ष्य अभीरुवत् निःशङ्कम् । अभिरोदित्यभीरुवत् इति पाठः ॥१२॥ शस्ताः प्रशस्ता गवादयः सव्यं वामम् । अपरे गेर्दभादयः । मम वाहान् अश्वान् रुदतः लक्षये पश्यामि ॥१३॥ अत्र कपोतशब्दः[2] सामान्यतः पक्षिवाची दूतः सूचकः तथा च उलूकः कपोतः उलूकाख्यः पक्षी प्रत्युलूकः तत्प्रतिपक्षः काकश्च यो यो मनः कम्पयन् वर्तते तौ द्वावेव विश्वं[3] शून्यं कर्तुमिच्छतः । वै एवार्थे कुह्वानैः कुत्सितशब्दैः ॥ १४ ॥ दिशः धूम्रा मलिनवर्णा तथा—'परिधयश्च' चन्द्रसूर्ययोरुत्पातसूचकमण्डलानि च दृश्यन्त इति शेषः । स्तनयित्नुभिः गर्जितैः सह निर्घातो निरभ्रवज्रपातश्चासीत् ॥१५॥ खरः कठोरः । तमो—विसृजन् विशेषेण प्रसारयन् । सर्वतोदिशं बीभत्सं घृणावहम् असृक् रक्तमेव वर्षन्तीत्यन्वयः ॥ १६ ॥ ग्रहाणां भौमादीनां मर्दं युद्धम् सुङ्कुलैः[4] रोदसी द्यावापृथिव्यौ ज्वलित एव त्वं पश्येत्यन्वयः । घातुका रुद्रगणा मध्ये स्थिता उपर्यधश्च ज्वालयन्तीत्यर्थः ॥१७॥ नद्यः क्षुद्रनद्यः न तु गङ्गाद्यास्तासां दिव्यत्वात् । सरांसि च क्षुभितानीति लिङ्गव्यत्ययेनान्वयः । आज्येन घृतेनापि । किमनिष्टम् ॥१८॥ स्तनं स्तन्यं न दुग्धम् । दुह्यन्ति दोहनं न कारयन्ति । ऋषभाः वृषभाः । न हृष्यन्ति हर्षनादं न कुर्वन्ति ॥१९॥ दैवेत्यर्द्धम् । दैवतानि प्रतिमाः स्विद्यन्ति स्वेदं मुञ्चन्ति ।

१—प्राण्यङ्गत्वेपि नैकवद्भावो भिन्नस्वभावत्वेन दोषख्यापनार्थः ।
२—'कपोतस्तु चित्रकण्ठपारावतविहङ्गयोः' इति मेदिनी ।
३—अयमेव पाठः प्रशस्तः श्रीधरसम्मतश्च ।
४—ससङ्कुलैः इति पाठे प्रमादादुकारश्च्युतः । सु अतिशयेन संङ्कुलैः सङ्कीर्णैः नानाजातीयैः ।

मन्य एतैर्महोत्पातैर्नूनं भगवतः पदैः । अनन्यपुरुषश्रीभिर्हीना भूर्हतसौभगा ॥२२॥
इति चिन्तयतस्तस्य दृष्टारिष्टेन चेतसा । राज्ञः प्रत्यागमद् ब्रह्मन् यदुपुर्याः कपिध्वजः ॥२३॥
तं पादयोर्निपतितमयथापूर्वमातुरम् । अधोवदनमब्बिन्दून् सृजन्तं नयनाब्जयोः ॥२४॥
विलोक्योद्विग्नहृदयो विच्छायमनुजं नृपः । पृच्छति स्म सुहृन्मध्ये संस्मरन्नारदेरितम् ॥२५॥

युधिष्ठिर उवाच

कच्चिदानर्तपुर्यां नः स्वजनाः सुखमासते । मधुभोजदशार्हार्हसात्वतान्धकवृष्णयः ॥२६॥
शूरो मातामहः कच्चित्स्वस्त्यास्ते वाथ मारिषः । मातुलः सानुजः कच्चित्कुशल्यानकदुंदुभिः॥२७
सप्त स्वसारस्तत्पत्न्यो मातुलान्यः सहात्मजाः । आसते सस्नुषाः क्षेमं देवकीप्रमुखाः स्वयम् ॥२८॥
कच्चिद्राजाऽऽहुको जीवत्यसत्पुत्रोऽस्य चानुजः । हृदीकः ससुतोऽक्रूरो जयन्तगदसारणाः॥२९॥
आसते कुशलं कच्चिद् ये च शत्रुजिदादयः । कच्चिदास्ते सुखं रामो भगवान् सात्वतां प्रभुः॥३०
प्रद्युम्नः सर्ववृष्णीनां सुखमास्ते महारथः । गम्भीररयोऽनिरुद्धो वर्धते भगवानुत ॥३१॥
सुषेणश्चारुदेष्णश्च साम्बो जाम्बवतीसुतः । अन्ये च कार्ष्णिप्रवराः सपुत्रा ऋषभादयः ॥३२॥
तथैवानुचराः शौरेः श्रुतदेवोद्धवादयः । सुनन्दनन्दशीर्षण्या ये चान्ये सात्वतर्षभाः ॥३३॥
अपि स्वस्त्यासते सर्वे रामकृष्णभुजाश्रयाः । अपि स्मरन्ति कुशलमस्माकं बद्धसौहृदाः ॥३४॥
भगवानपि गोविन्दो ब्रह्मण्यो भक्तवत्सलः । कच्चित्पुरे सुधर्मायां सुखमास्ते सुहृद्वृतः ॥३५॥

उच्चलन्ति स्थानादधः पतन्ति च ॥२०॥ अघं दुःखम् । दर्शयिष्यन्ति[1] ॥ २१ ॥ नूनं भगवतः पदैर्हीना त्यक्ता भूर्जाता इत्यहं मन्ये । न विद्यतेऽन्यपुरुषेषु श्रीर्वज्राङ्कुशादिशोभा येषां तैः ॥ २२ ॥ हे ब्रह्मन् शौनक ! इति चेतसा चिन्तयतः सतः राज्ञः समीपं कपिध्वजोऽर्जुनः यदुपुर्या द्वारकायाः सकाशात् हस्तिनापुरं प्रत्यागमत् ॥२३॥ तमिति द्वयम् । पूर्वं यथा कदापि न न्यपतत् तथा निपतितम् । अब्बिन्दून् अश्रूणि । नयनेति पञ्चम्यर्थे सप्तमी । विच्छायं विगतकान्तिम् अनुजमर्जुनम् ॥२४॥२५॥ आनर्तपुरी द्वारका । मध्वादयः सप्त यादवभेदाः ॥२६॥ वा अप्यर्थे । मारिषो मान्यः शूरः कुन्त्याः पिताऽपि स्वस्ति कुशलम् । आनकदुन्दुभिर्वसुदेवः । अनुजैर्देवमागादिभिः सहितः ॥२७॥ तत्पत्न्यो वसुदेवपत्न्यः अस्मन्मातुलान्यः स्वसारः परस्परं भगिन्यः देवकीप्रमुखाः स्नुषाभिः रुक्मिण्यादिभिः सहिताः ॥ २८ ॥ कच्चिदिति प्रश्ने । आहुकः उग्रसेनः असन् दुष्टः कंसः पुत्रो यस्य सः । तदनुजो देवकः । हृदीकः श्वफल्कस्तस्य पुत्रो ऽक्रूर इति वीरराघवः । सुतः कृतवर्मा । जयन्तादय कृष्णभ्रातरः ॥ २९ ॥ रामो बलरामः । सात्वतां यदूनाम् ॥३०॥ रयो वेगो युद्धे यस्य सः वर्धते मोदते किम् ॥ ३१ ॥ सुषेण इति त्रयम् । कृष्णस्यापत्यानि पुमांसः कार्ष्ण्यस्तेषु प्रवराः । स्वस्ति आसत इत्युत्तरेणान्वयः । शीर्षण्यौ मुख्यौ येषां

१—वर्तमानसामीप्ये वर्तमानप्रयोगः ।

मङ्गलाय च लोकानां क्षेमाय च भवाय च । आस्ते यदुकुलाम्भोधावाद्योऽनन्तसखः पुमान् ।३६।
यद्बाहुदण्डगुप्तायां स्वपुर्यां यदवोऽर्चिताः । क्रीडन्ति परमानन्दं महापौरुषिका इव ॥३७॥

यत्पादशुश्रूषणमुख्यकर्मणा सत्यादयो द्व्यष्टसहस्रयोषितः ।
निर्जित्य संख्ये त्रिदशांस्तदाशिषो हरन्ति वज्रायुधवल्लभोचिताः ॥३८॥
यद्बाहुदण्डाभ्युदयानुजीविनो यदुप्रवीरा ह्यकुतोभया मुहुः ।
अधिक्रमन्त्यङ्घ्रिभिराहृतां बलात् सभां सुधर्मां सुरसत्तमोचिताम् ॥३९॥

कच्चित्तेऽनामयं तात भ्रष्टतेजा विभासि मे । अलब्धमानोऽवज्ञातः किं वा तात चिरोषितः ।४०।
कच्चिन्नाभिहतोऽभावैः शब्दादिभिरमङ्गलैः । न दत्तमुक्तमर्थिभ्य आशया यत्प्रतिश्रुतम् ।४१।
कच्चित्त्वं ब्राह्मणं बालं गां वृद्धं रोगिणं स्त्रियम् । शरणोपसृतं सत्त्वं नात्याक्षीः शरणप्रदः ।४२।
कच्चित्त्वं नागमोऽगम्यां गम्यां वासत्कृतां स्त्रियम् । पराजितो वाथ भवान्नोत्तमैर्नासमैः पथि ।४३।
अपि स्वित्पर्यभुङ्क्थास्त्वं सम्भोज्यान् वृद्धबालकान् । जुगुप्सितं कर्म किंचित्कृतवान्न यदक्षमम् ४४

ते ॥३२॥३३॥३४॥ सुधर्मायां समायाम् ॥ ३५ ॥ मङ्गलाय ऐहिकसुखाय परत्र मोक्षाय भवाय वृद्धये च उभयत्र । अनन्तो बलदेवः ॥३६॥ महापौरुषिका भगवत्पार्षदा इव परमानन्दं क्रियाविशेषणम् ॥३७॥ यत् यस्य श्रीकृष्णस्य । सत्यादयः[1] सत्यभामादयः संख्ये युद्धे त्रिदशान् देवान् निर्जित्य तदाशिषः देव-भोग्यान् पारिजातादीन् हरन्ति आच्छिद्य भुञ्जते । वज्रेति । इन्द्रस्य बल्लभा इन्द्राणी तस्या उचिता उपभोगयोग्याः ॥३८॥ यत् यस्य श्रीकृष्णस्य । अभ्युदयः प्रभावः । बलादानीतां सभां पादैर्मुहुर्मुहुरनुदिनम् अधिक्रमन्ति आक्रम्य तिष्ठन्ति स गोविन्दः सुखमास्ते इति गतपञ्चमश्लोकेनान्वयः । सुरसत्तमः इन्द्रः ॥३९॥ अत्र पद्ये तातेति सम्बुद्धिद्वयं चित्तविकलतां द्योतयति । अनामयमारोग्यमस्ति कच्चित् । तत्र चिरकालमुषितः निवासः कृतः अतोऽवज्ञातः किम् ॥ ४० ॥ अभावैः प्रेमशून्यैः नाभिहतः न ताडितोऽसि किम् । आशया अर्थिभिरुक्तं प्रार्थितं त्वया च प्रतिज्ञातं यत् तत्तेभ्यो न दत्तं किम् ॥ ४१ ॥ ब्राह्मणादीन् अन्यद्वा शरणागतं सत्त्वं प्राणिमात्रं न त्यक्तवानसि किम् । यतस्त्वं शरणप्रदः ॥ ४२ ॥ अगम्यां विधवां परस्त्रियं वा नागमः न गतवानसि । असत्कृतां रजस्वलाम् । असमैर्बलेनातुल्यैः न्यूनैरित्यर्थः तत्रापि न उत्तमैः[2] नोत्तमैर्जात्यापि न श्रेष्ठैः नीचजातिभिरित्यर्थः न पराजितोऽसि किम् ।४३। संभोज्यान् प्राग्भोजनयोग्यान् । पर्यभुङ्क्थाः परित्यज्य भुक्तवानसि । परिरत्रवर्जने । जुगुप्सितं निन्दितं

१–सत्याशब्दः सत्यभामावाचकः विनाऽपि प्रत्ययं पूर्वोत्तरपदयोर्वा लोपो वाच्यः इति 'ठाजादावूर्ध्वं द्वितीयादचः' इति सूत्रस्थवार्तिकेन भामेत्युत्तरपदस्य लुप्तत्वादिति ।

२–नैकधेत्यादिवन्नशब्देन सह सुप्सुपेति समासः ।

कच्चित्प्रेष्ठतमेनाथ हृदयेनात्मबन्धुना । शून्योऽस्मि रहितो नित्यं मन्यसे तेऽन्यथा न रुक् ॥४५॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां प्रथमस्कन्धे युधिष्ठिरवितर्को नाम चतुर्दशोऽध्यायः ॥१४॥

किञ्चित्कर्मं कृतवान् यत् अक्षमं त्वदयोग्यम् ॥४४॥ हृदयेनान्तरङ्गेण तेन प्राणेन श्रीकृष्णेन रहितोऽहं शून्यः शवतुल्योऽस्मीति मन्यसे । अन्यथा ते एतादशी रुक् पीडा न घटते ॥४५॥

इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धे गूढार्थदीपिन्यां चतुर्दशोऽध्यायः

●

अथ पञ्चदशोऽध्यायः

सूत उवाच

एवं कृष्णसखः कृष्णो भ्रात्रा राज्ञाऽऽविकल्पितः । नानाशङ्कास्पदं रूपं कृष्णविश्लेषकर्शितः ॥१॥

शोकेन शुष्यद्वदनहृत्सरोजो हतप्रभः । विभुं तमेवानुध्यायन्नाऽऽशक्नोत्प्रतिभाषितुम् ॥२॥

कृच्छ्रेण संस्तभ्य शुचः पाणिनाऽऽमृज्य नेत्रयोः । परोक्षेण समुन्नद्धप्रणयौत्कण्ठ्यकातरः ॥३॥

सख्यं मैत्रीं सौहृदं च सारथ्यादिषु संस्मरन् । नृपमग्रजमित्याह बाष्पगद्गदया गिरा ॥४॥

अर्जुन उवाच

वञ्चितोऽहं महाराज हरिणा बन्धुरूपिणा । येन मेऽपहृतं तेजो देवविस्मापनं महत् ॥५॥

यस्य क्षणवियोगेन लोको ह्यप्रियदर्शनः । उक्थेन रहितो ह्येष मृतकः प्रोच्यते यथा ॥६॥

यत्संश्रयाद् द्रुपदगेहमुपागतानां राज्ञां स्वयंवरमुखे स्मरदुर्मदानाम् ।
तेजो हृतं खलु मयाभिहतश्च मत्स्यः सज्जीकृतेन धनुषाधिगता च कृष्णा ॥७॥

श्रुत्वा पञ्चदशे जिष्णोर्विलापं कलिसर्पणम् ।
न्यस्य राज्यं नृपः पौत्रे गतः स्वर्गमितोर्यते ॥१॥

एवमिति द्वयम् । कृष्णोऽर्जुनः रूपमालक्ष्य विकल्पितः[1] एवं वा एवं वेति कृत्वा बहुकोटिविषयीकृतः प्रतिभाषितुं नाशक्नोदित्युत्तरेणान्वयः । विश्लेषो वियोगः । रूपं प्रतीत्यध्याहार्यं दधान इति वा । शुष्यद्वदनं हृदयकमलं च यस्य सः ॥१॥२॥ कृच्छ्रेणेति द्वयम् । शुचः शोकाश्रूणि नेत्रयोरेव संस्तभ्य गलितानि च आमृज्य प्रोञ्छ्य कातरो विह्वलः सन् नृपमाहेत्युत्तरेणान्वयः । परोक्षेण श्रीकृष्णेन हेतुना समुन्नद्धमुत्कटं यत्प्रेमौत्कठ्यं तेन विह्वलः । सख्यं समानशीलत्वम् मैत्रीम् उपकारितां सौहृदं निरपेक्षहितकारितां च क्रमेण वाष्पेण अश्रुप्रवाहेण कण्ठावरोधात् ॥३॥४॥ वञ्चितस्त्यक्तः । विस्मापनम् आश्चर्यजनकम् ॥५॥ यस्येत्यादि यच्छब्दानां तेनाहमद्य मुषित इति सप्तमश्लोकेनान्वयः । उक्थेन[2] प्राणेन । एष पित्रादिः ॥६॥ यस्याश्रयात् द्रुपदगेहं पाञ्चालपुरमागतानां राज्ञां तेजो दर्परूपं मया हृतम् । कुतः ।

१–आपदेन लक्ष्येति तदर्थत्वेन गृह्यतेऽन्यथानामनेकार्थत्वादिति ।

२—'उक्थं कर्मफले प्राणे इति निरुक्तिः ।

यत्संनिधावहमु खाण्डवमग्नयेऽदामिन्द्रं च सामरगणं तरसा विजित्य ।
लब्धा सभा मयकृताद्भुतशिल्पमाया दिग्भ्योऽहरन्नृपतयो बलिमध्वरे ते ॥८॥
यत्तेजसा नृपशिरोऽङ्घ्रिमहन्मखार्थे आर्योऽनुजस्तव गजायुतसत्त्ववीर्यः ।
तेनाहृताः प्रमथनाथमखाय भूपा यन्मोचितास्तदनयन् बलिमध्वरे ते ॥९॥
पत्न्यास्तवाधिमखक्लृप्तमहाभिषेकश्लाघिष्ठचारुकबरं कितवैः सभायाम् ।
स्पृष्टं विकीर्य पदयोः पतिताश्रुमुख्या यैस्तत्स्त्रियोऽकृत हतेशविमुक्तकेशाः ॥१०॥
यो नो जुगोप वनमेत्य दुरन्तकृच्छ्राद् दुर्वाससोऽरिविहितादयुताग्रभुग्यः ।
शाकान्नशिष्टमुपभुज्य यतस्त्रिलोकीं तृप्ताममंस्त सलिले विनिमग्नसङ्घः ॥११॥
यत्तेजसाथ भगवान् युधि शूलपाणिर्विस्मापितः सगिरिजोऽस्त्रमदान्निजं मे ।
अन्येऽपि चाहममुनैव कलेवरेण प्राप्तो महेन्द्रभवने महदासनार्धम् ॥१२॥
तत्रैव मे विहरतो भुजदण्डयुग्मं गाण्डीवलक्षणमरातिवधाय देवाः ।
सेन्द्राः श्रिता यदनुभावितमाजमीढ तेनाहमद्य मुषितः पुरुषेण भूम्ना ॥१३॥

धनुषा मत्स्योऽभिहतः कृष्णा द्रौपदी च प्राप्ता । मुखे आरम्भे । दुर्मदानामुन्मत्तानाम् ॥ ७ ॥ उ इति विस्मये । यस्य सन्निधौ इन्द्रं विजित्यं अग्नये विप्ररूपेण याचमानाय खाण्डवमिन्द्रवनमदाम् । मयदानवकृता सभा लब्धा किञ्च यत्सन्निधौ ते अध्वरे राजसूये दिग्भ्य आगता नृपतयो बलिमहरन् समर्पयामासुस्तेनेत्यन्वयः । अद्भुतैः शिल्पैः कलाकौशलैः माया भ्रमरूपा जलस्थलादिषु यस्यां सा ॥ ८ ॥ यस्य तेजसा मम आर्योऽग्रजः तवानुजो भीमः मखार्थे जरासन्धमहन्निति विशेष्यमध्याहार्यम् । किञ्च तेन भैरवाय बलिं दातुमाहृता बलान्निरुद्धा नृपा यत् मोचितास्तत् तस्मात् तेऽध्वरेबलिम् अनयन् आनीतवन्तः कथंभूतो भीमः । गजायुतस्येव सत्त्वमुत्साहो वीर्यं बलं च यस्य सः । नृपशिरःसु अंघ्रिर्यस्य तम् ॥९॥ यैः कितवैः दुःशासनादिभिस्तव पत्न्याः कबरं केशपाशं विकीर्य उन्मुच्य स्पृष्टमाकृष्टं तेषां स्त्रियः स्त्रीः हतेशाः हतपतिका अत एव विमुक्तकेशाश्च यो भगवान् अकृत तेनेत्यन्वयः । कीदृशम् । अधिमखं[1] राजसूये कारितमहाभिषेकेण अत्यन्तश्लाघ्यं चारु सुन्दरं च । कथंभूतायाः स्मरणादेव प्राप्तस्य श्रीकृष्णस्य पदयोः पतिता चासौ अश्रुमुखी च तस्याः ॥१०॥ किञ्च यो भगवान् वनमेत्य दुर्वाससः हेतोः दुरन्तकृच्छ्रात् शापलक्षणात् नोऽस्मान् जुगोप । किं कृत्वा । शाकमेवमन्नम् अद्यते यत्तदन्नमिति व्युत्पत्त्या तदेव अवशिष्टं तत् उपभुज्य । यतो भोजनात् विनिमग्नो मुनिसंघः त्रिलोकीं तृप्तामेमंसत । शिष्याणामयुतस्याग्रपङ्क्तौ भुङ्क्ते ॥११॥ युधि वराहनिमित्तयुद्धे गिरिजया सहितः विस्मयं प्रापितः मे मह्यं निजं पाशुपतास्त्रमदात् । अन्येऽपि लोकपालाः स्वं स्वमस्त्रं ददुः । किञ्च अमुनैव शरीरेण महेन्द्रभवने अस्यैव महत्[2] श्रेष्ठं अर्द्धासनं प्राप्तवानस्मि ॥१२॥ तत्रैव इन्द्रभवने विहरतो मे भुजदण्डयुगलं सेन्द्राः

१—विभक्त्यर्थेऽव्ययीभावः ।

२—महत इन्द्रस्येति व्याख्याने 'आन्महत':—इत्यात्वापत्तिः स्यादित्यवधेयम् ।

यद्बान्धवः कुरुबलाब्धिमनन्तपारमेको रथेन ततराहमतार्यसत्त्वम् ।
प्रत्याहृतं बहुधनं च मया परेषां तेजास्पदं मणिमयं च हृतं शिरोभ्यः ॥१४॥

यो भीष्मकर्णगुरुशल्यचमूष्वदभ्रराजन्यवर्यरथमण्डलमण्डितासु ।
अग्रेचरो मम विभो रथयूथपानामायुर्मनांसि च दृशा सह ओज आच्छंत् ॥१५॥

यद्दोःषु मा प्रणिहितं गुरुभीष्मकर्णद्रौणित्रिगर्तशलसैन्धवबाह्लिकाद्यैः ।
अस्त्राण्यमोघमहिमानि निरूपितानि नो पस्पृशुर्नृहरिदासमिवासुराणि ॥१६॥

सौत्ये वृतः कुमतिनाऽऽत्मद ईश्वरो मे यत्पादपद्ममभवाय भजन्ति भव्याः ।
मां श्रान्तवाहमरयो रथिनो भुविष्ठं न प्राहरन्यदनुभावनिरस्तचित्ताः ॥१७॥

नर्माण्युदाररुचिरस्मितशोभितानि हे पार्थ हेऽर्जुन सखे कुरुनन्दनेति ।
संजल्पितानि नरदेव हृदिस्पृशानि स्मर्तुर्लुठन्ति हृदयं मम माधवस्य ॥१८॥

शय्यासनाटनविकत्थनभोजनादिष्वैक्याद्वयस्य ऋतवानिति विप्रलब्धः ।
सख्युः सखेव पितृवत्तनयस्य सर्वं सेहे महान् महितया कुमतेरघं मे ॥१९॥

देवाः श्रिता आश्रितवन्तः । अरातयः शत्रवो निवातकवचादयो दैत्याः । येन अनुभावितं प्रभावयुक्तं कृतम् । गाण्डीवेन सह लक्ष्यते दृश्यते इति भुजविशेषणम् । हे अजमीढवंशोद्भव युधिष्ठिर । भूम्ना परिपूर्णतमेन तेन रहितो जातः ॥१३॥ यः श्रीकृष्णः बान्धवः सहायभूतो यस्य सोऽहम् एकेनैव रथेन अनन्तं सेनासमुद्रं ततर तीर्णवान् । अतार्याणि दुस्तराणि सत्त्वानि भीष्मादीनि यस्मिंस्तम् । परेषां शत्रूणां गोधनं पुनरानीतं विराट्नगरे न केवलमेतदेव अपितु भीष्मादीनां शिरोभ्यो मणिमयं धनं मुकुटादिकं तथा तेजास्पदमभिमानलक्षणं सामर्थ्यं चापहृतमित्यन्वयः ॥१४॥

यो भीष्मादिसेनासु मध्ये सारथिरूपेण मम अग्रेचरः सन् तेषां यूथपतीनामायुरादीनि दृशा कालदृष्ट्या आच्छंत् अपहृतवानित्यन्वयः । मनः सह ओजांसि मनोबुद्धीन्द्रियशक्तयः । अदभ्रणां बहूनाम् ॥१५॥ यस्य दोःषु भुजेषु मध्ये प्रणिहितं स्थापितं मा मां गुर्वादिभिःनिरूपितानि प्रयुक्तानि अस्त्राणि नो पस्पृशुरित्यन्वयः । आसुराणि अस्त्राणि यथा प्रह्लादम् । अमोघमहिमानि अव्यर्थप्रभावाणि । द्रौणिः अश्वत्थामा त्रिगर्तः सुशर्मा शलः शल्यः सैन्धवो जयद्रथः : बाह्लिकः शन्तनोर्भ्राता ॥१६॥ भव्या भक्ता यस्य पादपद्मम् अभवाय मुक्तये भजन्ति स ईश्वरः मे मया सौत्ये सारथ्ये कर्मणि वृत इत्यन्वयः । किञ्च जयद्रथवधे श्रान्तानश्वान् जलं पाययितुं भुवि स्थितमपि मां रथस्था अरयो न प्राहरन् । कुतः । यस्य अनुभावेन विक्षिप्तचित्ताः सन्तः कुत्रार्जुन इति दिग्ज्ञानमपि तेषां नासीदित्यर्थः ॥१७॥ हे नरदेव ! माधवस्य हृदिस्पृशानि नर्माणि परिहासवाक्यानि तथा मध्ये मध्ये संजल्पितानि मधुराणि सम्बोधनवाक्यानि च स्मर्तुर्मम हृदयं लुठन्ति लोठयन्ति क्षोभयन्तीत्यन्वयः । चुरादेरनित्यो णिच् । उदारमाकर्षकं रुचिरं सुन्दरं च यत्स्मितं तेन शोभितानि ॥१८॥ शय्यासनादिषु ऐक्यात्सहचारित्वाद्धेतोः कदाचिद्वैपरीत्यं दृष्ट्वा हे वयस्य । त्वम् ऋतवान् वस्तुतः सत्यवादी असि इति वक्रोक्त्या विप्रलब्धः उपहसितोऽपि सर्वमघमपराधं मे सेहे । महितया गाम्भीर्येण हेतुना । यतो महान् अटनं भ्रमणम् । विकत्थनमात्मश्लाघा ॥१९॥

सोऽहं नृपेन्द्र रहितः पुरुषोत्तमेन सख्या प्रियेण सुहृदा हृदयेन शून्यः ।
अध्वन्युरुक्रमपरिग्रहमङ्ग रक्षन् गोपैरसद्भिरबलेव विनिर्जितोऽस्मि ॥२०॥
तद्वै धनुस्त इषवः स रथो हयास्ते सोऽहं रथी नृपतयो यत आनमन्ति ।
सर्वं क्षणेन तदभूदसदीशरिक्तं भस्मन् हुतं कुहकराद्धमिवोप्तमूष्याम् ॥२१॥
राजंस्त्वयाभिपृष्टानां सुहृदां नः सुहृत्पुरे । विप्रशापविमूढानां निघ्नतां मुष्टिभिर्मिथः ॥२२॥
वारुणीं मदिरां पीत्वा मदोन्मथितचेतसाम् । अजानतामिवान्योन्यं चतुःपञ्चावशेषिताः ॥२३॥
प्रायेणैतद्भगवत ईश्वरस्य विचेष्टितम् । मिथो निघ्नन्ति भूतानि भावयन्ति च यन्मिथः ॥२४॥
जलौकसां जले यद्वन्महान्तोऽदन्त्यणीयसः । दुर्बलान् बलिनो राजन् महान्तो बलिनो मिथः ॥२५॥
एवं बलिष्ठैर्यदुभिर्महद्भिरितरान् विभुः । यदून् यदुभिरन्योन्यं भूभारान् संजहार ह ॥२६॥
देशकालार्थयुक्तानि हृत्तापोपशमानि च । हरन्ति स्मरतश्चित्तं गोविन्दाभिहितानि मे ॥२७॥

सूत उवाच

एवं चिन्तयतो जिष्णोः कृष्णपादसरोरुहम् । सौहार्देनातिगाढेन शान्ताऽऽसीद् विमला मतिः ॥२८॥
वासुदेवाङ्घ्र्यनुध्यानपरिबृंहितरंहसा । भक्त्या निर्मथिताशेषकषायधिषणोऽर्जुनः ॥२९॥

अङ्ग हे नृपेन्द्र ! सोऽहमद्य तेन रहितः हृदयेन प्राणेन शून्यो जातः हा किं करोमि अध्वनि मार्गे उरुक्रमस्य श्रीकृष्णस्य परिग्रहं[1] स्त्रीवर्गं रक्षन् असद्भिस्तुच्छैर्गोपैरबलेव विनिर्जितोऽस्मि भगवत्पत्नीनां नीचहस्तगमनं शापवशात् । वस्तुतस्तु न विद्यन्ते सन्तो येभ्यस्तैः गां भूमिं स्वर्गं च पान्तीति गोपजातित्वाच्च गोपैः । अष्टावक्रशापात्तत्तद्रूपेण भगवतैव तासां हरणं कृतमित्युक्तं ब्रह्मपुराणे ॥२०॥ यतो येभ्यो धनुरादिभ्यो माम् आनमन्ति प्रणमन्ति । ईशेन रिक्तं सत् तत्सर्वमसत् कायक्षिममभूत् । भस्मनि हुतमिति निष्फलत्वे । कुहकात् ऐन्द्रजालिकात्प्राप्तमिति मिथ्याभूतत्वे । ऊष्यामूषरभूमौ उप्तमिति नश्यदवस्थत्वे च दृष्टान्तत्रयम् ॥२१॥ राजन्निति द्वयम् सुहृत्पुरे द्वारकाख्ये । नोऽस्माकं सुहृदां मध्ये । चत्वारः पञ्च वा चतुष्पञ्चाः डच् । वशेषिताः भागुरिमतेन अल्लोपः । उन्मथितं विभ्रान्तम् । वारुणी[2] ॥२२।२३॥ प्रायेण निश्चयेन । यत् यतो भगवतः निमित्तभूतात् भावयन्ति पालयन्ति च ॥२४॥ जलौकसामिति द्वयम् । यद्वत् यथा जलौकसां मत्स्यादीनां मध्ये अणीयसः सूक्ष्मान् । एवं बलिष्ठैर्महद्भिः पाण्डवैः दुर्योधनादीन् यदुभिरितरान् शाल्वादीन् यदून् यदुभिरन्योन्यं च निहत्येत्यन्वयः । हेत्याश्चर्ये ॥२५।२६॥ गोविन्दस्य अभिहितानि भाषणानि गीतारूपाणि स्मरतो मे चित्तं हरन्ति आकर्षन्ति व्यथयन्तीत्यर्थः । देशेति देशकालप्रयोजनानुकूलानि । हृदः तापानुपशमयन्तीति तथा ॥२७॥ एवमिति सूतोक्तिः । अतिगाढेन अपारेण प्रेम्णा जिष्णोरर्जुनस्य शान्ता विशोका विरक्ता च ॥२८॥ वासुदेवेति द्वयम् । संग्राममूर्धनि युद्धारम्भे गीतं गीतामुखेन उपदिष्टं यज्ज्ञानं तत् महता कालेन कर्मणा

१–'परिग्रहः कलत्रे च इत्यजयः ।

२–'अमृतमथनादुद्भूता मदिरा वारुणी सा च तालाद्यधिष्ठिता अतः तालप्रसूता मदिरा वारुणीत्युच्यते' इति श्रीवल्लभाचार्याः ।

गीतं भगवता ज्ञानं यत्तत्संग्राममूर्धनि । कालकर्मतमोरुद्धं पुनरध्यगमद् विभुः ॥३०॥
विशोको ब्रह्मसम्पत्त्या संछिन्नद्वैतसंशयः । लीनप्रकृतिनैर्गुण्यादलिङ्गत्वादसम्भवः ॥३१॥
निशम्य भगवन्मार्गं संस्थां यदुकुलस्य च । स्वःपथाय मतिं चक्रे निभृतात्मा युधिष्ठिरः ॥३२॥

पृथाप्यनुश्रुत्य धनञ्जयोदितं नाशं यदूनां भगवद्गतिं च ताम् ।
एकान्तभक्त्या भगवत्यधोक्षजे निवेशितात्मोपरराम संसृतेः ॥३३॥

ययाहरद् भुवो भारं तां तनुं विजहावजः । कण्टकं कण्टकेनेव द्वयं चापीशितुः समम् ॥३४॥
यथा मत्स्यादिरूपाणि धत्ते जह्याद् यथा नटः । भूभारःक्षपितो येन जहौ तच्च कलेवरम् ॥३५॥

यदा मुकुन्दो भगवानिमां महीं जहौ स्वतन्वा श्रवणीयसत्कथः ।
तदाहरेवाप्रतिबुद्धचेतसामधर्महेतुः कलिरन्ववर्तत ॥३६॥
युधिष्ठिरस्तत्परिसर्पणं बुधः पुरे च राष्ट्रे च गृहे तदाऽऽत्मनि ।
विभाव्य लोभानृतजिह्महिंसनाद्यधर्मचक्रं गमनाय पर्यधात् ॥३७॥

तमसा भोगासक्त्या च तिरोहितमपि अर्जुनः पुनरध्यगतव् प्राप्तवानिति द्वयोरन्वयः । यतो विभुः समर्थः । कथंभूतः । परिबृंहितं संवर्द्धितं रयो वेगो यस्यास्तया निर्मथिता निर्मूथिता अशेषाः कषाया वासना यस्याः सा तथाभूता धिषणा बुद्धिर्यस्य स तथाभूतः॥२९।३०॥ ब्रह्मसम्पत्त्या ब्रह्मज्ञानेन लीना प्रकृतिरविद्या यस्मिंस्तन्नैर्गुण्यं भवति ततो नैर्गुण्यात् गुणकार्यभूतलिङ्गशरीरनाशः ततोऽलिङ्गत्वादसंभवः[1] स्थूलदेहनाशः ततः संच्छिन्नो द्वैतलक्षणो भ्रमो यस्य स तथाभूतोऽर्जुनः विशोकः शोकरहितो जात इत्यन्वयः ॥३१॥ मार्गं वैकुण्ठगमनन् । संस्थां संहारम् । स्वःपथाय स्वर्गपथं गन्तुम् । निभृतात्मा स्थिरचित्तः सन् । युधिष्ठिर इत्युपलक्षणं पञ्चैव भ्रातरः ॥३२॥ पृथा कुन्ती तु हिमालयप्रस्थानात्पूर्वमेव धनञ्जयोदितं[2] नारदवर्णितं सर्वं वृत्तान्तं श्रुत्वा धृतराष्ट्रेण सहैव गता । तत्र भगवति निवेशितचित्ता सती संसारादुपरता जीवन्मुक्ताऽभूत् देहं च जहौ इति व्याख्येयमन्यथा भारतविरोधः स्यादित्यवधेयम् ॥३३॥ अजः श्रीकृष्णः यया यादवरूपया शान्तया तन्वा भारमसुरवृन्दरूमशान्तशरीरं कण्टकेन कण्टकमिव अहरत् तां तनुं विजहावित्यन्वयः । शान्तमशान्तं चेति द्वयमपि शरीरं भौतिकतया ईश्वरस्य संहार्यत्वेन सममेव ॥३४॥ यथा नट एकेनैव शरीरेण स्थितः नानारूपाणि धत्ते जह्याच्च तथा भगवानपि एकेन देहेन मत्स्यादीनि रूपाणि धत्ते जह्यात् अन्तर्धत्ते च । येन क्षपितोऽवतारितस्तच्च तत्तु जहौ ॥ ३५ ॥ तन्वा तनुद्वारा त्यागोऽत्र तनुकरण एव नतु सहेति कुव्याख्यानावकाशः[3] । अहरिति लुप्तसप्तम्यन्तम् । तदाहः तस्मिन्नेव अहनि । अप्रतिबुद्धेति-विवेकिनां तु न प्रभुः । अन्ववर्तत सर्वत्रानुप्रविष्टोऽभूत् ॥३६॥ तस्य कलेः परितः सर्पणं व्याप्तिं विभाव्य ज्ञात्वा । तन्मूलमधर्मचक्रं च विलोक्य । पर्यधात् निश्चितवान् । परिधानं

१—सम्यग्भोगाय पुनः पुनर्भवतीति व्युत्पत्त्या संभवः स्थूलदेहः ।

२—धनमविवेकरूपस्तं जयति विचारेणेति धनञ्जयो नारदः । धनशब्दोपपदात् जयतेः खश् तत एव पूर्वपदस्य नुम् । इति वंशीधरी ।

३—उपपदविभक्तेः कारकविभक्तिर्बलीयसी' इति न्यायात् ।

स्वराट् पौत्रं विनयिनमात्मनः सुसमं गुणैः । तोयनीव्याः पतिं भूमेरभ्यषिञ्चद् गजाह्वये ।।३८।।
मथुरायां तथा वज्रं शूरसेनपतिं ततः । प्राजापत्यां निरूप्येष्टिमग्नीनपिबदीश्वरः ।।३९।।
विसृज्य तत्र तत्सर्वं दुकूलवलयादिकम् । निर्ममो निरहंकारः संछिन्नाशेषबन्धनः ।।४०।।
वाचं जुहाव मनसि तत्प्राण इतरे च तम् । मृत्यावपानं सोत्सर्गं तं पञ्चत्वे ह्यजोहवीत् ।।४१।।
त्रित्वे हुत्वाथ पञ्चत्वं तच्चैकत्वेऽजुहोन्मुनिः । सर्वमात्मन्यजुहवीद् ब्रह्मण्यात्मानमव्यये ।।४२।।
चीरवासा निराहारो बद्धवाङ् मुक्तमूर्धजः । दर्शयन्नात्मनो रूपं जडोन्मत्तपिशाचवत् ।।४३।।
अनपेक्षमाणो निरगादश्रृण्वन् बधिरो यथा । उदीचीं प्रविवेशाशां गतपूर्वां महात्मभिः ।
हृदि ब्रह्म परं ध्यायन्नावर्तेत यतो गतः ।।४४।।
सर्वे तमनु निर्जग्मुर्भ्रातरः कृतनिश्चयाः । कलिनाधर्ममित्रेण दृष्ट्वा स्पृष्टाः प्रजा भुवि ।।४५।।
ते साधुकृतसर्वार्था ज्ञात्वाऽऽत्यन्तिकमात्मनः । मनसा धारयामासुर्वैकुण्ठचरणाम्बुजम् ।।४६।।

तु निश्चयः इत्यभिधानात् ।।३७।। स्वराट् युधिष्ठिरः आत्मनः पौत्रं परीक्षितं भूमेः पतिमभ्यषिञ्चदित्यन्वयः । तोयनीव्याः समुद्रपर्यन्तायाः । सुसममतिसदृशम् । 'सोः पूजायां षत्वनिषेधः'[1] ।। ३८ ।। वज्रमनिरुद्धपुत्रं शूरसेन देशानां पतित्वेनाभ्यषिञ्चदित्यनुषङ्गः । अनन्तरं[2] प्रजापतिदेवताकामिष्टिं कृत्वा अग्नीन् गार्हपत्यादीन् अपिबत् आत्मनि भावयामास । 'प्राणान् प्राणेषु जुह्वति इति गीतोक्तेः ।।३९।। विसृज्येति द्वयम् । तत्र गृहे एव सर्वं त्यक्त्वा वाचं जुहावेत्युत्तरेणान्वयः । तन्मनः प्राणे । तं प्राणमितरेऽपाने । सोत्सर्गं तमपानं मृत्यौ उत्सर्गो मलत्यागोऽपानव्यापारः । तं मृत्युं पञ्चत्वे पञ्चभूतानामैक्ये देहे अजोहवीत् देहस्यैव मृत्युः नात्मन इति भावितवान् ।।४०।४१।। पञ्चत्वं भूतपञ्चकं त्रित्वे गुणत्रये तच्च त्रित्वमेकत्वे प्रधाने तच्च सर्वंसर्वकारणभूतं प्रधानमात्मनि जीवे । तं चात्मानं जीवं ब्रह्मणि अजोहवीत्[3] मुनिः मननशीलो युधिष्ठिरः ।। ४२ ।। चीरेति सार्द्धम् जडादिवत् आत्मनो रूपं दर्शयन् गृहान्निरगादित्यन्वयः । चीरवासा[4] बल्कलवस्त्रः । मूर्धजाः केशाः बधिरवत् अश्रृण्वन् अन्ध इव अनवेक्षमाणः कञ्चिदप्यनवलोकयन् अनुजादीननपेक्षमाणो वा ।। ४३ ।। आशामुत्तरां शान्तां दिशम्[5] । महात्मभिः पूर्वजैः । गता पूर्वं या सा गतपूर्वा ताम् । प्रथमार्थे बहुव्रीहिः । यद्वा । पूर्वं गता गतपूर्वा । राजदन्तादित्वात्परनिपातः । यतो यां दिशम् ।।४४।। तं युधिष्ठिरम् । निश्चयो गृहत्यागरूपः ।।४५।। साधुकृताः सम्यक् कृताः सर्वेऽर्था धर्मादयो यैस्ते । आत्यन्तिकम् अन्तकभयनिवर्तकम् ।।४६।।

१–सुः पूजायाम् इति ।
२–प्राज्यापत्या भवेदिष्टिः सर्वस्वं यत्र दक्षिणा ।
३–'ओहाक् त्यागे इति धातो यङ्लुगन्ताल्लुङि रूपम् ।
४–'चीरं चीवरबल्कयोः' । इति कोशात् ।
५–एषा वै देवमनुष्याणां शान्ता दिक् इति श्रुतेः ।

तद्ध्यानोद्रिक्तया भक्त्या विशुद्धधिषणाः परे। तस्मिन्नारायणपदे एकान्तमतयो गतिम् ॥४७॥
अवापुर्दुरवापां ते असद्भिर्विषयात्मभिः। विधूतकल्मषाः स्थानं विरजेनात्मनैव हि ॥४८॥
विदुरोऽपि परित्यज्य प्रभासे देहमात्मवान्। कृष्णावेशेन तच्चित्तः पितृभिः स्वक्षयं ययौ ॥४९॥
द्रौपदी च तदाऽऽज्ञाय पतीनामनपेक्षताम्। वासुदेवे भगवति ह्येकान्तमतिराप तम् ॥५०॥

यः श्रद्धयैतद् भगवत्प्रियाणां पाण्डोः सुतानामिति सम्प्रयाणम्।
शृणोत्यलं स्वस्त्ययनं पवित्रं लब्ध्वा हरौ भक्तिमुपैति सिद्धिम् ॥५१॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां प्रथमस्कन्धे पाण्डवस्वर्गारोहणं नाम पञ्चदशोऽध्यायः ॥१५॥

तद्ध्यानेति द्वयम्। तस्य भगवतो ध्यानेन उद्रिक्तया तीव्रया भक्त्या विधूतपापा अत एव विशुद्धधिषणाः निर्मलबुद्धयस्ते पाण्डवा विरजेन वासनारहितेन अनेनैव आत्मना देहेन गतिं संसारान्मुक्तिं स्थानं विष्णुपदं च प्रापुरिति सरलान्वयः। कथंभूतास्ते। परे सर्वोत्कृष्टे तस्मिन् नारायणपदकमले निश्चलमतयः। गतिं कीदृशीम्। असद्भिर्दुर्लभाम् ॥४७।४८॥ प्रभासे क्षेत्रे। आत्मवान् ज्ञानी। नेतुमागतैः पितृभिः सह स्वक्षयं यमलोकम्। क्षि निवास इत्यस्मात् 'एरच्' ॥४९॥ अनपेक्षतां स्वापेक्षाराहित्यम्। एकान्ता अनन्या। तं भगवन्तम् ॥५०॥ य एतत् सम्प्रयाणं शृणोति स हरौ भक्तिं लब्ध्वा सिद्धिं मुक्तिं प्राप्नोतीत्यन्वयः। भगवत्प्रियेति। षष्ठीसमासो बहुव्रीहिर्वा। अलमतिशयेन स्वस्त्ययनं मङ्गलास्पदम् ॥५१॥

इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धे गूढार्थदीपिन्यां पञ्चदशोऽध्यायः।

अथ षोडशोऽध्यायः

सूत उवाच

ततः परीक्षिद् द्विजवर्यशिक्षया महीं महाभागवतः शशास ह।
यथा हि सूत्यामभिजातकोविदाः समादिशन् विप्र महद्गुणस्तथा ॥१॥

षोडशे दिग्जयो राज्ञः संवादो भूमिधर्मयोः।
तत्र कृष्णवियोगार्ता विलापं कुरुते क्षितिः ॥१॥

ततः पाण्डवनिर्याणानन्तरम्। हे विप्र शौनक! अभितो[1] जातके होराशास्त्रे कोविदाः निपुणाः सूत्यां जन्मदिने यथा समादिशन् तथैव महीं शशासेत्यन्वयः। महतां गुणा यस्मिन् सः। हेति सोत्साहम् ॥१॥

१–अभितो जायते अभिजातम्। पृषोदरादित्वात्ककारलोपः।

स उत्तरस्य तनयामुपयेम इरावतीम् । जनमेजयादींश्चतुरस्तस्यामुत्पादयन् सुतान् ॥२॥
आजहाराश्वमेधांस्त्रीन् गङ्गायां भूरिदक्षिणान् । शारद्वतं गुरुं कृत्वा देवा यत्राक्षिगोचराः॥३॥
निजग्राहौजसा वीरः कलिं दिग्विजये क्वचित् । नृपलिङ्गधरं शूद्रं घ्नन्तं गोमिथुनं पदा ॥४॥

शौनक उवाच

कस्य हेतोर्निजग्राह कलिं दिग्विजये नृपः । नृदेवचिह्नधृक् शूद्र कोऽसौ गां यः पदाहनत् ।
तत्कथ्यतां महाभाग यदि कृष्णकथाश्रयम् ॥५॥
अथवास्य पदाम्भोजमकरन्दलिहां सताम् । किमन्यैरसदालापैरायुषो यदसद्व्ययः ॥६॥
क्षुद्रायुषां नृणामङ्ग मर्त्यानामृतमिच्छताम् । इहोपहूतो भगवान् मृत्युः शामित्रकर्मणि ॥७॥
न कश्चिन्म्रियते तावद् यावदास्त इहान्तकः । एतदर्थं हि भगवानाहूतः परमर्षिभिः ।
अहो नृलोके पीयेत हरिलीलामृतं वचः ॥९॥
मन्दस्य मन्दप्रज्ञस्य वयो मन्दायुषश्च वै । निद्रया ह्रियते नक्तं दिवा च व्यर्थकर्मभिः ।१०।

सूत उवाच

यदा परीक्षित् कुरुजाङ्गलेऽशृणोत् कलिं प्रविष्टं निजचक्रवर्तिते ।
निशम्य वार्तामनतिप्रियां ततः शरासनं संयुगशौण्डिराददे ॥११॥
स्वलंकृतं श्यामतुरङ्गयोजितं रथं मृगेन्द्रध्वजमाश्रितः पुरात् ।
वृतो रथाश्वद्विपपत्तियुक्तया स्वसेनया दिग्विजयाय निर्गतः ॥१२॥

स परीक्षित् उत्तरस्य विराटपुत्रस्य स्वमातुलस्य । उत्पादयन् उत्पादमितुम् उपयेमे । हेतौ शतृप्रत्ययः । जनमेजयेति[1] ॥२॥ आजहार कृतवान् । शारद्वतं कृपाचार्यम् यत्र येषु ॥३॥ क्वचित् एकान्ते । ओजसा बलेन निगृहीतवान् । मिथुनं गां वृषभं च ॥४॥ धृक् धृजेः क्विच् शूद्रक इति पाठे कुत्सितार्थे कन् प्रत्ययः । नृदेवो राजा ॥५॥ तत् कलिनिग्रहादिकम् । आश्रयं सम्बन्धि । मकरन्दलिहां रसास्वादिनां सतां भक्तानां कथाश्रयं चेत्तर्हि कथ्यतामित्यन्वयः ॥६॥ अङ्ग हे सूत । मर्त्यानां मरणधर्मणामथापि ऋतं मोक्षमिच्छतामस्माकमन्यैः किं प्रयोजनम् यत् यैरसदालापैः आयुषः असद्व्ययः व्यर्थक्षयः । क्षुद्रमल्पम् ॥७॥ इह सत्रे । शमितुर्विघ्नशमनकर्तुरिदं कर्म शामित्रं तदर्थम् । तादर्थ्ये सप्तमी । विघ्नकारिणां शासनार्थम् ॥८॥ वचो वचनामृतं निर्विघ्नं जनैः पीयेत एतदर्थमित्यन्वयः । कर्मणि लिङ् । पीङ् पाने इत्यस्य कर्तरि वा ॥९॥ मन्दस्य मन्दभाग्यस्य नक्तं रात्रौ यद्वयस्तन्निद्रया ह्रियत इत्यन्वयः । मन्दायुषोऽल्पायुषः । ॥१०॥ कुरुजाङ्गले तद्राजधान्यां हस्तिनापुरे कलिं प्रविष्टम् अशृणोत् । निजचक्रेण स्वसेनया पालिते । अनतिप्रियां तज्जिघांसया किंचित्प्रियां च । शरासनं धनुराददे जग्राह ।

१–जनं शत्रुसमुदायमेजयते 'एजृ' कम्पने ।

भद्राश्वं केतुमालं च भारतं चोत्तरान् कुरून् । किम्पुरुषादीनि वर्षाणि विजित्य जगृहे बलिम् ॥१३॥
तत्र तत्रोपशृण्वानः स्वपूर्वेषां महात्मनाम् । प्रगीयमाणं च यशः कृष्णमाहात्म्यसूचकम् ॥१४॥
आत्मानं च परित्रातमश्वत्थाम्नोऽस्त्रतेजसः । स्नेहं च वृष्णिपार्थानां तेषां भक्तिं च केशवे ॥१५॥
तेभ्यः परमसंतुष्टः प्रीत्युज्जृम्भितलोचनः । महाधनानि वासांसि ददौ हारान् महामनाः ॥१६॥

सारथ्यपारिषदसेवनसख्यदौत्यवीरासनानुगमनस्तवनप्रणामान् ।
स्निग्धेषु पाण्डुषु जगत्प्रणतिं च विष्णोर्भक्तिं करोति नृपतिश्चरणारविन्दे ॥१७॥

तस्यैवं वर्तमानस्य पूर्वेषां वृत्तिमन्वहम् । नातिदूरे किलाश्चर्यं यदासीत् तन्निबोध मे ॥१८॥
धर्मः पदैकेन चरन् विच्छायामुपलभ्य गाम् । पृच्छति स्माश्रुवदनां विवत्सामिव मातरम् ॥१९॥

धर्म उवाच

कच्चिद्भद्रेऽनामयमात्मनस्ते विच्छायासि म्लायतेषन्मुखेन ।
आलक्षये भवतीमन्तराधिं दूरे बन्धुं शोचसि कंचनाम्ब ॥२०॥
पादैर्न्यूनं शोचसि मैकपादमात्मानं वा वृषलैर्भोक्ष्यमाणम् ।
अथो सुरादीन् हृतयज्ञभागान् प्रजा उत स्विन्मघवत्यवर्षति ॥२१॥
अरक्ष्यमाणाः स्त्रिय उर्वि बालान् शोचस्यथो पुरुषादैरिवार्तान् ।
वाचं देवीं ब्रह्मकुले कुकर्मण्यब्रह्मण्ये राजकुले कुलाग्र्यान् ॥२२॥
किं क्षत्रबन्धून् कलिनोपसृष्टान् राष्ट्राणि वा तैरवरोपितानि ।
इतस्ततो वाशनपानवासःस्नानव्यवायोन्मुखजीवलोकम् ॥२३॥

संयुगशौण्डः युद्धप्रवीणः ॥११॥ एवंभूतं रथमाश्रितः सेनया वृतश्च परीक्षित् पुरान्निर्गत इत्यन्वयः । मृगेन्द्रः सिंहाङ्कितो ध्वजो यस्मिन् तम् । द्विपो हस्ती पत्तिः पदातिः ॥१२॥ भद्राश्वादीनि वर्षाणि । बलिं करम् ॥१३॥ तत्रेति त्रयम् । तत्र तत्र तत्तद्देशेषु । पाण्डवानां यश आदीनि उपशृण्वन् तेभ्यो नानावस्तूनि ददाविति तृतीयेनान्वयः । महामना उदारचित्तः । स्नेहं परस्परमिति शेषः । उज्जृम्भिते प्रफुल्ले । प्रगीयमाणं कृत्यचः इति णत्वम् ॥१४।१५।१६॥ पाण्डुषु पाण्डुपुत्रेषु विष्णोः सारथ्यादीनि तस्य जगत्कर्तृकां प्रणतिं च शृण्वन् नृपतिः विष्णोश्चरणारविन्दे भक्तिं करोति स्मेत्यन्वयः । परिषदि भवं पारिषदं सभापतित्वम् । इकारघटितः पाठ एव समीचीनः । वीरासनं खड्गहस्तस्य रात्रौ जागरणम् ॥१७॥ अन्वहं प्रतिदिनम् । नातिदूरे समीपे । यत्तत् मे मत्तः सकाशात् त्वं निबोध शृणु ॥१८॥ धर्मो वृषरूपः गां गोरूपां पृथ्वीम् । विच्छायां कान्तिहीनाम् । उपलभ्य दृष्ट्वा । धर्मपृथ्वीकलयस्त्रयो लोकैरदृश्या अपि परीक्षिता योगजनेत्राभ्यां दृष्टा इत्यवधेयम् ॥१९॥ हे भद्रे ! कच्चिदिति प्रश्ने । ते आत्मनो देहस्य अनामयमारोग्यमस्ति कच्चित् । यतः ईषन्म्लायता वैवर्ण्यं भजता मुखेन विच्छायासि निस्तेजस्कासि । अतोऽहं त्वाम् अन्तर्व्याधियुक्तां पश्यामि । हे अम्ब ! दूरे गतं कञ्चन बन्धुं शोचसि ॥ २० ॥ पादैस्त्रिभि-र्न्यूनम् एकपादं माम् । वृषलैः शूद्रप्रायै राजभिर्भोक्ष्यमाणमात्मानं वा शोचसि । आहोस्वित सुरादीन् । उत अपि इन्द्रे अवर्षति सति दुर्भिक्षपीडिताः प्रजा शोचसि ॥२१॥ हे उर्वि पृथ्वि । स्त्रियः स्त्रीः ।

यद्वाम्ब ते भूरिभरावतारकृतावतारस्य हरेर्धरित्रि ।
अन्तर्हितस्य स्मरती विसृष्टा कर्माणि निर्वाणविलम्बितानि ।।२४।।
इदं ममाचक्ष्व तवाधिमूलं वसुन्धरे येन विकर्शितासि ।
कालेन वा ते बलिनां बलीयसा सुरार्चितं किं हृतमम्ब सौभगम् ।।२५।।

धरण्युवाच

भवान् हि वेद तत्सर्वं यन्मां धर्मानुपृच्छसि । चतुर्भिर्वर्तसे येन पादैर्लोकसुखावहैः ।।२६।।
सत्यं शौचं दया क्षान्तिस्त्यागः संतोष आर्जवम् । शमो दमस्तपः साम्यं तितिक्षोपरतिः श्रुतम्२७
ज्ञानं विरक्तिरैश्वर्यं शौर्यं तेजो बलं स्मृतिः । स्वातन्त्र्यं कौशलं कान्तिर्धैर्यं मार्दवमेव च ।।२८।।
प्रागल्भ्यं प्रश्रयः शीलं सह ओजो बलं भगः । गाम्भीर्यं स्थैर्यमास्तिक्यं कीर्तिर्मानोऽनहंकृतिः२९
एते चान्ये च भगवन्नित्या यत्र महागुणाः । प्रार्थ्या महत्त्वमिच्छद्भिर्न वियन्ति स्म कर्हिचित्३०
तेनाहं गुणपात्रेण श्रीनिवासेन साम्प्रतम् । शोचामि रहितं लोकं पाप्मना कलिनेक्षितम् ।।३१।।
आत्मानं चानुशोचामि भवन्तं चामरोत्तमम् । देवान् पितॄनृषीन् साधून् सर्वान् वर्णांस्तथाऽऽश्रमान्

अथो अथवा पुरुषादैः राक्षसैरिव निर्दयैः पित्रादिभिरार्तान् बालान् वा शोचसि । कुकर्मणीति देहली दीपकन्यायेनोभयोर्विशेषणम् । ब्राह्मणकुले वाचं वेद[1] वाणीम् । राजकुले कुलाग्र्यान् सेवकान् ब्राह्मणान् । कुकर्मणि दुराचारप्रवृत्ते द्वयोः शालिनीछन्दोभङ्गः ॥ २२ ॥ उपसृष्टान् कलिदोषग्रस्तान् क्षत्रियाधमान् किं शोचसीत्यनुषङ्गः । किं वा तैरेव अवरोपितानि विनाशितानि राष्ट्राणि देशान् । अथवा । इतस्ततः स्वेच्छाचारेण अशनादिषु उन्मुखं प्रवर्तमानं जीवलोकं वा शोचसीत्यन्वयः । वासो[2] वस्त्रम् । व्यवायो मैथुनम् ॥२३॥ हे धरित्रि ! अन्तर्हितस्य हरेः कर्माणि स्मरन्ती तेन विसृष्टा त्यक्ता सती त्वमात्मानं शोचसीत्यन्वयः । कथंभूतस्य हरेः ते भूरिभारस्य अवताराय हरणाय कृतोऽवतारो येन तस्य । निर्वाणेति मोक्षसम्बन्धीनि । निर्वाणं विलम्बितमाश्रितं[3] येषु तानि । सन्दर्भस्तु निर्वाणं विडम्बितमुपहसितं यैः । सुखादित्वान्निर्वाणशब्दस्य पूर्वनिपात, इत्याह ॥ २४ ॥ येन कृशीकृतासि तदिदं सर्वं मम मह्यं कथयेत्यन्वयः । आधिमूलं मनोव्यथाकारणम् । किं वा कालेन ते सौभगं दाम्पत्यमद्य अपहृतं किम् । सुरार्चितं देवैरपि श्लाघ्यम् ॥२५॥ भवानिति षवट्कम् । यत्पृच्छसि तदिदं सर्वं वेद अथापि शृणु । येन भगवता हेतुभूतेन त्वं वर्तसे अवर्तथाः[4] यत्र सत्यादयो गुणाः कदाचिदपि न वियन्ति न क्षीयन्ते तेन श्रीनिवासेन रहितं लोकं शोचामीति षष्ठेनान्वयः । सहओजोबलानि मनोज्ञानकर्मेन्द्रियशक्तयः । एते पूर्वोक्ता एकोनचत्वारिंशत् (३९) अन्ये च ब्रह्मण्यत्वादयः महागुणाः पाप्मना पापमूर्तिना ईक्षितमाविष्टम्

१–आचारकुलहीना अध्येष्यन्तीति ।
२–निर्विसर्गपाठे वासः स्थानम् ।
३–विलम्बितं विडम्बितमिति पाठद्वयमपि समानार्थकं साधु डलयोरभेदात् ।
४–वर्तमानसामीप्ये भूते लट् ।

ब्रह्मादयो बहुतिथं यदपाङ्गमोक्षकामास्तपः समचरन् भगवत्प्रपन्नाः ।
सा श्रीः स्ववासमरविन्दवनं विहाय यत्पादसौभगमलं भजतेऽनुरक्ता ॥३३॥
तस्याहमब्जकुलिशाङ्कुशकेतुकेतैः श्रीमत्पदैर्भगवतः समलंकृताङ्गी ।
त्रीनत्यरोच उपलभ्य ततो विभूतिं लोकान् स मां व्यसृजदुत्स्मयतीं तदन्ते ॥३४॥
यो वै ममातिभरमासुरवंशराज्ञामक्षौहिणीशतमपानुददात्मतन्त्रः ।
त्वां दुःस्थमूनपदमात्मनि पौरुषेण सम्पादयन् यदुषु रम्यमबिभ्रदङ्गम् ॥३५॥
का वा सहेत विरहं पुरुषोत्तमस्य प्रेमावलोकरुचिरस्मितवल्गुजल्पैः ।
स्थैर्यं समानमहरन्मधुमानिनीनां रोमोत्सवो मम यदङ्घ्रिविटङ्किताया: ॥३६॥
तयोरेवं कथयतोः पृथिवीधर्मयोस्तदा । परीक्षिन्नाम राजर्षिः प्राप्तः प्राचीं सरस्वतीम् ॥३७॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां प्रथमस्कन्धे पृथ्वीधर्मसंवादो नाम षोडशोऽध्यायः ॥१६॥

॥२६।२७।२८।२९।३०।३१॥ किं बहुना सर्वान् शोचामीत्यर्थः ॥३२॥ यस्या अपाङ्गमोक्षकामाः कृपाकटाक्षकामा ब्रह्मादयो बहुतिथं बहुकालं तपः समचरन् भगवन्तं प्रपन्ना[1] सा श्रीः स्वनिवासस्थानं विहाय यस्य भगवतः पादसौभगं माधुर्यसुखं भजतेऽनुभवति प्राप्नोतीत्यर्थः । अनुरक्ता सततं प्रेमासक्ता ॥३३॥ तस्य भगवतः श्रीमद्भिः पदैः समलङ्कृताङ्गी अहं त्रीन् लोकान् अत्यरोचे अतिक्रम्य शोभितवती अस्मि । स भगवान् तदन्ते विभूतिक्षयकाले उत्स्मयन्तीं गर्वं कुर्वाणां मां व्यसृजत् त्यक्तवानित्यन्वयः । ततो भगवतः सकाशात् विभूतिं समृद्धिमुपलभ्य । अब्जादीनां केतैराश्रयभूतैः । कुलिशं वज्रम् । केतुर्ध्वजः ॥३४॥ आत्मतन्त्रः स्वतन्त्रः यो भगवान् शतरूपं ममातिभारमपानुदत् दूरीकृतवान् ऊनपदं पादत्रयहीनं दुःस्थं त्वामपि सुस्थं सम्पादयन् सम्पादयितुं रम्यमङ्गं श्रीमूर्तिमबिभ्रत् धृतवान् तस्य विरहं का वा सहेतेत्युत्तरेणान्वयः । हेतौ शतृ प्रत्ययः । पौरुषेण सामर्थ्येन ॥३५॥ किञ्च यः प्रेमादिभिः मधुमानिनीनां मधुकुलस्त्रीणां सत्यभामादीनां समानं सगर्वं स्थैर्यं कामोन्मादकत्वमहरत् हृतवान् । यस्याङ्घ्रिभ्यो विटङ्कि[2] ताया अलङ्कृताया ममापि सस्यादिमिषेण रोमोत्सवो भवति तस्य विरहं का वा सहेत न कापीत्यन्वयः ॥३६॥ वल्गुजल्पैर्मधुरभाषणैः । प्राचीं पूर्ववाहिनीं कुरुक्षेत्रस्थाम् । कथयतोः सतोः ॥३७॥

इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धे गूढार्थदीपिन्यां षोडशोऽध्यायः ।

१–निर्विसर्गपाठ एव प्रशस्तः ।
२–'अलङ्कारे विटङ्कः स्यात्' इत्यभिधानात् ।

अथ सप्तदशोऽध्यायः

सूत उवाच

तत्र गोमिथुनं राजा हन्यमानमनाथवत् । दण्डहस्तं च वृषलं ददृशे नृपलाञ्छनम् ॥ १ ॥
वृषं मृणालधवलं मेहन्तमिव बिभ्यतम् । वेपमानं पदैकेन सीदन्तं शूद्रताडितम् ॥ २ ॥
गां च धर्मदुघां दीनां भृशं शूद्रपदाहताम् । विवत्सां साश्रुवदनां क्षामां यवसमिच्छतीम् ॥ ३ ॥
पप्रच्छ रथमारूढः कार्तस्वरपरिच्छदम् । मेघगम्भीरया वाचा समारोपितकार्मुकः ॥ ४ ॥
कस्त्वं मच्छरणे लोके बलाद्धंस्यबलान् बली । नरदेवोऽसि वेषेण नटवत्कर्मणाऽद्विजः ॥ ५ ॥
कस्त्वं कृष्णे गते दूरं सह गाण्डीवधन्वना । शोच्योऽस्यशोच्यान् रहसि प्रहरन् वधमर्हसि ॥ ६ ॥
त्वं वा मृणालधवलः पादैर्न्यूनः पदा चरन् । वृषरूपेण किं कश्चिद् देवो नः परिखेदयन् ॥ ७ ॥
न जातु पौरवेन्द्राणां दोर्दण्डपरिरम्भिते । भूतलेऽनुपतन्त्यस्मिन् विना ते प्राणिनां शुचः ॥ ८ ॥
मा सौरभेयानुशुचो व्येतु ते वृषलाद्भयम् । मा रोदीरम्ब भद्रं ते खलानां मयि शास्तरि ॥ ९ ॥
यस्य राष्ट्रे प्रजाः सर्वास्त्रस्यन्ते साध्व्यसाधुभिः । तस्य मत्तस्य नश्यन्ति कीर्तिरायुर्भगो गतिः १०
एष राज्ञां परो धर्मो ह्यार्तानामार्तिनिग्रहः । अत एनं वधिष्यामि भूतद्रुहमसत्तमम् ॥ ११ ॥

राज्ञो धर्मस्य संवादो मिथः सप्तदशेऽद्भुतः ।
निग्रहोऽनुग्रहः पश्चात्कलेरत्र निरूप्यते ॥१॥

तत्र सरस्वतीतटे । हन्यमानं ताड्यमानं मिथुनं गोवृषभरूपं वृषलं शूद्रं कलिं च नृपवेषधारिणं ददृशे इत्यन्वयः ॥१॥ मृणालं कमलनालसूत्रं तद्वत् धवलम् । मेहन्तं मूत्रयन्तमिव । वेपमानं कम्पमानम् । सीदन्तं क्लिश्यन्तं वृषं वृषरूपं धर्मं च ददृशे इत्यन्वयः ॥ २ ॥ गां च पृथ्वीरूपां ददर्शेत्यन्वयः । धर्मदुघां यज्ञार्थं पयोघृतरूपहविर्दोग्ध्रीम् । क्षामां दुर्बलाम् । यवसं तृणं यज्ञभागं च इच्छतीं गोरूपां पृथ्वीम् ॥३॥ कार्तस्वराः स्वर्णमयाः परिच्छदा मुकुटकुण्डलादयो यस्य तं वृषलं वृषं गां च पप्रच्छेति त्रयाणामन्वयः । सज्जीकृतं कार्मुकं धनुर्येन सः परीक्षित् ॥४॥ अहमेव शरणं रक्षिता यस्य तस्मिन् लोके बली सन् अबलान् हंसि स त्वं कः । नटवद्वेषेण । कर्मणा गोताडनरूपेण अद्विजः शूद्रोऽसि ॥५॥ अर्जुनेन सह दूरं स्वलोकं गते सति अरे त्वं कः । रहसि एकान्ते अशोच्यान् निरपधान् प्रहरन् त्वमेव शोच्यः सापराधोऽसि अतो वधमर्हसि ॥६॥ एकेन पदा । त्वं कश्चिद् देवो वर्तसे इति शेषः ॥ ७ ॥ कौरवेन्द्राणां[1] भुजदण्डैः परिपालितेऽस्मिन् भूतले ते शुचोऽश्रूणि विना अन्येषां जातु कदाचिदपि न पतन्तीत्यन्वयः । नु वितर्के ॥८॥ हे सुरभेः पुत्र ! वृषलात् कलेः । व्येतु अपयातु । मयि वर्तमाने ॥ ९ ॥ हे साध्वि ! त्रस्यन्ते पीडयन्ते । एते नश्यन्ति । भग ऐश्वर्यम् । गतिः परलोकः ॥ १० ॥ आर्तिनिग्रह इति यद् एष एव धर्मः ॥ ११ ॥

१—अयमेव पाठः सर्वसम्मतः ।

कोऽवृश्चत्तव पादांस्त्रीन् सौरभेय चतुष्पद । मा भूवंस्त्वादृशा राष्ट्रे राज्ञां कृष्णानुवर्तिनाम् ॥१२॥
आख्याहि वृष भद्रं वः साधूनामकृतागसाम् । आत्मवैरूप्यकर्तारं पार्थानां कीर्तिदूषणम् ॥१३॥
जनेऽनागस्यघं युञ्जन् सर्वतोऽस्य च मद्भयम् । साधूनां भद्रमेव स्यादसाधुदमने कृते ॥१४॥
अनागस्स्विह भूतेषु य आगस्कृन्निरङ्कुशः । आहर्तास्मि भुजं साक्षादमर्त्यस्यापि साङ्गदम् ॥१५॥
राज्ञो हि परमो धर्मः स्वधर्मस्थानुपालनम् । शासतोऽन्यान् यथाशास्त्रमनापद्युत्पथानिह ॥१६॥

धर्म उवाच

एतद् वः पाण्डवेयानां युक्तमार्ताभयं वचः । येषां गुणगणैः कृष्णो दौत्यादौ भगवान् वृतः ॥१७॥
न वयं क्लेशबीजानि यतः स्युः पुरुषर्षभ । पुरुषं तं विजानीमो वाक्यभेदविमोहिताः ॥१८॥
केचिद् विकल्पवसना आहुरात्मानमात्मनः । दैवमन्ये परे कर्म स्वभावमपरे प्रभुम् ॥१९॥
अप्रतर्क्यादनिर्देश्यादिति केष्वपि निश्चयः । अत्रानुरूपं राजर्षे विमृश स्वमनीषया ॥२०॥

सूत उवाच

एवं धर्मे प्रवदति स सम्राड् द्विजसत्तम । समाहितेन मनसा विखेदः पर्यचष्ट तम् ॥२१॥

राजोवाच

धर्मं ब्रवीषि धर्मज्ञ धर्मोऽसि वृषरूपधृक् । यदधर्मकृतः स्थानं सूचकस्यापि तद् भवेत् ॥२२॥
अथवा देवमायाया नूनं गतिरगोचरा । चेतसो वचसश्चापि भूतानामिति निश्चयः ॥२३॥
तपः शौचं दया सत्यमिति पादाः कृते कृताः । अधर्मांशैस्त्रयो भग्नाः स्मयसङ्गमदैस्तव ॥२४॥

चतुष्पदस्तव । अवृश्चत् चिच्छेद । मा भूवन् मा सन्तु ॥ १२ ॥ वो युष्माकम् । कीर्तिं दूषयति यस्त-माख्याहीत्यन्वयः । आगोऽपराधः ॥ १३ ॥ अनागसि निरपराधे योऽघं द्रोहं कुर्वन् भवेत् अस्य सर्वतः सर्वत्र मत् मत्तः ॥ १४ ॥ अनागःसु निरपराधेषु प्राणिषु य आगस्कृत् द्रोहकर्ता । निरंकुशः निर्भयः सन् । तस्य अमर्त्यस्य इन्द्रस्यापि भुजं छेत्तास्मि । अङ्गदं बाहुभूषणं तेन सहितं समूलमित्यर्थः ॥ १५ ॥ उत्पथान् धर्मपथमुल्लङ्घ्य वर्तमानान् । शासतो दण्डयतः आपदि तु दोषाल्पत्वमाह ॥१६॥ पाण्डुवं-श्यानाम् । आर्तानामभयं यस्मात्तदेतद्वचः युक्तमुचितमेव । वृतः[1] ॥१७॥ क्लेशबीजानि पादच्छेदादीनि । वाक्यभेदैर्नानाविधवाक्यैः ॥ १८ ॥ विकल्पवसना भेदाच्छादका वेदान्तिन आत्मनस्त्वंपदार्थस्य आत्मानं तत्पदार्थं मनो वा प्रभुं सुखदुःखकारणमाहुः । अन्ये दैवज्ञा दैवं ग्रहादिकम् । परे मीमांसकाः कर्म । अपरे सांख्याः स्वभावम् ॥ १९ ॥ केचित्तु अप्रतर्क्यात् तर्कागोचरात् अनिर्देश्यात् वक्तुमशक्यात् कस्माच्चित्कारणादित्याहुः । इतीत्थं केष्वपि पक्षेषु निश्चयो नेत्यध्याहारः । अत्र विषये अनुरूपम् अनुकूलं पक्षं स्वबुद्धया निश्चिनु ॥२०॥ समाहितेन लब्धसमाधानेन । तं धर्मं पर्यचष्ट प्रत्यभाषत ॥२१॥ धर्ममिति स्पष्टम् ॥२२॥ गतिर्वध्यघातकलक्षणा । अगोचरा अविषया । सुज्ञेया न भवतीत्यर्थः ॥२३॥ स्मयेन गर्वेण तपोभङ्गः । परस्त्रीसंगेन शौचभङ्गः । मदेन मदिरापानजेन दयाभङ्गः । अधर्मांशैः अधर्मपादैः

१—अयमेव पाठः प्रामाणिक इति दीपनी ।

इदानीं धर्मं पादस्ते सत्यं निर्वर्तयेद्यतः । तं जिघृक्षत्यधर्मोऽयमनृतेनैधितः कलिः ॥२५॥
इयं च भूर्भगवता न्यासितोरुभरा सती । श्रीमद्भिस्तत्पदन्यासैः सर्वतः कृतकौतुका ॥२६॥
शोचत्यश्रुकला साध्वी दुर्भगेवोज्झिताऽधुना । अब्रह्मण्या नृपव्याजाः शूद्रा भोक्ष्यन्ति मामिति२७
इति धर्मं महीं चैव सान्त्वयित्वा महारथः । निशातमाददे खड्गं कलयेऽधर्महेतवे ॥२८॥
तं जिघांसुमभिप्रेत्य विहाय नृपलाञ्छनम् । तत्पादमूलं शिरसा समगाद् भयविह्वलः ॥२९॥
पतितं पादयोर्वीक्ष्य कृपया दीनवत्सलः । शरण्यो नावधीच्छ्लोक्य आह चेदं हसन्निव ॥३०॥

राजोवाच

न ते गुडाकेशयशोधराणां बद्धाञ्जलेर्वै भयमस्ति किंचित् ।
न वर्तितव्यं भवता कथंचन क्षेत्रे मदीये त्वमधर्मबन्धुः ॥३१॥
त्वां वर्तमानं नरदेवदेहेष्वनुप्रवृत्तोऽयमधर्मपूगः ।
लोभोऽनृतं चौर्यमनार्यमंहो ज्येष्ठा च माया कलहश्च दम्भः ॥३२॥
न वर्तितव्यं तदधर्मबन्धो धर्मेण सत्येन च वर्तितव्ये ।
ब्रह्मावर्ते यत्र यजन्ति यज्ञैर्यज्ञेश्वरं यज्ञवितानविज्ञाः ॥३३॥
यस्मिन् हरिर्भगवानिज्यमान इज्यामूर्तिर्यजतां शं तनोति ।
कामनमोघान् स्थिरजङ्गमानामन्तर्बहिर्वायुरिवैष आत्मा ॥३४॥

सूत उवाच

परीक्षितैवमादिष्टः स कलिर्जातवेपथुः । तमुद्यतासिमाहेदं दण्डपाणिमिवोद्यतम् ॥३५॥

॥ २४ ॥ यतः सत्यात् । निर्वर्तयेत् आत्मानं धारयेत् । एधितो वर्धितः ॥ २५ ॥ इयमिति द्वयम् । इयं च भूः भगवता उज्झिता त्यक्ता सती दुर्भगा भाग्यहीनेव शोचति मां शूद्रा भोक्ष्यन्तीति । कीदृशी । न्यासितः अवतारित उरुभरो बहुभारो यस्याः सा । सर्वत्र कृतकौतुका कृतोत्सवा च । अश्रूणि कलयति मुञ्चतीति तथा ॥२६॥२७॥ कलये कलिं हन्तुम् । निशातं तीक्ष्णम् आददे जग्राह ॥२८॥ जिघांसुं हन्तुकामम् अभिप्रेत्य ज्ञात्वा । लाञ्छनं मुकुटादिं । समगात् पपातेत्यर्थः । ॥ २९ ॥ श्लोक्यः प्रशंसार्हः । सर्वथा कोपानिवृत्तेरिवेत्युक्तम्॥३०॥ गुडाकेशः जितनिद्रोऽर्जुनस्तस्य यशोधराणां कीर्तिविस्तारकामानामस्माकमग्रे । अथापि न वर्तितव्यं न स्थातव्यम् यतस्त्वम् अधर्मस्य बन्धुः सहयोगी ॥ ३१ ॥ नरदेवा ब्राह्मणा राजानो वा । तेषां देहेषु वर्तमानं त्वामनु अधर्मपूगः अधर्मसमूहः प्रवृत्तः सर्वत्र प्रविष्टः । अंहः पापम् । ज्येष्ठा दरिद्रा । माया कपटम् । दम्भो धर्मध्वजित्वम् ॥ ३२ ॥ तत् तस्मात् । यत्र यजन्ति तत्र ब्रह्मावर्ते ।[1] यज्ञेश्वरं श्रीविष्णुम् । वितानमनुष्ठानम् । ॥ ३३ ॥ यस्मिन् ब्रह्मावर्ते इज्यमानो हरिर्यजतां शं मोक्षसुखम् अमोघान् सत्यान् ईप्सितकामांश्च तनोति तत्र न वर्तितव्यमित्यन्वयः । कथंभूतः । स्थावरादीनामात्मा । वायुरिव सर्वत्र व्याप्तश्च ॥३४॥ वेपथुः कम्पः । उद्यतासिम् उत्थापितखड्गम् । दण्डपाणिं यमराजमिव ॥ ३५ ॥

१—सरस्वती दृषद्वत्योर्देवनद्योर्यदन्तरम् । तं देवनिर्मितं देशं ब्रह्मावर्तं प्रचक्षते ॥ (मनुः)

कलिरुवाच

यत्र क्वचन वत्स्यामि सार्वभौम तवाज्ञया। लक्षये तत्र तत्रापि त्वामात्तेषुशरासनम् ॥३६॥
तन्मे धर्मभृतां श्रेष्ठ स्थानं निर्देष्टुमर्हसि। यत्रैव नियतो वत्स्य आतिष्ठंस्तेऽनुशासनम् ॥३७॥

सूत उवाच

अभ्यर्थितस्तदा तस्मै स्थानानि कलये ददौ। द्यूतं पानं स्त्रियः सूना यत्राधर्मश्चतुर्विधः ॥३८॥
पुनश्च याचमानाय जातरूपमदात्प्रभुः। ततोऽनृतं मदं कामं रजो वैरं च पञ्चमम् ॥३९॥
अमूनि पञ्च स्थानानि ह्यधर्मप्रभवः कलिः। औत्तरेयेण दत्तानि न्यवसत्तन्निदेशकृत् ॥४०॥
अथैतानि न सेवेत बुभूषुः पुरुषः क्वचित्। विशेषतो धर्मशीलो राजा लोकपतिर्गुरुः ॥४१॥
वृषस्य नष्टांस्त्रीन् पादान् तपः शौचं दयामिति। प्रतिसंदध आश्वास्य महीं च समवर्धयत् ॥४२॥
स एष एतर्ह्यध्यास्त आसनं पार्थिवोचितम्। पितामहेनोपन्यस्तं राज्ञारण्यं विविक्षता ॥४३॥
आस्तेऽधुना स राजर्षिः कौरवेन्द्रश्रियोल्लसन्। गजाह्वये महाभागश्चक्रवर्ती बृहच्छ्रवाः ॥४४॥
इत्थम्भूतानुभावोऽयमभिमन्युसुतो नृपः। यस्य पालयतः क्षोणीं यूयं सत्राय दीक्षिताः ॥४५॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां प्रथमस्कन्धे कलिनिग्रहो नाम सप्तदशोऽध्यायः ॥१७॥

आत्तो गृहीतः इषुर्बाणः शरासनं धनुश्च येन तथाभूतं त्वां लक्षये पश्यामि ॥ ३६ ॥ आतिष्ठन् पालयन्। वत्स्यामि ॥ ३७ ॥ तस्मै कलये। पानं मद्यपानम्। स्त्रियोऽविवाहिताः। वेश्या वा सूना भूतहिंसा वधस्थानम्। यत्र द्यूतादिषु चतुर्विधः क्रमेण अनृतस्मयाशौचक्रौर्यरूपः सत्यतपःशौचदयानाशकः ॥ ३८ ॥ जातरूपं सुवर्णम्। ततः सुवर्णदानात् कामं स्त्रीसङ्गम्। रजः तन्मूलां हिसाम्। पञ्चमं वैरं च अदादित्यन्वयः ॥ ३९ ॥ अमूनि[1] अमीषु। अधर्मप्रभवः अधर्मोत्पादकः। औत्तरेयेण परीक्षिता। निदेशकृद् आज्ञाकर्ता ॥ ४० ॥ अथ हेतौ। यतो द्यूतादीनि कलेः वासस्थानानि अतः बुभूषुरभ्युदयेच्छुः। सुवर्णासेवनमासक्त्यभावः ॥ ४१ ॥ प्रतिसन्दधे संयोजयामास ॥ ४२ ॥ एतर्हि अधुनापि। अध्यास्ते वर्तमानसामीप्ये भूते लट्। उपन्यस्तं दत्तम् ॥ ४३ ॥ ४४ ॥ क्षोणी पृथ्वीं पालितवतः। सत्रं कर्तुम्।[2]

इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धे गूढार्थदीपिन्यां सप्तदशोऽध्यायः।

१—'कालभावाध्वदेशानाम्' इति कर्मत्वम्।
२—अधिशीङ्—इति कर्मत्वम्।

अथाष्टादशोऽध्यायः

सूत उवाच

यो वै द्रौण्यस्त्रविप्लुष्टो न मातुरुदरे मृतः। अनुग्रहाद् भगवतः कृष्णस्याद्भुतकर्मणः ॥१॥
ब्रह्मकोपोत्थिताद् यस्तु तक्षकात्प्राणविप्लवात्। न सम्मुमोहोरुभयाद् भगवत्यर्पिताशयः ॥२॥
उत्सृज्य सर्वतः सङ्गं विज्ञाताजितसंस्थितिः। वैयासकेर्जहौ शिष्यो गङ्गायां स्वं कलेवरम् ॥३॥
नोत्तमश्लोकवार्तानां जुषतां तत्कथामृतम्। स्यात्सम्भ्रमोऽन्तकालेऽपि स्मरतां तत्पदाम्बुजम् ॥
तावत्कलिर्न प्रभवेत्प्रविष्टोऽपीह सर्वतः। यावदीशो महानुर्व्यामाभिमन्यव एकराट् ॥५॥
यस्मिन्नहनि यर्ह्येव भगवानुत्ससर्ज गाम्। तदैवेहानुवृत्तोऽसावधर्मप्रभवः कलिः ॥६॥
नानुद्वेष्टि कलिं सम्राट् सारङ्ग इव सारभुक्। कुशलान्याशु सिद्ध्यन्ति नेतराणि कृतानि यत्
किं नु बालेषु शूरेण कलिना धीरभीरुणा। अप्रमत्तः प्रमत्तेषु यो वृको नृषु वर्तते ॥८॥
उपवर्णितमेतद् वः पुण्यं पारीक्षितं मया। वासुदेवकथोपेतमाख्यानं यदपृच्छत ॥९॥
या याः कथा भगवतः कथनीयोरुकर्मणः। गुणकर्माश्रयाः पुम्भिः संसेव्यास्ता बुभूषुभिः ।१०।

ऋषय ऊचुः

सूत जीव समाः सौम्य शाश्वतीर्विशदं यशः। यस्त्वं शंससि कृष्णस्य मर्त्यानाममृतं हि नः ११

अष्टादशे शमीकर्षेः न्यस्य सर्पं गले नृपः।
गतस्तदात्मजः श्रृङ्गी तं शशापेति वर्ण्यते ॥१॥

द्रौणिः 'अश्वत्थामा' तदस्त्रदग्धोऽपि न मृतः[1]। अद्भुतेति। मृतमपि जीवयतीति अद्भुतकर्मत्वम् ॥ १ ॥ ब्रह्मकोपेन श्रृङ्गिशापेन उत्थितात् तक्षकात् यः प्राणविप्लवः नाशस्तस्मात् यत् उरुभयं तस्मान्न संमुमोहेत्यन्वयः। यतो भगवति अर्पित मनाः ॥२॥ विज्ञातोऽनुभूतः अजितः श्रीकृष्णः संस्थितौ मरणकाले येन सः ॥ ३ ॥ उत्तमश्लोकस्य वार्तैव वार्ता जीवनहेतु र्येषाम्। संभ्रमो[2] भयं न ॥ ४ ॥ आभिमन्यवः परीक्षित् यावत् ईशः राजा आसीत् तावत् न प्रभवेत् न समर्थोऽभूत्। सर्वतः सर्वत्र ॥ ५ ॥ यर्हि क्षणे। गां भूमिम् तत्याज। इह भूमौ अनुवृत्तः अनुप्रविष्टः। प्रभवः जन्मदाता ॥ ६ ॥[3] सारभुक् सारग्राही भ्रमर इव। यत् यस्मिन् कुशलानि पुण्यानि आशु सङ्कल्पमात्रेण फलन्ति। इतराणि पापानि तु कृतान्येव ॥७॥ बालेषु अधार्मिकेषु। किन्तु अनिष्टं क्रियेत न किमपि धीरेषु धार्मिकेषु। मेषेषु वृक इव यो वर्तते। लुप्तोपमा ॥ ८ ॥

यत् अपृच्छत तदेतत् आख्यानं वः युष्माकम् उपवर्णितमित्यन्वयः ॥९॥ कथनीयानि उरूणि महान्ति कर्माणि यस्य तस्य भगवतः याः याः ताः ताः सर्वाः बुभूषुभिः मुमुक्षुभिः ॥१०॥ शाश्वतीः समाः बहून्

१—सुभद्राप्रार्थनया पुनर्जीवितः   २—सम्भ्रमः साध्वसेऽपि स्यात्।
३—ब्राह्मण्यां क्षत्रियाज्जातः सूत इत्यभिधीयते इति वचनात्।

कर्मण्यस्मिन्ननाश्वासे धूमधूम्रात्मनां भवान् । आपाययति गोविन्दपादपद्मासवं मधु ॥१२॥
तुलयाम लवेनापि न स्वर्गं नापुनर्भवम् । भगवत्सङ्गिसङ्गस्य मर्त्यानां किमुताशिषः ॥१३॥
को नाम तृप्येद् रसवित्कथायां महत्तमैकान्तपरायणस्य ।
नान्तं गुणानामगुणस्य जग्मुर्योगेश्वरा ये भवपाद्ममुख्याः ॥१४॥
तन्नो भवान् वै भगवत्प्रधानो महत्तमैकान्तपरायणस्य ।
हरेरुदारं चरितं विशुद्धं शुश्रूषतां नो वितनोतु विद्वन् ॥१५॥
स वै महाभागवतः परीक्षिद् येनापवर्गाख्यमदभ्रबुद्धिः ।
ज्ञानेन वैयासकिशब्दितेन भेजे खगेन्द्रध्वजपादमूलम् ॥१६॥
तन्नः परं पुण्यमसंवृतार्थमाख्यानमत्यद्भुतयोगनिष्ठम् ।
आख्याह्यनन्ताचरितोपपन्नं पारीक्षितं भागवताभिरामम् ॥१७॥

सूत उवाच

अहो वयं जन्मभृतोऽद्य हास्म वृद्धानुवृत्त्यापि विलोमजाताः ।
दौष्कुल्यमाधिं विधुनोति शीघ्रं महत्तमानामभिधानयोगः ॥१८॥
कुतः पुनर्गृणतो नाम तस्य महत्तमैकान्तपरायणस्य ।
योऽनन्तशक्तिर्भगवाननन्तो महद्गुणत्वाद् यमनन्तमाहुः ॥१९॥
एतावतालं ननु सूचितेन गुणैरसाम्यानतिशायनस्य ।
हित्वेतरान् प्रार्थयतो विभूतिर्यस्याङ्घ्रिरेणुं जुषतेऽनभीप्सोः ॥२०॥

संवत्सरान् । नः अस्माकं तदेव अमृतं मृत्युभयनिवर्तकम् ॥ ११ ॥ अनाश्वसे वैगुण्यबाहुल्येन अनिश्चित फले । धूमेन धूम्रः मलिनः गर्वितः आत्मा येषां तेषां नः । मधु मधुरम् आसवं भक्तिरसम् आपाययति ॥ १२ ॥ भक्तसङ्गस्य लवेनापि कालेन । अपुनर्भवं मोक्षं वा । आशिषो राज्यादिसुखानि न तुलयामेति किमुत वक्तव्यम् ॥ १३ ॥ महत्तमानां भक्तानाम् एकान्तेन मुख्यतया परमाश्रयो यस्तस्य भगवतः कथायाम् । अगुणस्य दिव्यगुणसम्पन्नस्य । न जग्मुः न प्रापुः । योगेश्वराः सनकादयः । पाद्मो ब्रह्मा ॥ १४ ॥ तत् तस्मात् नोऽस्माकं मध्ये भवान् वै भवानेव । उदारं चित्ताकर्षकम् ॥ १५ ॥ शब्दितेन शुकोपदिष्टेन येन ज्ञानेन ज्ञानसाधनेन आख्यानेन पादमूलं भेजे प्राप्तवान् तदाख्यानं नः आख्याहीत्युत्तरेणान्वयः । असंवृतार्थं स्पष्टार्थं यथा भवति तथा । अभिरामम् आनन्दजनकम् ॥ १६॥१७ ॥ हेति हर्षे । जन्मभृतः सफलजन्मानः आस्म जाताः । विलोमजाता वर्णसङ्करा अपि । वस्तुतस्तु विगतानि लोमानि यस्मात्सः विलोमा अग्निः तस्माज्जातत्वात् ब्राह्मणोत्तमा अपि । 'अग्निर्वै ब्राह्मणः' इति श्रुतेः । अभिधानयोगः संभाषणलक्षणसम्बन्धः दौष्कुल्यमाधिं विधुनोति अहं तु न तथेत्यर्थः ॥ १८ ॥ नाम कीर्तयतः पुंसः आधिं मनोव्यथां विधुनोतीति किमुत वक्तव्यम् । गुणतोऽपि यमनन्तमाहुः तस्येत्यन्वयः ॥ १९ ॥ एतावता सूचितेन महिम्ना अलम् । कस्तद्विस्तरतः वक्तुं शक्नोति । यतो हि अनभीप्सोरपि यस्य अङ्घ्रिरेणुं

अथापि यत्पादनखावसृष्टं जगद् विरञ्चोपहृतार्हणाम्भः ।
सेशं पुनात्यन्यतमो मुकुन्दात् को नाम लोके भगवत्पदार्थः ॥२१॥

यत्रानुरक्ताः सहसैव धीरा व्यपोह्य देहादिषु सङ्गमूढम् ।
व्रजन्ति तत्पारमहंस्यमन्त्यं यस्मिन्नहिंसोपशमः स्वधर्मः ॥२२॥

अहं हि पृष्टोऽर्यमणो भवद्भिराचक्ष आत्मावगमोऽत्र यावान् ।
नभः पतन्त्यात्मसमं पतत्त्रिणस्तथा समं विष्णुगतिं विपश्चितः॥२३॥

एकदा धनुरुद्यम्य विचरन्मृगयां वने । मृगाननुगतः श्रान्तः क्षुधितस्तृषितो भृशम् ॥२४॥
जलाशयमचक्षाणः प्रविवेश तमाश्रमम् । ददर्श मुनिमासीनं शान्तं मीलितलोचनम् ॥२५॥
प्रतिरुद्धेन्द्रियप्राणमनोबुद्धिमुपारतम् । स्थानत्रयात्परं प्राप्तं ब्रह्मभूतमविक्रियम् ॥२६॥
विप्रकीर्णजटाच्छन्नं रौरवेणाजिनेन च । विशुष्यत्तालुरुदकं तथाभूतमयाचत ॥२७॥
अलब्धतृणभूम्यादिरसम्प्राप्तार्घ्यसूनृतः । अवज्ञातमिवात्मानं मन्यमानश्चुकोप ह ॥२८॥
अभूतपूर्वः सहसा क्षुत्तृड्भ्यामर्दितात्मनः । ब्राह्मणं प्रत्यभूद् ब्रह्मन्मत्सरो मन्युरेव च ॥२९॥
स तु ब्रह्मऋषेरंसे गतासुमुरगं रुषा । विनिर्गच्छन् धनुष्कोट्या निधाय पुरमागमत्॥३०॥
एष किं निभृताशेषकरणो मीलितेक्षणः । मृषा समाधिराहोस्विर्त्कि नु स्यात्क्षत्रबन्धुभिः ॥३१॥
तस्य पुत्रोऽतितेजस्वी विहरन् बालकोऽर्भकैः । राज्ञाघं प्रापितं तातं श्रुत्वा तत्रेदमब्रवीत् ॥३२॥
अहो अधर्मः पालानां पीव्नां बलिभुजामिव । स्वामिन्यघं यद्दासानां द्वारपानां शुनामिव॥३३॥

विभूतिर्लक्ष्मीः जुषते सेवते । इतरान् ब्रह्मादीन् हित्वा ॥ २० ॥ अथापि पुनरपि । यस्य पादनखादवसृष्टं निःसृतं ब्रह्मद्रवं स्वकमण्डलौ धृत्वाऽर्घ्यीकृत्य समर्पितं सत् तत् अर्घ्योदकं गङ्गा अभूत् सा च सेशं शिवसहार्य्यं सत् जगत् पुनाति । अन्यथा तस्याः स्थितिर्दुष्करा । अथ तस्मादपि हेतोः अन्यतमः भगवत्पदस्य वाच्यार्थः कः न कोऽपीत्यर्थः ॥ २१ ॥ यत्र श्रीमुकुन्दे । रूढं निरूढं सङ्गम् आसक्तिं त्यक्त्वा । पारहंस्यं जीवन्मुक्ततां प्राप्नुवन्ति ॥ २२ ॥ हे अर्यम्णः अज्ञानतिमिरघ्नाः । यावान् मम आत्मावगमः आत्मज्ञानम् तावन्मात्रम् आचक्षे प्रवक्ष्यामि । आत्मसमं स्वशक्त्यनुरूपम् । गतिं महिमानम् । समं स्वमत्यनुरूपम् ॥ २३ ॥ मृगयामुद्दिश्य वने विचरन् आश्रमं प्रविवेशेति द्वयोरन्वयः । क्षुत् अस्य संजाता इति क्षुधितः अचक्षाणः अपश्यन् मुनिं शमीकम् ॥ २४ ॥ २५ ॥ प्रतिरुद्धेति द्वयम् । स्थानात्त्रयात् जाग्रदादेः परं तुरीयं समाधिम् । विप्रकीर्णाभिः परितो लम्बमानाभिः । रोरवाजिनं मृगचर्म ॥२६॥२७॥ तृणं तृणासनम् । सूनृतं मधुरवचनम् । अवज्ञातमनादृतमिव । हेति अत्यन्तम् ॥ २८॥ अर्दितः पीडितः ॥ २९ ॥ गतासुं मृतम् । कोट्या अग्रभागेन । अंसे स्कन्धे ॥ ३० ॥ निभृतानि निरुद्धानि अशेषकरणानि इन्द्रियाणि येन सः । किं वस्तुतः । किं नु किं प्रयोजनम् ॥३१॥ तस्य शमीकस्य पुत्रः शृङ्गी । अघं दुःखम् ॥३२॥ वलिभुजां काकानामिव द्वारपानां शुनामिव च दासभूतानां राज्ञां स्वामिनि यत् अधम्

ब्राह्मणैः क्षत्रबन्धुर्हि द्वारपालो निरूपितः । स कथं तद्गृहे द्वाःस्थः सभाण्डं भोक्तुमर्हति ॥३४॥
कृष्णे गते भगवति शास्तर्युत्पथगामिनाम् । तद्भिन्नसेतूनद्याहं शास्मि पश्यत मे बलम् ॥३५॥
इत्युक्त्वा रोषताम्राक्षो वयस्यानृषिबालकान् । कौशिक्याप उपस्पृश्य वाग्वज्रं विससर्ज ह ।३६।
इति लङ्घितमर्यादं तक्षकः सप्तमेऽहनि । दंक्ष्यति स्म कुलाङ्गारं चोदितो मे ततद्रुहम् ॥३७॥
ततोऽभ्येत्याश्रमं बालो गलेसर्पकलेवरम् । पितरं वीक्ष्य दुःखार्तो मुक्तकण्ठो रुरोद ह ॥३८॥
स वा आङ्गिरसो ब्रह्मन् श्रुत्वा सुतविलापनम् । उन्मील्य शनकैर्नेत्रे दृष्ट्वा स्वांसे मृतोरगम्३९
विसृज्य पुत्रं पप्रच्छ वत्स कस्माद्धि रोदिषि । केन वा तेऽपकृतमित्युक्तः स न्यवेदयत् ॥४०॥

निशम्य शप्तमतदर्हं नरेन्द्रं स ब्राह्मणो नात्मजमभ्यनन्दत् ।
अहो बतांहो महदद्य ते कृतमल्पीयसि द्रोह उरुर्दमो धृतः ॥४१॥
न वै नृभिर्नरदेवं पराख्यं सम्मातुमर्हस्यविपक्वबुद्धे ।
यत्तेजसा दुर्विषहेण गुप्ता विन्दन्ति भद्राण्यकुतोभयाः प्रजाः ॥४२॥
अलक्ष्यमाणे नरदेवनाम्नि रथाङ्गपाणावयमङ्ग लोकः ।
तदा हि चौरप्रचुरो विनङ्क्ष्यत्यरक्ष्यमाणोऽविवरूथवत्क्षणात्॥४३॥
तदद्य नः पापमुपैत्यनन्वयं यन्नष्टनाथस्य वसोर्विलुम्पकात् ।
परस्परं घ्नन्ति शपन्ति वृञ्जते[१] पशून् स्त्रियोऽर्थान् पुरुदस्यवो जनाः ॥४४॥

अपराध इत्ययमधर्मः अहो दुःसहः इत्यन्वयः ॥ ३३ ॥ श्ववत् द्वारपालः । सभाण्डं भाण्डस्थितं पायसादि । यद्वा । एकपात्रं यथा स्यात्तथा ॥ ३४ ॥ भिन्नसेतून् लङ्घितमर्यादान् शास्मि दण्डयामि ॥ ३५ ॥ उपस्पृश्य आचम्य । ह कठोरम् । वाग्वज्रं शापम् ॥३६॥ मे मया प्रेरितः सन् स्म निश्चये । ततः पिता । सप्तमे । केरलमते मशब्दः पञ्चसंख्यापरः पञ्चमाक्षरत्वात् सप्त च मश्चेति सप्तमं तस्मिन् द्वादशे । एवं पञ्चदिवसैः सर्वं कार्यं सम्पाद्य षष्ठदिनात् द्वादशदिनपर्यन्तं कथा श्राविता तदैव संगतिः अन्यथा मध्याह्नोत्तरं वनादागत्य शापश्रवणं पुत्रस्य राज्याभिषेकः इत्यादि सर्वमर्धदिनेन कर्तुमशक्यत्वात् सप्ताहं जीविताविधिः इत्युक्तेश्च बहु विरोधः स्यादित्यवधेयं सुधीभिरिति वंशीधरी ॥ ३७ ॥ गले अत्र समासे 'अमूर्ध'—इति सप्तम्या अलुक् । मुक्तकण्ठ उच्चस्वरेण । हेति दुःखे ॥ ३८ ॥ स वा इति द्वयम् । वै प्रसिद्धः । अङ्गिरोगोत्रः । प्रतिकृतम् अपकृतम् । भावे क्तः प्रतिकूलं कृतं वा ॥ ३९ ॥ ४० ॥ अतदर्हं शापायोग्यम् । ते त्वया महत् अंहः पापं कृतम् । द्रोहे अपराधे । उरुर्दमः महान् दण्डः । बत खेदे ॥४१॥ परो भगवदंश इति आख्या यस्य । नृभिः संमातुं समं द्रष्टुन् ॥ ४२ ॥ अङ्ग हे वत्स ! रथाङ्गपाणिर्भगवान् तदंशरूपे । राजनि अविवरूथः मेषसंघस्तद्वत् ॥ ४३ ॥ तत् तस्मात् नष्टनाथस्य लोकस्य वसोर्धनस्य विलुम्पकात् अपहर्तुः चोरात् हेतोः नोऽस्माकं यत्पापं तत् अनन्वयं सम्बन्धशून्यमेव उपैष्यति। यतः पुरवः बहवो जनाः ।

१—वृजिवर्जने अदादिः अत्रापहारेऽयम् ।

तदाऽऽर्यधर्मश्च विलीयते नृणां वर्णाश्रमाचारयुतस्त्रयीमयः ।
ततोऽर्थकामाभिनिवेशितात्मनां शुनां कपीनामिव वर्णसङ्करः ॥४५॥

धर्मपालो नरपतिः स तु सम्राड् बृहच्छ्रवाः । साक्षान्महाभागवतो राजर्षिर्हयमेधयाट् ।
क्षुत्तृट्श्रमयुतो दीनो नैवास्मच्छापमर्हति ॥४६॥

अपापेषु स्वभृत्येषु बालेनापक्वबुद्धिना । पापं कृतं तद्भगवान् सर्वात्मा क्षन्तुमर्हति ॥४७॥
तिरस्कृता विप्रलब्धाः शप्ताः क्षिप्ता हता अपि । नास्य तत्प्रतिकुर्वन्ति तद्भक्ताः प्रभवोऽपि हि॥४८
इति पुत्रकृताघेन सोऽनुतप्तो महामुनिः । स्वयं विप्रकृतो राज्ञा नैवाघं तदचिन्तयत् ॥४९॥
प्रायशः साधवो लोके परैर्द्वन्द्वेषु योजिताः । न व्यथन्ति न हृष्यन्ति यत आत्मागुणाश्रयः॥५०॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां प्रथमस्कन्धे विप्रशापोपलम्भनं नामाष्टादशोऽध्यायः ॥१८॥

वृञ्जते अपहरन्ति ॥ ४४ ॥ तदा नृपाभावे त्रयीमयः त्रय्या आगतः त्रयीमयः 'तत आगत' इत्यर्थे मयट्-प्रत्ययः । अर्थकामयोः अभिनिवेशित अत्यासक्त आत्मा मनो यवाम् ॥ ४५ ॥ धर्मेति सार्द्धम् । बृहच्छ्रवाः महायशाः । हयमेधेन यजतीति ॥ ४६ ॥ ४७ ॥ प्रभवः समर्था अपि । अस्य तिरस्कर्तुः । न तत्प्रति-कुर्वन्ति न तत्प्रतीकारं कुर्वन्ति । विप्रलब्धाः वञ्चिताः क्षिप्ता निन्दिता ॥ ४८ ॥ विप्रकृतः अनादृतः ॥ ४९ ॥ अग्रणाश्रयः गुणकार्यं रागद्वेषादिरहितः ॥ ५० ॥

इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धे गूढार्थदीपिन्यामष्टादशोऽध्यायः ।

अथैकोनविंशोऽध्यायः

सूत उवाच

महीपतिस्त्वथ तत्कर्म गर्ह्यं विचिन्तयन्नात्मकृतं सुदुर्मनाः ।
अहो मया नीचमनार्यवत्कृतं निरागसि ब्रह्मणि गूढतेजसि ॥१॥
ध्रुवं ततो मे कृतदेवहेलनाद् दुरत्ययं व्यसनं नातिदीर्घात् ।
तदस्तु कामं त्वघनिष्कृताय मे यथा न कुर्यां पुनरेवमद्धा ॥२॥

प्रायोपवेशेन सुधाम्बुनद्यां स्थितः परीक्षिन्मुनिवर्यसंघे ।
पृष्टे च तेन म्रियमाणकृत्ये समागतः श्रीशुक ऊनविंशे ॥:॥

अथ पुरप्रवेशान्तरम् । निरागसि निरपराधे । नीचं पापम् ॥१॥ कृतात् भूदेवापराधात् तव व्यसनं दुःखम् अद्धा साक्षात् मे अस्तु इत्यन्वयः । तत्तु ध्रुवं निश्चितं नातिदीर्घात् अचिरादेव अस्तु ।

अद्यैव राज्यं बलमृद्धकोशं प्रकोपितब्रह्मकुलानलो मे ।
दहत्वभद्रस्य पुनर्न मेऽभूत् पापीयसी धीर्द्विजदेवगोभ्यः ॥३॥

स चिन्तयन्नित्थमथाशृणोद् यथा मुनेः सुतोक्तो निर्ऋतिस्तक्षकाख्यः ।
स साधु मेने नचिरेण तक्षकानलं प्रसक्तस्य विरक्तिकारणम् ॥४॥

अथो विहायेममम्ुं च लोकं विमर्शितौ हेयतया पुरस्तात् ।
कृष्णाङ्घ्रिसेवामधिमन्यमान उपाविशत् प्रायममर्त्यनद्याम् ॥५॥

या वै लसच्छ्रीतुलसीविमिश्रकृष्णाङ्घ्रिरेण्वभ्यधिकाम्बुनेत्री ।
पुनाति लोकानुभयत्र सेशान् कस्तां न सेवेत मरिष्यमाणः ॥६॥

इति व्यवच्छिद्य स पाण्डवेयः प्रायोपवेशं प्रति विष्णुपद्याम् ।
दध्यौ मुकुन्दाङ्घ्रिमनन्यभावो मुनिव्रतो मुक्तसमस्तसङ्गः ॥७॥

तत्रोपजग्मुर्भुवनं पुनाना महानुभावा मुनयः सशिष्याः ।
प्रायेण तीर्थाभिगमापदेशैः स्वयं हि तीर्थानि पुनन्ति सन्तः ॥८॥

अत्रिर्वसिष्ठश्च्यवनः शरद्वानरिष्टनेमिर्भृगुरङ्गिराश्च ।
पराशरो गाधिसुतोऽथ राम उतथ्य इन्द्रप्रमदेध्मवाहौ ॥९॥

मेधातिथिर्देवल आर्ष्टिषेणो भारद्वाजो गौतमः पिप्पलादः ।
मैत्रेय और्वः कवषः कुम्भयोनिर्द्वैपायनो भगवान्नारदश्च ॥१०॥

अन्ये च देवर्षिमहर्षिवर्या राजर्षिवर्या अरुणादयश्च ।
नानार्षिगोत्रप्रवरान् समेतानभ्यर्च्य राजा शिरसा ववन्दे ॥११॥

सुखोपविष्टेष्वथ तेषु भूयः कृतप्रणामः स्वचिकीर्षितं यत् ।
विज्ञापयामास विविक्तचेता उपस्थितोऽग्रेऽभिगृहीतपाणिः ॥१२॥

अघनिष्कृताय पापप्रायश्चित्ताय । एवं पापम् । दुरत्ययं दुर्लङ्घ्यम् ॥२॥ बलं सैन्यम् । अभद्रस्य पापिनो मे न अभूत् न भवेत् । लिङर्थे लुङ् ॥३॥ निर्ऋतिः मृत्युः यथा मुनेः सुतेन उक्तः तथा अशृणोदित्यन्वयः ॥४॥ अथो अतः प्रायम् अनशनं निमित्तीकृत्य । अधि अधिकाम् ॥५॥ गौ प्रशस्ता या गङ्गा । उभयत्र अन्तर्बहिश्च । कीदृशी । लसच्छ्रिया तुलस्या व्यामिश्रैः रेणुभि परागैः अभ्यधिकम् अतीवोत्कृष्टं पापनाशकं यत् अम्बु तस्य नेत्री प्रवाहकर्त्री । मरिष्यमाणः आसन्नमृत्युः । ईशैः लोकपालैः सहितान् ॥६॥ पाण्डवेयः परीक्षित् प्रायोपवेशम् आमरणम् अनशनं प्रति इति इत्थं व्यवस्य निश्चित्य मुकुन्दाङ्घ्रिं दध्यौ इत्यन्वयः । गङ्गातटे । व्रतं शमदमादि ॥७॥ तीर्थाभिगमापदेशैः तीर्थयात्राव्याजैः ॥८॥ अत्रिरिति त्रयम् । अत्र्यादयः नारदान्ताः पञ्चविंशतिः । गाधिसुतः विश्वामित्रः । रामः परशुरामः । कुम्भयोनिः अगस्त्यः । महर्षि । इति पाठः ॥९।१०।११॥ विविक्तं भगवन्निष्ठम् । अभिगृहीतपाणिः

राजोवाच

अहो वयं धन्यतमा नृपाणां महत्तमानुग्रहणीयशीलाः ।
राज्ञां कुलं ब्राह्मणपादशौचाद् दूरात् विसृष्टं बत गर्ह्यकर्म ॥१३॥
तस्यैव मेऽघस्य परावरेशो व्यासक्तचित्तस्य गृहेष्वभीक्ष्णम् ।
निर्वेदमूलो द्विजशापरूपो यत्र प्रसक्तो भयमाशु धत्ते ॥१४॥
तं मोपयातं प्रतियन्तु विप्रा गङ्गा च देवी धृतचित्तमीशे ।
द्विजोपसृष्टः कुहकस्तक्षको वा दशत्वलं गायत विष्णुगाथाः ॥१५॥
पुनश्च भूयाद् भगवत्यनन्ते रतिः प्रसङ्गश्च तदाश्रयेषु ।
महत्सु यां यामुपयामि सृष्टिं मैत्र्यस्तु सर्वत्र नमो द्विजेभ्यः ॥१६॥
इदि स्म राजाध्यवसाययुक्तः प्राचीनमूलेषु कुशेषु धीरः ।
उदङ्मुखो दक्षिणकूल आस्ते समुद्रपत्न्याः स्वसुतन्यस्तभारः ॥१७॥
एवं च तस्मिन्नरदेवदेवे प्रायोपविष्टे दिवि देवसंङ्घाः ।
प्रशस्य भूमौ व्यकिरन् प्रसूनैर्मुदा मुहुर्दुन्दुभयश्च नेदुः ॥१८॥
महर्षयो वै समुपागता ये प्रशस्य साध्वित्यनुमोदमानाः ।
ऊचुः प्रजानुग्रहशीलसारा यदुत्तमश्लोकगुणाभिरूपम् ॥१९॥

बद्धाञ्जलिः सन् । यत् तदित्यन्वयः ॥१२॥ नृपाणां मध्ये । महद्भिः भवद्भिः अनुग्रहणीयं शीलं सद्वृत्तं येषां ते तथाभूता वयम् । विसृष्टं[1] त्यक्तं भवति । यद्वा । पादशौचात् पादप्रक्षालनतोयात् विसृष्टं दैवेन अपनीतं विमुखीकृतं चेत् तर्ह्येव गर्ह्यकर्म भवति ॥१३॥ अघस्य पापमूर्तेः मे ईशो भगवानेव शापरूपः सन् प्रकटोऽभूत् । यत्र शापे सति गृहेषु सक्तो भयम् ईशे च[2] अभयं धत्ते प्राप्नोति । निर्वेदमूलः वैराग्यहेतुः । परे ब्रह्मादयः अवरे अस्मदादयस्तेषां सर्वेषां ईशो नियन्ता ॥१४॥ मा. उपयातं मां शरणागतं प्रतियन्तु जानन्तु । गङ्गा च प्रत्येतु जानातु । उपसृष्टः प्रेरितः कुहकः वेषान्तरधारी सन् । साक्षात् वा ॥१५॥ पुनश्च भूयोऽपि कदाचित् यां यां सृष्टिं योनिमुपयामि तत्र तत्र सर्वत्र रतिः भक्तेषु प्रसङ्गः मैत्री चास्तु इत्यन्वयः ॥१६॥ अध्यवसायो निश्चयः तद्युक्तः राजा समुद्रपत्न्या गङ्गाया दक्षिणतटे आस्ते स्मेत्यन्वयः । प्राचीनमूलेषु प्रागग्रभागेषु कुशेषु । भारो राज्यभारः ।१७। प्रशस्य संश्लाघ्य । व्यकिरन् वृष्टिमकुर्वन् ।१८। साधु कृतं साधु कृतमिति । प्रजानुग्रहे शीलं स्वभावः सारो बलं च येषाम् । गुणानुरूपं

१–दूरादुच्छिष्टविण्मूत्रपादाम्भांसि समुत्सृजेत् इति स्मृतेः ।
२–अकारप्रश्लेषेणायमर्थः ।

न वा इदं राजर्षिवर्य चित्रं भवत्सु कृष्णं समनुव्रतेषु ।
येऽध्यासनं राजकिरीटजुष्टं सद्यो जहुर्भगवत्पार्श्वकामाः ॥२०॥

सर्वे वयं तावदिहास्महेऽद्य कलेवरं यावदसौ विहाय ।
लोकं परं विरजस्कं विशोकं यास्यत्ययं भागवतप्रधानः ॥२१॥

आश्रुत्य तेषां वचनं परीक्षित्समं मधुच्युद् गुरु चाव्यलीकम् ।
आभाषतैनानभिनन्द्य युक्तं शुश्रूषमाणश्चरितानि विष्णोः ॥२२॥

समागताः सर्वत एव सर्वे वेदा यथा मूर्तिधरास्त्रिपृष्ठे ।
नेहाथवामुत्र च कश्चनार्थ ऋते परानुग्रहमात्मशीलम् ॥२३॥

ततश्च वः पृच्छ्यमिमं विपृच्छे विस्रभ्य विप्रा इतिकृत्यतायाम् ।
सर्वात्मना म्रियमाणैश्च कृत्यं शुद्धं च तत्रामृशताभियुक्ताः ॥२४॥

तत्राभवद् भगवान् व्यासपुत्रो यदृच्छया गामटमानोऽनपेक्षः ।
अलक्ष्यलिङ्गो निजलाभतुष्टो वृतः स्त्रिबालैरवधूतवेषः ॥२५॥

तं द्व्यष्टवर्षं सुकुमारपादकरोरुबाह्वंसकपोलगात्रम् ।
चार्वायताक्षोन्नसतुल्यकर्णसुभ्र्वाननं कम्बुसुजातकण्ठम् ॥२६॥

निगूढजत्रुं पृथुतुङ्गवक्षसमावर्तनाभिं वलिवल्गूदरं च ।
दिगम्बरं वक्त्रविकीर्णकेशं प्रलम्बबाहुं स्वमरोत्तमाभम् ॥२७॥

गुणप्रकटानुकूलं यद्वचः तदेवोचुरित्यन्वयः ॥१९॥ न वै नैव । चित्रमाश्चर्यम् अध्यासनं सिंहासनम् ॥२०॥ परस्परं मन्त्रणां कुर्वते सर्वे इति । यावत् परं दिव्यं लोकम् अयं यास्यति तावत् सर्वे वयम् इहाद्य इहैव आस्महे स्थास्यामः ॥२१॥ समं पक्षपातशून्यम् । मधुच्युत् अमृतस्राविं गुरु गम्भीराशयम् । अव्यलीकं सत्यं युक्तं समयोपयोगि च यत् तदभाषतेत्यन्वयः ॥२२॥ त्रयाणां लोकानां पृष्ठे उपरि सत्यलोके । वेदाः तत्तुल्या भवन्तः । परेषु दीनेषु अनुग्रहम् ऋते विना इह परत्र परलोके च भवतां कश्चन अर्थः प्रयोजनं नास्ति । आत्मशीलं स्वतः सिद्धस्वभावम् ॥२३॥ हे अभियुक्ता विद्वांसः । विस्रभ्य विश्वस्य वः युष्मान् प्रच्छ्यं प्रष्टव्यमर्थम् । इतिकृत्यतायाम् अन्तकालिकर्तव्यतायाम् । शुद्धं शास्त्र सम्मतं च यत्कृत्यं तत्र विषये आमृशत विचार्य उपदिशत ॥२४॥ तत्र तेषु परस्परं विवदमानेषु कृत्यानिर्णयात् । अभवत् [१] प्राप्तः । गां पृथ्वीम् अटमानः परिभ्रमन् । अवधूतानां वेषो यस्य । अवधूतः त्यक्तः वेषः ज्ञापकचिह्नं वा येन ॥२५॥ तमिति त्रयम् । तं षोडशवर्षीयं दृष्ट्वा ते मुनयः प्रत्युत्थिताः उत्थाय स्वागतं चक्रुः । सुकुमाराणि पादादीनि यस्य । चारुणी आयते विशाले अक्षिणी यस्मिन् उन्नता

१–भू प्राप्तौ इत्यस्मात् ।

श्यामं सदापीच्यवयोऽङ्गलक्ष्म्या स्त्रीणां मनोज्ञं रुचिरस्मितेन।
प्रत्युत्थितास्ते मुनयः स्वासनेभ्यस्तल्लक्षणज्ञा अपि गूढवर्चसम् ॥२८॥

स विष्णुरातोऽतिथये गताय तस्मै सपर्यां शिरसाऽऽजहार ।
ततो निवृत्ता ह्यबुधाः स्त्रियोऽर्भका महासने सोपविवेश पूजितः ॥२९॥

स संवृतस्तत्र महान् महीयसां ब्रह्मर्षिराजर्षिदेवर्षिसंघैः ।
व्यरोचतालं भगवान् यथेन्दुर्ग्रहर्क्षतारानिकरैः परीतः ॥३०॥

प्रशान्तमासीनमकुण्ठमेधसं मुनिं नृपो भागवतोऽभ्युपेत्य ।
प्रणम्य मूर्ध्नाऽवहितः कृताञ्जलिर्नत्वा गिरा सूनृतयान्वपृच्छत् ॥३१॥

परीक्षिदुवाच

अहो अद्य वयं ब्रह्मन् सत्सेव्याः क्षत्रबन्धवः । कृपयातिथिरूपेण भवद्भिस्तीर्थका: कृताः ॥३२॥
येषां संस्मरणात् पुंसां सद्यः शुद्धचन्ति वै गृहाः । किं पुनर्दर्शनस्पर्शपादशौचासनादिभिः ॥३३॥
सांनिध्यात्ते महायोगिन् पातकानि महान्त्यपि । सद्यो नश्यन्ति वै पुंसां विष्णोरिव सुरेतराः ॥३४
अपि मे भगवान् प्रीतः कृष्णः पाण्डुसुतप्रियः । पैतृष्वसेयप्रीत्यर्थं तद्गोत्रस्यात्तबान्धवः ॥३५॥
अन्यथा तेऽव्यक्तगतेर्दर्शनं नः कथं नृणाम् । नितरां म्रियमाणानां संसिद्धस्य वनीयसः ॥३६॥
अतः पृच्छामि संसिद्धिं योगिनां परमं गुरुम् । पुरुषस्येह यत्कार्यं म्रियमाणस्य सर्वथा ॥३७॥
यच्छ्रोतव्यमथो जप्यं यत्कर्तव्यं नृभिः प्रभो । स्मर्तव्यं भजनीयं वा ब्रूहि यद्वा विपर्ययम् ॥३८॥

नासा यस्मिन् तुल्यौ कर्णौ यस्मिन् शोभनौ भ्रुवौ यस्मिन् एवंभूतमाननं यस्य। कम्बुः शंखस्तद्वत् रेखात्रयाङ्कितः सुन्दरः कण्ठो यस्य । निगूढे जत्रुणी यस्य । आवर्तवत् गम्भीरां नाभिर्यस्य। वलिभिस्त्रिभिः वल्गु सुन्दरमुदरं यस्य। स्वमरेषु देवश्रेष्ठेषु उत्तमो हरिस्तद्वत् आभा यस्य। अपीच्यमतिसुन्दरं यत्तारुण्यं तेन या अङ्गकान्तिः तया ॥२६।२७।२८॥ विष्णुरातः परीक्षित् गताय प्राप्ताय। सपर्यां पूजाम् आजहार कृतवान् ॥२९॥ तत्र उपविष्टः। ब्रह्मर्ष्यादिभिः संवृतः सन् सः अलं व्यरोचत। ग्रहाः सोमादयः ऋक्षाणि अश्विन्यादीनि ताराः ध्रुवागस्त्यादयः ॥ ३० ॥ अकुण्ठा अप्रतिहता मेधा यस्य। सूनृतया मधुरया ॥३१॥ बन्धवः अपराधिनोऽपि । तीर्थकाः कृताः पवित्रीकृताः ॥३२।३३॥ विष्णोः सन्निध्यात् असुरा इव ॥३४॥ पितृष्वसुः कुन्त्याः पुत्राः पाण्डवाः। तद्गोत्रस्य मे आत्तं स्वीकृतं बन्धुवत्कृत्यं स्वयं दर्शनादि येन ॥३५॥ वनमस्यास्तीति वनी वनवासी अतिशयेन वनी वनीयानिति सरलार्थः ॥ ३६ ॥ सम्यक् सिद्धिः भगवत्प्राप्तिः यस्मात्तम् ॥ ३७ ॥ जाप्यं जपितुं योग्यम् स्वार्थेऽण्

नूनं भगवतो ब्रह्मन् गृहेषु गृहमेधिनाम् । न लक्ष्यते ह्यवस्थानमपि गोदोहनं क्वचित् ॥३९॥

सूत उवाच

एवमाभाषितः पृष्टः स राज्ञा श्लक्ष्णया गिरा । प्रत्यभाषत धर्मज्ञो भगवान् बादरायणिः॥४०॥

इति श्रीमद्भागवते महापुराणे वैयासिक्यामष्टादशसाहस्र्यां पारमहंस्यां संहितायां प्रथमस्कन्धे शुकागमनं नामैकोनविंशोऽध्यायः ॥१९॥

विपर्ययम् अश्रोतव्यादि ॥ ३८ ॥ गोदोहनमात्रकालमपि ॥३९॥ श्लक्ष्णया मधुरया गिरा आभाषितः स्वाभिमुखीकृतः पृष्टश्च ॥४०॥

इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धे श्रीसनाढ्यवंशावतंसपण्डितप्रवरश्रीराममूर्ति शास्त्रिपौराणिकविरचितायां गूढार्थदीपिन्यामेकोनविंशोऽध्यायः ।

इति प्रथमः स्कन्धः समाप्तः ।

द्वितीयः स्कन्धः

अथ प्रथमोऽध्यायः

श्रीशुक उवाच

वरीयानेष ते प्रश्नः कृतो लोकहितं नृप । आत्मवित्सम्मतः पुंसां श्रोतव्यादिषु यः परः ॥१॥
श्रोतव्यादीनि राजेन्द्र नृणां सन्ति सहस्रशः । अपश्यतामात्मतत्त्वं गृहेषु गृहमेधिनाम् ॥२॥
निद्रया ह्रियते नक्तं व्यवायेन च वा वयः । दिवा चार्थेहया राजन् कुटुम्बभरणेन वा ॥३॥
देहापत्यकलत्रादिष्वात्मसैन्येष्वसत्स्वपि । तेषां प्रमत्तो निधनं पश्यन्नपि न पश्यति ॥४॥
तस्माद् भारत सर्वात्मा भगवानीश्वरो हरिः । श्रोतव्यः कीर्तितव्यश्च स्मर्तव्यश्चेच्छताभयम्॥५
एतावान् सांख्ययोगाभ्यां स्वधर्मपरिनिष्ठया । जन्मलाभः परः पुंसामन्ते नारायणस्मृतिः ॥६।
प्रायेण मुनयो राजन् निवृत्ता विधिषेधतः । नैर्गुण्यस्था रमन्ते स्म गुणानुकथने हरेः ॥७॥
इदं भागवतं नाम पुराणं ब्रह्मसम्मितम् । अधीतवान् द्वापरादौ पितुर्द्वैपायनादहम् ।८॥
परिनिष्ठितोऽपि नैर्गुण्य उत्तमश्लोकलीलया । गृहीतचेता राजर्षे आख्यानं यदधीतवान् ॥९॥

सृष्टिमोहमपाकर्तुं तपसि प्रेरयन् विधिम् ।
प्रोक्तवान् यश्चतुःश्लोकीं तं श्रीनारायणं भजे ॥

प्रथमे भगवन्नामकीर्तनादिभिराहृतम् ।
ब्रह्माण्डविग्रहे चित्तं धारयेदिति वर्ण्यते ॥

लोकहितं प्रति ते त्वया कृतः एष प्रश्नः वरीयान् अतिश्रेष्ठः[1] । यतः परः सारभूतः ॥ १ ॥ गृहेषु मेधा बुद्धिः मेधो हिंसा पञ्चसूना एषामस्तीति तेषां गृहेषु सहस्रशः सन्तीत्यन्वयः ॥ २ ॥ नक्तं रात्रौ यद्वयः तन्निद्रया मैथुनेन च ह्रियते इत्यन्वयः ॥ ३ ॥ असत्स्वपि नश्वरेष्वपि आत्मनो निधनं न पश्यति । यतः प्रमत्तः ॥ ४ ॥ अभयं मोक्षमिच्छता जनेन ॥ ५ ॥ सांख्यं तत्त्वविचारः योगोऽष्टाङ्गः ताभ्यां स्वधर्मे भक्तियोगे या निष्ठा तया च यत्स्मृतिः एतावानेव लाभः जन्मफलम् ॥ ६ ॥ स्म प्रसिद्धौ ॥ ७ ॥ ब्रह्म श्रीकृष्णतत्त्वं मितं ज्ञातं येन तत् । वेदतुल्यं वा । द्वापरः आदिर्यस्य सन्ध्यांशस्य तस्मिन् द्वापरान्ते इत्यर्थः ॥ ८ ॥ परिनिष्ठित इति द्वयम् महापुरुषं श्रीकृष्णं प्राप्तुमर्हतीति महा-

---

१—वर्णाश्रमसम्बन्धी प्रश्नः वरः । स्वाश्रमसम्बन्धी वरतरः । तदाचरणसम्बन्धी वरतमः । साक्षाद्भगवद्विषयकः प्रश्नः वरीयान् इति चतुर्थकोटौ यैं ईयसुन् प्रत्ययः ।

तदहं तेऽभिधास्यामि महापौरुषिको भवान्। यस्य श्रद्दधतामाशु स्यान्मुकुन्दे मतिः सती ॥१०॥
एतन्निर्विद्यमानानामिच्छतामकुतोभयम्। योगिनां नृप निर्णीतं हरेर्नामानुकीर्तनम् ॥११॥
किं प्रमत्तस्य बहुभिः परोक्षैर्हायनैरिह। वरं मुहूर्तं विदितं घटेत श्रेयसे यतः ॥१२॥
खट्वाङ्गो नाम राजर्षिर्ज्ञात्वेयत्तामिहायुषः। मुहूर्तात् सर्वमुत्सृज्य गतवानभयं हरिम् ॥१३॥
तवाप्येतर्हि कौरव्य सप्ताहं जीविताविधिः। उपकल्पय तत्सर्वं तावद् यत्साम्परायिकम् ॥१४॥
अन्तकाले तु पुरुष आगते गतसाध्वसः। छिन्द्यादसङ्गशस्त्रेण स्पृहां देहेऽनु ये च तम् ॥१५॥
गृहात् प्रव्रजितो धीरः पुण्यतीर्थजलाप्लुतः। शुचौ विविक्त आसीनो विधिवत् कल्पितासने १६
अभ्यसेन्मनसा शुद्धं त्रिवृद्ब्रह्माक्षरं परम्। मनो यच्छेज्जितश्वासो ब्रह्मबीजमविस्मरन् ॥१७॥
नियच्छेद् विषयेभ्योऽक्षान्मनसा बुद्धिसारथिः। मनः कर्मभिराक्षिप्तं शुभार्थे धारयेद् धिया १८
तत्रैकावयवं ध्यायेदव्युच्छिन्नेन चेतसा। मनो निर्विषयं युक्त्वा ततः किंचन न स्मरेत्।
पदं तत्परमं विष्णोर्मनो यत्र प्रसीदति ॥१९॥
रजस्तमोभ्यामाक्षिप्तं विमूढं मन आत्मनः। यच्छेद् धारणया धीरो हन्ति या तत्कृतं मलम् २०
यस्यां संधार्यमाणायां योगिनो भक्तिलक्षणः। आशु सम्पद्यते योग आश्रयं भद्रमीक्षतः ॥२१॥

राजोवाच

यथा संधार्यते ब्रह्मन् धारणा यत्र सम्मता। यादृशी वा हरेदाशु पुरुषस्य मनोमलम् ॥२२॥

श्रीशुक उवाच

जितासनो जितश्वासो जितसङ्गो जितेन्द्रियः। स्थूले भगवतो रूपे मनः संधारयेद् धिया ॥२३॥
विशेषस्तस्य देहोऽयं स्थविष्ठश्च स्थवीयसाम्। यत्रेदं दृश्यते विश्वं भूतं भव्यं भवच्च सत् २४
आण्डकोशे शरीरेऽस्मिन् सप्तावरणसंयुते। वैराजः पुरुषो योऽसौ भगवान् धारणाश्रयः २५

पौरुषिकः। यस्य यस्मिन् भागवते। सती निश्चला ॥ ९।१० ॥ इच्छतां कामिनां निर्विद्यमानानां मुमुक्षूणां योगिनां ज्ञानिनां च सर्वेषामभीष्टदमेतदेव निर्णीतम् ॥ ११ ॥ परोक्षैः व्यतीतैः। हायनैः वर्षैः। विदितं वृथा यातीति ज्ञातं। घटेत यतेत ॥ १२ ॥ इयत्तां परिमाणम् ॥ १३ ॥ अपिस्त्वर्थे एतर्हि इदानीम्। साम्परायिकं पारलौकिककृत्यं ॥ १४ ॥ गतसाध्वसः निर्भयः सन्। तं देहमनुवर्तन्ते ये पुत्रादयः तेष्वपि। असङ्गो वैराग्यम् ॥ १५ ॥ गृहादिति द्वयम्। आप्लुतः कृतस्नानः। त्रिभिरकारादिभिः वृत् वर्तनं ग्रथनं यस्य। ब्रह्माक्षरं प्रणवम्। बीज प्रणवम् ॥ १६।१७ ॥ अक्षान् इन्द्रियाणि। बुद्धि; सारथिः सहायकारिणी यस्य। आक्षिप्तम् आकृष्टम् शुभार्थे भगवद्रूपे ॥ १८ ॥ युक्त्वा कृत्वा। ङ्कारररहितः पाठः साधुः। अव्युच्छिन्नेन निश्चलेन ॥ १९ ॥ पदमिति सार्द्धम्। तत्कृतं गुणद्वयकृतं रागादिकम् ॥ २० ॥ यस्यां धारणायाम्। भद्रमाश्रयं भगवद्रूपम् ॥ २१ ॥ हरेत् एतत्सर्वं ब्रूहीति क्रियाशेषः। मलं वासनालक्षणम् ॥ २२।२३ ॥ विशेषः ब्रह्माण्डरूपः। भूतभविष्यद्वर्तमानम्। सव कार्यमात्रम् ॥ २४ ॥ भूताऽहङ्कारमहत्तत्त्वानि सप्त। विशेषतो राजते इति विराट् तत्रोपास्यतया भवो

पातालमेतस्य हि पादमूलं पठन्ति पार्ष्णिप्रपदे रसातलम् ।
महातलं विश्वसृजोऽथ गुल्फौ तलातलं वै पुरुषस्य जङ्घे ॥ २६ ॥
द्वे जानुनी सुतलं विश्वमूर्तेरूरुद्वयं वितलं चातलं च ।
महीतलं तज्जघनं महीपते नभस्तलं नाभिसरो गृणन्ति ॥ २७ ॥
उरःस्थलं ज्योतिरनीकमस्य ग्रीवा महर्वदनं वै जनोऽस्य ।
तपो रराटीं विदुरादिपुंसः सत्यं तु शीर्षाणि सहस्रशीर्ष्णः ॥ २८ ॥
इन्द्रादयो बाहव आहुरुस्राः कर्णौ दिशः श्रोत्रममुष्य शब्दः ।
नासत्यदस्रौ परमस्य नासे घ्राणोऽस्य गन्धो मुखमग्निरिद्धः ॥ २९ ॥
द्यौरक्षिणी चक्षुरभूत् पतङ्गः पक्ष्माणि विष्णोरहनी उभे च ।
तद् भ्रूविजृम्भः परमेष्ठिधिष्ण्यमापोऽस्य तालू रस एव जिह्वा ॥ ३० ॥
छन्दांस्यनन्तस्य शिरो गृणन्ति दंष्ट्रा यमः स्नेहकला द्विजानि ।
हासो जनोन्मादकरी च माया दुरन्तसर्गो यदपाङ्गमोक्षः ॥ ३१ ॥
व्रीडोत्तरोष्ठोऽधर एव लोभो धर्मः स्तनोऽधर्मपथोऽस्य पृष्ठः ।
कस्तस्य मेढ्रं वृषणौ च मित्रौ कुक्षिः समुद्रा गिरयोऽस्थिसंघाः ॥ ३२ ॥
नद्योऽस्य नाड्योऽथ तनूरुहाणि महीरुहा विश्वतनोर्नृपेन्द्र ।
अनन्तवीर्यः श्वसितं मातरिश्वा गतिर्वयः कर्म गुणप्रवाहः ॥ ३३ ॥
ईशस्य केशान् विदुरम्बुवाहान् वासस्तु संध्यां कुरुवर्य भूम्नः ।
अव्यक्तमाहुर्हृदयं मनश्च स चन्द्रमाः सर्वविकारकोशः ॥ ३४ ॥
विज्ञानशक्तिं महिमामनन्ति सर्वात्मनोऽन्तःकरणं गिरित्रम् ।
अश्वाश्वतर्युष्ट्रगजा नखानि सर्वे मृगाः पशवः श्रोणिदेशे ॥ ३५ ॥

वैराजः ॥ २५ ॥ पठन्ति वेदाः । पार्ष्णिः पादपृष्ठभागः । प्रपदमग्रभागः ॥२६॥ गृणन्ति वदन्ति ॥२७॥ ज्योतिरनीकं ज्योतिश्चक्रं स्वर्गलोकः । ग्रीवा महर्लोकः । वदनं जनलोकः । रराटीं ललाटं तपोलोकः ॥ २८ ॥ उस्राः देवाः तेजोममत्वात् । इति आहुः । नासत्यदस्रौ अश्विनौ दिशो देवता : अस्य कर्णौ श्रोत्रेन्द्रियस्याधिष्ठानम् । इद्धः दीप्तः । नासे नासिके ॥ २९ ॥ द्यौः अन्तरिक्षं तत्रत्यः सूर्यः । अक्षिणी नेत्रगोलके । पतङ्गो रूपं चक्षुरिन्द्रियम् । अहनी रात्र्यहनी । नपुंसकशेषः । आपो वरुणः ॥ ३० ॥ छन्दांसि गायत्र्यादीनि । शिरः ब्रह्मरन्ध्रम् । स्नेहकलाः मोहादयः द्विजा दन्ताः । दुरन्तोऽपारः ॥ ३१ ॥ मित्रौ मित्रावरुणौ । कः प्रजापतिः ॥ ३२ ॥ मातरिश्वा वायुः श्वसितं प्राणः । वयः कालः । गुणप्रवाह संसारः अस्य कर्म क्रीडा । ॥ ३३ ॥ सन्ध्याम् अस्य वासः पीताम्बरम् । अव्यक्तं मूलप्रकृतिम् । विकारः कामादिरूपः ॥ ३४ ॥ महिं महत्तत्त्वं तस्य विज्ञानशक्तिं चित्तं कथयन्ति । श्रोणिदेशे ज्ञेयाः ततो जाता

वयांसि तद्व्याकरणं विचित्रं मनुर्मनीषा मनुजो निवासः ।
गन्धर्वविद्याधरचारणाप्सरः स्वरस्मृतिरसुरानीकवर्यः ॥ ३६ ॥

ब्रह्माननं क्षत्रभुजो महात्मा विड्रूरङ्घ्रिश्रितकृष्णवर्णः ।
नानाभिधाभीज्यगणोपपन्नो द्रव्यात्मकः कर्म वितानयोगः ॥ ३७ ॥

इयानसावीश्वरविग्रहस्य यः संनिवेशः कथितो मया ते ।
संधार्यतेऽस्मिन् वपुषि स्थविष्ठे मनः स्वबुद्ध्या न यतोऽस्ति किंचित् ॥ ३८ ॥

स सर्वधीवृत्त्यनुभूतसर्व आत्मा यथा स्वप्नजनेक्षितैकः ।
तं सत्यमानन्दनिधिं भजेत नान्यत्र सज्जेद् यत आत्मपातः ॥३९॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां द्वितीयस्कन्धे महापुरुषसंस्थानुवर्णने प्रथमोऽध्यायः ॥१॥

इत्यर्थः । अश्वतरी गर्दभाद्वडवायामुत्पन्ना (खच्चरी) ॥ ३५ ॥ वयांसि पक्षिणः तस्य व्याकरणं शिल्पनैपुण्यम् । गन्धर्वादयः षड्जादिस्वरः । असुरानीकेषु वर्यः श्रेष्ठः प्रह्लादः तस्य स्मृतिः ॥ ३६ ॥ ब्रह्मा ब्राह्मणः । क्षत्रं क्षत्रियः भुजो यस्य । विट् वैश्यः ऊरू यस्य । अङ्घ्रिश्रितः कृष्णवर्णः शूद्रो यस्य सः एवंभूतो महात्मा विराट् पुरुषः तस्य वितानयोगः यज्ञप्रयोगः कर्म । द्रव्यात्मकः हविःसाध्यः । कथंभूतो महात्मा । नानाभिधा नानानामका ये अभीज्याः पूज्या देवगणास्तैरुपपन्नः ॥ ३७ ॥ यः सन्निवेशः अवयवरचनाविशेषः कथितः सोऽसौ एतावानेव ॥ ३८ ॥ यथा स्वप्ने कल्पितानां जनानामेक एव ईक्षिता जीवः अस्ति तथा भगवानपि एक एव तं भजेतेत्यन्वयः । कथंभूतः सर्वेषां धीवृत्तिभिरनुभूतं सर्वं चराचरं येन सः । आत्मपातः संसारः ।

इति श्रीमद्भागवते महापुराणे द्वितीयस्कन्धे गूढार्थदीपिन्यां प्रथमोऽध्यायः ॥ १ ॥

अथ द्वितीयोऽध्यायः

श्रीशुक उवाच

एवं पुरा धारणयाऽऽत्मयोनिर्नष्टां स्मृतिं प्रत्यवरुध्य तुष्टात्।
तथा ससर्जेदममोघदृष्टिर्यथाप्ययात् प्राग्व्यवसायबुद्धिः॥ १॥
शाब्दस्य हि ब्रह्मण एष पन्था यन्नामभिर्ध्यायति धीरपार्थैः।
परिभ्रमंस्तत्र न विन्दतेऽर्थान् मायामये वासनया शयानः॥ २॥
अतः कविर्नामसु यावदर्थः स्यादप्रमत्तो व्यवसायबुद्धिः।
सिद्धेऽन्यथार्थे न यतेत तत्र परिश्रमं तत्र समीक्षमाणः॥ ३॥
सत्यां क्षितौ किं कशिपोः प्रयासैर्बाहौ स्वसिद्धे ह्युपबर्हणैः किम्।
सत्यञ्जलौ किं पुरुधान्नपात्र्या दिग्वल्कलादौ सति किं दुकूलैः॥ ४॥
चीराणि किं पथि न सन्ति दिशन्ति भिक्षां नैवाङ्घ्रिपाः परभृतः सरितोऽप्यशुष्यन्।
रुद्धा गुहाः किमजितोऽवति नोपसन्नान् कस्माद् भजन्ति कवयो धनदुर्मदान्धान्॥५॥
एवं स्वचित्ते स्वत एव सिद्ध आत्मा प्रियोऽर्थो भगवाननन्तः।
तं निर्वृतो नियतार्थो भजेत संसारहेतूपरमश्च यत्र॥ ६॥
कस्तां त्वनादृत्य परानुचिन्तामृते पशूनसतीं नाम युञ्ज्यात्।
पश्यञ्जनं पतितं वैतरण्यां स्वकर्मजान् परितापाञ्जुषाणम्॥ ७॥

द्वितीये श्रीहरेन्तर्हृदये धारणाविदः।
मुमुक्षोरात्मलाभाय द्वे सृती समुपादिशत्॥१॥

एवं धारणया तुष्टात् हरेः पुरा प्रलये नष्टां स्मृतिं प्रत्यवरुध्य पुनः प्राप्य आत्मयोनिः ब्रह्मा अप्ययात् प्रलयात् प्राक् इदं विश्वं यथा आसीत् तथा ससर्जेत्यन्वयः। व्यवसाये सृष्टिविषयकनिश्चये॥ १॥ शब्दमयस्य ब्रह्मणः वेदस्य एष पन्थाः। कः। नाममात्रैः स्वर्गादिभिः साधकस्य धीः ध्यायतीति तत्तत्फलेच्छां करोतीति यत् स एषः। यतोऽपार्थैः नश्वरैः। तत्र स्वर्गादौ सुखमिति वासनया शयानः स्वप्नान् पश्यन्निव परिभ्रमन् न विन्दते इत्यन्वयः॥ २॥ नाममात्रेषु भोग्यवस्तुषु यावता अर्थेन अर्थो देहनिर्वाहो यस्य तथाभूतः स्यात्। नेदं सुखमिति व्यवसाये निश्चये। अन्यथा प्रकारान्तरेण॥ ३॥ कशिपोः शय्यायाः। उपबर्हणैः शिरःपीठैः। पुरुधा बहुधा। पात्र्या पात्रेण। 'पात्र्यमत्रे त्रिषु' इति कोशात्॥ ४॥ अङ्घ्रिपा वृक्षाः। परान् बिभ्रतीति परभृतः। उभयोर्विशेषणम्[1]। अजितः श्रीकृष्णः। उपसन्नान् शरणागतान्॥ ५॥ एवं नियतोऽनायाससिद्धोऽर्थो देहनिर्वाहरूपो यस्य। सिद्धः स्थितः। निर्वृतः, सानन्दः सन् तं भजेत्। यत्र भजने। हेतुः अविद्या॥ ६॥ परस्य हरेः अनुचिन्ताम्। असतीं

१—देहलीदीपकन्यायेन उभयत्रान्वेति।

केचित्स्वदेहान्तर्हृदयावकाशे प्रादेशमात्रं पुरुषं वसन्तम् ।
चतुर्भुजं कञ्जरथाङ्गशङ्खगदाधरं धारणया स्मरन्ति ॥ ८ ॥
प्रसन्नवक्त्रं नलिनायतेक्षणं कदम्बकिञ्जल्कपिशङ्गवाससम् ।
लसन्महारत्नहिरण्मयाङ्गदं स्फुरन्महारत्नकिरीटकुण्डलम् ॥ ९ ॥
उन्निद्रहृत्पङ्कजकर्णिकालये योगेश्वरास्थापितपादपल्लवम् ।
श्रीलक्ष्मणं कौस्तुभरत्नकन्धरमम्लानलक्ष्म्या वनमालयाऽऽचितम् ॥ १० ॥
विभूषितं मेखलयाङ्गुलीयकैर्महाधनैर्नूपुरकङ्कणादिभिः ।
स्निग्धामलाकुञ्चितनीलकुन्तलैर्विरोचमानाननहासपेशलम् ॥ ११ ॥
अदीनलीलाहसितेक्षणोल्लसद्भ्रूभङ्गसंसूचितभूर्यनुग्रहम् ।
ईक्षेत चिन्तामयमेनमीश्वरं यावन्मनो धारणयावतिष्ठते ॥ १२ ॥
एकैकशोऽङ्गानि धियानुभावयेत् पादादि यावद्धसितं गदाभृतः ।
जितं जितं स्थानमपोह्य धारयेत् परं परं शुद्ध्यति धीर्यथा यथा ॥१३॥
यावन्न जायेत परावरेऽस्मिन् विश्वेश्वरे द्रष्टरि भक्तियोगः ।
तावत्स्थवीयः पुरुषस्य रूपं क्रियावसाने प्रयतः स्मरेत ॥१४॥
स्थिरं सुखं चासनमास्थितो यतिर्यदा जिहासुरिममङ्ग लोकम् ।
काले च देशे च मनो न सज्जयेत् प्राणं नियच्छेन्मनसा जितासुः ॥१५॥
मनः स्वबुद्ध्यामलया नियम्य क्षेत्रज्ञ एतां निनयेत् तमात्मनि ।
आत्मानमात्मन्यवरुध्य धीरो लब्धोपशान्तिर्विरमेत कृत्यात् ॥१६॥

विषयचिन्तां कः कुर्यात् न कोऽपि । वैतरणी यमद्वारस्था नदी तत्तुल्या संसृतिः वैतरणी तस्याम् । पशून् विषयिणः ऋते ॥ ७ ॥ तर्जन्यङ्गुष्ठयोर्विस्तारः प्रादेशः स एव मात्रा परिमाणं यस्य । कञ्जं कमलम् ॥ ८ ॥ नलिनपत्रवत् आयते विशाले नेत्रे यस्य । कदम्बकेसरवत् पिशङ्गे वाससी यस्य । लसन्ति महारत्नानि येषु तानि कुण्डलानि यस्य । स्फुरन्महारत्नयुक्तं किरीटं कुण्डले च यस्य ॥ ९ ॥ विकसितहृत्कमलस्य कर्णिकैव आलयस्तस्मिन् । श्रीलक्ष्म रेखारूपं यस्य । पामादित्वात् न प्रत्ययः । आचितं व्याप्तम् । कुस्तुभात् समुद्राज्जातं कौस्तुभमिति तीर्थः । ॥ १० ॥ महाधनैः बहुमूल्यैः । स्निग्धादिविशेषणविशिष्टैः कुन्तलैः केशैः विरोचमाने आनने यो हासः तेन पेशलं सुन्दरम् ॥ ११ ॥ अदीनेन अतिमधुरेण मन्दस्मितेन युक्तं यदीक्षणं तेन उल्लसद्भिः भ्रूविक्षेपैः सम्यक् सूचितो भूर्यनुग्रहो येन । यावत् अवतिष्ठते तावत् ईक्षेत । चिन्ताया ध्यानात् आगतं चिन्तामयम्[1] ॥१२॥ अनुभावयेत् चिन्तयेत् । जितमभिव्यक्तम् । अपोह्य त्यक्त्वा । परं जङ्घादि ॥ १३ ॥ परे ब्रह्मादयः अवरे अर्वाचीनाः यस्मात् । अवसाने तत्पूर्त्यर्थम् ॥ १४ ॥ अङ्ग हे राजन् ! लोकं देहम् जितासुः जितप्राणः सन् प्राणम् इन्द्रियगणम् ॥ १५ ॥ एतां बुद्धिं क्षेत्रज्ञे आत्मनि जीवे तमात्मनं जीवम्

१—तत आगतः इत्यधिकारे मयट् ।

न यत्र कालोऽनिमिषां परः प्रभुः कुतो नु देवा जगतां य ईशिरे।
न यत्र सत्त्वं न रजस्तमश्च न वै विकारो न महान् प्रधानम् ॥१७॥
परं पदं वैष्णवमामनन्ति तद्यन्नेति नेतीत्यतदुत्सिसृक्षवः।
विसृज्य दौरात्म्यमनन्यसौहृदा हृदोपगुह्यार्हपदं पदे पदे ॥१८॥
इत्थं मुनिस्तूपरमेद् व्यवस्थितो विज्ञानदृग्वीर्यसुरन्धिताशयः।
स्वपार्ष्णिनाऽऽपीड्य गुदं ततोऽनिलं स्थानेषु षट्सून्नमयेज्जितक्लमः ॥१९॥
नाभ्यां स्थितं हृद्यधिरोप्य तस्मादुदानगत्योरसि तं नयेन्मुनिः।
ततोऽनुसंधाय धिया मनस्वी स्वतालुमूलं शनकैर्नयेत ॥२०॥
तस्माद् भ्रुवोरन्तरमुन्नयेत निरुद्धसप्तायतनोऽनपेक्षः।
स्थित्वा मुहूर्तार्धमकुण्ठदृष्टिर्निर्भिद्य मूर्धन् विसृजेत् परं गतः ॥२१॥
यदि प्रयास्यन्नृप पारमेष्ठ्यं वैहायसानामुत यद्विहारम्।
अष्टाधिपत्यं गुणसन्निवाये सहैव गच्छेन्मनसेन्द्रियैश्च ॥२२॥
योगेश्वराणां गतिमाहुरन्तर्बहिस्त्रिलोक्याः पवनान्तरात्मनाम्।
न कर्मभिस्तां गतिमाप्नुवन्ति विद्यातपोयोगसमाधिभाजाम् ॥२३॥
वैश्वानरं याति विहायसा गतः सुषुम्णया ब्रह्मपथेन शोचिषा।
विधूतकल्कोऽथ हरेरुदस्तात् प्रयाति चक्रं नृप शैशुमारम् ॥२४॥

आत्मनि ब्रह्मणि अवरुध्य एकीकृत्य कृत्यात् प्रयत्नात् ॥ १६ ॥ यत्र ब्रह्मणि अनिमिषां[1] देवानां परो नियन्ता कालोऽपि न प्रभुः न समर्थः। तत्र ये जगत्स्वेव ईशिरे नियन्त्रणं चक्रिरे ते देवाः कुतः प्रभवः स्युः। किञ्च यत्र सत्त्वादयोऽपि न प्रभवः। विकारोऽहङ्कारः। महत्तत्त्वं प्रकृतिश्च न क्रमेण ॥ १७ ॥ यत् यस्मात् नेति नेतीति कृत्वा अतत् जगत् त्यक्तुमिच्छवो ज्ञानिनः तत्परं श्रेष्ठं पदं स्वरूपं कथयन्ति। अतो दौरात्म्यमहङ्कारं विसृज्य तदेव अर्हपदं विष्णुपदं पदे पदे प्रतिक्षणं हृदा आलिङ्ग्य कृत्यात् विरमेदिति सम्बन्धः ॥ १८ ॥ उपरमेत् देहाच्च। सुरन्धिताशयः दग्धवासनः। स्थानेषु चक्रेषु। जितक्लमः निवृत्तश्रमः। अनिलम् उन्नमयेत् ऊर्ध्वं नयेत् ॥ १९ ॥ नाभ्यां मणिपूरचक्रे हृदि अनाहतचक्रे। उदानवायोर्गत्या संचारेण तं प्राणवायुम् उरसि विशुद्धाख्ये। मुखादिद्वारेण बहुधा निर्गमनशङ्कया शनकैरित्युक्तम् ॥ २० ॥ भ्रुवोरन्तरमाज्ञाचक्रम्। निरुद्धानि सप्त अस्वयनानि प्राणमार्गा येन। अनपेक्षश्चेत् परं ब्रह्म गतः सन् मूर्धन्[2] मूर्धानं ब्रह्मरन्ध्रं निर्भिद्य विसृजेत् स्थूलदेहमिति-शेषः। अकुण्ठदृष्टिः मार्गे समाहितदृष्टिः ॥ २१ ॥ पारमेष्ठ्यं ब्रह्मपदं। वैहायसानां देवानां विहार-स्थानं वा अष्टसिद्धियुक्तम्। किं बहुना गुणसन्निवाये ब्रह्माण्डे यत्र कुत्रापि प्रयास्यन् भवति तदा सूक्ष्मशरीरेण सहैव गच्छेदित्यन्वयः ॥ २२ ॥ पवनस्यान्तः आत्मा लिङ्गशरीरं येषाम् ॥ २३ ॥ वैश्वानरम् अग्निलोकम्। शोचिषा ज्योतिर्मय्या। विधूतकल्कः निरस्तपापः। शैशुमारं तदाश्रयं

१—मिषतेः क्विप्। २—सुपां सुलुक्।

तद्विश्वनाभिं त्वतिवर्त्य विष्णोरणीयसा विरजेनात्मनैकः ।
नमस्कृतं ब्रह्मविदामुपैति कल्पायुषो यद्विबुधा रमन्ते ॥२५॥
अथो अनन्तस्य मुखानलेन दन्दह्यमानं स निरीक्ष्य विश्वम् ।
निर्याति सिद्धेश्वरजुष्टधिष्ण्यं यद् द्वैपरार्ध्यं तद्‌ पारमेष्ठ्यम् ॥२६॥
न यत्र शोको न जरा न मृत्युर्नार्तिर्न चोद्वेग ऋते कुतश्चित् ।
यच्चित्ततोदः कृपयानिदंविदां दुरन्तदुःखप्रभवानुदर्शनात् ॥२७॥
ततो विशेषं प्रतिपद्य निर्भयस्तेनाऽऽत्मनापोऽनलमूर्तिरत्वरन् ।
ज्योतिर्मयो वायुमुपेत्य काले वाय्वात्मना खं बृहदात्मलिङ्गम् ॥२८॥
घ्राणेन गन्धं रसनेन वै रसं रूपं तु दृष्ट्या श्वसनं त्वचैव ।
श्रोत्रेण चोपेत्य नभोगुणत्वं प्राणेन चाकूतिमुपैति योगी ॥२९॥
स भूतसूक्ष्मेन्द्रियसंनिकर्षं मनोमयं देवमयं विकार्यम् ।
संसाद्य गत्या सह तेन याति विज्ञानतत्त्वं गुणसंनिरोधम् ॥३०॥
तेनात्मनाऽऽत्मानमुपैति शान्तमानन्दमानन्दमयोऽवसाने ।
एतां गतिं भागवतीं गतो यः स वै पुनर्नेह विषज्जतेऽङ्ग ॥३१॥
एते सृती ते नृप वेदगीते त्वयाभिपृष्टे ह सनातने च ।
ये वै पुरा ब्रह्मण आह पृष्ट आराधितो भगवान् वासुदेवः ॥३२॥

ज्योतिश्चक्रम् । उदस्तात्[1] उपरिस्थम् ॥ २४ ॥ विराट्पुरुषस्य नाभिस्थानीयम् । अणीयसा सूक्ष्मेण आत्मना शरीरेण । ब्रह्मविदां ऋषीणां लोकं महर्लोकम् । यत् यस्मिन् । विबुधा भृग्वादयः ॥२५॥ विश्वं त्रैलोक्यम् निरीक्ष्य । ततो महर्लोकात् उष्णीभूतात् । उ श्रेष्ठं यत् पारमेष्ठ्यं ब्रह्मपदं तत्प्रति निर्याति । तत्राप्यूष्मप्राप्तेः । कथंभूतम् । द्विपरार्द्धकालावस्थायि । धिष्ण्यं विमानम् ॥२६॥ कृपया चित्ततः हेतोः यत् दुःखम् अदः ऋते यत्र शोकादयो न सन्तीत्यन्वयः । इदं भगवतो ध्यानमजानतां प्राणिनां दुरन्तदुःखो यः प्रभवः पुनर्जन्म तस्यानुदर्शनात् या कृपा तया । यद्वा । चित्ततोदः मनःपीडा वा तुद व्यथने धातुः॥२७॥ततः सत्यलोकात् विशेषं पृथ्वीरूपतां ततः अपः तेजः प्राप्य ज्योतिर्मयः अनलमूर्तिः ततो वायुरूपेण बृहदात्मनः ब्रह्मणः लिङ्गं मूर्तिम् आकाशमुपैति॥२८॥श्वसनं स्पर्शम् । गुणं शब्दम् त्वप्रत्ययः स्वार्थे । प्राणेन तत्तत्कर्मेन्द्रियेण । आकूतिं तत्तत्क्रियाम् ॥ २९ ॥ भूतादीनां सन्निकर्षं लयस्थानं राजसं तामसं च मनसो देवानां च कारणत्वात् मनोमयं देवमयं च विकार्यं सात्त्विकाहङ्कारं प्राप्य तेन अहङ्कारेण सह गत्या गमनेन विज्ञानतत्त्वं महत्तत्त्व ततो गुणसन्निरोधं प्रधानं प्रकृतिं च याति ॥ ३० ॥ ततस्तेन आत्मना प्रधानरूपेण आनन्दमयः सन् उपाधीनाममवसाने आनन्दरूपमात्मनं परमात्मानमुपैति स च पुनर्न विषज्जते पुनर्नावर्तते ॥ ३१ ॥ अङ्ग हे नृप ! पृष्टो भगवान् पुरा ये ब्रह्मणे आह ते एव एते सृती मार्गौ मे मया

१—ऊपर्यर्थेऽव्ययमेतत् तस्याकृतिगणत्वात् ।

न ह्यतोऽन्यः शिवः पन्था विशतः संसृताविह । वासुदेवे भगवति भक्तियोगो यतो भवेत् ॥३३॥
भगवान् ब्रह्म कात्स्न्र्येन त्रिरन्वीक्ष्य मनीषया । तदध्यवस्यत्कूटस्थो रतिरात्मन् यतो भवेत्॥३४॥
भगवान् सर्वभूतेषु लक्षितः स्वात्मना हरिः । दृश्यैर्बुद्ध्यादिभिर्द्रष्टा लक्षणैरनुमापकैः ॥३५॥
तस्मात् सर्वात्मना राजन् हरिः सर्वत्र सर्वदा । श्रोतव्यः कीर्तितव्यश्च स्मर्तव्यो भगवान्नृणाम्॥३६

पिबन्ति ये भगवत आत्मनः सतां कथामृतं श्रवणपुटेषु सम्भृतम् ।
पुनन्ति ते विषयविदूषिताशयं व्रजन्ति तच्चरणसरोरुहान्तिकम् ॥३७॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां द्वितीयस्कन्धे पुरुषसंस्थावर्णनं नाम द्वितीयोऽध्यायः ॥२॥

अथ तृतीयोऽध्यायः

श्रीशुक उवाच

एवमेतन्निगदितं पृष्टवान् यद्भवान् मम । नृणां यन्म्रियमाणानां मनुष्येषु मनीषिणाम् ॥ १ ॥
ब्रह्मवर्चसकामस्तु यजेत ब्रह्मणस्पतिम् । इन्द्रमिन्द्रियकामस्तु प्रजाकामः प्रजापतीन् ॥ २ ॥

ते कथिते इत्यन्वयः । ह प्रसिद्धे । वै एवार्थे ॥३२॥ विशतः पुंसः । यतो लीलाश्रवणात् ॥३३॥ भगवान् ब्रह्मा त्रीन् वारान् ब्रह्म वेदं विचार्य तत् अध्यवस्यत् निश्चितवान् । आत्मन् आत्मनि हरौ ॥ ३४ ॥ द्रष्टा हरिः सर्वभूतेषु लक्षितोऽनुभूतो भवति । कथम् । स्वात्मना जीवान्तर्यामितया । कैः । दृश्यैः जडैः बुद्ध्यादिभिर्लक्षणैः । अस्त्येषां कश्चित् चेतयिता इत्येवंरूपैः । तथा अनुमानजनकलक्षणैश्च । बुद्ध्यादीनि कर्तृप्रयोज्यानि करणत्वात् वास्यादिवत् इत्येवं स्वतन्त्रं कर्तारं लक्षयन्ति ॥ ३५ ॥ नृणां नृभिः ॥ ३६ ॥ सतां सर्वस्वम् आत्मनः श्रीकृष्णस्य कथामृतं ये पिबन्ति[1] ते आशयमन्तःकरणं पुनन्ति तत्समीपे व्रजन्ति च । सतां सद्भिः संभृतं पूरितं वा । रुचिरा वृत्तम् ॥ ३७ ॥

इति श्रीमद्भागवते महापुराणे द्वितीयस्कन्धे गूढार्थदीपिन्यां द्वितीयोऽध्यायः ॥

तृतीये कामिनां तत्तत्फलायान्यसुरार्चनम् ।
किन्तु भक्तिं विना सर्वं व्यर्थमिन्द्रियचेष्टितम् ॥ १ ॥

मनुष्येषु ये मनीषिणः तत्रापि ये म्रियमाणाः तेषां यत्कृत्यं मम मां पृष्टवान् तदेतत् कथाश्रवणादिकम् एवं निगदितं विहितमित्यर्थः ॥ १ ॥ ब्रह्मणस्पतिं[2] वेदपतिं ब्रह्माणम् । कामः सामर्थ्यं कामः ॥ २ ॥

१—'निर्भिद्य मूर्धन्' इति सद्योमुक्तिरूपा एका । 'यदि प्रयास्यन्' इति क्रममुक्तिरूपा द्वितीया सृतिः ।
२–षष्ठ्याः पतिपुत्र—इत्यादिना विसर्गस्य सत्वं छान्दसम् ।

देवीं मायां तु श्रीकामस्तेजस्कामो विभावसुम्। वसुकामो वसून् रुद्रान् वीर्यकामोऽथ वीर्यवान्।
अन्नाद्यकामस्त्वदितिं स्वर्गकामोऽदितेः सुतान्।
विश्वान् देवान् राज्यकामः साध्यान् संसाधको विशाम्॥४॥
आयुष्कामोऽश्विनौ देवौ पुष्टिकाम इलां यजेत्। प्रतिष्ठाकामः पुरुषो रोदसी लोकमातरौ॥५॥
रूपाभिकामो गन्धर्वान् स्त्रीकामोऽप्सरउर्वशीम्। आधिपत्यकामः सर्वेषां यजेत परमेष्ठिनम्॥६॥
यज्ञं यजेद् यशस्कामः कोशकामः प्रचेतसम्। विद्याकामस्तु गिरिशं दाम्पत्यार्थं उमां सतीम्॥७॥
धर्मार्थं उत्तमश्लोकं तन्तुं तन्वन् पितॄन् यजेत्। रक्षाकामः पुण्यजनानोजस्कामो मरुद्गणान्॥८॥
राज्यकामो मनून् देवान्निर्ऋतिं त्वभिचरन् यजेत्। कामकामो यजेत् सोममकामः पुरुषं परम्।
अकामः सर्वकामो वा मोक्षकाम उदारधीः। तीव्रेण भक्तियोगेन यजेत पुरुषं परम्॥१०॥
एतावानेव यजतामिह निःश्रेयसोदयः। भगवत्यचलो भावो यद्भागवतसङ्गतः॥११॥
ज्ञानं यदाप्रतिनिवृत्तगुणोर्मिचक्रमात्मप्रसाद उत यत्र गुणेष्वसङ्गः।
कैवल्यसम्मतपथस्त्वथ भक्तियोगः को निर्वृतो हरिकथासु रतिं न कुर्यात्॥१२॥

शौनक उवाच

इत्यभिव्याहृतं राजा निशम्य भरतर्षभः। किमन्यत् पृष्टवान् भूयो वैयासकिमृषिं कविम्॥१३॥
एतच्छुश्रूषतां विद्वन् सूत नोऽर्हसि भाषितुम्। कथा हरिकथोदर्काः सतां स्युः सदसि ध्रुवम्॥१४।
स वै भागवतो राजा पाण्डवेयो महारथः। बालक्रीडनकैः क्रीडन् कृष्णक्रीडां य आददे॥१५॥
वैयासकिश्च भगवान् वासुदेवपरायणः। उरुगायगुणोदाराः सतां स्युर्हि समागमे॥१६॥
आयुर्हरति वै पुंसामुद्यन्नस्तं च यन्नसौ। तस्यर्ते यत्क्षणो नीत उत्तमश्लोकवार्तया॥१७॥

मायां दुर्गाम्। वसु धनम्। वीर्यं शुक्रं वा॥३॥ अन्नं भक्ष्यम् अपूपादि। आद्यं भोज्यं संयावादि। सुतान् द्वादशादित्यान्। साध्यान् साध्यसंज्ञकान्। विशां प्रजानां संसाधकः स्वाधीनकरणेच्छुः॥४॥ इलां पृथ्वीम्। रोदसी द्यावाभूमी। तत्र द्यौः पिता॥५।६॥ यज्ञं विष्णुम् इन्द्रं वा कोशः धनसंचयः॥७॥ तन्तुं तन्वन् सन्तानवृद्धिमिच्छन्। पुण्यजनान् यक्षान्॥८॥ राज्यं राजत्वम्। पूर्वं राज्ञः कर्मेति भेदः। अभिचरन् शत्रुनाशमिच्छन् निर्ऋतिं राक्षसम्। कामकामः भोगेच्छुः॥९।१०॥ यजतांम् एतावानेव उदयः मोक्षोपक्रमः। अचलो भाव इति यत् स च भक्त कः सङ्गतः॥११॥ यत् यासु कथासु ज्ञानं भवति चित्तशुद्धिः उत अपि असङ्गः वैराग्यं भक्तियोगश्च भवति तासु रतिं को न कुर्यादित्यन्वयः। कथंभूतं ज्ञानम्। आ सर्वतः प्रतिनिवृत्तं गुणोर्मीणां रागद्वेषादीनां चक्रं समूहो यस्मात् तत्। निर्वृतः श्रवणानन्दी॥१२॥ अभिव्याहृतं शुकोक्तम्॥१३॥ हरिकथैव उदर्कः उत्तरफलं यासु ताः कथाः भवन्तीत्यर्थः॥१४॥ क्रीडनकैः क्रीडासाधनैः यः क्रीडामाददे अतः स भागवत एवेत्यन्वयः॥१५॥ उरु बहुधा गीयते इति उरुगायः हरिः तस्य गुणैः उदारा आकर्षकाः॥१६॥ असौ सूर्यः उद्यन् अस्तं च यन् गच्छन्। तस्य आयुः ऋते। यत् येन क्षणो

तरवः किं न जीवन्ति भस्त्राः किं न श्वसन्त्युत । न खादन्ति न मेहन्ति किं ग्रामपशवोऽपरे ।।१८।।
श्वविड्वराहोष्ट्रखरैः संस्तुतः पुरुषः पशुः । न यत्कर्णपथोपेतो जातु नाम गदाग्रजः ।।१९।।

बिले बतोरुक्रमविक्रमान् ये न शृण्वतः कर्णपुटे नरस्य ।
जिह्वाऽसती दार्दुरिकेव सूत न चोपगायत्युरुगायगाथाः ।।२०।।
भारः परं पट्टकिरीटजुष्टमप्युत्तमाङ्गं न नमेन्मुकुन्दम् ।
शावौ करौ नो कुरुतः सपर्यां हरेर्लसत्काञ्चनकङ्कणौ वा ।।२१।।
बर्हायिते ते नयने नराणां लिङ्गानि विष्णोर्न निरीक्षतो ये ।
पादौ नृणां तौ द्रुमजन्मभाजौ क्षेत्राणि नानुव्रजतो हरेर्यौ ।।२२।।
जीवञ्छवो भागवताङ्घ्रिरेणुं न जातु मर्त्योऽभिलभेत यस्तु ।
श्रीविष्णुपद्या मनुजस्तुलस्याः श्वसञ्छवो यस्तु न वेद गन्धम् ।।२३।।
तदश्मसारं हृदयं बतेदं यद् गृह्यमाणैर्हरिनामधेयैः ।
न विक्रियेताथ यदा विकारो नेत्रे जलं गात्ररुहेषु हर्षः ।।२४।।
अथाभिधेह्यङ्ग मनोऽनुकूलं प्रभाषसे भागवतप्रधानः ।
यदाह वैयासकिरात्मविद्याविशारदो नृपतिं साधु पृष्टः ।।२५।।

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां द्वितीयस्कन्धे तृतीयोऽध्यायः ॥ ३ ॥

नीतः ॥ १७ ॥ न मेहन्ति न मैथुनं कुर्वन्ति किम् ? कुर्वन्त्येव ॥ १८ ॥ नाम प्रसिद्धो यः गदाग्रजः यस्य कर्णपथम् उपेतः प्राप्तो न भवति स श्वादिभिः संस्तुतः तुल्यो भवति । जातु कदाचिदपि । विड्वराहो ग्रामसूकरः ॥ १९ ॥ बत खेदे । त्रिविक्रमस्य विक्रमान् चरितानि न शृण्वतः नरस्य ये ते बिले एव । दर्दुरस्येयं दार्दुरिकेव मण्डूकजिह्वेव असती व्यर्था ॥२०॥ पट्टेन उष्णीषेण । परं केवलं भार एव । यौ करौ तौ शावौ मृतककरतुल्यौ । लसन्ती काञ्चनकङ्कणे ययोस्तौ । वा अप्यर्थे ॥ २१ ॥ ये लिङ्गानि मूर्तीः न निरीक्षेते ते बर्हायिते मयूरपिच्छतुल्ये । द्रुमवज्जन्म भजतः ॥ २२ ॥ यः रेणुं न अभिलभेत शिरसि न धारयेत् स जीवन्मृतकः । यश्च गन्धं न वेद नाभिनन्देत् सोऽपि तथाविध एव ।।२३।। बत खेदे । अश्मवत् सारो बलं काठिन्यं यस्य तत् पाषाणतुल्यम् । हर्षः रोमाञ्चः । अथ श्रवणानन्तरमेव ॥ २४ ॥ अङ्ग हे सूत ! त्वम् अनुकूलं प्रभाषसे । अथ अतः पृष्टः शुकः नृपतिं यत् आह तत् अभिधेहीत्यन्वयः ॥ २५ ॥

इति श्रीमद्भागवते महापुराणे द्वितीयस्कन्धे गूढार्थदीपिन्यां तृतीयोऽध्यायः ॥

अथ चतुर्थोऽध्यायः

सूत उवाच

वैयासकेरिति वचस्तत्त्वनिश्चयमात्मनः। उपधार्य मतिं कृष्णे औत्तरेयः सतीं व्यधात् ॥ १ ॥
आत्मजायासुतागारपशुद्रविणबन्धुषु । राज्ये चाविकले नित्यं निरूढां ममतां जहौ ॥ २॥
पप्रच्छ चेममेवार्थं यन्मां पृच्छथ सत्तमाः। कृष्णानुभावश्रवणे श्रद्दधानो महामनाः ॥ ३॥
संस्थां विज्ञाय संन्यस्य कर्म त्रैवर्गिकं च यत्। वासुदेवे भगवति आत्मभावं दृढं गतः ॥ ४ ॥

राजोवाच

समीचीनं वचो ब्रह्मन् सर्वज्ञस्य तवानघ। तमो विशीर्यते मह्यं हरेः कथयतः कथाम् ॥ ५ ॥
भूय एव विवित्सामि भगवानात्ममायया। यथेदं सृजते विश्वं दुर्विभाव्यमधीश्वरैः ॥ ६ ॥
यथा गोपायति विभुर्यथा संयच्छते पुनः। यां यां शक्तिमुपाश्रित्य पुरुशक्तिः परः पुमान्।
आत्मानं क्रीडयन् क्रीडन् करोति विकरोति च ॥ ७॥
नूनं भगवतो ब्रह्मन् हरेरद्भुतकर्मणः। दुर्विभाव्यमिवाभाति कविभिश्चापि चेष्टितम् ॥ ८ ॥
यथा गुणांस्तु प्रकृतेर्युगपत्क्रमशोऽपि वा। बिभर्ति भूरिशस्त्वेकः कुर्वन् कर्माणि जन्मभिः ॥९॥
विचिकित्सितमेतन्मे ब्रवीतु भगवान् यथा। शाब्दे ब्रह्मणि निष्णातः परस्मिंश्च भवान् खलु १०

सूत उवाच

इत्युपामन्त्रितो राज्ञा गुणानुकथने हरेः। हृषीकेशमनुस्मृत्य प्रतिवक्तुं प्रचक्रमे ॥११॥

चतुर्थे श्रीशुकः पृष्टो ब्रह्मनारदवादतः।
सर्गलीलां हरेर्वक्तुं स्वेष्टदेवमभिष्टुते ॥१॥

आत्मनः तत्त्वस्य निश्चयो यस्मात् तत् वचः उपधार्य श्रुत्वा। औत्तरेयः परीक्षित् ॥ १ ॥ आत्मा देहः। अविकले अखण्डे। निरूढां दृढीभूताम् ॥ २ ॥ पप्रच्छेति द्वयम्। इममेव अर्थं हरिलीलालक्षणं पप्रच्छ। कथंभूतः। संस्थां मृत्युं विज्ञाय कर्म च संन्यस्य आत्मनो भावं प्रेमलक्षणं गतः प्राप्तः सन्। हे सत्तमाः! शौनकादयः ॥३।४॥ हे अनघ! पापनिवर्तक। समीचीनं यतः कथयतः सतः मह्यं मम तमोऽज्ञानं विशीर्यते[1] नश्यति ॥ ५ ॥ भूय इति सार्द्धम्। यथा इदं सृजते यथा रक्षति पुनश्च यथा संहरति तथा विवित्सामीत्यन्वयः। दुर्विभाव्यं दुर्विकतर्क्यम् ॥ ६ ॥ पुरुशक्तिः अनन्तशक्तिः पुमान् मायया क्रीडन् आत्मानं करोति महदादिरूपेण सृजतीति सर्गप्रश्नः। ब्रह्ममरीच्यादीन् क्रीडयन् आत्मानं विकरोति चराचररूपेण विविधं सृजतीति विसर्गप्रश्नः ॥ ७ ॥ दुर्विभाव्यं दुर्ज्ञेयम् ॥ ८ ॥ एकः पुरुषरूपेण युगपत्। जन्मभिः ब्रह्माद्यवतारैः भूरिशो बहुरूपः सन् क्रमशो वा गुणान् बिभर्ति एतत् सर्वं विचिकित्सितं सन्देहास्पदं यथावत् भवान् ब्रवीतु यतो भवान् निष्णाः इति द्वयोरन्वयः ॥ ९ ॥ १० ॥ उपामन्त्रितः प्रार्थितः। प्रतिवक्तुम् उत्तरं दातुं स्तुतिमुखेन प्रारेभे भागवतसंहितामिति शेषः ॥ ११ ॥ पुरुषाय

श्रीशुक उवाच

नमः परस्मै पुरुषाय भूयसे सदुद्भवस्थाननिरोधलीलया।
गृहीतशक्तित्रितयाय देहिनामन्तर्भवायानुपलक्ष्यवर्त्मने ॥१२॥
भूयो नमः सद्वृजिनच्छिदेऽसतामसम्भवायाखिलसत्त्वमूर्तये।
पुंसां पुनः पारमहंस्य आश्रमे व्यवस्थितानामनुमृग्यदाशुषे ॥१३॥
नमो नमस्तेऽस्त्वृषभाय सात्वतां विदूरकाष्ठाय मुहुः कुयोगिनाम्।
निरस्तसाम्यातिशयेन राधसा स्वधामनि ब्रह्मणि रंस्यते नमः ॥१४॥
यत्कीर्तनं यत्स्मरणं यदीक्षणं यद्वन्दनं यच्छ्रवणं यदर्हणम्।
लोकस्य सद्यो विधुनोति कल्मषं तस्मै सुभद्रश्रवसे नमो नमः ॥१५॥
विचक्षणा यच्चरणोपसादनात् सङ्गं व्युदस्योभयतोऽन्तरात्मनः।
विन्दन्ति हि ब्रह्मगतिं गतक्लमास्तस्मै सुभद्रश्रवसे नमो नमः ॥१६॥
तपस्विनो दानपरा यशस्विनो मनस्विनो मन्त्रविदः सुमङ्गलाः।
क्षेमं न विन्दन्ति विना यदर्पणं तस्मै सुभद्रश्रवसे नमो नमः ॥१७॥
किरातहूणान्ध्रपुलिन्दपुल्कसा आभीरकङ्का यवनाः खसादयः।
येऽन्ये च पापा यदुपाश्रयाश्रयाः शुध्यन्ति तस्मै प्रभविष्णवे नमः ॥१८॥
स एष आत्माऽऽत्मवतामधीश्वरस्त्रयीमयो धर्ममयस्तपोमयः।
गतव्यलीकैरजशङ्करादिभिर्वितर्क्यलिङ्गो भगवान् प्रसीदताम् ॥१९॥

श्रीकृष्णाय। भूयसे अपरिमितमहिम्ने। कथंभूताय। सतो जगतः उद्भवादिषु निमित्तभूता या लीला तया गृहीतेति योज्यम्। अन्तर्यामिणेऽपि अनुपलक्ष्येति बहिर्दृष्टित्वात् ॥ १२ ॥ सतां धर्मिणां वृजिच्छिदे दुःखहन्त्रे। असताम् अधर्मिणाम् असम्भवाय नाशहेतवे। अखिलसत्त्वं विशुद्धसत्त्वम्। परमहंससम्बन्धिनि आश्रमे स्थितानाम् अनु-अनु मृग्यं यत् आत्मतत्त्वं तस्य दाशुषे[२] दात्रे। दाशृ दाने धातुः ॥ १३ ॥ सात्वतां भक्तानां पालकाय। कुयोगिनां विषयिणां विदूरा काष्ठा दिगपि यस्य। निरस्तं साम्यम् अतिशयश्च यस्मात् एवं भूतेन राधसा अचिन्त्यानन्तैश्वर्येण स्वस्वरूपे रममाणाय ते नमः ॥ १४ ॥ कल्मषं दुर्वासनालक्षणम्। सुभद्रं परममङ्गलमयं श्रवः श्रवणं यशो वा यस्य ॥ १५ ॥ विचक्षणाः विवेकिनः। उपसादनात् भजनात् हेतोः। अन्तरात्मनः मनसः उभयत्र इह परत्र च सङ्गं त्यक्त्वा गतिं मुक्तिं लभन्ते तस्मै नमः। गतक्लमाः निवृत्तक्लेशाः सन्तः ॥ १६ ॥ सुमङ्गलाः सदाचारनिष्ठाः। क्षेमं तप आदेः फलम् ॥ १७ ॥ पापाः पापजातयः। अर्थं आद्यजन्तः। यदुपाश्रयाः भक्ताः तान् आश्रयन्ते ये ते तथाभूताः सन्तः। प्रभविष्णवे सर्वसमर्थाय ॥१८॥ गतव्यलीकैः निष्कपटैः अजादिभिः वितर्क्यमत्याश्चर्येण वीक्षणीयं लिङ्गं

१–कर्मकर्तरि लट्।
२–'दाश्वान् साह्वान'—इति क्वसन्तो निपातः।

श्रियः पतिर्यज्ञपतिः प्रजापतिर्धियां पतिर्लोकपतिर्धरापतिः ।
पतिर्गतिश्चान्धकवृष्णिसात्वतां प्रसीदतां मे भगवान् सतां पतिः ॥२०॥

यदङ्घ्र्यनुध्यानसमाधिधौतया धियानुपश्यन्ति हि तत्त्वमात्मनः ।
वदन्ति चैतत्कवयो यथारुचं स मे मुकुन्दो भगवान् प्रसीदताम् ॥२१॥

प्रचोदिता येन पुरा सरस्वती वितन्वताऽजस्य सतीं स्मृतिं हृदि ।
स्वलक्षणा प्रादुरभूत् किलास्यतः स मे ऋषीणामृषभः प्रसीदताम् ॥२२॥

भूतैर्महद्भिर्य इमाः पुरो विभुर्निर्माय शेते यदमूषु पूरुषः ।
भुङ्क्ते गुणान् षोडश षोडशात्मकः सोऽलंकृषीष्ट भगवान् वचांसि मे॥२३॥

नमस्तस्मै भगवते व्यासायाऽमिततेजसे । पपुर्ज्ञानमयं सौम्या यन्मुखाम्बुरुहासवम् ॥२४॥
एतदेवात्मभू राजन्नारदाय विपृच्छते । वेदगर्भोऽभ्यधात् साक्षाद् यदाह हरिरात्मनः ॥२५॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां द्वितीयस्कन्धे चतुर्थोऽध्यायः ॥ ४ ॥

मूर्तिर्यस्य सः ॥ १९ ॥ गतिः रक्षकश्च । यद्यपि लोकपतित्वादेव सर्वपतित्वमायाति तथापि जनानां तत्तत्पतित्वाऽहङ्कारनिरासार्थं पृथगुक्तिः ॥ २० ॥ धौतया शोधितया । यथारुचं[1] रुच्यनुसारेण ॥२१॥ सृष्टिस्मृतिं वितन्वता येन भगवता प्रेरिता सरस्वती अस्य ब्रह्मणो मुखतः प्रादुरभूत् स प्रसीदतामित्यन्वयः । ऋषीणां ज्ञानदातॄणां श्रेष्ठः ॥ २२ ॥ इमाः पुरः शरीराणि निर्माय अमूषु पूर्षु यतः शेते अतः पूरुषः षोडश गुणान् भुङ्क्ते प्रकाशयति स मे वचांसि अलंकृषीष्टेत्यन्वयः। यतः षोडशानां तेषाम् आत्मा चेतयिता । स्वार्थे कः ॥ २३ ॥ सौम्याः प्रियशिष्याः वैशम्पायनादयः । अत्र व्यासायामिततेजसे इत्येव पाठः श्रीधरसम्मतः । व्यासं नमस्करोतीत्युक्तेः ॥ २४ ॥ हरिः आत्मनः[2] आत्मानं ब्रह्माणं प्रति यत् आह एतदेव आत्मभूः ब्रह्मा नारदाय अभ्यभाषतेत्यन्वयः ॥ २५ ॥

इति श्रीमद्भागवते महापुराणे द्वितीयस्कन्धे गूढार्थदीपिन्यां चतुर्थोऽध्यायः ॥४॥

१—रुचिमनतिक्रम्य इत्यव्ययीभावे 'झयः' इति टचि रुचाशब्देन टाबन्तेन वा समासः ।
२—षष्ठी द्वितीयार्थे ।

अथ पञ्चमोऽध्यायः

नारद उवाच

देवदेव नमस्तेऽस्तु भूतभावन पूर्वज। तद्विजानीहि यज्ज्ञानमात्मतत्त्वनिदर्शनम् ॥ १ ॥
यद्रूपं यदधिष्ठानं यतः सृष्टमिदं प्रभो। यत्संस्थं यत्परं यच्च तत्तत्त्वं वद तत्त्वतः ॥ २ ॥
सर्वं ह्येतद्भवान् वेद भूतभव्यभवत्प्रभुः। करामलकवद् विश्वं विज्ञानावसितं तव ॥ ३ ॥
यद्विज्ञानो यदाधारो यत्परस्त्वं यदात्मकः। एकः सृजसि भूतानि भूतैरेवात्ममायया ॥ ४॥
आत्मन् भावयसे तानि न पराभावयन् स्वयम्। आत्मशक्तिमवष्टभ्य ऊर्णनाभिरिवाक्लमः ॥ ५ ॥
नाहं वेद परं ह्यस्मिन्नापरं न समं विभो। नामरूपगुणैर्भाव्यं सदसत्किञ्चिदन्यतः ॥ ६ ॥
न भवानचरद् घोरं यत्तपः सुसमाहितः। तेन खेदयसे नस्त्वं पराशङ्कां प्रयच्छसि ॥ ७ ॥
एतन्मे पृच्छतः सर्वं सर्वज्ञ सकलेश्वर। विजानीहि यथैवेदमहं बुध्येऽनुशासितः ॥ ८ ॥

ब्रह्मोवाच

सम्यक्कारुणिकस्येदं वत्स ते विचिकित्सितम्। यदहं चोदितः सौम्य भगवद्वीर्यदर्शने ॥ ९॥
नानृतं तव तच्चापि यथा मां प्रब्रवीषि भोः। अविज्ञाय परं मत्त एतावत्त्वं यतो हि मे ॥१०॥
येन स्वरोचिषा विश्वं रोचितं रोचयाम्यहम्। यथार्कोऽग्निर्यथा सोमो यथर्क्षग्रहतारकाः ॥११॥

पञ्चमे नारदप्रश्ने तत्त्वसृष्टिं वदत्यजः।
जातश्च तैर्विराट्देहो यस्याङ्गैर्लोककल्पना ॥

भूतानि भावयति सृजतीति हे भूतभावन। आत्मतत्त्वस्य निदर्शनं ज्ञापकं यत् ज्ञानं ज्ञानसाधनं शास्त्रं तद्विशेषेण ज्ञापय। अन्तर्भावितण्यर्थः ॥ १ ॥ इदं विश्वं यद्रूपं यत्प्रकाश्यं यदाधारकं यस्मिन् संस्था लयो यस्य। यदधीनं यदात्मकं च तस्य तत्त्वं याथार्थ्यं तत्त्वतो वदेति षट् प्रश्नाः। भूतभविष्यद्वर्तमानानां प्रभुः ज्ञाता। करे अमलं कं जलं च तद्वत् इति श्लेषो वा। अवसितं निश्चितम् ॥ ३ ॥ यदिति अर्द्धम्। किञ्च त्वं यतो विज्ञानवानसि। यदाश्रयो ऽसि यदधीनोऽसि यदात्मकोऽसि तं वदेति शेषः इति चत्वारः प्रश्नाः ॥ ४ ॥ एक इति सार्द्धम्। ऊर्णनाभिरिव अक्लमः श्रमरहितः स्वयमेव आत्मनि भूतानि सृजसि भावयसे पालयसि पुनस्तानि संहरसि। अन्यतः पराभवम् अप्रापयन् ॥ ५ ॥ अस्मिन् लोके परम् उत्कृष्टं निकृष्टम् समं मध्यमं च सत् असत् स्थूलं सूक्ष्मं च यत् किञ्चित् प्रतीयमानं तत् अन्यतो न वेद किन्तु त्वत्त एव ॥६॥ परस्य ईश्वरान्तरस्य ॥ ७ ॥ विजानीहि विज्ञापय अन्तर्भावितण्यर्थः ॥ ८ ॥ यथा अनुशासितः शिक्षितः सन् बुध्ये जानीयाम्। शास्तेः स्वार्थे णिच् क्तः। विचिकित्सितं सन्देहात्मकः प्रश्नः। वीर्यं विश्वसृष्ट्यादि तस्य प्रकाशने ॥ ९ ॥ यतो मे एतावत्त्वं ब्रह्मत्वं तं मत्तः परम् ईश्वरम् अविज्ञाय यत् ब्रवीषि एकः सृजतीत्यादि तच्चापि अनृतं नास्तीत्यन्वयः ॥ १० ॥ यथा अर्कादयः येन रोचिषा प्रकाशित-

---

१-एकादशेन्द्रियाणि पञ्चभूतानीत्येवं षोडश।

तस्मै नमो भगवते वासुदेवाय धीमहि। यन्मायया दुर्जयया मां ब्रुवन्ति जगद्गुरुम् ॥१२॥
विलज्जमानया यस्य स्थातुमीक्षापथेऽमुया। विमोहिता विकत्थन्ते ममाहमिति दुर्धियः ॥१३॥
द्रव्यं कर्म च कालश्च स्वभावो जीव एव च। वासुदेवात्परो ब्रह्मन्न चान्योऽर्थोऽस्ति तत्त्वतः॥१४॥
नारायणपरा वेदा देवा नारायणाङ्गजाः। नारायणपरा लोका नारायणपरा मखाः ॥१५॥
नारायणपरो योगो नारायणपरं तपः। नारायणपरं ज्ञानं नारायणपरा गतिः ॥१६॥
तस्यापि द्रष्टुरीशस्य कूटस्थस्याखिलात्मनः। सृज्यं सृजामि सृष्टोऽहमीक्षयैवाभिचोदितः ॥१७॥
सत्त्वं रजस्तम इति निर्गुणस्य गुणास्त्रयः। स्थितिसर्गनिरोधेषु गृहीता मायया विभोः ॥१८॥
कार्यकारणकर्तृत्वे द्रव्यज्ञानक्रियाश्रयाः। बध्नन्ति नित्यदा मुक्तं मायिनं पुरुषं गुणाः ॥१९॥
स एष भगवाँल्लिङ्गैस्त्रिभिरेभिरधोक्षजः। स्वलक्षितगतिर्ब्रह्मन् सर्वेषां मम चेश्वरः ॥२०॥
कालं कर्म स्वभावं च मायेशो मायया स्वया। आत्मन् यदृच्छया प्राप्तं विबुभूषुरुपाददे ॥२१॥
कालाद् गुणव्यतिकरः परिणामः स्वभावतः। कर्मणो जन्म महतः पुरुषाधिष्ठितादभूत् ॥२२॥
महतस्तु विकुर्वाणाद्रजःसत्त्वोपबृंहितात्। तमः प्रधानस्त्वभवद् द्रव्यज्ञानक्रियात्मकः ॥२३॥
सोऽहंकार इति प्रोक्तो विकुर्वन् समभूत्त्रिधा। वैकारिकस्तैजसश्च तामसश्चेति यद्भिदा।
द्रव्यशक्तिः क्रियाशक्तिर्ज्ञानशक्तिरिति प्रभो ॥२४॥
तामसादपि भूतादेर्विकुर्वाणादभून्नभः। तस्य मात्रा गुणः शब्दो लिङ्गं यद्द्रष्टृदृश्ययोः ॥२५॥
नभसोऽथ विकुर्वाणादभूत्स्पर्शगुणोऽनिलः। परान्वयाच्छब्दवांश्च प्राण ओजः सहो बलम् ॥२६॥
वायोरपि विकुर्वाणात्कालकर्मस्वभावतः। उदपद्यत तेजो वै रूपवत्स्पर्शशब्दवत् ॥२७॥

मेव विश्वं प्रकाशयन्ति एवमहमपि तथैव रोचयामि ॥ ११ ॥ नमो धीमहि नमस्कुर्महे ॥ १२ ॥ ईक्षापथे दृष्टिपथे। मम अहमिति कृत्वा विकत्थन्ते आत्मानं श्लाघन्ते ॥ १३ ॥ द्रव्यं भूतानि। कालः गुणक्षोभकः। स्वभावः तत्परिणामहेतुः जीवो भोक्ता। अन्योऽपि अनुक्तः सर्वोऽपि पदार्थः वस्तुतः परो-भिन्नो नास्वि। एतेनैव पूर्वोक्तप्रश्नानामुत्तरमुक्तं भवति ॥ १४ । १५ ॥ गतिः मोक्षः ॥ १६ ॥ तस्य ईक्षया प्रवर्तितः तेन सृष्टश्च अहं सृज्यं तत्सृष्टमेव सृजामि ॥ १७ ॥ सत्त्वमिति द्वयम्। गुणाः अप्रधान-रूपा अत उत्तरपद्यस्थगुणपदेन न पुनरुक्तिः। द्रव्येति। भूतदेवतेन्द्रियकारणभूता गुणाः कार्यकारणकतृत्वे शरीरत्वे इन्द्रियत्वे देवत्वे च तत्तदभिमानेन वध्नन्ति ॥ १९ ॥ त्रिभिः लिङ्गैः गुणैः आवरकैः सुष्ठु अलक्षिता गतिर्यस्य अभक्तैरिति शेषः। स्वैर्भक्तैस्तु लक्षितेति। ब्रह्मन् इति नारदसम्बोधनम् ॥ २० ॥ आत्मन् आत्मनि प्राप्तम् अभिव्यक्तम् कालादिकम्। विबुभूषुः विविधं भवितुमिच्छुः ॥ २१ ॥ पुरुषा-धिष्ठितात् कालात् स्वभावात् कर्मणश्च क्रमेण व्यतिकरः क्षोभः साम्यत्यागः। परिणामः। महत्तत्वस्य जन्म अभूत् ॥ २२ ॥ उपबृंहितात् वर्धितात् तमः प्रधानो यः सोऽहङ्कार इत्युत्तरेणान्वेति। भूतदेवतेन्द्रिय-कारणरूपः। विगतः कारः विक्षेपो यस्मात् सः विकारः सत्त्वं तेन चरति प्रवर्तते इति वैकारिकः ॥२३॥ ॥ २४ ॥ भूतादेः अहङ्कारात्। यत् शब्दस्वरूपम्। उभयोः लिङ्गं बोधकम् ॥ २५ ॥ परस्य नभसः कारणत्वेन। प्राणरूपश्च। ओजआदीनां इन्द्रियमनोदेहशक्तीनां हेतुश्च ॥ २६ ॥ २७ ॥ परान्वयात्

तेजसस्तु विकुर्वाणादासीदम्भो रसात्मकम्। रूपवत्स्पर्शवच्चाम्भो घोषवच्च परान्वयात्॥२८॥
विशेषस्तु विकुर्वाणादम्भसो गन्धवानभूत्। परान्वयाद्रसस्पर्शशब्दरूपगुणान्वितः ॥२९॥
वैकारिकान्मनो जज्ञे देवा वैकारिका दश। दिग्वातार्कप्रचेतोऽश्विवह्नीन्द्रोपेन्द्रमित्रकाः॥३०॥
तैजसात्तु विकुर्वाणादिन्द्रियाणि दशाभवन्। ज्ञानशक्तिः क्रियाशक्तिर्बुद्धिः प्राणश्च तैजसौ।
श्रोत्रं त्वग्घ्राणदृग्जिह्वावाग्दोर्मेढ्राङ्घ्रिपायवः॥३१॥

यदैतेऽसङ्गता भावा भूतेन्द्रियमनोगुणाः। यदायतननिर्माणे न शेकुर्ब्रह्मवित्तम॥३२॥
तदा संहत्य चान्योन्यं भगवच्छक्तिचोदिताः। सदसत्त्वमुपादाय चोभयं ससृजुर्ह्यदः॥३३॥
वर्षपूगसहस्रान्ते तदण्डमुदकेशयम्। कालकर्मस्वभावस्थो जीवोऽजीवमजीवयत्॥३४॥
स एव पुरुषस्तस्मादण्डं निर्भिद्य निर्गतः। सहस्रोर्वङ्घ्रिबाह्वक्षः सहस्राननशीर्षवान्॥३५॥
यस्येहावयवैर्लोकान् कल्पयन्ति मनीषिणः। कट्यादिभिरधः सप्त सप्तोर्ध्वं जघनादिभिः॥३६॥
पुरुषस्य मुखं ब्रह्म क्षत्रमेतस्य बाहवः। ऊर्वोर्वैश्यो भगवतः पद्भ्यां शूद्रोऽभ्यजायत॥३७॥
भूर्लोकः कल्पितः पद्भ्यां भुवर्लोकोऽस्य नाभितः। हृदा स्वर्लोक उरसा महर्लोको महात्मनः॥३८॥
ग्रीवायां जनलोकश्च तपोलोकः स्तनद्वयात्। मूर्धभिः सत्यलोकस्तु ब्रह्मलोकः सनातनः॥३९॥
तत्कट्यां चातलं क्लृप्तमूरुभ्यां वितलं विभोः। जानुभ्यां सुतलं शुद्धं जङ्घाभ्यां तु तलातलम्॥४०॥
महातलं तु गुल्फाभ्यां प्रपदाभ्यां रसातलम्। पातालं पादतलत इति लोकमयः पुमान्॥४१॥
भूर्लोकः कल्पितः पद्भ्यां भुवर्लोकोऽस्य नाभितः। स्वर्लोकः कल्पितो मूर्ध्ना इति वा लोककल्पना

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां द्वितीयस्कन्धे पञ्चमोऽध्यायः॥५॥

कारणान्वयात्। घोषवत् शब्दवत् ॥ २८ ॥ विशिष्यते सर्वभूतगुणधारणेनेति विशेषः पृथ्वी ॥ २९ ॥ वैकारिकात् सात्त्विकाहङ्कारात् ये देवाः दिग्वातादयः तेऽपि जज्ञिरे। कः प्रजापतिः ॥३०॥ तैजसादिति सार्द्धम्। तैजसात् राजसाहङ्कारात्। ज्ञानशक्तिः बुद्धिः। क्रियाशक्तिः प्राणः। दशेन्द्रियाणि श्रोत्रेति ॥३१॥ असङ्गता अमिलिताः। आयतनस्य ब्रह्माण्डस्य ॥ ३२ ॥ संहत्य मिलित्वा। सदसत्त्वं स्थूलसूक्ष्मभावम्। उभयं स्थूलसूक्ष्मरूपम्। आयतनं ब्रह्माण्डम् ॥ ३३ ॥ जीवयतीति जीवः परमात्मा। अजीवम् अचेतनमण्डम्। अजीवयत् अचेतयत् ॥ ३४ ॥ तस्मात् अण्डात् निर्गतः पृथक् स्थितः ॥ ३५ ॥ सप्त लोकान् अतलादीन्। ऊर्ध्वं भूरादीन् ॥ ३६ ॥ ब्रह्म ब्राह्मणः। क्षत्रं क्षत्रियः ॥ ३७ ॥ ३८ ॥ जनलोकः स्तनद्वयात्। ग्रीवायां तपोलोक इत्यन्वयः। पाठक्रमादार्थक्रमो बलीयान् इति न्यायात्। यद्वा। स्तनच्छब्दं कुर्वत् यत् ओष्ठद्वयम् तस्मात् तपोलोकः। 'ष्टन' शब्दे धातुः ॥ ३९ ॥ ब्रह्मलोकः वैकुण्ठः स तु सनातनो नित्यः ॥३९॥ चतुर्दशलोकपक्षमाह तत्कट्यामिति ॥ ४० ॥ ४१ ॥ त्रिलोकपक्षमाह भूरिति ॥४२॥

इति श्रीमद्भागवते महापुराणे द्वितीयस्कन्धे गूढार्थदीपिन्यां पञ्चमोऽध्यायः॥५॥

अथ षष्ठोऽध्यायः

ब्रह्मोवाच

वाचां वह्नेर्मुखं क्षेत्रं छन्दसां सप्त धातवः । हव्यकव्यामृतान्नानां जिह्वा सर्वरसस्य च ॥ १ ॥
सर्वासूनां च वायोश्च तन्नासे परमायने । अश्विनोरोषधीनां च घ्राणो मोदप्रमोदयोः ॥ २ ॥
रूपाणां तेजसां चक्षुर्दिवः सूर्यस्य चाक्षिणी । कर्णौ दिशां च तीर्थानां श्रोत्रमाकाशशब्दयोः ।
तद्गात्रं वस्तुसाराणां सौभगस्य च भाजनम् ॥ ३ ॥
त्वगस्य स्पर्शवायोश्च सर्वमेधस्य चैव हि । रोमाण्युद्भिज्जजातीनां यैर्वा यज्ञस्तु सम्भृतः ॥ ४॥
केशश्मश्रुनखान्यस्य शिलालोहाभ्रविद्युताम् । बाहवो लोकपालानां प्रायशः क्षेमकर्मणाम् ॥ ५ ॥
विक्रमो भूर्भुवः स्वश्च क्षेमस्य शरणस्य च । सर्वकामवरस्यापि हरेश्चरण आस्पदम् ॥ ६ ॥
अपां वीर्यस्य सर्गस्य पर्जन्यस्य प्रजापतेः । पुंसः शिश्न उपस्थस्तु प्रजात्यानन्दनिर्वृतेः ॥ ७ ॥
पायुर्यमस्य मित्रस्य परिमोक्षस्य नारद । हिंसाया निर्ऋतेर्मृत्योर्निरयस्य गुदः स्मृतः ॥ ८ ॥
पराभूतेरधर्मस्य तमसश्चापि पश्चिमः । नाड्यो नदनदीनां तु गोत्राणामस्थिसंहतिः ॥ ९ ॥
अव्यक्तरससिन्धूनां भूतानां निधनस्य च । उदरं विदितं पुंसो हृदयं मनसः पदम् ॥१०॥

आध्यात्मिकादिभेदेन षष्ठे वैराजवैभवम् ।
यदुक्तं साधितं सर्वं तच्च पौरुषसूक्ततः ॥

तदधिष्ठातुः वह्नेश्च हरेः मुखं क्षेत्रमुत्पत्तिस्थानम् । हरेरिति षष्ठपद्यस्थेनान्वेति । सर्वत्र षष्ठ्यन्तानां प्रथमान्तं क्षेत्रं बोद्धव्यम् । छन्दसां गायत्र्यादीनाम् । हव्यं देवानां कव्यं पितॄणाम् उभय शेषोऽमृतान्नं मनुष्याणां जिह्वा क्षेत्रम् ॥ १ ॥ तन्नासारन्ध्रे परमायने उत्तमक्षेत्रे । मोद-प्रमोदयोः सामान्यविशेषगन्धयोः घ्राणेन्द्रियम् ॥ २ ॥ चक्षुः इन्द्रियम् । दिवः ज्योतिश्चक्रस्य अक्षिणी नेत्र गोलके । कर्णौ । श्रोत्राधिष्ठाने । श्रोत्रम्, इन्द्रियम् ॥ ३ ॥ तदिति सार्द्धम् । साराः सुवर्णादयः । सौभगं सौन्दर्यम् । वायुः अधिष्ठाता[1] । मेधस्य यज्ञस्य । यैः सम्भृतः सम्पादितो भवति तेषामपि ॥ ४ ॥ शिलायाः नखानि । लोहस्य अभ्राणां च केशाः । विद्युतां श्मश्रूणि । क्षेमः प्रजापालनमेव ॥ ५ ॥ विक्रमः त्रिधा पादन्यासः भूरादिलोकानाम् । अव्ययत्वात् षष्ठ्या लुक् । शरणस्य[2] मोक्षस्य । कामवरस्य अभिमतलाभस्य ॥ ६ ॥ शिश्नोऽधिष्ठानम् । प्रजात्यानन्देन सन्तानार्थं संभोगेन या निर्वृतिः तापशान्तिः तस्या उपस्थेन्द्रियम् ॥ ७ ॥ पायुः इन्द्रियम् । गुदम् अधिष्ठानम् । मोक्षो मलत्यागः । हिंसायाः मृत्योः निर्ऋतिः अलक्ष्मीः ॥ ८ ॥ तमसोऽज्ञानस्य पश्चिमः पृष्ठभागः । गोत्राणाम् पर्वतानाम् ॥ ९ ॥ अव्यक्तं प्रकृतिः । निधनस्य लयस्य उदरं पदं क्षेत्रम् । मनसः लिङ्गशरीरस्य हृदयं पदं क्षेत्रम् ॥ १० ॥ परस्य

१–'सर्वोऽपि द्वन्द्वो विभाषयैकवत् भवति' इत्येकत्वम् ।
२–मोक्षः शान्तिश्च शरणं निर्वाणं निर्वृतिस्तथा' इत्यभिधानात् ।

धर्मस्य मम तुभ्यं च कुमाराणां भवस्य च। विज्ञानस्य च सत्त्वस्य परस्यात्मा परायणम्॥११॥
अहं भवान् भवश्चैव त इमे मुनयोऽग्रजाः। सुरासुरनरा नागाः खगा मृगसरीसृपाः॥१२॥
गन्धर्वाप्सरसो यक्षा रक्षोभूतगणोरगाः। पशवः पितरः सिद्धा विद्याध्राश्चारणा द्रुमाः॥१३॥
अन्ये च विविधा जीवा जलस्थलनभौकसः। ग्रहर्क्षकेतवस्तारास्तडितः स्तनयित्नवः॥१४॥
सर्वं पुरुष एवेदं भूतं भव्यं भवच्च यत्। तेनेदमावृतं विश्वं वितस्तिमधितिष्ठति॥१५॥
स्वधिष्ण्यं प्रतपन् प्राणो बहिश्च प्रतपत्यसौ। एवं विराजं प्रतपंस्तपत्यन्तर्बहिः पुमान्॥१६॥
सोऽमृतस्याभयस्येशो मर्त्यमन्नं यदत्यगात्। महिमैष ततो ब्रह्मन् पुरुषस्य दुरत्ययः॥१७॥
पादेषु सर्वभूतानि पुंसः स्थितिपदो विदुः। अमृतं क्षेममभयं त्रिमूर्ध्नोऽधायि मूर्धसु॥१८॥
पादास्त्रयो बहिश्चासन्नप्रजानां य आश्रमाः। अन्तस्त्रिलोक्यास्त्वपरो गृहमेधोऽबृहद्व्रतः॥१९॥
सृती विचक्रमे विष्वङ् साशनानशने उभे। यदविद्या च विद्या च पुरुषस्तूभयाश्रयः॥२०॥
यस्मादण्डं विराड् जज्ञे भूतेन्द्रियगुणात्मकः। तद् द्रव्यमत्यगाद्विश्वं गोभिः सूर्य इवातपन्॥२१॥
यदास्य नाभ्यान्नलिनादहमासं महात्मनः। नाविदं यज्ञसम्भारान् पुरुषावयवादृते॥२२॥
तेषु यज्ञस्य पशवः सवनस्पतयः कुशाः। इदं च देवयजनं कालश्चोरुगुणान्वितः॥२३॥
वस्तून्योषधयः स्नेहा रसलोहमृदो जलम्। ऋचो यजूंषि सामानि चातुर्होत्रं च सत्तम॥२४॥
नामधेयानि मन्त्राश्च दक्षिणाश्च व्रतानि च। देवतानुक्रमः कल्पः संकल्पस्तन्त्रमेव च॥२५॥

परमात्मनः आत्मा चित्तं परायणं स्थानम्॥ ११॥ अहमिति सार्द्धत्रयम्। अग्रजाः सनकादयः। नागा गजाः। ग्रहाः सूर्यादयः। ऋक्षाणि अश्विन्यादीनि। तारा ध्रुवागस्त्याद्याः। स्तनयित्नवो मेघाः। केतुः धूमकेतुः अरिष्टसूचकः। भव्यं भविष्यम्। भवत् वर्तमानम्। एतत्सर्वं पुरुष एव न ततो भिन्नम्॥१२॥ ॥ १३॥ ॥ १४॥ तेन पुरुषेण। वितस्तिं दशाङ्गुलमधिक व्याप्य इत्याधिक्यमात्रं विवक्षितं न तु परिमाणम्॥१५॥ असौ प्राणः सूर्यः यथा स्वधिष्ण्यम् मण्डलम् एवं तथा विराजं विराट्शरीरम्॥१६॥ उतामृतत्वस्य-इत्यस्यार्थमाह-अमृतस्य अभयस्य। मर्त्यं मरणधर्मकम्। अन्नं वैषयिकसुखम्॥ १७॥ स्थितयः भूरादिलोकाः पादा इव पादाः अंशा यस्य स स्थितिपात् भगवान् तस्य पादेषु अंशभूतेषु लोकेषु। त्रिमूर्ध्नः महर्लोकस्य मूर्धसु उपरितनलोकेषु क्रमेण अधायि स्थापितम्। अमृत्युः अरोगः मोक्षश्च क्रमेणार्थाः ॥ १८॥ त्रयः जनतपःसत्यलोकाः। अप्रजानां ब्रह्मचर्यादीनाम् गृहस्थस्तु त्रिलोक्या अन्तःतिष्ठति ॥१९॥ ततो विष्वङ् इत्यस्यार्थमाह-विष्वक् जीवः साशनानशने भोगापवर्गसाधनभूते सृती दक्षिणोत्तरमार्गौ विचक्रमे प्रचलति स्म। यत् यतः एका अविद्या कर्मरूपा॥ २०॥ तस्माद्विराड् इत्यस्यार्थमाह यस्मात् अण्डं तत्र विराट् जज्ञे स ईश्वरः विश्वं विराट्शरीरं द्रव्यमण्डं च अत्यगात् अतिक्रम्य बहिरपि व्याप्तवान्। यथा सूर्यः गोभिः किरणैः स्वमण्डलं प्रतपन् बहिरपि प्रकाशयति तथा ॥ २१॥ नलिनात् कमलात्। संभारान् साधनानि नापश्यम्। तदा तैः पुरुषावयवैरेव संभाराः सम्पादिता इति चतुर्थेनान्वयः॥ २२॥ वस्तूनि पात्रादीनि। रसा मधुरादयः। लोहं सुवर्णम्। चतुर्भिः होत्रादिभिः अनुष्ठेयं कर्म। अनुक्रमः उद्देशः। कल्पः पद्धतिग्रन्थः। तन्त्रमनुष्ठानप्रकारः॥ २३।२४॥

गतयो मतयः श्रद्धा प्रायश्चित्तं समर्पणम् । पुरुषावयवैरेते सम्भाराः सम्भृता मया ॥२६॥
इति सम्भृतसम्भारः पुरुषावयवैरहम् । तमेव पुरुषं यज्ञं तेनैवायजमीश्वरम् ॥२७॥
ततस्ते भ्रातर इमे प्रजानां पतयो नव । अयजन् व्यक्तमव्यक्तं पुरुषं सुसमाहिताः ॥२८॥
ततश्च मनवः काले ईजिरे ऋषयोऽपरे । पितरो विबुधा दैत्या मनुष्याः क्रतुभिर्विभुम् ॥२९॥
नारायणे भगवति तदिदं विश्वमाहितम् । गृहीतमायोरुगुणः सर्गादावगुणः स्वतः ॥३०॥
सृजामि तन्नियुक्तोऽहं हरो हरति तद्वशः । विश्वं पुरुषरूपेण परिपाति त्रिशक्तिधृक् ॥३१॥
इति तेऽभिहितं तात यथेदमनुपृच्छसि । नान्यद्भगवतः किंचिद्भाव्यं सदसदात्मकम् ॥३२॥

न भारती मेऽङ्ग मृषोपलक्ष्यते न वै क्वचिन्मे मनसो मृषा गतिः ।
न मे हृषीकाणि पतन्त्यसत्पथे यन्मे हृदौत्कण्ठ्यवता धृतो हरिः ॥३३॥
सोऽहं समाम्नायमयस्तपोमयः प्रजापतीनामभिवन्दितः पतिः ।
आस्थाय योगं निपुणं समाहितस्तं नाध्यगच्छं यत आत्मसम्भवः ॥३४॥
नतोऽस्म्यहं तच्चरणं समीयुषां भवच्छिदं स्वस्त्ययनं सुमङ्गलम् ।
यो ह्यात्ममायाविभवं स्म पर्यगाद्यथा नभः स्वान्तमथापरे कुतः ॥३५॥
नाहं न यूयं यदृतां गतिं विदुर्न वामदेवः किमुतापरे सुराः ।
तन्मायया मोहितबुद्धयस्त्विदं विनिर्मितं चात्मसमं विचक्ष्महे ॥३६॥

यस्यावतारकर्माणि गायन्ति ह्यस्मदादयः । न यं विदन्ति तत्त्वेन तस्मै भगवते नमः ॥३७॥
स एष आद्यः पुरुषः कल्पे कल्पे सृजत्यजः । आत्माऽऽत्मन्यात्मनाऽऽत्मानं संयच्छति च पाति च
विशुद्धं केवलं ज्ञानं प्रत्यक्सम्यगवस्थितम् । सत्यं पूर्णमनाद्यन्तं निर्गुणं नित्यमद्वयम् ॥३९॥
ऋषे विदन्ति मुनयः प्रशान्तात्मेन्द्रियाशयाः । यदा तदेवासत्तर्कैस्तिरोधीयेत विप्लुतम् ॥४०॥

॥ २५ ॥ २६ ॥ यज्ञं श्रीविष्णुम् । ॥ २७ ॥ नव मरीच्यादयः व्यक्तं सगुणम् ॥ २८ ॥ २९ ॥ आहितम् अधिष्ठितम् ॥ ३० ॥ ध्रजतीति धृक् । धृज् गतौ धातुः ॥ ३१ ॥ भाव्यं सृज्यं सदसदात्मकं किञ्चदपि वस्तु । ॥३२॥ अङ्ग हे नारद । मृषा निरर्थिका । औत्कण्ठ्यं प्रेमोद्रेकः । धृतः ध्यातः ॥३३॥

आत्मनो मम संभवो जन्म यस्मात् तं नाध्यगच्छत् न ज्ञातवान् ॥ ३४ ॥ समीयुषां शरणागतानां संसारनिवर्तकम् स्वत्ययनम् ऐहिकम् सुमङ्गलम् आमुष्मिकम् पर्यगात् । एतावदिति न ज्ञातवान् । नभः कर्तृ । अपरे कुतो जानीयुः ॥ ३५ ॥ ऋतां गतिं परमार्थस्वरूपम् । यथा अहं न वेद्मि तथा यूयम् एवमन्येऽपि न विदुः किन्तु सर्वे वयम् आत्मसमं स्वशक्त्यनुरूपमेव विचक्ष्महे विद्मः ॥ ३६॥३७ ॥ आत्मा स्वयम् । संयच्छति संहरति ॥३८॥ विशुद्धमिति युग्मकम् । प्रत्यञ्चि जीवे सम्यक् अवस्थितम् यदा कुतर्कैः विप्लुतमाच्छन्नं भवति तदा तिरोधीयेत नानुभूयेत । आत्मा देहः । आशयो मनः ॥४०॥

आद्योऽवतारः पुरुषः परस्य कालः स्वभावः सदसन्मनश्च ।
द्रव्यं विकारो गुण इन्द्रियाणि विराट् स्वराट् स्थास्नु चरिष्णु भूम्नः ॥४१॥

अहं भवो यज्ञ इमे प्रजेशा दक्षादयो ये भवदादयश्च ।
स्वर्लोकपालाः खगलोकपाला नृलोकपालास्तललोकपालाः ॥४२॥

गन्धर्वविद्याधरचारणेशा ये यक्षरक्षोरगनागनाथाः ।
ये वा ऋषीणामृषभाः पितॄणां दैत्येन्द्रसिद्धेश्वरदानवेन्द्राः ।
अन्ये च ये प्रेतपिशाचभूतकूष्माण्डयादोमृगपक्ष्यधीशाः ॥४३॥

यत्किं च लोके भगवन्महस्वदोजःसहस्वद्बलवत्क्षमावत् ।
श्रीह्रीविभूत्यात्मवदद्भुतार्णं तत्त्वं परं रूपवदस्वरूपम् ॥४४॥

प्राधान्यतो यानृष आमनन्ति लीलावतारान् पुरुषस्य भूम्नः ।
आपीयतां कर्णकषायशोषाननुक्रमिष्ये त इमान् सुपेशान् ॥४५॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां द्वितीयस्कन्धे षष्ठोऽध्यायः ॥६॥

॥ ४० ॥ परस्य भूम्नः परमेश्वरस्य आद्योऽवतारः पुरुषः प्रकृतीक्षणकर्ता । कालादयः शक्तयः । सदसत् कार्यकारणात्मिका प्रकृतिः । मनः महत्तत्वम् । तदादीनि तस्य कार्याणि । द्रव्यं भूतानि । विकारोऽहङ्कारः । विराट् समष्टिशरीरम् । स्वराट् वैराजः स्थास्नु स्थावरं जङ्गमं तस्य व्यष्टिशरीरम् ॥४१॥ अहं ब्रह्मा । तदादयः गुणावताराः । दक्षादयः विभूतयः । यज्ञो विष्णुः ॥ ४२ ॥ गन्धर्वेति सार्द्धम् । यत् किञ्चित् तत्सर्वं परमेव तत्त्वं तद्विभूतिरेव । ओजःसहसी इन्द्रियमनःशक्ती तद्युक्तम् । आत्मा बुद्धिः । अद्भुतार्णम् आश्चर्यवर्णम् । किं बहुना साकारं निराकारं सर्वं तदेव ॥ ४४ ॥ हे ऋषे नारद ! यान् आमनन्ति कथयन्ति तानेव क्रमेण कथयिष्यामि । तदनुक्रमणामृतं त्वया पीयताम् । शत्रन्तं वा । असत्कथाश्रवणैः कर्णयोः ये कषाया दुर्वासनाः तान् शोषयन्तीति तथा तान् । सुपेशान् सुन्दरान् ।

इति श्रीमद्भागवते महापुराणे द्वितीयस्कन्धे गूढार्थदीपिन्यां षष्ठोऽध्यायः ॥६॥

अथ सप्तमोऽध्यायः

ब्रह्मोवाच

यत्रोद्यतः क्षितितलोद्धरणाय बिभ्रत्क्रौडीं तनुं सकलयज्ञमयीमनन्तः ।
अन्तर्महार्णव उपागतमादिदैत्यं तं दंष्ट्रयाद्रिमिव वज्रधरो ददार ॥ १ ॥

जातो रुचेरजनयत्सुयमान् सुयज्ञ आकूतिसूनुरमरानथ दक्षिणायाम् ।
लोकत्रयस्य महतीमहरद् यदाऽऽर्ति स्वायंभुवेन मनुना हरिरित्यनूक्तः ॥ २ ॥

जज्ञे च कर्दमगृहे द्विज देवहूत्यां स्त्रीभिः समं नवभिरात्मगतिं स्वमात्रे ।
ऊचे ययाऽऽत्मशमलं गुणसङ्गपङ्कमस्मिन् विधूय कपिलस्य गतिं प्रपेदे ॥ ३ ॥

अत्रेरपत्यमभिकाङ्क्षत आह तुष्टो दत्तो मयाहमिति यद्भगवान् स दत्तः ।
यत्पादपङ्कजपरागपवित्रदेहा योगर्द्धिमापुरुभयीं यदुहैहयाद्याः ॥ ४ ॥

तप्तं तपो विविधलोकसिसृक्षया मे आदौ सनात्स्वतपसः स चतुःसनोऽभूत् ।
प्राक्कल्पसम्प्लवविनष्टमिहात्मतत्त्वं सम्यग्जगाद मुनयो यदचक्षतात्मन् ॥ ५ ॥

धर्मस्य दक्षदुहितर्यजनिष्ट मूर्त्यां नारायणो नर इति स्वतपःप्रभावः ।
दृष्ट्वाऽऽत्मनो भगवतो नियमावलोपं देव्यस्त्वनङ्गपृतना घटितुं न शेकुः ॥ ६ ॥

सप्तमे श्रीहरेर्नानावताराः कर्मभिः सह ।
विभूतयः सभक्ताश्च ब्रह्मणा सम्यगीरिताः ॥ १ ॥

यत्र यदा वाराहीं तनुं विभ्रत् उद्यतः अनन्तः तदा तं हिरण्याक्षं प्रथमं करेण ततो दंष्ट्रया विददारेति योज्यम् । अन्यथा 'करेण कर्णमूलेऽहन्' इत्युक्तेर्विरोधः स्यात् । वज्रधरः इन्द्रः ॥ १ ॥ रुचेर्भार्या आकूतिः तत्सूनुः सुयज्ञो नाम जातः । स च दक्षिणायां स्वभार्यायां सुयमसंज्ञकान् अमरान् अजनयत् । स एव इन्द्रः सन् यदा आर्तिमहरत् तदा सुयज्ञनामापि मनुना अनु पश्चात् हरिरित्युक्तः ॥२॥ हे द्विज नारद ! भगिनीभिः समं सह कपिलो जज्ञे । स च मात्रे आत्मगतिं ब्रह्मविद्याम् ऊचे । यया आत्मनो मलिनीकरणं पङ्कं वासनालक्षणं निरस्य गतिं मुक्तिम् प्राप्तवती ॥ ३ ॥ मया अहमेव तुभ्यं दत्तः इति यत् आह स दत्तो नाम । योगर्द्धिं योगसिद्धिम् । उभयीं भुक्तिमुक्तिरूपां । हैहयः सहस्रार्जुनः ॥४॥ मे मया यत् तपः तप्तं कृतं तस्य सनात्[1]दानात् भगवति समर्पणात् स भगवान् चतुःसनः सनकादिचतुर्मूर्तिः सन् प्रादुरभूत् । सम्प्लवे प्रलये । यत् तत्त्वम् मुनयःआत्मनि मनसि अचक्षत् साक्षादपश्यन् ॥५॥ धर्मस्य मूर्त्यां पत्न्याम् । मूर्तिद्वयेन अजनिष्ट । स्वोऽसाधारणः । देव्यः अप्सरसः । आत्मनो नियमः तपोनाशनरूपः तस्य अवलोपं

१– 'षणु' दाने' इत्यस्मात् ।

कामं दहन्ति कृतिनो ननु रोषदृष्ट्या रोषं दहन्तमुत ते न दहन्त्यसह्यम् ।
सोऽयं यदन्तरमलं प्रविशन् बिभेति कामः कथं नु पुनरस्य मनः श्रयेत ॥ ७ ॥
विद्धः सपत्न्युदितपत्रिभिरन्ति राज्ञो बालोऽपि सन्नुपगतस्तपसे वनानि ।
तस्मा अदाद् ध्रुवगतिं गृणते प्रसन्नो दिव्याः स्तुवन्ति मुनयो यदुपर्यधस्तात् ॥ ८ ॥

यद् वेनमुत्पथगतं द्विजवाक्यवज्रविप्लुष्टपौरुषभगं निरये पतन्तम् ।
त्रात्वार्थितो जगति पुत्रपदं च लेभे दुग्धा वसूनि वसुधा सकलानि येन ॥ ९ ॥
नाभेरसावृषभ आस सुदेविसूनुर्यो वै चचार समदृग्जडयोगचर्याम् ।
यत् पारमहंस्यमृषयः पदमामनन्ति स्वस्थः प्रशान्तकरणः परिमुक्तसङ्गः ॥ १० ॥
सत्रे ममास भगवान् हयशीरषाथो साक्षात्स यज्ञपुरुषस्तपनीयवर्णः ।
छन्दोमयो मखमयोऽखिलदेवतात्मा वाचो बभूवुरुशतीः श्वसतोऽस्य नस्तः ॥ ११ ॥
मत्स्यो युगान्तसमये मनुनोपलब्धः क्षोणीमयो निखिलजीवनिकायकेतः ।
विस्रंसितानुरुभये सलिले मुखान्मे आदाय तत्र विजहार ह वेदमार्गान् ॥ १२ ॥
क्षीरोदधावमरदानवयूथपानामुन्मन्थताममृतलब्धय आदिदेवः ।
पृष्ठेन कच्छपवपुर्विदधार गोत्रं निद्राक्षणोऽद्रिपरिवर्तकषाणकण्डूः ॥ १३ ॥
त्रैविष्टपोरुभयहा स नृसिंहरूपं कृत्वा भ्रमद्भ्रुकुटिदंष्ट्रकरालवक्त्रम् ।
दैत्येन्द्रमाशु गदयाभिपतन्तमाराटूरौ निपात्य विददार नखैः स्फुरन्तम् ॥ १४॥

दृष्ट्वा भगवतो व्रतभङ्गं कर्तुं न शेकुः ॥ ६ ॥ कृतिनः श्रीरुद्रादयः नु अहो । उत अपि । सोऽयं रोषः यस्य अमलम् अन्तर्मनः । प्रविशन्निति पाठः ॥ ७ ॥ सपत्नी सुरुचिः तस्या उदितैः प्रयुक्तैः पत्रिभिः वाग्बाणैः । राज्ञः अन्ति विद्धोऽपि तपसे तपः कर्तुम् । गृणते स्तुवते । यत् यां गतिम् उपरिस्थिता भृग्वादयः अधः स्थिताः सप्तर्षयः स्तुवन्तिः ॥ ८ ॥ यत् यदा ऋषिभिः अर्थितः तदा वेनं त्रात्वा पुत्र इति पदं नाम लेभे । येन पृथुना जगति जगन्निमित्तं वसूनि अन्नादीनि दुग्धा अदुह्यत । कथंभूतं वेनम् । वाक्यमेव वज्रं तेन विप्लुष्टं दग्धं पौरुषम् ऐश्वर्यं च यस्य तम् ॥ ९ ॥ नाभेः पत्नी सुदेवी[1] मेरुदेवी । ऋषभः आस अभूत् । जडवत् योगचर्यां समाधिम् । यत् यां परमहंसानां पदं चिह्नम् आमनन्ति कथयन्ति ॥१०॥ सत्रे यज्ञे आस आविर्बभूव । श्वसतः श्वासान् मुञ्चतोऽस्य नासिकातः उशत्यः[2] कमनीयाः वेदलक्षणाः वाचो बभूवुः । तपनीयं सुवर्णम् ॥ ११ ॥ मनुना सत्यव्रतेन । क्षोणी पृथ्वी तन्मयः । चतुर्विधजीवसमूहानामाश्रयः । विस्रंसितान् विगलितान् मृग्यते परमात्मा येषु ते मार्गाः वेदरूपान् मार्गान् । ह हर्षेण ॥१२॥ गोत्रं मन्दराचलम् । अद्रेः परिवर्तः परिभ्रम एव कषः घर्षणं तेन अणति अपयाति कण्डूर्यस्य ॥ १३ ॥ त्रिविष्टपे

१–सुदेवीति मेरुदेव्या एव नामान्तरम् ।
२–वा छन्दसि इति जस्यपि पूर्वसवर्णदीर्घः ।

अन्तःसरस्युरुबलेन पदे गृहीतो ग्राहेण यूथपतिरम्बुजहस्त आर्तः ।
आहेदमादिपुरुषाखिललोकनाथ तीर्थश्रवः श्रवणमङ्गलनामधेय ॥ १५ ॥
श्रुत्वा हरिस्तमरणार्थिनमप्रमेयश्चक्रायुधः पतगराजभुजाधिरूढः ।
चक्रेण नक्रवदनं विनिपाट्य तस्माद्धस्ते प्रगृह्य भगवान् कृपयोज्जहार ॥ १६ ॥
ज्यायान् गुणैरवरजोऽप्यदितेः सुतानां लोकान् विचक्रम इमान् यदथाधियज्ञः ।
क्ष्मां वामनेन जगृहे त्रिपदच्छलेन याच्ञामृते पथि चरन् प्रभुभिर्न चाल्यः ॥ १७ ॥
नार्थो बलेरयमुरुक्रमपादशौचमापः शिखां धृतवतो विबुधाधिपत्यम् ।
यो वै प्रतिश्रुतमृते न चिकीर्षदन्यदात्मानमङ्ग शिरसा हरयेऽभिमेने ॥ १८ ॥
तुभ्यं च नारद भृशं भगवान् विवृद्धभावेन साधु परितुष्ट उवाच योगम् ।
ज्ञानं च भागवतमात्मसतत्त्वदीपं यद्वासुदेवशरणा विदुरञ्जसैव ॥ १९ ॥
चक्रं च दिक्ष्वविहतं दशसु स्वतेजो मन्वन्तरेषु मनुवंशधरो बिभर्ति ।
दुष्टेषु राजसु दमं व्यदधात् स्वकीर्तिं सत्ये त्रिपृष्ठ उशतीं प्रथयंश्चरित्रैः ॥ २० ॥
धन्वन्तरिश्च भगवान् स्वयमेव कीर्तिर्नाम्ना नृणां पुरुरुजां रुज आशु हन्ति ।
यज्ञे च भागममृतायुरवावरुद्धमायुश्च वेदमनुशास्त्यवतीर्य लोके ॥ २१ ॥

स्वर्गे भवाः त्रैविष्टपाः देवाः तेषामुरु भयं हन्तीति स भगवान् । यद्वा । त्रैविष्टपाः दैत्याः[1] तेषामुरुभयं यस्मात् तादृशो हासो यस्य तत् रूपम् । भ्रमन्त्या भ्रुकुट्या दंष्ट्राभ्यां च करालं वक्त्रं यस्मिन् तत् । आरात् समीपे ॥ १४ ॥ उरुबलेन महाबलेन । यूथपतिः गजेन्द्रः । तीर्थं परमपावनं यशो यस्य तत्सम्बुद्धौ । श्रवणेनैव मङ्गलप्रदम् ॥ १५ ॥ अरणार्थिनं शरणार्थिनम् । अप्रमेयः अपरिमितबलः । पतगराजो गरुडः । हस्ते शुण्डायाम् । तस्मात् नक्रवदनात् ॥ १६ ॥ अधियज्ञः यज्ञाधिपतिः विष्णुः अदितेः सुतानां द्वादशादित्यानां मध्ये अवरजोऽपि कनिष्ठोऽपि गुणैः ज्येष्ठः । यतो लोकान् क्रान्तवान् । पथि चरन् धर्ममार्गे वर्तमानः सः प्रभुभिः समर्थैरपि न चाल्यः ऐश्वर्यात् भ्रंशनीयो न स्यात् अतः याच्ञां चक्रे ॥ १७ ॥ अत्र आ अपः इति छेदः । यत् विबुधाधिपत्यम् इति अयं बलेरर्थः पुरुषार्थो नास्ति । यत् उरुक्रमस्य वामनस्य भगवतः पादप्रक्षालनरूपाः अपः आ सम्यक् प्रकारेण शिखां शिरः प्रति धृतवतः । किञ्च यत् प्रतिश्रुतं प्रतिज्ञातं तत् विना न चिकीर्षत्[2] अन्यथा कर्तुं नैच्छत् । किं बहुना पादपूत्यर्थं हरये आत्मानमपि अभिमेने समर्पितवान् । अङ्ग हे नारद ॥ १८ ॥ विवृद्धभावेन अनन्यभक्त्या तुष्टः सन् योगं भक्तियोगं ज्ञानसाधनं भागवतं च उवाच । दीपं प्रकाशकम् । अञ्जसा सुखेन । तत्त्वसतत्त्वशब्दौ पर्यायौ ॥ १९ ॥ स एष मनुवंशपालकः सन् स्वतेजः प्रभावमेव चक्रम् आज्ञारूपं दिक्षु धारयति । दुष्टेषु दण्डं च व्यदधात् । किं कुर्वन् । त्रयाणां लोकानां पृष्ठे उपरि स्थिते सत्यलोकेऽपि उशतीं कमनीयां कीर्तिं विस्तारयन् ॥ २० ॥ कीर्तिः कीर्तिरूपः । पुरुरुजां महारोगिणां रुजः रोगान् । दैत्यैः रुद्धं यज्ञे भागम् अवाप । किञ्च अवतीर्य आयुर्विषयकं वेदं च अनुशास्ति प्रवर्तयति । कथंभूतः । अमृतम् अपमृत्युनिवारकमायुर्यस्मात् सः ॥ २१ ॥

1–हिरण्यकशिपो राज्यकाले ।

2–'बहुलं छन्दस्यमाङ्योगेऽपि' इत्यडभावः ।

क्षत्रं क्षयाय विधिनोपभृतं महात्मा ब्रह्मध्रुगुज्झितपथं नरकार्तिलिप्सु ।
उद्धन्त्यसाववनिकण्टकमुग्रवीर्यस्त्रिःसप्तकृत्व उरुधारपरश्वधेन ॥ २२ ॥
अस्मत्प्रसादसुमुखः कलया कलेश इक्ष्वाकुवंश अवतीर्य गुरोर्निदेशे ।
तिष्ठन् वनं सदयितानुज आविवेश यस्मिन् विरुध्य दशकन्धर आर्तिमाच्छंत् ॥ २३ ॥
यस्मा अदादुदधिरूढभयाङ्गवेपो मार्गं सपद्यरिपुरं हरवद्दिधक्षोः ।
दूरेसुहृन्मथितरोषसुशोणदृष्ट्या तातप्यमानमकरोरगनक्रचक्रः ॥ २४
वक्षःस्थलस्पर्शरुग्णमहेन्द्रवाहदन्तैर्विडम्बितककुब्जुष ऊढहासम् ।
सद्योऽसुभिः सह विनेष्यति दारहर्तुर्विस्फूर्जितैर्धनुष उच्चरतोऽधिसैन्ये ॥ २५ ॥
भूमेः सुरेतरवरूथविमर्दितायाः क्लेशव्ययाय कलया सितकृष्णकेशः ।
जातः करिष्यति जनानुपलक्ष्यमार्गः कर्माणि चात्ममहिमोपनिबन्धनानि ॥ २६ ॥
तोकेन जीवहरणं यदुलूकिकायास्त्रैमासिकस्य च पदा शकटोऽपवृत्तः ।
यद्रिङ्गतान्तरगतेन दिविस्पृशोर्वा उन्मूलनं त्वितरथार्जुनयोर्न भाव्यम् ॥ २७ ॥

असौ महात्मा परशुरामः क्षत्रं क्षत्रियकुलम् उद्धन्ति समूलं नाशयति एकविंशतिवारम् । केन । उरुधारेण तीक्ष्णधारेण परशुना । कुतः । ब्रह्मध्रुक् इत्यादि योज्यम् । अत एव इदृग्विधत्वात् विधिना क्षयाय मृत्यवे समर्पितमिति निश्चीयते ॥ २२ ॥ कला माया तस्या ईशो नियन्ता रामः वंशे अवतीर्य गुरोः पितुः निदेशे तिष्ठन् वनम् आविवेश । यस्मिन् विरुध्य दशग्रीवः आर्तिम् आच्छंत् मरणं प्राप्तवान् । कथंभूतः । अस्माकं प्रसादे अनुग्रहे उन्मुखः । कलया भरतादिरूपया ॥ २३ ॥ यस्मै रामाय उदधिः मार्गमदात् । कथंभूतः उदधिः । हरवत् दिधक्षोः रामस्य दूरे वर्तमाना या सुहृत् सीता तया निमित्तभूतया उद्दीपित रोषेण या आरक्तदृष्टिः तया ऊढं प्राप्तं यद्भयं तेन अङ्गेषु वेपः कम्पो यस्य । तथैव च अतिशयेन तप्यमानं मकरादीनां चक्रं समूहो यस्मिन् स तथाभूतः ॥२४॥ दारहर्तुः रावणस्य उढहासं[1] प्राप्तगर्वं सद्यो नेष्यति नाशयिष्यति । कैः । धनुषः विस्फूर्जितैः टङ्कारघोषैः । कथंभूतस्य । अधिसैन्ये सैन्यमध्ये उच्चरतः उत्कृष्टं पराक्रमं कुर्वतः । पुनश्च इन्द्ररावणयुद्धे रावणस्य वक्षस्थलस्पर्शेन रूग्णैः ऐरावतदन्तैः दिक्षु पतितैश्च तैः धवलीकृताः याः ककुभः दिशः ताः जुषते सेवते विजित्य भुङ्क्ते इति तथा तस्य ॥ २५ ॥ भूमेः क्लेशव्ययाय भारापनयनाय कलया अंशेन रामेण सह जातः सन् कर्माणि करिष्यति । आत्मनो महिमा उपनिवध्यते अभिव्यज्यते येषु तानि तथाभूतानि । सितकृष्णौ केशो[2] अंशू वर्णौ यस्य सः । यद्वा कलया चातुर्येण सिता वद्धाः कृष्णाया राधायाः केशा येनति संक्षेपः ॥ २६ ॥

तोकेन[3] वालेन । उलूकिका उलूकवदरिष्टकर्त्री पूतना तस्याः । शकटः शकटासुरः । अपवृत्तः विपरीततया पातितः । रिङ्गता जानुभ्यां गच्छता मध्यङ्गतेन दिविस्पृशोः अत्युच्चयो अर्जुनयोः उन्मूलनमिति यव्

१–'हासः स्याद्धास्यगर्वयोः' इति धरणिः ।
२–'अंशवो ये प्रकाशन्ते मम ते केशसंज्ञिता, इति भारतोक्तेः ।
३–'तोकोऽल्पाङ्गे शिशौ सुते' इत्यभिधानात् ।

यद्वै व्रजे व्रजपशून् विषतोयपीथान् पालांस्त्वजीवयदनुग्रहदृष्टिवृष्ट्या ।
तच्छुद्धयेऽतिविषवीर्यविलोलजिह्वमुच्चाटयिष्य रगं विहरन् ह्रदिन्याम् ॥ २८ ॥

तत्कर्म दिव्यमिव यन्निशि निःशयानं दावाग्निना शुचिवने परिदह्यमाने ।
उन्नेष्यति व्रजमतोऽवसितान्तकालं नेत्रे पिधाप्य सबलोऽनधिगम्यवीर्यः ॥ २९ ॥

गृह्णीत यद् यदुपबन्धममुष्य माता शुल्वं सुतस्य न तु तत्तदमुष्य माति ।
यज्जृम्भतोऽस्यवदने भुवनानि गोपी संवीक्ष्य शङ्कितमनाः प्रतिबोधिताऽऽसीत् ॥ ३० ॥

नन्दं च मोक्ष्यति भयाद् वरुणस्य पाशाद् गोपान् बिलेषु पिहितान् मयसूनुना च ।
अह्न्यापृतं निशि शयानमतिश्रमेण लोकं विकुण्ठमुपनेष्यति गोकुलं स्म ॥ ३१ ॥

गोपैर्मखे प्रतिहते व्रजविप्लवाय देवेऽभिवर्षति पशून् कृपया रिरक्षुः ।
धर्तोच्छिलीन्ध्रमिव सप्त दिनानि सप्तवर्षो महीध्रमनघैककरे सलीलम् ॥ ३२ ॥

क्रीडन् वने निशि निशाकररश्मिगौर्यां रासोन्मुखः कलपदायतमूर्च्छितेन ।
उद्दीपितस्मररुजां व्रजभृद्वधूनां हर्तुर्हरिष्यति शिरो धनदानुगस्य ॥ ३३ ॥

ये च प्रलम्बखरदर्दुरकेश्यरिष्टमल्लेभकंसयवनाः कुजपौण्ड्रकाद्याः ।
अन्ये च शाल्वकपिबल्वलदन्तवक्त्रसप्तोक्षशम्बरविदूरथरुक्मिमुख्याः ॥ ३४ ॥

तदेतत् त्रयम् इतरथा अनीश्वरत्वे न भाव्यम् ॥ २७ ॥ विषमयतोयस्य पीथं पानं येषां तान् अजीवयत् । ह्रदिन्यां यमुनायां विहरन् उरगं कालियं निःसारयिष्यतीति यत् तदपि इतरथेति योज्यम् । विलोला चपला ॥ २८ ॥ शुचिवने ग्रीष्मकालिके शुष्के वने दह्यमाने सति शयानं व्रजम् उद्धरिष्यतीति यत् तत्कर्म अलौकिकमेव । पिधाप्य पिहिते कारयित्वा । अतो दावाग्नेः हेतोः अवसितः निश्चितः अन्तकालो यस्य तं व्रजम् । अनधिगम्यं दुर्ज्ञेयम् ॥ २९ ॥ उपबध्यतेऽनेनेति उपबन्ध बन्धनसाधनं शुल्वं[1] रज्जुः । न माति न पूर्यते । तेन प्रतिबोधिता निजैश्वर्यं ज्ञापितेति यत् तद्दिव्यमेवेत्यग्रेऽपि योज्यम् ॥ ३० ॥ पाशात् यद्भयं तस्मात् नन्दं मयसूनुना व्योमासुरेण पिहितान् तिरोधापितान् गोपांश्च मोक्ष्यति। आपृतं व्यापारग्रस्तम् उपनेष्यति प्रापयिष्यति स्मेत्याश्चर्ये ॥ ३१ ॥ विप्लवाय नाशाय । उद्गतछत्राकमिव महीध्रं धर्ता धारिष्यतीति अनघे श्रमरहिते करे यत् तद्दिव्यमेव अत्र सर्वत्र यत्तदोरध्याहारेणान्वयः कार्यः ॥३२॥ निशि क्रीडन् भगवान् व्रजभृद्वधूनां गोपीनां हर्तुः धनदानुगस्य शिरो हरिष्यतीत्यन्वयः । कथंभूतानाम् । स्मरपीडितानाम् । केन । मधुरपदैः दीर्घालापयुक्तगीतेन ॥ ३३ ॥ ये चेति युग्मम् । ये च ते सर्वे हरिणा हेतुभूतेन तदीयं निलयं स्थानं वैकुण्ठं यास्यन्तीत्यन्वयः । कीदृशम् अदर्शनम् इन्द्रियागोचरम् । खरो धेनुकासुरः । दर्दुरः वकः । अरिष्टो वृषभः । कुजो भौमः । कपिः द्विविदः । उक्षाणः सप्तवृषाः मृधे युद्धे आत्तचापाः अत एव समितौ वीरसमायां शालन्ते शोभन्ते तथा । बलादयो व्याजेनैव आह्वयाः ।

१–'शुल्वं स्याद्दामताम्रयोः' इत्यभिधानात् ।

ये वा मृधे समितिशालिन आत्तचापाः काम्बोजमत्स्यकुरुकैकयसृञ्जयाद्याः ।
यास्यन्त्यदर्शनमलं बलपार्थभीमव्याजाह्वयेन हरिणा निलयं तदीयम् ॥३५॥
कालेन मीलितधियामवमृश्य नृणां स्तोकायुषां स्वनिगमो बत दूरपारः ।
आविर्हितस्त्वनुयुगं स हि सत्यवत्यां वेदद्रुमं विटपशो विभजिष्यति स्म ॥३६॥
देवद्विषां निगमवर्त्मनि निष्ठितानां पूर्भिर्मयेन विहिताभिरदृश्यतूर्भिः ।
लोकान् घ्नतां मतिविमोहमतिप्रलोभं वेषं विधाय बहु भाष्यत औपधर्म्यम् ॥३७॥
यर्ह्यालयेष्वपि सतां न हरेः कथाः स्युः पाखण्डिनो द्विजजना वृषला नृदेवाः ।
स्वाहा स्वधा वषडिति स्म गिरो न यत्र शास्ता भविष्यति कलेर्भगवान् युगान्ते ।३८।
सर्गे तपोऽहमृषयो नव ये प्रजेशाः स्थाने च धर्ममखमन्वमरावनीशाः ।
अन्ते त्वधर्महरमन्युवशासुराद्या मायाविभूतय इमाः पुरुशक्तिभाजः ॥३९॥
विष्णोर्नु वीर्यगणनां कतमोऽर्हतीह यः पार्थिवान्यपि कविर्विममे रजांसि ।
चस्कम्भ यः स्वरहसाऽस्खलता त्रिपृष्ठं यस्मात्त्रिसाम्यसदनादुरुकम्पयानम् ॥४०॥
नान्तं विदाम्यहममी मुनयोऽग्रजास्ते मायाबलस्य पुरुषस्य कुतोऽपरे ये ।
गायन् गुणान् दशशतानन आदिदेवः शेषोऽधुनापि समवस्यति नास्य पारम् ॥४१॥
येषां स एव भगवान् दययेदनन्तः सर्वात्मनाऽऽश्रितपदो यदि निर्व्यलीकम् ।
ते दुस्तरामतितरन्ति च देवमायां नैषां ममाहमिति धीः श्वसृगालभक्ष्ये ॥४२॥

अपरनामानि यस्य तेन हरिणा ॥३४॥३५॥ मीलिता सङ्कुचिता । स्तोकमल्पम् । एवंभूतानां नृणां स्वनिगमो वेदराशिः बत अहो दूरपारः दुर्गमः इति विचार्य प्रादुर्भूतः सन् विटपशः शाखाभेदेन विभक्तं करिष्यति ॥ ३६ ॥ अदृश्यतूर्भिः[1] अलक्ष्यवेगाभिः पूर्भिः विमानरूपाभिः गच्छतां तत्रत्यैश्च शस्त्रास्त्रैः लोकान् नाशयतां औपधर्म्यं पाखण्डधर्मं भाषिष्यते । स्वार्थे ष्यञ् । वेषं पाखण्डवेषम् । मतेर्विमोहो वेदमार्गत्यागः मतेः प्रलोभः विरुद्धस्वीकारश्च यस्मात्तम् ॥३७॥ नृदेवाः राजानः वृषलाः शूद्राः । कलेः शास्ता कल्किः भविष्यति ॥ ३८ ॥ सर्गे सृष्टौ अहं ब्रह्मा । स्थाने पालने । मखः विष्णुः । मनवश्च । मन्युवशाः सर्पाः । मायायां प्रकृतिमण्डले इमा विभूतयः । पुरुशक्तिः अनन्तशक्तिः ॥ ३९ ॥ इह यः कश्चन कविः गणकः रजांसि पृथिव्याः परमाणून् विममे गणितवान् तादृशेषु कतमः वीर्यगणनां कर्तुमर्हति । न कतमोऽपि । कथंभूतस्य। यो विष्णुः त्रिपृष्ठं सत्यलोकं चस्कम्भ धृतवान् स्थिरीचकार । किमिति । यस्माद् अस्खलता स्वरहसा स्वपादवेगेन त्रिसाम्यसदनात् प्रकृत्यावरणादारभ्य सर्वम् उरु 'अधिकं कम्पयानं कम्पेन पतनोन्मुखं जातम् । अत्र 'रह एकान्तवेगयोः' इति कोशादनुस्वाररहित एव पाठः साधुः ॥४०॥ पुरुषस्य यन्मायाशक्तेर्बलं तस्याप्यन्तं न वेद्मि किमुत चिच्छक्तेः । शेषोऽपि अस्य भगवतो गुणानां पारं न समवस्यति न प्राप्नोति ॥ ४१ ॥ दययेत् दयां कुर्यात् । 'अधीगर्थे'ति षष्ठी । ते च निष्कपटं यदि आश्रित-

---

[1]—त्वरतेः क्विप् ज्वरत्व रेत्यूठ् ।

वेदाहमङ्ग परमस्य हि योगमायां यूयं भवश्च भगवानथ दैत्यवर्यः ।
पत्नी मनोः स च मनुश्च तदात्मजाश्च प्राचीनबर्हिर्ऋभुरङ्ग उत ध्रुवश्च ॥४३॥
इक्ष्वाकुरैलमुचुकुन्दविदेहगाधिरघ्वम्बरीषसगरा गयनाहुषाद्याः ।
मान्धात्रलर्कशतधन्वनुरन्तिदेवा देवव्रतो बलिरमूर्त्तरयो दिलीपः ॥४४॥
सौभर्युतङ्कशिबिदेवलपिप्पलादसारस्वतोद्धवपराशरभूरिषेणाः ।
येऽन्ये विभीषणहनूमदुपेन्द्रदत्तपार्थार्ष्टिषेणविदुरश्रुतदेववर्याः ॥४५॥
ते वै विदन्त्यतितरन्ति च देवमायां स्त्रीशूद्रहूणशबरा अपि पापजीवाः ।
यद्यद्भुतक्रमपरायणशीलशिक्षास्तिर्यग्जना अपि किमु श्रुतधारणा ये ॥४६॥
शश्वत्प्रशान्तमभयं प्रतिबोधमात्रं शुद्धं समं सदसतः परमात्मतत्त्वम् ।
शब्दो न यत्र पुरुकारकवान् क्रियार्थो माया परैत्यभिमुखे च विलज्जमाना ॥४७॥
तद्वै पदं भगवतः परमस्य पुंसो ब्रह्मेति यद्विदुरजस्रसुखं विशोकम् ।
सध्र्यङ् नियम्य यतयो यमकर्तहेतिं जह्युः स्वराडिव निपानखनित्रमिन्द्रः ॥४८॥
स श्रेयसामपि विभुर्भगवान् यतोऽस्य भावस्वभावविहितस्य सतः प्रसिद्धिः ।
देहे स्वधातुविगमेऽनुविशीर्यमाणे व्योमेव तत्र पुरुषो न विशीर्यतेऽजः ॥४९॥

सोऽयं तेऽभिहितस्तात भगवान् विश्वभावनः । समासेन हरेर्नान्यदन्यस्मात् सदसच्च यत् ।५०
इदं भागवतं नाम यन्मे भगवतोदितम् । संग्रहोऽयं विभूतीनां त्वमेतद्विपुलीकुरु ॥५१॥
यथा हरौ भगवति नृणां भक्तिर्भविष्यति । सर्वात्मन्यखिलाधारे इति संकल्प्य वर्णय ॥५२॥
मायां वर्णयतोऽमुष्य ईश्वरस्यानुमोदतः । शृण्वतः श्रद्धया नित्यं माययाऽऽत्मा न मुह्यति ।५३।
इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां द्वितीयस्कन्धे ब्रह्मनारदसंवादे सप्तमोऽध्यायः ॥७॥

भगवच्चरणा भवन्ति ते एव तरन्ति । भक्ष्ये देहे ॥ ४२ ॥ वेदाऽहमिति त्रिकम् अङ्ग हे नारद ! पत्नी शतरूपा अङ्गो वेनपिता । नाहुषो नहुषपुत्रो ययातिः । देवव्रतो भीष्मः । सारस्वतो दधीचिपुत्रः । उपेन्द्रदत्तः परीक्षित् ॥ ४३ । ४४ । ४५ ॥ अद्भुतपराक्रमो हरिः तत्परायणाः भक्तास्तेषां शीले शिक्षा येषां ते तथाभूता यदि भवन्ति तर्हि तेऽपि विदन्ति तरन्ति चेत्यन्वयः । श्रुते भगवद्रूपे धारणा येषां ते विदन्तीति किमुत वक्तव्यमित्यर्थः ॥४६॥ शश्वदिति द्वयम् । यद ब्रह्मेति विदुः तदेव भगवतः पदं स्वरूपम् यत्र शब्दो न प्रवर्तते । मायाऽपि परैति दूरतोऽपसर्पति यं भगवन्तं प्रति सध्र्यक् सहचरं मनः स्थिरीकृत्य यतयः अकर्तहेतिं अभेदसाधनं त्यजन्ति उपयोगाभावात् । यथा दरिद्रः स्वराट् इन्द्रः सन् निपानखनित्रं कूपखननसाधनं कुद्दालादिकं त्यजति तद्वत् । क्रियार्थः यागादिप्रतिपादकः ॥ ४७ । ४८ ॥ यतोऽस्य सतः कार्यमात्रस्य प्रपञ्चस्य प्रसिद्धिरुत्पत्तिः स एव श्रेयसां फलानां विभुः दाता । कथंभूतस्य सतः भावानां महदादीनां स्वभावेन परिणामेन विहितस्य । ननु मृतस्य कथं फलं तत्राह-शरीरारम्भकधातूनां विगमे वियोगे सति देहे विशीर्यमाणेऽपि तत्रस्थो जीवः न विशीर्यते न नश्यति । कर्मकर्तरि लट् ॥४९॥ विश्वभावनः विश्वहेतुभूतः समासेन संक्षेपेण कथितः । यत् यतः सदसत् कार्यं कारणं च यत्किञ्चित् तत् सर्वं हरेः अन्यत् व्यतिरिक्तं नास्ति । कथंभूतात् हरेः अन्यस्मात् कार्यव्यतिरिक्तात् ॥५०।५१।५२॥ मायां लीलाम् । आत्मा मनः न मुह्यति बद्धो न भवति ।

इति श्रीमद्भागवते महापुराणे द्वितीयस्कन्धे गूढार्थदीपिन्यां सप्तमोऽध्यायः ॥७॥

अथाष्टमोऽध्यायः

राजोवाच

ब्रह्मणा चोदितो ब्रह्मन् गुणाख्यानेऽगुणस्य च। यस्मै यस्मै यथा प्राह नारदो देवदर्शनः ॥ १ ॥
एतद्वेदितुमिच्छामि तत्त्वं वेदविदां वर। हरेरद्भुतवीर्यस्य कथा लोकसुमङ्गलाः ॥ २ ॥
कथयस्व महाभाग यथाहमखिलात्मनि। कृष्णे निवेश्य निःसङ्गं मनस्त्यक्ष्ये कलेवरम् ॥ ३ ॥
शृण्वतः श्रद्धया नित्यं गृणतश्च स्वचेष्टितम्। कालेन नातिदीर्घेण भगवान् विशते हृदि ॥ ४ ॥
प्रविष्टः कर्णरन्ध्रेण स्वानां भावसरोरुहम्। धुनोति शमलं कृष्णः सलिलस्य यथा शरत् ॥ ५ ॥
धौतात्मा पुरुषः कृष्णपादमूलं न मुञ्चति। मुक्तसर्वपरिक्लेशः पान्थः स्वशरणं यथा ॥ ६ ॥
यदधातुमतो ब्रह्मन् देहारम्भोऽस्य धातुभिः। यदृच्छया हेतुना वा भवन्तो जानते यथा ॥ ७ ॥
आसीद्यदुदरात् पद्मं लोकसंस्थानलक्षणम्। यावानयं वै पुरुष इयत्तावयवैः पृथक्।
तावानसाविति प्रोक्तः संस्थावयववानिव ॥ ८ ॥
अजः सृजति भूतानि भूतात्मा यदनुग्रहात्। ददृशे येन तद्रूपं नाभिपद्मसमुद्भवः ॥ ९ ॥
स चापि यत्र पुरुषो विश्वस्थित्युद्भवाप्ययः। मुक्त्वाऽऽत्ममायां मायेशः शेते सर्वगुहाशयः ॥१०॥
पुरुषावयवैर्लोकाः सपालाः पूर्वकल्पिताः। लोकैरमुष्यावयवाः सपालैरिति शुश्रुम ॥११॥
यावान् कल्पो विकल्पो वा यथा कालोऽनुमीयते। भूतभव्यभवच्छब्द आयुर्मानं च यत्सतः ॥१२॥
कालस्यानुगतिर्या तु लक्ष्यतेऽण्वी बृहत्यपि। यावत्यः कर्मगतयो यादृशीर्द्विजसत्तम ॥१३॥
यस्मिन् कर्मसमावायो यथा येनोपगृह्यते। गुणानां गुणिनां चैव परिणाममभीप्सताम् ॥१४॥

अष्टमे देहसम्बन्धाक्षेपं जीवेशयोर्वदन्।
नृपः पौराणिकानर्थान् श्रीशुकं पृष्टवान् बहून्॥

ब्रह्मणेति सार्द्धम्। देववत् दर्शनं यस्य। देवं दर्शयतीति वा। यस्मै व्यासादन्यस्मै ॥१॥ हरेरिति अर्द्धम् ॥ २ ॥ निःसङ्गं निर्वासनम् ॥ ३ ॥ गृणतः उपदिशतः ॥ ४ ॥ स्वानां भक्तानाम्। भावसरोरुहं हृदयकमलम्। शमलं कामादिमलम्। धुनोति निवर्तयति ॥५॥ धौतात्मा निर्वासनः। पान्थः प्रवासादागत्य यथा शरणं गृहं न मुञ्चति तद्वत् ॥ ६ ॥ धातवो भूतानि तत्सम्बन्धशून्यस्य अस्य जीवस्य देहारम्भ इति यत् तत् यदृच्छया निर्निमित्तं कर्मादिना वा यथावत् जानन्ति अतः कथयन्तु ॥ ७ ॥ आसीदिति सार्द्धम्। लोकरचनात्मकं पद्मम् आसीत्। यावान् अयं पुरुषः ईश्वरः तावानसौ जीवोऽपि अतः को विशेषः तस्येति वद ॥८॥ भूतानाम् आत्मा नियन्ता अजः तद्रूपं ददृशे सृजति च अतः विशेषः प्रतीयते एव ॥९॥ यत्र शेते वसति तं देशमित्यादिप्रश्नानां तत्त्वतः उदाहर्तुमर्हसीति २४ श्लोकेन क्रियायाः सम्बन्धः कार्यः ॥ १० । ११ ॥ कल्पो महान्। विकल्पोऽवान्तरः। भूतभविष्यद्वर्तमानवाचकः। सतः कार्यस्य देवमनुष्यादेः यत् मानं तच्च ॥ १२ ॥ अण्वी सूक्ष्मा निमेषादिरूपा गतयः भोगभूमयः यादृश्यस्ताश्च ॥ १३ ॥ गुणानां सत्त्वादीनां परिणामं देवादिभावमिच्छतां गुणिनां जीवानां मध्ये येन जीवेन

भूपातालककुब्व्योमग्रहनक्षत्रभूभृताम् । सरित्समुद्रद्वीपानां सम्भवश्चैतदोकसाम् ॥१५॥
प्रमाणमण्डकोशस्य बाह्याभ्यन्तरभेदतः । महतां चानुचरितं वर्णाश्रमविनिश्चयः ॥१६॥
युगानि युगमानं च धर्मो यश्च युगे युगे । अवतारानुचरितं यदाश्चर्यतमं हरेः ॥१७॥
नृणां साधारणो धर्मः सविशेषश्च यादृशः । श्रेणीनां राजर्षीणां च धर्मः कृच्छ्रेषु जीवताम् १८
तत्त्वानां परिसंख्यानं लक्षणं हेतुलक्षणम् । पुरुषाराधनविधिर्योगस्याध्यात्मिकस्य च ॥१९॥
योगेश्वरैश्वर्यगतिर्लिङ्गभङ्गस्तु योगिनाम् । वेदोपवेदधर्माणामितिहासपुराणयोः ॥२०॥
सम्प्लवः सर्वभूतानां विक्रमः प्रतिसंक्रमः । इष्टापूर्तस्य काम्यानां त्रिवर्गस्य च यो विधिः ॥२१॥
यश्चानुशायिनां सर्गः पाखण्डस्य च सम्भवः । आत्मनो बन्धमोक्षौ च व्यवस्थानं स्वरूपतः ॥२२॥
यथाऽऽत्मतन्त्रो भगवान् विक्रीडत्यात्ममायया । विसृज्य वा यथा मायामुदास्ते साक्षिवद्विभुः २३
सर्वमेतच्च भगवन् पृच्छते मेऽनुपूर्वशः । तत्त्वतोऽर्हस्युदाहर्तुं प्रपन्नाय महामुने ॥२४॥
अत्र प्रमाणं हि भवान् परमेष्ठी यथाऽऽत्मभूः । परे चेहानुतिष्ठन्ति पूर्वेषां पूर्वजैः कृतम् ॥२५॥
न मेऽसवः परायन्ति ब्रह्मन्ननशनादमी । पिबतोऽच्युतपीयूषमन्यत्र कुपिताद् द्विजात् ॥२६॥

सूत उवाच

स उपामन्त्रितो राज्ञा कथायामिति सत्पतेः । ब्रह्मरातो भृशं प्रीतो विष्णुरातेन संसदि ॥२७॥
प्राह भागवतं नाम पुराणं ब्रह्मसम्मितम् । ब्रह्मणे भगवत्प्रोक्तं ब्रह्मकल्प उपागते ॥२८॥
यद् यत् परीक्षिदृषभः पाण्डूनामनुपृच्छति । आनुपूर्व्येण तत्सर्वमाख्यातुमुपचक्रमे ॥२९॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां द्वितीयस्कन्धे प्रश्नविधिर्नामाष्टमोऽध्यायः ॥८॥

यस्मिन् देवादिभावे सति कर्मणां फलसमुदायो यथा गृह्यते तथोदाहर्तुमित्यन्वयः ॥ १४ ॥ एतदोकसां प्राणिनां च यः संभवस्तं च एवं सर्वत्र यच्छब्दो योज्यः ॥ १५।१६।१७ ॥ श्रेणीनां तत्तद्व्यवसायोपजीविनाम् । कृच्छ्रेषु आपत्सु जीवतां सर्वेषाम् ॥ १८ ॥ परिसंख्यानं गणना । तेषां लक्षणं स्वरूपम् । तत्तत्कार्यहेतुत्वेन च यल्लक्षणं तच्च ॥ १९ ॥ भङ्गः कारणे योलयस्तम् । वेदादीनां यल्लक्षणं तच्च ॥ २० ॥ सर्गः स्थितिः संहारः इति क्रमेणार्थाः इष्टं वैदिकं कर्म । पूर्तं स्मार्तम् ॥ २१ ॥ सर्गः उत्पत्तिप्रकारः ॥ २२ ॥ प्रलये उदास्ते साक्षिरूपेण ॥ २३।२४ ॥ अत्र पृष्टेषु अर्थेषु परमेष्ठी ब्रह्मा तथा भवानपि प्रमाणं सम्यक् ज्ञाता । यतः पूर्वेषां व्यासादीनां पूर्वजैः ब्रह्मादिभिः कृतमाचरितं परे अर्वाचीनाः अपि भवदादयः । आत्मनो नारायणात् भवतीति आत्मभूः ॥ २५ ॥ न परायन्ति न व्याकुलीभवन्ति । अन्यत्र विना ॥ २६ ॥ उपामन्त्रितः प्रार्थितः । सत्पतेः भगवतः । ब्रह्मरातः[1] शुकः । ब्रह्मणा श्रीकृष्णेन गर्भान्निष्कास्य मुनये रातः दत्तः ॥ २७ ॥ कल्पे सर्वादिभे ॥ २८ ॥ आनुपूर्व्येण प्रस्तावक्रमेण न तु प्रश्नक्रमेण ॥ २९ ॥ इति श्रीमद्भागवते महापुराणे द्वितीयस्कन्धे गूढार्थदीपिन्यामष्टमोऽध्यायः ॥८॥

१—कृष्णेन ब्रह्मणा दत्तो व्यासाय मुनये स्वयम् । निष्कास्य गर्भावीटाया भूत्वाऽथ प्रतिभूर्यतः
ब्रह्मरातो ह्यतः प्रोक्तः श्रीव्यासतनयोमुनिः । इति ब्रह्मवैवर्ते ।

अथ नवमोऽध्यायः

श्रीशुक उवाच

आत्ममायामृते राजन् परस्यानुभवात्मनः । न घटेतार्थसम्बन्धः स्वप्नद्रष्टुरिवाञ्जसा ॥१॥
बहुरूप इवाभाति मायया बहुरूपया । रममाणो गुणेष्वस्या ममाहमिति मन्यते ॥२॥
यर्हि वाव महिम्नि स्वे परस्मिन् कालमाययोः । रमेत गत सम्मोहस्त्यक्त्वोदास्ते तदोभयम् ॥३॥
आत्मतत्त्वविशुद्धयर्थं यदाह भगवानृतम् । ब्रह्मणे दर्शयन् रूपमव्यलीकव्रतादृतः ॥४॥

स आदिदेवो जगतां परो गुरुः स्वधिष्ण्यमास्थाय सिसृक्षयैक्षत ।
तां नाध्यगच्छद् दृशमत्र सम्मतां प्रपञ्चनिर्माणविधिर्यया भवेत् ॥५॥
स चिन्तयन् द्व्यक्षरमेकदाम्भस्युपाश्रृणोद् द्विर्गदितं वचो विभुः ।
स्पर्शेषु यत्षोडशमेकविंशं निष्किञ्चनानां नृप यद् धनं विदुः ॥६॥
निशम्य तद्वक्तृदिदृक्षया दिशो विलोक्य तत्रान्यदपश्यमानः ।
स्वधिष्ण्यमास्थाय विमृश्य तद्धितं तपस्युपादिष्ट इवादधे मनः ॥७॥
दिव्यं सहस्राब्दममोघदर्शनो जितानिलात्मा विजितोभयेन्द्रियः ।
अतप्यत स्माखिललोकतापनं तपस्तपीयांस्तपतां समाहितः ॥८॥
तस्मै स्वलोकं भगवान् सभाजितः संदर्शयामास परं न यत्परम् ।
व्यपेतसंक्लेशविमोहसाध्वसं स्वदृष्टवद्भिर्विबुधैरभिष्टुतम् ॥९॥

नवमे सूत्तरं दास्यन् ब्रह्मणे विष्णुर्वर्णितम् ।
नृपमूचे चतुःश्लोकीश्रीमद्भागवतं शुकः ॥१॥

अनुभवात्मनः ज्ञानरूपस्य परस्य जीवस्य भगवन्मायां विना अर्थेन देहादिना सम्बन्धो न घटेत । अञ्जसा तत्त्वतः यथा स्वाप्निकदेहसम्बन्धः ॥१॥ बालोऽहं स्थविरोऽहम् इत्येवं बहुरूप इव ॥ २ ॥ स्वे महिम्नि स्वस्वरूपे रमेत । उभयम् अहं ममेति । उदास्ते जीवन्मुक्तो भवति ॥ ३ ॥ आत्मनो जीवस्य तत्त्वज्ञानार्थं तद्भवत्येव । किं तत् । यत् चतुः श्लोकीभागवतं ब्रह्मणे आह तत् ऋतं सत्यम् रूपम् निष्कपट-भावेन आदृतः सेवितः ॥ ४ ॥ गुरुः ब्रह्मा । धिष्ण्यं पद्मम् । अत्र सृष्टिविषये दृशं नाध्यगच्छत् न प्राप्तवान् ॥ ५ ॥ सृष्टिं चिन्तयन् । वचः अश्रृणोत् । स्पर्शसंज्ञकवर्णेषु यत् षोडशं तकारः एकविंशं पकारः तच्च द्विर्गदितं तप तपेति लोण्मध्यमपुरुषैकवचनम् । निष्किञ्चनानां तपस्विनाम् ॥ ६ ॥ वचो निशम्य । अन्यत् वस्त्वन्तरम् । केनचित् उपादिष्टः प्रेरित इव मन आदधे कृतवान् स्वधिष्ण्यं पद्मम् ॥ ७ ॥ तपतां तपश्चरतां मध्ये तपीयान्[1] अतिशयेन तपस्वी ब्रह्मा सहस्राब्दं तपः अतप्यत अकरोदित्यन्वयः । अमोघ-दर्शनः सत्यसङ्कल्पः स्म प्रसिद्धौ । तापनं प्रकाशकम् ॥ ८ ॥ सभाजितः आराधितः भगवान् तस्मै ब्रह्मणे

१—तपस्विन् शब्दात् ईयसुन् विन्मतोर्लुक् ।

प्रवर्तते यत्र रजस्तमस्तयोः सत्त्वं च मिश्रं न च कालविक्रमः ।
न यत्र माया किमुतापरे हरेरनुव्रता यत्र सुरासुरार्चिताः ॥१०॥
श्यामावदाताः शतपत्रलोचनाः पिशङ्गवस्त्राः सुरुचः सुपेशसः ।
सर्वे चतुर्बाहव उन्मिषन्मणिप्रवेकनिष्काभरणाः सुवर्चसः ।
प्रवालवैदूर्यमृणालवर्चसः परिस्फुरत्कुण्डलमौलिमालिनः ॥११॥
भ्राजिष्णुभिर्यः परितो विराजते लसद्विमानावलिभिर्महात्मनाम् ।
विद्योतमानः प्रमदोत्तमाद्युभिः सविद्युदभ्रावलिभिर्यथा नभः ॥१२॥
श्रीर्यत्र रूपिण्युरुगायपादयोः करोति मानं बहुधा विभूतिभिः ।
प्रेङ्खं श्रिता या कुसुमाकरानुगैर्विगीयमाना प्रियकर्म गायती ॥१३॥
ददर्श तत्राखिलसात्वतां पतिं श्रियः पतिं यज्ञपतिं जगत्पतिम् ।
सुनन्दनन्दप्रबलार्हणादिभिः स्वपार्षदमुख्यैः परिसेवितं विभुम् ॥१४॥
भृत्यप्रसादाभिमुखं दृगासवं प्रसन्नहासारुणलोचनाननम् ।
किरीटिनं कुण्डलिनं चतुर्भुजं पीताम्बरं वक्षसि लक्षितं श्रिया ॥१५॥
अध्यर्हणीयासनमास्थितं परं वृतं चतुःषोडशपञ्चशक्तिभिः ।
युक्तं भगैः स्वैरितरत्र चाध्रुवैः स्व एव धामन् रममाणमीश्वरम् ॥१६॥
तद्दर्शनाह्लादपरिप्लुतान्तरो हृष्यत्तनुः प्रेमभराश्रुलोचनः ।
ननाम पादाम्बुजमस्य विश्वसृग् यत्पारमहंस्येन पथाधिगम्यते ॥१७॥

स्वलोकं वैकुण्ठम् । यत्परं यतोऽन्यत् परं श्रेष्ठं नास्ति । व्यपेताः संक्लेशादयो यस्मात् । सुष्ठु अदृष्टं पुण्यं येषां तैः ॥ ९॥ यत्र वैकुण्ठे । तयोः ताभ्यां मिश्रं सत्त्वमपि न । विक्रमो नाशः । अपरे तत्कार्यभूताः रागलोभादयः कुतः । अनुव्रताः पार्षदाः यत्र सन्ति ।१०। श्यामेति सार्द्धम्ःश्यामः नीलमणिः तद्वन्निर्मलाः । सुपेशसः सुकुमाराः । उन्मिषन्तो दीप्तिमन्तो मणिश्रेष्ठाः येषु तानि निष्काणि वक्षोभूषणानि येषां ते । सुवर्चसः लावण्यवन्तः । प्रवालादिवत् वर्णो येषां ते । मौलयो मुकुटानि मालाश्च सन्ति येषाम् ॥ ११ ॥ य एवंभूतः तं स्वलोकमिति पूर्वेणान्वयः । भ्राजिष्णुभिः देदीप्यमानाभिः । द्युभिः कान्तिभिः । विद्युत इव स्त्रियः । अभ्रपङ्क्तय इव विमानावलयः । नभ इव लोकः ॥ १२ ॥ उरुभिः मन्त्रैः गीयते इति उरुगायो हरिः । मानं पूजाम् विभूतिभिः स्वसखीभिः सह । प्रेङ्खं रत्नदोलाम् । अनुगैः भ्रमरीभूतैः ब्रह्मादिभिः । गायन्ती यत्र वर्तते तं लोकमित्यन्वयः ॥ १३ ॥ सात्वतां भक्तानाम् ॥ १४ ॥ दृक् आसव इव जगद्विस्मारिका यस्य । प्रसन्नहासम् अरुणलोचनं च आननं यस्य । श्रिया स्वर्णरेखाकारया ॥ १५ ॥ अध्यर्हणीयं सिंहासनम् । चतस्रः प्रकृतिपुरुषमहदहङ्काराख्याः । षोडश सेन्द्रियभूताख्याः । पञ्चतन्मात्ररूपा च । इतरत्र योगिषु, धामन् धामनि ॥ १६ ॥ आन्तरम् अन्तःकरणम् । हृष्यन्ती रोमाञ्चिता तनुर्यस्य । प्रेमभरेण प्रेमोद्रेकेण अश्रूणि लोचनेषु यस्य । परमहंसैः शुद्धभक्तैरनुष्ठेयेन भक्तिमार्गेण । विश्वसृक्

तं प्रीयमाणं समुपस्थितं तदा प्रजाविसर्गे निजशासनार्हणम्।
बभाष ईषत्स्मितशोचिषा गिरा प्रियः प्रियं प्रीतमनाः करे स्पृशन् ॥१८॥

श्रीभगवानुवाच

त्वयाहं तोषितः सम्यग्वेदगर्भ सिसृक्षया। चिरं भृतेन तपसा दुस्तोषः कूटयोगिनाम् ॥१९॥
वरं वरय भद्रं ते वरेशं माभिवाञ्छितम्। ब्रह्मञ्छ्रेयः परिश्रामः पुंसो मद्दर्शनावधिः ॥२०॥
मनीषितानुभावोऽयं मम लोकावलोकनम्। यदुपश्रुत्य रहसि चकर्थ परमं तपः ॥२१॥
प्रत्यादिष्टं मया तत्र त्वयि कर्मविमोहिते। तपो मे हृदयं साक्षादात्माहं तपसोऽनघ ॥२२॥
सृजामि तपसैवेदं ग्रसामि तपसा पुनः। बिभर्मि तपसा विश्वं वीर्यं मे दुश्चरं तपः ॥२३॥

ब्रह्मोवाच

भगवन् सर्वभूतानामध्यक्षोऽवस्थितो गुहाम्। वेद ह्यप्रतिरुद्धेन प्रज्ञानेन चिकीर्षितम् ॥२४॥
तथापि नाथमानस्य नाथ नाथय नाथितम्। परावरे यथा रूपे जानीयां ते त्वरूपिणः ॥२५॥
यथाऽऽत्ममाययोगेन नानाशक्त्युपबृंहितम्। विलुम्पन् विसृजन् गृह्णन् बिभ्रदात्मानमात्मना२६
क्रीडस्यमोघसंकल्प ऊर्णनाभिर्यथोर्णुते। तथा तद्विषयां धेहि मनीषां मयि माधव ॥२७॥
भगवच्छिक्षितमहं करवाणि ह्यतन्द्रितः। नेहमानः प्रजासर्गं बध्येयं यदनुग्रहात् ॥२८॥

यावत्सखा सख्युरिवेश ते कृतः प्रजाविसर्गे विभजामि भो जनम्।
अविक्लवस्ते परिकर्मणि स्थितो मा मे समुन्नद्धमदोऽजमानिनः ॥२९॥

ब्रह्मा ॥ १७ ॥ प्रीयमाणं भगवति प्रीतिमन्तम्। विसर्गे कार्ये समुद्यतम्। अर्हणं योग्यं च। ईषद् बभाषे इत्यत्रान्वेति अन्यथा पुनरुक्तिः स्यात् स्मितपदेनैव तदर्थस्य गतार्थत्वात्। शोचिषा शोभितया ॥ १८ ॥ भृतेन अनुष्ठितेन। कूटयोगिनां दाम्भिकानाम्। शेषे षष्ठी ॥ १९ ॥ मा कोऽर्थः मां प्रति। श्रेयः परिश्रमः साधनप्रयासः। 'नोदात्तोपदेश' इति वृद्धिनिषेधाभाव आर्षः। दर्शनावधिः नास्मादधिकं फलमस्तीत्यर्थः ॥ २० ॥ मनीषितेति सार्द्धम्। मनीषितं सङ्कल्पः तस्य प्रभावः। यत् तप तपेति वचः। चकर्थ कृतवानसि। तत्र तदा। कर्मणि सृष्टिकर्मणि मोहिते सति मयैव त्वां प्रत्युपदिष्टम् ॥ २१ ॥ तप इत्यर्द्धम् हृदयम् अतिप्रियम्। आत्मा स्वरूपम् ॥ २२ ॥ मे वीर्यं शक्तिः ॥ २३ ॥ गुहां हृदयाकाशम्। अध्यक्षो द्रष्टा च। अप्रतिरुद्धेन अप्रतिहतेन ॥ २४ ॥ नाथमानस्य याचमानस्य नाथितं प्रार्थितं नाथय पूरय। परावरे सूक्ष्मस्थूले रूपे यथा जानीयां तथा मनीषां धेहीत्युत्तरेणान्वयः ॥ २५ ॥ यथेति द्वयम्। उपबृंहितम् उपचितं विश्वं विविधं सृजन् आत्मना आत्मानमवतारं गृह्णन् बिभ्रत् पालयन् दुष्टान् विलुम्पन् संहरंश्च यथा क्रीडसि तथा धेहीत्यन्वयः। यथा ऊर्णनाभिः लूताकीटः असहाय एव तन्तुभिः आत्मानम् आच्छादयति ॥२६।२७॥ अतन्द्रितः आलस्यरहितः। सर्गम् ईहमानः कुर्वन्नपि यस्य तव अनुग्रहात् न बद्धो भवेयं तमनुग्रहं कुर्विति शेषः ॥ २८ ॥ भो ईश! त्वया लौकिकस्य सख्युः सखेव अहं सखा कृतः। अतः प्रजासर्गरूपे ते परिकर्मणि परिचर्यायां स्थितोऽव्याकुल एव यावज्जनं विभजामि

श्रीभगवानुवाच

ज्ञानं परमगुह्यं मे यद्विज्ञानसमन्वितम् । सरहस्यं तदङ्गं च गृहाण गदितं मया ॥३०॥
यावानहं यथाभावो यद्रूपगुणकर्मकः । तथैव तत्त्वविज्ञानमस्तु ते मदनुग्रहात् ॥३१॥
अहमेवासमेवाग्रे नान्यद्यत्सदसत्परम् । पश्चादहं यदेतच्च योऽवशिष्येत सोऽस्म्यहम् ॥३२॥
ऋतेऽर्थं यत्प्रतीयेत न प्रतीयेत चात्मनि । तद्विद्यादात्मनो मायां यथाऽऽभासो यथा तमः ॥३३॥
यथा महान्ति भूतानि भूतेषूच्चावचेष्वनु । प्रविष्टान्यप्रविष्टानि तथा तेषु न तेष्वहम् ॥३४॥
एतावदेव जिज्ञास्यं तत्त्वजिज्ञासुनाऽऽत्मनः । अन्वयव्यतिरेकाभ्यां यत्स्यात् सर्वत्र सर्वदा ॥३५॥
एतन्मतं समातिष्ठ परमेण समाधिना । भवान् कल्पविकल्पेषु न विमुह्यति कर्हिचित् ॥३६॥

श्रीशुक उवाच

सम्प्रदिश्यैवमजनो जनानां परमेष्ठिनम् । पश्यतस्तस्य तद् रूपमात्मनो न्यरुणद्धरिः ॥३७॥
अन्तर्हितेन्द्रियार्थाय हरये विहिताञ्जलिः । सर्वभूतमयो विश्वं ससर्जेदं स पूर्ववत् ॥३८॥
प्रजापतिर्धर्मपतिरेकदा नियमान् यमान् । भद्रं प्रजानामन्विच्छन्नातिष्ठत् स्वार्थकाम्यया ॥३९॥
तं नारदः प्रियतमो रिक्थादानामनुव्रतः । शुश्रूषमाणः शीलेन प्रश्रयेण दमेन च ॥४०॥
मायां विविदिषन् विष्णोर्मायेशस्य महामुनिः । महाभागवतो राजन् पितरं पर्यतोषयत् ॥४१॥

सृजामि तावन्मे समुन्नद्धः उत्कटः मदो नाऽभूदित्यन्वयः । यद्वा मदः मा समुन्नद्ध[1] उद्रिक्तो न भवेत् ॥ २९ ॥ रहस्यं भक्तिः । अङ्गं साधनम् ॥ ३० ॥ यावान् स्वरूपतो यत्परिमाणकः यथाभावः यादक् सत्तावान् ॥ ३१ ॥ अहमित्यारभ्य सर्वदेत्यन्तं चतुःश्लोकीभागवतम् । अहमेव नान्यत् किञ्चित्। सदसतोः स्थूलसूक्ष्मयोः परं कारणभूतं प्रधानं यदग्रे सृष्टेः पूर्वमासीत् तदहमेव यदेतत् विश्वं तदप्य हमेव यः शिष्यते सोऽपि अहमेव ॥ ३२ ॥ वास्तवमर्थं विनाऽपि यत् यतः किमपि आत्मनि प्रतीयेत सच्च न तत् आत्मनो मम मायां विद्यात् । यथा आभासो द्विचन्द्रादिः अविद्यमानोऽपि प्रतीयेत । यथा तमो राहुः ग्रहमण्डले स्थितोऽपि न प्रतीयेत ॥ ३३ ॥ भूतेषु प्रविष्टानि प्रतीयमानत्वात् अप्रविष्टानि च कारणतया प्रागेव विद्यमानत्वात् । तेषु भूतभौतिकेषु अहमस्मि नचाप्यस्मि एवं भूता मम सत्ता ॥३४॥ जिज्ञास्यं विचारणीयम् । कार्येषु कारणत्वेनान्वयः कारणावस्थायां च तेभ्यो व्यतिरेकः एवमेताभ्यां यत् सर्वत्र सर्वदा स्यात् तदेवात्मा स च अहमेव अतो नास्य बन्धमोक्षकल्पनेति ॥ ३५ ॥ समाधिना चित्तैकाग्र्येण । कल्पेषु ब्रह्मदिनेषु ये विकल्पा विविधसृष्टयः तेषु न मुह्यति बन्धं न यास्यति ॥ ३६॥ जनानां सर्वजीवानां परमेष्ठिनं पितामहम् एवम् उपदिश्य अजनो नारायणः आत्मनो रूपं न्यरुणत् अन्तर्हितवान् ॥ ३७ ॥ अन्तर्हितः इन्द्रियार्थः प्रत्यक्षरूपं येन तस्मै ॥ ३८ ॥ स्वार्थकाम्या स्वप्रयोजनेच्छा तया । अन्वतिष्ठत् अनुष्ठितवान् ॥ ३९ ॥ तमिति द्वयम् ॥ ४० ॥ रिक्थं पैतृकं धनमाददते इति रिक्थादाः पुत्राः तेषां मध्ये अनुव्रत. अनुवर्ती । पितरं शुश्रूषमाणः नारदः शीलादिना तं पर्यतोषयदि-

---

१–'णह' बन्धने लुङ् प्रथमपुरुषैकवचनम् । अडभावः ।

तुष्टं निशाम्य पितरं लोकानां प्रपितामहम्। देवर्षिः परिपप्रच्छ भवान् यन्माऽनुपृच्छति ॥४२॥
तस्मा इदं भागवतं पुराणं दशलक्षणम्। प्रोक्तं भगवता प्राह प्रीतः पुत्राय भूतकृत् ॥४३॥
नारदः प्राह मुनये सरस्वत्यास्तटे नृप। ध्यायते ब्रह्म परमं व्यासायामिततेजसे ॥४४॥
यदुताहं त्वया पृष्टो वैराजात् पुरुषादिदम्। यथाऽऽसीत्तदुपाख्यास्ये प्रश्नानन्यांश्च कृत्स्नशः ४५

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां द्वितीयस्कन्धे नवमोऽध्याय ॥ ९ ॥

अथ दशमोऽध्यायः

श्रीशुक उवाच

अत्र सर्गो विसर्गश्च स्थानं पोषणमूतयः। मन्वन्तरेशानुकथा निरोधो मुक्तिराश्रयः ॥ १ ॥
दशमस्य विशुद्धयर्थं नवानामिह लक्षणम्। वर्णयन्ति महात्मानः श्रुतेनार्थेन चाञ्जसा ॥ २ ॥
भूतमात्रेन्द्रियधियां जन्म सर्ग उदाहृतः। ब्रह्मणो गुणवैषम्याद् विसर्गः पौरुषः स्मृतः ॥ ३ ॥
स्थितिर्वैकुण्ठविजयः पोषणं तदनुग्रहः। मन्वन्तराणि सद्धर्म ऊतयः कर्मवासनाः ॥ ४ ॥
अवतारानुचरितं हरेश्चास्यानुवर्तिनाम्। पुंसामीशकथाः प्रोक्ता नानाख्यानोपबृंहिताः ॥ ५ ॥
निरोधोऽस्यानुशयनमात्मनः सह शक्तिभिः। मुक्तिर्हित्वाऽन्यथा रूपं स्वरूपेण व्यवस्थितिः। ६।

त्युत्तरेणान्वयः। ॥ ४१ ॥ निशाम्य दृष्ट्वा। मा माम् ॥ ४२ ॥ भूतानि चराचराणि करोति उत्पादयतीति भूतकृत् ब्रह्मा ॥ ४३ ॥ ४४ ॥ उत अपि। इदं विश्वम्। एवं नारायणो ब्रह्मणे ब्रह्मा-नारदाय नारदो व्यासाय व्यासो मह्यम् अहं तुभ्यमिति षट्संवादीयं श्रीमद्भागवतमित्यवधेयम्।

इति श्रीमद्भागवते महापुराणे द्वितीयस्कन्धे गूढार्थदीपिन्यां नवमोऽध्यायः।

दशमेऽस्य पुराणस्य लक्षणं दशधा वदन्।
विराट्देहेन्द्रियादीनामुत्पत्तिं प्राह सन्मुनिः॥

अत्र श्रीमद्भागवते सर्गादीनि दश लक्षणानि प्रतिपाद्यन्ते ॥ १ ॥ दशमस्य आश्रयपदवाच्यस्य ज्ञानार्थम्। महात्मानो मैत्रेयादयः। श्रुतेन श्रुतिसमकक्षेण स्तुतिभागेन अञ्जसा साक्षात् वर्णयन्ति। अर्थेन तत्तत्कथानकेन तात्पर्यद्वारा ॥२॥ धीशब्देन महदहङ्कारौ। ब्रह्मणः सकाशात् यत् गुणवैषम्यं परिणामः तस्माद्धेतोः भूतादीनां यज्जन्म स सर्गः। पुरुषो ब्रह्मा तत्कृतः चराचरसर्गो विसर्गः ॥ ३ ॥ वैकुण्ठस्य भगवतो विजयः द्वीपवर्षादीनां पालनेनोत्कर्षः स्थितिः स्थानम्। तस्य साधुषु अनुग्रहः पोषणम्। सतां मन्वन्तराधिपतीनां रक्षणीयो धर्मः। वासनाः शुभाशुभलक्षणाः ॥ ४ ॥ हरेः चरितम् अस्य अनुवर्तिनां च चरितमीशकथाः ॥ ५ ॥ अस्य आत्मनो जीवस्य उपाधिभिः सह हरौ अनुशयनं लयः निरोधः। अन्यथारूपम् अविद्याध्यस्तम् ॥ ६ ॥

आभासश्च निरोधश्च यतश्चाध्यवसीयते। स आश्रयः परं ब्रह्म परमात्मेति शब्द्यते ॥ ७॥
योऽध्यात्मिकोऽयं पुरुषः सोऽसावेवाधिदैविकः। यस्तत्रोभयविच्छेदः पुरुषो ह्याधिभौतिकः॥ ८॥
एकमेकतराभावे यदा नोपलभामहे। त्रितयं तत्र यो वेद स आत्मा स्वाश्रयाश्रयः ॥ ९॥
पुरुषोऽण्डं विनिर्भिद्य यदासौ स विनिर्गतः। आत्मनोऽयनमन्विच्छन्नपोऽस्राक्षीच्छुचिः शुचीः १०
तास्ववात्सीत् स्वसृष्टासु सहस्रपरिवत्सरान्। तेन नारायणो नाम यदापः पुरुषोद्भवाः ॥११॥
द्रव्यं कर्म च कालश्च स्वभावो जीव एव च। यदनुग्रहतः सन्ति न सन्ति यदुपेक्षया ॥१२॥
एको नानात्वमन्विच्छन् योगतल्पात् समुत्थितः वीर्यं हिरण्मयं देवो मायया व्यसृजत् त्रिधा १३
अधिदैवमथाध्यात्ममधिभूतमिति प्रभुः। अथैकं पौरुषं वीर्यं त्रिधाभिद्यत तच्छृणु ॥१४॥
अन्तःशरीर आकाशात् पुरुषस्य विचेष्टतः। ओजः सहो बलं जज्ञे ततः प्राणो महानसुः ॥१५॥
अनु प्राणन्ति यं प्राणाः प्राणन्तं सर्वजन्तुषु। अपानन्तमपानन्ति नरदेवमिवानुगाः ॥१६॥
प्राणेन क्षिपता क्षुत्तृडन्तरा जायते प्रभोः। पिपासतो जक्षतश्च प्राङ्मुखं निरभिद्यत ॥१७॥
मुखतस्तालु निर्भिन्नं जिह्वा तत्रोपजायते। ततो नानारसो जज्ञे जिह्वया योऽधिगम्यते ॥१८॥
विवक्षोर्मुखतो भूम्नो वह्निर्वाग्व्याहृतं तयोः। जले वै तस्य सुचिरं निरोधः समजायतः ॥१९॥
नासिके निरभिद्येतां दोधूयति नभस्वति। तत्र वायुर्गन्धवहो घ्राणो नसि जिघृक्षतः ॥२०॥
यदाऽऽत्मनि निरालोकमात्मानं च दिदृक्षतः। निर्भिन्ने ह्यक्षिणी तस्य ज्योतिश्चक्षुर्गुणग्रहः २१

आभासः सृष्टिः निरोधो लयश्च। अवसीयते निश्चीयते। शब्द्यते कथ्यते ॥ ७ ॥ योऽयमात्मनि देहे प्रसिद्धः चक्षुरादिकरणसमूहः स आध्यात्मिकः। यश्चासौ चक्षुराद्यधिष्ठातृभूतः सूर्यादिसमूहः स आधिदैविकः यश्च उभयविभागकरः सः आधिभौतिकः गोलकरूपः पुरुषः ॥ ८ ॥ एकतराभावे चक्षुरादिकरणाभावे एकमपि विषयम्। तत्र तदा। स्वाश्रयः सन् अन्येषामाश्रयः ॥ ९ ॥ पुरुषो वैराजः। अयनं स्थानम्। अपः गर्भोदकसंज्ञाः ॥ १० ॥ तासु अप्सु। पुरुषो नरः तदुद्भवाः आपो नारा अयनं यस्येति नारायणपदव्युत्पत्तिः ॥ ११ ॥ एते यदनुग्रहतः सन्ति कार्यक्षमा भवन्ति स नारायणः। द्रव्यं पृथिव्यादि। कर्म अदृष्टम्। कालः क्षोभकः। स्वभावः परिणामः जीवो भोक्ता एते ॥ १२ ॥ एक इति युग्मम्। वीर्यं तत्त्वसमुदायरूपं ब्रह्माण्डवीजम् ॥१३॥ १४ ॥ विचेष्टतः प्राणचेष्टां कुर्वतः पुरुषस्य अन्तः शरीरे यः आकाशः तस्मात् ओजः इन्द्रियशक्तिः सहो मनःशक्तिः बलं देहशक्तिः इति शक्तित्रययुक्तः समष्टिप्राणो जज्ञे ततो महान् सर्वगतः असुर्व्यष्टिप्राणश्च सर्वेषां जज्ञे ॥ १५ ॥ प्राणन्तं चेष्टां कुर्वन्तं यं प्राणमनु जन्तूनां प्राणिनां प्राणा इन्द्रियाणि चेष्टां कुर्वन्ति। अपानन्तं चेष्टां त्यजन्तमनु अपानन्ति चेष्टां त्यजन्ति ॥ १५ ॥ क्षिपता चालयता प्राणेन निमित्तेन। निरभिद्यत विभक्तमभूत् ॥ १७ ॥ मुखतः मुखे। तत्र तालुनि ॥ १८ ॥ विवक्षोरित्यर्द्धम्। भूम्नो विराजः। वह्निः देवता वागिन्द्रियम्। तयोरधीनं व्याहृतं भाषणं विषयः ॥ १९ ॥ जले इति सार्द्धम्। नभस्वति प्राणवायौ दोधूयति अत्यन्तं प्रचलति सति। तत्र नसि वायुः देवता। घ्राणः इन्द्रियम्। गन्धो विषयः ॥ २० ॥ आत्मनि देहे। अक्षिणी अधिष्ठानभूते। ज्योतिः सूर्यः। चक्षुरिन्द्रियम्। ततो रूपग्रहणं विषयः ॥ २१ ॥

बोध्यमानस्य ऋषिभिरात्मनस्तज्जिघृक्षतः । कर्णौ च निरभिद्येतां दिशः श्रोत्रं गुणग्रहः ॥२२॥

वस्तुनो मृदुकाठिन्यलघुगुर्वोष्णशीतताम् । जिघृक्षतस्त्वङ् निर्भिन्ना तस्यां रोममहीरुहाः ।
तत्र चान्तर्बहिर्वातस्त्वचा लब्धगुणो वृतः ॥ २३ ॥

हस्तौ रुरुहतुस्तस्य नानाकर्मचिकीर्षया । तयोस्तु बलमिन्द्रश्च आदानमुभयाश्रयम् ॥२४॥

गतिं जिगीषतः पादौ रुरुहातेऽभिकामिकाम् । पद्भ्यां यज्ञः स्वयं हव्यं कर्मभिः क्रियते नृभिः२५

निरभिद्यत शिश्नो वै प्रजानन्दामृतार्थिनः । उपस्थ आसीत् कामानां प्रियं तदुभयाश्रयम् ।२६।

उत्सिसृक्षोर्धातुमलं निरभिद्यत वै गुदम् । ततः पायुस्ततो मित्र उत्सर्ग उभयाश्रयः ॥२७॥

आसिसृप्सोः पुरः पुर्या नाभिद्वारमपानतः । तत्रापानस्ततो मृत्युः पृथक्त्वमुभयाश्रयम् ॥२८॥

आदित्सोरन्नपानानामासन् कुक्ष्यन्त्रनाडयः । नद्यः समुद्राश्च तयोस्तुष्टिः पुष्टिस्तदाश्रये ॥२९॥

निदिध्यासोरात्ममायां हृदयं निरभिद्यत । ततो मनस्ततश्चन्द्रः संकल्पः काम एव च ॥३०॥

त्वक्चर्ममांसरुधिरमेदोमज्जास्थिधातवः । भूम्यप्तेजोमयाः सप्त प्राणो व्योमाम्बुवायुभिः ॥३१॥

गुणात्मकानीन्द्रियाणि भूतादिप्रभवा गुणाः । मनः सर्वविकारात्मा बुद्धिर्विज्ञानरूपिणी ॥३२॥

एतद्भगवतो रूपं स्थूलं ते व्याहृतं मया । मह्यादिभिश्चावरणैरष्टभिर्बहिरावृतम् ॥३३॥

अतः परं सूक्ष्मतममव्यक्तं निर्विशेषणम् । अनादिमध्यनिधनं नित्यं वाङ्मनसः परम् ॥३४॥

अमुनी भगवद्रूपे मया ते अनुवर्णिते । उभे अपि न गृह्णन्ति मायासृष्टे विपश्चितः ॥३५॥

ऋषभिः वेदैः । तत् आत्मनः प्रबोधनम् । दिशोऽधिष्ठातृदेवताः । श्रोत्रमिन्द्रियम् । ततो गुणग्रहः शब्दग्रहणं विषयः ॥ २२ ॥ वस्तुन इति सार्द्धम् । ओष्णम् ईषदुष्णत्वम् । त्वगिन्द्रियाधिष्ठानं चर्म जातम् । रोमाणि इन्द्रियाणि । महीरुहा देवताः । तत्र त्वचि वातो वायुः वृत आवृत्य स्थितः ।कथंभूतः ।त्वचा लब्धः गुणः स्पर्शो येन सः ॥ २३ ॥ बलम् इन्द्रियम् । इन्द्रो देवता ॥ २४ ॥ अभीष्टां गतिं गमनं जिगीषतः इच्छतः धात्वर्थस्याविवक्षितत्वात् । यज्ञो विष्णुः पद्भ्यां पादेन्द्रियेण सह । कर्मभिः गमनागमनादिभिः । हव्यं हवनीयं द्रव्यम् ॥ २५ ॥ प्रजेति । पुत्ररतिस्वर्गार्थिनः शिश्नोऽधिष्ठानम् । उपस्थ इन्द्रियम् । प्रजापतिः देवता । प्रियं तत्सम्बन्धि भोगसुखम् इन्द्रियदेवताधीनम् ॥ २६ ॥ ततः तत्र पायुरिन्द्रियम् । ततः तस्य मित्रो देवता । उत्सर्गो मलत्यागः ॥ २७ ॥ पुर्या देहात् पुरो देहान्तराणि अपसर्पितुमिच्छोः; गन्तुमिच्छोः अपानतः प्राणतश्च नाभिद्वारमधिष्ठानं निरभिद्यत । अपान इन्द्रियम् । तस्य मृत्युः देवता । पृथक्त्वं मरणम् ॥ २८ ॥ अन्नसंग्रहेच्छोः कुक्ष्यन्त्रसमुद्रतुष्टयः क्रमेण स्थानेन्द्रियदेवताविषया । पेयसंग्रहेच्छोः कुक्षिनाडिनदीपुष्टयः इति विभागः ॥ २९ ॥ मायां मायिकं वस्तु ध्यातुमिच्छोः अधिष्ठानादयः हृदयमनश्चन्द्रसङ्कल्पाः ज्ञेयाः ॥ ३० ॥ त्वगादयः सप्त भूम्यादिकार्यभूताः । एतेषां पाञ्चभौतिकत्वेऽपि वाय्वाकाशयोराहारादिरूपेण संवर्द्धकत्वाभावादेतत्त्रयस्यैव कार्यत्वमुक्तम् । प्राणस्तु व्योमादिभिः सृष्ट इति शेषः । उपरितनं सूक्ष्मं चर्म त्वक् । तदन्तर्वर्ति स्थूलं चर्मेति भेदः ॥ ३१ ॥ गुणात्मकानि रजोगुणकार्याणि । भूतादिः अहङ्कारः तत एव प्रकर्षेण भवन्तीति । आत्मा कारणम् ॥ ३२ ॥ प्रकृत्यादित्रयेण सह अष्टभिः ॥ ३३ ॥ निर्विशेषणं प्रपञ्चातीतम् ॥ ३४।३५ ॥

स वाच्यवाचकतया भगवान् ब्रह्मरूपधृक् । नामरूपक्रिया धत्ते सकर्माकर्मकः परः ।।३६।।
प्रजापतीन् मनून् देवानृषीन् पितृगणान् पृथक् । सिद्धचारणगन्धर्वान् विद्याध्रासुरगुह्यकान्३७
किन्नराप्सरसो नागान् सर्पान् किम्पुरुषोरगान् । मातृ रक्षःपिशाचांश्च प्रेतभूतविनायकान् ३८
कूष्माण्डोन्मादवेतालान् यातुधानान् ग्रहानपि । खगान् मृगान् पशून् वृक्षान् गिरीन्नृप सरीसृपान्
द्विविधाश्चतुर्विधा येऽन्ये जलस्थलनभौकसः । कुशलाकुशला मिश्राः कर्मणां गतयस्त्विमाः ४०
सत्त्वं रजस्तम इति तिस्रः सुरनृनारकाः । तत्राप्येकैकशो राजन् भिद्यन्ते गतयस्त्रिधा ।
यदैकैकतरोऽन्याभ्यां स्वभाव उपहन्यते ।।४१।।
स एवेदं जगद्धाता भगवान् धर्मरूपधृक् । पुष्णाति स्थापयन् विश्वं तिर्यङ्नरसुरात्मभिः ।४२
ततः कालाग्निरुद्रात्मा यत्सृष्टमिदमात्मनः । संनियच्छति कालेन घनानीकमिवानिलः ।।४३।।
इत्थंभावेन कथितो भगवान् भगवत्तमः । नेत्थंभावेन हि परं द्रष्टुमर्हन्ति सूरयः ।।४४।।
नास्य कर्मणि जन्मादौ परस्यानुविधीयते । कर्तृत्वप्रतिषेधार्थं माययाऽऽरोपितं हि तत् ।।४५।।
अयं तु ब्रह्मणः कल्पः सविकल्प उदाहृतः । विधिः साधारणो यत्र सर्गाः प्राकृतवैकृताः ।।४६।।
परिमाणं च कालस्य कल्पलक्षणविग्रहम् । यथा पुरस्ताद् व्याख्यास्ये पाद्मं कल्पमथो शृणु ४७

शौनक उवाच

यदाह नो भवान् सूत क्षत्ता भागवतोत्तमः । चचार तीर्थानि भुवस्त्यक्त्वा बन्धून् सुदुस्त्यजान्।
कुत्र कौषारवेस्तस्य संवादोऽध्यात्मसंश्रितः । यद्वा स भगवांतस्तस्मै पृष्टस्तत्त्वमुवाच ह ।।४९।।
ब्रूहि नस्तदिदं सौम्य विदुरस्य विचेष्टितम् । बन्धुत्यागनिमित्तं च यथैवागतवान् पुनः ।।५०।।

स भगवान् वाचकतया नामानि वाच्यतया रूपाणि । धत्ते सृजति । मायया सकर्मा ।। ३६ ।। प्रजेति सार्द्धंत्रयम् । प्रजापत्यादीन् धत्ते इत्यनुषङ्गः । सरीसृपाः सहस्रपादादयः ।। ३७ । ३८ । ३९ ।। द्विविधाः स्थावरजङ्गमभेदेन । चतुर्विधाः जरायुजादिभेदेन । जलचराः भूचराः खेचराः इति त्रिविधाश्च गतयः फलानि ।। ४० ।। सत्त्वमिति सार्द्धम् । त्रिधा भिद्यन्ते नवसंख्याका भवन्ति । स्वभावः सात्त्विकादिः । अन्याभ्यां रजस्तमोभ्याम् ।। ४१ ।। तिर्यगाद्यवतारैः इदं विश्वं पालयन् पुष्णाति भोगैः संवर्द्धयति ।।४२।। आत्मनः सकाशात् यत् सृष्टं तत् कालेन संहरति । वायुः मेघसमूहमिव । कालः प्रलयकालः । अग्निः सङ्कर्षणमुखाननः ।। ४३।। इत्थंभावेन विश्वकर्तृत्वेन । हि त्वर्थे । परन्तु सूरयः इत्थं भावेन द्रष्टुं नार्हन्ति किन्तु मायातीतं शुद्धमनन्तं सौन्दर्यनिधिं पश्यन्तीत्यर्थः ।। ४४ ।। अस्य विश्वस्य कर्मणि परस्य परमेश्वरस्य कर्तृत्वं नास्ति किन्तु तस्य प्रतिषेधार्थं केवलमनूद्यते वर्ण्यते यथा भृत्यकृत्यं राजनि यतो हि मायया भ्रान्त्या आरोपितम् ।। ४५ ।। यस्मिन् ब्रह्मा जातः सोऽयं कल्पः संवत्सरशतात्मकः । विकल्पोऽवान्तरः ब्रह्मदिनात्मकः । प्राकृताः महदादयः । वैकृताः स्थावरादयः । विधिः प्रकारश्च अन्यकल्पैः समानः ।।४६।। परिमाणं स्थूलं सूक्ष्मं च । कल्पस्य स्वरूपं तद्विभागं मन्वन्तरादिरूपं च । पुरस्तात् तृतीयस्कन्धे ।। ४७ ।। क्षत्ता विदुरः । यदेति युग्मम् । भुवः सम्बन्धीनि । कुषारवपुत्रस्य मैत्रेयस्य ज्ञानगर्भितः । यद्वा यदेव तत्त्वं

सूत उवाच

राज्ञा परीक्षिता पृष्टो यदवोचन्महामुनिः। तद्वोऽभिधास्ये शृणुत राज्ञः प्रश्नानुसारतः ॥५१॥

इति श्रीमद्भागवते महापुराणे द्वितीयस्कन्धे ऽष्टादशसाहस्र्यां संहितायां
पुरुषसंस्थानुवर्णनं नाम दशमोऽध्यायः ॥१०॥

तमुवाच यथैव[1] पुनः आगतवान् तन्निमित्तं च ब्रूहीत्युत्तरेणान्वयः। हृ स्पष्टम् ॥४८।४९।५०॥
यत् अवोचत् तद्वः युष्मान् कथयिष्यामीत्यन्वयः ॥ ५१ ॥

तृतीयोऽन्तं दशलक्षणानि प्रोक्तान्युपोद्घातपरं द्वयं च।
विराट्शरीरेन्द्रियसृष्टिरत्र स्कन्धे द्वितीये दशमेऽद्वितीये[2] ॥१॥

इति श्रीमद्भागवते महापुराणे द्वितीयस्कन्धे श्रीसनाढ्यवंशावतंस-पण्डितप्रवर-श्रीराममूर्तिशास्त्रि
पौराणिकविरचितायां गूढार्थदीपिन्यां दशमोऽध्यायः।

द्वितीयः स्कन्धः समाप्तः

हरिः ॐ तत्सत्

---

१. अयमेव पाठः समीचीनः।
२. श्रीनारायणमुखात् चतुः श्लोकीभागवतस्य अत्र आविर्भावात् अस्य अद्वितीयत्वम्।

तृतीय-स्कन्धः

अथ प्रथमोऽध्यायः

श्रीशुक उवाच

एवमेतत् पुरा पृष्टो मैत्रेयो भगवान् किल । क्षत्त्रा वनं प्रविष्टेन त्यक्त्वा स्वगृहमृद्धिमत् ॥१॥

यद्वा अयं मन्त्रकृद्वो भगवानखिलेश्वरः । पौरवेन्द्रगृहं हित्वा प्रविवेशात्मसात्कृतम् ॥२॥

राजोवाच

कुत्र क्षत्तुर्भगवता मैत्रेयेणास सङ्गमः । कदा वा सह संवाद एतद्वर्णय नः प्रभो ॥३॥

न ह्यल्पार्थोदयस्तस्य विदुरस्यामलात्मनः । तस्मिन् वरीयसि प्रश्नः साधुवादोपबृंहितः ॥४॥

सूत उवाच

स एवमृषिवर्योऽयं पृष्टो राज्ञा परीक्षिता । प्रत्याह तं सुबहुवित्प्रीतात्मा श्रूयतामिति ॥५॥

श्रीशुक उवाच

यदा तु राजा स्वसुतानसाधून् पुष्णन्नधर्मेण विनष्टदृष्टिः ।
भ्रातुर्यविष्ठस्य सुतान् विबन्धून् प्रवेश्य लाक्षाभवने ददाह ॥६॥
यदा सभायां कुरुदेवदेव्याः केशाभिमर्शं सुतकर्म गर्ह्यम् ।
न वारयामास नृपः स्नुषायाः स्वास्रैर्हरन्त्याः कुचकुङ्कुमानि ॥७॥
द्यूते त्वधर्मेण जितस्य साधोः सत्यावलम्बस्य वनागतस्य ।
न याचतोऽदात्समयेन दायं तमो जुषाणो यदजातशत्रोः ॥८॥

सर्वातिशायि शास्त्रं यत् कापिलं सांख्यशब्दितम् ।
मात्रे प्रादाद् दयार्द्रः सन् नौमि तं कपिलं हरिम् ॥१॥
प्रथमे भ्रातुरन्यायात् त्यक्त्वा तं विदुरो गतः ।
तीर्थं तत्रोद्धवं प्राप्य बन्धुवृत्तं स पृष्टवान् ॥२॥

यथा त्वयाऽहम् एवमेव क्षत्रा दासीपुत्रेण विदुरेण एतत्प्रश्नवृन्दं प्रति मैत्रेयः पृष्टः । वै प्रसिद्धं यत् गृहं भगवान् विवेश तत्स्वगृहमित्यन्वयः । आत्मीयत्वेन स्वीकृतम् । पौरवेन्द्रो दुर्योधनः । ॥ १।२।३ ॥ अल्पार्थोदयोऽल्यफलो न । उपबृंहितः पुष्टः कृतः ॥४।५॥ यदा ददाह तदाविदुरोऽयादित्येकादशेनान्वयः । यविष्ठस्य कनिष्ठस्य भ्रातुः पाण्डोः । विबन्धून् मृतपितृकान् ॥ ६ ॥ अभिमर्शमाकर्षणरूपम् । अस्त्रैरश्रुभिः ॥ ७ ॥ दायं स्वभागम् । तमः पुत्रमोहम् । यत् यदा न अदात् तदेति योज्यम् ॥ ८ ॥

यदा च पार्थप्रहितः सभायां जगद्गुरुर्यानि जगाद कृष्णः ।
न तानि पुंसाममृतायनानि राजोरु मेने क्षतपुण्यलेशः ॥९॥
यदोपहूतो भवनं प्रविष्टो मन्त्राय पृष्टः किल पूर्वजेन ।
अथाह तन्मन्त्रदृशां वरीयान् यन्मन्त्रिणो वैदुरिकं वदन्ति ॥१०॥
अजातशत्रोः प्रतियच्छ दायं तितिक्षतो दुर्विषहं तवागः ।
सहानुजो यत्र वृकोदराहिः श्वसन् रुषा यत्त्वमलं बिभेषि ॥११॥
पार्थांस्तु देवो भगवान् मुकुन्दो गृहीतवान् स क्षितिदेवदेवः ।
आस्ते स्वपुर्यां यदुदेवदेवो विनिर्जिताशेषनृदेवदेवः ॥१२॥
स एष दोषः पुरुषद्विडास्ते गृहान् प्रविष्टो यमपत्यमत्या ।
पुष्णासि कृष्णाद् विमुखो गतश्रीस्त्यजाश्वशैवं कुलकौशलाय ॥१३॥
इत्यूचिवांस्तत्र सुयोधनेन प्रवृद्धकोपस्फुरिताधरेण ।
असत्कृतः सत्स्पृहणीयशीलः क्षत्ता सकर्णानुजसौबलेन ॥१४॥
क एनमत्रोपजुहाव जिह्मं दास्याः सुतं यद्बलिनैव पुष्टः ।
तस्मिन् प्रतीपः परकृत्य आस्ते निर्वास्यतामाशु पुराच्छ्वसानः॥१५॥
स इत्थमत्युल्बणकर्णबाणैर्भ्रातुः पुरो मर्मसु ताडितोऽपि ।
स्वयं धनुर्द्वारि निधाय मायां गतव्यथोऽयादुरु मानयानः ॥१६॥
स निर्गतः कौरवपुण्यलब्धो गजाह्वयात्तीर्थपदः पदानि ।
अन्वाक्रमत् पुण्यचिकीर्षयोर्व्यां स्वधिष्ठितो यानि सहस्रमूर्तिः ॥१७॥
पुरेषु पुण्योपवनाद्रिकुञ्जेष्वपङ्कतोयेषु सरित्सरःसु ।
अनन्तलिङ्गैः समलंकृतेषु चचार तीर्थायतनेष्वनन्यः ॥१८॥
गां पर्यटन् मेध्यविविक्तवृत्तिः सदाप्लुतोऽधःशयनोऽवधूतः ।
अलक्षितः स्वैरवधूतवेषो व्रतानि चेरे हरितोषणानि ॥१९॥

उरु बहु ॥ ९ ॥ विदुरेण प्रोक्तम् ॥१०॥ आगोऽपराधम् । यत्र आगसि । श्वसन्वर्तते । यत् यस्मात् त्वम् । अलमत्यन्तम् ॥११॥ नृदेवदेवा महाराजाः ॥१२॥ यं पुष्णासि स एव मूर्तिमान् दोष एव ते गृहान्प्रविष्ट आस्ते इत्यन्वयः आशु एवं त्यज ॥ १३ ॥ इति एवं प्रकारं बहूक्तवान् विदुरः । सौबलः शकुनिः ॥१४॥ बलिना अन्नेन । प्रतीपः प्रतिकूलः । श्वसानः जीवन्मात्रशेषः सन् निष्कास्यताम् ॥१५॥ अत्युल्बणैः कठोरवाक्यैः कर्णयोर्बाणैरिव प्रविश्य मर्मसु । उरु बहु मायां मानयन् ॥ १६ ॥ तीर्थं गङ्गा पादे यस्य तस्य भगवतः तानि तानि पदानि क्षेत्राणि अनुचचार । अनन्तमूर्तिः भगवान् उर्व्यां यानि यानि सम्यगधिष्ठाय स्थितः ॥ १७ ॥ पुरेषु अयोध्यादिषु । अनन्तलिङ्गैर्भगवत्प्रतिमाभिः । तीर्थेषु जनशोधकेषु अनन्यः एकाकी॥१८॥गां पृथिवीम् । मेध्या पवित्रा विविक्ता परवृत्तिभिरमिश्रिता वृत्तिर्जीविका यस्य । विविक्तैः ।

इत्थं व्रजन् भारतमेव वर्षं कालेन यावद् गतवान् प्रभासम् ।
तावच्छशास क्षितिमेकचक्रामेकातपत्रामजितेन पार्थः ॥२०॥

तत्राथ शुश्राव सुहृद्विनष्टिं वनं यथा वेणुजवह्निसंश्रयम् ।
संस्पर्धया दग्धमथानुशोचन् सरस्वतीं प्रत्यगियाय तूष्णीम् ॥२१॥

तस्यां त्रितस्योशनसो मनोश्च पृथोरथाग्नेरसितस्य वायोः ।
तीर्थं सुदासस्य गवां गुहस्य यच्छ्राद्धदेवस्य स आसिषेवे ॥२२॥

अन्यानि चेह द्विजदेवदेवैः कृतानि नानायतनानि विष्णोः ।
प्रत्यङ्गमुख्याङ्कितमन्दिराणि यद्दर्शनात् कृष्णमनुस्मरन्ति ॥२३॥

ततस्त्वतिव्रज्य सुराष्ट्रमृद्धं सौवीरमत्स्यान् कुरुजाङ्गलांश्च ।
कालेन तावद्यमुनामुपेत्य तत्रोद्धवं भागवतं ददर्श ॥२४॥

स वासुदेवानुचरं प्रशान्तं बृहस्पतेः प्राक्तनयं प्रतीतम् ।
आलिङ्ग्य गाढं प्रणयेन भद्रं स्वानामपृच्छद् भगवत्प्रजानाम् ॥२५॥

कच्चित्पुराणौ पुरुषौ स्वनाभ्यपाद्मानुवृत्त्येह किलावतीर्णौ ।
आसात उर्व्याः कुशलं विधाय कृतक्षणौ कुशलं शूरगेहे ॥२६॥

कच्चित्कुरूणां परमः सुहृन्नो भामः स आस्ते सुखमङ्ग शौरिः ।
यो वै स्वसॄणां पितृवद्ददाति वरान् वदान्यो वरतर्पणेन ॥२७॥

कच्चिद्वरूथाधिपतिर्यदूनां प्रद्युम्न आस्ते सुखमङ्ग वीरः ।
यं रुक्मिणी भगवतोऽभिलेभे आराध्य विप्रान् स्मरमादिसर्गे ॥२८॥

कच्चित्सुखं सात्वतवृष्णिभोजदाशार्हकाणामधिपः स आस्ते ।
यमभ्यषिञ्चच्छतपत्रनेत्रो नृपासनाशां परिहृत्य दूरात् ॥२९॥

पृथग्भूतं वृक्षपतितफलादिभिर्वा । अवधूतोऽसंस्कृतदेहः । अवधूतानां तापसानाम् ॥ १९ ॥ यावत् यावता कालेन तावन्तं कालम् । एकस्यैव चक्रं सैन्यं यस्याम् । अजितेन सहायीभूतेन कृष्णेन ॥२०॥ संश्रयं वनं यथा दग्धं भवति तथा संस्पर्धया विनष्टिमित्यन्वयः । सुहृदः कौरवाः यदवो वा । प्रत्यक् प्रवाहसम्मुखम् । पश्चिमवाहिनीं वा ॥ २१ ॥ त्रितादीनामेकादश तीर्थानि तत्तन्नाम्ना प्रसिद्धानि । सुदासो राजा ॥ २२ ॥ अङ्गम् अङ्गं प्रति वर्तन्ते इति प्रत्यङ्गानि आयुधानि तेषु यन्मुख्यं चक्रादि तेन । यत् येषाम् । जना इति शेषः ॥ २३ ॥ यावत्कालेनोद्धवः प्राप्तस्तावत्स्वयमपि ॥ २४ ॥ प्राक्तनयं प्रधानशिष्यम् । प्रतीतं विख्यातम् । प्रजानां पोष्याणाम् ॥ २५ ॥ स्वनाभौ भवः यः पाद्मो ब्रह्मा तस्य प्रार्थनया कृतक्षणौ सर्वेषां कृतोत्सवौ कुशलमासाते कच्चित् ॥ २६ ॥ अङ्ग हे उद्धव ! शौरिर्वसुदेवः भामः पूज्यः भगिनीपतित्वात् । पुरुवंशभवा रोहिणी वसुदेवस्य स्त्री पुरुवंशभवत्वात् विदुरस्य च सा भगिनीत्युक्ते भगिनीपतित्वम् । वरान् नानाविधभोगान् ॥ २७ ॥ वरूथाधिपतिः सेनापतिः पूर्वजन्मनि स्मरं सन्तं यं लेभे सः ॥ २८ ॥ अधिप उग्रसेनः । कंसभयेन दूरात्स्थितं यम् । शापभयेन कृष्ण एव वा परिहृत्येत्युभयत्र

कच्चिद्धरेः सौम्य सुतः सदृक्ष आस्तेऽग्रणी रथिनां साधु साम्बः।
असूत यं जाम्बवती व्रताढ्या देवं गुहं योऽम्बिकया धृतोऽग्रे ॥३०॥

क्षेमं स कच्चिद्युयुधान आस्ते यः फाल्गुनाल्लब्धधनूरहस्यः।
लेभेऽञ्जसाऽधोक्षजसेवयैव गतिं तदीयां यतिभिर्दुरापाम् ॥३१॥

कच्चिद् बुधः स्वस्त्यनमीव आस्ते श्वफल्कपुत्रो भगवत्प्रपन्नः।
यः कृष्णपादाङ्कितमार्गपांसुष्वचेष्टत प्रेमविभिन्नधैर्यः ॥३२॥

कच्चिच्छिवं देवकभोजपुत्र्या विष्णुप्रजाया इव देवमातुः।
या वै स्वगर्भेण दधार देवं त्रयी यथा यज्ञवितानमर्थम् ॥३३॥

अपिस्विदास्ते भगवान् सुखं वो यः सात्वतां कामदुघोऽनिरुद्धः।
यमामनन्ति स्म ह शब्दयोनिं मनोमयं सत्त्वतुरीयतत्त्वम् ॥३४॥

अपिस्विदन्ये च निजात्मदैवमनन्यवृत्त्या समनुव्रता ये।
हृदीकसत्यात्मजचारुदेष्णगदादयः स्वस्ति चरन्ति सौम्य ॥३५॥

अपि स्वदोर्भ्यां विजयाच्युताभ्यां धर्मेण धर्मः परिपाति सेतुम्।
दुर्योधनोऽतप्यत यत्सभायां साम्राज्यलक्ष्म्या विजयानुवृत्त्या ॥३६॥

किं वा कृताघेष्वघमत्यमर्षी भीमोऽहिवद्दीर्घतमं व्यमुञ्चत्।
यस्याङ्घ्रिपातं रणभूर्न सेहे मार्गं गदायाश्चरतो विचित्रम् ॥३७॥

कच्चिद्यशोधा रथयूथपानां गाण्डीवधन्वोपरतारिरास्ते।
अलक्षितो यच्छरकूटगूढो मायाकिरातो गिरिशस्तुतोष ॥३८॥

यमावुतस्वित्तनयौ पृथायाः पार्थैर्वृतौ पक्ष्मभिरक्षिणीव।
रेमात उद्दाय मृधे स्वरिक्थं परात्सुपर्णाविव वज्रिवक्त्रात् ॥३९॥

योज्यम् ॥ २९ ॥ यो गर्भे धृतस्तं यमसूत स साम्वः साधु कुशलम्। सदृक्षः सदृशः ॥ ३० ॥ युयुधानः सात्यकिः। फल्गुनीनक्षत्रजातत्वात्फाल्गुनोऽर्जुनः। अञ्जसा सुखेन ॥ ३१ ॥ अनमीवो निष्पापः। पुत्रोऽक्रूरः। अचेष्टत व्यलुठत् ॥ ३२ ॥ वामनपुत्रा या अदितेरिव देवकनामायो भोजवंशीयस्तस्य पुत्र्या देवक्याः। गीर्यते शब्द्यते संकप्यते इति गर्भो मनः। 'मनस्तः' इत्युक्तेः ॥ ३३ ॥ सात्त्वतां भक्तानाम्। अपि किम्। सत्त्वस्यान्तःकरणस्य तुरीयं यन्मनस्तस्याधिष्ठातारम्। मनः प्रवर्तकम् ॥ ३४ ॥ दैवं श्रीकृष्णम् ॥ ३५ ॥ विजयोऽर्जुनः। धर्मो युधिष्ठिरः। सेतुं धर्ममर्यादाम्। अनुवृत्त्या परम्परया ॥३६॥ अघो रोषेऽपि कीर्तितः इति तीर्थः ॥ ३७ ॥ उपरतारिर्विनष्टशत्रुः। कूटेन समूहेन ॥ ३८ ॥ उत किम्। पराच्छत्रोः स्वराज्यमाच्छिद्य वज्री इन्द्रः वक्त्रं प्रधानं पत्र स वज्रिवक्त्रो देवसमूहस्तस्मादिति वा ॥३९॥

अहो पृथापि ध्रियतेऽर्भकार्थे राजर्षिवर्येण विनापि तेन ।
यस्त्वेकवीरोऽधिरथो विजिग्ये धनुर्द्वितीयः ककुभश्चतस्रः ॥४०॥

सौम्यानुशोचे तमधःपतन्तं भ्रात्रे परेताय विदुद्रुहे यः ।
निर्यापितो येन सुहृत्स्वपुर्या अहं स्वपुत्रान् समनुव्रतेन ॥४१॥

सोऽहं हरेर्मर्त्यविडम्बनेन दृशो नृणां चालयतो विधातुः ।
नान्योपलक्ष्यः पदवीं प्रसादाच्चरामि पश्यन् गतविस्मयोऽत्र ॥४२॥

नूनं नृपाणां त्रिमदोत्पथानां महीं मुहुश्चालयतां चमूभिः ।
बधात्प्रपन्नार्तिजिहीर्षयेशोऽप्युपैक्षताघं भगवान् कुरूणाम् ॥४३॥

अजस्य जन्मोत्पथनाशनाय कर्माण्यकर्तुर्ग्रहणाय पुंसाम् ।
नन्वन्यथा कोऽर्हति देहयोगं परो गुणानामुत कर्मतन्त्रम् ॥४४॥

तस्य प्रपन्नाखिललोकपानामवस्थितानामनुशासने स्वे ।
अर्थाय जातस्य यदुष्वजस्य वार्तां सखे कीर्तय तीर्थकीर्तेः ॥४५॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां तृतीयस्कन्धे विदुरोद्धवसंवादे प्रथमोऽध्यायः ॥ १ ॥

ध्रियते जीवति । धनुरेव द्वितीयं सहायो यस्य । ककुभो दिशः ॥ ४० ॥ तं धृतराष्ट्रम् । परेताय मृताय । अहं निष्कासितः ॥ ४१ ॥ हरेः पदवीं मार्गंप्रापकं पुरुषं मृगयन् पदवीं लीलां वा ॥ ४२ ॥ बधात् हेतोः । अघमपराधम् । प्रथमापराधसमय एव ईशः निगृहीतुं समर्थोऽपि ॥ ४३ ॥ कर्माणि लीलाश्च सर्वेषां पुंसां ग्रहणाय स्वस्मिन्मनस आकर्षणाय । ननु निश्चितम् । अन्यथा गुणानां परः गुणातीतोऽपि तन्त्रं विस्तारं वा कोऽर्हति न कोऽपीत्यन्वयः ॥ ४४ ॥ तेषामर्थायोपकाराय जातस्य तस्य कथां कीर्तयः । तीर्थं संसारतारिणी ॥ ४५ ॥

इति श्रीमद्भागवते महापुराणे तृतीयस्कन्धे गूढार्थदीपिन्यां प्रथमोऽध्यायः ।

अथ द्वितीयोऽध्यायः

श्रीशुक उवाच

इति भागवतः पृष्टः क्षत्त्रा वार्तां प्रियाश्रयाम्। प्रतिवक्तुं न चोत्सेह औत्कण्ठ्यात्स्मारितेश्वरः ॥१॥

यः पञ्चहायनो मात्रा प्रातराशाय याचितः। तन्नैच्छद्रचयन् यस्य सपर्यां बाललीलया ॥२॥

स कथं सेवया तस्य कालेन जरसं गतः। पृष्टो वार्तां प्रतिब्रूयाद्भर्तुः पादावनुस्मरन् ॥३॥

स मुहूर्तमभूत्तूष्णीं कृष्णाङ्घ्रिसुधया भृशम्। तीव्रेण भक्तियोगेन निमग्नः साधु निर्वृतः ॥४॥

पुलकोद्भिन्नसर्वाङ्गो मुञ्चन्मीलद्दृशा शुचः। पूर्णार्थो लक्षितस्तेन स्नेहप्रसरसम्प्लुतः ॥५॥

शनकैर्भगवल्लोकान्नृलोकं पुनरागतः। विमृज्य नेत्रे विदुरं प्रत्याहोद्धव उत्स्मयन् ॥६॥

उद्धव उवाच

कृष्णद्युमणिनिम्लोचे गीर्णेष्वजगरेण ह। किं नु नः कुशलं ब्रूयां गतश्रीषु गृहेष्वहम् ॥७॥

दुर्भगो बत लोकोऽयं यदवो नितरामपि। ये संवसन्तो न विदुर्हरिं मीना इवोडुपम् ॥८॥

इङ्गितज्ञाः पुरुप्रौढा एकारामाश्च सात्वताः। सात्वतामृषभं सर्वे भूतावासममंसत ॥९॥

देवस्य मायया स्पृष्टा ये चान्यदसदाश्रिताः। भ्राम्यते धीर्न तद्वाक्यैरात्मन्युप्तात्मनो हरौ ॥१०॥

प्रदर्श्याऽतप्ततपसामवितृप्तदृशां नृणाम्। आदायान्तरधाद्यस्तु स्वबिम्बं लोकलोचनम् ॥११॥

यन्मर्त्यलीलौपयिकं स्वयोगमायाबलं दर्शयता गृहीतम्।
विस्मापनं स्वस्य च सौभगर्द्धेः परं पदं भूषणभूषणाङ्गम् ॥१२॥

द्वितीये प्रेमवैकल्यान्मुञ्चन्नश्रूण्यथोद्धवः।
जन्मतो रासपर्यन्तां कृष्णलीलामवर्णयत् ॥१॥

क्षत्रा विदुरेण ॥ १ ॥ आशाय भोजनाय। यः उद्धवः। यस्य कृष्णस्य ॥ २ ॥ कथं प्रतिब्रूयात् उत्तरं दद्यात्। काले समयेऽपि जरसं वृद्धत्वं न गत इति व्याख्येयमन्यथा "तत्र प्रवयसोऽप्यासन् युवानोऽतिबलौजसः" इत्युक्तिविरोधः स्यात् ॥ ३ ॥ सौन्दर्यं सुधया तूष्णीं ततश्च योगेन तत्र निमग्नः सन् भृशं निर्वृतोऽलौकिकसुखं प्राप्तवान् ॥ ४ ॥ पुलकैः रोमाञ्चैरुद्भिन्नं व्याप्तम् सर्वम् अङ्गं यस्य शुचोऽश्रुणि। प्रसरे प्रवाहे ॥ ५ ॥ भगवानेव लोकः प्रवेशस्थानं तस्मात् नृलोकं शरीराद्यनुसन्धानम्। उत् उत्कृष्टम् ॥ ६ ॥ द्युमणिः सूर्यस्तस्य निम्लोचेऽन्तर्हित सति। अजगरेण कालसर्पेण ॥ ७ ॥ दुर्भगो भाग्यहीनः। सं सहार्थे ॥८॥ इङ्गितं हृद्गतं भावम्। पुरू प्रौढा अतिनिपुणाः। ऋषभं यदुश्रेष्ठम् ॥९॥ ये यादवाः अस्मद्बन्धुरिति वदन्ति। ये च शिशुपालादयो निन्दन्ति। असद्वैरम्। आत्मनि हरौ अर्पित चित्तस्य ॥ १० ॥ न तप्त तयो यैः। लोकस्य लोचनं यत्र। यः तस्मिन्नात्मनिति पूर्वेणान्वयः ॥ ११ ॥ औपयिकं योग्यम्। गृहीतमाविष्कृतम्। सौन्दर्यसमृद्धेः। भूषणानि भूषयन्तीति तथाभूतानि अङ्गानि यस्य।

यद्धर्मसूनोर्बत राजसूये निरीक्ष्य दृक्स्वस्त्ययनं त्रिलोकः ।
कार्त्स्न्येन चाद्येह गतं विधातुरर्वाक्सृतौ कौशलमित्यमन्यत ॥१३॥

यस्यानुरागप्लुतहासरासलीलावलोकप्रतिलब्धमानाः ।
व्रजस्त्रियो दृग्भिरनुप्रवृत्तधियोऽवतस्थुः किल कृत्यशेषाः ॥१४॥
स्वशान्तरूपेष्वितरैः स्वरूपैरभ्यर्द्यमानेष्वनुकम्पितात्मा ।
परावरेशो महदंशयुक्तो ह्यजोऽपि जातो भगवान् यथाग्निः ॥१५॥
मां खेदयत्येतदजस्य जन्मविडम्बनं यद् वसुदेवगेहे ।
व्रजे च वासोऽरिभयादिव स्वयं पुराद् व्यवात्सीद्यदनन्तवीर्यः ॥१६॥
दुनोति चेतः स्मरतो ममैतद् यदाह पादावभिवन्द्य पित्रोः ।
तताम्ब कंसादुरुशङ्कितानां प्रसीदतं नोऽकृतनिष्कृतीनाम् ॥१७॥
को वा अमुष्याङ्घ्रिसरोजरेणुं विस्मर्तुमीशीत पुमान् विजिघ्रन् ।
यो विस्फुरद्भ्रूविटपेन भूमेर्भारं कृतान्तेन तिरश्चकार ॥१८॥
दृष्टा भवद्भिर्ननु राजसूये चैद्यस्य कृष्णं द्विषतोऽपि सिद्धिः ।
यां योगिनः संस्पृहयन्ति सम्यग्योगेन कस्तद्विरहं सहेत ॥१९॥
तथैव चान्ये नरलोकवीरा य आहवे कृष्णमुखारविन्दम् ।
नेत्रैः पिबन्तो नयनाभिरामं पार्थास्त्रपूताः पदमापुरस्य ॥२०॥
स्वयं त्वसाम्यातिशयस्त्र्यधीशः स्वाराज्यलक्ष्म्याप्तसमस्तकामः ।
बलिं हरद्भिश्चिरलोकपालैः किरीटकोट्येडितपादपीठः ॥२१॥
तत्तस्य कैङ्कर्यमलं भृतान्नो विग्लापयत्यङ्ग यदुग्रसेनम् ।
तिष्ठन्निषण्णं परमेष्ठिधिष्ण्ये न्यबोधयद्देव निधारयेति ॥२२॥

यद्विम्बं तदादायेति योज्यम् ॥१२॥ सृतौ मनुष्यसृष्टौ प्रवर्तमानस्य विधातुर्यत्कौशलं तत्साकल्येनाद्य इह बिम्बे गतम् अस्तं गतमित्यमन्यत जनः तत्सौन्दर्यस्याकृत्रिमत्त्वादित्यर्थः । बत हर्षे ॥ १३ ॥ रासक्रीडा कटाक्षपातश्च तैः प्राप्तो वहुमानो याभिः । किलेति प्रसिद्धम् ॥ १४ ॥

इतरैरशान्तै दैंत्यादिभिः । सुष्ठु अरूपै विकटरूपैरिति क्लिष्टोऽर्थः । महदंशो ब्रह्मा तेन नियुक्तः प्रार्थितः ॥ १५॥ यद्विडम्बनमनुकरणम् एतन्माम् । व्यवात्सीत् पलायत यत् तदपि ॥ १६ ॥ नोऽस्माकमुपरि युवां प्रसीदतमिति यत्कर्म एतदपि मम चेतो व्यथयति । निष्कृतिः शुश्रूषा ॥ १७ ॥ ईशीत शक्नुयात् । कृतान्तेन कालोपमेन भ्रमदभ्रूलेशेन ॥१८॥१९॥२०॥ न साम्यमतिशयश्च यस्य यस्मात् वा । बलिं करं समर्पयद्भिः । कोट्या अग्रभागेन ॥२१॥ भृतान् भृत्यान् । अङ्ग । हे विदुर ! आसीनमुग्रसेनं स्वयं तत्तले तिष्ठन् निधारय एतत्कृत्यं निश्चिनु इति विज्ञापितवान् यत् तत् ।२२। बन्की पूतना यं श्रीकृष्णम्

अहो बकी यं स्तनकालकूटं जिघांसयापाययदप्यसाध्वी ।
लेभे गतिं धात्र्युचितां ततोऽन्यं कं वा दयालुं शरणं व्रजेम ॥२३॥
मन्येऽसुरान् भागवतांस्त्र्यधीशे संरम्भमार्गाभिनिविष्टचित्तान् ।
ये संयुगेऽचक्षत तार्क्ष्यपुत्रमंसे सुनाभायुधमापतन्तम् ॥२४॥

वसुदेवस्य देवक्यां जातो भोजेन्द्रबन्धने । चिकीर्षुर्भगवानस्याः शमजेनाभियाचितः ॥२५॥
ततो नन्दव्रजमितः पित्रा कंसाद्विबिभ्यता । एकादश समास्तत्रगूढार्चिः सबलोऽवसत् ॥२६॥
परीतो वत्सपैर्वत्सांश्चारयन् व्यहरद्विभुः । यमुनोपवने कूजद्द्विजसंकुलिताङ्घ्रिपे ॥२७॥
कौमारीं दर्शयंश्चेष्टां प्रेक्षणीयां व्रजौकसाम् । रुदन्निव हसन्मुग्धबालसिंहावलोकनः ॥२८॥
स एव गोधनं लक्ष्म्या निकेतं सितगोवृषम् । चारयन्ननुगान् गोपान् रणद्वेणुररोरमत् ॥२९॥
प्रयुक्तान् भोजराजेन मायिनः कामरूपिणः । लीलया व्यनुदत्तांस्तान् बालः क्रीडनकानिव ॥३०॥
विपन्नान् विषपानेन निगृह्य भुजगाधिपम् । उत्थाप्यापाययद् गावस्तत्तोयं प्रकृतिस्थितम् ॥३१॥
अयाजयद्गोसवेन गोपराजं द्विजोत्तमैः । वित्तस्य चोरुभारस्य चिकीर्षन् सद्व्ययं विभुः ॥३२॥
वर्षतीन्द्रे व्रजः कोपाद्भग्नमानेऽतिविह्वलः । गोत्रलीलातपत्रेण त्रातो भद्रानुगृह्णता ॥३३॥
शरच्छशिकरैर्मृष्टं मानयन् रजनीमुखम् । गायन् कलपदं रेमे स्त्रीणां मण्डलमण्डनः ॥३४॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां तृतीयस्कन्धे विदुरोद्धवसंवादे द्वितीयोऽध्यायः ॥ २ ॥

धात्री माता ॥२३॥ संरम्भः क्रोधावेशः । अंसे चक्रायुधो हरिर्यस्य तं कश्यपपुत्र गरुडमपश्यन् । कण्ठेकाल इतिवत् समासः ॥२४॥ बन्धने कारागारे । अस्या भूमेः शं सुखम् ॥२५॥ पित्रा वसुदेवेन इतो गतः । समाः वर्षाणि ॥ २६ ॥ कूजद्भिः द्विजैर्मयूरादिभिर्व्याप्ता वृक्षा यस्मिन् ॥ २७ ॥ मुग्धः सुन्दरः ॥ २८ ॥ धनं समूहम् । गोवृषाः ककुद्मन्तः ॥ २९ ॥ व्यनुदत् जघान । प्रयुक्तान् प्रेषितान् ॥ ३० ॥ विपन्नान् मृतान् गोपान् या गावस्ताश्च । प्रकृति निर्विषं जलम् ॥३१॥ गोसवेन गोपूजन यागेन नन्दम् ॥३२॥ गोत्रः पर्वत एव । हे भद्र विदुर ! ॥३३॥ मृष्टमुज्ज्वलम् । कलं मधुरम् । मण्डयति भूषयतीति मण्डनः ॥ ३४ ॥

इति श्रीमद्भागवते महापुराणे तृतीयस्कन्धे गूढार्थदीपिन्यां द्वितीयोऽध्यायः ।

अथ तृतीयोऽध्यायः

उद्धव उवाच

ततः स आगत्य पुरं स्वपित्रोश्चिकीर्षया शं बलदेवसंयुतः ।
निपात्य तुङ्गाद्रिपुयूथनाथं हतं व्यकर्षद् व्यसुमोजसोर्व्याम् ॥ १ ॥

सान्दीपनेः सकृत्प्रोक्तं ब्रह्माधीत्य सविस्तरम् । तस्मै प्रादाद्वरं पुत्रं मृतं पञ्चजनोदरात् ॥ २ ॥

समाहुता भीष्मककन्यया ये श्रियः सवर्णेन बुभूषयैषाम् ।
गान्धर्ववृत्त्या मिषतां स्वभागं जह्रे पदं मूर्ध्नि दधत्सुपर्णः ॥ ३ ॥

ककुद्मतोऽविद्धनसो दमित्वा स्वयंवरे नाग्नजितीमुवाह ।
तद्भग्नमानानपि गृध्यतोऽज्ञाञ्जघ्नेऽक्षतः शस्त्रभृतः स्वशस्त्रैः ॥ ४ ॥

प्रियं प्रभुर्ग्राम्य इव प्रियाया विधित्सुराच्छद् द्युतरुं यदर्थे ।
वज्र्याद्रवत्तं सगणो रुषान्धः क्रीडामृगो नूनमयं वधूनाम् ॥ ५ ॥

सुतं मृधे खं वपुषा ग्रसन्तं दृष्ट्वा सुनाभोन्मथितं धरित्र्या ।
आमन्त्रितस्तत्तनयाय शेषं दत्त्वा तदन्तःपुरमाविवेश ॥ ६ ॥

तत्राहृतास्ता नरदेवकन्याः कुजेन दृष्ट्वा हरिमार्तबन्धुम् ।
उत्थाय सद्यो जगृहुः प्रहर्षव्रीडानुरागप्रहितावलोकैः ॥ ७ ॥

आसां मुहूर्त एकस्मिन्नानागारेषु योषिताम् । स विधं जगृहे पाणीननुरूपः स्वमायया ॥ ८ ॥

तास्वपत्यान्यजनयदात्मतुल्यानि सर्वतः । एकैकस्यां दश दश प्रकृतेर्विबुभूषया ॥ ९ ॥

कालमागधशाल्वादीननीकै रुन्धतः पुरम् । अजीघनत्स्वयं दिव्यं स्वपुंसां तेज आदिशत् ।१०।

तृतीये मथुरां गत्वा कंसघाताद्यविस्तरात् ।
द्वारकायां च कृष्णस्य यत्कृत्यं तच्च वर्ण्यते ॥१॥

ततो व्रजात् । शं सुखम् । हतं प्राप्ताघातमतो व्यसुम् कंसम् ॥ १ ॥ सविस्तरं साङ्गं ब्रह्म वेदम् । पञ्चजनोदरं प्राप्य मृतं यमलोकादानीय वरं दक्षिणाम् ॥ २ ॥ षष्ठ्यर्थे तृतीया । श्रियः लक्ष्मीरूपायाः कन्याया रुक्मिण्याः सामानो वर्णो यस्य तेन रुक्मिणा ये समाहूताः तेषां मूर्ध्नि पदं दधत् । सुपर्णो यथा सुधां तथा स्वभागं कन्यां जह्रे । कया । गान्धर्ववृत्त्या बुभुषया सदारो भवितुमिच्छया । मिषतां पश्यतां सताम् ॥ ३ ॥ ककुद्मतः वृषान् दमित्वा विद्धनासिकान् कृत्वा । तत् तैर्वृषैः । शस्त्रैः भृतः आच्छन्नोऽपि अक्षत इति वा ॥ ४ ॥ द्युतरुं पारिजातम् आच्छंत् आनीतवान् । ग्राम्यः कामी इव अयं वज्री इन्द्रः वधूनां क्रीडामृगो वानर अतोऽस्य किमकृत्यम् इति योज्यम् ॥ ५ ॥ सुष्ठु नाभिर्मध्यं यस्य तेन चक्रेण हतं स्वसुतं भौमम् । आमन्त्रितः प्रार्थितः । तनयाय भगदत्ताय ॥ ६ ॥ कुजेन भौमेन या आहृतास्ताः ॥ ७ ॥ विधा पाणिग्रहणप्रकारः तत्सहितं ॥ ८ ॥ दशेति विध्यर्थः पालितः । "दशास्यां पुत्रानाधेहि" इति श्रुतेः । प्रकृते हेतोः बुभूषया विविधं भवितमिच्छया ॥९॥ मुचुकुन्दादिभिर्निमित्तभूतैः

शम्बरं द्विविदं बाणं मुरं बल्वलमेव च । अन्यांश्च दन्तवक्त्रादीनवधीत्कांश्च घातयन् ॥११॥

अथ ते भ्रातृपुत्राणां पक्षयोः पतितान्नृपान् । चचाल भूः कुरुक्षेत्रं येषामापततां बलैः ॥१२॥

सकर्णदुश्शासनसौबलानां कुमन्त्रपाकेन हृतश्रियायुषम् ।

सुयोधनं सानुचरं शयानं भग्नोरुमुर्व्यां न ननन्द पश्यन् ॥१३॥

कियान् भुवोऽयं क्षपितोरुभारो यद् द्रोणभीष्मार्जुनभीममूलैः ।

अष्टादशाक्षौहिणिको मदंशैरास्ते बलं दुर्विषहं यदूनाम् ॥१४॥

मिथो यदैषां भविता विवादो मध्वामदाताम्रविलोचनानाम् ।

नैषां वधोपाय इयानतोऽन्यो मय्युद्यतेऽन्तर्दधते स्वयं स्म ॥१५॥

एवं सञ्चिन्त्य भगवान् स्वराज्ये स्थाप्य धर्मजम् । नन्दयामास सुहृदः साधूनां वर्त्म दर्शयन् १६

उत्तरायां धृतः पूरोर्वंशः साध्वभिमन्युना । स वै द्रौण्यस्त्रसंछिन्नः पुनर्भगवता धृतः ॥१७॥

अयाजयद्धर्मसुतमश्वमेधैस्त्रिभिर्विभुः । सोऽपि क्ष्मामनुजै रक्षन् रेमे कृष्णमनुव्रतः ॥१८॥

भगवानपि विश्वात्मा लोकवेदपथानुगः । कामान् सिषेवे द्वार्वत्यामसक्तः सांख्यमास्थितः ॥१९॥

स्निग्धस्मितावलोकेन वाचा पीयूषकल्पया । चरित्रेणानवद्येन श्रीनिकेतेन चात्मना ॥२०॥

इमं लोकममुं चैव रमयन् सुतरां यदून् । रेमे क्षणदया दत्तक्षणस्त्रीक्षणसौहृदः ॥२१॥

तस्यैवं रममाणस्य संवत्सरगणान् बहून् । गृहमेधेषु योगेषु विरागः समजायत ॥२२॥

दैवाधीनेषु कामेषु दैवाधीनः स्वयं पुमान् । को विस्रम्भेत योगेन योगेश्वरमनुव्रतः ॥२३॥

स्वयमेव । तेन तेजः कीर्तिं च दत्तवान् ॥ १० ॥ घातयन्बभूवेतिशेष ॥ ११ ॥ नृपान् घातयान्निति योज्यम् ॥ १२ ॥ स कृष्णः । न ननन्द सन्तोषं न प्राप । सौबलः शकुनिः श्रियेति व्याडिगालवमते यकारस्य वैकल्पिकत्वात् इयङ् ॥ १३ ॥

क्षपितश्चासौ बहुभारः स कियान् अत्यल्पः । यत् यस्मात् दुर्विषहम् । मूलमादि येषां तैः मूलैः कारणभूतैर्वा ।१४। यदा तदा इयानेव । अन्तर्धास्यन्ते । स्मेति निश्चये । मधुना मद्येन ।१५।१६। पुनर्धृतः पुनर्जीवितः ॥ १७ ॥ त्रिभिरिति त्रिगुणदक्षिणादादेकस्यैव त्रित्वम् ॥ १८ ॥ सांख्यं ज्ञानम् ॥ १९ ॥ स्निग्धेति युग्मम् । आत्मना देहेन । क्षणदया रात्र्या दत्तावसरयासुतासुस्त्रीषु क्षणमात्रम् । क्षणेन कामोत्सवेन वा ॥ २०।२१ ॥ मेधेषु धर्मेषु । योगेषु कामभोगसाधनेषु । विरागः स चासीदेव तदानीमतिस्पष्टो बभूवेत्यर्थः । किञ्च "गुणेष्व सङ्गो वैराग्यमिति लक्षणात् गुणातीतेषु रुक्मिण्यादिविलासेषु वैराग्यं न व्याख्येयम् ॥ २२ ॥ भक्तियोगेन योगेश्वरं कृष्णं सेवमानः कः पुमान् तेषु विस्रम्भेत विश्वासं प्रीतिं

पुर्यां कदाचित्क्रीडद्भिर्यदुभोजकुमारकैः। कोपिता मुनयः शेपुर्भगवन्मतकोविदाः ॥२४॥
ततः कतिपयैर्मासैर्वृष्णिभोजान्धकादयः। ययुः प्रभासं संहृष्टा रथैर्देवविमोहिताः ॥२५॥
तत्र स्नात्वा पितॄन्देवानृषींश्चैव तदम्भसा। तर्पयित्वाथ विप्रेभ्यो गावो बहुगुणा ददुः ॥२६॥
हिरण्यं रजतं शय्यां वासांस्यजिनकम्बलान्। यानं रथानिभान् कन्या धरां वृत्तिकरीमपि २७
अन्नं चोरुरसं तेभ्यो दत्त्वा भगवदर्पणम्। गोविप्रार्थासवः शूराः प्रणेमुर्भुवि मूर्धभिः ॥२८॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां तृतीयस्कन्धे विदुरोद्धवसंवादे तृतीयोऽध्यायः ॥ ३ ॥

अथ चतुर्थोऽध्यायः

उद्धव उवाच

अथ ते तदनुज्ञात्वा भुक्त्वा पीत्वा च वारुणीम्। तया विभ्रंशितज्ञाना दुरुक्तैर्मर्म पस्पृशुः ॥ १ ॥
तेषां मैरेयदोषेण विषमीकृतचेतसाम्। निम्लोचति रवावासीद्वेणूनामिव मर्दनम् ॥ २॥
भगवान् स्वात्ममायाया गतिं तामवलोक्य सः। सरस्वतीमुपस्पृश्य वृक्षमूलमुपाविशत् ॥ ३॥
अहं चोक्तो भगवता प्रपन्नार्तिहरेण ह। बदरीं त्वं प्रयाहीति स्वकुलं संजिहीर्षुणा ॥ ४ ॥
अथापि तदभिप्रेतं जानन्नहमरिन्दम। पृष्ठतोऽन्वगमं भर्तुः पादविश्लेषणाक्षमः ॥ ५ ॥
अद्राक्षमेकमासीनं विचिन्वन्दयितं पतिम्। श्रीनिकेतं सरस्वत्यां कृतकेतमकेतनम् ॥ ६ ॥
श्यामावदातं विरजं प्रशान्तारुणलोचनम्। दोर्भिश्चतुर्भिर्विदितं पीतकौशाम्बरेण च ॥ ७ ॥
वाम ऊरावधिश्रित्य दक्षिणाङ्घ्रिसरोरुहम्। अपाश्रितार्भकाश्वत्थमकृशं त्यक्तपिप्पलम् ॥ ८॥
तस्मिन्महाभागवतो द्वैपायनसुहृत्सखः। लोकाननुचरन् सिद्ध आससाद यदृच्छया ॥ ९॥

वा कुर्याद् न कोऽपि ॥ २३।२४।२५ ॥ या गावस्ताः ॥ २६ ॥ हिरण्यमिति युग्मम्। यात्यनेनेति यानं हयः। उरुरसं षड्रसोपेतम् ॥ २८ ॥

इति श्रीमद्भागवते महापुराणे तृतीयस्कन्धे गूढार्थदीपिन्यां तृतीयोऽध्यायः।

चतुर्थे यदुसंहारं कृष्णान्तर्धानमुद्धवात्।
श्रुत्वा श्वसन् स्वबोधार्थी क्षत्ता मित्रासुतं गतः ॥

ते यदवः। वारुणीं मदिराम् ॥ १ ॥ निम्लोचति अस्तं गच्छति सति ॥ २ ॥ गतिं संहारलक्षणाम् ॥ ३ ॥ त्वं ह हर्षेण ॥ ४।५ ॥ अद्राक्षमिति त्रिकम्। कृतकेतं कृतनिवासम्। वस्तुतोऽनाश्रयम्। अवदातः शुद्धः। पिप्पलं विषयसुखमथाऽपि अकृशमानन्दपूर्णम् ॥ ६।७।८ ॥ तस्मिन् स्थाने।

तस्यानुरक्तस्य मुनेर्मुकुन्दः प्रमोदभावानतकन्धरस्य ।
आशृण्वतो मामनुरागहाससमीक्षया विश्रमयन्नुवाच ॥१०॥

श्रीभगवानुवाच

वेदाहमन्तर्मनसेप्सितं ते ददामि यत्तद् दुरवापमन्यैः ।
सत्रे पुरा विश्वसृजां वसूनां मत्सिद्धिकामेन वसो त्वयेष्टः ॥११॥

स एष साधो चरमो भवानामासादितस्ते मदनुग्रहो यत् ।
यन्मां नृलोकान् रह उत्सृजन्तं दिष्ट्या ददृश्वान् विशदानुवृत्त्या ॥१२॥

पुरा मया प्रोक्तमजाय नाभ्ये पद्मे निषण्णाय ममादिसर्गे ।
ज्ञानं परं मन्महिमावभासं यत्सूरयो भागवतं वदन्ति ॥१३॥

इत्यादृतोक्तः परमस्य पुंसः प्रतीक्षणानुग्रहभाजनोऽहम् ।
स्नेहोत्थरोमा स्खलिताक्षरस्तं मुञ्चञ्छुचः प्राञ्जलिराबभाषे ॥१४॥

को न्वीश ते पादसरोजभाजां सुदुर्लभोऽर्थेषु चतुर्ष्वपीह ।
तथापि नाहं प्रवृणोमि भूमन् भवत्पदाम्भोजनिषेवणोत्सुकः ॥१५॥

कर्माण्यनीहस्य भवोऽभवस्य ते दुर्गाश्रयोऽथारिभयात्पलायनम् ।
कालात्मनो यत्प्रमदायुताश्रयः स्वात्मन् रतेः खिद्यति धीर्विदामिह ॥१६॥

मन्त्रेषु मां वा उपहूय यत्त्वमकुण्ठिताखण्डसदात्मबोधः ।
पृच्छेः प्रभो मुग्ध इवाप्रमत्तस्तन्नो मनो मोहयतीव देव ॥१७॥

ज्ञानं परं स्वात्मरहःप्रकाशं प्रोवाच कस्मै भगवान् समग्रम् ।
अपि क्षमं नो ग्रहणाय भर्तर्वदाञ्जसा यद् वृजिनं तरेम ॥१८॥

इत्यावेदितहार्दाय मह्यं स भगवान् परः । आदिदेशारविन्दाक्ष आत्मनः परमां स्थितिम् ॥१९॥

द्वैपायनः सुहृत्सखा च यस्य स मैत्रेयः । तस्य पराशरशिष्यत्वात् ॥९।१०॥ वसो । उद्धव । इति पूर्वजन्माभिप्रायेण । ददामि दास्यामि ॥ ११ ॥ ते भवानां जन्मनां मध्ये एष भवो जन्म चरमः । यत् यस्मिन् ते त्वया विशदानुवृत्त्या एकान्तभक्त्या । दिष्ट्या एतत् भद्रम् ॥ १२ ॥ मम नाभ्ये नाभिस्थे । ज्ञानं ज्ञान साधनम् । महिमा लीला अवभास्यते येन तत् ददामीति पूर्वस्यानुषङ्गः ॥ १३ ॥ एवमादृत उक्तश्च । प्रतीक्षणं कृपालोकः । प्रतिक्षणं वा पाठः । शुचोऽश्रूणि ॥ १४ ॥ हे भूमन् सर्वव्यापक ॥ १५ ॥ भवो जन्म । कालात्मनो दुर्गाश्रयः पलायनं च । इह अस्मिन् विरोधे ॥ १६ ॥ वै अहो पृच्छेरपृच्छः । सदात्म यथार्थः ॥१७॥ ज्ञानं ज्ञानसाधनम् भागवतम् । कस्मै ब्रह्मणे । यद्वा न कस्मैचिदपि ब्रह्मातिरिक्तायेत्यर्थः ॥ अपि क्षमं यदि योग्यं तर्हि वद । यत् यतोऽञ्जसा सुखेन वृजिनं दुःखं संसारम् ॥ १८ ॥ स्थितिमन्तरङ्गाम्

स एवमाराधितपादतीर्थादधीततत्त्वात्मविबोधमार्गः ।
प्रणम्य पादौ परिवृत्य देवमिहागतोऽहं विरहातुरात्मा ॥२०॥

सोऽहं तद्दर्शनाह्लादवियोगार्तियुतः प्रभो । गमिष्ये दयितं तस्य बदर्याश्रममण्डलम् ॥२१॥
यत्र नारायणो देवो नरश्च भगवानृषिः । मृदु तीव्रं तपो दीर्घं तेपाते लोकभावनौ ॥२२॥

श्रीशुक उवाच

इत्युद्धवादुपाकर्ण्य सुहृदां दुःसहं बधम् । ज्ञानेनाशमयत्क्षत्ता शोकमुत्पतितं बुधः ॥२३॥
स तं महाभागवतं व्रजन्तं कौरवर्षभः । विस्रम्भादभ्यधत्तेदं मुख्यं कृष्णपरिग्रहे ॥२४॥

विदुर उवाच

ज्ञानं परं स्वात्मरहःप्रकाशं यदाह योगेश्वर ईश्वरस्ते ।
वक्तुं भवान्नोऽर्हति यद्धि विष्णोर्भृत्याः स्वभृत्यार्थकृतश्चरन्ति ॥२५॥

उद्धव उवाच

ननु ते तत्त्वसंराध्य ऋषिः कौषारवोऽन्ति मे । साक्षाद्भगवताऽऽदिष्टो मर्त्यलोकं जिहासता २६

श्रीशुक उवाच

इति सह विदुरेण विश्वमूर्तेर्गुणकथया सुधया प्लावितोरुतापः ।
क्षणमिव पुलिने यमस्वसुस्तां समुषित औपगविर्निशां ततोऽगात् ॥२७॥

राजोवाच

निधनमुपगतेषु वृष्णिभोजेष्वधिरथयूथपयूथपेषु मुख्यः ।
स तु कथमवशिष्ट उद्धवो यद्धरिरपि तत्यज आकृतिं त्र्यधीशः ॥२८॥

श्रीशुक उवाच

ब्रह्मशापापदेशेन कालेनामोघवाञ्छितः । संहृत्य स्वकुलं नूनं त्यक्ष्यन् देहमचिन्तयत् ॥२९॥
अस्माल्लोकादुपरते मयि ज्ञानं मदाश्रयम् । अर्हत्युद्धव एवाद्धा सम्प्रत्यात्मवतां वरः ॥३०॥
नोद्धवोऽण्वपि मन्न्यूनो यद् गुणैर्नार्दितः प्रभुः । अतो मद्वयुनं लोकं ग्राहयन्निह तिष्ठतु ॥३१॥
एवं त्रिलोकगुरुणा संदिष्टः शब्दयोनिना । बदर्याश्रममासाद्य हरिमीजे समाधिना ॥३२॥
विदुरोऽप्युद्धवाच्छ्रुत्वा कृष्णस्य परमात्मनः । क्रीडयोपात्तदेहस्य कर्माणि श्लाघितानि च ।३३।

याथात्म्यज्ञानं वा ॥ १९ ॥ पादे तीर्थं गङ्गा यस्य तस्मात्कृष्णात् । तत्त्वानामात्मा आश्रयः कृष्णस्तस्य ज्ञानस्य मार्गो भागवतं शास्त्रम् सोऽधीतो येन । परिवृत्य प्रदक्षिणीकृत्य ॥२०।२१॥ मृदु सुखदम् । तेपाते चक्राते । भावनौ पालकौ ॥ २२।२३ ॥ प्लावितः अपनीतः । ता रात्रिं क्षणमिव सभुषितः नीत्वेत्यर्थः । ततः पुलिनात् । उपगोरत्यमौपगविरुद्धवः : उद्धवपितुर्महाभागस्य उपगुरित्यपि नामान्तरम् ॥ २७ ॥ निधनं निश्चितं धनं भगवद्धाम । आकृतिं भूमिम् । 'भूमिरवनिराकृतिः'' इति कोशात् ॥ २८ ॥ देहं विराड्देहम् ॥ २९ ॥ मयि उपरते । अर्हति उपदेष्टुमिति शेषः ॥ ३० ॥ मत् मत्तः । वयुनं ज्ञानमिति निरुक्ति ॥ ३१ ॥ शब्दो वेदः योनिर्ज्ञापकं यस्य ॥ ३२ ॥ विदुर इति त्रिकम् । देहस्य चिन्मयस्य

देहन्यासं च तस्यैवं धीराणां धैर्यवर्धनम् । अन्येषां दुष्करतरं पशूनां विक्लवात्मनाम् ॥३४॥
आत्मानं च कुरुश्रेष्ठ कृष्णेन मनसेक्षितम् । ध्यायन् गते भागवते रुरोद प्रेमविह्वलः ॥३५॥
कालिन्द्या कतिभिः सिद्ध अहोभिर्भरतर्षभः । प्रापद्यत स्वःसरितं यत्र मित्रासुतो मुनिः ॥३६॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां तृतीयस्कन्धे विदुरोद्धवसंवादे चतुर्थोऽध्यायः ॥४॥

अथ पञ्चमोऽध्यायः

श्रीशुक उवाच

द्वारि द्युनद्या ऋषभः कुरूणां मैत्रेयमासीनमगाधबोधम् ।
क्षत्तोपसृत्याच्युतभावशुद्धः पप्रच्छ सौशील्यगुणाभितृप्तः ॥१॥

विदुर उवाच

सुखाय कर्माणि करोति लोको न तैः सुखं वान्यदुपारमं वा ।
विन्देत भूयस्तत एव दुःखं यदत्र युक्तं भगवान् वदेन्नः ॥२॥
जनस्य कृष्णाद्विमुखस्य दैवादधर्मशीलस्य सुदुःखितस्य ।
अनुग्रहायेह चरन्ति नूनं भूतानि भव्यानि जनार्दनस्य ॥३॥
तत्साधुवर्यादिश वर्त्म शं नः संराधितो भगवान् येन पुंसाम् ।
हृदि स्थितो यच्छति भक्तिपूते ज्ञानं स तत्त्वाधिगमं पुराणम् ॥४॥
करोति कर्माणि कृतावतारो यान्यात्मतन्त्रो भगवांस्त्र्यधीशः ।
यथा ससर्जाग्र इदं निरीहः संस्थाप्य वृत्तिं जगतो विधत्ते ॥५॥

न्यासं स्वधाम्नि प्रवेशनम् । भूलोकत्यागं वा । पशूनां कर्मिणाम् । विक्लवोऽधीरः । ईक्षितं स्मृतम् श्रुत्वा ॥ ३३।३४।३५ ॥ अहोभिर्दिवसैः सिद्धे निष्पन्ने सति कतिषु अहःसु वृत्तेषु सत्सु । सिद्धः कृतकृत्यो विदुरो वा ॥ ३६ ॥

इति श्रीमद्भागवते महापुराणे तृतीयस्कन्धे गूढार्थदीपिन्यां चतुर्थोऽध्यायः ।

पञ्चमे विविधप्रश्नैः पृष्टो लीलां हरेर्मुनिः ।
तत्त्वानां सम्यगुत्पत्तिं तैः स्तुतिं चाप्यवर्णयत् ॥

द्वारि हरिद्वारे ॥ १ ॥ अन्यत् दुःखनाशनं वा । उपारमं वैराग्यं वा । ततः तैः ॥ २ ॥ भूतानि भक्ता भवद्विधाः ॥३॥ शं सुखमयम् वर्त्म भजनमार्गम् । तत्त्वस्य भगवत्स्वरूपस्य अधिगमो यस्मात् तज्ज्ञानं स प्रसिद्धो भगवान् ॥ ४ ॥ संस्थाप्य सम्यक् स्थितिं रक्षां च कृत्वा वृत्तिं जीविकां च यथा विधत्ते एत

यथा पुनः स्वे ख इदं निवेश्य शेते गुहायां स निवृत्तवृत्तिः ।
योगेश्वराधीश्वर एक एतदनुप्रविष्टो बहुधा यथाऽऽसीत् ॥६॥

क्रीडन् विधत्ते द्विजगोसुराणां क्षेमाय कर्माण्यवतारभेदैः ।
मनो न तृप्यत्यपि शृण्वतां नः सुश्लोकमौलेश्चरितामृतानि ॥७॥

यैस्तत्त्वभेदैरधिलोकनाथो लोकानलोकान् सहलोकपालान् ।
अचीक्लृपद्यत्र हि सर्वसत्त्वनिकायभेदोऽधिकृतः प्रतीतः ॥८॥

येन प्रजानामुत आत्मकर्मरूपाभिधानां च भिदां व्यधत्त ।
नारायणो विश्वसृडात्मयोनिरेतच्च नो वर्णय विप्रवर्य ॥९॥

परावरेषां भगवन् व्रतानि श्रुतानि मे व्यासमुखादभीक्ष्णम् ।
अतृप्नुम क्षुल्लसुखावहानां तेषामृते कृष्णकथामृतौघात् ॥१०॥

कस्तृप्नुयात्तीर्थपदोऽभिधानात् सत्रेषु वः सूरिभिरीड्यमानात् ।
यः कर्णनाडीं पुरुषस्य यातो भवप्रदां गेहरतिं छिनत्ति ॥११॥

मुनिर्विवक्षुर्भगवद्गुणानां सखापि ते भारतमाह कृष्णः ।
यस्मिन्नृणां ग्राम्यसुखानुवादैर्मतिर्गृहीता नु हरेः कथायाम् ॥१२॥

सा श्रद्दधानस्य विवर्धमाना विरक्तिमन्यत्र करोति पुंसः ।
हरेः पदानुस्मृतिनिर्वृतस्य समस्तदुःखात्ययमाशु धत्ते ॥१३॥

ताञ्छोच्यशोच्यानविदोऽनुशोचे हरेः कथायां विमुखानघेन ।
क्षिणोति देवोऽनिमिषस्तु येषामायुर्वृथावादगतिस्मृतीनाम् ॥१४॥

तदस्य कौषारव शर्मदातुर्हरेः कथामेव कथासु सारम् ।
उद्धृत्य पुष्पेभ्य इवार्तबन्धो शिवाय नः कीर्तय तीर्थकीर्तेः ॥१५॥

द्वर्णयेति पञ्चमेनान्वयः ॥ ५ ॥ खे हृदयाकाशे । इदं विश्वम् । गुहायां श्रीराधाशयने ॥६॥ यानि विधत्ते तानि वर्णय यतो न तृप्यति । सुश्लोकाः पुण्यकीर्तयः तेषां मौलेः ॥ ७ ॥ अलोकान् लोकालोकापर्वताद्बहिर्भागान् कल्पयामास तान् वर्णय । यत्र येषु । कर्मानुरूपाधिकारितया निवेशितः प्रतीतो भवति । सत्त्वानि प्राणिनः ॥ ८ ॥ येन प्रकारेण । आत्मा स्वभावः । आत्मयोनिर्ब्रह्मा ॥ ९ ॥ परे त्रैवर्णिकाः अवरे शूद्रादयः । तेषां श्रवणेनेति शेषः । क्षुल्लं तुच्छम् ॥ १० ॥ तीर्थपदः कृष्णस्य अभिधानात् चरितामृतात् । सत्रेषु समाजेषु ॥११॥ कृष्णः कृष्णद्वैपायनः । ग्राम्यकथा कामिकथा । नु निश्चितम् ॥१२॥ सा हरिकथा । अन्यत्र विषयेषु । निर्वृतस्य आनन्दितस्य । धत्ते विधत्ते ॥१३॥ शोच्यानां पशूनामपि शोच्यान् अत्यन्तशोच्यानित्यर्थः । अनिमिषः कालरूपी सूर्यः । क्षिणोति क्षपयति नाशयति ।१४। तत् तस्मात्

स विश्वजन्मस्थितिसंयमार्थे कृतावतारः प्रगृहीतशक्तिः ।
चकार कर्माण्यतिपूरुषाणि यानीश्वरः कीर्तय तानि मह्यम् ॥१६॥

श्रीशुक उवाच

स एवं भगवान् पृष्टः क्षत्त्रा कौषारविर्मुनिः । पुंसां निःश्रेयसार्थाय तमाह बहु मानयन् ॥१७॥

मैत्रेय उवाच

साधु पृष्टं त्वया साधो लोकान् साध्वनुगृह्णता । कीर्तिं वितन्वता लोके आत्मनोऽधोक्षजात्मनः॥१८
नैतच्चित्रं त्वयि क्षत्तर्बादरायणवीर्यजे । गृहीतोऽनन्यभावेन यत्त्वया हरिरीश्वरः ॥१९॥
माण्डव्यशापाद् भगवान् प्रजासंयमनो यमः । भ्रातुः क्षेत्रे भुजिष्यायां जातः सत्यवतीसुतात् २०
भवान् भगवतो नित्यं सम्मतः सानुगस्य च । यस्य ज्ञानोपदेशाय माऽऽदिशद् भगवान् व्रजन्२१
अथ ते भगवल्लीला योगमायोपबृंहिताः । विश्वस्थित्युद्भवान्तार्था वर्णयाम्यनुपूर्वशः ॥२२॥
भगवानेक आसेदमग्र आत्माऽऽत्मनां विभुः । आत्मेच्छानुगतावात्मा नानामत्युपलक्षणः ॥२३॥
स वा एष तदा द्रष्टा नापश्यद् दृश्यमेकराट् । मेनेऽसन्तमिवात्मानं सुप्तशक्तिरसुप्तदृक् ॥२४॥
सा वा एतस्य संद्रष्टुः शक्तिः सदसदात्मिका । माया नाम महाभाग ययेदं निर्ममे विभुः ॥२५॥
कालवृत्त्या तु मायायां गुणमय्यामधोक्षजः । पुरुषेणात्मभूतेन वीर्यमाधत्त वीर्यवान् ॥२६॥
ततोऽभवन्महत्तत्त्वमव्यक्तात्कालचोदितात् । विज्ञानात्माऽऽत्मदेहस्थं विश्वं व्यञ्जंस्तमोनुदः॥२७
सोऽप्यंशगुणकालात्मा भगवद्दृष्टिगोचरः । आत्मानं व्यकरोदात्मा विश्वस्यास्य सिसृक्षया ॥२८॥
महत्तत्त्वाद्विकुर्वाणादहंतत्त्वं व्यजायत । कार्यकारणकर्त्रात्मा भूतेन्द्रियमनोमयः ॥२९॥

हे मैत्रेय ! शर्म सुखम् । सारं सारभूताम् । पुष्पेभ्यो मधुकरो यथोद्धरति तद्वत् ॥ १५॥१६ ॥ कुषारवपुत्रः मैत्रेयः । निश्रेयसार्थाय । तृतीयान्तपाठोऽपि ।१७।१८। चित्रमाश्चर्यम् ॥१९॥ भ्रातुर्विचित्रवीर्यस्य क्षेत्रत्वेन स्वीकृतायां दास्याम् । प्रजाः संयमयति दण्डयतीति । माण्डव्यो हि कस्यचिद्राज्ये चौरैः सह शूले आरोपितः स च यमं प्रष्टुं गतः तेनोक्तो यमस्त्वं बाल्ये शकुन्तिकापृष्ठे कण्टकं प्रवेश्य क्रीडिततवानतीत्याह ततः क्रुद्धो मुनिर्बाल्ये कृतं पित्रोर्भवतीत्यज्ञानात् त्वयाऽहं दण्डितोऽतः शूद्रो भवेति शशापेति वल्लभाचार्यः।२०।

यस्य तव । मा माम् ॥ २१ ॥ उपबृंहिताः विस्तारिताः ॥ २२ ॥ आत्मनां जीवानाम् आत्मा आश्रय एक आत्मा आत्मेच्छा माया तस्या अनुगतौ लये सति ॥ २३ ॥ दृक् चिच्छक्तिः ॥ २४ ॥ यया निर्ममे सा शक्तिस्तदिच्छया क्षुभिताऽभूत कार्योन्मुखी जातेत्यर्थ ॥ २५ ॥ वृत्त्या शक्त्या आत्मांशभूतेन । वीर्यं चिदाभासम् ॥ २६ ॥ प्रकृते विज्ञानात्मा चित्तरूपः पदार्थोऽभूत स एव नाम्ना महत्तत्वम् । स व्यञ्जयन् प्रकाशयन् तमोध्वंसकर्ता ॥ २७ ॥ सोऽपि महानपि । अंशो जीवः । आत्मा तदाश्रयः आत्मानं स्वयं व्यकरोत् रूपान्तरमनयत् ॥२८॥ अधिभूतादीनामात्मा कारणभूतः । तद्विवृणोति-

वैकारिकस्तैजसश्च तामसश्चेत्यहं त्रिधा ॥३०॥ अहंतत्त्वाद्विकुर्वाणान्मनो वैकारिकादभूत् ।
वैकारिकाश्च ये देवा अर्थाभिव्यञ्जनं यतः ॥ ३१ ॥
तैजसानीन्द्रियाण्येव ज्ञानकर्ममयानि च । तामसो भूतसूक्ष्मादिर्यतः खं लिङ्गमात्मनः ॥३२॥
कालमायांशयोगेन भगवद्वीक्षितं नभः । नभसोऽनुसृतं स्पर्शं विकुर्वन्निर्ममेऽनिलम् ॥३३॥
अनिलोऽपि विकुर्वाणो नभसोरुबलान्वितः । ससर्ज रूपतन्मात्रं ज्योतिर्लोकस्य लोचनम् ॥३४॥
अनिलेनान्वितं ज्योतिर्विकुर्वत्परवीक्षितम् । आधत्ताम्भो रसमयं कालमायांशयोगतः ॥३५॥
ज्योतिषाम्भोऽनुसंसृष्टं विकुर्वद् ब्रह्मवीक्षितम् । महीं गन्धगुणामाधात्कालमायांशयोगतः ॥३६॥
भूतानां नभ आदीनां यद्यद्भव्यावरावरम् । तेषां परानुसंसर्गाद् यथासंख्यं गुणान् विदुः ॥३७॥
एते देवाः कला विष्णोः कालमायांशलिङ्गिनः । नानात्वात् स्वक्रियानीशाः प्रोचुः प्राञ्जलयो विभुम्

देवा ऊचुः

नमाम ते देव पदारविन्दं प्रपन्नतापोपशमातपत्रम् ।
यन्मूलकेता यतयोऽञ्जसोरु संसारदुःखं बहिरुत्क्षिपन्ति ॥३९॥
धातर्यदस्मिन् भव ईश जीवास्तापत्रयेणोपहता न शर्म ।
आत्मँल्लभन्ते भगवंस्तवाङ्घ्रिच्छायां सविद्यामत आश्रयेम ॥४०॥
मार्गन्ति यत्ते मुखपद्मनीडैश्छन्दःसुपर्णैर्ऋषयो विविक्ते ।
यच्चाघमर्षोदसरिद्वरायाः पदं पदं तीर्थपदः प्रपन्नाः ॥४१॥
यच्छ्रद्धया श्रुतवत्या च भक्त्या संमृज्यमाने हृदयेऽवधाय ।
ज्ञानेन वैराग्यबलेन धीरा व्रजेम तत्तेऽङ्घ्रिसरोजपीठम् ॥४२॥
विश्वस्य जन्मस्थितिसंयमार्थे कृतावतारस्य पदाम्बुजं ते ।
व्रजेम सर्वे शरणं यदीश स्मृतं प्रयच्छत्यभयं स्वपुंसाम् ॥४३॥

भूतेति ॥२९॥ वैकारिक इत्यर्द्धम् । सात्विको राजसः । अहम् अहङ्कारः ॥३०॥ ये देवाः तेऽपि वैकारिका सात्त्विकाहङ्कारकार्यभूताः । यतो येभ्यः शब्दादिप्रकाशः ॥ ३१ ॥ तैजसानि राजसाहङ्कारकार्याणि । आदिः कारणम् । लिङ्गं शरीरम् ॥ ३२ ॥ नभोऽभूत् । अनुसृतमुद्भूतं स्पर्शतन्मात्रं सत् ॥ ३३ ॥ नभसा नभोगुणेन शब्देन सह । ततो लोचनं प्रकाशकं तेजोऽभूत् ॥ ३४ ॥ आधत्त असृजत् ॥ ३५ ॥ अनुसंसृष्टं संयुक्तम् । आधात् असृजत् ॥३६॥ भव्य विदुर ! यत् यत् अवरावरमुत्तरोत्तरं कार्यम् । परैः कारणैः ।३७। कालमायाजीवशरीरस्य । अनीशा असमर्थाः ।३८। प्रपन्नानां तापोपशमने । यस्य मूलं पादतलमेव केत आश्रयः येषां ते अञ्जसा ऽनायासेन । बहिर्दूरतः ।३९। यत् यस्मात् । शर्म सुखम् हे आत्मन् ! छायायामेवविद्या वर्तते नान्यत्रेति भक्त्या विना ज्ञानमेव न सिध्यतीत्यतो वेदान्तिनो मिथ्याज्ञानिन इत्यर्थः ॥४०॥ विविक्ते एकान्ते । यन्मार्गन्ति अन्वेषयन्ति तीर्थपदस्तस्यैव ते तत्पदं वयं शरणं प्रपन्नाः । कैर्मार्गन्ति । शोभने भगवत्येव पर्णं पतनं पर्यवसानं येषां तैश्छन्दोभिः । कथंभूतम् । अघमर्षं पापनाशकम् उदकं यस्याः सा चासौ सरिद्वरा गङ्गा तस्याः पदमुद्गमस्थानम् ॥ ४१ ॥ संमृज्यमाने शोध्यमाने यत् अवधाय ध्यात्वा धीरा कृतार्था भवन्ति तत्तेऽङ्घ्रिकमलमेव पीठं शरणं व्रजेम ॥ ४२।४३ ॥

यत्सानुबन्धेऽसति देहगेहे ममाहमित्यूढदुराग्रहाणाम् ।
पुंसां सुदूरं वसतोऽपि पुर्यां भजेम तत्ते भगवन् पदाब्जम् ॥४४॥
तान् वा असद्वृत्तिभिरक्षिभिर्ये पराहृतान्तर्मनसः परेश ।
अथो न पश्यन्त्युरुगाय नूनं ये ते पदन्यासविलासलक्ष्याः ॥४५॥
पानेन ते देव कथासुधायाः प्रवृद्धभक्त्या विशदाशया ये ।
वैराग्यसारं प्रतिलभ्य बोधं यथाञ्जसान्वीयुरकुण्ठधिष्ण्यम् ॥४६॥
तथाऽपरे चात्मसमाधियोगबलेन जित्वा प्रकृतिं बलिष्ठाम् ।
त्वामेव धीराः पुरुषं विशन्ति तेषां श्रमः स्यान्न तु सेवया ते ॥४७॥
तत्ते वयं लोकसिसृक्षयाऽऽद्य त्वयानुसृष्टास्त्रिभिरात्मभिः स्म ।
सर्वे वियुक्ताः स्वविहारतन्त्रं न शक्नुमस्तत्प्रतिहर्तवे ते ॥४८॥
यावद्बलिं तेऽज हराम काले यथा वयं चान्नमदाम यत्र ।
यथोभयेषां त इमे हि लोका बलिं हरन्तोऽन्नमदन्त्यनूहाः ॥४९॥
त्वं नः सुराणामसि सान्वयानां कूटस्थ आद्यः पुरुषः पुराणः ।
त्वं देव शक्त्यां गुणकर्मयोनौ रेतस्त्वजायां कविमादधेऽजः ॥५०॥
ततो वयं सत्प्रमुखा यदर्थे बभूविमात्मन् करवाम किं ते ।
त्वं नः स्वचक्षुः परिदेहि शक्त्या देव क्रियार्थे यदनुग्रहाणाम् ॥५१॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां तृतीयस्कन्धे पञ्चमोऽध्यायः ॥ ५ ॥

पुंसां पुर्यां देहे वसतोऽपि ते यत्सुदूरं वर्तते तदित्यन्वयः ।४४। बहिर्मुखैरिन्द्रियैर्ये विषयाकृष्टचित्ताः अथो अत एव ते नूनं तान् भक्तान्न पश्यन्ति । कान् । ये ते पदविन्यासस्य यो विलासः माधुर्यं स एव लक्ष्यः प्राप्यो येषां ते तथाभू ताः तान् । अयमेव पाठः साधुः इति दीपिनी । अतः सत्सङ्गाभावात्सुदूरं यत्त-दित्यन्वयः । वै प्रसिद्धे ॥४५॥ पानेनेति युग्मकम् । ये ते अञ्जसा सुखेनैव धिष्ण्यं वैकुण्ठलोकं प्रापुः । अपरे ज्ञानिनः त्वामेव कथञ्चित् न साक्षात् भक्तिं विना ज्ञानमेव न स्यात्कुतो मुक्तिरतो परमानन्दा-लाभाच्छ्रम एव इति सुष्ठूक्तम् ॥ ४६ ॥ ते त्वदीया वयं यतः आत्मभिर्गुणैरनुक्रमेण सृष्टास्ततस्ततो हेतोः विषमत्वात् वियुक्ताः सन्तो यदर्थं सृष्टाः तव विहारतन्त्रं क्रीडाप्रधानं ब्रह्माण्डं ते तुभ्यं प्रतिहर्तवे संपाद्य प्रत्यर्पयितुं न शक्नुमः । अतः स्वचक्षुर्देहीति चतुर्थेनान्वयः ॥ ४७ ॥ काले तत्तदवसरे यावत्सा कल्येन बलिं भोगं ते हराम समर्पयाम । वयं चान्नं भोगम् यत्र च ब्रह्माण्डे स्थित्वा इमे लोका उभयेषां तव अस्माकं च बलिं समर्पयन्तः अनूहा निःसंशयाः सन्तः भोगं प्राप्नुयुः तादृशमण्डं कर्तुं न शक्नुम इति पूर्वेणान्वयः ॥४८॥ अन्वयः कार्यं कारणं वा तत्सहितानां त्वमाद्यः कारणभूतोऽसि । अजस्त्वं गुणानां कर्मणां जन्मादीनां च योनौ प्रकृतौ रेतः सृष्टिसामर्थ्यम् निहितवानसि कविं महत्तत्त्वरूपम् ॥४९॥ यत एवंभूतस्त्वं ततो हेतो यदर्थे बभूविम तस्याः क्रियाया अर्थे नःस्वचक्षुः स्वसृष्टिविवेकं शक्त्या सह

अथ षष्ठोऽध्यायः

ऋषिरुवाच

इति तासां स्वशक्तीनां सतीनामसमेत्य सः । प्रसुप्तलोकतन्त्राणां निशाम्य गतिमीश्वरः ॥ १ ॥
कालसंज्ञां तदा देवीं बिभ्रच्छक्तिमुरुक्रमः । त्रयोविंशतितत्त्वानां गणं युगपदाविशत् ॥ २ ॥
सोऽनुप्रविष्टो भगवांश्चेष्टारूपेण तं गणम् । भिन्नं संयोजयामास सुप्तं कर्म प्रबोधयन् ॥ ३ ॥
प्रबुद्धकर्मा दैवेन त्रयोविंशतिको गणः । प्रेरितोऽजनयत् स्वाभिर्मात्राभिरधिपूरुषम् ॥ ४ ॥
परेण विशता स्वस्मिन् मात्रया विश्वसृड्गणः । चुक्षोभान्योन्यमासाद्य यस्मिँल्लोकाश्चराचराः ॥५॥
हिरण्मयः स पुरुषः सहस्रपरिवत्सरान् । आण्डकोश उवासाप्सु सर्वसत्त्वोपबृंहितः ॥ ६ ॥
स वै विश्वसृजां गर्भो देवकर्मात्मशक्तिमान् । विबभाजात्मनाऽऽत्मानमेकधा दशधा त्रिधा ॥ ७ ॥
एष ह्यशेषसत्त्वानात्मांशः परमात्मनः । आद्योऽवतारो यत्रासौ भूतग्रामो विभाव्यते ॥ ८ ॥
साध्यात्मः साधिदैवश्च साधिभूत इति त्रिधा । विराट् प्राणो दशविध एकधा हृदयेन च ॥९॥
स्मरन् विश्वसृजामीशो विज्ञापितमधोक्षजः । विराजमतपत् स्वेन तेजसैषां विवृत्तये ॥१०॥
अथ तस्याभितप्तस्य कति चायतनानि ह । निरभिद्यन्त देवानां तानि मे गदतः शृणु ॥११॥

देहि अन्यद्वा ते किं करवाम तदाज्ञापयेति शेषः । अहं महान् प्रमुखे आदौ येषान्ते मत्प्रमुखा महदादयः सर्वे । यस्य भवत एवानुग्रहो येषां नः । क्रियार्थे इयानेव अनुग्रहो येषामित्येकं पदं वा । अत्र मत्प्रमुखा इत्येव पाठः महदादय इति स्वामिव्याख्यानात् न तु सत्प्रमुखा इति ॥ ५० ॥

इति श्रीमद्भागवते महापुराणे तृतीयस्कन्धे गूढार्थदीपिन्यां पञ्चमोऽध्यायः ।

षष्ठे तत्त्वैर्विराड्देहस्तत्र चित्सम्प्रवेशतः ।
अध्यात्मादिविभागश्च सप्रपञ्चं प्रपञ्च्यते ॥ १ ॥

इतीति युग्मकम् । असमेत्य अमिलित्वा वर्तमानानां गतिं स्थितिम् । तन्त्रं रचना । कालेनैव महदाद्याः संज्ञा यस्यास्तां प्रकृतिम् कालयति मेलयति सर्वमिति स कालः संज्ञा यस्या इति वा ॥ १।२ ॥ कर्मक्रियाम् ॥ ३ ॥ मात्राभिरंशैः । अधिपूरुषं सावरणं विराड्देहम् ॥ ४ ॥ स्वस्मिन् तत्त्वगणे । विश्वसृजां तत्त्वानाम् । चुक्षोभ ब्रह्माण्डरूपेण परिणतोऽभूत् ॥ ५ ॥ स समष्टिर्विराट् । सत्वोपबृंहितः जीवैः सहितः ॥ ६ ॥ गर्भो कार्यरूपो विराट् । देवशक्त्या जीवरूपेण एकधा । कर्मशक्त्या प्राणरूपेण दशधा । अध्यात्मादिशक्त्या त्रिधा ॥ ७ ॥ एष विराट् । सत्वानां जीवानामात्मा आधारः । अशोऽवतारश्च । ग्रामः समूहः ॥ ८ ॥ प्राणः प्राणरूपः । हृदयेन तदवच्छिन्नचैतन्येन जीवेन ॥ ९ ॥ तेजसा चिच्छक्त्या अतपत् एवं करिष्यामीत्यालोचितवान् 'तप्' आलोचने । विः विविधार्थे ॥ १० ॥ ह स्फुटम् ।

तस्याग्निरास्यं निर्भिन्नं लोकपालोऽविशत् पदम् । वाचा स्वांशेन वक्तव्यं ययासौ प्रतिपद्यते १२।
निर्भिन्नं तालु वरुणो लोकपालोऽविशद्धरेः । जिह्वयांशेन च रसं ययासौ प्रतिपद्यते ।।१३।।
निर्भिन्ने अश्विनौ नासे विष्णोराविशां पदम् । घ्राणेनांशेन गन्धस्य प्रतिपत्तिर्यतो भवेत् ।।१४।।
निर्भिन्ने अक्षिणी त्वष्टा लोकपालोऽविशद् विभोः । चक्षुषांशेन रूपाणां प्रतिपत्तिर्यतो भवेत् १५।
निर्भिन्नान्यस्य चर्माणि लोकपालोऽनिलोऽविशत् । प्राणेनांशेन संस्पर्शं येनासौ प्रतिपद्यते ।।१६।
कर्णावस्यविनिर्भि न्नौधिष्ण्यं स्वं विविशुर्दिशः । श्रोत्रेणांशेन शब्दस्य सिद्धि येन प्रपद्यते।।१७।।
त्वचमस्य विनिर्भिन्नां विविशुर्धिष्ण्यमोषधीः । अंशेन रोमभिः कण्डूं यैरसौ प्रतिपद्यते ।।१८।।
मेढ्रं तस्य विनिर्भिन्नं स्वधिष्ण्यं क उपाविशत् । रेतसांशेन येनासावानन्दं प्रतिपद्यते ।।१९।।
गुदं पुंसो विनिर्भिन्नं मित्रो लोकेश आविशत् । पायुनांशेन येनासौ विसर्गं प्रतिपद्यते ।।२०।।
हस्तावस्य विनिर्भिन्नाविन्द्रः स्वर्पतिराविशत् । वार्तयांशेन पुरुषो यया वृत्तिं प्रपद्यते ।।२१।।
पादावस्य विनिर्भिन्नौ लोकेशो विष्णुराविशत् । गत्या स्वांशेन पुरुषो यया प्राप्यं प्रपद्यते ।२२।
बुद्धिं चास्य विनिर्भिन्नां वागीशो धिष्ण्यमाविशत् । बोधेनांशेन बोद्धव्यप्रतिपत्तिर्यतो भवेत् २३।
हृदयं चास्य निर्भिन्नं चन्द्रमा धिष्ण्यमाविशत् । मनसांशेन येनासौ विक्रियां प्रतिपद्यते ।।२४।।
आत्मानं चास्य निर्भिन्नमभिमानोऽविशत्पदम् । कर्मणांशेन येनासौ कर्तव्यं प्रतिपद्यते ।।२५।।
सत्त्वं चास्य विनिर्भिन्नं महान् धिष्ण्यमुपाविशत् । चित्तेनांशेन येनासौ विज्ञानं प्रतिपद्यते ।२६।
शीर्ष्णोऽस्य द्यौर्धरा पद्भ्यां खं नाभेरुदपद्यत । गुणानां वृत्तयो येषु प्रतीयन्ते सुरादयः ।।२७।।
आत्यन्तिकेन सत्त्वेन दिवं देवाः प्रपेदिरे । धरां रजःस्वभावेन पणयो ये च तानन ।।२८।।
तार्तीयेन स्वभावेन भगवन्नाभिमाश्रिताः । उभयोरन्तरं व्योम ये रुद्रपार्षदां गणाः ।।२९।।
मुखतोऽवर्तत ब्रह्म पुरुषस्य कुरूद्वह । यस्तून्मुखत्वाद् वर्णानां मुख्योऽभूत् ब्राह्मणो गुरुः ।।३०।।
बाहुभ्योऽवर्तत क्षत्रं क्षत्रियस्तदनुव्रतः । यो जातस्त्रायते वर्णान् पौरुषः कण्टकक्षतात् ।।३१।।

मे मत्तः ॥ ११ ॥ विभिन्नं पृथक् जातम् । अंशेन शक्त्या ॥ १२ ॥ हरे विराजः ॥ १३ ॥ विष्णोः विराजः ॥१४॥ त्वष्टा सूर्यः । विभोः विराजः ॥१५॥ प्राणवत् देहव्यापिना त्वगिन्द्रियेण ॥१६॥ धिष्ण्यं स्थानम् । दिशो देवताः ॥ १७ ॥ ओषध्यः कृदिकारात् इति ङीषि स्त्रीत्वमपि । रोमांशेन रोमेन्द्रियेण ॥ १८ ॥ कः प्रजापतिः । रेतसोपलक्षितेन अशेन उपस्थेन्द्रियेण ॥ १९ ॥ विसर्गं मलत्यागम् ॥ २० ॥ स्वः स्वर्गः । वार्तयाऽनुमेयेन अंशेन पाणीन्द्रियेण ॥ २१ ॥ गतिसाधनेन पादेन्द्रियेण ॥ २२ ॥ वागीशो ब्रह्मा ॥ २३।२४ ॥ आत्मानमहङ्कारम् । अभिमानो रुद्रः ॥ २५ ॥ सत्त्वं चित्तम् । महान् वासुदेवः । चित्तेन चेतनया ॥ २६ ॥ द्यौः स्वर्लोकः वृत्तयः परिणामा ॥ २७ ॥ आत्यन्तिकेन वृद्धिं गतेन । पणन्ते व्यवहरन्तीति पणयो मनुष्यास्ताननुवर्तन्ते ये गवादयस्तेऽपि ॥ २८ ॥ तार्तीयेन तामसेन ये ते नाभिमित्यन्वयः । उभयोर्द्यावापृथिव्योर्मध्यं भुवर्लोकम् ॥ २९ ॥ ब्रह्म वेदोऽभूत् । यस्तु वेदोन्मुखत्वात् गुरुः सोऽपि मुखत इत्यन्वयः ॥ ३० ॥ क्षत्रं पालनशक्तिस्तदुन्मुखोऽपि

विशोऽवर्तन्त तस्योर्वोर्लोकवृत्तिकरीर्विभोः । वैश्यस्तदुद्भवो वार्तां नृणां यः समवर्तयत् ॥३२॥
पद्भ्यां भगवतो जज्ञे शुश्रूषा धर्मसिद्धये । तस्यां जातः पुरा शूद्रो यद्वृत्त्या तुष्यते हरिः ॥३३॥
एते वर्णा स्वधर्मेण यजन्ति स्वगुरुं हरिम् । श्रद्धयाऽऽत्मविशुद्ध्यर्थं यज्जाताः सह वृत्तिभिः ॥३४॥
एतत्क्षत्तर्भगवतो दैवकर्मात्मरूपिणः । कः श्रद्दध्यादुपाकर्तुं योगमायाबलोदयम् ॥३५॥
अथापि कीर्तयाम्यङ्ग यथामति यथाश्रुतम् । कीर्तिं हरेः स्वां सत्कर्तुं गिरमन्याभिधासतीम् ॥३६॥

एकान्तलाभं वचसो नु पुंसां सुश्लोकमौलेर्गुणवादमाहुः ।
श्रुतेश्च विद्वद्भिरुपाकृतायां कथासुधायामुपसंप्रयोगम् ॥३७॥

आत्मनोऽवसितो वत्स महिमा कविनाऽऽदिना । संवत्सरसहस्रान्ते धिया योगविपक्वया ॥३८॥
अतो भगवतो माया मायिनामपि मोहिनी । यत्स्वयं चात्मवर्त्मात्मा न वेद किमुतापरे ॥३९॥
यतोऽप्राप्य न्यवर्तन्त वाचश्च मनसा सह । अहं चान्य इमे देवास्तस्मै भगवते नमः ॥४०॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां तृतीयस्कन्धे षष्ठोऽध्यायः ॥ ६ ॥

अथ सप्तमोऽध्यायः

श्रीशुक उवाच

एवं ब्रुवाणं मैत्रेयं द्वैपायनसुतो बुधः । प्रीणयन्निव भारत्या विदुरः प्रत्यभाषत ॥ १ ॥

विदुर उवाच

ब्रह्मन् कथं भगवतश्चिन्मात्रस्याविकारिणः । लीलया चापि युज्येरन्निर्गुणस्य गुणाः क्रियाः ॥२॥

पौरुषो भगवदंशः । कण्टकक्षतात् चौराद्युपद्रवात् ॥ ३१ ॥ वृत्तिकर्यः विशः कृष्यादि व्यवसायाः । वैश्योऽपि ऊरुभवः ॥ ३२ ॥ तस्यां निमित्तभूतायाम् ॥ ३३ ॥ यत् यस्मात् ॥ ३४ ॥ दैवकर्मात्मानः कालकर्मस्वभावाः । एतत् विराड् रूपं साकल्येन निरूपयितुं क इच्छेत् ॥ ३५ ॥ सत्कर्तुं पवित्रीकर्तुम् ॥ ३६ ॥ एकान्तलाभं मुख्यं फलम् उप समीपे आ सम्यक् कृतायां विनितायाम् ॥ ३७ ॥ कविना ब्रह्मणाऽपि आत्मनो हरे र्महिमाऽवसितः ज्ञातः किं नैव ॥ ३८ ॥ आत्मा परमात्मा । आत्मवर्त्म आत्ममाया विस्तारं न वेद अनन्तत्वादित्यर्थः ॥ ३९ ॥ अहम् अहङ्काराधिष्ठाता रुद्रोऽपीति लीलासौन्दर्याय ॥ ४० ॥

इति श्रीमद्भागवते महापुराणे तृतीयस्कन्धे गूढार्थदीपिन्यां षष्ठोऽध्यायः ।

सप्तमे निर्गुणस्यासीद्विभोश्चिक्रीडिषा कथम् ।
इत्युपक्रम्य तत् क्षत्तुः प्रश्नवृन्दं निरूप्यते ॥

प्रीणयन् प्रीतिं जनयन् । संदेहस्य पूर्णतयाऽनिवृत्तत्वादिवेत्युक्तम् ॥ १ ॥ अविकारिणः क्रियाश्च

क्रीडायामुद्यमोऽर्भस्य कामश्चिक्रीडिषाऽन्यतः। स्वतस्तृप्तस्य च कथं निवृत्तस्य सदाऽन्यतः ॥३॥
अस्राक्षीद् भगवान् विश्वं गुणमय्याऽऽत्ममायया। तया संस्थापयत्येतद् भूयः प्रत्यपिधास्यति॥४॥
देशतः कालतो योऽसाववस्थातः स्वतोऽन्यतः। अविलुप्तावबोधात्मा स युज्येताऽजया कथम् ॥५॥
भगवानेक एवैष सर्वक्षेत्रेष्ववस्थितः। अमुष्य दुर्भगत्वं वा क्लेशो वा कर्मभिः कुतः ॥ ६ ॥
एतस्मिन् मे मनो विद्वन् खिद्यतेऽज्ञानसङ्कटे। तन्नः पराणुद विभो कश्मलं मानसं महत् ॥ ७ ॥

श्रीशुक उवाच

स इत्थं चोदितः क्षत्त्रा तत्त्वजिज्ञासुना मुनिः। प्रत्याह भगवच्चित्तः स्मयन्निव गतस्मयः ॥८॥

मैत्रेय उवाच

सेयं भगवतो माया यन्नयेन विरुध्यते। ईश्वरस्य विमुक्तस्य कार्पण्यमुत बन्धनम् ॥ ९ ॥
यदर्थेन विनामुष्य पुंस आत्मविपर्ययः। प्रतीयत उपद्रष्टुः स्वशिरश्छेदनादिकः ॥१०॥
यथा जले चन्द्रमसः कम्पादिस्तत्कृतो गुणः। दृश्यतेऽसन्नपि द्रष्टुरात्मनोऽनात्मनो गुणः ॥११॥
स वै निवृत्तिधर्मेण वासुदेवानुकम्पया। भगवद्भक्तियोगेन तिरोधत्ते शनैरिह ॥१२॥
यदेन्द्रियोपरामोऽथ द्रष्ट्रात्मनि परे हरौ। विलीयन्ते तदा क्लेशाः संसुप्तस्येव कृत्स्नशः ॥१३॥

अशेषसंक्लेशशमं विधत्ते गुणानुवादश्रवणं मुरारेः।
कुतः पुनस्तच्चरणारविन्दपरागसेवारतिरात्मलब्धा ॥ १४ ॥

विदुर उवाच

संछिन्नः संशयो मह्यं तव सूक्तासिना विभो। उभयत्रापि भगवन् मनो मे सम्प्रधावति ॥१५॥
साध्वेतद् व्याहृतं विद्वन्नात्ममायायनं हरेः। आभात्यपार्थं निर्मूलं विश्वमूलं न यद् बहिः॥१६॥
यश्च मूढतमो लोके यश्च बुद्धेः परं गतः। तावुभौ सुखमेधेते क्लिश्यत्यन्तरितो जनः ॥१७॥

लीलार्थमपि कथम् उपयुक्ताः स्युः ॥ २ ॥ उद्यमः प्रवर्तकः। कथं चिक्रीडिषेति योज्यम् ॥ ३ ॥ संस्थापयति पालयति। प्रत्यपिधास्यति संहरिष्यति ॥ ४ ॥ आत्मा जीवश्च सोऽपि कथमित्याक्षेपान्तरम् ॥ ५ ॥ सर्वक्षेत्रेषु जीवदेहेषु। अतस्तस्मिन् सति अमुष्य जीवस्य दुर्भगत्वमैश्वर्यादिराहित्यम् ॥ ६ ॥ कश्मलं मोहं पराणुद दूरीकुरु ॥७॥ चोदितः आक्षिप्तः गतस्मयो निवृत्ताऽहङ्कारः। स्मयन् मन्दं हसन्निव ॥८॥ नयेन युक्त्या। ईश्वरस्य समर्थस्य जीवस्य कार्पण्यं देहोऽस्मीति मननं दैन्यम् बन्धनं चेति यत्सेत्यन्वयः ॥९॥ यत् यथा अर्थेन शिरश्छेदादिना विनाऽपि द्रष्टुः स्वप्नद्रष्टुः उप समीपे ममेदं शिरश्छिन्नमित्यात्मविपर्ययो भवति तद्वत् अमुष्य जीवस्यापि कार्पण्यादि न वस्तुत इत्यर्थः ॥ १० ॥ ईश्वरस्य तु नेत्याह—जले प्रतिबिम्बितस्यैव न त्वाकाशस्थस्य। एवमनात्म देहादेर्गुणो धर्मः कृशत्वादिः आत्मनो देहाभिमानिनो द्रष्टुर्जीवस्यैव दृश्यते न तु ईश्वरस्येत्यर्थः ॥ १२ ॥ द्रष्ट्रात्मनि जीवन्तर्यामिणि ॥ १३ ॥ आत्मनि मनसि ॥ १४ ॥ मह्यं मम। मां बोधयितुं वा। उभयत्र ईश्वरस्वातन्त्र्ये जीवपारतन्त्र्ये च ॥१५॥ हरेरात्ममाया जीवाविद्या तदाश्रयमेतत् दुर्भगत्वादि असदेव आभाति निर्मूलं च यतः विश्वमूलं बहिः अज्ञानं विना नैतदिति साधूक्तम् ॥ १६ ॥ परमीश्वरम्। एवेते जीवतः। अन्तरितः

अर्थाभावं विनिश्चित्य प्रतीतस्यापि नात्मनः । तां चापि युष्मच्चरणसेवयाऽहं पराणुदे ॥१८॥
यत्सेवया भगवतः कूटस्थस्य मधुद्विषः । रतिरासो भवेत् तीव्रः पादयोर्व्यसनार्दनः ॥१९॥
दुरापा ह्यल्पतपसः सेवा वैकुण्ठवर्त्मसु । यत्रोपगीयते नित्यं देवदेवो जनार्दनः ॥२०॥
सृष्ट्वाग्रे महदादीनि सविकाराण्यनुक्रमात् । तेभ्यो विराजमुद्धृत्य तमनुप्राविशद् विभुः ।२१।
यमाहुराद्यं पुरुषं सहस्राङ्घ्र्यूरुबाहुकम् । यत्र विश्व इमे लोकाः सविकासं समासते ।२२।
यस्मिन् दशविधः प्राणः सेन्द्रियार्थेन्द्रियस्त्रिवृत् । त्वयेरितो यतो वर्णास्तद्विभूतीर्वदस्व नः ।२३।
यत्र पुत्रैश्च पौत्रैश्च नप्तृभिः सह गोत्रजैः । प्रजा विचित्राकृतय आसन् याभिरिदं ततम् ।२४।
प्रजापतीनां स पतिश्चक्लृपे कान् प्रजापतीन् । सर्गांश्चैवानुसर्गांश्च मनून् मन्वन्तराधिपान् ।२५।
एतेषामपि वंशांश्च वंश्यानुचरितानि च । उपर्यधश्च ये लोका भूमेर्मित्रात्मजासते ।२६॥

तेषां संस्थां प्रमाणं च भूर्लोकस्य च वर्णय । तिर्यङ्मानुषदेवानां सरीसृपपतत्त्रिणाम् ।
वद नः सर्गसंव्यूहं गार्भस्वेदद्विजोद्भिदाम् ॥२७॥

गुणावतारैर्विश्वस्य सर्गस्थित्यप्ययाश्रयम् । सृजतः श्रीनिवासस्य व्याचक्ष्वोदारविक्रमम् ॥२८॥
वर्णाश्रमविभागांश्च रूपशीलस्वभावतः । ऋषीणां जन्मकर्मादि वेदस्य च विकर्षणम् ॥२९॥
यज्ञस्य च वितानानि योगस्य च पथः प्रभो । नैष्कर्म्यस्य च सांख्यस्य तन्त्रं वा भगवत्स्मृतम्३०
पाखण्डपथवैषम्यं प्रतिलोमनिवेशनम् । जीवस्य गतयो याश्च यावतीर्गुणकर्मजाः ॥३१॥
धर्मार्थकाममोक्षाणां निमित्तान्यविरोधतः । वार्तायां दण्डनीतेश्च श्रुतस्य च विधिं पृथक् ॥३२॥
श्राद्धस्य च विधिं ब्रह्मन् पितॄणां सर्गमेव च । ग्रहनक्षत्रताराणां कालावयवसंस्थितिम् ॥३३॥

संशयितः ॥ १७ ॥ नात्मनो देहादेरात्मत्वेन प्रतीतस्यापि अर्थाभावमत्रार्थो नास्ति किन्तु प्रतीतिरेवेति सेवया विनिश्चित्य तां प्रतीतिमपि पराणुदेऽपनेष्यामि ॥ १८ ॥ यत् येषां युष्माकम् । रतिरासः प्रेमोल्लासः ॥ १९ ॥ वर्त्मसु मार्गभूतेषु भवत्सु । यत्र येषु भवत्सु ॥ २० ॥

विकारैरिन्द्रियादिभिः । उद्धृत्य उत्पाद्य ॥ २१ ॥ विश्वे सर्वे । सविकासमसंकोचेन ॥ २२ ॥ त्रिवृत् त्रिगुणकार्यः । विभूतीर्ब्रह्माद्याः ॥ २३ ॥ यत्र विभूतिषु । ब्रह्माण्डे वा । नप्तृभिः दौहित्रैः । ततं व्याप्तम् ॥ २४ ॥ प्रजेति सार्द्धम् । पतिर्ब्रह्मा । चक्लृपे सृष्टवान् । अनुसर्गान् तद्भेदान् । तान् वर्णये-त्युत्तरेणान्वयः ॥ २५ ॥ संस्थां व्यवस्थाम् ॥ २६ ॥ सरीसृपाः सर्पादयः सहस्रपादादयो वा । संव्यूहं विभागम् । गार्भा जरायुजाः ॥ २७ ॥ अवतारैर्ब्रह्मादिभिः सृजतः जगद्व्यापारं कुर्वतः तस्य विक्रमम् । कथंभूतम् । सर्गादीनां हेतुभूतम् ॥ २८ ॥ शीलमाचारः । विकर्षणं विभागम् ॥ २९॥ भगवता नारदेन कृतं पञ्चरात्रम् ॥ ३० ॥ प्रतिलोमानां सूतचाण्डालादीनामुत्पत्तिम् । यावत्यस्तावतीः ॥ ३१ ॥ निमित्तानि उपायान् । वार्ताया वाणिज्योदः । श्रुतस्य वेदस्य ॥ ३२ ॥ कालावयवे कालचक्रे

दानस्य तपसो वापि यच्चेष्टापूर्तयोः फलम् । प्रवासस्थस्य यो धर्मो यश्च पुंस उतापदि ॥३४॥
येन वा भगवांस्तुष्येद् धर्मयोनिर्जनार्दनः । सम्प्रसीदति वा येषामेतदाख्याहि चानघ ॥३५॥
अनुव्रतानां शिष्याणां पुत्राणां च द्विजोत्तम । अनापृष्टमपि ब्रूयुर्गुरवो दीनवत्सलाः ॥३६॥
तत्त्वानां भगवंस्तेषां कतिधा प्रतिसंक्रमः । तत्रेमं क उपासीरन् क उ स्विदनुशेरते ॥३७॥
पुरुषस्य च संस्थानं स्वरूपं वा परस्य च । ज्ञानं च नैगमं यत्तद् गुरुशिष्यप्रयोजनम् ॥३८॥
निमित्तानि च तस्येह प्रोक्तान्यनघ सूरिभिः । स्वतो ज्ञानं कुतः पुंसां भक्तिर्वैराग्यमेव वा ॥३९॥
एतान् मे पृच्छतः प्रश्नान् हरेः कर्मविवित्सया । ब्रूहि मेऽज्ञस्य मित्रत्वादजया नष्टचक्षुषः ॥४०॥
सर्वे वेदाश्च यज्ञाश्च तपो दानानि चानघ । जीवाभयप्रदानस्य न कुर्वीरन् कलामपि ॥४१॥

श्रीशुक उवाच

स इत्थमापृष्टपुराणकल्पः कुरुप्रधानेन मुनिप्रधानः ।
प्रवृद्धहर्षो भगवत्कथायां सञ्चोदितस्तं प्रहसन्निवाह ॥ ४२ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां तृतीयस्कन्धे सप्तमोऽध्यायः ॥ ७ ॥

अथाष्टमोऽध्यायः

मैत्रेय उवाच

सत्सेवनीयो बत पूरुवंशो यल्लोकपालो भगवत्प्रधानः ।
बभूविथेहाजितकीर्तिमालां पदे पदे नूतनयस्यभीक्ष्णम् ॥ १ ॥
सोऽहं नृणां क्षुल्लसुखाय दुःखं महद् गतानां विरमाय तस्य ।
प्रवर्तये भागवतं पुराणं यदाह साक्षाद् भगवानृषिभ्यः ॥ २ ॥

ज्योतिश्चक्रे वा ॥ ३३।३४ ॥ येन मार्गेण ॥ ३५ ॥ चतुर्थ्यर्थे षष्ठ्यः ॥ ३६ ॥ प्रतिसंक्रमः प्रलयः । उ स्वित् के वाऽपि लीना भवन्ति ॥ ३७ ॥ पुरुषस्य जीवस्य तत्त्वम् । परस्येश्वरस्य ॥ ३८ ॥ तस्य ज्ञानस्य साधनानि ॥ ३९ ॥ मे प्रश्नान् मे मित्रत्वादतो न पौनरुक्त्यम् । मे मह्यम् मामुद्धर्तुं वा ॥ ४०।४१ ॥ आपृष्टः पुराणकल्पः पुराणसमूहो यस्मात् । कल्पः पुराणव्याख्याने समर्थो वा ।

इति श्रीमद्भागवते महापुराणे तृतीयस्कन्धे गूढार्थदीपिन्यां सप्तमोऽध्यायः ।

अष्टमे भगवन्नाभेः पद्माज्जातो विधिर्जले ।
तमन्विष्यापि दुर्ज्ञेयं हृद्यपश्यत्समाधितः ॥ १ ॥

बत अहो यत् यतः पूरुवंशे त्वं जातोऽसि । अजितस्य कृष्णस्य ॥ १ ॥ क्षुल्लं तुच्छम् । भगवान्

आसीनमुर्व्यां भगवन्तमाद्यं सङ्कर्षणं देवमकुण्ठसत्त्वम् ।
विवित्सवस्तत्त्वमतः परस्य कुमारमुख्या मुनयोऽन्वपृच्छन् ॥ ३ ॥
स्वमेव धिष्ण्यं बहु मानयन्तं यं वासुदेवाभिधमामनन्ति ।
प्रत्यग्धृताक्ष्यम्बुजकोशमीषदुन्मीलयन्तं विबुधोदयाय ॥ ४ ॥
स्वर्धुन्युदार्द्रैः स्वजटाकलापैरुपस्पृशन्तश्चरणोपधानम् ।
पद्मं यदर्चन्त्यहिराजकन्याः सप्रेम नानाबलिभिर्वरार्थाः ॥ ५ ॥
मुहुर्गृणन्तो वचसानुरागस्खलत्पदेनास्य कृतानि तज्ज्ञाः ।
किरीटसाहस्रमणिप्रवेकप्रद्योतितोद्दामफणासहस्रम् ॥ ६ ॥
प्रोक्तं किलैतद्भगवत्तमेन निवृत्तिधर्माभिरताय तेन ।
सनत्कुमाराय स चाह पृष्टः सांख्यायनायाङ्ग धृतव्रताय ॥ ७ ॥
सांख्यायनः पारमहंस्यमुख्यो विवक्षमाणो भगवद्विभूतीः ।
जगाद सोऽस्मद्गुरवेऽन्विताय पराशरायाथ बृहस्पतेश्च ॥ ८ ॥
प्रोवाच मह्यं स दयालुरुक्तो मुनिः पुलस्त्येन पुराणमाद्यम् ।
सोऽहं तवैतत् कथयामि वत्स श्रद्धालवे नित्यमनुव्रताय ॥ ९ ॥
उदाप्लुतं विश्वमिदं तदासीद्यन्निद्रयामीलितदृङ् न्यमीलयत् ।
अहीन्द्रतल्पेऽधिशयान एकः कृतक्षणः स्वात्मरतौ निरीहः ॥१०॥
सोऽन्तःशरीरेऽर्पितभूतसूक्ष्मः कालात्मिकां शक्तिमुदीरयाणः ।
उवास तस्मिन् सलिले पदे स्वे यथाऽनलो दारुणि रुद्धवीर्यः ॥११॥
चतुर्युगानां च सहस्रमप्सु स्वपन् स्वयोदीरितया स्वशक्त्या ।
कालाख्ययाऽऽसादितकर्मतन्त्रो लोकानपीतान् ददृशे स्वदेहे ॥१२॥

संकर्षणः ॥ २ ॥ उर्व्यां पातालतले । अकुण्ठसत्त्वम् अप्रतिहतज्ञानम् । अतः संकर्षणात्परस्य श्रीवासुदेवस्य तत्त्वम् ॥३॥ कथंभूतम् । यं तमेव धिष्ण्यं स्वीयमाश्रयम् । प्रतिजीवमञ्चति व्याप्नोतीति प्रत्यक् वासुदेवस्तत्र धृतमन्तर्मुखीकृतम् ॥४॥ मुनीन् विशिनष्टि सार्द्धेन । स्वर्धुनी गङ्गा । चरणौ उपधीयते यत्र तत्पद्मम् उपबर्हणरूपम् । बलिभिरुपहारैः । वरार्थाः पतिकामाः । कृतानि चरितानि ॥ ५ ॥ किरीटेत्यर्धं संकर्षणविशेषणम् । प्रवेकैरुत्तमैः । उद्दामम् उत्कृष्टम् ॥ ६ ॥ एतद्भागवतम् । भगवन्तं ताम्यति कांक्षतीति तेन संकर्षणेन । "तमु" कांक्षायाम् इत्यतोऽच् । अङ्ग हे विदुर! ॥ ७ ॥ पारमहंस्ये भागवतधर्मे श्रवणकीर्तनादिलक्षणे । बृहस्पतये च ॥ ८ ॥ पुलस्त्येनोक्तो दत्तवरः पुराणप्रवक्ता भविष्यतीति स पराशरः ॥९॥ उद-शब्दोऽप्युदकवाची । यत् यदा । दृक् ज्ञानदृष्टिः । कृतक्षणो लब्धावसरः । ॥ १० ॥ सूक्ष्माणि मनुष्यादिसूक्ष्मशरीराणि । उदीरयाणः प्रेरयन् । वीर्यं दाहकत्वादि ॥ ११ ॥ आसादितं भोगार्थं संयोजितं जीवेषु क्रियाकलापे येन । अपीतान् लीनान् ॥ १२ ॥

तस्यार्थसूक्ष्माभिनिविष्टदृष्टेरन्तर्गतोऽर्थो रजसा तनीयान् ।
गुणेन कालानुगतेन विद्धः सूष्यंस्तदाभिद्यत नाभिदेशात् ॥१३॥
स पद्मकोशः सहसोदतिष्ठत् कालेन कर्मप्रतिबोधनेन ।
स्वरोचिषा तत्सलिलं विशालं विद्योतयन्नर्क इवात्मयोनिः ॥१४॥
तल्लोकपद्मं स उ एव विष्णुः प्रावीविशत् सर्वगुणावभासम् ।
तस्मिन् स्वयं वेदमयो विधाता स्वयंभुवं यं स्म वदन्ति सोऽभूत् ॥१५॥
तस्यां स चाम्भोरुहकर्णिकायामवस्थितो लोकमपश्यमानः ।
परिक्रमन् व्योम्नि विवृत्तनेत्रश्चत्वारि लेभेऽनुदिशं मुखानि ॥१६॥
तस्माद् युगान्तश्वसनावघूर्णजलोर्मिचक्रात् सलिलाद् विरूढम् ।
उपाश्रितः कञ्जमु लोकतत्त्वं नात्मानमद्धाऽविददादिदेवः ॥१७॥
क एष योऽसावहमब्जपृष्ठ एतत्कुतो वाब्जमनन्यदप्सु ।
अस्ति ह्यधस्तादिह किञ्चनैतदधिष्ठितं यत्र सता नु भाव्यम् ॥१८॥
स इत्थमुद्वीक्ष्य तदब्जनालनाडीभिरन्तर्जलमाविवेश ।
नार्वाग्गतस्तत्खरनालनालनाभिं विचिन्वंस्तदविन्दताजः ॥१९॥
तमस्यपारे विदुरात्मसर्गं विचिन्वतोऽभूत् सुमहांस्त्रिणेमिः ।
यो देहभाजां भयमीरयाणः परिक्षिणोत्यायुरजस्य हेतिः ॥२०॥
ततो निवृत्तोऽप्रतिलब्धकामः स्वधिष्ण्यमासाद्य पुनः स देवः ।
शनैर्जितश्वासनिवृत्तचित्तो न्यषीददारूढसमाधियोगः ॥२१॥
कालेन सोऽजः पुरुषायुषाभिप्रवृत्तयोगेन विरूढबोधः ।
स्वयं तदन्तर्हृदयेऽवभातमपश्यतापश्यत यन्न पूर्वम् ॥२२॥

अर्थसूक्ष्मेषु सर्वजीवलिङ्गशरीरेषु अभिनिविष्टा निष्कासनेच्छया प्रविष्टा दृष्टिर्यस्य । तनीयान् अतिसूक्ष्मोऽपि प्राकृतपदार्थ विद्धः संक्षोभितः । सूष्यन् प्रसवं प्राप्नुवन् । अभिद्यत निर्गतः ।१३। स चार्थः कालेन पद्मकोशःसन्नुदतिष्ठत् । आत्मा परमात्मा योनिः कारणं यस्य ।१४। उ इति संबोधने विस्मये वा । गुणान् भोग्यानर्थान् । प्रावीति स्वार्थे णिच् । स्वयंभुवमित्यदृष्टपितृत्वेन ।१५। परिक्रमन् ग्रीवां चालयन् । अनु प्रति ॥ १६॥ जायते इति जं लीयते इति लं तथाभूतं च कं समूहो यस्मिन् अतः सलिलपदेन न पौनरुक्त्यम् महोर्मीति पाठो वा । कञ्जं पद्मम् । तत्त्वं लोकात्मकपद्मरहस्यम् आत्मानं च । उ वितर्के ।१७। अनन्यत् एकम् । हि निश्चितम् । इह जले अधस्ताद् किञ्चन वस्तु अस्ति यत्र एतत् पद्मम् अधिष्ठितम् अत एव सता सुधिया मयाऽपि तदनुभाव्यम् ॥ १८ ॥ नालं दण्डः । तत्कमलदण्डस्य नाभिमधिष्ठानम् अन्वेषयन् अर्वाक् समीपं गतोऽपि तत् नाविन्दतेत्यन्वयः ॥ १९ ॥ सर्गं कारणम् । सुमहान् संवत्सरशतात्मकः । त्रिणेमिः कालः । योऽजस्य विष्णोश्चक्ररूपः । ईरयाणः उत्पादयन् ॥ २० ॥ ततोऽन्वेषणात् । धिष्ण्यं पद्मम् । निवृत्तं निरुद्धम् ॥ २१ ॥ पुरुषायुषा दिव्यवर्षशतेन । "दिव्यं वर्षशतं तपः" इति वक्ष्यमाणो-

मृणालगौरायतशेषभोगपर्यङ्क एकं पुरुषं शयानम् ।
फणातपत्रायुतमूर्धरत्नद्युभिर्हतध्वान्तयुगान्ततोये ॥२३॥
प्रेक्षां क्षिपन्तं हरितोपलाद्रेः सन्ध्याभ्रनीवेरुरुरुक्ममूर्ध्नः ।
रत्नोदधारौषधिसौमनस्यवनस्रजो वेणुभुजाङ्घ्रिपाङ्घ्रेः ॥२४॥
आयामतो विस्तरतः स्वमानदेहेन लोकत्रयसंग्रहेण ।
विचित्रदिव्याभरणांशुकानां कृतश्रियापाश्रितवेषदेहम् ॥२५॥
पुंसां स्वकामाय विविक्तमार्गैरभ्यर्चतां कामदुघाङ्घ्रिपद्मम् ।
प्रदर्शयन्तं कृपया नखेन्दुमयूखभिन्नाङ्गुलिचारुपत्रम् ॥२६॥
मुखेन लोकार्तिहरस्मितेन परिस्फुरत्कुण्डलमण्डितेन ।
शोणायितेनाधरबिम्बभासा प्रत्यर्हयन्तं सुनसेन सुभ्र्वा ॥२७॥
कदम्बकिञ्जल्कपिशङ्गवाससा स्वलङ्कृतं मेखलया नितम्बे ।
हारेण चानन्तधनेन वत्स श्रीवत्सवक्षःस्थलवल्लभेन ॥२८॥
परार्ध्यकेयूरमणिप्रवेकपर्यस्तदोर्दण्डसहस्रशाखम् ।
अव्यक्तमूलं भुवनाङ्घ्रिपेन्द्रमहीन्द्रभोगैरधिवीतवल्शम् ॥२९॥
चराचरौको भगवन्महीध्रमहीन्द्रबन्धुं सलिलोपगूढम् ।
किरीटसाहस्रहिरण्यशृङ्गमाविर्भवत्कौस्तुभरत्नगर्भम् ॥३०॥

क्तैरत्रापि तथैवेति प्राञ्चः । यत्तु द्वितीये दिव्यं सहस्राब्दं तत्तु ब्राह्मकल्पापेक्षमेतच्च पाद्मकल्पपरमतो न विरोधः । अभिप्रवृत्तेन सिद्धेन ॥ २२ ॥ नवस्वपि अपश्यदित्यस्यान्वयः । आयुताः सर्वतो युक्ताः ॥ २३ ॥ कथंभूतम् । मरकतशिलामयपर्वतस्य प्रेक्षां शोभां देहेन तिरस्कुर्वन्तम् । कथंभूतस्याद्रेः । नीवी परिधानं यस्य तस्य पीताम्बरेण । पुनः । अनेकस्वर्णशिखरस्य तस्य स्वकिरीटैः । पुनः । रत्नादियुक्तस्य तस्य स्वीयरत्नमुक्तातुलसीपुष्पमालाभिः । पुनः । वेणुभुजस्य वृक्षचरणस्य च तस्य स्वीयभुजपादैः । सौमनस्यानि पुष्पसमूहाः ॥ २४ ॥

आयामतो दैर्घ्येण । सुष्ठु अमानेन निरुपमेन । तेषामपि कृता श्रीः शोभा यस्य तेन देहेन प्रेक्षामिति योज्यम् । अपाश्रितवेषदा ईहा इच्छा यस्येति वा ॥ २५ ॥ पुनः कीदृशम् । भक्तानां स्वाभिलषितफलाय अङ्घ्रिपद्मं प्रदर्शयन्तम् । भिन्ना व्याप्ता अङ्गुलय एव सुन्दरपत्राणि यस्य । विविक्तैः शुद्धैः ॥ २६ ॥ सुभ्र्वा शोभनभ्रूयुक्तेन मुखेन भ्रूवा चात्र प्रत्यर्हयन्तं भक्तान् सम्मानयन्तम् । शोणायितेन रक्तोत्पलच्छविवद्वर्तमानेन ॥ २७ ॥ पुनः । मेखलया च ॥ २८ ॥ चन्दनवृक्षरूपकेण तं विशिनष्टि—भुवनानि चतुर्दश अङ्घ्रिणा एकेनैव पाति रक्षतीति स चासाविन्द्र ऐश्वर्यवांश्च तं भगवन्तमपश्यत् । पक्षे भुवनेषु वृक्षश्रेष्ठम् । अव्यक्तस्य प्रकृतेर्मूलम् । उभयत्र बहुव्रीहिर्वा । भोगैर्देहावयवैः संवेष्टिता वल्शाः स्कन्धा यस्येत्युभयत्र । परार्ध्यैरमूल्यैः केयूरादिभिः फलपुष्पादिभिर्वा व्याप्ता भुजदण्डा एव अनन्ताः शाखा यस्य । प्रवेकाः उत्तमाः ॥ २९ ॥ चन्दनपर्वतरूपकेणाह भगवानेव महीध्रो मलयगिरिस्तम् ओकः वास-

निवीतमाम्नायमधुव्रतश्रिया स्वकीर्तिमय्या वनमालया हरिम् ।
सूर्येन्दुवाय्वग्न्यगमं त्रिधामभिः परिक्रमत्प्राधनिकैर्दुरासदम् ॥३१॥
तर्ह्येव तन्नाभिसरःसरोजमात्मानमम्भः श्वसनं वियच्च ।
ददर्श देवो जगतो विधाता नातः परं लोकविसर्गदृष्टिः ॥३२॥
स कर्मबीजं रजसोपरक्तः प्रजाः सिसृक्षन्नियदेव दृष्ट्वा ।
अस्तौद् विसर्गाभिमुखस्तमीड्यमव्यक्तवर्त्मन्यभिवेशितात्मा ॥३३॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां तृतीयस्कन्धे अष्टमोऽध्यायः ॥ ८ ॥

अथ नवमोऽध्यायः

ब्रह्मोवाच

ज्ञातोऽसि मेऽद्य सुचिरान्ननु देहभाजां न ज्ञायते भगवतो गतिरित्यवद्यम् ।
नान्यत्त्वदस्ति भगवन्नपि तन्न शुद्धं मायागुणव्यतिकराद्यदुरुर्विभासि ॥१॥
रूपं यदेतदवबोधरसोदयेन शश्वन्निवृत्ततमसः सदनुग्रहाय ।
आदौ गृहीतमवतारशतैकबीजं यन्नाभिपद्मभवनादहमाविरासम् ॥२॥

स्थानम् । अहीन्द्रः शेषः । अहीन्द्राः सर्पाधिपाश्च । सलिलेन गर्भोदेन क्षीरोदेन च । गर्भे मूर्तिमध्ये । पक्षे गिरेश्च रत्नखनिमत्त्वात् ॥ ३० ॥ निवीतं युक्तम् । आम्नाया वेदा एव भ्रमराः । अगमम् अगम्यम् उपमानत्वेन । त्रिषु कालेषु धाम मूर्तिर्येषान्तैः परिक्रमद्भिः परिचर्यार्थं प्रदक्षिणां कुर्वद्भिः प्राधनिकैः संग्रामप्रयोजकैः सुदर्शनादिभिर्हेतुभूतैः दुष्प्रापम् ॥ ३१ ॥ यदैव हरिमपश्यत् तर्ह्येव । भूतत्रिकम् आत्मानं सरोजं चेति पञ्चकमेव । विर्विविधार्थे । यद्वा सरोजपदेन पृथ्वी आत्मपदेन तेजः भगवतोऽन्तर्गतत्वात् एवं भूतपञ्चकम् इति श्रीवल्लभाचार्याः ॥ ३२ ॥ कर्मबीजं लोकसृष्टेः कारणम् । इयत् पञ्चकमेव । अव्यक्तवर्त्मनि भगवति ॥ ३३ ॥

इति श्रीमद्भागवते महापुराणे तृतीयस्कन्धे गूढार्थदीपिन्यामष्टमोऽध्यायः ।

नवमे मधुरैः पद्यैः स्तुत्वा नारायणं विधिः ।
ततोऽसौ सृष्टिसामर्थ्यं लब्धवानिति वर्ण्यते ॥ १ ॥

सुचिरात् बहुकालोपासनेन मे मया । गतिस्तत्त्वं न ज्ञायते इति देहभाजाम् अवद्यं दोषः । यदपि अस्ति तदपि शुद्धं सत्यं न, किन्तु अनित्यमेव यतो व्यतिकरात्क्षोभात् उरुर्बहुरूपस्त्वमेवेत्यन्वयः ॥ १ ॥ रूपमिति युग्मकम् । यस्य नाभिपद्मादहं तस्य तव यदेतत् दृश्यमानं रूपं त्वयैवानुग्रहात् आदौ गृहीतं यच्च श्रुत्या प्रतिपादितमानन्दमात्रं भवतः स्वरूपं तदेकमेव परं भिन्नं न पश्यामि अतस्ते अदो रूप-

नातः परं परम यद्भवतः स्वरूपमानन्दमात्रमविकल्पमविद्धवर्चः ।
पश्यामि विश्वसृजमेकमविश्वमात्मन् भूतेन्द्रियात्मकमदस्त उपाश्रितोऽस्मि ॥३॥
तद्वा इदं भुवनमङ्गल मङ्गलाय ध्याने स्म नो दर्शितं त उपासकानाम् ।
तस्मै नमो भगवतेऽनुविधेम तुभ्यं योऽनादृतो नरकभाग्भिरसत्प्रसङ्गैः ॥४॥
ये तु त्वदीयचरणाम्बुजकोशगन्धं जिघ्रन्ति कर्णविवरैः श्रुतिवातनीतम् ।
भक्त्या गृहीतचरणः परया च तेषां नापैषि नाथ हृदयाम्बुरुहात्स्वपुंसाम् ॥५॥
तावद्भयं द्रविणगेहसुहृन्निमित्तं शोकः स्पृहा परिभवो विपुलश्च लोभः ।
तावन्ममेत्यसदवग्रह आर्तिमूलं यावन्न तेऽङ्घ्रिमभयं प्रवृणीत लोकः ॥६॥
दैवेन ते हतधियो भवतः प्रसङ्गात्सर्वाशुभोपशमनाद् विमुखेन्द्रिया ये ।
कुर्वन्ति कामसुखलेशलवाय दीना लोभाभिभूतमनसोऽकुशलानि शश्वत् ॥७॥
क्षुत्तृट्त्रिधातुभिरिमा मुहुरर्द्यमानाः शीतोष्णवातवर्षैरितरेतराच्च ।
कामाग्निनाऽच्युत रुषा च सुदुर्भरेण सम्पश्यतो मन उरुक्रम सीदते मे ॥८॥
यावत्पृथक्त्वमिदमात्मन इन्द्रियार्थमायाबलं भगवतो जन ईश पश्येत् ।
तावन्न संसृतिरसौ प्रतिसंक्रमेत व्यर्थापि दुःखनिवहं वहति क्रियार्था ॥९॥
अह्न्यापृतार्तकरणा निशि निःशयाना नानामनोरथधिया क्षणभग्ननिद्राः ।
दैवाऽऽहतार्थरचना ऋषयोऽपि देव युष्मत्प्रसङ्गविमुखा इह संसरन्ति ॥१०॥
त्वं भावयोगपरिभावितहृत्सरोज आस्से श्रुतेक्षितपथो ननु नाथ पुंसाम् ।
यद् यद्धिया त उरुगाय विभावयन्ति तत्तद्वपुः प्रणयसे सदनुग्रहाय ॥११॥
नातिप्रसीदति तथोपचितोपचारैराराधितः सुरगणैर्हृदि बद्धकामैः ।
यत्सर्वभूतदययाऽसदलभ्ययैको नानाजनेष्ववहितः सुहृदन्तरात्मा ॥१२॥

मुपाश्रितोऽस्मीत्यन्वयः । वेदान्तिनां विप्रकृष्टमपि भक्तानां तु उप समीप एवेति द्योतनाय अद इत्युक्तम् । अदसस्तु विप्रकृष्टे इति वचनात् । अवबोधरसश्चिच्छक्तिः । तमोऽविद्या । अविद्धवर्चोऽनावृतप्रकाशम् । अविश्वं सर्वविलक्षणम् । आत्मकं कारणम् ॥ २।३ ॥ स्म श्रुतिप्रसिद्धं तद्वै तदेव इदं रूपं ते त्वया नः । नमोऽनुविधेम नमस्कुर्महे । असन्मिथ्यैवेदं सर्वमिति प्रसङ्गवद्भिः ॥ ४ ॥ गन्धं गन्धवत् विस्तृतं आकर्षकं च यशः जिघ्रन्ति शृण्वन्ति । श्रुतिः श्रवणरूपा भक्तिः ॥ ५ ॥ न प्रवृणीत नाश्रयेत् ॥ ६ ॥ ये भवतः कथाप्रसङ्गात् विमुखेन्द्रियाः सन्तोऽकुशलानि कुर्वन्ति ते इत्यन्वयः ॥ ७ ॥ इमाः प्रजाः संपश्यतो मे मनः क्लिश्यति । अच्युतया । संबोधनं वा ॥ ८ ॥ बलं यत्र त्वन्मायाकारितमित्यर्थः आत्मनो जीवस्य इदं पृथक्त्वं देहादिभावम् । न प्रतिसंक्रमेत न निवर्तेत । क्रियाणामर्थः फलं यतः ॥९॥ आपृतानि नानाव्यापारयुक्तानि आर्तानि च इन्द्रियाणि येषाम् ॥ १० ॥ भावयोगो भक्तियोगः तेन परिशोधिते । श्रुतेन कथाश्रवणेन । उरु प्रकारेण उरुभिर्वा शास्त्रेषु गीयते तथा । विभावयन्ति ध्यायन्ति । प्रणयसे प्रकटयसि ॥ ११ ॥ अवहितः प्रविष्टः एको भवान् यत् यथा दयया तथा बहूपचारै-

पुंसामतो विविधकर्मभिरध्वराद्यैर्दानेन चोग्रतपसा व्रतचर्यया च ।
आराधनं भगवतस्तव सत्क्रियार्थो धर्मोऽर्पितः कर्हिचिद् ध्रियते न यत्र ॥१३॥

शश्वत्स्वरूपमहसैव निपीतभेदमोहाय बोधधिषणाय नमः परस्मै ।
विश्वोद्भवस्थितिलयेषु निमित्तलीलारासाय ते नम इदं चकृमेश्वराय ॥१४॥

यस्यावतारगुणकर्मविडम्बनानि नामानि येऽसुविगमे विवशा गृणन्ति ।
ते नैकजन्मशमलं सहसैव हित्वा संयान्त्यपावृतमृतं तमजं प्रपद्ये ॥१५॥

यो वा अहं च गिरिशश्च विभुः स्वयं च स्थित्युद्भवप्रलयहेतव आत्ममूलम् ।
भित्त्वा त्रिपाद्ववृध एक उरुप्ररोहस्तस्मै नमो भगवते भुवनद्रुमाय ॥१६॥

लोको विकर्मनिरतः कुशले प्रमत्तः कर्मण्ययं त्वदुदिते भवदर्चने स्वे ।
यस्तावदस्य बलवानिह जीविताशां सद्यश्छिनत्त्यनिमिषाय नमोऽस्तु तस्मै ॥१७॥

यस्माद् बिभेम्यहमपि द्विपरार्धधिष्ण्यमध्यासितः सकललोकनमस्कृतं यत् ।
तेपे तपो बहुसवोऽवरुरुत्समानस्तस्मै नमो भगवतेऽधिमखाय तुभ्यम् ॥१८॥

तिर्यङ्मनुष्यविबुधादिषु जीवयोनिष्वात्मेच्छयाऽऽत्मकृतसेतुपरीप्सया यः ।
रेमे निरस्तरतिरप्यवरुद्धदेहस्तस्मै नमो भगवते पुरुषोत्तमाय ॥१९॥

योऽविद्ययानुपहतोऽपि दशार्धवृत्त्या निद्रामुवाह जठरीकृतलोकयात्रः ।
अन्तर्जलेऽहिकशिपुस्पर्शानुकूलां भीमोर्मिमालिनि जनस्य सुखं विवृण्वन् ॥२०॥

नेत्यन्वयः ॥ १२ ॥ यतः सकामानां नातिप्रसीदति अतस्तवाराधनमेव सत्क्रियार्थः श्रेष्ठं क्रियाफलम् । यत्र त्वयि । न ह्रियते न नश्यति किन्तु अक्षयफलो भवतीत्यर्थः ॥ १३ ॥ महसा प्रकाशेन । निपीतौ दूरीकृतौ । निमित्तभूता या लीलाशक्तिस्तया रासः क्रीडा यस्य । इदं नमो नमनं चकृम कृतवन्तो वयम् । प्राक्कालिकदर्शनस्मृत्या प्रेमोद्रेकाल्लिट्-प्रयोगः ॥ १४ ॥ विडम्बनमनुकरणमस्ति येषु तानि । गृणन्ति उच्चारयन्ति । शमलं पापम् । ऋतं सच्चिदानन्दं कृष्णम् ॥ १५ ॥ यो वै एकः पुनरस्य हेतवो भूत्वा अहं ब्रह्मादिरूपः त्रिपात् पुनश्च उरुप्ररोहः मरीच्यादिबहुशाखोपशाखारूपः सन् ववृधे तस्मै नम इत्यन्वयः । किं कृत्वा ववृधे । आत्ममूलं प्रकृतिं भित्वा गुणत्रयेण विभज्य ॥ १६ ॥ स्वे कुशले कर्मणि प्रमत्तो यावत् वर्तते तावत् यश्छिनत्ति तस्मै अनिमिषाय कालाय नम इत्यन्वयः ॥ १७ ॥ यत् तत् द्विपरार्द्धं ब्रह्मशतवर्षस्थायि स्थानमध्यासितोऽपि यस्मात् अहमपि बिभेमि भीतश्च सन् अवरुरुत्समानः त्वामेव प्राप्तुमिच्छन् बहुकालं तपश्च कृतवान् तस्मै मखफलदात्रे तुभ्यं नमः । सवः कालेऽपि इति निरुक्तिः ॥ १८ ॥ सेतुपरीप्सया धर्ममर्यादापालनार्थं आत्मेच्छया भक्तेच्छया तिर्यगादिषु अवरुद्धदेहः स्वीकृतमूर्तिः सन् यो रेमे तस्मै नम इत्यन्वयः ॥१९॥ दशार्द्धवृत्या पञ्चपर्ववत्या अविद्यया तामिस्रादि-

यन्नाभिपद्मभवनादहमासमीड्य लोकत्रयोपकरणो यदनुग्रहेण ।
तस्मै नमस्त उदरस्थभवाय योगनिद्रावसानविकसन्नलिनेक्षणाय ॥२१॥
सोऽयं समस्तजगतां सुहृदेक आत्मा सत्त्वेन यन्मृडयते भगवान् भगेन ।
तेनैव मे दृशमनुस्पृशताद्यथाहं स्रक्ष्यामि पूर्ववदिदं प्रणतप्रियोऽसौ ॥२२॥
एष प्रपन्नवरदो रमयाऽऽत्मशक्त्या यद् यत्करिष्यति गृहीतगुणावतारः ।
तस्मिन् स्वविक्रममिदं सृजतोऽपि चेतो युञ्जीत कर्मशमलं च यथा विजह्याम् ॥२३॥
नाभिह्रदादिह सतोऽम्भसि यस्य पुंसो विज्ञानशक्तिरहमासमनन्तशक्तेः ।
रूपं विचित्रमिदमस्य विवृण्वतो मे मा रीरिषीष्ट निगमस्य गिरां विसर्गः ॥२४॥
सोऽसावदभ्रकरुणो भगवान् विवृद्धप्रेमस्मितेन नयनाम्बुरुहं विजृम्भन् ।
उत्थाय विश्वविजयाय च नो विषादं माध्व्या गिरापनयतात्पुरुषः पुराणः ॥२५॥

मैत्रेय उवाच

स्वसम्भवं निशाम्यैवं तपोविद्यासमाधिभिः । यावन्मनोवचः स्तुत्वा विरराम स खिन्नवत् ॥२६॥
अथाभिप्रेतमन्वीक्ष्य ब्रह्मणो मधुसूदनः । विषण्णचेतसं तेन कल्पव्यतिकराम्भसा ॥२७॥
लोकसंस्थानविज्ञान आत्मनः परिखिद्यतः । तमाहागाधया वाचा कश्मलं शमयन्निव ॥२८॥

श्रीभगवानुवाच

मा वेदगर्भ गास्तन्द्रीं सर्ग उद्यममावह । तन्मयाऽऽपादितं ह्यग्रे यन्मां प्रार्थयते भवान् ॥२९॥
भूयस्त्वं तप आतिष्ठ विद्यां चैव मदाश्रयाम् । ताभ्यामन्तर्हृदि ब्रह्मन् लोकान् द्रक्ष्यस्यपावृतान्॥३०॥
तत आत्मनि लोके च भक्तियुक्तः समाहितः । द्रष्टासि मां ततं ब्रह्मन्मयि लोकांस्त्वमात्मनः ॥३१॥
यदा तु सर्वभूतेषु दारुष्वग्निमिव स्थितम् । प्रतिचक्षीत मां लोको जह्यात्तर्ह्येव कश्मलम् ॥३२॥

रूपया । य उवाह तस्मै इत्युत्तरेणान्वयः विवृण्वन् प्रकटयन् ॥ २० ॥ उपकरणम् आज्ञाकारि कृतिर्वा सामग्री वा । भवः प्रपञ्चः ॥ २१ ॥ यत् येन सत्त्वेन ज्ञानेन भगेन च जगन्ति मृडयते सुखयति सोऽयं तेनैव सत्त्वेन मे दृशं प्रज्ञामनुस्पृशताद् योजयतु ॥ २२ ॥ यत् यत् चरितं करिष्यति तस्मिन् तस्मिन् मे चेतो युञ्जीत संल्लग्नं भवेत् यथाऽहं कर्मशमलं सृष्टिजन्यं वैषम्यादिपापं त्यजेयम् । कथंभूतस्य मे । तव पराक्रमरूपमिदं जगत् सृजतः ॥२३॥ यस्य नाभिह्रदादहमासं तस्यैव अस्य विचित्रं रूपमिदं विश्वं विस्तारयतो मे विसर्गो वागुच्चारणं मा रीरिषीष्ट मा लुप्येत । रिष् हिंसायामित्यस्य यङ्लुगन्ताल्लिङि कर्मकर्तरि वैदिकरीत्याऽस्य साधुत्वं ज्ञेयमस्य वेदरूपत्वात् ॥ २४ ॥ विजृम्भयन् उन्मीलयन् । विजयाय उद्भवाय । माध्व्या मधुरया ॥ २५ ॥ स्वसंभवं स्वजनकम् । यावत्सामर्थ्यं तावत् ॥ २६ ॥ अथेति युग्मकम् । आत्मनो हेतोः लोकरचनाविज्ञाने खिद्यतः ब्रह्मणोऽभिप्रायं ज्ञात्वा भगवान् तमाहेत्यन्वयः । कल्पव्यतिकरः प्रलयः । कश्मलं मोहम् ॥ २७।२८ ॥ तन्द्रीमालस्यम् ॥ २९ ॥ विद्यां भक्तिनिष्ठाम् ॥ ३० ॥ आत्मनि स्वमनसि । ततं व्याप्तम् । आत्मनो जीवांश्च ॥ ३१ ॥ प्रतिचक्षीत पश्येत् ॥ ३२ ॥

यदा रहितमात्मनं भूतेन्द्रियगुणाशयैः । स्वरूपेण मयोपेतं पश्यन् स्वाराज्यमृच्छति ॥३३॥
नानाकर्मवितानेन प्रजा बह्वीः सिसृक्षतः । नात्मावसीदत्यस्मिंस्ते वर्षीयान्मदनुग्रहः ॥३४॥
ऋषिमाद्यं न बध्नाति पापीयांस्त्वां रजोगुणः । यन्मनो मयि निर्बद्धं प्रजाः संसृजतोऽपि ते ॥३५
ज्ञातोऽहं भवता त्वद्य दुर्विज्ञेयोऽपि देहिनाम् । यन्मां त्वं मन्यसेऽयुक्तं भूतेन्द्रियगुणात्मभिः ॥३६
तुभ्यं मद्विचिकित्सायामात्मा मे दर्शितोऽबहिः । नालेन सलिले मूलं पुष्करस्य विचिन्वतः ॥३७
यच्चकर्थाङ्ग मत्स्तोत्रं मत्कथाभ्युदयाङ्कितम् । यद्वा तपसि ते निष्ठा स एष मदनुग्रहः ॥३८॥
प्रीतोऽहमस्तु भद्रं ते लोकानां विजयेच्छया । यदस्तौषीर्गुणमयं निर्गुणं मानुवर्णयन् ॥३९॥
य एतेन पुमान्नित्यं स्तुत्वा स्तोत्रेण मां भजेत् । तस्याशु सम्प्रसीदेयं सर्वकामवरेश्वरः ॥४०॥
पूर्तेन तपसा यज्ञैर्दानैर्योगसमाधिना । राद्धं निःश्रेयसं पुंसां मत्प्रीतिस्तत्त्वविन्मतम् ॥४१॥
अहमात्माऽऽत्मनां धातः प्रेष्ठः सन् प्रेयसामपि । अतो मयि रतिं कुर्याद् देहादिर्यत्कृते प्रियः॥४२
सर्ववेदमयेनेदमात्मनात्माऽऽत्मयोनिना । प्रजाः सृज यथापूर्वं याश्च मय्यनुशेरते ॥४३॥

मैत्रेय उवाच

तस्मा एवं जगत्स्रष्ट्रे प्रधानपुरुषेश्वरः । व्यज्येदं स्वेन रूपेण कञ्जनाभस्तिरोदधे ॥४४॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां तृतीयस्कन्धे नवमोऽध्याय. ॥ ९ ॥

अथ दशमोऽध्यायः

विदुर उवाच

अन्तर्हिते भगवति ब्रह्मा लोकपितामहः । प्रजाःससर्ज कतिधा दैहिकीर्मानसीर्विभुः ॥१॥
ये च मे भगवन् पृष्टास्त्वय्यर्था बहुवित्तम । तान् वदस्वानुपूर्व्येण छिन्धि नः सर्वसंशयान् ॥२॥

स्वरूपेण स्वप्रियेण मया सह पश्यन् भवति तदा स्वाराज्यं दिव्यसुखम् ॥ ३३ ॥ ते आत्मा चित्तं खिन्नं न भविष्यति । वर्षीयान् अत्यधिकः ॥ ३४।३५ ॥ आत्माऽहंकारः ॥ ३६ ॥ विचिन्वतोऽन्वेषयतः तुभ्यं तव मे मया आत्मा स्वरूपम् अबहिरन्तर्हृदि । कदा । अस्ति ह्यधस्तादिति मद्विचारणायां सत्याम् ॥ ३७।३८ ॥ विजयेच्छया सर्गेच्छया । मा माम् ॥ ३९ ॥ ईश्वरो दाता ॥ ४० ॥ पूर्तं स्मार्तं कर्म तदादिभिः राद्धं सिद्धं यत् निःश्रेयसं फलं तन्मत्प्रीतिरेव न स्वर्गादि न च शुष्कज्ञानम् ॥ ४१ ॥ आत्मनां जीवानामात्मा आश्रयः प्रेष्ठश्च सन् स्थितः अतः । यत्कृतो यदर्थम् ॥४२॥ आत्मा त्वम् आत्मनैव अन्यनिरपेक्षेण । यद्वा । इदमात्मना अनेनैव देहेन । आत्मा नारायणः योनिः कारणं यस्य तेन ॥ ४३ ॥ इदं जगन्निर्माणं व्यज्य प्रकटं कृत्वा ॥ ४४ ॥

इति श्रीमद्भागवते महापुराणे तृतीयस्कन्धे गूढार्थदीपिन्यां नवमोऽध्यायः ।

सूत उवाच

एवं सञ्चोदितस्तेन क्षत्त्रा कौषारवो मुनिः । प्रीतः प्रत्याह तान् प्रश्नान् हृदिस्थानथ भार्गव ॥३॥

मैत्रेय उवाच

विरिञ्चोऽपि तथा चक्रे दिव्यं वर्षशतं तपः । आत्मन्यात्मानमावेश्य यदाह भगवानजः ॥४॥

तद्विलोक्याब्जसम्भूतो वायुना यदधिष्ठितः । पद्ममम्भश्च तत्कालकृतवीर्येण कम्पितम् ॥५॥

तपसा ह्येधमानेन विद्यया चात्मसंस्थया । विवृद्धविज्ञानबलो न्यपाद् वायुं सहाम्भसा ॥६॥

तद्विलोक्य वियद्व्यापि पुष्करं यदधिष्ठितम् । अनेन लोकान् प्राग्लीनान् कल्पितास्मीत्यचिन्तयत् ॥७

पद्मकोशं तदाऽऽविश्य भगवत्कर्मचोदितः । एकं व्यभाङ्क्षीदुरुधा त्रिधा भाव्यं द्विसप्तधा ॥८॥

एतावाञ्जीवलोकस्य संस्थाभेदः समाहृतः । धर्मस्य ह्यनिमित्तस्य विपाकः परमेष्ठ्यसौ ॥९॥

विदुर उवाच

यदात्थ बहुरूपस्य हरेरद्भुतकर्मणः । कालाख्यं लक्षणं ब्रह्मन् यथा वर्णय नः प्रभो ॥१०॥

मैत्रेय उवाच

गुणव्यतिकराकारो निर्विशेषोऽप्रतिष्ठितः । पुरुषस्तदुपादानमात्मानं लीलयासृजत् ॥११॥

विश्वं वै ब्रह्मतन्मात्रं संस्थितं विष्णुमायया । ईश्वरेण परिच्छिन्नं कालेनाव्यक्तमूर्तिना ॥१२॥

यथेदानीं तथाग्रे च पश्चादप्येतदीदृशम् । सर्गो नवविधस्तस्य प्राकृतो वैकृतस्तु यः ॥१३॥

कालद्रव्यगुणैरस्य त्रिविधः प्रतिसंक्रमः । आद्यस्तु महतः सर्गो गुणवैषम्यमात्मनः ॥१४॥

दशमे वर्ण्यते पूर्वं काललक्षणमंशतः ।
ततोऽनु दशधा सर्गः प्राकृतादिश्च तद्भवः ॥ १ ॥

हे स्व आत्मीय ! ॥ १।२ ॥ संचोदितः प्रार्थितः ॥ ३ ॥ आत्मनि श्रीनारायणे आत्मनं मनः अजो नारायणः ॥ ४ ॥ तदिति युग्मकम् । यदधिष्ठाय स्थितः तत्पद्मम्भश्च कम्पितं विलोक्य वायुं न्यपादित्युत्तरेणान्वयः ॥ ५।६ ॥ वियत्सत्यलोकपर्यन्तम् । कल्पिताऽस्मि स्रक्ष्यामि ॥ ७ ॥ भगवता कर्मणि जगत्सर्गे । तमेकमेव त्रिधा लोकत्रयरूपेण गुणैर्वा । चतुर्दशलोकरूपेण च विभक्तवान् यतः उरुधा भावयितुं योग्यम् ॥ ८ ॥ लोकस्य भोगस्थानस्य रचनाविशेषः समाहृतः संक्षिप्य कथितः । अनिमित्तस्य निष्कामधर्मस्य विपाकः फलरूपः ॥ ९ ॥ यत् आत्थ तत् यथावत् ॥ १०॥ गुणानां व्यतिकरः परिणामः सूत्रमहदादिः स एव आकारो रूपं यस्य । निर्विशेषः सूक्ष्मः अनिरिति च्छेदात् स्थूलश्च अप्रतिष्ठितः आद्यन्तरहितः यः कालः तत् तमेव उपादानं निमित्तं कृत्वा पुरुष ईश्वर आत्मानमेव विश्वरूपेण-असृजत् ॥ ११॥ ब्रह्म तन्मात्रं सूक्ष्मावस्था यस्य प्रलये मायया संहृतं ब्रह्मरूपमेव विश्वं सत् सर्गे ईश्वररूपेण कर्त्रा कालेन निमित्तेन परिच्छिन्नं पृथक् प्रकाशितम् ॥ १२ ॥ यथेति सार्द्धम् । ईदृशं । भावरूपमेव । तेन कार्यावस्थाया एवानित्यत्वं कारणरूपेण तु नित्यमेव । 'तदेतदक्षयं नित्यं जगत्' इति वैष्णवोक्तेः तस्य जगतः । यस्तूभयात्मकः स दशमः । प्रतिसंक्रमः प्रलयः स च कालेन नित्यः । द्रव्येण संकर्षणाग्न्या-दिना नैमित्तिकः । गुणैः स्वस्वकार्यं ग्रसमानैः प्राकृतिकः प्रकृतेर्जाताः प्राकृताः विकृतिः समष्टि-विराट् ब्रह्मा तज्जा वैकृताः ॥ १३ ॥ आत्मनो हरेः सकाशात् वैषम्यं नाम । अहमोऽहङ्कारस्य यत्र

द्वितीयस्त्वहमो यत्र द्रव्यज्ञानक्रियोदयः । भूतसर्गस्तृतीयस्तु तन्मात्रो द्रव्यशक्तिमान् ॥१५॥
चतुर्थ ऐन्द्रियः सर्गो यस्तु ज्ञानक्रियात्मकः । वैकारिको देवसर्गः पञ्चमो यन्मयं मनः ॥१६॥
षष्ठस्तु तमसः सर्गो यस्त्वबुद्धिकृतः प्रभो । षडिमे प्राकृताः सर्गा वैकृतानपि मे शृणु ॥१७॥
रजोभाजो भगवतो लीलेयं हरिमेधसः । सप्तमो मुख्यसर्गस्तु षड्विधस्तस्थुषां च यः ॥१८॥
वनस्पत्योषधिलतात्वक्सारा वीरुधो द्रुमाः । उत्स्रोतसस्तमःप्राया अन्तःस्पर्शा विशेषिणः ॥१९॥
तिरश्चामष्टमः सर्गः सोऽष्टाविंशद्विधो मतः । अविदो भूरितमसो घ्राणज्ञा हृद्यवेदिनः ॥२०॥
गौरजो महिषः कृष्णः सूकरो गवयो रुरुः । द्विशफाः पशवश्चेमे अविरुष्ट्रश्च सत्तम ॥२१॥
खरोऽश्वोऽश्वतरो गौरः शरभश्चमरी तथा । एते चैकशफाः क्षत्तः शृणु पञ्चनखान् पशून् ॥२२॥
श्वा सृगालो वृको व्याघ्रो मार्जारः शशशल्लकौ । सिंहः कपिर्गजः कूर्मो गोधा च मकरादयः २३
कङ्कगृध्रवटश्येनभासभल्लूकबर्हिणः । हंससारसचक्राह्वकाकोलूकादयः खगाः ॥२४॥
अर्वाक्स्रोतस्तु नवमः क्षत्तरेकविधो नृणाम् । रजोऽधिकाः कर्मपरा दुःखे च सुखमानिनः २५
वैकृतास्त्रय एवैते देवसर्गश्च सत्तम । वैकारिकस्तु यः प्रोक्तः कौमारस्तूभयात्मकः ॥२६॥
देवसर्गश्चाष्टविधो विबुधाः पितरोऽसुराः । गन्धर्वाप्सरसः सिद्धा यक्षरक्षांसि चारणाः ॥२७॥
भूतप्रेतपिशाचाश्च विद्याध्राः किन्नरादयः । दशैते विदुराख्याताः सर्गास्ते विश्वसृक्कृताः ॥२७॥
अतः परं प्रवक्ष्यामि वंशान्मन्वन्तराणि च । एवं रजःप्लुतःस्रष्टा कल्पादिष्वात्मभूर्हरिः ।
सृजत्यमोघसङ्कल्प आत्मैवात्मानमात्मना ॥२८॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां तृतीयस्कन्धे दशमोऽध्यायः ॥१०॥

यस्मात् ॥१४॥ तन्मात्रात्मकः भूतसूक्ष्मसर्गः महाभूतोत्पादकः ॥१५॥ वैकारिकः सत्त्विकाऽहङ्काराज्जातः । यस्याहङ्कारस्य कार्यं मनः सोऽपि सर्ग पञ्चमः । ब्रह्मणोऽज्ञानकृतः । यद्वा हे प्रभो विदुर ! आवरणं विक्षेपश्च तां करोतीति कृत् तस्य तमसः पञ्चपर्वाविद्यायाः ॥१६॥ मे मत्तः ॥१७॥ रजोभाजो ब्रह्मणः । लीला न श्रमजनी । हरौ मेधा यस्य । हरिर्मेधायां वा । सत्तम इति सार्द्धकम् । मुख्यः मुखमिव प्रथमं कृतत्वात् परोपकारित्वाद्वा । त्वक्सारा वेण्वादयः । लता आरोहणापेक्षा नागवल्ल्याद्याः । वीरुधः आरोहणानपेक्षाः कूष्माण्डाद्याः इति भेदः । अन्तःस्पर्शा अन्तर्ज्ञाना अनेक-भेदवन्तश्च ॥ १८।१९॥ गवादय उष्ट्रान्ता द्विखुरा नव ॥ २० ॥ खरादयश्चमर्यन्ता एकखुराः षट् । कृष्णरुरुगवयगौरा मृगभेदाः । शरभोऽष्टापदः । श्वादयो गोधान्ताः पञ्चनखा द्वादश । मकरादयो जलचराः । कङ्कादयः खेचरा अभूचरत्वेनैकीकृत्य गृहीतां एव-मुक्तभेदाः । कङ्कः लोहपृष्ठः पक्षी । भासनामकश्चित्रितः द्युतिमान् पक्षी । भल्लूकः ऋक्षमुखः पक्षी विश्वा-मित्रसृष्टः । इति पद्यचतुष्कम् ॥२०।२१।२२।२३ ॥ अर्वाक् अधः ॥ २४ ॥ एते स्थावरतिर्यङ्मनुष्याख्याः उभयात्मकः देवत्वेन मनुष्यत्वेन च सृज्यः ॥ २५ ॥ देवेति सार्द्धम् ॥ २६ ॥ विश्वसृक् ब्रह्मा ॥ २७ ॥ हरिरेवात्मभूः सन् ॥ २८ ॥ इतः परं पद्यद्वयं क्वचित् ।

इति श्रीमद्भागवते महापुराणे तृतीयस्कन्धे गूढार्थदीपिन्यां दशमोऽध्यायः ।

अथैकादशोऽध्यायः

मैत्रेय उवाच

चरमः सद्विशेषाणामनेकोऽसंयुतः सदा । परमाणुः स विज्ञेयो नृणामैक्यभ्रमो यतः ॥१॥
सत एव पदार्थस्य स्वरूपावस्थितस्य यत् । कैवल्यं परममहानविशेषो निरन्तरः ॥२॥
एवं कालोऽप्यनुमितः सौक्ष्म्ये स्थौल्ये च सत्तम । संस्थानभुक्त्या भगवानव्यक्तो व्यक्तभुग् विभुः३
स कालः परमाणुर्वै यो भुङ्क्ते परमाणुताम् । सतोऽविशेषभुग् यस्तु स कालः परमो महान् ४
अणुर्द्वौ परमाणू स्यात्त्रसरेणुस्त्रयः स्मृतः । जालार्करश्म्यवगतः खमेवानुपतन्नगात् ॥५॥
त्रसरेणुत्रिकं भुङ्क्ते यः कालः स त्रुटिः स्मृतः । शतभागस्तु वेधः स्यात्तैस्त्रिभिस्तु लवः स्मृतः६
निमेषस्त्रिलवो ज्ञेय आम्नातस्ते त्रयः क्षणः । क्षणान् पञ्च विदुः काष्ठां लघुता दश पञ्च च ॥७॥
लघूनि वै समाम्नाता दश पञ्च च नाडिका । ते द्वे मुहूर्तः प्रहरः षड्यामः सप्त वा नृणाम् ८॥
द्वादशार्धपलोन्मानं चतुर्भिश्चतुरङ्गुलैः । स्वर्णमाषैः कृतच्छिद्रं यावत्प्रस्थजलप्लुतम् ॥९॥
यामाश्चत्वारश्चत्वारो मर्त्यानामहनी उभे । पक्षः पञ्चदशाहानि शुक्लः कृष्णश्च मानद ॥१०॥
तयोः समुच्चयो मासः पितॄणां तदहर्निशम् । द्वौ तावृतुः षडयनं दक्षिणं चोत्तरं दिवि ॥११॥

एकादशे महान् कालः पराण्वादिपरार्द्धगः ।
वर्ण्यंते वर्षकल्पादेर्मानं विज्ञायते यतः ॥ १ ॥

सतः कार्यस्य पृथिव्यादेर्विशेषाणामंशानां यश्चरमोऽन्त्योंऽशः सः । यतः येभ्यः संयुतेभ्यः परमाणुभ्यः तार्किकादीनाम् ऐक्यभ्रमो भवति अखण्डानां परमाणूनां नाशासंभवात् ते नित्यास्तदैक्यं विश्वमिति वदन्ति ते ॥ १ ॥ यस्य चरमोंऽशः परमाणुस्तस्यैव सतः । अवस्थितस्य द्वैविध्येनाऽविभक्तस्य यत्कैवल्यमेकत्वं तदेव महान्पदार्थः । कैवल्यं विवृणोति–विशेषविवक्षारहितः भेद-शून्यश्च ॥ २ ॥ यथा सूक्ष्मः स्थूलश्चायं पदार्थ एवम् । कया । परमाण्वादि-भुक्त्या । व्यक्तं प्रपञ्चम् । विशेषेण भातीति अथाऽपि अव्यक्तोऽदृश्यः ॥ ३ ॥ एतदेव विवृणोति–स इति । सतः पृथिव्यादेः परमाणुतां भुङ्क्ते परमाणुदेशमतिक्रामति सः । यस्तु अविशेषं साकल्यं द्वादशराश्यात्मकं सर्वं भुवनकोशं भुङ्क्ते अतिक्रामति स वर्षात्मको महान्, तस्यैवावृत्या युगादिक्रमेण द्विपरार्द्धान्तत्वमिति निष्कर्षः ॥ ४ ॥ त्रयोऽगवः । अवगतः प्रत्यक्षः सन् अगात् अवगतो भवति ।५। 'सूच्या भिन्ने पद्मपत्रे त्रुटिरित्यभिधीयते' इति सिद्धान्तोक्तेः । शतं भागास्त्रुटिरूपाः यस्मिन् सः त्रुटिशतेनेत्यर्थः । तैर्वेधैः ।६। निमेषत्रयं क्षणः । पञ्च क्षणाः काष्ठाः । पञ्चदश काष्ठा एकं लघु ॥७॥ पञ्चदश लघूनि नाडिका तद्द्वयं मुहूर्तः नाडिकाषट्कं सप्तकं वा प्रहरः स एव यामश्चतुर्थो भागः ॥८॥ द्वादशार्द्धैः षड्भिः पलैः कृतमुन्मानं पात्रं तच्च माषचतुष्टयमितस्वर्णकृतचतुरंगुलदीर्घ-सूचीविशेषैः कृतच्छिद्रं सत् यावत् प्रस्थजलपूरितं निमग्नं च भवति तावान् कालो नाडिका घटी भवति । प्रस्थः षोडशपलैः । चतुःषष्ट्या माषैः पलम् । दीपिन्त्यां तु पलमत्र पक्वटङ्कम् । प्रस्थपक्वपञ्चविंशतिटङ्कपरिमितं सेटकम् ॥ ९ ॥ एवमष्टौ यामाः । अहनी अहोरात्रः रात्रिंदिवं वा ॥ १० ॥ तयोरिति सार्द्धम् । षण्मासा दिवि स्वर्गे द्वे अयने देवानामहोरात्रौ ॥११॥

अयने चाहनी प्राहुर्वत्सरो द्वादश स्मृतः । संवत्सरशतं नृणां परमायुर्निरूपितम् ॥१२॥
ग्रहर्क्षताराचक्रस्थः परमाण्वादिना जगत् । संवत्सरावसानेन पर्येत्यनिमिषो विभुः ॥१३॥
संवत्सरः परिवत्सर इडावत्सर एव च । अनुवत्सरो वत्सरश्च विदुरैवं प्रभाष्यते ॥१४॥

यः सृज्यशक्तिमुरुधोच्छ्वसयन् स्वशक्त्या पुंसोऽभ्रमाय दिवि धावति भूतभेदः ।
कालाख्यया गुणमयं क्रतुभिर्वितन्वंस्तस्मै बलिं हरत वत्सरपञ्चकाय ॥१५॥

विदुर उवाच

पितृदेवमनुष्याणामायुः परमिदं स्मृतम् । परेषां गतिमाचक्ष्व ये स्युः कल्पाद् बहिर्विदः ॥१६॥
भगवान् वेद कालस्य गतिं भगवतो ननु । विश्वं विचक्षते धीरा योगराद्धेन चक्षुषा ॥१७॥

मैत्रेय उवाच

कृतं त्रेता द्वापरं च कलिश्चेति चतुर्युगम् । दिव्यैर्द्वादशभिर्वर्षैः सावधानं निरूपितम् ॥१८॥
चत्वारि त्रीणि द्वे चैकं कृतादिषु यथाक्रमम् । संख्यातानि सहस्राणि द्विगुणानि शतानि च १९॥
संध्यांशयोरन्तरेण यः कालः शतसंख्ययोः । तमेवाहुर्युगं तज्ज्ञा यत्र धर्मो विधीयते ॥२०॥
धर्मश्चतुष्पान्मनुजान् कृते समनुवर्तते । स एवान्येष्वधर्मेण व्येति पादेन वर्धता ॥२१॥
त्रिलोक्या युगसाहस्रं बहिराब्रह्मणो दिनम् । तावत्येव निशा तात यन्निमीलति विश्वसृक् २२॥
निशावसान आरब्धो लोककल्पोऽनुवर्तते । यावद्दिनं भगवतो मनून् भुञ्जंश्चतुर्दश ॥२३॥
स्वं स्वं कालं मनुर्भुङ्क्ते साधिकां ह्येकसप्ततिम् । मन्वन्तरेषु मनवस्तद्वंश्या ऋषयः सुराः ।
भवन्ति चैव युगपत्सुरेशाश्चानु ये च तान् ॥२४॥
एष दैनन्दिनः सर्गो ब्राह्मस्त्रैलोक्यवर्तनः । तिर्यङ्नृपितृदेवानां संभवो यत्र कर्मभिः ॥२५॥
मन्वन्तरेषु भगवान् बिभ्रत्सत्त्वं स्वमूर्तिभिः । मन्वादिभिरिदं विश्वमवत्युदितपौरुषः ॥२६॥

संवत्सरेत्यर्द्धम् ॥ १२ ॥ ॥ ग्रहाश्चन्द्रादयः । ऋक्षाणि अश्विन्यादीनि । तारा ध्रुवागस्त्यादयः अनिमिषः सूर्यः जगत् द्वादश राश्यात्मकं परिक्रामति ॥ १३ ॥ सौरवार्हस्पत्य-सावन-चान्द्रनाक्षत्रमास-भेदेन पञ्चभेदाः सूर्यादिगतिविशेषात् ॥ १४ ॥ यो भूतभेदः तेजोरूपी सूर्यः सृज्यशक्तिं बीजादिशक्तिम् उच्छ्वसयन् प्रकाशयन् धावति तस्मै वर्षपञ्चकप्रवर्तकाय पूजां कुरुत । मुमुक्षोरभ्रमाय मोक्षाय । बुभुक्षोर्गुणमयं स्वर्गादिफलम् ॥ १५ ॥ कल्पः कल्पस्थायि त्रैलोक्यं तस्मात् बहिस्तिष्ठन्ति ये विदो भृग्वादयस्तेषां गतिमायुर्मानम् ॥ १६ ॥ योगराद्धेन ध्यानसिद्धेन ॥ १७ ॥ वर्षैः वर्षसहस्रैः । सावधानं सन्ध्यासन्ध्यांशसहितम् ॥ १८ ॥ सहस्रीति युगमानम् । शतानीति संध्यासन्यांशयोमानम् तथा च कृतयुगे चत्वारि सहस्राणि अष्टौ शतानि एवमन्यत्रापि ॥ १९ ॥ युगस्यादौ सन्ध्या अन्तेंऽशः । कालः सहस्रसंख्यः ॥ २० ॥ अधर्मेण हेतुना एकैकपादेन ह्रसति ॥ २१ ॥ बहिर्महर्लोकादारभ्य ब्रह्मलोक-पर्यन्तम् । यत् यस्याम् ॥ २२ ॥ यावत् दिनं तावत् मनून् मन्वन्तराणि भुञ्जन् लोककल्पः त्रिलोकी-सर्गः । स्वमित्यर्द्धम् । साधिकां सार्द्धाष्टादशलक्षवर्षाधिकामिति तीर्थः ॥ २३ ॥ युगपत्समकालमेव ।ताननुवर्तन्ते ये गन्धर्वादयस्तेऽपि ॥ २४ ॥ वर्तनमुत्पत्तिर्यस्मिन् ॥ २५ ॥ मूर्तिभिरवतारैः सत्त्वं स्वा-

तमोमात्रामुपादाय प्रतिसंरुद्धविक्रमः । कालेनानुगताशेष आस्ते तूष्णीं दिनात्यये ॥२७॥
तमेवान्वपिधीयन्ते लोका भूरादयस्त्रयः । निशायामनुवृत्तायां निर्मुक्तशशिभास्करम् ॥२८॥
त्रिलोक्यां दह्यमानायां शक्त्या सङ्कर्षणाग्निना । यान्त्यूष्मणा महर्लोकाज्जनं भृग्वादयोऽर्दिताः२९
तावत्त्रिभुवनं सद्यः कल्पान्तैधितसिन्धवः । प्लावयन्त्युत्कटाटोपचण्डवातेरितोर्मयः ॥३०॥
अन्तः स तस्मिन् सलिल आस्तेऽनन्तासनो हरिः । योगनिद्रानिमीलाक्षः स्तूयमानो जनालयैः
एवंविधैरहोरात्रैः कालगत्योपलक्षितैः । अपक्षितमिवास्यापि परमायुर्वयःशतम् ॥३२॥
यदर्धमायुषस्तस्य परार्धमभिधीयते । पूर्वः परार्धोऽपक्रान्तो ह्यपरोऽद्य प्रवर्तते ॥३३॥
पूर्वस्यादौ परार्धस्य ब्राह्मो नाम महानभूत् । कल्पो यत्राभवद् ब्रह्मा शब्दब्रह्मेति यं विदुः ३४
तस्यैव चान्ते कल्पोऽभूद् यं पाद्ममभिचक्षते । यद्धरेर्नाभिसरस आसील्लोकसरोरुहम् ॥३५॥
अयं तु कथितः कल्पो द्वितीयस्यापि भारत । वाराह इति विख्यातो यत्रासीत्सूकरो हरिः ३६॥
कालोऽयं द्विपरार्धाख्यो निमेष उपचर्यते । अव्याकृतस्यानन्तस्य अनादेर्जगदात्मनः ॥३७॥
कालोऽयं परमाण्वादिर्द्विपरार्धान्त ईश्वरः । नैवेशितुं प्रभुर्भूम्न ईश्वरो धाममानिनाम् ॥३८॥
विकारैः सहितो युक्तैर्विशेषादिभिरावृतः । आण्डकोशो बहिरयं पञ्चाशत्कोटिविस्तृतः ॥३९॥
दशोत्तराधिकैर्यत्र प्रविष्टः परमाणुवत् लक्ष्यतेऽन्तर्गताश्चान्ये कोटिशो ह्यण्डराशयः ॥४०॥
तदाहुरक्षरं ब्रह्म सर्वकारणकारणम् । विष्णोर्धाम परं साक्षात्पुरुषस्य महात्मनः ॥४१॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां तृतीयस्कन्धे एकादशोऽध्यायः ॥ ११ ॥

तन्व्यमेव बिभ्रत मन्वादिभिर्निमित्तभूतैर्भगवानेव अवति । मात्रां लेशम् । विक्रमो लोकत्रयम् । अनुगतं प्रविष्टमशेषं यस्मिन् स ब्रह्मेति शेषः ॥ २६ ॥ अपिधीयन्ते स्वयमेव लीयन्ते कर्मकर्तरि प्रयोगः । अनुधृत्तायां प्राप्तायाम् । निर्मुक्तो रहितो यथा भवति तथा ॥ २८।२९ ॥ तावत् तदा । उत्कटाटोपो-असह्यक्षोभो येषाम् ॥ ३० ॥ हरिस्तेन सह ब्रह्मापि प्रकरणात् ॥ ३१ ॥ इव एवार्थे गतप्रायमेव ॥३२॥ अद्य अस्मिन्कल्पे ॥ ३३।३४ ॥ यत् यस्मिन् ॥ ३५ ॥ अयं तु सम्प्रति वर्तमानः द्वितीयरार्द्धस्यादौ ५१ वर्षस्य प्रथमदिने ॥ ३६ ॥ अव्याकृतस्य नित्यविग्रहस्य निमेष इति लोकव्यवहाराय न वस्तुतस्तथा ॥ ३७ ॥ ईश्वरः समर्थोऽपि भूम्नः परमेश्वरस्य स्वातन्त्र्यमीशितुं वशीकर्तुं न प्रभुः न समर्थः यतो देहाद्यभिमानिनामेव ॥ ३८ ॥ विकारैरिति त्रिकम् । यत्र परमाणुवत् तद् ब्रह्म विष्णोर्धाम स्वरूपमाहुः ॥ ३९ ॥

इति श्रीमद्भागवते महापुराणे तृतीयस्कन्धे गूढार्थदीपिन्यामेकादशोऽध्यायः ।

अथ द्वादशोऽध्यायः

मैत्रेय उवाच

इति ते वर्णितः क्षत्तः कालाख्यः परमात्मनः । महिमा वेदगर्भोऽथ यथास्राक्षीन्निबोध मे ॥१॥
ससर्जाग्रेऽन्धतामिस्रमथ तामिस्रमादिकृत् । महामोहं च मोहं च तमश्चाज्ञानवृत्तयः ॥२॥
दृष्ट्वा पापीयसीं सृष्टिं नात्मानं बह्वमन्यत । भगवद्ध्यानपूतेन मनसान्यां ततोऽसृजत् ॥३॥
सनकं च सनन्दं च सनातनमथात्मभूः । सनत्कुमारं च मुनीन्निष्क्रियानूर्ध्वरेतसः ॥४॥
तान् बभाषे स्वभूः पुत्रान् प्रजाः सृजत पुत्रकाः । तन्नैच्छन्मोक्षधर्माणो वासुदेवपरायणाः ॥५॥
सोऽवध्यातः सुतैरेवं प्रत्याख्यातानुशासनैः । क्रोधं दुर्विषहं जातं नियन्तुमुपचक्रमे ॥६॥
धिया निगृह्यमाणोऽपि भ्रुवोर्मध्यात्प्रजापतेः । सद्योऽजायत तन्मन्युः कुमारो नीललोहितः ॥७॥
स वै रुरोद देवानां पूर्वजो भगवान् भवः । नामानि कुरु मे धातः स्थानानि च जगद्गुरो ॥८॥
इति तस्य वचः पाद्मो भगवान् परिपालयन् । अभ्यधाद् भद्रया वाचा मा रोदीस्तत्करोमि ते
यदरोदीः सुरश्रेष्ठ सोद्वेग इव बालकः । ततस्त्वामभिधास्यन्ति नाम्ना रुद्र इति प्रजाः ॥१०॥
हृदिन्द्रियाण्यसुर्व्योम वायुरग्निर्जलं मही । सूर्यश्चन्द्रस्तपश्चैव स्थानान्यग्रे कृतानि मे ॥११॥
मन्युर्मनुर्महेशानो महाञ्छिव ऋतध्वजः । उग्ररेता भवः कालो वामदेवो धृतव्रतः ॥१२॥
धीर्वृत्तिरुशनोमा च नियुत्सर्पिरिलाम्बिका । इरावती सुधा दीक्षा रुद्राण्यो रुद्र ते स्त्रियः॥१३॥
गृहाणैतानि नामानि स्थानानि च सयोषणः । एभिः सृज प्रजा बह्वीः प्रजानामसि यत्पतिः १४
इत्यादिष्टः स गुरुणा भगवान्नीललोहितः । सत्त्वाकृतिस्वभावेन ससर्जात्मसमाः प्रजाः ॥१५॥
रुद्राणां रुद्रसृष्टानां समन्ताद् ग्रसतां जगत् । निशाम्यासंख्यशो यूथान् प्रजापतिरशङ्कत ।१६।
अलं प्रजाभिः सृष्टाभिरीदृशीभिः सुरोत्तम । मया सह दहन्तीभिर्दिशश्चक्षुर्भिरुल्बणैः ॥१७॥
तप आतिष्ठ भद्रं ते सर्वभूतसुखावहम् । तपसैव यथापूर्वं स्रष्टा विश्वमिदं भवान् ॥१८॥

द्वादशे सनकादीनां सर्गतो वृद्ध्यदर्शनात् ।
शतरूपामनोः ब्रह्मा मैथुनीं सृष्टिमाचरत् ॥ १ ॥

मे निबोध मत्तः श्रृणु ॥ १ ॥ तमोऽज्ञानं ततो मोहो देहाद्यहंबुद्धिः ततो भोगेच्छा । तत्प्रतिघाते क्रोधः । देहनाशेऽहमेव मृत इति व्युत्क्रमेणार्थाः ॥ २ ॥ दृष्ट्वेति युग्मकम् । अन्यां सृष्टिमसृजत् सृष्टानेव बहिः प्रकटितवानित्यर्थः । अन्यानिति पाठो वा ॥३।४।५॥ अवध्यातोऽवज्ञातः ॥६।७।८॥ तत् नामादि ॥९॥ यत् यस्मात् ॥ १० ॥ मे मया ॥ ११ ॥ महेशान इत्येव पाठः न तु महिनसः अनर्थकत्वादिति दीपिनी ॥ १२ । १३ ॥ चात्कलत्राणि । सयोषणः सस्त्रीकः ॥ १४ ॥ सत्त्वं बलम् । आकृतिर्नीललोहितता । स्वभाव उग्रता ॥ १५ । १६ ॥ उल्बणैर्भयङ्करैः ॥ १७ ॥ आतिष्ठ कुरु ।

तपसैव परं ज्योतिर्भगवन्तमधोक्षजम्। सर्वभूतगुहावासमञ्जसा विन्दते पुमान् ॥१९॥

मैत्रेय उवाच

एवमात्मभुवाऽऽदिष्टः परिक्रम्य गिरां पतिम्। बाढमित्यमुमामन्त्र्य विवेश तपसे वनम् ॥२०॥
अथाभिध्यायतः सर्गं दश पुत्राः प्रजज्ञिरे। भगवच्छक्तियुक्तस्य लोकसन्तानहेतवः ॥२१॥
मरीचिरत्र्यङ्गिरसौ पुलस्त्यः पुलहः क्रतुः। भृगुर्वसिष्ठो दक्षश्च दशमस्तत्र नारदः ॥२२॥
उत्सङ्गान्नारदो जज्ञे दक्षोऽङ्गुष्ठात्स्वयम्भुवः। प्राणाद् वसिष्ठः सञ्जातो भृगुस्त्वचि करात्क्रतुः
पुलहो नाभितो जज्ञे पुलस्त्यः कर्णयोर्ऋषिः। अङ्गिरा मुखतोऽक्ष्णोऽत्रिर्मरीचिर्मनसोऽभवत् २४
धर्मः स्तनाद् दक्षिणतो यत्र नारायणः स्वयम्। अधर्मः पृष्ठतो यस्मान्मृत्युर्लोकभयङ्करः २५॥
हृदि कामो भ्रुवः क्रोधो लोभश्चाधरदच्छदात्। आस्याद्वाक् सिन्धवो मेढ्रान्निर्ऋतिःपायोरघाश्रयः
छायायाः कर्दमो जज्ञे देवहूत्याः पतिः प्रभुः। मनसो देहतश्चेदं जज्ञे विश्वकृतो जगत् ॥२७॥
वाचं दुहितरं तन्वीं स्वयम्भूर्हरतीं मनः। अकामां चकमे क्षत्तः सकाम इति नः श्रुतम् ॥२८॥
तमधर्मे कृतमतिं विलोक्य पितरं सुताः। मरीचिमुख्या मुनयो विस्रम्भात्प्रत्यबोधयन् ॥२९॥
नैतत्पूर्वैः कृतं त्वद्य न करिष्यन्ति चापरे। यस्त्वं दुहितरं गच्छेरनिगृह्याङ्गजं प्रभुः ॥३०॥
तेजीयसामपि ह्येतन्न सुश्लोक्यं जगद्गुरो। यद्वृत्तमनुतिष्ठन् वै लोकः क्षेमाय कल्पते ॥३१॥
तस्मै नमो भगवते य इदं स्वेन रोचिषा। आत्मस्थं व्यञ्जयामास स धर्मं पातुमर्हति ॥३२॥
स इत्थं गृणतः पुत्रान् पुरो दृष्ट्वा प्रजापतीन्। प्रजापतिपतिस्तन्वं तत्याज व्रीडितस्तदा।
तां दिशो जगृहुर्घोरां नीहारं यद्विदुस्तमः ॥३४॥

स्रष्टा स्रक्ष्यति ॥ १८ ॥ अञ्जसा सुखेन ॥ १९ ॥ बाढम् एवं करिष्यामीति अमुमुक्त्वा। वनमत्र जलं ज्ञेयं तदानीं वृक्षाणामसंभवात्। यथोक्तं "जले रुद्रो न्यमज्जत" इति ॥ २० ॥ लोकसन्तानस्य सृष्टिविस्तारस्य ॥ २१ । २२ ॥ उत्कृष्टात् सङ्गात् साधुसङ्गादिति श्लेषोऽपि व्याख्येयः। त्वचि त्वचः ॥ २३ ॥ कर्णाभ्याम् ॥ २४ । २५ ॥ हृदि मनसः। अधरदच्छदात् अधरोष्ठात्। निर्ऋतिर्नाम कश्चिन्नरकाधिकारी। राक्षसो वा। अघाश्रयः दुःखदाता ॥ २६ ॥ छायायाः कान्तेः विश्वकृतो ब्रह्मणः ॥ २७ ॥ वाचं सरस्वतीम्। सकामः वृद्धिसङ्कल्पवान् सन् चकमे न तु रेमे इति श्रुतं किंवदन्ती। नानाविध-तामसी-सृष्टिवृद्ध्यर्थमेव तथाभावस्य। भगवदिच्छयैव किञ्चित्कालोदयेन ब्रह्मणोऽदोषात् अत एव मृगो भूत्वैव तस्यानुधावनं श्रूयते पशुषु तथारतेरगर्हितत्वात्। "न मे हृषीकाणि पतन्त्यसत्पथे" इत्युक्तत्वाच्च। किञ्च पूर्वापरग्रन्थस्वारस्याच्चेत्थमेव व्याख्येयम्। अध्यात्मार्थ-कल्पनेन तु पौराणिकप्रक्रियाया अपलापापत्तेरन्याय्यत्वाच्चेति दिक् ॥२८॥ विस्रम्भात् प्रणयात् ॥२९॥ त्वद् त्वत्तः अङ्गजं कामम् ॥३०॥ एतत् विकर्म न सुश्लोक्यं न यशस्करम्। वृत्तं चरित्रम् ॥३१॥ इदं विश्वम् ॥३२॥ तन्वं तनुम्। अत्र तनुत्यागेन भावत्याग एव विवक्षितः ॥ ३३ ॥ तामित्यर्द्धम्। यत् याम् ॥ ३४ ॥

कदाचिद् ध्यायतः स्रष्टुर्वेदा आसंश्चतुर्मुखात् । कथं स्रक्ष्याम्यहं लोकान् समवेतान् यथा पुरा ।३५।
चातुर्होत्रं कर्मतन्त्रमुपवेदनयैः सह । धर्मस्य पादाश्चत्वारस्तथैवाश्रमवृत्तयः ॥३६॥

विदुर उवाच

स वै विश्वसृजामीशो वेदादीन् मुखतोऽसृजत् । यद् यद् येनासृजद् देवस्तन्मे ब्रूहि तपोधन ।३७।

मैत्रेय उवाच

ऋग्यजुःसामाथर्वाख्यान् वेदान् पूर्वादिभिर्मुखैः । शस्त्रमिज्यां स्तुतिस्तोमं प्रायश्चित्तं व्यधात्क्रमात्
आयुर्वेदं धनुर्वेदं गान्धर्वं वेदमात्मनः । स्थापत्यं चासृजद् वेदं क्रमात्पूर्वादिभिर्मुखैः ॥३९॥
इतिहासपुराणानि पञ्चमं वेदमीश्वरः । सर्वेभ्य एव वक्त्रेभ्यः ससृजे सर्वदर्शनः ॥४०॥
षोडश्युक्थौ पूर्ववक्त्रात्पुरीष्यग्निष्टुतावथ । आप्तोर्यामातिरात्रौ च वाजपेयं सगोसवम् ॥४१॥
विद्या दानं तपः सत्यं धर्मस्येति पदानि च । आश्रमांश्च यथासंख्यमसृजत्सह वृत्तिभिः ॥४२॥
सावित्रं प्राजापत्यं च ब्राह्मं चाथ बृहत्तथा । वार्तासञ्चयशालीनशिलोञ्छ इति वै गृहे ॥४३॥
वैखानसा वालखिल्यौदुम्बराः फेनपा वने । न्यासे कुटीचकः पूर्वं बह्वोदो हंसनिष्क्रियौ ॥४४॥
आन्वीक्षिकी त्रयी वार्ता दण्डनीतिस्तथैव च । एवं व्याहृतयश्चासन् प्रणवो ह्यस्य दह्नतः ।४५।
तस्योष्णिगासील्लोमभ्यो गायत्री च त्वचो विभोः ।त्रिष्टुम्मांसात्स्नुतोऽनुष्टुब्जगत्यस्थ्नः प्रजापतेः
मज्जायाः पङ्क्तिरुत्पन्ना बृहती प्राणतोऽभवत् । स्पर्शस्तस्याभवज्जीवः स्वरो देह उदाहृतः ४७
ऊष्माणमिन्द्रियाण्याहुरन्तःस्था बलमात्मनः । स्वराः सप्त विहारेण भवन्ति स्म प्रजापतेः ॥४८
शब्दब्रह्मात्मनस्तस्य व्यक्ताव्यक्तात्मनः परः ।ब्रह्मावभाति विततो नानाशक्त्युपबृंहितः ॥४९॥
ततोऽपरामुपादाय स सर्गाय मनो दधे । ५० । ऋषीणां भूरिवीर्याणामपि सर्गमविस्तृतम् ।
ज्ञात्वा तद्धृदये भूयश्चिन्तयामास कौरव । ५१ । अहो अद्भुतमेतन्मे व्यापृतस्यापि नित्यदा ।
न ह्येधन्ते प्रजा नूनं दैवमत्र विघातकम् । ५२ । एवं युक्तकृतस्तस्य दैवं चावेक्षतस्तदा ।

समवेतान् यथावत्सन्निवेशान् ॥ ३५ ॥ चतुर्णां होत्रादीनां कर्मतन्त्रं यज्ञविस्तारः । आसन्निति पूर्वेण योज्यम् ॥ ३६ । ३७ ॥ शस्त्रम् अप्रगीतमन्त्रस्तोत्रं यत्स्वरानुपूर्वीरहितैर्मन्त्रैः स्तूयते तत् । स्तुतिस्तोमं सङ्गीतस्तोत्रम् ॥ ३८ ॥ स्थापत्यं विश्वकर्म-शास्त्रम् ॥ ३९ । ४० ॥ षोडश्यादयो यज्ञविशेषसंज्ञाः ॥ ४१ ॥ विद्या शौचम् । दानं दया ॥ ४२ ॥ त्रिरात्रम् । संवत्सरान्तम् । वेदग्रहणान्तम् । बृहद् नैष्ठिकं चेति क्रमेण ब्रह्मचर्ये । वार्ता कृष्यादिवृत्तिः । शालीनम् अयाचितवृत्तिः । गृहे गृहाश्रमे । "ह्रस्व दीर्घप्लुत इतिवदेकत्वम्" ॥४३॥ वने स्थिताश्चत्वारः ॥ ४४ ॥ क्रमेण मोक्षधर्मकामार्थविद्या । दह्नतः हृदयाकाशात् ॥ ४५ ॥ स्नुतः स्नायुतः ॥ ४६ ॥ स्पर्शः कादिमावसानः तस्य ब्रह्मणः जीवः ततो जातः । स्वरोऽकारादिः देहजः ॥४७।४८॥ व्यक्ता वैखरी अव्यक्तः प्रणवः तत्कारणस्य अत एव शब्दब्रह्मरूपस्य ब्रह्मणो हृदि निर्गुणं ब्रह्म बहिर्विततः सगुणश्च परः परमेश्वरोऽवभाति अतस्तस्य नानादेहधारणे नानाप्रजासर्जने च न प्रयास इति तात्पर्यम् ॥ ४९ ॥ तत इत्यर्द्धम् ॥५०।५१॥

कस्य रूपमभूद् द्वेधा यत्कायमभिचक्षते । ५३ । ताभ्यां रूपविभागाभ्यां मिथुनं समपद्यत
यस्तु तत्र पुमान् सोऽभून्मनुः स्वायम्भुवः स्वराट् ।स्त्री याऽऽसीच्छतरूपाख्या महिष्यस्य महात्मनः
तदा मिथुनधर्मेण प्रजा ह्येधाम्बभूविरे । ५५ । स चापि शतरूपायां पञ्चापत्यान्यजीजनत्
प्रियव्रतोत्तानपादौ तिस्रः कन्याश्च भारत । आकूतिर्देवहूतिश्च प्रसूतिरिति सत्तम ॥५६॥
आकूतिं रुचये प्रादात्कर्दमाय तु मध्यमाम् । दक्षायादात्प्रसूतिं च यत आपूरितं जगत् ॥५७॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां तृतीयस्कन्धे द्वादशोऽध्यायः ॥ १२ ॥

अथ त्रयोदशोऽध्यायः

श्रीशुक उवाच

निशम्य वाचं वदतो मुनेः पुण्यतमां नृप । भूयः पप्रच्छ कौरव्यो वासुदेवकथादृतः ॥ १ ॥

विदुर उवाच

स वै स्वायम्भुवः सम्राट् प्रियः पुत्रः स्वयम्भुवः । प्रतिलभ्य प्रियां पत्नीं किं चकार ततो मुने २
चरितं तस्य राजर्षेरादिराजस्य सत्तम । ब्रूहि मे श्रद्दधानाय विष्वक्सेनाश्रयो ह्यसौ ॥ ३ ॥

श्रुतस्य पुंसां सुचिरश्रमस्य नन्वञ्जसा सूरिभिरीडितोऽर्थः ।
यत्तद्गुणानुश्रवणं मुकुन्दपादारविन्दं हृदयेषु येषाम् ॥ ४ ॥

श्रीशुक उवाच

इति ब्रुवाणं विदुरं विनीतं सहस्रशीर्ष्णश्चरणोपधानम् ।
प्रहृष्टरोमा भगवत्कथायां प्रणीयमानो मुनिरभ्यचष्ट ॥ ५ ॥

व्यापृतस्य सृष्टिसंल्लग्नस्यापि ॥ ५२ ॥ युक्तकृतः सयुक्ति चिन्तनं कुर्वतः । कस्य ब्रह्मणः ॥ ५ ।५४ ॥ महिषी राज्ञी ॥ ५५ ॥ स चापीति सार्द्धम् ॥ ५६ ॥ ५७ ॥

इति श्रीमद्भागवते महापुराणे तृतीयस्कन्धे गूढार्थदीपिन्यां द्वादशोऽध्यायः ।

त्रयोदशे जले मग्नां गामुद्धर्तुं विधेर्नसः ।
वराहो भगवाञ्जातः स्तुतो देवैरितीर्यते ॥ १ ॥

कौरव्यो विदुरः । कथायामादृतः आदरेण युक्तः । दृङो भावक्तान्तात् मत्वर्थीयोऽन् ॥१।२॥ विषूची सर्वतःप्रसरन्ती सेना भक्तलक्षणा यस्य सः कृष्णः ।३। श्रुतस्य शास्त्राभ्यासस्य अञ्जसा मुख्यतया अयमेवार्थः प्रयोजनम् । कः । येषां हृदयेषु तेषां गुणानुवादश्रवणमिति यत् सः ।।४ ।। चरणौ उपधीयेते प्रसार्येते यस्मिन् ॥ ५ ॥ उपधानम् उपवर्हणरूपम् । प्रणीयमानः तेन प्रवर्त्यमानः । अभ्यभाषत

मैत्रेय उवाच

यदा स्वभार्यया साकं जातः स्वायम्भुवो मनुः। प्राञ्जलिः प्रणतश्चेदं वेदगर्भमभाषत ॥६॥
त्वमेकः सर्वभूतानां जन्मकृद् वृत्तिदः पिता। अथापि नः प्रजानां ते शुश्रूषा केन वा भवेत् ७॥
तद्विधेहि नमस्तुभ्यं कर्मस्वीड्यात्मशक्तिषु। यत्कृत्वेह यशो विष्वगमुत्र च भवेद् गतिः ॥८॥

ब्रह्मोवाच

प्रीतस्तुभ्यमहं तात स्वस्ति स्ताद्वां क्षितीश्वर। यन्निर्व्यलीकेन हृदा शाधि मेत्यात्मनार्पितम् ९
एतावत्यात्मजैर्वीर कार्या ह्यपचितिर्गुरौ। शक्त्याप्रमत्तैर्गृह्येत सादरं गतमत्सरैः ॥१०॥
स त्वमस्यामपत्यानि सदृशान्यात्मनो गुणैः। उत्पाद्य शास धर्मेण गां यज्ञैः पुरुषं यज ॥११॥
परं शुश्रूषणं मह्यं स्यात्प्रजारक्षया नृप। भगवांस्ते प्रजाभर्तुर्हृषीकेशोऽनुतुष्यति ॥१२॥
येषां न तुष्टो भगवान् यज्ञलिङ्गो जनार्दनः। तेषां श्रमो ह्यपार्थाय यदात्मा नादृतः स्वयम् १३

मनुरुवाच

आदेशेऽहं भगवतो वर्तेयामीवसूदन। स्थानं त्विहानुजानीहि प्रजानां मम च प्रभो ॥१४॥
यदोकः सर्वसत्त्वानां मही मग्ना महाम्भसि। अस्या उद्धरणे यत्नो देव देव्या विधीयताम् ॥१५॥

मैत्रेय उवाच

परमेष्ठी त्वपां मध्ये तथा सन्नामवेक्ष्य गाम्। कथमेनां समुन्नेष्य इति दध्यौ धिया चिरम् ॥१६॥
सृजतो मे क्षितिर्वार्भिः प्लाव्यमाना रसां गता। अथात्र किमनुष्ठेयमस्माभिः सर्गयोजितैः ॥१७॥
यस्याहं हृदयादासं स ईशो विदधातु मे ॥ १८ ॥
इत्यभिध्यायतो नासाविवरात्सहसानघ। वराहतोको निरगादङ्गुष्ठपरिमाणकः ॥१९॥

॥ ६ । ७ ॥ आत्मशक्तिषु अस्मच्छक्येषु कर्मसु मध्ये केन तद्विधेहीति द्वयोरन्वयः। अमुत्र परलोके ॥८॥ मा मामनुशाधि आज्ञापयेति। आत्मना स्वयमेव निवेदितमतः प्रीतः। वां युवाभ्यां स्वस्ति। तुभ्यमिति पत्ये शेते इतिवत् ॥ ९ ॥ अपचितिः सपर्या। गृह्येत गुर्वाज्ञेति शेषः ॥१०॥ गां शास पृथ्वीं पालय ॥ ११ ॥ मह्यं मम नु निश्चितम् ॥ १२ ॥ यज्ञलिङ्गो यज्ञमूर्तिः। अपार्थाय निष्फलत्वाय। यत् यस्मात् तैः आत्मा परमात्मा नादृत उपेक्षितः ॥ १३ ॥ वर्तेय वर्तिष्ये। किन्तु इह कार्ये। स्थानम् अनुजानीहि आज्ञापय प्रदर्शयेत्यर्थः। हे पापनाशन ! प्रजा सृजत्याज्ञप्तो मनुः प्रजासृष्टिं चकार। पृथ्वीनिमज्जनेन यदा सृष्टिविघ्नो जातस्तदाऽऽगत्य ब्रह्माणमुवाचेति योज्यमत्र, अन्यथा तात्कालिकतद्वचनस्वीकारे तु मनुकन्यादेवहूतिसुतायां कलायां मरीचेरुत्पन्नात् कश्यपाद्धिरण्याक्षस्य सम्प्रत्यनुत्पन्नत्वात् तस्य वराहकृतसंहारः कथं घटेतेति ध्येयमत्र ॥ १४ ॥ यत् ओकः निवासस्थानं सा मही ॥ १५ ॥ सन्नां निमग्नाम्। गां पृथ्वीम्। समुन्नेष्ये उद्धरिष्यामि ॥ १६ ॥ रसां तलोपलक्षितं गर्भोदकम्, रसातलस्य भूविवरतया तत्र मज्जनासंभवात् ॥ १७ ॥ यस्येत्यर्द्धम्। मेऽनुष्ठेयम् ॥ १८ ॥ तोको बालकः

तस्याभिपश्यतः खस्थः क्षणेन किल भारत । गजमात्रः प्रववृधे तदद्भुतमभून्महत् ॥२०॥
मरीचिप्रमुखैर्विप्रैः कुमारैर्मनुना सह । दृष्ट्वा तत्सौकरं रूपं तर्कयामास चित्रधा ॥२१॥
किमेतत्सौकरव्याजं सत्त्वं दिव्यमवस्थितम् । अहो बताश्चर्यमिदं नासाया मे विनिःसृतम् ॥२२॥
दृष्टोऽङ्गुष्ठशिरोमात्रः क्षणाद् गण्डशिलासमः । अपि स्विद्भगवानेष यज्ञो मे खेदयन्मनः ॥२३॥
इति मीमांसतस्तस्य ब्रह्मणः सह सूनुभिः । भगवान् यज्ञपुरुषो जगर्जागेन्द्रसन्निभः ॥२४॥
ब्रह्माणं हर्षयामास हरिस्तांश्च द्विजोत्तमान् । स्वगर्जितेन ककुभः प्रतिस्वनयता विभुः ॥२५॥

निशम्य ते घर्घरितं स्वखेदक्षयिष्णु मायामयसूकरस्य ।
जनस्तपःसत्यनिवासिनस्ते त्रिभिः पवित्रैर्मुनयोऽगृणन् स्म ॥ २६ ॥
तेषां सतां वेदवितानमूर्तिर्ब्रह्मावधार्यात्मगुणानुवादम् ।
विनद्य भूयो विबुधोदयाय गजेन्द्रलीलो जलमाविवेश ॥ २७ ॥
उत्क्षिप्तवालः खचरः कठोरः सटा विधुन्वन् खररोमशत्वक् ।
खुराहताभ्रः सितदंष्ट्र ईक्षाज्योतिर्बभासे भगवान्महीध्रः ॥ २८ ॥
घ्राणेन पृथ्व्याः पदवीं विजिघ्रन् क्रोडापदेशः स्वयमध्वराङ्गः ।
करालदंष्ट्रोऽप्यकरालदृग्भ्यामुद्वीक्ष्य विप्रान् गृणतोऽविशत्कम् ॥ २९ ॥
स वज्रकूटाङ्गनिपातवेगविशीर्णकुक्षिः स्तनयन्नुदन्वान् ।
उत्सृष्टदीर्घोर्मिभुजैरिवार्तश्चुक्रोश यज्ञेश्वर पाहि मेति ॥ ३० ॥
खुरैः क्षुरप्रैर्दरयंस्तदाऽऽप उत्पारपारं त्रिपरू रसायाम् ।
ददर्श गां तत्र सुषुप्सुरग्रे यां जीवधानीं स्वयमभ्यधत्त ॥ ३१ ॥
स्वदंष्ट्रयोद्धृत्य महीं निमग्नां स उत्थितः संरुरुचे रसायाः ।
तत्रादिदैत्यं गदयाऽऽपतन्तं सुनाभसंदीपिततीव्रमन्युः ॥ ३२ ॥

॥ १९ । २० ॥ चित्रधा अनकधा ॥ २१ ॥ व्याजं व्याजमात्रं सत्त्वं जीवः प्राणिविशेषो वा । ॥ २२ ॥ गण्डशिला स्थूलपाषाणः । खेदयन् संशयैर्मनः क्षोभयन् वर्तते किम् ॥२३ । २४॥ दिशः प्रतिध्वनिपूर्णाः कुर्वता ॥ २५ ॥ ते पूर्वोक्ता ब्रह्मादयः ये भजनादिनिवासिनस्ते च अतो न पौनरुक्त्यम् । मायाऽत्र कृपा । मायाया अविद्याया आमयो रोगो यस्मात् इति वा । स्म साश्चर्यम् ॥ २६ ॥ वितन्यते स्तूयते मूर्तिर्यस्य । ब्रह्म स्तुतिलक्षणं वेदम् । अवधार्य श्रुत्वा ॥ २७ ॥ वालः पुच्छं येन । खराणि तीक्ष्णानि रोमाणि सन्ति यस्यां सा त्वक् यस्येति योजनीयं तदैव शप्रत्ययार्थो व्यज्येत । सटाः स्कन्धबालान् । ईक्षैव ज्योतिः प्रकाशकरी यस्य ॥ २८ ॥ गृणतः स्तुवतः । कं जलम् ॥ २९ ॥ वज्रमयपर्वतवत् अङ्गं यस्य तस्य । उदन्वान् समुद्रः ध्वनिं कुर्वन् मां पाहीत्येवं चुक्रोश । उत्सृष्टैः प्रसारितैः ॥ ३० ॥ अग्रे प्रलये तत्र अप्सु सुषुप्सुः सन् यां स्वयम् अभ्यधत्त जठरे धृतवान् तां गां रसातले ददर्श । किं कुर्वन् । क्षुरप्रैः अर्द्धचन्द्राकारवाणवत्तीक्ष्णैः खुरैरपो विदारयन् दुष्पाराणामपि अपां पारं यथा भवति तथा । त्रिपरूर्यज्ञमूर्तिः । जीवधानीमाधारभूताम् । त्रीणि परूंषि रेखाः ककुत्स्थले यस्येति वा ॥ ३१ ॥

जघान रुन्धानमसह्यविक्रमं स लीलयेभं मृगराडिवाम्भसि।
तद्रक्तपङ्काङ्कितगण्डतुण्डो यथा गजेन्द्रो जगतीं विभिन्दन् ॥ ३३ ॥
तमालनीलं सितदन्तकोट्या क्ष्मामुत्क्षिपन्तं गजलीलयाङ्ग।
प्रज्ञाय बद्धाञ्जलयोऽनुवाकैर्विरिञ्चिमुख्या उपतस्थुरीशम् ॥ ३४ ॥

ऋषय ऊचुः

जितं जितं तेऽजित यज्ञभावन त्रयीं तनुं स्वां परिधुन्वते नमः।
यद्रोमगर्तेषु निलिल्युरध्वरास्तस्मै नमः कारणसूकराय ते ॥ ३५ ॥
रूपं तवैतन्ननु दुष्कृतात्मनां दुर्दर्शनं देव यदध्वरात्मकम्।
छन्दांसि यस्य त्वचि बर्हिरोमस्वाज्यं दृशि त्वङ्घ्रिषु चातुर्होत्रम् ॥ ३६ ॥
स्रुक्तुण्ड आसीत्स्रुव ईश नासयोरिडोदरे चमसाः कर्णरन्ध्रे।
प्राशित्रमास्ये ग्रसने ग्रहास्तु ते यच्चर्वणं ते भगवन्नग्निहोत्रम् ॥ ३७ ॥
दीक्षानुजन्मोपसदः शिरोधरं त्वं प्रायणीयोदयनीयदंष्ट्रः।
जिह्वा प्रवर्ग्यस्तव शीर्षकं क्रतोः सभ्यावसथ्यं चितयोऽसवो हि ते ॥ ३८॥
सोमस्तु रेतः सवनान्यवस्थितिः संस्थाविभेदास्तव देव धातवः।
सत्राणि सर्वाणि शरीरसन्धिस्त्वं सर्वयज्ञक्रतुरिष्टिबन्धनः ॥ ३९ ॥
नमो नमस्तेऽखिलमन्त्रदेवताद्रव्याय सर्वक्रतवे क्रियात्मने।
वैराग्यभक्त्यात्मजयानुभावितज्ञानाय विद्यागुरवे नमो नमः ॥ ४० ॥
दंष्ट्राग्रकोट्या भगवंस्त्वया धृता विराजते भूधर भूः सभूधरा।
यथा वनान्निःसरतो दता धृता मतङ्गजेन्द्रस्य सपत्रपद्मिनी ॥ ४१ ॥
त्रयीमयं रूपमिदं च सौकरं भूमण्डलेनाथ दता धृतेन ते।
चकास्ति शृङ्गोढघनेन भूयसा कुलाचलेन्द्रस्य यथैव विभ्रमः ॥ ४२ ॥

स्वेत्यर्द्धम् ॥ ३२ ॥ तत्रेति सार्द्धम्। तत्राम्भस्यपि। सुनाभेन चक्रेण सन्दीपितः अतिज्वलितः मन्युः यस्य रुन्धानं रोद्धुं चतुर्दिक्षु भ्रमन्तम्। यथा गौरिकधातुना ॥ ३३ ॥ दन्तकोट्या दंष्ट्राग्रेण पृथ्वीमुद्धरन्तमीशं प्रज्ञाय अनुवाकैर्वैदिकसूक्तैः तुष्टुवुः ।३४। यज्ञैर्भाव्यते चिन्त्यते उपास्यते वा। त्रयीं वेदमयीम् ॥३५॥ यत् तदेतत्। बर्हिः कुशः। चतुर्होत्रादीनां कर्म। आज्यं घृतम् ।३६। स्रुक् जुहूः। स्रुव इतरदर्वी। इडा हविर्भक्षणपात्रम्। चमसाः ग्रहाश्च सोमपात्राणि प्राशित्रं ब्रह्मभागपात्रम्। ग्रसने मुखान्तर्वर्तिच्छिद्रे। चर्वणं भक्षणम् ॥३७॥ दीक्षणीयेष्टिस्तवजन्म। उपसदसंज्ञकाः त्रिस्र इष्टयः आरम्भेष्टिः अन्त्येष्टिस्ते दंष्ट्रे। प्रवर्ग्यो महावीरो यागः स च तप्तघृतपूर्णे क्षीरप्रक्षारणम्। सभ्यो होमरहितोऽग्निः। आवसथ्यः औपासनाग्निः। चितय इष्टकाचयनानि ॥ ३८ ॥ सोमोऽमृतवल्लीरसः। प्रातःसवनादीनि ते बाल्याद्यवस्था। सप्त संस्थाविभेदा ज्योतिष्टोमादिभेदाः। सत्राणि नानाकर्माणि। क्रतुः ससोमः। इष्टिर्यजनं त्वन्निमित्तं तदेव ॥ ३९ ॥ आत्मजयो मनोनैश्चल्यं च तैर्निष्पादितं ज्ञानं यस्य ।४०। वनात् जलात्। दता दन्तेन ।४१। धृतेन इदं रूपं

संस्थापयैनां जगतां सतस्थुषां लोकाय पत्नीमसि मातरं पिता ।
विधेम चास्यै नमसा सह त्वया यस्यां स्वतेजोऽग्निमिवारणावधाः ॥४३॥
कः श्रद्दधीतान्यतमस्तव प्रभो रसां गताया भुव उद्विबर्हणम् ।
न विस्मयोऽसौ त्वयि विश्वविस्मये यो माययेदं ससृजेऽतिविस्मयम् ॥४४॥
विधुन्वता वेदमयं निजं वपुर्जनस्तपःसत्यनिवासिनो वयम् ।
सटाशिखोद्धूतशिवाम्बुबिन्दुभिर्विमृज्यमाना भृशमीश पाविताः ॥ ४५ ॥
स वै बत भ्रष्टमतिस्तवैष ते यः कर्मणां पारमपारकर्मणः ।
यद्योगमायागुणयोगमोहितं विश्वं समस्तं भगवन् विधेहि शम् ॥ ४६ ॥

मैत्रेय उवाच

इत्युपस्थीयमानस्तैर्मुनिभिर्ब्रह्मवादिभिः । सलिले स्वखुराक्रान्त उपाधत्तावितावनिम् ॥४७॥
स इत्थं भगवानुर्वीं विष्वक्सेनः प्रजापतिः । रसाया लीलयोन्नीतामप्सु न्यस्य ययौ हरिः ॥४८॥
य एवमेतां हरिमेधसो हरेः कथां सुभद्रां कथनीयमायिनः ।
शृण्वीत भक्त्या श्रवयेत वोशतीं जनार्दनोऽस्याशु हृदि प्रसीदति ॥ ४९ ॥
तस्मिन् प्रसन्ने सकलाशिषां प्रभो किं दुर्लभं ताभिरलं लवात्मभिः ।
अनन्यदृष्ट्या भजतां गुहाशयः स्वयं विधत्ते स्वगतिं परः पराम् ॥ ५० ॥
को नाम लोके पुरुषार्थसारवित्पुराकथानां भगवत्कथासुधाम् ।
आपीय कर्णाञ्जलिभिर्भवापहामहो विरज्येत विना नरेतरम् ॥ ५१ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां तृतीयस्कन्धे वराहप्रादुर्भावानुवर्णने त्रयोदशोऽध्यायः ।१३।

चकास्ति । यथा भूयसा महता शिखरैः धृतेन धनेन अचलस्य विभ्रमः शोभा भवति तद्वत् ॥ ४२ ॥ त्वं पितासि अत एव यस्यां स्वतेजो धारणशक्तिमधा निहितवानसि तामेनां संस्थापय त्वया सह अस्यै नमस्कारेण परिचरेमेत्यन्वयः । अरणौ मन्थनकाष्ठे ॥ ४३ ॥ तव त्वया कृतमुद्धरणं त्वत्तोऽन्यतमः कः कर्तुं स्पृहयेत् । विश्वे सर्वे ॥ ४४ ॥ शिखाभिरग्रभागैः । प्रोक्षमाणाः ॥ ४५ ॥ बत अहो यः पारम् एषते ज्ञातुमिच्छति स वै निश्चितम् । एषृ गतौ । यत् यतः समस्तं मोहितमतोऽस्य शम् ॥ ४६ ॥ उपस्थीयमानः स्तूयमानः ॥ ४७ । ४८ ॥ हरति क्लेशमिति हरिः मेधति हिनस्ति दुष्टानिति मेधाः स चासौ स च तस्य । "मेधृ सङ्गमहिंसयोः" इत्यसुन्प्रत्ययः । न ह्रियते प्राप्यते भक्तिं विनेत्यहरिस्तस्य भक्तिगम्यस्येत्यर्थः । मायीनि प्रभाववन्ति चरितानि । श्रावयेत । उशतीं कमनीयाम् ॥ ४९ ॥ आशिषां सम्पदां प्रभौ दातरि । लवात्मभिस्तुच्छाभिः स्वर्गाद्याशीर्भिः ॥ ५० ॥ पुराकथानां पुराणकथानां मध्ये सारभूताम् । नरेतरं पशुं विना कः न कोऽपि यो विरज्येत स पशुरेवेति ध्वनिः ॥ ५१ ॥

इति श्रीमद्भागवते महापुराणे तृतीयस्कन्धे गूढार्थदीपिन्यां त्रयोदशोऽध्यायः ।

अथ चतुर्दशोऽध्यायः

श्रीशुक उवाच

निशम्य कौषारविणोपवर्णितां हरेः कथां कारणसूकरात्मनः।
पुनः स पप्रच्छ तमुद्यताञ्जलिर्न चातितृप्तो विदुरो धृतव्रतः ॥ १ ॥

विदुर उवाच

तेनैव तु मुनिश्रेष्ठ हरिणा यज्ञमूर्तिना। आदिदैत्यो हिरण्याक्षो हत इत्यनुशुश्रुम ॥ २ ॥
तस्य चोद्धरतः क्षोणीं स्वदंष्ट्राग्रेण लीलया। दैत्यराजस्य च ब्रह्मन् कस्माद्धेतोरभून्मृधः ॥३॥

मैत्रेय उवाच

साधु वीर त्वया पृष्टमवतारकथां हरेः। यत्त्वं पृच्छसि मर्त्यानां मृत्युपाशविशातनीम् ॥ ४ ॥
ययोत्तानपदः पुत्रो मुनिना गीतयार्भकः। मृत्योः कृत्वैव मूर्ध्न्यङ्घ्रिमारुरोह हरेः पदम् ॥ ५ ॥
अथात्रापीतिहासोऽयं श्रुतो मे वर्णितः पुरा। ब्रह्मणा देवदेवेन देवानामनुपृच्छताम् ॥ ६ ॥
दितिर्दाक्षायणी क्षत्तर्मारीचं कश्यपं पतिम्। अपत्यकामा चकमे सन्ध्यायां हृच्छयार्दिता ॥ ७ ॥
इष्ट्वाग्निजिह्वं पयसा पुरुषं यजुषां पतिम्। निम्लोचत्यर्क आसीनमग्न्यगारे समाहितम् ॥ ८ ॥

दितिरुवाच

एष मां त्वत्कृते विद्वन् काम आत्तशरासनः। दुनोति दीनां विक्रम्य रम्भामिव मतङ्गजः॥९ ॥
तद्भवान्दह्यमानायां सपत्नीनां समृद्धिभिः। प्रजावतीनां भद्रं ते मय्यायुङ्क्तामनुग्रहम् ॥१०॥
भर्तर्याप्तोरुमानानां लोकानाविशते यशः। पतिर्भवद्विधो यासां प्रजया ननु जायते ॥११॥
पुरा पिता नो भगवान्दक्षो दुहितृवत्सलः। कं वृणीत वरं वत्सा इत्यपृच्छत नः पृथक् ॥१२॥
स विदित्वाऽऽत्मजानां नो भावं सन्तानभावनः। त्रयोदशाददात्तासां यास्ते शीलमनुव्रताः॥१३॥

चतुर्दशे हिरण्याक्षदौर्जन्ये कारणं वदन्।
प्राह दित्या हाठात्सापं कश्यपादगर्भसंस्थितिम् ॥ १ ॥

न च नैव ॥ १ ॥ येन भूमिरुद्धृता तेन ॥ २ ॥ मृधो युद्धम् ॥ ३ ॥ यत्कथां पृच्छसि तत्साधु ॥ ४ ॥ यया कथया ॥ ५ ॥ अथ मङ्गले उत्तरारम्भे वा। अत्रापि दैत्ययुद्धेऽपि। मे मया ॥६॥ हृच्छयः कामः। दितिरिति युग्मकम्। पयसा। पयोविकारेण घृतेन। यजुषां यज्ञानां पतिफलदातारम्। निम्लोचति अस्तं गच्छति सति ॥७।८॥ दुनोति पीडयति ॥९॥ आयुङ्क्तां सम्यक्करोति[1] ॥१०॥ भर्तरि भर्तुः विषये सकाशात्। प्रजया पुत्ररूपेण ॥११।१२॥ भावयति वर्द्धयतीति। यास्ते शीलं ता अस्मात् त्रयोदश

१-सम्यक्त्व पुत्रोत्पादकतया।

अथ मे कुरु कल्याण कामं कञ्जविलोचन। आर्तोपसर्पणं भूमन्नमोघं हि महीयसि ॥१४॥
इति तां वीर मारीचः कृपणां बहुभाषिणीम्। प्रत्याहानुनयन् वाचा प्रवृद्धानङ्गकश्मलाम् ॥१५॥
एष तेऽहं विधास्यामि प्रियं भीरु यदिच्छसि। तस्याः कामं न कः कुर्यात् सिद्धिस्त्रैवर्गिकी यतः॥१६॥
सर्वाश्रमानुपादाय स्वाश्रमेण कलत्रवान्। व्यसनार्णवमत्येति जलयानैर्यथार्णवम् ॥१७॥
यामाहुरात्मनो ह्यर्धं श्रेयस्कामस्य मानिनि। यस्यां स्वधुरमध्यस्य पुमांश्चरति विज्वरः ॥१८॥
यामाश्रित्येन्द्रियारातीन्दुर्जयानितराश्रमैः । वयं जयेम हेलाभिर्दस्यून्दुर्गपतिर्यथा ॥१९॥
न वयं प्रभवस्तां त्वामनुकर्तुं गृहेश्वरि। अप्यायुषा वा कार्त्स्न्येन ये चान्ये गुणगृध्नवः ॥२०॥
अथापि काममेतं ते प्रजात्यै करवाण्यलम्। यथा मां नातिवोचन्ति मुहूर्तं प्रतिपालय ॥२१॥
एषा घोरतमा वेला घोराणां घोरदर्शना। चरन्ति यस्यां भूतानि भूतेशानुचराणि ह ॥२२॥
एतस्यां साध्वि सन्ध्यायां भगवान् भूतभावनः। परीतो भूतपर्षद्भिर्वृषेणाटति भूतराट् ॥२३॥

श्मशानचक्रानिलधूलिधूम्रविकीर्णविद्योतजटाकलापः ।
भस्मावगुण्ठामलरुक्मदेहो देवस्त्रिभिः पश्यति देवरस्ते ॥ २४ ॥
न यस्य लोके स्वजनः परो वा नात्यादृतो नोत कश्चिद्विगर्ह्यः।
वयं व्रतैर्यच्चरणापविद्धामाशास्महेऽजां बत भुक्तभोगाम् ॥ २५ ॥
यस्यानवद्याचरितं मनीषिणो गृणन्त्यविद्यापटलं बिभित्सवः।
निरस्तसाम्यातिशयोऽपि यत्स्वयं पिशाचचर्यामचरद्गतिः सताम् ॥२६ ॥
हसन्ति यस्याचरितं हि दुर्भगाः स्वात्मन् रतस्याविदुषः समीहितम् ।
यैर्वस्त्रमाल्याभरणानुलेपनैः श्वभोजनं स्वात्मतयोपलालितम् ॥ २७ ॥
ब्रह्मादयो यत्कृतसेतुपाला यत्कारणं विश्वमिदं च माया।
आज्ञाकारी तस्य पिशाचचर्या अहो विभूम्नश्चरितं विडम्बनम् ॥ २८ ॥

तुभ्यम् ॥ १३ ॥ अथ अतः। अमोघं व्यर्थं न ॥ १४ ॥ हे वीर विदुर ! अनुनयन् सान्त्वयन्। कश्मलं मूर्च्छा ॥ १५ । १६ ॥ उपादाय अन्नादिदानेनोपकृत्य ॥ १७ ॥ यां तां त्वामित्युत्तरेणान्वयः। आत्मनो देहस्य। स्वधुरं गृहस्थभारम् ॥ १८ ॥ हेलाभिः लीलाभिः ॥ १९ ॥ अनुकर्तुं प्रत्युपकर्तुं न समर्थाः। ये गुणग्राहकास्तेऽपि न ॥ २० ॥ नातिवोचन्ति न निन्दन्ति। 'वुच वोच हिंसानादरयोः। इति दीपिन्नी। प्रतिपालय प्रतीक्षस्व ॥ २१ ॥ घोराणां भूतप्रेतादीनाम्। ह हर्षेण ॥ २२ ॥ पर्षद्भिर्गणैः ॥ २३ ॥ विकीर्णो विक्षिप्तः द्युतिमांश्च। अवगुण्ठ आच्छन्नः रुक्मवत् स्वर्णवत्सत्या दक्षकन्यात्वेन दितिभगिनीत्वात् एकस्य जामातरः परस्परं भ्रातर इति व्यवहारस्तेन देवरः त्रिभिः सोमसूर्याग्निनेत्रैः ॥ २४ ॥ उत अपि। अपविद्धां त्यक्ताम् अजां मायामयीं सम्पदम् ॥ २५ ॥ पटलमावरणम् ॥ २६ ॥ स्वात्मनि। समीहितमभिप्रायमविद्वांसः। न विद्वानन्यो यस्मात् सर्वज्ञस्येति वा। श्वभोजनं शरीरम्। त्रिपु यच्छब्दानां स पश्यतीति पूर्वेणान्वयः ॥ २७ ॥ सेतवो मर्यादा। य एव कारणं यस्य। विभूम्नः परमेश्वरस्य। विडम्बनं मतर्क्यम्। मानिदशानुकरणेन

मैत्रेय उवाच

सैवं संविदिते भर्त्रा मन्मथोन्मथितेन्द्रिया। जग्राह वासो ब्रह्मर्षेर्वृषलीव गतत्रपा ॥२९॥

स विदित्वाथ भार्यायास्तं निर्बन्धं विकर्मणि। नत्वा दिष्टाय रहसि तयाथोपविवेश ह ॥३०॥

अथोपस्पृश्य सलिलं प्राणानायम्य वाग्यतः। ध्यायञ्जजाप विरजं ब्रह्म ज्योतिः सनातनम्॥३१॥

दितिस्तु व्रीडिता तेन कर्मावद्येन भारत। उपसंगम्य विप्रर्षिमधोमुख्यभ्यभाषत ॥३२॥

दितिरुवाच

मा मे गर्भमिमं ब्रह्मन् भूतानामृषभो वधीत्। रुद्रः पतिर्हि भूतानां यस्याकरवमंहसम् ॥३३॥

नमो रुद्राय महते देवायोग्राय मीढुषे। शिवाय न्यस्तदण्डाय धृतदण्डाय मन्यवे ॥३४॥

स नः प्रसीदतां भामो भगवानुर्वनुग्रहः। व्याधस्याप्यनुकम्प्यानां स्त्रीणां देवः सतीपतिः॥३५॥

मैत्रेय उवाच

स्वसर्गस्याशिषं लोक्यामाशासानां प्रवेपतीम्। निवृत्तसन्ध्यानियमो भार्यामाह प्रजापतिः ॥३६॥

कश्यप उवाच

अप्रायत्यादात्मनस्ते दोषान्मौहूर्तिकादुत। मन्निदेशातिचारेण देवानां चातिहेलनात् ॥३७॥

भविष्यतस्तवाभद्रावभद्रे जाठराधमौ। लोकान् सपालांस्त्रींश्चण्डि मुहुराक्रन्दयिष्यतः ॥३८॥

प्राणिनां हन्यमानानां दीनानामकृतागसाम्। स्त्रीणां निगृह्यमाणानां कोपितेषु महात्मसु ॥३९॥

तदा विश्वेश्वरः क्रुद्धो भगवाँल्लोकभावनः। हनिष्यत्यवतीर्यासौ यथाद्रीन् शतपर्वधृक् ॥४०॥

दितिरुवाच

वधं भगवता साक्षात्सुनाभोदारबाहुना। आशासे पुत्रयोर्मह्यं मा क्रुद्धाद्ब्राह्मणाद्विभो ॥४१॥

न ब्रह्मदण्डदग्धस्य न भूतभयदस्य च। नारकाश्चानुगृह्णन्ति यां यां योनिमसौ गतः ॥४२॥

कश्यप उवाच

कृतशोकानुतापेन सद्यः प्रत्यवमर्शनात्। भगवत्युरुमानाच्च भवे मय्यपि चादरात् ॥४३॥

वैराग्यबोधकमित्यर्थः ॥ २८ ॥ वृषली वेश्या ॥ २९ ॥ निर्बन्धं हठम्। उपविवेश मैथुनं चकार ॥ ३ ॥ उपस्पृश्य स्नात्वा आचम्य च ब्रह्म गायत्रीम् ॥ ३१ ॥ कर्मावद्येन कर्मदोषेण ॥ ३२ ॥ मा वधीत न हन्तु। असहम् अपराधम् ॥ ३३ ॥ मीढुषे फलसेचनाकर्त्रे ॥ ३४ ॥ भामो भगिनीभर्ता। व्याधस्य अतिक्रूरस्यापि अनुकम्पितुं योग्यानाम् ॥ ३५ ॥ आशिषं सन्ततेः मङ्गलमिच्छन्तीम् लोक्यां लोकद्वयार्हाम् ॥ ३६ ॥ अप्रेति युग्मकम्। ते आत्मनो देहस्य अशुचित्वात् रजस्वलात्वादित्यर्थं इति श्रीवल्लभाचार्याः। उत अपि। अतिचारेण उल्लङ्घनेन। जाठरौ पुत्रौ। आक्रन्दयिष्यतः रोदयिष्यतः ॥ ३७।३८ ॥ प्राणीति युग्मकम्। यदा प्राणिषु हन्यमानेषु स्त्रीणाम् आचारभङ्गेन कोपितेषु तदेत्यन्वयः। धृक्। धृजे क्विप्। वज्रधर इन्द्रः ॥३९।४०॥ सुनाभेन चक्रेण युक्त उदारो महान् अतीव सुन्दरो बाहुर्यस्य। मह्यं मम। आशासे वधम् इच्छामि ॥ ४१ ॥ दण्डः शापः। तं च नानुगृह्णन्ति निकटे गमनादिकमपि नानुमन्यन्ते ॥ ४२ ॥ कृतेति युग्मकम्। कृतमनुचितं कर्म तेन। पुत्रस्य हिरण्यकशिपोः।

पुत्रस्यैव तु पुत्राणां भवितैकः सतां मतः । गास्यन्ति यद्यशः शुद्धं भगवद्यशसा समम् ॥४४॥
योगैर्हेमेव दुर्वर्णं भावयिष्यन्ति साधवः । निर्वैरादिभिरात्मानं यच्छीलमनुवर्तितुम् ॥४५॥
यत्प्रसादादिदं विश्वं प्रसीदति यदात्मकम् । स स्वदृग्भगवान् यस्य तोष्यतेऽनन्यया दृशा ॥४६॥

स वै महाभागवतो महात्मा महानुभावो महतां महिष्ठः ।
प्रवृद्धभक्त्या ह्यनुभाविताशये निवेश्य वैकुण्ठमिमं विहास्यति ॥४७॥
अलम्पटः शीलधरो गुणाकरो हृष्टः परर्द्धर्या व्यथितो दुःखितेषु ।
अभूतशत्रुर्जगतः शोकहर्ता नैदाधिकं तापमिवोडुराजः ॥४८॥
अन्तर्बहिश्चामलमब्जनेत्रं स्वपूरुषेच्छानुगृहीतरूपम् ।
पौत्रस्तव श्रीललनाललामं द्रष्टा स्फुरत्कुण्डलमण्डिताननम् ॥४९॥

मैत्रेय उवाच

श्रुत्वा भागवतं पौत्रममोदत दितिर्भृशम् । पुत्रयोश्च वधं कृष्णाद्विदित्वाऽऽसीन्महामनाः ।५०।

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां तृतीयस्कन्धे दितिकश्यपसंवादे चतुर्दशोऽध्यायः ॥१४॥

अथ पञ्चदशोऽध्यायः

मैत्रेय उवाच

प्राजापत्यं तु तत्तेजः परतेजोहनं दितिः । दधार वर्षाणि शतं शङ्कमाना सुरार्दनात् ॥ १ ॥
लोके तेन हतालोके लोकपाला हतौजसः । न्यवेदयन् विश्वसृजे ध्वान्तव्यतिकरं दिशाम् ॥ २ ॥

देवा ऊचुः

तम एतद्विभो वेत्थ संविग्ना यद्वयं भृशम् । न ह्यव्यक्तं भगवतः कालेनास्पृष्टवर्त्मनः ॥ ३ ॥
देवदेव जगद्धातर्लोकनाथशिखामणे । परेषामपरेषां त्वं भूतानामसि भाववित् ॥ ४ ॥

समं सह तुल्यं वा ॥ ४३।४४ ॥ योगैर्दाहादिभिरुपायैर्यथा भाव्यते शोध्यते तथा अनुवर्तितुं प्राप्तुं शोधयिष्यन्ति ॥ ४५ ॥ यदात्मकं यदधीनम् ॥ ४६ ॥ अनुभाविते शोधिते चित्ते । इमं देहाद्यभिमानम् ॥ ४७ ॥ अलम्पटो विरक्तः । नैदाधिकं ग्रीष्मकालभवम् ॥ ४८ ॥ तव पौत्रः प्रह्लादः अन्तर्ध्यानेन बहिः साक्षात् भगवन्तं द्रष्टा द्रक्ष्यति । ललामं भूषणभूतम् । स्वपूरुषाः स्वभक्ताः ॥ ४९ ॥ महामनाः प्रसन्नचित्ता ॥ ५० ॥

इति श्रीमद्भागवते महापुराणे तृतीयस्कन्धे गूढार्थदीपिन्यां चतुर्दशोऽध्यायः ।

●

वैकुण्ठवर्णनं तत्र सनकादेर्निरोधतः ।
शापो द्वारस्थयोश्चैतद्विधिः पञ्चदशेऽदिशत् ॥ १ ॥

अर्दनं पीडनं तस्मात् असुरार्दनात् । विष्णोर्वा ॥ १ ॥ तेन गर्भतेजसा । व्यतिकरं व्याप्तिम् ॥ २ ॥ यत् यतः । अव्यक्तमज्ञातम् । अस्पृष्टवर्त्मनोऽलुप्तज्ञानस्य ॥ ३ ॥ परेषामतीतानाम् । अपरेषामनागतानां

नमो विज्ञानवीर्याय माययेदमुपेयुषे । गृहीतगुणभेदाय नमस्तेऽव्यक्तयोनये ॥ ५ ॥
ये त्वानन्येन भावेन भावयन्त्यात्मभावनम् । आत्मनि प्रोतभुवनं परं सदसदात्मकम् ॥ ६ ॥
तेषां सुपक्वयोगानां जितश्वासेन्द्रियात्मनाम् । लब्धयुष्मत्प्रसादानां न कुतश्चित्पराभवः॥ ७ ॥
यस्य वाचा प्रजाः सर्वा गावस्तन्त्येव यन्त्रिताः । हरन्ति बलिमायत्तास्तस्मै मुख्याय ते नमः।८
स त्वं विधत्स्व शं भूमंस्तमसा लुप्तकर्मणाम् । अदभ्रदयया दृष्ट्या आपन्नानर्हसीक्षितुम्॥१०॥

मैत्रेय उवाच

स प्रहस्य महाबाहो भगवान् शब्दगोचरः । प्रत्याचष्टात्मभूर्देवान् प्रीणन् रुचिरया गिरा॥११।

ब्रह्मोवाच

मानसा मे सुता युष्मत्पूर्वजाः सनकादयः । चेरुर्विहायसा लोकाँल्लोकेषु विगतस्पृहाः ॥१२॥
त एकदा भगवतो वैकुण्ठस्यामलात्मनः । ययुर्वैकुण्ठनिलयं सर्वलोकनमस्कृतम् ॥१३॥
वसन्ति यत्र पुरुषाः सर्वे वैकुण्ठमूर्तयः । येऽनिमित्तनिमित्तेन धर्मेणाराधयन् हरिम् ॥१४॥
यत्र चाद्यः पुमानास्ते भगवान् शब्दगोचरः । सत्त्वं विष्टभ्य विरजं स्वानां नो मृडयन् वृषः१५
यत्र नैःश्रेयसं नाम वनं कामदुघैर्द्रुमैः । सर्वर्तुश्रीभिर्विभ्राजत्कैवल्यमिव मूर्तिमत् ॥१६॥

वैमानिकाः सललनाश्चरितानि यत्र गायन्ति लोकशमलक्षपणानि भर्तुः ।
अन्तर्जलेऽनुविकसन्मधुमाधवीनां गन्धेन खण्डितधियोऽप्यनिलं क्षिपन्तः ॥१७॥

पारावतान्यभृतसारसचक्रवाकदात्यूहहंसशुकतित्तिरिबर्हिणां यः ।
कोलाहलो विरमतेऽचिरमात्रमुच्चैर्भृङ्गाधिपे हरिकथामिव गायमाने ॥१८॥

मन्दारकुन्दकुरबोत्पलचम्पकार्णपुन्नागनागबकुलाम्बुजपारिजाताः ।
गन्धेऽर्चिते तुलसिकाभरणेन तस्या यस्मिंस्तपः सुमनसो बहु मानयन्ति ॥१९॥

यत्संकुलं हरिपदानतिमात्रदृष्टैर्वैदूर्यमारकतहेममयैर्विमानैः ।
येषां बृहत्कटितटाः स्मितशोभिमुख्यः कृष्णात्मनां न रज आदधुरुत्स्मयाद्यैः ॥२०॥

च ॥ ४ ॥ मायया कृपया । इदं ब्रह्मशरीरम् । गुणभेदो रजोगुणः । अव्यक्तो नारायणः ॥ ५ ॥ य इति युग्मकम् । आत्मभावनं स्वकारणं त्वां ध्यायन्ति ॥६।७॥ वाचा वेदलक्षणया । तन्त्या दीर्घरज्वा । बलिं हरन्ति पूजां कुर्वन्ति । मुख्याय नियन्त्रे ॥८।९॥ अर्पितं स्थापितम् ओजो वीर्यमेव गर्भः ॥ १० ॥ शब्दा विज्ञप्तिवाक्यानि तेषां विषयः । प्रत्यभाषत ॥ ११।१२।१३ ॥ अनिमित्तोऽनाश्रयो भगवानेव निमित्तं यस्मिन् तेन ॥ १४ ॥ विरजं सत्त्वं शुद्धसत्त्वरूपं शरीरं धृत्वा । स्वान् सुखयन् मनोरथान् वर्षतीति वृषः ॥ १५ ॥ श्रीःपुष्पादिसंतत् येषाम् ॥ १६ ॥ विमानेन चरन्तो भक्ताः । शमलं दुःखम् । अन्तः शब्दोऽत्र समीपवाची जल समीपे तटे । मधु मकरन्दस्तद्युक्ताः माधव्यो वासन्तीलताः मधौ वसन्ते वा । क्षिपन्तस्तिरस्कुर्वन्तः ॥ १७ ॥ अन्यभृतां कोकिलां । दात्यूहश्चातकः । अचिरमात्रं क्षणमात्रम् ॥ १८ ॥ कुरवस्तिलकवृक्षः । अर्णं करवीरम् । नागकेसरः आभरणन श्रीविष्णुना । एवंभूतं वनं यत्र तद्वैकुण्ठमिति योजना ॥ १९ ॥ यत् वैकुण्ठम् । आनतिमात्रेण भक्तिमात्रेण न तु ज्ञानादिना ।

श्री रूपिणी क्वणयती चरणारविन्दं लीलाम्बुजेन हरिसद्मनि मुक्तदोषा ।
संलक्ष्यते स्फटिककुड्य उपेतहेम्नि सम्मार्जतीव यदनुग्रहणेऽन्ययत्नः ॥२१॥

वापीषु विद्रुमतटास्वमलामृताप्सु प्रेष्यान्विता निजवने तुलसीभिरीशम् ।
अभ्यर्चती स्वलकमुन्नसमीक्ष्य वक्त्रमुच्छेषितं भगवतेत्यमताङ्ग यच्छ्रीः ॥२२॥

यन्न व्रजन्त्यघभिदो रचनानुवादाच्छृण्वन्ति येऽन्यविषयाः कुकथा मतिघ्नीः ।
यास्तु श्रुता हतभगैर्नृभिरात्तसारास्तांस्तान् क्षिपन्त्यशरणेषु तमःसु हन्त ॥२३॥

येऽभ्यर्थितामपि च नो नृगतिं प्रपन्ना ज्ञानं च तत्त्वविषयं सहधर्म यत्र ।
नाराधनं भगवतो वितरन्त्यमुष्य सम्मोहिता विततया बत मायया ते ॥२४॥

यच्च व्रजन्त्यनिमिषामृषभानुवृत्त्या दूरेयमा ह्युपरि नः स्पृहणीयशीलाः ।
भर्तुर्मिथः सुयशसः कथनानुरागवैक्लव्यबाष्पकलया पुलकीकृताङ्गाः ॥२५॥

तद्विश्वगुर्वधिकृतं भुवनैकवन्द्यं दिव्यं विचित्रविबुधाग्र्यविमानशोचिः ।
आपुः परां मुदमपूर्वमुपेत्य योगमायाबलेन मुनयस्तदथो विकुण्ठम् ॥२६॥

तस्मिन्नतीत्य मुनयः षडसज्जमानाः कक्षाः समानवयसावथ सप्तमायाम् ।
देवावचक्षत गृहीतगदौ परार्ध्यकेयूरकुण्डलकिरीटविटङ्कवेषौ ॥२७॥

मत्तद्विरेफवनमालिकया निवीतौ विन्यस्तयासितचतुष्टयबाहुमध्ये ।
वक्त्रं भ्रुवा कुटिलया स्फुटनिर्गमाभ्यां रक्तेक्षणेन च मनाग्रभसं दधानौ ॥२८॥

उत्स्मयाद्यैर्येषां रजः कामं न जनयामासुस्तेषां विमानैर्यं द्वयात्तमित्यन्वयः ॥ २० ॥ रूपिणी मूर्तिमती । दोषश्चाञ्चल्यम् । यद्वा । मुक्तदोषा प्रसारितहस्तेन भ्रमयता लीलाम्वुजेन सम्मार्जतीवेत्युत्प्रेक्षा । यत् यस्याः अन्येषा ब्रह्मादीनां यत्नः सा ॥ २१ ॥ यत् यस्मिन् वैकुण्ठे । अङ्ग हे देवाः ! अमलामृताप्सु प्रतिविम्बितं स्वमुखं तत्रैव प्रतिविम्बितेन नीलोत्पलेन मिलितं वीक्ष्य रतिभावोदयेन भगवतैव चुम्बितमित्यमन्यत । प्रेष्या दसी ।२२। ते यद्वैकुण्ठ नं वजन्ति येऽघमिदः कृष्णस्य रचनानुवादात् लीलानुकीर्तनाव अन्यविषया न्यायादिविषयाः । सारः पुण्यम् । तान् श्रोतृन् । तमःसु नरकेषु ॥ २३ ॥ नोऽस्माभिः । नृगतिं मनुष्ययोनिम् । सहधर्म भक्तिसहितं भगवद्विषयकम् । येन वितरन्ति न कुर्वन्ति ते । वत खेदे ॥ २४ ॥ नोऽस्माकमुपरि स्थितं यद्वैकुण्ठं ते व्रजन्ति । के । अनिमिषां देवानाम् ऋषभः श्रेष्ठो हरिस्तस्य सेवया दूरेयमाः । अनिमिषेति क्विबन्तः ॥ २५ ॥ तत् तदा तदपूर्वं विकुण्ठमथो अनन्तर मुपेत्य परां मुदमापुः विश्वगुरुणा हरिणा । अग्र्यं श्रेष्ठम् । शोचिः दीप्तिः ॥ २६ ॥ तस्मिन् वैकुण्ठेऽपि असजमाना आसक्तिमकुर्वाणाः कक्षाः (डयोढ़ी) इति । पराद्ध्यैंः श्रेष्ठैः विटङ्कः सुन्दरः ॥ २७ ॥ विवीतौ वेष्टितौ । मध्ये वक्षसि । किञ्च तया ताभ्यां तेन च मनाग्रभसम् ईषदुग्रं वक्त्रं च दधानौ तौ अचक्षतेति योज्यम् । स्फुटः सवेगः श्वासनिर्गमो याभ्यां ताभ्यां नासा पुटाभ्यांमिति विशेष्यपदमध्या-

द्वार्येतयोर्निविविशुर्मिषतोरपृष्ट्वा पूर्वा यथा पुरटवज्रकपाटिका याः ।
सर्वत्र तेऽविषमया मुनयः स्वदृष्ट्या ये सञ्चरन्त्यविहता विगताभिशङ्काः ॥२९॥
तान् वीक्ष्य वातरशनांश्चतुरः कुमारान् वृद्धान्दशार्धवयसो विदितात्मतत्त्वान् ।
वेत्रेण चास्खलयतामतदर्हणांस्तौ तेजो विहस्य भगवत्प्रतिकूलशीलौ ॥३०॥
ताभ्यां मिषत्स्वनिमिषेषु निषिध्यमानाः स्वर्हत्तमा ह्यपि हरेः प्रतिहारपाभ्याम् ।
ऊचुः सुहृत्तमदिदृक्षितभङ्ग ईषत्कामानुजेन सहसा त उपप्लुताक्षाः ॥३१॥

मुनय ऊचुः

को वामिहैत्य भगवत्परिचर्ययोच्चैस्तद्धर्मिणां निवसतां विषमः स्वभावः ।
तस्मिन् प्रशान्तपुरुषे गतविग्रहे वां को वाऽऽत्मवत्कुहकयोः परिशङ्कनीयः ॥३२॥
न ह्यन्तरं भगवतीह समस्तकुक्षावात्मानमात्मनि नभो नभसीव धीराः ।
पश्यन्ति यत्र युवयोः सुरलिङ्गिनोः किं व्युत्पादितं ह्युदरभेदि भयं यतोऽस्य ॥३३॥
तद्वाममुष्य परमस्य विकुण्ठभर्तुः कर्तुं प्रकृष्टमिह धीमहि मन्दधीभ्याम् ।
लोकानितो व्रजतमन्तरभावदृष्ट्या पापीयसस्त्रय इमे रिपवोऽस्य यत्र ॥३४॥
तेषामितीरितमुभाववधार्य घोरं तं ब्रह्मदण्डमनिवारणमस्त्रपूगैः ।
सद्यो हरेरनुचरावुरु बिभ्यतस्तत्पादग्रहावपततामतिकातरेण ॥३५॥
भूयादघोनि भगवद्भिरकारि दण्डो यो नौ हरेत सुरहेलनमप्यशेषम् ।
मा वोऽनुतापकलया भगवत्स्मृतिघ्नो मोहो भवेदिह तु नौ व्रजतोरधोऽधः ॥३६॥

हार्यम् ॥ २८ ॥ पूर्वा यां षट् द्वारस्ता यथा विविशुस्तथा सप्तम्यामपि द्वारि ते निविविशुः । एतौ अनादृत्य अपृष्ट्वैव । कथं भूताः । सुवर्णालङ्कृतहीरककीलवत्यः कपाटिका यासु ताः । अविहता अनिवारितः ॥ २९ ॥ वातारशनान् नग्नान् दशार्द्धं पञ्च । अस्खलयतां निवारितवन्तौ । न तन्निवारणमर्हन्तीति तान् ॥ ३० ॥ अनिमेषु देवेषु पश्यत्सु स्वर्हत्तमा सुष्ठु पूजनीया अपि ताभ्यां निषिध्यमान्त भगवद्दर्शनेच्छा प्रतिघाते सति किञ्चित्क्रोधेनारूण नेत्राः सन्त ऊचुरित्यन्वयः ॥ ३१ ॥ उच्चैर्महत्या परिचर्य्ययां एत्य प्राप्य इह वैकुण्ठे निवसतां समदर्शिनां मध्ये वां युवयोरेव कोऽयं विषमः स्वभावः प्रशान्ताः पुरुषा यस्मिन् तस्मिन् वैकुण्ठे कुहकाभ्यां कपटमूर्तिभ्यां वां युवाभ्यां कः । कर्तरि षष्ठी । आत्मवन्मन्यते जग दिति न्यायात् ॥ ३२ ॥ इह वैकुण्ठे यत्र भगवति आत्मनि विष्णौ आत्मानं सर्वं जीवात्मानं ज्ञानिनोऽन्तरं भिन्नं न पश्यन्ति तस्यास्य भयं युवाभ्यां यतो विशेषेण उत्पादितं तत्किं नाम तावत्प्रथमं ब्रूत । कीदृक् । उदरो पलक्षितदेह भेद प्रयुक्तम् ॥ ३३ ॥ तत् तस्मात् अमुष्य भृत्याभ्यां वां युवाभ्यां प्रकृष्टं भद्रमेव कर्तुमिह अपराधे यदुचितं तत् धीमहि चिन्तयेम अन्तरभावो भेदभावोः । अस्य भेदद्रष्टुः : रिपवः कामादयः ॥ ३४ ॥ दण्डं शापरूपं घोरमीरितं भाषणं श्रुत्वा पादग्रहणं कुर्वन्तौ सन्तौ भगवतो विभ्यतः सनकादीन्प्रति दण्डवत् । ब्राह्मणेभ्यो बिभ्यतो हरे र्वा । उरू बहु ॥ ३५ ॥ अघोनि अपराधवति य उचितो दण्डः स एवाऽकारि अतोऽसो नौ भूयात् यो । हेलनं भवत्तिरस्काररूपं

एवं तदैव भगवानरविन्दनाभः स्वानां विबुध्य सदतिक्रममार्यहृद्यः ।
तस्मिन् ययौ परमहंसमहामुनीनामन्वेषणीयचरणौ चलयन् सहश्रीः ॥३७॥
तं त्वागतं प्रतिहृतौपयिकं स्वपुम्भिस्तेऽचक्षताक्षविषयं स्वसमाधिभाग्यम् ।
हंसश्रियोर्व्यजनयोः शिववायुलोलच्छुभ्रातपत्रशशिकेसरशीकराम्बुम् ॥३८॥
कृत्स्नप्रसादसुमुखं स्पृहणीयधाम स्नेहावलोककलया हृदि संस्पृशन्तम् ।
श्यामे पृथावुरसि शोभितया श्रिया स्वश्चूडामणिं सुभगयन्तमिवात्मधिष्ण्यम् ॥३९॥
पीतांशुके पृथुनितम्बिनि विस्फुरन्त्या काञ्च्यालिभिर्विरुतया वनमालया च ।
वल्गुप्रकोष्ठवलयं विनतासुतांसे विन्यस्तहस्तमितरेण धुनानमब्जम् ॥४०॥
विद्युत्क्षिपन्मकरकुण्डलमण्डनार्हगण्डस्थलोन्नसमुखं मणिमत्किरीटम् ।
दोर्दण्डषण्डविवरे हरता परार्ध्यहारेण कन्धरगतेन च कौस्तुभेन ॥४१॥
अत्रोपसृष्टमिति चोत्स्मितमिन्दिरायाः स्वानां धिया विरचितं बहुसौष्ठवाढ्यम् ।
मह्यं भवस्य भवतां च भजन्तमङ्गं नेमुर्निरीक्ष्य नवितृप्तदृशो मुदा कैः ॥४२॥
तस्यारविन्दनयनस्य पदारविन्दकिञ्जल्कमिश्रतुलसीमकरन्दवायुः ।
अन्तर्गतः स्वविवरेण चकार तेषां संक्षोभमक्षरजुषामपि चित्ततन्वोः ॥४३॥
ते वा अमुष्य वदनासितपद्मकोशमुद्वीक्ष्य सुन्दरतराधरकुन्दहासम् ।
लब्धाशिषः पुनरवेक्ष्य तदीयमङ्घ्रिद्वन्द्वं नखारुणमणिश्रयणं निदध्युः ॥४४॥
पुंसां गतिं मृगयतामिह योगमार्गैर्ध्यानास्पदं बहु मतं नयनाभिरामम् ।
पौंस्नं वपुर्दर्शयानमनन्यसिद्धैरौत्पत्तिकैः समगृणन् युतमष्टभोगैः ॥४५॥

पापम् । किन्तु इह स्थितयोः नौ आवयो अधोऽग्रः नीचयोनीर्व्रजतोरपि मोहो न भवेत् । अनुतापः कृपारूपः ॥ ३६ ॥ सत्सु महत्सु अपराधम् आर्यहृद्यः भक्तप्रियः तेषां मनोज्ञो वा । तस्मिन् स्थाने ॥३७॥ तं तु तेचऽक्षत् निरीक्ष्य च कैः शिरोभिः प्रणेमुरिति पञ्चमेनान्वयः । कथंभूतम् । प्रतिहृत मानीतमौपयिकं गमनोचितं छत्रपादुकादि यस्य । तदेव शशी तस्य केसरेभ्यो रश्मिभ्यो निःसृतानि शीकराणिवाता एव अम्बूनि यस्मिन्निति तीर्थं ।३८। कृत्स्नस्य भक्तवृन्दस्य । संस्पृशन्तमानन्दयन्तम् । स्वर्गलोकस्य चूडामणिवत्स्थितमात्मधिष्ण्णं वैकुण्ठ शोभयन्तमिव ॥ ३९ ॥ तया तया च युक्तं सुभगयन्तमिति पूर्वेण वा । नितम्बाश्रये । वल्गुषु सुन्दरेषु ॥४०॥ मकराकारे कुण्डले तयोरपि मण्डनोर्हे गण्डस्थले यत्र तच्च तत् यस्य । भुजदण्डचतुष्टयस्य विवरे मध्ये हरता मनोहरेण तेन तेन च सभुगयन्तम् ॥ ४१ ॥ अत्र भगवत्सौन्दर्ये लक्ष्म्या उत्स्मितं सौन्दर्याऽहङ्करणम् उपसृष्टमस्तं गतम् । मह्यं मम ब्रह्मणः कैः शिरोभिः ॥ ४२ ॥ स्वविवरेण नासिकारन्ध्रेण चित्ते हर्षं तनौ रोमाञ्चम् ऐतनाऽद्वैतिनां शुष्कानन्दो निराकृत इत्यत्र मुनय एव प्रमाणम् ॥ ४३ ॥ ते सनकादयः कोशोऽन्तर्भागः अधरे कुन्दवत् । उत् ऊर्ध्वं वीक्ष्य लब्धाशिषः प्राप्तमनोरथाः सन्तः पुनरवेक्ष्य अधो वीक्ष्य एवं पुनः पुनः विमज्ज्योन्यजन्तरः ऊर्ध्वाधो वीक्ष्य पश्चादङ्घ्रि द्वन्द्वमेव ध्यातवन्तः ॥ ४४ ॥ गतिं मुक्तिम् । बहुमतमत्यादरणीयम् । पौंस्नं

कुमारा ऊचुः

योऽन्तर्हितो हृदि गतोऽपि दुरात्मनां त्वं सोऽद्यैव नो नयनमूलमनन्त राद्धः।
यर्ह्येव कर्णविवरेण गुहां गतो नः पित्रानुवर्णितरहा भवदुद्भवेन ॥४६॥
तं त्वां विदाम भगवन् परमात्मतत्त्वं सत्त्वेन सम्प्रति रतिं रचयन्तमेषाम्।
यत्तेऽनुतापविदितैर्दृढभक्तियोगैरुद्ग्रन्थयो हृदि विदुर्मुनयो विरागाः ॥४७॥
नात्यन्तिकं विगणयन्त्यपि ते प्रसादं किन्त्वन्यदर्पितभयं भ्रुव उन्नयैस्ते।
येऽङ्ग त्वदङ्घ्रिशरणा भवतः कथायाः कीर्तन्यतीर्थयशसः कुशला रसज्ञाः ॥४८॥
कामं भवः स्ववृजिनैर्निरयेषु नः स्ताच्चेतोऽलिवद् यदि नु ते पदयो रमेत।
वाचश्च नस्तुलसिवद् यदि तेऽङ्घ्रिशोभाः पूर्येत ते गुणगणैर्यदि कर्णरन्ध्रः ॥४९॥
प्रादुश्चकर्थ यदिदं पुरुहूत रूपं तेनेश निर्वृतिमवापुरलं दृशो नः।
तस्मा इदं भगवते नम इद्विधेम योऽनात्मनां दुरुदयो भगवान् प्रतीतः ॥५०॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां तृतीयस्कन्धे जयविजययोः सनकादि-
शापो नाम पञ्चदशोऽध्यायः ॥ १५ ॥

पौरुषम्। अष्टैश्वर्यैः। समगृणन् सम्यगस्तुवन् ॥ ४५ ॥ यो दुरात्मनां तिरोहितोऽसि स त्वमद्यैव नयनमूलं न राद्धः प्राप्तः पूर्वं भवत्पुत्रेण नः पित्रा ब्रह्मणा। यदैव उपदिष्टरहाः रहस्यस्तदैव गुहां हृदयमेव गतः अधुना तु नयनविषयम् इत्यहोभाग्यमित्यर्थः ॥ ४६ ॥ योगैरुद्ग्रन्थयो निरहङ्कारा मुनयः हृदि यत् यं विदुर्ध्यायन्ति तं त्वां विदामेत्वन्वयः। कीदृशम्। सत्त्वेन शुद्धसत्त्वात्मकदिव्यविग्रहेण एषां भक्तानां लोकानां वा सम्यक् प्रतिक्षणं प्रीतिमुत्पादयन्तम्। तेऽनुतापः कृपा ॥ ४७ ॥ अङ्ग हे नाथ ! आत्यन्तिकं मोक्षाख्यमपि तव प्रसादं ते नाद्रियन्ते किमुत अन्यत् स्वर्गादिसुखम्। ते के। ये भवतः कथाया रसज्ञाः सन्तः त्वदङ्घ्रिशरणास्ते। कीर्तनीयं परमपावनं यशो यस्य। उन्नयैर्विक्षेपैः ॥४८॥ कामं यथेष्टं भवो जन्म। नु वितर्के। अङ्घ्रिभ्यां वर्ण्यमानाभ्यां शोभा यासान्तास्तथाभूताः वाचो यदि स्युः। एतेन रन्ध्रस्याकाशत्वात् गुणानां चानन्तत्वात्पूरणाभावेन नित्यमेव श्रवणं स्यादिति प्रार्थितम् ॥ ४९ ॥ पुरुभिर्बहुभिर्भक्तैर्हूत आहूत हे भगवन्! यदिदं रूपं प्रकटितवानसि तेन अलं निर्वृतिमत्यतं सुखम्। अतस्तस्मै इदं नमनं विधेम य इत् इत्थं प्रत्यक्षतया प्रतीतः। कीदृशः। अनात्मनां देहाभिमानिनामथापि ब्रह्माऽस्मीति वदतां वञ्चकानां दुष्प्रापः।

इति श्रीमद्भागवते महापुराणे तृतीयस्कन्धे गूढार्थदीपिन्यां पञ्चदशोऽध्यायः।

अथ षोडशोऽध्यायः

ब्रह्मोवाच

इति तद् गृणतां तेषां मुनीनां योगधर्मिणाम् । प्रतिनन्द्य जगादेदं विकुण्ठनिलयो विभुः ॥ १ ॥

श्रीभगवानुवाच

एतौ तौ पार्षदौ मह्यं जयो विजय एव च । कदर्थीकृत्य मां यद्वो बह्वकार्ष्टामतिक्रमम् ॥ २ ॥

यस्त्वेतयोर्धृतो दण्डो भवद्भिर्मामनुव्रतैः । स एवानुमतोऽस्माभिर्मुनयो देवहेलनात् ॥ ३ ॥

तद्वः प्रसादयाम्यद्य ब्रह्म दैवं परं हि मे । तद्धीत्यात्मकृतं मन्ये[1] यन्मत्पुम्भिरसत्कृताः ॥ ४ ॥

यन्नामानि च गृह्णाति लोको भृत्ये कृतागसि । सोऽसाधुवादस्तत्कीर्तिं हन्ति त्वचमिवामयः ॥५॥

यस्यामृतामलयशःश्रवणावगाहः सद्यः पुनाति जगदाश्वपचाद् विकुण्ठः ।
सोऽहं भवद्भ्य उपलब्धसुतीर्थकीर्तिश्छिन्द्यां स्वबाहुमपि वः प्रतिकूलवृत्तिम् ॥ ६ ॥

यत्सेवया चरणपद्मपवित्ररेणुं सद्यःक्षताखिलमलं प्रतिलब्धशीलम् ।
न श्रीर्विरक्तमपि मां विजहाति यस्याः प्रेक्षालवार्थमितरे नियमान् वहन्ति ॥ ७ ॥

नाहं तथाद्मि यजमानहविर्विताने श्च्योतद्घृतप्लुतमदन् हुतभुङ्मुखेन ।
यद् ब्राह्मणस्य मुखतश्चरतोऽनुघासं तुष्टस्य मय्यवहितैर्निजकर्मपाकैः ॥ ८ ॥

येषां बिभर्म्यहमखण्डविकुण्ठयोगमायाविभूतिरमलाङ्घ्रिरजः किरीटैः ।
विप्रांस्तु को न विषहेत यदर्हणाम्भः सद्यः पुनाति सहचन्द्रललामलोकान् ॥ ९ ॥

षोडशे ब्राह्मणोत्कर्षैर्विष्णूत्कर्षैश्च तौ मिथः ।
तोषितौ चक्रतुस्तोषं द्वाःस्थयोः पततोरपि ॥१॥

गृणतां स्तुवतां तेषां तद्वाक्यमभिनन्द्य ॥ १ ॥ मह्यं मम । यत् यस्मात् मां तुच्छीकृत्य अपृष्ट्वैव बहु अत्यपराधं कृतवन्तौ ॥ २ ॥ हे मुनयः ! मामनुलक्ष्य ॥ ३ ॥ ब्रह्म ब्राह्मणाः । मदीयैः पुम्भिर्यद्वः तत् आत्मकृतमेव ॥४॥ यत् यस्य स्वामिनः तत्तस्य स्वामिन एव । आमयः श्वेतकुष्ठम् ॥५॥ यस्य मम । तस्य श्रवणावगाहः श्रोत्रप्रवेशः । श्रवणमेव मुख्यं स्नानं यस्येति वा । आश्वपचात् चाण्डालपर्यन्तं प्राणि वर्गम् । भवद्भ्यो हेतुभूतेभ्यः ॥६॥ यत् येषां ब्राह्मणानाम् चरणपद्मगतः । तेषां वः । प्रेक्षालवार्थं कटाक्ष पातार्थम् । इतरे ब्रह्मादयः । एतत्सर्वं येषां ब्राह्मणानां सेवया तेषां व इति योज्यम् ॥७॥ अनुघासं चरतः प्रतिग्रासं स्वादपूर्वकं भुञ्जानस्य ब्राह्मणस्य मुखेन यत् यथाऽश्नामि तथा यज्ञे अग्निमुखेन हविरदन्नपि नाद्मीत्यन्वयः । तत्र स्वादो न लभ्यते इत्यर्थः । एतेन ब्राह्मणभोजनं विना यज्ञस्य वैयर्थ्यं ध्वनितम् । क्षरता घृतेन प्लुतं मिश्रितम् व्याप्तं वा । मय्यर्पितैः फलैः ॥ ८ ॥ यस्य मम अर्हणाम्भः पादप्रक्षालनोदकं सद्यः पुनाति सोऽहं किरीटैः येषामङ्घ्रिरजः बिभर्मि तान् विप्रान् को न विषहेतेत्यन्वयः । विकुण्ठाऽप्रतिहता । चन्द्रललामः शिवः तत्सहितानेव लोकस्थजीवान् तत्पूजारहितांस्तु वैष्णवानपि न तेषां पूजाग्रहणाद् ।

१–अयं पाठः स्वामिसम्मतः ।

ये मे तनूर्द्विजवरान्दुहतीर्मदीया भूतान्यलब्धशरणानि च भेदबुद्ध्या।
द्रक्ष्यन्त्यघक्षतदृशो ह्यहिमन्यवस्तान् गृध्रा रुषा मम कुषन्त्यधिदण्डनेतुः ॥ १० ॥
ये ब्राह्मणान्मयि धिया क्षिपतोऽर्चयन्तस्तुष्यद्धृदः स्मितसुधोक्षितपद्मवक्त्राः।
वाण्यानुरागकलयाऽऽत्मजवद् गृणन्तः सम्बोधयन्त्यहमिवाहमुपाहृतस्तैः ॥ ११ ॥
तन्मे स्वभर्तुवसायमलक्षमाणौ युष्मद्व्यतिक्रमगतिं प्रतिपद्य सद्यः।
भूयो ममान्तिकमितां तदनुग्रहो मे यत्कल्पतामचिरतो भृतयोर्विवासः ॥ १२ ॥

ब्रह्मोवाच

अथ तस्योशतीं देवीमृषिकुल्यां सरस्वतीम्। नास्वाद्य मन्युदष्टानां तेषामात्माप्यतृप्यत ॥१३॥
सतीं व्यादाय शृण्वन्तो लघ्वीं गुर्वर्थगह्वराम्। विगाह्यागाधगम्भीरां न विदुस्तच्चिकीर्षितम्॥१४॥
ते योगमाययाऽऽरब्धपारमेष्ठ्यमहोदयम्। प्रोचुः प्राञ्जलयो विप्राः प्रहृष्टाः क्षुभितत्वचः ॥१५॥

ऋषय ऊचुः

न वयं भगवन् विद्मस्तव देव चिकीर्षितम्। कृतो मेऽनुग्रहश्चेति यदध्यक्षः प्रभाषसे ॥१६॥
ब्रह्मण्यस्य परं दैवं ब्राह्मणाः किल ते प्रभो। विप्राणां देवदेवानां भगवानात्मदैवतम् ॥१७॥
त्वत्तः सनातनो धर्मो रक्ष्यते तनुभिस्तव। धर्मस्य परमो गुह्यो निर्विकारो भवान्मतः ॥१८॥
तरन्ति ह्यञ्जसा मृत्युं निवृत्ता यदनुग्रहात्। योगिनः स भवान् किं स्विदनुगृह्येत यत्परैः॥१९॥
यं वै विभूतिरुपयात्यनुवेलमन्यैरर्थार्थिभिः स्वशिरसा धृतपादरेणुः।
धन्यार्पिताङ्घ्रितुलसीनवदामधाम्नो लोकं मधुव्रतपतेरिव कामयाना ॥२०॥

"अनर्चिते नीलकण्ठे न गृह्णात्यर्चनं हरिः" इति स्कान्दोक्तेः ॥ ९ ॥ दुहतीर्गाः। अलब्धशरणानि निराश्रयाणि। ये द्रक्ष्यन्ति तान् सर्वाङ्गेषु दण्डवेतुर्यमस्य गृध्राकारा दूताः चञ्चुभिः अधिकं कुषन्ति छिन्दन्ति। कथंभूतस्य मम मन्नियुक्तस्य ॥ १० ॥ अहं यथा भृगुं तथा क्षिपतस्तिरस्कुर्वतो ब्राह्मणान् आत्मजवत् पुत्रमिव प्रशंसन्तः ये संबोधयन्ति तैरहमुपाकृतो वशीकृतोऽस्मि। कलया बद्धया। कल वन्धने धातुः। आत्मजेत्युक्ते हीनोऽपि ब्राह्मणो नादर्तव्य इत्युक्तं भवति ॥ ११ ॥ स्वयोरनयोः। मम अवसायं निश्चयं विप्रभक्तिविषयकम्। व्यतिक्रमगतिं तिरस्कारफलम्। इतां प्राप्नुताम्। तत् स एव। विवासः परदेशवासः शीघ्रं समाप्यताम्। यद्वा। विशिष्टो मया सह वासः समर्थो भवतु उचितो भवतु ॥ १२ ॥ उशतीं कमनीयाम्। ऋषिकुलाय हितां वाणीम्। आत्मा मनः ॥ १३ ॥ व्यादाय कर्णं दत्त्वा। आशयतोऽगाधां विषयतो गम्भीराम् अत एव गह्वरां दुर्बोधाम् ॥ १४ ॥ आरब्धः प्रकटितः पारमेष्ठ्यस्य वैकुण्ठस्य महानुदयो येन। यद्वा। मायया कृपया विस्तारितो भक्तानां महानुत्कर्षो येन। परमेष्ठिनो भगवत इमे पारमेष्ठ्याः। भक्ताः क्षुभिता रोमाञ्चिताः।१५। मे ममोपरि। यत् यस्मात्।१६।१७। त्वत्तः प्रवर्तते। तनुभिरवतारैः। निर्विकारः परमः फलस्वरूपो भवानेव श्रुतिभिर्निर्णीतः ॥१८॥ निवृत्ता विरक्ताः सन्तः अञ्जसा सुखेन। स्वित् विस्मये। इति यत् तत् किं कथं घटेत ॥ १९॥ यमिति युग्मकम्। नवदाम नूतनमाला तदेव धाम स्थानं यस्य तस्य भ्रमरराजस्य लोकं भगवदङ्घ्रिं कामयमानेव विभूति

यस्तां विविक्तचरितैरनुवर्तमानां नात्याद्रियत्परमभागवतप्रसङ्गः।
स त्वं द्विजानुपथपुण्यरजः पुनीतः श्रीवत्सलक्ष्म किमगा भगभाजनस्त्वम् ॥२१॥
धर्मस्य ते भगवतस्त्रियुग त्रिभिः स्वैः पद्भिश्चराचरमिदं द्विजदेवतार्थम्।
नूनं भृतं तदभिघाति रजस्तमश्च सत्त्वेन नो वरदया तनुवा निरस्य ॥२२॥
न त्वं द्विजोत्तमकुलं यदिहात्मगोपं गोप्ता वृषः स्वर्हणेन ससूनृतेन।
तर्ह्येव नङ्क्ष्यति शिवस्तव देव पन्था लोकोऽग्रहीष्यदृषभस्य हि तत्प्रमाणम् ॥२३॥
तत्तेऽनभीष्टमिव सत्त्वनिधेर्विधित्सोः क्षेमं जनाय निजशक्तिभिरुद्धृतारेः।
नैतावता त्र्यधिपतेर्बत विश्वभर्तुस्तेजः क्षतं त्ववनतस्य स ते विनोदः ॥२४॥
यं वानयोर्दममधीश भवान् विधत्ते वृत्तिं नु वा तदनुमन्महि निर्व्यलीकम्।
अस्मासु वा य उचितो ध्रियतां स दण्डो येऽनागसौ वयमयुङ्क्ष्महि किल्बिषेण ॥२५॥

श्रीभगवानुवाच

एतौ सुरेतरगतिं प्रतिपद्य सद्यः संरम्भसम्भृतसमाध्यनुबद्धयोगौ।
भूयः सकाशमुपयास्यत आशु यो वः शापो मयैव निमितस्तदवैत विप्राः ॥२६॥

ब्रह्मोवाच

अथ ते मुनयो दृष्ट्वा नयनानन्दभाजनम्। वैकुण्ठं तदधिष्ठानं विकुण्ठं च स्वयंप्रभम् ॥२७॥
भगवन्तं परिक्रम्य प्रणिपत्यानुमान्य च। प्रतिजग्मुः प्रमुदिताः शंसन्तो वैष्णवीं श्रियम् ॥२८॥
भगवाननुगावाह यातं मा भैष्टमस्तु शम्। ब्रह्मतेजः समर्थोऽपि हन्तुं नेच्छे मतं तु मे ॥२९॥
एतत्पुरैव निर्दिष्टं रमया क्रुद्धया यदा। पुरापवारिता द्वारि विशन्ती मय्युपारते ॥३०॥

लक्ष्मीः अनुवेलं तत्तदवसरेषु यं सेवते अथापि तां यो नात्याद्रियत् स त्वमेवं भगभाजनः सौभाग्यनिधिरसि तं त्वां रजः लक्ष्म च द्वे अपि किं पुनीतः नैव अतः तत् किमर्थं ते द्वे अगा भूषणत्वेन प्राप्तवानसि अतो यत्सेवयेत्युक्तिर्लोकशिक्षार्था। धन्यैर्भक्तै नातीत्युक्तिर्भक्तोत्कर्षद्योतनार्था ॥ २०।२१ ॥ हे त्रियुग! धर्मरूपस्य तव त्रिभिः पदैः तपःशौचदयाभिरिदं जगत् भृतं पालितम्। किं कृत्वा। सत्त्वेन सत्त्वमय्या तनुवा मूर्त्या तपआदिघातकं रजस्तमश्च निराकृत्य। लोडन्तं वा। अस्माकं तद्द्वयं निरस्य दूरीकुरु ॥२२॥ आत्मगोपं त्वयैव रक्षणीयम्। वृषः श्रेष्ठः त्वं न गोप्ता। सूनृतं प्रियवचनम्। पन्था वेदमार्गः। ऋषभस्य श्रेष्ठस्य तव पदाचरितं तत्प्रमाणं मत्वा ॥ २३ ॥ तद्वेदमार्गनाशनमनभीष्टमेव। एतावता वेदरक्षार्थेन ब्राह्मण कुलेऽवनतस्य ते। यतः स नमनादिः विनोदो लीलैव ॥ २४ ॥ दमं दण्डं वृत्तिमत्र स्थितिं वा। अनागसौ जननिवारणरूपस्वधर्मे स्थितत्वात् निरपराधौ किल्बिषेण शापेन ये वयम् ।२५। संरम्भः कोपावेशः। सकाशं मत्समीपम् नितरां मितः निर्णीतः। अवैत जानीत ॥ २६ ॥ विकुण्ठं विष्णुम्। अथेति युग्मकम्। अनुमान्य आज्ञां गृहीत्वा ॥ २७।२८॥ तेजः शापम्। यतो मम सम्मतम् ॥ २९ ॥ यदा निवारिता तदा।

मयि संरम्भयोगेन निस्तीर्य ब्रह्महेलनम् । प्रत्येष्यतं निकाशं मे कालेनाल्पीयसा पुनः ॥३१॥
द्वाःस्थावादिश्य भगवान् विमानश्रेणिभूषणम् । सर्वातिशयया लक्ष्म्या जुष्टं स्वं धिष्ण्यमाविशत् ३२
तौ तु गीर्वाणऋषभौ दुस्तराद्धरिलोकतः । हतश्रियौ ब्रह्मशापादभूतां विगतस्मयौ ॥३३॥
तदा विकुण्ठधिषणात्तयोर्निपतमानयोः । हाहाकारो महानासीद् विमानाग्र्येषु पुत्रकाः ॥३४॥
तावेव ह्यधुना प्राप्तौ पार्षदप्रवरौ हरेः । दितेर्जठरनिर्विष्टं काश्यपं तेज उल्बणम् ॥३५॥
तयोरसुरयोरद्य तेजसा यमयोर्हि वः । आक्षिप्तं तेज एतर्हि भगवांस्तद् विधित्सति ॥३६॥

विश्वस्य यः स्थितिलयोद्भवहेतुराद्यो योगेश्वरैरपि दुरत्यययोगमायः ।
क्षेमं विधास्यति स नो भगवांस्त्र्यधीशस्तत्रास्मदीयविमृशेन कियानिहार्थः॥३७॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां तृतीयस्कन्धे षोडशोऽध्यायः ॥१६॥

अथ सप्तदशोऽध्यायः

मैत्रेय उवाच

निशम्यात्मभुवा गीतं कारणं शङ्कयोज्झिताः । ततः सर्वे न्यवर्तन्त त्रिदिवाय दिवौकसः ॥१॥
दितिस्तु भर्तुरादेशादपत्यपरिशङ्किनी । पूर्णे वर्षशते साध्वी पुत्रौ प्रसुषुवे यमौ ॥२॥
उत्पाता बहवस्तत्र निपेतुर्जायमानयोः । दिवि भुव्यन्तरिक्षे च लोकस्योरुभयावहाः ॥३॥
सहाचला भुवश्चेलुर्दिशः सर्वाः प्रजज्वलुः । सोल्काश्चाशनयः पेतुः केतवश्चार्तिहेतवः ॥४॥
ववौ वायुः सुदुःस्पर्शः फूत्कारानीरयन्मुहुः । उन्मूलयन्नगपतीन् वात्यानीको रजोध्वजः ॥५॥
उद्धसत्तडिदम्भोदघटया नष्टभागणे । व्योम्नि प्रविष्टतमसा न स्म व्यादृश्यते पदम् ॥६॥

एतत् ब्राह्मणैः यदिदानीमुक्त तत् ॥३०॥ हेलनं शापम् । निकाशं समीपम् ॥३१।३२॥ लोकतः पतन्तो । स्मयो गर्वः ॥ ३३ ॥ विमानश्रेष्ठेषु वसताम् ॥ ३४ ॥ तेजो वीर्यं प्राप्तौ ॥ ३५ ॥ आक्षिप्तं तिरस्कृतम् एतर्हि इदानीम् । तत तस्य प्रतीकारम् ॥ ३६ ॥ विमशेन विचारेण ॥ ३७ ॥

इति श्रीमद्भागवते महापुराणे तृतीयस्कन्धे गूढार्थदीपिन्यां षोडशोऽध्यायः ।

दैत्ययोर्जन्म सोत्पातं दिग्जये वरुणं क्वचित् ।
गतः सप्तदशे गर्वात् हिरण्याक्षो युयुत्सया ॥१॥

आत्मभुवा ब्रह्मणा ॥ १।२ ॥ तत्र तज्जन्मसमये ॥३॥ सोल्काः साङ्गारा अशनयो वज्राः[1] ॥४॥ ईरयन् ध्वनयन् । वात्या मण्डलवायुः सैवानीकं सेना यस्य ॥ ५ ॥ उच्चैर्हसन्त्य इव तडितो येषु तेषां

---

1. केतवो भयसूचका लम्बायमानास्तारा: ।

चुक्रोश विमना वार्धिरुदूर्मिक्षुभितोदरः । सोदपानाश्च सरितश्चुक्षुभुः शुष्कपङ्कजाः ॥७॥
मुहुः परिधयोऽभूवन् सराह्वोः शशिसूर्ययोः । निर्घाता रथनिर्ह्रादा विवरेभ्यः प्रजज्ञिरे ॥८॥
अन्तर्ग्रामेषु मुखतो वमन्त्यो वह्निमुल्बणम् । सृगालोलूकटङ्कारैः प्रणेदुरशिवं शिवाः ॥९॥
सङ्गीतवद्रोदनवदुन्नमय्य शिरोधराम् । व्यमुञ्चन् विविधा वाचो ग्रामसिंहास्ततस्ततः॥१०॥
खराश्च कर्कशैः क्षत्तः खुरैर्घ्नन्तो धरातलम् । खार्काररभसा मत्ताः पर्यधावन् वरूथशः ॥११॥
रुदन्तो रासभत्रस्ता नीडादुदपतन् खगाः । घोषेऽरण्ये च पशवः शकृन्मूत्रमकुर्वत ॥१२॥
गावोऽत्रसन्नसृग्दोहास्तोयदाः पूयवर्षिणः । व्यरुदन्देवलिङ्गानि द्रुमाः पेतुर्विनानिलम् ॥१३॥
ग्रहान् पुण्यतमानन्ये भगणांश्चापि दीपिताः । अतिचेरुर्वक्रगत्या युयुधुश्च परस्परम् ॥१४॥
दृष्ट्वान्यांश्च महोत्पातानतत्तत्त्वविदः प्रजाः । ब्रह्मपुत्रानृते भीता मेनिरे विश्वसम्प्लवम् ॥१५॥
तावादिदैत्यौ सहसा व्यज्यमानात्मपौरुषौ । ववृधातेऽश्मसारेण कायेनाद्रिपती इव ॥१६॥

दिविस्पृशौ हेमकिरीटकोटिभिर्निरुद्धकाष्ठौ स्फुरदङ्गदाभुजौ ।
गां कम्पयन्तौ चरणैः पदे पदे कट्या सुकाञ्च्यार्कमतीत्य तस्थतुः ॥१७॥
प्रजापतिर्नाम तयोरकार्षीद् यः प्राक् स्वदेहाद् यमयोरजायत ।
तं वै हिरण्यकशिपुं विदुः प्रजा यं तं हिरण्याक्षमसूत साग्रतः ॥१८॥

चक्रे हिरण्यकशिपुर्दोर्भ्यां ब्रह्मवरेण च । वशे सपालाँल्लोकांस्त्रीनकुतोमृत्युरुद्धतः ॥१९॥
हिरण्याक्षोऽनुजस्तस्य प्रियः प्रीतिकृदन्वहम् । गदापाणिर्दिवं यातो युयुत्सुर्मृगयन् रणम् ॥२०॥
तं वीक्ष्य दुःसहजवं रणत्काञ्चननूपुरम् । वैजयन्त्या स्रजा जुष्टमंसन्यस्तमहागदम् ॥२१॥
मनोवीर्यवरोत्सिक्तमसृण्यमकुतोभयम् । भीता निलिल्यिरे देवास्तार्क्ष्यत्रस्ता इवाहयः ॥२२॥
स वै तिरोहितान् दृष्ट्वा महसा स्वेन दैत्यराट् सेन्द्रान्देवगणान् क्षीबो न पश्यन् व्यनदद् भृशम्२३
ततो निवृत्तः क्रीडिष्यन् गम्भीरं भीमनिःस्वनम् । विजगाहे महासत्त्वो वार्धिं मत्त इव द्विपः२४

तस्मिन् प्रविष्टे वरुणस्य सैनिका यादोगणाः सन्नधियः ससाध्वसाः ।
अहन्यमाना अपि तस्य वर्चसा प्रधर्षिता दूरतरं प्रदुद्रुवुः ॥२५॥

घट्या समूहेन ॥ ६ ॥ उदरस्था मकरादयः । उदपाना वापीकूपादयः ॥ ७ ॥ परिधयो मण्डलानि । निर्घाता निरभ्रगर्जितानि । निर्ह्रादास्तत्तुल्यध्वनयः ॥८॥ टङ्कारै र्ध्वनिभिः सह । शिवाः सृगाल्यः ॥९॥ ग्रामसिंहाः श्वानः । ततस्तत्र तत्र ॥ १० ॥ खार्कारेण खरजातिशब्देन रभसो हर्षो येषांमिति वा ॥११॥ रासभात् गर्दभशब्दात् । उड्डीय अधो निपेतुः ॥ १२ ॥ असृग्दोहा रुधिरदुग्धाः ॥ १३ ॥ पुण्यतमान् गुर्वादीन् । अन्ये क्रूरग्रहा मङ्गलादयः ॥ १४ ॥ संप्लवं प्रलयम् ॥ १५ ॥ अश्मवत्सारेण अयस्तुल्येन कठोरेण ॥ १६ ॥ कोटिभिरग्रैः । निरुद्धकाष्ठौ व्याप्तदिग्भागौ । सोमपाशब्दवदङ्गदाशब्दोऽपीति सन्दर्भः भूषणवाची ॥१७॥ गर्भसमये यः प्राक् तं ज्येष्ठम् दितिः प्रथमं यमसूत तं कनिष्ठञ्च ॥१८।१९॥ मृगयन् अन्वेषयन् ॥ २० ॥ तमिति युग्मकम् 'वैजयन्ती भवेन्मालाऽष्टधामौक्तिकनिर्मिता' इति । उत्सिक्त गर्वितम् । असृण्यं निरङ्कुशम् । तार्क्ष्यो गरुडः ॥२१।२२॥ महसा तेजसा । क्षीवो मत्त इत्येव पाठः न तु क्षीवान् भीतत्वेन तेषां मत्तत्त्वासंभवादिति दीपिनी ॥२३।२४॥ सन्ना नष्टा किंकर्तव्यविमूढा । वर्चसा

स वर्षपुगानुदधौ महाबलश्चरन्महोर्मीञ्च्छ्वसनेरितान्मुहुः ।
मौर्व्याभिजघ्ने गदया विभावरीमासेदिवांस्तात पुरीं प्रचेतसः ॥२६॥
तत्रोपलभ्यासुरलोकपालकं यादोगणानामृषभं प्रचेतसम् ।
स्मयन् प्रलब्धुं प्रणिपत्य नीचवज्जगाद मे देह्यधिराज संयुगम् ॥२७॥
त्वं लोकपालोऽधिपतिर्बृहच्छ्रवा वीर्यापहो दुर्मदवीरमानिनाम् ।
विजित्य लोकेऽखिलदैत्यदानवान् यद्राजसूयेन पुरायजत् प्रभो ॥२८॥
स एवमुत्सिक्तमदेन विद्विषा दृढं प्रलब्धो भगवानपां पतिः ।
रोषं समुत्थं शमयन् स्वया धिया व्यवोचदङ्गोपशमं गता वयम् ॥२९॥
पश्यामि नान्यं पुरुषात्पुरातनाद् यः संयुगे त्वां रणमार्गकोविदम् ।
आराधयिष्यत्यसुरर्षभेहि तं मनस्विनो यं गृणते भवादृशाः ॥३०॥
तं वीरमारादभिपद्य विस्मयः शयिष्यसे वीरशये श्वभिर्वृतः ।
यस्त्वद्विधानामसतां प्रशान्तये रूपाणि धत्ते सदनुग्रहेच्छया ॥३१॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां तृतीयस्कन्धे हिरण्याक्षदिग्विजये सप्तदशोऽध्यायः॥ १७॥

अथाष्टादशोऽध्यायः

मैत्रेय उवाच

तदेवमाकर्ण्य जलेशभाषितं महामनास्तद् विगणय्य दुर्मदः ।
हरेर्विदित्वा गतिमङ्ग नारदाद्रसातलं निर्विविशे त्वरान्वितः ॥ १ ॥
ददर्श तत्राभिजितं धराधरं प्रोन्नीयमानावनिमग्रदंष्ट्रया ।
मुष्णन्तमक्ष्णा स्वरुचोऽरुणश्रिया जहास चाहो वनगोचरो मृगः ॥ २ ॥

तेजसा ।२५। चरन् विहरन् मौर्व्या लोहमय्या । श्वसनो वायुः तेन ईरितान् उत्थितान् ।२६। लोकः पातालः प्रलब्धुं वक्रोक्त्या वञ्चयितुं म्लेच्छवदेकहस्तेन ॥ २७ ॥ यत् यस्मात् ॥ २८ ॥ उत्सिक्तो वृद्धि गतः । प्रलब्ध उपहसितः । अङ्ग हे दैत्य ! उपशमं युद्धादुपरमम् ॥२९॥ यस्तोषयिष्यति तस्मादन्यं न अतस्तमिहि गच्छ । गृणते स्तुवन्ति ॥३०॥ आरात् शीघ्रम् । विस्मयो नष्टगर्वः । वीरशये रणाङ्गणे ॥ ३१ ॥

इति श्रीमद्भागवते महापुराणे तृतीयस्कन्धे गूढार्थदीपिन्यां सप्तदशोऽध्यायः ।

अष्टादशे वराहस्य हिरण्याक्षेण भीषणम् ।
वाचा युद्धं गदायुद्धं मल्लयुद्धं च वर्ण्यते ॥

विगणय्य अनादृत्य । गतिं स्थानम् । अङ्ग हे विदुर ॥१॥ अभितो जयतीति तं श्रीहरिम् ! । प्रकर्षेण ऊर्ध्वं नीयमाना अवनिः पृथ्वी येन तम् । वनगोचरो जलचरो वराहः । जले शयानो नारायण

आहैनमेह्यज्ञ महीं विमुञ्च नो रसौकसां विश्वसृजेयमर्पिता ।
न स्वस्ति यास्यस्यनया ममेक्षतः सुराधमासादितसूकराकृते ॥ ३ ॥
त्वं नः सपत्नैरभवाय किं भृतो यो मायया हन्त्यसुरान् परोक्षजित् ।
त्वां योगमायाबलमल्पपौरुषं संस्थाप्य मूढ प्रमृजे सुहृच्छुचः ॥ ४ ॥
त्वयि संस्थिते गदया शीर्णशीर्षण्यस्मद्भुजच्युतया ये च तुभ्यम् ।
बलिं हरन्त्यृषयो ये च देवाः स्वयं सर्वे न भविष्यन्त्यमूलाः ॥ ५ ॥
स तुद्यमानोऽरिदुरुक्ततोमरैर्दंष्ट्राग्रगां गामुपलक्ष्य भीताम् ।
तोदं मृषन्निरगादम्बुमध्याद् ग्राहाहतः सकरेणुर्यथेभः ॥ ६ ॥
तं निःसरन्तं सलिलादनुद्रुतो हिरण्यकेशो द्विरदं यथा झषः ।
करालदंष्ट्रोऽशनिनिःस्वनोऽब्रवीद् गतह्रियां किं त्वसतां विगर्हितम् ॥ ७ ॥
स गामुदस्तात्सलिलस्य गोचरे विन्यस्य तस्यामदधात्स्वसत्त्वम् ।
अभिष्टुतो विश्वसृजा प्रसूनैरापूर्यमाणो विबुधैः पश्यतोऽरेः ॥ ८ ॥
परानुषक्तं तपनीयोपकल्पं महागदं काञ्चनचित्रदंशम् ।
मर्माण्यभीक्ष्णं प्रतुदन्तं दुरुक्तैः प्रचण्डमन्युः प्रहसंस्तं बभाषे ॥ ९ ॥

श्रीभगवानुवाच

सत्यं वयं भो वनगोचरा मृगा युष्मद्विधान्मृगये ग्रामसिंहान् ।
न मृत्युपाशैः प्रतिमुक्तस्य वीरा विकत्थनं तव गृह्णन्त्यभद्र ॥१०॥

एव योगिभि मृग्यते मृगः । स्वस्य दैत्यस्य रुचः ॥२॥ न विद्यते ज्ञो यस्मात् हे सर्वज्ञ ! नो मा विमुञ्च । हे विश्वसृज ![1] कः । इयं तुभ्यम् उपहारीकृता । न केवलमियमेव किन्तु अनया सह नोऽस्माकं स्वस्ति मङ्गलं राज्यादिकमपि प्राप्स्यसि । सुरा अधमा यस्मात् हे सुरोत्तम । आसादिता भक्तेभ्यः सेवार्थं-दत्ता ॥ ३ ॥ अभवाय मोक्षाय भृत आश्रितः । मायया कृपया परोक्षे दूरत एव । अल्पं पौरुषं यस्मात् । त्वां संस्थाप्य हृदि स्थिरीकृत्य । सुहृच्छुचः संसारदुःखानि मृजे नाशयामि । मूढान् प्राति स्वभक्ति-दानेनाऽऽप्यायतीति तथा हे मूढ प्रप्रापूर्तौ धातुः ॥ ४ ॥ संस्थिते मृते सति न भविष्यन्ति मरिष्यन्ति । पक्षे । च्युतयाऽपि अशीर्णमितिच्छेदः । ये नवीना ये च प्राचीना भक्ताः बलिं हरन्ति पूजां कुर्वन्ति ते अमूला न किन्तु दृढमूला इत्यर्थः ॥ ५ ॥ तोमरः गड़ासा इति । गां पृथ्वीम् । तोदं निगूढार्थमजानतां ब्रह्मादीनां व्यथां सहमानः । करेणुर्हस्तिनी तत्सहितश्च गजः ॥६॥ मकरो यथागजं तथाऽनुधावन् हिरण्याक्षोऽब्रवीत् । गतह्रियामस्माकं किं निन्दितं न किमपि उपकारिणोऽपि भगवतो विघ्न-कर्तॄन् धिगस्मानित्यर्थः ॥ ७ ॥ स वराहः । सलिलस्य उदस्तात् उपरि गोचरे अदूरप्रदेशे गां पृथ्वीं निधाय । सत्त्वमाधारशक्तिम् । पश्यन्तमरिमनादृत्य ॥ ८ ॥ परानुषक्तं पृष्ठतो लग्नम् । तपेति सुवर्णालङ्कारम् । दंशः कवचम् । प्रतुदन्तं न तु सूक्तैः । दुरुक्तश्रवणेन प्रचण्डमन्युः सूक्तश्रवणेन प्रहसन् ॥ ९ ॥ ग्रामसिंहान् शुनः । प्रतिमुक्तस्य बद्धस्य विकत्थनं स्वप्रशंसनम् असंबद्धभाषणं

1. इगुपध लक्षणः कः ।

एते वयं न्यासहरा रसौकसां गतह्रियो गदया द्रावितास्ते ।
तिष्ठामहेऽथापि कथंचिदाजौ स्थेयं क्व यामो बलिनोत्पाद्य वैरम् ॥११॥
त्वं पद्रथानां किल यूथपाधिपो घटस्व नोऽस्वस्तय आश्वनूहः ।
संस्थाप्य चास्मान् प्रमृजाश्रु स्वकानां यः स्वां प्रतिज्ञां नातिपिपर्त्यसभ्यः ॥१२॥

मैत्रेय उवाच

सोऽधिक्षिप्तो भगवता प्रलब्धश्च रुषा भृशम् । आजहारोल्बणं क्रोधं क्रीड्यमानोऽहिराडिव ॥१३॥
सृजन्नमर्षितः श्वासान्मन्युप्रचलितेन्द्रियः । आसाद्य तरसा दैत्यो गदयाभ्यहनद्धरिम् ॥१४॥
भगवांस्तु गदावेगं विसृष्टं रिपुणोरसि । अवञ्चयत्तिरश्चीनो योगारूढ इवान्तकम् ॥१५॥
पुनर्गदां स्वामादाय भ्रामयन्तमभीक्ष्णशः । अभ्यधावद्धरिः क्रुद्धः संरम्भाद्दष्टदच्छदम् ॥१६॥
ततश्च गदयारातिं दक्षिणस्यां भ्रुवि प्रभुः । आजघ्ने स तु तां सौम्य गदया कोविदोऽहनत् ॥१७॥
एवं गदाभ्यां गुर्वीभ्यां हर्यक्षो हरिरेव च । जिगीषया सुसंरब्धावन्योन्यमभिजघ्नतुः ॥१८॥

तयोः स्पृधोस्तिग्मगदाहताङ्गयोः क्षतास्रवघ्राणविवृद्धमन्य्वोः ।
विचित्रमार्गांश्चरतोर्जिगीषया व्यभादिलायामिव शुष्मिणोर्मृधः ॥१९॥
दैत्यस्य यज्ञावयवस्य मायागृहीतवाराहतनोर्महात्मनः ।
कौरव्य मह्यां द्विषतोर्विमर्दनं दिदृक्षुरागादृषिभिर्वृतः स्वराट् ॥२०॥
आसन्नशौण्डीरमपेतसाध्वसं कृतप्रतीकारमहार्यविक्रमम् ।
विलक्ष्य दैत्यं भगवान् सहस्रणीर्जगाद नारायणमादिसूकरम् ॥२१॥

ब्रह्मोवाच

एष ते देव देवानामङ्घ्रिमूलमुपेयुषाम् । विप्राणां सौरभेयीणां भूतानामप्यनागसाम् ॥२२॥
आगस्कृद्भयकृद्दुष्कृदस्मदाद्धवरोऽसुरः । अन्वेषन्नप्रतिरथो लोकानटति कण्टकः ॥२३॥
मैनं मायाविनं दृप्तं निरङ्कुशमसत्तमम् । आक्रीड बालवद् देव यदाऽऽशीविषमुत्थितम् ॥२४॥

वा ॥ १० ॥ न्यासभूत पृथ्वीहराः । आजौ संग्रामे ॥ ११ ॥ पद्रथानां पदातीनाम् अस्वस्तये परिभवाय अनूहः निःशङ्कः सन् । संस्थाप्य हत्वेति व्यङ्ग्योक्तिः ॥ १२ ॥ प्रलब्ध उपहसितः । क्रीडाविषयी क्रियमाणः कालियोऽन्यो वा ।१३। श्वासान् सृजन् मुञ्चन् । तरसा वेगेन ।१४।१५। दच्छद ओष्ठः ॥१६॥ अरातिंशत्रुम् ॥ १७ ॥ हर्यक्षो हरितनेत्रो हिरण्याक्षः । सुसंरब्धौ अतिक्रुद्धौ ॥ १८ ॥ स्पृधोः स्पर्धमानयोः । क्षतादास्रवतीति तत् रुधिरम् । इलायां गवि निमित्तभूतायां शुष्मिणोर्मत्तयोर्वृषयोः । मृधः संग्रामः । इला भूमिरपि ॥ १९ ॥ माया कृपा । विमर्दनं युद्धम् । स्वराट् ब्रह्मा ॥ २० ॥ आसन्नं व्यक्तीकृतं शौण्डीरं शौर्यं येन । अहार्यो दुर्निवार्यः । सहस्रणीरिति ऋषिसहस्राणां नेता ॥ २१ ॥ एष इति युग्मकम् । प्रतिरथमन्वेषयन् स्वयं तु अप्रतिरथः ।२२।२३। मा आक्रीडय । यत् यस्मादेनमाशीविषं

न यावदेव वर्धेत स्वां वेलां प्राप्य दारुणः । स्वां देव मायामास्थाय तावज्जह्यघमच्युत ।।२५।।
एषा घोरतमा संध्या लोकच्छम्बट्करी प्रभो । उपसर्पति सर्वात्मन् सुराणां जयमावह ।।२६।।
अधुनैषोऽभिजिन्नाम योगो मौहूर्तिको ह्यगात् । शिवाय नस्त्वं सुहृदामाशु निस्तर दुस्तरम् ।।२७।।
दिष्ट्या त्वां विहित मृत्युमयमासादितः स्वयम् । विक्रम्यैनं मृधे हत्वा लोकानाधेहि शर्मणि ।२८।

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां तृतीयस्कन्धे हिरण्याक्षवधेऽष्टादशोऽध्यायः ।।१८।।

अथैकोनविंशोऽध्यायः

मैत्रेय उवाच

अवधार्य विरिञ्चस्य निर्व्यलीकामृतं वचः । प्रहस्य प्रेमगर्भेण तदपाङ्गेन सोऽग्रहीत् ।। १ ।।
ततः सपत्नं मुखतश्चरन्तमकुतोभयम् । जघानोत्पत्य गदया हनावसुरमक्षजः ।। २ ।।
सा हता तेन गदया विहता भगवत्करात् । विघूर्णितापतद्रेजे तदद्भुतमिवाभवत् ।। ३ ।।
स तदा लब्धतीर्थोऽपि न बबाधे निरायुधम् । मानयन् स मृधे धर्मं विष्वक्सेनं प्रकोपयन् ।। ४।।
गदायामपविद्धायां हाहाकारे विनिर्गते । मानयामास तद्धर्मं सुनाभं चास्मरद्विभुः ।। ५ ।।

तं व्यग्रचक्रं दितिजाधमेन स्वपार्षदमुख्येन विषज्जमानम् ।
चित्रा वाचोऽतद्विदां खेचराणां तत्रास्मासन् स्वस्ति तेऽमुं जहीति ।। ६ ।।

मन्ये इति शेषः । सर्वत्रैष एव पाठः स्वामिसंमतश्च न तु यथेति सन्दर्भः दीपिनी च ।२४। स्वामासुरीम् । मायामास्थाय शक्तिं प्रकटीकृत्य । अघं पापमूर्तिम् ॥ २५ ॥ छम्बट्शब्दो वैदिको नाशवाची । सन्ध्यायामेव प्रलयत्वात् ॥ २६ ॥ अभिजित् मध्याह्ने घटीद्वयमितः अगात् आगतः । गतप्रायो वा । तस्मात् दुस्तरं दैत्यं निस्तर जहि ॥ २७ ॥ कश्यपेन विहितं त्वां मृत्युं मारकम् । एतत् दिष्ट्या मङ्गलम् । शर्मणि आधेहि सुखे स्थापयं ॥ २८ ॥

इति श्रीमद्भागवते महापुराणे तृतीय स्कन्धे गूढार्थदीपिन्यामष्टादशोऽध्यायः ।

ऊनविंशे महामायाः सृजन्तं दितिजं हरिः ।
क्रीडन्निव हिरण्याक्षं जघानेति निरूप्यते ।।

अवधार्य श्रुत्वा । निर्व्यलीकं निष्कपटम् अमृतं प्रियं च ॥ १ ॥ मुखतः सम्मुखे एव । अक्षजः ब्रह्मणो घ्राणेन्द्रियादुत्पन्नः ॥ २ ॥ सा हरेर्गदा विहता विच्युता सती विघूर्णिता भूत्वा ॥३ ॥ लब्धतीर्थो लब्धावसरः । स न बबाधे न प्राहरत् किन्तु स प्रकोपयन्बभूव अतो न पौनरुक्त्यम् वाक्यभेदात् ॥ ४ ॥ अपविद्धायां पतितायाम् । सुनाभं चाद् गदामपि ॥ ५ ॥ विषज्जमानं विशेषेण सङ्गं प्राप्नुवन्तं तं भगवन्तं

स तं निशाम्यात्तरथाङ्गमग्रतो व्यवस्थितं पद्मपलाशलोचनम् ।
विलोक्य चामर्षपरिप्लुतेन्द्रियो रुषा स्वदन्तच्छदमादशच्छ्वसन् ॥ ७ ॥

करालदंष्ट्रश्चक्षुर्भ्यां संचक्षाणो दहन्निव । अभिप्लुत्य स्वगदया हतोऽसीत्याहनद्धरिन् ॥ ८ ॥
पदा सव्येन तां साधो भगवान् यज्ञसूकरः । लीलया मिषतः शत्रोः प्राहरद्वातरंहसम् ॥ ९ ॥
आह चायुधमादत्स्व घटस्व त्वं जिगीषसि । इत्युक्तः स तदा भूयस्ताडयन् व्यनदद् भृशम्॥१०॥
तां स आपततीं वीक्ष्य भगवान् समवस्थितः । जग्राह लीलया प्राप्तां गरुत्मानिव पन्नगीम्॥११॥
स्वपौरुषे प्रतिहते हतमानो महासुरः । नैच्छद् गदां दीयमानां हरिणा विगतप्रभः ॥१२॥
जग्राह त्रिशिखं शूलं ज्वलज्ज्वलनलोलुपम् । यज्ञाय धृतरूपाय विप्रायाभिचरन् यथा ॥१३॥

तदोजसा दैत्यमहाभटार्पितं चकासदन्तः ख उदीर्णदीधिति ।
चक्रेण चिच्छेद निशातनेमिना हरिर्यथा ताक्ष्यंपतत्रमुज्झितम् ॥१४॥

वृक्णे स्वशूले बहुधारिणा हरेः प्रत्येत्य विस्तीर्णमुरो विभूतिमत् ।
प्रवृद्धरोषः स कठोरमुष्टिना नदन् प्रहृत्यान्तरधीयतासुरः ॥१५॥

तेनेत्थमाहतः क्षत्तर्भगवानादिसूकरः । नाकम्पत मनाक् क्वापि स्रजा हत इव द्विपः ॥१६॥
अथोरुधा सृजन्मायां योगमायेश्वरे हरौ । यां विलोक्य प्रजास्त्रस्ता मेनिरेऽस्योपसंयमम् ॥१७॥
प्रववुर्वायवश्चण्डास्तमः पांसवमैरयन् । दिग्भ्यो निपेतुर्ग्रावाणः क्षेपणैः प्रहिता इव ॥१८॥
द्यौर्नष्टभगणाभ्रौघैः सविद्युत्स्तनयित्नुभिः । वर्षद्भिः पूयकेशासृग्विण्मूत्रास्थीनि चासकृत्॥१९॥
गिरयः प्रत्यदृश्यन्त नानायुधमुचोऽनघ । दिग्वाससो यातुधान्यः शूलिन्यो मुक्तमूर्धजाः ॥२०॥
बहुभिर्यक्षरक्षोभिः पत्त्यश्वरथकुञ्जरैः । आततायिभिरुत्सृष्टा हिंस्रा वाचोऽतिवैशसाः ॥२१॥
प्रादुष्कृतानां मायानामासुरीणां विनाशयत् । सुदर्शनास्त्रं भगवान् प्रायुङ्क्त दयितं त्रिपात्॥२२॥

प्रति । अतद्विदां भगवत्प्रभावमजानताम् । स्म साश्चर्यम् ॥ ६ ॥ आत्तचक्रं निशाम्य दृष्ट्वा पुनरग्रतो-व्यवस्थितं च विलोक्य । दन्तच्छदमधरोष्ठम् ॥ ७ ॥ संचक्षाणः पश्यन् । हतोऽसि पक्षे ज्ञातोऽसि ॥ ८ ॥ सव्येन वामेन । मिषतः पश्यतः सतः वातरंहसं वायुवेगाम् ॥ ९ ॥ घटस्व प्रयत्नं कुरु ॥ १० । ११ । १२ ॥ ज्वलन् ज्वालायुक्तो यो ज्वलनोऽग्निस्तद्वत । यज्ञाय विष्णवे । अभिचारं कुर्वन् कृत्यां प्रयुञ्जन् ॥ १३ ॥ तत् त्रिशूलम् । अन्तः खे आकाशमध्ये । दीधितिः दीप्तिः । निशातनेमिना तीक्ष्ण धारेण । हरिर्वराह इन्द्रश्च । पतत्रं पक्षम् । एतच्चादिपर्वणि अमृताहरणप्रकरणे द्रष्टव्यम् ॥ १४ ॥ अरिणा चक्रेण वृक्णे छिन्ने । प्रत्येत्य सम्मुखमागत्य हरेरुरः प्रहृत्य । विभूतिर्लक्ष्मीः ॥ १५ ॥ मनाक् ईषदपि क्वाप्यङ्गे ॥ १६ ॥ उरुधा बहुधा । अस्य जगतः प्रलयम् ॥ १७ ॥ यातुधान्यः राक्षस्यः । मूर्धजाः केशाः ॥ २० ॥ छिन्धि भिन्धीत्येवंभूता अतिक्रूरा उच्चारिता अभूवन्नेति शेषः ॥ २१ ॥ माया विनाशयत् विनाशयितुं प्रायुङ्क्त प्रयुक्तवान् शेषे षष्ठी हेतौ शता । त्रीणि सवनानि पादा यस्य स यज्ञमूर्तिः

तदा दितेः समभवत्सहसा हृदि वेपथुः । स्मरन्त्या भर्तुरादेशं स्तनाच्चासृक् प्रसुस्रुवे ॥२३॥
विनष्टासु स्वमायासु भूयश्चाव्रज्य केशवम् । रुषोपगूहमानोऽमुं ददृशेऽवस्थितं बहिः ॥२४॥
तं मुष्टिभिर्विनिघ्नन्तं वज्रसारैरधोक्षजः । करेण कर्णमूलेऽहन् यथा त्वाष्ट्रं मरुत्पतिः ॥२५॥

स आहतो विश्वजिता ह्यवज्ञया परिभ्रमद्गात्र उदस्तलोचनः ।
विशीर्णबाह्वङ्घ्रिशिरोरुहोऽपतद् यथा नगेन्द्रो लुलितो नभस्वता ॥२६॥
क्षितौ शयानं तमकुण्ठवर्चसं करालदंष्ट्रं परिदष्टदच्छदम् ।
अजादयो वीक्ष्य शशंसुरागता अहो इमां को नु लभेत संस्थितिम् ॥२७॥
यं योगिनो योगसमाधिना रहो ध्यायन्ति लिङ्गादसतो मुमुक्षया ।
तस्यैष दैत्यायसदः पदाहतो मुखं प्रपश्यस्तनुमुत्ससर्ज ह ॥२८॥

एतौ तौ पार्षदावस्य शापाद् यातावसद्गतिम् । पुनः कतिपयैः स्थानं प्रपत्स्येते ह जन्मभिः ॥२९॥

देवा ऊचुः

नमो नमस्तेऽखिलयज्ञतन्तवे स्थितौ गृहीतामलसत्त्वमूर्तये ।
दिष्ट्या हतोऽयं जगतामरुन्तुदस्त्वत्पादभक्त्या वयमीश निर्वृताः ॥ ३० ॥

मैत्रेय उवाच

एवं हिरण्याक्षमसह्यविक्रमं स सादयित्वा हरिरादिसूकरः ।
जगाम लोकं स्वमखण्डितोत्सवं समीडितः पुष्करविष्टरादिभिः ॥ ३१ ॥
मया यथानूक्तमवादि ते हरेः कृतावतारस्य सुमित्र चेष्टितम् ।
यथा हिरण्याक्ष उदारविक्रमो महामृधे क्रीडनवन्निराकृतः ॥ ३२ ॥

सूत उवाच

इति कौषारवाख्यातामाश्रुत्य भगवत्कथाम् । क्षत्ताऽऽनन्दं परं लेभे महाभागवतो द्विज ॥३३॥
अन्येषां पुण्यश्लोकानामुद्दामयशसां सताम् । उपश्रुत्य भवेन्मोदः श्रीवत्साङ्कस्य किं पुनः ॥३४॥
यो गजेन्द्रं झषग्रस्तं ध्यायन्तं चरणाम्बुजम् । क्रोशन्तीनां करेणूनां कृच्छ्रतोऽमोचयद् द्रुतम् ॥३५॥

॥२२॥ यदा प्रायुङ्क्त तदा । वेपथुः कम्पः । असृक् रक्तम् ॥२३॥ उपगूहमानः सम्मर्दयन् ॥२४॥ सारैः कठोरैः । मरुत्पतिरिन्द्रो यथा वृत्रम् ॥ २५ ॥ वायुना ऊन्मूलितो यथा महावृक्षः । उदस्ते बहिर्निर्गते ॥ २६ ॥ संस्थितिं मृत्युम् ॥ २७ ॥ रह एकान्ते । लिङ्गशरीरात् । अपसदो नीचः । हेत्याश्चर्ये । वराहस्य पूर्वपादयोरेव करत्वात् करेणाऽहन् पदा हत इत्यनेन च न विरोधः ॥ २८ ॥ कतिपयैस्त्रिभिः ह निश्चितम् ॥ २९ ॥ तन्तवे प्रवर्तकाय । अरुन्तुदो मर्मभेदी । निर्वृताः सुखिनो जाताः ॥ ३० ॥ सादयित्वा मारयित्वा । पुष्करविष्टरः कमलासनः ब्रह्मा ॥३१॥ यथानूक्तं यथोपदेशम् । ते तुभ्यम् । हे सुमित्र विदुर ! निराकृतो मारितः ॥३२॥ हे द्विज शौनक ! ॥३३॥ उद्दामम् उत्कृष्टम् ॥३४॥ झषो ग्राहः

तं सुखाराध्यमृजुभिरनन्यशरणैर्नृभिः । कृतज्ञः को न सेवेत दुराराध्यमसाधुभिः ॥३६॥
यो वै हिरण्याक्षवधं महाद्भुतं विक्रीडितं कारणसूकरात्मनः ।
शृणोति गायत्यनुमोदतेऽञ्जसा विमुच्यते ब्रह्मवधादपि द्विजाः ॥ ३७ ॥
एतन्महापुण्यमलं पवित्रं धन्यं यशस्यं पदमायुराशिषाम् ।
प्राणेन्द्रियाणां युधि शौर्यवर्धनं नारायणोऽन्ते गतिरङ्ग शृण्वताम् ॥ ३८ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां तृतीयस्कन्धे हिरण्याक्षवधो नाम एकोनविंशोऽध्यायः॥ १९॥

अथ विंशोऽध्यायः

शौनक उवाच

महीं प्रतिष्ठामध्यस्य सौते स्वायम्भुवो मनुः । कान्यन्वतिष्ठद् द्वाराणि मार्गायावरजन्मनाम् ॥१॥
क्षत्ता महाभागवतः कृष्णस्यैकान्तिकः सुहृत् । यस्तत्याजाग्रजं कृष्णे सापत्यमघवानिति॥ २ ॥
द्वैपायनादनवरो महित्वे तस्य देहजः । सर्वात्मना श्रितः कृष्णं तत्परांश्चाप्यनुव्रतः ॥ ३ ॥
किमन्वपृच्छन्मैत्रेयं विरजास्तीर्थसेवया । उपगम्य कुशावर्त आसीनं तत्त्ववित्तमम् ॥ ४ ॥
तयोः संवदतोः सूत प्रवृत्ता ह्यमलाः कथाः । आपो गाङ्गा इवाघघ्नीर्हरेः पादाम्बुजाश्रयाः॥ ५॥
ता नः कीर्तय भद्रं ते कीर्तन्योदारकर्मणः । रसज्ञः को नु तृप्यते हरिलीलामृतं पिबन् ॥ ६ ॥
एवमुग्रश्रवाः पृष्ट ऋषिभिर्नैमिषायनैः । भगवत्यर्पिताध्यात्मस्तानाह श्रूयतामिति ॥ ७ ॥

सूत उवाच

हरेर्धृतक्रोडतनोः स्वमायया निशम्य गोरुद्धरणं रसातलात् ।
लीलां हिरण्याक्षमवज्ञया हतं संजातहर्षो मुनिमाह भारतः ॥८॥

करेणूनां हस्तिनीनाम् ॥ ३५ ॥ ऋजुभिरकुटिलैः ॥ ३६ ॥ अञ्जसा आशु । ब्रह्म ज्ञानं तेन वध्यते नश्यते इति ब्रह्मवधः संसारस्तस्माद्वा ॥ ३७ ॥ एतत् वराहचरितम् । पदं रक्षकम् ॥ ३८ ॥

इति श्रीमद्भागवते महापुराणे तृतीयस्कन्धे गूढार्थदीपिन्यामेकोनविंशोऽध्यायः ।

विंशे प्रारभ्य यः पूर्वं रुद्धो वाराहगाथया ।
सोऽयं वक्तुं मनोर्वंशं सर्गोऽनुस्मार्यते पुनः ॥१॥

हे सौते रोमहर्षणपुत्र ! प्रतिष्ठामध्यस्य स्थानं प्राप्य । अवरजन्मनां पश्चात्तनकाले जातानां प्राणिनां मार्गाय उत्पत्तये कानि साधनानि अनुष्ठितवान् ॥ १ ॥ कृष्णे अघवानिति हेतोः यः क्षत्ता सापत्यं पुत्रसहितं धृतराष्ट्रं तत्याज स कुशावर्ते गङ्गाद्वारे मैत्रेयमुपगम्य किमन्वपृच्छत् इति त्रयाणा, मेकान्वयः । कथंभूतः । अनवरोऽन्यूनः ।२।३।४। अघघ्न्यः गङ्गासम्बन्धिन्यः आप इव ॥५।६॥ उग्रश्रवा नाम सूतः । अध्यात्मं मनः । एवमिति व्यासोक्तिः ॥ ७ ॥ मायया कृपया । गोः पृथिव्याः । उद्धरण

विदुर उवाच

प्रजापतिपतिः सृष्ट्वा प्रजासर्गे प्रजापतीन् । किमारभत मे ब्रह्मन् प्रब्रूह्यव्यक्तमार्गवित् ॥९॥

ये मरीच्यादयो विप्रा यस्तु स्वायम्भुवो मनुः । ते वै ब्रह्मण आदेशात्कथमेतदभावयन् ॥१०॥

सद्वितीयाः किमसृजन् स्वतन्त्रा उत कर्मसु । आहोस्वित्संहताः सर्व इदं स्म समकल्पयन् ॥११॥

मैत्रेय उवाच

दैवेन दुर्वितर्क्येण परेणानिमिषेण च । जातक्षोभाद्भगवतो महानासीद् गुणत्रयात् ॥१२॥

रजःप्रधानान्महतस्त्रिलिङ्गो दैवचोदितात् । जातः ससर्ज भूतादिर्वियदादीनि पञ्चशः ॥१३॥

तानि चैकैकशः स्रष्टुमसमर्थानि भौतिकम् । संहत्य दैवयोगेन हैममण्डमवासृजन् ॥१४॥

सोऽशयिष्टाब्धिसलिले आण्डकोषो निरात्मकः । साग्रं वै वर्षसाहस्रमन्ववात्सीत्तमीश्वरः ॥१५॥

तस्य नाभेरभूत्पद्मं सहस्रार्कोरुदीधिति । सर्वजीवनिकायौको यत्र स्वयमभूत्स्वराट् ॥१६॥

सोऽनुविष्टो भगवता यः शेते सलिलाशये । लोकसंस्थां यथापूर्वं निर्ममे संस्थया स्वया ॥१७॥

ससर्जच्छाययाविद्यां पञ्चपर्वाणमग्रतः । तामिस्रमन्धतामिस्रं तमो मोहो महातमः ॥१८॥

विससर्जात्मनः कायं नाभिनन्दंस्तमोमयम् । जगृहुर्यक्षरक्षांसि रात्रिं क्षुत्तृट्समुद्भवाम् ॥१९॥

क्षुत्तृड्भ्यामुपसृष्टास्ते तं जग्धुमभिदुद्रुवुः । मा रक्षतैनं जक्षध्वमित्यूचुः क्षुत्तृडर्दिताः ॥२०॥

देवस्तानाह संविग्नो मा मां जक्षत रक्षत । अहो मे यक्षरक्षांसि प्रजा यूयं बभूविथ ॥२१॥

देवताः प्रभया या या दीव्यन् प्रमुखतोऽसृजत् । ते अहार्षुर्देवयन्तो विसृष्टां तां प्रभामहः ॥२२॥

देवोऽदेवाञ्जघनतः सृजति स्मातिलोलुपान् । त एनं लोलुपतया मैथुनायाभिपेदिरे ॥२३॥

ततो हसन् स भगवानसुरैर्निरपत्रपैः । अन्वीयमानस्तरसा क्रुद्धो भीतः परापतत् ॥२४॥

स उपव्रज्य वरदं प्रपन्नार्तिहरं हरिम् । अनुग्रहाय भक्तानामनुरूपात्मदर्शनम् ॥२५॥

रूपाम् । भारतो विदुरः ॥८॥ एतत् जगत् । अभावयन् प्रावर्धयन् ॥ १० ॥ सद्वितीयाः सभार्याः । स्वतन्त्राः भार्यानपेक्षाः । स्मेत्यनेन संहत्य सर्जनमेव प्रसिद्धम् ॥ ११ ॥ अनिमिषेण कालेन । गुणत्रयात् प्रकृतेः ॥ १२ ॥ त्रिलिङ्गस्त्रिगुणः भूतादिरहङ्कारो जातः सन् ॥ १३ ॥ संहत्य मिलित्वा ॥ १४ ॥ निरात्मकोऽचेतनः ॥ १५ ॥ निकायः समूहः ओकः स्थानम् ॥ १६ ॥ यः शेते तेन भगवता प्रेरितः सन् स ब्रह्मा संस्थां रचनाम् संस्थया परिपाट्या नामरूपादिक्रमेण ॥ १७ ॥ छायया तमोमयेन कायेन ॥ १८ ॥ विसृष्टकाय एव रात्र्यभिमानिनी देवता तां जगृहु तमसो जातानि यक्षादीनि ॥ १९ ॥ उपसृष्टाः पीडिताः जक्षध्वं भक्षयत ॥ २० ॥ हे यक्षरक्षांसि ! ॥ २१ ॥ प्रभया प्रभारूपया तन्वा दीव्यन् द्योतमानो ब्रह्मा माया द्युतिमत्यः सुररूपाः प्रजाः प्राधान्येन असृजत् ते देवतापरपर्यायाः पुत्राः तेन विसृष्टाम् अहोरूपां प्रभां सतीं क्रीडयन्तो जगृहुः ॥ २२ ॥ अदेवान् असुरान् ॥ २३ ॥ परापतत् पलायितवान् ॥ २४ ॥ उपव्रज्य मनसैवोपसाद्य निवेदयामासेति शेषः ॥ २५ ॥ प्रेषणेन

पाहि मां परमात्मंस्ते प्रेषणेनासृजं प्रजाः । ता इमा यभितुं पापा उपाक्रामन्ति मां प्रभो ॥२६॥
त्वमेकः किल लोकानां क्लिष्टानां क्लेशनाशनः । त्वमेकः क्लेशदस्तेषामनासन्नपदां तव ॥२७॥
सोऽवधार्यास्य कार्पण्यं विविक्ताध्यात्मदर्शनः । विमुञ्चात्मतनुं घोरामित्युक्तो विमुमोच ह ॥२८॥
तां क्वणच्चरणाम्भोजां मदविह्वललोचनाम् । काञ्चीकलापविलसद्दुकूलच्छन्नरोधसम् ॥२९॥
अन्योन्याश्लेषयोत्तुङ्गनिरन्तरपयोधराम् । सुनासां सुद्विजां स्निग्धहासलीलावलोकनाम् ॥३०॥
गूहन्तीं व्रीडयाऽऽत्मानं नीलालकवरूथिनीम् । उपलभ्यासुरा धर्म सर्वे सम्मुमुहुः स्त्रियम् ॥३१॥
अहो रूपमहो धैर्यमहो अस्या नवं वयः । मध्ये कामयमानानामकामेव विसर्पति ॥३२॥
वितर्कयन्तो बहुधा तां संध्यां प्रमदाकृतिम् । अभिसम्भाव्य विस्रम्भात्पर्यपृच्छन् कुमेधसः ॥३३॥
कासि कस्यासि रम्भोरु को वार्थस्तेऽत्र भामिनि । रूपद्रविणपण्येन दुर्भगान्नो विबाधसे ॥३४॥
या वा काचित्त्वमबले दिष्ट्या संदर्शनं तव । उत्सुनोषीक्षमाणानां कन्दुकक्रीडया मनः ॥३५॥

नैकत्र ते जयति शालिनि पादपद्मं घ्नन्त्या मुहुः करतलेन पतत्पतङ्गम् ।
मध्यं विषीदति बृहत्स्तनभारभीतं शान्तेव दृष्टिरमला सुशिखासमूहः ॥३६॥

इति सायंतनीं संध्यामसुराः प्रमदायतीम् । प्रलोभयन्तीं जगृहुर्मत्वा मूढधियः स्त्रियम् ॥३७॥
प्रहस्य भावगम्भीरं जिघ्रन्त्यात्मानमात्मना । कान्त्या ससर्ज भगवान् गन्धर्वाप्सरसां गणान् ॥३८
विससर्ज तनुं तां वै ज्योत्स्नां कान्तिमतीं प्रियाम् । त एव चाददुः प्रीत्या विश्वावसुपुरोगमाः ॥३९
सृष्ट्वा भूतपिशाचांश्च भगवानात्मतन्द्रिणा । दिग्वाससो मुक्तकेशान् वीक्ष्य चामीलयद् दृशौ ॥४०॥
जगृहुस्तद्विसृष्टां तां जृम्भणाख्यां तनुं प्रभोः । निद्रामिन्द्रियविक्लेप्ते यया भूतेषु दृश्यते ।
येनोच्छिष्टान्धर्षयन्ति तमुन्मादं प्रचक्षते ॥४१॥
ऊर्जस्वन्तं मन्यमान आत्मानं भगवानजः । साध्यान् गणान् पितृगणान् परोक्षेणासृजत्प्रभुः ॥४२
त आत्मसर्गं तं कायं पितरः प्रतिपेदिरे । साध्येभ्यश्च पितृभ्यश्च कवयो यद्वितन्वते ॥४३॥

प्रेरणया । यभितुं मैथुनं कर्तुं मां परिवेष्टन्ते ॥ २६ ॥ तव अनासन्नो अनाश्रितौ पादौ यैः ॥ २७ ॥ अवधार्य ज्ञात्वा । विविक्तमसंदिग्धम् अध्यात्मदर्शनं परचित्तज्ञानं यस्य ॥ २८ ॥ तामिति त्रिकम् । रोधः कटिप्रदेशः । आश्लेषया 'सुपां सुलुक्' इति टाप्प्रत्ययस्य यादेशः । निरन्तरौ अव्यवधानौ । सुद्विजां सुदतीम् वरूथः समूहः । उपलभ्य मत्वा धर्म हे विदुर ! ॥२९।३०।३१।३२। अभिसंभाव्य सत्कृत्य । विस्रम्भात् प्रणयात् ॥ ३३ ॥ रूपमेव द्रविणं तेन पण्येन व्यवहारयोग्येन दुर्भगान् तद्भोग हीनान् ॥३४। उत्सुनोषि विमथ्नासि ।३५। हे शलिनि श्लाघ्ये । उदधश्चलन्तं पतङ्गं कन्दुकं घ्नन्त्यास्तव एकत्र न तिष्ठति श्राम्यति । मध्यं च कृशीभवति भङ्गं प्राप्नोति वा । दृष्टिरमला प्रेम पूर्णा सुन्दरः केशकलापश्च तेऽस्ति अतः पादौ प्रसार्य उत्सङ्गे शपनं कर्तव्यमिति भावः ॥ ३६ । ३७ ॥ आत्मानं देहम् आत्मना स्वयम् । कान्त्या सौन्दर्येण ॥ ३८ । ३९ ॥ तन्द्रिणा आलस्येन ॥ ४० ॥ जगृहुरिति सार्द्धम् । तां तनुं ते भूतादयो जगृहुः । तस्या एव आलस्यं जृम्भणं निद्रा उन्माद इति चतुर्धा भेदः । यया तां निद्राम् । येन विक्लेदेन धर्षयन्ति भ्रान्तान् कुर्वन्ति तमित्यन्वयः ॥४१॥ ऊर्जस्वन्तम् बलवन्तम् । परोक्षेण अदृश्यरूपेण ॥ ४२ ॥ ते साध्याः पितरश्च तं कायं हव्यकव्यान्नरूपम् । यत् येन कायेन निमित्तेन क्रमेण

सिद्धान् विद्याधरांश्चैव तिरोधानेन सोऽसृजत् । तेभ्योऽददात्तमात्मानमन्तर्धानाख्यमद्भुतन् ४४
सकिन्नरान् किम्पुरुषान् प्रत्यात्म्येनासृजत्प्रभुः । मानयन्नात्मनाऽऽत्मानमात्माभासं विलोकयम् ४५
ते तु तज्जगृहू रूपं त्यक्तं यत्परमेष्ठिना । मिथुनीभूय गायन्तस्तमेवोषसि कर्मभिः ॥४६॥
देहेन वै भोगवता शयानो बहुचिन्तया । सर्गेऽनुपचिते क्रोधादुत्ससर्ज ह तद्वपुः ॥४७॥
येऽहीयन्तामुतः केशा अहयस्तेऽङ्ग जज्ञिरे । सर्पाः प्रसर्पतः क्रूराः नागा भोगोरुकन्धराः ॥४८॥
स आत्मानं मन्यमानः कृतकृत्यमिवात्मभूः । तदा मनून् ससर्जान्ते मनसा लोकभावनान् ॥४९॥
तेभ्यः सोऽत्यसृजत्स्वीयं पुरं पुरुषमात्मवान् । तान्दृष्ट्वा ये पुरा सृष्टाः प्रशशंसुः प्रजापतिम् ५०
अहो एतज्जगत्स्रष्टः सुकृतं बत ते कृतम् । प्रतिष्ठिताः क्रिया यस्मिन् साकमन्नमदामहे ॥५१॥
तपसा विद्यया युक्तो योगेन सुसमाधिना । ऋषीनृषिर्हृषीकेशः ससर्जाभिमताः प्रजाः ॥५२॥
तेभ्यश्चैकैकशः स्वस्य देहस्यांशमदादजः । यत्तत्समाधियोगर्द्धितपोविद्याविरक्तिमत् ॥५३॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां तृतीयस्कन्धे गूढार्थदीपिन्यां विंशोऽध्यायः ।

अथैकविंशोऽध्यायः

विदुर उवाच

स्वायम्भुवस्य च मनोर्वंशः परमसम्मतः । कथ्यतां भगवन् यत्र मैथुनेनैधिरे प्रजाः ॥ १ ॥
प्रियव्रतोत्तानपादौ सुतौ स्वायम्भुवस्य वै । यथाधर्मं जुगुपतुः सप्तद्वीपवतीं महीम् ॥ २ ॥
तस्य वै दुहिता ब्रह्मन्देवहूतीति विश्रुता । पत्नी प्रजापतेरुक्ता कर्दमस्य त्वयानघ ॥ ३ ॥

हव्यं कव्यं चान्नं समर्पयन्ति ॥ ४३ ॥ तिरोधानेन अन्तर्धानशक्त्या । आत्मानं शरीरम् ॥ ४४ ॥ प्रत्यात्म्येन प्रतिबिम्बेन । आत्माभासं प्रतिबिम्बम् ॥ ४५ ॥ तत्प्रतिबिम्बात्मकम् गायन्तो बभूवुः ॥ ४६ ॥ भोगवता सर्पशरीराकारवल्लम्बमानेन । अनुपचितेऽप्रवृद्धे सति ॥ ४७ ॥ अमुतोऽमुष्माद् देहात् ये प्रच्युतास्तेऽहयः । प्रसर्पतो देहात् सर्पाः । उत्सृष्टात् अचलात् देहात् नागा गतिहीना अजगराः । भोगेन लम्बमानशरीरेण सहिता उरु बहु विस्तीर्णा कन्धरा येषां ते क्रूराः ॥ ४८ ॥ यदा मन्यमान आसीत्तदा । भावनान् वृद्धिकरान् ॥ ४९ ॥ पुरुषाकारं पुरं देहम् अत्यादरेण ददौ । तान्मनून् ॥ ५० ॥ एतत् मनुष्यनिर्माणरूपं सुकृतं सुष्ठु कार्यं कृतम् । क्रिया भुक्तिमुक्तिसाधनरूपाः । साकं सहैव अन्नं हविर्भागादि । हे ब्रह्मन् ॥५१॥ हृषीकेशो जितेन्द्रियः ऋषिर्ब्रह्मा । ऋषिरूपाः ।५२। यत् समाध्यादियुक्तं शरीरं तस्य एकैकमंशम् ॥ ५३ ॥

इति श्रीमद्भागवते महापुराणे तृतीयस्कन्धे गूढार्थदीपिन्यां विंशोऽध्यायः ।

एकविंशे तपस्तुष्टः संस्तुतश्चाह यद्धरिः ।
कर्दमं तद्विवाहार्थमाश्रमं मनुरागमत् ॥

चकारो हेत्वर्थे ॥१॥ वै औरसत्वेन प्रसिद्धौ । यथा एतद्वदेति तृतीयेनान्वयः ॥ २।३ ॥

तस्यां स वै महायोगी युक्तायां योगलक्षणैः । ससर्ज कतिधा वीर्यं तन्मे शुश्रूषवे वद ॥ ४ ॥
रुचिर्यो भगवान् ब्रह्मन्दक्षो वा ब्रह्मणः सुतः । यथा ससर्ज भूतानि लब्ध्वा भार्यां च मानवीम्५

मैत्रेय उवाच

प्रजाः सृजेति भगवान् कर्दमो ब्रह्मणोदितः । सरस्वत्यां तपस्तेपे सहस्राणां समा दश ॥ ६ ॥
ततः समाधियुक्तेन क्रियायोगेन कर्दमः । सम्प्रपेदे हरिं भक्त्या प्रपन्नवरदाशुषम् ॥ ७ ॥
तावत्प्रसन्नो भगवान् पुष्कराक्षः कृते युगे । दर्शयामास तं क्षत्तः शाब्दं ब्रह्म दधद्वपुः ॥ ८ ॥
स तं विरजमर्काभं सितपद्मोत्पलस्रजम् । स्निग्धनीलालकव्रातवक्त्राब्जं विरजोऽम्बरम् ॥९॥
किरीटिनं कुण्डलिनं शङ्खचक्रगदाधरम् । श्वेतोत्पलक्रीडनकं मनःस्पर्शस्मितेक्षणम् ॥१०॥
विन्यस्तचरणाम्भोजमंसदेशे गरुत्मतः । दृष्ट्वा खेऽवस्थितं वक्षःश्रियं कौस्तुभकन्धरम् ११
जातहर्षोऽपतन्मूर्ध्ना क्षितौ लब्धमनोरथः । गीर्भिस्त्वभ्यगृणात्प्रीतिस्वभावात्मा कृताञ्जलिः १२

ऋषिरुवाच

जुष्टं बताद्याखिलसत्त्वराशेः सांसिध्यमक्ष्णोस्तव दर्शनान्नः ।
यद्दर्शनं जन्मभिरीड्य सद्भिराशासते योगिनो रूढयोगाः ॥१३॥
ये मायया ते हतमेधसस्त्वत्पादारविन्दं भवसिन्धुपोतम् ।
उपासते कामलवाय तेषां रासीश कामान्निरयेऽपि ये स्युः ॥१४॥
तथा स चाहं परिवोढुकामः समानशीलां गृहमेधधेनुम् ।
उपेयिवान्मूलमशेषमूलं दुराशयः कामदुघाङ्घ्रिपस्य ॥१५॥
प्रजापतेस्ते वचसाधीश तन्त्या लोकः किलायं कामहतोऽनुबद्धः ।
अहं च लोकानुगतो वहामि बलिं च शुक्लानिमिषाय तुभ्यम् ॥१६॥

लक्षणैः शमदमादिभिः कति संख्याकं वीर्यमपत्यम् ॥४॥ मनुपुत्रीम् आकूतिं प्रसूतिं च क्रमेण यथा तच्च वदेति चकारस्यान्वयः ॥५॥ दशसहस्रवर्षाणि । तेपे चकार । पाकं पचतीतिवन्निर्देशः ॥६॥ ततः तस्मिंस्तपसि । दाशुषं वरदातारं हरिं सिषेवे । ॥७॥ यावत्सम्प्रपेदे तावदिति प्रसादेऽविलम्बः सूचितः । शाब्दं वेदैकवेद्यं यद् ब्रह्म तन्मयम् ॥८॥ स इति चतुष्कम् । स तं खेऽवस्थितं दृष्ट्वा मूर्ध्ना क्षितौ अपतत् गीर्भिश्च अस्तौदित्यन्वयः । व्रातः समूहः वक्त्राब्जे यस्य । मनःस्पर्शं मनःप्रीतिजनकम् । प्रीतिस्वभावः प्रीतिजनकः आत्मा मनो यस्य ॥ ९।१०।११।१२ ॥ बत हर्षे । दर्शनात् नोऽस्माभिः अक्ष्णोः सांसिध्यं जुष्टं साफल्यं प्राप्तम् । आशासते प्रार्थयन्ते ॥१३॥ ये कामलवार्थमुपासते ते हतबुद्धयः अथाऽपि तेषां तोषार्थं तान् ददासि ये कामा नरकतुल्यशूकरादियोनिष्वपि स्युः ॥१४॥ सोऽहं दुराशयः कल्पवृक्षस्य तव मूलमङ्घ्रिं प्राप्तः । अशेषपदार्था मूले तले यस्य । गृहमेधो गृहाश्रमस्तत्र -धेनुं भार्याम् ॥१५॥ वचसा तन्त्या वेदरूपया रज्ज्वा अतः अनिमिषं कालरूपं त्वां प्रसादयितुं बलिं

लोकांश्च लोकानुगतान् पशूंश्च हित्वा श्रितास्ते चरणातपत्रम् ।
परस्परं त्वद्गुणवादसीधुपीयूषनिर्यापितदेहधर्माः ॥१७॥
न तेऽजराक्षभ्रमिरायुरेषां त्रयोदशारं त्रिशतं षष्टिपर्व ।
षण्नेम्यनन्तच्छदि यत्त्रिणाभि करालस्रोतो जगदाच्छिद्य धावत् ॥१८॥
एकः स्वयं सञ्जगतः सिसृक्षया द्वितीययाऽऽत्मन्नधियोगमायया ।
सृजस्यदः पासि पुनर्ग्रसिष्यसे यथोर्णनाभिर्भगवन् स्वशक्तिभिः ॥१९॥
नैतद्बताधीश पदं तवेप्सितं यन्मायया नस्तनुषे भूतसूक्ष्मम् ।
अनुग्रहायास्त्वपि यर्हि मायया लसत्तुलस्या तनुवा विलक्षितः ॥२०॥
तं त्वानुभूत्योपरतक्रियार्थं स्वमायया वर्तितलोकतन्त्रम् ।
नमाम्यभीक्ष्णं नमनीयपादसरोजमल्पीयसि कामवर्षम् ॥२१॥

ऋषिरुवाच

इत्यव्यलीकं प्रणुतोऽब्जनाभस्तमावभाषे वचसामृतेन ।
सुपर्णपक्षोपरि रोचमानः प्रेमस्मितोद्वीक्षणविभ्रमद्भ्रूः ॥२२॥

श्रीभगवानुवाच

विदित्वा तव चैत्यं मे पुरैव समयोजि तत् । यदर्थमात्मनियमैस्त्वयैवाहं समर्चितः ॥२३॥
न वै जातु मृषैव स्यात्प्रजाध्यक्ष मदर्हणम् । भवद्विधेष्वतितरां मयि संगृभितात्मनाम् ॥२४॥
प्रजापतिसुतः सम्राण्मनुर्विख्यातमङ्गलः । ब्रह्मावर्तं योऽधिवसन् शास्ति सप्तार्णवां महीम् ।२५।

कर्ममयीं त्वदाज्ञां पालयामि तदर्थं भार्यां चेच्छामीति चकारास्यान्वयः ॥१६॥ ये आश्रितास्तेषामेषा मायुराकृष्य धावन्न भवति । किम् । जगदाच्छिद्य धावदपि ते यत् त्रिणाभि कालचक्रं तत् । कीदृशम् । अजरे ब्रह्मणि अक्षरूपे भ्रमि र्भ्रमणं यस्य । अधिकमासेन सह त्रयोदश आरा यस्य । त्रिशतं षष्टिश्च अहोरात्राः पर्वाणि यस्य । षड् ऋतवो नेमयो यस्य । अनन्ताः क्षणलवादयः छदाः पत्राकारा धाराः सन्ति यस्य । त्रीणि चातुर्मास्यानि नाभय आधारभूतानि बलयानि यस्य । करालस्रोतः तीव्रवेगम् । लोकान् न्यायमीमांसादिशास्त्राभिज्ञान् । अनुगतान् तदुपदेशवाक्येषु विश्वसतः शास्त्रानभिज्ञान् । तेषामुभयेषामपि पशुत्वं भक्तिराहित्यादिति चक्रवर्ती व्याचष्टे । जगद्विस्मारकत्वात् शीधु मद्यम् मृत्यु दूरीकरणादतिस्वादुत्वाच्च पीयूषम् ॥१७।१८॥ आत्मनि । मायया हेतुभूतया स्वीकृता याः सत्त्वाद्याः शक्तयस्ताभिः । अदो विश्वम् ।१९। नोऽस्माकं भक्तानां यत्पदं शब्दादिकं विषयं कृपया विस्तारयसीति एतत्तव ईप्सितं न तथापि अस्तु ईप्सितं भवतु । यर्हि यतः तनुवा श्रीमूर्त्या त्वमपि विलक्षितोऽसि दृष्टोऽसि । अतो मुक्तिदोऽपि भक्ताग्रहतो भुक्तिदोऽसीति भावः । 'माया दम्भे कृपायां च' इति विश्वः ।२०। त्वा त्वाम् । भक्तानां निजानुभवेन शिथिलितकर्मफलभोगम् । तन्त्रमुपकरणम् । अल्पीयसि निकृष्टेऽपि सकाम-भक्तेऽस्मद्विधे ॥२१॥ अव्यलीकं निष्कपटं स्तुतः ॥ २२॥ चैत्यं चित्ताभिप्रायम् । मे मया समयोजि सम्पादितम् ॥२३॥ संगृहीतः निश्चलीकृतः आत्मा चित्तं यै स्तेषां यन्मदर्हणम् ॥२४॥ मङ्गलं यशः

स चेह विप्र राजर्षिर्महिष्या शतरूपया । आयास्यति दिदृक्षुस्त्वां परश्वो धर्मकोविदः ॥२६॥
आत्मजामसितापाङ्गीं वयःशीलगुणान्विताम् । मृगयन्तीं पतिं दास्यत्यनुरूपाय ते प्रभो ॥२७॥
समाहितं ते हृदयं यत्रेमान् परिवत्सरान् । सा त्वां ब्रह्मन्नृपवधूः काममाशु भजिष्यति ॥२८॥
या त आत्मभृतं वीर्यं नवधा प्रसविष्यति । वीर्ये त्वदीये ऋषय आधास्यन्त्यञ्जसाऽऽत्मनः ॥२९॥
त्वं च सम्यगनुष्ठाय निदेशं म उशत्तमः । मयि तीर्थीकृताशेषक्रियार्थो मां प्रपत्स्यसे ॥३०॥
कृत्वा दयां च जीवेषु दत्त्वा चाभयमात्मवान् । मय्यात्मानं सह जगद् द्रक्ष्यस्यात्मनि चापि माम्
सहाहं स्वांशकलया त्वद्वीर्येण महामुने । तव क्षेत्रे देवहूत्यां प्रणेष्ये तत्त्वसंहिताम् ॥३२॥

मैत्रेय उवाच

एवं तमनुभाष्याथ भगवान् प्रत्यगक्षजः । जगाम बिन्दुसरसः सरस्वत्या परिश्रितात् ॥३३॥
निरीक्षतस्तस्य ययावशेषसिद्धेश्वराभिष्टुतसिद्धमार्गः ।
आकर्णयन् पत्ररथेन्द्रपक्षैरुच्चारितं स्तोममुदीर्णसाम ॥३४॥
अथ सम्प्रस्थिते शुक्ले कर्दमो भगवानृषिः । आस्ते स्म बिन्दुसरसि तं कालं प्रतिपालयन् ॥३५॥
मनुः स्यन्दनमास्थाय शातकौम्भपरिच्छदम् । आरोप्य स्वां दुहितरं सभार्यः पर्यटन्महीम् ॥३६॥
तस्मिन् सुधन्वन्नहनि भगवान् यत्समादिशत् । उपायादाश्रमपदं मुनेः शान्तव्रतस्य तत् ॥३७॥
यस्मिन् भगवतो नेत्रान्न्यपतन्नश्रुबिन्दवः । कृपया सम्परीतस्य प्रपन्नेऽर्पितया भृशम् ॥३८॥
तद्वै बिन्दुसरो नाम सरस्वत्या परिप्लुतम् । पुण्यं शिवामृतजलं महर्षिगणसेवितम् ॥४०॥
पुण्यद्रुमलताजालैः कूजत्पुण्यमृगद्विजैः । सर्वर्तुफलपुष्पाढ्यं वनराजिश्रियान्वितम् ॥४०॥
मत्तद्विजगणैर्घुष्टं मत्तभ्रमरविभ्रमम् । मत्तबर्हिनटाटोपमाह्वयन्मत्तकोकिलम् ॥४१॥
कदम्बचम्पकाशोककरञ्जबकुलासनैः । कुन्दमन्दारकुटजैश्चूतपोतैरलंकृतम् ॥४२॥
कारण्डवैः प्लवैर्हंसैः कुररैर्जलकुक्कुटैः । सारसैश्चक्रवाकैश्च चकोरैर्वल्गु कूजितम् ॥४३॥
तथैव हरिणैः क्रोडैः श्वाविद्गवयकुञ्जरैः । गोपुच्छैर्हरिभिर्मर्कैर्नकुलैर्नाभिभिर्वृतम् ॥४४॥

॥२५।२६।२७॥ यत्र यस्यां समाहितमासक्तं सा वधूः कन्या 'वधूर्जायास्नुषा कन्या' इति धरणिः ॥२८॥ आत्मनि धारितं ते वीर्यम् । नवधा कन्यारूपेण विभक्ते वीर्ये च आत्मनः पुत्रान् उत्पादयिष्यन्ति ॥२९॥ निदेशमाज्ञाम् । तीर्थीकृतः समर्पितः क्रियार्थः क्रियाफलं येन ॥३०॥ आत्मानं जगच्च सह एकीभूतम् ॥३१॥ क्षेत्रे भार्यायां त्वद्वीर्येण त्वत्कन्यापत्यवृन्देन सहाविर्भूय सांख्यशास्त्रं करिष्ये ॥३२॥ प्रत्यभूतेषु निरुद्धेषु इन्द्रियेषु जायते तथा ॥३३॥ सिद्धमार्गो वैकुण्ठमार्गः । गरुडपक्षैरूच्चारितं स्तोमं स्तोत्रसमुदायमाकर्णयन् । कीदृशम् । अभिव्यक्तं सामगानं यस्मात् ॥३४।३५॥ मनुरिति युग्मकम् । शातकौम्भाः स्वर्णमया अलङ्कारा यस्मिन् । यत् अहः समादिशत् तस्मिन्नहनि । तत्पूर्वोक्तम् । हे सुधन्वन् विदुर ॥३६।३७॥ प्रपन्ने कर्दमे ॥३८।३९॥ वनराजिर्वृक्षपङ्क्तिः ॥४०॥ घुष्टं नादितम् । आरोपो नृत्य-विलासः ॥४१॥ असनः पुष्पप्रधानः ॥४२॥ वल्गु मधुरम् ॥४३॥ श्वावित् शल्यकः । गोपुच्छैः

प्रविश्य तत्तीर्थवरमादिराजः सहात्मजः । ददर्श मुनिमासीनं तस्मिन् हुतहुताशनम् ॥४५॥
विद्योतमानं वपुषा तपस्युग्रयुजा चिरम् । नातिक्षामं भगवतः स्निग्धापाङ्गावलोकनात् ।
तद्व्याहृतामृतकलापीयूषश्रवणेन च ॥४६॥
प्रांशुं पद्मपलाशाक्षं जटिलं चीरवाससम् । उपसंसृत्य मलिनं यथार्हणमसंस्कृतम् ॥४७॥
अथोटजमुपायातं नृदेवं प्रणतं पुरः । सपर्यया पर्यगृह्णात्प्रतिनन्द्यानुरूपया ॥४८॥
गृहीतार्हणमासीनं संयतं प्रीणयन्मुनिः । स्मरन् भगवदादेशमित्याह श्लक्ष्णया गिरा ॥४९॥
नूनं चङ्क्रमणं देव सतां संरक्षणाय ते । वधाय चासतां यस्त्वं हरेः शक्तिर्हि पालिनी ॥५०॥
योऽर्केन्द्वग्नीन्द्रवायूनां यमधर्मप्रचेतसाम् । रूपाणि स्थान आधत्से तस्मै शुक्लाय ते नमः ॥५१॥
न यदा रथमास्थाय जैत्रं मणिगणार्पितम् । विस्फूर्जच्चण्डकोदण्डो रथेन त्रासयन्नघान् ॥५२॥
स्वसैन्यचरणक्षुण्णं वेपयन्मण्डलं भुवः । विकर्षन् बृहतीं सेनां पर्यटस्यंशुमानिव ॥५३॥
तदैव सेतवः सर्वे वर्णाश्रमनिबन्धनाः । भगवद्रचिता राजन् भिद्येरन् बत दस्युभिः ॥५४॥
अधर्मश्च समेधेत लोलुपैर्व्यङ्कुशैर्नृभिः । शयाने त्वयि लोकोऽयं दस्युग्रस्तो विनङ्क्ष्यति ॥५५॥
अथापि पृच्छे त्वां वीर यदर्थं त्वमिहागतः । तद्वयं निर्व्यलीकेन प्रतिपद्यामहे हृदा ॥५६॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां तृतीयस्कन्धे एकविंशोऽध्यायः ॥ २१ ॥

अथ द्वाविंशोऽध्यायः

मैत्रेय उवाच

एवमाविष्कृताशेषगुणकर्मोदयो मुनिम् । सव्रीड इव तं सम्राडुपारतमुवाच ह ॥ १ ॥

मनुरुवाच

ब्रह्मासृजत्स्वमुखतो युष्मानात्मपरीप्सया । छन्दोमयस्तपोविद्यायोगयुक्तानलम्पटान् ॥२॥

गोलाङ्गूलैः । हरिभिः सिंहैः । नाभिः कुस्तूरी मृगः ॥४४॥ अनुगा भार्या वा ॥४५॥ विद्योतेति सार्द्धम् । युक् योगः । नातिक्षामं नातिकृशम् । तद्भाषणमेव अमृतकलस्य चन्द्रस्य आ सम्यक् पीयूषं तस्य ॥४६॥ अर्हणं महारत्नम् ॥४७॥ उटजं पर्णशालाम् ॥४८॥ श्लक्ष्णया मधुरया हर्षयन् ॥४९।५०॥ स्थाने तत्तत्कार्यावसरे पालने वा । शुक्लाय विष्णवे इति मनःस्थं प्रणमति ॥५१॥ जैत्रं जयप्रदम् । अघान् पापिनः । यदा न पर्यटसि तदैव सेतवो धर्ममर्यादाः ॥ ५२।५३।५४ ॥ शयाने न्यायाऽन्यायविचारशून्ये सति सहर्षेण प्रतिपद्यामहे स्वीकुर्महे ॥ ५६ ॥

इति श्रीमद्भागवते महापुराणे तृतीयस्कन्धे गूढार्थदीपिन्यामेकविंशोऽध्यायः ।

•

द्वाविंशे स्वसुतां दत्त्वा कर्दमाय मनुर्नृपः ।
क्लिश्यन् विरहतोऽगच्छद्राजधानीमितीर्यते ॥

आविष्कृतो वर्णितः उदय उत्कर्षः यस्य । ह हर्षेण ॥ १ ॥ आत्मनो वेदस्य परीप्सया रक्ष-

तत्त्राणायासृजच्चास्मान्दोः सहस्रात्सहस्रपात् । हृदयं तस्य हि ब्रह्म क्षत्रमङ्गं प्रचक्षते ॥ ३ ॥
अतो ह्यन्योन्यमात्मानं ब्रह्म क्षत्रं च रक्षतः । रक्षति स्माव्ययो देवः स यः सदसदात्मकः ॥४॥
तव सदर्शनादेवच्छिन्ना मे सर्वसंशयाः । यत्स्वयं भगवान् प्रीत्या धर्ममाह रिरक्षिषोः ॥५॥
दिष्ट्या मे भगवान् दृष्टो दुर्दर्शो योऽकृतात्मनाम् । दिष्ट्या पादरजः स्पृष्टं शीर्ष्णा मे भवतः शिवम्
दिष्ट्या त्वयानुशिष्टोऽहं कृतश्चानुग्रहो महान् । अपावृतैः कर्णरन्ध्रैर्जुष्टा दिष्ट्योशतीर्गिरः ॥७॥
स भवान्दुहितृस्नेहपरिक्लिष्टात्मनो मम । श्रोतुमर्हसि दीनस्य श्रावितं कृपया मुने ॥८॥
प्रियव्रतोत्तानपदोः स्वसेयं दुहिता मम । अन्विच्छति पतिं युक्तं वयः शीलगुणादिभिः ॥९॥
यदा तु भवतः शीलश्रुतरूपवयोगुणान् । अशृणोन्नारदादेषा त्वय्यासीत्कृतनिश्चया ॥१०॥
तत्प्रतीच्छ द्विजाग्र्येमां श्रद्धयोपाहृतां मया । सर्वात्मनानुरूपां ते गृहमेधिषु कर्मसु ॥११॥
उद्यतस्य हि कामस्य प्रतिवादो न शस्यते । अपि निर्मुक्तसङ्गस्य कामरक्तस्य किं पुनः ॥१२॥
य उद्यतमनादृत्य कीनाशमभियाचते । क्षीयते तद्यशः स्फीतं मानश्चावज्ञया हतः ॥१३॥
अहं त्वाशृणवं विद्वन् विवाहार्थं समुद्यतम् । अतस्त्वमुपकुर्वाणः प्रत्तां प्रतिगृहाण मे ॥१४॥

ऋषिरुवाच

बाढमुद्वोढुकामोऽहमप्रत्ता च तवात्मजा । आवयोरनुरूपोऽसावाद्यो वैवाहिको विधिः ॥१५॥

कामः स भूयान्नरदेव तेऽस्याः पुत्र्याः समाम्नायविधौ प्रतीतः ।
क एव ते तनयां नाद्रियेत स्वयैव कान्त्या क्षिपतीमिव श्रियम् ॥१६॥
यां हर्म्यपृष्ठे क्वणदङ्घ्रिशोभां विक्रीडतीं कन्दुकविह्वलाक्षीम् ।
विश्वावसुर्न्यपतत्स्वाद्विमानाद्विलोक्य सम्मोहविमूढचेताः ॥१७॥
तां प्रार्थयन्तीं ललनाललाममसेवितश्रीचरणैरदृष्टाम् ।
वत्सां मनोरुच्चपदः स्वसारं को नानुमन्येत बुधोऽभियाताम् ॥१८॥

णेच्छया ॥ २ ॥ तत्त्राणाय ब्राह्मणपालनाय । दो र्बाहुः । तस्य भगवतः । ब्रह्म ब्राह्मणजातिः हृदयं ज्ञानशक्तिप्रधानत्वात् । क्षत्रं क्षत्रियजातिः अङ्गं भुजः क्रियाशक्तिप्रधानत्वात् ॥ ३ ॥ वस्तुतस्तु यः कार्यकारणात्मकः स एवोभयम् ॥४॥ रिरक्षिषोः क्षत्रियस्य ॥५॥ भगवान् भवान् । एतत् दिष्ट्या भद्रम् भाग्येन वा । अकृतात्मनाम् अपुण्यात्मनाम् ॥ ६ ॥ उशत्यः कमनीयाः ॥ ७ ॥ भवान् त्वम् । श्रावितं विज्ञानम् ॥८।९।१०॥ तत् तस्मात् प्रतीच्छ प्रतिगृहाण । गृहमेधिषु गृहकार्येषु ॥ ११ ॥ उद्यतस्य स्वतः प्राप्तस्य विषयस्य प्रतिवादो निषेधः निर्मुक्तस्य विरक्तस्यापि न शक्यते किं पुनः कामरक्तस्य ॥ १२ ॥ कीनाशं कृपणम् । स्फीतं प्रवृद्धम् ॥ १३ ॥ उपकुर्वाणः सावधिकब्रह्मचर्यवान् । मे प्रत्तां मया दत्ताम् ॥ १४ ॥ अप्रत्ता नान्यस्मै दातुं सङ्कल्पिता न कस्मैचिद्दत्ता ॥ १५ ॥ प्रतीतः प्रसिद्धः कामो विवाहः । समाम्नायो वेदः । श्रियं भूषणादिशोभां न तु लक्ष्मीमनौचित्यात् ॥ १६ ॥ हर्म्यपृष्ठे प्रासादोपरि । विश्वावसुर्नाम कश्चिद् गन्धर्वः । विमूढं व्याकुलम् ॥ १७ ॥ ललामं रत्न-

अतो भजिष्ये समयेन साध्वीं यावत्तेजो बिभृयादात्मनो मे।
अतो धर्मान् पारमहंस्यमुख्यान् शुक्लप्रोक्तान् बहु मन्येऽविहिंस्रान्॥१९॥
यतोऽभवद्विश्वमिदं विचित्रं संस्थास्यते यत्र च वावतिष्ठते।
प्रजापतीनां पतिरेष मह्यं परं प्रमाणं भगवाननन्तः॥२०॥

मैत्रेय उवाच

स उग्रधन्वन्नियदेवाबभाष आसीच्च तूष्णीमरविन्दनाभम्।
धियोपगृह्णन् स्मितशोभितेन मुखेन चेतो लुलुभे देवहूत्याः॥२१॥
सोऽनु ज्ञात्वा व्यवसितं महिष्या दुहितुः स्फुटम्। तस्मै गुणगणाढ्याय ददौ तुल्यां प्रहर्षितः२२
शतरूपा महाराज्ञी पारिबर्हान्महाधनान्। दम्पत्योः पर्यदात्प्रीत्या भूषावासःपरिच्छदान्२३
प्रत्तां दुहितरं सम्राट् सदृक्षाय गतव्यथः। उपगुह्य च बाहुभ्यामौत्कण्ठ्योन्मथिताशयः॥२४॥
अशक्नुवंस्तद्विरहं मुञ्चन् बाष्पकलां मुहुः। आसिञ्चदम्ब वत्सेति नेत्रोदैर्दुहितुः शिखाः॥२५॥
आमन्त्र्य तं मुनिवरमनुज्ञातः सहानुगः। प्रतस्थे रथमारुह्य सभार्यः स्वपुरं नृपः॥२६॥
उभयोर्ऋषिकुल्यायाः सरस्वत्याः सुरोधसोः। ऋषीणामुपशान्तानां पश्यन्नाश्रमसम्पदः॥२७॥
तमायान्तमभिप्रेत्य ब्रह्मावर्तात्प्रजाः पतिम्। गीतसंस्तुतिवादित्रैः प्रत्युदीयुः प्रहर्षिताः॥२८॥
बर्हिष्मती नाम पुरी सर्वसम्पत्समन्विता। न्यपतन् यत्र रोमाणि यज्ञस्याङ्गं विधुन्वतः॥२९॥
कुशाः काशास्त एवासन् शश्वद्धरितवर्चसः। ऋषयो यैः पराभाव्य यज्ञघ्नान् यज्ञमीजिरे ३०
कुशकाशमयं बर्हिरास्तीर्य भगवान्मनुः। अयजद्यज्ञपुरुषं लब्धा स्थानं यतो भुवम्॥३१॥
बर्हिष्मतीं नाम विभुर्यां निर्विश्य समावसत्। तस्यां प्रविष्टो भवनं तापत्रयविनाशनम्॥३२॥

भूताम्। उच्चपदः उत्तानपादस्य। स्वयमागताम्॥ १८॥ यावत् मे मम आत्मनो देहाच्च्युतं तेजो वीर्यं बिभृयात् तावता कालेन। यद्वा। आत्मनः परमात्मनः कपिलाख्यं तेजो मे मत्तः सकाशात्। अथो अनन्तरम्। शुक्लः श्रीविष्णुः। परमहंसाश्रमे मुख्यान् शमदमादीन्॥ १९॥ यतो येन च संस्थास्यते स्वस्वधर्मे निधाय रक्ष्यते प्रलये च यत्र यस्योदरे एव लीनं भवति स प्रमाणं साक्षी तस्याप्याज्ञा पालनीया न केवलं पितुरेवेति भावः॥ २०॥ हे उग्रधन्वन् विदुर! उपगृह्णन् चिन्तयन् तूष्णीम्। देवहूत्या मुखेन मुनेश्चेत इत्येव व्याख्येयम् अन्यथा विरक्ताय कन्या दत्तेति दम्पत्योरनुतापः स्यादित्यवधेयम्॥ २१॥ अनु अनन्तरं व्यवसितमभिप्रायम्॥ २२॥ पारिप्रर्हान् विवाहे देयान्॥ २३॥ प्रत्तामिति युग्मकम्। प्रत्तां दत्ताम्। विरहं सोढुमिति शेषः। वाष्पकला अश्रुविन्दून्। हे अम्ब पुत्रि! 'अम्बा मातरि पुत्र्यां च' इति निरुक्तिः। शिखाः केशान्॥ २४।२५॥ युग्मकम्। आमन्त्र्य पृष्ट्वा कुल्याया नद्याः। ऋषिकुलहिताया वा। सुरोधसोः शोभनतटयो॥ २६। २७॥ अभिप्रेत्य ज्ञात्वा। वादित्रैः सह तम् आनेतुं जग्मुः॥ २८॥ यत्र ब्रह्मावर्ते। यत्र च यज्ञस्य वराहस्य॥ २९॥ त एव रोमरूपा एव। वर्चो वर्णः। यज्ञं विष्णुं वा॥ ३०॥ वर्हिः हस्तपरिमितमासनम् 'हस्तमात्रं भवेद्वर्हिः' इत्युक्तेः। भुवं भूरूपम्। लब्धेति तृन्नन्तम् लब्धवान्॥ ३१॥ बर्हिष्मतीमिति सार्द्धद्वयम्। यां पूर्वं समावसत् तस्यां

सभार्यः सप्रजः कामान् बुभुजेऽन्याविरोधतः। संगीयमानसत्कीर्तिः सस्त्रीभिः सुरगायकैः।
प्रत्यूषेष्वनुबद्धेन हृदा शृण्वन् हरेः कथाः ॥ ३३ ॥
निष्णातं योगमायासु मुनिं स्वायम्भुवं मनुम्। यदाऽऽभ्रंशयितुं भोगा न शेकुर्भगवत्परम्॥३४॥
अयातयामास्तस्यासन् यामाः स्वान्तरयापनाः। शृण्वतो ध्यायतो विष्णोः कुर्वतो ब्रुवतःकथाः
स एवं स्वान्तरं निन्ये युगानामेकसप्ततिम्। वासुदेवप्रसङ्गेन परिभूतगतित्रयः ॥३६॥
शारीरा मानसा दिव्या वैयासे ये च मानुषाः। भौतिकाश्च कथं क्लेशा बाधन्ते हरिसंश्रयम्३७
यः पृष्टो मुनिभिः प्राह धर्मान्नानाविधाञ्छुभान्। नृणां वर्णाश्रमाणां च सर्वभूतहितः सदा ३८
एतत्त आदिराजस्य मनोश्चरितमद्भुतम्। वर्णितं वर्णनीयस्य तदपत्योदयं शृणु ॥३९॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां तृतीयस्कन्धे द्वाविंशोऽध्यायः ॥२२॥

अथ त्रयोविंशोऽध्यायः

मैत्रेय उवाच

पितृभ्यां प्रस्थिते साध्वी पतिमिङ्गितकोविदा। नित्यं पर्यचरत्प्रीत्या भवानीव भवं प्रभुम्॥१॥
विस्रम्भेणात्मशौचेन गौरवेण दमेन च। शुश्रूषया सौहृदेन वाचा मधुरया च भोः ॥२॥
विसृज्य कामं दम्भं च द्वेषं लोभमघं मदम्। अप्रमत्तोद्यता नित्यं तेजीयांसमतोषयत् ॥३॥
स वै देवर्षिवर्यस्तां मानवीं समनुव्रताम्। दैवाद् गरीयसः पत्युराशासानां महाशिषः ॥४॥
कालेन भूयसा क्षामां कर्शितां व्रतचर्यया। प्रेमगद्गदया वाचा पीडितः कृपयाब्रवीत् ॥५॥

निर्विश्य भवनम्। अन्यस्य धर्मस्य। प्रत्यूषःसु प्रातःकालेषु ॥ ३२।३३॥ निष्णातमिति युग्मकम्। यत् यत आ ईषदपि भ्रंशयितुं न शेकुरतस्तस्य यामा अयातयामाः सफला आसन्। स्वान्तरयापनाः स्वमन्वन्तर पूरकाः ॥ ३४।३५॥ युगानामेकसप्ततिपरिमितम्। गतित्रयं तापत्रयम् ॥ ३६ ॥ शरीरा मानसाः आध्यात्मिकाः मानुषा आधिभौतिकाः। वैयासे विदुर! ॥३७।३८॥ ते तुभ्यम्। तस्य यदपत्यं देवहूतिः तस्य प्रभावम् ॥ ३९ ॥

इति श्रीमद्भागवते महापुराणे तृतीयस्कन्धे गूढार्थदीपिन्यां द्वाविंशोऽध्यायः।

त्रयोविंशे तपःसिद्धे सर्वसम्पत्समन्विते।
नानास्थानेषु दम्पत्यो विमाने रतिरुच्यते॥

'इङ्गितो हृद्गतो भावः। इत्यभिधानात् ॥ १ ॥ विस्रम्भेण विश्वासेन। इति युग्मकम्। अघं निषिद्धाचरणम् ॥२।३॥ स इति युग्मकम्। दैवादपि गुरुतरात् दैवमपि अन्यथा कर्तुं समर्थात्। यद्वा। दैवात् भाग्योदेव लब्धस्य पत्युः सकाशात् महाशिषो दिव्यभोगान् इच्छन्तीम् व्रतचर्यया क्षामां

कुर्दम वाच

तुष्टोऽहमद्य तव मानवि मानदायाः शुश्रूषया परमया परया च भक्त्या ।
यो देहिनामयमतीव सुहृत्स्वदेहो नावेक्षितः समुचितः क्षपितुं मदर्थे ॥६॥

ये मे स्वधर्मनिरतस्य तपःसमाधिविद्यात्मयोगविजिता भगवत्प्रसादाः ।
तानेव ते मदनुसेवनयावरुद्धान् दृष्टिं प्रपश्य वितराम्यभयानशोकान् ॥७॥

अन्ये पुनर्भगवतो भ्रुव उद्विजृम्भविभ्रंशितार्थरचनाः किमुरुक्रमस्य ।
सिद्धासि भुङ्क्ष्व विभवान्निजधर्मदोहान्दिव्यान्नरैर्दुरधिगान्नृपविक्रियाभिः ॥८॥

एवं ब्रुवाणमबलाखिलयोगमायाविद्याविचक्षणमवेक्ष्य गताधिरासीत् ।
सम्प्रश्रयप्रणयविह्वलया गिरेषद्व्रीडावलोकविलसद्धसिताननाऽऽह ॥९॥

देवहूतिरुवाच

राद्धं बत द्विजवृषैतदमोघयोगमायाधिपे त्वयि विभो तदवैमि भर्तः ।
यस्तेऽभ्यधायि समयः सकृदङ्गसङ्गो भूयाद् गरीयसि गुणः प्रसवः सतीनाम् ॥१०॥

तत्रेतिकृत्यमुपशिक्ष यथोपदेशं येनैष मे कर्शितोऽतिरिरंसयाऽऽत्मा ।
सिद्ध्येत ते कृतमनोभवधर्षिताया दीनस्तदीश भवनं सदृशं विचक्ष्व ॥११॥

मैत्रेय उवाच

प्रियायाः प्रियमन्विच्छन् कर्दमो योगमास्थितः । विमानं कामगं क्षत्तस्तर्ह्येवाविरचीकरत् १२
सर्वकामदुघं दिव्यं सर्वरत्नसमन्वितम् । सर्वर्द्ध्युपचयोदर्कं मणिस्तम्भैरुपस्कृतम् ॥१३॥
दिव्योपकरणोपेतं सर्वकालसुखावहम् । पट्टिकाभिः पताकाभिर्विचित्राभिरलंकृतम् ॥१४॥

क्षीणशक्तिम् अतः कर्शिताम् क्षामां सहनशीलां वा । अकारपदच्छेदेन नैतत्सहनयोग्यां वा राजपुत्रीत्वात् ॥ ४।५ ॥ समुचितः श्लाघ्योऽपि यो देहः स मत्सेवार्थे क्षीणीकर्तुं नापेक्षित उपेक्षित इत्यर्थं ॥६॥ मे तप आदिषु य आत्मयोगश्चित्तैकाग्र्यं तेन प्राप्ता मे प्रसादा येदिव्यभोगास्तान् ते त्वयापि अवरुद्धान् वशीकृतान् पश्य अहं दिव्यदृष्टिं वितरामि ददामि ॥ ७ ॥ अन्ये पुनः स्वर्गादिभोगाः किं न किमपि अतितुच्छा एवेत्यर्थः । यत उरुक्रमस्य विष्णोर्भ्रुवः

कालस्य वेगेन विभ्रंशिता अर्थरचना येषाम् । धर्मेण दुह्यन्ते प्रपूर्यन्ते साध्यन्ते तथा तान् । विशिष्टाः क्रियाः अश्वमेधादिरूपास्तामिरपि अलभ्यान् ॥८॥ संप्रश्रयो विनय प्रणयः स्नेहः ॥९॥ वृष श्रेष्ठ हे भर्तः ! त्वयि एतत् राद्धं सिद्धमेव तदहम् अवैमि जानाम्येव बत हर्षे किन्तु यः समयः स भूयात् । यतः गरीयसि पत्यौ निमित्ते सति सतीनां यः प्रसवोऽपत्योत्पत्तिर्गुणः स महान् लाभः अन्यथा वन्ध्येयमिति निन्देव । सकृदपत्यजननपर्यन्तमङ्गसङ्गो यस्मिन् ॥ १० ॥ तत्र अङ्गसङ्गे इतिकृत्यं साधनं कामशास्त्रानुसारेण संपादय । येन दीन आत्मा देहः सिध्येत रतिसमर्थो भवेत् । तत् ततः सदृशं रत्यनुकूलं भवनं च उपकल्पय धर्षितायाः पीडितायाः ॥ ११ ॥ तर्हि तत्क्षणमेव विमानं सम्राट्संपद्युतं गेहं खगामि सप्तभूमिकम् ॥ १२ ॥ सर्वसंपत्समूहस्य उदर्कं उत्तरोत्तरमभिवृद्धिर्यस्मिन् । उपस्कृतमलंकृतम् । सर्वसम्पदामुपचयो वृद्धिरेव उत्तरोत्तरं फलं यस्मिन् इति वा ॥१३॥ उपकरणं सामग्री ॥ १४ ॥ माल्यानि

स्रग्भिर्विचित्रमाल्याभिर्मञ्जुशिञ्जत्षडङ्घ्रिभिः । दुकूलक्षौमकौशेयैर्नानावस्त्रैर्विराजितम् ॥१५॥
उपर्युपरि विन्यस्तनिलयेषु पृथक्पृथक् । क्षिप्तैः कशिपुभिः कान्तं पर्यङ्कव्यजनासनैः ॥१६॥
तत्र तत्र विनिक्षिप्तनानाशिल्पोपशोभितम् । महामरकतस्थल्या जुष्टं विद्रुमवेदिभिः ॥१७॥
द्वाःसु विद्रुमदेहल्या भातं वज्रकपाटवत् । शिखरेष्विन्द्रनीलेषु हेमकुम्भैरधिश्रितम् ॥१८॥
चक्षुष्मत्पद्मरागाग्र्यैर्वज्रभित्तिषु निर्मितैः । जुष्टं विचित्रवैतानैर्महार्हैर्हेमतोरणैः ॥१९॥
हंसपारावतव्रातैस्तत्र तत्र निकूजितम् । कृत्रिमान्मन्यमानैः स्वानधिरुह्याधिरुह्य च ॥२०॥
विहारस्थानविश्रामसंवेशप्राङ्गणाजिरैः । यथोपजोषं रचितैर्विस्मापनमिवात्मनः ॥२१॥
ईदृग्गृहं तत्पश्यन्तीं नातिप्रीतेन चेतसा । सर्वभूताशयाभिज्ञः प्रावोचत्कर्दमः स्वयम् ॥२२॥
निमज्ज्यास्मिन् ह्रदे भीरु विमानमिदमारुह । इदं शुक्लकृतं तीर्थमाशिषां यापकं नृणाम् ।२३।
सा तद्भर्तुः समादाय वचः कुवलयेक्षणा । सरजं बिभ्रती वासो वेणीभूतांश्च मूर्धजान् ॥२४॥
अङ्गं च मलपङ्केन संछन्नं शबलस्तनम् । आविवेश सरस्वत्याः सरः शिवजलाशयम् ॥२५॥
सान्तः सरसि वेश्मस्थाः शतानि दश कन्यकाः । सर्वाः किशोरवयसो ददर्शोत्पलगन्धयः ॥२६॥
तां दृष्ट्वा सहसोत्थाय प्रोचुः प्राञ्जलयः स्त्रियः । वयं कर्मकरीस्तुभ्यं शाधि नः करवाम किम्।२७
स्नानेन तां महार्हेण स्नापयित्वा मनस्विनीम् । दुकूले निर्मले नूत्ने ददुरस्यै च मानदाः॥२८॥
भूषणानि परार्ध्यानि वरीयांसि द्युमन्ति च । अन्नं सर्वगुणोपेतं पानं चैवामृतासवम् ॥२९॥
अथादर्शे स्वमात्मानं स्रग्विणं विरजाम्बरम् । विरजं कृतस्वस्त्ययनं कन्याभिर्बहुमानितम्॥३०॥
स्नातं कृतशिरःस्नानं सर्वाभरणभूषितम् । निष्कग्रीवं वलयिनं कूजत्काञ्चननूपुरम् ॥३१॥

पुष्पाणि । मञ्जु मधुरं सिञ्जन्तो ध्वनिं कुर्वन्तो भ्रमरा यासु । दुकूलैः कार्पासतन्तुभवैः क्षौमैरतसीतन्तुभवैः । कोशो जन्तुविशेषः तज्जन्यैश्च ॥ १५ ॥ क्षिप्तैः स्थापितैः कशिपुभिः शय्याभिः कमनीयम् । पर्यङ्कैः मञ्चैः ॥ १६ ॥ जुष्टं युक्तम् ॥ १७ ॥ हीरककपाटयुक्तम् । नीलमयेषु ॥ १८ ॥ चक्षुष्मन्तो दीप्तिमन्तो ये । निर्मितैः खचितैः ॥ १९ ॥ कृत्रिमानपि स्वान् सजातीयान् जीवितानित्यर्थः ॥ २० ॥ संवेश उपभोगस्थानं यथोषजोषं यथासुखम् । आत्मनः कर्दमस्यापि । प्राङ्गणं गृहाद्बहिः ॥ २१ ॥ नातिप्रीतेन मलिनदेहत्वात् दास्यभावाच्च ॥ २२ ॥ ह्रदे बिन्दुसरोवरे । आशिषामीप्सितानां प्रापकम् ॥ २३ ॥ रजः शब्दोऽदन्तोऽप्यस्ति । सेति युग्मकम् शबलौ विवर्णौ । आशयं स्थानम् । जलाशया जलचरा वा यत्र ॥ २४।२५ ॥ गन्धयः गन्धीः ॥ २६ ॥ कर्मकरीर्नः शाधि । वयं किं करवामेत्यन्वयः ॥ २७ ॥ स्नानेति युग्मकम् । महत्या राज्या अर्हेण योग्येन । दुकूले धौतवस्त्रे । परार्ध्यानि अमूल्यानि । स्वादु मादकं च पेयम् ॥ २८।२९ ॥ अथेति चतुष्कम् आत्मानं देहं ददर्शेति शेषः स्नातं उद्वर्त्य क्षालितम् । पुनः स्नानं शुद्धस्नानम् । वक्षोऽलङ्करणे निष्कम्' इति मेदिनी । अध्यस्तया-

श्रोण्योरध्यस्तया काञ्च्या काञ्चन्या बहुरत्नया। हारेण च महार्हेण रुचकेन च भूषितम् ॥३२॥

सुदता सुभ्रुवा श्लक्ष्णस्निग्धापाङ्गेन चक्षुषा। पद्मकोशस्पृधा नीलैरलकैश्च लसन्मुखम् ॥३३॥

यदा सस्मार ऋषभमृषीणां दयितं पतिम्। तत्र चास्ते सह स्त्रीभिर्यत्रास्ते स प्रजापतिः॥३४॥

भर्तुः पुरस्तादात्मानं स्त्रीसहस्रवृतं तदा। निशाम्य तद्योगगतिं संशयं प्रत्यपद्यत ॥३५॥

स तां कृतमलस्नानां विभ्राजन्तीमपूर्ववत्। आत्मनो बिभ्रतीं रूपं संवीतरुचिरस्तनीम् ॥३६॥

विद्याधरीसहस्रेण सेव्यमानां सुवाससम्। जातभावो विमानं तदारोहयदमित्रहन् ॥३७॥

तस्मिन्नलुप्तमहिमा प्रिययानुरक्तो विद्याधरीभिरुपचीर्णवपुर्विमाने।
बभ्राज उत्कचकुमुद्गणवानपीच्यस्ताराभिरावृत इवोडुपतिर्नभःस्थः ॥३८॥

तेनाष्टलोकपविहारकुलाचलेन्द्रद्रोणीष्वनङ्गसखमारुतसौभगासु।
सिद्धैर्नुतो द्युधुनिपातशिवस्वनासु रेमे चिरं धनदवल्ललनावरूथी ॥३९॥

वैश्रम्भके सुरसने नन्दने पुष्पभद्रके। मानसे चैत्ररथ्ये च स रेमे रामया रतः ॥४०॥

भ्राजिष्णुना विमानेन कामगेन महीयसा। वैमानिकानत्यशेत चरँल्लोकान् यथानिलः ॥४१॥

किं दुरापादनं तेषां पुंसामुद्दामचेतसाम्। यैराश्रितस्तीर्थपदश्चरणो व्यसनात्ययः ॥४२॥

प्रेक्षयित्वा भुवो गोलं पत्न्यै यावान् स्वसंस्थया। बह्वाश्चर्यं महायोगी स्वाश्रमाय न्यवर्तत॥४३॥

विभज्य नवधाऽऽत्मानं मानवीं सुरतोत्सुकाम्। रामां निरमयन् रेमे वर्षपूगान्मुहूर्तवत् ॥४४॥

तस्मिन् विमान उत्कृष्टां शय्यां रतिकरीं श्रिता। न चाबुध्यत तं कालं पत्यापीच्येन संगता॥४५॥

एवं योगानुभावेन दम्पत्यो रममाणयोः। शतं व्यतीयुः शरदः कामलालसयोर्मनाक् ॥४६॥

तस्यामाधत्त रेतस्तां भावयन्नात्मनाऽऽत्मवित्। नोधा विधाय रूपं स्वं सर्वसंकल्पविद्विभुः॥४७॥

अतः सा सुषुवे सद्यो देवहूतिः स्त्रियः प्रजाः। सर्वास्ताश्चारुसर्वाङ्ग्यो लोहितोत्पलगन्धयः॥४८॥

पतिं सा प्रव्रजिष्यन्तं तदाऽऽलक्ष्योशती सती। स्मयमाना विक्लवेन हृदयेन विदूयता ॥४९॥

ऽवधृतया रुचकेन कण्ठाभरणेन ॥ ३०।३१।३२।३३ ॥ यदा तत्र स्वयमपि ॥ ३४ ॥ गतिं प्रभावं च निशाम्य दृष्ट्वा ॥ ३५ ॥ कृतं मलनिवर्तकं स्नानं यया। संवीतौ प्रावृतौ। भावो मैथुनप्रेम ॥३६।३७॥ तस्मिन् विमाने मुनिर्बभ्राजे। उपचीर्णं शुश्रूषितम्। उत्कचो विकसितः। अपीच्यः अतिसुन्दरः। पूर्णचन्द्र इव मुनिः। नभ इव विमानम्। तारा इव स्त्रियः। कुमुदीनीव तासां नेत्राणि ॥३८॥ विहारो यत्र मेरौ तस्य कन्दरासु। अनङ्गसखा वसन्तः। द्युधुनिर्गङ्गा। स्वनः शब्दः वरूथी समूहवान् ॥ ३९ ॥ वैश्रम्भकादिषु पञ्चसु देवोद्यानेषु मानससरोवरेषु रतः प्रीतः सन् रमण्या सह ॥ ४० ॥ वैमानिकान् देवान् अत्यशेत अतिक्रान्तवान् ॥४१॥ उत्कृष्टं दाम बन्धनं यशोदाकृतं यस्य स उद्दामः दामोदरः कृष्णः ॥४२॥ स्वसंस्थया द्वीपादिरचनया यावान् तावन्तम् ॥ ४३ ॥ नि नितराम् ॥ ४४ ॥ अपीच्येन धातुस्खलनवर्जितेन "पीच् स्खलने धातुः ॥ ४५ ॥ शरदः वर्षाणि। मनाक् ईषत्काल इव। ॥ ४६ ॥ आत्मना स्वदेहार्धरूपेण ॥ ४७ ॥ सद्यः एकस्मिन्नेवाहनि। अङ्गीः। गन्धीः ॥ ४८ ॥ पतिमिति युग्मकम्।

लिखन्त्यधोमुखी भूमिं पदा नखमणिश्रिया । उवाच ललितां वाचं निरुध्याश्रुकलां शनैः ॥५०॥

देवहूतिरुवाच

सर्वं तद्भगवान्मह्यमुपोवाह प्रतिश्रुतम् । अथापि मे प्रपन्नाया अभयं दातुमर्हसि ॥५१॥

ब्रह्मन् दुहितृभिस्तुभ्यं विमृग्याः पतयः समाः । कश्चित् स्यान्मे विशोकाय त्वयि प्रव्रजिते वनम्

एतावतालं कालेन व्यतिक्रान्तेन मे प्रभो । इन्द्रियार्थप्रसङ्गेन परित्यक्तपरात्मनः ॥५३॥

इन्द्रियार्थेषु सज्जन्त्या प्रसङ्गस्त्वयि मे कृतः । अजानन्त्या परं भावं तथाप्यस्त्वभयाय मे ।५४।

सङ्गो यः संसृतेर्हेतुरसत्सु विहितोऽधिया । स एव साधुषु कृतो निःसङ्गत्वाय कल्पते ॥५५॥

नेह यत्कर्म धर्माय न विरागाय कल्पते । न तीर्थपदसेवायै जीवन्नपि मृतो हि सः ॥५६॥

साहं भगवतो नूनं वञ्चिता मायया दृढम् । यत्त्वां विमुक्तिदं प्राप्य न मुमुक्षेय बन्धनात् ॥५७॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां तृतीयस्कन्धे कापिलेयोपाख्याने त्रयोविंशोऽध्यायः ॥२३॥

अथ चतुर्विंशोऽध्यायः

मैत्रेय उवाच

निर्वेदवादिनीमेवं मनोर्दुहितरं मुनिः । दयालुः शालिनीमाह शुक्लाभिव्याहृतं स्मरन् ॥१॥

ऋषिरुवाच

मा खिदो राजपुत्रीत्थमात्मानं प्रत्यनिन्दिते । भगवांस्तेऽक्षरो गर्भमदूरात्सम्प्रपत्स्यते ॥ २ ॥

धृतव्रतासि भद्रं ते दमेन नियमेन च । तपोद्रविणदानैश्च श्रद्धया चेश्वरं भज ॥ ३ ॥

स त्वयाऽऽराधितः शुक्लो वितन्वन्मामकं यशः । छेत्ता ते हृदयग्रन्थिमौदर्यो ब्रह्मभावनः ॥ ४॥

उशती पुत्रमिच्छन्ती । वहिः स्मयमाना अन्तस्तु विक्लवेन व्याकुलेन हृदोवाचेत्यन्वयः । लिखन्तीति वात्स्यायनोक्तं कामार्ताचिह्नम् ॥४९।५०॥ यत् प्रतिज्ञातं तत् उपोवाह सम्पादितवान् ॥५१॥ तुभ्यं त्वया ॥ ५२ ॥ तस्या मे एतावता भोगकालेन अलं पर्याप्तम् । अवशिष्टेन कालेन मोक्षोपायं साधयिष्यामीति भावः । परित्यक्तो विस्मृतः परमात्मा यया तस्या मे । ॥५३॥ मे मया । परं भावं ब्रह्मवित्त्वम् । अभयाय मोक्षाय । ॥५४॥ निःसङ्गत्वाय मुक्तये ॥५५॥ यस्य कर्म धर्माद्यर्थं न कल्पते सः ॥५६॥ मोक्षं नेच्छितवती ॥ ५७ ॥

इति श्रीमद्भागवते महापुराणे तृतीयस्कन्धे गूढार्थदीपिन्यां त्रयोविंशोऽध्यायः ।

चतुर्विंशेऽभवत् पुत्रः कर्दमात्कपिलो हरिः ।
कृत्वा स कन्यकोद्वाहं न्यस्य सर्वं वनं गतः ॥ १ ॥

निर्वेदो वैराग्यम् । शालिनी भार्या इत्यभिधानम् । शुक्लो विष्णुः ॥ १ ॥ अदूरात् शीघ्रम् । पितृवीर्येण मातृयोनौ न क्षरतीति तथा न भवतीति ॥ २।३ ॥ ब्रह्मभावनः ब्रह्मोपदेष्टा औदर्यः पुत्रः

मैत्रेय उवाच

देवहूत्यपि संदेशं गौरवेण प्रजापतेः । सम्यक् श्रद्धाय पुरुषं कूटस्थमभजद् गुरुम् ॥ ५ ॥

तस्यां बहुतिथे काले भगवान्मधुसूदनः । कार्दमं वीर्यमापन्नो जज्ञेऽग्निरिव दारुणि ॥ ६ ॥

अवादयंस्तदा व्योम्नि वादित्राणि घनाघनाः । गायन्ति तं स्म गन्धर्वा नृत्यन्त्यप्सरसो मुदा ॥७॥

पेतुः सुमनसो दिव्याः खेचरैरपवर्जिताः । प्रसेदुश्च दिशः सर्वा अम्भांसि च मनांसि च ॥ ८ ॥

तत्कर्दमाश्रमपदं सरस्वत्या परिश्रितम् । स्वयम्भूः साकमृषिभिर्मरीच्यादिभिरभ्ययात् ॥ ९ ॥

भगवन्तं परं ब्रह्म सत्त्वेनांशेन शत्रुहन् । तत्त्वसंख्यानविज्ञप्त्यै जातं विद्वानजः स्वराट् ॥१०॥

सभाजयन् विशुद्धेन चेतसा तच्चिकीर्षितम् । प्रहृष्यमाणैरसुभिः कर्दमं चेदमभ्यधात् ॥११॥

ब्रह्मोवाच

त्वया मेऽपचितिस्तात कल्पिता निर्व्यलीकतः । यन्मे संजगृहे वाक्यं भवान्मानद मानयन् ॥१२॥

एतावत्येव शुश्रूषा कार्या पितरि पुत्रकैः । बाढमित्यनुमन्येत गौरवेण गुरोर्वचः ॥१३॥

इमा दुहितरः सभ्य तव वत्स सुमध्यमाः । सर्गमेतं प्रभावैः स्वैर्बृंहयिष्यन्त्यनेकधा ॥१४॥

अतस्त्वमृषिमुख्येभ्यो यथाशीलं यथारुचि । आत्मजाः परिदेह्यद्य विस्तृणीहि यशो भुवि ॥१५॥

वेदाहमाद्यं पुरुषमवतीर्णं स्वमायया । भूतानां शेवधिं देहं बिभ्राणं कपिलं मुने ॥१६॥

ज्ञानविज्ञानयोगेन कर्मणामुद्धरञ्जटाः । हिरण्यकेशः पद्माक्षः पद्ममुद्रापदाम्बुजः ॥१७॥

एष मानवि ते गर्भं प्रविष्टः कैटभार्दनः । अविद्यासंशयग्रन्थिं छित्त्वा गां विचरिष्यति ॥१८॥

अयं सिद्धगणाधीशः साङ्ख्याचार्यैः सुसम्मतः । लोके कपिल इत्याख्यां गन्ता ते कीर्तिवर्धनः ॥१९

मैत्रेय उवाच

तावाश्वास्य जगत्स्रष्टा कुमारैः सह नारदः । हंसो हंसेन यानेन त्रिधाम परमं ययौ ॥२०॥

सन् ते ग्रन्थिमज्ञानं छेत्स्यति ॥४॥ संदेशमुपदेशम् श्रद्धाय विश्वस्य ॥ ५ ॥ बहूनां शुभमुहूर्तयोगादीनां पूरणे बहुतिथे काले गते सति अतो अदूरादिति पूर्वोक्तेनं विरोधः । वीर्यं भक्तिप्रभावमापन्नः तेन वशीकृत इत्यर्थः । यद्वा । वीर्यमापन्नः अपाकुर्वन् प्रादुर्भूतः । आपदं नाशं नयति प्रापयतीति आपन्नः कर्मणि डः । घनाघना गर्जन्तो मेघा इव देवाः । तं भगवन्तमुद्दिश्य ॥ ६।७ ॥ खेचरैर्देवैं मुक्ताः सुमनसः पुष्पाणि ॥ ८।९ ॥ भगवन्तमिति युग्मकम् । अंशेन जातं भगवन्तं जानन् तच्चिकीर्षितं साङ्ख्यप्रवर्तनादि च अभिनन्दयन् इदमवोचत् । चात् देवहूतिं च । तत्वसंख्यानं सांख्यशास्त्रम् ॥ १०।११ ॥ हे तात पुत्र अपचितिः परिचर्या कृता ॥ १२ ॥ यत् गुरोः पितुः ॥ १३ ॥ प्रभावैर्वंशैर्वर्धयिष्यान्ति ॥ १४।१५ ॥ स्वमायया भक्तेषु कृपया । शेवधिं निधिम्॥ १६॥ ज्ञानेति युग्मकम् । जटा वासना उद्धरन् उत्पाटयितुं ते गर्भं । पद्ममुद्रा पद्माकाररेखायुक्तम् । गां पृथ्वीम् ॥ १७।१८ ॥ कं सुखं पाति रक्षति इति कपिर्ज्ञानं तल्लाति ददाति मात्रे कपिलः ॥ १९ ॥ त्रिधाम्नः लोकत्रयात्परममत्युकृष्टम् सत्यलोकम् । हंसो

गते शतधृतौ क्षत्तः कर्दमस्तेन चोदितः। यथोदितं स्वदुहितॄः प्रादाद्विश्वसृजां ततः ॥२१॥
मरीचये कलां प्रादादनसूयामथात्रये। श्रद्धामङ्गिरसेऽयच्छत्पुलस्त्याय हविर्भुवम् ॥२२॥
पुलहाय गतिं युक्तां क्रतवे च क्रियां सतीम्। ख्यातिं च भृगवेऽयच्छद्वसिष्ठायाप्यरुन्धतीम् ।२३
अथर्वणेऽददाच्छान्तिं यया यज्ञो वितन्यते। विप्रर्षभान् कृतोद्वाहान् सदारान् समलालयत् ।२४
ततस्त ऋषयः क्षत्तः कृतदारा निमन्त्र्य तम्। प्रातिष्ठन्नन्दिमापन्नाः स्वं स्वमाश्रममण्डलम्॥२५
स चावतीर्णं त्रियुगमाज्ञाय विबुधर्षभम्। विविक्त उपसङ्गम्य प्रणम्य समभाषत ॥२६॥
अहो पापच्यमानानां निरये स्वैरमङ्गलैः। कालेन भूयसा नूनं प्रसीदन्तीह देवताः ॥२७॥
बहुजन्मविपक्वेन सम्यग्योगसमाधिना। द्रष्टुं यतन्ते यतयः शून्यागारेषु यत्पदम् ॥२८॥
स एव भगवानद्य हेलनं नगणय्य नः। गृहेषु जातो ग्राम्याणां यः स्वानां पक्षपोषणः ॥२९॥
स्वीयं वाक्यमृतं कर्तुमवतीर्णोऽसि मे गृहे। चिकीर्षुर्भगवान्ज्ञानं भक्तानां मानवर्धनः ॥३०॥
तान्येव तेऽभिरूपाणि रूपाणि भगवंस्तव। यानि यानि च रोचन्ते स्वजनानामरूपिणः ॥३१॥

त्वां सूरिभिस्तत्त्वबुभुत्सयाद्धा सदाभिवादार्हणपादपीठम्।
ऐश्वर्यवैराग्ययशोऽवबोधवीर्यश्रिया पूर्त्तमहं प्रपद्ये ॥ ३२ ॥
परं प्रधानं पुरुषं महान्तं कालं कविं त्रिवृतं लोकपालम्।
आत्मानुभूत्यानुगतप्रपञ्चं स्वच्छन्दशक्तिं कपिलं प्रपद्ये ॥ ३३ ॥
आ स्माभिपृच्छेऽद्य पतिं प्रजानां त्वयावतीर्णर्ण उताप्तकामः।
परिव्रजत्पदवीमास्थितोऽहं चरिष्ये त्वां हृदि युञ्जन् विशोकः ॥ ३४ ॥

श्रीभगवानुवाच

मया प्रोक्तं हि लोकस्य प्रमाणं सत्यलौकिके। अथाजनि मया तुभ्यं यदवोचमृतं मुने ॥३५॥

ब्रह्मा ॥ २० ॥ शतधृतौ ब्रह्मणि। ततस्तेभ्यः विश्वसृड्भ्यः ॥ २१।२२ ॥ युक्तां तदनुरूपामिति सर्वत्र योज्यम् ॥ २३।२४ ॥ निमन्त्र्य पृष्ट्वा। नन्दिं हर्षम् ॥ २५ ॥

त्रियुगं युगत्रये दर्शनार्हम्। त्रीणि युगानि षडैश्वर्याणि यस्येति वा। विविक्ते एकान्ते ॥ २६॥ निरये संसारे। अमङ्गलैः रागद्वेषादिभिः ॥ २७।२८ ॥ बह्विति युग्मकम्। शून्यागारेषु रागादिरहितेषु हृदयस्थानेषु यत्पदं स्वरूपम्। हेलनं स्वलाघवं न शब्देन सुप्सुपेति समासः अतो ल्यप् ॥ २९ ॥ ज्ञानं ज्ञानसाधनं सांख्यम् ॥ ३० ॥ भक्तानां तव यानि तान्येव तेऽभिरूपाणि अभिमतानि ॥ ३१ ॥ श्रियापूर्तमित्येकं पदं गालवमते इयङादेशस्य वैकल्पिकत्वात्। पूर्तं पूर्णम् ॥ ३२ ॥ त्रयाणां गुणानां वृत् वर्तनं यत्र तमहङ्काररूपम्। अनुभूत्या शक्त्या लीनः। स्वच्छन्दाः स्वाधीनाः ॥ ३३ ॥ स्मेति प्रसिद्धं त्वाम् आ ईषदभिपृच्छामि। अवतारितऋणत्रयः। युञ्जन् स्मरन् ॥ ३४ ॥ लौकिके त्रिवर्गप्राप्तिलक्षणे धर्मे मन्वादिभिः। सत्ये मत्प्राप्तिलक्षणे भागवतधर्मे च मया। अतस्त्वया साधु विचारितं यत्सर्वं त्यक्त्वा यामीत्यर्थः। स्वोक्तस्य प्रामाण्यं दर्शयति अथेति। अतएव मया अजनि। तुभ्यं तव पुत्रो भविष्यामीति

एतन्मे जन्म लोकेऽस्मिन्मुमुक्षूणां दुराशयात् । प्रसंख्यानाय तत्त्वानां सम्मतायात्मदर्शने ॥३६॥
एष आत्मपथोऽव्यक्तो नष्टः कालेन भूयसा । तं प्रवर्तयितुं देहमिमं विद्धि मया भृतम् ॥३७॥
गच्छ कामं मयाऽऽपृष्टो मयि संन्यस्तकर्मणा । जित्वा सुदुर्जयं मृत्युममृतत्वाय मां भज ॥३८॥
मामात्मानं स्वयंज्योतिः सर्वभूतगुहाशयम् । आत्मन्येवात्मना वीक्ष्य विशोकोऽभयमृच्छसि॥३९॥
मात्र आध्यात्मिकीं विद्यां शमनीं सर्वकर्मणाम् । वितरिष्ये यया चासौ भयं चातितरिष्यति॥४०॥

मैत्रेय उवाच

एवं समुदितस्तेन कपिलेन प्रजापतिः । दक्षिणीकृत्य तं प्रीतो वनमेव जगाम ह ॥४१॥
व्रतं स आस्थितो मौनमात्मैकशरणो मुनिः । निःसङ्गो व्यचरत्क्षोणीमनग्निरनिकेतनः ॥४२॥
मनो ब्रह्मणि युञ्जानो यत्तत्सदसतः परम् । गुणावभासे विगुण एकभक्त्यानुभाविते ॥४३॥
निरहंकृतिर्निर्ममश्च निर्द्वन्द्वः समदृक् स्वदृक् । प्रत्यक्प्रशान्तधीर्धीरः प्रशान्तोर्मिरिवोदधिः ॥४४॥
वासुदेवे भगवति सर्वज्ञे प्रत्यगात्मनि । परेण भक्तिभावेन लब्धात्मा मुक्तबन्धनः ॥४५॥
आत्मानं सर्वभूतेषु भगवन्तमवस्थितम् । अपश्यत्सर्वभूतानि भगवत्यपि चात्मनि ॥४६॥
इच्छाद्वेषविहीनेन सर्वत्र समचेतसा । भगवद्भक्तियुक्तेन प्राप्ता भागवती गतिः ॥४७॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां तृतीयस्कन्धे कापिलेयोपाख्याने चतुर्विंशोऽध्यायः॥२४॥

यदवोचं तत् ऋतं सत्यमेव ॥ ३५ ॥ दुराशयात्संसारात् मुमुक्षूणामात्मज्ञाने सम्मताय तत्वविवेचनाय विद्धीत्युत्तरेणान्वयः । आत्मपथः मदीयज्ञानमार्गः । अव्यक्तो गूढः ॥ ३६।३७ ॥ आपृष्टोऽनुज्ञातः धातूनामनेकार्थत्वात् । अमृतत्वाय मोक्षाय ॥ ३८ ॥ आत्मना बुद्ध्या ॥ ३९ ॥ शमनीमुन्मुलनीम् । भयं संसारम् । चात्परमानन्दं च प्राप्स्यति ॥ ४० ॥ समुदितः सम्यगुक्तः ॥ ४१ ॥ मुनीनामिदंर्हि सालक्षणम् । क्षोणीं पृथ्वीम् ॥ ४२ ॥ मन इति चतुष्कम् । यत्परं तस्मिन् अनुभाविते साक्षात्कृते ब्रह्मणि मनो युञ्जानः कर्दमः आत्मानं भगवन्तं सर्वभूतेषु अपश्यदित्यन्वयः । प्रत्यक् अन्तर्मुखी वहिर्दृष्टिशून्या । प्रतीचो जीवस्य आत्मनि ॥४३।४४।४५।४६॥ समचेतसा कर्दमेन गतिर्मुक्तिः ॥४७॥ यद्वा चेतसा हेतुभूतेन स भागवतीं गतिं प्राप्तः । इति पाठान्तरम् ।

इति श्रीमद्भागवते महापुराणे तृतीयस्कन्धे गूढार्थदीपिन्यां चतुर्विंशोऽध्यायः ।

अथ पञ्चविंशोऽध्यायः

शौनक उवाच

कपिलस्तत्त्वसंख्याता भगवानात्ममायया । जातः स्वयमजः साक्षादात्मप्रज्ञप्तये नृणाम् ॥१॥

न ह्यस्य वर्ष्मणः पुंसां वरिम्णः सर्वयोगिनाम् । विश्रुतौ श्रुतदेवस्य भूरि तृप्यन्ति मेऽसवः॥२॥

यद्यद्विधत्ते भगवान् स्वच्छन्दात्माऽऽत्ममायया । तानि मे श्रद्दधानस्य कीर्तन्यान्यनुकीर्तय॥३॥

सूत उवाच

द्वैपायनसखस्त्वेवं मैत्रेयो भगवांस्तथा । प्राहेदं विदुरं प्रीत आन्वीक्षिक्यां प्रचोदितः ॥ ४॥

मैत्रेय उवाच

पितरि प्रस्थितेऽरण्यं मातुः प्रियचिकीर्षया । तस्मिन् बिन्दुसरेऽवात्सीद्भगवान् कपिलः किल॥५॥

तमासीनमकर्माणं तत्त्वमार्गाग्रदर्शनम् । स्वसुतं देवहूत्याह धातुः संस्मरती वचः ॥ ६ ॥

देवहूतिरुवाच

निर्विण्णा नितरां भूमन्नसदिन्द्रियतर्षणात् । येन सम्भाव्यमानेन प्रपन्नान्धं तमः प्रभो ॥ ७ ॥

तस्य त्वं तमसोऽन्धस्य दुष्पारस्याद्य पारगम् । सच्चक्षुर्जन्मनामन्ते लब्धं मे त्वदनुग्रहात् ॥८॥

य आद्यो भगवान् पुंसामीश्वरो वै भवान् किल । लोकस्य तमसान्धस्य चक्षुः सूर्य इवोदितः॥९॥

अथ मे देव सम्मोहमपाक्रष्टुं त्वमर्हसि । योऽवग्रहोऽहंममेतीत्येतस्मिन् योजितस्त्वया ॥१०॥

तं त्वा गताहं शरणं शरण्यं स्वभृत्यसंसारतरोः कुठारम् ।
जिज्ञासयाहं प्रकृतेः पूरुषस्य नमामि सद्धर्मविदां वरिष्ठम् ॥ ११ ॥

इति स्वमातुर्निरवद्यमीप्सितं निशम्य पुंसामपवर्गवर्धनम् ।
धियाभिनन्द्यात्मवतां सतां गतिर्बभाष ईषत्स्मितशोभिताननः ॥ १२ ॥

पञ्चविंशे स्वमात्राऽयं पृष्टो बन्धविमुक्तये ।
कपिलः सोपपत्त्याह भक्तिसाधनमुत्तमम् ॥ १ ॥

तत्त्वसंख्याता सांख्यप्रवर्तकः । मायया भक्तविषयककृपया ॥ १ ॥ अस्य कपिलस्य विश्रुतौ कीर्तौ मेऽसव इन्द्रियणि भूरि अत्यन्तं न तृप्यन्ति । वर्ष्मणो अतिसुन्दराकृतेः । वर्ष्मदेहप्रमाणातिसुन्दराकृतिषु स्मृतम् ईति मेदिनी । श्रुतेन श्रवणेन श्रोतृहृदि दीव्यति प्रकाशते तथा ॥ २ ॥ यत् यत् यानि यानि अकरोत् ॥ ३ ॥ तथा तत्प्रश्नानुसारेण । आन्वीक्षिक्यामात्मविद्यायाम् ॥ ४ ॥ बिन्दुः सरसि यस्मिन्निति टच् समासान्त इति श्रीवल्लभाचार्याः ॥५॥ अग्रं पारं सिद्धान्तमित्यर्थः । वचः एष मानवीत्यादि ॥६॥ निर्विण्णा खिन्ना संभाव्यमानेन पूर्यमाणेन येन इन्द्रियतर्पणेन ॥७॥ त्वमेव त्वद्रूपम् । मे मया ॥८॥ य आद्यः कारणं स भवान् आन्तरीयतमोनाशको ज्ञानचक्षुरूपः ।९। अपाक्रष्टुं दूरीकर्तुम् । अवग्रह-आग्रहः । एतस्मिन्देहादौ ॥ १० ॥ जिज्ञासया शरणं गता सती अहं त्वां नमामीत्यन्वयः ॥ ११ ॥ वर्धनं मोक्षे

श्रीभगवानुवाच

योग आध्यात्मिकः पुंसां मतो निःश्रेयसाय मे। अत्यन्तोपरतिर्यत्र दुःखस्य च सुखस्य च ॥१३॥
तमिमं ते प्रवक्ष्यामि यमवोचं पुरानघे। ऋषीणां श्रोतुकामानां योगं सर्वाङ्गनैपुणम् ॥१४॥
चेतः खल्वस्य बन्धाय मुक्तये चात्मनो मतम्। गुणेषु सक्तं बन्धाय रतं वा पुंसि मुक्तये ॥१५॥
अहंममाभिमानोत्थैः कामलोभादिभिर्मलैः। वीतं यदा मनः शुद्धमदुःखमसुखं समम् ॥१६॥
तदा पुरुष आत्मानं केवलं प्रकृतेः परम्। निरन्तरं स्वयंज्योतिरणिमानमखण्डितम् ॥१७॥
ज्ञानवैराग्ययुक्तेन भक्तियुक्तेन चात्मना। परिपश्यत्युदासीनं प्रकृतिं च हतौजसम् ॥१८॥
न युज्यमानया भक्त्या भगवत्यखिलात्मनि। सदृशोऽस्ति शिवः पन्था योगिनां ब्रह्मसिद्धये ॥१९॥
प्रसङ्गमजरं पाशमात्मनः कवयो विदुः। स एव साधुषु कृतो मोक्षद्वारमपावृतम् ॥२०॥
तितिक्षवः कारुणिकाः सुहृदः सर्वदेहिनाम्। अजातशत्रवः शान्ताः साधवः साधुभूषणाः ॥२१॥
मय्यनन्येन भावेन भक्तिं कुर्वन्ति ये दृढाम्। मत्कृते त्यक्तकर्माणस्त्यक्तस्वजनबान्धवाः ॥२२॥
मदाश्रयाः कथा मृष्टाः शृण्वन्ति कथयन्ति च। तपन्ति विविधास्तापा नैतान्मद्गतचेतसः ॥२३॥
त एते साधवः साध्वि सर्वसङ्गविवर्जिताः। सङ्गस्तेष्वथ ते प्रार्थ्यः सङ्गदोषहरा हि ते ॥२४॥

सतां प्रसङ्गान्मम वीर्यसंविदो भवन्ति हृत्कर्णरसायनाः कथाः।
तज्जोषणादाश्वपवर्गवर्त्मनि श्रद्धा रतिर्भक्तिरनुक्रमिष्यन्ति ॥२५॥
भक्त्या पुमाञ्जातविराग ऐन्द्रियाद् दृष्टश्रुतान्मद्रचनानुचिन्तया।
चित्तस्य यत्तो ग्रहणे योगयुक्तो यतिष्यते ऋजुभिर्योगमार्गैः ॥२६॥
असेवयायं प्रकृतेर्गुणानां ज्ञानेन वैराग्यविजृम्भितेन।
योगेन मय्यर्पितया च भक्त्या मां प्रत्यगात्मानमिहावरुन्धे ॥२७॥

प्रवर्तकम्। ईषत् संक्षेपेण वभाषे इत्यत्रान्वेति अन्यथा पुनरुक्तिः स्यात् ॥१२॥ आध्यात्मिकः भगवन्निष्ठः। मे मतः मम सम्मतः। सुखस्य प्राकृतस्य ॥ १३ ॥ ॥ ऋषीणां नारदादीनामर्थे। नैपुणं पूर्णता यत्र। यत्र सर्वेषामङ्गनामिन्द्रियादीनामैकाग्र्यं यस्मिन्निति वा ॥ १४ ॥ आत्मनो जीवस्य। गुणेषु विषयेषु पुंसि श्रीकृष्णे ॥ १५ ॥ अहमिति त्रिकम्। वीतमत एव ऐन्द्रियकसुखदुःखैरनभिभूतं सत् यदा शुद्धं समं निश्चलं च भवति तदा पुरुषो जीव आत्मना चेतसा उत् उत्कृष्टे हृत्कमले आसीनं परम् आत्मानं श्रीकृष्णं परिश्यतीति त्रयाणान्वयः। हतौजसं पराजिताम् ॥ १६।१७।१८ ॥ युज्यमानया क्रियमाणयां भक्त्या सदृशः अन्य शिवः पन्था नेत्यन्वयः। सिद्धये प्राप्तये ॥१९॥ प्रकृष्टमत्यन्तं सङ्गं विषयेषु कृतम्। द्वारं भवति ॥ २० ॥ साधु शीलमेव ॥ २१।२२ ॥ मृष्टाः मधुराः न तपन्ति न क्लेशयन्ति ॥ २३ ॥ तै त्वया। सङ्गदोषः दुःसङ्गजदोषः ॥ २४ ॥ सम्यक् वित् वेदनं यासु ताः। रसमानन्दमायन्ते तासां जोषणात् सेवनात्। क्रमतो भविष्यति ॥ २५ ॥ मद्रचनानां मल्लीलानानामनुचिन्तया या भक्तिस्तया। ऋजुभिः सुखसाध्यैर्भक्तियोगमार्गैः ॥ २६ ॥ यत्नं कुर्यात्। गुणानां विषयाणाम्। भक्त्या यज्ज्ञानं तेन योगो ध्यानयोगस्तेन इहैव देहे प्रत्यगात्मानं जीवान्तर्यामिणं मां प्राप्नोति। विजृम्भितेन

देवहूतिरुवाच

काचित्त्वय्युचिता भक्तिः कीदृशी मम गोचरा। यया पदं ते निर्वाणमञ्जसान्वश्नावा अहम्॥२८॥
यो योगो भगवद्वाणो निर्वाणात्मंस्त्वयोदितः। कीदृशः कति चाङ्गानि यतस्तत्त्वावबोधनम्२९
तदेतन्मे विजानीहि यथाहं मन्दधीर्हरे। सुखं बुद्धचेय दुर्बोधं योषा भवदनुग्रहात् ॥३०॥

मैत्रेय उवाच

विदित्वार्थं कपिलो मातुरित्थं जातस्नेहो यत्र तन्वाभिजातः।
तत्त्वाम्नायं यत्प्रवदन्ति सांख्यं प्रोवाच वै भक्तिवितानयोगम् ॥३१॥

श्रीभगवानुवाच

देवानां गुणलिङ्गानामानुश्रविककर्मणाम्। सत्त्व एवैकमनसो वृत्तिः स्वाभाविकी तु या ॥३२॥
अनिमित्ता भागवती भक्तिः सिद्धेर्गरीयसी। जरयत्याशु या कोशं निगीर्णमनलो यथा ॥३३॥

नैकात्मतां मे स्पृहयन्ति केचिन्मत्पादसेवाभिरता मदीहाः।
येऽन्योन्यतो भागवताः प्रसज्य सभाजयन्ते मम पौरुषाणि ॥३४॥
पश्यन्ति ते मे रुचिराण्यम्ब सन्तः प्रसन्नवक्त्रारुणलोचनानि।
रूपाणि दिव्यानि वरप्रदानि साकं वाचं स्पृहणीयां वदन्ति।३५॥
तैर्दर्शनीयावयवैरुदारविलासहासेक्षितवामसूक्तैः ।
हृतात्मनो हृतप्राणांश्च भक्तिरनिच्छतो मे गतिमण्वीं प्रयुङ्क्ते ॥३६॥
अथो विभूतिं मम मायाविनस्तामैश्वर्यमष्टाङ्गमनुप्रवृत्तम्।
श्रियं भागवतीं वास्पृहयन्ति भद्रां परस्य मे तेऽश्नुवते तु लोके ॥३७॥

पूर्णेन ॥ २७ ॥ मम गोचरा मया कर्तुं योग्या। अञ्जसा सुखेन। अनु अनन्तरमेव अश्नवै प्राप्नवानि। निर्वाणं पदं मुक्तिधाम वैकुण्ठम् ॥२८॥ भगवति लक्ष्ये वाणवत्प्रयुक्तः। हे निर्वाणात्मन् नित्यमुक्ता! ।२९। विजानीहि विज्ञापय। सुखपूर्वकम् ॥३०॥ तत्त्वानि आम्नायन्तेऽनुक्रम्यन्ते यत्र। वितानं योगं ध्यानंयोगं च ॥ ३१ ॥ देवानामिति युग्मकम्। एकमनसः पुंसः मुमुक्षोः गुणलिङ्गानां विषयप्रकाशकानां ज्ञानेन्द्रियाणाम् आनुश्रविकं वेदोदितं कर्म येषां कर्मेन्द्रियाणां च देवानां द्योतनात्मकानामुभयेषामपि सत्त्वमूर्तौ भगवति या वृत्तिः सा भक्ति सिद्धेर्मुक्तेरपि गरीयसी। न हि मुक्तौ भगवान् कस्यचित्सारपिर्भवति। न च पराजितः सन् श्रीदामानं बहति नापि उलूखले बद्धश्च भवतीत्यतः सिद्धान्तोक्तिरियम्। या भक्तिः कोशं लिङ्गशरीरम्। निगीर्णं भुक्तम् ॥ ३२।३३ ॥ एकात्मतां सज्यमुक्तिम्। प्रसज्य आसक्ति कृत्वा। पौरुषाणि लीलामृतानि आस्वादयन्ति ॥ ३४ ॥ पश्यन्ति ध्यायन्ति तैः सह मद्वार्ता च ॥ ३५ ॥ कामं मधुरम्। अण्वीं मुक्ति ब्रह्मैक्यरूपां हे भक्ता गृहीत इति प्रयोग मात्रं न कुरुते तु सादातुमवकाशं लभते भगवतो हासावलोकादिभिस्तेषामात्मनां चोरितत्वेन सम्प्रदानाभावादिति सुव्याख्यातं चक्रवर्तिना। प्राणा इन्द्रियाणि ॥ ३६ ॥ विभूतिं मोगसम्पत्तिम्। अथो तथा भक्तिमनुप्रवृत्तं स्वत एव प्राप्तं ते

न कर्हिचिन्मत्पराः शान्तरूपे नङ्क्ष्यन्ति नो मेऽनिमिषो लेढि हेतिः ।
येषामहं प्रिय आत्मा सुतश्च सखा गुरुः सुहृदो दैवमिष्टम् ॥३८॥
इमं लोकं तथैवामुमात्मानमुभयायिनम् । आत्मानमनु ये चेह ये रायः पशवो गृहाः ॥३९॥
विसृज्य सर्वानन्यांश्च मामेवं विश्वतोमुखम् । भजन्त्यनन्यया भक्त्या तान्मृत्योरतिपारये ॥४०॥
नान्यत्र मद्भगवतः प्रधानपुरुषेश्वरात् । आत्मनः सर्वभूतानां भयं तीव्रं निवर्तते ॥४१॥
मद्भयाद्वाति वातोऽयं सूर्यस्तपति मद्भयात् । वर्षतीन्द्रो दहत्यग्निर्मृत्युश्चरति मद्भयात् ॥४२॥
ज्ञानवैराग्ययुक्तेन भक्तियोगेन योगिनः । क्षेमाय पादमूलं मे प्रविशन्त्यकुतोभयम् ॥४३॥
एतावानेव लोकेऽस्मिन् पुंसां निःश्रेयसोदयः । तीव्रेण भक्तियोगेन मनो मय्यर्पितं स्थिरम् ॥४४॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां तृतीयस्कन्धे कापिलेयोपाख्याने पञ्चविंशोऽध्यायः ॥२५॥

अथ षड्विंशोऽध्यायः

श्रीभगवानुवाच

अथ ते सम्प्रवक्ष्यामि तत्त्वानां लक्षणं पृथक् । यद्विदित्वा विमुच्येत पुरुषः प्राकृतैर्गुणैः ॥ १ ॥
ज्ञानं निःश्रेयसार्थाय पुरुषस्यात्मदर्शनम् । यदाहुर्वर्णये तत्ते हृदयग्रन्थिभेदनम् ॥ २ ॥
अनादिरात्मा पुरुषो निर्गुणः प्रकृतेः परः । प्रत्यग्धामा स्वयंज्योतिर्विश्वं येन समन्वितम् । ३ ।
स एष प्रकृतिं सूक्ष्मां दैवीं गुणमयीं विभुः । यदृच्छयैवोपगतामभ्यपद्यत लीलया ॥ ४ ॥
गुणैर्विचित्राः सृजतीं सरूपाः प्रकृतिं प्रजाः । विलोक्य मुमुहे सद्यः स इह ज्ञानगूहया ॥ ५ ॥

यद्यपि न स्पृहयन्ति अथापि वैकुण्ठे प्राप्नुवन्त्येव ॥ ३७ ॥ शान्तमविकृतं रूपं यस्य तस्मिन् वैकुण्ठे वा । न नङ्क्ष्यन्ति भोगहीना न भवन्ति । मेऽनिमिषो हेतिर्मदीयं कालचक्रं च तान्न ग्रसते ॥ ३८ ॥ इममिति युग्मकम् । उभयायिनं लोकद्वयगामिनमात्मानं देहं तदभिमानमित्यर्थः । रायो धनानि । मृत्योः संसारात् ॥ ३९।४० ॥ मत् मत्तोऽन्यत्र मद्भक्तिं विनेत्यर्थः ॥४१।४२।४३॥ मयि अर्पितं सत् स्थिरं भवतीति यत् एतावानेव मोक्षोपायः ॥४४ ॥

इति श्रीमद्भागवते महापुराणे तृतीयस्कन्धे गूढार्थदीपिन्यां पञ्चविंशोऽध्यायः ।

षड्विंशे बन्धमोक्षाय नामलक्षणभेदतः ।
तत्त्वोत्पत्तिस्ततो जातः प्रोदतिष्ठच्चितो विराट् ॥१॥

आत्मा परमात्मा दृश्यते साक्षात्क्रियतेऽनेनेति । ग्रथिरहङ्कारः ॥ १।२ ॥ आत्मा परमात्मा । प्रत्यक् प्रतिलोमं धाम कीर्तिर्यस्य । समन्वितं प्रकाशते इति शेषः ॥ ३ ॥ एष परमात्मा । दैवीं स्वशक्तित्वात् । सृष्ट्यादिलीलया अभ्यपद्यत । जीवशक्तिरूपं वीर्यं तस्यामादधान ऐक्षतेत्यर्थः ॥ ४ ॥ इह प्रकृतौ स्थितः स जीवः सद्यः प्रकृतिसंसर्गसमय एव ज्ञानगूहया प्रकृतेरेवावद्याख्यवृत्त्या युक्तो मुमुहे स्वरूप

एवं पराभिध्यानेन कर्तृत्वं प्रकृतेः पुमान् । कर्मसु क्रियमाणेषु गुणैरात्मनि मन्यते ॥ ६ ॥
तदस्य संसृतिर्बन्धः पारतन्त्र्यं च तत्कृतम् । भवत्यकर्तुरीशस्य साक्षिणो निर्वृतात्मनः ॥ ७ ॥
कार्यकारणकर्तृत्वे कारणं प्रकृतिं विदुः । भोक्तृत्वे सुखदुःखानां पुरुषं प्रकृतेः परम् ॥ ८ ॥

देवहूतिरुवाच

प्रकृतेः पुरुषस्यापि लक्षणं पुरुषोत्तम । ब्रूहि कारणयोरस्य सदसच्च यदात्मकम् ॥ ९ ॥

श्रीभगवानुवाच

यत्तत्त्रिगुणमव्यक्तं नित्यं सदसदात्मकम् । प्रधानं प्रकृतिं प्राहुरविशेषं विशेषवत् ॥१०॥
पञ्चभिः पञ्चभिर्ब्रह्म चतुर्भिर्दशभिस्तथा । एतच्चतुर्विंशतिकं गणं प्राधानिकं विदुः ॥११॥
महाभूतानि पञ्चैव भूरापोऽग्निर्मरुन्नभः । तन्मात्राणि च तावन्ति गन्धादीनि मतानि मे ॥१२॥
इन्द्रियाणि दश श्रोत्रं त्वग्दृग्रसननासिकाः । वाक्करौ चरणौ मेढ्रं पायुर्दशम उच्यते ॥१३॥
मनो बुद्धिरहङ्कारश्चित्तमित्यन्तरात्मकम् । चतुर्धा लक्ष्यते भेदो वृत्त्या लक्षणरूपया ॥१४॥
एतावानेव संख्यातो ब्रह्मणः सगुणस्य ह । संनिवेशो मया प्रोक्तो यः कालः पञ्चविंशकः॥१५॥
प्रभावं पौरुषं प्राहुः कालमेके यतो भयम् । अहंकारविमूढस्य कर्तुः प्रकृतिमीयुषः ॥१६॥
प्रकृतेर्गुणसाम्यस्य निर्विशेषस्य मानवि । चेष्टा यतः स भगवान् काल इत्युपलक्षितः॥१७॥
अन्तः पुरुषरूपेण कालरूपेण यो बहिः । समन्वेत्येष सत्त्वानां भगवानात्ममायया ॥१८॥
दैवात्क्षुभितधर्मिण्यां स्वस्यां योनौ परः पुमान् । आधत्त वीर्यं सासूत महत्तत्त्वं हिरण्मयम्॥१९॥
विश्वमात्मगतं व्यञ्जन् कूटस्थो जगदङ्कुरः । स्वतेजसापिबत्तीव्रमात्मप्रस्वापनं तमः ॥ २० ॥

विस्मृतवान् ॥५॥ पराभिध्यानेन प्रकृत्यध्यासेन देह एवाऽहमिति मननेन । प्रकृते गुणैः क्रियमाणेषु कर्मसु सात्विकादिरूपादिग्रहणेषु सत्स्वपि तस्याः कर्तृत्वमात्मनीत्यन्वयः ॥ ६ ॥ तत् तस्मात् कर्तृत्व-मननादेव साक्षिणः अस्य जीवस्य वस्तुतः अकर्तुरेव सतः कर्मभिर्बन्धः तथा ईशस्य ईशशक्तिरूपत्वात्स्व-तन्त्रस्यापि कर्मबन्धकृतभोगपारतन्त्र्यं निर्वृतात्मन आनन्दरूपस्यापि संसृतिर्जन्ममृत्युप्रवाहश्च भवति ॥७॥ शरीरेन्द्रियजीवभावे कारणम् यां विलोक्य मुमुहे तां प्रकृतिम् । यो मुमुहे तं पुरुषं बद्धजीवं च भोक्तृत्वे कारणमित्यन्वयः ॥ ८ ॥ सत् असत् स्थूलं सूक्ष्मं च कार्यं यदात्मकं तयोरस्य विश्वस्य कारणयोः ॥ ९ ॥ यत्प्रधानं तदेव प्रकृतिम् अविशेषं कार्यावस्थायामप्राप्तम् । विशेषा महदादयो विद्यन्ते यस्य तद्युक्तं च ॥ १० ॥ एतानि चतुर्विंशतिर्यत्र तं गणं ब्रह्म ब्रह्मत्वेनोपास्यं विदुः ॥११॥ एतदेव विवृणोति ॥ १२॥ १३ ॥ अन्तरात्मकम् अन्तः करणम् । लक्षणरूपया चिह्नभूतया सङ्कल्प-निश्चयाभिमानस्मरण-रूपया ॥ १४ ॥ सन्निवेशोऽवस्थाभेदो यावान्मया प्रोक्तः एतावानेव अन्यैरपि साख्याचार्यैः ॥ १५ ॥ एके पुरुषस्य भगवतः विक्रममेव कालम् । यतो बद्धजीवस्य ॥ १६ ॥ यतः प्रकृतेश्चेष्टा साम्यत्यागः सा । निर्विशेषस्य महदादिरहितस्य ॥ १७ ॥ वस्तुतः यः सत्त्वानां सर्वप्राणिनामन्तर्बहिश्च तत्तद्रूपेण सम्यक् व्याप्तो वर्तते स एष भगवानेक एव ॥ १८ ॥ दैवात् कालात् । धर्मा गुणाः । योनौ प्रकृतौ । वीर्यं सृष्टिसामर्थ्यम् ॥ १९ ॥ जगत् अङ्कुरः कार्यं यस्य स महान् । कूटस्थो निर्विकार इति भगवद-

यत्तत्सत्त्वगुणं स्वच्छं शान्तं भगवतः पदम् । यदाहुर्वासुदेवाख्यं चित्तं तन्महदात्मकम् ॥२१॥
स्वच्छत्वमविकारित्वं शान्तत्वमिति चेतसः । वृत्तिभिर्लक्षणं प्रोक्तं यथापां प्रकृतिः परा ॥२२॥
महत्तत्त्वाद्विकुर्वाणाद्भगवद्वीर्यसम्भवात् । क्रियाशक्तिरहंकारस्त्रिविधः समपद्यत ॥२३॥
वैकारिकस्तैजसश्च तामसश्च यतो भवः । मनसश्चेन्द्रियाणां च भूतानां महतामपि ॥२४॥
सहस्रशिरसं साक्षाद्यमनन्तं प्रचक्षते । संकर्षणाख्यं पुरुषं भूतेन्द्रियमनोमयम् ॥२५॥
कर्तृत्वं करणत्वं च कार्यत्वं चेति लक्षणम् । शान्तघोरविमूढत्वमिति वा स्यादहंकृतेः ॥२६॥
वैकारिकाद्विकुर्वाणान्मनस्तत्त्वमजायत । यत्संकल्पविकल्पाभ्यां वर्तते कामसम्भवः ॥२७॥
यद्विदुर्ह्यनिरुद्धाख्यं हृषीकाणामधीश्वरम् । शारदेन्दीवरश्यामं संराध्यं योगिभिः शनैः ॥२८॥
तैजसात्तु विकुर्वाणाद् बुद्धितत्त्वमभूत्सति । द्रव्यस्फुरणविज्ञानमिन्द्रियाणामनुग्रहः ॥२९॥
संशयोऽथ विपर्यासो निश्चयः स्मृतिरेव च । स्वाप इत्युच्यते बुद्धेर्लक्षणं वृत्तितः पृथक् ॥३०॥
तैजसानीन्द्रियाण्येव क्रियाज्ञानविभागशः । प्राणस्य हि क्रियाशक्तिर्बुद्धेर्विज्ञानशक्तिता ॥३१॥
तामसाच्च विकुर्वाणाद्भगवद्वीर्यचोदितात् । शब्दमात्रमभूत्तस्मान्नभः श्रोत्रं तु शब्दगम् ॥३२॥
अर्थाश्रयत्वं शब्दस्य द्रष्टुर्लिङ्गत्वमेव च । तन्मात्रत्वं च नभसो लक्षणं कवयो विदुः ॥३३॥
भूतानां छिद्रदातृत्वं बहिरन्तरमेव च । प्राणेन्द्रियात्मधिष्ण्यत्वं नभसो वृत्तिलक्षणम् ॥३४॥
नभसः शब्दतन्मात्रात्कालगत्या विकुर्वतः । स्पर्शोऽभवत्ततो वायुस्त्वक् स्पर्शस्य च संग्रहः ॥३५॥

धिष्ठितत्वात् तच्छक्तित्वाच्च तदभेदेन निर्देशः अन्यथा प्रकृतिकार्ये महति कूटस्थविशेषणं विरुद्धं स्यात् । प्रस्वापनमाच्छादकम् ॥ २० ॥ पदमभिव्यक्तिस्थानम् । यच्चित्तं तन्महत्तत्त्वमेव ॥ २१ ॥ यथा परा स्वच्छत्वादिरूपः स्वभावस्तथा चेतसो वृत्तिभिः स्वभावैर्धर्मैः चेतसो लक्षणम् ॥ २२।२३ ॥ सात्त्विको राजसः क्रमेण । यतः त्रिविधाहङ्कारात् मनआदीनां क्रमेण भवो जन्म ॥ २४ ॥ यमहङ्कारं । शेषाख्यमनन्तम् अनन्तोपासनस्थानम् । मयट् प्राधान्ये भूतादीनां प्रधानकारणमित्यर्थः ॥ २५ ॥ मनोरूपेण इन्द्रियरूपेण भूतरूपेण चेति क्रमेण ॥२६॥ अत एव मनोभवः । इति कामस्य संज्ञा । यत् यतः ॥२७॥ यन्मनस्तदेवमनिरुद्धोपासनस्थानम् । संराध्यं वशीकर्तुं शक्यम् ॥ २८ ॥ यतो बुद्धितत्त्वात् स्फुरणरूपं विज्ञानमनुग्रहो भवति । बुद्ध्या विना पञ्चेन्द्रियाणि न प्रवर्तितुं शक्नुवन्तीत्यर्थः ॥ २९ ॥ विपर्यासो मिथ्याज्ञानम् ॥ ३० ॥

तैजसानि राजसाऽहङ्कारकार्याणि । प्राणस्य कर्मेन्दियगणस्य । बुद्धेर्ज्ञानेन्द्रियगणस्य ॥ ३१ ॥ शब्दगं शब्दग्राहकम् ॥ ३२ ॥ अर्थवाचकत्वम् । द्रष्टुः कुड्यान्तरितस्य वक्तुर्ज्ञापकत्वम् शब्दस्य लक्षणमित्यन्वयः ॥ ३३ ॥ छिद्रमवकाशः । धिष्ण्यं स्थानम् । वृत्तिभिर्धर्मैः ॥ ३४ ॥ सम्यक् ग्रहणं ततो

मृदुत्वं कठिनत्वं च शैत्यमुष्णत्वमेव च । एतत्स्पर्शस्य स्पर्शत्वं तन्मात्रत्वं नभस्वतः ॥३६॥
चालनं व्यूहनं प्राप्तिर्नेतृत्वं द्रव्यशब्दयोः । सर्वेन्द्रियाणामात्मत्वं वायोः कर्माभिलक्षणम् ॥३७॥
वायोश्च स्पर्शतन्मात्राद्रूपं दैवेरितादभूत् । समुत्थितं ततस्तेजश्चक्षू रूपोपलम्भनम् ॥३८॥
द्रव्याकृतित्वं गुणता व्यक्तिसंस्थात्वमेव च । तेजस्त्वं तेजसः साध्वि रूपमात्रस्य वृत्तयः ॥३९॥
द्योतनं पचनं पानमदनं हिममर्दनम् । तेजसो वृत्तयस्त्वेताः शोषणं क्षुत्तृडेव च ॥४०॥
रूपमात्राद्विकुर्वाणात्तेजसो दैवचोदितात् । रसमात्रमभूत्तस्मादम्भो जिह्वा रसग्रहः ॥४१॥
कषायो मधुरस्तिक्तः कट्वम्ल इति नैकधा । भौतिकानां विकारेण रस एको विभिद्यते ॥४२॥
क्लेदनं पिण्डनं तृप्तिः प्राणनाप्यायनोन्दनम् । तापापनोदो भूयस्त्वमम्भसो वृत्तयस्त्विमाः ॥४३॥
रसमात्राद्विकुर्वाणादम्भसो दैवचोदितात् । गन्धमात्रमभूत्तस्मात्पृथ्वी घ्राणस्तु गन्धगः ॥४४॥
करम्भपूतिसौरभ्यशान्तोग्राम्लादिभिः पृथक् । द्रव्यावयववैषम्याद् गन्ध एको विभिद्यते ॥४५॥
भावनं ब्रह्मणः स्थानं धारणं सद्विशेषणम् । सर्वसत्त्वगुणोद्भेदः पृथिवीवृत्तिलक्षणम् ॥४६॥
नभोगुणविशेषोऽर्थो यस्य तच्छ्रोत्रमुच्यते । वायोर्गुणविशेषोऽर्थो यस्य तत्स्पर्शनं विदुः ॥४७॥
तेजोगुणविशेषोऽर्थो यस्य तच्चक्षुरुच्यते । अम्भोगुणविशेषोऽर्थो यस्य तद्रसनं विदुः ॥
भूमेर्गुणविशेषोऽर्थो यस्य स घ्राण उच्यते ॥ ४८ ॥
परस्य दृश्यते धर्मो ह्यपरस्मिन् समन्वयात् । अतो विशेषो भावानां भूमावेवोपलक्ष्यते ॥४९॥
एतान्यसंहत्य यदा महदादीनि सप्त वै । कालकर्मगुणोपेतो जगदादिरुपाविशत् ॥५०॥
ततस्तेनानुविद्धेभ्यो युक्तेभ्योऽण्डमचेतनम् । उत्थितं पुरुषो यस्मादुदतिष्ठदसौ विराट् ॥५१॥

भवति ॥ ३५ ॥ स्पर्शत्वं लक्षणमित्यर्थः ॥ ३६ ॥ व्यूहनं मेलनम् । प्राप्तिवस्तुमात्रेण संयोगः । आत्मत्वं सञ्जीवकत्वम् कार्यक्षमता सम्पादकत्वमित्यर्थः । कर्मद्वारा ॥ ३७ ॥ उपलम्भनं ग्राहकम् ॥ ३८ ॥ आकृतित्वं ह्रस्वदीर्घाद्याकारसमर्पकत्वम् । गुणता प्रकाशित्वम् । व्यक्तेः संस्था एव संस्था यस्य । यदि व्यक्तिर्वक्रा रूपमपि वक्रम् । तेजस्त्वं गुणत्वम् । वृत्तयो लक्षणानि ॥ ३९ ॥ क्षुत् तृट् च तद् द्वारेण अदनं पानं च ॥ ४० ॥ या पूर्वोत्पन्ना जिह्वा ततो रसग्रहणम् ॥ ४१ ॥ भौतिकानां पृथिव्यवयवानां संश्लेषात् । अत्र लवणोऽपि योज्यः ॥ ४२ ॥ प्राणनं जीवनम् आपोमयः प्राणः इति श्रुतेः । आप्यायनं सुखकरत्वम् उन्दनं विन्दुभावः । 'उन्दनं विन्दुभावः स्यात्' इत्यभिधानात् । उद्धृतस्यापि जलस्य कूपादौ भूयस्त्वमाधिक्यम् ॥ ४३ ॥ गन्धगो गन्धग्राहकः ॥ ४४ ॥ करम्भो मिश्रगन्धः । पूतिर्दुर्गन्धः । सौरभ्यं सुगन्धः । शान्तः शतपत्रादेः । उदग्रो लशुनादेः ॥४५॥ भावनं प्रतिमानिर्माणकारणत्वम् । सतामाकाशादीनां विशेषणं भेदकत्वं घटाकाशो घटजलं काष्ठवह्निरित्यादिरूपेण । सर्वेति । तत्तद्देशस्थप्राणिनामाकारविशेषे हेतुत्वम् । वृत्तिः कार्यमेव ॥ ४६ ॥ गुणः शब्दः । अर्थो विषयः । तत् इन्द्रियम् । स्पर्शनं त्वक् ॥ ४७ ॥ तेज इति सार्द्धकम् ॥ ४८ ॥ परस्य कारणस्य धर्मं शब्दादिः कार्ये वाय्वादौ कारणान्वयात् । भावानामाकाशादीनां विशेषः सर्वोऽपि गुणः शब्दादिरूपः ॥ ४९॥ असंहत्य अमिलित्वा यदा स्थितानि तदा जगदादिः परमात्मा ॥ ५० ॥ अनुविद्धेभ्यः क्षुभितेभ्यस्तत्क्षणादेव मिलितेभ्यश्च

एतदण्डं विशेषाख्यं क्रमवृद्धैर्दशोत्तरैः । तोयादिभिः परिवृतं प्रधानेनावृतैर्बहिः ।
यत्र लोकवितानोऽयं रूपं भगवतो हरेः ॥ ५२ ॥

हिरण्मयादण्डकोशादुत्थाय सलिलेशयात् । तमाविश्य महादेवो बहुधा निर्बिभेद खम् ॥५३॥

निरभिद्यतास्य प्रथमं मुखं वाणी ततोऽभवत् । वाण्या वह्निरथो नासे प्राणोतो घ्राण एतयोः॥५४॥

घ्राणाद्वायुरभिद्येतामक्षिणी चक्षुरेतयोः । तस्मात्सूर्यो न्यभिद्येतां कर्णौ श्रोत्रं ततो दिशः ॥५५॥

निर्बिभेद विराजस्त्वग्रोमश्मश्र्वादयस्ततः । तत ओषधयश्चासन् शिश्नं निर्बिभिदे ततः ॥५६॥

रेतस्तस्मादाप आसन्निरभिद्यत वै गुदम् । गुदादपानोऽपानाच्च मृत्युर्लोकभयंकरः ॥५७॥

हस्तौ च निरभिद्येतां बलं ताभ्यां ततः स्वराट् । पादौ च निरभिद्येतां गतिस्ताभ्यां ततो हरिः॥५८॥

नाड्योऽस्यनिरभिद्यन्त ताभ्यो लोहित मा भृतम् । नद्यस्ततः समभवन्नुदरं निरभिद्यत ॥५९॥

क्षुत्पिपासे ततः स्यातां समुद्रस्त्वेतयोरभूत् । अथास्य हृदयं भिन्नं हृदयान्मन उत्थितम् ॥६०॥

मनसश्चन्द्रमा जातो बुद्धिर्बुद्धेर्गिरां पतिः । अहंकारस्ततो रुद्रश्चित्तं चैत्यस्ततोऽभवत् ॥६१॥

एते ह्यभ्युत्थिता देवा नैवास्योत्थापनेऽशकन् । पुनराविविशुः खानि तमुत्थापयितुं क्रमात्॥६२॥

वह्निर्वाचा मुखं भेजे नोदतिष्ठत्तदा विराट् । घ्राणेन नासिके वायुर्नोदतिष्ठत्तदा विराट् ॥६३॥

अक्षिणी चक्षुषाऽऽदित्योनोदतिष्ठत्तदा विराट् । श्रोत्रेण कर्णौ च दिशो नोदतिष्ठत्तदा विराट्॥६४

त्वचं रोमभिरोषध्यो नोदतिष्ठत्तदा विराट् । रेतसा शिश्नमापस्तु नोदतिष्ठत्तदा विराट् ॥६५॥

गुदं मृत्युरपानेन नोदतिष्ठत्तदा विराट् । हस्ताविन्द्रो बलेनैव नोदतिष्ठत्तदा विराट् ॥६६॥

विष्णुर्गत्यैव चरणौ नोदतिष्ठत्तदा विराट् । नाडीर्नद्यो लोहितेन नोदतिष्ठत्तदा विराट् ॥६७॥

क्षुत्तृड्भ्यामुदरं सिन्धुर्नोदतिष्ठत्तदा विराट् । हृदयं मनसा चन्द्रो नोदतिष्ठत्तदा विराट् ॥६८॥

बुद्ध्या ब्रह्मापि हृदयं नोदतिष्ठत्तदा विराट् । रुद्रोऽभिमत्या हृदयं नोदतिष्ठत्तदा विराट् ॥६९॥

चित्तेन हृदयं चैत्यः क्षेत्रज्ञः प्राविशद्यदा । विराट् तदैव पुरुषः सलिलादुदतिष्ठत ॥७०॥

यथा प्रसुप्तं पुरुषं प्राणेन्द्रियमनोधियः । प्रभवन्ति विना येन नोत्थापयितुमोजसा ॥७१॥

तत्त्वेभ्यः ॥ ५१ ॥ दशोत्तरैरुत्तरोत्तरं दशगुणाधिकैः बहिः स्थितेन । यत्र अण्डे ॥ ५२ ॥ भगवान् खं छिद्रम् ॥ ५३ ॥ ततस्तत्र । नासे निरभिद्येताम् । ऊतः स्यूतः संवद्ध एतयोरभवत् ॥ ५४ ॥ घ्राणादनन्तरं वापुराविशत् । एवमग्रेऽपि पञ्चम्यन्तानां तदनन्तरमिति व्याख्या । दिशो देवताः ॥५५॥ आदिनाकेशाः । ततस्तत्र । ओषधयो देवताः ॥ ५६ ॥ रेत उपस्थेन्द्रियम् । आपो देवता ॥ ५७ ॥ स्वराट् इन्द्रः हरिर्विष्णुः ॥ ५८॥ आभृतं जातम् । नद्यो देवताः ॥५९॥ हृदयमधिष्ठानम् । मन इन्द्रियम् ॥६०॥ पतिर्ब्रह्मा । चित्ताधिष्ठाता वासुदेवः ॥ ६१ ॥ आविवशुः प्रयत्नं चक्रुः ॥ ६२।६३।६४।६५।६६।६७। ६८। ६९ ॥ चैत्यो वासुदेवः ॥७०॥ येनान्तर्यामिणा विना न समर्था भवन्ति तथा वह्न्यादयो नाशक्नुवन्

तमस्मिन् प्रत्यगात्मानं धिया योगप्रवृत्तया। भक्त्या विरक्त्या ज्ञानेन विविच्यात्मनि चिन्तयेत्॥७२

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां तृतीयस्कन्धे कापिलेयोपाख्याने तत्त्वसमाम्नाये षड्विंशोऽध्यायः ॥ २६ ॥

अथ सप्तविंशोऽध्यायः

श्रीभगवानुवाच

प्रकृतिस्थोऽपि पुरुषो नाज्यते प्राकृतैर्गुणैः। अविकारादकर्तृत्वान्निर्गुणत्वाज्जलार्कवत् ॥ १ ॥
स एष यर्हि प्रकृतेर्गुणेष्वभिविषज्जते। अहंक्रियाविमूढात्मा कर्तास्मीत्यभिमन्यते ॥ २ ॥
तेन संसारपदवीमवशोऽभ्येत्य निर्वृतः। प्रासङ्गिकैः कर्मदोषैः सदसन्मिश्रयोनिषु ॥ ३ ॥
अर्थे ह्यविद्यमानेऽपि संसृतिर्न निवर्तते। ध्यायतो विषयानस्य स्वप्नेऽनर्थागमो यथा ॥ ४ ॥
अत एव शनैश्चित्तं प्रसक्तमसतां पथि। भक्तियोगेन तीव्रेण विरक्त्या च नयेद्वशम् ॥ ५ ॥
यमादिभिर्योगपथैरभ्यसन् श्रद्धयान्वितः। मयि भावेन सत्येन मत्कथाश्रवणेन च ॥ ६ ॥
सर्वभूतसमत्वेन निर्वैरेणाप्रसङ्गतः। ब्रह्मचर्येण मौनेन स्वधर्मेण बलीयसा ॥ ७ ॥
यदृच्छयोपलब्धेन संतुष्टो मितभुङ् मुनिः। विविक्तशरणः शान्तो मैत्रः करुण आत्मवान् ॥ ८ ॥
सानुबन्धे च देहेऽस्मिन्नकुर्वन्नसदाग्रहम्। ज्ञानेन दृष्टतत्त्वेन प्रकृतेः पुरुषस्य च ॥ ९ ॥
निवृत्तबुद्ध्यवस्थानो दूरीभूतान्यदर्शनः। उपलभ्यात्मनाऽऽत्मानं चक्षुषेवार्कमात्मदृक् ॥१०॥
मुक्तिलिङ्गं सदाभासमसति प्रतिपद्यते। सतो बन्धुमसच्चक्षुः सर्वानुस्यूतमद्वयम् ॥११॥
यथा जलस्थ आभासः स्थलस्थेनावदृश्यते। स्वाभासेन तथा सूर्यो जलस्थेन दिवि स्थितः॥१२॥

तं जीवान्तर्यामिणम् आत्मनि हृदि चिन्तयेदिति द्वयोरन्वयः ॥७१।७२॥

इति श्रीमद्भागवते महापुराणे तृतीयस्कन्धे गूढार्थदीपिन्यां षड्विंशोऽध्यायः।

सप्तविंशे मनोरोधसाधनैः कृष्णभक्तितः।
प्रकृतिर्दह्यमानाशु लीयतेऽस्येति वर्ण्यते ॥ १ ॥

प्रकृतिस्थः देहस्थोऽपि पुरुषो जीवः गुणैः सुखदुःखादिभिर्न लिप्यते सुषुप्तिप्रलययोर्निर्गुणत्वादकर्तृत्वम् ॥ १ ॥ यर्हि जागरस्वप्नयोः ॥ २ ॥ तेनाभिमानेन पदवीमभ्येत्य देवतिर्यङ्नरादिषु निर्वृतः सुखितो भवति न तु विरज्यते ॥ ३ ॥ अर्थे कर्मरूपे। अनर्थागमः स्वशिरश्छेदादिः ॥ ४ ॥ अत एव विषयध्यानस्यानर्थहेतुत्वादेव ॥ ५ ॥ अभ्यसन् चित्तं स्थिरीकुर्वन्। अद्वयं प्रतिपद्यते इति षष्ठेनान्वयः। बलीयसा ईश्वरार्पितेन। विविक्तशरण एकान्तवासी। असदाग्रहम् अहंममताम्। अवस्थानि जाग्रदादीनि रागद्वेषादिद्वन्द्वानि वा। अन्यस्य विषयस्य। मुक्तैर्लिङ्ग्यते ज्ञायते तम्। असति नश्वरे जगति अन्तर्यामित्वेन सदैव भासते तम्। सतः पुरुषस्य प्रकृतेश्च बन्धुं नियन्तारम्। असतः कार्यस्य चक्षुः प्रकाशकम् ॥ ६।७।८।९।१०।११ ॥ यथेति युग्मकम्। तथा शब्दाश्चार्थे। यथा गृहकोणस्थितैः पुरुषैः स्थल

एवं त्रिवृदहंकारो भूतेन्द्रियमनोमयैः । स्वाभासैर्लक्षितोऽनेन सदाभासेन सत्यदृक् ॥१३॥

भूतसूक्ष्मेन्द्रियमनोबुद्ध्यादिष्विह निद्रया । लीनेष्वसति यस्तत्र विनिद्रो निरहंक्रियः ॥१४॥

मन्यमानस्तदाऽऽत्मानमनष्टो नष्टवन्मृषा । नष्टेऽहंकरणे द्रष्टा नष्टवित्त इवातुरः ॥१५॥

एवं प्रत्यवमृश्यासावात्मानं प्रतिपद्यते । साहंकारस्य द्रव्यस्य योऽवस्थानमनुग्रहः ॥१६॥

देवहूतिरुवाच

पुरुषं प्रकृतिर्ब्रह्मन्न विमुञ्चति कर्हिचित् । अन्योन्यापाश्रयत्वाच्च नित्यत्वादनयोः प्रभो ॥१७॥

यथा गन्धस्य भूमेश्च न भावो व्यतिरेकतः । अपां रसस्य च यथा तथा बुद्धेः परस्य च ॥१८॥

अकर्तुः कर्मबन्धोऽयं पुरुषस्य यदाश्रयः । गुणेषु सत्सु प्रकृतेः कैवल्यं तेष्वतः कथम् ॥१९॥

क्वचित्तत्त्वावमर्शेन निवृत्तं भयमुल्बणम् । अनिवृत्तनिमित्तत्वात्पुनः प्रत्यवतिष्ठते ॥२०॥

श्रीभगवानुवाच

अनिमित्तनिमित्तेन स्वधर्मेणामलात्मना । तीव्रया मयि भक्त्या च श्रुतसम्भृतया चिरम् ॥२१॥

ज्ञानेन दृष्टतत्त्वेन वैराग्येण बलीयसा । तपोयुक्तेन योगेन तीव्रेणात्मसमाधिना ॥२२॥

प्रकृतिः पुरुषस्येह दह्यमाना त्वहर्निशम् । तिरोभवित्री शनकैरग्नेर्योनिरिवारणिः ॥२३॥

भुक्तभोगा परित्यक्ता दृष्टदोषा च नित्यशः । नेश्वरस्याशुभं धत्ते स्वे महिम्नि स्थितस्य च ॥२४॥

स्थेन भित्तिस्थेन आभासेन प्रथमं जलस्थ आभासः यथा च तेन जलस्थेन स्वाभासेन सूर्यप्रतिम्बेन दिवि स्थितः सूर्योऽवदृश्यते एवमनेन प्रस्तुतेन जीवेन प्रथमं स्वाभासाःचित्प्रकाशिताः भूतादयः तैश्च कार्यैस्तत्कारणभूतस्त्रिगुणात्मकोऽहङ्कारस्तेन च सदाभासेन चित्प्रकाशितेनाऽहङ्कारेण सत्यदृक् नित्यस्वरूपः आत्मा लक्षितो भवतीत्यन्वयः ॥ १२।१३ ॥ भूतेति त्रिकम् । भूतादिषु निद्रया लीनेषु सत्सु यस्तत्र यस्तदा असति मृतकतुल्ये इह देहे वीतनिद्रस्तिष्ठति यश्च तदा सुषुप्तौ अहङ्करणे नष्टे सति स्वयमनष्टोऽपि नष्टवन्मन्यमानो भवति सोऽसौ द्रष्टा जीवः विवेकी प्रबोधनसमये सुखमहमस्वाप्सं न किञ्चिदवेदिषम् इत्येवमात्मपरामर्शं कृत्वा तमात्मानं सर्वावस्थानुगतत्वेन प्रतिपद्यते जानाति अनुभवतीत्वन्वयः । कथंभूतः स आत्मा । यः सान्तःकरणस्य द्रव्यस्य देहस्य अवस्थानं धारकः अनुग्राहकः प्रकाशकश्च । ॥ १४।१५।१६ ॥ पुरुषव्यतिरेकेण प्रकृतेः स्वरूपालाभात् प्रकृतिव्यतिरेकेण च पुरुषस्याभिव्यक्त्यभावादन्योन्याश्रयत्वम् ॥ १७ ॥ गन्धादेर्व्यतिरेकतः परस्परमेकस्य यथा भावः सत्ता न तथा प्रकृतेः पुरुषस्य च । गन्धस्य क्वचिदपक्षयदर्शनादपामित्युक्तम् ॥ १८ ॥ यद्गुणाश्रयः तेषु वर्तमानेषु अतः प्रकृतेर्मोक्षः ॥१९॥ निमित्रं कारणं रागरूपम् । प्रत्यवतिष्ठते उपस्थितं भवति ।२०। यदेति त्रिकम् । न निमित्तं फलं निमित्तं प्रवर्तकं यत्र । श्रुतं लीलाश्रवणं न तु वेदान्तादीति संशब्दो ध्वनयति । प्रकृतिः सूक्ष्मदेहः । अरणिः काष्ठभेदः । यथा स काष्ठादुत्पद्य काष्ठं दहति एवं ज्ञानं सूक्ष्मदेहादुत्पद्य तमेव । भस्मीभूता अरणिः यथाऽग्नितो वियुक्ता भवति तद्वत् ॥ २१।२२।२३ ॥ अशुभं संसारभयम् ईश्वरस्य समर्थभक्तस्य ।

यथा ह्यप्रतिबुद्धस्य प्रस्वापो बह्वनर्थभृत् । स एव प्रतिबुद्धस्य न वै मोहाय कल्पते ॥२५॥
एवं विदिततत्त्वस्य प्रकृतिर्मयि मानसम् । युञ्जतो नापकुरुत आत्मारामस्य कर्हिचित् ॥२६॥
यदैवमध्यात्मरतः कालेन बहुजन्मना । सर्वत्र जातवैराग्य आब्रह्मभुवनान्मुनिः ॥२७॥
मद्भक्तः प्रतिबुद्धार्थो मत्प्रसादेन भूयसा । निःश्रेयसं स्वसंस्थानं कैवल्याख्यं मदाश्रयम् ॥२८॥
प्राप्नोतीहाञ्जसा धीरः स्वदृशा छिन्नसंशयः । यद् गत्वा न निवर्तेत योगी लिङ्गाद्विनिर्गमे ॥२९॥
यदा न योगोपचितासु चेतो मायासु सिद्धस्य विषज्जतेऽङ्ग ।
अनन्यहेतुष्वथ मे गतिः स्यादात्यन्तिकी यत्र न मृत्युहासः ॥३०॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां तृतीयस्कन्धे कापिलेयोपाख्याने सप्तविंशोऽध्यायः ॥२७॥

अथाष्टाविंशोऽध्यायः

श्रीभगवानुवाच

योगस्य लक्षणं वक्ष्ये सबीजस्य नृपात्मजे । मनो येनैव विधिना प्रसन्नं याति सत्पथम् ॥ १ ॥
स्वधर्माचरणं शक्त्या विधर्माच्च निवर्तनम् । दैवाल्लब्धेन संतोष आत्मविच्चरणार्चनम् ॥ २ ॥
ग्राम्यधर्मनिवृत्तिश्च मोक्षधर्मरतिस्तथा । मितमेध्यादनं शश्वद्विविक्तक्षेमसेवनम् ॥ ३ ॥
अहिंसा सत्यमस्तेयं यावदर्थपरिग्रहः । ब्रह्मचर्यं तपः शौचं स्वाध्यायः पुरुषार्चनम् ॥ ४ ॥
मौनं सदाऽऽसनजयस्थैर्यं प्राणजयः शनैः । प्रत्याहारश्चेन्द्रियाणां विषयान्मनसा हृदि ॥ ५ ॥

स्वे महिम्नि भगवदनुभवं प्राप्तस्य ॥ २४।२५।२६ ॥ यदेति त्रिकम् । यदैवमध्यात्मरतस्तदा मत्प्रसादेन छिन्नसंशयः सन् योगी अञ्जसा सुखेन तद्धाम प्राप्नोति यद् गत्वा न निवर्तते इत्यन्वयः । लिङ्गाद्विनिर्गमे सूक्ष्मशरीरनाशे सति ॥ २७।२८।२९ ॥ अङ्ग हे मातः ! उपचितासु प्राप्तासु मायासु सिद्धिषु यदा न विषजते अथ तदा मे गतिः मत्प्राप्तिः स्यात् यत्र यस्यां मृत्युगर्वो न भवति । आत्यन्तिकी सार्वकालिकी न योगादन्यो हेतुर्यासु तासु ॥ ३० ॥

इति श्रीमद्भागवते महापुराणे तृतीयस्कन्धे गूढार्थदीपिन्यां सप्तविंशोऽध्यायः ।

अष्टाविंशे हरेरङ्गप्रत्यङ्गध्यानमद्भुतम् ।
वर्ण्यते यन्मनःस्थित्या स्वरूपज्ञानमाप्यते ॥

योगस्य ध्यानयोगस्य । बीजं ध्येयं वस्तु । यद्वा । साधनं यमनियमादि । सत्पथं ध्येयं भगवन्तम् ॥१।२॥ ग्राम्यधर्मो विषयसेवा । परिमितशुद्धभोजनम् । विविक्तक्षेमम् एकान्तनिर्बाधस्थानम् ॥ ३ ॥ यावता तावन्मात्रस्यार्थस्य ॥ ४ ॥ सद आसनं स्थिरसुखमासनं तस्य जयेन ॥ ५ ॥

स्वधिष्ण्यानामेकदेशे मनसा प्राणधारणम् । वैकुण्ठलीलाभिध्यानं समाधानं तथाऽऽत्मनः ॥ ६ ॥
एतैरन्यैश्च पथिभिर्मनो दुष्टमसत्पथम् । बुद्ध्या युञ्जीत शनकैर्जितप्राणो ह्यतन्द्रितः ॥ ७ ॥
शुचौ देशे प्रतिष्ठाप्य विजितासन आसनम् । तस्मिन् स्वस्ति समासीन ऋजुकायः समभ्यसेत् ॥८
प्राणस्य शोधयेन्मार्गं पूरकुम्भकरेचकैः । प्रतिकूलेन वा चित्तं यथा स्थिरमचञ्चलम् ॥ ९ ॥
मनोऽचिरात्स्याद्विरजं जितश्वासस्य योगिनः । वाय्वग्निभ्यां यथा लोहं ध्मातं त्यजति वै मलम्
प्राणायामैर्दहेद्दोषान्धारणाभिश्च किल्बिषान् । प्रत्याहारेण संसर्गान्ध्यानेनानीश्वरान् गुणान् ॥११॥
यदा मनः स्वं विरजं योगेन सुसमाहितम् । काष्ठां भगवतो ध्यायेत्स्वनासाग्रावलोकनः ॥१२॥
प्रसन्नवदनाम्भोजं पद्मगर्भारुणेक्षणम् । नीलोत्पलदलश्यामं शङ्खचक्रगदाधरम् ॥१३॥
लसत्पङ्कजकिञ्जल्कपीतकौशेयवाससम् । श्रीवत्सवक्षसं भ्राजत्कौस्तुभामुक्तकन्धरम् ॥१४॥
मत्तद्विरेफकलया परीतं वनमालया । परार्ध्यहारवलयकिरीटाङ्गदनूपुरम् ॥१५॥
काञ्चीगुणोल्लसच्छ्रोणिं हृदयाम्भोजविष्टरम् । दर्शनीयतमं शान्तं मनोनयनवर्धनम् ॥१६॥
अपीच्यदर्शनं शश्वत्सर्वलोकनमस्कृतम् । सन्तं वयसि कैशोरे भृत्यानुग्रहकातरम् ॥१७॥
कीर्तन्यतीर्थयशसं पुण्यश्लोकयशस्करम् । ध्यायेद्देवं समग्राङ्गं यावन्न च्यवते मनः ॥१८॥
स्थितं व्रजन्तमासीनं शयानं वा गुहाशयम् । प्रेक्षणीयेहितं ध्यायेच्छुद्धभावेन चेतसा ॥१९॥
तस्मिँल्लब्धपदं चित्तं सर्वावयवसंस्थितम् । विलक्ष्यैकत्र संयुज्यादङ्गे भगवतो मुनिः ॥ २० ॥

संचिन्तयेद्भगवतश्चरणारविन्दं वज्राङ्कुशध्वजसरोरुहलाञ्छनाढ्यम् ।
उत्तुङ्गरक्तविलसन्नखचक्रवालज्योत्स्नाभिराहतमहद्धृदयान्धकारम् ॥२१॥
यच्छौचनिःसृतसरित्प्रवरोदकेन तीर्थेन मूर्ध्न्यधिकृतेन शिवः शिवोऽभूत् ।
ध्यातुर्मनःशमलशैलनिसृष्टवज्रं ध्यायेच्चिरं भगवतश्चरणारविन्दम् ॥२२॥

प्राणस्थानानां मूलाधारादीनामेकदेशे हृदि । आत्मनो मनसः ॥ ६ ॥ अन्यैश्च व्रतादिभिः । युञ्जीत ध्याने योजयेत् ॥ ७ ॥ स्वस्तिकमासनमुद्रां विधाय यथा सुखं वा अकुटिलदेहः विजितासनः चिरमुपविशन्नप्यक्लमः प्राणं समभ्यसेत् ॥ ८ ॥ अस्थिरमपि चित्तं यथा निश्चलं स्यात् तथा ॥ ९ ॥ लोहं सुवर्णम् । ध्मातं सन्तप्तम् ॥ १० ॥ दोषान् वातश्लेष्मादीन् । संसर्गान् विषयसंगान् । अनीश्वरान् रागद्वेषादीन् ॥ ११ ॥ काष्ठामुत्कृष्टस्वरूपम् । नासाग्रं भ्रुकुटिमध्यम् ॥ १२ ॥ प्रसन्नेति षट्कम् ॥१३॥ किञ्जल्कवत् पीते । आमुक्ता बद्धा ग्रीवा यस्य ॥ १४ ॥ कलो मधुरध्वनिः । कं सुखं लातीति वा । परार्ध्यानि अमूल्यानि हारादीनि यस्य ॥ १५ ॥ गुणेन सूत्रेण । वर्धनं हर्षकरम् ॥ १६ ॥ अपीच्यमतिसुन्दरम् । कैशोरे पञ्चदशवर्षे । कातरं व्यग्रम् ॥ १७ ॥ तीर्थं पावनम् ॥१८॥ स्थितं गोपीमण्डले । व्रजन्तं गोपीगृहेषु । आसीनमुलूखले । शयानं राधाङ्के एवंभूतं गुहाशयं स्वहृदयस्थम् । ईहितं चौर्यादिलीला ॥ १९ ॥ तस्मिन् भगवद्विग्रहे । एकत्र एकैकस्मिन् ॥ २० ॥ आढ्यं युक्तम् । नखचक्रवालं नखमण्डलम् । महतां ध्यातॄणामन्धकारः अज्ञानलक्षणो वा येन ॥२१॥ यस्य शौचेन पादप्रक्षालन

जानुद्वयं जलजलोचनया जनन्या लक्ष्म्याखिलस्य सुरवन्दितया विधातुः ।
ऊर्वोर्निधाय करपल्लवरोचिषा यत्संलालितं हृदि विभोरभवस्य कुर्यात् ॥२३॥
उरू सुपर्णभुजयोरधिशोभमानावोजोनिधी अतसिकाकुसुमावभासौ ।
व्यालम्बिपीतवरवाससि वर्तमानकाञ्चीकलापपरिरम्भि नितम्बबिम्बम् ॥२४॥
नाभिह्रदं भुवनकोशगुहोदरस्थं यत्रात्मयोनिधिषणाखिललोकपद्मम् ।
व्यूढं हरिन्मणिमुषः स्तनयोरमुष्य ध्यायेद् द्वयं विशदहारमयूखगौरम् ॥२५॥
वक्षोऽधिवासमृषभस्य महाविभूतेः पुंसां मनोनयननिर्वृतिमादधानम् ।
कण्ठं च कौस्तुभमणेरधिभूषणार्थं कुर्यान्मनस्यखिललोकनमस्कृतस्य ॥२६॥
बाहूँश्च मन्दरगिरेः परिवर्तनेन निर्णिक्तबाहुवलयानधिलोकपालान् ।
संचिन्तयेद्दशशतारमसह्यतेजः शङ्खं च तत्करसरोरुहराजहंसम् ॥२७॥
कौमोदकीं भगवतो दयितां स्मरेत दिग्धामरातिभटशोणितकर्दमेन ।
मालां मधुव्रतवरूथगिरोपघुष्टां चैत्यस्य तत्त्वममलं मणिमस्य कण्ठे ॥२८॥
भृत्यानुकम्पितधियेह गृहीतमूर्तेः संचिन्तयेद्भगवतो वदनारविन्दम् ।
यद्विस्फुरन्मकरकुण्डलवल्गितेन विद्योतितामलकपोलमुदारनासम् ॥२९॥
यच्छ्रीनिकेतमलिभिः परिषेव्यमाणं भूत्या स्वया कुटिलकुन्तलवृन्दजुष्टम् ।
मीनद्वयाश्रियमधिक्षिपदब्जनेत्रं ध्यायेन्मनोमयमतन्द्रित उल्लसद्भ्रु ॥३०॥

जलेन शिवः स्वयं सुखमयोऽपि शिवोऽभूत् अतिसुखी जातः प्रियप्रसादत्वादित्यर्थः। मनोगतपापपर्वतेषु प्रक्षिप्तं वज्रं स्वलाञ्छनरूपं येन ॥२२॥ अखिलस्य विधातु र्ब्रह्मणो जनन्या स्वोर्वोर्निधाय यत्संलालितं तत् जानुद्वयं हृदि कुर्यात् ध्यायेदित्यन्वयः। नास्ति भवो ध्यातॄणां यस्मात्तस्य। अखिलस्य जनन्येति वा ॥२३॥ ऊरू नितम्बमण्डलं च हृदि कुर्यादिति पूर्वेणैवान्वयः। ओजो बलम्। परिरम्भः संश्लेषो विद्यते यस्य ॥२४॥ धिषणं ब्रह्मणः स्थानम् अखिललोकात्मकं पद्मं यत्र व्यूढमुत्पन्नम् तं नाभिह्रदं तथा अमुष्य स्तनयो र्द्वयं च ध्यायेदित्यन्वयः। कथंभूतस्य इन्द्रनीलमणिप्रभां मुष्णतः। कोशस्य समूहस्य गुहा अधिष्ठानं यदुदरं तत्र ॥ २५ ॥ ऋषभस्य श्रेष्ठस्य भगवतो वक्षस्तथा कण्ठं च मनसि कुर्यात् ध्यायेत्। कथंभूतम्। तस्याधिकं भूषणमेवार्थः प्रयोजनं यस्य। निर्वृतिमानन्दमुत्पादयन्तमित्युभयोर्विशेषणम्। विभूतेर्लक्ष्म्याः॥२६॥ समुद्रं मथ्नतो हरेर्बाहून् तथा दश शतारं चक्रं शंखं च सञ्चिन्तयेत्। कथंभूतान्। परिभ्रमणेन उज्ज्वलीकृतानि वलयानि अङ्गदानि येषु। अधि अधिष्ठिता लोकपाला येषु तान् राजहंसवत् शोभमानम् ॥२७॥ दिग्धां लिप्तां गदां तथाऽस्य कण्ठे मालां मणिं च स्मरेत। उपघुष्टां नादिताम्। कीदृशम् चैत्यस्य जीवस्य तत्त्वं स्वरूपप्रकाशकम्। अरातयः शत्रवः ॥ २८ ॥ वल्गितेन प्रचलनेन विद्योतितौ अमलकपोलौ यत्र तद्वदनारविन्दं सञ्चिन्तयेत् ॥ २९ ॥ जुष्टं युक्तं यद्वदनारविन्दं कर्तृ स्वया भूत्याऽनुपमशोभया भ्रमरैः परिषेव्यमाणं श्रीनिकेतनं पद्ममधिक्षिपत् वर्तते तत् ध्यायेत्। किञ्च तत्रैव मीनद्वयस्य श्रियमधिक्षिपत् यदब्जनेत्रयुगलं तच्चेत्यन्वयः। अतन्द्रितः निरालस्यः सन्। प्राचीनतम। तैलङ्गादिपुस्तकेषु

तस्यावलोकमधिकं कृपयातिघोरतापत्रयोपशमनाय निसृष्टमक्ष्णोः ।
स्निग्धस्मितानुगुणितं विपुलप्रसादं ध्यायेच्चिरं विपुलभावनया गुहायाम् ॥३१॥
हासं हरेरवनताखिललोकतीव्रशोकाश्रुसागरविशोषणमत्युदारम् ।
सम्मोहनाय रचितं निजमाययास्य भ्रूमण्डलं मुनिकृते मकरध्वजस्य ॥३२॥
ध्यानायनं प्रहसितं बहुलाधरोष्ठभासारुणायिततनुद्विजकुन्दपङ्क्ति ।
ध्यायेत्स्वदेहकुहरेऽवसितस्य विष्णोर्भक्त्याऽऽर्द्रयार्पितमना न पृथग्दिदृक्षेत् ॥३३॥
एवं हरौ भगवति प्रतिलब्धभावो भक्त्या द्रवद्धृदय उत्पुलकः प्रमोदात् ।
औत्कण्ठ्यबाष्पकलया मुहुरर्द्यमानस्तच्चापि चित्तबडिशं शनकैर्वियुङ्क्ते ॥३४॥
मुक्ताश्रयं यर्हि निर्विषयं विरक्तं निर्वाणमृच्छति मनः सहसा यथार्चिः ।
आत्मानमत्र पुरुषोऽव्यवधानमेकमन्वीक्षते प्रतिनिवृत्तगुणप्रवाहः ॥३५॥
सोऽप्येतया चरमया मनसो निवृत्त्या तस्मिन्महिम्न्यवसितः सुखदुःखबाह्ये ।
हेतुत्वमप्यसति कर्तरि दुःखयोर्यत्स्वात्मन् विधत्त उपलब्धपरात्मकाष्ठः ॥३६॥
देहं च तं न चरमः स्थितमुत्थितं वा सिद्धो विपश्यति यतोऽध्यगमत्स्वरूपम् ।
दैवादुपेतमथ दैववशादपेतं वासो यथा परिकृतं मदिरामदान्धः ॥३७॥

दर्शनात् परिनिविभ्यः' इति सूत्रबलाच्चोक्त एव पाठः साधुः। श्रियमित्यपि बहुभिः सम्मतः पाठः सुन्दरसङ्गतिश्च ॥ ३० ॥ अधिकमत्यन्तं कृपयैव अक्षिभ्यां निर्मितं तस्य भगवतोऽवलोकं चिरं सर्वदैव गुहायां हृदि ध्यायेत् । कथंभूतम् । सस्नेहेन मधुरहासेन उपशोभितम् । विपुलभावनया प्रेमातिशयेन ॥ ३१ ॥ अत्युदारम् अतिसुखदं हरे मन्दहासं तथाऽस्य भ्रूमण्डलं च ध्यायेत् । मुनीनामुपकारार्थं कामस्य संमोहनाय कृपया व्यक्तीकृतम् ॥ ३२॥ देहकुहरे हृदयाकाशे प्रकटितस्य विष्णोरुच्चैर्हसितं ध्यायेत् ततश्च तस्मिन्नेवार्पितमनाः सन् पृथक् वस्तु द्रष्टुं नेच्छेत् । अरुणीभूतास्तनुद्विजाः सूक्ष्मदन्ता एव कुन्दकलिकारूपास्तेषां पङ्क्तिः स्फुरति यस्मिन् तत्प्रहसितम् ॥ ३३ ॥ भावः प्रेम । द्रवत् द्रवीभूतम् । उत्पुलकः जातरोमाञ्चः । वाष्पकलायाऽश्रुधारया एव आर्द्रीक्रियभावः । पुमान् वडिशमिव यच्चित्तं दुर्ग्रहं भगवन्तं ग्रहीतुं प्रायुङ्क्त तस्य तच्चित्तमपि लक्ष्यं प्राप्य स्वत एव वियुङ्क्ते ग्रहणव्यापारवियुक्तं रहितं सत् तिष्ठति तत्र श्लिष्टं भवति । वडिश मत्स्यग्रहणसाधनं लोहकण्टकं यथा मत्स्यं गृहीत्वा निर्व्यापारं तिष्ठति तद्वदित्यर्थः ॥३४॥ मुक्तो नित्यमुक्तो भगवान् तदाश्रय तद्विषयकं यर्हि मनो भवति तर्हि निर्विषयं सत् निर्वाणमृच्छति लयं प्राप्नोति अत्र दशायां पुरुषो जीवः व्यवधानशून्यमेकमात्मानं परमात्मानं श्रीकृष्णमन्वीक्षेत । गुणप्रवाहः संसारः । अर्चिर्दीपकलिका यथा तैलवर्त्याद्यभावे ॥ ३५ ॥ सुखमपि दुःखं यस्मिन् स सुखदुःख संसारः स वाह्यो यस्मात् तस्मिन् महिम्नि भगवति कृष्णेऽवसितः प्रतिबद्धः पुमान् आत्मनि सुखदुःखःयोर्हेतुत्वं भोक्तृत्वं यत्पूर्वमासीत् तत् असति अविद्याकृते कर्तरि अहङ्कारे एव विधत्ते तन्निष्ठमेव पश्यति ननु स्वस्मिन् । कुतः । अहङ्काराभावात् । तत्कुतः । उपलब्धकृष्णस्वरूपः॥ ३६॥ चरमदशापन्नः सिद्धो देहमेव न पश्यति कुतः सुखदुःखे । यथा परिकृतं कट्यां वेष्टितम् ॥ ३७ ॥ यावद

देहोऽपि दैववशगः खलु कर्म यावत्स्वारम्भकं प्रतिसमीक्षत एव सासुः ।
तं सप्रपञ्चमधिरूढसमाधियोगः स्वाप्नं पुनर्न भजते प्रतिबुद्धवस्तुः ॥३८॥
यथा पुत्राच्च वित्ताच्च पृथङ्मर्त्यः प्रतीयते । अप्यात्मत्वेनाभिमताद्देहादेः पुरुषस्तथा ॥३९॥
यथोल्मुकाद्विस्फुलिङ्गाद्धूमाद्वापि स्वसम्भवात् । अप्यात्मत्वेनाभिमताद्यथाग्निः पृथगुल्मुकात्॥४०॥
भूतेन्द्रियान्तःकरणात्प्रधानाज्जीवसंज्ञितात् । आत्मा तथा पृथग्द्रष्टा भगवान् ब्रह्मसंज्ञितः॥४१॥
सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि । ईक्षेतानन्यभावेन भूतेष्विव तदात्मताम् ॥४२॥
स्वयोनिषु यथा ज्योतिरेकं नाना प्रतीयते । योनीनां गुणवैषम्यात्तथाऽऽत्मा प्रकृतौ स्थितः॥४३॥
तस्मादिमां स्वां प्रकृतिं दैवीं सदसदात्मिकाम् । दुर्विभाव्यां पराभाव्य स्वरूपेणावतिष्ठते॥४४॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां तृतीयस्कन्धे कापिलेयोपाख्याने साधनानुष्ठानं नामाष्टाविंशोऽध्यायः ॥ २८ ॥

अथैकोनत्रिंशोऽध्यायः

देवहूतिरुवाच

लक्षणं महदादीनां प्रकृतेः पुरुषस्य च । स्वरूपं लक्ष्यतेऽमीषां येन तत्पारमार्थिकम् ॥ १ ॥
यथा सांख्येषु कथितं यन्मूलं तत्प्रक्षते । भक्तियोगस्य मे मार्गं ब्रूहि विस्तरशः प्रभो ॥ २ ॥
विरागो येन पुरुषो भगवन् सर्वतो भवेत् । आचक्ष्व जीवलोकस्य विविधा मम संसृतीः॥ ३ ॥

देहारम्भकं कर्म तावत् सासुः जीवन् सन् प्रतीक्षते एव किन्तु जीवन्तमपि स्वप्नतुल्यं तं देहं नोपास्ते यतो ज्ञाततत्त्वः ॥३८॥ अभिमतादपि पुत्रादेः ॥३९॥ यथेति युग्मकम् । यथा वस्तुतः उल्मुकात् अर्धदग्धकाष्ठात् ज्वलत्काष्ठात् अग्निः वा पृथक् उल्मुकाग्निसंयोगसंभवात् यथा च अग्नेः संभूतात् अग्निकणात् धूमाद्वापिऽग्निः पृथक् तथेत्यन्वयः। तापकतया धूमेऽप्यग्न्यंशसद्भावेन अग्निस्वरूपतयाऽभिमतात् प्रतीतादिति त्रयाणां विशेषणम् । उल्मुकमत्तिज्वलयतीत्यग्निविशेषणम् । उल्मुक स्थानीयात् प्रधानात् । विस्फुलिङ्गस्थानीयात् जीवेति । धूमस्थानीयात् भूतेति ॥४०।४१॥ एवं सर्वभूतेषु चेतनाचेतनेषु तदात्मतां तत्सत्तामेव । इव एवार्थे ॥४२॥ योनिषु काष्ठेषु । ज्योतिरग्निः । वैषम्यात् ह्रस्वदीर्घादिभेदात् । प्रकृतौ देहे ॥४३॥ पराभाव्य जित्वा मोक्षं प्राप्नोति ॥ ४४ ॥

इति श्रीमद्भागवते महापुराणे तृतीयस्कन्धे गूढार्थदीपिन्याष्टाविंशोऽध्यायः ।

एकोनत्रिंशके भक्तेः स्वरूपं सगुणाऽगुणम् ।
भूतमानक्रमः कालबलं चात्र निरूप्यते ॥ १ ॥

लक्षणमिति युग्मकम् । महदादीनां लक्षणं यथा सांख्येषु कथितं येन च अमीषां यथार्थस्वरूपं लक्ष्यते तत्कथितं त्वया यतस्तल्लक्षणं यस्य भक्तियोगस्य मूलं साधनं प्रचक्षते तस्य मार्गं भेदं ब्रूहीत्यन्वयः ॥१।२॥ विराग इति युग्मकम् । मम ताः संसृतीराचक्ष्व येन संसृतिवर्णनेन विगतरागो भवेत्

कालस्येश्वररूपस्य परेषां च परस्य ते । स्वरूपं बत कुर्वन्ति यद्धेतोः कुशलं जनाः ॥ ४ ॥
लोकस्य मिथ्याभिमतेरचक्षुषश्चिरं प्रसुप्तस्य तमस्यनाश्रये ।
श्रान्तस्य कर्मस्वनुविद्धया धिया त्वमाविरासीः किल योगभास्करः ॥ ५ ॥

मैत्रेय उवाच

इति मातुर्वचः श्लक्ष्णं प्रतिनन्द्य महामुनिः । आबभाषे कुरुश्रेष्ठ प्रीतस्तां करुणार्दितः ॥ ६ ॥

श्रीभगवानुवाच

भक्तियोगो बहुविधो मार्गैर्भामिनि भाव्यते । स्वभावगुणमार्गेण पुंसां भावो विभिद्यते ॥ ७ ॥
अभिसंधाय यो हिंसां दम्भं मात्सर्यमेव वा । संरम्भी भिन्नदृग्भावं मयि कुर्यात्स तामसः ॥ ८ ॥
विषयानभिसंधाय यश ऐश्वर्यमेव वा । अर्चादावर्चयेद्यो मां पृथग्भावः स राजसः ॥ ९ ॥
कर्मनिर्हारमुद्दिश्य परस्मिन् वा तदर्पणम् । यजेद्यष्टव्यमिति वा पृथग्भावः स सात्त्विकः ॥१०॥
मद्गुणश्रुतिमात्रेण मयि सर्वगुहाशये । मनोगतिरविच्छिन्ना यथा गङ्गाम्भसोऽम्बुधौ ॥११॥
लक्षणं भक्तियोगस्य निर्गुणस्य ह्युदाहृतम् । अहैतुक्यव्यवहिता या भक्तिः पुरुषोत्तमे ॥१२॥
सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्युत । दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः ॥१३॥
स एव भक्तियोगाख्य आत्यन्तिक उदाहृतः । येनातिव्रज्य त्रिगुणं मद्भावायोपपद्यते ॥१४॥
निषेवितानिमित्तेन स्वधर्मेण महीयसा । क्रियायोगेन शस्तेन नातिहिंस्रेण नित्यशः ॥१५॥
मद्धिष्ण्यदर्शनस्पर्शपूजास्तुत्यभिवन्दनैः । भूतेषु मद्भावनया सत्त्वेनासङ्गमेन च ॥१६॥
महतां बहुमानेन दीनानामनुकम्पया । मैत्र्या चैवात्मतुल्येषु यमेन नियमेन च ॥१७॥
आध्यात्मिकानुश्रवणान्नामसंकीर्तनाच्च मे । आर्जवेनार्यसङ्गेन निरहंक्रियया तथा ॥१८॥

ते तव प्रजा यद्धेतोर्यद्भयात् पुण्यं कुर्वन्ति बत हर्षे तस्य कालस्य स्वरूपं चाचक्ष्व कथयेत्यन्वयः ॥३।४॥ अत्र क्षुषोऽज्ञस्य । अनुविद्धया आसक्तया । भक्तिज्ञानात्मकयोगयोः कमलयोः भास्कर इव प्रकाशकः ॥५॥ श्लक्ष्णं मधुरम् ॥ ६ ॥ हे भामिनि पूज्ये । भाव्यते निष्पाद्यते ॥ ७ ॥ अभिसन्धाय सङ्कल्प्य । संरम्भी-क्रोधी । भावं भक्तिम् ॥ ९ ॥ अर्चादौ प्रतिमादौ ॥ ९ ॥ कर्मनिर्हारं कर्मक्षयं मोक्षम् । अर्पणं यथा प्रीतिमुद्दिश्य । यष्टव्यमिति विधिसिद्धिमुद्दिश्य ॥ १० ॥ मदिति युग्मकम् । मयि पुरुषोत्तमे मनोगति-रिति या भक्तिः सा निर्गुणस्य लक्षणमित्यन्वयः । अहैतुकी निष्कामा ॥ ११।१२॥ जना उत्तमभक्ता दीयमानमपि न गृह्णन्ति किमुत सांसारिकफलम् । सार्ष्टिं समानैश्चर्यम् । एकत्वं सायुज्यम् । तथा च लोकेषु विष्णोर्निवसन्ति केचिद् समीपमृच्छन्ति च केचिदन्ये । अन्ये तु रूपं सदृशं भजन्ते सायुज्यमन्ये सः नु मोक्ष उक्तः' इति ॥ १३ ॥ येनाऽतिक्रम्य मद्भावाय मद्विषयकप्रेम्णे स आत्यन्तिकः सर्वान्तिम ॥ १४ ॥ निषेवितश्चासौ अनिमित्तो निष्कामश्च तेनेत्येकं पदम् । शस्तेन शास्त्रप्रसिद्धेन । मन्दिरमार्जनादिषु पिपीलिकादिसूक्ष्महिंसाया अनिवार्यत्वादतिशब्दः ॥ १५ ॥ मद्धिष्ण्यं मत्प्रतिमादि । सत्त्वेन धैर्येण ॥ १६ ॥ यमोऽहिंसादिः । नियमः शौचादिः ॥ १७ ॥ आत्मानं श्रीकृष्णमधिकृत्य यद्

मद्धर्मणो गुणैरेतैः परिसंशुद्ध आशयः। पुरुषस्याञ्जसाभ्येति श्रुतमात्रगुणं हि माम् ॥१९॥
यथा वातरथो घ्राणमावृङ्क्ते गन्ध आशयात्। एवं योगरतं चेत आत्मानमविकारि यत्॥२०॥
अहं सर्वेषु भूतेषु भूतात्मावस्थितः सदा। तमवज्ञाय मां मर्त्यः कुरुतेऽर्चाविडम्बनम् ॥२१॥
यो मां सर्वेषु भूतेषु सन्तमात्मानमीश्वरम्। हित्वार्चां भजते मौढ्याद्भस्मन्येव जुहोति सः २२
द्विषतः परकाये मां मानिनो भिन्नदर्शिनः। भूतेषु बद्धवैरस्य न मनः शान्तिमृच्छति ॥२३॥
अहमुच्चावचैर्द्रव्यैः क्रिययोत्पन्नयानघे। नैव तुष्येऽर्चितोऽर्चायां भूतग्रामावमानिनः ॥२४॥
अर्चादावर्चयेत्तावदीश्वरं मां स्वकर्मकृत्। यावन्न वेद स्वहृदि सर्वभूतेष्ववस्थितम् ॥२५॥
आत्मनश्च परस्यापि यः करोत्यन्तरोदरम्। तस्य भिन्नदृशो मृत्युर्विदधे भयमुल्बणम् ॥२६॥
अथ मां सर्वभूतेषु भूतात्मानं कृतालयम्। अर्हयेद्दानमानाभ्यां मैत्र्याभिन्नेन चक्षुषा ॥२७॥
जीवाः श्रेष्ठा ह्यजीवानां ततः प्राणभृतः शुभे। ततः सचित्ताः प्रवरास्ततश्चेन्द्रियवृत्तयः॥२८॥
तत्रापि स्पर्शवेदिभ्यः प्रवरा रसवेदिनः। तेभ्यो गन्धविदः श्रेष्ठास्ततः शब्दविदो वराः॥२९॥
रूपभेदविदस्तत्र ततश्चोभयतोदतः। तेषां बहुपदाः श्रेष्ठाश्चतुष्पादस्ततो द्विपात् ॥३०॥
ततो वर्णाश्च चत्वारस्तेषां ब्राह्मण उत्तमः। ब्राह्मणेष्वपि वेदज्ञो ह्यर्थज्ञोऽभ्यधिकस्ततः ॥३१॥
अर्थज्ञात्संशयच्छेत्ता ततः श्रेयान् स्वकर्मकृत्। मुक्तसङ्गस्ततो भूयानदोग्धा धर्ममात्मनः॥३२॥
तस्मान्मय्यर्पिताशेषक्रियार्थात्मा निरन्तरः। मय्यर्पितात्मनः पुंसो मयि संन्यस्तकर्मणः।
न पश्यामि परं भूतमकर्तुः समदर्शनात् ॥३३॥

तत् आध्यात्मिकं बाललीलादि। आर्जवेन अकौटिल्येन ॥ १८ ॥ मम लीला श्रवणादिरेव धर्मो यस्य। तस्य आशयश्चित्तम्। अञ्जसा सुखेन ॥१९॥ यथा वातारूढो गन्ध आशयात् पुष्पादितः घ्राणं प्राप्नोति एवं भक्तियोगरतं यच्चेतः तदात्मानं श्रीकृष्णम् ॥ २० ॥ भूताधिष्ठितं मामवज्ञाय अर्चा भौतिकप्रतिमाधिष्ठितस्य मम पूजनमपि विडम्बनं तदनुकारित्वादवज्ञानमेवेत्यर्थः। एवमग्रेऽपि एतेन न मूर्तिनिन्दाऽभिप्रेता किन्तु अन्तर्याम्युपासनैव साधितेति तत्त्वम् ॥ २१ ॥ हित्वा उपेक्ष्य। अर्चां प्रतिमां पूजयति। जडपूजनं कृत्वा साक्षाद् भूतान्तर्यामिणं मां तिरस्करोतीत्यतः तत् पूजाग्रहणाद्भस्मन्येवेत्युक्तम् ॥ २२ ॥ न ऋच्छति न प्राप्नोति ॥ २३ ॥ द्रव्यैरुत्पन्नया सम्पादितया ॥२४।२५॥ स्वस्य परस्यापि हृदि स्थितमेकमेव अन्तरेण भेदेन युक्तम् उदरं ब्रह्म करोति। 'उदरं ब्रह्म' इति श्रुतेः ॥ २६ ॥ अथ अतः। तेषु कृतालयं तेषामात्मानं कारणं च ॥ २७ ॥ अजीवानामचेतनेभ्यः शुष्ककाष्ठादिभ्यः सजीवाः पाषाणादयस्तेषां वृद्धिदर्शनात्। प्राणभृतस्तृणादयः। रसवृद्धिदर्शनात्। सचित्ता लताद्या वृक्षं प्रति चलन दर्शनात्। इन्द्रियवृत्तयो वृक्षाः। तस्मात्पश्यन्ति पादपाः' इत्युक्तेः ॥ २८ ॥ स्पर्शवेदिभ्यः वृक्षादिभ्यः। तेषां स्पर्शेन्द्रियस्य प्रसिद्धत्वात्। रसवेदिनो मत्स्यादयः। गन्धविदो भ्रमरादयः। शब्दविदो हरिण सर्पादयः ॥ २९ ॥ रूपभेदविदः काकादयः। उभयतोदतः अजादयः। बहुपदः शरभादयः ॥ ३० ॥ ततस्तेषु ॥ ३१ ॥ मुक्तसङ्गो ज्ञानी। अदोग्धा फलानभीप्सुः ॥ ३२ ॥ तस्मादित्यर्द्धम्। अर्थः फलम्।

मनसैतानि भूतानि प्रणमेद्बहु मानयन् । ईश्वरो जीवकलया प्रविष्टो भगवानिति ॥३४॥
भक्तियोगश्च योगश्च मया मानव्युदीरितः । ययोरेकतरेणैव पुरुषः पुरुषं व्रजेत् ॥३५॥
एतद्भगवतो रूपं ब्रह्मणः परमात्मनः । परं प्रधानंपुरुषं दैवं कर्मविचेष्टितम् ॥३६॥
रूपभेदास्पदं दिव्यं काल इत्यभिधीयते । भूतानां महदादीनां यतो भिन्नदृशां भयम् ॥३७॥
योऽन्तः प्रविश्य भूतानि भूतैरत्त्यखिलाश्रयः। स विष्णवाख्योऽधियज्ञोऽसौ कालः कलयतां प्रभुः३८
न चास्य कश्चिद्दयितो न द्वेष्यो न च बान्धवः । आविशत्यप्रमत्तोऽसौ प्रमत्तं जनमन्तकृत्३९
यद्भयाद्वाति वातोऽयं सूर्यस्तपति यद्भयात् । यद्भयाद्वर्षते देवो भगणो भाति यद्भयात् ॥४०॥
यद्वनस्पतयो भीता लताश्चौषधिभिः सह । स्वे स्वे कालेऽभिगृह्णन्ति पुष्पाणि च फलानि च ४१
स्रवन्ति सरितो भीता नोत्सर्पत्युदधिर्यतः । अग्निरिन्धे सगिरिभिर्भूर्न मज्जति यद्भयात् ।४२।
नभो ददाति श्वसतां पदं यन्नियमाददः । लोकं स्वदेहं तनुते महान् सप्तभिरावृतम् ॥४३॥
गुणाभिमानिनो देवाः सर्गादिष्वस्य यद्भयात् । वर्तन्तेऽनुयुगं येषां वश एतच्चराचरम् ॥४४॥
सोऽनन्तोऽन्तकरः कालोऽनादिरादिकृदव्ययः । जनं जनेन जनयन्मारयन्मृत्युनान्तकम् ॥४५॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां तृतीयस्कन्धे
कापिलेयोपाख्याने एकोनत्रिंशोऽध्यायः ॥ २९ ॥

आत्मा देहः निरन्तरो व्यवधानरहितः मदात्मको वा ॥ ३३ ॥ परं श्रेष्ठमन्यन्न ॥३४॥ जीवरूपा या कला स्वांशतया । इति मनसा इति द्रष्टव्या ॥ ३५ ॥ योगो ज्ञानयोगः । पुरुषं श्रीविष्णुम् ॥ ३६ ॥ एतदिति युग्मकम् । प्रध.नं प्रकृतिः पुरुषश्चेति द्वन्द्वैक्यं परं तयोर्नियन्तृ च कर्मभिः पुण्यपापैर्विविधं चेष्टितं यतस्तत् दैवं जीवादृष्टं च किं बहुना रूपभेदस्यास्पदं सर्वमेव एतत् जगत् भगवतोदिव्यं रूपं काल इत्यभिधीयते ॥ ३७।३८॥ अधियज्ञः यज्ञफलदाता । कलयतो वशीकुर्वतां ब्रह्मादीनामपि प्रभुर्नियन्ता ॥३९।४०॥ भगणो नक्षत्रसमूहः ॥ ४१ ॥ यत् यस्मात् ॥ ४२ ॥ नोत्सर्पति मर्यादां न त्यजति । इन्धे ज्वलति ॥ ४३ ॥ नियमात् आज्ञातः । पदमवकाशम् । लोकं ब्रह्माण्डत्वेन ॥ ४४ ॥ देवा ब्रह्मादयोऽनुयुगं वारं वारं प्रवर्तन्ते ॥४५॥ जनं पुत्रादिकं जनयन् आदिकृत् मृत्युना अन्तकमपि मारयन्नन्तकरः स्वयमनादिरनन्तोऽव्ययश्च ॥ ४६ ॥

इति श्रीमद्भागवते महापुराणे तृतीय स्कन्धे गूढार्थदीपिन्यां मेकोनत्रिंशोऽध्यायः ।

अथ त्रिंशोऽध्यायः

कपिल उवाच

तस्यैतस्य जनो नूनं नायं वेदोरुविक्रमम् । काल्यमानोऽपि बलिना वायोरिव घनावलिः ॥१॥
यं यमर्थमुपादत्ते दुःखेन सुखहेतवे । तं तं धुनोति भगवान् पुमाञ्छोचति यत्कृते ॥ २ ॥
यदध्रुवस्य देहस्य सानुबन्धस्य दुर्मतिः । ध्रुवाणि मन्यते मोहाद् गृहक्षेत्रवसूनि च ॥ ३ ॥
जन्तुर्वै भव एतस्मिन् यां यां योनिमनुव्रजेत् । तस्यां तस्यां स लभते निर्वृतिं न विरज्यते॥४॥
नरकस्थोऽपि देहं वै न पुमांस्त्यक्तुमिच्छति । नारक्यां निर्वृतौ सत्यां देवमायाविमोहितः ॥५॥
आत्मजायासुतागारपशुद्रविणबन्धुषु । निरूढमूलहृदय आत्मानं बहु मन्यते ॥ ६ ॥
संदह्यमानसर्वाङ्ग एषामुद्वहनाधिना । करोत्यविरतं मूढो दुरितानि दुराशयः ॥ ७ ॥
आक्षिप्तात्मेन्द्रियः स्त्रीणामसतीनां च मायया । रहो रचितयाऽऽलापैः शिशूनां कलभाषिणाम्८
गृहेषु कूटधर्मेषु दुःखतन्त्रेष्वतन्द्रितः । कुर्वन्दुःखप्रतीकारं सुखवन्मन्यते गृही ॥ ९ ॥
अर्थैरापादितैर्गुर्व्या हिंसयेतस्ततश्च तान् । पुष्णाति येषां पोषेण शेषभुग्यात्यधः स्वयम् ॥१०॥
वार्तायां लुप्यमानायामारब्धायां पुनः पुनः । लोभाभिभूतो निःसत्त्वः परार्थे कुरुते स्पृहाम्॥११॥
कुटुम्बभरणाकल्पो मन्दभाग्यो वृथोद्यमः । श्रिया विहीनः कृपणो ध्यायञ्छ्वसिति मूढधीः ॥१२॥
एवं स्वभरणाकल्पं तत्कलत्रादयस्तथा । नाद्रियन्ते यथा पूर्वं कीनाशा इव गोजरम् ॥१३॥
तत्राप्यजातनिर्वेदो भ्रियमाणः स्वयम्भृतैः । जरयोपात्तवैरूप्यो मरणाभिमुखो गृहे ॥१४॥
आस्तेऽवमत्योपन्यस्तं गृहपाल इवाहरन् । आमयाव्यप्रदीप्ताग्निरल्पाहारोऽल्पचेष्टितः ॥१५॥

त्रिंशे गृहेषु सक्तानां प्रावोचत्कामिनां नृणाम् ।
ऐहिकीर्नारकी र्घोरा यन्त्रणाश्च विरक्तये ॥ १ ॥

तस्योक्तप्रभावस्य एतस्य कालस्य महाविक्रमम् । बलिना तेन कालेन काल्यमानः पीड्यमानोऽपि ॥१॥ धुनोति नाशयति । भगवान् कालः । यत्कृते यन्निमित्तम् ॥२॥ अनुबन्धो भार्यादिः । यत् यस्मात् मन्यते तस्मात् तन्नाशे शोचतीति योजना ॥ ३ ॥ निर्वृतिं सुखम् ॥ ४।५ ॥ निरूढं सुदृढं वासनारूपं मूलं यस्य तादृशं हृदयं यस्य ॥ ६ ॥ उद्वहनाधिना पालनचिन्तया ॥ ७ ॥ आक्षिप्तेति युग्मकम् । रचितया मायया संभोगादिरूपया आलापैश्च वशीभूतचित्तेन्द्रियो गृही सुखवन्मन्यते इत्यन्वयः । कूटाः सकपटाः । तन्त्रं प्रधानम् ॥८।९॥ गुर्व्या बहुलया । इतस्ततः आपादितैः सञ्चितैः । शेषभुक् तद्भुक्तावशिष्टभुगिति भोगोऽपि तस्य दुर्लभः । अधो नरकम् ॥ १० ॥ वार्तायां जीविकायाम् । निःसत्त्वो-गतधैर्यः ॥ ११ ॥ अकल्पोऽसमर्थः श्वसिति रुदन्निव श्वासान्मुञ्चति ॥ १२ ॥ कीनाशाः कर्षकाः । 'कृतान्ते पुंसि कीनाशः क्षुद्रकर्षकयोस्त्रिषु' इत्यमरः । गोजरं वृद्धबलीवर्दम् ॥ १३ ॥ तत्रेति युग्मकम् । तत्रापि एवमनादरेऽपि अनुत्पन्नवैराग्यः । भ्रियमाणः पुष्यमाणः । अवज्ञया उपन्यस्तं प्रक्षिप्तमन्नादि श्वेव

वायुनोत्क्रमतोत्तारः कफसंरुद्धनाडिकः । कासश्वासकृतायासः कण्ठे घुरघुरायते ॥१६॥
शयानः परिशोचद्भिः परिवीतः स्वबन्धुभिः । वाच्यमानोऽपि न ब्रूते कालपाशवशं गतः ॥१७॥
एवं कुटुम्बभरणे व्यापृतात्माजितेन्द्रियः । म्रियते रुदतां स्वानामुरुवेदनयास्तधीः ॥१८॥
यमदूतौ तदा प्राप्तौ भीमौ सरभसेक्षणौ । स दृष्ट्वा त्रस्तहृदयः शकृन्मूत्रं विमुञ्चति ॥१९॥
यातनादेह आवृत्य पाशैर्बद्ध्वा गले बलात् । नयतो दीर्घमध्वानं दण्ड्यं राजभटा यथा ॥२०॥
तयोर्निर्भिन्नहृदयस्तर्जनैर्जातवेपथुः । पथि श्वभिर्भक्ष्यमाण आर्तोऽघं स्वमनुस्मरन् ॥२१॥

क्षुत्तृट्परीतोऽर्कदवानलानिलैः संतप्यमानः पथि तप्तवालुके ।
कृच्छ्रेण पृष्ठे कशया च ताडितश्चलत्यशक्तोऽपि निराश्रमोदके ॥२२॥

तत्र तत्र पतञ्छ्रान्तो मूर्च्छितः पुनरुत्थितः । पथा पापीयसा नीतस्तरसा यमसादनम् ॥२३॥
योजनानां सहस्राणि नवतिं नव चाध्वनः । त्रिभिर्मुहूर्तैर्द्वाभ्यां वा नीतः प्राप्नोति यातनाः ॥२४॥
आदीपनं स्वगात्राणां वेष्टयित्वोल्मुकादिभिः । आत्ममांसादनं क्वापि स्वकृत्तं परतोऽपि वा ॥२५॥
जीवतश्चान्त्राभ्युद्धारः श्वगृध्रैर्यमसादने । सर्पवृश्चिकदंशाद्यैर्दशद्भिश्चात्मवैशसम् ॥२६॥
कृन्तनं चावयवशो गजादिभ्यो भिदापनम् । पातनं गिरिशृङ्गेभ्यो रोधनं चाम्बुगर्तयोः ॥२७॥
यास्तामिस्रान्धतामिस्रा रौरवाद्याश्च यातनाः । भुङ्क्ते नरो वा नारी वा मिथः सङ्गेन निर्मिताः
अत्रैव नरकः स्वर्ग इति मातः प्रचक्षते । या यातना वै नारक्यस्ता इहाप्युपलक्षिताः ॥२९॥
एवं कुटुम्बं बिभ्राण उदरम्भर एव वा । विसृज्येहोभयं प्रेत्य भुङ्क्ते तत्फलमीदृशम् ॥३०॥
एकः प्रपद्यते ध्वान्तं हित्वेदं स्वकलेवरम् । कुशलेतरपाथेयो भूतद्रोहेण यद् भृतम् ॥३१॥

भुञ्जानः गृहे एवास्ते इत्यन्वयः : आमयावी रोगी ॥ १४।१५ ॥ उत्क्रमता कृच्छ्रान्निर्गच्छता उत्तारः बहिर्निर्गतनेत्रः ॥ १६ ॥ परिवीत आवृतः ॥ १७ ॥ व्यापृतात्मा संलग्नचित्तः अस्तधीर्बाह्यज्ञानशून्यः सन् ॥ १८ ॥ सरभसेक्षणौ सक्रोधनेत्रौ । स पापी । शकृत्पुरीषम् ॥ १९ ॥ आवृत्य निरुध्य । नयतस्तौ । भटाः भृत्याः ॥ २० ॥ तयोरिति युग्मकम् । स्वमघमनुस्मरन् अर्कादिभिस्तप्तवालुके पथि अशक्तोऽपि कृच्छ्रेण चलति तैरेव सन्तप्यमानः । परीतो व्याकुलः ॥ २१।२२ ॥ तमसा अन्धकारपूर्णेन । पापीयसा अतिक्लेशदेन । सादनमालयं नीतो भवति ॥ २३॥ अध्वनः संबन्धिनां नवतिं नव च सहस्राणि ९९ सहस्रयोजनानि नीतः अतिक्रामितः सन् पापाल्पत्वे द्वाभ्याम् आधिक्ये त्रिभिः ततोप्याधिक्ये वा शब्दः दशदिनैः पक्षेण वा मासेन वा । 'पक्षान्मासेन वा याति यमलोकमितो मृतः' इति तीर्थोक्तेः ॥२४॥ आदीपनमित्यादीनाम् प्राप्नोतीत्यनेनान्वयः । कृत्तं छिन्नं यत् तस्य अदनं च ॥ २५ ॥ अभ्युद्धारो निःसारणं यस्तमपि । वैशसं पीडाम् ॥ २६ ॥ भिदाया अवयवानां विदारणस्य आपनं प्रापणम् । कृन्तनं कर्तनम् । रोधनं च प्राप्नोत्यनुषङ्गः ॥ २७ ॥ सङ्गेन पापिनां सङ्गेन ॥ २८ ॥ वै निश्चितम् ॥ २९ ॥ उभयं देहं कुटुम्बं च । प्रेत्य मृत्वा ॥ ३० ॥ द्रोहेण यद्भृतं पुष्टीकृतं तदिदं कलेवरमिहैव हित्वा एक एव ध्वान्तं

दैवेनासादितं तस्य शमलं निरये पुमान् । भुङ्क्ते कुटुम्बपोषस्य हृतवित्त इवातुरः ॥३२॥
केवलेन ह्यधर्मेण कुटुम्बभरणोत्सुकः । याति जीवोऽन्धतामिस्रं चरमं तमसः पदम् ॥३३॥
अधस्तान्नरलोकस्य यावतीर्यातनादयः । क्रमशः समनुक्रम्य पुनरत्राव्रजेच्छुचिः ॥३४॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां तृतीयस्कन्धे कापिलेयोपाख्याने कर्मविपाको नाम त्रिंशोऽध्यायः ॥ ३० ॥

अथैकत्रिंशोऽध्यायः

श्रीभगवानुवाच

कर्मणा दैवनेत्रेण जन्तुर्देहोपपत्तये । स्त्रियाः प्रविष्टः उदरं पुंसो रेतःकणाश्रयः ॥ १ ॥
कललं त्वेकरात्रेण पञ्चरात्रेण बुद्बुदम् । दशाहेन तु कर्कन्धूः पेश्यण्डं वा ततः परम् ॥ २ ॥
मासेन तु शिरो द्वाभ्यां बाह्वङ्घ्र्याद्यङ्गविग्रहः । नखलोमास्थिचर्माणि लिङ्गच्छिद्रोद्भवस्त्रिभिः ॥३॥
चतुर्भिर्धातवः सप्त पञ्चभिः क्षुत्तृडुद्भवः । षड्भिर्जरायुणा वीतः कुक्षौ भ्राम्यति दक्षिणे ॥४॥
मातुर्जग्धान्नपानाद्यैरेधद्धातुरसम्मते । शेते विण्मूत्रयोर्गर्ते स जन्तुर्जन्तुसम्भवे ॥ ५ ॥
कृमिभिः क्षतसर्वाङ्गः सौकुमार्यात्प्रतिक्षणम् । मूर्च्छामाप्नोत्युरुक्लेशस्तत्रत्यैः क्षुधितैर्मुहुः ॥ ६ ॥
कटुतीक्ष्णोष्णलवणरूक्षाम्लादिभिरुल्वणैः । मातृभुक्तैरुपस्पृष्टः सर्वाङ्गोत्थितवेदनः ॥ ७ ॥

नरकम् । पुण्यात् इत स्यापमेव पथि भोज्यं यस्य सः ॥ ३१ ॥ तस्य भूतद्रोहेण कुटुम्बपोषस्य शमलं पापं दैवेन प्रापितम् ॥ ३२ ॥ तमसो नरकस्य ॥ ३३ ॥ यावत्यः । अत्र मनुष्यलोके नरत्वमाव्रजेत् प्राप्नोति ॥ ३४ ॥

इति श्रीमद्भागवते महापुराणे तृतीयस्कन्धे गूढार्थदीपिन्यां त्रिंशोऽध्यायः ।

एकत्रिंशे स्तुतिं चक्रे जीवोऽयं मातृगर्भगः ।
बहिर्गतस्य तस्यैव बाल्यादिक्लेश ईर्यते ॥ १ ॥

दैवमीश्वरो नेत्रं प्रवर्तकं यस्य तेन प्राचीनेन कर्मणा प्रविष्टो भवति ॥ १ ॥ तद्वासनामयं शरीरं कललं शुक्रशोणितमिश्रितं भवति । बुद्बुदाकारम् । कर्कन्धूर्बदरीफलाकारं कठिनम् । पेशी मांसपिण्डम् । अण्डं योन्यन्तरे ॥ २ ॥ विग्रहो विभागः ॥ ३ ॥ वीत आवृतः ॥४।५॥ तत्रत्यै गर्भस्थैः ॥ ६ ॥ कद्विति सार्द्धयुग्मकम् । उल्वणैर्दुःखदैः कट्वादिभिरुपस्पृष्टः तस्मिन्मातृकुक्षौ आस्ते । कुटिलीभूतपृष्ठग्रीवः ।

उल्बेन संवृतस्तस्मिन्नन्त्रैश्च बहिरावृतः। आस्ते कृत्वा शिरः कुक्षौ भुग्नपृष्ठशिरोधरः॥८॥
अकल्पः स्वाङ्गचेष्टायां शकुन्त इव पञ्जरे। तत्र लब्धस्मृतिर्दैवात्कर्म जन्मशतोद्भवम्।
स्मरन्दीर्घमनुच्छ्वासं शर्म किं नाम विन्दते॥९॥
आरभ्य सप्तमान्मासाल्लब्धबोधोऽपि वेपितः। नैकत्रास्ते सूतिवातैर्विष्ठाभूरिव सोदरः॥१०॥
नाथमान ऋषिर्भीतः सप्तवध्रिः कृताञ्जलिः। स्तुवीत तं विक्लवया वाचा येनोदरेऽर्पितः॥११॥

जन्तुरुवाच

तस्योपसन्नमवितुं जगदिच्छयाऽऽत्तनानातनोर्भुवि चलच्चरणारविन्दम्।
सोऽहं व्रजामि शरणं ह्यकुतोभयं मे येनेदृशी गतिरदर्श्यतोऽनुरूपा॥१२॥
यस्त्वत्र बद्ध इव कर्मभिरावृतात्मा भूतेन्द्रियाशयमयीमवलम्ब्य मायाम्।
आस्ते विशुद्धमविकारमखण्डबोधमातप्यमानहृदयेऽवसितं नमामि॥१३॥
यः पञ्चभूतरचिते रहितः शरीरे छन्नोऽयथेन्द्रियगुणार्थचिदात्मकोऽहम्।
तेनाविकुण्ठमहिमानमृषिं तमेनं वन्दे परं प्रकृतिपूरुषयोः पुमांसम्॥१४॥
यन्माययोरुगुणकर्मनिबन्धनेऽस्मिन् सांसारिके पथि चरंस्तदभिश्रमेण।
नष्टस्मृतिः पुनरयं प्रवृणीत लोकं युक्त्या कया महदनुग्रहमन्तरेण॥१५॥
ज्ञानं यदेतददधात्कतमः स देवस्त्रैकालिकं स्थिरचरेष्वनुवर्तितांशः।
तं जीवकर्मपदवीमनुवर्तमानास्तापत्रयोपशमनाय वयं भजेम॥१६॥
देह्यन्यदेहविवरे जठराग्निनासृग्विण्मूत्रकूपपतितो भृशतप्तदेहः।
इच्छन्नितो विवसितुं गणयन् स्वमासान्निर्वास्यते कृपणधीर्भगवन् कदा नु॥१७॥

॥७।८॥ अकल्पोऽसमर्थः तत्र गर्भे। अनुच्छ्वासं यथा स्यात्तथा। शर्म सुखम्॥ ९॥ विष्ठाभूः कृमिरिव॥१०॥ नाथमान उपतप्यमानः। ऋषिरात्मदर्शी। सप्तधातवो वध्रयो बन्धनानि यस्य। विह्वलया स्तौति॥११॥ योऽसौ दैवाल्लब्धस्मृतिः सोऽहं तस्य हरेश्चरणारविन्दं शरणं व्रजामि येन असतो विषयिणो मेऽनुरूपा गतिरदर्शि तस्येति योज्यम्। कथंभूतस्य। उपसन्नं शरणागतं जगत् रक्षितुं गृहीतरामकृष्णादिमूर्तेः। भुवि वृन्दावनभुवि॥ १२॥ शरीररूपां मायामवलम्ब्य योऽत्र कर्मभिर्बद्ध इवास्ते सोऽहं यस्तु अत्रैव मुक्तः सन्नास्ते तं नमामीत्यन्वयः। अवसितं प्रतीतम् अनुभूतम्। तुशब्देनेश्वरविशेषो दर्शितः॥१३॥ यः शरीरे अयथा मिथ्यैव छन्नः यतस्तेन रहितः अत एव अयथा मिथ्यैव इन्द्रियादिरूपश्च लिङ्गशरीराध्यस्तचिद्रूपश्चः यः सोऽहं तं पुमांसं श्रीकृष्णं वन्दे इत्यन्वय। तेन शरीरेणासङ्कुचितज्ञानम्। ऋषिं सर्वज्ञम्॥ १४॥ यस्य मायया मोहितः सांसारिके पथि चरन् तदभिश्रमेण संसरता येन च नष्टस्मृतिः सन्नयं जीवः महतस्तस्यैव ईश्वरस्यानुग्रहं विना पुनः कया युक्त्या भगवद्धाम स्वरूपं वा प्राप्नुयात् न कयाऽपीत्यर्थः॥ १५॥ यदेतत् ज्ञानं तत्कतमो मयि अदधात् न कोऽपि किन्तु स देवः कृष्ण एव अतो वयं तमेव भजेमेत्यन्वयः। कथंभूतो देवः। अनुवर्तितोऽन्तर्यामिरूपोंऽशो येन। कर्मपदवीं संसारमार्गम्॥ १६॥ अन्यस्या मातुरुदरे यः

येनेदृशीं गतिमसौ दशमास्य ईश संग्राहितः पुरुदयेन भवादृशेन।
स्वेनैव तुष्यतु कृतेन स दीननाथः को नाम तत्प्रति विनाञ्जलिमस्य कुर्यात् ॥१८॥
पश्यत्ययं धिषणया ननु सप्तवध्रिः शारीरके दमशरीर्यपरः स्वदेहे।
यत्सृष्टया स तमहं पुरुषं पुराणं पश्ये बहिर्हृदि च चैत्यमिव प्रतीतम् ॥१९॥
सोऽहं वसन्नपि विभो बहुदुःखवासं गर्भान्न निर्जिगमिषे बहिरन्धकूपे।
यत्रोपयातमुपसर्पति देवमाया मिथ्यामतिर्यदनु संसृतिचक्रमेतत् ॥२०॥
तस्मादहं विगतविक्लव उद्धरिष्य आत्मानमाशु तमसः सुहृदाऽऽत्मनैव।
भूयो यथा व्यसनमेतदनेकरन्ध्रं मा मे भविष्यदुपसादितविष्णुपादः ॥२१॥

कपिल उवाच

एवं कृतमतिर्गर्भे दशमास्यः स्तुवन्नृषिः। सद्यः क्षिपत्यवाचीनं प्रसूत्यै सूतिमारुतः ॥२२॥
तेनावसृष्टः सहसा कृत्वावाक् शिर आतुरः। विनिष्क्रामति कृच्छ्रेण निरुच्छ्वासो हतस्मृतिः२३
पतितो भुव्यसृङ्मूत्रे विष्ठाभूरिव चेष्टते। रोरूयति गते ज्ञाने विपरीतां गतिं गतः ॥२४॥
परच्छन्दं न विदुषा पुष्यमाणो जनेन सः। अनभिप्रेतमापन्नः प्रत्याख्यातुमनीश्वरः ॥२५॥
शायितोऽशुचिपर्यङ्के जन्तुस्वेदजदूषिते। नेशः कण्डूयनेऽङ्गानामासनोत्थानचेष्टने ॥२६॥
तुदन्त्यामत्वचं दंशा मशका मत्कुणादयः। रुदन्तं विगतज्ञानं कृमयः कृमिकं यथा ॥२७॥
इत्येवं शैशवं भुक्त्वा दुःखं पौगण्डमेव च। अलब्धाभीप्सितोऽज्ञानादिद्धमन्युः शुचार्पितः ॥२८॥

कूपस्तत्र पतितः अग्निना तप्तदेहश्च अत एव इतो विवरात् निर्गन्तुमिच्छन् स्वमासान् गणयन् कृपणधीरयं देही जीवः कदा नु अहो बहिर्निष्कास्यते ॥१७॥ येन ईदृशीं गतिं ज्ञानवत्तां पूर्वस्मृतिं संग्राहितः स स्वेनैव कृतेन स्वयमेव च तुष्यतु यतोऽस्य हरेरञ्जलिं प्रणामं विना तत्प्रत्युपकारं को नु कुर्यात् न कोऽपीत्यन्वयः। भवत्सदृशो दयालुर्भवानेव नान्य इत्यनन्वयालङ्कारो बोधितः ॥ १८ ॥ अयं मनुष्यजातिमापन्नः सप्तवध्रिर्जीवः शरीरभवे सुखदुःख एव धिषणया बुद्धया पश्यति। ततोऽपरः कश्चित् भाग्यवान् स्वदेहे स्थितो दमशरीरी ज्ञानी भवति। अहं तु स प्रसिद्धः पापात्माऽपि यत्सृष्टया यद्दत्तया धिषणया बहिर्हृदि च प्रतीतमपरोक्षतया प्राप्तमिव तं पश्यामि अहो दयालुता तस्येत्यर्थः। चैत्यं चित्ताधिष्ठातारम् ॥ १९ ॥ वासं यथा स्यात्तथा गर्भं प्रति वा। कूपे संसारे। यत्र बहिः देवस्य तव। यदनु यामनु देहेऽहं बुद्धिः ततश्च ।२०। विगतविक्लवोऽव्याकुलः सन् सुहृदा आत्मना त्वयैव हेतुभूतेन तमसः संसारात्। व्यसनं दुःखरूपं नवच्छिद्रं शरीरं यथा मा भविष्यति ॥२१॥ यः पुण्यात्मा स स्तुवन् अनायासेन निःसरति। यस्तु पूर्वोक्तो दुर्जीवस्तमर्वाचीनमधो गच्छन्तं सांसारिक सद्यः क्षिपतीति जीवद्वैविध्यं ज्ञेयमन्यथैकत्वे पूर्वार्द्धेऽपि द्वितीयान्तपदान्येव प्रयुक्तानि स्युः ॥ २२ ॥ तेन मारुतेन अधः क्षिप्तः। अवाक् अधः ॥ २३ ॥ विपरीतां गतिं देहात्मविषयकं ज्ञानम् ॥२४॥ परस्य बालकस्य इच्छां न जानता। अनीश्वरोऽसमर्थः सन् रोरूयते ॥२५॥ जन्तवो ये स्वेदजा यूकादयस्तैः। जन्तुरिति पृथक् वा। नेशोऽसमर्थः सन् रोरूयते ॥२६॥ आमा कोमला त्वक् यस्य ॥२७॥ इतीति युग्मकम्। पौगण्डं यद्यपि दशमावधि तथाप्यत्र यौवनात्प्राग-

सह देहेन मानेन वर्धमानेन मन्युना । करोति विग्रहं कामी कामिष्वन्ताय चात्मनः ॥२९॥

भूतैः पञ्चभिरारब्धे देहे देह्यबुधोऽसकृत् । अहंममेत्यसद्ग्राहः करोति कुमतिर्मतिम् ॥३०॥

तदर्थं कुरुते कर्म यद्बद्धो याति संसृतिम् । योऽनुयाति ददत्क्लेशमविद्याकर्मबन्धनः ॥३१॥

यद्यसद्भिः पथि पुनः शिश्नोदरकृतोद्यमैः । आस्थितो रमते जन्तुस्तमो विशति पूर्ववत् ॥३२॥

सत्यं शौचं दया मौनं बुद्धिः श्रीर्ह्रीर्यशः क्षमा । शमो दमो भगश्चेति यत्सङ्गाद्याति संक्षयम् ।३३।

तेष्वशान्तेषु मूढेषु खण्डितात्मस्वसाधुषु । सङ्गं न कुर्याच्छोच्येषु योषित्क्रीडामृगेषु च ॥३४॥

न तथास्य भवेन्मोहो बन्धश्चान्यप्रसङ्गतः । योषित्सङ्गाद्यथा पुंसो यथा तत्सङ्गिसङ्गतः ॥३५॥

प्रजापतिः स्वां दुहितरं दृष्ट्वा तद्रूपधर्षितः । रोहिद्भूतां सोऽन्वधावदृक्षरूपी हतत्रपः ॥३६॥

तत्सृष्टसृष्टसृष्टेषु को न्वखण्डितधीः पुमान् । ऋषिं नारायणमृते योषिन्मय्येह मायया ॥३७॥

बलं मे पश्य मायायाः स्त्रीमय्या जयिनो दिशाम् । या करोति पदाक्रान्तान् भ्रूविजृम्भेण केवलम्३८

सङ्गं न कुर्यात्प्रमदासु जातु योगस्य पारं परमारुरुक्षुः ।
मत्सेवया प्रतिलब्धात्मलाभो वदन्ति या निरयद्वारमस्य ॥३९॥

योपयाति शनैर्माया योषिद्देवविनिर्मिता । तामीक्षेतात्मनो मृत्युं तृणैः कूपमिवावृतम् ॥४०॥

यां मन्यते पतिं मोहान्मन्मायामृषभायतीम् । स्त्रीत्वं स्त्रीसङ्गतः प्राप्तो वित्तापत्यगृहप्रदम् ॥४१॥

तामात्मनो विजानीयात्पत्यपत्यगृहात्मकम् । दैवोपसादितं मृत्युं मृगयोर्गायनं यथा ॥४२॥

देहेन जीवभूतेन लोकाल्लोकमनुव्रजन् । भुञ्जान एव कर्माणि करोत्यविरतं पुमान् ॥४३॥

वस्था ग्राह्या । अर्पितो व्याप्तः । प्रतिकूलेषु विग्रहं चकारादनुकूलेषु मैत्रीं च ॥ २८।२९ ॥ असद्ग्राहो-मिथ्याग्रहः देहेऽहमिति गेहादौ ममेति मतिम् ॥३०॥ बन्धनभूतो यो देहोऽनुवर्तते तदर्थं कर्म कुरुते । यत् येन कर्मणा ॥ ३१॥ पथि सन्मार्गे आस्थितोऽपि यदि असद्भिः सह रमते तर्हि तमो नरकम् । शिश्नाद्यर्थं कृतः उद्यमः यैः ॥ ३२ ॥ यत् येषामसताम् ॥३३॥ खण्डितात्मसु आत्मघातिषु । क्रीडामृगो वानरस्तद्वत् अधीनेषु ॥३४॥ यथा च तत्सङ्गिनां स्त्रीलम्पटानाम् ॥३५॥ रोहिद्भूतां मृगीरूपां स्वाम् । ऋक्षरूपी मृगरूपः स ब्रह्मा । धर्षितो मोहितः । तामसीसृष्टिवृद्ध्यर्थं भगवदिच्छयैव तथाभावस्योदयात्प्रकृतोपयोगित्वाच्च धावनं न स्वत इत्युक्तं प्रागतो न शङ्कालेशोऽपि ॥३६॥ तेषु मध्ये नारायणमृते यो वर्तमानः तदभक्त इत्यर्थः स मायया कोनु अविमोहितचित्तः स्यात् न कोऽपि । तेषु मध्ये नारायणं विनेति न व्याख्येयं तस्य विधिसृज्यत्वापत्तेः । ब्रह्मसृष्टा मरीच्यादयः तैः सृष्टा देवमनुष्यादयः ॥ ३७ ॥ इति केवलं निर्णीतम् । 'निर्णीति केवलम्' इत्यमरात् ॥ ३८ ॥ याः प्रमदा निरयस्य संसारस्य द्वारमाहुर्मुनयः अतस्तासु स्वीयास्वपि अत्यासक्तिं न । कः । पारं मत्पदमारुरुक्षुर्ज्ञानी भक्तः । आत्मलाभः कृष्णप्रेम ॥३९॥ शनैः शुश्रूषादिव्याजेन मृत्युं मृत्युरूपाम् ॥ ४० ॥ यामिति युग्मकम् । स्त्रीत्वं प्राप्तो जीवः ऋषभायतीं पुरुषवदाचरन्तीं यां मन्मायां वित्तादिप्रदं पतिं मन्यते तां मायां पत्यादिरूपं मृत्युं विजानीयादित्युरेणान्वयः । यथा व्याधस्य गानं मृगस्य मृत्युकरं तथा ॥४१।४२॥ जीवोपाधिभूतेन लिङ्गदेहेन ।

जीवो ह्यस्यानुगो देहो भूतेन्द्रियमनोमयः । तन्निरोधोऽस्य मरणमाविर्भावस्तु सम्भवः ॥४४॥
द्रव्योपलब्धिस्थानस्य द्रव्येक्षायोग्यता यदा । तत्पञ्चत्वमहंमानादुत्पत्तिर्द्रव्यदर्शनम् ॥४५॥
यथाक्ष्णोर्द्रव्यावयवदर्शनायोग्यता यदा । तदैव चक्षुषो द्रष्टुर्द्रष्टृत्वायोग्यतानयोः ॥४६॥
तस्मान्न कार्यः संत्रासो न कार्पण्यं न सम्भ्रमः । बुद्ध्वा जीवगतिं धीरो मुक्तसङ्गश्चरेदिह॥४७॥
सम्यग्दर्शनया बुद्धया योगवैराग्ययुक्तया । मायाविरचिते लोके चरेन्न्यस्य कलेवरम् ॥४८॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां तृतीयस्कन्धे कापिलेयोपाख्याने जीवगतिर्नामैकत्रिंशोऽध्यायः ॥ ३१ ॥

अथ द्वात्रिंशोऽध्यायः

कपिल उवाच

अथ यो गृहमेधीयान्धर्मानेवावसन् गृहे । काममर्थं च धर्मान् स्वान् दोग्धि भूयः पिपर्ति तान् ॥१॥
स चापि भगवद्धर्मात्काममूढः पराङ्मुखः । यजते क्रतुभिर्देवान् पितॄंश्च श्रद्धयान्वितः ॥ २ ॥
तच्छ्रद्धयाक्रान्तमतिः पितृदेवव्रतः पुमान् । गत्वा चान्द्रमसं लोकं सोमपाः पुनरेष्यति ॥ ३ ॥
यदा चाहीन्द्रशय्यायां शेतेऽनन्तासनो हरिः । तदा लोका लयं यान्ति त एते गृहमेधिनाम् ॥४॥
ये स्वधर्मान्न दुह्यन्ति धीराः कामार्थहेतवे । निःसङ्गा न्यस्तकर्माणः प्रशान्ताः शुद्धचेतसः॥५॥

भुञ्जानः कर्मफलमिति शेषः ॥ ४३ ॥ यो जीवः पूर्वोक्तो लिङ्गदेहः अस्यानुगतो देहः स्थूलशरीरं तस्य नाशोऽस्य जीवस्य ॥ ४४ ॥ स्थानस्य स्थूलदेहस्य यदा यदयोग्यता तत् तदेव । इदमेवाहमित्यभिमानेन द्रव्यस्य स्थूलदेहस्य ॥ ४५ ॥ अक्ष्णोर्गोलकयोर्द्रव्यावयवस्य रूपादेः । चक्षुष इन्द्रियस्य । यदा अनयोर्गोलकेन्द्रिययोः रूपदर्शनेऽयोग्यता तदा द्रष्टुर्जीवस्यापि ॥ ४६ ॥ संभ्रमः संशयः । गतिं नित्यज्ञान स्वरूपताम् ॥ ४७ ॥ न्यस्य तत्रासक्तिं त्यक्त्वा ॥ ४८ ॥

इति श्रीमद्भागवते महापुराणे तृतीयस्कन्धे गूढार्थदीपन्यामेकत्रिंशोऽध्यायः ।

●

द्वात्रिंशेऽकामकामानां शुक्लकृष्णगतीब्रुवन् ।
प्राहाऽनावृत्तिमावृत्तिं तथैतज्ज्ञानभाजनम् ॥ १ ॥

अथेति युग्मकम् यो गृहे एव आवसन् तदीयान् धर्मान् आचरति तान् दोग्धि तत्फलमिच्छति भूयस्तान् पिपर्ति अनुतिष्ठति स चापीत्यन्वयः । गृहमेधो गृहाश्रमस्तादीयान् । मूढः सन् यजतेऽतो भगवद्धर्मात्पराङ्मुखः ॥ २ ॥ पित्राद्यर्थम् । तत्र सोमपा भूत्वा ॥ ३ ॥ यदा च दैनन्दिनप्रलये । ये ते एते ॥ ४ ॥ ये इति त्रिकम् न दुहन्ति तत्फलं नेच्छन्ति । स्वधर्मं इति आख्या यस्य तेन सत्त्वेन गुणेन ।

निवृत्तिधर्मनिरता निर्ममा निरहंकृताः । स्वधर्माख्येन सत्त्वेन परिशुद्धेन चेतसा ॥ ६ ॥
सूर्यद्वारेण ते यान्ति पुरुषं विश्वतोमुखम् । परावरेशं प्रकृतिमस्योत्पत्त्यन्तभावनम् ॥ ७ ॥
द्विपरार्द्धावसाने यः प्रलयो ब्रह्मणस्तु ते । तावदध्यासते लोकं परस्य परचिन्तकाः ॥ ८ ॥

क्ष्माम्भोऽनलानिलवियन्मनइन्द्रियार्थभूतादिभिः परिवृतं प्रतिसंजिहीर्षुः ।
अव्याकृतं विशति यर्हि गुणत्रयात्मा कालं पराख्यमनुभूय परः स्वयम्भूः ॥ ९ ॥
एवं परेत्य भगवन्तमनुप्रविष्टा ये योगिनो जितमरुन्मनसो विरागाः ।
तेनैव साकममृतं पुरुषं पुराणं ब्रह्म प्रधानमुपयान्त्यगताभिमानाः ॥१०॥

अथ तं सर्वभूतानां हृत्पद्मेषु कृतालयम् । श्रुतानुभावं शरणं व्रज भावेन भामिनि ॥११॥
आद्यः स्थिरचराणां यो वेदगर्भः सहर्षिभिः । योगेश्वरैः कुमाराद्यैः सिद्धैर्योगप्रवर्तकैः ॥१२॥
भेददृष्ट्याभिमानेन निःसङ्गेनापि कर्मणा । कर्तृत्वात्सगुणं ब्रह्म पुरुषं पुरुषर्षभम् ॥१३॥
स संसृत्य पुनः काले कालेनेश्वरमूर्तिना । जाते गुणव्यतिकरे यथापूर्वं प्रजायते ॥१४॥
ऐश्वर्यं पारमेष्ठ्यं च तेऽपि धर्मविनिर्मितम् । निषेव्य पुनरायान्ति गुणव्यतिकरे सति ॥१५॥
ये त्विहासक्तमनसः कर्मसु श्रद्धयान्विताः । कुर्वन्त्यप्रतिषिद्धानि नित्यान्यपि च कृत्स्नशः॥१६॥
रजसा कुण्ठमनसः कामात्मानोऽजितेन्द्रियाः । पितॄन् यजन्त्यनुदिनं गृहेष्वभिरताशयाः ॥१७॥
त्रैवर्गिकास्ते पुरुषा विमुखा हरिमेधसः । कथायां कथनीयोरुविक्रमस्य मधुद्विषः ॥१८॥
नूनं दैवेन विहता ये चाच्युतकथासुधाम् । हित्वा शृण्वन्त्यसद्गाथाः पुरीषमिव विड्भुजः।.९।
दक्षिणेन पथार्यम्णः पितृलोकं व्रजन्ति ते । प्रजामनु प्रजायन्ते श्मशानान्तक्रियाकृतः ॥२०॥
ततस्ते क्षीणसुकृताः पुनर्लोकमिमं सति । पतन्ति विवशा दैवैः सद्यो विभ्रंशितोदयाः ॥२१॥

प्रकृतिं मूलकारणम् । अस्य जगतः सृष्टिसंहारकारणं च परे ब्रह्मादयः अवरे अस्मदादयः तेषां सर्वेषामीशम् ॥ ७ ॥ परस्य ब्रह्मणो लोकम् । यतस्ते परत्वेन पुरुषोत्तमत्वेन तं चिन्तयन्तीति ॥ ८ ॥ क्ष्मादिभिः परिवृतं युक्तं ब्रह्माण्डं यदि सञ्जिहीर्षुर्भवति तर्हि पराख्यं द्विपरार्द्धं कालमनुभूय अव्याकृतं परमात्मानं विशति । भूतादिः अहङ्कारः । गुणत्रयात्मा प्रपञ्चाभिमानी ॥ ९ ॥ ये भगवन्तं ब्रह्माणमनुप्रविष्टास्तल्लोकं गतास्तेऽपि एवं परेत्य तेनैव ब्रह्मणा सह पुरुषमुपयान्तीत्यन्वयः । वयं ब्रह्मोपासका इत्यभिमानवन्तः ॥ १० ॥ भगवदुपासकास्तु साक्षान्न क्रमेणेत्यत आह-अथेति । अथ तस्मात् तं ब्रह्मादि प्राप्यं त्वमपि साक्षात् शरणं व्रजेत्यन्वयः हे भामिनि पूज्ये आद्य इति चतुष्कम् । आद्यः कारणभूतो यो ब्रह्मा स अभिमानेन कर्तृत्वात् हेतोः निष्कामेन कर्मणा सगुणं ब्रह्म संसृत्य प्राप्य कालेन गुणव्यतिकरे महत्तत्त्वादौ जाते सति ऋषिभिः सह यथा पूर्वं प्रजायते । ये चान्ये लीनास्तेऽपि ऐश्वर्यं निषेव्य पुनरायान्ति जायन्ते इत्यन्वयः ॥१२।१३।१४।१५॥ ये त्विति पञ्चकम् । ये कर्माणि कुर्वन्ति ते कथायां विमुखाः सन्तः पितृलोकं व्रजन्ति । कुतः । ये कथां हित्वा असद्गाथाः शृण्वन्ति ते पुरुषा नूनं दैवेन विहता इत्यन्वयः । अप्रतिषिद्धानि काम्यानि । कुण्ठमनसो विक्षिप्तमनसः । त्रैवर्गिका धर्मार्थकामपरायणाः । हरि दुःखहर्त्री मेधा यस्य । क्रियाः कुर्वन्तीति तादृशाः ॥१६।१७।१८।१९।२०॥ उदयो भोगसाधनम् ॥२१॥

तस्मात्त्वं सर्वभावेन भजस्व परमेष्ठिनम् । तद्गुणाश्रयया भक्त्या भजनीयपदाम्बुजम् ॥२२॥
वासुदेवे भगवति भक्तियोगः प्रयोजितः । जनयत्याशु वैराग्यं ज्ञानं यद् ब्रह्मदर्शनम् ॥२३॥
यदास्य चित्तमर्थेषु समेष्विन्द्रियवृत्तिभिः । न विगृह्णाति वैषम्यं प्रियमप्रियमित्युत ॥२४॥
स तदैवात्मनाऽऽत्मानं निःसङ्गं समदर्शनम् । हेयोपादेयरहितमारूढं पदमीक्षते ॥२५॥
ज्ञानमात्रं परं ब्रह्म परमात्मेश्वरः पुमान् । दृश्यादिभिः पृथग्भावैर्भगवानेक ईयते ॥२६॥
एतावानेव योगेन समग्रेणेह योगिनः । युज्यतेऽभिमतो ह्यर्थो यदसङ्गस्तु कृत्स्नशः ॥२७॥
ज्ञानमेकं पराचीनैरिन्द्रियैर्ब्रह्म निर्गुणम् । अवभात्यर्थरूपेण भ्रान्त्या शब्दादिधर्मिणा ॥२८॥
यथा महानहंरूपस्त्रिवृत्पञ्चविधः स्वराट् । एकादशविधस्तस्य वपुरण्डं जगद्यतः ॥२९॥
एतद्वै श्रद्धया भक्त्या योगाभ्यासेन नित्यशः । समाहितात्मा निःसङ्गो विरक्त्या परिपश्यति ३०
इत्येतत्कथितं गुर्वि ज्ञानं तद् ब्रह्मदर्शनम् । येनानुबुद्ध्यते तत्त्वं प्रकृतेः पुरुषस्य च ॥३१॥
ज्ञानयोगश्च मन्निष्ठो नैर्गुण्यो भक्तिलक्षणः । द्वयोरप्येक एवार्थो भगवच्छब्दलक्षणः ॥३२॥
यथेन्द्रियैः पृथग्द्वारैरर्थो बहुगुणाश्रयः । एको नानेयते तद्वद्भगवान् शास्त्रवर्त्मभिः॥३३॥
क्रियया क्रतुभिर्दानैस्तपःस्वाध्यायमर्शनैः । आत्मेन्द्रियजयेनापि संन्यासेन च कर्मणाम्॥३४॥
योगेन विविधाङ्गेन भक्तियोगेन चैव हि । धर्मेणोभयचिह्नेन यः प्रवृत्तिनिवृत्तिमान् ॥३५॥
आत्मतत्त्वावबोधेन वैराग्येण दृढेन च । ईयते भगवानेभिः सगुणो निर्गुणः स्वदृक्॥३६॥
प्रावोचं भक्तियोगस्य स्वरूपं ते चतुर्विधम् । कालस्य चाव्यक्तगतेर्योऽन्तर्धावति जन्तुषु ॥३७॥

तद्गुणा एवाश्रयः प्रवृत्तिहेतुर्यस्याः ॥ २२ ॥ प्रयोजितः कृतः । यत् ज्ञानं तच्चेत्यन्वयः ॥ २३ ॥ यदेति युग्मकम् । अस्य भक्तस्य । बन्धकत्वेन समेषु अर्थेषु शब्दादिविषयेषु न उत नैव । तदैव आत्मानं स्वीयजीवं पदमारूढं वैकुण्ठमारूढप्रायम् आत्मना ईक्षते बुद्धया अनुभवति । बन्धमोक्षादिजीवधर्माभ्यां रहितम् ॥२४।२५॥ कारणभूत एक एव भगवान् दृश्यादिभिर्भावै कार्यैः पृथक् नाना प्रतीयते इत्यन्वयः ॥ २६ ॥ युज्यते उपयुक्तो भवति । अर्थः प्रयोजनम् ॥ २७ ॥ ज्ञानस्वरूपम् एकं ब्रह्मैव बहिर्मुखैरिन्द्रियैः अर्थरूपेण आकाशादिरूपेण भ्रान्त्या अवभाति ॥ २८ ॥ महान् महत्तत्त्वमेव अहङ्कारः स च सात्विकादिभेदेन त्रिवृत् त्रिविधः भूतरूपेण पञ्चविधः इन्द्रियरूपेण एकादशविधः एतत् तत्त्वात्मकं यदण्डं स्वराट् ब्रह्मा च यत उत्पन्नं तस्यैव भगवत एतत् सर्वं जगत् वपुः शरीरं यथा यथावत् निश्चितमित्यर्थः ॥२९॥ एतत् कृत्स्नस्य ब्रह्मात्मकत्वम् ॥३०॥ हे गुर्वि पूज्ये! येनावबुध्यते तदेतत् ॥३१॥ नैर्गुण्यो दम्भादिमायागुणवर्जित इत्युभयत्रान्वेति भक्तियोगश्च मन्निष्ठ एव । यत एक एवार्थः प्रयोजनम् शब्दलक्षणः भगवत्स्वरूपबोधकः ॥ ३२ ॥ पृथग्द्वारैः पृथग्व्यापारैः । शास्त्रवर्त्मभिः शास्त्रीयैः साधनैः ईयते ज्ञायते । ई गत्यादौ अतः कर्मणि लट् ॥ ३३ ॥ क्रियेतित्रिकम् । क्रियादित्रयं गृहस्थधर्मः । तपो वानप्रस्थस्य । स्वाध्यायमर्शने ब्रह्मचारिणः । आत्मेति द्वयं सन्यासिनः । मर्शनं मीमांसा । यो धर्मः । एभिः साधनैः । स्वैर्भक्तैरेव दृश्यते न तु वेदान्तिभिः इति स्वदृक् ॥३४।३५।३६॥ चतुर्विधं त्रिधा सगुणा

जीवस्य संसृतीर्बह्वीरविद्याकर्मनिर्मिताः । यास्वङ्ग प्रविशन्नात्मा न वेद गतिमात्मनः ॥३८॥
नैतत्खलायोपदिशेन्नाविनीताय कर्हिचित् । न स्तब्धाय न भिन्नाय नैव धर्मध्वजाय च ॥३९॥
न लोलुपायोपदिशेन्न गृहारूढचेतसे । नाभक्ताय च मे जातु न मद्भक्तद्विषामपि ॥४०॥
श्रद्दधानाय भक्ताय विनीतायानसूयवे । भूतेषु कृतमैत्राय शुश्रूषाभिरताय च ॥४१॥
बहिर्जातविरागाय शान्तचित्ताय दीयताम् । निर्मत्सराय शुचये यस्याहं प्रेयसां प्रियः ॥४२॥
य इदं शृणुयादम्ब श्रद्धया पुरुषः सकृत् । यो वोभिधत्ते मच्चितः स ह्येति पदवीं च मे॥४३॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां तृतीयस्कन्धे कापिलेयोपाख्याने द्वात्रिंशोऽध्यायः ॥३२॥

अथ त्रयस्त्रिंशोऽध्यायः

मैत्रेय उवाच

एवं निशम्य कपिलस्य वचो जनित्री सा कर्दमस्य दयिता किल देवहूतिः ।
विस्रस्तमोहपटला तमभिप्रणम्य तुष्टाव तत्त्वविषयाङ्कितसिद्धभूमिम् ॥ १ ॥

देवहूतिरुवाच

अथाप्यजोऽन्तःसलिले शयानं भूतेन्द्रियार्थात्ममयं वपुस्ते ।
गुणप्रवाहं सदशेषबीजं दध्यौ स्वयं यज्जठराब्जजातः ॥ २ ॥

एका निर्गुणा चेत्यवरूपेण । अन्तर्धावति उत्पत्त्यादि कुर्वंच्च प्रविशति ॥ ३७ ॥ संसृतीर्योनीश्च प्रावोचमित्यनुषङ्गः । अङ्ग हे मातः ! । आत्मा जीवः ॥ ३८ ॥ खलः शाठ्येन प्रश्नकर्ता । स्तब्धो गर्वी । भिन्नो वेदान्ती मतान्तराभिनिवेशेन भक्तिविमुखत्वात् । धर्मध्वजः पाखण्डी ॥ ३९।४० ॥ श्रद्दधानायेति युग्मकम् ॥४१।४२॥ अभिधत्ते वक्ति । स च सोऽपि । हि निश्चितम् पदवीं मत्पदविन्यासस्थलीं मद्धाम वा चात्कामितं च ॥ ४३ ॥

इति श्रीमद्भागवते महापुराणे तृतीयस्कन्धे गूढार्थदीपिन्यां द्वात्रिंशोऽध्यायः ।

त्रयस्त्रिंशे स्तुतः पुत्रो देवहूत्या वनं गतः ।
साऽपि तन्मार्गमाश्रित्य मुक्तिं प्रापेति वर्ण्यते ॥१॥

जनित्री माता । विस्रस्तेति ध्वस्तमोहावरणा । तत्त्वविषयेण अङ्कितं यत् सांख्यशास्त्रं तस्य प्रसिद्धभूमिं मुख्यप्रवर्तकम् । यद्वा । अङ्कितं यत् सिद्धं प्रसिद्धं सांख्यशास्त्रं तस्य भूमिम् ॥१॥ अथेति मङ्गले त्रिकम् । अजोऽपि ते वपुः केवलं दध्यौ न तु पूर्वमेव दृष्टवान् स च : स्वयं साक्षात् यस्य तव जठराब्जात् नाभिकमलाज्जातः स भवानेव विश्वस्य सर्गादि वितनुते न तु तत्र सर्गादिकर्ता कश्चिदस्ति स एवं विशिष्टस्त्वं मे मया कथं जठरेण भृत इत्याश्चर्यस्य कारणं त्वमेव ब्रूहीति वाक्यशेषः । कीदृशं वपुः । गुणान् भक्त-

स एव विश्वस्य भवान् विधत्ते गुणप्रवाहेण विभक्तवीर्यः।
सर्गाद्यनीहोऽवितथाभिसन्धिरात्मेश्वरोऽतर्क्यसहस्रशक्तिः ॥ ३ ॥
स त्वं भृतो मे जठरेण नाथ कथं नु यस्योदर एतदासीत्।
विश्वं युगान्ते वटपत्र एकः शेते स्म मायाशिशुरङ्घ्रिपानः ॥ ४ ॥
त्वं देहतन्त्रः प्रशमाय पाप्मनां निदेशभाजां च विभो विभूतये।
यथावतारास्तव सूकरादयस्तथायमप्यात्मपथोपलब्धये ॥ ५ ॥
यन्नामधेयश्रवणानुकीर्तनाद् यत्प्रह्वणाद्यत्स्मरणादपि क्वचित्।
श्वादोऽपि सद्यः सवनाय कल्पते कुतः पुनस्ते भगवन्नु दर्शनात् ॥ ६ ॥
अहो बत श्वपचोऽतो गरीयान् यज्जिह्वाग्रे वर्तते नाम तुभ्यम्।
तेपुस्तपस्ते जुहुवुः सस्नुरार्या ब्रह्मानूचुर्नाम गृणन्ति ये ते ॥ ७ ॥
तं त्वामहं ब्रह्म परं पुमांसं प्रत्यक्स्रोतस्यात्मनि संविभाव्यम्।
स्वतेजसा ध्वस्तगुणप्रवाहं वन्दे विष्णुं कपिलं वेदगर्भम् ॥ ८ ॥

मैत्रेय उवाच

ईडितो भगवानेवं कपिलाख्यः परः पुमान्। वाचा विक्लवयेत्याह मातरं मातृवत्सलः ॥९॥

कपिल उवाच

मार्गेणानेन मातस्ते सुसेव्येनोदितेन मे। आस्थितेन परां काष्ठामचिरादवरोत्स्यसि॥१०॥
श्रद्धत्स्वैतन्मतं मह्यं जुष्टं यद् ब्रह्मवादिभिः। येन मामभवं याया मृत्युमृच्छन्त्यतद्विदः॥११॥

मैत्रेय उवाच

इति प्रदर्श्य भगवान् सतीं तामात्मनो गतिम्। स्वमात्रा ब्रह्मवादिन्या कपिलोऽनुमतो ययौ॥१२॥

वात्सल्यादीन् प्रकर्षेण वहतीति। सत् सत्यम्।। अवितथाभिसन्धिः सत्यसङ्कल्पः। स्वचरणाङ्गुष्ठपान-कर्ता। सर्वमेव सुखं त्यक्त्वा मच्चरणमाधुर्य एव सर्वे मनीषिणो निमज्जन्ति तदेतन्मयाप्यास्वाद्यानुभवनीयमिति बुद्ध्येति भावः ॥ २।३।४ ॥ पाप्मनां दुष्कृतां विनाशाय। आज्ञानुवर्तिनां साधूनां विभूतये परित्राणाय च देहन्तन्त्र आविष्कृतदेहोऽसि। मातुर्देहाधीन इति वा। उपलब्धये इत्यहं वेद्मि ॥ ५ ॥ क्वचित्कदाचिदपि श्रवणादिहेतोः। प्रह्वणात् प्रणामात् श्वादः श्वपचोऽपि सवनाय सोमयागकरणाय समर्थो भवति। तद्वदादरो व्यञ्जितः। ते दर्शनादहं कृतार्थेति किं पुनर्वक्तव्यम् ॥६॥ बतेति हर्षे। तुभ्यं तव। त्वां वशीकर्तुं वा। अतो हेतोः यत् यस्य। ये ते तव नाम कीर्तयन्ति ते एव आर्याः सर्वश्रेष्ठा। तेपुः तपः कृतवन्तः। सस्नुः तीर्थेषु स्नाताः ब्रह्म अनूचुः वेदं चाधीतवन्तः। यत् यस्मात् अतः गरीयान् ॥ ७ ॥ प्रत्यक्स्रोतसि अन्तर्मुखे। आत्मनि मनसि सम्यक् चिन्तनीयम्। गुणप्रवाहः संसारः। कपिभ्यः सुग्रीवहनुमदादिभ्योऽपि लाति ज्ञानं ददातीति तथाभूतो मातरं तारयिष्यसीति किमाश्चर्यम् ॥८॥ विक्लवया सगद्गदया यतो मातृवत्सलः ॥ ९ ॥ मे मया उदितेन ते त्वया आस्थितेन अनुष्ठितेन सुसेव्यमार्गेण भक्तियोगेन शीघ्रं जीवन्मुक्तिं प्राप्स्यसि ।१०। अभवं मुक्तिदम्। याया यास्यसि। मृत्युं संसारं प्राप्नुवन्ति ।११। स्वस्य गतिं

सा चापि तनयोक्तेन योगादेशेन योगयुक् । तस्मिन्नाश्रम आपीडे सरस्वत्याः समाहिता ॥१३॥
अभीक्ष्णावगाहकपिशान् जटिलान्कुटिलालकान् । आत्मानं चोग्रतपसा बिभ्रती चीरिणं कृशम्॥१४
प्रजापतेः कर्दमस्य तपोयोगविजृम्भितम् । स्वगार्हस्थ्यमनौपम्यं प्रार्थ्यं वैमानिकैरपि ॥१५॥
पयःफेननिभाः शय्या दान्ता रुक्मपरिच्छदाः । आसनानि च हैमानि सुस्पर्शास्तरणानि च॥१६॥
स्वच्छस्फटिककुड्येषु महामारकतेषु च । रत्नप्रदीपा आभान्ति ललनारत्नसंयुताः ॥१७॥
गृहोद्यानं कुसुमितै रम्यं बह्वमरद्रुमैः । कूजद्विहङ्गमिथुनं गायन्मत्तमधुव्रतम् ॥१८॥
यत्र प्रविष्टमात्मानं विबुधानुचरा जगुः । वाप्यामुत्पलगन्धिन्यां कर्दमेनोपलालितम् ॥१९॥
हित्वा तदीप्सिततममप्याखण्डलयोषिताम् । किञ्चिच्चकार वदनं पुत्रविश्लेषणातुरा ॥२०॥
वनं प्रव्रजिते पत्यावपत्यविरहातुरा । ज्ञाततत्त्वाप्यभून्नष्टे वत्से गौरिव वत्सला ॥२१॥
तमेव ध्यायती देवमपत्यं कपिलं हरिम् । बभूवाचिरतो वत्स निःस्पृहा तादृशे गृहे ॥२२॥
ध्यायन्ती भगवद्रूपं यदाह ध्यानगोचरम् । सुतः प्रसन्नवदनं समस्तव्यस्तचिन्तया ॥२३॥
भक्तिप्रवाहयोगेन वैराग्येण बलीयसा । युक्तानुष्ठानजातेन ज्ञानेन ब्रह्महेतुना ॥२४॥
विशुद्धेन तदाऽऽत्मानमात्मना विश्वतोमुखम् । स्वानुभूत्या तिरोभूतमायागुणविशेषणम् ॥२५॥
ब्रह्मण्यवस्थितमतिर्भगवत्यात्मसंश्रये । निवृत्तजीवापत्तित्वात्क्षीणक्लेशाऽऽप्तनिर्वृतिः ॥२६॥
नित्यारूढसमाधित्वात्परावृत्तगुणभ्रमा । न सस्मार तदाऽऽत्मानं स्वप्ने दृष्टमिवोत्थितः॥२७॥
तद्देहः परतः पोष्योऽप्यकृशश्चाध्यसम्भवात् । बभौ मलैरवच्छन्नः सधूम इव पावकः ॥२८॥
स्वाङ्गं तपोयोगमयं मुक्तकेशं गताम्बरम् । दैवगुप्तं न बुबुधे वासुदेवप्रविष्टधीः ॥२९॥

प्राप्तिमार्गम् । अनुमतोऽनुज्ञातः ॥ १२ ॥ सरस्वत्या आपीडे पुष्पमुकुटतुल्ये तस्मिन्नाश्रमे समाहिता समाधिस्था सती स्वगार्हस्थ्यं हित्वा वदनं किञ्चिन्मलिनं चकारेत्यष्टमेवान्वयः । तत्र हेतुः पुत्रेति । योगादेशेन भक्तिज्ञानोपदेशेन योगं भगवद्ध्यानं युनक्तीति ॥ १३ ॥ अभीक्ष्णावगाहेन त्रिकालस्नानेन । आत्मानं देहं च ॥ १४ ॥ विजृम्भितम् अतिशयितम् । वैमानिकैः देवैः ॥१५॥ यत्र गार्हस्थ्ये शय्यादयः सन्तीति शेषः । दान्ताः गजदन्तनिर्मिता मञ्चकाश्च । स्वर्णमय्यः घटादिसामग्रयश्च । आसनानि पीठादीनि । महान्ति अमूल्यानि मारकतानि इन्द्रनीलानि शोभार्थं संयुक्तानि येषु ॥१६।१७॥ यत्र गृहोद्यानं च आभाति ॥ १८ ॥ यत्रोद्याने । स्थितायां वाप्यां प्रविष्टमात्मानं देवहूतिम् ॥ १९ ॥ हित्वा उपेक्ष्य ॥ २० ॥ नष्टेऽदर्शनं गते ॥ २१ ॥ वत्स हे विदुर ! ॥२२॥ ध्यायन्तीति पञ्चकम् । सुतो यदाह तत् भगवद्रूपं ध्यायन्ती आत्मानं च विश्वतो मुखं सर्वगतं ध्यायन्ती ब्रह्मणि अवस्थितमति र्बभूव तदा च आत्मानं सा न सस्मारेत्यन्वयः । केन ध्यायन्ती । विशुद्धेन आत्मना मनसा । केन विशुद्धेन । भक्त्यादिना युक्तं यदनुष्ठानम् अखण्डध्यानं तस्माज्जातेन ब्रह्मसाक्षात्कारहेतुना ज्ञानेन । गुणकृतं विशेषणं देहाभिमानलक्षणं यस्मात्तम् । आत्मसंश्रये सर्वजीवाश्रये । जीवापत्तिरविद्या । परावृत्तो निवृत्तः भ्रमो देहाध्यासलक्षणः । उत्थितो यथा दुःखादियुक्तं न स्मरति तथा । साकल्येन अवयवशश्च चिन्तया ॥ २३।२४।२५।२६।२७ ॥ परतः परैः पोष्योऽपीति वीरराघवः । एकशब्देन समासस्य दुर्घटत्वात् ॥२८॥ अत्र सेत्यध्याहार्यम् ॥२९॥

एवं सा कपिलोक्तेन मार्गेणाचिरतः परम् । आत्मानं ब्रह्म निर्वाणं भगवन्तमवाप ह ॥३०॥
तद्वीरासीत्पुण्यतमं क्षेत्रं त्रैलोक्यविश्रुतम् । नाम्ना सिद्धपदं यत्र सा संसिद्धिमुपेयुषी ॥३१॥
तस्यास्तद्योगविधुतमार्त्यं मर्त्यमभूत्सरित् । स्रोतसां प्रवरा सौम्य सिद्धिदा सिद्धसेविता ।३२।
कपिलोऽपि महायोगी भगवान् पितुराश्रमात् । मातरं समनुज्ञाप्य प्रागुदीचीं दिशं ययौ ॥३३॥
सिद्धचारणगन्धर्वैर्मुनिभिश्चाप्सरोगणैः । स्तूयमानः समुद्रेण दत्तार्हणनिकेतनः ॥३४॥
आस्ते योगं समास्थाय सांख्याचार्यैरभिष्टुतः । त्रयाणामपि लोकानामुपशान्त्यै समाहितः ।३५।
एतन्निगदितं तात यत्पृष्टोऽहं तवानघ । कपिलस्य च संवादो देवहूत्याश्च पावनः ॥३६॥

य इदमनुशृणोति योऽभिधत्ते कपिलमुनेर्मतमात्मयोगगुह्यम् ।
भगवति कृतधीः सुपर्णकेतावुपलभते भगवत्पदारविन्दम् ॥ ३७ ॥

इति श्रीमद्भागवते महापुराणे वैयासिक्यामष्टादशसाहस्त्र्यां पारमहंस्यां संहितायां
तृतीयस्कन्धे कापिलेयोपाख्याने त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥

इति तृतीयः स्कन्धः समाप्तः ।

॥ हरिः ॐ तत्सत् ॥

निर्वाणं नित्यमुक्तम् । ह हर्षेण ॥३०॥ हे वीर विदुर !। संसिद्धि मुक्तिम् ॥३१॥ विधुता विलीना मार्त्या दैहिकधातुमला यस्य तत् मर्त्यं शरीरमेव ॥ ३२ ॥ अनुज्ञां सम्प्रार्थ्य प्राक् प्रथमं ततो गङ्गासागर संगमे ॥ ३३ ॥ सिद्धेति युग्मकम् । अर्घ्यं निकेतनं निवासस्थानं च यस्मै ॥३४।३५।३६॥ मतं भक्तिरूपम् । आत्मयोगेषु भगवत्प्राप्त्युपायेषु गोप्यम् । सुपर्णकेतौ गरुडध्वजे । पदारविन्दं सेवार्थम् एतेन दास्यभावो ध्वनितः ॥३७॥ पुष्पिताग्रावृत्तम् ।

तृतीयस्कन्धसंबन्धिदुर्गमग्रन्थिभेदिनी ।
श्रद्धया सेव्यतामेषा बुधैर्गूढार्थदीपिनी ॥

[तृतीये सर्गवर्णनम्]

इति श्रीमद्भागवते महापुराणे तृतीयस्कन्धे श्रीसनाढ्यवंशावतंसपण्डितप्रवरश्रीराममूर्तिशास्त्रिपौराणिक विरचितायां गूढार्थदीपिन्यां त्रयस्त्रिंशोऽध्यायः

श्रीकृष्णार्पणमस्तु

ॐ श्रीपरमात्मने नमः

श्रीमद्भागवतम्

चतुर्थः स्कन्धः

अथ प्रथमोऽध्यायः

मैत्रेय उवाच

मनोस्तु शतरूपायां तिस्रः कन्याश्च जज्ञिरे। आकूतिर्देवहूतिश्च प्रसूतिरिति विश्रुताः ॥ १ ॥
आकूतिं रुचये प्रादादपि भ्रातृमतीं नृपः। पुत्रिकाधर्ममाश्रित्य शतरूपानुमोदितः ॥ २ ॥
प्रजापतिः स भगवान् रुचिस्तस्यामजीजनत्। मिथुनं ब्रह्मवर्चस्वी परमेण समाधिना ॥ ३ ॥
यस्तयोः पुरुषः साक्षाद्विष्णुर्यज्ञस्वरूपधृक्। या स्त्री सा दक्षिणा भूतेरंशभूतानपायिनी ॥ ४ ॥
आनिन्ये स्वगृहं पुत्र्याः पुत्रं विततरोचिषम्। स्वायंभुवो मुदा युक्तो रुचिर्जग्राह दक्षिणाम् ॥ ५ ॥
तां कामयानां भगवानुवाह यजुषां पतिः। तुष्टायां तोषमापन्नोऽजनयद् द्वादशात्मजान् ॥ ६ ॥
तोषः प्रतोषः संतोषो भद्रः शान्तिरिडस्पतिः। इध्मः कविर्विभुः स्वह्नः सुदेवो रोचनो द्विषट् ७
तुषिता नाम ते देवा आसन् स्वायम्भुवान्तरे। मरीचिमिश्रा ऋषयो यज्ञः सुरगणेश्वरः ॥८॥
प्रियव्रतोत्तानपादौ मनुपुत्रौ महौजसौ। तत्पुत्रपौत्रनप्तॄणामनुवृत्तं तदन्तरम् ॥ ९ ॥
देवहूतिमदात्तात कर्दमायात्मजां मनुः। तत्सम्बन्धि श्रुतप्रायं भवता गदतो मम ॥ १० ॥

[विसर्ग वर्णनम्]

यज्ञनाशो हरद्वेषात् ध्रुवो भक्त्या ध्रुवं गतः।
प्रथोः सूक्त मथो वन्दे प्रचेतोमन्त्रदं शिवम् ॥१॥

प्रथमे मनुकन्यानां वंशविस्तारवर्णने।
यज्ञदत्तादिभिः सम्यक् हरेः प्राकट्यमीर्यते ॥२॥

चकारात् द्वौ पुत्रौ च। तु शब्देन मरीच्यादिपुत्रापेक्षयाऽस्य भक्त्युत्कर्षो द्योतितः ॥ १ ॥ यद्यप्ययं धर्मोऽभ्रातृकायां कन्यायां पुत्रार्थिनः एव प्रसिद्धस्तथाप्याकूतिपुत्रस्य साक्षाद्भगवतोऽवतारत्वात् दौहित्रोऽपि मम पुत्रो भवेदित्यभिप्रेत्य तथा कृतवानिति तत्त्वम् ॥ २ ॥ भगवान् बहुज्ञानवान् मिथुनं पुत्रं पुत्रीं च ॥ ३ ॥ तयोर्मध्ये। भूतेर्लक्ष्म्या अनपायिनी अवियोगिनी। अतो भगिनीभ्रात्रोरपि विवाहो न विरुद्धः 'लक्ष्मीर्नान्यस्य भार्या स्यात्' इत्यादिपुराणात्। धारणे जकारान्तोऽपि धृज् धातुः इत्यभियुक्तोक्तेः ॥ ४।५ ॥ यजुषां यज्ञानां पतिः फलदाता। कामयानां पतिमिच्छन्तीम्। आगमशास्त्रस्यानित्यत्वान्नुमभावः। उवाह विवाहितवान्। तुष्यत्यनयेति तुष्टा दक्षिणा तस्याम् ॥ ६ ॥ द्विरावृत्ताः षट् द्वादश ॥ ७ ॥ अन्तरे मन्वन्तरे। मिश्राः प्रभृतयः ॥८॥ नप्तारोऽत्र प्रपौत्रादयो ज्ञेयाः। तेषां वंशैस्तन्मन्वन्तरम् अनुवृत्तं व्याप्तं पालितं च ॥ ९ ॥ हे तात विदुर ! चरितमिति शेषः। तत्कन्या-

दक्षाय ब्रह्मपुत्राय प्रसूतिं भगवान्मनुः। प्रायच्छद्यत्कृतः सर्गस्त्रिलोक्यां विततो महान् ॥११॥
याः कर्दमसुताः प्रोक्ता नव ब्रह्मर्षिपत्नयः। तासां प्रसूतिप्रसवं प्रोच्यमानं निबोध मे ॥ १२ ॥
पत्नी मरीचेस्तु कला सुषुवे कर्दमात्मजा। कश्यपं पूर्णिमानं च ययोरापूरितं जगत् ॥ १३ ॥
पूर्णिमासूत विरजं विश्वगं च परंतप। देवकुल्यां हरेः पादशौचाद्याभूत्सरिद्दिवः ॥ १४ ॥
अत्रेः पत्न्यनसूया त्रीञ्जज्ञे सुयशसः सुतान्। दत्तं दुर्वाससं सोममात्मेशब्रह्मसम्भवान् ॥ १५ ॥

विदुर उवाच

अत्रेर्गृहे सुरश्रेष्ठाः स्थित्युत्पत्त्यन्तहेतवः। किंचिच्चिकीर्षवो जाता एतदाख्याहि मे गुरो १६

मैत्रेय उवाच

ब्रह्मणा चोदितः सृष्टावत्रिर्ब्रह्मविदां वरः। सह पत्न्या ययावृक्षं कुलाद्रिं तपसि स्थितः ॥१७॥
तस्मिन् प्रसूनस्तबकपलाशाशोककानने। वार्भिः स्रवद्भिरुद्घुष्टे निर्विन्ध्यायाः समन्ततः १८
प्राणायामेन संयम्य मनो वर्षशतं मुनिः। अतिष्ठदेकपादेन निर्द्वन्द्वोऽनिलभोजनः ॥ १९ ॥
शरणं तं प्रपद्येऽहं य एव जगदीश्वरः। प्रजामात्मसमां मह्यं प्रयच्छत्विति चिन्तयन् ॥२०॥
तप्यमानं त्रिभुवनं प्राणायामैधसाग्निना। निर्गतेन मुनेर्मूर्ध्नः समीक्ष्य प्रभवस्त्रयः ॥ २१ ॥
अप्सरोमुनिगन्धर्वसिद्धविद्याधरोरगैः । वितायमानयशसस्तदाश्रमपदं ययुः ॥ २२ ॥
तत्प्रादुर्भावसंयोगविद्योतितमना मुनिः । उत्तिष्ठन्नेकपादेन ददर्श विबुधर्षभान् ॥ २३ ॥
प्रणम्य दण्डवद्भूमावुपतस्थेऽर्हणाञ्जलिः । वृषहंससुपर्णस्थान् स्वैः स्वैश्चिन्हैश्च चिन्हितान्
कृपावलोकेन हसद्वदनेनोपलम्भितान् ।२४। तद्रोचिषा प्रतिहते निमील्य मुनिरक्षिणी ॥ २५ ॥
चेतस्तत्प्रवणं युञ्जन्नस्तावीत्संहताञ्जलिः। श्लक्ष्णया सूक्तया वाचा सर्वलोकगरीयसः ॥ २६ ॥

वंशानामश्रुतत्वात्प्रायग्रहणम् ॥१०।११॥ मे मया प्रोच्यमानं। निबोध शृणु। प्रसूतिप्रसवं सन्ततिविस्तारम् ॥ १२ ॥ पूर्णिमानं चेति पुत्रद्वयं न चास्य स्त्रीत्वमाशङ्क्यम् इमनिच्प्रत्ययेन सिद्धत्वात् ॥१३॥ देवकुल्यां नाम कन्यां च ॥ १४ ॥ आत्मेति हरिहरब्रह्मांशोद्भूतान् ॥ १५ ॥ किञ्चिच्चिकीर्षवः किं कर्तुमिच्छवः ॥१६॥ ऋक्षं नाम। स्थितोऽभूत् ॥१७॥ तस्मिन्निति त्रिकम्। तस्मिन् कुलाद्रौ यत्काननं तस्मिन् इति चिन्तयन् सन् एकपादेन अतिष्ठदित्यन्वयः। उद्घुष्टे नादिते ॥१८।१९।२०॥ तप्यमानमिति युग्मकम्। प्राणायाम एव एधः काष्ठं यस्य तेन। प्रभवः समर्थास्त्रयो देवाः। वितायमानं विस्तीर्यमाणं यशो येषान्ते ॥२१।२२।२३॥ प्रणम्येति सार्द्धम्। अर्हणं पुष्पादिकमञ्जलौ यस्य। उपतस्थे पूजयामास। स्वैः स्वैः त्रिशूलकमण्डलुचक्रादिभिः। उपलक्षितान् प्रतीयमानान् ॥२४॥ तदिति अर्द्धम् ॥२५॥ तत्प्रवणं युञ्जन् तदासक्तं कुर्वन्। गरीयसः पूज्यान् ।२६। विगृहीतो विभज्य गृहीता देहा यैस्ते। ते यूयम् अतो वो युष्मान्। तेभ्यः सकाशादेक एव मे मयोपहूतः स च भवतां मध्ये क इत्युच्यतामित्यर्थः ॥ २७ ॥ प्रधानै-

अत्रिरुवाच

विश्वोद्भवस्थितिलयेषु विभज्यमानैर्मायागुणैरनुयुगं विगृहीतदेहाः।
ते ब्रह्मविष्णुगिरिशाः प्रणतोऽस्म्यहं वस्तेभ्यः क एव भवतां म इहोपहूतः ॥ २७ ॥
एको मयेह भगवान् विबुधप्रधानैश्चित्तीकृतः प्रजननाय कथं नु यूयम्।
अत्रागतास्तनुभृतां मनसोऽपि दूरा ब्रूत प्रसीदत महानिह विस्मयो मे ॥ २८ ॥

मैत्रेय उवाच

इति तस्य वचः श्रुत्वा त्रयस्ते विबुधर्षभाः। प्रत्याहुः श्लक्ष्णया वाचा प्रहस्य तमृषिं प्रभो २९

देवा ऊचुः

यथा कृतस्ते संकल्पो भाव्यं तेनैव नान्यथा। सत्संकल्पस्य ते ब्रह्मन् यद्वै ध्यायति ते वयम् ३०
अथास्मदंशभूतास्ते आत्मजा लोकविश्रुताः। भवितारोऽङ्ग भद्रं ते विस्रप्स्यन्ति च ते यशः ३१
एवं कामवरं दत्त्वा प्रतिजग्मुः सुरेश्वराः। सभाजितास्तयोः सम्यग्दम्पत्योर्मिषतोस्ततः ॥३२॥
सोमोऽभूद् ब्रह्मणोंऽशेन दत्तो विष्णोस्तु योगवित्। दुर्वासाःशङ्करस्यांशो निबोधाङ्गिरसःप्रजाः।
श्रद्धा त्वङ्गिरसः पत्नी चतस्रोऽसूत कन्यकाः। सिनीवाली कुहू राका चतुर्थ्यनुमतिस्तथा ३४
तत्पुत्रावपरावास्तां ख्यातौ स्वारोचिषेऽन्तरे। उतथ्यो भगवान् साक्षाद् ब्रह्मिष्ठश्च बृहस्पतिः३५
पुलस्त्योऽजनयत्पत्न्यामगस्त्यं च हविर्भुवि। सोऽन्यजन्मनि दह्राग्निर्विश्रवाश्च महातपाः।३६।
तस्य यक्षपतिर्देवः कुबेरस्त्विडविडासुतः। रावणः कुम्भकर्णश्च तथान्यस्यां विभीषणः ॥३७॥
पुलहस्य गतिर्भार्या त्रीनसूत सती सुतान्। कर्मश्रेष्ठं वरीयांसं सहिष्णुं च महामते ॥ ३८ ॥
क्रतोरपि क्रिया भार्या बालखिल्यानसूयत। ऋषीन् षष्टिसहस्राणि ज्वलतो ब्रह्मतेजसा ॥३९॥
ऊर्जायां जज्ञिरे पुत्रा वसिष्ठस्य परंतप। चित्रकेतुप्रधानास्ते सप्त ब्रह्मर्षयोऽमलाः ॥ ४० ॥
चित्रकेतुः सुरोचिश्च विरजा मित्र एव च। उल्बणो वसुभृद्यानो द्युमाञ्छक्त्यादयोऽपरे ४१
चित्तिस्त्वथर्वणः पत्नी लेभे पुत्रं धृतव्रतम्। दध्यञ्चमश्वशिरसं भृगोर्वंशं निबोध मे ॥ ४२ ॥

रुपचारैः प्रजननाय पुत्रोत्पत्त्यै ॥ २८ ॥ ते त्वया। तेन तथैव। यतस्ते सङ्कल्पोऽन्यथा न भवति। यदेकं तत्त्वं भवान् ध्यायति ते वयं त्रयोऽपि तदेवैकं तत्त्वं नास्माकं भेदोऽस्तीत्यर्थः ॥ २९ ॥ अथ अतः। अङ्ग हे मुने! विस्रप्स्यन्ति विस्तृतं करिष्यन्ति ॥ ३० ॥ सभाजिताः पूजिताः। मिषतोः पश्यतोः। ततः स्थानात् ॥ ३१ ॥ निबोध शृणु ॥ ३२।३३ ॥ तत्पुत्रौ अङ्गिरःपुत्रौ। अन्तरे मन्वन्तरे। विशेषणद्वयं बृहस्पतेरेव ॥ ३४ ॥ हविर्भुवि पत्न्याम्। सोऽगस्त्यः दह्रो जाठराऽग्निरभूत्। विश्रवाश्च पुलस्त्यस्य सुत इति शेषः ॥ ३५ ॥ तस्य विश्रवसः। अन्यस्यां केशिन्यां त्रयः ॥३६।३७।३८॥ ऊर्जेत्यरुन्धत्या एव नामान्तरम् ॥ ३९ ॥ शक्त्यादयोऽन्यस्याः पुत्राः ॥ ४० ॥ अथर्वाऽपि ब्रह्मपुत्रः। चित्तिरिति शान्त्या एव नामान्तरम्। दध्यञ्चं नामैकम् ॥ ४१ ॥ पुत्रौ च पुत्री च तान् ॥ ४२ ॥ तयोस्ताभ्यां

भृगुः ख्यात्यां महाभागः पत्न्यां पुत्रानजीजनत् । धातारं च विधातारं श्रियं च भगवत्पराम् ।
आयतिं नियतिं चैव सुते मेरुस्तयोरदात् । ताभ्यां तयोरभवतां मृकण्डः प्राण एव च ॥४४॥
मार्कण्डेयो मृकण्डस्य प्राणाद्वेदशिरा मुनिः । कविश्च भार्गवो यस्य भगवानुशना सुतः ॥४५॥
त एते मुनयः क्षत्तर्लोकान् सर्गैरभावयन् । एष कर्दमदौहित्रसंतानः कथितस्तव ।
शृण्वतः श्रद्दधानस्य सद्यः पापहरः परः ॥४६॥
प्रसूतिं मानवीं दक्ष उपयेमे ह्यजात्मजः । तस्यां ससर्ज दुहितॄः षोडशामललोचनाः ॥४७॥
त्रयोदशादाद्धर्माय तथैकामग्नये विभुः । पितृभ्य एकां युक्तेभ्यो भवायैकां भवच्छिदे ॥४८॥
श्रद्धा मैत्री दया शान्तिस्तुष्टिः पुष्टिः क्रियोन्नतिः । बुद्धिर्मेधा तितिक्षा ह्रीर्मूर्तिर्धर्मस्य पत्नयः ४९
श्रद्धासूत शुभं मैत्री प्रसादमभयं दया । शान्तिः सुखं मुदं तुष्टिः स्मयं पुष्टिरसूयत ॥५०॥
योगं क्रियोन्नतिर्दर्पमर्थं बुद्धिरसूयत । मेधा स्मृतिं तितिक्षा तु क्षेमं ह्रीः प्रश्रयं सुतम् ५१।
मूर्तिः सर्वगुणोत्पत्तिर्नरनारायणावृषी ॥ ५२ ॥
ययोर्जन्मन्यदो विश्वमभ्यनन्दत्सुनिर्वृतम् । मनांसि ककुभो वाताः प्रसेदुः सरितोऽद्रयः ॥५३॥
दिव्यवाद्यन्त तूर्याणि पेतुः कुसुमवृष्टयः । मुनयस्तुष्टुवुस्तुष्टा जगुर्गन्धर्वकिन्नराः ॥५४॥
नृत्यन्ति स्म स्त्रियो देव्य आसीत्परममङ्गलम् । देवा ब्रह्मादयः सर्वे उपतस्थुरभिष्टवैः ॥५५॥

देवा ऊचुः

यो मायया विरचितं निजयाऽऽत्मनीदं खे रूपभेदमिव तत्प्रतिचक्षणाय ।
एतेन धर्मसदने ऋषिमूर्तिनाद्य प्रादुश्चकार पुरुषाय नमः परस्मै ॥५६॥
सोऽयं स्थितिव्यतिकरोपशमाय सृष्टान् सत्त्वेन नः सुरगणाननुमेयतत्त्वः ।
दृश्याददभ्रकरुणेन विलोकनेन यच्छ्रीनिकेतममलं क्षिपतारविन्दम् ॥५७॥
एवं सुरगणैस्तात भगवन्तावभिष्टुतौ । लब्धावलोकैर्ययतुरर्चितौ गन्धमादनम् ॥५८॥

धातृविधातृभ्याम् । पुनस्ताभ्यां सकाशात् । तयोरायतिनियत्योः ॥ ४३ ॥ यस्य वेदशिरसः सुतः उशनाः शुक्रः स एव कविर्नाम भार्गवः भृगुवंशीयः ॥ ४४ ॥ अभावयन् अवर्धयन् । त इत्यर्द्धम् ॥४५॥ दुहितॄणामयं दौहित्रः स चासौ सन्तानो वंशः । तव तुभ्यम् । यतः परः श्रेष्ठः ॥ ४६ ॥ मानवीं मनुपुत्रीम् ॥ ४७ ॥ युक्तेभ्यो मिलितेभ्यः ॥ ४८।४९ ॥ स्मयं धर्मोत्साहम् ॥ ५० ॥ दर्पं तपःसामर्थ्यख्यापनम् । एतदन्यौ स्मयदर्पौ तु अधर्मवंश्यौ । योगमिति सार्द्धम् ॥ ५१ ॥ सुनिर्वृतमानन्दपूर्णं सत् अभ्यनन्दत् समृद्धमासीत् । टुनदि ? समृद्धौ ॥ ५२ ॥ अवाद्यन्त देवैरिति शेषः ॥ ५३ ॥ स्म साश्चर्यम् । अभिष्टवैः स्तोत्रैः ॥ ५४ ॥ खे इव निर्मले यस्मिन्नात्मनि रूपभेदास्पदमिदं विश्वं निजमायया विरचितं तस्यात्मनः प्रतिचक्षणाय प्रकाशनाय य एतेन रूपेण अद्य आत्मानं प्रादुश्चकार तस्मै नम इत्यन्वयः । खे रूपभेदं गन्धर्वनगरमिवेति स्वामिचरणाः ॥ ५५ ॥ सोऽयम् अदभ्रकरुणेन अपारदयेन विलोकनेन नेत्रेण नोऽस्मान् दृश्यात् पश्यतु । कीदृशेन । श्रीनिकेतं यदरविन्दं तत् क्षिपता तिरस्कुर्वता । कथंभूतान् । स्थितिर्जगत्पालनं तत्र यो व्यतिकरो विघ्नस्तस्य विनाशनाय सृष्टान् । दृश्यादित्याशीर्लिङ् अतः पश्यामः ॥ ५६ ॥ लब्धः कृपावलोको यैः ॥ ५७ ॥ कृष्णौ कृष्णोऽस्त्याश्रयत्वेनास्येति कृष्णोऽर्जुनश्च

ताविमौ वै भगवतो हरेरंशाविहागतौ। भारव्ययाय च भुवः कृष्णौ यदुकुरूद्वहौ ॥५९॥
स्वाहाभिमानिनश्चाग्नेरात्मजांस्त्रीनजीजनत्। पावकं पवमानं च शुचिं च हुतभोजनम् ॥६०॥
तेभ्योऽग्नयः समभवन् चत्वारिंशच्च पञ्च च। त एवैकोनपञ्चाशत्साकं पितृपितामहैः ॥६१॥
वैतानिके कर्मणि यन्नामभिर्ब्रह्मवादिभिः। आग्नेय्य इष्टयो यज्ञे निरूप्यन्तेऽग्नयस्तु ते॥६२॥
अग्निष्वात्ता बर्हिषदः सौम्याः पितर आज्यपाः। साग्नयोऽनग्नयस्तेषां पत्नी दाक्षायणी स्वधा६३
तेभ्यो दधार कन्ये द्वे वयुनां धारिणीं स्वधा। उभे ते ब्रह्मवादिन्यौ ज्ञानविज्ञानपारगे ॥६४॥
भवस्य पत्नी तु सती भवं देवमनुव्रता। आत्मनः सदृशं पुत्रं न लेभे गुणशीलतः ॥६५॥
पितर्यप्रतिरूपे स्वे भवायानागसे रुषा। अप्रौढैवात्मनाऽऽत्मानमजहाद्योगसंयुता ॥६६॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां चतुर्थस्कन्धे विदुरमैत्रेयसंवादे प्रथमोऽध्यायः ॥१॥

अथ द्वितीयोऽध्यायः

विदुर उवाच

भवे शीलवतां श्रेष्ठे दक्षो दुहितृवत्सलः। विद्वेषमकरोत्कस्मादनादृत्यात्मजां सतीम् ॥ १ ॥
कस्तं चराचरगुरुं निर्वैरं शान्तविग्रहम्। आत्मारामं कथं द्वेष्टि जगतो दैवतं महत् ॥ २ ॥
एतदाख्याहि मे ब्रह्मन् जामातुः श्वशुरस्य च। विद्वेषस्तु यतः प्राणांस्तत्यजे दुस्त्यजान् सती३

मैत्रेय उवाच

पुरा विश्वसृजां सत्रे समेताः परमर्षयः। तथामरगणाः सर्वे सानुगा मुनयोऽग्नयः ॥ ४ ॥

तौमत्वर्थीयोऽच् ।५८। अग्नेः पत्नी स्वाहा नाम्नी अग्न्यभिमानिनो देवात्। हुतेति त्रयाणां विशेषणम् ।५९। तेभ्यस्त्रिभ्यः पञ्चदश पञ्चदश पुत्राः अतः पितरस्त्रयः पावकादयः पितामहश्चैकोऽग्निः एवं ॥ ६० ॥ वैतानिके वैदिके। यत् येषाम्। आग्नेय्यः अग्निदेवताका इष्टयो यागाः क्रियन्ते तत्करणं विना यज्ञासिद्धिरतो वहूनामपि सार्थकत्वम् ॥ ६१ ॥ सौम्याः सोमपाः। अग्नौ करणं कर्मविशेषो येषान्ते साग्नयः य जले करणवन्तोऽनग्नयः ॥ ६२ ॥ तेभ्यो मिलितपितृभ्यः। दधार गर्भे इति शेषः ॥ ६३।६४ ॥ अप्रतिरूपे प्रतिकूले सति आत्मना स्वयमेव आत्मानं देहम् संयुता योगमाश्रित्य ॥६५॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे गूढार्थदीपिन्यां प्रथमोऽध्यायः।

•

द्वितीये विश्वसड्यज्ञे दक्षविद्वेषकारणम्।
आक्षेपश्च शिवे शापो भृगुनन्दीशयोर्मिथः ॥ १ ॥

सतीनाम्नीम् ॥ १ ॥ कः प्रजापतिर्दक्षो वा ॥ २ ॥ यत इत्युभयत्रान्वेति। यतो हेतोर्विद्वेषः यतो विद्वेषात् प्राणान् एतदाख्याहीत्यन्वयः ॥ ३ ॥ विश्वसृजां मरीच्यादीनां सत्रे बहुयजमानकर्तृके

तत्र प्रविष्टमृषयो दृष्ट्वार्कमिव रोचिषा । भ्राजमानं वितिमिरं कुर्वन्तं तन्महत्सदः ॥५॥
उदतिष्ठन् सदस्यास्ते स्वधिष्ण्येभ्यः सहाग्नयः । ऋते विरिञ्चं शर्वं च तद्भासाऽऽक्षिप्तचेतसः ६
सदसस्पतिभिर्दक्षो भगवान् साधु सत्कृतः । अजं लोकगुरुं नत्वा निषसाद तदाज्ञया ॥ ७ ॥
प्राङ् निषण्णं मृडं दृष्ट्वा नामृष्यत्तदनादृतः । उवाच वामं चक्षुर्भ्यामभिवीक्ष्य दहन्निव ॥ ८ ॥
श्रूयतां ब्रह्मर्षयो मे सहदेवाः सहाग्नयः । साधूनां ब्रुवतो वृत्तं नाज्ञानान्न च मत्सरात् ॥ ९ ॥
अयं तु लोकपालानां यशोघ्नो निरपत्रपः । सद्भिराचरितः पन्था येन स्तब्धेन दूषितः ॥१०॥
एष मे शिष्यतां प्राप्तो यन्मे दुहितुरग्रहीत् । पाणिं विप्राग्निमुखतः सावित्र्या इव साधुवत् ११
गृहीत्वा मृगशावाक्ष्याः पाणिं मर्कटलोचनः । प्रत्युत्थानाभिवादार्हे वाचाप्यकृत नोचितम् ॥१२॥
लुप्तक्रियायाशुचये मानिने भिन्नसेतवे । अनिच्छन्नप्यदां बालां शूद्रायेवोशतीं गिरम् ॥१३॥
प्रेतावासेषु घोरेषु प्रेतैर्भूतगणैर्वृतः । अटत्युन्मत्तवन्नग्नो व्युप्तकेशो हसन् रुदन् ॥१४॥
चिताभस्मकृतस्नानः प्रेतस्रङ्न्रस्थिभूषणः । शिवापदेशो ह्यशिवो मत्तो मत्तजनप्रियः ।
पतिः प्रमथभूतानां तमोमात्रात्मकात्मनाम् ॥ १५ ॥
तस्मा उन्मादनाथाय नष्टशौचाय दुर्हृदे । दत्ता बत मया साध्वी चोदिते परमेष्ठिना ॥१६॥

यागे । समेता उपस्थिता आसन् ॥ ४ ॥ तत्रेति युग्मकम् । तत्र सत्रस्थले । प्रविष्टं दक्षम् । धिष्ण्यमासनम् । क्षिप्तं संकुचितम् ।५।६।। भगवान् सृष्टितत्त्वज्ञः ॥ ७ ॥ प्राक् स्वोपवेशनात्पूर्वम् । वामं वक्रं यथा स्यात्तथा । इवेत्यनेन भावी स्वस्यैव दाहो ध्वनितः ॥ ८ ॥ हे ब्रह्मर्षयः मे वचनमिति शेषः ॥ ९ ॥ स्तब्धेन अनम्रेण । वस्तुतस्तु तद्वाणी शिवं स्तौति । इन्द्रद्वेषिविद्युन्माल्यादिराज्ये वृष्टिद्वारा इन्द्रस्य । कामदाहकतयाऽग्नेः । मृत्युञ्जयत्वेन यमस्य । राक्षसधार्यरक्तार्द्रगजचर्मधारित्वेन निरृतेः । गङ्गाधृतेर्वरुणस्य पृथ्वीधारकशेषधारित्वेन शेषस्य । प्रलये श्वासद्वारा समुद्रशोषकत्वेन वायोः । कुबेरसखित्वेऽपि कपालित्वेन कुबेरस्य । एवं सर्वेषां यशोघ्न इति सुष्ठूक्तम् । निर्गता अप् समन्तात् त्रा त्राणं येषान्तान् अपत्रत्रान् रक्षकहीनान् पातीति भावेऽङ् । स्तब्धेन पाखण्डिना दूषितोऽपि वेदमार्गो येनैव हेतुना दुष्टनाशनेन प्रवर्तितः स्तब्धानामहङ्कारिणामिनाः स्वामिनस्तैर्दूषित इत्येकं पदं वा । मेऽशिष्टतां प्राप्तः पूर्वमेव ज्ञातवान् अत एवाऽभ्युत्थानादिकं न चकारेत्यर्थः । तथापि साधुवत् वस्तुतस्तु असाधोर्मे दुहितु-पाणि यदग्रहीत् तत् सावित्र्या इव तस्या गुणत एव ॥१०।११॥ गृहीत्वा मर्कटतुल्यकामिनोऽपि मे लोचनसंबन्धेन द्रष्टा बभूव तथापि त्वयि यदयमुचितं सत्कारं नाकरोत्तन्मां धिक् ॥ १२ ॥ लुप्तेति परब्रह्मरूपत्वात् । नास्ति शुचिर्यस्मात् । अग्रे उभयत्राऽकारपदच्छेदः । शूद्रा एवेति सन्धिः अत्र भोभगो-इत्यनेन यलोपस्याभावो वैकल्पिकत्वात् । उशतीं कमनीयां वेदलक्षणाम् ॥ १३ ॥ प्रेतेत्यादि भगवत्प्रेमोन्मादमयं लीलामात्रं न वस्तुतः अन्यथा उन्मत्त इत्येवाक्ष्यत । व्युप्तकेशो मुक्तकेशः ॥१४॥ चितेति सार्द्धम् । शिवोऽपकृष्टदेशोऽपि यस्मात् । उभयत्राऽमत्त इति च्छेदः । तमोरूपःआत्मा स्वभावो येषां तेषामपि दोषमपनीय कृपया पातीति पतिः ।१५। उत्कृष्टो मादो हर्षो येषान्ते उन्मादा वैष्णवास्तेषां नाथाय शिरोमणये । नष्टानां शिवनिन्दकत्वात्पतितवैष्णवानामपि शौचं शुद्धिर्यस्मात् । यतो दुष्टेष्वपि तेषु उद्धरणीया' एते इति दयालुतापूर्णं हृन्मनो यस्य । बत हर्षे ॥ १६ ॥

मैत्रेय उवाच

विनिन्द्यैवं स गिरिशमप्रतीपमवस्थितम् । दक्षोऽथाप उपस्पृश्य क्रुद्धः शप्तुं प्रचक्रमे ॥१७॥
अयं तु देवयजन इन्द्रोपेन्द्रादिभिर्भवः । सह भागं न लभतां देवैर्देवगणाधमः ॥१८॥

निषिध्यमानः स सदस्यमुख्यैर्दक्षो गिरित्राय विसृज्य शापम् ।
तस्माद्विनिष्क्रम्य विवृद्धमन्युर्जगाम कौरव्य निजं निकेतनम् ॥१९॥
विज्ञाय शापं गिरिशानुगाग्रणीर्नन्दीश्वरो रोषकषायदूषितः ।
दक्षाय शापं विससर्ज दारुणं ये चान्वमोदंस्तदवाच्यतां द्विजाः ॥२०॥

य एतन्मर्त्यमुद्दिश्य भगवत्यप्रतिद्रुहि । द्रुह्यत्यज्ञः पृथग्दृष्टिस्तत्त्वतो विमुखो भवेत् ॥२१॥
गृहेषु कूटधर्मेषु सक्तो ग्राम्यसुखेच्छया । कर्मतन्त्रं वितनुतां वेदवादविपन्नधीः ॥२२॥
बुद्ध्या पराभिध्यायिन्या विस्मृतात्मगतिः पशुः । स्त्रीकामःसोऽस्त्वतितरां दक्षो बस्तमुखोऽचिरात्
विद्याबुद्धिरविद्यायां कर्ममय्यामसौ जडः । संसरन्त्विह ये चामुमनु शर्वावमानिनम् ॥२४॥
गिरः श्रुतायाः पुष्पिण्या मधुगन्धेन भूरिणा । मथ्ना चोन्मथितात्मानः सम्मुह्यन्तु हरद्विषः॥२५॥
सर्वभक्षा द्विजा वृत्त्यै धृतविद्यातपोव्रताः । वित्तदेहेन्द्रियारामा याचका विचरन्त्विह ॥२६॥
तस्यैवं वदतः शापं श्रुत्वा द्विजकुलाय वै । भृगुः प्रत्यसृजच्छापं ब्रह्मदण्डं दुरत्ययम् ॥२७॥
भवव्रतधरा ये च ये च तान् समनुव्रताः । पाखण्डिनस्ते भवन्तु सच्छास्त्रपरिपन्थिनः ॥२८॥
नष्टशौचा मूढधियो जटाभस्मास्थिधारिणः । विशन्तु शिवदीक्षायां यत्र दैवं सुरासवम् ॥२९॥
ब्रह्म च ब्राह्मणाश्चैव यद्यूयं परिनिन्दथ । सेतुं विधारणं पुंसामतः पाखण्डमाश्रिताः ॥३०॥
एष एव हि लोकानां शिवः पन्थाः सनातनः । यं पूर्वे चानुसंतस्थुर्यत्प्रमाणं जनार्दनः ॥३१॥

व्युपसर्गस्योभयार्थकत्वात्स्तुत्वेत्यर्थः । अप्रतीपमजातशत्रुम् । अथ शीघ्रमेव क्रुद्ध इत्यादि स्वस्यैव भाविनाशार्थम् ॥ १७ ॥ यजने यज्ञे सह भागं न किन्तु तेभ्यः पूर्वमेव अग्रभोजित्वात् यतो देवगणोऽधमो यस्मात् ॥ १८ ॥ तस्मात् स्थानात् हे कौरव्य विदुर ! ॥ १९ ॥ रोष एव कषायो विकारस्तेन । ये तदवाच्यतां शिवनिन्दां तेभ्योऽपि ॥ २० ॥ मर्त्यं शरीरम् । पृथग्दृष्टिः भगवानयं न भवतीति नीचदृष्टिरिति सन्दर्भः ॥ २१ ॥ कूटा वञ्चनाबहुलाः । ग्राम्यसुखं विषयसुखम् । कर्मतन्त्रं कर्मकाण्डम् । वितनुताम् । वादैरर्थवादैः रुच्युत्पादकफलश्रुतिभिः विपन्ना विभ्रष्टा ॥ २२ ॥ परो देहादिः । 'बस्तो निवासे छागे च' इति निरुक्तिः ॥ २३ ॥ ये च अमुं दक्षमनुवर्तन्ते तेऽपि इहैव ॥ २४ ॥ श्रुतायाः श्रुतिरूपायाः । पुष्पतुल्यार्थवादबहुलायाः मधुगन्धतुल्येन मथ्ना कामेन सकामधर्मेण वा । 'मन्था: कामोऽङ्गज उदाहृतः' इत्यभिधानात् ॥ २५ ॥ सर्वं पलाण्ड्वादि ॥ २६ ॥ तस्य नन्दिनः वचनं श्रुत्वा । प्रत्यसृजत् प्रत्यदात् । दण्डरूपम् ॥ २७ ॥ सच्छास्त्रस्य विधिनिषेधरूपस्य प्रतिकूलाः सन्तः पाखण्डिनः स्वेच्छाचारिणः ॥ २८ ॥ दैवं देवतावदादरणीयम् । आसवस्तालादिरसः ॥ २९ ॥ पुंसां विधारणं नियामकं सेतुं मर्यादारूपं ब्रह्म वेदं यत् यस्मात् निदन्थ अत इत्यन्वयः ।३०। एष वेदलक्षणः । पूर्वे

तद् ब्रह्म परमं शुद्धं सतां वर्त्म सनातनम् । विगर्ह्य यात पाषण्डं दैवं वो यत्र भूतराट् ॥३२॥

मैत्रेय उवाच

तस्यैवं ददतः शापं भृगोः स भगवान् भवः । निश्चक्राम ततः किंचिद्विमना इव सानुगः ॥३३॥

तेऽपि विश्वसृजः सत्रं सहस्रपरिवत्सरान् । संविधाय महेष्वास यत्रेज्य ऋषभो हरिः ॥३४॥

आप्लुत्यावभृथं यत्र गङ्गा यमुनयान्विता । विरजेनात्मना सर्वे स्वं स्वं धाम ययुस्ततः ॥३५॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां चतुर्थस्कन्धे दक्षशापो नाम द्वितीयोऽध्यायः ॥२॥

अथ तृतीयोऽध्यायः

मैत्रेय उवाच

सदा विद्विषतोरेवं कालो वै ध्रियमाणयोः । जमातुः श्वशुरस्यापि सुमहानतिचक्रमे ॥ १ ॥

यदाभिषिक्तो दक्षस्तु ब्रह्मणा परमेष्ठिना । प्रजापतीनां सर्वेषामाधिपत्ये स्मयोऽभवत् ॥ २ ॥

इष्ट्वा स वाजपेयेन ब्रह्मिष्ठानभिभूय च । बृहस्पतिसवं नाम समारेभे क्रतूत्तमम् ॥ ३ ॥

तस्मिन् ब्रह्मर्षयः सर्वे देवर्षिपितृदेवताः । आसन् कृतस्वस्त्ययनास्तत्पत्न्यश्च सभर्तृकाः॥ ४ ॥

तदुपश्रुत्य नभसि खेचराणां प्रजल्पताम् । सती दाक्षायणी देवी पितुर्यज्ञमहोत्सवम् ॥ ५ ॥

ब्रह्मादय आश्रितवन्तः । यत् यस्मिन् प्रमाणं मूलम् सम्यग्वक्ता वा ॥ ३१ ॥ भूतेषु सर्वप्राणिषु राजते शोभते ॥३२॥ ददतः सतः । इवेत्युक्तेर्वस्तुतो न विमना आत्मारामत्वात् किन्तु द्वयोःशापाभ्यां द्वयोरेव हानिः स्यादिति विचार्य द्वेषादिकं परित्यज्य उभयोरभिन्नत्वादुभावेव सेव्यौ 'यो वै रुद्रः स नारायणः' इति श्रुतेरेतदेव प्रकरणव्यङ्ग्यं वस्त्विति तात्पर्यम् । ३३ ॥ तेऽपीति युग्मकम् । हे महेष्वास विदुर । यत्र इज्यः पूज्यस्तत्सत्रम् । यत्र प्रयागे तत्र अवभृथं यज्ञान्तस्नानम् आप्लुत्य कृत्वा प्रसन्नचित्तेन ययुः ततः प्रयागात् ॥ ३४,३५ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे गूढार्थदीपिन्यां द्वितीयोऽध्यायः ।

तृतीये तु गमिष्यन्ती पितृयज्ञोत्सवं सती ।
दिदृक्षुर्वारिता युक्त्या शङ्करेणेति वर्ण्यते ॥ १ ॥

ध्रियमाणयोः अवतिष्ठमानयोः धृङ् अवस्थाने इत्यस्मात् । अतिचक्रमे व्यतीतः ॥१॥ तदा स्मयो गर्वः ॥ २ ॥ ब्रह्मिष्ठान् शिवादीन् अनादृत्य ॥ ३ ॥ कृतस्वस्त्ययनाः कृतार्हणाः ॥ ४ ॥ तदिति त्रिकम् । तत् तदा सती प्रजल्पतां मुखात् उत्सवमुपश्रुत्य व्रजन्तीः स्त्रियश्च स्वगृहसमीपे दृष्ट्वा पतिमभ्यभाषतेत्यन्वयः । उपदेवा गन्धर्वादयः । विमानैर्यानं यासाम् । निष्कं दीनारहारः । लोलानि चञ्चलानि । मृष्टानि

व्रजन्तीः सर्वतो दिग्भ्य उपदेव वरस्त्रियः । विमानयानाः सप्रेष्ठा निष्ककण्ठीः सुवाससः ॥ ६ ॥
दृष्ट्वा स्वनिलयाभ्याशे लोलाक्षीर्मृष्टकुण्डलाः । पतिं भूतपतिं देवमौत्सुक्यादभ्यभाषत ॥ ७ ॥

सत्युवाच

प्रजापतेस्ते श्वशुरस्य साम्प्रतं निर्यापितो यज्ञमहोत्सवः किल ।
वयं च तत्राभिसराम वाम ते यद्यर्थिताऽमी विबुधा व्रजन्ति हि ॥ ८ ॥
तस्मिन् भगिन्यो मम भर्तृभिः स्वकैर्ध्रुवं गमिष्यन्ति सुहृद्दिदृक्षवः ।
अहं च तस्मिन् भवताभिकामये सहोपनीतं परिबर्हमर्हितुम् ॥ ९ ॥
तत्र स्वसॄर्मे ननु भर्तृसम्मिता मातृष्वसॄः क्लिन्नधियं च मातरम् ।
द्रक्ष्ये चिरोत्कण्ठमना महर्षिभिरुन्नीयमानं च मृडाध्वरध्वजम् ॥१०॥
त्वय्येतदाश्चर्यमजात्ममायया विनिर्मितं भाति गुणत्रयात्मकम् ।
तथाप्यहं योषिदतत्त्वविच्च ते दीना दिदृक्षे भव मे भवक्षितिम् ॥११॥
पश्य प्रयान्तीरभवान्ययोषितोऽप्यलंकृताः कान्तसखा वरूथशः ।
यासां व्रजद्भिः शितिकण्ठ मण्डितं नभो विमानैः कलहंसपाण्डुभिः ॥१२॥
कथं सुतायाः पितृगेहकौतुकं निशम्य देहः सुरवर्य नेङ्गते ।
अनाहुता अप्यभियन्ति सौहृदं भर्तुर्गुरोर्देहकृतश्च केतनम् ॥१३॥
तन्मे प्रसीदेदममर्त्य वाञ्छितं कर्तुं भवान् कारुणिको बतार्हति ।
त्वयाऽऽत्मनोऽर्धेऽहमदभ्रचक्षुषा निरूपिता मानुगृहाण याचितः ॥१४॥

ऋषिरुवाच

एवं गिरित्रः प्रिययाभिभाषितः प्रत्यभ्यधत्त प्रहसन् सुहृत्प्रियः ।
संस्मारितो मर्मभिदः कुवागिषून् यानाह को विश्वसृजां समक्षतः ॥१५॥

उज्ज्वलानि ॥ ५ ६।७ ॥ निर्यापितः ऋषिभिः प्रवर्तितः । वयं च वयमपि । अर्थिता इच्छा । हे वाम अतिसुन्दर 'वामो वक्रेऽतिसुन्दरे' इति धरणिः ॥ ८ ॥ पित्रादिभिरुपनीतं दत्तं परिबर्हमलङ्कारादिकं भवता सह अर्हितुं ग्रहीतुमिच्छामि ॥ ९ ॥ संमिताः सहिता. उन्नीयमानं प्रवर्त्यमानं यज्ञश्रेष्ठं च । हे मृड ! ॥ १० ॥ हे अज ! आश्चर्यरूपम् एतद्विश्वं त्वय्येव आत्मनस्तव मायया रचितं भाति अतो यद्यपि तव नाश्चर्यबुद्धिस्तथापीत्यन्वयः । भवक्षितिं जन्मभूमिम् ॥ ११ ॥ अन्याः सम्बन्धरहिता अपि । व्रजद्भिर्यासां विमानैर्नभो मण्डितं ताः प्रयान्तीः पश्येत्यन्वयः । हंसवत् धवलैः ॥१२॥ कौतुकमुत्सवम् । कथं नेङ्गते द्रष्टुं न प्रचलति । सुहृदः इदं सुहृत्सम्बन्धि । तथा मन्त्रादीनां च ॥ १३ ॥ तत् तस्मात् कारुणिकत्वमेवाह-यतः अदभ्रचक्षुषा अनल्पदयादृष्ट्या आत्मनो देहस्यार्द्धेस्थापिता अतो मया याचितस्त्वं मामनुगृहाण । बत हर्षे ॥१४॥ अभिभाषितो याचितः । प्रत्यभ्यधत प्रत्यभाषत । को दक्षो यानाह तान्

श्रीभगवानुवाच

त्वयोदितं शोभनमेव शोभने अनाहुता अप्यभियन्ति बन्धुषु ।
ते यद्यनुत्पादितदोषदृष्टयो बलीयसानात्म्यमदेन मन्युना ॥१६॥

विद्यातपोवित्तवपुर्वयःकुलैः सतां गुणैः षड्भिरसत्तमेतरैः ।
स्मृतौ हतायां भृतमानदुर्दृशः स्तब्धा न पश्यन्ति हि धाम भूयसाम् ॥१७॥

नैतादृशानां स्वजनव्यपेक्षया गृहान् प्रतीयादनवस्थितात्मनाम् ।
येऽभ्यागतान् वक्रधियाऽभिचक्षते आरोपितभ्रूभिरमर्षणाक्षिभिः ॥१८॥

तथारिभिर्न व्यथते शिलीमुखैः शेतेऽर्दिताङ्गो हृदयेन दूयता ।
स्वानां यथा वक्रधियां दुरुक्तिभिर्दिवानिशं तप्यति मर्मताडितः ॥१९॥

व्यक्तं त्वमुत्कृष्टगतेः प्रजापतेः प्रियाऽऽत्मजानामसि सुभ्रु सम्मता ।
अथापि मानं न पितुः प्रपत्स्यसे मदाश्रयात्कः परितप्यते यतः ॥२०॥

पापच्यमानेन हृदाऽऽतुरेन्द्रियः समृद्धिभिः पूरुषबुद्धिसाक्षिणाम् ।
अकल्प एषामधिरोढुमञ्जसा पदं परं द्वेष्टि यथासुरा हरिम् ॥२१॥
प्रत्युद्गमप्रश्रयणाभिवादनं विधीयते साधु मिथः सुमध्यमे ।
प्राज्ञैः परस्मै पुरुषाय चेतसा गुहाशयायैव न देहमानिने ॥२२॥
सत्त्वं विशुद्धं वसुदेवशब्दितं यदीयते तत्र पुमानपावृतः ।
सत्त्वे च तस्मिन् भगवान् वासुदेवो ह्यधोक्षजो मे नमसा विधीयते ॥२३॥

प्रति स्मरणं प्रापितः संस्मरन्नित्यर्थः । निवृत्तप्रेरणात्स्मरतेः णिजन्तात् कर्तरि क्तः ।१५। यदुदितं तच्छोभनं सत्यमेव । किन्तु ते यदि दृढ़तरेण अनात्म्यमदेन देहाभिमाननिमित्तदर्पेण जातेन मन्युना न तथाभूताः न दोषदृष्टयः तर्हि बन्धुगृहेषु अभियन्ति नान्यथेत्यर्थः ।। १६ ।। गुणैर्विवेकहेतुभिरपि असत्तमानामितरैर्दोषरूपैरत एव तैः स्मृतौ कार्याकार्यविवेकरूपायां हतायां भृतेन धृतेन अहम्मनाभिमानेन कुदृष्टयोऽन्धाः सन्तो महतां प्रभावं द्रष्टुं न शक्नुवन्तीत्यर्थः ॥ १७ ॥ स्वानां दुरुक्तिभिर्मर्मसु ताडितो यथा व्यथमानेन हृदा दिवानिशं तप्यति तथाऽरिभिः कर्तृभि.र्बाणैः खण्डितगात्रोऽपि न व्यथते अपि तु शेते इत्यन्वयः ॥ १९ ॥ व्यक्तं निश्चितं त्वम् आत्मजानां कन्यानां मध्ये प्रियेति मे सम्मताऽसि अथापीत्यन्वयः । को दक्षः । उत्कृष्टेत्यत्र विपरीतलक्षणया निकृष्टेत्यर्थः ।। २० ॥ साक्षिणां प्रेरकाणामस्मत्सदृशानां समृद्धिभिर्जाज्वल्यमानेन हृदा व्याकुलेन्द्रियः सन् परं केवलं द्वेष्टि । कुतः । अञ्जसा तत्त्वेन एषां पदं स्थानमैश्वर्यं वा प्राप्तुमसमर्थं अतः ॥ २१ ॥ प्राज्ञैः वासुदेवः सर्वमिति तत्त्ववेदिभिः पुरुषैः भक्तेषु आगच्छत्सु मिथः परस्परं प्रत्युद्गमादिकं चेतसा गुहाशयाय हृदये स्थिताय वासुदेवायैव विधीयते । प्रत्युद्गमः उत्थाय सम्मुखागमनम् । प्रश्रयणं विनयः ॥ २२ ॥ सत्त्वमन्तःकरणं वसुदेवशब्देनोक्तं भवति । कुतः । यत् यस्मात् तत्र पुमान् प्रतीयते स च वासुदेव एव सत्त्वे वसुदेवे भवति आविर्भवतीति

तत्ते निरीक्ष्यो न पितापि देहकृद् दक्षो मम द्विट् तदनुव्रताश्च ये ।
यो विश्वसृग्यज्ञगतं वरोरु मामनागसं दुर्वचसाकरोत्तिरः ॥२४॥
यदि व्रजिष्यस्यतिहाय मद्वचो भद्रं भवत्या न ततो भविष्यति ।
सम्भावितस्य स्वजनात्पराभवो यदा स सद्यो मरणाय कल्पते ॥२५॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां चतुर्थस्कन्धे उमारुद्रसंवादे तृतीयोऽध्यायः ॥ ३ ॥

अथ चतुर्थोऽध्यायः

मैत्रेय उवाच

एतावदुक्त्वा विरराम शंकरः पत्न्यङ्गनाशं ह्युभयत्र चिन्तयन् ।
सुहृद्दिदृक्षुः परिशङ्किता भवान्निष्क्रामती निर्विशती द्विधाऽऽस सा ॥ १ ॥
सुहृद्दिदृक्षाप्रतिघातदुर्मनाः स्नेहाद्रुदत्यश्रुकलातिविह्वला ।
भवं भवान्यप्रतिपूरुषं रुषा प्रधक्ष्यतीवैक्षत जातवेपथुः ॥ २ ॥
ततो विनिःश्वस्य सती विहाय तं शोकेन रोषेण च दूयता हृदा ।
पित्रोरगात्स्त्रैणविमूढधीर्गृहान् प्रेम्णाऽऽत्मनो योऽर्धमदात् सतां प्रियः ॥ ३ ॥

तथा स एव च मया नमस्कारेण विधीयते सेव्यते । मनसेति पाठे विशेषेण धीयते चिन्त्यते इत्यर्थः । अधोभूतेषु प्रत्याहृतेषु अक्षेषु इन्द्रियेषु जायते प्रकाशते तथा ॥ २३ ॥ तत् तस्मात् । ते त्वया । किं बहुना ये तदनुव्रतास्तेऽपि न निरीक्ष्याः । तिरः अकरोत् तिरश्चकार । देहं कृन्ततीति श्लेषेण भावी देहपातश्च सूचितः ॥ २४ ॥ अतिहाय उल्लङ्घ्य भवत्यास्तव । ततस्तत्र गमनात् । संभावितस्य सुप्रतिष्ठितस्य । तदा स पराभवः सद्यो नाशहेतुर्भवति ॥ २५ ॥

इति श्रीमद्भागवतो महापुराणे चतुर्थस्कन्धे गूढार्थदीपिन्यां तृतीयोऽध्यायः ।

चतुर्थे श्रीशिवं त्यक्त्वा दक्षयज्ञमगात्सती ।
विमता गर्हयित्वा तं जहौ प्राणानितीर्यते ॥ १ ॥

शं मोक्षः करे यस्येति वा । उभयत्र प्रस्थापने निवारणे च दिदृक्षुर्गृहान्निष्क्रामन्ती शङ्किता च पुनर्निविशन्ती च सा द्विचित्ता बभूव । आसेत्यव्ययं तदर्थे ॥ १ ॥ प्रतिघातेन भङ्गेन निरोधेन वा । कलाभिर्बिन्दुभिः । जगत् आत्मानं वा प्रधक्ष्यतीव भवमैक्षतेत्यन्वयः । अप्रतिपूरुषम् अनुपमम् । वेपथुः कम्पः ॥ २ ॥ ततो दूयता उपतप्यमानेन हृदा तं विहाय पित्रोर्गृहान् अगात् । कथंभूतम् । यः प्रेम्णा

तामन्वगच्छन्द्रुतविक्रमां सतीमेकां त्रिनेत्रानुचराः सहस्रशः ।
सपार्षदयक्षा मणिमन्मदादयः पुरोवृषेन्द्रास्तरसा गतव्यथाः ॥ ४ ॥
तां सारिकाकन्दुकदर्पणाम्बुजश्वेतातपत्रव्यजनस्रगादिभिः ।
गीतायनैर्दुन्दुभिशङ्खवेणुभिर्वृषेन्द्रमारोप्य विटङ्किता ययुः ॥ ५ ॥
आब्रह्मघोषोर्जितयज्ञवैशसं विप्रर्षिजुष्टं विबुधैश्च सर्वशः ।
मृद्दार्वयःकाञ्चनदर्भचर्मभिर्निसृष्टभाण्डं यजनं समाविशत् ॥ ६ ॥
तामागतां तत्र न कश्चनाद्रियद्विमानितां यज्ञकृतो भयाज्जनः ।
ऋते स्वसॄर्वै जननीं च सादराः प्रेमाश्रुकण्ठ्यः परिषस्वजुर्मुदा ॥ ७ ॥
सौदर्यसम्प्रश्नसमर्थवार्तया मात्रा च मातृष्वसृभिश्च सादरम् ।
दत्तां सपर्यां वरमासनं च सा नादत्त पित्राप्रतिनन्दिता सती ॥ ८ ॥
अरुद्रभागं तमवेक्ष्य चाध्वरं पित्रा च देवे कृतहेलनं विभौ ।
अनादृता यज्ञसदस्यधीश्वरी चुकोप लोकानिव धक्ष्यती रुषा ॥ ९ ॥
जगर्ह सामर्षविपन्नया गिरा शिवद्विषं धूमपथश्रमस्मयम् ।
स्वतेजसा भूतगणान् समुत्थितान् निगृह्य देवी जगतोऽभिशृण्वतः ॥१०॥

श्रीदेव्युवाच

न यस्य लोकेऽस्त्यतिशायनः प्रियस्तथाप्रियो देहभृतां प्रियात्मनः ।
तस्मिन् समस्तात्मनि मुक्तवैरके ऋते भवन्तं कतमः प्रतीपयेत् ॥११॥
दोषान् परेषां हि गुणेषु साधवो गृह्णन्ति केचिन्न भवादृशा द्विज ।
गुणांश्च फल्गून् बहुलीकरिष्णवो महत्तमास्तेष्वविदद्भवानघम् ॥१२॥

तस्यै आत्मनो देहस्यार्द्धमदात् तम् । त्यागे हेतुः । स्त्रैणं स्त्रीस्वभावः ॥ ३ ॥ द्रुतविक्रमां शीघ्रगतिम् । तरसा वेगेन अन्वगच्छन् । रुद्रातिक्रमणेन आगतेति पदच्छेदो वा ॥४॥ तां सतीं वृषेन्द्रमारोप्य सारिकादिभिर्विटङ्किता अलङ्कृताः सन्तो ययुरित्यन्वयः । 'अलङ्कारे विटङ्कः स्यात्' इत्यभिधानात् । सारिका क्रीडाशुकी । गीतायनैर्गानाधारैः साधनैर्वा ॥५॥ यजनं यज्ञस्थानं समाविशत् सतीति शेषः । कथंभूतम् । आ समन्तात् यो ब्रह्मघोषो वेदध्वनिस्तेन ऊर्जितमतिशायितं यज्ञे वैशसं जिगीषया परस्परस्पर्धा न तु पशुहिंसा शास्त्रार्थो वा यस्मिन् । विबुधैर्देवैश्च जुष्टमिति विभज्यान्वेति । निसृष्टानि निर्मितानि पात्राणि यस्मिन । अयो लोहम् । चर्म मृगचर्म ॥६॥ यज्ञकृतो दक्षात् यद्भयं तस्मात् कोऽपि न आद्रियत् यतस्तेनापमानिताम् । तास्तु सादरा आलिङ्गितवत्यः । प्रेमाश्रुयुक्तः ॥७॥ सोदरत्वेन भगिनीनां यः कुशलप्रश्नः तत्रोचितवार्तया सह ताभिर्दत्तां पूजामासनं च सा न गृहीतवती यतोऽप्रतिनन्दिताऽनादृता ॥ ८ ॥ हेलनमपमानम् ॥ ९ ॥ सा देवी जगतोऽभिशृण्वतः सतः गिरा दक्षं जगर्ह निन्दितवती । कथभूतया । अमर्षेण क्रोधेन विपन्नया सगद्गदया । धूमपथः कर्ममार्गस्तत्र श्रमेण गर्वो यस्य । निगृह्य निवार्य ॥१०॥ यस्मात् अतिशायनोऽधिकः उत्कृष्टो वा । प्रतीपयेत् प्रातिकूल्यमाचरेत् ॥ ११ ॥ ये परेषां गुणेषु दोषानेव गृह्णन्ति

नाश्चर्यमेतद्यदसत्सु सर्वदा महद्विनिन्दा कुणपात्मवादिषु ।
सेर्ष्यं महापूरुषपादपांसुभिर्निरस्ततेजःसु तदेव शोभनम् ॥१३॥
यद् द्व्यक्षरं नाम गिरेरितं नृणां सकृत्प्रसङ्गादघमाशु हन्ति तत् ।
पवित्रकीर्ति तमलङ्घ्यशासनं भवानहो द्वेष्टि शिवं शिवेतरः ॥१४॥
यत्पादपद्मं महतां मनोऽलिभिर्निषेवितं ब्रह्मरसासवार्थिभिः ।
लोकस्य यद्वर्षति चाशिषोऽर्थिनस्तस्मै भवान् द्रुह्यति विश्वबन्धवे ॥१५॥
किं वा शिवाख्यमशिवं न विदुस्त्वदन्ये ब्रह्मादयस्तमवकीर्य जटाः श्मशाने ।
तन्माल्यभस्मनृकपाल्यवसत्पिशाचैर्ये मूर्धभिर्दधति तच्चरणावसृष्टम् ॥१६॥
कर्णौ पिधाय निरियाद्यदकल्प ईशे धर्मावितर्यसृणिभिर्नृभिरस्यमाने ।
छिन्द्यात्प्रसह्य रुशतीमसतीं प्रभुश्चेज्जिह्वामसूनपि ततो विसृजेत्स धर्मः ॥१७॥
अतस्तवोत्पन्नमिदं कलेवरं न धारयिष्ये शितिकण्ठगर्हिणः ।
जग्धस्य मोहाद्धि विशुद्धिमन्धसो जुगुप्सितस्योद्धरणं प्रचक्षते ॥१८॥
न वेदवादाननुवर्तते मतिः स्व एव लोके रमतो महामुनेः ।
यथा गतिर्देवमनुष्ययोः पृथक् स्व एव धर्मे न परं क्षिपेत्स्थितः ॥१९॥
कर्म प्रवृत्तं च निवृत्तमप्यृतं वेदे विविच्योभयलिङ्गमाश्रितम् ।
विरोधि तद्यौगपदैककर्तरि द्वयं तथा ब्रह्मणि कर्म नर्च्छति ॥२०॥

ते भवादृशा असाधवोऽधमाः ये च तेषु यथास्थितान् गुणदोषान् विवेकेन गृह्णन्ति ते केचित् महान्तः ये च गुणानेव गृह्णन्ति ते महत्तराः । ये च तुच्छानपि गुणान् बहुलीकुर्वन्ति ते महत्तमास्तेषु भवान् अपराधं कृतवानित्यर्थः ॥ १२ ॥ कुणपं शरीरं तदेवात्मेति वदन्ति ये तेषु भवादृशेषु असत्सु सेर्ष्यं महद्विनिन्देति यत् एतदाश्चर्यं न किन्तु तदेव निन्दनमेव शोभनमुचितं स्वनाशहेतुत्वात् यतो महेति ॥ १३ ॥ यत् यस्य । प्रसङ्गात् तत्रापि सकृत् एकवारमेव ईरितमुच्चारितं सत् ॥ १४॥ ब्रह्मरसः भगवत्स्वरूपानन्दः स एव आसवः तृप्तिकरं मधु जगद्विस्मारकत्वात् यच्च अर्थिनो याचमानस्य आशिषोऽभीष्टानि वर्षति तस्मै द्रुह्यति ।१५। यो जटाः प्रसार्य श्मशाने पिशाचैः सह अवसत् तस्य श्मशानस्य माल्यादीनि भूषणत्वेन च सन्ति यस्य तं शिवं त्वत्तोऽन्येऽशिवं किं न विदुः विदन्त्येवेति चेन्न कुतः । ये पदासृष्टं गलितं निर्माल्यं मूर्धभिर्धारयन्ति ॥ १६ ॥ धर्मरक्षके जने ईशे वा असृणिभिर्निरङ्कुशैस्तिरस्क्रियमाणे सति गर्तुं मारयितुं वा यदि अकल्पोऽसमर्थः तर्हि कर्णौ पिधाय निर्गच्छेत् । समर्थः प्रभुःश्चेत् रुशतीं कटुवादिनीं जिह्वाम् । ततः प्रभुत्वाभावेऽसूनपि विसृजेत् इति यत्स धर्मः । अत्र क्षत्रियस्य दण्डेऽधिकारात् छिन्द्यात् वैश्यशूद्रौ स्वतनुत्यागरूपं दण्डं कुर्यातास् ब्राह्मणस्तु कर्णौ पिधायेति धर्मव्यवस्था । 'मार्गेवा प्वङ्कुशे सृणिः' इतिनिरुक्तिः ॥ १७ ॥ तव त्वत्तः । शितिर्नीलः । मोहात् भक्षितस्य जुगुप्सितस्य निषिद्धस्य अन्धसः विप्रसम्प्रक्तान्नस्य उद्धरणं वमनमेव विशुद्धिं कथयन्ति विज्ञाः ॥ १८ ॥ वेदवादान् विधिनिषेधरूपान् । स्वे लोके स्वात्मन्येव । अतः स्वधर्मे स्थितः परं न क्षिपेदिति विधिः ॥ १९ ॥ प्रवृत्तमग्निहोत्रादि

मा वः पदव्यः पितरस्मदास्थिता या यज्ञशालासु न धूमवर्त्मभिः ।
तदन्नतृप्तैरसुभृद्भिरीडिता अव्यक्तलिङ्गा अवधूतसेविताः ॥२१॥
नैतेन देहेन हरे कृतागसो देहोद्भवेनालमलं कुजन्मना ।
व्रीडा ममाभूत्कुजनप्रसङ्गतस्तज्जन्म धिग्यो महतामवद्यकृत् ॥२२॥
गोत्रं त्वदीयं भगवान् वृषध्वजो दाक्षायणीत्याह यदा सुदुर्मनाः ।
व्यपेतनर्मस्मितमाशु तद्ध्यहं व्युत्स्रक्ष्य एतत्कुणपं त्वदङ्गजम् ॥२३॥

मैत्रेय उवाच

इत्यध्वरे दक्षमनूद्य शत्रुहन् क्षितावुदीचीं निषसाद शान्तवाक् ।
स्पृष्ट्वा जलं पीतदुकूलसंवृता निमील्य दृग्योगपथं समाविशत् ॥२४॥
कृत्वा समानावनिलौ जितासना सोदानमुत्थाप्य च नाभिचक्रतः ।
शनैर्हृदि स्थाप्य धियोरसि स्थितं कण्ठाद् भ्रुवोर्मध्यमनिन्दिताऽनयत् ॥२५॥
एवं स्वदेहं महतां महीयसा मुहुः समारोपितमङ्कमादरात् ।
जिहासती दक्षरुषा मनस्विनी दधार गात्रेष्वनिलाग्निधारणाम् ॥२६॥
ततः स्वभर्तुश्चरणाम्बुजासवं जगद्गुरोश्चिन्तयती न चापरम् ।
ददर्श देहो हतकल्मषा सती सद्यः प्रजज्वाल समाधिजाग्निना ॥२७॥

निवृत्तं शमदमदि ऋतं सत्यमेव यतो वेदे आश्रितं विहितं तच्च विविच्य व्यवस्थामधिकृत्य यथा एककालावच्छेदेन एकस्मिन् कर्तरि तत्कर्मद्वयं विरोधि तथा ब्रह्मणि शिवे तद् द्वयमपि न प्राप्नोति । उभयं बन्धमोक्षलक्षणं चिह्नं फलं यस्य ॥ २० ॥ हे पितः अस्माभिराश्रिताः पदव्योऽणिमादिसमृद्धो वो युष्माकं मा सन्ति जन्मकोटिभिरपि न भविष्यन्तीत्यर्थः । कुतः । या यज्ञशालासु न भवन्ति तदन्नतृप्तैरुदरम्भरैः काकतुल्यैर्धूमवर्त्मभिः कर्मिभिश्च नेडिता न स्तुता भवन्ति अप्राप्तत्वात् किन्तु ता अवधूतैः भक्तैः सेविताः सेव्यन्ते । वर्तमाने क्तः ॥ २१ ॥ एतेन देहेन नालं न किञ्चित्प्रयोजनम् । कथंभूतेन । हरे शिवे कृतापराधस्य तव देहादुत्पन्ने न । योऽवद्यकृत् अपमानकर्ता तस्मात् यज्जन्म तत् धिक् निन्दितमित्यर्थः ॥२२॥ त्वदीयं त्वत्संबन्धवाचकं गोत्रं नाम यदा आह तदा निवृत्तक्रीडास्मितपूर्वकं सुदुर्मना भवामि । तत् तस्मात् एतत् कुणपं शरीरं त्यक्ष्यामि । 'शरीरे कुणपम्' इति स्वामी ॥ २३ ॥ दक्षं प्रत्यनुवादं कृत्वा । उदीचीं दिशमुद्दिश्य क्षितौ निषसादेति योज्यम् । दृक् दृशौ ।२४। अनिन्दिता सा सती अनिलौ प्राणापानौ नाभिचक्रे समानौ कृत्वा तत उदानमुत्थाप्य उर्ध्वमुखं कृत्वा निश्चलबुद्धया क्रमेण भ्रुवोर्मध्यमाज्ञाचक्रमनयत् ॥ २५ ॥ महीयसा पूज्यतमेन श्रीरुद्रेण । दधार चकार ॥ २६ ॥ आसवं चिन्तयन्ती ध्यानेन तन्माधुर्यमास्वादयन्ती भर्तुरपरं न ददर्श । देहश्च सद्यः प्रजज्वाल विद्युदिव प्रदीप्य अन्तरधादित्यर्थः । शक्तिदेहस्यानित्यत्वे तु शक्तिमत ईश्वरस्याप्यनित्यत्वं प्रसज्येत अभेदोपचारात् । किञ्च शिवधृततद्देहस्य विष्णुचक्रच्छेदात्क्षेत्रोत्पत्तिवर्णनमिति पुराणान्तरविरोधोऽप्याते दतस्तद्देहनाशो न व्याख्येयः किन्तु कालान्तरेणाणुर्भूत्वा मेनागर्भे प्रविष्टोऽभूदिति ज्ञेयमत्र । हतं दक्षकन्यात्वमभिमानलक्षणं कल्मषं

तत्पश्यतां खे भुवि चाद्भुतं महद्धाहेति वादः सुमहानजायत ।
हन्त प्रिया दैवतमस्य देवी जहावसून् केन सती प्रकोपिता ॥२८॥
अहो अनात्म्यं महदस्य पश्यत प्रजापतेर्यस्य चराचरं प्रजाः ।
जहावसून् यद्विमताऽऽत्मजा सती मनस्विनी मानमभीक्ष्णमर्हति ॥२९॥
सोऽयं दुर्मर्षहृदयो ब्रह्मध्रुक् च लोकेऽपकीर्ति महतीमवाप्स्यति ।
यदङ्गजां स्वां पुरुषद्विडुद्यतां न प्रत्यषेधन्मृतयेऽपराधतः ॥३०॥
वदत्येवं जने सत्या दृष्ट्वाऽसुत्यागमद्भुतम् । दक्षं तत्पार्षदा हन्तुमुदतिष्ठन्नुदायुधाः ॥३१॥
तेषामापततां वेगं निशाम्य भगवान् भृगुः । यज्ञघ्नघ्नेन यजुषा दक्षिणाग्नौ जुहाव ह ॥३२॥
अध्वर्युणा हूयमाने देवा उत्पेतुरोजसा । ऋभवो नाम तपसा सोमं प्राप्ताः सहस्रशः ॥३३॥
तैरलातायुधैः सर्वे प्रमथाः सहगुह्यकाः । हन्यमाना दिशो भेजुरुशद्भिर्ब्रह्मतेजसा ॥३४॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां चतुर्थस्कन्धे सतीदेहोत्सर्गो नाम चतुर्थोऽध्यायः ॥४॥

अथ पञ्चमोऽध्यायः

मैत्रेय उवाच

भवो भवान्या निधनं प्रजापतेरसत्कृताया अवगम्य नारदात् ।
स्वपार्षदसैन्यं च तदध्वरर्भुभिर्विद्रावितं क्रोधमपारमादधे ॥ १ ॥
क्रुद्धः सुदष्टोष्ठपुटः स धूर्जटिर्जटां तडिद्वह्निसटोग्ररोचिषम् ।
उत्कृत्य रुद्रः सहसोत्थितो हसन् गम्भीरनादो विससर्ज तां भुवि ॥ २ ॥

यतः ॥ २७ ॥ तत् देहप्रज्वलनरूपमाश्चर्यं । पश्यताम् । हन्तेति विषादे । दैवतमस्य पूज्यतमस्य । केन दक्षेण । जहाविति लोकप्रतीत्योक्तम् ॥ २८ ॥ यस्य प्रजाः तस्य अस्य दक्षस्य अनात्म्यं दौर्जन्यम् । येन विमताऽवज्ञाता ॥ २९ ॥ दुर्मर्षमतिक्रूरम् । चान्नरकं च । यत् यतः अस्यैवापराधतो मृतये उद्यतां सुतां न प्रत्यषेधत् ॥३०।३१॥ निशाम्य दृष्ट्वा । यज्ञघ्ना यज्ञनाशकाः राक्षसाः तान् हन्तीति तेन यजुषा यजुर्वेदीयमन्त्रेण 'अपहतं रक्षः' इत्यादिना । ह स्फुटम् ॥३२॥ अध्वर्युणा भृगुणा । ये यज्ञे सोममसृतम् प्राप्ताः ते ॥३३॥ उशद्भिर्देदीप्यमानैः । तैः ऋभुभिः । भेजुः पलायितवन्तः ॥ ३४ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे गूढार्थदीपिन्यां चतुर्थोऽध्यायः ।

पञ्चमे नारदात्सत्या मृत्युमाकर्ण्य शङ्करः ।
वीरभद्रं समुत्पाद्य तेन यज्ञमधानयत् ॥ १ ॥

प्रजापतिना । कर्तरि षष्ठी । तस्य दक्षस्याध्वरे ऋभवो देवास्तैः । आदधे कृतवान् ॥ १ ॥

ततोऽतिकायस्तनुवा स्पृशन्दिवं सहस्रबाहुर्घनरुक् त्रिसूर्यदृक् ।
करालदंष्ट्रो ज्वलदग्निमूर्धजः कपालमाली विविधोद्यतायुधः ॥ ३ ॥
तं किं करोमीति गृणन्तमाह बद्धाञ्जलिं भगवान् भूतनाथः ।
दक्षं सयज्ञं जहि मद्भटानां त्वमग्रणी रुद्र भटांशको मे ॥ ४ ॥
आज्ञप्त एवं कुपितेन मन्युना स देवदेवं परिचक्रमे विभुम् ।
मेने तदाऽऽत्मानमसङ्गरंहसा महीयसां तात सहः सहिष्णुम् ॥ ५ ॥
अन्वीयमानः स तु रुद्रपार्षदैर्भृशं नदद्भिर्व्यनदत्सुभैरवम् ।
उद्यम्य शूलं जगदन्तकान्तकं स प्राद्रवद् घोषणभूषणाङ्घ्रिः ॥ ६ ॥
अथर्त्विजो यजमानः सदस्याः ककुभ्युदीच्यां प्रसमीक्ष्य रेणुम् ।
तमः किमेतत्कुत एतद्रजोऽभूदिति द्विजा द्विजपत्न्यश्च दध्युः ॥ ७ ॥
वाता न वान्ति न हि सन्ति दस्यवः प्राचीनबर्हिर्जीवति होग्रदण्डः ।
गावो न काल्यन्त इदं कुतो रजो लोकोऽधुना किं प्रलयाय कल्पते ॥ ८ ॥
प्रसूतिमिश्राः स्त्रिय उद्विग्नचित्ता ऊचुर्विपाको वृजिनस्यैष तस्य ।
यत्पश्यन्तीनां दुहितॄणां प्रजेशः सुतां सतीमवदध्यावनागाम् ॥ ९ ॥
यस्त्वन्तकाले व्युप्तजटाकलापः स्वशूलसूच्यर्पितदिग्गजेन्द्रः ।
वितत्य नृत्यत्युदितास्त्रदोर्ध्वजानुच्चाट्टहासस्तनयित्नुभिन्नदिक् ॥ १० ॥
अमर्षयित्वा तमसह्यतेजसं मन्युप्लुतं दुर्विषहं भ्रुकुट्या ।
करालदंष्ट्राभिरुदस्तभागणं स्यात्स्वस्ति किं कोपयतो विधातुः ॥ ११ ॥
बह्वेवमुद्विग्नदृशोच्यमाने जनेन दक्षस्य मखे महात्मनः ।
उत्पेतुरुत्पाततमाः सहस्रशो भयावहा दिवि भूमौ च पर्यक् ॥ १२ ॥

स धूर्जटिः रुद्रो भयानकः सन् । सटा ज्वालाः ॥२॥ ततो जटातो वीरभद्रोऽभूदिति शेषः । तनुवा उवङ् वैकल्पिकः । घनरुक् कृष्णवर्णः ॥३॥ हे भट युद्धकोविद त्वम् अग्रणीः सन् जहि यतस्त्वं मेंऽशकः ॥४॥ मन्युना श्रीरुद्रेण । असङ्गरंहसाऽप्रतिघातवेगेन वलीयसामपि सहो वलं सहिष्णुं सोढुं क्षममात्मानं मेने ॥ ५ ॥ अन्वीयमानः परिवेष्टितः जगदन्तको मृत्युः । घोषणानि शब्दायमानानि नूपुरादीनि अङ्घ्रौ यस्य ॥ ६ ॥ ककुभि दिशि । सदस्या विधिदर्शिनः । दध्युः चिन्तयामासुः ॥ ७ ॥ दस्यवश्चोराः । ह प्रसिद्धस्तदानीन्तनो राजा । न काल्यन्ते न शीघ्रं चाल्यन्ते ॥ ८ ॥ मिश्रा मुख्याः । तस्य वृजिनस्य अपराधस्य विपाकः फलम् । यत् अनागसं निरपराधां सतीमवदध्यौ अवज्ञातवान् ॥ ९ ॥ यस्त्विति युग्मकम् । यस्तु प्रलये वाहुरूपध्वजान् विस्तार्य नृत्यति तं रुद्रम् असहनयुक्तं कृत्वा पुनश्च तं कोपयतो विधातुरपि किं स्वस्ति कुशलं स्यान्नेत्यन्वयः । व्युप्तः प्रसारितः । सूचिरग्रभागः । उच्चाट्टोऽतिकठोरः हास एव गर्जितं तेन विदीर्णा दिशो येन सः । भगण एव भागणः स्वार्थिकोऽण् ॥ १०।११ ॥ महात्मनोऽतितेजस्विनोऽपि दक्षस्य भयावहा इति योज्यम् । अकारपदच्छेदात् दुरात्मनो वा । पर्यक् सर्वतश्च ॥१२॥

तावत्स रुद्रानुचरैर्मखो महान्नानायुधैर्वामनकैरुदायुधैः ।
पिङ्गैः पिशङ्गैर्मकरोदराननैः पर्याद्रवद्भिर्विदुरान्वरुध्यत ॥१३॥

केचिद्बभञ्जुः प्राग्वंशं पत्नीशालां तथापरे । सद आग्नीध्रशालां च तद्विहारं महानसम् ॥१४॥

रुरुजुर्यज्ञपात्राणि तथैकेऽग्नीननाशयन् । कुण्डेष्वमूत्रयन् केचिद्बिभिदुर्वेदिमेखलाः ॥१५॥

अबाधन्त मुनीनन्य एके पत्नीरतर्जयन् । अपरे जगृहुर्देवान् प्रत्यासन्नान् पलायितान् ॥१६॥

भृगुं बबन्ध मणिमान् वीरभद्रः प्रजापतिम् । चण्डीशः पूषणं देवं भगं नन्दीश्वरोऽग्रहीत् ॥१७॥

सर्व एवर्त्विजो दृष्ट्वा सदस्याः सदिवौकसः । तैरर्द्यमानाः सुभृशं ग्रावभिर्नैकधाऽद्रवन् ॥१८॥

जुह्वतः स्रुवहस्तस्य श्मश्रूणि भगवान् भवः । भृगोर्लुलुञ्चे सदसि योऽहसच्छ्मश्रु दर्शयन्॥१९॥

भगस्य नेत्रे भगवान् पातितस्य रुषा भुवि । उज्जहार सदःस्थोऽक्ष्णा यःशपन्तमसूसुचत् ॥२०॥

पूष्णश्चापातयद्दन्तान् कालिङ्गस्य यथा बलः । शप्यमाने गरिमणि योऽहसद्दर्शयन्दतः ॥२१॥

आक्रम्योरसि दक्षस्य शितधारेण हेतिना । छिन्दन्नपि तदुद्धर्तुं नाशक्नोत् त्र्यम्बकस्तदा ॥२२॥

शस्त्रैरस्त्रान्वितैरेवमनिर्भिन्नत्वचं हरः । विस्मयं परमापन्नो दध्यौ पशुपतिश्चिरम् ॥२३॥

दृष्ट्वा संज्ञपनं योगं पशूनां स पतिर्मखे । यजमानपशोः कस्य कायात्तेनाहरच्छिरः ॥२४॥

साधुवादस्तदा तेषां कर्म तत्तस्य शंसताम् । भूतप्रेतपिशाचानामन्येषां तद्विपर्ययः ॥२५॥

जुहावैतच्छिरस्तस्मिन् दक्षिणाग्नावमर्षितः । तद्देवयजनं दग्ध्वा प्रातिष्ठद् गुह्यकालयम् ॥२६॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां चतुर्थस्कन्धे दक्षयज्ञविध्वंसो नाम पञ्चमोऽध्यायः ॥ ५॥

यावदुत्पेतुः तावदविलम्बमेव स मखः तैरन्वरुध्यत । पिङ्गैः कपिलैः पिशङ्गैः पीतैः ॥ १३ ॥ प्राग्वंशं पूर्वपश्चिमस्तम्भयोरर्पितं काष्ठम् । सदः सभामण्डपम् । आग्नीध्रशालां होमकुण्डस्थलीम् । तद्विहारं यजमानगृहम् ॥ १४ ॥ रुजो भङ्गे इति धातुः । वेद्याः सीमासूत्राणि ॥ १५ ॥ प्रत्यासन्नान् समीपस्थान् पलायितानपि ॥ १६ ॥ मणिमान्नाम । प्रजापतिं दक्षम् ॥ १७ ॥ ग्रावभिः पाषाणैरनेकधा ताड्यमानाः । नैकधा सर्वतो दुद्रुवुरित्यत्रान्वयो वा ॥ १८ ॥ भवो वीरभद्रः वह्निकणवह्नित्यायेन लुलुञ्चे उत्पाटितवान् ॥ १९ ॥ शपन्तं निन्दां कुर्वन्तं प्रेरितवान् ॥ २० ॥ गरिमणि श्रीरुद्रे निन्द्यमाने सति ॥ २१ ॥ हेतिना खड्गेन । तन्मस्तकम् । त्र्यम्बको वीरभद्रः तदा छेदनावसरे ॥ २२ ॥ त्वचं दृष्ट्वेति शेषः ॥ २३ ॥ संज्ञपनं कण्ठनिष्पीडनेन त्रोटनरूपम् । यजमान एव पशुः ॥ २४ ॥ अन्येषां दक्षपक्षीयाणाम् ॥ २५ ॥ गुह्यकालयं कैलासम् ॥ २६ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे गूढार्थदीपिन्यां पञ्चमोऽध्यायः ।

अथ षष्ठोऽध्यायः

मैत्रेय उवाच

अथ देवगणाः सर्वे रुद्रानीकैः पराजिताः । शूलपट्टिशनिस्त्रिंशगदापरिघमुद्गरैः ॥ १ ॥
संछिन्नभिन्नसर्वाङ्गाः सर्त्विक्सभ्या भयाकुलाः । स्वयम्भुवे नमस्कृत्य कात्स्न्र्येनैतन्न्यवेदयन् ॥ २ ॥
उपलभ्य पुरैवैतद्भगवानब्जसम्भवः । नारायणश्च विश्वात्मा न कस्याध्वरमीयतुः ॥ ३ ॥
तदाकर्ण्य विभुः प्राह तेजीयसि कृतागसि । क्षेमाय तत्र सा भूयान्न प्रायेण बुभूषताम् ॥ ४ ॥

अथापि यूयं कृतकिल्विषा भवं ये बर्हिषो भागभाजं परादुः ।
प्रसादयध्वं परिशुद्धचेतसा क्षिप्रप्रसादं प्रगृहीताङ्घ्रिपद्मम् ॥ ५ ॥
आशासाना जीवितमध्वरस्य लोकः सपालः कुपिते न यस्मिन् ।
तमाशु देवं प्रियया विहीनं क्षमापयध्वं हृदि विद्धं दुरुक्तैः ॥ ६ ॥
नाहं न यज्ञो न च यूयमन्ये ये देहभाजो मुनयश्च तत्त्वम् ।
विदुः प्रमाणं बलवीर्ययोर्वा तस्मात्म क उनः पापं विधित्सेत् ॥ ७ ॥
स इत्थमादिश्य सुरानजस्तैः समन्वितः पितृभिः सप्रजेशैः ।
ययौ स्वधिष्ण्यान्निलयं पुरद्विषः कैलासमद्रिप्रवरं प्रियं प्रभोः ॥ ८ ॥

जन्मौषधितपोमन्त्रयोगसिद्धैर्नरेतरैः । जुष्टं किन्नरगन्धर्वैरप्सरोभिर्वृतं सदा ॥ ९ ॥
नानामणिमयैः श्रृङ्गैर्नानाधातुविचित्रितैः । नानाद्रुमलतागुल्मैर्नानामृगगणावृतैः ॥ १० ॥

षष्ठे ब्रह्मा सुरैः सार्द्धं गत्वा कैलासमद्भुतम् ।
दक्षादीन् जीवितुं स्तुत्या महादेवमतोषयत् ॥ १ ॥

अथेति युग्मकम् । शूलादिभिः संच्छिन्नानि त्रुटितानि भिन्नानि विदीर्णानि अङ्गानि येषान्ते सर्वे एतत् शिवविद्वेषफलं यज्ञादिविध्वसनं न्यवेदयन् ॥ १।२ ॥ उपलभ्य ज्ञात्वा । भगवान् विश्वात्मेत्युभयोः विशेषणम् । कस्य दक्षस्य ॥ ३ ॥ विभुः ब्रह्मा । तेजस्विनि पुरुषे कृतापराधेऽपि तत्र बुभूषतां कृतापराधीभवितुमिच्छतां सा वुभूषा अपराधीभवितुमिच्छा क्षेमाय नेत्यन्वयः ॥४॥ यद्यपि यूयं कृतकिल्विषा अथाऽपि तं प्रसादयध्वम् । किं कृत्वा । अङ्घ्रिपद्मं प्रगृह्य । क्त्वार्थे निष्ठा । क्रियाविशेषणं वा । किल्विषत्वे हेतुः । ये भवन्तो यज्ञस्य भागभाजं भवं परादुः वहिश्चक्रुः ॥ ५ ॥ जीवितं पुनः सन्धानमिच्छन्तो यूयं तं क्षमापयध्वम् । यतः यस्मिन् कुपिते लोको न भवेत् नश्येदित्यर्थः ॥६॥ अहं ब्रह्मा तदादयः यस्य तत्त्व स्वरूपं प्रमाणमियत्तां च न विदुः तस्यात्मनः परमात्मनः शिवस्य उअहो कः पापमराधं विधातुमिच्छेत् इति प्राचीनः पाठः । वीर्यं पराक्रमः । यज्ञ इन्द्रः ॥ ७ ॥ स्वधिष्ण्यात् स्वस्थानात् ॥ ८ ॥ कथंभूतं कैलासम् । जन्मादिभिः सिद्धैर्नरेतरैर्देवादिभिर्जुष्टं सेवितम् ॥ ९ ॥ नानेति युग्मकम् । श्रृङ्गं रमणं रतिजनकमित्यन्वयः । नानेत्यादि द्वयं श्रृङ्गविशेषणम् । नानाद्रुमेत्यस्य नानामृगेति विशेषणम् । नानामलेत्यादि द्वयं तु पृथक् पृथगेव । गुल्मः झाड़ी इति । प्रस्रवणं निर्भरः। सानवः पर्वतोर्ध्वंसमभूमिभागाः

नानामलप्रस्रवणैर्नानाकन्दरसानुभिः । रमणं विहरन्तीनां रमणैः सिद्धयोषिताम् ॥११॥
मयूरकेकाभिरुतं मदान्धालिविमूर्छितम् । प्लावितै रक्तकण्ठानां कूजितैश्च पतत्त्रिणाम् ।
आह्वयन्तमिवोद्धस्तैर्द्विजान् कामदुघैर्द्रुमैः ।१२। व्रजन्तमिव मातङ्गैर्गृणन्तमिव निर्झरैः ॥१३॥
मन्दारैः पारिजातैश्च सरलैश्चोपशोभितम् । तमालैः शालतालैश्च कोविदारासनार्जुनैः ॥१४॥
चूतैः कदम्बैर्नीपैश्च नागपुन्नागचम्पकैः । पाटलाशोकबकुलैः कुन्दैः कुरबकैरपि ॥१५॥
स्वर्णार्णशतपत्रैश्च वररेणुकजातिभिः । कुब्जकैर्मल्लिकाभिश्च माधवीभिश्च मण्डितम् ॥१६॥
पनसोदुम्बराश्वत्थप्लक्षन्यग्रोधहिङ्गुभिः । भूर्जैरोषधिभिः पूगै राजपूगैश्च जम्बुभिः ॥१७॥
खर्जूराम्रातकाम्राद्यैः प्रियालमधुकेङ्गुदैः । द्रुमजातिभिरन्यैश्च राजितं वेणुकीचकैः ॥१८॥
कुमुदोत्पलकह्लारशतपत्रवनर्द्धिभिः । नलिनीषु कलं कूजत्खगवृन्दोपशोभितम् ॥१९॥
मृगैः शाखामृगैः क्रोडैर्मृगेन्द्रैर्ऋक्षशल्यकैः । गवयैः शरभैर्व्याघ्रै रुरुभिर्महिषादिभिः ॥२०॥
कर्णान्त्रैकपदाश्वास्यैर्निर्जुष्टं वृकनाभिभिः । कदलीषण्डसंरुद्धनलिनीपुलिनश्रियम् ।
पर्यस्तं नन्दया सत्याः स्नानपुण्यतरोदया ।२१। विलोक्य भूतेशगिरिं विबुधा विस्मयं ययुः ।२२।
ददृशुस्तत्र ते रम्यामलकां नाम वै पुरीम् । वनं सौगन्धिकं चापि यत्र तन्नाम पङ्कजम् ॥२३॥
नन्दा चालकनन्दा च सरितौ बाह्यतः पुरः । तीर्थपादपदाम्भोजरजसातीव पावने ॥२४॥
ययोः सुरस्त्रियः क्षत्तरवरुह्य स्वधिष्ण्यतः । क्रीडन्ति पुंसः सिञ्चन्त्यो विगाह्य रतिकर्शिताः ।२५

रमणैः पतिभिः सह ॥ १०।११ ॥ मयूरेनिसार्द्धम् । अभितो रुतं सर्वतो नादितम् । विमूर्च्छितं विविधं गीतम् रक्तकण्ठानां कोकिलानाम् । द्विजान् पक्षिणः ॥ १२ ॥ व्रजन्तमित्यर्द्धम् । गृणन्तं भाषमाणमिव ॥ १३ ॥ सरलैर्देवदारुभिः । कोविदारः कचनारेति ख्यातः । असनो विजयसारः । अर्जुनः कौपीतक इति ख्यातः ॥ १४ ॥ नीपो धूलिकदम्बः । नागो नागकेसरः । पुन्नागो देववल्लभः । पाटलनामा । वकुलः मौलसिरी इति । कुरवकः तालमखाना इति ॥१५॥ स्वर्णार्णैः स्वर्णवर्णैः । वरा श्रेष्ठा रेणुका एला । जातिमलिती चमेली कुब्जकः कुंकुमवृक्षः । मल्लिका वेला इति । माधवी वासन्ती लता ॥ १६ ॥ क्रमेण कटहर, गूलर, पिप्पल पाकड़ वट हींगवृक्षाः । भूर्जैः भोजपत्रैः । पूगः सुपारी इति ॥ १७ ॥ आम्रातकः अम्वाडा इति प्रियालः चिरौंजी इति । महुआ, इङ्गुआ, इति । वेणुः नीरन्ध्रः । कीचकः सरन्ध्रः । अन्यैरन्याभिः ॥ १९ ॥ समृद्धिभिर्हेतुभिर्नलिनीषु सरःसु कलं मधुरं यथा स्यात्तथा ॥ १९ ॥ क्रोडैर्वराहैः शल्यकैः कण्टकवराहैः । गवया वनगावः । शरभोऽष्टापदो व्याघ्रहन्ता । रुरुर्हरिणेषु महान् ॥ २० ॥ कर्णयोरन्त्राणि येषाम् एकपदा अश्वमुखाश्चेति रुद्रगणभेदा एव तत्सहचारित्वान्मध्ये निर्दिष्टाः वस्तुतः । कर्णोर्णैः गोकर्णाख्यैः ऊर्णामृगैः अन्यैरपि तद्वद्देश्च । मनुष्याकारा मृगा वा । वृकनाभिः कस्तूरीमृगः । षण्डैः समूहैः नन्दया गङ्गया परिवेष्टितम् । पुण्यतरमति सुसन्धमुदकं यस्यास्तया । पुण्यं धर्मे सुगन्धे च इति कोशः ॥२१।२२॥ तत्रकैं लासे ॥२३॥ पुरात् वाह्यतः स्तः । तीर्थपादः श्रीविष्णुः ॥ २४ ॥ ययोर्विगाह्य प्रविश्य पुंसः पतीन् । धिष्ण्यतः विमानेभ्यः ॥ २५ ॥

ययोस्तत्स्नानविभ्रष्टनवकुङ्कुमपिञ्जरम् । वितृषोऽपि पिबन्त्यम्भः पाययन्तो गजा गजीः २६
तारहेममहारत्नविमानशतसंकुलाम् । जुष्टां पुण्यजनस्त्रीभिर्यथा खं सतडिद्घनम् ॥२७॥
हित्वा यक्षेश्वरपुरीं वनं सौगन्धिकं च तत् । द्रुमैः कामदुघैर्हृद्यं चित्रमाल्यफलच्छदैः ॥२८॥
रक्तकण्ठखगानीकस्वरमण्डितषट्पदम् । कलहंसकुलप्रेष्ठखरदण्डजलाशयम् ॥२९॥
वनकुञ्जरसंघृष्टहरिचन्दनवायुना । अधि पुण्यजनस्त्रीणां मुहुरुन्मथयन् मन. ॥३०॥
वैदूर्यकृतसोपाना वाप्य उत्पलमालिनीः । प्राप्तः किम्पुरुषैर्दृष्ट्वा त आराद्ददृशुर्वटम् ॥३१॥
स योजनशतोत्सेधः पादोनविटपायतः । पर्यक्कृताचलच्छायो निर्नीडस्तापवर्जितः ॥३२॥
तस्मिन् महायोगमये मुमुक्षुशरणे सुराः । ददृशुः शिवमासीनं त्यक्तामर्षमिवान्तकम् ॥३३॥
सनन्दनाद्यैः महासिद्धैः शान्तैः संशान्तविग्रहम् । उपास्यमानं सख्या च भर्त्रा गुह्यकरक्षसाम् ॥३४॥
विद्यातपोयोगपथमास्थितं तमधीश्वरम् । चरन्तं विश्वसुहृदं वात्सल्याल्लोकमङ्गलम् ॥३५॥
लिङ्गं च तापसाभीष्टं भस्मदण्डजटाजिनम् । अङ्गेन सन्ध्याभ्ररुचा चन्द्रलेखां च बिभ्रतम् ॥३६॥
उपविष्टं दर्भमय्यां बृस्यां ब्रह्म सनातनम् । नारदाय प्रवोचन्तं पृच्छते शृण्वतां सताम् ॥३७॥
कृत्वोरौ दक्षिणे सव्यं पादपद्मं च जानुनि । बाहुं प्रकोष्ठेऽक्षमालामासीनं तर्कमुद्रया ॥३८॥

तं ब्रह्मनिर्वाणसमाधिमाश्रितं व्युपाश्रितं गिरिशं योगकक्षाम् ।
सलोकपाला मुनयो मनूनामाद्यं मनुं प्राञ्जलयः प्रणेमुः ॥३९॥

स तूपलभ्यागतमात्मयोनिं सुरासुरेशैरभिवन्दिताङ्घ्रिः ।
उत्थाय चक्रे शिरसाभिवन्दनमर्हत्तमः कस्य यथैव विष्णुः ॥४०॥

ययोरम्भः गजीः पाययन्तः स्वयं पिबन्ति । पिञ्जरं पीतवर्णम् ॥ २६ ॥ तारेति पञ्चकम् । यथा शोभते तथा शोभितां पुरीं वनं चातिक्रम्य ते देवा आरात् दूरात् वटं ददृशुरित्यन्वयः । कीदृशीं पुरीम् । तारं रजतं तदादिमयविमानानां शतैः व्याप्ताम् । पुण्यजना यक्षाः । कथंभूतं वनम् । नानाविधपुष्पफलपत्रयुक्तैर्वृक्षैर्हृद्यं मनोहरम् । पुनः । षट्पदाः षट् पदस्वरा यस्मिन् । खरदण्डैः कमलैर्युक्ता यस्मिन् । पुनः । मुहुः अधि अधिकम् उन्मथयत् क्षुभितं कुर्वत् किञ्च यत्र उत्पल मालिन्यो वाप्यः सन्ति तद्वनं किं पुरुषैः प्राप्तं सेवितं दृष्ट्वेत्यन्वयः ॥२७।२८।२९।३०।३१॥ स वटः उत्सेधः औन्नत्यम् । पादोनैः सर्वतः पञ्चसप्ततियोजनप्रमाणैर्विटपैः शा खाभिर्विस्तृतः ॥ ३२ ॥ तस्मिन्निति षट्कम् । तस्मिन् वटमूले । महायोगमये समाधिप्राचुर्यस्थाने ॥ ३३ ॥ सनन्दः सनन्दनः । सिद्धैः सख्या कुवेरेण च ॥ ३४ ॥ आश्रितं प्रवर्तनं द्वारा । मङ्गलहेतुभूतं तप आचरन्तम् ॥ ३५ ॥ अङ्गेन भस्मादि तपस्विचिह्नं चन्द्रकलां च ॥ ३६ ॥ वृस्यां यतियोग्यासने । यतीनामासनं वृसी इति हलः । ब्रह्म श्रीकृष्णतत्त्वम् ॥ ३७ ॥ सव्यं वामम् । जानुनि च सव्यं वाहुं करम् । प्रकोष्ठे मणिवन्धस्थाने मालां च कृत्वा ज्ञानमुद्रया ॥ ३८ ॥ ब्रह्मणि श्रीकृष्णे योऽखण्डसमाधिः तम् कक्षां पट्टिकां च । मनवो मननशीलाः ॥३९॥ स इति । अर्हत्तमः पूज्यतयोऽपि विष्णुर्वामनो यथा कस्य कश्यपस्य एवमेव स शिवश्चक्रे तथाऽपरेऽपि चक्रुः ये महर्षिभिः

तथापरे सिद्धगणा महर्षिभिर्ये वै समन्तादनु नीललोहितम् ।
नमस्कृतः प्राह शशाङ्कशेखरं कृतप्रणामं प्रहसन्निवात्मभूः ॥४१॥

ब्रह्मोवाच

जाने त्वामीशं विश्वस्य जगतो योनिबीजयोः । शक्तेः शिवस्य च परं यत्तद् ब्रह्म निरन्तरम् ॥४२॥
त्वमेव भगवन्नेतच्छिवशक्त्योः सरूपयोः । विश्वं सृजसि पास्यत्सि क्रीडन्नूर्णपटो यथा ॥४३॥

त्वमेव धर्मार्थदुघाभिपत्तये दक्षेण सूत्रेण ससर्जिथाध्वरम् ।
त्वयैव लोकेऽवसिताश्च सेतवो यान् ब्राह्मणाः श्रद्दधते धृतव्रताः ॥४४॥
त्वं कर्मणां मङ्गल मङ्गलानां कर्तुः स्म लोकं तनुषे स्वः परं वा ।
अमङ्गलानां च तमिस्रमुल्बणं विपर्ययः केन तदेव कस्यचित् ॥४५॥
न वै सतां त्वच्चरणार्पितात्मनां भूतेषु सर्वेष्वभिपश्यतां तव ।
भूतानि चात्मन्यपृथग्दिदृक्षतां प्रायेण रोषोऽभिभवेद्यथा पशुम् ॥४६॥
पृथग्धियः कर्मदृशो दुराशयाः परोदयेनार्पितहृद्रुजोऽनिशम् ।
परान् दुरुक्तैर्वितुदन्त्यरुन्तुदास्तान् मा वधीद्दैववधान् भवद्विधः ॥४७॥
यस्मिन् यदा पुष्करनाभमायया दुरन्तया स्पृष्टधियः पृथग्दृशः ।
कुर्वन्ति तत्र ह्यनुकम्पया कृपां न साधवो दैवबलात्कृते क्रमम् ॥४८॥
भवांस्तु पुंसः परमस्य मायया दुरन्तयाऽस्पृष्टमतिः समस्तदृक् ।
तया हतात्मस्वनुकर्मचेतःस्वनुग्रहं कर्तुमिहार्हसि प्रभो ॥४९॥
कुर्वध्वरस्योद्धरणं हतस्य भोस्त्वयाऽसमाप्तस्य मनो प्रजापतेः ।
न यत्र भागं तव भागिनो ददुः कुयाजिनो येन मखो निनीयते ॥५०॥

सहिताः शिवमनुवर्तन्ते तेऽपि ॥ ४० ॥ एवं सर्वैर्नमस्कृतो ब्रह्मा । कृतः प्रणामो यस्मै ॥ ४१ ॥ विश्वस्य सर्वस्य परम् ईशं परं कारणं सदाशिवरूपं जाने । यच्च निर्भेदं ब्रह्म कारणत्वेन मन्यन्ते तदपि त्वामेवेत्यन्वयः ॥ ४२ ॥ सरूपयोरविभक्तयोः । तृतीयार्थे षष्ठी । ताभ्यां क्रीडन्नित्यर्थः ॥ ४३ ॥ हे धर्मार्थदुघ ! अभिपत्तये एतस्यैव प्रवर्तनाय दक्षरूपसूत्रेण अध्वररूपं वस्त्रं तन्तुवाय इव त्वम् । सेतवो धर्ममर्यादा अवसितां निर्धारिताः । श्रद्दधतेऽनुतिष्ठन्ति ॥४४॥ हे मङ्गलमूर्ते । पुण्यकर्मणां कर्तुः स्वः स्वर्गं परं मोक्षं वा ददासि । अन्येषां च तमिस्रं नरकम् । तदा तस्मिन्नेव कर्मणि कस्यचित् केनेव द्वेषादिहेतुनैव फलविपर्ययो भवति । दक्षस्य पुण्यकर्तुरपि तमिस्रम् अजामिलस्य पापकर्तुरपि अपवर्गः ।४५। नान्यथेति प्रत्यक्षम् ॥ ४५ ॥ तव त्वामभिपश्यतः अपृग्भावेन दिदृक्षतश्च सतो भवादृशान् रोषो न यथा पशुमज्ञम् ॥ ४६ ॥ अरुन्तुदा मर्मभेत्तारः । भवद्विधोऽपि मा हन्यात् किमुत भवान् ॥ ४७ ॥ यस्मिन् देशे यदा काले । पृथग्दृशो भवन्ति । तत्र तेषु । अनुकम्पया कृपालुत्वस्वभावेन कृपामेव कुर्वन्ति न पराक्रमम् । यतो दैववलादेव तैरपराधे कृते न तेषां दोष इत्यर्थः ॥ ४८ ॥ हतात्मसु नष्टबुद्धिषु कर्मानुगतचित्तेषु तेषु इह अपराधे ।४९। भागिनोऽपि तव यत्र न ददुः तेनैवापराधेन त्वया हतस्य । येने त्वयैव

जीवताद्यजमानोऽयं प्रपद्येताक्षिणी भगः । भृगोः श्मश्रूणि रोहन्तु पूष्णो दन्ताश्च पूर्ववत् ॥५१॥
देवानां भग्नगात्राणामृत्विजां चायुधाश्मभिः । भवतानुगृहीतानामाशु मन्योऽस्त्वनातुरम् ॥५२॥
एष ते रुद्र भागोऽस्तु यदुच्छिष्टोऽध्वरस्य वै । यज्ञस्ते रुद्र भागेन कल्पतामद्य यज्ञहन् ॥५३॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां चतुर्थस्कन्धे रुद्रसान्त्वनं नाम षष्ठोऽध्यायः ॥६॥

अथ सप्तमोऽध्यायः

मैत्रेय उवाच

इत्यजेनानुनीतेन भवेन परितुष्यता । अभ्यधायि महाबाहो प्रहस्य श्रूयतामिति ॥ १ ॥

श्रीमहादेव उवाच

नाघं प्रजेश बालानां वर्णये नानुचिन्तये । देवमायाभिभूतानां दण्डस्तत्र धृतो मया ॥ २ ॥
प्रजापतेर्दग्धशीर्ष्णो भवत्वजमुखं शिरः । मित्रस्य चक्षुषेक्षेत भागं स्वं बर्हिषो भगः ॥ ३ ॥
पूषा तु यजमानस्य दद्भिर्जक्षतु पिष्टभुक् । देवाः प्रकृतसर्वाङ्गा ये म उच्छेषणं ददुः ॥ ४ ॥
बाहुभ्यामश्विनोः पूष्णो हस्ताभ्यां कृतबाहवः । भवन्त्वध्वर्यवश्चान्ये बस्तश्मश्रुर्भृगुर्भवेत् ॥५ ॥

मैत्रेय उवाच

तदा सर्वाणि भूतानि श्रुत्वा मीढुष्टमोदितम् । परितुष्टात्मभिस्तात साधु साध्वित्यथाब्रुवन् ॥६॥
ततो मीढ्वांसमामन्त्र्य सुनासीराः सहर्षिभिः । भूयस्तद्देवयजनं समीढ्वद्वेधसो ययुः ॥ ७ ॥

मखो निनीयते सफलीक्रियते । तस्य तव भागिनोऽपि यत्र न ददुस्तस्याध्व रस्येत्यन्वयः । भो मनो ! ॥ ५० ॥ पूर्ववत् भवन्तु ॥ ५१ ॥ हे मन्यो ! अनातुरम् आरोग्यम् ॥ ५२ ॥ यत् उच्छिष्टस्तेन भागेन यज्ञः कल्पतां पूर्णो भवतु । अत्र उत्कृष्टं शिष्टम् उच्छिष्टमिति निरुक्तेः उत्कृष्टः स्विष्टःकृद्भागः न तु भुक्तावशिष्ट इत्यर्थः । 'रुद्रस्य भागं यज्ञे च विशिष्टं ते त्वकल्पयन्' इति महाभारतात् । अतो यागार्थानी तच्छुद्धावशिष्टानुपहतद्रव्यमेव रुद्रभागस्तेन विना यज्ञपूर्तिर्निस्पादतः स एव दत्त इति संक्षेपः ॥५३॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे गूढार्थदीपिन्यां षष्ठोऽध्यायः ।

सप्तमेऽनुग्रहाच्छम्भोः साङ्गोपाङ्गसुराकृतिः ।
विष्णुस्तुतिः कृता देवैर्यज्ञपूर्तिश्च वर्ण्यते ॥ १ ॥

अनुनीतः प्रार्थितो यो भवस्तेन प्रहस्य इति वक्ष्यमाणं यत् कथितं तच्छ्रूयतामित्यन्वयः ॥ १ ॥ बालानामज्ञानाम् । अघमपराधम् । तत्र अपराधे दण्डः हितार्थं शिक्षा ॥ २ ॥ बर्हिषो यज्ञस्य ॥ ३ ॥ दद्भिर्दन्तैः । केवलश्चेत् पिष्टभुक् भवतु । ये मे मह्यं उच्छेषणम् उत्कृष्टभागं ददुस्ते तथा भवन्तु । प्रकर्षेण कृतानि लग्नानि ॥ ४ ॥ हस्ताभ्यां कृतहस्ताश्च भवन्तु । वस्तस्य छागस्येव ॥ ५ ॥ अतिशयेन मीढ्वानिति मीढुष्टमः कामवर्षी शिवस्तेन । आत्मभिश्चित्तैः । इत्यथ इतिमङ्गलशब्दम् ॥ ६ ॥ आमन्त्र्य प्रार्थ्य सुनासीरा देवा मीढुषा शिवेन ब्रह्मणा च सहिता ययुः । सुष्ठु नासीरं सेनामुखं येषान्ते ॥ ७ ॥

विधाय कार्त्स्न्येन च तद्यदाह भगवान् भवः । संदधुः कस्य कायेन सवनीयपशोः शिरः ॥ ८ ॥
संधीयमाने शिरसि दक्षो रुद्राभिवीक्षितः । सद्यः सुप्त इवोत्तस्थौ ददृशे चाग्रतो मृडम् ॥ ९ ॥
तदा वृषध्वजद्वेषकलिलात्मा प्रजापतिः । शिवावलोकादभवच्छरद्ध्रद इवामलः ॥ १० ॥
भवस्तवाय कृतधीर्नाशक्नोदनुरागतः । औत्कण्ठ्याद्वाष्पकलया सम्परेतां सुतां स्मरन् ॥ ११ ॥
कृच्छ्रात्संस्तभ्य च मनः प्रेमविह्वलितः सुधीः । शशंस निर्व्यलीकेन भावेनेशं प्रजापतिः ॥ १२ ॥

दक्ष उवाच

भूयाननुग्रह अहो भवता कृतो मे दण्डस्त्वया मयि धृतो यदपि प्रलब्धः ।
न ब्रह्मबन्धुषु च वां भगवन्नवज्ञा तुभ्यं हरेश्च कुत एव धृतव्रतेषु ॥ १३ ॥
विद्यातपोव्रतधरान् मुखतः स्म विप्रान् ब्रह्मात्मतत्त्वमवितुं प्रथमं त्वमस्राक् ।
तद् ब्राह्मणान् परम सर्वविपत्सु पासि पालः पशूनिव विभो प्रगृहीतदण्डः ॥ १४ ॥
योऽसौ मयाऽविदिततत्त्वदृशा सभायां क्षिप्तो दुरुक्तिविशिखैरगणय्य तन्माम् ।
अर्वाक् पतन्तमर्हत्तमनिन्दयाऽपाद् दृष्ट्याऽऽर्द्रया स भगवान् स्वकृतेन तुष्येत् ॥ १५ ॥

मैत्रेय उवाच

क्षमाप्यैवं स मीढ्वांसं ब्रह्मणा चानुमन्त्रितः । कर्म संतानयामास सोपाध्यायर्त्विगादिभिः ॥ १६ ॥
वैष्णवं यज्ञसंतत्यै त्रिकपालं द्विजोत्तमाः । पुरोडाशं निरवपन् वीरसंसर्गशुद्धये ॥ १७ ॥
अध्वर्युणाऽऽत्तहविषा यजमानो विशाम्पते । धिया विशुद्धया दध्यौ तथा प्रादुरभूद्धरिः ॥ १८ ॥
तदा स्वप्रभया तेषां द्योतयन्त्या दिशो दश । मुष्णंस्तेज उपानीतस्तार्क्ष्येण स्तोत्रवाजिना ॥ १९ ॥

श्यामो हिरण्यरशनोऽर्ककिरीटजुष्टो नीलालकभ्रमरमण्डितकुण्डलास्यः ।
कम्ब्वब्जचक्रशरचापगदासिचर्मव्यग्रैर्हिरण्मयभुजैरिव कर्णिकारः ॥ २० ॥

सन्दधुः योजितवन्तः । कस्य दक्षस्य यज्ञीयच्छागस्य ॥ ८।९ ॥ कलिलात्मा मलिनचित्तोऽपि ॥ १० ॥ अनुरागतः स्मरन् औत्कण्ठ्यादुत्पन्नयाऽश्रुधारया रुद्धकण्ठत्वान्नाशक्नोदित्यन्वयः । सम्परेतां मृताम् ॥ ११ ॥ संस्तभ्य निरुद्ध्य । भावेन निष्कपटप्रेम्णा तुष्टाव ॥ १२ ॥ यद्यपि प्रलब्ध तिरस्कृतोऽस्यापि दण्डो धृतः शिक्षा कृता न तूपेक्षितः । युक्तं चैतत् यतः ब्राह्मणाभासेष्वपि तुभ्यं तव हरेश्च वां युवयोरवज्ञा उपेक्षा नास्ति ॥ १३ ॥ त्वमेव ब्रह्मा भूत्वा स्म तिरोहितमात्मतत्त्वमवितुं विप्रान् अस्राक्षीः तत् तस्मात् तान् पासीत्यन्वयः । यद्वा । ब्रह्म वेदमात्मतत्त्वं च । स्म अतीते ॥ १४ ॥ योऽसौ क्षिप्तोऽपि तत् तिरस्करणम् अगणय्य विस्मृत्य मां कृपादृष्ट्याऽपात् स भगवान् स्वकृतेनैवोपकारेण तुष्येत् नाहं प्रत्युपकर्तुं क्षमः । कथंभूतं माम् । पूज्यतमस्य तव निन्दया अर्वाक् अधः पतन्तम् ॥ १५ ॥ मीढ्वांसं वरसेक्तारम् । अनुमन्त्रितोऽनुज्ञातः । प्रवर्तयामास ॥ १६ ॥ त्रिषु कपालेषु संस्कृतं विष्णुदेवताकं पुरोडाशं तण्डुलपिष्टनिर्मितकूर्माकारं वलिं निरवपन् समन्त्रं ददुः । वीरभद्रोपद्रवनिवृत्तये ॥ १७ ॥ अध्वर्युणा सह दक्षो यथा दध्यौ तथैवेत्यन्वयः ॥ १८ ॥ तदेति त्रिकम् । तेषां तेजस्तिरस्कुर्वन् गरुडेन समीपं प्रापितः । वेदोपनिषत्पक्षवता ॥ १९ ॥ कथंभूतः । हिरण्यवत् रशना वस्त्रं यस्य । कम्बुः शंखस्तदादिभि-

वक्षस्यधिश्रितवधूर्वनमाल्युदारहासावलोककलया रमयंश्च विश्वम् ।
पार्श्वभ्रमद्व्यजनचामरराजहंसः श्वेतातपत्रशशिनोपरि रज्यमानः ॥२१॥

तमुपागतमालक्ष्य सर्वे सुरगणादयः । प्रणेमुः सहसोत्थाय ब्रह्मेन्द्रत्र्यक्षनायकाः ॥२२॥
तत्तेजसा हतरुचः सन्नजिह्वाः ससाध्वसाः । मूर्ध्ना धृताञ्जलिपुटा उपतस्थुरधोक्षजम् ॥२३॥
अप्यर्वाग्वृत्तयो यस्य महि त्वात्मभुवादयः । यथामति गृणन्ति स्म कृतानुग्रहविग्रहम् ॥२४॥

दक्षो गृहीत्वार्हणसादनोत्तमं यज्ञेश्वरं विश्वसृजां परं गुरुम् ।
सुनन्दनन्दाद्यनुगैर्वृतं मुदा गृणन् प्रपेदे प्रयतः कृताञ्जलिः ॥२५॥

दक्ष उवाच

शुद्धं स्वधाम्न्युपरताखिलबुद्ध्यवस्थं चिन्मात्रमेकमभयं प्रतिषिध्य मायाम् ।
तिष्ठंस्तयैव पुरुषत्वमुपेत्य तस्यामास्ते भवानपरिशुद्ध इवात्मतन्त्रः ॥२६॥

ऋत्विज ऊचुः

तत्त्वं न ते वयमनञ्जन रुद्रशापात्कर्मण्यवग्रहधियो भगवन् विदामः ।
धर्मोपलक्षणमिदं त्रिवृदध्वराख्यं ज्ञातं यदर्थमधिदैवमदोव्यवस्थाः ॥२७॥

सदस्या ऊचुः

उत्पत्त्यध्वन्यशरण उरुक्लेशदुर्गेऽन्तकोग्रव्यालान्विष्टे विषयमृगतृष्ण्यात्मगेहोरुभारः ।
द्वन्द्वश्वभ्रे खलमृगभये शोकदावेऽज्ञसार्थः पादौकस्ते शरणद कदा याति कामोपसृष्टः ॥२८॥

भृत्यरक्षार्थं व्यग्रैरष्टभुजैः कर्णिकारः अष्टदलकमलराज इव रज्यमानः शोभमान इत्युपमोपमेययोः सङ्गतिः । 'कर्णिकारो द्रुमोत्पले' इति मेदिनीकोषात् । चर्म ढाल इति ॥ २० ॥ वधूर्लक्ष्मीः । व्यजनचामररूपौ । उपरि स्थितेन ॥२१।२२॥ सन्नजिह्वाः सगद्गदवाचः । ससाध्वसाः ससंभ्रमाः मूर्ध्ना मूर्ध्नि । उपतस्थुः तुष्टुवुः ॥ २३ ॥ यस्य महि तु महिमानं प्रति तु अधोवृत्तयो ब्रह्मादयोऽपि साश्चर्यं स्तुवन्ति तं ते उपतस्थुरिति योजना ॥ २४ ॥ उत्तमं पूजापात्रं गृहीत्वा तं गृणन् स्तुवन् प्रपेदे शरणं जगाम ॥२५॥ शुद्धं चिन्मात्रं चैतन्यघनो भवानेव मायां प्रतिषिध्य स्वधाम्नि स्वस्वरूपे तिष्ठन् तयैव मायया पुरुषत्वं मनुष्यनाट्यमुपेत्य तस्यां मायायां रामकृष्णाद्यवतारेषु अपरिशुद्ध इव रागादिमानिव आस्ते अतस्तव तत्त्वस्य दुर्ज्ञेयत्वात् त्वत्स्वरूपे श्रीशिवे कृतभेदबुद्धिरूपं पापं नाशयेत्यर्थः । बुद्ध्यवस्था जागरणादयः ॥ २६ ॥ हे अनञ्जन उपाधिरहित ! न विद्मः किन्तु धर्मज्ञापकं त्रयीप्रतिपाद्यमिदमेव तव रूपमस्माभिः ज्ञातम् । यदर्थं यस्य सिद्धये देवाधिकरणे पूर्वमीमांसायाम् अत्रेय मेव देवता नान्येत्यमूर्व्यवस्थाः सञ्जाताः । अवग्रहा आग्रहवती ॥ २७ ॥ हे शरणद ! आश्रयप्रद ! उत्पत्त्यध्वनि संसारमार्गे वर्तमानोऽयम् अज्ञसार्थः जीवसमूहः ते पादरूपम् ओको निवासस्थानं कदा याति यास्यति नैव प्राप्स्यतीत्यर्थः । कुतः । कामेन पीडतः । तत्कुतः । आत्मा देहः गेहश्च उरुर्भारः भरणीयो यस्य । कथंभूते मार्गे । अस्य सप्त विशेषणानि । अशरणे विश्रामशून्ये । उरवः पञ्च क्लेशा एव दुर्गाणि दुर्गमस्थानानि । तेन अन्विष्टे

रुद्र उवाच

तव वरद वराङ्घ्रावाशिषेहाखिलार्थे ह्यपि मुनिभिरसक्तैरादरेणार्हणीये।
यदि रचितधियं माऽविद्यलोकोऽपविद्धं जपति न गणये तत्त्वत्परानुग्रहेण ॥२९॥

भृगुरुवाच

यन्मायया गहनयाऽपहृतात्मबोधा ब्रह्मादयस्तनुभृतस्तमसि स्वपन्तः।
नात्मन् श्रितं तव विदन्त्यधुनापि तत्त्वं सोऽयं प्रसीदतु भवान् प्रणतात्मबन्धुः ॥३०॥

ब्रह्मोवाच

नैतत्स्वरूपं भवतोऽसौ पदार्थभेदग्रहैः पुरुषो यावदीक्षेत्।
ज्ञानस्य चार्थस्य गुणस्य चाश्रयो मायामयाद् व्यतिरिक्तो यतस्त्वम् ॥३१॥

इन्द्र उवाच

इदमप्यच्युत विश्वभावनं वपुरानन्दकरं मनोदृशाम्।
सुरविद्विट्क्षपणैरुदायुधैर्भुजदण्डैरुपपन्नमष्टभिः ॥३२॥

पत्न्य ऊचुः

यज्ञोऽयं तव यजनाय केन सृष्टो विध्वस्तः पशुपतिनाऽद्य दक्षकोपात्।
तं नस्त्वं शवशयनाभशान्तमेधं यज्ञात्मन्नलिनरुचा दृशा पुनीहि ॥३३॥

ऋषय ऊचुः

अनन्वितं ते भगवन् विचेष्टितं यदात्मनाऽऽचरसि हि कर्म नाज्यसे।
विभूतये यत उपसेदुरीश्वरीं न मन्यते स्वयमनुवर्ततीं भवान् ॥३४॥

लक्ष्वीकृते। विषयरूपा मृगतृट् मृगतृष्णिका यत्र। श्वभ्राणि गर्ता यत्र! मृगा व्याघ्रादयः। दावो वनाग्निः। मन्दाक्रान्तावृत्तम् ॥ २८ ॥ हे वरद ! तव वराङ्घ्रौ रचितधियं न्यस्तचित्तमपि मां विद्याहीनो जनो दक्षादिः यदि अपविद्धमाचारभ्रष्टं जल्पति तर्हि तज्जल्पनमहं न गणये। कथंभूते। आशिषा कामेन असक्तैर्निष्कामैरर्हणीये। मालिनीवृत्तम् ॥ २९ ॥ तमसि स्वपन्तः अविद्याग्रस्ता एव आत्मसु जीवेषु प्रेरकत्वेनाश्रितं स्थितम् तव तत्त्वं न विदन्ति सोऽयं भवान् प्रणतजीवानां भक्तानाम् ।३०। पदार्थभेदग्रहैर्विषयग्राहकैरिन्द्रियैर्यावत् भवतः स्वरूपं नेक्षेत् तावदेव गुणत्रतस्य आश्रयो मायामयेः प्रपञ्चोऽस्ति दुःखद इति शेषः। दृष्टे च न। यतस्तस्मात्त्वं व्यतिरक्तः सुखस्वरूपः। ज्ञानस्य सत्त्वस्य। अर्थस्य तमसः। गुणस्य रजोगुणस्य। उपजातिच्छन्दोभङ्गः ॥ ३१ ॥ इनमेव तव वपुः उपपन्नं भक्तै रधिकं मतम्। भावनं पालकम्। सुरविद्विषो दैत्याः। वैतालीयं छन्दः ॥ ३२ ॥ तब यजनाय त्वां यष्टुं केन ब्रह्मणा दक्षेण वा सृष्टः तं यज्ञं नोऽस्मांश्च त्वं पुनीहि। शान्तमेधं निवृत्तोत्सवम्। शवमुदकं तत्र शेते इति शवशयः कमलं नाभौ यस्य। श्मशानवत् आभा यस्येत्येकंपदं वा। 'शवः स्यात्कुणये पुमान्। नपुंसकं तु पानीये' इति मेदिनी। प्रहर्षिणीवृत्तम् ॥३३॥ अनन्वितम् अघटमानं दुर्ज्ञेयमित्यर्थः। आत्मना स्वयम् आचरसि नाज्यसे न लिप्यसे। यतो याम् अन्ये भेजुः तां नादियते तथा यथा भक्तानित्यर्थः। रुचिरावृत्तम्।

सिद्धा ऊचुः

अयं त्वत्कथामृष्टपीयूषनद्यां मनोवारणः क्लेशदावाग्निदग्धः ।
तृषार्तोऽवगाढो न सस्मार दावं न निष्क्रामति ब्रह्मसम्पन्नवन्नः ॥३५॥

यजमान्युवाच

स्वागतं ते प्रसीदेश तुभ्यं नमः श्रीनिवास श्रिया कान्तया त्राहि नः ।
त्वामृतेऽधीश नाङ्गैर्मखः शोभते शीर्षहीनः कबन्धो यथा पूरुषः ॥३६॥

लोकपाला ऊचुः

दृष्टः किं नो दृग्भिरसद्ग्रहैस्त्वं प्रत्यग्द्रष्टा दृश्यते येन दृश्यम् ।
माया ह्येषा भवदीया हि भूमन् यस्त्वं षष्ठः पञ्चभिर्भासि भूतैः ॥३७॥

योगेश्वरा ऊचुः

प्रेयान्न तेऽन्योऽस्त्यमुतस्त्वयि प्रभो विश्वात्मनीक्षेन्न पृथग्य आत्मनः ।
अथापि भक्त्येशतयोपधावतामनन्यवृत्त्याऽनुगृहाण वत्सल ॥३८॥
जगदुद्भवस्थितिलयेषु दैवतो बहुभिद्यमानगुणयाऽऽत्ममायया ।
रचितात्मभेदमतये स्वसंस्थया विनिर्वर्तितभ्रमगुणात्मने नमः ॥३९॥

ब्रह्मोवाच

नमस्ते श्रितसत्त्वाय धर्मादीनां च सूतये । निर्गुणाय च यत्काष्ठां नाहं वेदापरेऽपि च ॥४०॥

अग्निरुवाच

यत्तेजसाऽहं सुसमिद्धतेजा हव्यं वहे स्वध्वर आज्यसिक्तम् ।
तं यज्ञियं पञ्चविधं च पञ्चभिः स्विष्टं यजुर्भिः प्रणतोऽस्मि यज्ञम् ॥४१॥

॥ ३४ ॥ नोऽस्माकमयं मनोगजो नद्यामवगाढः प्रविष्टः दावं संसारतापं विस्मृतवान् । अतस्ततो न निष्क्रामति । मुक्तवत् । मृष्टं शुद्धम् । सम्पन्नमैक्यम् प्राप्त इव भुजङ्गप्रयातं वृत्तम् ।३५। कबन्ध इत्यस्य व्याख्या शीर्षेति। अङ्गैः ऋत्विगादिभिरिति तीर्थः। स्रग्विणीवृत्तम् ।३६। प्रत्यक् अन्तर्यामी द्रष्टाऽपि त्वम् । असद्ग्रहैर्दृग्भिः विषयग्राहिभिरिन्द्रियैरपि अद्य किं नो दृष्टोऽपि तु दृष्ट एव । अहो ते दयालुता । येन त्वया विश्वं । यस्त्वं षष्ठः पञ्चभूतातिरिक्तोऽपि तानि भासयन् तैः सह स्वयं भासीत्येषा माया कृपैव । व्यापकस्यापि व्याप्यत्वेन प्रतीतिर्नानुग्रहं विना घटते इत्यत उक्तं भूमन्निति । शालिनीवृत्तम् ।३७। विश्वात्मनि त्वयि य आत्मनो जीवान् पृथङ् नेक्षेत अमुष्मात् ज्ञानिनोऽन्यः यद्यपि ते प्रियतमो नास्ति अथाऽपि हे ईश स्वामिभृत्यभावेन उपधावतो भजमानान् भक्तानेव अनुग्रहाण नत्वहङ्कारिणो ज्ञानिनः भक्तवत्सलत्वात्ते इत्यर्थः । वीरासिकावृत्तम् ॥ ३८ ॥ दैवतः सङ्कल्पात् । रचिता आत्मनां जीवानां भेदमतिर्नानाभिमानो येन । पुनश्च स्वस्मिन् रूपे संस्थया मनः स्थित्या च विनिर्वर्तितो भ्रमः गुणश्च जीवानां येन यद्वा हे विनिर्वर्तितभ्रम ! तयैव गुणात्मने सगुणमूर्तये इत्यप्येकोऽर्थः । मञ्जुभाषिणीवृत्तम् ॥ ३९ ॥ ब्रह्माऽत्र विरिञ्चिः पूर्वत्र तु यज्ञीयः । अत एव धर्मादीनां सूतये उत्पत्त्यै श्रितं गृहीतम् सत्त्वं येन सगुणायेत्यर्थः । यस्य काष्ठां तत्त्वम् । अपरेऽपि न विदुस्तस्मै ते नमः ।४०। अग्नि कुण्डस्थः ।हव्यं हविः । वहे तत्तद्देवान्

देवा ऊचुः

पुरा कल्पापाये स्वकृतमुदरीकृत्य विकृतं त्वमेवाद्यस्तस्मिन् सलिल उरगेन्द्राधिशयने ।
पुमान् शेषे सिद्धैर्हृदि विमृशिताध्यात्मपदविः स एवाद्याक्ष्णोर्यः पथि चरसि भृत्यानवसि नः ॥४२

गन्धर्वा ऊचुः

अंशांशास्ते देव मरीच्यादय एते ब्रह्मेन्द्राद्या देवगणा रुद्रपुरोगाः ।
क्रीडाभाण्डं विश्वमिदं यस्य विभूमन् तस्मै नित्यं नाथ नमस्ते करवाम ॥४३॥

विद्याधरा ऊचुः

त्वन्माययार्थमभिपद्य कलेवरेऽस्मिन् कृत्वा ममाहमिति दुर्मतिरुत्पथैः स्वैः ।
क्षिप्तोऽप्यसद्विषयलालस आत्ममोहं युष्मत्कथामृतनिषेवक उद्व्युदस्येत् ॥४४॥

ब्राह्मणा ऊचुः

त्वं क्रतुस्त्वं हविस्त्वं हुताशः स्वयं त्वं हि मन्त्रः समिद्दर्भपात्राणि च ।
त्वं सदस्यर्त्विजो दम्पती देवता अग्निहोत्रं स्वधा सोम आज्यं पशुः ॥४५॥
त्वं पुरा गां रसाया महासूकरो दंष्ट्रया पद्मिनीं वारणेन्द्रो यथा ।
स्तूयमानो नदँल्लीलया योगिभिर्व्युज्जहर्थ त्रयीगात्र यज्ञक्रतुः ॥४६॥
स प्रसीद त्वमस्माकमाकाङ्क्षतां दर्शनं ते परिभ्रष्टसत्कर्मणाम् ।
कीर्त्यमाने नृभिर्नाम्नि यज्ञेश ते यज्ञविघ्नाः क्षयं यान्ति तस्मै नमः ॥४७॥

मैत्रेय उवाच

इति दक्षः कविर्यज्ञं भद्र रुद्राभिमर्शितम् । कीर्त्यमाने हृषीकेशे संनिन्ये यज्ञभावने ॥४८॥
भगवान् स्वेन भागेन सर्वात्मा सर्वभागभुक् । दक्षं बभाष आभाष्य प्रीयमाण इवानघ ॥४९॥

प्रति नयामि प्रापयामि । पञ्चभिर्यजुर्वेदमन्त्रैः सुपूजितं यज्ञपालकं तं यज्ञमूर्ति प्रणतोऽस्मि । अग्निहोत्रादि पञ्च । आश्रावयेत्यादि पञ्च ॥ ४१ ॥ यः प्रलये स्वकृतं विकृतं जगत् उदरस्थीकृत्य शेषे स एवाद्यः पुमान् अद्येदानीमक्ष्णोः पथि चरसि अस्मानवसि च धन्या वयमित्यर्थः । अध्यात्मपदवी ज्ञान मार्गः ॥ ४२ ॥ ते अंशो ब्रह्मा तदंशा रुद्रमरीच्यादयः । पुनश्च तेऽशो नाभिकमलं तदंशो ब्रह्मापि । मत्तमयूरं वृत्तम् ॥४३॥ अर्थं पुरुषार्थसाधनं प्राप्य ममाहं कृत्वा च दुर्मतिः पुत्रादिभिः क्षिप्तः तिरस्कृतोऽपि विषय लालस एव इममात्ममोहं निषेवकः सन् उद्व्युदस्येत् परित्यजेन्नान्यः ॥ ४४ ॥ हुताशोऽग्निः सोमः सोमलता अग्निहोत्राख्यः क्रतुः कर्मरूपः । स्रग्विणीवृत्तम् ।४५। हे त्रयीगात्र वेदमूर्ते । त्वं सूकरः सन् लीलयैव रसातलात् गां पृथ्वीं व्युज्जदथं उद्धृतवान् । यज्ञः क्रतुः कर्मयस्य । करोति क्रियते वेति विग्रहे कृतः क्रतुः ॥ ४६ ॥ यस्य नाम्नि कीर्त्यमाने तस्मैं ते नमः इत्यन्वयः ॥ ४७ ॥ हे भद्र विदुर ! यद्वा । भद्ररुद्रेण वीरभद्रेण दूषितम् । संनिन्ये प्रवर्तयामास ॥ ४८ ॥ भागेन प्रीयमाणः । इवेत्यनेनाधुनाऽपि

श्रीभगवानुवाच

अहं ब्रह्मा च शर्वश्च जगतः कारणं परम् । आत्मेश्वर उपद्रष्टा स्वयंदृगविशेषणः ॥५०॥
आत्ममायां समाविश्य सोऽयं गुणमयीं द्विज । सृजन् रक्षन् हरन् विश्वं दध्रे संज्ञां क्रियोचिताम्५१
तस्मिन् ब्रह्मण्यद्वितीये केवले परमात्मनि । ब्रह्मरुद्रौ च भूतानि भेदेनाज्ञोऽनुपश्यति ॥५२॥
यथा पुमान्न स्वाङ्गेषु शिरःपाण्यादिषु क्वचित् । पारक्यबुद्धिं कुरुते एवं भूतेषु मत्परः ॥५३॥
त्रयाणामेकभावानां यो न पश्यति वै भिदाम् । सर्वभूतात्मनां ब्रह्मन् स शान्तिमधिगच्छति ।५४

मैत्रेय उवाच

एवं भगवताऽऽदिष्टः प्रजापतिपतिर्हरिम् । अर्चित्वा क्रतुना स्वेन देवानुभयतोऽयजत्
रुद्रं च स्वेन भागेन ह्युपाधावत्समाहितः ॥५५॥ कर्मणोदवसानेन सोमपानितरानपि ।
उदवस्य सहर्त्विग्भिः सस्नाववभृथं ततः ॥५६॥
तस्मा अप्यनुभावेन स्वेनैवावाप्तराधसे । धर्म एव मतिं दत्त्वा त्रिदशास्ते दिवं ययुः ॥५७॥
एवं दाक्षायणी हित्वा सती पूर्वकलेवरम् । जज्ञे हिमवतः क्षेत्रे मेनायामिति शुश्रुम ॥५८॥
तमेव दयितं भूय आवृङ्क्ते पतिमम्बिका । अनन्यभावैकगतिं शक्तिः सुप्तेव पूरुषम् ॥५९॥
एतद्भगवतः शम्भोः कर्म दक्षाध्वरद्रुहः । श्रुतं भागवताच्छिष्यादुद्धवान्मे बृहस्पतेः ॥६०॥
इदं पवित्रं परमीशचेष्टितं यशस्यमायुष्यमघौघमर्षणम् ।
यो नित्यदाऽऽकर्ण्य नरोऽनुकीर्तयेद् धुनोत्यघं कौरव भक्तिभावतः ॥६१॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां चतुर्थस्कन्धे दक्षयज्ञसंधानं नाम सप्तमोऽध्यायः॥ ७ ॥

किञ्चिद्धार्दिकवेदनाऽवशिष्टेति सूचितं रुद्रापराधित्वात् । 'विष्णोश्च हृदये शिवः' इत्युक्तेः । आमाष्य सबोध्य ॥ ४९ ॥ योऽहं जगतः कारणं स एव ब्रह्मा शर्वश्चेत्यन्वयः । अविशेषण उपाधिशून्यः ॥ ५० ॥ समाविश्य अधिष्ठाय ॥ ५१ ॥ तस्मिन् भेदरहिते मयि अज्ञ एव भेदेन पश्यति न तु विज्ञः स च भूतानि जीवानपि न किमुत ब्रह्मरुद्रौ ॥५२॥ एवमिति सार्द्धम् । एवं मत्परो मद्भक्तो भूतेषु न कुरुते ।५३। भावः स्वरूपम् । सर्वभूतस्वामिनाम् । शान्तिं मोक्षम् ॥ ५४ ॥ स्वेन स्वकर्तृकेन क्रतुना हरिमर्चित्वा । उभयतोऽङ्गैः प्रधानेन च । उपाधावत् अपूजयत् ॥ ५५ ॥ उदवस्यते समाप्यतेऽनेन तेन कर्मणा समाप्तीष्ट्या । उदवस्य यज्ञं समाप्य । अवभृथं यज्ञान्तस्नानं यथा भवति तथा स्नातवान् । चकार वा ॥ ५६ ॥ स्वेन असाधारणेन भगवत्पूजाप्रभावेण प्राप्तसिद्धयेऽपि ॥ ५७ ॥ क्षेत्रे भार्यायां मेनकायाम् ॥ ५८ ॥ आवृङ्क्ते भजते स्म पुरुषं प्रलये ईश्वरमिव ॥ ५९ ॥ बृहस्पतेः शिष्यात् ॥ ६० ॥ मर्षणं नाशनम् । अघं संसारदुःखं निवर्तयति हे कौरव विदुर ! ॥ ६१ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे गूढार्थदीपिन्यां सप्तमोऽध्यायः ।

अथाष्टमोऽध्यायः

मैत्रेय उवाच

सनकाद्या नारदश्च ऋभुर्हंसोऽरुणिर्यतिः । नैते गृहान् ब्रह्मसुता ह्यावसन्नूर्ध्वरेतसः ॥ १ ॥
मृषाऽधर्मस्य भार्याऽऽसीद्दम्भं मायां च शत्रुहन् । असूत मिथुनं तत्तु निर्ऋतिर्जगृहेऽप्रजः ॥ २ ॥
तयोः समभवल्लोभो निकृतिश्च महामते । ताभ्यां क्रोधश्च हिंसा च यद् दुरुक्तिः स्वसा कलिः ।३।
दुरुक्तौ कलिराधत्त भयं मृत्युं च सत्तम । तयोश्च मिथुनं जज्ञे यातना निरयस्तथा ॥ ४ ॥
संग्रहेण मयाऽऽख्यातः प्रतिसर्गस्तवानघ । त्रिःश्रुत्वैतत्पुमान् पुण्यं विधुनोत्यात्मनो मलम्॥५॥
अथातः कीर्तये वंशं पुण्यकीर्तेः कुरूद्वह । स्वायंभुवस्यापि मनोर्हरेरंशांशजन्मनः ॥ ६ ॥
प्रियव्रतोत्तानपादौ शतरूपापतेः सुतौ । वासुदेवस्य कलया रक्षायां जगतः स्थितौ ॥ ७ ॥
जाये उत्तानपादस्य सुनीतिः सुरुचिस्तयोः । सुरुचिः प्रेयसी पत्युर्नेतरा यत्सुतो ध्रुवः ॥ ८ ॥
एकदा सुरुचेः पुत्रमङ्कमारोप्य लालयन् । उत्तमं नारुरुक्षन्तं ध्रुवं राजाभ्यनन्दत ॥ ९ ॥
तथा चिकीर्षमाणं तं सपत्न्यास्तनयं ध्रुवम् । सुरुचिः शृण्वतो राज्ञः सेर्ष्यमाहातिगर्विता॥१०॥
न वत्स नृपतेर्धिष्ण्यं भवानारोढुमर्हति । न गृहीतो मया यत्त्वं कुक्षावपि नृपात्मजः ॥११॥
बालोऽसि बत नात्मानमन्यस्त्रीगर्भसम्भृतम् । नूनं वेद भवान् यस्य दुर्लभेऽर्थे मनोरथः ॥१२॥
तपसाऽऽराध्य पुरुषं तस्यैवानुग्रहेण मे । गर्भे त्वं साधयात्मानं यदीच्छसि नृपासनम् ॥१३॥

मैत्रेय उवाच

मातुः सपत्न्याः स दुरुक्तिविद्धः श्वसन् रुषा दण्डहतो यथाहिः ।
हित्वा मिषन्तं पितरं सन्नवाचं जगाम मातुः प्ररुदन् सकाशम् ॥१४॥

अष्टमे सुरुचिक्षिप्तवाग्बाणैस्ताडितो भृशम् ।
ध्रुवो वृन्दावनं गत्वाऽतोषयत्तपसा हरिम् ॥१॥

अवशिष्टब्रह्मपुत्रानाह । सनकाद्या इति ॥ १ ॥ ब्रह्मपृष्ठादुत्पन्नस्याधर्मस्य वंशमाह-मृषेति । निर्ऋतिः नैरृतकोणाधिपतिः ॥ २ ॥ तयोर्दम्भमाययोः । निकृतिः शठता यत् याम्यां । कलिः तस्य स्वसा दुरुक्तिश्च अभवत् ॥३॥ आधत्त उत्पादयामास । भयं पुत्रं मृत्युं कन्यां च भारते तथैवोक्तत्वात् ।४। संग्रहेण संक्षेपेण । प्रतिकूलः सर्गः प्रतिसर्गः प्रलयः अधर्मस्य प्रलयहेतुत्वात् । एतत्पूर्वोक्तम् । पुण्यंवर्जनद्वारा पुण्यकरम् । मलं दंभादिरूपम् ॥ ५ ॥ हरेरंशो ब्रह्मा तस्यांशात् देहार्द्धाज्जन्म यस्य ॥ ६ ॥ कलया अंशेन ॥ ७ ॥ इतरा सुनीतिः । यत् यस्याः ॥ ८ ॥ पुत्रम् उत्तमम् । नाभ्यनन्दत नाङ्गीकृतवान् ॥ ९ ॥ तथाऽङ्कारोहणम् ॥ १० ॥ धिष्ण्यं सिंहासनम् । नृपात्मजोऽपि यत् यस्मात् मया न धृतः । वस्तुतस्तु नरमात्रस्य पतिः विष्णुः तस्य वत्स हे भावि भक्त । न केवलं धिष्ण्यमात्रमपि तु विष्णुपदम् । एवंभूतोऽपि त्वं यन्मया लालनार्थमपि कुक्षौ कटिप्रदेशेऽपि न धृतः धिङ् मामिति वागर्थः ॥ ११ ॥ बत खेदादौ । यस्य तव ॥ १२ ॥ गर्भे हृदये वा आत्मानं परमात्मानं साधय साक्षात्कुरु वा मे वत्सेति योज्यम् ॥१३॥ स ध्रुवः । दुरुक्तिरिति लोकदृष्ट्या । मिषन्तं पश्यन्तम् । सन्नवाचं तूष्णींभूतम् ॥१४॥

तं निःश्वसन्तं स्फुरिताधरोष्ठं सुनीतिरुत्सङ्ग उदूह्य बालम् ।
निशम्य तत्पौरमुखान्नितान्तं सा विव्यथे यद् गदितं सपत्न्या ॥१५॥
सोत्सृज्य धैर्यं विललाप शोकदावाग्निना दावलतेव बाला ।
वाक्यं सपत्न्याः स्मरती सरोजश्रिया दृशा वाष्पकलामुवाह ॥१६॥
दीर्घं श्वसन्ती वृजिनस्य पारमपश्यती बालकमाह बाला ।
माऽमङ्गलं तात परेषु मंस्था भुङ्क्ते जनो यत्परदुःखदस्तत् ॥१७॥
सत्यं सुरुच्याऽभिहितं भवान्मे यद् दुर्भगाया उदरे गृहीतः ।
स्तन्येन वृद्धश्च विलज्जते यां भार्येति वा वोढुमिडस्पतिर्माम् ॥१८॥
आतिष्ठ तत्तात विमत्सरस्त्वमुक्तं समात्रापि यदव्यलीकम् ।
आराधयाऽधोक्षजपादपद्मं यदीच्छसेऽध्यासनमुत्तमो यथा ॥१९॥
यस्याङ्घ्रिपद्मं परिचर्य विश्वविभावनायात्तगुणाभिपत्तेः ।
अजोऽध्यतिष्ठत् खलु पारमेष्ठ्यं पदं जितात्मश्वसनाभिवन्द्यम् ॥२०॥
तथा मनुर्वो भगवान् पितामहो यमेकमत्या पुरुदक्षिणैर्मखैः ।
इष्ट्वाऽभिपेदे दुरवापमन्यतो भौमं सुखं दिव्यमथापवर्ग्यम् ॥२१॥
तमेव वत्साश्रय भृत्यवत्सलं मुमुक्षुभिर्मृग्यपदाब्जपद्धतिम् ।
अनन्यभावे निजधर्मभाविते मनस्यवस्थाप्य भजस्व पूरुषम् ॥२२॥
नान्यं ततः पद्मपलाशलोचनाद् दुःखच्छिदं ते मृगयामि कंचन ।
यो मृग्यते हस्तगृहीतपद्मया श्रियेतरैरङ्ग विमृग्यमाणया ॥२३॥

मैत्रेय उवाच

एवं संजल्पितं मातुराकर्ण्यार्थागमं वचः । संनियम्यात्मनाऽऽत्मानं निश्चक्राम पितुः पुरात् ॥

तम् उत्सङ्गे उदुह्य अङ्के आरोप्य सा विव्यथे । यत् गदितं तत् निशम्य । कस्मात् । पुरेऽन्तः पुरे भवाः पौरा दासीजनास्तेषां मुखात् ॥ १५ ॥ दावो वनम् । वाष्पकलाम् अश्रुधाराम् ॥ १६ ॥ वृजिनस्य दुःखस्य । यत् यस्मात् यः परदुःखदः तत् दत्तं दुखं स स्वयमेव भुङ्क्ते तस्मात् मां मंस्था इत्यन्वयः १७ यत् तत् सत्यम् । मया दुर्भगया कर्तरि षष्ठी । गृहीतो धृत इति । तस्या एव स्तन्येन दुग्धेन । यां मां भार्येति वोढुं वक्तुं विलज्जते । वा शब्दात् दासीत्यपि डलयोरभेदात् इडा भूमिः पारस्करादित्वात् सुट्ह्रस्वौ ॥१८॥ समात्रा मातृसपत्न्याऽपि यतप उक्तं तदैवाव्यलीकं प्रियम् आतिष्ठ कुरु । उत्तमो भ्राता । यद्वा । ज्ञानी सेवते यथा ॥ १९ ॥ परिचर्य निषेव्य । विभावनाय पालनाय । आत्ता गृहीता गुणाभिपत्तिर्मङ्गलमूर्ति येन । जितः आत्मा मनः श्वसनः प्राणश्च यैस्तैर्योगिभिः ।२०। एकमत्या एकग्रवुद्धया । पुरुदक्षिणैर्बहुदक्षिणैः । दिव्यं स्वर्गसंवन्धि । मोक्षसंवन्धि च ।२१। पद्धतिः आराधनविधिः मार्गो वा । निजधर्मैर्भागवतधर्मैः शोधिते ॥२२॥ न मृगयामि अन्विष्यापि न पश्यामि । हस्तेन गृहीतं दीपवत्पद्मं ययेत्युत्प्रेक्षा । तइरैर्ब्रह्मादिभिः । अङ्ग हे वत्स ! ॥२३॥ संजल्पितं विलापम् । अर्थस्य अभिप्रेतस्य आगमः प्राप्ति-

नारदस्तदुपाकर्ण्य ज्ञात्वा तस्य चिकीर्षितम् । स्पृष्ट्वा मूर्धन्यघघ्नेन पाणिना प्राह विस्मितः२५

अहो तेजः क्षत्रियाणां मानभङ्गममृष्यताम् । बालोऽप्ययं हृदा धत्ते यत्समातुरसद्वचः ॥२६॥

नारद उवाच

नाधुनाप्यवमानं ते सम्मानं वापि पुत्रक । लक्षयामः कुमारस्य सक्तस्य क्रीडनादिषु ॥२७॥

विकल्पे विद्यमानेऽपि न ह्यसंतोषहेतवः । पुंसो मोहमृते भिन्ना यल्लोके निजकर्मभिः ॥२८॥

परितुष्येत् ततस्तात तावन्मात्रेण पूरुषः । दैवोपसादितं यावद् वीक्ष्येश्वरगतिं बुधः ॥२९॥

अथ मात्रोपदिष्टेन योगेनावरुरुत्ससि । यत्प्रसादं स वै पुंसां दुराराध्यो मतो मम ॥३०॥

मुनयः पदवीं यस्य निःसङ्गेनोरुजन्मभिः । न विदुर्मृगयन्तोऽपि तीव्रयोगसमाधिना ॥३१॥

अतो निवर्ततामेष निर्बन्धस्तव निष्फलः । यतिष्यति भवान् काले श्रेयसां समुपस्थिते ॥३२॥

यस्य यद् दैवविहितं स तेन सुखदुःखयोः । आत्मानं तोषयन् देही तमसः पारमृच्छति ॥३३॥

गुणाधिकान्मुदं लिप्सेदनुक्रोशं गुणाधमात् । मैत्रीं समानादन्विच्छेन्न तापैरभिभूयते ॥३४॥

ध्रुव उवाच

सोऽयं शमो भगवता सुखदुःखहतात्मनाम् । दर्शितः कृपया पुंसां दुर्दर्शोऽस्मद्विधैस्तु यः ॥३५॥

अथापि मेऽविनीतस्य क्षात्त्रं घोरमुपेयुषः । सुरुच्या दुर्वचोबाणैर्न भिन्ने श्रयते हृदि ॥३६॥

पदं त्रिभुवनोत्कृष्टं जिगीषोः साधु वर्त्म मे । ब्रूह्यस्मत्पितृभिर्ब्रह्मन्नन्यैरप्यनधिष्ठितम् ॥३७॥

नूनं भवान् भगवतो योऽङ्गजः परमेष्ठिनः । वितुदन्नटते वीणां हितार्थं जगतोऽर्कवत् ॥३८॥

मैत्रेय उवाच

इत्युदाहृतमाकर्ण्य भगवान् नारदस्तदा । प्रीतः प्रत्याह तं बालं सद्वाक्यमनुकम्पया ॥३९॥

यस्मात् । आत्मना धैर्येण । आत्मानं मनः ॥ २४।२५ ॥ विस्मितः सन् तन्निकटमागत्य प्राहेति स्वगतं वाक्यम् । नारद उवाचेति स्फुटोक्तिख्यापनात् । समातुः मातृसपत्न्याः ॥२६।२७॥ विकल्पे शत्रुमित्रादिविविधिकल्पने सत्यपि दुःखस्य हेतवस्तेऽपमानादयः तत्कर्तारः शत्रवो वा मोहमज्ञानं विना भिन्ना न सन्ति किन्तु मोहकल्पिता एव यत् यतः अपमानादयः निजकर्मभिरेव भवन्तीति सरलार्थः ॥ २८ ॥ प्राचीनकर्मणा प्रापितं यावत् यत्प्रमाणकं सुखं दुःखं वा तावन्मात्रेण । वीक्ष्य ईश्वरप्रेरितमेव कर्म फलतीति ज्ञात्वेत्यर्थः ॥ २९ ॥ अथ यदि । अवरुरुत्ससि प्राप्तुमिच्छसि । इति मम मतः मया ज्ञातः । पुंसामभक्तानामेव ॥ ३० ॥ यस्य पदवी मार्गमपि न विदुः स इत्यन्वयः ॥ ३१ ॥ यतोऽभक्तैरेव दुराराध्यः अतो भवान् मात्रोपदिष्टयोगेन नितरां प्रवर्ततां । निर्बन्धो दृढः भगवत्प्रसादनलक्षणः । नि निश्चितं फलं यत्र सकल एव तस्मादस्मिन्नेव काले यतिष्यति । वर्तमानसामीप्ये । पक्षे वृद्धत्वे ॥३२॥ तपोर्मध्ये यत्सुखं दुःखं वा तेन आत्मानं तोषयन् । तमसः संसारस्य पारं श्रीहरिम् प्राप्नोति ।३३। गुणाधिकं प्राप्य । अनुक्रोशं कृपाम् ॥३४॥ यद्यपि दर्शितः अथाऽपीत्यन्वयः ॥ ३५ ॥ क्षात्त्रं क्षत्रियस्वभावम् । मे हृदि ॥३६॥ वर्त्म साधनम् ॥ ३७ ॥ यो नारदः स एव भवान् नूनम् । वितुदन् वादयन् ॥३८॥ सद्वाक्यमत्र स्पष्टत्वेन पूर्वं

नारद उवाच

जनन्याऽभिहितः पन्थाः स वै निःश्रेयसस्य ते । भगवान् वासुदेवस्तं भज तत्प्रवणात्मना ॥४०॥
धर्मार्थकाममोक्षाख्यं य इच्छेच्छ्रेय आत्मनः । एकमेव हरेस्तत्र कारणं पादसेवनम् ॥४१॥
तत्तात गच्छ भद्रं ते यमुनायास्तटं शुचि । पुण्यं मधुवनं यत्र सांनिध्यं नित्यदा हरेः ॥४२॥
स्नात्वाऽनुसवनं तस्मिन् कालिन्द्याः सलिले शिवे । कृत्वोचितानि निवसन्नात्मनः कल्पितासनः४३
प्राणायामेन त्रिवृता प्राणेन्द्रियमनोमलम् । शनैर्व्युदस्याभिध्यायेन्मनसा गुरुणा गुरुम् ॥४४॥
प्रसादाभिमुखं शश्वत्प्रसन्नवदनेक्षणम् । सुनासं सुभ्रुवं चारुकपोलं सुरसुन्दरम् ॥४५॥
तरुणं रमणीयाङ्गमरुणोष्ठेक्षणाधरम् । प्रणताश्रयणं नृम्णं शरण्यं करुणार्णवम् ॥४६॥
श्रीवत्साङ्कं घनश्यामं पुरुषं वनमालिनम् । शङ्खचक्रगदापद्मैरभिव्यक्तचतुर्भुजम् ॥४७॥
किरीटिनं कुण्डलिनं केयूरवलयान्वितम् । कौस्तुभाभरणग्रीवं पीतकौशेयवाससम् ॥४८॥
काञ्चीकलापपर्यस्तं लसत्काञ्चननूपुरम् । दर्शनीयतमं शान्तं मनोनयनवर्धनम् ॥४९॥
पद्भ्यां नखमणिश्रेण्या विलसद्भ्यां समर्चताम् । हृत्पद्मकर्णिकाधिष्ण्यमाक्रम्यात्मन्यवस्थितम्५०
स्मयमानमभिध्यायेत् सानुरागावलोकनम् । नियतेनैकभूतेन मनसा वरदर्षभम् ॥५१॥
एवं भगवतो रूपं सुभद्रं ध्यायतो मनः । निर्वृत्या परया तूर्णं सम्पन्नं न निवर्तते ॥५२॥
जप्यश्च परमो गुह्यः श्रूयतां मे नृपात्मज । यं सप्तरात्रं प्रपठन् पुमान् पश्यति खेचरान् ५३

'ॐ नमो भगवते वासुदेवाय ।'

मन्त्रेणानेन देवस्य कुर्याद् द्रव्यमयीं बुधः । सपर्यां विविधैर्द्रव्यैर्देशकालविभागवित् ॥५४॥
सलिलैः शुचिभिर्माल्यैर्वन्यैर्मूलफलादिभिः । शस्ताङ्कुरांशुकैश्चार्चेत् तुलस्या प्रियया प्रभुम् ५५
लब्ध्वा द्रव्यमयीमर्चां क्षित्यम्ब्वादिषु वार्चयेत् ।आभृतात्मा मुनिः शान्तो यतवाङ् मितवन्यभुक्५६

गोप्यत्वेन ॥ ३९ ॥ यः स एव । तत्प्रवणात्मना तन्निष्ठचेतसा ॥ ४० ॥ य इच्छेत्तस्य तत्र श्रेयःप्राप्तौ । कारणमुपायः ॥ ४१।४२ ॥ स्नात्वेत्यष्टकम् त्रिवृता पूरकादिमदेन । गुरुणा स्थिरेण मलं चाञ्चल्यं दूरीकृत्य । अमुसवनं त्रिकालं स्नात्वा आत्मन उचितानि नमस्कारादीनि च कृत्वा गुरुं श्रीहरिमभिध्यायेदित्यन्वयः ॥ ४३।४४ ॥ कथंभूतम् । प्रसादेऽनुग्रहे ॥ ४५ ॥ नृम्णं स्यात्सुन्दरे धने, इति धरणिः ॥ ४६।४७ ॥ कौस्तुभस्य आभरणं भूषणरूपा ग्रीवा यस्य ॥ ४८ ॥ कलापो भूषणे इति निरुक्तिः । पर्यस्तं वेष्टितम् । वर्धनं हर्षकरम् ॥ ४९ ॥ समर्चतां भक्तानाम् आत्मनि मनसि स्फुरन्तम् । किं कृत्वा । स्वपद्भ्यां तेषां कर्णिकाया मध्यस्थानमाक्रम्य ॥५०॥ पुनश्च स्मयमानमेव तम् एवं पूर्वं ध्यानाङ्गधारणोक्ता इदानीं तु ध्यानमिति द्विरुक्तधातुरहस्यम् । नियतेन विषयेभ्य उपरतेन निरुद्धेन अत एव एकाग्रेण ।५१। निर्वृत्या परमानन्देन शीघ्रं सम्पन्नं पूर्णं सत् ततो न निवर्तते इति समाधिः ।५२। जप्यः जपनीयो मन्त्रः । मे मत्तः । खेचरान् पार्षदान् साक्षात् स्वप्ने वा ॥ ५३ ॥ द्रव्ययीं द्रव्यैकसाध्यां वृन्दावनादिदेशे वसन्तादिकाले तत्तदुचितां सपर्यां पूजाम् ॥ ५४ ॥ शुचिभिः स्त्रीशूद्रादिभिरनानीतैः ।

स्वेच्छावतारचरितैरचिन्त्यनिजमायया । करिष्यत्युत्तमश्लोकस्तद्ध्यायेद्धृदयङ्गमम् ॥५७॥

परिचर्या भगवतो यावत्यः पूर्वसेविताः । ता मन्त्रहृदयेनैव प्रयुञ्ज्यान्मन्त्रमूर्तये ॥५८॥

एवं कायेन मनसा वचसा च मनोगतम् । परिचर्यमाणो भगवान् भक्तिमत्परिचर्यया ॥५९॥

पुंसाममायिनां सम्यग्भजतां भाववर्धनः । श्रेयो दिशत्यभिमतं यद्धर्मादिषु देहिनाम् ॥६०॥

विरक्तश्चेन्द्रियरतौ भक्तियोगेन भूयसा । तं निरन्तरभावेन भजेताद्धा विमुक्तये ॥६१॥

इत्युक्तस्तं परिक्रम्य प्रणम्य च नृपार्भकः । ययौ मधुवनं पुण्यं हरेश्चरणचर्चितम् ॥६२॥

तपोवनं गते तस्मिन् प्रविष्टोऽन्तः पुरं मुनिः । अर्हितार्हणको राज्ञा सुखासीन उवाच तम् ॥६३॥

नारद उवाच

राजन् किं ध्यायसे दीर्घं मुखेन परिशुष्यता । किं वा न रिष्यते कामो धर्मो वार्थेन संयुतः ॥६४॥

राजोवाच

सुतो मे बालको ब्रह्मन् स्त्रैणेनाऽकरुणात्मना । निर्वासितः पञ्चवर्षः सह मात्रा महान् कविः ॥६५

अप्यनाथं वने ब्रह्मन् मास्मादन्त्यर्भकं वृकाः । श्रान्तं शयानं क्षुधितं परिम्लानमुखाम्बुजम् ॥६६

अहो मे बत दौरात्म्यं स्त्रीजितस्योपधारय । योऽङ्कं प्रेम्णाऽऽरुरुक्षन्तं नाभ्यनन्दमसत्तमः ॥६७॥

नारद उवाच

मा मा शुचः स्वतनयं देवगुप्तं विशाम्पते । तत्प्रभावमविज्ञाय प्रावृङ्क्ते यद्यशो जगत् ॥६८॥

सुदुष्करं कर्म कृत्वा लोकपालैरपि प्रभुः । एष्यत्यचिरतो राजन् यशो विपुलयंस्तव ॥६९॥

मैत्रेय उवाच

इति देवर्षिणा प्रोक्तं विश्रुत्य जगतीपतिः । राजलक्ष्मीमनादृत्य पुत्रमेवान्वचिन्तयत् ॥७०॥

तत्राभिषिक्तः प्रयतस्तामुपोष्य विभावरीम् । समाहितः पर्यचरदृष्यादेशेन पूरुषम् ॥७१॥

त्रिरात्रान्ते त्रिरात्रान्ते कपित्थबदराशनः । आत्मवृत्त्यनुसारेण मासं निन्येऽर्चयन् हरिम् ॥७२॥

शस्ताङ्कुरैः दूर्वाङ्कुरैः । अंशुकैः सूक्ष्मवस्त्रैः ॥ ५५ ॥ द्रव्ये शिलादिनिर्मितां प्रतिमाम् सम्पाद्य अर्चयेत् आभृतात्मा वशीकृतचित्तः ॥ ५६ ॥ मायया लीलाशक्त्या यत् यत् तत् तत् हृदयङ्गमं मनोहरं चरितम् ॥ ५७ ॥ पूर्वैराचार्यैः सेविता विहिता । याः पूजासामग्र्यः ताः सर्वा अपि हृदयेन मुख्येनोक्त-मन्त्रेणैव समर्पयेत् ॥५८॥ एवमिति युग्मकम् । मनो गतं प्रविष्टं यथा भवति तथा कायादिभिर्भक्ति-मत्या सेवया यदभिमतं तत् दिशति ददातीत्यन्वयः ॥५९ ६०॥ इन्द्रियरतौ विषयभोगे । यो दिशति तम् ॥ ६१ ॥ चर्चितं मण्डितमिति हरेर्नित्यसन्निहितत्वात् ॥ ६२ ॥ तस्मिन् ध्रुवे । राज्ञोऽन्तः पुरम् । अर्हितं समर्पितमर्घ्यादि यस्मै सः ॥ ६३ ॥ न रिष्यते न नश्यति किं वा ॥ ६४ ॥ उभयोरप्यनादृत-त्वान्मयैव निष्कासितः ॥ ६५ ॥ अपिस्म किंस्वित् ॥ ६६ ॥ बत खेदे । उपधारय पश्य ॥ ६७ ॥ यत् यशः कर्तृ । प्रावृङ्क्ते व्याप्स्यति ॥ ६८ ॥ विपुलयन् विस्तारयन् ॥ ६९।७० ॥ यस्यां तत्र गतः तां तस्यामुपवासं कृत्वा ॥ ७१ ॥ आत्मवृत्तिर्देहस्थितिः । निन्येऽतिक्रान्तवान् ॥ ७२ ॥ अभ्यर्चयन्

द्वितीयं च तथा मासं षष्ठे षष्ठेऽर्भको दिने । तृणपर्णादिभिः शीर्णं कृताम्नोऽभ्यर्चयद्विभुम् ॥७३॥
तृतीयं चानयन्मासं नवमे नवमेऽहनि । अब्भक्ष उत्तमश्लोकमुपाधावत्समाधिना ॥७४॥
चतुर्थमपि वै मासं द्वादशे द्वादशेऽहनि । वायुभक्षो जितश्वासो ध्यायन् देवमधारयत् ॥७५॥
पञ्चमे मास्यनुप्राप्ते जितश्वासो नृपात्मजः । ध्यायन् ब्रह्म पदैकेन तस्थौ स्थाणुरिवाचलः ॥७६॥
सर्वतो मन आकृष्य हृदि भूतेन्द्रियाशयम् । ध्यायन् भगवतो रूपं नाद्राक्षीत् किंचनापरम् ॥७७॥
आधारं महदादीनां प्रधानपुरुषेश्वरम् । ब्रह्म धारयमाणस्य त्रयो लोकाश्चकम्पिरे ॥७८॥

यदैकपादेन स पार्थिवार्भकस्तस्थौ तदङ्गुष्ठनिपीडिता मही ।
ननाम तत्रार्धमिभेन्द्रधिष्ठिता तरीव सव्येतरतः पदे पदे ॥७९॥

तस्मिन्नभिध्यायति विश्वमात्मनो द्वारं निरुध्यासुमनन्यया धिया ।
लोका निरुच्छ्वासनिपीडिता भृशं सलोकपालाः शरणं ययुर्हरिम् ॥८०॥

देवा ऊचुः

नैवं विदामो भगवन् प्राणरोधं चराचरस्याखिलसत्त्वधाम्नः ।
विधेहि तन्नो वृजिनाद्विमोक्षं प्राप्ता वयं त्वां शरणं शरण्यम् ॥८१॥

श्रीभगवानुवाच

मा भैष्ट बालं तपसो दुरत्ययान्निवर्तयिष्ये प्रतियात स्वधाम ।
यतो हि वः प्राणनिरोध आसीदौत्तानपादिर्मयि संगतात्मा ॥८२॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां चतुर्थस्कन्धे ध्रुवचरितेऽष्टमोऽध्यायः ॥८॥

द्वितीयमपि निन्ये इत्यनुषङ्गः ।७३। आ ईषदिव नयन् उपाधावत् आराधितवान् । शश्वन्तं वा उपाधावन् आनयत् ॥७४॥ मासं नयन् तं ध्यायन् हृदि देवम् अधारयत् ॥७५॥७६॥ भूतानि इन्द्रियाणि च आशेरते यस्मिन् तन्मनः ॥७७॥ धारयति सति ॥७८॥ तत्र तदा । अर्द्धंप्रदेशं व्याप्य तथा ननाम तरी नौं वामतो दक्षिणतश्च यथा नमति ॥ ७९॥ आत्मनो देहस्य द्वारमिन्द्रियवर्गम् असुं प्राणं च निरुध्य तस्मिन् ध्रुवे विश्वं विश्वमूर्तिं विष्णुं ध्यायति सति ॥ ८० ॥ अखिलेति । सर्वप्राणिशरीरस्य । तत् तस्मात् वृजिनात् क्लेशात् ॥ ८१ ॥ यतो मयि सङ्गतात्मा समावेशितचेता तत एव निरोधः अथाऽपि मा भैष्ट यूयं धाम प्रति यात च अहं निवर्तयिष्ये इत्यन्वयः ॥ ८२ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे गूढार्थदीपिन्यामष्टमोऽध्यायः ।

अथ नवमोऽध्यायः

मैत्रेय उवाच

त एवमुत्सन्नभया उरुक्रमे कृतावनामाः प्रययुस्त्रिविष्टपम्।
सहस्रशीर्षापि ततो गरुत्मता मधोर्वनं भृत्यदिदृक्षयाऽऽगतः॥ १॥
स वै धिया योगविपाकतीव्रया हृत्पद्मकोशे स्फुरितं तडित्प्रभम्।
तिरोहितं सहसैवोपलक्ष्य बहिःस्थितं तदवस्थं ददर्श॥ २॥
तद्दर्शनेनागतसाध्वसः क्षिताववन्दताङ्गं विनमय्य दण्डवत्।
दृग्भ्यां प्रपश्यन् प्रपिबन्निवार्भकश्चुम्बन्निवास्येन भुजैरिवाश्लिषन्॥ ३॥
स तं विवक्षन्तमतद्विदं हरिर्ज्ञात्वास्य सर्वस्य च हृद्यवस्थितः।
कृताञ्जलिं ब्रह्ममयेन कम्बुना पस्पर्श बालं कृपया कपोले॥ ४॥
स वै तदैव प्रतिपद्य तां गिरं दैवीं परिज्ञातपरात्मनिर्णयः।
तं भक्तिभावोऽभ्यगृणादसत्वरं परिश्रुतोरुश्रवसं ध्रुवक्षितिः॥ ५॥

ध्रुव उवाच

योऽन्तः प्रविश्य मम वाचमिमां प्रसुप्तां संजीवयत्यखिलशक्तिधरः स्वधाम्ना।
अन्यांश्च हस्तचरणश्रवणत्वगादीन् प्राणान्नमो भगवते पुरुषाय तुभ्यम्॥ ६॥
एकस्त्वमेव भगवन्निदमात्मशक्त्या मायाख्ययोरुगुणया महदाद्यशेषम्।
सृष्ट्वानुविश्य पुरुषस्तदसद्गुणेषु नानेव दारुषु विभावसुवद्विभासि॥ ७॥

नवमे दर्शनं विष्णोः स्तुतिः प्राप्तिर्वरस्य च।
ध्रुवस्य सोत्सवं राज्याभिषेकः सम्यगीर्यते॥ १॥

ते देवाः उत्सन्नं निवृत्तम्। उरुक्रमे भगवति॥१॥ योगो ध्यानयोगस्तस्य दार्ढ्येन निश्चलया। तिरोहितं भगवतैव साक्षात्स्वदर्शनार्थम्। यादृगन्तः तदवस्थं तादृशं रूपम्॥ २॥ साध्वसः आनन्दोद्रेकः। मुखारविन्दमाधुर्यं प्रपिबन्निव पश्यन् आस्येन चरणारविन्दमाधुर्यं चुम्बन्निव अवन्दतेति योज्यम्। भुजैरिति पौनः पुन्येन व्यापारबाहुल्यात् उत्प्रेक्षया बहुवचनम्॥ ३॥ विवक्षन्तं स्तुतिं कर्तुमिच्छन्तम् किन्तु न तत् स्तुतिकरणं वेत्तीति तथाभूतम्। ब्रह्ममयेन कम्बुना शंखेन।'कपोले वसते वाणी' इत्युक्तेस्तत्स्पर्शेन सुप्तेव सोत्थापितेत्यर्थः॥ ४॥ स ध्रुवः तां वेदात्मिकां गिरं प्रतिपद्य तं हरिम् असत्वरं धैर्येण अभ्यगृणात् अस्तौत्। कथंभूतम्। परिश्रुतं सर्वतो विख्यातं बहु यशो यस्य। परात्मनोः ईश्वरजीवयोः। भावः स्वभावः। ध्रुवा प्रलयेऽप्यनश्वरा क्षितिः स्थानं यस्येति भाविनिर्देशः॥ ५॥ यः प्रसुप्तां वाचम् अन्यांश्च प्राणान् इन्द्रियाणि च स्वधाम्ना चिच्छक्त्या संजीवयति तस्मै तुभ्यं नमः॥ ६॥ इदमशेषं जगत् सृष्ट्वा अनुविश्य च पुरुषोऽन्तर्यामी त्वमेक एव तस्या मायायाः असत्सु गुणेषु इन्द्रियादिषु चेतयितुं स्थितः

त्वद्दत्तया वयुनयेदमचष्ट विश्वं सुप्तप्रबुद्ध इव नाथ भवत्प्रपन्नः।
तस्यापवर्ग्यशरणं तव पादमूलं विस्मर्यते कृतविदा कथमार्तबन्धो ॥ ८ ॥
नूनं विमुष्टमतयस्तव मायया ते ये त्वां भवाप्ययविमोक्षणमन्यहेतोः।
अर्चन्ति कल्पकतरुं कुणपोपभोग्यमिच्छन्ति यत्स्पर्शजं निरयेऽपि नृणाम् ॥ ९ ॥
या निर्वृतिस्तनुभृतां तव पादपद्मध्यानाद्भवज्जनकथाश्रवणेन वा स्यात्।
सा ब्रह्मणि स्वमहिमन्यपि नाथ मा भूत् किम्वन्तकासिलुलितात्पततां विमानात् ॥१०॥
भक्तिं मुहुः प्रवहतां त्वयि मे प्रसङ्गो भूयादनन्त महताममलाशयानाम्।
येनाञ्जसोल्बणमुरुव्यसनं भवाब्धिं नेष्ये भवद्गुणकथामृतपानमत्तः ॥११॥
ते न स्मरन्त्यतितरां प्रियमीश मर्त्यं ये चान्वदः सुतसुहृद्गृहवित्तदाराः।
ये त्वब्जनाभ भवदीयपदारविन्दसौगन्ध्यलुब्धहृदयेषु कृतप्रसङ्गाः ॥१२॥
तिर्यङ्नगद्विजसरीसृपदेवदैत्यमर्त्यादिभिः परिचितं सदसद्विशेषम्।
रूपं स्थविष्ठमज ते महदाद्यनेकं नातः परं परम वेद्मि न यत्र वादः ॥१३॥
कल्पान्त एतदखिलं जठरेण गृह्णन् शेते पुमान् स्वदृगनन्तसखस्तदङ्के।
यन्नाभिसिन्धुरुहकाञ्चनलोकपद्मगर्भे द्युमान् भगवते प्रणतोऽस्मि तस्मै ॥१४॥
त्वं नित्यमुक्तपरिशुद्धविबुद्ध आत्मा कूटस्थ आदिपुरुषो भगवांस्त्र्यधीशः।
यद्बुद्ध्यवस्थितिमखण्डितया स्वदृष्ट्या द्रष्टा स्थितावधिमखो व्यतिरिक्त आस्से ॥१५॥

सन् नानेव विभासि। यथा दारुषु स्थित एकोऽप्यग्निः तद्भेदान्नाना ॥ ७ ॥ भवत्प्रपन्नो ब्रह्माऽपि त्वद्दत्तज्ञानेनैव इदं विश्वमपश्यत् तस्य तव पादमूलं कृतज्ञेन कथं विस्मर्यते न कथमपि। आपवर्ग्यशरणं मुक्तिसाधनम्। स्वार्थे ष्यञ् ॥ ८ ॥ ते नूनं वञ्चितचित्ताः। के। ये मुक्तिदं त्वामन्यहेतोस्तुच्छफलार्थमर्चन्ति। कुतः। कल्पवृक्षं त्वामर्चन्ति शवतुल्यदेहोपभोग्यमिच्छन्ति अतः। यत् स्पर्शजं विषयसुखं निरये नरके शूकरादियोनावपि भवति तदित्यन्वयः। कुणपः शवदुर्गन्ध्योः इति मेदिनी ॥ ९ ॥ या निर्वृतिः सुखं स्यात् सा वेदान्तिनां ब्रह्मण्यपि मा भूत् नास्तीत्यर्थः लडर्थे लुङ्। अन्तकासिना कालेन खण्डितात् विमानात् पततां स्वर्गिणां सा नास्तीति किमु वक्तव्यम् नहि सितारूपिणः सितास्वादः किन्तु तद्भिन्नानामेव एवमत्रापि एतेन भागवतसिद्धान्तोऽपि स्फोरितः ॥ १० ॥ त्वयि भक्तिं प्रकुर्वतां महतां मे प्रकृष्टसंगो भूयात्। येन मत्तः सन् अञ्जसा अयत्नत एव बहुदुःखं भवाब्धिं नेष्ये तरिष्यामि। न प्राप्स्यामीति वा। इषु गतौ धातुः ॥ ११ ॥ तेऽत्यन्तं प्रियं मर्त्यं शरीरं न स्मरन्ति तथा अदः मर्त्यमनुवर्तन्ते ये सुतादयस्तानपि ते न। ते के। ये भक्तेषु कृतप्रसङ्गाः ॥१२॥ तिर्यगादिभिः परिचितं परितो व्याप्तं महदादिविशेषं पृथिवीपर्यन्तं सदसत् चिदचिदात्मकम् अनेकं नानाविधं ते स्थविष्ठं विराड्रूपमेव एतावन्तं कालमहमवेदिषम् अतः परमप्राकृतरूपं च न एतत्तु अधुनैव भवत्प्रसादाद् वेद्मि। यत्र विवादो नास्ति स्वानुभूतत्वादित्यर्थः ॥ १३ ॥ यः पुमान् प्रलये एतद्विश्वं गृह्णन् तदङ्के शेषोत्सङ्गे शेते। किञ्च यस्य नाभिसिन्धूत्थस्वर्णवर्णलोकात्मककमलकर्णिकायां द्युमान् ब्रह्मा आविर्भवति तस्मै तं प्रसादयितुं प्रणतोऽस्मीत्यन्वयः। स्वदृक् अन्तर्दृष्टिः ॥ १४ ॥ त्वं तु व्यतिरिक्तः जीवविलक्षणः सन्नास्से। यत् यतः जीवस्य

यस्मिन् विरुद्धगतयो ह्यनिशं पतन्ति विद्यादयो विविधशक्तय आनुपूर्व्यात् ।
तद् ब्रह्म विश्वभवमेकमनन्तमाद्यमानन्दमात्रमविकारमहं प्रपद्ये ॥१६॥
सत्याऽऽशिषो हि भगवंस्तव पादपद्ममाशीस्तथानुभजतः पुरुषार्थमूर्तेः ।
अप्येवमार्य भगवान् परिपाति दीनान् वाश्रेव वत्सकमनुग्रहकातरोऽस्मान् ॥१७॥

मैत्रेय उवाच

अथाभिष्टुत एवं वै सत्संकल्पेन धीमता । भृत्यानुरक्तो भगवान् प्रतिनन्द्येदमब्रवीत् ॥१८॥

श्रीभगवानुवाच

वेदाहं ते व्यवसितं हृदि राजन्यबालक । तत्प्रयच्छामि भद्रं ते दुरापमपि सुव्रत ॥१९॥
नान्यैरधिष्ठितं भद्र यद् भ्राजिष्णु ध्रुवक्षिति । यत्र ग्रहर्क्षताराणां ज्योतिषां चक्रमाहितम्॥२०॥
मेढ्यां गोचक्रवत्स्थास्नु परस्तात्कल्पवासिनाम् । धर्मोऽग्निः कश्यपः शुक्रो मुनयो ये वनौकसः ।
चरन्ति दक्षिणीकृत्य भ्रमन्तो यत्सतारकाः ॥ २१ ॥
प्रस्थिते तु वनं पित्रा दत्त्वा गां धर्मसंश्रयः । षट्त्रिंशद्वर्षसाहस्रं रक्षिताव्याहतेन्द्रियः ॥२२॥
त्वद्भ्रातर्युत्तमे नष्टे मृगयायां तु तन्मनाः । अन्वेषन्ती वनं माता दावाग्निं सा प्रवेक्ष्यति॥२३॥
इष्ट्वा मां यज्ञहृदयं यज्ञैः पुष्कलदक्षिणैः । भुक्त्वा चेहाशिषः सत्या अन्ते मां संस्मरिष्यसि २४
ततो गन्तासि मत्स्थानं सर्वलोकनमस्कृतम् । उपरिष्टादृषिभ्यस्त्वं यतो नावर्तते गतः ॥२५॥

मैत्रेय उवाच

इत्यर्चितः स भगवानतिदिश्यात्मनः पदम् । बालस्य पश्यतो धाम स्वमगाद् गरुडध्वजः॥२६॥

बुद्धयवस्थां स्वापादिकं दृष्ट्या चिच्छक्त्या द्रष्टा साक्षात्पश्यसि । स्थितौ पालने उद्धरणे च तेषां त्वमेव अधिष्ठाता मुख्यो मखो विष्णुरित्यहं जाने । द्रष्टे ति तृन्नन्तोऽतः षष्ठ्यभावः १५ यस्मिन् आधारे आधेयभूताः विद्याऽविद्यादयः पतन्ति आविर्भवन्ति तद् ब्रह्म पुरो वर्तमानं अहं प्रपद्ये । विश्वभवं सर्वकारणम् ॥ १६ ॥ पुरुषार्थमूर्तेः परमानन्दमूर्तेस्तव पादपद्मम् आशिषो राज्यादेः सकाशात् सत्या आशीः परमार्थफलम् । कस्य । तथा तेन प्रकारेण त्वमेव पुरुषार्थ इत्येवमनु अनु भजतः पुंसः । यद्यप्येवमथाऽपि दीनानस्मानपि परितो भुक्तिमुक्तिदानेन पाति । वाश्रा नवप्रसूता गौः वत्सकं यथा ।१७।१८। व्यवसितं वाञ्छितम् ।१९। नान्यैरिति सार्द्धद्वयम् । ध्रुवा क्षितिर्निवासो यस्मिन् । मेढ्यां स्तम्भे वलीवर्दसमूहवत् यत्र चक्रं शिशुमाराख्यम् आहितं निबद्धं यच्च प्रदक्षिणीकृत्य भ्रमन्तो नक्षत्ररूपा धर्मादयश्चरन्तितदित्यन्वयः । वानप्रस्थाः मुनयः सप्तर्षयः परस्तात् लोकत्रयनाशेऽपि स्थास्नु ॥ २०।२१ ॥ वनं प्रति । गां पृथ्वीम् । रक्षिता रक्षिष्यति ॥ २२ ॥ मृगयायाम् आखेटे । सा सुरुचिः ॥ २३ ॥ यज्ञो हृदयं प्रिया मूर्तिः यस्य । पुष्कला पूर्णा । आशिषो भोगान् ॥ २४ ॥ उपरिष्टात् स्थितम् ॥ २५ ॥ अतिदिश्य दत्वा ॥ २६ ॥

सोऽपि संकल्पजं विष्णोः पादसेवोपसादितम् । प्राप्य संकल्पनिर्वाणं नातिप्रीतोऽभ्यगात् पुरम्

विदुर उवाच

सुदुर्लभं यत्परमं पदं हरेर्मायाविनस्तच्चरणार्चनार्जितम् ।

लब्ध्वाप्यसिद्धार्थमिवैकजन्मना कथं स्वमात्मानममन्यतार्थवित् ॥२८॥

मैत्रेय उवाच

मातुः सपत्न्या वाग्बाणैर्हृदि विद्धस्तु तान् स्मरन् । नैच्छन्मुक्तिपतेर्मुक्तिं तस्मात्तापमुपेयिवान्

ध्रुव उवाच

समाधिना नैकभवेन यत्पदं विदुः सनन्दादय ऊर्ध्वरेतसः ।

मासैरहं षड्भिरमुष्य पादयोश्छायामुपेत्यापगतः पृथङ्मतिः ॥३०॥

अहो बत ममानात्म्यं मन्दभाग्यस्य पश्यत । भवच्छिदः पादमूलं गत्वायाचे यदन्तवत् ॥३१॥

मतिर्विदूषिता देवैः पतद्भिरसहिष्णुभिः । यो नारदवचस्तथ्यं नाग्रहीषमसत्तमः ॥३२॥

दैवीं मायामुपाश्रित्य प्रसुप्त इव भिन्नदृक् । तप्ये द्वितीयेऽप्यसति भ्रातृभ्रातृव्यहृद्रुजा । ३३।

मयैतत्प्रार्थितं व्यर्थं चिकित्सेव गतायुषि ॥३४॥ प्रसाद्य जगदात्मानं तपसा दुष्प्रसादनम् ।

भवच्छिदमयाचेऽहं भवं भाग्यविवर्जितः ॥३५॥

स्वाराज्यं यच्छतो मौढ्यान्मानो मे भिक्षितो बत । ईश्वरात् क्षीणपुण्येन फलीकारानिवाधनः

मैत्रेय उवाच

न वै मुकुन्दस्य पदारविन्दयो रजोजुषस्तात भवादृशा जनाः ।

वाञ्छन्ति तद्दास्यमृतेऽर्थमात्मनो यदृच्छया लब्धमनस्समृद्धयः ॥३७॥

आकर्ण्यात्मजमायान्तं सम्परेत्य यथाऽऽगतम् । राजा न श्रद्दधे भद्रमभद्रस्य कुतो मम ॥३८॥

श्रद्धाय वाक्यं देवर्षेर्हर्षवेगेन धर्षितः । वार्ताहर्तुरतिप्रीतो हारं प्रादान्महाधनम् ॥३९॥

सङ्कल्पस्य समाप्तिर्यस्मात्तं पूर्णं सङ्कल्पजं स्वमनोरथम् ॥ २७ ॥ मायाविनः सकामस्य यद् दुर्लभं तदेकेनैव जन्मना लब्ध्वाऽपि अर्थविद् ध्रुवः कथं स्वमात्मानम् अपूर्णार्थमिव अमन्यत ॥ २८ ॥ मुक्तिमनुचरत्वम् । 'विष्णोरनुचरत्वं हि मोक्षमाहुर्मनीषिणः' इति पाद्मोक्तेः सायुज्यं न व्याख्येयं या निर्वृतिरित्यादिना तत्रारुचिप्रतिपादनात् ॥२९॥ नैकभवेन बहुजन्माभ्यस्तेन । यस्य पदं स्वरूपं न तस्य अमुष्य छायां सामीप्यं प्राप्यापि अहम् अपगतः वियोगं प्राप्तः ॥३०॥ बत खेदे । अनात्म्यमज्ञत्वम् । गत्वा प्राप्य । यत् अन्तवत् प्राकृतं राज्यं तत् अयाचे याचितवानस्मि । लङ् । उत्तमपुरुषैकवचनम् ।३१। पतद्भिःमदपेक्षयाऽधःस्थानं प्राप्तवद्भिः नाग्रहीषमिति वीरराघवः ।३२। यथा प्रसुप्तः स्वकीयं परं मत्वा तप्यते तथाऽहमपि भ्रातैव शत्रुरिति हृद्रोगेण तप्ये तापमनुभवामि ।३३। मयेति ।३४। भवच्छिदं प्रसाद्य भवमयाचे ।३५। स्वाराज्यं निजानन्दम् दास्यं वा । ददतः मानोऽभिमानः मानहेतुः राज्यादिः ईश्वरात् चक्रवर्तिनः फलीकारान् तुषान् ।३६। रजोजुषः परागरसास्वादिनः अन्यमर्थं न । लब्धेन भोजनाच्छादनेनैव समृद्धिः पूर्णता येषाम् ॥३७॥ सम्परेत्य मृत्वा ॥ ३८ ॥ श्रद्धाय विश्वस्य । धर्षितो विवशीकृतः । समाचारदातुः । बहुमूल्यम् ॥ ३९ ॥

सदश्वं रथमारुह्य कार्तस्वरपरिष्कृतम् । ब्राह्मणैः कुलवृद्धैश्च पर्यस्तोऽमात्यबन्धुभिः ॥४०॥
शङ्खदुन्दुभिनादेन ब्रह्मघोषेण वेणुभिः । निश्चक्राम पुरात्तूर्णमात्मजाभीक्षणोत्सुकः ॥४१॥
सुनीतिः सुरुचिश्चास्य महिष्यौ रुक्मभूषिते । आरुह्य शिबिकां सार्धमुत्तमेनाभिजग्मतुः ॥४२॥
तं दृष्ट्वोपवनाभ्याश आयान्तं तरसा रथात् । अवरुह्य नृपस्तूर्णमासाद्य प्रेमविह्वलः ॥४३॥
परिरेभेऽङ्गजं दोर्भ्यां दीर्घोत्कण्ठमनाः श्वसन् । विष्वक्सेनाङ्घ्रिसंस्पर्शहताशेषाघबन्धनम् ४४
अथाजिघ्रन्मुहुर्मूर्ध्नि शीतैर्नयनवारिभिः । स्नापयामास तनयं जातोद्दाममनोरथः ॥४५॥
अभिवन्द्य पितुः पादावाशीर्भिश्चाभिमन्त्रितः । ननाम मातरौ शीर्ष्णा सत्कृतः सज्जनाग्रणीः ४६
सुरुचिस्तं समुत्थाप्य पादावनतमर्भकम् । परिष्वज्याह जीवेति बाष्पगद्गदया गिरा ॥४७॥
यस्य प्रसन्नो भगवान् गुणैर्मैत्र्यादिभिर्हरिः । तस्मै नमन्ति भूतानि निम्नमाप इव स्वयम् ४८
उत्तमश्च ध्रुवश्चोभावन्योन्यं प्रेमविह्वलौ । अङ्गसङ्गादुत्पुलकावस्रौघं मुहुरूहतुः ॥४९॥
सुनीतिरस्य जननी प्राणेभ्योऽपि प्रियं सुतम् । उपगुह्य जहावाधिं तदङ्गस्पर्शनिर्वृता ॥५०॥
पयः स्तनाभ्यां सुस्राव नेत्रजैः सलिलैः शिवैः । तदाऽभिषिच्यमानाभ्यां वीर वीरसुवो मुहुः ५१
तां शशंसुर्जना राज्ञीं दिष्ट्या ते पुत्र आर्तिहा । प्रतिलब्धश्चिरं नष्टो रक्षिता मण्डलं भुवः ॥५२॥
अभ्यर्चितस्त्वया नूनं भगवान् प्रणतार्तिहा । यदनुध्यायिनो धीरा मृत्युं जिग्युः सुदुर्जयम् ५३
लाल्यमानं जनैरेवं ध्रुवं सभ्रातरं नृपः । आरोप्य करिणीं हृष्टः स्तूयमानोऽविशत् पुरम् ॥५४॥
तत्र तत्रोपसंक्लृप्तैर्लसन्मकरतोरणैः । सवृन्तैः कदलीस्तम्भैः पूगपोतैश्च तद्विधैः ॥५५॥
चूतपल्लववासःस्रङ्मुक्तादामविलम्बिभिः । उपस्कृतं प्रतिद्वारमपां कुम्भैः सदीपकैः ॥५६॥
प्राकारैर्गोपुरागारैः शातकुम्भपरिच्छदैः । सर्वतोऽलंकृतं श्रीमद्विमानशिखरद्युभिः ॥५७॥
मृष्टचत्वररथ्याट्टमार्गं चन्दनचर्चितम् । लाजाक्षतैः पुष्पफलैस्तण्डुलैर्बलिभिर्युतम् ॥५८॥

सदश्वमिति युग्मकम् । कार्तस्वरं सुवर्णम् । पर्यस्तः परिवृतः । ब्रह्मघोषेण वेदपाठेन सह ॥ ४०।४१ ॥ रुक्मं स्वर्णालङ्कारः ॥ ४२ ॥ तमिति युग्मकम् । अभ्याशे समीपे । तरसा वेगेनावरुह्य तरसा परिरेभे-इत्युभयत्रान्वेति । अघं बन्धनं च रागद्वेषादि यस्य ॥४३।४४॥ उद्दामः उत्कृष्टः ।४५। आशीर्भिः सह पृष्ट-कुशलमङ्गलः ।४६। अर्भकमिव लुप्तोपमा ॥४७॥ आपो यथा स्वयमेव निम्नं देशं प्रति प्रवहन्ति ।४८। उत्पुलकौ रोमाञ्चयुक्तौ । अस्रौघम् अश्रुप्रवाहम् । ऊहतुः मुमुचतुः ॥४९॥ निर्वृता आनन्दिता ॥५०॥वीरं पुत्रं ध्रुवं सूतै तस्याः वीरसुवः सुनीत्या अश्रुभिः अभिषिच्यमानाभ्यां स्तनाभ्याम् ।५१। चिरं नष्टो दर्शनमप्राप्तः इदानीं दिष्ट्या भाग्येन त्वया प्रतिलब्धः ॥५२॥ यत् यस्य हरेः अनुध्यायिनः ध्यानपरायणाः ॥५३॥ लाल्यमानमिति पञ्चकम् । 'करिणी बालमङ्गले' इति वचनात् ॥ ५४ ॥ कथंभूतं पुरम् । उपसंक्लृप्तैः रचितैः मकराकारैस्तोरणैर्वन्दनमालिकाभिरुपस्कृतमलङ्कृतम् । सवृन्तैः फलमञ्जरीयुक्तैः । तद्विधैः सवृन्तैः । पूगपोतैः पहुधा इति ॥ ५५ ॥ मुक्तादामानि मुक्तामालाश्च तेषां विशेषेण लम्बनमस्ति येषु तैः कुम्भैः ॥ ५६ ॥ विमानाग्राणामिव द्यौर्द्युति र्येषान्तैः । शातकौम्भाः स्वर्णमयाः परिच्छदाः सामग्र्यः येषु तैः प्राकारादिभिः । गोपुरं पुरद्वारम् ॥ ५७ ॥ मृष्टाः निर्मलीकृताः चत्वरादयो यस्मिन् । चत्वरं चतुष्पथः ।

ध्रुवाय पथि दृष्टाय तत्र तत्र पुरस्त्रियः । सिद्धार्थाक्षतदध्यम्बुदूर्वापुष्पफलानि च ॥५९॥
उपजह्रुः प्रयुञ्जाना वात्सल्यादाशिषः सतीः । शृण्वंस्तद्वल्गुगीतानि प्राविशद्भवनं पितुः ॥६०॥
महामणिव्रातमये स तस्मिन् भवनोत्तमे । लालितो नितरां पित्रा न्यवसद्दिवि देववत् ॥६१॥
पयः फेननिभाः शय्या दान्ता रुक्मपरिच्छदाः । आसनानि महार्हाणि यत्र रौक्मा उपस्कराः॥६२॥
यत्र स्फटिककुड्येषु महामारकतेषु च । मणिप्रदीपा आभान्ति ललनारत्नसंयुताः ॥६३॥
उद्यानानि च रम्याणि विचित्रैरमरद्रुमैः । कूजद्विहङ्गमिथुनैर्गायन्मत्तमधुव्रतैः ॥६४॥
वाप्यो वैदूर्यसोपानाः पद्मोत्पलकुमद्वतीः । हंसकारण्डवकुलैर्जुष्टाश्चक्राह्वसारसैः ॥६५॥
उत्तानपादो राजर्षिः प्रभावं तनयस्य तम् । श्रुत्वा दृष्ट्वाद्भुततमं प्रपेदे विस्मयं परम् ॥६६॥
वीक्ष्योढवयसं तं च प्रकृतीनां च सम्मतम् । अनुरक्तप्रजं राजा ध्रुवं चक्रे भुवः पतिम् ॥६७॥
आत्मानं च प्रवयसमाकलय्य विशाम्पतिः । वनं विरक्तः प्रातिष्ठद् विमृशन्नात्मनो गतिम् ॥६८॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां चतुर्थस्कन्धे ध्रुवराज्याभिषेकवर्णनं नाम नवमोऽध्यायः९

अथ दशमोऽध्यायः

मैत्रेय उवाच

प्रजापतेर्दुहितरं शिशुमारस्य वै ध्रुवः । उपयेमे भ्रमिं नाम तत्सुतौ कल्पवत्सरौ ॥ १ ॥
इलायामपि भार्यायां वायोः पुत्र्यां महाबलः । पुत्रमुत्कलनामानं योषिद्रत्नमजीजनत् ॥ २ ॥

रथ्या रथमार्गः । अट्टः चबूतरा अटारी इति वा मार्गोऽवान्तरः । चन्दनजलैः सिक्तम् । अक्षतैः यवैः ।५८। ध्रुवायेति । सिद्धार्थैः श्वेतसर्षपः तदादीनि ध्रुवाय उपजह्रुः व्यकिरन् । सती आशिषः श्रेष्ठाशीर्वादान् मयट् प्रयुञ्जानाः । वल्गूनि मनोहराणि ।५९।६०। व्रातः समूहः तत्प्रचुरे प्राचुर्ये ।६१। दान्ताः हस्तिदन्तनिर्मितपादाः । रुक्मेति । स्वर्णमया उपर्याच्छादनपटा यासाम् । यत्र भवने । हैमाः पात्रादयः ।६२। यत्रेति त्रिकम् । मणय प्रदीपा इव आभान्तीति त्रिष्वपि योज्यम् ॥ ६३।६४ ॥ कुमुत् कुमुदं तद्वत्यः । कारण्डवः बत्तख इति ॥ ६५ ॥ तम् अलौकिकम् ॥ ६६ ॥ ऊढवयसं प्राप्तयौवनम् । प्रकृतीनां मन्त्रिणाम् ॥ ६७ ॥ प्रवयसं वृद्धम् । आकलय्य ज्ञात्वा । आत्मनो गतिं मुक्त्युपायम् ॥ ६८ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे गूढार्थदीपिन्यां नवमोऽध्यायः ।

•

दशमे भ्रातरं यक्षैर्हतं श्रुत्वा ध्रुवोऽलकाम् ।
गत्वा रणे बहून् यक्षान् जघानेति निरूप्यते ॥ १ ॥

एतच्चोत्तानपादवनगमनान्तरमेव ज्ञेयम् । उपयेमे विवाहितवान् ।१। योषिद्रत्नं कन्यारत्नं च ।२।

उत्तमस्त्वकृतोद्वाहो मृगयायां बलीयसा । हतः पुण्यजनेनाद्रौ तन्माताऽस्य गतिं गता ॥ ३ ॥

ध्रुवो भ्रातृवधं श्रुत्वा कोपामर्षशुचार्पितः । जैत्रं स्यन्दनमास्थाय गतः पुण्यजनालयम् ॥ ४ ॥

गत्वोदीचीं दिशं राजा रुद्रानुचरसेविताम् । ददर्श हिमवद्द्रोण्यां पुरीं गुह्यकसंकुलाम् ॥ ५ ॥

दध्मौ शङ्खं बृहद्बाहुः खं दिशश्चानुनादयन् । येनोद्विग्नदृशः क्षत्तरुपदेव्योऽत्रसन्भृशम् ॥ ६ ॥

ततो निष्क्रम्य बलिन उपदेवमहाभटाः । असहन्तस्तन्निनादमभिपेतुरुदायुधाः ॥ ७ ॥

स तानापततो वीर उग्रधन्वा महारथः । एकैकं युगपत्सर्वानहन् बाणैस्त्रिभिस्त्रिभिः॥ ८ ॥

ते वै ललाटलग्नैस्तैरिषुभिः सर्व एव हि । मत्वा निरस्तमात्मानमाशंसन् कर्म तस्य तत्॥९॥

तेऽपि चामुममृष्यन्तः पादस्पर्शमिवोरगाः । शरैरविध्यन् युगपद् द्विगुणं प्रचिकीर्षवः ॥१०॥

ततः परिघनिस्त्रिंशैः प्रासशूलपरश्वधैः । शक्त्यृष्टिभिर्भुशुण्डीभिश्चित्रवाजैः शरैरपि ॥११॥

अभ्यवर्षन् प्रकुपिताः सरथं सहसारथिम् । इच्छन्तस्तत्प्रतीकर्तुमयुतानि त्रयोदश ॥१२॥

औत्तानपादिः स तदा शस्त्रवर्षेण भूरिणा । न चैवादृश्यतच्छन्न आसारेण यथा गिरिः ॥१३॥

हाहाकारस्तदैवासीत् सिद्धानां दिवि पश्यताम् । हतोऽयं मानवः सूर्यो मग्नः पुण्यजनार्णवे॥१४॥

नदत्सु यातुधानेषु जयकाशिष्वथो मृधे । उदतिष्ठद्रथस्तस्य नीहारादिव भास्करः ॥१५॥

धनुर्विस्फूर्जयन् दिव्यं द्विषतां खेदमुद्वहन् । अस्त्रौघं व्यधमद्बाणैर्घनानीकमिवानिलः ॥१६॥

तस्य ते चापनिर्मुक्ता भित्त्वा वर्माणि रक्षसाम् । कायानाविविशुस्तिग्मा गिरीनशनयो यथा १७

भल्लैः संछिद्यमानानां शिरोभिश्चारुकुण्डलैः । ऊरुभिर्हेमतालाभैर्दोर्भिर्वलयवल्गुभिः ॥१८॥

पुण्यजनेन यक्षेण । अद्रौ हिमालये । गतिं गता मृतेत्यर्थः ॥ ३ ॥ अमर्षोऽक्षान्तिः शुक् शोकश्च त्रयाणां द्वन्द्वैक्यं तेन व्याप्तः । जैत्रं जयप्रदमुहूर्तरचितम् । आलयम् अलकाम् ॥ ४ ॥ राजा ध्रुवः । द्रोण्यां द्रोणी निम्नतटे गिरेः ।५। दध्मौ वादितवान् । हे क्षत्तः । विदुर! । उपदेव्यः यक्षस्त्रियः ।६। उपदेवमहाभटाः कुवेरसैनिकाः । अभिपेतुः सम्मुखमाजग्मुः ॥ ७ ॥ स ध्रुवः । युगपत् एककालावच्छेदेन ॥ ८ ॥ ते यक्षा : निरस्तं पराजितम् । आशंसन् प्रशशंसुः ।।९॥ च पुनश्च ते अमृष्यन्तो अमुम् असहमाना अविध्यन् द्विगुणं यथा भवति तथा षड्भिः षड्भि र्बाणैः प्रतिकर्तुमिच्छन्तः ॥ १० ॥ तत इति युग्मकम् । परिघो लोहवद्धलगुडः । निस्त्रिंशः खड्गः । प्रासः भाला इति । ऋष्टिः द्विधारखड्गः । भुशुण्डी वन्दूख इति । वाजैः पक्षैः । त्रयोदश अयुतानि एकलक्षादुपरि त्रिंशत्सहस्राणिः ॥ ११।१२ ॥ नचैवाऽदृश्यतेति प्राचीनपाठः । आसारेण धारासंपातेन ॥ १३ ॥ हाहाकारः हर्षध्वनिः । सूर्यतुल्यः मनुपौत्रः अयं विजयं हतः प्राप्त एव । 'अयः शुभावहो विधिः' इत्यमरात् । यद्वा । हर्षेण अर्णवे मग्नः प्रविष्टः यथा सूर्यस्तोयं जलमिति वास्तवोऽर्थः ।१४। यातूनि यातना धीयन्तेऽस्मिन्निति तेषु यातुधानेषु यक्षराक्षसेषु । जयप्रकाशकेषु सत्सु मृधे युद्धे ॥ १५ ॥ विस्फूर्जयन् टङ्कारयुक्तं कुर्वन् । व्यधमत् चूर्णयामास ॥ १६ ॥ तस्य ध्रुवस्य ते वाणाः । रक्षसां यक्षाणाम् । अशनयो वज्राणि ॥ १७॥ भल्लैरिति युग्मकम् । यक्षाणां शिरआदिभिः आस्तृता आच्छन्नास्ता रणभुवो रेजुरित्यन्वयः । हेमतालाभैः स्वर्णतालवृक्षसदृशैः । वल्गुभिः सुन्दरैः ।१८।

हारकेयूरमुकुटैरुष्णीषैश्च महाधनैः । आस्तृतास्ता रणभुवो रेजुर्वीरमनोहराः ॥१९॥

हतावशिष्टा इतरे रणाजिराद्रक्षोगणाः क्षत्रियवर्यसायकैः ।
प्रायो विवृक्णावयवा विदुद्रुवुर्मृगेन्द्रविद्रावितयूथपा इव ॥२०॥

अपश्यमानः स तदाऽऽततायिनं महामृधे कंचन मानवोत्तमः ।
पुरीं दिदृक्षन्नपि नाविशद् द्विषां न मायिनां वेद चिकीर्षितं जनः ॥२१॥

इति ब्रुवंश्चित्ररथः स्वसारथिं यत्तः परेषां प्रतियोगशङ्कितः ।
शुश्राव शब्दं जलधेरिवेरितं नभस्वतो दिक्षु रजोऽन्वदृश्यत ॥२२॥

क्षणेनाच्छादितं व्योम घनानीकेन सर्वतः । विस्फुरत्तडिता दिक्षु त्रासयत्स्तनयित्नुना ॥२३॥
ववृषू रुधिरौघासृक्पूयविण्मूत्रमेदसः । निपेतुर्गगनादस्य कबन्धान्यग्रतोऽनघ ॥२४॥
ततः खेऽदृश्यत गिरिर्निपेतुः सर्वतोदिशम् । गदापरिघनिस्त्रिंशमुसलाः साश्मवर्षिणः ॥२५॥
अहयोऽशनिनिःश्वासा वमन्तोऽग्निं रुषाक्षिभिः । अभ्यधावन् गजा मत्ताः सिंहव्याघ्राश्च यूथशः
समुद्र ऊर्मिभिर्भीमः प्लावयन् सर्वतो भुवम् । आससाद महाह्लादः कल्पान्त इव भीषणः॥२७॥
एवंविधान्यनेकानि त्रासनान्यमनस्विनाम् । ससृजुस्तिग्मगतय आसुर्या माययाऽसुराः ॥२८॥
ध्रुवे प्रयुक्तामसुरैस्तां मायामतिदुस्तराम् । निशाम्य तस्य मुनयः शमाशंसन् समागताः॥२९॥

मुनयः ऊचुः

औत्तानपादे भगवांस्तव शार्ङ्गधन्वा देवः क्षिणोत्ववनतार्तिहरो विपक्षान् ।
यन्नामधेयमभिधाय निशम्य चाद्धा लोकोऽञ्जसा तरति दुस्तरमङ्ग मृत्युम् ॥३०॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां चतुर्थस्कन्धे दशमोऽध्यायः ॥१०॥

---

१९ ॥ रक्षो यक्षः । विद्राविता हस्तिन इव । विद्रावितेति प्राचीनपाठः ॥ २० ॥ आततायिनं शस्त्रपाणिम् ॥ २१ ॥ चित्ररथो ध्रुवः । प्रतियोगः प्रतिक्रिया । ईरितम् उत्पन्नम् । नभस्वतो वायोर्हेतोः ॥ २२ ॥ सर्वतो दिक्षु व्योम । त्रासयन्तः स्तनयित्नवो वज्रगर्जितानि यस्मिंस्तेन मेघमण्डलेन॥२३॥ ववृषुः मेघा इति शेषः । न सृजति न त्यजति शरीरमिति असृक् श्लेष्मादिः । अस्य ध्रुवस्य ॥२४॥ ततो गिरेः सकाशात् गदादयो निपेतुः । कथंभूताः अश्मसहितं यद्वर्षं तद्वन्तः ॥२५॥ अहयो गजाश्च ॥२६॥ आससाद निकटमगात् । प्रलये यथा भीषणः तथा भीमः ॥ २७ ॥ त्रासनानि भयसाधनानि । तिग्मगतयः क्रूरप्रवृत्तयः । असुरतुल्या यक्षाः ॥ २८ ॥ तस्य शं कल्याणं प्रार्थितवन्तः ॥ २९ ॥ स देवः तव विपक्षान् क्षिणोतु नाशयतु । यत् यस्य । अद्धा साक्षात् । अञ्जसा सुखेन ॥ ३० ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे गूढार्थदीपिन्यां दशमोऽध्यायः ।

अथैकादशोऽध्यायः

मैत्रेय उवाच

निशम्य गदतामेवमृषीणां धनुषि ध्रुवः । संदधेऽस्त्रमुपस्पृश्य यन्नारायणनिर्मितम् ॥ १ ॥
संधीयमान एतस्मिन् माया गुह्यकनिर्मिताः । क्षिप्रं विनेशुर्विदुर क्लेशा ज्ञानोदये यथा ॥ २ ॥

तस्यार्षमस्त्रं धनुषि प्रयुञ्जतः सुवर्णपुङ्खाः कलहंसवाससः ।
विनिःसृता आविविशुर्द्विषद्बलं यथा वनं भीमरवाः शिखण्डिनः ॥ ३ ॥
तैस्तिग्मधारैः प्रधने शिलीमुखैरितस्ततः पुण्यजना उपद्रुताः ।
तमभ्यधावन् कुपिता उदायुधाः सुपर्णमुन्नद्धफणा इवाहयः ॥ ४ ॥
स तान् पृषत्कैरभिधावतो मृधे निकृत्तबाहूरुशिरोधरोदरान् ।
निनाय लोकं परमर्कमण्डलं व्रजन्ति निर्भिद्य यमूर्ध्वरेतसः ॥ ५ ॥
तान् हन्यमानानभिवीक्ष्य गुह्यकाननागसश्चित्ररथेन भूरिशः ।
औत्तानपादिं कृपया पितामहो मनुर्जगादोपगतः सहर्षिभिः ॥ ६ ॥

मनुरुवाच

अलं वत्सातिरोषेण तमोद्वारेण पाप्मना । येन पुण्यजनानेतानवधीस्त्वमनागसः ॥ ७ ॥
नास्मत्कुलोचितं तात कर्मैतत्सद्विगर्हितम् । वधो यदुपदेवानामारब्धस्तेऽकृतैनसाम् ॥ ८ ॥
नन्वेकस्यापराधेन प्रसङ्गाद्बहवो हताः । भ्रातुर्वधाभितप्तेन त्वयाङ्ग भ्रातृवत्सल ॥ ९ ॥
नायं मार्गो हि साधूनां हृषीकेशानुवर्तिनाम् । यदात्मानं पराग्गृह्य पशुवद् भूतवैशसम् ॥१०॥
सर्वभूतात्मभावेन भूतावासं हरिं भवान् । आराध्याप दुराराध्यं विष्णोस्तत्परमं पदम् ११

एकादशे मनुर्दृष्ट्वा यक्षनाशमदोषतः ।
ध्रुवं निवार्य तत्रैत्य सान्त्वयामास युक्तितः ॥१॥

निशम्य वच इति शेषः । उपस्पृश्य आचम्य ॥१॥ एतस्मिन् अस्त्रे ॥२॥ ऋषेर्नारायणस्येदं मार्षमस्त्रमिति पाठः । प्रयुञ्जतः सन्दधतः सतः ततो विनिःसृताः शरा बलं विविशुः । पुंखा-मूलप्रान्ताः कलहंसा राजहंसाः । तेषामिव वासांसि पक्षा येषाम् । भीमरवत्वं सर्पाद्यावेशे ।३। प्रधने युद्धे तीक्ष्णधारैर्वाणैः उपद्रुताः ताडयमाना यक्षाः तं ध्रुवम् । उन्नद्धा उत्थापिताः ॥ ४ ॥ स ध्रुवः मृधे युद्धे अभिधावतस्तान् परं लोकम् । मण्डलं निर्भिद्य यं सन्यासिनस्तम् । पृषत्कैर्वाणैर्निकृत्तेति । शिरोधरा ग्रीवा ॥ ५ ॥ अनागसो निरपराधान् । चित्ररथेन ध्रुवेण । विमानेन वा मनुरुपगत इत्यत्र योज्यम् ॥ ६ ॥ तमसो नरकस्य । पाप्मना हिंसाजनकेन ॥ ७ ॥ आरब्ध इति यत् एतत् । 'एनः पापापराधयोः' इति कोशः ॥ ८ ॥ प्रसङ्गात् तत्संबन्धात् । अङ्ग हे ॥ ९ ॥ पराक् बाह्येन्द्रियैर्ग्राह्यं देहम् आत्मानं गृह्य मत्वा वैशसं प्राणिहननमिति यत् अयम् ॥ १० ॥ यो भवान् तत्पदम् आप स त्वमिति योज्यम् । सर्व-

स त्वं हरेरनुध्यातस्तत्पुंसामपि सम्मतः । कथं त्ववद्यं कृतवाननुशिक्षन् सतां व्रतम् ॥१२॥
तितिक्षया करुणया मैत्र्या चाखिलजन्तुषु । समत्वेन च सर्वात्मा भगवान् सम्प्रसीदति॥१३॥
सम्प्रसन्ने भगवति पुरुषः प्राकृतैर्गुणैः । विमुक्तो जीवनिर्मुक्तो ब्रह्म निर्वाणमृच्छति ॥१४॥
भूतैः पञ्चभिरारब्धैर्योषित्पुरुष एव हि । तयोर्व्यवायात्सम्भूतिर्योषित्पुरुषयोरिह ॥१५॥
एवं प्रवर्तते सर्गः स्थितिः संयम एव च । गुणव्यतिकराद् राजन् मायया परमात्मनः ॥१६॥
निमित्तमात्रं तत्रासीन्निर्गुणः पुरुषर्षभः । व्यक्ताव्यक्तमिदं विश्वं यत्र भ्रमति लोहवत् ॥१७॥

स खल्विदं भगवान् कालशक्त्या गुणप्रवाहेण विभक्तवीर्यः ।
करोत्यकर्तैव निहन्त्यहन्ता चेष्टा विभूम्नः खलु दुर्विभाव्या ॥१८॥

सोऽनन्तोऽन्तकरः कालोऽनादिरादिकृदव्ययः । जनं जनेन जनयन् मारयन् मृत्युनान्तकम्॥१९॥

न वै स्वपक्षोऽस्य विपक्ष एव वा परस्य मृत्योर्विशतः समं प्रजाः ।
तं धावमानमनुधावन्त्यनीशा यथा रजांस्यनिलं भूतसंघाः ॥२०॥

आयुषोऽपचयं जन्तोस्तथैवोपचयं विभुः । उभाभ्यां रहितः स्वस्थो दुःस्थस्य विदधात्यसौ॥२१
केचित्कर्म वदन्त्येनं स्वभावमपरे नृप । एके कालं परे दैवं पुंसः काममुतापरे ॥२२॥
अव्यक्तस्याप्रमेयस्य नानाशक्त्युदयस्य च । न वै चिकीर्षितं तात को वेदाथ स्वसम्भवम्॥२३॥
न चैते पुत्रक भ्रातुर्हन्तारो धनदानुगाः । विसर्गादानयोस्तात पुंसो दैवं हि कारणम् ॥२४॥
स एव विश्वं सृजति स एवावति हन्ति च । अथापि ह्यनहङ्कारान्नाज्यते गुणकर्मभिः ॥२५॥

भूतेषु आत्मा परमात्मा आस्ते इति भावनया तं हरेः अनु निरन्तर ध्यातं ध्यानं यस्मिन् तत्पुंसां नारदादीनामपि । अवद्यं निन्द्यं कर्म हिंसनरूपम् ॥ ११।१२ ॥ व्रतमेवाह । महत्सु । नीचेषु । समेषु क्रमेण ॥१३॥ जीवेन लिङ्गशरीरेण । निर्वाणम् आनन्दनिधिं श्रीकृष्णं प्राप्नोति ॥ १४ ॥ मिथो हन्तृत्वादिकमपि निराकरोति । एवकारश्चार्थे हि प्रसिद्धौ । संभूतिरुत्पत्तिः ॥ १५ ॥ व्यतिकरात् क्षोभात् न्यूनाधिकभावेन संबन्धात् ।१६। यत्र यस्मिन् निमित्ते सति कार्यकारणात्मकं स्थूल सूक्ष्मात्मकं वा जडमपि इदं चेतनीभवति । यथाऽयस्कान्ते निमित्ते लोहं सचेष्टं भवति तद्वत् ॥ १७ ॥ इदं विश्वम् । प्रवाहेण क्षोभेण विभक्तं वीर्यं रज आदि शक्तिः सृष्ट्यादिविषयकं यस्य । विभूम्नोऽनन्तशक्तेः । अतर्क्या ।१८। जनेन पित्रादिना जनं पुत्रादि जनयन् आदिकृत अन्तकं चोरादिकं तन्मृत्युहेतुना राजादिना मारयन् अन्तकरः स्वयं तु अनन्तादिरूपः ।१९। मृत्योः कर्मानुसारेण मारकस्य समं पक्षपातरहितं यथास्यात्तथा प्रजा विशतः संहरतः । धावमानं क्रियां कुर्वन्तं अनीशाः कर्माधीनाः भूतसंघा धावन्ति क्रियां कुर्वन्ति ॥ २० ॥ दुःस्थस्य कर्माधीनस्य । अपचयम् अकालमृत्युं पापमृत्युमित्यर्थः । 'दुर्मतिः पापमरणमकालमरणं तथा । पर्याया एव विज्ञेया न कालेन विना मृतिः' इत्युक्तेः अपचयम् उपचयं ह्रासं वृद्धि वा मशकादौ देवादौ च ॥ २१ ॥ एनमीश्वरम् । केचिन्मीमांसकाः । अपरे चार्वाकाः । एके व्यावहारिकाः । परे ज्योतिर्विदः । अपरे वात्स्यायनादयः ॥२२॥ अस्य चिकीर्षितमेव तावत् न वेद अथ स्वसंभवम् ईश्वरं च को वेद न कोऽपि ॥२३॥ विसर्गादानयोः जन्ममृत्योः । 'दोऽवखण्डने' इत्यस्मात् ॥२४॥ न अज्यते

एष भूतानि भूतात्मा भूतेशो भूतभावनः। स्वशक्त्या मायया युक्तः सृजत्यत्ति च पाति च२६

तमेव मृत्युममृतं तात दैवं सर्वात्मनोपेहि जगत्परायणम्।
यस्मै बलिं विश्वसृजो हरन्ति गावो यथा वै नसि दामयन्त्रिताः ॥२७॥
यः पञ्चवर्षो जननीं त्वं विहाय मातुः सपत्न्या वचसा भिन्नमर्मा।
वनं गतस्तपसा प्रत्यगक्षमाराध्य लेभे मूर्ध्नि पदं त्रिलोक्याः ॥२८॥
तमेनमङ्गात्मनि मुक्तविग्रहे व्यपाश्रितं निर्गुणमेकमक्षरम्।
आत्मानमन्विच्छ विमुक्तमात्मदृग् यस्मिन्निदं भेदमसत्प्रतीयते ॥२९॥
त्वं प्रत्यगात्मनि तदा भगवत्यनन्त आनन्दमात्र उपपन्नसमस्तशक्तौ।
भक्तिं विधाय परमां शनकैरविद्याग्रन्थिं विभेत्स्यसि ममाहमिति प्ररूढम्॥३०॥

संयच्छ रोषं भद्रं ते प्रतीपं श्रेयसां परम्। श्रुतेन भूयसा राजन्नगदेन यथाऽऽमयम् ॥३१॥
येनोपसृष्टात्पुरुषाल्लोक उद्विजते भृशम्। न बुधस्तद्वशं गच्छेदिच्छन्नभयमात्मनः ॥३२॥
हेलनं गिरिशभ्रातुर्धनदस्य त्वया कृतम्। यज्जघ्निवान् पुण्यजनान् भ्रातृघ्ना इत्यमर्षितः३३
तं प्रसादय वत्साशु सन्नत्या प्रश्रयोक्तिभिः। न यावन्महतां तेजः कुलं नोऽभिभविष्यति॥३४॥
एवं स्वायम्भुवः पौत्रमनुशास्य मनुर्ध्रुवम्। तेनाभिवन्दितः साकमृषिभिः स्वपुरं ययौ ॥३५॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां चतुर्थस्कन्धे एकादशोऽध्यायः ॥ ११ ॥

न लिप्यते ॥ २५ ॥ क्रमेण ब्रह्मा रुद्रः विष्णुः ॥ २६ ॥ मृत्युं मरणहेतुम्। अमृतं जीवनहेतुम्। उपेहि शरणं गच्छ। यस्मै यत्संतोषार्थं ब्रह्मादयः बलिं हरन्ति आज्ञां पालयन्ति। दाम रज्जुः ॥ २७ ॥ यो भवान् प्रत्यगक्षं निरुद्धेन्द्रियं यथा स्यात्तथा हरिमाराध्य मूर्ध्नि उपरि पदं लेभे स त्वं तमेवात्मानम् अन्विच्छेति द्वयोरन्वयः। आत्मनि मनसि। विग्रहे विरोधे। अवस्थितम्। यस्मिन् अन्विष्टे सति जगत् असत् अरोचकमेव प्रतीयते कीदृक्। अयं शत्रुमित्रादिरूपः दृश्यमानो भेदो यत्र तत् ॥ २८।२९ ॥ त्वं तदा पञ्चवर्षवयसि एव ग्रन्थिं व्यभिनः किमिदं स्मरसीति अभिज्ञानवचने' इति भूते एव लृट्। प्रत्यगात्मनि जीवान्तर्यामिणि ॥ ३० ॥ प्रतीपं विघातकं। श्रुतेन मदुपदेशेन। अगदेन औषधेन ॥ ३१ ॥ येन रोषेण व्याप्तात् ॥ ३२ ॥ हेलनमवज्ञानम्। यत् यतः। भ्रातुः सख्युः। भ्रातृघ्ना इत्येव पाठो युक्त इति पदस्यारस्यात् यत् यत इति स्वामिव्याख्यानाच्चेति दीपिनी ॥ ३३ ॥ नाभिभवेत् न दहेत्। लिङर्थे लृट् ॥ ३४ ॥ स्वपुरं स्वं-लोकम् ॥ ३५ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे गूढार्थदीपिन्यां मेकादशोऽध्यायः।

अथ द्वादशोऽध्यायः

मैत्रेय उवाच

ध्रुवं निवृत्तं प्रतिबुद्धय वैशसादपेतमन्युं भगवान् धनेश्वरः ।
तत्रागतश्चारणयक्षकिन्नरैः संस्तूयमानोऽभ्यवदत् कृताञ्जलिम् ॥ १ ॥

धनद उवाच

भो भोः क्षत्रियदायाद परितुष्टोऽस्मि तेऽनघ । यस्त्वं पितामहादेशाद्वैरं दुस्त्यजमत्यजः ॥२॥
न भवानवधीद्यक्षान्न यक्षा भ्रातरं तव । काल एव हि भूतानां प्रभुरप्ययभावयोः ॥३॥
अहं त्वमित्यपार्था धीरज्ञानात्पुरुषस्य हि । स्वाप्नीवाभात्यतद्ध्यानाद्यया बन्धविपर्ययौ ॥४॥
तद्गच्छ ध्रुव भद्रं ते भगवन्तमधोक्षजम् । सर्वभूतात्मभावेन सर्वभूतात्मविग्रहम् ॥५॥
भजस्व भजनीयाङ्घ्रिमभवाय भवच्छिदम् । युक्तं विरहितं शक्त्या गुणमय्याऽऽत्ममायया ६
वृणीहि कामं नृप यन्मनोगतं मत्तस्त्वमौत्तानपदेऽविशङ्कितः ।
वरं वरार्होऽम्बुजनाभपादयोरनन्तरं त्वां वयमङ्ग शुश्रुम ॥७॥

मैत्रेय उवाच

स राजराजेन वराय चोदितो ध्रुवो महाभागवतो महामतिः ।
हरौ स वव्रेऽचलितां स्मृतिं यया तरत्ययत्नेन दुरत्ययं तमः ॥८॥
तस्य प्रीतेन मनसा तां दत्त्वैडविडस्ततः । पश्यतोऽन्तर्दधे सोऽपि स्वपुरं प्रत्यपद्यत ॥९॥
अथायजत यज्ञेशं क्रतुभिर्भूरिदक्षिणैः । द्रव्यक्रियादेवतानां कर्म कर्मफलप्रदम् ॥१०॥
सर्वात्मन्यच्युतेऽसर्वे तीव्रौघां भक्तिमुद्वहन् । ददर्शात्मनि भूतेषु तमेवावस्थितं विभुम् ॥११॥

द्वादशे प्राप्तसम्मानः कुबेरादाययौ पुरीम् ।
यज्ञैर्हरिं समाराध्य सदेहोऽगाद् ध्रुवं ध्रुवः ॥ १ ॥

वैशसात् वधात् युद्धात् वा 'युद्धे हिंसाक्रूयोश्च वैशसस्त्रिषु वर्तते' इति निरुक्तिः ॥ १ ॥ क्रोधत्यागजन्यहर्षातिरेकात् द्विरुक्तिः भो दायाद पुत्र ! भो अनघ ॥ २ ॥ अप्ययभावयोः मृत्युजन्मनोः । प्रभुः कर्ता ॥ ३ ॥ आत्मस्वरूपाज्ञानात् अतद्ध्यानं देहानुसन्धानं तस्मादेव अहं हन्ता त्वं वध्य इति अतात्त्विकी मिथ्या बुद्धिः । यया बन्धः संसारः दुःखादिश्च ॥ ४ ॥ तदिति युग्मकम् । तत् तस्मात् गच्छ गत्वा च अभवाय मोक्षाय भगवन्तं भजस्वेत्यन्वयः । आत्मभावेन भगवद्दृष्ट्या । सर्वभूतात्मको विग्रहो यस्य । युक्तमित्यादि सगुणनिर्गुणभेदेन ॥५।६॥ अङ्ग हे ध्रुव ! त्वामनन्तरमतिनिकटम् अतस्त्वं वरार्हः अत एव च यत् तत् काममसंकोचेन मत्तो वृणीहीत्यन्वयः ॥७॥ स चोदितोऽभूत् स च वव्रे अतो न पुनरुक्तिः । राज्ञा सह वर्तमानेषु लोकेषु राजते इत्येकं पदं वा । तमः संसारम् ॥ ८ ॥ इडविडापुत्रः कुबेरः । सोऽपि ध्रुवोऽपि ॥ ९ ॥ कर्म । द्रव्यादिसंबन्धि कर्मप्रदं कर्मकारयितारं तत्फलप्रदं च ॥१०॥ सर्वे पूर्णे । अकारच्छेदे प्रपञ्चाद्वयतिरिक्ते वा ॥ ११ ॥ सेतुः मर्यादा ॥ १२ ॥ कुर्वन् कर्तुमिच्छन् ।

तमेवं शीलसम्पन्नं ब्रह्मण्यं दीनवत्सलम् । गोप्तारं धर्मसेतूनां मेनिरे पितरं प्रजाः ॥१२॥
षट्त्रिंशद्वर्षसाहस्रं शशास क्षितिमण्डलम् । भोगैः पुण्यक्षयं कुर्वन्नभोगैरशुभक्षयम् ॥१३॥
एवं बहुसवं कालं महात्माविचलेन्द्रियः । त्रिवर्गौपयिकं नीत्वा पुत्रायादान्नृपासनम् ॥१४॥
मन्यमान इदं विश्वं मायारचितमात्मनि । अविद्यारचितस्वप्नगन्धर्वनगरोपमम् ॥१५॥

आत्मस्त्र्यपत्यसुहृदो बलमृद्धकोशमन्तःपुरं परिविहारभुवश्च रम्याः ।
भूमण्डलं जलधिमेखलमाकलय्य कालोपसृष्टमिति स प्रययौ विशालाम् ॥१६॥
तस्यां विशुद्धकरणः शिववार्विगाह्य बद्ध्वाऽऽसनं जितमरुन्मनसाऽऽहृताक्षः ।
स्थूले दधार भगवत्प्रतिरूप एतद् ध्यायंस्तदव्यवहितो व्यसृजत्समाधौ ॥१७॥
भक्तिं हरौ भगवति प्रवहन्नजस्रमानन्दबाष्पकलया मुहुरर्द्यमानः ।
विक्लिद्यमानहृदयः पुलकाचिताङ्गो नात्मानमस्मरदसाविति मुक्तलिङ्गः ॥१८॥

स ददर्श विमानाग्र्यं नभसोऽवतरद् ध्रुवः । विभ्राजयद्दशदिशो राकापतिमिवोदितम् ॥१९॥

तत्रानु देवप्रवरौ चतुर्भुजौ श्यामौ किशोरावरुणाम्बुजेक्षणौ ।
स्थितावववष्टभ्य गदां सुवाससौ किरीटहाराङ्गदचारुकुण्डलौ ॥२०॥
विज्ञाय तावुत्तमगायकिङ्करावभ्युत्थितः साध्वसविस्मृतक्रमः ।
ननाम नामानि गृणन् मधुद्विषः पार्षत्प्रधानाविति संहताञ्जलिः ॥२१॥
तं कृष्णपादाभिनिविष्टचेतसं बद्धाञ्जलिं प्रश्रयनम्रकन्धरम् ।
सुनन्दनन्दावुपसृत्य सस्मितं प्रत्यूचतुः पुष्करनाभसम्मतौ ॥२२॥

सुनन्दनन्दावूचतुः

भो भो राजन् सुभद्रं ते वाचं नोऽवहितः शृणु । यं पञ्चवर्षस्तपसा भवान् देवमतीतृपत् २३
तस्याखिलजगद्धातुरावां देवस्य शार्ङ्गिणः । पार्षदाविह सम्प्राप्तौ नेतुं त्वां भगवत्पदम् ॥२४॥

अभोगैर्व्रतादिभिः ॥ १३ ॥ बहुसवं बहुसंवत्सरात्मकम् । औपयिकम् उपयोगिनं कालं नीत्वा गमयित्वा । पुत्राय वत्सरनाम्ने ॥ १४।१५ ॥ आत्मस्त्र्यादिकं सर्वमपि कालोपसृष्टं कालग्रस्तमिति आकलय्य निश्चित्य स विशालां बदरिकाश्रमं प्रययौ । अविद्याऽध्यस्तं स्वप्नोपमं नगरोपमं च क्षणिकमेव मन्यमानः ॥१६॥ शिववाः गाङ्गोदकं विगाह्य प्रविश्य स्नात्वा च विशुद्धेन्द्रियः सन् भगवत्प्रतिमासदृशे स्थूले विराड्रूपे एतत् मनो दधार । धारणां चकार तत् ध्यायन् अव्यवहितः भगवत्स्वरूपे व्यवधानशून्यः सन् समाधौ स्थितः तत्स्थूलं व्यसृजत् विस्मृतवान् ॥ १७ ॥ भक्ति प्रवहन् कुर्वन् असौ ध्रुवः अहमित्यात्मानं नास्मरत् । यतो मुक्तदेहाभिमानः । बाष्पकलया अश्रुधारया ॥ १८ ॥ अग्र्यमतिश्रेष्ठम् । राकापतिं पूर्णचन्द्रमिव ॥ १९ ॥ तत्र विमाने अनु अनन्तरं देवप्रवरौ ददर्शेत्यनुषङ्गः । अवष्टभ्य धृत्वा ॥ २० ॥ उत्तमैः सनकादिभिर्गीयते इत्युत्तमगायो हरिः । इति हेतोः साध्वसेन आनन्दसम्भ्रमेण विस्मृतः पूजाक्रमो येन स केवलं तस्य नामानि गृणन् तौ ननामेत्यन्वयः ॥ २१ ॥ कन्धरा ग्रीवा । सम्मतौ भृत्यौ ॥ २२ ॥ भो इति द्वयम् । आदरे वीप्सा ॥ २३ ॥ यमतीतृपत तस्येत्यन्वयः । य इति

सुदुर्जयं विष्णुपदं जितं त्वया यत्सूरयोऽप्राप्य विचक्षते परम् ।
आतिष्ठ तच्चन्द्रदिवाकरादयो ग्रहर्क्षतारा: परियन्ति दक्षिणम् ॥२५॥

अनास्थितं ते पितृभिरन्यैरप्यङ्ग कर्हिचित् । आतिष्ठ जगतां वन्द्यं तद्विष्णोः परमं पदम्॥२६॥

एतद्विमानप्रवरमुत्तमश्लोकमौलिना । उपस्थापितमायुष्मन्नधिरोढुं त्वमर्हसि ॥२७॥

मैत्रेय उवाच

निशम्य वैकुण्ठनियोज्यमुख्ययोर्मधुच्युतं वाचमुरुक्रमप्रियः ।
कृताभिषेकः कृतनित्यमङ्गलो मुनीन् प्रणम्याशिषमभ्यवादयत् ॥२८॥

परीत्याभ्यर्च्य धिष्ण्याग्र्यं पार्षदावभिवन्द्य च । इयेष तदधिष्ठातुं बिभ्रद्रूपं हिरण्मयम् ॥२९॥

तदोत्तानपदः पुत्रो ददर्शान्तकमागतम् । मृत्योर्मूर्ध्नि पदं दत्त्वा आरुरोहाद्भुतं गृहम् ॥३०॥

तदा दुन्दुभयो नेदुर्मृदङ्गपणवादयः । गन्धर्वमुख्याः प्रजगुः पेतुः कुसुमवृष्टयः ॥३१॥

स च स्वर्लोकमारोक्ष्यन् सुनीतिं जननीं ध्रुवः । अन्वस्मरदगं हित्वा दीनां यास्ये त्रिविष्टपम्॥३२

इति व्यवसितं तस्य व्यवसाय सुरोत्तमौ । दर्शयामासतुर्देवीं पुरो यानेन गच्छतीम् ॥३३॥

तत्र तत्र प्रशंसद्भिः पथि वैमानिकैः सुरैः । अवकीर्यमाणो ददृशे कुसुमैः क्रमशो ग्रहान्॥३४॥

त्रिलोकीं देवयानेन सोऽतिव्रज्य मुनीनपि । परस्ताद्यद् ध्रुवगतिर्विष्णोः पदमथाभ्यगात्॥३५॥

यद् भ्राजमानं स्वरुचैव सर्वतो लोकास्त्रयो ह्यनुविभ्राजन्त एते ।
यन्नाव्रजञ्जन्तुषु येऽननुग्रहा व्रजन्ति भद्राणि चरन्ति येऽनिशम् ॥३६॥

शान्ताः समदृशः शुद्धाः सर्वभूतानुरञ्जनाः । यान्त्यञ्जसाच्युतपदमच्युतप्रियबान्धवाः ॥३७॥

इत्युत्तानपदः पुत्रो ध्रुवः कृष्णपरायणः । अभूत्त्रयाणां लोकानां चूडामणिरिवामलः ॥३८॥

गम्भीरवेगोऽनिमिषं ज्योतिषां चक्रमाहितम् । यस्मिन् भ्रमति कौरव्य मेढ्यामिव गवां गणः॥३९

पाठो लेखकप्रमादात् ॥ २४ ॥ सूरयः सप्तर्षयोऽपि यदप्राप्य अधः स्थिताः परं केवलं पश्यन्ति यच्च चन्द्रादयः दक्षिणं परियन्ति प्रदक्षिणीकुर्वन्ति तत् आतिष्ठेत्यन्वयः ॥ २५ ॥ यत् अनास्थितं तदित्यन्वयः ॥ २६ ॥ उपस्थापितं प्रेषितम् । आयुष्मन्निति सशरीरयानाभिप्रायेण ॥ २७ ॥ नियोज्यो भृत्यः । उरुक्रमो भगवान् । कृतं नित्यमङ्गलकृत्यं सन्ध्यादिकं येन । तैराशिषमभ्यवादयत् स्वस्तिवाचनमकारयत् ॥ २८ ॥ धिष्ण्याग्र्यं विमानश्रेष्ठम् । परीत्य प्रदक्षिणीकृत्य अरोढुमैच्छत् ॥ २९ ॥ यदा इयेष तदेत्यन्वयः ॥३०।३१॥ अगं दुर्गमं त्रिविष्टपं कथं यास्ये इत्यन्वस्मरत् ॥ ३२ ॥ व्यवसितमभिप्रायं ज्ञात्वा ॥ ३३ ॥ सुरैः कर्तृभिः । अवकीर्यमाण आच्छाद्यमानः ॥ ३४ ॥ ततः परस्तात् उपरि वर्तमानं यत्पदं तदित्यन्वयः ॥३५॥ यद् भ्राजमानम् अनु पश्चात् एते विभ्राजन्ते यच्च निरनुग्रहा निर्दयाः नाव्रजन् तदभ्यगात् ॥ ३६ ॥ अञ्जसा सुखेन ॥३७।३८॥ यस्मिन् आहितं संवद्धं ज्योतिश्चक्रम् अनिमिषमनलसं

महिमानं विलोक्यास्य नारदो भगवानृषिः । आतोद्यं विदुदन् श्लोकान् सत्रेऽगायत्प्रचेतसाम्॥४०

नारद उवाच

नूनं सुनीतेः पतिदेवतायास्तपः प्रभावस्य सुतस्य तां गतिम् ।
दृष्ट्वाभ्युपायानपि वेदवादिनो नैवाधिगन्तुं प्रभवन्ति किं नृपाः ॥ ४१॥
यः पञ्चवर्षो गुरुदारवाक्शरैर्भिन्नेन यातो हृदयेन दूयता ।
वनं मदादेशकरोऽजितं प्रभुं जिगाय तद्भक्तगुणैः पराजितम् ॥४२॥
यः क्षत्रबन्धुर्भुवि तस्याधिरूढमन्वारुरुक्षेदपि वर्षपूगैः ।
षट्पञ्चवर्षो यदहोभिरल्पैः प्रसाद्य वैकुण्ठमवाप तत्पदम् ॥४३॥

मैत्रेय उवाच

एतत्तेऽभिहितं सर्वं यत्पृष्टोऽहमिह त्वया । ध्रुवस्योद्दामयशसश्चरितं सम्मतं सताम् ॥४४॥
धन्यं यशस्यमायुष्यं पुण्यं स्वस्त्ययनं महत् । स्वर्ग्यं ध्रौव्यं सौमनस्यं प्रशस्यमघमर्षणम्॥४५॥
श्रुत्वैतच्छ्रद्धयाभीक्ष्णमच्युतप्रियचेष्टितम् । भवेद्भक्तिर्भगवति यया स्यात्क्लेशसंक्षयः ॥४६॥
महत्त्वमिच्छतां तीर्थं श्रोतुः शीलादयो गुणाः । यत्र तेजस्तदिच्छूनां मानो यत्र मनस्विनाम्॥४७
प्रयतः कीर्तयेत्प्रातः समवाये द्विजन्मनाम् । सायं च पुण्यश्लोकस्य ध्रुवस्य चरितं महत्॥४८॥
पौर्णमास्यां सिनीवाल्यां द्वादश्यां श्रवणेऽथवा । दिनक्षये व्यतीपाते संक्रमेऽर्कदिनेऽपि वा ॥४९॥
श्रावयेच्छ्रद्दधानानां तीर्थपादपदाश्रयः । नेच्छंस्तत्रात्मनाऽऽत्मानं संतुष्ट इति सिध्यति॥५०॥
ज्ञानमज्ञाततत्त्वाय यो दद्यात्सत्पथेऽमृतम् । कृपालोर्दीननाथस्य देवास्तस्यानुगृह्णते ॥५१॥
इदं मया तेऽभिहितं कुरूद्वह ध्रुवस्य विख्यातविशुद्धकर्मणः ।
हित्वार्भकः क्रीडनकानि मातुर्गृहं च विष्णुं शरणं यो जगाम ॥५२॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां चतुर्थस्कन्धे ध्रुवचरितं नाम द्वादशोऽध्यायः ॥१२॥

भ्रमति स ध्रुव इति योज्यम् ॥ ३९ ॥ आतोद्यं वीणां वादयन् ॥ ४० ॥ अभ्युपायान् अन्तरंगसाधनानि दृष्ट्वा ऋषयोऽपि तां प्राप्तुं न किमुत नृपाः ॥ ४१ ॥ गुरुदाराः पितृपत्नी सुरुचिः । यो जिगाय तस्येत्युत्तरेणान्वयः ॥ ४२ ॥ तस्याधिरूढं तेन प्राप्तं पदं यः कोऽपि स वर्षसमूहैरपि किमारोढुमिच्छेत् । नैवेत्यर्थः । कथंभूतं पदम् । प्रसाद्य यत् तस्य पदं तत् । षडिति लुप्ततृतीयान्तं षडभिरहोभिः षड्भिर्मासैः । 'पैत्रो मासेन' इत्युक्तेः ॥४३॥ एतदिति युग्मकम् । उद्दामम् उत्कृष्टम् । ध्रौव्यं ध्रुवपदप्रापकम् । मनः शुद्धिकरम् प्रशस्यं प्रशंसायोग्यं च ॥४४।४५॥ श्रुत्वा यो वर्तते । तस्य भक्तिरित्यन्वयः ॥४६॥ तीर्थं महत्त्वप्रापकम् । यत्र श्रुते सति ॥ ४७ ॥ प्रयत इति युग्मकम् समवाये समूहे । सिनीवाल्याम् अमावास्यायाम् । दिनक्षये तिथिक्षये ॥४८।४९ ॥ श्रद्दधानान् । तत्र श्रावणे । तीर्थं गंगा पादे यस्य सः । इति हेतोः सिध्यति अभीष्टं प्राप्नोति ॥ ५० ॥ सत्पथे भगवन्मार्गे अज्ञात तत्त्वाय दीनाय अमृतमयं ज्ञानसाधनं ध्रुवचरितम् यो दद्यात्तस्येत्यन्वयः ॥ ५१ ॥ यो जगाम तस्य ध्रुवस्य ॥ ५२ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे गूढार्थदीपिन्यां द्वादशोऽध्यायः ।

अथ त्रयोदशोऽध्यायः

सूत उवाच

निशम्य कौषारविणोपवर्णितं ध्रुवस्य वैकुण्ठपदाधिरोहणम् ।
प्ररूढभावो भगवत्यधोक्षजे प्रष्टुं पुनस्तं विदुरः प्रचक्रमे ॥ १ ॥

विदुर उवाच

के ते प्रचेतसो नाम कस्यापत्यानि सुव्रत । कस्यान्ववाये प्रख्याताः कुत्र वा सत्रमासत ॥ २ ॥
मन्ये महाभागवतं नारदं देवदर्शनम् । येन प्रोक्तः क्रियायोगः परिचर्याविधिर्हरेः ॥ ३ ॥
स्वधर्मशीलैः पुरुषैर्भगवान् यज्ञपूरुषः । इज्यमानो भक्तिमता नारदेनेरितः किल ॥ ४ ॥
यास्ता देवर्षिणा तत्र वर्णिता भगवत्कथाः । मह्यं शुश्रूषवे ब्रह्मन् कार्त्स्न्येनाचष्टुमर्हसि ॥ ५ ॥

मैत्रेय उवाच

ध्रुवस्य चोत्कलः पुत्रः पितरि प्रस्थिते वनम् । सार्वभौमश्रियं नैच्छदधिराजासनं पितुः ॥ ६ ॥
स जन्मनोपशान्तात्मा निःसङ्गः समदर्शनः । ददर्श लोके विततमात्मानं लोकमात्मनि ॥ ७ ॥
आत्मानं ब्रह्म निर्वाणं प्रत्यस्तमितविग्रहम् । अवबोधरसैकात्म्यमानन्दमनुसंततम् ॥ ८ ॥
अव्यवच्छिन्नयोगाग्निदग्धकर्ममलाशयः । स्वरूपमवरुन्धानो नात्मनोऽन्यं तदैक्षत ॥ ९ ॥
जडान्धबधिरोन्मत्तमूकाकृतिरतन्मतिः । लक्षितः पथि बालानां प्रशान्तार्चिरिवानलः ॥ १० ॥
मत्वा तं जडमुन्मत्तं कुलवृद्धाः समन्त्रिणः । वत्सरं भूपतिं चक्रुर्यवीयांसं भ्रमेः सुतम् ॥ ११ ॥

त्रयोदशेऽभवद्वंशे ध्रुवस्याङ्गो महीपतिः ।
दुश्चरित्रात् स पुत्रस्य दुःखितः सन् वनं गतः ॥ १ ॥

कुषारवपुत्रेण मैत्रेयेण ॥ १ ॥ अन्ववाये वंशे । आसत अकुर्वत इति पाठ इति दीपिनी ॥ २ ॥ देवदर्शनं यस्य । देवं दर्शयतीति वा ॥ ३ ॥ पुरुषैः प्रचेतोभिः आराध्यमानो भगवान् नारदेन प्रतिपादितः शुद्धभक्त्यैवासौ आराध्यो न तु धर्मादिमिश्रतयेत्येवंरूपेणेत्यर्थः ॥ ४ ॥ तत्र सत्रे। या वर्णितास्ता आचष्टुं वक्तुम् ॥ ५ ॥ प्रचेतसो ध्रुववंशे जाता इति तद्वंशकथायामेव तेषां कथा आयास्यतीत्यभिप्रेत्य वंशमनुक्रामति । आसनं चेत्यत्रान्वेति ॥ ६ ॥ विततमनुगतम् आत्मानं परमात्मानम्। परमात्मनि आधारे च लोकम् । यो मां पश्यति इति गीतोक्तेः ॥ ७ ॥ आत्मानमिति युग्मकम्। स्वरूपं प्रशस्तं रूपम् आनन्दनिधिम् आत्मानं श्रीकृष्णमवरुन्धानः हृदि अनुभवन् तस्मादात्मनोऽन्यं तदा नैक्षतेत्यन्वयः । कथंभूतम् । निर्वाणं शान्तम् निर्विकारं निरस्तविवादं वा । दग्धः कर्ममलोऽहङ्कार आशयो वासना च यस्येति केचित् ॥८-९॥ न तेषामिव मतिर्यस्य । बालानां बालैः ॥ १० ॥ यवीयांसम् उत्कलात्कनिष्ठं कल्पात् ज्येष्ठं च अत एव तस्य राज्याधिकार 'कल्पवत्सरौ' इत्यत्र तु क्रमो न विवक्षितः।

स्वर्वीथिर्वत्सरस्येष्टा भार्यासूत षडात्मजान् । पुष्पार्णं तिग्मकेतुं च इषमूर्जं वसुं जयम् ॥१२॥
पुष्पार्णस्य प्रभा भार्या दोषा च द्वे बभूवतुः । प्रातर्मध्यन्दिनं सायमिति ह्यासन् प्रभासुताः॥१३॥
प्रदोषो निशिथो व्युष्ट इति दोषासुतास्त्रयः । व्युष्टः सुतं पुष्करिण्यां सर्वतेजसमादधे ॥१४॥
स चक्षुः सुतमाकूत्यां पत्न्यां मनुमवाप ह । मनोरसूत महिषी विरजान्नड्वला सुतान् ॥१५॥
पुरुं कुत्सं त्रितं द्युम्नं सत्यवन्तमृतं व्रतम् । अग्निष्टोममतीरात्रं प्रद्युम्नं शिबिमुल्मुकम् ॥१६॥
उल्मुकोऽजनयत्पुत्रान् पुष्करिण्यां षडुत्तमान् । अङ्गं सुमनसं ख्यातिं क्रतुमङ्गिरसं गयम्॥१७॥
सुनीथाङ्गस्य या पत्नी सुषुवे वेनमुल्बणम् । यद्दौःशील्यात्स राजर्षिर्निर्विण्णो निरगात्पुरात्॥१८॥
यमङ्ग शेपुः कुपिता वाग्वज्रा मुनयः किल । गतासोस्तस्य भूयस्ते ममन्थुर्दक्षिणं करम् ॥१९॥
अराजके तदा लोके दस्युभिः पीडिताः प्रजाः । जातो नारायणांशेन पृथुराद्यः क्षितीश्वरः ॥२०॥

विदुर उवाच

तस्य शीलनिधेः साधोर्ब्रह्मण्यस्य महात्मनः । राज्ञः कथमभूद् दुष्टा प्रजा यद्विमना ययौ ॥२१॥
किं वांहो वेन उद्दिश्य ब्रह्मदण्डमयूयुजन् । दण्डव्रतधरे राज्ञि मुनयो धर्मकोविदाः ॥२२॥
नावध्येयः प्रजापालः प्रजाभिरघवानपि । यदसौ लोकपालानां बिभर्त्योजः स्वतेजसा ॥२३॥
एतदाख्याहि मे ब्रह्मन् सुनीथात्मजचेष्टितम् । श्रद्दधानाय भक्ताय त्वं परावरवित्तमः ॥२४॥

मैत्रेय उवाच

अङ्गोऽश्वमेधं राजर्षिराजहार महाक्रतुम् । नाजग्मुर्देवतास्तस्मिन्नाहूता ब्रह्मवादिभिः ॥२५॥
तमूचुर्विस्मितास्तत्र यजमानममर्थत्विजः । हवींषि हूयमानानि न ते गृह्णन्ति देवताः ॥२६॥
राजन् हवींष्यदुष्टानि श्रद्धयाऽऽसादितानि ते । छन्दांस्ययातयामानि योजितानि धृतव्रतैः॥२७॥
न विदामेह देवानां हेलनं वयमण्वपि । यन्न गृह्णन्ति भागान् स्वान् ये देवाः कर्मसाक्षिणः॥२८॥

मैत्रेय उवाच

अङ्गो द्विजवचः श्रुत्वा यजमानः सुदुर्मनाः । तत्प्रष्टुं व्यसृजद्वाचं सदस्यांस्तदनुज्ञया ॥२९॥

॥ ११।१२।१३ ॥ निशीथः । व्युष्ट आसन्नप्रभातः । स्त्रियः पुत्राश्च कालादितत्तद्वस्त्वभिमानिनो ज्ञेयाः ॥ १४ ॥ स इत्यर्द्धकम् । स सर्वतेजा एव चक्षुःसंज्ञः सुतं मनुं चाक्षुषनामानमिति व्याख्येयम्' 'षष्ठस्तु चक्षुषः पुत्रश्चाक्षुषो नाम वै मनुः' इत्यष्टमात् ॥१५॥ मनोरिति सार्द्धकम् । विरजान् शुद्धान् पुरुप्रमुखान् द्वादश ॥ १६।१७ ॥ निर्विण्णो विरक्तः ॥१८॥ यं वेनम् । गतासोः मृतस्य ॥१९॥ नष्टराजवंशस्य पृथोरेव प्रथमं प्रचलनात्तस्यैवाद्यत्वम् ॥ २० ॥ प्रजा पुत्रः । यत् यस्या हेतोः ॥ २१ ॥ अंहोऽपराधमालक्ष्य ॥ २२।२३ ॥ परेति । भूतभविष्यज्ज्ञानां मध्येऽतिश्रेष्ठः ॥ २४ ॥ आजहार आरब्धवान् ॥ २५।२६ ॥ न यात एकोऽपि यामोऽभ्यासं विना येषान्तानि प्रभाववन्तीत्यर्थः । योजितानि प्रयुक्तानि ॥ २७ ॥ यत् यस्मान्न तत् अणु अपि हेलनमवज्ञानम् ॥ २८ ॥ तत् अनागमनकारणम् ।

नागच्छन्त्याहुता देवा न गृह्णन्ति ग्रहानिह । सदसस्पतयो ब्रूत किमवद्यं मया कृतम् ॥३०॥

सदसस्पतय ऊचुः

नरदेवेह भवतो नाघं तावन्मनाक् स्थितम् । अस्त्येकं प्राक्तनमघं यदिहेदृक् त्वमप्रजः ॥३१॥

तथा साधय भद्रं ते आत्मानं सुप्रजं नृप । इष्टस्ते पुत्रकामस्य पुत्रं दास्यति यज्ञभुक् ॥३२॥

तथा स्वभागधेयानि ग्रहीष्यन्ति दिवौकसः । यद्यज्ञपुरुषः साक्षादपत्याय हरिर्वृतः ॥३३॥

तांस्तान् कामान् हरिर्दद्याद्यान् यान् कामयते जनः । आराधितो यथैवैष तथा पुंसां फलोदयः ३४

इति व्यवसिता विप्रास्तस्य राज्ञः प्रजातये । पुरोडाशं निरवपन् शिपिविष्टाय विष्णवे ॥३५॥

तस्मात्पुरुष उत्तस्थौ हेममाल्यमलाम्बरः । हिरणमयेन पात्रेण सिद्धमादाय पायसम् ॥३६॥

स विप्रानुमतो राजा गृहीत्वाञ्जलिनौदनम् । अवघ्राय मुदा युक्तः प्रादात्पत्न्या उदारधीः ॥३७॥

सा तत्पुंसवनं राज्ञी प्राश्य वै पत्युरादधे । गर्भं काल उपावृत्ते कुमारं सुषुवेऽप्रजा ॥३८॥

स बाल एव पुरुषो मातामहमनुव्रतः । अधर्मांशोद्भवं मृत्युं तेनाभवदधार्मिकः ॥३९॥

स शरासनमुद्यम्य मृगयुर्वनगोचरः । हन्त्यसाधुर्मृगान् दीनान् वेनोऽसावित्यरौज्जनः ॥४०॥

आक्रीडे क्रीडतो बालान् वयस्यानतिदारुणः । प्रसह्य निरनुक्रोशः पशुमारममारयत् ॥४१॥

तं विचक्ष्य खलं पुत्रं शासनैर्विविधैर्नृपः । यदा न शासितुं कल्पो भृशमासीत्सुदुर्मनाः ॥४२॥

प्रायेणाभ्यर्चितो देवो येऽप्रजा गृहमेधिनः । कदपत्यभृतं दुःखं ये न विन्दन्ति दुर्भरम् ॥४३॥

यतः पापीयसी कीर्तिरधर्मश्च महान्नृणाम् । यतो विरोधः सर्वेषां यत आधिरनन्तकः ॥४४॥

कस्तं प्रजापदेशं वै मोहबन्धनमात्मनः । पण्डितो बहु मन्येत यदर्थाः क्लेशदा गृहाः ॥४५॥

कदपत्यं वरं मन्ये सदपत्याच्छुचां पदात् । निर्विद्येत गृहान्मर्त्यो यत्क्लेशनिवहा गृहाः ॥४६॥

एवं स निर्विण्णमना नृपो गृहान्निशीथ उत्थाय महोदयोदयात् ।
अलब्धनिद्रोऽनुपलक्षितो नृभिर्हित्वा गतो वेनसुवं प्रसुप्ताम् ॥४७॥

व्यसृजत् प्रयुक्तवान् । तदनुज्ञया त्यक्तमौनः ॥ २९ ॥ दीर्घाभाव आर्षः । ग्रहान् हविःपिण्डान् । अवद्यम् अपराधः पापं वा ॥ ३० ॥ ईदृक् धार्मिकोऽपि ॥ ३१ ॥ ते इष्टः त्वया पूजितः ॥ ३२ ॥ तथा सति ॥ ३३।३४ ॥ निश्चिताः पुत्रोत्पत्तये । पुरोडाशं तण्डुलपिष्टनिर्मितकूर्माकारं वलिं निरवपन् समन्त्रं ददुः । शिपिविष्टो नाम विष्णुरूपान्तरं पुत्रकामेष्टिदेवता ॥ ३५ ॥ तस्मात् अग्निदत्तपुरोडाशात् ॥ ३६ ॥ पत्न्यै यलोपः ॥ ३७ ॥ पुंसवनं पुत्रोत्पादकम् । उपावृत्ते प्राप्ते सति ॥ ३८ ॥ मृत्युं मृत्युनामानमसुरम् । अधर्मेति विशेषणदानेन धर्मांशोद्भवो मृत्युर्देवोऽन्योऽस्तीति रहस्यमवगन्तव्यम् । 'मृत्युर्देवो यमभ्राता वेनमातामहोऽसुरः' इति तीर्थोक्तेः ॥ ३९ ॥ मृगयुर्व्याधः । वेनयति पीडयतीति वेनः । अरौत् भयात् चुक्रोश ॥ ४० ॥ आक्रीडे क्रीडास्थाने । निरनुक्रोशो निर्दयः । पशुमारः पशुघातीव । उपमाने कर्तरि णमुल ॥ ४१ ॥ न कल्पो न समर्थो यदा तदा ॥ ४२ ॥ येऽप्रजा अपुत्रास्तैरभ्यर्चितः । यतो ये कुपुत्रैः भृतं प्राप्तं दुर्भरं दुःसहम् ॥४३॥ यतः इति युग्मम् । कदपत्यात् ॥४४॥ यदर्था यन्निमित्ताश्च क्लेशदास्तं कः मन्येत न कोऽपीत्यर्थः अपदेशं नाममात्रम् ॥ ४५ ॥ विरहादौ शुचां पदात् शोकमूलात् गृहविशेषगं वा । यतः कदपत्यात् गृहाः ॥ ४६ ॥ निर्विण्णं विरक्तम् । महोदयस्य महासम्पत्तेरुदयो

विज्ञाय निर्विद्य गतं पतिं प्रजाः पुरोहितामात्यसुहृद्गणादयः ।
विचिक्युरुर्व्यामतिशोककातरा यथा निगूढं पुरुषं कुयोगिनः ॥४८॥
अलक्षयन्तः पदवीं प्रजापतेर्हतोद्यमाः प्रत्युपसृत्य ते पुरीम् ।
ऋषीन् समेतानभिवन्द्य साश्रवो न्यवेदयन् पौरव भर्तृविप्लवम् ॥४९॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां चतुर्थस्कन्धे त्रयोदशोऽध्यायः ॥ १३ ॥

अथ चतुर्दशोऽध्यायः

मैत्रेय उवाच

भृग्वादयस्ते मुनयो लोकानां क्षेमदर्शिनः । गोप्तर्यसति वै नृणां पश्यन्तः पशुसाम्यताम् ॥ १ ॥
वीरमातरमाहूय सुनीथां ब्रह्मवादिनः । प्रकृत्यसम्मतं वेनमभ्यषिञ्चन् पतिं भुवः ॥ २ ॥
श्रुत्वा नृपासनगतं वेनमत्युग्रशासनम् । निलिल्युर्दस्यवः सर्वे सर्पत्रस्ता इवाखवः ॥ ३ ॥
स आरूढनृपस्थान उन्नद्धोऽष्टविभूतिभिः । अवमेने महाभागान् स्तब्धः सम्भावितः स्वतः॥ ४ ॥
एवं मदान्ध उत्सिक्तो निरङ्कुश इव द्विपः । पर्यटन् रथमास्थाय कम्पयन्निव रोदसी । ५ ॥
न यष्टव्यं न दातव्यं न होतव्यं द्विजाः क्वचित् । इति न्यवारयद्धर्मं भेरीघोषेण सर्वशः ॥ ६ ॥
वेनस्यावेक्ष्य मुनयो दुर्वृत्तस्य विचेष्टितम् । विमृश्य लोकव्यसनं कृपयोचुः स्म सत्रिणः ॥ ७ ॥
अहो उभयतः प्राप्तं लोकस्य व्यसनं महत् । दारुण्युभयतो दीप्त इव तस्करपालयोः ॥ ८ ॥
अराजकभयादेष कृतो राजाऽतदर्हणः । ततोऽप्यासीद्भयं त्वद्य कथं स्यात्स्वस्ति देहिनाम्॥९॥

यत्र । वेनं सूते इति वेनसूः ताम् वेनसुवं वेनमातरं सुनीथाम् । गतो वनं प्रति ॥ ४७ ॥ विचिक्युः अन्वेषितवन्तः ॥ ४८ ॥ प्रत्युपसृत्य पुनरागत्य । हे पौरव विदुर ! साश्रवो रुदन्तः । विप्लवमदर्शनम् ॥४९॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे गूढार्थदीपिन्यां त्रयोदशोऽध्यायः ।

चतुर्दशे कृतो वेनोऽराजकत्वभयान्नृपः ।
नास्तिकत्वात् हतो विप्रैर्निषादोऽभूत्तदूरुजः ॥१॥

भृग्वादय इति युग्मकम् । दर्शिनः चिन्तकाः । गोप्तरि राजनि असति । प्रकृतिः प्रजामात्यादिः ॥ १।२ ॥ सर्वे इति स्वामिसम्मतः पाठः । लीना बभूवुः । आखवो मूषकाः ॥ ३ ॥ विभूतिभिर्लोकपालैश्वर्यैरुद्धतः । स्तब्धोऽहङ्कारी । स्वेनैव संभावितः कृतात्मप्रशंसः ॥ ४ ॥ एवमिति युग्मकम् । गज इव उत्सिक्त उन्मत्तः रोदसी द्यावापृथिव्यौ कम्पयन्निव पर्यटन् धर्मं न्यवारयदित्यन्वयः ॥ ५ ६ ॥ सत्रिणो मिलिताः सन्तः । स्म साश्चर्यम् ॥७॥ उभाभ्यां तस्करपालकाभ्याम् । यथोभयतो दीप्ते काष्ठे तन्मध्यवर्तिनां पिपीलिकादीनां दुःखं भवति ॥८॥ अराजकेति सार्द्धकम् । अतदर्हणो राज्यायोग्यः । अनर्थभूत् अनर्थ-

अहेरिव पयःपोषः पोषकस्याप्यनर्थभृत् । वेनः प्रकृत्यैव खलः सुनीथागर्भसम्भवः ॥१०॥
निरूपितः प्रजापालः स जिघांसति वै प्रजाः । तथापि सान्त्वयेमामुं नास्मांस्तत्पातकं स्पृशेत्११
तद्विद्वद्भिरसद्वृत्तो वेनोऽस्माभिः कृतो नृपः । सान्त्वितो यदि नो वाचं न ग्रहीष्यत्यधर्मकृत्१२
लोकधिक्कारसंदग्धं दहिष्यामः स्वतेजसा । एवमध्यवसायैनं मुनयो गूढमन्यवः ।
उपव्रज्याब्रुवन् वेनं सान्त्वयित्वा च सामभिः ॥ १३ ॥

मुनय ऊचुः

नृपवर्य निबोधैतद्यत्ते विज्ञापयाम भोः । आयुःश्रीबलकीर्तीनां तव तात विवर्धनम् ॥१४॥
धर्म आचरितः पुंसां वाङ्मनःकायबुद्धिभिः । लोकान् विशोकान् वितरत्यथानन्त्यमसङ्गिनाम्
स ते मा विनशेद्वीर प्रजानां क्षेमलक्षणः । यस्मिम् विनष्टे नृपतिरैश्वर्यादवरोहति ॥१६॥
राजन्नसाध्वमात्येभ्यश्चोरादिभ्यः प्रजा नृपः । रक्षन् यथा बलिं गृह्णन्निह प्रेत्य च मोदते१७
यस्य राष्ट्रे पुरे चैव भगवान् यज्ञपूरुषः । इज्यते स्वेन धर्मेण जनैर्वर्णाश्रमान्वितैः ॥१८॥
तस्य राज्ञो महाभाग भगवान् भूतभावनः । परितुष्यति विश्वात्मा तिष्ठतो निजशासने ॥१९॥
तस्मिंस्तुष्टे किमप्राप्यं जगतामीश्वरेश्वरे । लोकाः सपाला ह्येतस्मै हरन्ति बलिमादृताः ॥२०॥

तं सर्वलोकामरयज्ञसंग्रहं त्रयीमयं द्रव्यमयं तपोमयम् ।
यज्ञैर्विचित्रैर्यजतो भवाय ते राजन् स्वदेशाननुरोद्धुमर्हसि ॥२१॥

यज्ञेन युष्मद्विषये द्विजातिभिर्वितायमानेन सुराः कला हरेः ।
स्विष्टाः सुतुष्टाः प्रदिशन्ति वाञ्छितं तद्धेलनं नार्हसि वीर चेष्टितुम् ॥२२॥

वेन उवाच

बालिशा बत यूयं वा अधर्मे धर्ममानिनः । ये वृत्तिदं पतिं हित्वा जारं पतिमुपासते ॥२३॥
अवजानन्त्यमी मूढा नृपरूपिणमीश्वरम् । नानुविन्दन्ति ते भद्रमिह लोके परत्र च ॥२४॥
को यज्ञपुरुषो नाम यत्र वो भक्तिरीदृशी । भर्तृस्नेहविदूराणां यथा जारे कुयोषिताम् ॥२५॥

करः ॥ ९।१० ॥ तत्पातकं विद्वद्भिः ॥११।१२॥ एवं निश्चित्य । सामभिः प्रियवचनैः ॥१३ ॥ निबोध शृणु ॥१४॥ असङ्गिनां निष्कामानाम् आनन्त्यं मोक्षम् ॥१५॥ सधर्मः मा विनशेत् । अवरोहति भ्रश्यति ।१६। यथाशास्त्र षष्ठांशम् । प्रेत्य परलोकं प्राप्य ।१७। यस्येति युग्मकम् । तस्योपरि तुष्यति । वृद्धये१८।१९। आदृताः सादराः हरन्ति समर्पयन्ति । एतत्तोषार्थमाज्ञां पालयन्ति वा ॥ २० ॥ ते भवाय भद्राय वा यजतः स्वदेशवासिनोजनान् नः अनुरोद्धुं यजने प्रवर्तयितुमर्हसि । 'भवो भद्रे हरे प्राप्तौ इति यादवः। संग्रहं पालकम् ॥ २१ ॥ विषये देशे । निरन्तरं क्रियमाणेन यज्ञेन स्विष्टाः सुपूजिताः सन्तो ये प्रदिशन्ति तेषां हेलनमवज्ञां चेष्टितुं कर्तुम् नार्हसि । कला अंशाः ॥ २२ ॥ बालिशा मूर्खाः ॥ २३।२४।२५ ॥

विष्णुर्विरिञ्चो गिरिश इन्द्रो वायुर्यमो रविः । पर्जन्यो धनदः सोमः क्षितिरग्निरपाम्पतिः ॥२६॥

एते चान्ये च विबुधाः प्रभवो वरशापयोः । देहे वसन्ति नृपतेः सर्वदेवमयो नृपः ॥२७॥

तस्मान्मां कर्मभिर्विप्रा यजध्वं गतमत्सराः । बलिं च मह्यं हरत मत्तोऽन्यः कोऽग्रभुक् पुमान्२८

मैत्रेय उवाच

इत्थं विपर्ययमतिः पापीयानुत्पथं गतः । अनुनीयमानस्तद्याच्ञां न चक्रे भ्रष्टमङ्गलः ॥२९॥

इति तेऽसत्कृतास्तेन द्विजाः पण्डितमानिना । भग्नायां भव्य याच्ञायां तस्मै विदुर चुक्रुधुः३०

हन्यतां हन्यतामेष पापः प्रकृतिदारुणः । जीवञ्जगदसावाशु कुरुते भस्मसाद् ध्रुवम् ॥३१॥

नायमर्हत्यसद्वृत्तो नरदेववरासनम् । योऽधियज्ञपतिं विष्णुं विनिन्दत्यनपत्रपः ॥३२॥

को वैनं परिचक्षीत वेनमेकमृतेऽशुभम् । प्राप्त ईदृशमैश्वर्यं यदनुग्रहभाजनः ॥३३॥

इत्थं व्यवसिता हन्तुमृषयो रूढमन्यवः । निजघ्नुर्हुंङ्कृतैर्वेनं हतमच्युतनिन्दया ॥३४॥

ऋषिभिः स्वाश्रमपदं गते पुत्रकलेवरम् । सुनीथा पालयामास विद्यायोगेन शोचती ॥३५॥

एकदा मुनयस्ते तु सरस्वत्सलिलाप्लुताः । हुत्वाग्नीन् सत्कथाश्चक्रुरुपविष्टाः सरित्तटे ॥३६॥

वीक्ष्योत्थितांस्तदोत्पातानाहुर्लोकभयङ्करान् । अप्यभद्रमनाथाया दस्युभ्यो न भवेद्भुवः ॥३७॥

एवं मृशन्त ऋषयो धावतां सर्वतोदिशम् । पांसुः समुत्थितो भूरिश्चोराणामभिलुम्पताम्३८

तदुपद्रवमाज्ञाय लोकस्य वसु लुम्पताम् । भर्तर्युपरते तस्मिन्नन्योन्यं च जिघांसताम्॥३९॥

चोरप्रायं जनपदं हीनसत्त्वमराजकम् । लोकान्नावारयञ्छक्ता अपि तद्दोषदर्शिनः ॥४०॥

ब्राह्मणः समदृक् शान्तो दीनानां समुपेक्षकः । स्रवते ब्रह्म तस्यापि भिन्नभाण्डात्पयो यथा॥४१।

नाङ्गस्य वंशो राजर्षेरेष संस्थातुमर्हति । अमोघवीर्या हि नृपा वंशेऽस्मिन् केशवाश्रयाः ॥४२॥

विनिश्चित्यैवमृषयो विपन्नस्य महीपतेः । ममन्थुरूरुं तरसा तत्रासीद्बाहुको नरः ॥४३॥

विष्णुरिति युग्मकम् । पर्जन्यः वृष्ट्यधिष्ठाता कश्चन देवः । प्रभवो दातारः ॥ २६।२७ ॥ हरत समर्पयत ॥ २८ ॥ अनुनीयमानः प्रबोध्यमानः । मङ्गलं पुण्यम् ॥ २९ ॥ भव्येति विदुरसंबोधनं वा ॥ ३० ॥ कुरुते करिष्यति ॥३१॥ अनपत्रपो निर्लज्जः ॥३२॥ यदनुग्रहविषयः सन् ऐश्वर्यं प्राप्तः तमेनं भगवन्तं को वा परिचक्षीत निन्देत् न कोऽपीत्यर्थः ॥ ३३ ॥ व्यवसिता निश्चिन्वानाः ॥ ३४ ॥ विद्यायोगेन समन्त्रतैलप्रक्षेपाद्युपायेन ॥ ३५ ॥ सरस्वत्याः पुंवद्भाव आर्षः ॥ ३६ ॥ तदोत्पातानित्येव स्वामिसम्मतः पाठस्तथा व्याख्यानात् इति दीपिनी । अपि किम् ।३७। मृशन्तो विचारयन्तो यावत् स्थितास्तावदेव पांसुः ॥ ३८ ॥ तदिति युग्मकम् । तत् तदा लुंपतां हरतामुपद्रवं तथाभूतं जनपदं चाज्ञाय शक्ता अपि तस्मिन् चोरनिवारणे हिंसादिदोषदर्शिनः सन्तो मुनयो लुम्पतो लोकान्नावारयन्नित्यन्वयः ॥ ३९।४० ॥ सामान्यमुक्त्वा विशेषमाह यदि तर्हि तस्यापि ब्रह्म तपः स्रवति नश्यति इति दीपिनी ॥ ४१ ॥ संस्थातुं नष्टीभवितुम् ॥ ४२ ॥ विनिश्चित्येति युग्मकम् विपन्नस्य मृतस्य । ऊरुं दक्षिणम् । 'अङ्गानुक्तौ दक्षिणं

काककृष्णोऽतिह्रस्वाङ्गो ह्रस्वबाहुर्महाहनुः । ह्रस्वपान्निम्ननासाग्रो रक्ताक्षस्ताम्रमूर्धजः ॥४४॥
तं तु तेऽवनतं दीनं किं करोमीति वादिनम् । निषीदेत्यब्रुवंस्तात स निषादस्ततोऽभवत् ॥४५॥
तस्य वंश्यास्तु नैषादा गिरिकाननगोचराः । येनाहरज्जायमानो वेनकल्मषमुल्वणम् ॥४६॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां चतुर्थस्कन्धे पृथुचरिते निषादोत्पत्तिर्नाम चतुर्दशोऽध्यायः ॥ १४ ॥

अथ पञ्चदशोऽध्यायः

मैत्रेय उवाच

अथ तस्य पुनर्विप्रैरपुत्रस्य महीपतेः । बाहुभ्यां मथ्यमानाभ्यां मिथुनं समपद्यत ॥ १ ॥
तद् दृष्ट्वा मिथुनं जातमृषयो ब्रह्मवादिनः । ऊचुः परमसंतुष्टा विदित्वा भगवत्कलाम् ॥२॥

ऋषय ऊचुः

एष विष्णोर्भगवतः कला भुवनपालिनी । इयं च लक्ष्म्याः सम्भूतिः पूरुषस्यानपायिनी ॥ ३ ॥
अत्र तु प्रथमो राज्ञां पुमान् प्रथयिता यशः । पृथुर्नाम महाराजो भविष्यति पृथुश्रवाः ॥ ४ ॥
इयं च सुदती देवी गुणभूषणभूषणा । अर्चिर्नाम वरारोहा पृथुमेवावरुन्धती ॥ ५ ॥
एष साक्षाद्धरेरंशो जातो लोकरिरक्षया । इयं च तत्परा हि श्रीरनुजज्ञेऽनपायिनी ॥ ६ ॥

मैत्रेय उवाच

प्रशंसन्ति स्म तं विप्रा गन्धर्वप्रवरा जगुः । मुमुचुः सुमनोधाराः सिद्धा नृत्यन्ति स्वःस्त्रियः ॥७॥

स्यात्' इति कात्यायनोक्तेः । बाहुको वामनः । मूर्धजाः केशाः ॥ ४३।४४।४५ ॥ येन कारणेन असौ जायमानः पापमहरत् स्वस्मिन् जग्राह तेन स निषादस्तस्य वंश्यास्तु नैषादा इत्यन्वयः अत एव निषीदति पापमस्मिन्निति व्युत्पत्तिरप्यनुसन्धेया अत्र । यद्वा निषीदतीति निषादः । ज्वलादित्वात् णः ॥ ४६ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे गूढार्थदीपिन्यां चतुर्दशोऽध्यायः ।

●

पुनः पञ्चदशे वेनबाहुमन्थनतो द्विजैः ।
जातस्य हि पृथोः राज्याभिषेकः सम्यगीर्यत ॥१॥

तस्य वेनस्य ॥१।२॥ संभूतिः कला । अनपायिनी अवियोगिनी । अतस्तयोर्विवाहोऽपि न विरुद्धः । 'लक्ष्मीर्नान्यस्य भार्या स्यात्' इत्युक्तेः ॥ ३ ॥ अत्र मिथुने यः पुमान् स यशः प्रथयिता विस्तारयितेति निरुक्त्या पृथुः । राज्ञां भाविनाम् । 'अयं तु' इति पाठो न स्वामिसम्मतः किन्तु अत्र इति । पृथुश्रवा महायशाः ॥ ४ ॥ गुणा एव भूषणानि यासां तासामपि भूषणा चूडामणितुल्या । अवरुन्धती पतित्वेनाश्रयन्ती सती भविष्यति ॥ ५ ॥ रिरक्षिषया ॥ ६ ॥ प्रशशंसुः । सुमनोधाराः पुष्पवृष्टीः ।

शङ्खतूर्यमृदङ्गाद्या नेदुर्दुन्दुभयो दिवि । तत्र सर्व उपाजग्मुर्देवर्षिपितृणां गणाः ॥ ८ ॥
ब्रह्मा जगद्गुरुर्देवैः सहासृत्य सुरेश्वरैः । वैन्यस्य दक्षिणे हस्ते दृष्ट्वा चिह्नं गदाभृतः ॥ ९ ॥
पादयोररविन्दं च तं वै मेने हरेः कलाम् । यस्याप्रतिहतं चक्रमंशः स परमेष्ठिनः ॥ १० ॥
तस्याभिषेक आरब्धो ब्राह्मणैर्ब्रह्मवादिभिः । आभिषेचनिकान्यस्मा आजह्रुः सर्वतो जनाः ११
सरित्समुद्रा गिरयो नागा गावः खगा मृगाः । द्यौः क्षितिः सर्वभूतानि समाजह्रुरुपायनम् १२
सोऽभिषिक्तो महाराजः सुवासाः साध्वलंकृतः । पत्न्यार्चिषालंकृतया विरेजेऽग्निरिवापरः १३
तस्मै जहार धनदो हैमं वीर वरासनम् । वरुणः सलिलस्रावमातपत्रं शशिप्रभम् ॥ १४ ॥
वायुश्च वालव्यजने धर्मः कीर्तिमयीं स्रजम् । इन्द्रः किरीटमुत्कृष्टं दण्डं संयमनं यमः ॥ १५ ॥
ब्रह्मा ब्रह्ममयं वर्म भारती हारमुत्तमम् । हरिः सुदर्शनं चक्रं तत्पत्न्यव्याहतां श्रियम् ॥१६॥
दशचन्द्रमसिं रुद्रः शतचन्द्रं तथाम्बिका । सोमोऽमृतमयानश्वांस्त्वष्टा रूपाश्रयं रथम् ॥ १७ ॥
अग्निराजगवं चापं सूर्यो रश्मिमयानिषून् । भूः पादुके योगमय्यौ द्यौः पुष्पावलिमन्वहम् ॥१८॥
नाट्यं सुगीतं वादित्रमन्तर्धानं च खेचराः । ऋषयश्चाशिषः सत्याः समुद्रः शङ्खमात्मजम् १९
सिन्धवः पर्वता नद्यो रथवीथीर्महात्मनः । सूतोऽथ मागधो वन्दी तं स्तोतुमुपतस्थिरे ॥ २० ॥
स्तावकांस्तानभिप्रेत्य पृथुर्वैन्यः प्रतापवान् । मेघनिर्ह्रादया वाचा प्रहसन्निदमब्रवीत् ॥ २१ ॥

पृथुरुवाच

भोः सूत हे मागध सौम्य वन्दिँल्लोकेऽधुनाऽस्पष्टगुणस्य मे स्यात् ।
किमाश्रयो मे स्तव एष योज्यतां मा मय्यभूवन् वितथा गिरो वः ॥ २२ ॥

तस्मात्परोक्षेऽस्मदुपश्रुतान्यलं करिष्यथ स्तोत्रमपीच्यवाचः ।
सत्युत्तमश्लोकगुणानुवादे जुगुप्सितं न स्तवयन्ति सभ्याः ॥ २३ ॥

स्वःस्त्रियोऽप्सरसः ॥ ७ ॥ तत्र स्थाने ॥ ८ ॥ ब्रह्मेति सार्द्धकम् । आसृत्य आगत्य । चिह्नं रेखात्मकं चक्रम् गदैव तत् इति वंशीधरी ॥ ९ ॥ यस्येत्यर्द्धकम् । अप्रतिहतं रेखान्तरैरभिन्नं पाणितले ॥ १० ॥ अभिषेकसाधनानि आजह्रुः आनीतवन्तः ॥ ११ ॥ समाजह्रुः समर्पितवन्तः ॥ १२।१३ ॥ सलिलं पीयूषं तस्य स्रावश्चन्द्रकिरणवत् यस्मात् । जहार ददौ इत्यग्रेऽप्यन्वेति ॥ १४ ॥ वालव्यजने चामरद्वयम्-संयम्यन्ते ताड्यन्तेऽधर्मिणोऽनेन तं दण्डम् ॥१५॥ ब्रह्मप्रवचनसामर्थ्यापादकं वर्मकवचम् ॥१६॥ दश चन्द्राकाराणि बिम्बानि कोशे यस्य । शतचन्द्रे ढाल इति । अमृतमयान् दिव्यान् । रूपाश्रयमतिसुन्दरम् ॥१७॥ अजस्य गोवृषस्य च शृङ्गाभ्यां निर्मितम् आजगवम् । योगमय्यौ स्पर्शमात्रेणाऽभीष्टदेशप्रापिके । द्यौः द्युपतिः इन्द्रः ॥ १८ ॥ खेचरा गन्धर्वादयः । आत्मजं स्वप्रभवम् ॥ १९ ॥ वीथीर्मार्गान् । सूतादयः क्रमेण पुराणस्थनृपाणां मृतवीरनृपाणां वर्तमाननृपाणां च स्तोतारोऽत्रैवर्णिका ज्ञेयाः ॥२०॥ मेघवदगम्भीरया ।२१। मेऽस्पष्टगुणत्वात् किमाश्रयः स्यात् अत एष स्तवः अमे मदन्यस्य योज्यतां यतो मयि विषये वः स्तुतिगिरः मिथ्या मा भवेयुः ॥ २२ ॥ हे अपीच्यवाचो मधुरगिरः ! परोक्षे कालान्तरे स्पष्टेषु

महद्गुणानात्मनि कर्तुमीशः कः स्तावकैः स्तावयतेऽसतोऽपि ।
तेऽस्याभविष्यन्निति विप्रलब्धो जनावहासं कुमतिर्न वेद ।। २४ ।।

प्रभवो ह्यात्मनः स्तोत्रं जुगुप्सन्त्यपि विश्रुताः । ह्रीमन्तः परमोदाराः पौरुषं वा विगर्हितम् २५

वयं त्वविदिता लोके सूताद्यापि वरीमभिः । कर्मभिः कथमात्मानं गापयिष्याम बालवत् २६

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां चतुर्थस्कन्धे पृथुचरिते पञ्चदशोऽध्यायः ।। १५ ।।

अथ षोडशोऽध्यायः

मैत्रेय उवाच

इति ब्रुवाणं नृपतिं गायका मुनिचोदिताः । तुष्टुवुस्तुष्टमनसस्तद्वागमृतसेवया ।। १ ।।

नालं वयं ते महिमानुवर्णने यो देववर्योऽवततार मायया ।
वेनाङ्गजातस्य च पौरुषाणि ते वाचस्पतीनामपि बभ्रमुर्धियः ।। २ ।।

अथाप्युदारश्रवसः पृथोर्हरेः कलावतारस्य कथामृतादृताः ।
यथोपदेशं मुनिभिः प्रचोदिताः श्लाघ्यानि कर्माणि वयं वितन्महि ।। ३ ।।

एष धर्मभृतां श्रेष्ठो लोकं धर्मेऽनुवर्तयन् । गोप्ता च धर्मसेतूनां शास्ता तत्परिपन्थिनाम् ।। ४ ।।

गुणेषु सत्सु प्रतिस्तोत्रम् अस्माकं यशांसि अलं लोकभूषणं करिष्यथ । किन्तु अनुवादरूपे कार्ये सति जुगुप्सितमर्वाचीनं न स्तवयन्ति स्तवशब्दात् कर्मणि अप्प्रत्ययान्तात् तत्करोतीति णिजन्तस्य रूपमेतत् ।२३। कर्तुं सम्पादयितुमीशः समर्थोऽपि असतो गुणान् कः न कोऽपि । यस्तु स्तावयते स च कुमतिर्जनावहासं न वेद । कीदृशः । यद्ययमभ्यासमकरिष्यत् तर्हि ते गुणा अस्य अभविष्यन्निति क्रियातिपत्त्या विप्रलब्ध उपहसितः ॥ २४ ॥ विश्रुताः प्रख्यातगुणा अपि आत्मस्तुतिं निन्दन्ति । किमिव । गोवधे शूरोऽयमिति निन्दितं पौरुषमिव । वा शब्द इवार्थे ॥ २५ ॥ वरीमभिः वरिष्ठैः । अविदिता अप्रकाशितगुणाः बालवत् अज्ञवत् ।। २६ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे गूढार्थदीपिन्यां पञ्चदशोऽध्यायः ।

•

षोडशे मुनिभिः प्रोक्तैः सूतमागधवन्दिभिः ।
भाविवृत्तानुसारेण श्रीपृथोः क्रियते स्तुतिः ।। १ ।।

नालं न समर्थाः किं बहुना पौरुषाणि प्रति ।१।२। आदरणमाहृतिः सा विद्यते येषान्ते सादराः । भावे क्तिन् ततोऽर्शं आद्यच् वितन्महि । विस्तारयामः । श्रुवो यशः ॥ ३ ॥ सेतुर्मर्यादा । तत्परिपन्थिनाम्

एष वै लोकपालानां बिभर्त्येकस्तनौ तनूः । काले काले यथाभागं लोकयोरुभयोर्हितम् ॥ ५ ॥
वसु काल उपादत्ते काले चायं विमुञ्चति । समः सर्वेषु भूतेषु प्रतपन् सूर्यवद्विभुः ॥ ६ ॥
तितिक्षत्यक्रमं वैन्य उपर्याक्रमतामपि । भूतानां करुणः शश्वदार्तानां क्षितिवृत्तिमान् ॥ ७ ॥
देवेऽवर्षत्यसौ देवो नरदेववपुर्हरिः । कृच्छ्रप्राणाः प्रजा ह्येष रक्षिष्यत्यञ्जसेन्द्रवत् ॥ ८ ॥
आप्याययत्यसौ लोकं वदनामृतमूर्तिना । सानुरागावलोकेन विशदस्मितचारुणा ॥ ९ ॥

अव्यक्तवर्त्मैष निगूढकार्यो गम्भीरवेधा उपगुप्तवित्तः ।
अनन्तमाहात्म्यगुणैकधामा पृथुः प्रचेता इव संवृतात्मा ॥ १० ॥

दुरासदो दुर्विषह आसन्नोऽपि विदूरवत् । नैवाभिभवितुं शक्यो वेनारण्युत्थितोऽनलः ॥११॥
अन्तर्बहिश्च भूतानां पश्यन् कर्माणि चारणैः । उदासीन इवाध्यक्षो वायुरात्मेव देहिनाम् ॥१२॥
नादण्ड्यं दण्डयत्येष सुतमात्मद्विषामपि । दण्डयत्यात्मजमपि दण्ड्यं धर्मपथे स्थितः ॥१३॥
अस्याप्रतिहतं चक्रं पृथोरामानसाचलात् । वर्तते भगवानर्को यावत्तपति गोगणैः ॥१४॥
रञ्जयिष्यति यल्लोकमयमात्मविचेष्टितैः । अथामुमाहू राजानं मनोरञ्जनकैः प्रजाः ॥१५॥
दृढव्रतः सत्यसंधो ब्रह्मण्यो वृद्धसेवकः । शरण्यः सर्वभूतानां मानदो दीनवत्सलः ॥१६॥
मातृभक्तिः परस्त्रीषु पत्न्यामर्ध इवात्मनः । प्रजासु पितृवत्स्निग्धः किङ्करो ब्रह्मवादिनाम् ॥१७॥
देहिनामात्मवत्प्रेष्ठः सुहृदां नन्दिवर्धनः । मुक्तसङ्गप्रसङ्गोऽयं दण्डपाणिरसाधुषु ॥१८॥

अयं तु साक्षाद्भगवांस्त्र्यधीशः कूटस्थ आत्मा कलयाऽवतीर्णः ।
यस्मिन्नविद्यारचितं निरर्थकं पश्यन्ति नानात्वमपि प्रतीतम् ॥१९॥

अयं भुवो मण्डलमोदयाद्रेर्गोप्तैकवीरो नरदेवनाथः ।
आस्थाय जैत्रं रथमात्तचापः पर्यस्यते दक्षिणतो यथाऽर्कः ॥२०॥

तद्विरोधिनाम् ॥ ४ ॥ तनूः शक्तीः । हितं यथा स्यात्तथा ॥ ५ ॥ अयं पृथुः सूर्यश्च वसु धनं जलं च काले दुर्भिक्षे वर्षासु च क्रमेण विमुञ्चति ॥ ६ ॥ अक्रमम् अपराधम् । तितिक्षति सहिष्यते । क्षितेः वृत्तिः सर्वंसहनरूपाऽस्यास्तीति ॥ ७ ॥ कृच्छ्रं कष्टं गताः प्राणा यासाम् ताः । अञ्जसाऽनायासेन स्वयं वृष्टिं कृत्वा ॥८॥ वदनामृतमूर्तिना मुखचन्द्रेण आप्याययति बर्द्धयिष्यति ।९। गम्भीरमन्यैरज्ञाताभिप्रायं विधत्ते तथा प्रचेता वरुण इव भविष्यतीति शेषः ॥ १० ॥ वेनरूपकाष्ठात् ॥ ११ ॥ अन्तर्बहिश्च कृतानि गुप्तचरैः पश्यन् वायुरिव उदासीनः रागद्वेषरहितोऽपि परमात्मेव देहिनामध्यक्षः साक्षी ॥१२।१३॥ चक्रमाज्ञा सेना वा रथचक्रं वा मानसाचलमभिव्याप्य । गोगणैः किरणसमूहैः ॥ १४ ॥ यत् यतः रञ्जनकैश्चेष्टितैः रञ्जयिष्यति आनन्दयिष्यति । अथ अतः ॥ १५ ॥ सत्यसंधः सत्यप्रतिज्ञो भविष्यतीति सर्वत्र शेषः ॥ १६ ॥ आत्मनो देहस्य अर्द्धे यथा प्रीतिमान् ॥ १७ ॥ नन्दिः आनन्दः । मुक्तसङ्गेषु विरक्तेषु ॥ १८ ॥ यस्मिन् आत्मनि प्रतीतमपि नानात्वं प्रपञ्चं विद्वांसो नश्वरं पश्यन्ति तदासक्तिं त्यजन्तीत्यर्थः ॥ १९ ॥ रथमास्थाय उदयाचलपर्यन्तं भूमण्डलं गोप्ता सन् दक्षिणतः पर्यस्यते

अस्मै नृपालाः किल तत्र तत्र बलिं हरिष्यन्ति सलोकपालाः ।
मंस्यन्त एषां स्त्रिय आदिराजं चक्रायुधं तद्यश उच्चरन्त्यः ॥२१॥
अयं महीं गां दुदुहेऽधिराजः प्रजापतिर्वृत्तिकरः प्रजानाम् ।
यो लीलयाद्रीन् स्वशरासकोट्या भिन्दन् समां गामकरोद्यथेन्द्रः ॥२२॥
विस्फूर्जयन्नाजगवं धनुः स्वयं यदाचरत्क्ष्मामविषह्यमाजौ ।
तदा निलिल्युर्दिशि दिश्यसन्तो लाङ्गूलमुद्यम्य यथा मृगेन्द्रः ॥२३॥
एषोऽश्वमेधान् शतमाजहार सरस्वती प्रादुरभावि यत्र ।
अहार्षीद्यस्य हयं पुरन्दरः शतक्रतुश्चरमे वर्तमाने ॥२४॥
एष स्वसद्मोपवने समेत्य सनत्कुमारं भगवन्तमेकम् ।
आराध्य भक्त्या लभतामलं तज्ज्ञानं यतो ब्रह्म परं विदन्ति ॥२५॥
तत्र तत्र गिरस्तास्ता इति विश्रुतविक्रमः । श्रोष्यत्यात्माश्रिता गाथाः पृथुः पृथुपराक्रमः॥२६॥
दिशो विजित्याऽप्रतिरुद्धचक्रः स्वतेजसोत्पाटितलोकशल्यः ।
सुरासुरेन्द्रैरुपगीयमानमहानुभावो भविता पतिर्भुवः ॥२७॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां चतुर्थस्कन्धे षोडशोऽध्यायः ॥ १६ ॥

अथ सप्तदशोऽध्यायः

मैत्रेय उवाच

एवं स भगवान् वैन्यः ख्यापितो गुणकर्मभिः । छन्दयामास तान् कामैः प्रतिपूज्याभिनन्द्य च॥१॥
ब्राह्मणप्रमुखान् वर्णान् भृत्यामात्यपुरोधसः । पौराञ्जानपदान् श्रेणीः प्रकृतीः समपूजयत्॥ २॥

पर्यटिष्यति ॥ २० ॥ बलिमुपायनं समर्पयिष्यन्ति । उच्चरन्त्यः कीर्तयन्त्य इति सर्वत्र पाठः । चक्रायुधं विष्णुरूपम् ॥ २१ ॥ शरासो धनुः तस्य कोटयाऽग्रभागेन अद्रीन् भिन्दन् गां पृथ्वीम् ॥ २२ ॥ लाङ्गूलं पुच्छमुद्यम्य यथा सिंहश्चरति तथा धनुः टङ्कारयन् यदा पृथ्वीमचरत् तदेति योज्यम् । आजौ सङ्ग्रामे ॥२३॥ आजहार कृतवान् । प्रादुरभावि पृथुनैव प्रादुर्भविता इति सन्दर्भः । अहार्षीत् हरिष्यति ॥ २४ ॥ अलमत लप्स्यते ॥ २५ ॥ गाथा निबन्धरूपा तत्र तत्र सर्वत्र ॥ २६ ॥ अप्रतिरुद्धचक्रोऽप्रतिहताज्ञः । लोकशल्यः लोकोपद्रवः ॥ २७ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे गूढार्थदीपिन्यां षोडशोऽध्यायः ।

ततः सप्तदशे लोकैरन्नार्थं प्रार्थितः पृथुः ।
ग्रस्तान्नां भूमिमाहन्तुमुद्यतोऽभूत् तया स्तुतः ॥ १ ॥

तान् सूतादीन् । कामैरभीष्टपदार्थैः । छन्दयामास तोषितवान् ॥ १ ॥ जानपदान् बहिर्देशीयान् ।

विदुर उवाच

कस्माद्दधार गोरूपं धरित्री बहुरूपिणी । यां दुदोह पृथुस्तत्र को वत्सो दोहनं च किम् ॥ ३ ॥
प्रकृत्या विषमा देवी कृता तेन समा कथम् । तस्य मेध्यं हयं देवः कस्य हेतोरपाहरत् ॥ ४ ॥
सनत्कुमाराद्भगवतो ब्रह्मन् ब्रह्मविदुत्तमात् । लब्ध्वा ज्ञानं सविज्ञानं राजर्षिः कां गतिं गतः ॥ ५ ॥
यच्चान्यदपि कृष्णस्य भवान् भगवतः प्रभोः । श्रवः सुश्रवसः पुण्यं पूर्वदेहकथाश्रयम् ॥ ६ ॥
भक्ताय मेऽनुरक्ताय तव चाधोक्षजस्य च । वक्तुमर्हति योऽदुह्यद्वैन्यरूपेण गामिमाम् ॥ ७ ॥

सूत उवाच

चोदितो विदुरेणैवं वासुदेवकथां प्रति । प्रशस्य तं प्रीतमना मैत्रेयः प्रत्यभाषत ॥ ८ ॥

मैत्रेय उवाच

यदाऽभिषिक्तः पृथुरङ्ग विप्रैरामन्त्रितो जनतायाश्च पालः ।
प्रजा निरन्ने क्षितिपृष्ठ एत्य क्षुत्क्षामदेहाः पतिमभ्यवोचन् ॥ ९ ॥
वयं राजञ्जाठरेणाभितप्ता यथाग्निना कोटरस्थेन वृक्षाः ।
त्वामद्य याताः शरणं शरण्यं यः साधितो वृत्तिकरः पतिर्नः ॥ १० ॥
तन्नो भवानीहतु रातवेऽन्नं क्षुधार्दितानां नरदेवदेव ।
यावन्न नङ्क्ष्यामह उज्झितोर्जा वार्तापतिस्त्वं किल लोकपालः ॥ ११ ॥

मैत्रेय उवाच

पृथुः प्रजानां करुणं निशम्य परिदेवितम् । दीर्घं दध्यौ कुरुश्रेष्ठ निमित्तं सोऽन्वपद्यत ॥१२॥
इति व्यवसितो बुद्ध्या प्रगृहीतशरासनः । संदधे विशिखं भूमेः क्रुद्धस्त्रिपुरहा यथा ॥१३॥
प्रवेपमाना धरणी निशाम्योदायुधं च तम् । गौः सत्यपाद्रवद्भीता मृगीव मृगयुद्रुता ॥१४॥
तामन्वधावत्तद्वैन्यः कुपितोऽत्यरुणेक्षणः । शरं धनुषि संधाय यत्र यत्र पलायते ॥१५॥
सा दिशो विदिशो देवी रोदसी चान्तरं तयोः । धावन्ती तत्र तत्रैन ददर्शानूद्यतायुधम् ॥१६॥

श्रेणीः तैलिकताम्बूलिकादीन् । एवं प्रकृतीः सर्वा अपि प्रजाः ॥ २ ॥ तत्र दोहनावसरे । दोहनं पात्रम् ॥ ३ ॥ प्रकृत्या स्वभावत उच्चावचा । मेध्यं यज्ञियम् । देव इन्द्रः ॥ ४।५ ॥ यच्चेति युग्मकम् । सुश्रुवसः पवित्रकीर्तेः कृष्णस्य यच्च अन्यत् श्रवो यशस्तदपि मे वक्तुमर्हसि । पूर्वदेहः पृथुः ॥ ६।७।८ ॥ अङ्ग हे विदुर ! पालःरक्षकः इत्यामन्त्रितो नियुक्तश्च तदा पतिमेत्य । पृष्ठे भूतले । क्षामः क्षीणः ॥९॥ यो विप्रैर्मन्थनेन सम्पादितस्तं त्वाम् ॥ १० ॥ तत् तस्मात् उज्झितोर्जाः त्यक्तान्ना वयं यावन्न तावदेव नोऽस्माकमन्नं रातवे दातुम् ईहतु यत्नं करोतु । यतस्त्वं वार्तापतिः जीविकाप्रदः । न केवलं जनपालः अपि तु किललोका सात्विकदेवास्तेषामपि । किल श्वैत्ये इत्यस्मात् ॥ ११ ॥ परिदेवितं विलापम् । निमित्तं निरन्नत्वे कारणं भूग्रस्तबीजत्वरूपम् ॥ १२ ॥ व्यवसितो निश्चिन्वानः । भूमिं प्रति । विशिखं वाणम् ॥ १३ ॥ गौः सतीति पदच्छेदः न तु जाड्यावच्छिन्नभूमण्डलं प्रति तेन वाणसन्धानं कृतमिति ध्येयम् । मृगयुद्रुता व्याधानुगता ॥ १४ ॥ तत् तदा ॥ १५ ॥ रोदसी द्यावापृथिव्यौ तयोः । अन्तरम्

लोके नाविन्दत त्राणं वैन्यान्मृत्योरिव प्रजाः । त्रस्ता तदा निववृते हृदयेन विदूयता ॥१७॥
उवाच च महाभागं धर्मज्ञापन्नवत्सल । त्राहि मामपि भूतानां पालनेऽवस्थितो भवान् ॥१८॥
स त्वं जिघांससे कस्माद्दीनामकृतकिल्बिषाम् । अहनिष्यत्कथं योषां धर्मज्ञ इति यो मतः ॥१९॥
प्रहरन्ति न वै स्त्रीषु कृतागःस्वपि जन्तवः किमुत त्वद्विधा राजन् करुणा दीनवत्सलाः ॥२०॥
मां विपाट्याजरां नावं यत्र विश्वं प्रतिष्ठितम् । आत्मानं च प्रजाश्चेमाः कथमम्भसि धास्यसि ॥

पृथुरुवाच

वसुधे त्वां वधिष्यामि मच्छासनपराङ्मुखीम् । भागं बर्हिषि या वृङ्क्ते न तनोति च नो वसु २२
यवसं जग्ध्यनुदिनं नैव दोग्ध्यौधसं पयः । तस्यामेवं हि दुष्टायां दण्डो नात्र न शस्यते ॥२३॥
त्वं खल्वोषधिबीजानि प्राक् सृष्टानि स्वयम्भुवा । न मुञ्चस्यात्मरुद्धानि मामवज्ञाय मन्दधीः २४
अमूषां क्षुत्परीतानामार्तानां परिदेवितम् । शमयिष्यामि मद्बाणैर्भिन्नायास्तव मेदसा ॥ २५ ॥
पुमान् योषिदुत क्लीब आत्मसम्भावनोऽधमः । भूतेषु निरनुक्रोशो नृपाणां तद्वधोऽवधः ॥२६॥
त्वां स्तब्धां दुर्मदां नीत्वा मायागां तिलशः शरैः । आत्मयोगबलेनेमा धारयिष्याम्यहं प्रजाः २७
एवं मन्युमयीं मूर्ति कृतान्तमिव बिभ्रतम् । प्रणता प्राञ्जलिः प्राह मही सञ्जातवेपथुः ॥२८॥

धरोवाच

नमः परस्मै पुरुषाय मायया विन्यस्तनानातनवे गुणात्मने ।
नमः स्वरूपानुभवेन निर्धुतद्रव्यक्रियाकारकविभ्रमोर्मये ॥ २९ ॥
येनाहमात्मायतनं विनिर्मिता धात्रा यतोऽयं गुणसर्गसंग्रहः ।
स एव मां हन्तुमुदायुधः स्वराडुपस्थितोऽन्यं शरणं कमाश्रये ॥ ३० ॥
य एतदादावसृजच्चराचरं स्वमाययाऽऽत्माश्रययावितर्क्यया ।
तयैव सोऽयं किल गोप्तुमुद्यतः कथं नु मां धर्मपरो जिघांसति ॥ ३१ ॥

अन्तरिक्षम् । अनु पृष्ठदेशे ॥१६॥ निववृते तत्सम्मुखीबभूव ॥१७।१८॥ कस्मादिति स्वस्यावध्यत्वं दर्शितं कथं हनिष्यतीति तव हन्तृत्वमप्यनुचितमिति अतो न पौनरुक्त्यम् ॥१९॥ कृतागस्सु कृतापराधासु ॥२०॥ अजरां दृढाम् । विपाट्य विदार्य । धारयिष्यसि ॥ २१ ॥ बर्हिषि यज्ञे । या भवती वृङ्क्ते भजते सा त्वं वसु धान्यादिकं नेत्यन्वयः ॥ २२ ॥ औधसं स्तनगतं दुग्धं च न स्रवति । अत्राऽस्मिन्नपराधे । न इति न अपि तु शस्यते एव ॥ २३ ॥ आत्मनि देहे ॥ २४ ॥ अमूषां प्रजानाम् । मेदसा मांसेन ॥२५॥ अधमो भूत्वाऽपि य आत्मानं संभावयति सर्वोत्कृष्टं मन्यते सः । निरनुक्रोशः निर्दयः ॥ २६ ॥ स्तब्धामनम्राम् । मायया दम्भेन ॥ २७।२८ वेपथुः कम्पः । मायया कृपया भक्तार्थम् । अत एव आत्मरूपदर्शनेन तेषामपि निर्धूता दूरीकृताः शरीरेन्द्रियदेवतानिमित्तका विभ्रमोर्मयः संसारतरङ्गा रागद्वेषादयः येन तस्मै ॥२९॥ यतो यस्यां गुणसर्गस्य चतुर्विधजीवसमूहस्य स्थितिः साहं भूमिः येन विनिर्मिता स एव हन्तुमुपस्थितः अतोऽन्यं कं न कमपि किन्तु त्वामेवेत्यन्वयः । आत्मायतनं जीवाधारभूता ॥ ३० ॥ आत्माश्रयया जीवसंबन्धिन्या स्वलीलया ॥३१॥ यो ब्रह्माणमकरोत् यश्च तेन चराचरमकारयत् य एकः

नूनं बतेशस्य समीहितं जनैस्तन्मायया दुर्जययाऽकृतात्मभिः ।
न लक्ष्यते यस्त्वकरोदकारयद्योऽनेक एकः परतश्च ईश्वरः ॥३२॥
सर्गादि योऽस्यानुरुणद्धि शक्तिभिर्द्रव्यक्रियाकारकचेतनात्मभिः ।
तस्मै समुन्नद्धनिरुद्धशक्तये नमः परस्मै पुरुषाय वेधसे ॥३३॥
स वै भवानात्मविनिर्मितं जगद्भूतेन्द्रियान्तःकरणात्मकं विभो ।
संस्थापयिष्यन्नज मां रसातलादभ्युज्जहाराम्भस आदिसूकरः ॥३४॥
अपामुपस्थे मयि नाव्यवस्थिताः प्रजा भवानद्य रिरक्षिषुः किल ।
स वीरमूर्तिः समभूद्धराधरो यो मां पयस्युग्रशरो जिघांससि ॥३५॥
नूनं जनैरीहितमीश्वराणामस्मद्विधैस्तद्गुणसर्गमायया ।
न ज्ञायते मोहितचित्तवर्त्मभिस्तेभ्यो नमो वीरयशस्करेभ्यः ॥३६॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां चतुर्थस्कन्धे पृथुविजये धरित्रीनिग्रहो नामसप्तदशोऽध्यायः ॥१७॥

अथाष्टादशोऽध्यायः

मैत्रेय उवाच

इत्थं पृथुमभिष्टूय रुषा प्रस्फुरिताधरम् । पुनराहावनिर्भीता संस्तभ्यात्मानमात्मना ॥ १ ॥
संनियच्छाभिभो मन्युं निबोध श्रावितं च मे । सर्वतः सारमादत्ते यथा मधुकरो बुधः ॥ २ ॥

परतो मायया‌ऽनेकश्च तस्येशस्य ते समीहितं जनैर्न लक्ष्यते इत्यन्वयः । अकृतात्मभिः विक्षिप्तचित्तैः ॥३२॥ अस्य विश्वस्य सर्गादि योऽनुरुणद्धि करोति तस्मै नमः इत्यन्वयः । भूतेन्द्रिय-देवताबुद्धयहङ्काररूपाभिः । समुन्नद्धाः प्रबलाः परस्परविरुद्धाश्च विद्याऽविद्यारूपाः पालनसंहाररूपा वा शक्तयो यस्य ॥ ३३ ॥ यः सृष्टवान् स एव भवान् जगत् संस्थापयितुमादिशूकरः सन् माम् उद्दधार उद्धृतवान् । अम्भस अम्भसि प्रविश्य । ल्यब्लोपे । पञ्चमी ॥ ३४ ॥ तदा च यो धराधरः समभूत् स एव पृथुमूर्तिः सन् अद्य पयसि दुग्धे निमित्ते मां जिघांसतीत्यतः तच्चेष्टितं न ज्ञायते इत्यन्वयः । उपस्थे उपरि नौकारूपायां मयि ॥ ३५ ॥ ईश्वराणा येषां भवतामीहितं चिकीर्षितं जनै र्न ज्ञायते तेभ्यो नमः । मायया संसृतिरूपयाऽविद्यया मोहितानि चित्तवर्त्मानि चित्तवृत्तयो येषां तैः ॥ ३६ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे गूढार्थदीपिन्यां सप्तदशोऽध्यायः ।

अष्टादशे महीं दुग्ध्वा सर्वे स्वेच्छानुसारतः ।
वत्सपात्रादिभेदेन स्वं स्वं दुग्धं च लेभिरे ॥१॥

अवनिः पृथ्वी आत्मना आत्मानं बुद्धया मनः सुस्थिरं कृत्वा ॥ १ ॥ अभिभो हे प्रभो

अस्मिँल्लोकेऽथवामुष्मिन् मुनिभिस्तत्त्वदर्शिभिः । दृष्टा योगाः प्रयुक्ताश्च पुंसां श्रेयःप्रसिद्धये ३
तानातिष्ठति यः सम्यगुपायान् पूर्वदर्शितान् । अवरः श्रद्धयोपेत उपेयान् विन्दतेऽञ्जसा ॥ ४॥
ताननादृत्य योऽविद्वानर्थानारभते स्वयम् । तस्य व्यभिचरन्त्यर्था आरब्धाश्च पुनः पुनः॥५॥
पुरा सृष्टा ह्योषधयो ब्रह्मणा या विशाम्पते । भुज्यमाना मया दृष्ट्वा असद्भिरधृतव्रतैः ॥६॥
अपालिताऽनादृता च भवद्भिर्लोकपालकैः । चोरीभूतेऽथ लोकेऽहं यज्ञार्थेऽग्रसमोषधीः ॥ ७ ॥
नूनं ता वीरुधः क्षीणा मयि कालेन भूयसा । तत्र योगेन दृष्टेन भवानादातुमर्हति ॥ ८ ॥
वत्सं कल्पय मे वीर येनाहं वत्सला तव । धोक्ष्ये क्षीरमयान् कामाननुरूपं च दोहनम् ॥ ९ ॥
दोग्धारं च महाबाहो भूतानां भूतभावन । अन्नमीप्सितमूर्जस्वद्भगवान् वाञ्छते यदि ॥१०॥
समां च कुरु मां राजन् देववृष्टं यथा पयः । अपर्तावपि भद्रं त उपावर्तेत मे विभो ॥ ११ ॥
इति प्रियं हितं वाक्यं भुव आदाय भूपतिः । वत्सं कृत्वा मनुं पाणावदुहत् सकलौषधीः ॥१२॥
तथाऽपरे च सर्वत्र सारमाददते बुधाः । ततोऽन्ये च यथाकामं दुदुहुः पृथुभाविताम् ॥ १३ ॥
ऋषयो दुदुहुर्देवीमिन्द्रियेष्वथ सत्तम । वत्सं बृहस्पतिं कृत्वा पयश्छन्दोमयं शुचि ॥ १४ ॥
कृत्वा वत्सं सुरगणा इन्द्रं सोममदूदुहन् । हिरण्मयेन पात्रेण वीर्यमोजो बलं पयः ॥ १५ ॥
दैतेया दानवा वत्सं प्रह्लादमसुरर्षभम् । विधायादूदुहन् क्षीरमयःपात्रे सुरासवम् ॥ १६ ॥
गन्धर्वाप्सरसोऽधुक्षन् पात्रे पद्ममये पयः । वत्सं विश्वावसुं कृत्वा गान्धर्वं मधुसौभगम् ॥१७॥
वत्सेन पितरोऽर्यम्णा कव्यं क्षीरमधुक्षत । आमपात्रे महाभागाः श्रद्धया श्राद्धदेवताः ॥ १८ ॥
प्रकल्प्य वत्सं कपिलं सिद्धाः संकल्पनामयीम् । सिद्धिं नभसि विद्यां च ये च विद्याधरादयः१९

भो राजन् ! अभि निःशेषतः अभयं यथा स्यात्तथेति मन्युं नियच्छ श्रावितं विज्ञापितं च शृणु । वुधः सर्वतः ।२।अस्मिन् लोके फलप्राप्तये योगाः कृष्याद्युपायाः परलोके च यज्ञादयः ।३। आति अनु । अवर आधुनिकः। अञ्जसा सुखेन उपेयान् फलानि ॥ ४ ॥ अर्था उद्योगा व्यभिचरन्ति निष्फला भवन्ति ॥ ५ ॥ पुरेति युग्मकम् । या सृष्टास्ता ओषधी असद्भि र्भुज्यनाना अपालिता च दृष्ट्वा अहमग्रसमित्यन्वयः । ओषधयो व्रीह्याद्याः । दृष्ट्वेति पाठः तीर्थसम्मत उपयुक्तश्च ॥ ६।७ ॥ वीरुधः ओषधयः । क्षीणा जीर्णाः । योगेन वक्ष्यमाणोपायेन ॥ ८ ॥ वत्समिति युग्मकम् । यदि भूतानामीप्सितम् ऊर्जस्वत् बलप्रदमन्नं वाञ्छते तर्हि येनाहं तव कामान् पूरयिष्यामि तादृशं वत्सं दोहनपात्रं दोग्धारं च उपकल्पयेत्यन्वयः ।९।१०। अपगतेऽपि वर्षर्तौ यथा पयो मे मयि सर्वतो वर्तेत तथा मां समां कुरु तत एव ते भद्रम् अभीष्ट-सिद्धिर्भविष्यति ॥ ११ ॥ वत्सं भावनामयम् ॥ १२ ॥ यथा पृथुः सारं गृहीतवान् तथा सर्वत्र लोके अपरेऽपि वुधाः । ततः पृथोः अनन्तरं भावितां वशीकृताम् ॥ १३ ॥ इन्द्रियेषु वाङ्मनःश्रोत्रेषु पात्रेषु ॥ १४ ॥ वीर्यमिति मनइन्द्रियदेहशक्तिसम्पादकं सोमम् अमृतरूपं पयः ॥ १५ ॥ अयःपात्रे लोहपात्रे। आसनं तालादिमद्यरूपं च ॥१६॥ मधु वाङ्माधुर्यं सौन्दर्यं चास्त्यस्मिन् तद्गान्धर्वं गानरूपं पयः ॥१७॥ कव्यं पित्रन्नम् । आमपात्रे अचक्रघटितेऽपक्वमृण्मये ॥१८॥ नभसि पात्रे । ये च तेऽपि खेचरत्वादिविद्यां

अन्ये च मायिनो मायामन्तर्धानाद्भुतात्मनाम्। मयं प्रकल्प्य वत्सं ते दुदुहुर्धारणामयीम् २०
यक्षरक्षांसि भूतानि पिशाचाः पिशिताशनाः। भूतेशवत्सा दुदुहुः कपाले क्षतजासवम् ॥२१॥
तथाऽहयो दन्दशूकाः सर्पा नागाश्च तक्षकम्। विधाय वत्सं दुदुहुर्बिलपात्रे विषं पयः॥ २२॥
पशवो यवसं क्षीरं वत्सं कृत्वा च गोवृषम् अरण्यपात्रे चाधुक्षन्मृगेन्द्रेण च दंष्ट्रिणः॥ २३॥
क्रव्यादाः प्राणिनः क्रव्यं दुदुहुः स्वे कलेवरे। सुपर्णवत्सा विहगाश्चरं चाचरमेव च॥ २४॥
वटवत्सा वनस्पतयः पृथग्रसमयं पयः। गिरयो हिमवद्वत्सा नानाधातून् स्वसानुषु॥ २५॥
सर्वे स्वमुख्यवत्सेन स्वे स्वे पात्रे पृथक् पयः। सर्वकामदुघां पृथ्वीं दुदुहुः पृथुभाविताम् २६
एवं पृथ्वादयः पृथ्वीमन्नादाः स्वन्नमात्मनः। दोहवत्सादिभेदेन क्षीरभेदं कुरूद्वह॥ २७॥
ततो महीपतिः प्रीतः सर्वकामदुघां पृथुः। दुहितृत्वे चकारेमां प्रेम्णा दुहितृवत्सलः॥ २८॥
चूर्णयन् स्वधनुष्कोट्या गिरिकूटानि राजराट्। भूमण्डलमिदं वैन्यः प्रायश्चक्रे समं विभुः २९
अथास्मिन् भगवान् वैन्यः प्रजानां वृत्तिदः पिता। निवासान् कल्पयाञ्चक्रे तत्र तत्र यथार्हतः ३०
ग्रामान् पुरः पत्तनानि दुर्गाणि विविधानि च। घोषान् व्रजान् सशिबिरानाकरान् खेटखर्वटान् ३१
प्राक्पृथोरिह नैवैषा पुरग्रामादिकल्पना। यथासुखं बसन्ति स्म तत्र तत्राऽकुतोभयाः॥३२॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां चतुर्थस्कन्धे पृथुविजयेऽष्टादशोऽध्यायः॥ १८॥

दुदुहुरिति योज्यम् ॥ १९ ॥ तेन अद्भुतात्मनाम् आश्चर्यमनसां संबन्धिनीम् मायामन्तर्धानशक्तिम् ॥ २० ॥ पिशिताशना मांसभोजनाः। भूतेशो भैरवः क्षतजं रुधिरं तदेव ॥ २१ ॥ यथाऽन्ये तथा। सर्पावान्तरभेदाः ॥ २२ ॥ पशव इति सार्द्धम्। गोवृषं नन्दीश्वरम्। मृगन्द्रेण वत्सेन क्रव्यादा मांसाशिनो वृकादयः ॥ २३ ॥ सुपर्णेत्यर्द्धम्। चरं कीटादि। अचरं फलादि। अत्रापि स्वकलेवरे पात्रे इति योज्यम् ॥ २४ ॥ वनस्पतयोऽपि स्वकलेवरे ॥ २५ ॥ सर्वे अन्ये इहानुक्ता अपि। स्वजातौ यो मुख्यस्तेन ॥२६॥ अन्नादाः अन्नकांक्षिणः स्वन्नमभीष्टमन्नमेव क्षीरभेदं दुदुहुः। दोहः पात्रम् ॥२७।२८॥ कोट्या अग्रभागेन। कूटानि शृङ्गाणि ॥ २९ ॥ यथार्हतः यथायोग्यम् ॥३०॥ घोषा गोपस्थानम्। व्रजः गोशाला। शिविरं सेनानिवासस्थानम्। खेटः कर्षकग्रामः। खर्वटः पर्वतीयग्रामः ॥ ३१ ॥ अथाऽपि तत्र तत्र स्थाने निर्भयाः सत्यः ॥ ३२ ॥

इति श्रीमद्भागवतो महापुराणे चतुर्थस्कन्धे गूढार्थदीपिन्यां मष्टादशोऽध्यायः।

अथैकोनविंशोऽध्यायः

मैत्रेय उवाच

अथादीक्षत राजा तु हयमेधशतेन सः । ब्रह्मावर्ते मनोः क्षेत्रे यत्र प्राची सरस्वती ॥ १ ॥
तदभिप्रेत्य भगवान् कर्मातिशयमात्मनः । शतक्रतुर्न ममृषे पृथोर्यज्ञमहोत्सवम् ॥ २ ॥
यत्र यज्ञपतिः साक्षाद्भगवान् हरिरीश्वरः । अन्वभूयत सर्वात्मा सर्वलोकगुरुः प्रभुः ॥ ३ ॥
अन्वितो ब्रह्मशर्वाभ्यां लोकपालैः सहानुगैः । उपगीयमानो गन्धर्वैर्मुनिभिश्चाप्सरोगणैः ॥ ४ ॥
सिद्धा विद्याधरा दैत्या दानवा गुह्यकादयः । सुनन्दनन्दप्रमुखाः पार्षदप्रवरा हरेः ॥ ५ ॥
कपिलो नारदो दत्तो योगेशाः सनकादयः । तमन्वीयुर्भागवता ये च तत्सेवनोत्सुकाः ॥ ६ ॥
यत्र धर्मदुघा भूमिः सर्वकामदुघा सती । दोग्धि स्माभीप्सितानर्थान् यजमानस्य भारत ॥ ७ ॥
ऊहुः सर्वरसान्नद्यः क्षीरदध्यन्नगोरसान् । तरवो भूरिवर्ष्माणः प्रासूयन्त मधुच्युतः ॥ ८ ॥
सिन्धवो रत्ननिकरान् गिरयोऽन्नं चतुर्विधम् । उपायनमुपाजह्रुः सर्वे लोकाः सपालकाः ॥ ९ ॥
इति चाधोक्षजेशस्य पृथोस्तु परमोदयम् । असूयन् भगवानिन्द्रः प्रतिघातमचीकरत् ॥ १० ॥
चरमेणाश्वमेधेन यजमाने यजुष्पतिम् । वैन्ये यज्ञपशुं स्पर्धन्नपोवाह तिरोहितः ॥ ११ ॥
तमत्रिर्भगवानैक्षत्त्वरमाणं विहायसा । आमुक्तमिव पाखण्डं योऽधर्मे धर्मविभ्रमः ॥ १२ ॥
अत्रिणा चोदितो हन्तुं पृथुपुत्रो महारथः । अन्वधावत संक्रुद्धस्तिष्ठ तिष्ठेति चाब्रवीत् ॥ १३ ॥
तं तादृशाकृतिं वीक्ष्य मेने धर्मं शरीरिणम् । जटिलं भस्मनाच्छन्नं तस्मै बाणं न मुञ्चति ॥ १४ ॥
वधान्निवृत्तं तं भूयो हन्तवेऽत्रिरचोदयत् । जहि यज्ञहनं तात महेन्द्रं विबुधाधमम् ॥ १५ ॥
एवं वैन्यसुतः प्रोक्तस्त्वरमाणं विहायसा । अन्वद्रवदभिक्रुद्धो रावणं गृध्रराडिव ॥ १६ ॥

ऊनविंशे हयं हर्तुं कृतपाखण्डविस्तृतिम् ।
हन्तुमिन्द्रं पृथुर्यत्तो ब्रह्मणाऽऽगत्य वारितः ॥ १ ॥

शतेन निमित्तेन अदीक्षत सङ्कल्पं कृतवान् । प्राची पूर्ववाहिनी ॥ १ ॥ आत्मनः अतिशयमतिक्रामकं तत् शतसङ्कल्परूपं कर्म ज्ञात्वा तस्य यज्ञोत्सवं न सेहे ॥ २ ॥ यत्रेति युग्मकम् । साक्षादन्वभूयत प्रत्यक्षोऽभूत् ॥ ३।४ ॥ सिद्धेति युग्मकम् । सिद्धादयश्च तं हरिमनुजग्मुः ॥ ५।६ ॥ यत्र यज्ञे । धर्मदुघा यज्ञयोग्यपयोदोग्ध्री धेनुः सती । दोग्धि स्म अपूरयत् ॥ ७ ॥ सर्वरसान् इक्षुद्राक्षादिरसान् । गोरसो घृतं तक्रं च । वहन्ति स्म । भूरिवर्ष्माणः बहुप्रमाणाः प्रासूयन्त फलान्यजनयन् ॥ ८ ॥ चतुर्विधं भक्ष्यं भोज्यं चूष्यं लेह्यं च । उपाजह्रुः समर्पितवन्तः ॥ ९ ॥ स ईशो नाथो यस्य । असूयन् असहमानः । विघ्नम् । तु तदिति पाठद्वयम् ॥ १० ॥ यजुष्पतिं विष्णुं पूजयति सति । अपोवाह अपहृतवान् ॥ ११ ॥ त्वरमाणं धावन्तम् । पाखण्डवेशम् आमुक्तं कवचमिव धृतवन्तम् ॥ १२।१३ ॥ न मुञ्चति न मुमोच । १४ । हन्तवे हन्तुम् । १५ । गृध्रेति एतच्च भविष्यदपि भूतवन्निर्दिष्टं त्रिकालज्ञत्वात्

सोऽश्वं रूपं च तद्धित्वा तस्मा अन्तर्हितः स्वराट् । वीरः स्वपशुमादाय पितुर्यज्ञमुपेयिवान् ।१७।
ततस्य चाद्भुतं कर्म विचक्ष्य परमर्षयः । नामधेयं ददुस्तस्मै विजिताश्व इति प्रभो ॥१८॥
उपसृज्य तमस्तीव्रं जहाराश्वं पुनर्हरिः । चषालयूपतश्छन्नो हिरण्यरशनं विभुः ॥१९॥
अत्रिः संदर्शयामास त्वरमाणं विहायसा । कपालखट्वाङ्गधरं वीरो नैनमबाधत ॥२०॥
अत्रिणा चोदितस्तस्मै संदधे विशिखं रुषा । सोऽश्वं रूपं च तद्धित्वा तस्थावन्तर्हितः स्वराट्२१
वीरश्चाश्वमुपादाय पितृयज्ञमथाव्रजत् । तदवद्यं हरे रूपं जगृहुर्ज्ञानदुर्बलाः ॥२२॥
यानि रूपाणि जगृहे इन्द्रो हयजिहीर्षया । तानि पापस्य खण्डानि लिङ्गं खण्डमिहोच्यते॥२३॥
एवमिन्द्रे हरत्यश्वं वैन्ययज्ञजिघांसया । तद्गृहीतविसृष्टेषु पाखण्डेषु मतिर्नृणाम् ॥२४॥
धर्म इत्युपधर्मेषु नग्नरक्तपटादिषु । प्रायेण सज्जते भ्रान्त्या पेशलेषु च वाग्मिषु ॥२५॥
तदभिज्ञाय भगवान् पृथुः पृथुपराक्रमः । इन्द्राय कुपितो बाणमादत्तोद्यतकार्मुकः ॥२६॥

तमृत्विजः शक्रवधाभिसंधितं विचक्ष्य दुष्प्रेक्ष्यमसह्यरंहसम् ।
निवारयामासुरहो महामते न युज्यतेऽत्रान्यवधः प्रचोदितात् ॥ २७ ॥
वयं मरुत्वन्तमिहार्थनाशनं ह्वयामहे त्वच्छ्रवसा हतत्विषम् ।
अयातयामोपहवैरनन्तरं प्रसह्य राजन् जुहवाम तेऽहितम् ॥ २८ ॥

इत्यामन्त्र्य क्रतुपतिं विदुरास्यर्त्विजो रुषा । स्रुग्घस्ताञ्जुह्वतोऽभ्येत्य स्वयम्भूः प्रत्यषेधत॥२९॥
न वध्यो भवतामिन्द्रो यद्यज्ञो भगवत्तनुः । यं जिघांसथ यज्ञेन यस्येष्टास्तनवः सुराः ॥३०॥
तदिदं पश्यत महद्धर्मव्यतिकरं द्विजाः । इन्द्रेणानुष्ठितं राज्ञः कर्मैतद्विजिघांसता ॥३१॥
पृथुकीर्तेः पृथोर्भूयात्तर्ह्येकोनशतक्रतुः । अलं ते क्रतुभिः स्विष्टैर्यद्भवान् मोक्षधर्मवित् ॥३२॥
नैवात्मने महेन्द्राय रोषमाहर्तुमर्हसि । उभावपि हि भद्रं ते उत्तमश्लोकविग्रहौ ॥३३॥

ज्ञत्वात् ॥१६॥ तस्मै तमिन्द्रं हन्तुम् ॥२१॥ अवद्यं निन्द्यम् । दुर्बला हीनाः ॥२२॥ पाशब्दः पापनिकरे खण्डं चिह्नं मिहोच्यते पापस्य चिह्नं पाखण्डस्तत्सेवी नारकी ध्रुवम् इति ।२३। एवमिति । युग्मकम् । पापस्य खण्डेषु ज्ञापकेषु उपधर्मेषु धर्माभासेषु नग्नादिषु भ्रान्त्या अयं धर्म इति नृणां मतिः आसक्ता भवति । पेशलेषु अविचाररम्येषु । नग्ना जैना । रक्तपटा बौद्धाः ।२४।२५। तत् इन्द्रकर्म । इन्द्राय इन्द्रं हन्तुम् ।२६। वधे अभिसन्धितं कृताभिप्रायम् । अत्राश्वमेधे विहितात् ॥ २७ ।. अर्थनाशनं यज्ञनाशकं तेऽहितमिन्द्रम् अगतसारैः अमोघैः उपहवैः आह्वानमन्त्रैः इह आह्वयामहे अनन्तरं प्रसह्य होष्यामः । श्रवसा यशसा ॥ २८ ॥ क्रतुपतिं पृथुम् आमन्त्र्य विज्ञाप्य । अस्य पृथोः ॥ २९ ॥ यं यज्ञेन जिघासथ स भवतां वध्यो न । कुतः यत् यस्मात् यज्ञो नामायमिन्द्रो भगवदवतारः । अतः सर्वेऽपि सुराः किमुत मनुष्या यस्य तनुवत् वशवर्तिनः प्रियाश्चेत्यप्येकोऽर्थः ॥ ३० ॥ धर्मस्य व्यतिकरो नाशो यस्मात्तत् पाखण्डरूपम् । अनुष्ठितं प्रवर्तितम् । असान्वितश्च पुनः प्रवर्तयिष्यतीति अतोऽनेन सख्यमेव कार्यमिति भावः ॥ ३१ ॥ स्विष्टैरनुष्ठितैः ॥ ३२ ॥ आत्मने त्वद्रूपाय । आहर्तुं कर्तुम् । ते भद्रं शतसङ्कल्प-

मास्मिन् महाराज कृथाः स्म चिन्तां निशामयास्मद्वच आदृतात्मा ।

यद्धयायतो दैवहतं नु कर्तुं मनोऽतिरुष्टं विशते तमोऽन्धम् ॥३४॥

क्रतुर्विरमतामेष देवेषु दुरवग्रहः । धर्मव्यतिकरो यत्र पाखण्डैरिन्द्रनिर्मितैः ॥३५॥

एभिरिन्द्रोपसंसृष्टैः पाखण्डैर्हारिभिर्जनम् । ह्रियमाणं विचक्ष्वैनं यस्ते यज्ञध्रुगश्वमुट् ॥३६॥

भवान् परित्रातुमिहावतीर्णो धर्मं जनानां समयानुरूपम् ।

वेनापचारादवलुप्तमद्य तद्देहतो विष्णुकलासि वैन्य ॥३७॥

स त्वं विमृश्यास्य भवं प्रजापतेः संकल्पनं विश्वसृजां पिपीपृहि ।

ऐन्द्रीं च मायामुपधर्ममातरं प्रचण्डपाखण्डपथं प्रभो जहि ॥३८॥

मैत्रेय उवाच

इत्थं स लोकगुरुणा समादिष्टो विशाम्पतिः । तथा च कृत्वा वात्सल्यं मघोनापि च संदधे ॥३९॥

कृतावभृथस्नानाय पृथवे भूरिकर्मणे । वरान् ददुस्ते वरदा ये तद्बर्हिषि तर्पिताः ॥४०॥

विप्राः सत्याशिषस्तुष्टाः श्रद्धया लब्धदक्षिणाः । आशिषो युयुजुः क्षत्तरादिराजाय सत्कृताः॥४१

त्वयाऽऽहूता महाबाहो सर्वं एव समागताः । पूजिता दानमानाभ्यां पितृदेवर्षिमानवाः ॥४२॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां चतुर्थस्कन्धे पृथुविजये एकोनविंशोऽध्यायः ॥१९॥

पूर्तिर्भवतु ॥ ३३ ॥ अस्मिन् यज्ञविघ्ने आदृतात्मा सावधानमनाः सन् शृणु । यत् यस्मात् हतं कर्म कर्तुं ध्यायतः पुंसो मनः नु निश्चितं मोहं विशते न तु शान्तिं लभते ॥ ३४ ॥ यत्र दुरवग्रहो दुराग्रहः । यत्र च व्यतिकरो नाशः स एष क्रतुः ॥ ३५ ॥ यः इन्द्रः तेनेन्द्रेण निर्मितैः हारिभिर्बुद्धिभ्रंशकैः ह्रियमाणं धर्मात्पराङ्मुखीक्रियमाणम् ॥ ३६ ॥ अपचारात् अन्यायात् । विष्णुकलैव त्वमवतीर्णोऽसि । समयः सिद्धान्तः शास्त्रं वा ।३७। अस्य विश्वस्य भवं भद्रं प्रति । विश्वसृजां मुनीनां सङ्कल्पनं भगवानेवाऽवतीर्य भद्रं करिष्यतीत्येवंरूपं पूरय । पथरूपाम् । अप्युपसर्गात् पृधातोः लोटो मध्यमपुरुषैकवचने रूपम् । भागुरिमतेऽलोपे छान्दसदीर्घे च ॥ ३८ ॥ यथा ब्रह्मण आज्ञा तथैव । सन्दधे सन्धिं चकार ॥ ३९ ॥ अवभृथस्नानं यज्ञान्तस्नानम् बर्हिषि यज्ञे ॥ ४०।४१। तुष्टानां वाक्यं त्वयेति ॥ ४२ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे गूढार्थदीपिन्यामेकोनविंशोऽध्यायः ।

अथ त्रिंशोऽध्यायः

मैत्रेय उवाच

भगवानपि वैकुण्ठः साकं मघवता विभुः। यज्ञैर्यज्ञपतिस्तुष्टो यज्ञभुक् तमभाषत ॥ १ ॥

श्रीभगवानुवाच

एष तेऽह्यकरोद्भङ्गं हयमेधशतस्य ह। क्षमापयत आत्मानममुष्य क्षन्तुमर्हसि ॥ २ ॥
सुधियः साधवो लोके नरदेव नरोत्तमाः। नाभिद्रुह्यन्ति भूतेभ्यो यर्हि नात्मा कलेवरम्॥ ३ ॥
पुरुषा यदि मुह्यन्ति त्वादृशा देवमायया। श्रम एव परं जातो दीर्घया वृद्धसेवया ॥ ४ ॥
अतः कायमिमं विद्वानविद्याकामकर्मभिः। आरब्ध इति नैवास्मिन् प्रतिबुद्धोऽनुषज्जते ॥ ५ ॥
असंसक्तः शरीरेऽस्मिन्नमुनोत्पादिते गृहे। अपत्ये द्रविणे वापि कः कुर्यान्ममतां बुधः ॥ ६ ॥
एकः शुद्धः स्वयंज्योतिर्निर्गुणोऽसौ गुणाश्रयः। सर्वगोऽनावृतः साक्षी निरात्माऽऽत्माऽऽत्मनः परः
य एवं सन्तमात्मानमात्मस्थं वेद पूरुषः। नाज्यते प्रकृतिस्थोऽपि तद्गुणैः स मयि स्थितः ॥८॥
यः स्वधर्मेण मां नित्यं निराशीः श्रद्धयान्वितः। भजते शनकैस्तस्य मनो राजन् प्रसीदति॥ ९ ॥
परित्यक्तगुणः सम्यग्दर्शनो विशदाशयः। शान्तिं मे समवस्थानं ब्रह्म कैवल्यमश्नुते ॥१०॥
उदासीनमिवाध्यक्षं द्रव्यज्ञानक्रियात्मनाम्। कूटस्थमिममात्मानं यो वेदाप्नोति शोभनम्॥११॥

भिन्नस्य लिङ्गस्य गुणप्रवाहो द्रव्यक्रियाकारकचेतनात्मनः।
दृष्टासु सम्पत्सु विपत्सु सूरयो न विक्रियन्ते मयि बद्धसौहृदाः॥१२॥

विंशे विष्णोरभिव्यक्तिरुपदेशः पृथुं प्रति।
स्तुतिर्वरप्रदानेन द्वयोः सन्धिश्च कार्यते ॥ १ ॥

प्रादुर्भूतः सन् ॥१॥ हयमेधेषु शतस्य शततमस्य अन्तिमस्येत्यर्थः। ह स्फुटम्। आत्मानं त्वाम्। ह्यकरोत् इति प्राचीनः पाठः सन्दर्भसम्मतः ॥ २ ॥ भूतेभ्यः भूतानि पीडयितुम् प्रतिकूलयितुम् अत उपसर्गयोगेऽपि न द्वितीया। कलेवरं नात्मा जडमत एवानित्यं यर्हि यस्मात् तस्मान्न ॥ ३ ॥ देवस्य मम। वृद्धानां ज्ञानिनाम् ॥ ४ ॥ अतः सेवातः प्रतिबुद्धः प्राप्तज्ञानः सन् अस्मिन् नैवासक्तो भवति। कुतः। अविद्ययैव कामः ततः कर्माणि तैरारब्ध इत्येवमिमं जानन् ॥ ५ ॥ कः न कोऽपि ॥ ६ ॥ असौ आत्मा परमात्मा आत्मनः परः देहाद्भिन्नः। निर्गुणः प्राकृतगुणरहितः। वात्सल्यादिगुणाश्रयः। निरात्मा निराश्रय ॥ ७ ॥ प्रकृतिस्थः देहस्थोऽपि तद्गुणैः सुखदुःखादिभिर्न लिप्यते ॥ ८ ॥ निराशीः निष्कामः। प्रसीदति विरक्तं भवति ॥ ९ ॥ दर्शनं ज्ञानम्। शान्तिप्रदं मे सम्यगावासभूतं शरीरभूतं मूर्तिमत् केवलमेव ब्रह्म अनुभवति ॥ १० ॥ देहज्ञानकर्मेन्द्रियमनसामध्यक्षं नियन्तारम् उत्कृष्टे हृत्कमले आसीनमेव इममात्मानं हरिं यो वेद स इह परत्र च शोभनं दिव्यसुखमेव ॥ ११ ॥ जीवाद्भिन्नस्य लिङ्गस्य देहस्यैव गुणप्रवाहः संसारो नात्मन इति पश्यन्तः सूरयः। कथंभूतस्य। द्रव्येति। भूतेन्द्रियदेवता-

समः समानोत्तममध्यमाधमः सुखे च दुःखे च जितेन्द्रियाशयः ।
मयोपक्लृप्ताखिललोकसंयुतो विधत्स्व वीराखिललोकरक्षणम् ॥१३॥
श्रेयः प्रजापालनमेव राज्ञो यत्साम्पराये सुकृतात् षष्ठमंशम् ।
हर्तान्यथा हृतपुण्यः प्रजानामरक्षिता करहारोऽघमत्ति ।।१४।।
एवं द्विजाग्र्यानुमतानुवृत्तधर्मप्रधानोऽन्यतमोऽवितास्याः ।
ह्रस्वेन कालेन गृहोपयातान् द्रष्टासि सिद्धाननुरक्तलोकः ॥१५॥
वरं च मत् कंचन मानवेन्द्र वृणीष्व तेऽहं गुणशीलयन्त्रितः ।
नाहं मखैर्वै सुलभस्तपोभिर्योगेन वा यत्समचित्तवर्ती ॥१६॥

मैत्रेय उवाच

स इत्थं लोकगुरुणा विष्वक्सेनेन विश्वजित् । अनुशासित आदेशं शिरसा जगृहे हरेः ॥१७॥
स्पृशन्तं पादयोः प्रेम्णा व्रीडितं स्वेन कर्मणा । शतक्रतुं परिष्वज्य विद्वेषं विससर्ज ह ॥१८॥
भगवानथ विश्वात्मा पृथुनोपहृतार्हणः । समुज्जिहानया भक्त्या गृहीतचरणाम्बुजः ॥१९॥
प्रस्थानाभिमुखोऽप्येनमनुग्रहविलम्बितः । पश्यन् पद्मपलाशाक्षो न प्रतस्थे सुहृत्सताम्॥२०॥

स आदिराजो रचिताञ्जलिर्हरिं विलोकितुं नाशकदश्रुलोचनः ।
न किंचनोवाच स बाष्पविक्लवो हृदोपगुह्यामुमधादवस्थितः ॥२१॥
अथावमृज्याश्रुकला विलोकयन्नतृप्तदृग्गोचरमाह पूरुषम् ।
पदा स्पृशन्तं क्षितिमंस उन्नते विन्यस्तहस्ताग्रमुरङ्गविद्विषः ॥२२॥

वृद्धीः अतति व्याप्य तिष्ठतीति तथाभूतस्य ॥ १२ ॥ समाना उत्तमादयो यस्य । सुखादौ समत्वम् । उपक्लृप्तैरुपयोजितैरखिललोकैर्मन्त्र्यादिभिः सहितः सन् ॥ १३ ॥ यतो लोकरक्षणात् राजा प्रजाभिः कृतात् सुकृतात् षष्ठमंशं साम्पराये परलोके हरति । अन्यथा विपक्षे करहारः सन् अरक्षिता चेत्तर्हि प्रजाभिर्हृतपुण्यः तासामघमत्ति अतस्तस्य पालनमेवेत्यन्वयः ॥ १४ ॥ एवमस्याः पृथिव्या अविता सन् त्वं सिद्धान् सनकादीन् द्रष्टासि । विप्रसम्मतः अनुवृत्तः परम्पराप्राप्तश्च यो धर्मस्तत्प्रधानो अन्यतमौ अर्थकामौ यस्येत्युपयुक्त एकपद्यपाठः ॥ १५ ॥ मत् मत्तः । यन्त्रितो वशीकृतः । यत् यतः अहं समचित्तेषु वर्तनशीलः ॥ १६।१७ ॥ क्षमापयितुं स्पृशन्तम् ॥ १८ ॥ भगवानिति युग्मकम् । उपहृतं समर्पितमर्हणम् अर्घ्यादिकं यस्मै स एवं पश्यन्न प्रतस्थे । समुज्जिहानया वर्धमानया ॥ १९।२० ॥ स नाशकत् स च नोवाचेति वाक्यभेदान्न पौनरुक्त्यम् । किन्तु तूष्णीमवस्थितः सन् अमुं हरिं हृदाऽऽलिङ्ग्य तत्रैव धृतवान् । स राजप्रसिद्धो वा ॥ २१ ॥ कला बिन्दून् । गोचरं विषयभूतम् । क्षितिमिति । नहि देवा भुवं स्पृशन्ति अथापि भक्तवात्सल्येन स्वरूपविस्मरणादिव क्षितिम् । अत एव पतनभयाद् गरुडस्य उन्नतस्कन्धे च विन्यस्तेति च भावसौन्दर्यार्थमुक्तम् । वस्तुतस्तु क्षितिं निवासभूतां भक्तहृदयस्थलीं स्पृशन्तमानन्दयन्तम् । अत एव किञ्चित्तिष्ठेति हस्तेन सङ्केतः कृत इति रहस्यम् ॥ २२ ॥

पृथुरुवाच

वरान् विभो त्वद्वरदेश्वराद् बुधः कथं वृणीते गुणविक्रियात्मनाम् ।
ये नारकाणामपि सन्ति देहिनां तानीश कैवल्यपते वृणे न च ॥२३॥
न कामये नाथ तदप्यहं क्वचिन्न यत्र युष्मच्चरणाम्बुजासवः ।
महत्तमान्तर्हृदयान्मुखच्युतो विधत्स्व कर्णायुतमेष मे वरः ॥२४॥
स उत्तमश्लोक महन्मुखच्युतो भवत्पदाम्भोजसुधाकणानिलः ।
स्मृतिं पुनर्विस्मृततत्त्ववर्त्मनां कुयोगिनां नो वितरत्यलं वरैः ॥२५॥
यशः शिवं सुश्रव आर्यसङ्गमे यदृच्छया चोपशृणोति ते सकृत् ।
कथं गुणज्ञो विरमेद्विना पशुं श्रीर्यत्प्रवव्रे गुणसंग्रहेच्छया ॥२६॥
अथाभजे त्वाखिलपूरुषोत्तमं गुणालयं पद्मकरेव लालसः ।
अप्यावयोरेकपतिस्पृधोः कलिर्न स्यात्कृतत्वच्चरणैकतानयोः ॥२७॥
जगज्जनन्यां जगदीश वैशसं स्यादेव यत्कर्मणि नः समीहितम् ।
करोषि फल्ग्वप्युरु दीनवत्सलः स्व एव धिष्ण्येऽभिरतस्य किं तया ॥२८॥
भजन्त्यथ त्वामत एव साधवो व्युदस्तमायागुणविभ्रमोदयम् ।
भवत्पदानुस्मरणादृते सतां निमित्तमन्यद्भगवन्न विद्म हे ॥२९॥
मन्ये गिरं ते जगतां विमोहिनीं वरं वृणीष्वेति भजन्तमात्थ यत् ।
वाचा नु तन्त्या यदि ते जनोऽसितः कथं पुनः कर्म करोति मोहितः ॥३०॥

बुधश्चेत् त्वत्तः कथं वृणीते न कथमपि अतोऽहमपि तान् न वृणे । कुतः । ये नारकाणां भवद्विमुखानामेव । कथंभूतानां गुणैर्विविधतया क्रियते इति गुणविक्रियः संसारः तस्मिन्नात्मा मनो येषाम् ॥२३॥ किं बहुना तत्कैवल्यमपि न कामये । कुतः । यत्र हृदयात् शनैः शनैः मुखद्वारेण निर्गतः आसव इव जगद्विस्मारकः कथारसो न तत् । अतस्तस्यैव पानार्थं कर्णायुतं विधत्स्वेत्यन्वयः द्वयोरेव तावत्कर्णसामर्थ्यम् ॥ २४ ॥ सुष्ठु दधातीति सुधा कथा तस्याः कणः प्रसङ्गलेशस्तत्संबन्धी वायुरपि दूरतः स्पृष्टः त्वच्चरणस्मृतिं वितरति तस्यांदन्यैर्वरैरलम् ॥२५॥ हे सुश्रवः पुण्यकीर्ते ! ते शिवं यशः सकृदपि य उपशृणोति स गुणज्ञश्चेत् पशुं विना कथं विरमेत् न कथमपीत्यर्थः । अत एव श्रीरपि यत् यश एव वव्रे । पशुं विनेत्युक्तेः यो विरमेत् स मनुष्येषु पशुः । यो न विरमेत् स पशुष्वपि मनुष्य इति ध्वनिः ॥२६॥ अथ अतोऽहं लक्ष्मीरिव लालसः सोत्कण्ठः सन् त्वामेव आ सर्वतो भावेन भजे । एवम् एकमेव पतिं स्पर्धेते तयोरावयोः अपि किं कलहो न स्यात् अवश्यं स्यात् । यतः कृतस्त्वच्चरणयोरेव एकस्तानो मनोविस्तारो याभ्याम् ॥ २७ ॥ स्वयं समाधत्ते । यस्याः कर्मणि चरणसेवालक्षणेऽस्माकमिच्छा तस्यां जनन्यां विरोधः स्यादेव । भक्तु नाम काऽत्र चिन्ता । यतस्त्वं फल्गु अपि अत्यल्पपि भक्तकृतं बहु करोषि । स्वे धिष्ण्ये स्वरूपे भक्तहृदि वा अभिरतस्य तव तया किं प्रयोजनम् । इन्द्रविरोधे मत्पक्षपातवदत्रापि सैव नीतिरित्येका दिक् ॥ २८ ॥ यतो दीनवत्सलः अत एव साधवोऽथ ज्ञानानन्तरमपि त्वामेव । व्युदस्तो दूरीकृतः गुणनिमित्तः विभ्रमोदयः संसारो येन तम् । यतोऽन्यन्निमित्तं जीवनफलम् न विद्म हे सम्बोधनम् । 'विदो लटो वा' इति मसो मादेशः' ॥२९॥ भक्तं मां यत् आत्थ तां ते गिरम् । अन्यथा त्वमेव ब्रूहि ।

त्वन्माययाद्धा जन ईश खण्डितो यदन्यदाशास्त ऋतात्मनोऽबुधः ।
यथा ऽऽचरेद्बालहितं पिता स्वयं तथा त्वमेवार्हसि नः समीहितुम् ॥३१॥

मैत्रेय उवाच

इत्यादिराजेन नुतः स विश्वदृक् तमाह राजन् मयि भक्तिरस्तु ते।
दिष्ट्येदृशी धीर्मयि ते कृता यया मायां मदीयां तरति स्म दुस्त्यजाम्॥३२॥

तत्त्वं कुरु मयाऽऽदिष्टमप्रमत्तः प्रजापते । मदादेशकरो लोकः सर्वत्राप्नोति शोभनम् ॥३३॥

मैत्रेय उवाच

इति वैन्यस्य राजर्षेः प्रतिनन्द्यार्थवद्वचः । पूजितोऽनुगृहीत्वैनं गन्तुं चक्रेऽच्युतो मतिम् ॥३४॥

देवर्षिपितृगन्धर्वसिद्धचारणपन्नगाः । किन्नराप्सरसो मर्त्याः खगा भूतान्यनेकशः ॥३५॥

यज्ञेश्वरधिया राज्ञा वाग्वित्ताञ्जलिभक्तितः । सभाजिता ययुः सर्वे वैकुण्ठानुगतास्ततः ॥३६॥

भगवानपि राजर्षेः सोपाध्यायस्य चाच्युतः ।हरन्निव मनोऽमुष्य स्वधाम प्रत्यपद्यत ॥३७॥

अदृष्टाय नमस्कृत्य नृपः संदर्शितात्मने । अव्यक्ताय च देवानां देवाय स्वपुरं ययौ ॥३८॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां चतुर्थस्कन्धे विंशोऽध्यायः ॥ २० ॥

अथैकविंशोऽध्यायः

मैत्रेय उवाच

मौक्तिकैः कुसुमस्रग्भिर्दुकूलैः स्वर्णतोरणैः । महासुरभिभिर्धूपैर्मण्डितं तत्र तत्र वै ॥१॥

ते जनो भक्तजनो यदि वेदलक्षणया वाचाऽसित अबद्धः फलाशानिर्मुक्त इत्यर्थः तर्हि फलैर्मोहित. सन् नु अहो प्रवृत्तकर्म कथं करिष्यति ॥ ३० ॥ ऋतात्मन. सत्यमूर्तेस्त्वत्तोऽयं जनः खण्डितः पृथक् कृतः। यत् यतोऽन्यत्स्वर्गादिकमाशास्ते । अतः यथाऽऽचरेत् तथा त्वमपि नः हितं कर्तुमर्हसि ॥ ३१ ॥ नुतः स्तुतः । ते त्वया ईदृशी कृता एतत् दिष्ट्या भद्रं जातम्।३४। देवर्षीति युग्मकम् । अंजलिः करबद्धप्रणामः। सभाजिताः सत्कृताः । अनुगताः पार्षदाः । ततः यज्ञस्थानात् ॥ ३५।३६ ॥ स्वधाम वैकुण्ठम् । पृथु-हृदयं वा ॥ ३७ ॥ पूर्वं सन्दर्शित स्वरूपं येन । पश्चात् अदृष्टाय अन्तर्हिताय ॥ ३८ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे गूढार्थदीपिन्यां विंशोऽध्यायः ।

एकविंशे महासत्रसभायां पृथुभाषणम् ।
विष्णुभक्तिं पुरस्कृत्य प्रजाशिक्षार्थमीरितम् ॥ १ ॥

मौक्तिकैरिति त्रिकम् । पुरमित्युक्तं तद्वर्णयति । मौक्तिकैर्मुक्तामालाभिः । दुकूलैः क्षौमवस्त्रैः ।

चन्दनागुरुतोयार्द्ररथ्याचत्वरमार्गवत् । पुष्पाक्षतफलैस्तोक्मैर्लाजैरर्चिभिरर्चितम् ॥ २ ॥
सवृन्तैः कदलीस्तम्भैः पूगपोतैः परिष्कृतम् । तरुपल्लवमालाभिः सर्वतः समलंकृतम् ॥ ३ ॥
प्रजास्तं दीपबलिभिः सम्भृताशेषमङ्गलैः । अभीयुर्मृष्टकन्याश्च मृष्टकुण्डलमण्डिताः ॥ ४ ॥
शङ्खदुन्दुभिघोषेण ब्रह्मघोषेण चर्त्विजाम् । विवेश भवनं वीरः स्तूयमानो गतस्मयः ॥ ५ ॥
पूजितः पूजयामास तत्र तत्र महायशाः । पौराञ्जानपदांस्तांस्तान् प्रीतः प्रियवरप्रदः ॥ ६ ॥

स एवमादीन्यनवद्यचेष्टितः कर्माणि भूयांसि महान् महत्तमः ।
कुर्वन् शशासावनिमण्डलं यशः स्फीतं निधायारुरुहे परं पदम् ॥ ७ ॥

सूत उवाच

तदादिराजस्य यशो विजृम्भितं गुणैरशेषैर्गुणवत्सभाजितम् ।
क्षत्ता महाभागवतः सदस्पते कौषारविं प्राह गृणन्तमर्चयन् ॥ ८ ॥

विदुर उवाच

सोऽभिषिक्तः पृथुर्विप्रैर्लब्धाशेषसुरार्हणः । बिभ्रत् स वैष्णवं तेजो बाह्वोर्याभ्यां दुदोह गाम्॥९॥

को न्वस्य कीर्तिं न शृणोत्यभिज्ञो यद्विक्रमोच्छिष्टमशेषभूपाः ।
लोकाः सपाला उपजीवन्ति काममद्यापि तन्मे वद कर्म शुद्धम् ॥ १० ॥

मैत्रेय उवाच

गङ्गायमुनयोर्नद्योरन्तरा क्षेत्रमावसन् । आरब्धानेव बुभुजे भोगान् पुण्यजिहासया ॥११॥
सर्वत्रास्खलितादेशः सप्तद्वीपैकदण्डधृक् । अन्यत्र ब्राह्मणकुलादन्यत्राच्युतगोत्रतः ॥१२॥
एकदाऽऽसीन्महासत्रदीक्षा तत्र दिवौकसाम् । समाजो ब्रह्मर्षीणां च राजर्षीणां च सत्तम॥१३॥

तोरणोऽस्त्री बहिर्द्वारि तथा वन्दनमालिका' इति । चन्दनागुरुतोयैरार्द्रा रथ्यादयः सन्ति यस्मिन् । तोक्मैर्हरितयवैः । अर्चिभिर्दीपज्वालाभिः ॥ २ ॥ सवृन्तैः फलपुष्पादिगुच्छकसहितैः पोतैर्बालवृक्षैः ॥ ३ ॥ प्रजाः कन्याश्च तं पृथुमभीयुः सम्मुखं जग्मुः सम्पादितदध्यादिमङ्गलद्रव्यैः सह । मृष्टा उज्वलाः ॥४॥ वेदघोषेण सह वन्दिभिः स्तूयमानोऽपि अहङ्कारशून्यः ॥ ५ ॥ जानपदान् बहिर्देशीयांश्च तत्तदभीष्टद्रव्यैः ॥ ६ ॥ स पृथुः एवमादीनि बहूनि कर्माणि कुर्वन् भूमण्डलं शशास ततश्च स्फीतं विपुलम् यशो निधाय हरेः पदमारुरुहे इत्यन्वयः । गुणैर्महान् यतो महत्तमः भगवदवतारः अत एव श्लाघनीयचरितः ॥ ७ ॥ हे शौनक । क्षत्ता विदुरः आदिराजज्य तत् यशो गृणन्तं कौषारविं मैत्रेयमर्चयन् सम्मानयन् प्राह । कथंभूतम् । गुणैर्वर्धितम् । गुणवद्भिः सत्कृतं च ॥ ८ ॥ याभ्यां पृथ्वीं दुदोह तयोर्बाह्वोर्वैष्णवं तेजः सुदर्शनचक्रं बिभ्रत् च अन्यच्च किमकरोदिति शेषः । लब्धानि अशेषसुरेभ्योऽर्हणानि योग्यानि छत्रचामरादीनि येन सः ।९। यस्य पृथोर्विक्रमः पृथ्वीदोहनं तस्योच्छिष्टं शेषं कामं भोग्यमद्यापि सर्वे उपजीवन्तिः भुञ्जते- तस्यास्य कीर्तिको नु न शृणोति सर्वोऽपि अतस्तत् तस्यैव कर्म मे मह्यं वद ।१०। अन्तरा मध्ये यत् तत् आरब्धानेव मत्वेति लोकदृष्ट्योक्तम् ॥ ११ ॥ अच्युतगोत्रतो वैष्णवकुलात् । 'गोत्रं नाम्नि कुले, इति यादवः ॥ १२ ॥ दीक्षा आसीत् । तत्सङ्कल्पं कृतवानित्यर्थः । तत्र सत्रे । समाजः सम्मेलनम् ॥ १३ ॥

तस्मिन्नर्हत्सु सर्वेषु स्वर्चितेषु यथार्हतः । उत्थितः सदसो मध्ये ताराणामुडुराडिव ॥१४॥
प्रांशुः पीनायतभुजो गौरः कञ्जारुणेक्षणः । सुनासः सुमुखः सौम्यः पीनांसः सुद्विजस्मितः ॥१५॥
व्यूढवक्षा बृहच्छ्रोणिर्वलिवल्गुदलोदरः । आवर्तनाभिरोजस्वी काञ्चनोरुरुदग्रपात् ॥१६॥
सूक्ष्मवक्रासितस्निग्धमूर्धजः कम्बुकन्धरः । महाधने दुकूलाग्र्ये परिधायोपवीय च ॥१७॥
व्यञ्जिताशेषगात्रश्रीर्नियमे न्यस्तभूषणः । कृष्णाजिनधरः श्रीमान् कुशपाणिः कृतोचितः ॥१८॥
शिशिरस्निग्धताराक्षः समैक्षत समन्ततः । ऊचिवानिदमुर्वीशः सदः संहर्षयन्निव ॥१९॥
चारु चित्रपदं श्लक्ष्णं मृष्टं गूढमविक्लवम् । सर्वेषामुपकारार्थं तदा अनुवदन्निव ॥२०॥

राजोवाच

सभ्याः शृणुत भद्रं वः साधवो य इहागताः । सत्सु जिज्ञासुभिर्धर्ममावेद्यं स्वमनीषितम् ॥२१॥
अहं दण्डधरो राजा प्रजानामिह योजितः । रक्षिता वृत्तिदः स्वेषु सेतुषु स्थापिता पृथक् ॥२२॥
तस्य मे तदनुष्ठानाद्यानाहुर्ब्रह्मवादिनः । लोका स्युःकामसंदोहा यस्य तुष्यति दिष्टदृक् ॥२३॥
य उद्धरेत्करं राजा प्रजा धर्मेष्वशिक्षयन् । प्रजानां शमलं भुङ्क्ते भगं च स्वं जहाति सः ॥२४॥
तत् प्रजा भर्तृपिण्डार्थं स्वार्थमेवानसूयवः । कुरुताधोक्षजधियस्तर्हि मेऽनुग्रहः कृतः ॥२५॥
यूयं तदनुमोदध्वं पितृदेवर्षयोऽमलाः । कर्तुः शास्तुरनुज्ञातुस्तुल्यं यत्प्रेत्य तत्फलम् ॥२६॥
अस्ति यज्ञपतिर्नाम केषांचिदर्हसत्तमाः । इहामुत्र च लक्ष्यन्ते ज्योत्स्नावत्यः क्वचिद् भुवः ॥२७॥

तस्मिन् समाजे अर्हत्सु पूज्येषु स्वर्चितेषु सत्सु किञ्चिद्विज्ञापनार्थमुत्थितः सन् समन्ततः समैक्षतेति षष्ठेनान्वयः ॥ १४ ॥ कथंभूत इति तल्लक्षणानि वक्ति । प्रांशुः उन्नतः । आयतौ लम्बौ । पीनांसः । स्थूलस्कन्धः द्विजा दन्ताः ॥ १५॥ व्यूढं विशालम् । श्रोणी नितम्बौ । त्रिवलिभिर्वल्गु सुन्दरम् अश्वत्थदलवत् कोमलमुदरं यस्य । उदग्रौ उन्नताग्रौ पादौ यस्य ॥ १६ ॥ मूर्धजाः केशाः कम्बुवत् शंखवत् त्रिरेखाङ्किता ग्रीवा यस्य । एकमधो धृत्वा एकं च उपर्याच्छाद्य वर्तमानः ॥ १७ ॥ नियमे निमित्ते । उचितानि सन्ध्यादीनि ।। १८ ॥ शिशिरे सन्तापहरे तारे ययोस्तेऽक्षिणी यस्य सः ॥ १९ ॥ श्लक्ष्णं मधुराक्षरम् । मृष्टं निर्दोषम् । स्वयं यदनुभूतं तस्यानुवादं कुर्वन्निव तदोचिवान् ॥१९।२०॥ ये आगताः ते सर्वे यूयम् शृणुत यतो धर्मं जिज्ञासुभिः पुंभिः स्वविचारितं सत्सु निवेदनीयं युक्तमयुक्तं वेति परीक्षार्थम् ।२१। सेतुषु धर्ममर्यादासु । स्थापयिता ।।२२।। दिष्टदृक् कर्मसाक्षी ईश्वरः यस्य तुष्यति तस्य ब्रह्मवादिनो वेदज्ञाः यान् लोकानाहुः ते लोका मेऽपि स्युः । कुतः । प्रजापालनाद्यनुष्ठानात् । कामसन्दोहाः मनोरथपूरकाः ।। २३ ।। उद्धरेत् गृह्णीयात् । शमलं पापफलं नरकम् । भगमैश्वर्यं च ।। २४।। तत् तस्मात् हे प्रजाः भर्तुर्मम पिण्डदानवत्परलोकहितार्थं स्वार्थं स्वधर्ममेव कुरुत तद्धियः सत्यः तर्हि वः ममोपरि कृतो अनुग्रहो भवेत् ।। २५ ।। यत्कर्तुः फलं तत् शिक्षयितुरनुमोदितुश्च भवति । प्रेत्य परलोकं गत्वा ॥ २६ ॥ अर्हान् भक्तान् सादयन्ति पीडयन्तीति हे भगवन्निन्दका मीमांसकाः केषाञ्चिदास्तिकानां मते यज्ञफलदाता कश्चिदीश्वरोऽस्ति । यतः इह लोके परलोके च तत्प्रेरितकर्मानुसारेण प्रकाशबहुला भुवः विचित्रा भोगभूमयः तमोत्कारो विचित्रशरीराश्च दृश्यन्ते । त्वन्मते च कर्मणो जडत्वात् प्रेरकं विना जगत्फलवैचित्र्या-

मनोरुत्तानपादस्य ध्रुवस्यापि महीपतेः । प्रियव्रतस्य राजर्षेरङ्गस्यास्मत्पितुः पितुः ॥२८॥
ईदृशानामथान्येषामजस्य च भवस्य च । प्रह्लादस्य बलेश्चापि कृत्यमस्ति गदाभृता ॥२९॥
दौहित्रादीनृते मृत्योः शोच्यान् धर्मविमोहितान् । वर्गस्वर्गापवर्गाणां प्रायेणैकात्म्यहेतुना॥३०॥

यत्पादसेवाभिरुचिस्तपस्विनामशेषजन्मोपचितं मलं धियः ।
सद्यः क्षिणोत्यन्वहमेधती सती यथा पदाङ्गुष्ठविनिःसृता सरित् ॥ ३१ ॥
विनिर्धुताशेषमनोमलः पुमानसङ्गविज्ञानविशेषवीर्यवान् ।
यदङ्घ्रिमूले कृतकेतनः पुनः न संसृतिं क्लेशवहां प्रपद्यते ॥ ३२ ॥
तमेव यूयं भजतात्मवृत्तिभिर्मनोवचःकायगुणैः स्वकर्मभिः ।
अमायिनः कामदुघाङ्घ्रिपङ्कजं यथाधिकारावसितार्थसिद्धयः ॥३३॥
असाविहानेकगुणोऽगुणोऽध्वरः पृथग्विधद्रव्यगुणक्रियोक्तिभिः ।
सम्पद्यतेऽर्थाशयलिङ्गनामभिर्विशुद्धविज्ञानघनः स्वरूपतः ॥ ३४ ॥
प्रधानकालाशयधर्मसंग्रहे शरीर एष प्रतिपद्य चेतनाम् ।
क्रियाफलत्वेन विभुर्विभाव्यते यथानलो दारुषु तद्गुणात्मकः ॥ ३५ ॥
अहो ममामी वितरन्त्यनुग्रहं हरिं गुरुं यज्ञभुजामधीश्वरम् ।
स्वधर्मयोगेन यजन्ति मामका निरन्तरं क्षोणितले दृढव्रताः ॥ ३६ ॥

नुपपत्तिरत ईश्वरो मन्तव्य इति गूढाभिसन्धिः ॥ २७ ॥ अत्र विद्वदनुभवोऽपि प्रमाणमित्याह त्रिकेण । पितुः पितुः पितामहस्य अङ्गस्य कृत्यं मुक्तिरूपं प्रयोजनमस्ति तत्तु गदाभृतैव सम्पादितमतः कर्मफलदाताऽवश्यं कल्पनीय इति तेषां मतमित्यर्थः । कथंभूतेन । वर्गस्त्रिवर्गस्तत्फलभूतः स्वर्गोऽपवर्गश्च तेषामैकात्म्येनाद्वितीयेन हेतुना मुख्यप्रदात्रेत्यर्थः । मृत्योरसुरस्य दुहिता सुनीथा तत्पुत्रो वेनस्तदादीन् निन्द्यान् विना । गदेति निर्देशेन परत्र मीमांसकेभ्यो भयं सूचितमिति संक्षेपः ॥ २८।२९।३० ॥ यत्पादसेवाभिरुचिः प्रतिदिनं वर्धमाना सती सद्यो मलं क्षपयति यदङ्घ्रिमूले कृतनिवासः सन् संसृतिं च न प्रपद्यते तमेव यूयं भजतेति त्रयाणामेकान्वयः । तपस्विनां तप्तानाम् ॥ ३१ ॥ असङ्गो वैराग्यं तेन विज्ञानविशेषः भगवत्साक्षात्कारः तदेव वीर्यमस्ति यस्य ॥ ३२ ॥ अमायिनो निष्कपटाः सन्तस्तमेव भजत । काभिः ध्यानगुणगानपरिचर्यादिभिः स्वकर्मभिर्या आत्मनो वृत्तयो जीविकास्ताभिः । कथंभूता । यथाऽधिकारं निश्चिता फलसिद्धिर्येषान्ते दृढविश्वासाः सन्तः ॥ ३३ ॥ असौ हरिरेव इह कर्मकाण्डे पृथग्विधैः द्रव्यादिभिः अर्थादिभिश्च अध्वरः यज्ञमूर्तिः सन् सम्पद्यते व्यक्तो भवति । द्रव्याणि व्रीह्यादीनि गुणाः शुक्लादयः क्रिया अवधातादयः उक्तयो मन्त्राः अर्थं फलं स्वर्गादि आशयः सङ्कल्पः लिङ्गम् अग्नीन्द्रादि नाम ज्योतिष्टोमादि ॥ ३४ ॥ शरीरे वर्तमान एष विभु र्हरिरेव जीवस्य चेतनां कर्मार्पणरूपां बुद्धिं प्रतिपद्य दत्त्वा तस्य कर्मफलरूपतया भुक्तिमुक्तित्वेन स्वयमेव प्रतीयते । कथंभूते प्रकृतिकालवासनाकर्मजन्ये । तद्गुणात्मकः दारुधर्मदैर्घ्यवक्रत्वादिरूपः ॥ ३५ ॥ अहो हर्षे । स्वस्य जीवस्य धर्मो भक्तियोगस्तेन ये मां पूजयन्ति ते ममोपरि अनुग्रहं कुर्वन्ति अत एव च ते मामका ममातिप्रियाः । क्षोणिः पृथ्वी ॥३६॥

मा जातु तेजः प्रभवेन्महर्द्धिभिस्तितिक्षया तपसा विद्यया च ।
देदीप्यमानेऽजितदेवतानां कुले स्वयं राजकुलाद् द्विजानाम् ॥ ३७ ॥

ब्रह्मण्यदेवः पुरुषः पुरातनो नित्यं हरिर्यच्चरणाभिवन्दनात् ।
अवाप लक्ष्मीमनपायिनीं यशो जगत्पवित्रं च महत्तमाग्रणीः ॥ ३८ ॥

यत्सेवयाशेषगुहाशयः स्वराड् विप्रप्रियस्तुष्यति काममीश्वरः ।
तदेव तद्धर्मपरैर्विनीतैः सर्वात्मना ब्रह्मकुलं निषेव्यताम् ॥ ३९ ॥

पुमाँल्लभेतानतिवेलमात्मनः प्रसीदतोऽत्यन्तशमं स्वतः स्वयम् ।
यन्नित्यसम्बन्धनिषेवया ततः परं किमत्रास्ति मुखं हविर्भुजाम् ॥ ४० ॥

अश्नात्यनन्तः खलु तत्त्वकोविदैः श्रद्धाहुतं यन्मुख इज्यनामभिः ।
न वै तथा चेतनया बहिष्कृते हुताशने पारमहंस्यपर्यगुः ॥ ४१ ॥

यद्ब्रह्म नित्यं विरजं सनातनं श्रद्धातपोमङ्गलमौनसंयमैः ।
समाधिना बिभ्रति हार्थदृष्टये यत्रेदमादर्श इवावभासते ॥ ४२ ॥

तेषामहं पादसरोजरेणुमार्या वहेयाधिकिरीटमायुः ।
यं नित्यदा बिभ्रत आशु पापं नश्यत्यमुं सर्वगुणा भजन्ति ॥ ४३ ॥

गुणायनं शीलधनं कृतज्ञं वृद्धाश्रयं संवृणतेऽनु सम्पदः ।
प्रसीदतां ब्रह्मकुलं गवां च जनार्दनः सानुचरश्च मह्यम् ॥ ४४ ॥

महर्द्धिभिः राजकुलादुत्थितं तेजः विष्णुभक्तानां द्विजानां कुले जातु कदाचिदपि प्रभावं मा करोतु । कथंभूते । तितिक्षादिभिः स्वयमेव देदीप्यमाने ॥३७॥ भृगुपरीक्षादौ यस्य ब्रह्मकुलस्य चरणाभिवन्दनात् हरिः लक्ष्मीं यशश्च अवापयत्सेवया च ईश्वरस्तुष्यति तदेव ब्रह्मकुलं सर्वैर्निषेव्यतामिति द्वयोरन्वयः । कथंभूतैः । तद्धर्मपरैः विष्णुधर्मपरैः हरिरिति लोकसङ्ग्रहार्थमिति द्रष्टव्यम् ॥ ३८।३९ ॥ यस्य ब्रह्मकुलस्य नित्यसंबन्धरूपसेवया पुमान् अनतिवेलं शीघ्रमेव स्वयमनायासेनैव अत्यन्तशमं मोक्षं लभेत । कुतः । स्वतः सेवयैव प्रसीदतः शुद्धयत आत्मनः चित्तात् हेतोः । ततः परं श्रेष्ठमत्र कर्मभूमौ देवानां किं मुखं न किमपि किन्तु ब्राह्मणा एव अतस्तदेवत्यन्वयः । इज्याः पूज्या इन्द्रादयस्तेषां नामभिः यन्मुखे श्रद्धया हुतं पायसादि अनन्तो यथाऽश्नाति तथा हुताशने हुतं न अतस्तदेवेत्यन्वयः कैर्हुतम् ब्राह्मणरूपोऽयं हरिरेव इति तत्त्वं विद्वद्भिः । कथंभूतः । परमहंसा एव पारमहंस्या भगवदुपासकाः तान् परित्यज्य न गच्छतीति तथाभूतः । परिरत्र वर्जने ॥ ४१ ॥ यदिति युग्मकम् । हे आर्याः । अर्थदृष्टये सुस्पष्टतत्त्वज्ञानाय यत् ये ब्रह्म वेदं बिभ्रति तेषां रेणुम् आ आयुर्जीवनपर्यन्तम् अधिकिरीटं मुकुटोपरि वहेय । आदर्शे मुखमिव । यत्र वेदे इदं ज्ञानसाधनम् । मंगलं सदाचारः । यं रेणुम् बिभ्रतः पुंसः । अमुं रजोधारिणम् ॥४२।४३॥ तादृशं ब्राह्मगमेकमप्याश्रितवन्तम् । आनुपूर्व्येण सम्पदः संवृणते सम्यक् भजन्ति

मैत्रेय उवाच

इति ब्रुवाणं नृपतिं पितृदेवद्विजातयः। तुष्टुवुर्हृष्टमनसः साधुवादेन साधवः ॥४५॥
पुत्रेण जयते लोकानिति सत्यवती श्रुतिः। ब्रह्मदण्डहतः पापो यद्वेनोऽत्यतरत्तमः ॥४६॥
हिरण्यकशिपुश्चापि भगवन्निन्दया तमः। विविक्षुरत्यगात् सूनोः प्रह्लादस्यानुभावतः ॥४७॥
वीरवर्य पितः पृथ्व्याः समाः संजीव शाश्वतीः। यस्येदृश्यच्युते भक्तिः सर्वलोकैकभर्तरि ॥४८॥

अहो वयं ह्यद्य पवित्रकीर्ते त्वयैव नाथेन मुकुन्दनाथाः।
य उत्तमश्लोकतमस्य विष्णोर्ब्रह्मण्यदेवस्य कथां व्यनक्ति ॥ ४९ ॥

नात्यद्भुतमिदं नाथ तवाजीव्यानुशासनम्। प्रजानुरागो महतां प्रकृतिः करुणात्मनाम् ॥५०॥
अद्य नस्तमसः पारस्त्वयोपासादितः प्रभो। भ्राम्यतां नष्टदृष्टीनां कर्मभिर्दैवसंज्ञितैः ॥५१॥
नमो विवृद्धसत्त्वाय पुरुषाय महीयसे। यो ब्रह्म क्षत्रमाविश्य बिभर्तीदं स्वतेजसा ॥५२॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां चतुर्थस्कन्धे एकविंशोऽध्यायः ॥ २१ ॥

अथ द्वाविंशोऽध्यायः

मैत्रेय उवाच

जनेषु प्रगृणत्स्वेवं पृथुं पृथुलविक्रमम्। तत्रोपजग्मुर्मुनयश्चत्वारः सूर्यवर्चसः ॥ १ ॥
तांस्तु सिद्धेश्वरान् राजा व्योम्नोऽवतरतोऽर्चिषा। लोकानपापान् कुर्वत्या सानुगोऽचष्ट लक्षितान् ॥
तद्दर्शनोद्गतान् प्राणान् प्रत्यादित्सुरिवोत्थितः। ससदस्यानुगो वैन्य इन्द्रियेशो गुणानिव॥ ३ ॥

यस्मादेवं तस्मात् गवां च कुलम्। साधूक्तं भवतेति वचनेन ॥४५॥ पुत्रेण सत्पुत्रेण पिता लोकान् जयते प्राप्नोति यत् यतः। तमः नरकम् ॥ ४६ ॥ अतिक्रम्य भगवन्तमगात् ॥ ४७ ॥ शाश्वतीः समाः बहुवर्षाणि॥४८॥ यो भवान् उत्तमेति प्रशस्तयशसः कथां व्यनक्ति प्रकटयति ॥४९॥ आजीविनां सेवकानाम् आ सम्यक् शिक्षणं यतः प्रकृतिः स्वभावः ॥५०॥ नाऽस्माकं तमसः संसारस्य पार उपासादितो दर्शितः। दृष्टि र्ज्ञानम् ॥५१॥ यः पृथुरूपो भवान् क्षत्रं वेनाङ्गजातं देहमाविश्य इदं ब्रह्मकुलं बिभर्ति पालयति तस्मै ते नमः। इत्यन्वयः। यद्वा। ब्रह्म आविश्य क्षत्रं विद्यादिना बिभर्ति। क्षत्रं चाविश्य ब्रह्म तदुभयमाविश्य विश्वं चेत्यन्वयः ॥ ५२ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे गूढार्थदीपिन्यामेकविंशोऽध्यायः

●

द्वाविंशके केन भवेन्नराणां क्षेमो भवेऽस्मिन् पृथुनेति पृष्टः।
भक्तिं परां ज्ञानविरागयुक्तां सनत्कुमारो भगवान् जगाद ॥ १ ॥

प्रगृणत्सु स्तुवत्सु सत्सु तत्र स्वसद्भोपवने पृथुलो महान् ॥ १ ॥ अवतरतस्तान् अचष्ट अपश्यत्। अर्चिषा तेजसा सनकादय इति लक्षितान् ॥ २ ॥ प्रत्यादित्सुः पुनः प्राप्तुमिच्छुरिव। इन्द्रियेशो जीवो

गौरवाद्यन्त्रितः सभ्यः प्रश्रयानतकन्धरः। विधिवत्पूजयांचक्रे गृहीताध्यर्हणासनान्॥ ४॥
तत्पादशौचसलिलैर्मार्जितालकबन्धनः। तत्र शीलवतां वृत्तमाचरन्मानयन्निव ॥ ५॥
हाटकासन आसीनान् स्वधिष्ण्येष्विव पावकान्। श्रद्धासंयमसंयुक्तः प्रीतः प्राह भवाग्रजान्॥६॥

पृथुरुवाच

अहो आचरितं किं मे मङ्गलं मङ्गलायनाः। यस्य वो दर्शनं ह्यासीद् दुर्दर्शानां च योगिभिः॥७॥
किं तस्य दुर्लभतरमिह लोके परत्र च। यस्य विप्राः प्रसीदन्ति शिवो विष्णुश्च सानुगः॥८॥
नैव लक्षयते लोको लोकान् पर्यटतोऽपि यान्। यथा सर्वदृशं सर्व आत्मानं येऽस्य हेतवः॥ ९॥
अधना अपि ते धन्याः साधवो गृहमेधिनः। यद्गृहा ह्यर्हवर्याम्बुतृणभूमीश्वरावराः॥१०॥
व्यालालयद्रुमा वै तेऽप्यरिक्ताखिलसम्पदः। यद्गृहास्तीर्थपादीयपादतीर्थविवर्जिताः॥११॥
स्वागतं वो द्विजश्रेष्ठा यद्व्रतानि मुमुक्षवः। चरन्ति श्रद्धया धीरा बाला एव बृहन्ति च ।१२।
कच्चिन्नः कुशलं नाथा इन्द्रियार्थार्थवेदिनाम्। व्यसनावाप एतस्मिन् पतितानां स्वकर्मभिः॥१३॥
भवत्सु कुशलप्रश्न आत्मारामेषु नेष्यते। कुशलाकुशला यत्र न सन्ति मतिवृत्तयः॥१४॥
तदहं कृतविस्रम्भः सुहृदो वस्तपस्विनाम्। सम्पृच्छे भव एतस्मिन् क्षेमः केनाञ्जसा भवेत्॥१५॥
व्यक्तमात्मवतामात्मा भगवानात्मभावनः। स्वानामनुग्रहायेमां सिद्धरूपी चरत्यजः॥१६॥

मैत्रेय उवाच

पृथोस्तत्सूक्तमाकर्ण्य सारं सुष्ठु मितं मधु। स्मयमान इव प्रीत्या कुमारः प्रत्युवाच ह॥१७॥

गुणान् गन्धादीन् प्रति यथोद्गच्छतीत्यौत्सुक्ये दृष्टान्तः॥३॥ तेषां गौरवात् यन्त्रितः सङ्कुचितः वशीभूतः। अर्घ्यंहणम् अर्घ्यम्॥ ४॥ तत्र तदा वृत्तं विनयादिकं मानयन्नेव स्वयमाचरत्॥ ५॥ हाटकासने स्वर्णपीठे। धिष्ण्येषु कुण्डेषु। भवाग्रे सर्गादौ जातान्। भवस्याप्यग्रजत्वेन मान्यानिति प्राञ्चः। ॥ ६॥ मङ्गलं पुण्यम्। मङ्गलं भगवान् विष्णुः स एवायनमाश्रयो येषां ते तत्संबुद्धौ। यस्य मे॥ ७॥ यस्य प्रसीदन्ति तस्य शिवो विष्णुरपि प्रसीदति अतस्तस्य किं दुर्लभंनकिमपीत्यन्वयः॥८॥ यान् युष्मान् न पश्यति। यथा सर्वदर्शिनं परमात्मानं सर्वे न तद्वत्। सर्वे के। येऽस्य विश्वस्य हेतवो प्रकृतिमहदादयस्ते॥ ९॥ येषां गृहाः अर्हवर्याः अतिथ्यादिस्वीकारयोग्या अम्बाद्यो येषु तादृशाः। ईश्वरो गृहस्वामी। अवरा भृत्यादश्च॥ १०॥ यत् ये गृहाः। तीर्थपादीया भगवद्भक्तास्तेषां पादतीर्थं पादप्रक्षालनोदकेन। वै एवार्थे अरिक्ताः परिपूर्णाः॥११॥येषां वो व्रतानि अन्ये बाला अज्ञाः मुक्तिकामाः सन्तश्चरन्ति॥१२॥ इन्द्रियार्थं विषयसुखमेव पुरुषार्थं जानतां नः कच्चित् किं कुशल न किमपि। व्यसनानि दुःखानि उप्यन्ते वीजवन्निक्षिप्यन्तेऽस्मिन् संसारे॥ १३॥ नेष्यते नोपयुक्तो भवति। यत्र येषु॥१४॥ यस्मात् आत्मारामाः तत् तस्मात् कृतविस्रम्भः कृतविश्वासः सन् अञ्जसा झटिति। विश्वासे दन्त्यः प्रमादे तालव्य इति विवेकः। तपस्विनां सन्तप्तान् वः युष्मान्॥ १५॥ व्यक्तं निश्चितम् अजो भगवानेव इमां पृथ्वीं विचरति। आत्मा हरिरेवोपास्यत्वेनाऽस्ति येषां तेषां भक्तानामात्मेव प्रीतिविषयः अत एव तेषामात्मभावनः स्वरूपप्रकाशकश्च॥ १६॥ मधु मधुरम् कुं कुत्सितं देहाध्यासं मारयति

सनत्कुमार उवाच

साधु पृष्टं महाराज सर्वभूतहितात्मना । भवता विदुषा चापि साधूनां मतिरीदृशी ॥१८॥
सङ्गमः खलु साधूनामुभयेषां च सम्मतः । यत्सम्भाषणसम्प्रश्नः सर्वेषां वितनोति शम् ॥१९॥

अस्त्येव राजन् भवतो मधुद्विषः पादारविन्दस्य गुणानुवादने ।
रतिर्दुरापा विधुनोति नैष्ठिकी कामं कषायं मलमन्तरात्मनः ॥ २० ॥
शास्त्रेष्वियानेव सुनिश्चितो नृणां क्षेमस्य सध्र्यग्विमृशेषु हेतुः ।
असङ्ग आत्मव्यतिरिक्त आत्मनि दृढा रतिर्ब्रह्मणि निर्गुणे च या ॥ २१ ॥
सा श्रद्धया भगवद्धर्मचर्यया जिज्ञासयाऽऽध्यात्मिकयोगनिष्ठया ।
योगेश्वरोपासनया च नित्यं पुण्यश्रवःकथया पुण्यया च ॥ २२ ॥
अर्थेन्द्रियारामसगोष्ठ्यतृष्णया तत्सम्मतानामपरिग्रहेण च ।
विविक्तरुच्या ऽपरितोष आत्मन् विना हरेर्गुणपीयूषपानात् ॥ २३ ॥
अहिंसया पारमहंस्यचर्यया स्मृत्या मुकुन्दाचरिताग्र्यसीधुना ।
यमैरकामैर्नियमैश्चाप्यनिन्दया निरीहया द्वन्द्वतितिक्षया च ॥ २४ ॥
हरेर्मुहुस्तत्परकर्णपूरया गुणाभिधानेन विजृम्भमाणया ।
भक्त्या ह्यसङ्गः सदसत्यनात्मनि स्यान्निर्गुणे ब्रह्मणि चाञ्जसा रतिः ॥२५॥
यदा रतिर्ब्रह्मणि नैष्ठिकी पुमानाचार्यवान् ज्ञानविरागरंहसा ।
दहत्यवीर्यं हृदयं जीवकोशं पञ्चात्मकं योनिमिवोत्थितोऽग्निः ॥२६॥

निवर्तयतीति कुमारः । ह स्फुटम् ॥१७॥ विदुषा जानताऽपि । ईदृशी परोपकारनिष्ठा ॥१८॥ उभयेषां श्रोतॄणां श्रावयितॄणां च । यत् येषां संभाषणपूर्वकः प्रश्नः शं सुखम् ॥ १९ ॥ या अन्तरात्मनो मनसः कामं वासनात्मकं मलं निवर्तयतीति सा रतिरस्त्येव अथाऽपि किञ्चिद् ब्रूमः । कषायं धातुरागवद् दुर्निवर्त्यम् । अनुवादयति कथने प्रवर्तयतीति अनुवादनं श्रवणम् ॥२०॥ सध्र्यक् समीचीनः साधनविमर्शो येषु तेषु शास्त्रेषु क्षेमस्य हेतुर्मोक्षोपाय एतावानेव । कः । व्यतिरिक्ते देहादौ योऽसङ्गो वैराग्यं परमात्मनि या रतिश्चेति द्वयात्मकः ॥ २१ ॥

सेति चतुष्कम् । सा रतिः असङ्गश्च श्रद्धादिभिः स्यादिति चतुर्थेनान्वयः । पुण्यश्रवसः पुण्ययशसो हरेः कथया लीलानिबन्धशास्त्रेण । अग्रे मुकुन्देत्यत्र तच्चरितामृतपानेन अतो न पुनरुक्तिः ॥२२॥ अर्थारामा धनलुब्धा इन्द्रियारामा भोगासक्ताश्च तैः सह या गोष्ठी तस्याम् । तत्संमतानां तत्सङ्गिनाम् । विविक्तिरुच्या एकान्तवासेन । पानाद्विना आत्मनि योऽपरितोषस्तेन च ॥ २३ ॥ चर्यया उपशमादिवृत्त्या । चरितमेव अग्र्यं मुख्यं शीधु अमृतं तेन स्वाद्यमानेन । यमैः सत्यादिभिः । 'शीधु मद्येऽमृतेऽपि च' इति स्वामी ॥२४॥ हरेर्गुणकीर्तनेन वर्धमानया । कीदृश्या तत्परा भक्तास्तेषां कर्णपूरया । स्थूलसूक्ष्मरूपे ऽनात्मनि संसारे । अञ्जसा झटिति । पूरयेति तृतीयान्तः तीर्थसम्मतः पाठ उपयुक्तश्च ॥२५॥ यदा मुक्तियोग्ये

दग्धाशयो मुक्तसमस्ततद्गुणो नैवात्मनो बहिरन्तर्विचष्टे ।
परात्मनोर्यद् व्यवधानं पुरस्तात् स्वप्ने यथा पुरुषस्तद्विनाशे ।।२७।।

आत्मानमिन्द्रियार्थं च परं यदुभयोरपि । सत्याशय उपाधौ वै पुमान् पश्यति नान्यदा ।।२८।।
निमित्ते सति सर्वत्र जलादावपि पूरुषः । आत्मनश्च परस्यापि भिदां पश्यति नान्यदा ।।२९।।
इन्द्रियैर्विषयाकृष्टैराक्षिप्तं ध्यायतां मनः । चेतनां हरते बुद्धेः स्तम्बस्तोयमिव ह्रदात् ।।३०।।
भ्रश्यत्यनुस्मृतिश्चित्तं ज्ञानभ्रंशः स्मृतिक्षये । तद्रोधं कवयः प्राहुरात्मापह्नवमात्मनः ।।३१।।
नातः परतरो लोके पुंसः स्वार्थव्यतिक्रमः । यदध्यन्यस्य प्रेयस्त्वमात्मनः स्वव्यतिक्रमात् ।।३२।।
अर्थेन्द्रियार्थाभिध्यानं सर्वार्थापह्नवो नृणाम् । भ्रंशितो ज्ञानविज्ञानाद्येनाविशति मुख्यताम् ।।३३।।
न कुर्यात् कर्हिचित्सङ्गं तमस्तीव्रं तितीरिषुः । धर्मार्थकाममोक्षाणां यदत्यन्तविघातकम् ।।३४।।
तत्रापि मोक्ष एवार्थ आत्यन्तिकतयेष्यते । त्रैवर्ग्योऽर्थो यतो नित्यं कृतान्तभयसंयुतः ।।३५।।
परेऽवरे च ये भावा गुणव्यतिकरादनु । न तेषां विद्यते क्षेममीशविध्वंसिताशिषाम् ।।३६।।

तत् त्वं नरेन्द्र जगतामथ तस्थुषां च देहेन्द्रियासुधिषणात्मभिरावृतानाम् ।
यः क्षेत्रवित्तपतया हृदि विश्वगाविः प्रत्यक् चकास्ति भगवांस्तमवेहि सोऽस्मि ।।३७।।

जन्मनि गुरुभक्तिमान् भवति तदा तत्प्रसादलब्धज्ञानविरागप्रभावेण ब्रह्मणि रतिः तदैव च पुमान् अवीर्यं निर्वासनं लिङ्गशरीरं दहति मुक्तो भवति । कथंभूतम् । मनोयुक्तं जीवस्य आवरकं पञ्चतन्मात्रात्मकम् । योनिं काष्ठम् ॥२६॥ आशयो लिङ्गदेहः । तद्गुणा देहगुणाः कर्तृत्वादयः । आत्मनः स्वस्मात् बहिःशत्रुमित्रादिः अन्तस्तत्कृतं मानापमानादिः नैवानुभवति । कुतः परात्मनोः ईशजीवयोः व्यवधायकं यत् लिङ्ग शरीरं पूर्वमासीत् तस्य विनाशे सति । यथा स्वप्न दृष्टं राजादि स्वप्नविनाशे सति न पश्यति तद्वत् । ॥२७॥ आत्मानं भोक्तारं जीवम् इन्द्रियार्थं भोग्यं च तयोर्भोगीत्थं यत्परमन्यत् सुख दुःखं च तत्सर्वम् आशये लिङ्गदेहे सत्येव पश्यति । अन्यदा देहाभावे न किन्तु तदा ईश्वरमेवेत्यन्वयः । ॥ २८ ॥ लोकेऽपि सर्वत्र जलदर्पणादौ भेदनिमित्ते सत्येव बिम्बस्य प्रतिबिम्बस्य च भेदं पश्यति न तु अन्यदा जलादि निमित्ताभावे ॥ २९ ॥ विषयान् ध्यायतां मन इन्द्रियैर्विक्षिप्तं सत् बुद्धेर्विचारसामर्थ्यं हरति यथा स्तम्बः कुशादिमूहः मूलैः ह्रदात् तोयम् ॥ ३० ॥ चित्तं चेतनामनु स्मृतिः पूर्वपरानुसन्धानम् । एवं तद्रोधं ज्ञान नाशमेव आत्मनो ज्ञानरूपस्य जीवस्य आत्मापह्नवं स्वरूपनाशं प्राहुः ॥ ३१ ॥ व्यतिक्रमः स्वार्थहानिः अतः परतरोऽधिकतरो न । कस्मात् । यमात्मानमधिकृत्य अन्यस्य स्त्रीपुत्रादेः प्रियतमत्वं भवति तस्यात्मनः स्वेनैव व्यतिक्रमो विस्मृतिः तस्मादस्मात् ॥ ३२ ॥ अर्थस्य विषयस्य इन्द्रियप्रीतये यदभिध्यानं तत् सर्वार्थनाशः । येन ध्यानेन भ्रंशितः सन् स्थावरतां प्राप्नोति । मुखमिव प्रथमे जातत्वात् स्वार्थराहित्येन परोपकारित्वाद्वा मुख्यत्वमायाति ॥ ३३ ॥ तीव्रं दुःखदं तमः संसारम् । यत् विघातकं तत्र सङ्गम् ॥ ३४॥ तत्रापि धर्मादिष्वपि त्रिवर्गसंबन्धी यतोऽनित्यः अतो मोक्ष एव नित्यतया अर्थो मुख्यः ॥ ३५ ॥ गुणक्षोभा दनन्तरं परे ब्रह्मादयः अवरे अस्मदादयश्च ये भवन्तीति भावा प्राणिनः तेषां क्षेमं न विद्यते । ईशः कालः । आशिषो भोगाः ॥३६॥ तत् तस्मात् जङ्गमानां स्थावराणां च हृदि यः प्रत्यक् प्रतिलोमं चकास्ति तमवेहि

यस्मिन्निदं सदसदात्मतया विभाति मायाविवेकविधुति स्रजि वाहिबुद्धिः ।
तं नित्यमुक्तपरिशुद्धविबुद्धतत्त्वं प्रत्यूढकर्मकलिलप्रकृतिं प्रपद्ये ॥ ३८ ॥

यत्पादपङ्कजपलाशविलासभक्त्या कर्माशयं ग्रथितमुद्ग्रथयन्ति सन्तः ।
तद्वन्न रिक्तमतयो यतयोऽपि रुद्धस्रोतोगणास्तमरणं भज वासुदेवम् ॥३९॥

कृच्छ्रो महानिह भवार्णवमप्लवेशां षड्वर्गनक्रमसुखेन तितीर्षयन्ति ।
तत् त्वं हरेर्भगवतो भजनीयमङ्घ्रिं कृत्वोडुपं व्यसनमुत्तर दुस्तरार्णम् ॥४०॥

मैत्रेय उवाच

स एवं ब्रह्मपुत्रेण कुमारेणात्ममेधसा । दर्शितात्मगतिः सम्यक्प्रशस्योवाच तं नृपः ॥४१॥

राजोवाच

कृतो मेऽनुग्रहः पूर्वं हरिणाऽऽर्तानुकम्पिना । तमापादयितुं ब्रह्मन् भगवन् यूयमागताः ॥४२॥
निष्पादितश्च कार्त्स्न्येन भगवद्भिर्घृणालुभिः । साधूच्छिष्टं हि मे सर्वमात्मना सह किं ददे॥४३॥
प्राणा दाराः सुता ब्रह्मन् गृहाश्च सपरिच्छदाः । राज्यं बलं मही कोश इति सर्वं निवेदितम् ॥४४॥
सैनापत्यं च राज्यं च दण्डनेतृत्वमेव च । सर्वलोकाधिपत्यं च वेदशास्त्रविदर्हति ॥४५॥
स्वमेव ब्राह्मणो भुङ्क्ते स्वं वस्ते स्वं ददाति च । तस्यैवानुग्रहेणान्नं भुञ्जते क्षत्रियादयः॥४६॥

यैरीदृशी भगवतो गतिरात्मवादे एकान्ततो निगमिभिः प्रतिपादिता नः ।
तुष्यन्त्वदभ्रकरुणाः स्वकृतेन नित्यं को नाम तत्प्रतिकरोति विनोदपात्रम् ॥४७॥

कथम् । सोऽहमस्मीति भावनया । सूर्यकिरणस्यापि सूर्यत्वदिति न्यायात् । कथंभूतो यः । क्षेत्रविदो जीवान् तपति नियमयतीति अन्तर्यामिरूपेण विष्वगाविः सर्वतः प्रकटः । धिणां बुद्धिः । आत्मा अहङ्कारः ॥ ३७ ॥ कार्यकारणरूपतया यस्मिन्निदं विश्वं विभाति तं प्रपद्ये । कथंभूतम् । माया भगवत्कृपा तयैव विवेकस्तेन निवृत्तिर्यस्य । वा यथा । तत्त्वं स्वरूपम् । पुनः । प्रत्यूढा सर्वदा दूरीभूता कर्ममलिना प्रकृतिर्यस्मात् । इदं मायैवेति केचित् । 'माया दम्भे कृपायां च' इति मेदनी ॥ ३८ ॥ यस्य पादपङ्कजयोः पत्रायमाणामङ्गुलीनां विलासभक्त्या ज्योतिः स्मृत्या सन्तो भक्ता दृढं कर्माशयमहङ्कारं यथा नाशयन्ति तद्वत् यतयोऽपि न अतोऽरणं सर्वथा रक्षकं तं भजेत्यन्वयः । रिक्ता भक्तिधनशून्या । रुद्धः स्रोतसामिवेन्द्रियाणां गणो यैः श्लेषेण अरणं निःसंग्रामं वा ॥३९॥ नास्ति प्लवस्तरणहेतुः ईट् ईशो येषां तेषाम् इह तरणे महान् क्लेशः । यतः षडिन्दियवर्गग्राहं भवार्णवम् । तत् तस्मात् त्वंदुस्तरार्णं दुस्तरसमुद्ररूपं संसारव्यसनमुत्तर । अदन्तोऽप्यर्णशब्दो जलवाची ॥४०॥ आत्मनि श्रीकृष्णे मेधा यस्य । आत्मगतिर्भगवन्मार्गो यस्मै ॥ ४१ ॥ प्राधान्यादेकस्य संबोधनं बहुत्वाच्च यूयमतो नासङ्गतिः ॥ ४२ ॥ यः पूर्वं कृतः स दयालुभिर्भवद्भिः साकल्येन निष्पादितः । आत्मना देहेन सह मे सर्वं साधूनामनुग्रहाल्लब्धमतो गुरुदक्षिणार्थं किं दद्याम् ॥४३॥ अथापि निवेदितं भवद्भिर्दत्तमेव पुनः निवेद्यते इति धार्ष्ट्यं ॥४४॥ ॥ ४५ ॥ स्वं स्वीयमेवान्नम् । वस्ते परिधत्ते ॥ ४६ ॥ आत्मवादे भगवत्स्वरूपविचारे यैर्भवद्भिः

मैत्रेय उवाच

त आत्मयोगपतय आदिराजेन पूजिताः। शीलं तदीयं शंसन्तः खेऽभूवन् मिषतां नृणाम् ॥४८॥
वैन्यस्तु धुर्यो महतां संस्थित्याध्यात्मशिक्षया। आप्तकाममिवात्मानं मेन आत्मन्यवस्थितः ॥४९॥
कर्माणि च यथाकालं यथादेशं यथाबलम्। यथोचितं यथावित्तमकरोद् ब्रह्मसात्कृतम् ॥५०॥
फलं ब्रह्मणि विन्यस्य निर्विषङ्गः समाहितः। कर्माध्यक्षं च मन्वान आत्मानं प्रकृतेः परम्॥५१॥
गृहेषु वर्तमानोऽपि स साम्राज्यश्रियान्वितः। नासज्जतेन्द्रियार्थेषु निरहंमतिरर्कवत् ॥५२॥
एवमध्यात्मयोगेन कर्माण्यनुसमाचरन्। पुत्रानुत्पादयामास पञ्चार्चिष्यात्मसम्मतान् ॥५३॥
विजिताश्वं धूम्रकेशं हर्यश्वं द्रविणं वृकम्। सर्वेषां लोकपालानां दधारैकः पृथुर्गुणान् ॥५४॥
गोपीथाय जगत्सृष्टेःकाले स्वे स्वेऽच्युतात्मकः। मनोवाग्वृत्तिभिः सौम्यैर्गुणैः संरञ्जयन् प्रजाः॥५५
राजेत्यधान्नामधेयं सोमराज इवापरः। सूर्यवद्विसृजन् गृह्णन् प्रतपंश्च भुवो वसु ॥५६॥
दुर्धर्षस्तेजसेवाग्निर्महेन्द्र इव दुर्जयः। तितिक्षया धरित्रीव द्यौरिवाभीष्टदो नृणाम् ॥५७॥
वर्षति स्म यथाकामं पर्जन्य इव तर्पयन्। समुद्र इव दुर्बोधः सत्त्वेनाचलराडिव ॥५८॥
धर्मराडिव शिक्षयामाश्चर्ये हिमवानिव। कुबेर इव कोशाढ्यो गुप्तार्थो वरुणो यथा ॥५९॥
मातरिश्वेव सर्वात्मा बलेन सहसौजसा। अविषह्यतया देवो भगवान् भूतराडिव ॥६०॥
कन्दर्प इव सौन्दर्ये मनस्वी मृगराडिव। वात्सल्ये मनुवन्नृणां प्रभुत्वे भगवानजः ॥६१॥
बृहस्पतिर्ब्रह्मवादे आत्मवत्त्वे स्वयं हरिः। भक्त्या गोगुरुविप्रेषु विष्वक्सेनानुवर्तिषु।
ह्रिया प्रश्रयशीलाभ्यामात्मतुल्यः परोद्यमे ॥ ६२ ॥
कीर्त्योर्ध्वंगीतया पुम्भिस्त्रैलोक्ये तत्र तत्र ह। प्रविष्टः कर्णरन्ध्रेषु स्त्रीणां रामः सतामिव॥६३॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां चतुर्थस्कन्धे पृथुचरिते द्वाविंशोऽध्यायः ॥२२॥

एकान्ततः मुख्यतया गतिः प्रतिपादिता मार्गः प्रदर्शितः ते भवन्तः स्वकृतेनैव उपकारेण तुष्यन्तु। यतः उदपात्रमञ्जलिं विना को नाम तत्प्रत्युपकर्तुं शक्नोति न कोऽपि। निगमिभिः वेदतात्पर्यविद्भिः ॥४७॥ मिषतां पश्यताम् ॥ ४८ ॥ धुर्यः श्रेष्ठः। शिक्षया या संस्थितिरेकाग्रता तया आत्मनि कृष्णेऽवस्थितः सन्। इव एवार्थे ॥ ४९ ॥ ब्रह्मणि अर्पितं यथा भवेत्तथा ॥ ५० ॥ फलमिति युग्मकम्। निर्विषङ्गः फलेष्वनासक्तः परं श्रीकृष्णं कर्मणाम् अध्यक्षं फलप्रदं मन्वानः विषयेषु नासज्जतेत्यन्वयः ॥ ५१।५२ ॥ एवमिति सार्द्धम्। आत्मनि श्रीकृष्णे भक्तियोगेन। अर्चिर्नाम्न्यां पत्न्याम्। सम्मतान् तुल्यान् ॥ ५३ ॥ गोपीथाय रक्षणाय। स्वे स्वे उचिते ॥ ५४ ॥ सोमश्चासौ राजा ॥५५॥ वसु धनं जलं च गृह्णन् ॥५६॥ द्यौः स्वर्ग इव ॥ ५७ ॥ सत्त्वेन धैर्येण मेरुरिव ॥ ५८ ॥ मातरिश्वा वायुरिव सर्वगः। बलेनेति देहमन-इन्द्रियशक्तिभिः ॥ ५९।६० ॥ प्रभुत्वे आज्ञादाने। आत्मवत्त्वे जितेन्द्रियत्वे ॥ ६१ ॥ अनुवर्तिषु भगवद्भक्तेषु च भक्त्यादिभिरात्मतुल्यो निरुपमः। परोद्यमे परोपकारे च ॥ ६२ ॥ ह सुस्पष्टमुच्चैः गीतया। कीर्त्या सतां भक्तानां कर्णेषु यथा रामः तथा प्रविष्टः ॥ ६३ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे गूढार्थदीपिन्यां द्वाविंशोऽध्यायः।

अथ त्रयोविंशोऽध्यायः

मैत्रेय उवाच

दृष्ट्वाऽऽत्मानं प्रवयसमेकदा वैन्य आत्मवान् । आत्मना वर्धिताशेषस्वानुसर्गः प्रजापतिः ॥१॥
जगतस्तस्थुषश्चापि वृत्तिदो धर्मभृत्सताम् । निष्पादितेश्वरादेशो यदर्थमिह जज्ञिवान् ॥ २ ॥
आत्मजेष्वात्मजां न्यस्य विरहाद्रुदतीमिव । प्रजासु विमनःस्वेकः सदारोऽगात्तपोवनम् ॥३॥
तत्राप्यदाभ्यनियमो वैखानससुसंमते । आरब्ध उग्रतपसि यथा स्वविजये पुरा ॥ ४ ॥
कन्दमूलफलाहारः शुष्कपर्णाशनः क्वचित् । अब्भक्षः कतिचित्पक्षान् वायुभक्षस्ततः परम् ॥ ५ ॥
ग्रीष्मे पञ्चतपा वीरो वर्षास्वासारषाण्मुनिः । आकण्ठमग्नः शिशिरे उदके स्थण्डिलेशयः ॥६॥
तितिक्षुर्यतवाग्दान्त ऊर्ध्वरेता जितानिलः । आरिराधयिषुः कृष्णमचरत्तप उत्तमम् ॥ ७ ॥
तेन क्रमानुसिद्धेन ध्वस्तकर्ममलाशयः । प्राणायामैः संनिरुद्धषड्वर्गश्छिन्नबन्धनः ॥ ८ ॥
सनत्कुमारो भगवान् यदाहाध्यात्मिकं परम् । योगं तेनैव पुरुषमभजत्पुरुषर्षभः ॥ ९ ॥
भगवद्धर्मिणः साधोः श्रद्धया यततः सदा । भक्तिर्भगवति ब्रह्मण्यनन्यविषयाऽभवत् ॥१०॥

तस्यानया भगवतः परिकर्मशुद्धसत्त्वात्मनस्तदनुसंस्मरणानुपूर्त्या ।
ज्ञानं विरक्तिमदभून्निशितेन येन चिच्छेद संशयपदं निजजीवकोशम् ॥ ११ ॥
छिन्नान्यधीरधिगतात्मगतिर्निरीहस्तत्तत्यजेऽच्छिनदिदं वयुनेन येन ।
तावन्न योगगतिभिर्यतिरप्रमत्तो यावद्गदाग्रजकथासु रतिं न कुर्यात् ॥ १२ ॥

त्रयोविंशे वनं गत्वा तपसाऽऽराधयन् हरिम् ।
पृथुः पत्न्या सहैवागात् विष्णुलोकमनामयम् ॥१॥

दृष्ट्वेति त्रिकम् । प्रवयसं वृद्धं दृष्ट्वा तपोवनमगादित्युत्तरेणान्वयः । कथंभूतः । आत्मना स्वप्रभावेण वर्धितः अशेषः स्वकृतोऽनुसर्गोऽन्नपुरग्रामादिसर्गो येन ॥ १ ॥ जगतो जङ्गमस्य । स्थावरस्य च वृत्तिदानमुपवनादिकरणेन । आदेशः प्रजापालनादिरूपः । किं बहुना यदर्थं जातस्तत्सर्वं विधाय ॥२॥ आत्मजां पृथ्वीम् ।३। तत्रापि तपोवनेऽपि । अदाभ्या विघ्नैरखण्ड्या । लपिदभिभ्यां च इति ब्यत् । वैखानसा वानप्रस्थाः । आरब्धः प्रवृत्तः ।४।५। तसस्तापः । आसारं धारासम्पातवृष्टिं सहते षाट् 'छन्दसि सहः' इति ण्विः । स्थण्डिले भूमौ ॥६॥ यतवाक् मौनी । अचरत् कृतवान् ॥७॥ क्रमेण शनैः शनैः परिपक्वेन तेन तपसा । आशयोऽन्तःकरणम् । षड्वर्गः इन्द्रियवर्गः । बन्धनानि रागद्वेषादीनि ।८। आत्मनि स्वस्मिन्नधिकृतं परं सर्वोत्कृष्टं यत् यं भक्तियोगमाह तेनैव । विनयादित्वात्स्वार्थे ठक् ॥ ९ ॥ अनन्यविषया अव्यभिचारिणी ॥१०॥ तस्य पृथोः ज्ञानमभूत् येन संशयानां स्थानं स्वजीवावरकम् अहङ्कारं लिङ्गशरीरं वा । चिच्छेद । कथंभूतेन । अनया भक्त्या निशितेन तीक्ष्णेन । कथंभूतया । तस्य भगवतोऽनुक्षणस्मरणेन परिपूर्णता यस्याः । परिकर्म परिचर्या तेन शुद्धसत्त्वः निर्वासनः आत्मा मनो यस्य । चिच्छेदेति लोकोक्तिः भगवद्विग्रहत्वेन तस्य लिङ्गदेहाभावात् ॥११॥ छिन्ना अन्यस्मिन् उपाधिरूपे देहे धीदृष्टिर्यस्य । आत्मगतिः

एवं स वीरप्रवरः संयोज्यात्मानमात्मनि। ब्रह्मभूतो दृढं काले तत्याज स्वं कलेवरम् ॥१३॥
सम्पीड्य पायुं पार्ष्णिभ्यां वायुमुत्सारयञ्छनैः। नाभ्यां कोष्ठेष्ववस्थाप्य हृदुरः कण्ठशीर्षणि१४
उत्सर्पयंस्तु तं मूर्ध्नि क्रमेणावेश्य निःस्पृहः। वायुं वायौ क्षितौ कायं तेजस्तेजस्ययूयुजत्॥१५॥
खान्याकाशे द्रवं तोये यथास्थानं विभागशः। क्षितिमम्भसि तत्तेजस्यदो वायौ नभस्यमुम्॥१६॥
इन्द्रियेषु मनस्तानि तन्मात्रेषु यथोद्भवम्। भूतादिनामून्युत्कृष्य महत्यात्मनि संदधे॥१७॥
तं सर्वगुणविन्यासं जीवे मायामये न्यधात्। तं चानुशयमात्मस्थमसावनुशयी पुमान्।
ज्ञानवैराग्यवीर्येण स्वरूपस्थोऽजहात्प्रभुः ॥ १८ ॥
अर्चिर्नाम महाराज्ञी तत्पत्न्यनुगता वनम्। सुकुमार्यतदर्हा च यत्पद्भ्यां स्पर्शनं भुवः॥१९॥

अतीव भर्तुर्व्रतधर्मनिष्ठया शुश्रूषया चार्षशरीरयात्रया।
नाविन्दतार्ति परिकर्शितापि सा प्रेयस्करस्पर्शनमाननिर्वृतिः ॥ २० ॥

देहं विपन्नाखिलचेतनादिकं पत्युः पृथिव्या दयितस्य चात्मनः।
आलक्ष्य किञ्चिच्च विलप्य सा सती चितामथारोपयदद्रिसानुनि ॥ २१ ॥

विधाय कृत्यं ह्रदिनीजलाप्लुता दत्त्वोदकं भर्तुरुदारकर्मणः।
नत्वा दिविस्थांस्त्रिदशांस्त्रिः परीत्य विवेश वह्निं ध्यायती भर्तृपादौ॥२२॥

विलोक्यानुगतां साध्वीं पृथुं वीरवरं पतिम्। तुष्टुवुर्वरदा देवैर्देवपत्न्यः सहस्रशः॥२३॥
कुर्वत्यः कुसुमासारं तस्मिन् मन्दरसानुनि। नदत्स्वमरतूर्येषु गृणन्ति स्म परस्परम्॥२४॥

भगवत्पादधर्षरूपा। अत एव निरीहः निस्पृहः सन् येन ज्ञानेन इदं संशयपदमच्छिनत् तत्प्रयत्नमपि तत्यजे। कुतो निस्पृहत्वम्। गतिभिः सिद्धिभिस्तावन्नाप्रमत्तः न निःस्पृह किन्तु सस्पृह एव यावत् रतिं न कुर्यात् तस्य च स्वभावतः कथारतित्वान्न स्पृहेत्यर्थः।१२। आत्मनि श्रीकृष्णे आत्मानं मनः दृढं स्थिरं यथा भवति तथा॥१३॥ सम्पीड्येति त्रिकम्। उत्सारयन् ऊर्ध्वं नयन् नाभ्यादिकोष्ठेषु चक्रेषु अवस्थाप्य पुनस्तं प्राणवायुमुत्सर्पयन् क्रमेण मूर्ध्नि ब्रह्मरन्ध्रे आवेश्य कायस्थितान् वाय्वादीन् वाय्वादिमहाभूतेषु एवं क्षित्यादिमहाभूतान्यपि अम्भआदिषु अयूयुजत् विलापितवानित्यन्वयः। कायं कायस्थिता क्षितिः। कायस्थितं तेजः। कायस्थितानि खानि इन्द्रियच्छिद्राणि। कायस्थितं द्रवं जलम्। यथा योग्यं पृथक् पृथक्। शीर्षं भ्रूमध्यम् ॥ १४।१५।१६ ॥ इन्द्रियाधीनं मन इन्द्रियेषु। तानीन्द्रियाणि शब्दादिषु ततश्च यथोद्भवं यथास्यात्तथा अमूनि तन्मात्राणि भूतादिनाऽहङ्कारेण उत्क्षिप्य संयोज्य तं च महत्यात्मनि महत्तत्त्वे विलापयामास ॥१७॥ तमिति सार्द्धम्। तं महान्तं जीवोपाधौ मायामये प्रधाने। स्वार्थे मयट्। कथंभूतम्। गुणकार्याणां विन्यासः स्थितिः यस्मिन् तम् आत्मस्थं तं च अनुशयमुपाधिं भगवत्स्वरूपाश्रितः सन्नजहात् यतः प्रभुः समर्थः। कथंभूतम्। योऽसौ पूर्वमनुशयी पुमान् जीवाभिमानी पृथुस्तम् ॥ १८ ॥ यत्स्पर्शनं न तस्य अर्हा योग्या यतः सुकुमारी च अथापि वनमित्यन्वयः ॥ १९ ॥ व्रतं भूमिशयनादि धर्मः श्रवणकीर्तनादिः ऋषीणामियमार्षी चासौ शरीरयात्रा कन्दमूलाद्याहाररूपा तया। निर्वृतिरानन्दः। चार्षशरीरयात्रयेति पाठः साधुः ॥ २० ॥ पृथिव्या आत्मनः स्वस्याश्च दयितस्य पत्युः तथाभूतं देहमालक्ष्य सानुनि प्रदेशे काष्ठैश्चितां विधाय अथ तस्यां तं देहमारोपयदित्यन्वयः विपन्नं नष्टम् ॥ २१ ॥ कृत्यं पिण्डदानादि। ह्रदिनी नदी। वह्निं त्रिः परीत्य प्रदक्षिणीकृत्य ॥ २२ ॥ देवैः सहिताः ॥ २३ ॥ कुसुमासारं पुष्प-

देव्य ऊचुः

अहो इयं वधूर्धन्या या चैवं भूभुजां पतिम् । सर्वात्मना पतिं भेजे यज्ञेशं श्रीर्वधूरिव ॥२५॥

सैषा नूनं व्रजत्यूर्ध्वमनु वैन्यं पतिं सती । पश्यतास्मानतीत्यार्चिर्दुर्विभाव्येन कर्मणा ॥२६॥

तेषां दुरापं किं त्वन्यन्मर्त्यानां भगवत्पदम् । भुवि लोलायुषो ये वै नैष्कर्म्यं साधयन्त्युत ॥२७॥

स वञ्चितो बतात्मध्रुक् कृच्छ्रेण महता भुवि । लब्ध्वाऽऽपवर्ग्यं मानुष्यं विषयेषु विषज्जते ॥२८॥

मैत्रेय उवाच

स्तुवतीष्वमरस्त्रीषु पतिलोकं गता वधूः । यं वा आत्मविदां धुर्यो वैन्यः प्रापाच्युताशयः ॥२९॥

इत्थम्भूतानुभावोऽसौ पृथुः स भगवत्तमः । कीर्तितं तस्य चरितमुद्दामचरितस्य ते ॥३०॥

य इदं सुमहत्पुण्यं श्रद्धयाऽवहितः पठेत् । श्रावयेच्छृणुयाद्वापि स पृथोः पदवीमियात् ॥३१॥

ब्राह्मणो ब्रह्मवर्चस्वी राजन्यो जगतीपतिः । वैश्यः पठन् विट्पतिः स्याच्छूद्रः सत्तमतामियात्

त्रिःकृत्व इदमाकर्ण्य नरो नार्यथवाऽऽदृता । अप्रजः सुप्रजतमो निर्धनो धनवत्तमः ॥३३॥

अस्पष्टकीर्तिः सुयशा मूर्खो भवति पण्डितः । इदं स्वस्त्ययनं पुंसाममङ्गल्यनिवारणम् ॥३४॥

धन्यं यशस्यमायुष्यं स्वर्ग्यं कलिमलापहम् । धर्मार्थकाममोक्षाणां सम्यक्सिद्धिमभीप्सुभिः ।

श्रद्धयैतदनुश्राव्यं चतुर्णां कारणं परम् ॥ ३५ ॥

विजयाभिमुखो राजा श्रुत्वैतदभियाति यान् । बलिं तस्मै हरन्त्यग्रे राजानः पृथवे यथा ॥३६॥

मुक्तान्यसङ्गो भगवत्यमलां भक्तिमुद्वहन् । वैन्यस्य चरितं पुण्यं शृणुयाच्छ्रावयेत् पठेत् ॥३७॥

वैचित्रवीर्याभिहितं महन्माहात्म्यसूचकम् । अस्मिन् कृतमतिर्मर्त्यः पार्थवीं गतिमाप्नुयात् ॥३८॥

वृष्टिम् । गृणन्ति स्म ऊचुः ॥ २४ ॥ यज्ञेशं श्रीविष्णुम् ॥ २५ ॥ वैन्यं पृथुमनुसृत्य ऊर्ध्वम् दुर्विभाव्येन कर्मणा चिन्तयितुमप्यशक्येन ।२६। भगवान् पद्यते प्राप्यतेऽनेनेति भगवत्प्राप्तिसाधनं नैष्कर्म्यं निवृत्तिधर्मं ये साधयन्ति तेषामन्यत् देवादि पदं किं दुर्लभं न किमपीत्यर्थः । लोलं चलं स्वल्पमित्यर्थः ॥ २७ ॥ य आपवर्ग्यं मुक्तिसाधनं लब्ध्वाऽपि विषजते लिप्तो भवति स आत्मघाती । बत खेदे ॥२८॥ यं लोकं वै निश्चितमेव सा प्राप । आशयो मनः ।२९। उद्दामं बन्धनिवर्तकम् । 'उद्दामो बन्धरहिते' इति मेदिनी । ते तुभ्यम् ॥ ३० ॥ अवहितः सावधानः । पदवीं गतिम् ॥ ३१ ॥ शूद्रः शृण्वन् इति योज्यम् । 'नाध्येतव्यं कदाचन' इति भविष्योक्तेः । सत्तमतां स्वजातिप्रधानताम् ॥३२॥ त्रिरिति सार्द्धम् । त्रिःकृत्वः त्रिवारं श्रुत्वा ॥ ३३ ॥ धन्यं धनप्रापकम् । अमङ्गल्यं रोगादि ॥ ३४।३५ ॥ यान् देशान् । तद्देशीयाः । बलिं हरन्ति करं समर्पयन्ति ॥३६॥ मुक्तान्यसङ्गः फलेच्छारहितः । उद्वहन् कुर्वन् ॥३७॥ हे वैचित्रवीर्य विदुर ! इदमभिहितम् । महतो भगवतः । पृथुसंबन्धिनीम् ॥ ३८ ॥ प्रथयन् व्याख्यां कुर्वन्

अनुदिनमिदमादरेण शृण्वन् पृथुचरितं प्रथयन् विमुक्तसङ्गः।
भगवति भवसिन्धुपोतपादे स च निपुणां लभते गतिं मनुष्यः॥ ३९॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां चतुर्थस्कन्धे त्रयोविंशोऽध्यायः॥ २३॥

अथ चतुर्विंशोऽध्यायः

मैत्रेय उवाच

विजिताश्वोऽधिराजाऽऽसीत् पृथुपुत्रः पृथुश्रवाः।यवीयोभ्योऽददात् काष्ठा भ्रातृभ्यो भ्रातृवत्सलः
हर्यक्षायादिशत्प्राचीं धूम्रकेशाय दक्षिणाम्। प्रतीचीं वृकसंज्ञाय तुर्यां द्रविणसे विभुः॥ २॥
अन्तर्धानगतिं शक्राल्लब्ध्वान्तर्धानसंज्ञितः। अपत्यत्रयमाधत्त शिखण्डिन्यां सुसम्मतम्॥ ३॥
पावकः पवमानश्च शुचिरित्यग्नयः पुरा। वसिष्ठशापादुत्पन्नाः पुनर्योगगतिं गताः॥ ४॥
अन्तर्धानो नभस्वत्यां हविर्धानमविन्दत। य इन्द्रमश्वहर्तारं विद्वानपि न जघ्निवान्॥ ५॥
राज्ञां वृत्तिं करादानदण्डशुल्कादिदारुणाम्। मन्यमानो दीर्घसत्रव्याजेन विससर्ज ह॥ ६॥
तत्रापि हंसं पुरुषं परमात्मानमात्मदृक्। यजंस्तल्लोकतामाप कुशलेन समाधिना॥ ७॥
हविर्धानाद्धविर्धानी विदुरासूत षट् सुतान्। बर्हिषदं गयं शुक्लं कृष्णं सत्यं जितव्रतम्॥ ८॥
बर्हिषत् सुमहाभागो हाविर्धानिः प्रजापतिः। क्रियाकाण्डेषु निष्णातो योगेषु च कुरूद्वह॥ ९॥
यस्येदं देवयजनमनु यज्ञं वितन्वतः। प्राचीनाग्रैः कुशैरासीदास्तृतं वसुधातलम्॥१०॥

पोतो नौकारूपः पादो यस्य। निपुणां भगवदाकर्षिणीम्। गम्यतेऽनयेति गतिर्भक्तिस्ताम्। रतिं मतिम् इति पाठौ। पुष्पिताग्रावृत्तम्॥ ३९॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे गूढार्थदीपिन्यां त्रयोविंशोऽध्यायः।

चतुर्विंशे पृथोः पौत्रपुत्रात्प्राचीनबर्हिषः।
जाताः प्रचेतसस्तेभ्यो रुद्रगीतं च वर्ण्यते॥ १॥

अधिराजो महाराजः पृथुश्रवा महायशाः। यवीयोभ्यः कनिष्ठेभ्यः। काष्ठा दिशः॥ १॥ प्रतीचीं पश्चिमाम्। तुर्यां चतुर्थीमुत्तराम्॥ २॥ लब्ध्वा अश्वविजयावसरे। विजिताश्व एवान्तर्धाननामा॥ ३॥ पुरा पूर्वजन्मनि यो वसिष्ठशापस्तस्मादस्य पुत्रत्वेनोत्पन्नाः योगगतिम् अग्नित्वम्। एवं हि श्रूयते वसिष्ठभार्यारुन्धतीरूपमोहितोऽग्निर्यदा तां रन्तुमियेष तदाऽग्निपत्नी स्वाहा तद्रूपिणी भूत्वा तं सिषेवे किन्तु तथाभूतामपि तां किञ्चिद्वैलक्षण्येन तादृशीमदृष्ट्वा पुनर्मुनिपत्नीमेव चकमे तदा वसिष्ठो योगबलेनैतज्ज्ञात्वा तं शशापेति॥ ४॥ नभस्वत्यामन्यस्यां भार्यायाम्। विद्वान् जानन्नपि॥ ५॥ हेत्याश्चर्ये॥६॥ तत्रापि दीर्घसत्रेऽपि। हन्ति भक्तक्लेशमिति तम् हंसम्। कुशलेन निर्विघ्नेन। तल्लोकतां भगवत्पार्षदत्वम्॥ ७॥ हविर्धानी तद्भार्या॥ ८॥ हविर्धानस्यापत्यम् पुमान्॥ ९॥ अनुयज्ञं प्रति-

सामुद्रीं देवदेवोक्तामुपयेमे शतद्रुतिम् ॥११॥

यां वीक्ष्य चारुसर्वाङ्गीं किशोरीं सुष्ठ्वलंकृताम् । परिक्रमन्तीमुद्वाहे चकमेऽग्निः शुकीमिव ॥१२॥

विबुधासुरगन्धर्वमुनिसिद्धनरोरगाः । विजिताः सूर्यया दिक्षु क्वणयन्त्यैव नूपुरैः ॥१३॥

प्राचीनबर्हिषः पुत्राः शतद्रुत्यां दशाभवन् । तुल्यनामव्रताः सर्वे धर्मस्नाताः प्रचेतसः ॥१४॥

पित्राऽऽदिष्टाः प्रजासर्गे तपसेऽर्णवमाविशन् । दशवर्षसहस्राणि तपसाऽऽर्चंस्तपस्पतिम् ॥१५॥

यदुक्तं पथि दृष्टेन गिरिशेन प्रसीदता । तद्ध्यायन्तो जपन्तश्च पूजयन्तश्च संयताः ॥१६॥

विदुर उवाच

प्रचेतसां गिरित्रेण यथाऽऽसीत्पथि सङ्गमः । यदुताह हरः प्रीतस्तन्नो ब्रह्मन् वदार्थवत् ॥१७॥

सङ्गमः खलु विप्रर्षे शिवेनेह शरीरिणाम् । दुर्लभो मुनयो दध्युरसङ्गाद्यमभीप्सितम् ॥१८॥

आत्मारामोऽपि यस्त्वस्य लोककल्पस्य राधसे । शक्त्या युक्तो विचरति घोरया भगवान् भवः

मैत्रेय उवाच

प्रचेतसः पितुर्वाक्यं शिरसाऽऽदाय साधवः । दिशं प्रतीचीं प्रययुस्तपस्यादृतचेतसः ॥२०॥

समुद्रमुपविस्तीर्णमपश्यन् सुमहत्सरः । महन्मन इव स्वच्छं प्रसन्नसलिलाशयम् ॥२१॥

नीलरक्तोत्पलाम्भोजकह्लारेन्दीवराकरम् । हंससारसचक्राह्वकारण्डवनिकूजितम् ॥२२॥

मत्तभ्रमरसौस्वर्यहृष्टरोमलताङ्घ्रिपम् । पद्मकोशरजो दिक्षु विक्षिपत्पवनोत्सवम् ॥२३॥

तत्र गान्धर्वमाकर्ण्य दिव्यमार्गमनोहरम् । विसिस्म्यू राजपुत्रास्ते मृदङ्गपणवाद्यनु ॥२४॥

यज्ञं देवपूजनं वितन्वतः कुर्वंतः यस्य प्राचीनाग्रैः कुशैरिदमाच्छादितमासीत् अत एव प्राचीनबर्हिरिति तस्य नाम जातम् ॥७॥ सामुद्रीमित्यर्द्धम् । समुद्रपुत्रीम् । देवदेवो ब्रह्मा । उपयेमे विवाहितवान् ॥११॥ परिक्रमन्ती प्रदक्षिणं कुर्वन्तीम् । यथा अग्निः स्तुकीं स्वल्पघृतधाराम् । 'स्तुक् अल्पीभावे' इत्यस्मात् । शुकीमिवेति पाठे । राजपुत्रीं शुकीमग्निरावर्तन्तीं प्रदक्षिणम् । 'आदायान्तरधाद्दानसमये मन्मथातुरः' इति वचनादयं विशेषो ज्ञातव्य इति तीर्थः ॥ १२ ॥ सूर्यया नवोढया । नूपुरैः पादौ । तद्ध्वनिमात्रेणेत्यर्थः ॥ १३ ॥ स्नाताः पारङ्गताः ॥१४॥ पित्रेत्यर्द्धम् । सर्गे निमित्ते । तपसे तपः कर्तुम् ॥ १५ ॥ दशेति सार्द्धम् । यदुक्तम् उपदिष्टं तदेव ध्यायन्तः तपस्पतिं विष्णुमार्चन् ॥ १६ ॥ अर्थवत् पुरुषार्थसाधनं यदप्याह तत् वद ॥ १७ ॥ मुनयोऽपि सर्वतः सङ्गं परित्यज्य प्राप्तुमिष्टं यं केवलं दध्युरेव न तु प्रापुस्तेन शिवेनेति योजना कार्या ॥ १८ ॥ लोककल्पस्य लोकरचनाया पालनाय । भक्तसङ्कल्पस्य सिद्धये वा । लोके यः कल्पः कीर्तनादिसमर्थो वा । घोरया द्वेषिणांमेव घोरत्वेन प्रतीयमानया ॥ १९ ॥ वाक्यं प्रजाः सृजेति ॥ २० ॥ समुद्रमिति त्रिकम् । समुद्रात्किञ्चिन्न्यूनम् । उपोऽधिके च समुद्रसमीपे वा । महतां भक्तानाम् । सलिलाशया जलचराः ॥ २१ ॥ आकरमुत्पत्तिस्थानम् । नीलं च तद्रक्तं च तथाभूतं यदुत्पलमतो नीलकमलवाचीन्दीवरपदेन न पुनरुक्तिः । कारण्डवो वत्तरवभेदः ॥२२॥ अङ्घ्रिपा वृक्षाधिष्ठातृदेवताः । यत् रजः तत् विक्षिपता प्रसारयता पवनेन उत्सव आनन्दो यस्मिन् ॥२३॥ तत्र सरसि । अनु पश्चात् । अनुकूलं वा गान्धर्वं गानम् । मार्गैरालापमार्गैः । दिव्यमार्गा देवा वा ॥२४॥

तर्ह्येव सरसस्तस्मान्निष्क्रामन्तं सहानुगम्। उपगीयमानममरप्रवरं विबुधानुगैः ॥२५॥
तप्तहेमनिकायाभं शितिकण्ठं त्रिलोचनम्। प्रसादसुमुखं वीक्ष्य प्रणेमुर्जातकौतुकाः ॥२६॥
स तान् प्रपन्नार्तिहरो भगवान् धर्मवत्सलः। धर्मज्ञान् शीलसम्पन्नान् प्रीतः प्रीतानुवाच ह २७

श्रीरुद्र उवाच

यूयं वेदिषदः पुत्रा विदितं वश्चिकीर्षितम्। अनुग्रहाय भद्रं व एवं मे दर्शनं कृतम् ॥२८॥
यः परं रहसः साक्षात्त्रिगुणाज्जीवसंज्ञितात्। भगवन्तं वासुदेवं प्रपन्नः स प्रियो हि मे ॥२९॥
स्वधर्मनिष्ठः शतजन्मभिः पुमान् विरिञ्चतामेति ततः परं हि माम्।
अव्याकृतं भागवतोऽथ वैष्णवं पदं यथाहं विबुधाः कलात्यये ॥३०॥
अथ भागवता यूयं प्रियाः स्थ भगवान् यथा। न मद्भागवतानां च प्रेयानन्योऽस्ति कर्हिचित्३१
इदं विविक्तं जप्तव्यं पवित्रं मङ्गलं परम्। निःश्रेयसकरं चापि श्रूयतां तद्वदामि वः ॥३२॥

मैत्रेय उवाच

इत्यनुक्रोशहृदयो भगवानाह ताञ्छिवः। बद्धाञ्जलीन् राजपुत्रान्नारायणपरो वचः ॥३३॥

श्रीरुद्र उवाच

जितं त आत्मविद्धुर्य स्वस्तये स्वस्तिरस्तु मे। भवता राधसा राद्धं सर्वस्मा आत्मने नमः३४
नमः पङ्कजनाभाय भूतसूक्ष्मेन्द्रियात्मने। वासुदेवाय शान्ताय कूटस्थाय स्वरोचिषे ॥३५॥
संकर्षणाय सूक्ष्माय दुरन्तायान्तकाय च। नमो विश्वप्रबोधाय प्रद्युम्नायान्तरात्मने ॥३६॥
नमो नमोऽनिरुद्धाय हृषीकेशेन्द्रियात्मने। नमः परमहंसाय पूर्णाय निभृतात्मने ॥३७॥

तर्ह्येति युग्मकम्। तर्हि श्रवणोत्तरमेव। ते तं वीक्ष्य प्रणेमुः। जाताश्चर्याः सन्तः। निकायो राशिः। शितिर्नीलः ॥२५।२६॥ तान् प्रचेतसः। हेति सुस्पष्टम् ॥ २७ ॥ वेदिषदः बर्हिषदः। मे मया कृतं कारितम्। यद्वा। अनुग्रहार्थमागतस्य मे मम वो युष्माभिः दर्शनं कृतम् एतच्च भद्रमेव ॥ २८ ॥ त्रिगुणात्प्रधानात् जीवसंज्ञितात् पुरुषाच्च रहसः तत्त्वात्परं यः सः। 'रहस्तत्त्वे' इति मेदिनी। रंहस सानु स्वारपाठस्तु लेखकभ्रमात्। सूक्ष्मादिति श्रीधर्यामस्वारस्यादिति सन्दर्भः। तमस इति क्वचित् पाठो वा तत्र प्रकृतेरित्यर्थः ॥ २९ ॥ विरिञ्चतां ब्रह्मपदम्। मां श्रीरुद्रम्। न तु तीर्थोक्तं मां श्रियमिति प्रकरणविरोधात्[1]। भागवतस्तु अथ देहपातानन्तरमेव वैष्णवं पदमेति यथाऽहं रुद्रः अन्ये विबुधाश्च कलात्यये स्वस्वाधिकारान्ते एष्यन्ति तथेति संक्षेपः ॥३०॥ यथा भगवान् तथैव यूयमपि प्रियाः। तेषां च मत्तोऽन्यो न ।३१। विविक्तं परमात्मविवेचकम्। कर्तरि क्तः। इदं गीतम्। वो युष्मभ्यम् ।३२। अनुक्रोशः कृपा हृदये यस्य ॥३३॥ ते जितं जयेत्युच्चारणमपि आत्मारामाणां स्वस्तये भक्तिप्राप्तये अतो मे स्तोतुरपि सा स्वस्तिः अस्तु सु अस्तिः स्वस्तिः इक् श्तिपौ धातुनिर्देशे इति श्तिप्। यतो भवतैव हेतुभूतेन सर्वं जगत् राधसा राद्धम् ऐश्वर्यपूर्णं भवति अतः सर्वान्तर्यामिणे परमात्मने ते नमः ॥ ३४ ॥ भूतादीनि अतति सततं व्याप्य तिष्ठतीति वासुदेवाय चित्ताधिष्ठात्रे ॥ ३५ ॥ सङ्कर्षणाय अहङ्काराधिष्ठात्रे दुरन्ताय अनन्ताय। अन्तरात्मने बुद्ध्यधिष्ठात्रे ॥ ३६ ॥ हृषीकाणामीशं यदिन्द्रियं मनस्तस्याधिष्ठात्रे।

१—अत्र तीर्थेन यदुक्तं तदसार्वत्रिकत्वादचारुवद्भाति। इति वंशीधरी।

स्वर्गापवर्गद्वाराय नित्यं शुचिषदे नमः। नमो हिरण्यवीर्याय चातुर्होत्राय तन्तवे ॥३८॥
नम ऊर्ज इषे त्रय्याः पतये यज्ञरेतसे। तृप्तिदाय च जीवानां नमः सर्वरसात्मने ॥३९॥
सर्वसत्त्वात्मदेहाय विशेषाय स्थवीयसे। नमस्त्रैलोक्यपालाय सहओजोबलाय च ॥४०॥
अर्थलिङ्गाय नभसे नमोऽन्तर्बहिरात्मने। नमः पुण्याय लोकाय अमुष्मै भूरिवर्चसे ॥४१॥
प्रवृत्ताय निवृत्ताय पितृदेवाय कर्मणे। नमोऽधर्मविपाकाय मृत्यवे दुःखदाय च ॥४२॥
नमस्त आशिषामीश मनवे कारणात्मने। नमो धर्माय बृहते कृष्णायाकुण्ठमेधसे।
पुरुषाय पुराणाय सांख्ययोगेश्वराय च ॥ ४३ ॥
शक्तित्रयसमेताय मीढुषेऽहंकृतात्मने। चेतआकूतिरूपाय नमो वाचोविभूतये ॥४४॥
दर्शनं नो दिदृक्षूणां देहि भागवतार्चितम्। रूपं प्रियतमं स्वानां सर्वेन्द्रियगुणाञ्जनम् ॥४५॥
स्निग्धप्रावृड्घनश्यामं सर्वसौन्दर्यसंग्रहम्। चार्वायतचतुर्बाहुं सुजातरुचिराननम् ॥४६॥
पद्मकोशपलाशाक्षं सुन्दरभ्रु सुनासिकम्। सुद्विजं सुकपोलास्यं समकर्णविभूषणम् ॥४७॥
प्रीतिप्रहसितापाङ्गमलकैरुपशोभितम्। लसत्पङ्कजकिञ्जल्कदुकूलं मृष्टकुण्डलम् ॥४८॥
स्फुरत्किरीटवलयहारनूपुरमेखलम्। शङ्खचक्रगदापद्ममालामण्युत्तमर्द्धिमत् ॥४९॥
सिंहस्कन्धत्विषो बिभ्रत्सौभगग्रीवकौस्तुभम्। श्रियाऽनपायिन्याक्षिप्तनिकषाश्मोरसोल्लसत् ॥५०॥

हंसाय सूर्याय। नितरां भृता वृष्टयादिभिः पालिता आत्मानो जीवा येन।३७। शुचिषु योगिचित्तेषु सीदति तिष्ठतीति हंसविशेषणम्। चतुर्भिर्होतृभिः साध्याय तन्तवे तद्विस्तारकाय अग्निरूपाय च ते नमः ॥३८॥ ऊर्जे पित्रन्नदात्रे। इषे देवान्नदात्रे यज्ञरेतसे सोमरूपाय पतये हरये। सर्वरसात्मने जलरूपाय ॥३९॥ सर्वप्राणिनामात्मदा आश्रयप्रदा ईहा चेष्टा यस्य तस्मै। अतिस्थूलाय। विशेषाय पृथ्वीरूपाय। मनइन्द्रियदेहशक्तिप्रदाय। पालाय प्राणवायुस्वरूपाय च ते।४०। अर्थलिङ्गाय शब्दगुणकाय। आत्मने व्यवहारालम्बनाय। एवमुपासनया पुण्यलोकाय वैकुण्ठदात्रे अमुष्मै हरये ॥ ४१ ॥ धर्मान्तरस्यापि प्रयोजकत्वेन प्रणमति-पितृदेवप्रापकाय। विपाकः फलं यस्मात् ॥ ४२ ॥ नमस्ते इति सार्द्धकम् आशिषां धर्मादीनां कारणात्मने फलप्रकाशकाय मनुरूपाय। धर्ममूर्तये। ईश्वराय प्रवर्तकाय कपिलादिरूपेण ॥ ४३ ॥ शक्तित्रयं कर्तृकर्मकरण रूपम्। मीढुषे वरसेक्ते रुद्रमूर्तये ते। चेतो ज्ञानम् आकूतिः क्रियां तद्रूपाय ब्रह्मस्वरूपाय। वाचो वेदलक्षणाया विभूतिः विविधा सृष्टि र्यस्मात् ॥ ४४ ॥ दर्शनं देहि। कथम्। रूपं मङ्गलविग्रहं प्रदर्शयेति नवमेन संबन्धः। रूपं कीदृक्। सर्वेन्द्रियाणां स्वगुणैरञ्जनमाकर्षणं यत्र। इन्द्रियाणां वात्सल्यादिगुणानां चाभिव्यक्तिर्यत्रेति वा ॥ ४५ ॥ आयता लम्बाः। 'सुजातं कोमलं विदुः' इत्यभिधानम्।४६। पद्मकोशस्थे कोमले पलाशे इव अक्षिणी यत्र। द्विजा दन्ताः समकर्णयो विशिष्टानि कुण्डलादन्यान्यपि भूषणानि यत्र अतो वक्ष्यमाणकुण्डलपदेन न पुनरुक्तिः।४७। किञ्जल्कवत् केशरवत् दुकूलं पीताम्बरं यस्मिन्। मृष्टे निर्मले ॥ ४८ ॥ स्फुरन्ति किरीटादीनि यस्मिन्। उत्तमर्द्धिर्लक्ष्मीः। एतैः ऋद्धिः शोभा अस्ति अस्मिन्निति। 'ऋद्धिः शोभा रमौषधी इति निघण्टुः ॥ ४९ ॥ सिंहस्येव स्कन्धौ तयोस्त्विषः कुण्डलादिदीप्तीर्बिभ्रत् पृथक् विशेषणम्। सौभगः सुन्दरः ग्रीवया कौस्तुभो

पूररेचकसंविग्नवलिवल्गद्दलोदरम् । प्रतिसंक्रामयद्विश्वं नाभ्याऽऽवर्तगभीरया ॥५१॥
श्यामश्रोण्यधिरोचिष्णु दुकूलस्वर्णमेखलम् । समचार्वङ्घ्रिजङ्घोरुनिम्नजानुसुदर्शनम् ॥५२॥
पदा शरत्पद्मपलाशरोचिषा नखद्युभिर्नोऽन्तरघं विधुन्वता ।
प्रदर्शय स्वीयमपास्तसाध्वसं पदं गुरो मार्गगुरुस्तमोजुषाम् ॥ ५३ ॥
एतद्रूपमनुध्येयमात्मशुद्धिमभीप्सताम् । यद्भक्तियोगोऽभयदः स्वधर्ममनुतिष्ठताम् ॥५४॥
भवान् भक्तिमता लभ्यो दुर्लभः सर्वदेहिनाम् । स्वाराज्यस्याप्यभिमत एकान्तेनात्मविद्गतिः
तं दुराराध्यमाराध्य सतामपि दुरापया । एकान्तभक्त्या को वाञ्छेत्पादमूलं विना बहिः॥५६॥
यत्र निर्विष्टमरणं कृतान्तो नाभिमन्यते । विश्वं विध्वंसयन् वीर्यशौर्यविस्फूर्जितभ्रुवा ॥५७॥
क्षणार्धेनापि तुलये न स्वर्गं नापुनर्भवम् । भगवत्सङ्गिसङ्गस्य मर्त्यानां किमुताशिषः ॥५८॥
अथानघाङ्घ्रेस्तव कीर्तितीर्थयोरन्तर्बहिःस्नानविधूतपाप्मनाम् ।
भूतेष्वनुक्रोशसुसत्त्वशीलिनां स्यात्सङ्गमोऽनुग्रह एष नस्तव ॥५९॥
न यस्य चित्तं बहिरर्थविभ्रमं तमोगुहायां च विशुद्धमाविशत् ।
यद्भक्तियोगानुगृहीतमञ्जसा मुनिर्विचष्टे ननु तत्र ते गतिम् ॥६०॥

मणिः यस्मिन् । रेखारूपया श्रिया तिरस्कृतो निकषाश्मा स्वर्णघर्षणपाषाणो येन तादृशेनोरसा शोभमानम् ।५०। श्वासोच्छ्वासाभ्यां संविग्नाश्चालिता या वलयस्ताभिर्वल्गद्दलवत् अश्वत्थपत्रवत् उदरं यस्मिन् । दक्षिणावर्तेन निम्नया नाभ्या निर्गतं विश्वं पुनस्तयैव स्वस्मिन् प्रवेशयदिव स्वसौन्दर्येणाकर्षदिवेत्यर्थः । अत्र वल्गन्ति चलन्ति दलानि यस्येति वल्गद्दलशब्देनाश्वत्थो गृहीतः चलदलसमानार्थकत्वात् । 'बोधिद्रुमश्चलदलः ह्यश्वत्थः कुञ्जराशनः' इत्यमरोक्तेः लेखकभ्रमादेव स्वामिटीकायामन्यत्र च वल्गु सुन्दरमित्यङ्कितं तदचारु इति वंशीधरी ॥५१॥ श्यामनितम्बेन अधिकं रोचिष्णु यत्पीताम्बरं तत्र स्वर्णमयी मेखला यस्मिन् । निम्ने अनुन्नते ॥५२॥ हे गुरो पदं सर्वसुखस्थानं स्वकीयं रूपं प्रदर्शय । यतस्त्वमेव तमोजुषाम् अज्ञानिनां मार्गप्रदर्शको गुरुः । कीदृक् रूपम् । विधुन्वता दूरीकुर्वता पदैव दीपस्थानीयेन केवलमपास्तं भक्तानां भयं येन किमुतान्यावयवेन ॥ ५३ ॥ यत् यस्य रूपस्य ध्यानादिभजनयोग एव यतः सर्वाश्रमिणां मुक्तिदः ॥ ५४ ॥ स्वः स्वर्गे राज्यं यस्य तस्य इन्द्रादेरपि अभिमतः स्पृहणीयः न तु प्राप्यः किन्च एकान्तेन सर्वतो विरक्तत्वेन य आत्मवित् ज्ञानी तस्यापि गतिरूप एव न तु प्राप्तः लभ्यस्तु साक्षाद्भक्तिमतैवेति योजना । प्रशंसायां मतुप् ॥५५॥ य एवंभूतस्तं भक्त्या आराध्य बहिर्नश्वरं विषयसुखं को वाञ्छेत् न कोऽपि । सतां ज्ञानिनामपि ॥५६॥ यत्र पादमूले अरणं निर्विष्टं शरणं प्रविष्टं जनं कालो न वशीकरोति तं पादमूलमिति योजना । वीर्यं प्रभावः शौर्यमुत्साहस्ताभ्यां क्षुभितया भ्रुवा ॥५७॥ भगवत्सङ्गस्य क्षणार्द्धेन मोक्षमपि न किमुत आशिषो राज्याद्याः सम्पदः ॥ ५८ ॥

अथ अतः भक्तानां सङ्गम एष एव तवानुग्रहः । कथंभूतानाम् । अनुक्रोशः कृपा सुसत्त्वं शुद्धान्तःकरणं शीलमार्जवादि च विद्यते येषाम् । पुनः । अनघौ पापनिवर्तकौ अङ्घ्री यस्य तस्य तव चरितगङ्गयोः क्रमेण ॥५९॥ यत् यदा सत्सङ्गमः तदैव भक्तियोगेनाकृष्टमत एव विशुद्धं सत् यस्य चित्तं कथाश्रवणादिकाले बाह्यार्थविक्षिप्त न भवति न च निद्रारूपगुहायामाविशति तत्र तदैव स मुनिः ते गतिं तत्त्वं स्वरूपं

यत्रेदं व्यज्यते विश्वं विश्वस्मिन्नवभाति यत् । तत् त्वं ब्रह्म परं ज्योतिराकाशमिव विस्तृतम्॥६१॥

यो माययेदं पुरुरूपयाऽसृजद्बिभर्ति भूयः क्षपयत्यविक्रियः ।
यद्भेदबुद्धिः सदिवात्मदुःस्थया तमात्मतन्त्रं भगवन् प्रतीमहि ॥६२॥

क्रियाकलापैरिदमेव योगिनः श्रद्धान्विताः साधु यजन्ति सिद्धये ।
भूतेन्द्रियान्तःकरणोपलक्षितं वेदे च तन्त्रे च त एव कोविदाः ॥६३॥

त्वमेक आद्यः पुरुषः सुप्तशक्तिस्तया रजःसत्त्वतमो विभिद्यते ।
महानहं खं मरुदग्निवार्धराः सुरर्षयो भूतगणा इदं यतः ॥६४॥

सृष्टं स्वशक्त्येदमनुप्रविष्टश्चतुर्विधं पुरमात्मांशकेन ।
अथो विदुस्तं पुरुषं सन्तमन्तर्भुङ्क्ते हृषीकैर्मधु सारघं यः ॥६५॥

स एष लोकानतिचण्डवेगो विकर्षसि त्वं खलु कालयानः ।
भूतानि भूतैरनुमेयतत्त्वो घनावलीर्वायुरिवाविषह्यः ॥६६॥

प्रमत्तमुच्चैरितिकृत्यचिन्तया प्रवृद्धलोभं विषयेषु लालसम् ।
त्वमप्रमत्तः सहसाऽभिपद्यसे क्षुल्लेलिहानोऽहिरिवाखुमन्तकः ॥६७॥

कस्त्वत्पदाब्जं विजहाति पण्डितो यस्तेऽवमानव्ययमानकेतनः ।
विशङ्कयाऽस्मद्गुरुरर्चति स्म यद्विनोपपत्तिं मनवश्चतुर्दश ॥६८॥

साक्षात्पश्यति नान्यथेत्यन्वयः । यद्वा । यत् यदा अर्थविभ्रमं विक्षिप्तं विषयासक्तं न भवति । तमोगुहायामाविशत् लयं प्राप्तं न भवति कार्याक्षमं च न भवति इति विशेषणद्वयेन विक्षेपलयाभावात् सत्त्वस्थे मनसि अञ्जसा अनायासेन विचष्टे इत्यर्थः ॥ ६० ॥ तत्त्वमाह यत्र व्यज्यते व्यक्तं भवति तन्तुषु पट व विश्वस्मिन् यव पटे तन्तुवत् तत् परं तत्त्वं ब्रह्म श्रीकृष्णरूपं त्वमेवासि ॥ ६१ ॥ यत् यया सदिव सत्येव भेदबुद्धिर्भवति तया बहुरूपया मायया य इदं विश्वमसृजत् तं त्वां स्वतन्त्रं कदा हे भगवन् प्रतीमहि प्रपद्येमहि । आत्मसु जीवेषु दुःखरूपेण स्थितया । सदिति सामान्ये नपुंसकम् ॥ ६२ ॥ सिद्धये मुक्तये जगत्कर्तृ साधु इदं श्रीकृष्णरूपमेव ये यजन्ति ते एव स्वर्गकामो यजेदित्यादिवेदे सांख्यादितन्त्रे च कोविदाः तत्तात्पर्यज्ञा नान्ये अचेतनभूतादीनामस्ति कश्चिच्चेतयितेति तर्केण उपसमीपे हृद्येव लक्षितम् ॥६३॥ प्रलये सुप्तशक्तिः पुनः सृष्टौ प्रबुद्धया तया शक्त्या रज आदि पृथक् भवति ततो महदादयो विभिद्यन्ते एवं क्रमेण सर्वमिदं जगत् यतो भवति स त्वमेक एवाराध्य इत्यन्वयः । अहम् अहङ्कारः ॥६४॥ जरायुजादिभेदेन चतुर्विधं प्रकृत्या सृष्टमिदं पुरम् आत्मना नियन्तृरूपेण अंशकेन जीवरूपेण च त्वं प्रविष्टोऽसि । अथो अतः पुरस्यान्तः सन्तं त्वां पुरुषमीश्वरं वन्धनिवर्तकतया विदुः । यश्च हृषीकैरिन्द्रियैः मध्विव क्षुल्लकं कर्मफलं भुङ्क्ते तं पुरुषं जीवं च बद्धतया विदुः । सरघाभिर्मधुमक्षिकाभिः कृतं संचितम् ॥६५॥ यः स्वशक्त्येदं सृष्टवान् स एष त्वं लोकान् भोगस्थान्यपि चालयन् भूतैर्यमादिभिः भूतानि विकर्षसि संहरसि । अनुमेयतत्त्वः अलक्ष्यस्वरूपः ॥६६॥ प्रमत्तं जनम् अप्रमत्तस्त्वमन्तक सन् सहसा आक्रामसि यथा लेलिहानः जिह्वया ओष्ठप्रान्तौ स्पृशन् अहिर्मूषकम् । कया प्रमत्तम् । इदं कृतम् इदं करिष्ये इति उच्चैरनन्तया चिन्तया ॥६७॥ यः सः कः विजहाति न कोऽपि अत एव अस्मद्गुरुः

अथ त्वमसि नो ब्रह्मन् परमात्मन् विपश्चिताम् । विश्वं रुद्रभयध्वस्तमकुतश्चिद्भया गतिः॥६९॥
इदं जपत भद्रं वो विशुद्धा नृपनन्दनाः । स्वधर्ममनुतिष्ठन्तो भगवत्यर्पिताशयाः ॥७०॥
तमेवात्मानमात्मस्थं सर्वभूतेष्ववस्थितम् । पूजयध्वं गृणन्तश्च ध्यायन्तश्चासकृद्धरिम् ॥७१॥
योगादेशमुपासाद्य धारयन्तो मुनिव्रताः । समाहितधियः सर्व एतदभ्यसतादृताः ॥७२॥
इदमाह पुराऽस्माकं भगवान् विश्वसृक्पतिः । भृग्वादीनामात्मजानां सिसृक्षुः संसिसृक्षताम्॥७३॥
ते वयं नोदिताः सर्वे प्रजासर्गे प्रजेश्वराः । अनेन ध्वस्ततमसः सिसृक्ष्मो विविधाः प्रजाः॥७४॥
अथेदं नित्यदा युक्तो जपन्नवहितः पुमान् । अचिराच्छ्रेय आप्नोति वासुदेवपरायणः ॥७५॥
श्रेयसामिह सर्वेषां ज्ञानं निःश्रेयसं परम् । सुखं तरति दुष्पारं ज्ञाननौर्व्यसनार्णवम् ॥७६॥
य इमं श्रद्धया युक्तो मद्गीतं भगवत्स्तवम् । अधीयानो दुराराध्यं हरिमाराधयत्यसौ ॥७७॥
विन्दते पुरुषोऽमुष्माद्यद्यदिच्छत्यसत्वरन् । मद्गीतगीतात्सुप्रीताच्छ्रेयसामेकवल्लभात् ॥७८॥
इदं यः कल्य उत्थाय प्राञ्जलिः श्रद्धयान्वितः । शृणुयाच्छ्रावयेन्मर्त्यो मुच्यते कर्मबन्धनैः॥७९॥

गीतं मयेदं नरदेवनन्दनाः परस्य पुंसः परमात्मनः स्तवम् ।
जपन्त एकाग्रधियस्तपो महत् चरध्वमन्ते तत आप्स्यथेप्सितम् ॥८०॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां चतुर्थस्कन्धे रुद्रगीतं नाम चतुर्विंशोऽध्यायः ॥२४॥

पितां ब्रह्मापि मनश्च नाशशङ्कया यत्पदाब्जमर्चन्ति । स्म कालत्रितयेपि उपपत्तिं तर्कं बिना दृढविश्वासेनेत्यर्थः । अवमानः अनादरस्तेन व्ययं प्राप्नुवत् । अय् गतौ । केतनं शरीरं यस्य । गुरुरिति जनकत्वात् उपदेष्टृत्वाच्च ॥६८॥ विश्वं सर्वमपि त्रस्तम् । अथ अतो विपश्चितामेतज्जानताम् भक्तानां त्वमेव गतिः रक्षकोऽसि । रोदयतीति रुद्रः कालो वा ॥ ६९ ॥ विशुद्धा देवतान्तरानिन्दकाः सन्तः ॥ ७० ॥ गृणन्तः स्तुवन्तः ॥७१॥ योगो भगवत्प्राप्त्युपाय आदिश्यते उपदिश्यतेऽस्मिन्नित्येतन्नामकं स्तोत्रम् । उपासाद्य कण्ठीकृत्य । अभ्यसत जपत ॥७२॥ सिसृक्षुः पतिः ब्रह्मा सिसृक्षताम् अस्माकम् अस्मान् आह ॥ ७३ ॥ सिसृक्ष्मः सृष्टवन्तो वयम् ॥ ७४ ॥ अथ अतः ॥ ७५ ॥ ज्ञानमत्र भागवतमेव प्रस्तुतत्वात् । व्यसनार्णवं संसारसमुद्रम् ॥ ७६ ॥ यो अधीयानो भवति सोऽसौ हरिमाराधयति वशीकरोति ॥ ७७ ॥ यद् गीतं स्तोत्रं तेन गीतात् स्तुतात् अमुष्मात् हरेः सकाशात् तत्तत् विन्दते । असत्वरन्[1] त्वरामकुर्वन् । श्रेयसां सर्वफलानामेकवल्लभः मुख्यपतिः दाता तस्मात् ॥ ७८ ॥ यः कल्ये प्रभाते स मुच्यते ॥७९॥ परमात्मनो हरेः । चरध्वं कुरुध्वम् । तपसोऽन्ते । ततः हरेः सकाशात् । ईप्सितम् अभीष्टं प्राप्स्यथ ॥ ८० ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे गूढार्थदीपिन्यां चतुर्विंशोऽध्यायः ।

१– त्वरया सह वर्तते इति सत्वरः तमिवाचरतीति सत्वरति सत्वरतीति सत्वरन् न सत्वरन् असत्वरन् । आचारक्विबन्तात् शतृप्रत्यये ततो नञ्समासे च रूपमिदं सिध्यति ।

अथ पञ्चविंशोऽध्यायः

मैत्रेय उवाच

इति संदिश्य भगवान् बार्हिषदैरभिपूजितः । पश्यतां राजपुत्राणां तत्रैवान्तर्दधे हरः ॥ १ ॥
रुद्रगीतं भगवतः स्तोत्रं सर्वे प्रचेतसः । जपन्तस्ते तपस्तेपुर्वर्षाणामयुतं जले ॥ २ ॥
प्राचीनबर्हिषं क्षत्तः कर्मस्वासक्तमानसम् । नारदोऽध्यात्मतत्त्वज्ञःकृपालुः प्रत्यबोधयत् ॥ ३ ॥
श्रेयस्त्वं कतमद्राजन् कर्मणाऽऽत्मन ईहसे । दुःखहानिः सुखावाप्तिः श्रेयस्तन्नेह चेष्यते ॥ ४ ॥

राजो उवाच

न जानामि महाभाग परं कर्मापविद्धधीः । ब्रूहि मे विमलं ज्ञानं येन मुच्येय कर्मभिः ॥ ५ ॥
गृहेषु कूटधर्मेषु पुत्रदारधनार्थधीः । न परं विदन्ते मूढो भ्राम्यन् संसारवर्त्मसु ॥ ६ ॥

नारद उवाच

भो भोः प्रजापते राजन् पशून पश्य त्वयाध्वरे। संज्ञापिताञ्जीवसङ्घान्निर्घृणेन सहस्रशः॥ ७ ॥
एते त्वां सम्प्रतीक्षन्ते स्मरन्तो वैशसं तव । सम्परेतमयःकूटैश्छिन्दन्त्युत्थितमन्यवः ॥ ८ ॥
अत्र ते कथयिष्येऽमुमितिहासं पुरातनम् । पुरञ्जनस्य चरितं निबोध गदतो मम ॥ ९ ॥
आसीत्पुरञ्जनो नाम राजा राजन् बृहच्छ्रवाः । तस्याऽविज्ञातनामाऽऽसीत्सखाऽविज्ञातचेष्टितः१०
सोऽन्वेषमाणः शरणं बभ्राम पृथिवीं प्रभुः । नानुरूपं यदाविन्ददभूत्स विमना इव ॥११॥

पञ्चविंशे मुनिः प्राह कूटं प्राचीनबर्हिषे ।
जीवो बुद्धिस्त्रिया रेमे नवद्वारे पुरञ्जनः ॥ १ ॥

संदिश्य उपदिश्य । बार्हिषदैः प्रचेतोभिः ॥१॥ अयुतं दशसाहस्रम् । तेपुः चक्रुः । पाकं पचतीतिवन्निर्देशः ॥ २ ॥ हे क्षत्तः विदुर ! कृपालुरिति ध्रुववंशजत्वात् ॥ ३ ॥ यज्ञकर्मणा त्वं किमात्मकं श्रेयः फलमिच्छसि । इति श्रेयश्चेत्तर्हि इह कर्मणि तदुभयमपि न लक्ष्यते ॥४॥ परं श्रेयो मोक्षाख्यम् । अपविद्धा विमोहिता ॥ ५ ॥ गृहेषु स्थितः पुत्रादिषु सत्यबुद्धिः अत एव वर्त्मसु नानायोनिषु भ्राम्यन् परं मोक्षोपायं नेत्यन्वयः । कूटाः कपटपूर्णाः ॥ ६ ॥ निर्घृणेन निर्दयेन त्वया संज्ञापितान् मारितान् पशुरूपान् ॥७॥ सम्प्रतीक्षन्ते कदाऽयं मरिष्यतीति तव वैशसं त्वत्कृतां पीडाम् । मृतं त्वां लोहमयैः शृङ्गैः छेत्स्यन्ति । छटा अविलम्वत एव ॥ ८ ॥ ते तुभ्यम् । पुरं शरीरमतति सततं विषयीकृत्य वर्तते इति पुरातनम् अध्यात्मविषयम् अन्यथा 'इतिहासः पुरावृत्तः' इत्यमरात् पुनरुक्तिः स्यात् । मम मत्तः निबोध शृणु ॥ ९ ॥ श्रवो यशः । चेष्टितं नीतिविषयकम् गुप्तकूटनीतिः । अध्यात्मपक्षे कर्मणा तत्फलं भोक्तुं पुरं जनयतीति मायायां राजमानो जीवः । अकारो वासुदेव इति विज्ञातनामा प्रसिद्धनामा ॥ १० ॥ अत्र रूपके जीवो राजत्वेन शरीरं पुरत्वेन परमात्मा सखित्वेन बुद्धिर्भार्यात्वेन च निरूप्यते इत्यनुसन्धेयम् । स पुरञ्जनो राजा जीवश्च । शरणं रक्षागृहं दुर्गम् । पक्षे देहम् । अनुरूपं भोगयोग्यम् ।११।

न साधु मेने ताः सर्वा भूतले यावतीः पुरः । कामान् कामयमानोऽसौ तस्य तस्योपपत्तये ॥१२॥
स एकदा हिमवतो दक्षिणेष्वथ सानुषु । ददर्श नवभिर्द्वार्भिः पुरं लक्षितलक्षणाम् ॥१३॥
प्रकारोपवनाट्टालपरिखैरक्षतोरणैः । स्वर्णरौप्यायसैः शृङ्गैः संकुलां सर्वतो गृहैः ॥१४॥
नीलस्फटिकवैदूर्यमुक्तामरकतारुणैः । क्लृप्तहर्म्यस्थलीं दीप्तां श्रिया भोगवतीमिव ॥१५॥
सभाचत्वररथ्याभिराक्रीडायतनापणैः । चैत्यध्वजपताकाभिर्युक्तां विद्रुमवेदिभिः ॥१६॥
पुर्यास्तु बाह्योपवने दिव्यद्रुमलताकुले । नदद्विहङ्गालिकुलकोलाहलजलाशये ॥१७॥
हिमनिर्झरविप्रुष्मत्कुसुमाकरवायुना । चलत्प्रवालविटपनलिनीतटसम्पदि ॥१८॥
नानारण्यमृगव्रातैरनाबाधे मुनिव्रतैः । आहूतं मन्यते पान्थो यत्र कोकिलकूजितैः ॥१९॥
यदृच्छयाऽऽगतां तत्र ददर्श प्रमदोत्तमाम् । भृत्यैर्दशभिरायान्तीमेकैकशतनायकैः ॥२०॥
पञ्चशीर्षाहिना गुप्तां प्रतीहारेण सर्वतः । अन्वेषमाणामृषभमप्रौढां कामरूपिणीम् ॥२१॥
सुनासां सुदतीं बालां सुकपोलां वराननाम् । समविन्यस्तकर्णाभ्यां बिभ्रतीं कुण्डलश्रियम् ॥२२॥

पक्षे यावत्यः पुरः गवादिशरीराणि । तस्य तस्य विषयस्य प्राप्तये ॥ १२ ॥ पक्षे । एकदा पुण्योदयकाले । दक्षिणसानुषु भारतभूप्रदेशेषु । नवभिः इन्द्रियच्छिद्रैः । लक्षणानि अन्धपङ्गुत्वादिरहितानि । पुरं मनुष्यदेहरूपाम् । ददर्श दृष्ट्वा च प्राविशदित्यध्याहार्यम् ॥ १३ ॥ अक्षैर्गवाक्षैः । तोरणैः बहिर्द्वारैः परितः खातनदी । पक्षे प्राकारास्त्वचः । उपवनानि बहिर्विषयाः । अट्टालो मुखम् उच्चशिरोनासादिमत्त्वात् । परिखा गुणाः । अक्षा रोमरन्ध्राणि । तोरणानि नेत्रादिद्वाराणि स्वर्णाद्यैः शृङ्गैः पित्तकफवातैः धातुभिः । राजससात्त्विकतामसैः स्वभावैर्वा गृहैः आधारादिचक्रैः व्याप्ताम् ॥ १४ ॥ अरुणं माणिक्यम् । नीलादिरत्नैः क्लृप्ता रचिता हर्म्यस्थल्यः चित्रिता आकर्षकभूमयो यस्याम् । हरति मन इति हर्म्या । भोगवती नागपुरीम् । पक्षे । नीलादिनानावर्णाभिर्नाडीभिः क्लृप्ताः हर्म्यस्थल्यो हृदयादिस्थानानि । भोगा सन्ति अस्यामिति ॥ १५ ॥ रथ्या रथयोग्यमार्गः । चैत्यं विश्रामस्थानम् । पक्षे । सभा हृदयम् । चत्वरं चतुष्पथं तच्चात्र तालवधः स्थलं तत्रैव मुखनासिकानयनकर्णमार्गाश्चत्वारः । रथ्याः राजमार्गाः इडापिङ्गलासुषुम्णाः । आयतनानि इन्द्रियगोलकाः । आपणो मनोगोलकः । चैत्यं चित्तमध्यम् । ध्वजे भगवद्वैमुख्यरूपे संयुक्ताः पताकाः पञ्च क्लेशाः । वेदयः चक्रमध्यस्थलानि अधरा वा ।१६। पुर्या इति चतुष्कम् । कोलाहलो यत्र ते जलाशया यस्मिन् । हिमनिर्झराणां विप्रुष्मता विन्दुयुक्तेन वसन्तसंबन्धि वायुना चलत्पत्रशाखैर्वृक्षैः सरसीतटेषु संपत् शोभाधिक्यं यस्मिन् । मुनिव्रतैरहिंस्रैः । पक्षे । पुर्या देहस्य बाह्यविषयवर्गे प्रमदोत्तमावत् जीवमोहिनीं वैषयिकीं बुद्धिं ददर्श । दिव्येति रूपवैचित्र्यम् । नददिति शब्दवैचित्र्यम् । हिमेति रसः । कुसुमेति गन्धः । वायुनेति स्पर्शः चलदिति कामोद्गमः । आहूतमित्याकर्षणम् । कूजितैः कीर्तिभिः । पान्थः पुरञ्जनो जीवश्च ॥ १७।१८।१९ ॥

दृष्ट्वा च तामाहेत्यन्वयः । कीदृशीम् । पक्षे । दशभिः ज्ञानकर्मेन्द्रियैः । प्रत्येकं शतमनन्ता नायिका वृत्तयो येषाम् ॥ २० ॥ अहिरूपेण द्वारपालेन । पक्षे पञ्चवृत्तिप्राणेन । ऋषभं पतिं जीवं च । अप्रौढां षोडशवार्षिकीं वैषयिकीबुद्धिम् । कामेति नानाशृङ्गारधारिणीं नानावासनावती च ॥ २१ ॥ पक्षे उन्नताऽभिमानलक्षणा नासिका । उपर्यधो मानापमानादयो दन्ताः । बालां सुकुमारवृत्तिम् । सुकपोलां

पिशङ्गनीवीं सुश्रोणीं श्यामां कनकमेखलाम् । पद्भ्यां क्वणद्भ्यां चलतीं नूपुरैर्देवतामिव २३
स्तनौ व्यञ्जितकैशोरौ समवृत्तौ निरन्तरौ । वस्त्रान्तेन निगूहन्तीं व्रीडया गजगामिनीम् ।२४।
तामाह ललितं वीरः सव्रीडस्मितशोभनाम् । स्निग्धेनापाङ्गपुङ्खेन स्पृष्टः प्रेमोद्भ्रमद्भ्रुवा।२५।
का त्वं कञ्जपलाशाक्षि कस्यासीह कुतः सति। इमामुपपुरीं भीरु किं चिकीर्षसि शंस मे।।२६।।
क एतेऽनुपथा ये त एकादश महाभटाः । एता वा ललनाः सुभ्रु कोऽयं तेऽहिः पुरःसरः ।।२७।।

त्वं ह्रीर्भवान्यस्यथ वाग्रमापतिं विचिन्वती किं मुनिवद्रहो वने ।
त्वदङ्घ्रिकामाप्तसमस्तकामं क्व पद्मकोशः पतितः कराग्रात् ।। २८ ।।
नासां वरोर्वन्यतमा भुविस्पृक् पुरीमिमां वीरवरेण साकम् ।
अर्हस्यलंकर्तुमदभ्रकर्मणा लोकं परं श्रीरिव यज्ञपुंसा ।। २९ ।।
यदेष तेऽपाङ्गविखण्डितेन्द्रियं सव्रीडभावस्मितविभ्रमद्भ्रुवा ।
अथोपसृष्टो भगवान् मनोभवः प्रबाधते ऽमानुगृहाण शोभने ।। ३० ।।

सर्वाकर्षणरूपाम् । बाह्याभ्यन्तरवृत्तिभ्यां वरमाननं चेष्टा यस्याः । कर्णाभ्यां सङ्कल्पविकल्परूपमनोभ्यां श्रियं विषयेषु परिवर्तनश्रियं प्रवृत्तिनिवृत्तिशास्त्रार्थं वा ॥ २२ ।। पिशङ्गेति राजसकर्मावृताम् सुश्रोणीं सुष्ठुतया विषयोपरक्ताम् । श्यामां तमोगुणप्रचुराम् । रजोगुणलक्षणसुवर्णकाञ्चीम् । पद्भ्यां रजस्तमोविकृतवृत्तिरूपाभ्यां नूपुरैः शिशुकलभाषणैः । चलतीमिति वृद्धेरस्थैर्यम् ॥ २३ ॥ स्तनौ रागद्वेषौ कैशोरं यौवनोपक्रमः । वृद्धस्यापि तौ नित्यतरुणौ । वृत्तौ वर्तुलौ । पक्षे । समं वृत्तं पुम्मात्रमोहनं ययोः । निरन्तरौ संश्लिष्टौ । पक्षे । उभयोरैक्यान्निर्भेदौ । वस्त्रान्तौ विनयः । लोकेऽपि रागद्वेषौ ह्रीविनयाभ्यां निगूह्येते एव । अहङ्कारेण गजवत् शनैः शनैः मूलाधारादायान्तीं वुद्धिम् ।।२४।। प्रेम्णा उच्चैर्भ्रमन्ती भ्रूः धनुःस्थानीया यस्मिन् तेन । अपाङ्ग एव पुंखो मूलप्रान्तो यस्य तेन कटाक्षरूपेण वाणेन विद्धः । पक्षे भोगोत्साहवत्त्वात् वीरः । शोभनामित्यनेन स्वकार्याभिमुखीम् । प्रेमादित्वासितेनैव मनोवाणेन विद्धः ॥ २५ ।। यद्यपि बुद्ध्यादिभिः सहैव जीवस्थितिस्तथापि ते अनुरागेण तामपरिचिन्वन्निव पृच्छति । इमां पुरीम् उप समीपे ।। २६ ॥ मनसा सह इन्द्रियाण्यालक्ष्य एकादशेति । तद्वृत्तीरालक्ष्य ललना इति । लल् विलासे । प्राणमालक्ष्य अहिरिति ।। २७ ।। पतिं धर्मं शिवं ब्रह्माणं विष्णुम् इति क्रमेण योज्यम् । यदि रमाऽसि तर्हि क्व । पक्षे । लज्जावृत्तिविशिष्टत्वात् ह्रीः । सङ्कल्पवृत्त्या भवानी । वचनवृत्त्या वाक् । रमणवृत्त्या रमा । पतिं देहस्वामिनम् । वने देहलक्षणे वासनावने । मुनिवत् मनोवत् । त्वदङ्घ्रिणा गत्या । 'अघिरघिलघि गत्यर्थाः' । पद्मकोशः कन्दुकलक्षणं मनः कराग्रात् वृत्तिविशेषात् पतितो गतः क्व कां वृत्तिमुपगतः ।। २८ ॥ यतो भुविस्पृक् । नहि देवता भुवं स्पृशन्ति । पक्षे यदि त्वं ह्रीप्रभृतिवृत्तिविशेषाणामन्यतमा वृत्तिविशिष्टा नासि किन्तु स्थिरवृत्तिविशिष्टा असि । भुवि सत्कर्मणि स्पृक् आशावती । तर्हि अदभ्रकर्मणा महापराक्रमवता मया सह इमां पुरीं देहलक्षणाम् अलङ्कर्तुमर्हसि । यज्ञपुंसा विष्णुना परं वैकुण्ठमिव ।।२९।। यत् यस्मात् एष मनोभवः प्रबाधते अथ अतः मा मामनुगृहाण । भ्रुवा उपसृष्टः प्रेरितः । ते अथ मा इति स्वामिसम्मतपाठा इति सन्दर्भः । पक्षे । अपाङ्गेन शरीररहितेनापि विखण्डितज्ञानचक्षुषम् । उप अधिक्येन निर्मितः मनोभवः विषयवासनासमूहः । अनुगृहाण त्वदीयान् शब्दस्पर्शादीन्

तदाननं सुभ्रु सुतारलोचनं व्यालम्बिनीलालकवृन्दसंवृतम् ।
उन्नीय मे दर्शय वल्गुवाचकं यद्व्रीडया नाभिमुखं शुचिस्मिते ।। ३१ ।।

नारद उवाच

इत्थं पुरञ्जनं नारी याचमानमधीरवत् । अभ्यनन्दत तं वीरं हसन्ती वीर मोहिता ।।३२।।
न विदाम वयं सम्यक्कर्तारं पुरुषर्षभ । आत्मनश्च परस्यापि गोत्रं नाम च यत्कृतम् ।।३३।।
इहाद्य सन्तमात्मानं विदाम न ततः परम् । येनेयं निर्मिता वीर पुरी शरणमात्मनः ।।३४।।
एते सखायः सख्यो मे नरा नार्यश्च मानद । सुप्तायां मयि जागर्ति नागोऽयं पालयन् पुरीम् ३५
दिष्ट्याऽऽगतोऽसि भद्रं ते ग्राम्यान् कामानभीप्ससे । उद्वहिष्यामि तांस्तेऽहं स्वबन्धुभिररिंदम ३६
इमां त्वमधितिष्ठस्व पुरीं नवमुखीं विभो । मयोपनीतान् गृह्णानः कामभोगान् शतं समाः ।।३७
कं नु त्वदन्यं रमये ह्यरतिज्ञमकोविदम् । असम्परायाभिमुखमश्वस्तनविदं पशुम् ।।३८।।
धर्मो ह्यत्रार्थकामौ च प्रजानन्दोऽमृतं यशः । लोका विशोका विरजा यान्न केवलिनो विदुः ।।३९
पितृदेवर्षिमर्त्यानां भूतानामात्मनश्च ह । क्षेम्यं वदन्ति शरणं भवेऽस्मिन् यद्गृहाश्रमः ।।४०।।
का नाम वीर विख्यातं वदान्यं प्रियदर्शनम् । न वृणीत प्रियं प्राप्तं मादृशी त्वादृशं पतिम् ।।४१।

भोजये उपभोक्तुं लभेयेत्यर्थः ।।३०।। यद्व्रीडया संमुखं न भवति तदाननम् उन्नीय मह्यं दर्शयेत्यन्वयः । शोभिनतारायुक्ते लोचने यत्र । पक्षे । आननं चेष्टाविशेषणम् । सुष्ठु शोभना भ्रूः भ्रमणशीला विषयेषु यस्य । सुतमुत्पन्नमरं शीघ्रम् आलोचनात्मकं बाह्यज्ञानं यस्मात् । तर्हि किमिति न प्रकाशते । चञ्चलानां नीलालकोपमवर्णानां तामसवृत्तिविशेषाणां वृन्देन गूढम् । अतस्ता उन्नीय पृथक्कृत्य दर्शय । वल्गु सुन्दर वाचकं वाक्यं यस्यिन् । शुचिषु भक्तेषु स्मितं यस्याः ।। ३१ ।। पक्षे । नारी वैषयिको बुद्धिः । मोहिता । यथा विषयमाधुर्यैस्तया जीवोऽनुरंजितः एवं चिन्माधुर्यैः जीवेनापि सा अनुरंजिता । हे वीर ! अभ्यनन्दत पतित्वेन स्वीचकार ।।३२।। आत्मनो मम परस्य सहचरादेरपि कर्तारं यत्कृतं गोत्रादि तं च न विद्मः । कस्याश्चिदप्सरसः कन्यात्वात् । पक्षे । या जीवज्ञानमावृणोति सा ईश्वरं जानामीति कथं वक्तुमुत्सहेत ।। ३३ ।। इह पुर्याम् । अद्य अधुना आत्मानमेव विद्मः न परं येन आत्मनो मम शरणं निवासयोग्या पुरी निर्मिता तम् ।। ३४ ।। सखाय इन्द्रियाणि । सख्यस्तद्वृत्तयः । नागः प्राणः ।। ३५ ।। पक्षे दिष्टया भाग्येन आगतः मनुष्यदेहं प्राप्तोऽसि । यान् इन्द्रियग्रामार्हान् भोगान् तान् सम्पादयिष्यामि स्वबन्धुभिरिन्द्रियैः ।। ३६ ।। उपनीतान् प्रापितान् ।।३७।। त्वत्तोऽन्यं कं नु विरक्तं रमये न कमपि। कथंभूतम् । सम्पराये स्त्रिया युद्धे नाभिमुखम् श्वोभवमुत्तरोत्तरसुखं न वेत्तीति अत एव पशुतुल्यम् । पक्षे । प्रवृत्तिस्वभावत्वान्निवृत्तिमार्गनिन्देवोचिता ।।३८।। अत्र गार्हस्थ्ये । प्रजानन्दः पुत्रसुखम् । अमृतं मोक्षः केवलिनो विरक्ताः ।। ३९ ।। यत् क्षेम्यं मोक्षयोग्यं शरणमाश्रयं वदन्ति स गृहाश्रमः ।। ४० ।। मादृशी वैषयिकी बुद्धिः त्वादृशं विषयिणं पतिं जीवम् । वदान्यं रत्युदारम् ।। ४१ ।।

कस्या मनस्ते भुवि भोगिभोगयोः स्त्रिया न सज्जेद्भुजयोर्महाभुज ।
योऽनाथवर्गाधिमलं घृणोद्धतस्मितावलोकेन चरत्यपोहितुम् ॥ ४२ ॥

नारद उवाच

इति तौ दम्पती तत्र समुद्य समयं मिथः । तां प्रविश्य पुरीं राजन् मुमुदाते शमं समाः ॥४३॥
उपगीयमानो ललितं तत्र तत्र च गायकैः । क्रीडन् परिवृतः स्त्रीभिर्ह्रदिनीमाविशच्छुचौ ॥४४॥
सप्तोपरि कृता द्वारः पुरस्तस्यास्तु द्वे अधः । पृथग्विषयगत्यर्थं तस्यां यः कश्चनेश्वरः ॥४५॥
पञ्च द्वारस्तु पौरस्त्या दक्षिणैका तथोत्तरा । पश्चिमे द्वे अमूषां ते नामानि नृप वर्णये ॥४६॥
खद्योताऽऽविर्मुखी च प्राग्द्वारावेकत्र निर्मिते । विभ्राजितं जनपदं याति ताभ्यां द्युमत्सखः ॥४७॥
नलिनी नालिनी च प्राग्द्वारावेकत्र निर्मिते । अवधूतसखस्ताभ्यां विषयं याति सौरभम् ॥४८॥
मुख्या नाम पुरस्ताद् द्वास्तयाऽऽपणबहूदनौ । विषयौ याति पुरराड्रसज्ञविपणान्वितः ॥४९॥
पितृहूर्नृप पुर्या द्वार्दक्षिणेन पुरञ्जनः । राष्ट्रं दक्षिणपञ्चालं याति श्रुतधरान्वितः ॥५०॥

भोगिभोगयोः सर्पदेहाकारयोः । न सज्जेत् नासक्तं भवेत् । यो भवान् अनाथवर्गस्य अस्मदादेः आधिं मनोदुःखम् अलमपोहितुम् अत्यन्तं दूरीकर्तुम् विचरति । घृणा दया । पक्षे चैतन्येनैव बुद्ध्यादयः सनाथा भवन्तीत्युक्तम् ॥ ४२ ॥ दम्पती बुद्धिजीवौ । तत्र विषयोपवने । समयं सङ्केतपूर्वकं संवादं कृत्वा । पुरीं स्थूलदेहम् । बुद्ध्यादिलिङ्गशरीरस्य परस्पराध्यासे जातेऽपि भोगार्थं स्थूलदेहाध्यासस्यावश्यंकत्वम् । समा वर्षाणि ।४३। शुचौ ग्रीष्मे । ह्रदिनीं नदीम् आविशत् । पक्षे तत्र तत्र प्रतीन्द्रियविषयं गायकैः शब्दादिभिः जागरे स्वप्ने च सेव्यमानः स्त्रीभिः मनोवृत्तिभिः क्रीडन् शुचौ श्रमकाले सति ह्लादिनी सुषुप्तिस्थानम् ।४४। जाग्रदवस्थामाह विस्तरेण यावध्यायसमाप्ति । य ईश्वरः पुरञ्जनः तस्य पृथक् पृथक् देशान्प्रति गत्यर्थम् । पक्षे । तस्य पुरो देहस्य उपरिभागे श्रोत्रे नेत्रे नासिके मुखं चेति सप्त । अधो गुदलिङ्गे । ईश्वरो जीवो रूपादिविषयज्ञानार्थम् ॥ ४५ ॥ पौरस्त्याः पूर्वाभिमुख्यः ॥ ४६ ॥ प्राक् पूर्वदिशि । द्युमन्नाम्नः तद्देशाभिज्ञस्य सखा पुरञ्जनः विभ्राजितं नाम देशम् । पक्षे खद्योतवत् अल्पप्रकाशा वामनेत्ररूपा । आविर्मुखी विपुलप्रकाशा दक्षिणनेत्ररूपा। निर्मिते लग्ने । द्युमत्सखः[1] चक्षुरिन्द्रियसहितो जीवः । रूपं विषयं गृह्णाति ॥४७॥ अवधूतनामकेन सह राजा सौरभं नाम देशम् । पक्षे नलं नालं च छिद्रमेव अस्या अस्तीति वामदक्षिणनासिके । अवधूतसखः घ्राणेन्द्रियसहितो जीवः । सौरभं गन्धम् । ताभ्यां-द्वार्भ्याम् ॥४८॥ रसज्ञेन सह बहूदनसंज्ञकं देशं विपणेन सह आपणसंज्ञकं देशं च एकयैव द्वारा याति । पक्षे। पुरस्तात् पूर्वा मुखरूपा तया । रसज्ञेन रसनेन्द्रियेण सह बहूदनं नानाविधमन्नं विपणेन वागिन्द्रियेण सह आपणं भाषणं च विषयम् ॥ ४९ ॥ दक्षिणेन दक्षिणस्यां दशि दक्षिणमुखोत्यर्थः तया दक्षिण-पञ्चालं नाम देशं श्रुतधरसंज्ञकेन तद्देशाभिज्ञेन सह राजा । पक्षे । पितॄन् जिहीते गच्छति अनयेति पितृहूः । 'ओहाङ्गतौ इत्यस्मात् सृतिश्रद्धयोः कूरिति बाहुलकात् कू प्रत्ययः पितृलोकप्राप्तिसाधनभूतस्य प्रवृत्तिशास्त्रस्य कर्मकांण्डस्य प्रथमं दक्षिणकर्णेन श्रवणात् पितृहूः दक्षिणः कर्णः । वामेन निवृत्तिपरकस्य ज्ञानकाण्डस्य श्रवणात् देवहूः दक्षिणकर्ण उच्यते । पितृहूर्नाम दक्षिणकर्णः तेन दक्षिणपञ्चालं प्रवृत्तं शास्त्रं कर्मकाण्डं शृणोति श्रुतधरेण श्रोत्रेन्द्रियेण सहितो जीवः । चातुर्येण पञ्चानां विषयाणां प्रकाशनाय

1—द्युमान् आदित्यश्चक्षुर्लक्षणः सखा यस्य सः । 'आदित्यो ह वै चक्षुरिति श्रुतेः ।

देवहूर्नाम पुर्या द्वा उत्तरेण पुरञ्जनः। राष्ट्रमुत्तरपञ्चालं याति श्रुतधरान्वितः॥ ५१॥
आसुरी नाम पश्चाद् द्वास्तया याति पुरञ्जनः। ग्राम्यकं नाम विषयं दुर्मदेन समन्वितः॥५२॥
निर्ऋतिर्नाम पश्चाद् द्वास्तया याति पुरञ्जनः। वैशसं नाम विषयं लुब्धकेन समन्वितः॥५३॥
अन्धावमीषां पौराणां निर्वाक्पेशस्कृतावुभौ। अक्षण्वतामधिपतिस्ताभ्यां याति करोति च॥५४॥
स यर्ह्यन्तःपुरगतो विषूचीनसमन्वितः। मोहं प्रसादं हर्षं वा याति जायात्मजोद्भवम्॥५५॥
एवं कर्मसु संसक्तः कामात्मा वञ्चितोऽबुधः। महिषी यद्यदीहेत तत्तदेवान्ववर्तत॥५६॥
क्वचित्पिबन्त्यां पिबति मदिरां मदविह्वलः। अश्नन्त्यां क्वचिदश्नाति जक्षत्यां सह जक्षति॥५७
क्वचिद् गायति गायन्त्यां रुदत्यां रुदति क्वचित्। क्वचिद्धसन्त्यां हसति जल्पन्त्यामनु जल्पति
क्वद्धावति धावन्त्यां तिष्ठन्त्यामनु तिष्ठति। अनु शेते शयानायामन्वास्ते क्वचिदासतीम्॥५९॥

क्वचिच्छृणोति शृण्वन्त्यां पश्यन्त्यामनु पश्यति।
क्वचिज्जिघ्रति जिघ्रन्त्यां स्पृशन्त्यां स्पृशति क्वचित्॥ ६०॥

क्वचिच्च शोचतीं जायामनु शोचति दीनवत्। अनु हृष्यति हृष्यन्त्यां मुदितामनु मोदते॥६१॥
विप्रलब्धो महिष्यैवं सर्वप्रकृतिवञ्चितः। नेच्छन्ननुकरोत्यज्ञः क्लैब्यात्क्रीडामृगो यथा॥६२॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां चतुर्थस्कन्धे पुरञ्जनोपाख्याने पञ्चविंशोऽध्यायः॥ २५॥

अलम्॥ ५०॥ उत्तरेण उत्तरमुखी। पूर्ववत्। पक्षे। देवहूर्नामोत्तरकर्णेन उत्तरपञ्चालं निवृत्तं शास्त्रं ज्ञानकाण्डम्॥ ५१॥ पश्चात् पश्चिममुखी। विषयं देशं दुर्मदेन तद्देशाभिज्ञेन सह राजा। पक्षे। असुराणां विषयिणामियम् आसुरी[1] शिश्नद्वाः। ग्राम्याणां गृहस्थजनानां कं सुखं येन तं मैथुनम्। दुर्मदेन गुह्येन्द्रियेण॥ ५२॥ लुब्धकेन तन्मार्गाभिज्ञेन। पक्षे। निर्ऋच्छति निर्गच्छति पुरीषमस्मादिति निर्ऋतिः गुदः तया वैशसं मलत्यागं करोति। लुब्धकेन पायुनेन्द्रियेण॥ ५३॥ पौराणां पुरद्वाराणां मध्ये द्वौ अन्धकारपूर्णौ तत्तन्नामानौ ताभ्यां अक्षण्वतां द्वारपानामधिपतिः राजा गूढं याति गूढंकार्यं करोति च। पक्षे। निर्वाक् पादः पेशस्कृत् हस्तः उभौ अन्धौ छिद्राभावात्। अक्षण्वतां देहानामधिपति र्जीवः॥ ५४॥ स राजा विषूचीनेन अन्तःपुरगामिना केनचित्क्लीवेन। पक्षे विष्वक् सर्वतोऽञ्चतीति मनः। अन्तःपुरं हृदयम् स जीवः। जाया बुद्धिः आत्मजा इन्द्रियपरिणामा दर्शनादयः॥ ५५॥ पक्षे महिषी वैषयिकी बुद्धिः। अन्वसरत्॥ ५६॥ पक्षे क्वचिदित्यारम्य मोदते इत्यन्तं प्रकृतेर्गुणैः क्रियमाणेषु कर्मसु पुमान् आत्मनि कर्तृत्वं मन्यते इत्यस्यैव विवरणम् अध्यासवशात्। जक्षत्यां चर्वन्त्याम् स ह स्फुटम्॥ ५७।५८॥ आसीनाम्॥ ५९।६०॥ हृष्यति इष्टदर्शनेन। मोदते इष्टस्मरणेन॥ ६१॥ महिष्या बुद्ध्या विप्रलब्धो मोहितः। सर्वथा प्रकृत्या स्वभावेन ज्ञानानन्दादिरूपया वञ्चितः त्याजितः क्रीडार्थो मृगः वानरः क्लैब्यात् पारतन्त्र्यात्॥ ६२॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे गूढार्थदीपिन्यां पञ्चविंशोऽध्यायः।

१–अस्यते क्षिप्यते वीर्यमनेनेति असुरं मेढ्रं ततः स्वार्थेऽणि टित्वात् ङीप् आसुरी।

अथ षड्विंशोऽध्यायः

नारद उवाच

स एकदा महेष्वासो रथं पञ्चाश्वमाशुगम् । द्वीषं द्विचक्रमेकाक्षं त्रिवेणुं पञ्चबन्धुरम् ॥ १ ॥
एकरश्म्येकदमनमेकनीडं द्विकूबरम् । पञ्चप्रहरणं सप्तवरूथं पञ्चविक्रमम् ॥ २ ॥
हैमोपस्करमारुह्य स्वर्णवर्माऽक्षयेषुधिः । एकादशचमूनाथः पञ्चप्रस्थमगाद्वनम् ॥ ३ ॥
चचार मृगयां तत्र दृप्त आत्तेषुकार्मुकः । विहाय जायामतदर्हां मृगव्यसनलालसः ॥ ४ ॥
आसुरीं वृत्तिमाश्रित्य घोरात्मा निरनुग्रहः । न्यहनन्निशितैर्बाणैर्वनेषु वनगोचरान् ॥ ५ ॥
तीर्थेषु प्रतिदृष्टेषु राजा मेध्यान् पशून् वने । यावदर्थमलं लुब्धो हन्यादिति नियम्यते ॥ ६ ॥
य एवं कर्म नियतं विद्वान् कुर्वीत मानवः । कर्मणा तेन राजेन्द्र ज्ञानेन न स लिप्यते ॥ ७ ॥
अन्यथा कर्म कुर्वाणो मानारूढो निबध्यते । गुणप्रवाहपतितो नष्टप्रज्ञो व्रजत्यधः ॥ ८ ॥

षड्विंशे सात्त्विकीं बुद्धिं त्यक्त्वाऽसौ मृगयां गतः ।
पुनस्तां प्राप्य तुष्टोऽभूत् स्वप्नजाग्रदवस्थया ॥ १ ॥

इदानीं सद्बुद्धिं त्यक्त्वा मृगयाव्याजेन यातस्य पुरञ्जनस्य स्वप्नजाग्रदवस्थाभ्यां गृहस्थलीलामाह-स इति त्रिकम् । एकदा स्वप्नवेलायां रथं स्वप्नदेहमाश्रित्य पञ्चप्रस्थं वनमगादिति तृतीयेनान्वयः । कथंभूतं रथम् । द्वे अहन्ताममते ईषे दण्डिके यस्य । पञ्च ज्ञानेन्द्रियाणि अश्वा यस्य । द्वे पुण्यपापे चक्रे यस्य । एकं प्रधानमक्षो धूर्यस्य । त्रयो गुणा वेणवो ध्वजा यस्य । पञ्च प्राणा बन्धुराणि बन्धनानि यस्य ॥१॥ एकं मनो रश्मिः यस्य एका बुद्धिर्दमनः सूतो यस्य स च स च तम् । एकं हृदयं नीडं रथिन उपवेशस्थानं यत्र । पञ्च शब्दादिविषया प्रहरणानि अस्त्राणि यस्य । सप्त धातवो वरूथाः चर्माद्यावरणानि यस्य । पञ्च कर्मेन्द्रियाणि विस्तृता वां विक्रमा गतिप्रकारा यस्य पचि । विस्तारे धातुः ॥२॥ हैमो रजोगुण एव उपस्करोऽलङ्करणं यस्य । स्वयमपि स्वर्णवर्मा रजोगुणकवचः । अक्षयेषुधिः अनन्तवासनाश्रयः । एकादशो मनोरूपः तत्संख्याका वा चमूनाथा यस्य । पञ्च शब्दादयः प्रस्थाः सानवो यत्र । वनं भजनीयदेशम् । तत्संज्ञकं वनं वा ॥ ३ ॥ पक्षे । तत्र विषयोपवने मृगयां विषयभोगलक्षणां कृतवान् दृप्तो गर्वितः । इषवो रागद्वेषादयः कार्मुकमासक्तिरूपं च जायां विवेकवतीं सात्त्विकीं बुद्धिं त्यागानर्हाम् । मृग्यन्ते इति मृगा विषयाः ॥ ४ ॥ वनगोचरान् मृगान् । पक्षे । वनेषु भोगस्थानेषु वनगोचरान् भोग्यविषयान् बाणैः रागादिभिः नितरामगच्छत् असेवतेत्यर्थः । 'हन्' हिंसागत्योः धातुः ।५। यदि अलमत्यन्तं लुब्धो रागी सन् हन्यात्तर्हि तीर्थेषु श्राद्धादिष्वेव तत्रापि प्रतिदृष्टेषु प्रख्यातेष्वेव तत्रापि राजैव मेध्यान् यज्ञार्हानेव वने एव यावदुपयोगमेवेति षड्भिः नियमैः उच्छृङ्खलप्रवृत्तिवारणार्थं पशुहिंसा सङ्कोच्यते न तु विधीयते रागप्राप्तत्वात् एवं पुत्रार्थिनो जीवस्य विषयसेवाऽपि 'ऋतौ भार्यामुपेयात्' इत्यादिवाक्यैः सङ्कोच्यते इत्यर्थः ॥ ६ ॥ य एवं नियतं सङ्कोचितं कर्म हिंसनात्मकं विषयसेवनात्मकं च कुर्वीत न तु यथेष्टं स तेन कर्मणा जातेन ज्ञानेन न लिप्यते ॥७॥ अन्यथा नियमोल्लङ्घनेन । मानः कर्तृत्वाभिमानः

तत्र निर्भिन्नगात्राणां चित्रवाजैः शिलीमुखैः । विप्लवोऽभूद् दुःखितानां दुःसहः करुणात्मनाम् ॥९॥
शशान् वराहान् महिषान् गवयान् रुरुशल्यकान् । मेध्यानन्यांश्च विविधान् विनिघ्नन् श्रममध्यगात् ॥१०॥
ततः क्षुत्तृट्परिश्रान्तो निवृत्तो गृहमेयिवान् । कृतस्नानोचिताहारः संविवेश गतक्लमः ॥११॥
आत्मानमर्हयांचक्रे धूपालेपस्रगादिभिः । साध्वलंकृतसर्वाङ्गो महिष्यामादधे मनः ॥१२॥
तृप्तो हृष्टः सुदृप्तश्च कन्दर्पाकृष्टमानसः । न व्यचष्ट वरारोहां गृहिणीं गृहमेधिनीम् ॥१३॥
अन्तःपुरस्त्रियोऽपृच्छद्विमना इव वेदिषत् ।१४। अपि वः कुशलं रामाःसेश्वरीणां यथा पुरा ॥
न तथैतर्हि रोचन्ते गृहेषु गृहसम्पदः ।१५। यदि न स्याद् गृहे माता पत्नी वा पतिदेवता ।
व्यङ्गे रथ इव प्राज्ञः को नामासीत दीनवत् ॥ १६ ॥
क्व वर्तते सा ललना मज्जन्तं व्यसनार्णवे । या मामुद्धरते प्रज्ञां दीपयन्ती पदे पदे ॥१७॥

रामा ऊचुः

नरनाथ न जानीमस्त्वत्प्रिया यद्व्यवस्यति । भूतले निरवस्तारे शयानां पश्य शत्रुहन् ॥१८॥

नारद उवाच

पुरञ्जनः स्वमहिषीं निरीक्ष्यावधुतां भुवि । तत्संगोन्मथितज्ञानो वैक्लव्यं परमं ययौ ॥१९॥

प्रवाहे संसारे । अधो नरकम् ॥ ८ ॥ तत्र नानापक्षैर्वर्णैर्मृगाणां विप्लवो नाशोऽभूत् योऽस्मादृशां दुःसहः अत एव त्वं प्रवोध्यसे इति भावः । पक्षे । तत्र विषयोपवने शिलावत् दृढमुखैः चित्रवाजैर्नानागतिकुशलैः शिश्नादीन्द्रियैर्मृदितावयवानां बालिकानां विप्लवः आश्लेषादिः । वज् गतौ घञ् ॥ ९ ॥ रुरुशल्यकौ मृगभेदौ । मेध्यान् यज्ञार्हान् । पक्षे । शशवन्मनश्चञ्चलकरान् । महिषवदङ्गशैथिल्यकरान् । गवयान् गतवयसो वृद्धान्प्रति रुरून् रोदनहेतून् वियोगे शल्यवत् दुःखहेतून् अत एव वरैः श्रेष्ठैराहान् सर्वतस्त्यक्तान् । मेध्यान् सम्प्राप्तान् अन्यान् विषयान् विनिघ्नन् भुञ्जानः श्रममध्यगात् पश्चात्तापं कृतवान् धार्मिकत्वादित्यर्थः । मेधृ संङ्गमे च ॥१०॥ संविवेश शय्यामाश्रितः । क्लमः श्रमः । पक्षे । क्षुत् विषयबुभुक्षा तृट् विषयपिपासा च ताभ्याम् । गृहमेयिवान् धर्ममर्यादायां स्थातुमियेष । स्नानं पापप्रायश्चित्तम् । उचिताहारः मांसादित्यागः । संविवेश किञ्चित्स्थिरीवभूव । क्लमः विषयपरिश्रमः ॥११॥ पक्षे । आत्मानमन्तःकरणं शोधयामास । कैः । क्रमेण ज्ञानवैराग्यहरिनाममालोपदेशैः । भक्तिशोधितसर्वचित्तवृत्तिकः । महिष्यां विवेकवत्यां बुद्धौ ॥ १२ ॥ पक्षे सुदृप्तो गर्वितः । कन्दर्पो नाम बुद्धिबालासङ्गमोत्साहः । गृहमेधिनीं धर्मनिर्वाहिकां सात्विकीं बुद्धिं नापश्यत् । राजससंस्कारशेषत्वादित्यर्थः ॥१३॥ अन्तरित्यर्द्धकम् । पक्षे । स्त्रियोऽन्तः करणवृत्तीः ईषत्प्रादुर्भूताः । वीक्ष्य परामर्शं । हे वेदिषत् प्राचीनबर्हिः ॥१४॥ पक्षे । अपि किम् हे रमणोपयोगिन्यः वृत्तयः । यथा पुरा तथेतर्हि इदानीं सम्पदो निषिद्धविषया न ॥ १५ ॥ माता कृष्णभक्तिः । पत्नी सात्विकी बुद्धिः । व्यङ्गे चक्रादिहीने रथ इव प्राणशून्ये गृहे देहे ॥ १६॥ सा ललना शोभना बुद्धिः । प्रज्ञां भगवद्विषयकज्ञानम् । उद्धरते भविष्यति लट् ॥१७॥ व्यवस्यति निश्चिनोति । निरवस्तारे आस्तरणरहिते । पक्षे । प्रिया बुद्धिः । तव हृदयमेव तस्याः पुष्पपर्यङ्कस्तस्माद्विच्युतिरेव भूतले शयनमित्यर्थः । हे शत्रुहन् त्यक्तपाप ॥ १८ ॥ अवधुतां पतिताम् ।

सान्त्वयन् श्लक्ष्णया वाचा हृदयेन विदूयता। प्रेयस्याः स्नेहसंरम्भलिङ्गमात्मनि नाभ्यगात् २०।
अनुनिन्येऽथ शनकैर्वीरोऽनुनयकोविदः। पस्पर्श पादयुगलमाह चोत्सङ्गलालिताम् ॥२१॥

पुरञ्जन उवाच

नूनं त्वकृतपुण्यास्ते भृत्या येष्वीश्वराः शुभे। कृतागस्स्वात्मसात्कृत्वा शिक्षादण्डं न युञ्जते।२२।
परमोऽनुग्रहो दण्डो भृत्येषु प्रभुणार्पितः। बालो न वेद तत्तन्वि बन्धुकृत्यममर्षणः ॥२३॥

सा त्वं मुखं सुदति सुभ्र्वनुरागभारव्रीडाविलम्बविलसद्धसितावलोकम्।
नीलालकालिभिरुपस्कृतमुन्नसं नः स्वानां प्रदर्शय मनस्विनि वल्गुवाक्यम् ॥ २४ ॥

तस्मिन्दधे दममहं तव वीरपत्नि योऽन्यत्र भूसुरकुलात्कृतकिल्बिषस्तम्।
पश्ये न वीतभयमुन्मुदितं त्रिलोक्यामन्यत्र वै मुररिपोरितरत्र दासात् ॥ २५ ॥

वक्त्रं न ते वितिलकं मलिनं विहर्षं संरम्भभीममविमृष्टमपेतरागम्।
पश्ये स्तनावपि शुचोपहतौ सुजातौ बिम्बाधरं विगतकुङ्कुमपङ्करागम् ॥ २६ ॥

तत्सङ्गेन तदासक्त्या उन्मथितं व्याकुलम्। वैक्लव्यं दैन्यम्। पक्षे। अवधुतां मयैव हृदयादयसारिताम्। पुनस्तद्ग्रहणेच्छया तिरस्कृतस्वदुर्बुद्धिकः ॥ १९ ॥ स्नेहसंरम्भः प्रणयकोपस्तस्यलिङ्गं कुटिलदृष्ट्यादि स्वस्मिन् लब्धवान्। पक्षे। प्रेयस्याः सद्बुद्धेः यः स्नेहस्तस्य संरम्भो नाशस्तस्य कारणं न ज्ञातवान् रजोवृतमनस्त्वात्। रम्भ हिंसायाम् ॥ २० ॥ अनुनये सान्त्वने। अनुनिन्ये सान्त्वयामास। अद्यारभ्य दुर्विषयभोगं नैव करिष्ये इति। अभिमानत्यागभक्तसम्मानौ एव तस्याः पादौ पस्पर्श प्राप। उत्सङ्गमारोप्य चुम्बिताम्। पक्षे। स्वहृत्समीपमानीताम् ॥ २१ ॥ कृतापराधेषु येषु अस्मदधीना एते इति मत्वा शिक्षार्थं दण्डं न कुर्वते ते मन्दभाग्या इत्यन्वयः। ईश्वराः स्वामिनः। पक्षे मम तु पापाचरणेन लोकनिन्द्यादिरूपो दण्डो जात एव अतस्त्वां न कदापि त्यक्ष्यामीति मनसा सद्बुद्धिं संबोध्याह–द्वाभ्याम्। अमर्षणः क्रोधी बन्धुवत्कृत्यं हिताचरणं न यतो बालोऽज्ञः ॥२२।२३॥ हे सुदति! हे सुभ्रु! यामया कोपिता सा त्वं स्वकीयानां नः मुखं प्रदर्शय। अनुरागाधिक्येन व्रीडाविष्करणं तेन विलसन् हसितावलोको यत्र। पक्षे। भक्त्यङ्गपरिपूर्णा मे सात्विकी बुद्धिरनुकूलीभूय हृदि तिष्ठतु इति प्रार्थना ॥२४॥ हे वीरस्य मम पत्नि! भूसुरकुलादन्यत्र मुररिपोर्दासादितरत्र अन्यस्मिन् प्राणिनि। यस्ते कृतकिल्बिषस्तस्मिन्नहं दण्डं करोमि। कस्मिन्। यतस्तं त्रिलोक्याम् अन्यत्र तद्बहिश्च वीतभयं न पश्ये। पक्षे। हे सद्बुद्धे! यदि प्राक्तनादैहिकाद्वा पापाचरणात्ते प्रतिकूल्यं तर्हि दमं दानव्रतादि प्रायश्चित्तं करोमि। यदि तु ब्राह्मणापराधात् भक्तापराद्वा ते प्रातिकूल्यं तदा तद्द्वयप्रसादादेव शान्तिर्नान्यथा। वीतेति अधर्मनिर्मूलनेद्द्र साटोपोक्तिः ॥ २५ ॥ इतः पूर्वं ते वक्त्रं श्रृङ्गारहीनं स्तनौ च शोकाश्रुक्लिन्नौ अधरं च ताम्बूलरागहीनं च कदापि नापश्यम् इदानीं तु पश्ये। संरम्भः कोपावेशः। अविमृष्टमकृतोद्वर्तनम्। स्नेहशून्यं च। सुजातौ शोभनौ। बिम्बफलवत्। पङ्कतुल्यः। पक्षे। एतैर्विशेषणैः सुबुद्धेः पूर्ववत्प्रसादाभावः सूचितः। स्वैरं स्वातन्त्र्येण त्वामपृष्ट्वैव। विस्रस्तपौंस्नं नष्टधैर्यं देवरं 'रतिप्रदं पतिं कृत्ये प्रयोजननिमित्ते का न भजेत। उशती कामयमाना। पक्षे। हे सद्बुद्धे। प्रसीद हृदि विराजस्व।

तन्मे प्रसीद सुहृदः कृतकिल्बिषस्य स्वैरं गतस्य मृगयां व्यसनातुरस्य।
का देवरं वशगतं कुसुमास्त्रवेगविस्रस्तपौंस्नमुशती न भजेत कृत्ये॥ २७॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां चतुर्थस्कन्धे पुरञ्जनोपाख्याने षड्विंशोऽध्याय ॥२६॥

अथ सप्तविंशोऽध्यायः

नारद उवाच

इत्थं पुरञ्जनं सध्र्यग्वशमानीय विभ्रमैः। पुरञ्जनी महाराज रेमे रमयती पतिम्॥ १॥
स राजा महिषीं राजन् सुस्नातां रुचिराननाम्। कृतस्वस्त्ययनां तृप्तामभ्यनन्ददुपागताम्॥२॥

तयोपगूढः परिब्धकन्धरो रहोऽनुमन्त्रैरपकृष्टचेतनः।
न कालरंहो बुबुधे दुरत्ययं दिवा निशेति प्रमदापरिग्रहः॥ ३॥
शयान उन्नद्धमदो महामना महार्हतल्पे महिषीभुजोपधिः।
तामेव वीरो मनुते परं यतस्तमोऽभिभूतो न निजं परं च यत्॥ ४॥

तयैवं रममाणस्य कामकश्मलचेतसः। क्षणार्धमिव राजेन्द्र व्यतिक्रान्तं नवं वयः॥ ५॥
तस्यामजनयत् पुत्रान् पुरञ्जन्यां पुरञ्जनः। शतान्येकादश विराडायुषोऽर्धमथात्यगात्॥ ६॥

गतस्य व्याधस्येव पापिनः। केति। स्त्री यथा सापराधमपि कान्तं न त्यजति तथा त्वमपि मां न त्यजेत्यर्थः॥ २७॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे गूढार्थदीपिन्यां षड्विंशोऽध्यायः।

सप्तविंशेऽभवत् पुर्यां चण्डवेगाक्रमो बलात्।
कालकन्यजरा रोगैर्जर्जरामकरोदिमाम्॥ १॥

पक्षे। पुरञ्जनी सात्विकी बुद्धिः पुरञ्जनं जीवं विभ्रमौ विलासैः वृत्तिविशेषैश्च सम्यक्। रमणं चात्र परस्परानुकूल्यमेव ज्ञेयम्॥ १॥ कृतं स्वस्त्ययनं श्रृङ्गारो यस्याः। अभ्यनन्दत् आश्लिष्टवान्। पक्षे। एतैर्विशेषणैर्बुद्धेः प्रसन्न तामालक्ष्य कृतकृत्योऽभूत्॥ २॥ उपगूढ आलिङ्गितः। परिरब्धा गृहीता कन्धरा भार्याग्रीवा येन। रहोऽनुमन्त्रैः रत्यालापैः। पक्षे। यज्ञसंबन्धिविचारैर्विलुप्तमोक्षबुद्धिः। कालरंहः आयुर्व्ययम्। न बुबुधे पूर्णवैराग्याभावात्। प्रमदया परितो ग्रहणं यस्य॥ ३॥ उपधीयते शिरोऽस्मिन्नित्युपधिः उच्छीर्षकम्। पक्षे महार्हतल्पे पुण्यकर्मणि शयानो मग्नः। उत्कटमदः धार्मिकोऽहमित्याकारकः। भुजोपधिः रजःसम्पृक्ताविद्योपाधियुक्तः। धर्मकरणार्थं तामेव सात्त्विकबुद्धिमेव परं पुरुषार्थममन्यत न तु यत् निजं स्वस्वरूपं परमीश्वरस्वरूपं तच्च यतस्तमसा कर्मजालेन आवृतः॥ ४॥ तया सात्त्विकबुद्ध्या संसरतः। कामैर्यज्ञादिभिः कश्मलं मोहितम्। वयो यौवनम्॥ ५॥ चक्षुरादीनि मनोऽन्तानि इन्द्रियाण्येकादशसंज्ञानि विषयीकृत्य शतमनन्ता बुद्धिपरिणामा विवेकनिर्णयादयो भवन्ति

दुहितृर्दशोत्तरशतं पितृमातृयशस्करीः । शीलौदार्यगुणोपेताः पौरञ्जन्यः प्रजापते ॥ ७ ॥
स पञ्चालपतिः पुत्रान् पितृवंशविवर्धनान् । दारैः संयोजयामास दुहितृः सदृशैर्वरैः ॥ ८ ॥
पुत्राणां चाभवन् पुत्रा एकैकस्य शतं शतम् । यैर्वै पौरञ्जनो वंशः पञ्चालेषु समेधितः ॥ ९ ॥
तेषु तद्रिक्थहारेषु गृहकोशानुजीविषु । निरूढेन ममत्वेन विषयेष्वन्वबध्यत ॥१०॥
ईजे च क्रतुभिर्घोरैर्दीक्षितः पशुमारकैः । देवान् पितॄन् भूतपतीन्नानाकामो यथा भवान् ॥११॥
युक्तेष्वेवं प्रमत्तस्य कुटुम्बासक्तचेतसः । आससाद स वै कालो योऽप्रियः प्रिययोषिताम् ॥१२॥
चण्डवेग इति ख्यातो गन्धर्वाधिपतिर्नृप । गन्धर्वास्तस्य बलिनः षष्ट्युत्तरशतत्रयम् ॥१३॥
गन्धर्व्यस्तादृशीरस्य मैथुन्यश्च सिताऽसिताः । परिवृत्त्या विलुम्पन्ति सर्वकामविनिर्मिताम् ॥१४॥
ते चण्डवेगानुचराः पुरञ्जनपुरं यदा । हर्तुमारेभिरे तत्र प्रत्यषेधत्प्रजागरः ॥१५॥
स सप्तभिः शतैरेको विंशत्या च शतं समाः । पुरञ्जनपुराध्यक्षो गन्धर्वैर्युयुधे बली ॥१६॥
क्षीयमाणे स्वसम्बन्धे एकस्मिन् बहुभिर्युधा । चिन्तां परां जगामार्तः सराष्ट्रपुरबान्धवः ॥१७॥
स एव पुर्यां मधुभुक् पञ्चालेषु स्वपार्षदैः । उपनीतं बलिं गृह्णन् स्त्रीजितो नाविदद्भयम् ॥१८॥
कालस्य दुहिता काचित्त्रिलोकीं वरमिच्छती । पर्यटन्ती न बर्हिष्मन् प्रत्यनन्दत कश्चन ॥१९॥

ते एव तावत्संख्याकाः पुत्रा उच्यन्ते । विराट् सम्राट् । विविधं राजते इति जीवो वा ॥ ६ ॥ परिणामानन्तरं दुहितृः बुद्धवृत्तीश्च लज्जाद्याः अजनयत् । पिता जीवो माता बुद्धिस्तयोः यशस्करीरिति तासां पुण्यक्रियाहेतुत्वात् । पुरञ्जनकन्यात्वात् ताः पौरञ्जन्यः अनेकदेहोत्पत्तिहेतुभूता उच्यन्ते ॥७॥ पञ्चालो देशः । पक्षे । पञ्चन्ति विषयान् विस्तारयन्तीति पञ्चाला इन्द्रियाणि तेषां पतिः जीवः पुत्रान् बुद्धि परिणामान् दारैः इष्टानिष्टचिन्तारूपाभिर्भार्याभिः वरैर्विषयभोगरूपैः विवाहितवान् ॥ ८ ॥ पुत्राः परिणतवृत्तिभ्यो वृत्त्यन्तराणि नानाकर्मरूपाः । वंशः संसारः पञ्चालेषु शब्दादिभोगनिमित्तम् ॥ ९ ॥ तस्य पुरञ्जनस्य रिक्थं धनमभिमानादि हरन्तीति तेषु पुत्रेषु विवेकादिषु । गृहं स्थूलं कोशः सूक्ष्मम् अनुजीविनः प्राणाश्च तेषु च ॥ १० ॥ घोरैः हिंसागर्भैः क्रतुभिः कर्मेन्द्रियव्यापाररूपैः दीक्षितः कृतसङ्कल्पः । देवानीजे इन्द्रियाणि तर्पितवान् । यथा पितृदेवादीन् भवानिति दृष्टान्ते ॥ ११ ॥ युक्तेष्विति युक्तेषु भक्त्यादिकर्मसु । असावधानस्य । कुटुम्बे बुद्धिद्वृतत्त्यादौ । कालो जरासमयः । अप्रियः इच्छाऽपूर्तिकरः । आशुवेगः संवत्सररूपः । गन्धर्वाश्च गन्धर्व्यश्चेत्येकशेषः ॥ १२ ॥ गन्धर्वा दिवसाः । गन्धर्व्यो रात्रयः तादृश्यः तावत्संख्याकाः दिवसैर्मिथुनीभूय वर्तमानाः । सिताऽसिताः शुक्लकृष्णपक्षीयाः । परिवृत्या पुनः पुनरावृत्या पुरीं विलुम्पन्ति आयुरपहरन्ति ॥ १३।१४ ॥ पुरं देहम् । तत्र तदा । प्रजागरः पुरपालकः प्राणश्च ॥ १५ ॥ सोऽध्यक्षः प्राणः विंशत्यधिकसप्तशतसंख्याकैर्गन्धर्वैं रात्रि दिवसैः सह । अत्राप्येकशेषः । रात्रिदिनानां सङ्कलनेन तावत्येव वार्षिकी संख्या संभवति ७२० इति ॥१६॥ स्वसंबन्धिनि प्राणे । राष्ट्रेण विषयेण पुरेण देहेन बान्धवैरिन्द्रियैः सह वर्तमान आर्तः पुरञ्जनः ॥१७॥ पुर्यां तथा पञ्चालेषु बहिर्देशेषु च । पक्षे । सजीवः पुर्यां देहे पञ्चालेषु विषयेषु मधुभुक् रसास्वादी स्वपार्षदैरिन्द्रियैः प्रापितं बलिं विषयसुखं गृह्णन् कालभयं न अविदत् न प्राप्तवान् यतो बुद्ध्या वशीकृतः ॥१८॥ कालादेव जरा जायतेऽतस्तस्य दुहितेत्युच्यते । तां कोऽपि न प्रत्यनन्दत् नावृणोत् । हे बर्हिष्मन् प्राचीन-

दौर्भाग्येनात्मनो लोके विश्रुता दुर्भगेति सा । तुष्टा राजर्षये या तु वृतादात्पूरवे वरम् ॥२०॥
कदाचिदटमाना सा ब्रह्मलोकान्महीं गतम् । वव्रे बृहद्व्रतं मां तु जानती काममोहिता ॥२१॥
मयि संरभ्य विपुलमदाच्छापं सुदुःसहम् । स्थातुमर्हसि नैकत्र मद्याच्ञाविमुखो मुने ॥२२॥
ततो विहतसंकल्पा कन्यका यवनेश्वरम् । मयोपदिष्टमासाद्य वव्रे नाम्ना भयं पतिम् ॥२३॥
ऋषभं यवनानां त्वां वृणे वीरेप्सितं पतिम् । संकल्पस्त्वयि भूतानां कृतः किल न रिष्यति २४
द्वाविमावनुशोचन्ति बालावसदवग्रहौ । यल्लोकशास्त्रोपनतं न राति न तदिच्छति ॥२५॥
अथो भजस्व मां भद्र भजन्तीं मे दयां कुरु । एतावान् पौरुषो धर्मो यदार्ताननुकम्पते ॥२६॥
कालकन्योदितवचो निशम्य यवनेश्वरः । चिकीर्षुर्देवगुह्यं ससस्मितं तामभाषत ॥२७॥
मया निरूपितस्तुभ्यं पतिरात्मसमाधिना । नाभिनन्दति लोकोऽयं त्वामभद्रामसम्मताम् ॥२८॥
त्वमव्यक्तगतिर्भुङ्क्ष्व लोकं कर्मविनिर्मितम् । याहि मे पृतनायुक्ता प्रजानाशं प्रणेष्यसि ॥२९॥
प्रज्वारोऽयं मम भ्राता त्वं च मे भगिनी भव । चराम्युभाभ्यां लोकेऽस्मिन्नव्यक्तो भीमसैनिकः

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां चतुर्थस्कन्धे पुरञ्जनोपाख्याने सप्तविंशोऽध्यायः॥२७॥

बर्हिः ॥ १९ ॥ आत्मनः शरीरस्य दौर्भाग्येन सौन्दर्यनाशकत्वेन हेतुना । या जरा ययातिपुत्राय पूरवे वरं राजासनरूपं यतस्तेन वृतां सा तुष्टा राजर्षये या तु इति साधुपाठः लेखकभ्रमाद्व्युत्क्रमो जात इति प्राञ्चः ॥ २० ॥ बृहद्व्रतं नैष्ठिकब्रह्मचारिणं जानन्त्यपि वव्रे यतः कामेति । अप्यर्थे तु शब्दः ॥ २१ ॥ प्रत्याख्यातवति मयि संरभ्य[1] कोपं कृत्वा । मद्देहस्य दिव्यत्वात् तत्प्रवेशासामर्थ्यमेव मत्प्रत्याख्यानत्वेन लोकोपकाराय मम सर्वत्र गमनं च तस्याः शापफलत्वेन उत्प्रेक्षितमिति रहस्यं चात्र ज्ञेयम् ॥२२॥ यवनानामाधिव्याधीनामीश्वरं भयमेव । एतेन लोकानां भयमेव जरया जीर्णं भवतु इति मुनेर्दयालुत्वं व्यञ्जितम् ॥ २३ ॥ हे वीर । ऋषभं महाव्याधिरूपं त्वां भयम् । यतो भूतानामन्यैरपि भूतैः त्वयि कृतः सङ्कल्पो मनोरथः व्यर्थो न भवति किमुत त्वदेकपरायणाया ममेत्यर्थः ।२४। सन्तो द्वौ अज्ञौ अनुशोचन्ति । कौ । यो लोकशास्त्रयोरुचितं यद्देयं वस्तु तत् न ददाति यश्च दीयमानं ग्राह्यं वस्तु नेच्छति न गृह्णाति तौ द्वौ कर्मभूतौ असदवग्रहौ दुराग्रहौ । अतः स्वयम्वरा कन्याऽहं त्वत्समीपमागता गृहस्थेन त्वया ग्राह्यैवेति तात्पर्यम् ॥ २५ ॥ अथो अतः । मे मयि । पौरुषः पुरुषेण कर्त्तव्यः ॥ २६ ॥ यवनेश्वरो भयनामा । वैराग्यानुदयाय देवैः गोप्यते इति देवगुह्यं मरणम् ॥ २७ ॥ यस्त्वां नाभिनन्दति नेच्छति सोऽयं लोकः तुभ्यं तव । आत्मसमाधिना मनोभावनया ॥ २८ ॥ या मे मदीया पृतना सेना तया युक्ता त्वं याहि । प्रणेष्यसि करिष्यसि ॥ २९ ॥ प्रज्वारो मारको ज्वरः वैष्णवः । अधर्मांशोद्भवानामस्माकं भगिन्यपि त्वं मम भार्यैव तव भ्राताऽप्यहं पतिरेवातो नारदोक्तमपि नासङ्गतमित्यनुसन्धेयम् ॥३०॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे गूढार्थदीपिन्यां सप्तविंशोऽध्यायः ॥२७॥

---

१ विदल्ध लाभे धातुः लुङ् अङ् ।

अथाष्टाविंशोऽध्यायः

नारद उवाच

सैनिका भयनाम्नो ये बर्हिष्मन् दिष्टकारिणः। प्रज्वारकालकन्याभ्यां विचेरुरवनीमिमाम् ॥१॥

त एकदा तु रभसा पुरञ्जनपुरीं नृप। रुरुधुर्भौमभोगाढ्यां जरत्पन्नगपालिताम् ॥२॥

कालकन्यापि बुभुजे पुरञ्जनपुरं बलात्। ययाभिभूतः पुरुषः सद्यो निःसारतामियात् ॥३॥

तयोपभुज्यमानां वै यवनाः सर्वतोदिशम्। द्वार्भिः प्रविश्य सुभृशं प्रार्दयन् सकलां पुरीम् ॥४॥

तस्यां प्रपीड्यमानायामभिमानी पुरञ्जनः। अवापोरुविधांस्तापान् कुटुम्बी ममताकुलः ॥५॥

कन्योपगूढो नष्टश्रीः कृपणो विषयात्मकः। नष्टप्रज्ञो हृतैश्वर्यो गन्धर्वयवनैर्बलात् ॥६॥

विशीर्णां स्वपुरीं वीक्ष्य प्रतिकूलाननादृतान्। पुत्रान् पौत्रानुगामात्याञ्जायां च गतसौहृदाम् ७

आत्मानं कन्यया ग्रस्तं पञ्चालानरिदूषितान्। दुरन्तचिन्तामापन्नो न लेभे तत्प्रतिक्रियाम् ८

कामानभिलषन् दीनो यातयामांश्च कन्यया। विगतात्मगतिः स्नेहात् पुत्रदारांश्च लालयन् ॥९॥

गन्धर्वयवनाक्रान्तां कालकन्योपमर्दिताम्। हातुं प्रचक्रमे राजा तां पुरीमनिकामतः ॥१०॥

भयनाम्नोऽग्रजो भ्राता प्रज्वारः प्रत्युपस्थितः। ददाह तां पुरीं कृत्स्नां भ्रातुः प्रियचिकीर्षया

तस्यां संदह्यमानायां सपौरः सपरिच्छदः। कौटुम्बिकः कुटुम्बिन्या उपातप्यत सान्वयः॥१२॥

अष्टाविंशे पुरीं त्यक्त्वा स्त्रीसङ्गात्स्त्रीत्वमेत्य सः।
सख्युस्तत्त्वोपदेशेन मुक्तिं प्रापेति वर्ण्यते ॥ १ ॥

दिष्टकारिण आज्ञाकारिणो ये सैनिका व्याधयस्ते अवनीं पृथ्वीम्। हे प्राचीनर्बर्हिः। इदानीं पुरञ्जनस्य पुंदेहत्यागपूर्वकं स्त्रीत्वप्रकारमाह-वेशमनीत्यन्तेन ॥१॥ ते व्याधय एकदा प्रारब्धकर्मक्षये रभसा वेगेन पुरीं रुरुधुः शरीरं ग्रस्तवन्तः। जरत्पन्नगः क्षीणबलः सर्पः प्राणश्चतेन ॥२॥ कन्या जरा। निःसारतां निर्बलताम् ॥ ३ ॥ यवना व्याधयः। द्वार्भिश्चक्षुरादिभिः। प्रार्दयन् पीडितवन्तः ॥ ४ ॥ तस्यां पुर्याम्। ममेयमित्यभिमानी। बहुविधान् ॥ ५ ॥ कन्येति त्रिकम्। कन्यया जरया ग्रस्तः सन् बुद्ध्या अलिङ्गितः इति। वीरराघवः। तत्प्रतिक्रियां तत्तन्निवृत्युपायं न लेभे इति तृतीयेनान्वयः। गन्धर्वैरहर्दोरात्रैः। यवनैर्व्याधिभिश्च। हृतैश्वर्य उत्थानाद्यशक्तः ॥ ६ ॥ विशीर्णां दन्तपतनादिना। पुत्रान् विषेकादींश्च प्रतिकूलान् अभीष्टाप्रापकान् आदररहितांश्च। पौत्रा धैर्यादयः। अनुगा इन्द्रियाणि। अमात्या इन्द्रियदेवाः। जाया बुद्धिः। सौहृदं निश्चयः ।७। आत्मानं शरीरम्। कन्यया जरया। पञ्चालान् विषयान्। अरिभिः व्याध्यादिभिः ॥ ८ ॥ कामानिति युग्मकम्। कन्यया जरया यातयामान् गतसारान् क्षुन्मान्द्यादिहेतोः। स्नेहादिति पृथक् पाठः शोभन इति वंशीधरी गतिः पारलौकिकी स्नेहः ऐहिकः ॥ ९ ॥ अनिकामतोऽनिच्छातः ॥१०॥ प्रज्वारो वैष्णवज्वरः। भ्रातुर्भयस्य। ददाह अतएव। शरीरे ज्वरः प्रवृत्तः ॥ ११ ॥ सपौरः सप्तधातुसहितः। सपरिच्छदः सेन्द्रियः कुटुम्बेन दीव्यतीति कौटुम्बिको जीवो बुद्ध्या

यवनोपरुद्धायतनो ग्रस्तायां कालकन्यया । पुर्यां प्रज्वारसंसृष्टः पुरपालोऽन्वतप्यत ॥१३॥
न शेके सोऽवितुं तत्र पुरुकृच्छ्रोरुवेपथुः । गन्तुमैच्छत्ततो वृक्षकोटरादिव सानलात् ॥१४॥
शिथिलावयवो यर्हि गन्धर्वैर्हृतपौरुषः । यवनैररिभी राजन्नुपरुद्धो रुरोद ह ॥१५॥
दुहितॄः पुत्रपौत्रांश्च जामिजामातृपार्षदान् । स्वत्वावशिष्टं यत्किंचिद् गृहकोशपरिच्छदम् १६
अहं ममेति स्वीकृत्य गृहेषु कुमतिर्गृही । दध्यौ प्रमदया दीनो विप्रयोग उपस्थिते ॥१७॥
लोकान्तरं गतवति मय्यनाथा कुटुम्बिनी । वर्तिष्यते कथं त्वेषा बालकाननुशोचती ॥१८॥
न मय्यनाशिते भुङ्क्ते नास्नाते स्नाति मत्परा । मयि रुष्टे सुसंत्रस्ता भर्त्सिते यतवाग्भयात्१९
प्रबोधयति माविज्ञं व्युषिते शोककर्शिता । वर्त्मैतद् गृहमेधीयं वीरसूरपि नेष्यति ॥२०॥
कथं नु दारका दीना दारकीर्वा परायणाः । वर्तिष्यन्ते मयि गते भिन्ननाव इवोदधौ ॥२१॥
एवं कृपणया बुद्ध्या शोचन्तमतदर्हणम् । ग्रहीतुं कृतधीरेनं भयनामाऽभ्यपद्यत ॥२२॥
पशुवद्यवनैरेष नीयमानः स्वकं क्षयम् । अन्वद्रवन्ननुपथाः शोचन्तो भृशमातुराः ॥२३॥
पुरीं विहायापगत उपरुद्धो भुजङ्गमः । यदा तमेवानु पुरी विशीर्णा प्रकृतिं गता ॥२४॥
विकृष्यमाणः प्रसभं यवनेन बलीयसा । नाविन्दत्तमसाऽऽविष्टः सखायं सुहृदं पुरः ॥२५॥
तं यज्ञपशवोऽनेन संज्ञप्ता येऽदयालुना । कुठारैश्चिच्छिदुः क्रुद्धाः स्मरन्तोऽमीवमस्य तत् ॥२६॥
अनन्तपारे तमसि मग्नो नष्टस्मृतिः समाः । शाश्वतीरनुभूयार्तिं प्रमदासङ्गदूषितः ॥२७॥
तामेव मनसा गृह्णन् बभूव प्रमदोत्तमा । अनन्तरं विदर्भस्य राजसिंहस्य वेश्मनि ॥२८॥

सह । सन्ध्यभावेन भावी सन्धिविच्छेदः सूचितः । सान्वयः पुत्रपौत्रादि युक्तः ॥ १२ ॥ यवनै र्व्याधिभिः । आयतनानि नाडीप्रभृतीनि । संसृष्टः पीडितः । पुरपालः प्रजागरः प्राणः ॥ १३ ॥ पुरुकृच्छ्रेण बहुक्लेशेन बहुकम्पो यस्य । स पुरपालः तत्र तदा । कोटरात्सर्पं इव ॥ १४ ॥ गन्धर्वैरहोरात्रैः । पौरुष मुत्थानादि । यवनैर्व्याधिभिः निरुद्धमार्गः घुरघुरध्वनिं चकार । ह कष्टे ॥ १५ ॥ दुहितॄरिति युग्मकम् । जामयः पुत्रवध्वः । पार्षदा भृत्याः । प्रमदया व्यावहारिक्या सह वियोगे उपस्थिते सति यत्किञ्चित् गृहादिकं वस्तु तत् दध्यौ । तेषु अहं ममेत्यभिमानं कृत्वा ॥१६।१७ ॥ वर्तिष्यते जीविष्यति ॥ १८ ॥ अनाशितेऽभोजिते । यतवाक् मौनमाश्रिता ॥ १९ ॥ अविज्ञं मूर्खं माम् । व्युषिते परदेशं गते । वीरसूः पुत्रवती अपि किं गृहस्थधर्मं नेष्यति अनुवर्तयिष्यति किं वा मरिष्यति ॥ २० ॥ दारक्यः कन्याश्च निराश्रयाः पराश्रया वा । भिन्ननौका वणिज इव कथं नु वर्तिष्यन्ते ॥ २१ ॥ अतदर्हणं शोकायोग्यम् ॥ २२ ॥ एष जीवो यदा यवनै यमदूतैः व्याधिभिश्च स्वकं स्थानं देहान्तरं यमपुरं वा पशुन्नीयमानोऽभूत् तदा अनुपथा भृत्या इन्द्रियाणि च ॥२३॥ यवनैरुपरुद्धः भुजङ्गमः प्राणः यदा अपगतः पृथग्भूतस्तदा तं प्राणमनु देहोऽपि प्रकृतिं पञ्चत्वं प्राप्तः ॥ २४ ॥ यवनेन यमदूतेन । पुरः सन्तमपि सखायमीश्वरं न सस्मार यतस्तमसाऽज्ञानेन व्याप्तः ॥२५॥ ये संज्ञप्ता हिंसितास्ते कुठारैः शृङ्गैः । तत् पूर्वकृतम् । अमीवं क्रौर्यपापयोः, इति निरुक्तिः ॥ २६ ॥ अनन्तेति युग्मकम् । तमसि नरके । शाश्वतीः समा बहूनि वर्षाणि । प्रमदासङ्गेन विषयबुद्धिस्वीकारेण ॥ २७ ॥ विदर्भस्य तन्नाम्न इति केचित् । पक्षे यस्या मरणकाले

उपयेमे वीर्यपणां वैदर्भी मलयध्वजः । युधि निर्जित्य राजन्यान् पाण्ड्यः परपुरञ्जयः ॥२९॥
तस्यां स जनयांचक्र आत्मजामसितेक्षणाम् । यवीयसः सप्त सुतान् सप्त द्रविडभूभृतः ॥३०॥
एकैकस्याभवत्तेषां राजन्नर्बुदमर्बुदम् । भोक्ष्यते यद्वंशधरैर्मही मन्वन्तरं परम् ॥३१॥
अगस्त्यः प्राग्दुहितरमुपयेमे धृतव्रताम् । यस्यां दृढच्युतो जात इध्मवाहात्मजो मुनिः ॥३२॥
विभज्य तनयेभ्यः क्ष्मां राजर्षिर्मलयध्वजः । आरिराधयिषुः कृष्णं स जगाम कुलाचलम् ॥३३॥
हित्वा गृहान् सुतान् भोगान् वैदर्भी मदिरेक्षणा । अन्वधावत पाण्ड्येशं ज्योत्स्नेव रजनीकरम् ३४
तत्र चन्द्रवशा नाम ताम्रपर्णी वटोदका । तत्पुण्यसलिलैर्नित्यमुभयत्रात्मनो मृजन् ॥३५॥

क्षणिकत्यागस्तामेव सद्बुद्धिम् । उत्तमा सद्बुद्धियुक्ता प्रमदा वभूव । कुत्र । विशिष्टानि दर्माणि दर्मोपलक्षितकर्माणि यस्य तस्य धार्मिकस्य गृहे । एवं पुरञ्जनस्य स्त्रीत्वेन जन्म ततः तस्य मलयध्वजेन गुरुणा सङ्गः ततः कृष्णभक्तिस्ततो वैराग्यं ततः पातिव्रत्येन गुरुं भजतो भगवत्प्रसादान्मोक्ष इत्येवात्र तात्पर्यम् ॥ २८ ॥ पाण्डयः पण्डदेशोद्भवः विदर्भपुत्रीम् उपयेमे विवाहितवान् । पणो मूल्यम् । पक्षे । सदसद्विवेकवती बुद्धिः पण्डा तद्युक्तः मलयतुल्येषु साधुषु ध्वज इव श्रेष्ठो मलयध्वजो नाम गुरुः । परस्य विष्णोः पुरं वैकुण्ठं भक्त्या जयतीति तथा । तामुपयेमे शिष्यत्वेन स्वीकृतवान् वीर्येण दृढसङ्कल्पेन पण्यते स्तूयते । युधि शास्त्रार्थे राजन्यान् वेदान्तादीन् ॥ २९ ॥ स राजा गुरुश्च तस्यां वैदर्भ्याम् । असितेक्षणानाम्नीम् । पक्षे असितस्य कृष्णस्य दर्शनं यया । ताम् आत्मजां कृष्णसेवारुचिम् द्रविडभूमिपालकान् कनिष्ठान् सप्त सुतान् श्रवणादिदास्यान्तान् भक्तिप्रकारान् । सख्यात्मनिवेदनयोस्तु उत्तरकालभावित्वेन सम्प्रत्यनुत्पन्नत्वात्सप्तेत्युक्तम् ॥३०॥ तेषां श्रवणादीनाम् । अर्बुदमर्बुदं बहवो भेदा अभवन् । येषां वंशधरैः सम्प्रदायभेदैर्मन्वन्तरं ततोऽपि परं सर्वदैव मही मोक्ष्यते अधर्मात् रक्षिष्यते ॥ ३१ ॥ अगस्त्यो नाम कश्चन राजा प्रथमजातां तां सुशीलाम् असितेक्षणानाम्नीं कन्यामुपयेमे । यस्यामगस्त्यस्य पुत्रो दृढच्युतस्तस्य पुत्र इध्मवाह इति मलयध्वजस्य कन्यांवंश उक्तः । पक्षे । अगानि स्वतो गतिहीनानीन्द्रियाणि स्त्यायति संघातयति स्वेन मिलितीकृत्य चालयतीति अगस्त्यो मनः प्राग्दुहितरं कृष्णसेवारुचिम् । जीवस्य मनः कृष्णसेवासक्तं बभूवेत्यर्थः । यस्यां सेवारुचौ दृढः स्थिरः च्योततीति च्युतः सर्वेन्द्रियसेचकः तृप्तिकरो भक्तियोगो जातः । दृढत्वे हेतुः । मुनिः मननशीलः । कथभूतः । इध्मवाहः शिष्यीभूता वैष्णवा एव बहव आत्मजा सहाया यत्र तथाभूतः धृतानि व्रतानि शमदमादीनि यया तां सेवारुचिम् ॥३२॥ पक्षे । मलयध्वजो वैदर्भ्या गुरुरूपः पतिः वैराग्यादिसम्पत्त्या राजते राजा स चासौ ऋषिश्च तनयेभ्यः श्रवणकीर्तनादिभ्यः क्ष्मां पृथ्वीं विभज्य तत्र तत्र भक्तिभेदं प्रवर्त्य कुलाचलं मलयपर्वतं प्रति जगाम । कुलेन लोकसमूहेनाप्यचलं चालयितुमशक्यम् । एकान्तस्थलं वा ॥३३॥

मदिरा ईक्षणयोर्यस्याः । पक्षे । मदयतीति मदिरं भगवद्रूपं तत्रेक्षणं यस्याः । सुतान् श्रवणादीन् । भोगान् तदुत्थप्रेमानन्दान् । गृहान् एकान्तस्थानान्यपि । पाण्डयेशं मलयध्वजं गुरुम् ॥ ३४ ॥ तत्रेति युग्मकम् । तत्र कुलाचलसमीपे । तासां नदीनां पुण्यसलिलैरुभयत्र अन्तर्बहिश्च आत्मनो मनसः मलं क्षालयन् कन्दादिभिर्वर्तमानः देहनिर्वाहं कुर्वन् तप आस्थितः अकरोत् इत्यन्वयः । पक्षे । एकान्ते गुरुस्त-

कन्दाष्टिभिर्मूलफलैः पुष्पपर्णैस्तृणोदकैः । वर्तमानः शनैर्गात्रकर्शनं तप आस्थितः ॥३६॥
शीतोष्णवातवर्षाणि क्षुत्पिपासे प्रियाप्रिये । सुखदुःखे इति द्वन्द्वान्यजयत्समदर्शनः ॥३७॥
तपसा विद्यया पक्वकषायो नियमैर्यमैः । युयुजे ब्रह्मण्यात्मानं विजिताक्षानिलाशयः ॥३८॥
आस्ते स्थाणुरिवैकत्र दिव्यं वर्षशतं स्थिरः । वासुदेवे भगवति नान्यद्वेदोद्वहन् रतिम् ॥३९॥
स व्यापकतयाऽऽत्मानं व्यतिरिक्ततयाऽऽत्मनि । विद्वान् स्वप्न इवामर्शसाक्षिणं विरराम ह ४०
साक्षाद्भगवतोक्तेन गुरुणा हरिणा नृप । विशुद्धज्ञानदीपेन स्फुरता विश्वतोमुखम् ॥४१॥
परे ब्रह्मणि चात्मानं परं ब्रह्म तथाऽऽत्मनि । वीक्षमाणो विहायेक्षामस्मादुपरराम ह ॥४२॥
पतिं परमधर्मज्ञं वैदर्भी मलयध्वजम् । प्रेम्णा पर्यचरद्धित्वा भोगान् सा पतिदेवता ॥४३॥
चीरवासा व्रतक्षामा वेणीभूतशिरोरुहा । बभावुपपतिं शान्ता शिखा शान्तमिवानलम् ॥४४॥
अजानती प्रियतमं यदोपरतमङ्गना । सुस्थिरासनमासाद्य यथापूर्वमुपाचरत् ॥४५॥
यदा नोपलभेताङ्घ्रावूष्माणं पत्युरर्चती । आसीत् संविग्नहृदया यूथभ्रष्टा मृगी यथा ॥४६॥
आत्मानं शोचती दीनमबन्धुं विक्लवाश्रुभिः । स्तनावासिच्य विपिने सुस्वरं प्ररुरोद सा ॥४७॥
उत्तिष्ठोत्तिष्ठ राजर्षे इमामुदधिमेखलाम् । दस्युभ्यः क्षत्रबन्धुभ्यो बिभ्यतीं पातुमर्हसि ॥४८॥

पसि स्थितः । अस्यते भूमौ क्षिप्यते इत्यष्टिर्बीजम् ॥३५।३६।३७॥ तपसा जातया विद्यया ज्ञानेन पक्वा निर्दग्धा कषायाः कामादिवासना यस्य सः ब्रह्मणि श्रीकृष्णे आत्मानं मनः । अक्षाणि इन्द्रियाणि अनिलः प्राणः आशयश्चित्तम् ॥ ३८ ॥ आस्ते उपविष्टवान् । ततश्च रतिं प्रेम कुर्वन् अन्यत् देहादिकं न सस्मार ॥ ३९ ॥ स वैदर्भ्या गुरुः आत्मनि हृदये आत्मानं श्रीकृष्णं विद्वान् अनुभवन् स्वप्न इवानित्यो यो देहादिप्रपञ्चस्तस्मात् ह हर्षेण उपररामेत्यन्वयः । कथं विद्वान् । सर्वेभ्यो व्यतिरिक्ततया पृथक्तया सर्वेषु व्यापकतया प्रविष्टतया च । विद्वानित्यत्र हेतुः । आमर्शस्य भक्तविचारस्य मनोरथस्य साक्षिणं पूरकमित्यर्थः स्वप्न इवानित्यमामृश्येति पाठो वा ॥ ४० ॥ साक्षादिति युग्मकेन । सम्प्रति मलयध्वजस्य मोक्षमाह । भगवानेव हरिः स एव गुरुस्तेन गीतायाम् 'ओमित्येकाक्षरं ब्रह्म' इत्यादिनोक्तेन सर्वतोमुखं स्फुरताऽकुण्ठेन ज्ञानरूपेण दीपेन परे ब्रह्मणि कृष्णसमीपमात्मानम् आत्मनि स्वसमीपं कृष्णं च वीक्षमाणः ईक्षां संसारदृष्टिं विहाय अस्मात्संसारात् उपरराम मुक्तोऽभूत् । यद्वा । ब्रह्मणि अंशिनि अंशभूतमात्मानम् आत्मनि अंशे च परं ब्रह्म अंशिस्वरूपमिति केचित् ॥ ४१।४२ ॥ वैदर्भी शिष्यरूपा पतिं गुरुरूपम् । पर्यचरत् सेवितवती ॥ ४३ ॥ चीरवासा जीर्णवस्त्रा । क्षामा दुर्बला । उपपतिं पत्युः समीपे । शिरोरुहाः केशाः । शान्तं निर्धूमम् ॥ ४४ ॥ यदा उपरतं मृतं तदाऽपि सुस्थिरासनम् अत एव तथाभूतं तमजानती यथापूर्वमसेवत । आसाद्य समीपं गत्वा । यदा अजानती अभूत् तदा सुस्थिरासनमासाद्य आबध्येति वा ॥ ४५ ॥ अङ्घ्रिमर्चन्ती यदा तस्मिन् ऊष्माणं नोपलभेत नापश्यत् तदा ॥ ४६ ॥ बन्धुः पतिः गुरुश्च । सा वैदर्भी ॥ ४७ ॥ पक्षे । हे राजर्षे गुरो ! दस्युभ्योऽहङ्कारादिभ्यः । क्षत्रबन्धुभ्यो मिथ्याज्ञानादिभ्य इमां पृथ्वीं पातुम् । उदधिः भक्तिसमुद्र एव मेखला

एवं विलपन्ती बाला विपिनेऽनुगता पतिम् । पतिता पादयोर्भर्तुः रुदत्यश्रूण्यवर्तयत् ॥४९॥
चितिं दारुमयीं चित्वा तस्यां पत्युः कलेवरम् । आदीप्य चानुमरणे विलपन्ती मनो दधे ५०
तत्र पूर्वतरः कश्चित्सखा ब्राह्मण आत्मवान् । सान्त्वयन् वल्गुना साम्ना तामाह रुदतीं प्रभो ५१

ब्राह्मण उवाच

का त्वं कस्यासि को वायं शयानो यस्य शोचसि । जानासि किं सखायं मां येनाग्रे विचचर्थ ह५२
अपि स्मरसि चात्मानमविज्ञातसखं सखे । हित्वा मां पदमन्विच्छन् भौमभोगरतो गतः ॥५३॥
हंसावहं च त्वं चार्य सखायौ मानसायनौ । अभूतामन्तरा वौकः सहस्रपरिवत्सरान् ॥५४॥
स त्वं विहाय मां बन्धो गतो ग्राम्यमतिर्महीम् । विचरन् पदमद्राक्षीः कयाचिन्निर्मितं स्त्रिया ५५
पञ्चारामं नवद्वारमेकपालं त्रिकोष्ठकम् । षट्कुलं पञ्चविपणं पञ्चप्रकृति स्त्रीधवम् ॥५६॥
पञ्चेन्द्रियार्था आरामा द्वारः प्राणा नव प्रभो । तेजोऽबन्नानि कोष्ठानि कुलमिन्द्रियसंग्रहः ५७
विपणस्तु क्रियाशक्तिर्भूतप्रकृतिरव्यया । शक्त्यधीशः पुमांस्त्वत्र प्रविष्टो नावबुध्यते ॥५८॥
तस्मिंस्त्वं रामया स्पृष्टो रममाणोऽश्रुतस्मृतिः । तत्सङ्गादीदृशीं प्राप्तो दशां पापीयसीं प्रभो ५९
न त्वं विदर्भदुहिता नायं वीरः सुहृत्तव । न पतिस्त्वं पुरञ्जन्या रुद्धो नवमुखे यया ॥६०॥

यस्याः ॥ ४८ ॥ विलपन्ती । भर्त्तुः गुरोः । अवर्तयत् अमुञ्चत् ॥ ४९ ॥ चितिं चित्वा चितां कृत्वा । पत्युर्गुरोः कलेवरं निधायेति शेषः ॥ ५० ॥ तत्र तदा । पूर्वतरोऽनादिः सखा ईश्वरः ब्राह्मणो भूत्वा । वल्गुना मधुरेण । साम्ना प्रियवचनेन ॥५१॥ कस्य पुत्री । यस्य यम् । मामीश्वरम् । ह हर्षेण येन सह अग्रे सृष्टेः पूर्वम् ॥ ५२ ॥ अविज्ञातस्य कस्यचित् सखाऽस्मीत्येवमात्मानम् अपि किम् । भौमभोगेषु शब्दादिविषयेषु आसक्तः पदं भोगस्थानमन्विच्छन् गतः मद्वियोगं प्राप्तोऽभूः । सखीत्यप्रयुज्य पुंस्त्वनिर्देशेन प्राक्तनपुंस्त्वं स्मारयति ॥ ५३ ॥ हे आर्य ! अहं च त्वं च मानससरोवराश्रयौ हंसपक्षिणौ अभूताम् । बहुकालम् ओकोऽन्तरैव गृहं विनैव । वा शब्द एवार्थे । पक्षे । हंसौ शुद्धौ सखायौ । ओकः स्थूलशरीरं विनैव मानसं सूक्ष्मशरीरगतं हृदयमयनं ययोस्तौ ॥ ५४ ॥ ग्राम्ये विषयसुखे मतिर्यस्य सः महीं कर्मभूमिं गतः । तत्र पर्यटन् पदं भोगस्थानं शरीरम् । स्त्रिया मायया । स त्वमिति युग्मकम् ॥५५॥ कथंभूतं पदम् । कोष्ठानि भाण्डागारस्थानानि । कुलानि बहिष्ठपदार्थदर्शनाय निर्मितस्थानानि । पक्षे । पञ्च विषया उपवनानि यत्र । नव प्राणच्छिद्राणि । एकः प्राणः । त्रीणि पृथिव्यप्तेजांसि । षट् ज्ञानेन्द्रियमनांसि कुलानि वणिजः कुत्सितविषयग्राहकाणि वा । पञ्च कर्मेन्द्रियाणि विपणा इहा यत्र । पञ्च भूतानि प्रकृतिरुपादानकारणं यस्य । स्त्री बुद्धिः धवा स्वामिनी यस्य यत्र वा ॥ ५६ ॥ पद्यं स्वयमेव व्याख्याति—पञ्चेति युग्मकेन ॥ ५७ ॥ क्रियाशक्तिः कर्मेन्द्रियगणः । भूतान्येव अव्यया प्रकृतिः कारणम् । शक्तिः प्रकृतिरधीशा धवा यस्य । अत्र पदे शरीरे । नावबुध्यते स्वात्मानं मां च ॥ ५८ ॥ तस्मिन् पदे शरीरे रामया विषयबुद्धया स्पृष्टो वशीकृतः । न श्रुता स्मृति गीतादिज्ञानसाधन शास्त्रं येन । न विद्यते विद्वन्मुखाच्छ्रुते अंशांशित्वे स्मृतिर्यस्येति वा । तत्सङ्गात् रामासङ्गात् । ईदृशीं स्त्रीयोनिरूपाम् । हे प्रभो सर्वसाधनसमर्थ ॥ ५९ ॥ अयं वीरो मलयध्वजः सुहृत् पतिः । यया

माया ह्येषा मया सृष्टा यत्पुमांसं स्त्रियं सतीम् । मन्यसे नोभयं यद्वै हंसौ पश्यावयोर्गतिम् ६१
अहं भवान्न चान्यस्त्वं त्वमेवाहं विचक्ष्व भोः । न नौ पश्यन्ति कवयश्छिद्रं जातु मनागपि ६२
यथा पुरुष आत्मानमेकमादर्शचक्षुषोः । द्विधाभूतमवेक्षेत तथैवान्तरमावयोः ॥६३॥
एवं स मानसो हंसो हंसेन प्रतिबोधितः । स्वस्थस्तद्व्यभिचारेण नष्टामाप पुनः स्मृतिम् ।६४।
बर्हिष्मन्नेतदध्यात्मं पारोक्ष्येण प्रदर्शितम् । यत्परोक्षप्रियो देवो भगवान् विश्वभावनः ॥६५॥
इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां चतुर्थस्कन्धे पुरञ्जनोपाख्यानेऽष्टाविंशोऽध्यायः ॥२८॥

अथैकोनत्रिंशोऽध्यायः

प्राचीनबर्हिरुवाच

भगवंस्ते वचोऽस्माभिर्न सम्यगवगम्यते । कवयस्तद्विजानन्ति न वयं कर्ममोहिताः ॥१॥

नारद उवाच

पुरुषं पुरञ्जनं विद्याद्यद् व्यनक्त्यात्मनः पुरम् । एकद्वित्रिचतुष्पादं बहुपादमपादकम् ॥२॥

पुरे रुद्धस्तस्या पुर अन्या इति पूर्वजन्माभिप्रायेण । पक्षे न त्वं किन्तु मदंशः । अयं ते न सुहृत् हितकारी किन्तु एतद्रूपेणाऽहमेव गुरुरभवम् । यया बुद्धया ॥ ६० ॥ यत् यया पूर्वत्र पुमांसम् इदानीं च स्त्रियं मन्यसे सैषा माया यत उभयं पुंस्त्वस्त्रीत्वयुग्मं जीवे नास्ति । यत् यस्मात् वै निश्चितम् आवां हंसौ शुद्धौ अत आवयोर्गतिं स्वरूपं विचारय ॥ ६१ ॥ मनाक् ईषदपि जातु कदाचिदपि नौ आवयोः छिद्रं पृथगवस्थानं न पश्यन्ति । नहि अंशांशिनोः गुणगुणिनोः प्रभाप्रभावतोः जातिव्यक्त्योः कार्यकारणयोः पृथगवस्थानं संभवति एवं च स्वरूपतो भिन्नयोरप्यावयोः पृथगवस्थानादभेद इति स्वाभाविक आवयोर्भेदाभेदसंबन्ध इति सिद्धान्तः ॥ ६२ ॥ एतदेव दृष्टान्तेनोपपादयति-आत्मानं स्वभावत एकमेव देहम् । तथैवावयोरभेदे सत्यपि अन्तरं विद्याऽविद्याकृतं भेदं चावेक्षेतेत्यन्वयः ॥६३॥ पूर्वं यः पुरञ्जनत्वेनेदानीं च वैदर्भीत्वेनोक्तः स मानसो मानसरोवरवासी हंसः हंसेन अविज्ञातसखेन । तद्व्यभिचारेण सखिवियोगेन । स्मृतिं स्वरूपज्ञानम् । पक्षे । हंसो जीवः हंसेन ईश्वरेण । तद्व्यभिचारेण भगवद्वैमुख्येन । स्मृतिमाप मुक्तो बभवेत्यर्थः ॥ ६४ ॥ हे बर्हिष्मन् हे प्राचीनबर्हिः । आत्मानं जीवम् ईश्वरं चाधिकृत्य वर्तते इत्यध्यात्मं जीवेश्वरस्वरूपविवरणं पारोक्ष्येण राजकथाव्याजेन । यत् यस्मात् परोक्षं परोक्षतः तत्त्वकथनं प्रियं यस्य । तस्य सारल्येन बुद्धिस्थत्वादित्यर्थः ॥ ६५ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे गूढार्थदीपिन्यामष्टाविंशोऽध्यायः ।

पुरञ्जनकथाध्यात्मव्याख्यानं सारगर्भितम् ।
ऊनत्रिंशे कथं भोगो देहनाशादितीरितम् ॥ १ ॥

अध्यात्मपक्षस्य दुर्गमत्वात् न सम्यगिति ॥ १ ॥ पुरुषं जीवम् । यत् यतः पुरं शरीरं कर्मणा व्यनक्ति प्रकटयति जनयतीति तथा । पुरं विशिनष्टि । एक द्व्यादयः पादा यस्य । एकः पिशाचादेः । द्वौ

योऽविज्ञाताहृतस्तस्य पुरुषस्य सखेश्वरः । यन्न विज्ञायते पुम्भिर्नामभिर्वा क्रियागुणैः ॥३॥
यदा जिघृक्षन् पुरुषः कार्त्स्न्येन प्रकृतेर्गुणान् । नवद्वारं द्विहस्ताङ्घ्रि तत्रामनुत साध्विति ॥४॥
बुद्धिं तु प्रमदां विद्यान्ममाहमिति यत्कृतम् । यामधिष्ठाय देहेऽस्मिन् पुमान् भुङ्क्तेऽक्षभिर्गुणान्५
सखाय इन्द्रियगणा ज्ञानं कर्म च यत्कृतम् । सख्यस्तद्वृत्तयः प्राणः पञ्चवृत्तिर्यथोरगः ॥६॥
बृहद्बलं मनो विद्यादुभयेन्द्रियनायकम् । पञ्चालाः पञ्च विषया यन्मध्ये नवखं पुरम् ॥७॥
अक्षिणी नासिके कर्णौ मुखं शिश्नगुदाविति । द्वे द्वे द्वारौ बहिर्याति यस्तदिन्द्रियसंयुतः ॥८॥
अक्षिणी नासिके आस्यमिति पञ्च पुरः कृताः । दक्षिणा दक्षिणः कर्ण उत्तरा चोत्तरः स्मृतः॥९॥
पश्चिमे इत्यधो द्वारा गुदं शिश्नमिहोच्यते । खद्योताऽऽविर्मुखी चात्र नेत्रे एकत्र निर्मिते॥१०॥
रूपं विभ्राजितं ताभ्यां विचष्टे चक्षुषेश्वरः ॥११॥
नलिनी नालिनी नासे गन्धः सौरभ उच्यते । घ्राणोऽवधूतो मुख्यास्यं विपणो वाग्रसविद्रसः १२
आपणो व्यवहारोऽत्र चित्रमन्धो बहूदनम् । पितृहूर्दक्षिणः कर्ण उत्तरो देवहूः स्मृतः ॥१३॥
प्रवृत्तं च निवृत्तं च शास्त्रं पञ्चालसंज्ञितम् । पितृयानं देवयानं श्रोत्राच्छ्रुतधराद्व्रजेत् ॥१४॥
आसुरी मेढ्रमर्वाग्द्वार्व्यवायो ग्रामिणां रतिः । उपस्थो दुर्मदः प्रोक्तो निरृतिर्गुद उच्यते ॥१५॥
वैशसं नरकं पायुर्लुब्धकोऽन्धौ तु मे शृणु । हस्तपादौ पुमांस्ताभ्यां युक्तो याति करोति च१६
अन्तःपुरं च हृदयं विषूचिर्मन उच्यते । तत्र मोहं प्रसादं वा हर्षं प्राप्नोति तद्गुणैः ॥१७॥

मनुष्यादेहः । त्रयो ज्वरादेः । चत्वारः पश्वादेः बह्वः गोजर कानखजूरेति प्रसिद्धस्य । अपादकं सर्पादि ।२। अविज्ञातशब्देन उदाहृत उक्तो यः स ईश्वरः पुरुषस्य जीवस्य सखा । यत् यतः सः । नामभिः अहम् ऋग्वेदीत्यादिभिः । यज्ञादिक्रियाभिः गुणैरुदारत्वादिभिश्च किं बहुना विविधैरुपायैरपि न भक्त्यैव तस्य विज्ञेयत्वादित्यर्थः ॥ ३ ॥ यदा पुरुषो जीवः गुणान् विषयान् जिघृक्षुर्भवति तत्र तदा मनुष्यशरीरं साधु श्रेष्ठमिति अमन्यत ॥४॥ यत् यया । यां बुद्धिमाश्रित्य । अक्षभिरिन्द्रियैर्गुणान् विषयान् ।५। यत् येन इन्द्रियगणेन ज्ञानं शब्दादिबोधरूपं कर्म आदानादिरूपं च कृतं भवति । तद्वृत्तय इन्द्रियवृत्तयः । प्राणापानादिभेदेन पञ्चवृत्तिः प्राणः पञ्चशिराः सर्प इव भवतीति ॥ ६ ॥ महाभटव्याख्या बृहद्बलं मन इति । नायकत्वं विषयं प्रति नेतृत्वात् । यत् येषां विषयाणाम् । नवद्वारं शरीरम् ॥७॥ द्वे द्वे अक्ष्यादिकं च एकैका द्वास्ताभिः द्वार्भिः तत्तदिन्द्रियैः संयुक्तो जीवः बहिर्विषयं प्रति ॥ ८ ॥ पञ्च द्वारः पुरः पूर्वभागे । पश्चिम इत्यर्द्धम् इति प्रतीकग्रहणम् ।१०। अत्राध्यात्मपक्षे विभ्राजितमित्यस्य व्याख्या रूपम् । चक्षुषेति द्युमदित्यस्य व्याख्या । ईश्वरो जीवः ॥ ११ ॥ नासे गन्धः घ्राणः आस्यमिति व्याख्या । विपणो वागिन्द्रियम् । रसविद् तस्य रसज्ञः व्याख्या रसः रसनेन्द्रियम् ॥ १२ ॥ व्यवहारो भाषणम् । चित्रमन्धः चतुर्विधमन्नम् ॥ १३ ॥ प्रवृत्तं कर्मकाण्डात्मकं दक्षिणपञ्चालसंज्ञितं पितृलोकप्रापकत्वात् पितृयानं निवृत्तं ज्ञानकाण्डात्मकमुत्तरपञ्चालसंज्ञितं देवलोकप्रापकत्वात् देवयानम् एवमुभयविधशास्त्रतात्पर्यं श्रोत्रात् श्रोत्रेन्द्रियमाश्रित्य व्रजेत् जानाति जीव इति शेषः । श्रुतधरपदव्याख्या श्रोत्रादिति ॥ १४ ॥ अर्वाक् पश्चात् नीचैः आसुरी द्वाः मेढ्रम् । ग्रामिणां रतिः । ग्राम्यकं व्याख्या व्यवायः मैथुनम् ॥ १५।१६ ॥ तत्र मनसि । तद्गुणैर्मनोगुणैः तमःसत्त्वरजोभिः ॥ १७ ॥

यथा यथा विक्रियते गुणाक्तो विकरोति वा । तथा तथोपद्रष्टाऽऽत्मा तद्वृत्तीरनुकार्यते ॥१८॥
देहो रथस्त्विन्द्रियाश्वः संवत्सररयो गतिः । द्विकर्मचक्रस्त्रिगुणध्वजः पञ्चासुबन्धुरः ॥१९॥
मनोरश्मिर्बुद्धिसूतो हृन्नीडो द्वन्द्वकूबरः । पञ्चेन्द्रियार्थप्रक्षेपः सप्तधातुवरूथकः ॥२०॥
आकूतिर्विक्रमो बाह्यो मृगतृष्णां प्रधावति । एकादशेन्द्रियचमूः पञ्चसूनाविनोदकृत् ॥२१॥
संवत्सरश्चण्डवेगः कालो येनोपलक्षितः । तस्याहानीह गन्धर्वा गन्धर्व्यो रात्रयः स्मृताः ॥
हरन्त्यायुः परिक्रान्त्या षष्ट्युत्तरशतत्रयम् ॥२२॥
कालकन्या जरा साक्षाल्लोकस्तां नाभिनन्दति । स्वसारं जगृहे मृत्युः क्षयाय यवनेश्वरः ॥२३॥
आधयो व्याधयस्तस्य सैनिका यवनाश्चराः । भूतोपसर्गाशुरयः प्रज्वारो द्विविधो ज्वरः ।२४।
एवं बहुविधैर्दुःखैर्दैवभूतात्मसम्भवैः । क्लिश्यमानः शतं वर्षं देहे देही तमोवृतः ॥२५॥
प्राणेन्द्रियमनोधर्मानात्मन्यध्यस्य निर्गुणः । शेते कामलवान् ध्यायन्ममाहमिति कर्मकृत् ॥२६॥
यदाऽऽत्मानमविज्ञाय भगवन्तं परं गुरुम् । पुरुषस्तु विषज्जेत गुणेषु प्रकृतेः स्वदृक् ॥२७॥
गुणाभिमानी स तदा कर्माणि कुरुतेऽवशः । शुक्लं कृष्णं लोहितं वा यथा कर्माभिजायते ॥२८॥
शुक्लात्प्रकाशभूयिष्ठाँन् लोकानाप्नोति कर्हिचित् । दुःखोदर्कान् क्रियायासांस्तमःशोकोत्कटान् क्वचित्
क्वचित्पुमान् क्वचिच्च स्त्री क्वचिन्नोभयमन्धधीः । देवो मनुष्यस्तिर्यग्वा यथाकर्मगुणं भवः ॥३०

महिषी यद्यदीहेत इत्यादेरर्थं संगृह्य व्याचष्टे । स्वप्ने यथा बुद्धिः दैवेन विक्रियते जागरे यथा विकरोति इन्द्रियाणि परिभ्रामयति तथा तस्याः गुणैर्लिप्तो जीवः तद्वृत्तीः दर्शनस्पर्शनाद्या बुद्ध्यैव बलादनुवर्त्यते । बुद्धेः कर्तृत्वमकर्तर्यात्मनि आरोप्यते इत्यर्थः ॥ १८ ॥ आशुगमित्यत्र गतिर्विवक्षिता संवत्सरवेगतुल्या । बन्धुरा बन्धाः । 'साम्ये बन्धे च बन्धुरः' इत्यभिधानात् ॥ १९ ॥ नीड उपवेशस्थानम् । कूबरो युगबन्धनस्थानम् । प्रक्षेपः प्रहरणम् । वरूथा रक्षार्थमावरणानि ॥ २० ॥ चमूर्पस्येति कबभाव आर्षः । पञ्चसु विषयेषु सूनेव हिंसेव दुःखोदर्को यो विनोदस्तं करोतीति तथाभूतो जीवः मृगतृष्णावन्मिथ्याभूतानेव विषयान्प्रधावति न तु सुखं प्राप्नोति । अनेन चचार मृगयामित्यादि व्याख्यातम् ॥ २१ ॥ संवत्सर इति सार्द्धम् । ते च सर्वे मिलिताः षष्ट्युत्तरशतत्रयसंख्याकाः पुरुषस्यायुर्हरन्ति । परिक्रान्त्या पुनः पुनरावृत्या ॥ २२ ॥ लोकानां क्षयाय स्वसारं स्वसृत्वेन भगिनीत्वेन । अधर्मांशोद्भवत्वात् तस्य स्वसाऽपि भार्याऽपि अभूत् । यो यवनेश्वरः स मृत्युः ॥ २३ ॥ तस्य मृत्योः चराः सञ्चारिणः । भूतानामुपसर्गे क्लेशे आशुरयो मारको वेगो यस्य सः शीतोष्णरूपेण द्विविधो ज्वरः प्रज्वारो ज्ञेयः ॥२४॥ एतत्प्रकरणतात्पर्यमाह-एवमिति युग्मकेन आधिदैविकाधिभौतिकाध्यात्मिकैः । तमोवृतः अज्ञानाच्छन्नो जीवः अहं ममेति हेतोः कर्मकृत् देहे शेते वसति । क्रमेण क्षुत्पिपासादीन् अन्धत्वादीन् कामादींश्च आत्मनि आरोप्य ॥२५।२६॥ यदेति युग्मकम् । आत्मानं परमात्मानम् । यदा प्रकृतेर्गुणेषु स्वदृक् देहादिषु आत्मबुद्धिः सन् आसक्तो भवेत् तदा अवशः परतन्त्रः सन् कर्माणि कुरुते ततश्च सात्त्विकं तामसं राजसं वा यथा तस्य कर्म तथैव सोऽभिजायते जन्म लभते इत्यन्वयः ॥२७।२८॥ शुक्लात् सात्त्विकात् । लोक्यन्ते कर्मफलानि भुज्यन्ते यैरिति लोकान् देवादिदेहान् । दुःखमेवोदर्कं उत्तरंफलं येषु तान् मनुष्यादीन् राजसात् । तामसात् तिर्यगादींश्च आप्नोति ।२९। नोभयं नपुंसकम् । यथेति गुणकर्मानुसारेणेत्यर्थः । भवः जन्म

क्षुत्परीतो यथा दीनः सारमेयो गृहं गृहम् । चरन् विन्दति यद्दिष्टं दण्डमोदनमेव वा ॥३१॥
तथा कामाशयो जीव उच्चावचपथा भ्रमन् । उपर्यधो वा मध्ये वा याति दिष्टं प्रियाप्रियम् ३२
दुःखेष्वेकतरेणापि दैवभूतात्महेतुषु । जीवस्य न व्यवच्छेदः स्याच्चेत्तत्तत्प्रतिक्रिया ॥३३॥
यथा हि पुरुषो भारं शिरसा गुरुमुद्वहन् । तं स्कन्धेन स आधत्ते तथा सर्वाः प्रतिक्रियाः ॥३४॥
नैकान्ततः प्रतीकारः कर्मणां कर्म केवलम् । द्वयं ह्यविद्योपसृतं स्वप्ने स्वप्न इवानघ ॥३५॥
अर्थे ह्यविद्यमानेऽपि संसृतिर्न निवर्तते । मनसा लिङ्गरूपेण स्वप्ने विचरतो यथा ॥३६॥
अथात्मनोऽर्थभूतस्य यतोऽनर्थपरम्परा । संसृतिस्तद्व्यवच्छेदो भक्त्या परमया गुरौ ॥३७॥
वासुदेवे भगवति भक्तियोगः समाहितः । सध्रीचीनेन वैराग्यं ज्ञानं च जनयिष्यति ॥३८॥
सोऽचिरादेव राजर्षे स्यादच्युतकथाश्रयः । शृण्वतः श्रद्दधानस्य नित्यदा स्यादधीयतः ॥३९॥
यत्र भागवता राजन् साधवो विशदाशयाः । भगवद्गुणानुकथनश्रवणव्यग्रचेतसः ॥४०॥

तस्मिन् महन्मुखरिता मधुभिच्चरित्रपीयूषशेषसरितः परितः स्रवन्ति ।
ता ये पिबन्त्यवितृषो नृप गाढकर्णैस्तान्न स्पृशन्त्यशनतृड्भयशोकमोहाः॥४१॥

एतैरुपद्रुतो नित्यं जीवलोकः स्वभावजैः । न करोति हरेर्नूनं कथामृतनिधौ रतिम् ॥४२॥
प्रजापतिपतिः साक्षाद्भगवान् गिरिशो मनुः । दक्षादयः प्रजाध्यक्षा नैष्ठिकाः सनकादयः॥४३॥

भवति ॥ ३० ॥ क्षुदिति युग्मकम् । यत् दिष्टं दैवतः प्राप्तं तदेव । ताडनमन्नं वा । सारमेयः श्वा । दीन इति राजकीयव्यावृत्त्यर्थम् । परीतो व्याप्तः ॥ ३१ ॥ कामे विषये आशयो मनो यस्य । यत् दिष्टं तदेव प्राप्नोति । उच्चनीचमार्गेण ॥ ३२ ॥ व्यवच्छेदः वियोगः । तत्तद्दुःखस्य प्रतिक्रिया चेत्तदपि न तासामपि दुःखरूपत्वादित्यर्थः ॥३३।३४॥ केवलं ज्ञानशून्यं कर्म कर्मणां दुःखहेतुभूतसर्वपापानामेकान्ततो निःशेषतः निवर्तकं न भवति । यतः पापकर्म पापनिवर्तकं चेति द्वयमपि कर्म देहाभिमानरूपाज्ञानेन जनितम् अतोऽज्ञानमूलत्वेन न तयोर्निवर्त्यनिवर्तकसंबन्धः यथा । स्वप्ने दृष्टः स्वप्नो जागरणं विना न निवर्तते एवं भक्तिसिक्तज्ञानं विनापि न कर्मवासना न च तज्जन्यदुःखं निवर्तते इति तात्पर्यम् ॥ ३५ ॥ अर्थे दुःखादिरूपे जीवस्य वस्तुतोऽविद्यमानेपि तन्निवर्तनं विना संसृतिर्न निवर्तते यथा स्वप्ने सूक्ष्मरूपेण मनसा सह विचरतो जीवस्य मिथ्याभूतमपि सर्पादिकं वस्तु दुःखदमेव जागरणं विना ॥३६॥ अथ तस्माद् अर्थभूतस्य सुखस्वरूपस्य आत्मनो जीवस्य यतोऽज्ञानात् दुःखपरम्परारूपा संसृतिर्भवति तस्याज्ञानस्य नाशो गुरौ वासुदेवे भक्त्यैव नान्यथा ब्रह्माऽस्मीति प्रलापेन ॥३७॥ समाहितः सम्यक् कृतः । सध्रीचीनेन समीचीनेन अनायासेनेत्यर्थः ॥ ३८ ॥ अच्युतकथैव आश्रय उत्पत्तिस्थानं यस्य स भक्तियोगः कथा शृण्वतः श्रद्धालोर्जनस्य स्यादेव स्यादेवेति द्विरुक्तिर्दार्ढ्यार्था ॥ ३९ ॥ कुत्र शृण्वतः । यत्र भगवद्भक्ता वसन्ति तत्रेत्यर्थः । पुनः पुनः कथने श्रवणे च व्यग्रं हा हा समयो व्यतीत इत्येवं संलग्नं चेतो येषाम् ॥ ४० ॥ तस्मिन् भक्तसमाजे महद्भिर्मुखरिता भक्तैर्वर्णिता श्रीकृष्णचरितामृतसारभूतनद्यो वहन्ति । ता ये पिबन्ति शृण्वन्ति तान् अशनादयो न स्पृशन्ति न बाधन्ते । अवितृषोऽलंबुद्धिशून्याः सन्तः गाढकर्णैर्दत्तकर्णैः । अशनं क्षुत् । तृट् पिपासा ॥४१॥ स्वभावजैः सह जातैः एतैरशनादिभिरुपद्रुतो व्याकुलो जीवसमूहः ॥ ४२ ॥ प्रजेति त्रिकम् । पतिर्ब्रह्मा तदादयः मत्पर्यन्ता एते वाचस्पतय आगमतत्त्वज्ञाः तप आदि-

मरीचिरत्र्यङ्गिरसौ पुलस्त्यः पुलहः क्रतुः। भृगुर्वसिष्ठ इत्येते मदन्ता ब्रह्मवादिनः ॥४४॥
अद्यापि वाचस्पतयस्तपोविद्यासमाधिभिः। पश्यन्तोऽपि न पश्यन्ति पश्यन्तं परमेश्वरम् ॥४५॥
शब्दब्रह्मणि दुष्पारे चरन्त उरुविस्तरे। मन्त्रलिङ्गैर्व्यवच्छिन्नं भजन्तो न विदुः परम् ॥४६॥
यदा यमनुगृह्णाति भगवानात्मभावितः। स जहाति मतिं लोके वेदे च परिनिष्ठिताम् ॥४७॥
तस्मात्कर्मसु बर्हिष्मन्नज्ञानादर्थकाशिषु। माऽर्थदृष्टिं कृथाः श्रोत्रस्पर्शिष्वस्पृष्टवस्तुषु ॥४८॥
स्वं लोकं न विदुस्ते वै यत्र देवो जनार्दनः। आहुर्धूम्रधियो वेदं सकर्मकमतद्विदः ॥४९॥
आस्तीर्य दर्भैः प्रागग्रैः कार्त्स्न्येन क्षितिमण्डलम्। स्तब्धो बृहद्वधान्मानी कर्म नावैषि यत्परम् ॥५०॥
तत्कर्म हरितोषं यत्सा विद्या तन्मतिर्यया ॥५१॥
हरिर्देहभृतामात्मा स्वयं प्रकृतिरीश्वरः। तत्पादमूलं शरणं यतः क्षेमो नृणामिह ॥५२॥
स वै प्रियतमश्चात्मा यतो न भयमण्वपि। इति वेद स वै विद्वान् यो विद्वान् स गुरुर्हरिः ॥५३॥

नारद उवाच

प्रश्न एवं हि संछिन्नो भवतः पुरुषर्षभ। अत्र मे वदतो गुह्यं निशामय सुनिश्चितम् ॥५४॥

क्षुद्रञ्चरं सुमनसां शरणे मिथित्वा रक्तं षडङ्घ्रिगणसामसु लुब्धकर्णम्।
अग्रे वृकानसुतृपोऽविगणय्य यान्तं पृष्ठे मृगं मृगय लुब्धकबाणभिन्नम् ॥५५॥

[अस्यार्थः]

सुमनःसधर्मणां स्त्रीणां शरण आश्रमे पुष्पमधुगन्धवत्क्षुद्रतमं काम्यकर्मविपाकजं काम सुखलवं जैह्वयौपस्थ्यादि विचिन्वन्तं मिथुनीभूय तदभिनिवेशितमनसं षडङ्घ्रिगणसामगीतवदति

साधनैः परमेश्वरं श्रीकृष्णं पश्यन्तः विचिन्वन्तोऽपि न पश्यन्ति भक्तिं विनेति शेषः 'भक्त्या मामभिजानाति' इति गीतोक्तेः सृष्टेरारभ्य अद्यावध्यप्येष एव सिद्धान्तो ज्ञेयः। साक्षाद्भगवान् भगवत्तत्त्वज्ञः गिरिशश्चेति सर्वेषां गुरुत्वेन मध्ये निर्दिष्टः ॥ ४३।४४।४५ ॥

अर्थतो दुष्पारे स्वरूपत उरुविस्तरे वेदे विचरन्तः जिज्ञासया प्रविष्टा अपि 'वज्रहस्तः पुरन्दरः' इत्यादिमन्त्रलिङ्गैर्वेदोक्तलक्षणैर्व्यवच्छिन्नं युक्तमिन्द्रादिकमेव भजन्तः परं श्रीकृष्णं न विदुः ॥ ४६ ॥ आत्मनि मनसि भावितः चिन्तितः यं भक्तं तदैव स लौकिकव्यवहारे कर्मकाण्डे च दृढां मतिम् ॥ ४७ ॥ यतो भक्तिसिक्तज्ञानेनैव मोक्षः तस्मात् कर्मसु पुरुषार्थबुद्धिं मा कृथाः। कथंभूतेषु। अज्ञानात् वेदस्य कर्मपरत्वभ्रमात् अक्षयार्थदर्शित्वेन भासमानेषु केवलं कर्णरम्येषु न स्पृष्टं मुख्यवस्तु कृष्णतत्त्वं यैस्तेषु कृष्णगन्धरहितेषु ॥ ४८ ॥ यत्र देवो मुख्यविषयतया प्रतिपाद्यते तं वेदं ये सकर्मकं कर्मपरमाहुस्ते मीमांसका अतद्विदः वेदतात्पर्यानभिज्ञाः। कुतः मलिनबुद्धयः। अतस्ते स्वमसाधारणं नित्यं वैकुण्ठलोकं न विदुः किन्तु पतनोन्मुखं स्वर्गमेवेत्यन्वयः ॥ ४९ ॥ आस्तीर्य आच्छाद्य। स्तब्धोऽनम्रः। बहुपशुवधात्। यत्परं मुख्यं कर्म ईश्वराराधनलक्षणं तन्न जानासि ॥ ५० ॥ हरिं तोषयतीति यत्तदेव ॥ ५१ ॥ आत्मा आधारः स्वयं स्वातन्त्र्येण प्रकृतिः कारणरूपश्च अतस्तस्य पादमूलमेव इह संसारे शरणं रक्षकम् ॥५२॥ हरिरिति अज्ञानहरत्वादुक्तम् ॥ ५३ ॥ संछिन्नः कृतोत्तरः। अत्र अवसरे मे गुह्यं वचः शृणु ॥ ५४ ॥ सुमनसां शरणे पुष्पवाटिकायां मिथित्वा स्त्रिया सह मिलित्वा रक्तमासक्तं क्षुद्रं दूर्वादि चरतीति तं

मनोहरवनितादिजनालापेष्वतितरामतिप्रलोभितकर्णमग्रे वृकयूथवदात्मन आयुर्हरतोऽहोरात्रा-
न्तान् काललवविशेषानविगणय्य गृहेषु विहरन्तं पृष्ठत एव परोक्षमनुप्रवृत्तो लुब्धकः कृतान्तोऽन्तः
शरेण यमिह पराविध्यति तमिममात्मानमहो राजन् भिन्नहृदयं द्रष्टुमर्हसि मृगयुहतं मृगमिव ५६

स त्वं विचक्ष्य मृगचेष्टितमात्मनोऽन्तश्चित्तं नियच्छ हृदि कर्णधुनीं च चित्ते ।
जह्यङ्गनाश्रममसत्तमयूथगाथं प्रीणीहि हंसशरणं विरम क्रमेण ॥५७॥

राजोवाच

श्रुतमन्वीक्षितं ब्रह्मन् भगवान् यदभाषत । नैतज्जानन्त्युपाध्यायाः किं न ब्रूयुर्विदुर्यदि ॥५८॥
संशयोऽत्र तु मे विप्र संछिन्नस्तत्कृतो महान् । ऋषयोऽपि हि मुह्यन्ति यत्र नेन्द्रियवृत्तयः ॥५९
कर्माण्यारभते येन पुमानिह विहाय तम् । अमुत्रान्येन देहेन जुष्टानि स यदश्नुते ॥६०॥
इति वेदविदां वादः श्रूयते तत्र तत्र ह । कर्म यत्क्रियते प्रोक्तं परोक्षं न प्रकाशते ॥६१॥

नारद उवाच

येनैवारभते कर्म तेनैवामुत्र तत्पुमान् । भुङ्क्ते ह्यव्यवधानेन लिङ्गेन मनसा स्वयम् ॥६२॥

मृगं मृगय आलोचय । साभसु गीतेषु । असुतृपः स्वप्राणतर्पणपरान् ॥ ५५ ॥ उक्तपद्यं स्वमेव व्याख्याति पुष्पैः संमानो धर्मो सचो विरूपत्वादिलक्षणो यामाम् । आश्रमे गार्हस्थ्ये । विपाकजं परिणामजं फलरूप-मित्यर्थः । विचिन्वन्तम् अन्वेषयन्तम् । अति सततम् । अन्तःशरेण प्राणाकर्षणरूपेण दूरादेव ताडयति तमिमं स्वात्मानं जीवम् अर्हसीत्यग्रे मृगयुहतं मृगमिवेति पाठश्च्युतः तीर्थव्याख्यानात् ॥ ५६ ॥ आत्मनो मृगवच्चेष्टितं निचक्ष्य विचार्य कर्णधुनीं नदीमिव विषयवाहिनीं सर्वेन्द्रियवृत्तिं चित्ते नियच्छ । निरुध्य च तच्चित्तं हृद्यन्तः स्थे श्रीकृष्णे नियच्छ योजय स्थापयेति वा । कामिनां यूथस्य विषयवार्तैव यत्र तं गृहाश्रमं जहि । हंसानां सारग्राहिणां भक्तानां रक्षकं भगवन्तं च प्रसादय । एवं क्रमेण विषया-नन्दात् विरम । कर्णेति सर्वेन्द्रियाणामुपलक्षणम् । धुनी नदी । कर्णयो र्धुनीं नदीमिव प्रवहतीं 'अक्षय्यं ह वै' इत्यादिरूपां च फलश्रुतिं वा ॥ ५७ ॥ भवान् यदभाषत तन्मया श्रुतं विचारितं च । एतत् त्वदुक्तं भक्तितत्त्वम् ॥ ५८ ॥ अत्र भक्तिमार्गे तत्कृत उपाध्यायकृतोऽसंभावनारूपः महान् संशयः संछिन्नः तु शब्देन किन्तु कर्ममार्गे एकः संशयोऽस्ति तमपि छिन्धि यत्र संशयपदे इन्द्रियवृत्तीनामप्रवृत्तेः तेऽपि मुह्यन्ति मोहात्कर्म कुर्वन्ति कारयन्ति च ॥ ५९ ॥ उक्तमेव स्पष्टयति । येन देहेन कुरुते तमिहैव विहाय अमुत्र परलोके जुष्टानि प्राप्तानि कर्मफलानि अन्येन देहेनाश्नुते इति वादः तत्र तत्र शास्त्रेषु ह प्रसिद्धतया यच्छ्रूयते तत्कथं घटते इत्यन्वयः । तन्नोपयुज्यते वा ॥ ६० ॥ किञ्च संशयान्तरमाह प्रोक्तं वेदोक्तं यत् क्रियते तत्परोक्षमदृश्यं सत् क्षणान्तरे च न प्रकाशते नष्टत्वात् अतस्तत्फलभोगोऽपि कथम् ॥ ६१ ॥ उत्तरयति-मनः प्रधानत्वात् मनसा प्रेरितेन येन लिङ्गेन देहेन कर्म करोति अमुत्र परलोके व्यवधान-

शयानमिममुत्सृज्य श्वसन्तं पुरुषो यथा । कर्मात्मन्याहितं भुङ्क्ते तादृशेनेतरेण वा ॥६३॥
ममैते मनसा यद्यदसावहमिति ब्रुवन् । गृह्णीयात्तत्पुमान् राद्धं कर्म येन पुनर्भवः ॥६४॥
यथानुमीयते चित्तमुभयैरिन्द्रियेहितैः । एवं प्राग्देहजं कर्म लक्ष्यते चित्तवृत्तिभिः ॥६५॥
नानुभूतं क्व चानेन देहेनादृष्टमश्रुतम् । कदाचिदुपलभ्येत यद्रूपं यादृगात्मनि ॥६६॥
तेनास्य तादृशं राजँल्लिङ्गिनो देहसम्भवम् । श्रद्धत्स्वाननुभूतोऽर्थो न मनः स्प्रष्टुमर्हति ॥६७॥
मन एव मनुष्यस्य पूर्वरूपाणि शंसति । भविष्यतश्च भद्रं ते तथैव न भविष्यतः ॥६८॥
अदृष्टमश्रुतं चात्र क्वचिन्मनसि दृश्यते । यथा तथानुमन्तव्यं देशकालक्रियाश्रयम् ॥६९॥
सर्वे क्रमानुरोधेन मनसीन्द्रियगोचराः । आयान्ति वर्गशो यान्ति सर्वे समनसो जनाः ॥७०॥
सत्त्वैकनिष्ठे मनसि भगवत्पार्श्ववर्तिनि । तमश्चन्द्रमसीवेदमुपरज्यावभासते ॥७१॥

शून्येन तेनैव तत्कर्मफलं भुङ्क्ते । लिङ्गशरीरस्यैव कर्तृत्वेन परत्राऽपि तस्यैव भोक्तृत्वाद्व्यवधानाभावेन नोक्तदोषप्रसक्तिरित्यर्थः ॥ ६२ ॥ एतच्च स्वप्नदृष्टान्तेन स्पष्टयति । इमं स्थूलदेहम् उत्सृज्य विस्मृत्य आत्मनि मनसि आहितसंस्काररूपेण स्थितं कर्मफलं तादृशेन कर्मोपस्थापितेन शयानदेहसदृशेन अन्येन देवादिशरीरेण वा यथा भुङ्क्ते तथा लोकान्तरेऽपीति ॥ ६३ ॥ ममैते पुत्रादयः असौ अहं ब्राह्मण इति ब्रुवन् मनसा लिङ्गेन यत् यत् स्थूलदेहम् अभिमानविषयीकुर्यात् तत् तत् ततो देहात् राद्धं सिद्धं कर्मैव गृह्णीयात् पुमान् न स्थूलं येनाहङ्कारगृहीतेन कर्मणा पुनर्जन्म भवति अतोऽभिमानकर्तुर्लिङ्गदेहस्यैव कर्तृत्वं स्थूलस्य तु पुत्रादि देहवत् केवलं द्वारमात्रत्वमिति भावः ॥ ६४ ॥ कर्मणो नष्टत्वात्कथं भोग इत्युत्तरयति । उभयैर्ज्ञानिकर्मरूपैरीहितैश्चेष्टाभिर्यथा चित्तम् एवं चित्तवृत्तिभिः कर्मेत्यन्वयः ॥ ६५ ॥

स्थूलनाशेऽपि सूक्ष्मानाशे युक्तिमाह द्वाभ्याम् । अनेन वर्तमानेन देहेन क्वचिदपि यन्नानुभूतं यद्रूपं यत्प्रकारकं च वस्तु तत्कदाचित् स्वप्नमनोरथादौ आत्मनि मनसि उपलभ्येत् तेनैव हेतुनाऽस्य लिङ्गिनो जीवस्य तादृशमनुभवादिकं पूर्वदेहसंभवं निश्चयेन मन्यस्व । यतो न ह्यननुभूतोऽर्थः मनसि स्फुरितुमर्हति ॥ ६६।६७ ॥ मन एव सात्त्विकादिवृत्तिभिः पूर्वपूर्वशरीराणि पूर्वमप्येवमेवाऽऽसीत् दिति कथयति । भविष्यतश्च तस्य भावीनि शरीराणि एवमेवायं भविष्यतीति । न भविष्यत पुनर्न जनिष्यमाणस्य अस्य मुक्तिर्भविष्यतीति मन एव ज्ञापयति अत एकमेव मनोमयं लिङ्गशरीरं न पुनः पुनः जायते इत्यर्थः ॥ ६८ ॥ अत्र जन्मनि क्वचित्स्वप्ने अदृष्टमश्रुतमपि यथा पर्वताग्रे समुद्रादि दिवा नक्षत्रादि स्वशिरश्छेदादि च मनसि दृश्यते चेत्तर्हि तद्यथा घटते तत् तथाऽनुमन्तव्यं घटनीयं कथं तत्राह देशेति । मैनाकस्य समुद्रान्तः पातित्वात्तदुपरिदेशाश्रयः समुद्रोऽस्तीत्युक्तं वाल्मीकीये । निशाश्रयं नक्षत्रादि च सूर्यस्य सर्वग्रासे सति दिवाऽपि दृश्यते एव तैलमर्दनाद्यशुचिदशायां शयने तदाश्रयः स्वशिरश्छेदादिरपि नासंभव इत्युक्तं चरकादौ ॥ ६९ ॥ किं बहुना सर्वेऽपि गोचरा विषया समुदायरूपेण क्रमानुसारेण वा एकैकशो एकैकशो मनसि उत्पद्यन्ते विलीयन्ते च यतः सर्वे समनसः मनःप्रधानलिङ्गशरीरवन्तः अतो नादृश्यः कश्चन पदार्थोऽस्तीति ॥ ७० ॥ किञ्च भगवद्विषये मनसि उपरज्य संयोगमिव प्राप्य इदं विश्वमपि अवभासते विश्वतया प्रतीयते चन्द्रमसि उपरज्य यथा कदाचित् राहुरिति प्रतीयमान-

नाहं ममेति भावोऽयं पुरुषे व्यवधीयते । यावद्बुद्धिमनोऽक्षार्थगुणव्यूहो ह्यनादिमान् ॥७२॥
सुप्तिमूर्च्छोपतापेषु प्राणायनविघाततः । नेहतेऽहमिति ज्ञानं मृत्युप्रज्वारयोरपि ॥७३॥
गर्भे बाल्येऽप्यपौष्कल्यादेकादशविधं तदा । लिङ्गं न दृश्यते यूनः कुह्वां चन्द्रमसो यथा ॥७४॥
अर्थे ह्यविद्यमानेऽपि संसृतिर्न निवर्तते । ध्यायतो विषयानस्य स्वप्नेऽनर्थागमो यथा ॥७५॥
एवं पञ्चविधं लिङ्गं त्रिवृत् षोडशविस्तृतम् । एष चेतनया युक्तो जीव इत्यभिधीयते ॥७६॥
अनेन पुरुषो देहानुपादत्ते विमुञ्चति । हर्षं शोकं भयं दुःखं सुखं चानेन विन्दति ॥७७॥
यथा तृणजलूकेयं नापयात्यपयाति च । न त्यजेन्म्रियमाणोऽपि प्राग्देहाभिमतिं जनः ॥
यावदन्यं न विन्देत व्यवधानेन कर्मणाम् ।७८। मन एव मनुष्येन्द्र भूतानां भवभावनम् ।।७९।।
यदाक्षैश्चरितान् ध्यायन् कर्माण्याचिनुतेऽसकृत् । सति कर्मण्यविद्यायां बन्धः कर्मण्य आत्मनः८०
अतस्तदपवादार्थं भज सर्वात्मना हरिम् । पश्यंस्तदात्मकं विश्वं स्थित्युत्पत्त्यप्यया यतः ।८१।

स्यापि प्रतीतौ दृष्टान्तः ॥ ७१ ॥ पुरुषे जीवे भावोऽध्यासलक्षणः तावन्न व्यवधीयते न विमुक्तो भवति यावत् बुद्ध्यादिरूपः गुणव्यूहो गुणपरिणामो लिंगदेहोऽस्ति ॥ ७२ ॥ सुप्त्यादिषु अहमिति ज्ञानं नेहते प्रकटरूपेण न प्रकाशते । कुतः । इन्द्रियाणां विघातात् लयात् नतु लिङ्गाभावेन ॥ ७३ ॥

यूनस्तरुणस्य यत् एकादशेन्द्रियैः स्फुटं लिङ्गमहङ्करणं तत्तदा गर्भादौ न दृश्यते । अपौष्कल्यात् इन्द्रियायतनानामसंपूर्णत्वात् नतु लिङ्गाभावेनेति योज्यम् । यथा कुह्वाममावास्यायां सतोऽपि चन्द्रमसो रूपं न दृश्यते तद्वत् ॥ ७४ ॥ अर्थे शब्दादिविषये वस्तुतोऽविद्यमानेऽपि तान् ध्यायतोऽस्य जन्ममरणादि परम्परा न निवर्तते । यथा स्वप्ने शिरश्छेदादि जागरणं विना न ॥ ७५ ॥ लिङ्गदेहं वर्णयति । पञ्चविधं पञ्चतन्मात्रात्मकम् एकादशेन्द्रियैः सह षोडशात्मना विस्तृतम् त्रिभिर्वर्तते इति त्रिवृत् त्रिगुणकार्यभूतं यदेवं लिङ्गदेहः स एष चेतनया बुद्ध्या युक्तः सप्तदशतत्त्वात्मकः जीवः जीवोपाधिरुच्यते । पञ्चप्राणस्य स्पर्शतन्मात्रेऽन्तर्भावः ॥७६॥ अनेन लिङ्गदेहेन युक्तः पुरुषो जीवः देहान् स्थूलान् ॥ ७७ ॥ यथेति सार्द्धम् । यथेयं प्रसिद्धा तृणजलूका कीटविशेषः यदा तृणान्तरं गच्छति तदा तद्ग्रहणं विना पूर्वतृणान्नापगच्छति तद्गृहीत्वा तु अपयाति एवं प्राचीनकर्मणां व्यवधानेन भोगेन समाप्त्या यावदन्यं देहं न लभते तावत् म्रियमाणोऽपि पूर्वं देहाऽभि मतिं न त्यजतीत्यन्वयः ॥ ७८ ॥ मन इत्यर्द्धम् । मनः मनःप्रधानलिङ्गदेह एव प्राणिनां भवं संसारं भावयति उत्पादयतीति तथा ॥ ७९ ॥ अक्षैरिन्द्रियैश्चरितानुपभुक्तान् विषयान् आचिनुते करोति । अविद्यायां विषयेच्छायां सत्यां कर्म भवति तस्मिन् सति आत्मनो जीवस्य बन्धः स च कर्मण्यः[1] कर्महेतुक इति पाठः शोभनः प्रतिभाति तीर्थादिबह्वाचार्यसम्मतत्वात् । तत्रैवाग्रहे तु—यतः कर्मणि एकस्मिन्नपि बीजरूपे स्थिते सति अविद्यायां सत्याम् अनात्मनो देहादेः कर्मणि ॥ ८० ॥ तदपवादार्थम् अविद्यानिवृत्यर्थम् । तदात्मकं तद्रूपम् । यतो

---

१. कर्मण्य आत्मनः इति पाठः ।

मैत्रेय उवाच

भागवतमुख्यो भगवान्नारदो हंसयोर्गतिम् । प्रदर्श्य ह्यमुमामन्त्र्य सिद्धलोकं ततोऽगमत् ॥८२॥
प्राचीनबर्हीं राजर्षिः प्रजासर्गाभिरक्षणे । आदिश्य पुत्रानगमत्तपसे कपिलाश्रमम् ॥८३॥
तत्रैकाग्रमना वीरो गोविन्दचरणाम्बुजम् । विमुक्तसङ्गोऽनुभजन् भक्त्या तत्साम्यतामगात् ८४
एतदध्यात्मपारोक्ष्यं गीतं देवर्षिणानघ । यः श्रावयेद्यः शृणुयात्स लिङ्गेन विमुच्यते ॥८५॥
एतन्मुकुन्दयशसा भुवनं पुनानं देवर्षिवर्यमुखनिःसृतमात्मशौचम् ।
यः कीर्त्यमानमधिगच्छति पारमेष्ठ्यं नास्मिन् भवे भ्रमति मुक्तसमस्तबन्धः॥८६॥
अध्यात्मपारोक्ष्यमिदं मयाधिगतमद्भुतम् । एवं स्त्रियाऽऽश्रमः पुंसश्छिन्नोऽमुत्र च संशयः ।८७।

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां चतुर्थस्कन्धे मैत्रेयविदुरसंवादे नारदप्राचीनबर्हिसंवादो नामैकोनत्रिंशोऽध्यायः ॥ २९ ॥

अथ त्रिंशोऽध्यायः

विदुर उवाच

ये त्वयाभिहिता ब्रह्मन् सुताः प्राचीनबर्हिषः । ते रुद्रगीतेन हरिं सिद्धिमापुः प्रतोष्य काम् ।१।
किं बार्हस्पत्येह परत्र वाथ कैवल्यनाथप्रियपार्श्ववर्तिनः ।
आसाद्य देवं गिरिशं यदृच्छया प्रापुः परं नूनमथ प्रचेतसः ॥२॥

हरेः ॥ ८१ ॥ हंसयोर्जीवेश्वरयोः । गतिं स्वरूपम् । अमुं नृपं पृष्ट्वा । ब्रह्मलोकम् ॥ ८२ ॥ पुत्रानादिश्येति मन्त्रिमुखेनेति शेषः । सम्प्रति तेषामनागमनादित्यर्थः । आश्रमं गंगासागरसंगमम् ॥८३॥ तत्साम्यतां तत्पार्षदत्वम् । स्वार्थे ष्यञन्तात्तल् ॥ ८४ ॥ अध्यात्मस्य जीवस्य पारोक्ष्यं परोक्षत्वेन वर्णनं यत्र । एतत् उपाख्यानम् ॥ ८५ ॥ यशसा युक्तम् आत्मशौचं मनः शोधकं विद्वद्भिः कीर्त्यमानम् एतत् योऽधिगच्छति सम्यगवधारयति सोऽस्मिन् भवे न भ्रमति मुक्तो भवतीत्यर्थः । परमेष्ठी परमपदवासी भगवान् तत्प्रापकं च ॥ ८६ ॥ अध्यात्मतत्त्वस्य गोप्यतया वर्णनं यस्मिन् इदमद्भुतं पुरञ्जनोपाख्यानं मया गुरुमुखादधिगतं तुभ्यं च कथितमिति शेषः । एवमुक्तानुसन्धानेन स्त्रिया बुद्ध्या सह वर्तमानस्य पुंसो जीवस्य आसमन्तात् श्रमहेतुरहङ्कारंश्छिन्नो भवति आश्रमो वा अमुत्र कथं भोग इति संशयश्च निवर्तते ॥८७॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे गूढार्थदीपिन्यामेकोनत्रिंशोऽध्यायः ।

त्रिंशे प्राप्तवरा विष्णोः स्तुतिं कृत्वा प्रचेतसः ।
आगत्य राज्यं सम्प्राप्य वार्क्ष्यां दक्षं च जज्ञिरे ॥ १ ॥

हे ब्रह्मन् मैत्रेय ! ते हरिं प्रतोष्य कां सिद्धिमित्यन्वयः ॥१॥ हे बार्हस्पत्य बृहस्पतिशिष्य मैत्रेय ! प्रचेतसः यदृच्छया गिरिशमासाद्य अथ तस्मात् इह लोके अथवा परत्र किं परं श्रेष्ठं वस्तु फलं वा प्रापुः ।

मैत्रेय उवाच

प्रचेतसोऽन्तरुदधौ पितुरादेशकारिणः । जपयज्ञेन तपसा पुरञ्जनमतोषयन् ॥३॥
दशवर्षसहस्रान्ते पुरुषस्तु सनातनः । तेषामाविरभूत्कृच्छ्रं शान्तेन शमयन् रुचा ॥४॥
सुपर्णस्कन्धमारूढो मेरुशृङ्गमिवाम्बुदः । पीतवासा मणिग्रीवः कुर्वन् वितिमिरा दिशः ॥५॥

काशिष्णुना कनकवर्णविभूषणेन भ्राजत्कपोलवदनो विलसत्किरीटः ।
अष्टायुधैरनुचरैर्मुनिभिः सुरेन्द्रैरासेवितो गरुडकिन्नरगीतकीर्तिः ॥६॥
पीनायताष्टभुजमण्डलमध्यलक्ष्म्या स्पर्धच्छ्रिया परिवृतो वनमालयाऽऽद्यः ।
बर्हिषतः पुरुष आह सुतान् प्रपन्नान् पर्जन्यनादरुतया सघृणावलोकः ॥७॥

श्रीभगवानुवाच

वरं वृणीध्वं भद्रं वो यूयं मे नृपनन्दनाः । सौहार्देनापृथग्धर्मास्तुष्टोऽहं सौहृदेन वः ॥८॥
योऽनुस्मरति संध्यायां युष्माननुदिनं नरः तस्य भ्रातृष्वात्मसाम्यं तथा भूतेषु सौहृदम् ॥९॥
ये तु मां रुद्रगीतेन सायं प्रातः समाहिताः । स्तुवन्त्यहं कामवरान्दास्ये प्रज्ञां च शोभनाम् १०
यद्यूयं पितुरादेशमग्रहीष्ट मुदान्विताः । अथो व उशती कीर्तिर्लोकाननुभविष्यति ॥११॥
भविता विश्रुतः पुत्रोऽनवमो ब्रह्मणो गुणैः । य एतामात्मवीर्येण त्रिलोकीं पूरयिष्यति ॥१२॥
कण्डोः प्रम्लोचया लब्धा कन्या कमललोचना । तां तापबिद्धां जगृहुर्भूरुहा नृपनन्दना. ॥१३॥
क्षुत्क्षामाया मुखे राजा सोमः पीयूषवर्षिणीम् । देशिनीं रोदमानाया निदधे स दयान्वितः ॥१४॥
प्रजाविसर्ग आदिष्टाः पित्रा मामनुवर्तता । तत्र कन्यां वरारोहां तामुद्वहत मा चिरम् ॥१५॥

विष्णुप्रियस्य श्रीशिवस्य पार्श्ववर्तिनः शिष्याः सन्तः ॥ २ ॥ जपयज्ञेन रुद्रगीतेन पुरञ्जनं श्रीविष्णुम् पुरं सर्वसमूहं जनयतीति ॥३॥ रुचा कान्त्या तेषां तपःक्लेशमपनयन् शान्तेन परमानन्दरूपेणाविरभूत् ॥४॥ सुपर्णेति त्रिकम् । मालया परिवृत आद्यः पुरुषो भगवान् प्राचीनबर्हिषः सुतान् मेघनादवत्तोषप्रदया वाण्या आहेति तृतीयेनान्वयः । वितिमिरा अन्धकारशून्याः ॥ ५ ॥ काशिष्णुना दीप्तिमता विभूषणेन कुण्डलादिना भ्राजत् कपोलयुक्तं वदनं यस्य । शंखचक्रगदापद्मशार्ङ्गशरखड्गखेटैरष्टायुधैर्युक्तः । पद्मस्यानायुधत्वेऽपि छत्रिन्यायेन तत्प्रयोगः ॥ ६ ॥ अष्टभुजमण्डल मध्ये वक्षसि स्थितया लक्ष्म्या स्पर्धमाना श्रीःशोभा यस्यास्तया मालया । सघृणः कृपायुक्तः ।७। हे नृपनन्दनाः । मे मत्तः अपृग्धर्माः समानधर्माः ॥ ८ ॥ आत्मसाम्यं वैषम्याभावः हृदयेनैक्यं वा ॥ ९ ॥ कामवरान् अभीष्टभोगान् ॥ १० ॥ यत् यस्मात् । अथो अतः । उशती कमनीया। लोकाननु लोकेषु भविष्यति प्राप्स्यति विस्तरिष्यतीत्यर्थः । भूप्राप्तौ यूयमिति बहुत्वेऽपि तेषामेकत्वप्रदर्शनार्थमग्रहीष्टेत्येकवचनमुक्तम् ॥ ११ ॥ गुणैर्ब्रह्मणः सकाशादन्यूनः विश्रुतः विख्यातः आत्मवीर्येण स्वसन्तानेन ॥ १२ ॥ पुत्रो भविता कस्यामित्याह—कण्डोरिति । तपोनाशार्थमागतया प्रम्लोचयाऽप्सरसा कण्डोः सकाशाल्लब्धा तपोनाशानन्तरं च स्वर्गं गच्छन्त्या तया अपविद्धां गर्भरूपेण त्यक्तां तां वृक्षाधिष्ठातृदेवा जगृहुः । हे नृपनन्दनाः प्रचेतसः । १३ । यो भूरुहाणां वृक्षाणां राजा स सोमश्चन्द्रः क्षुत्पीडितायास्तस्या मुखे देशिनीम् अमृतस्राविणी तर्जनीम् ॥ १४ ॥ पित्रा प्राचीनबर्हिषा

अपृथग्धर्मशीलानां सर्वेषां वः सुमध्यमा । अपृथग्धर्मशीलेयं भूयात्पत्न्यर्पिताशया ॥१६॥

दिव्यवर्षसहस्राणां सहस्रमहतौजसः । भौमान् भोक्ष्यथ भोगान् वै दिव्यांश्चानुग्रहान्मम॥१७

अथ मय्यनपायिन्या भक्त्या पक्वगुणाशयाः । उपयास्यथ मद्धाम निर्विद्य निरयादतः ॥१८॥

गृहेष्वाविशतां चापि पुंसां कुशलकर्मणाम् । मद्वार्तायातयामानां न बन्धाय गृहा मताः ॥१९॥

नव्यवद्धृदये यज्ज्ञो ब्रह्मैतद् ब्रह्मवादिभिः । न मुह्यन्ति न शोचन्ति न हृष्यन्ति यतो गताः॥२०

मैत्रेय उवाच

एवं ब्रुवाणं पुरुषार्थभाजनं जनार्दनं प्राञ्जलयः प्रचेतसः ।
तद्दर्शनध्वस्ततमोरजोमला गिराऽगृणन् गद्गदया सुहृत्तमम् ॥२१॥

प्रचेतस ऊचुः

नमो नमः क्लेशविनाशनाय निरूपितोदारगुणाह्वयाय ।
मनोवचोवेगपुरोजवाय सर्वाक्षमार्गैरगताध्वने नमः ॥२२॥

शुद्धाय शान्ताय नमः स्वनिष्ठया मनस्यपार्थं विलसद्द्वयाय ।
नमो जगत्स्थानलयोदयेषु गृहीतमायागुणविग्रहाय ॥२३॥

नमो विशुद्धसत्त्वाय हरये हरिमेधसे । वासुदेवाय कृष्णाय प्रभवे सर्वसात्वताम् ॥२४॥

सर्गे नियुक्ताः यूयं तत्र गत्वा उद्वहत परिणयत चिरं विलम्बं मा कुरुत ॥ १५ ॥ सर्वेषां व इयमेकैव भूयादिति मदाशीर्वादेन न कोऽपि व्यावहारिकदोषः स्यात्ः । आशयः चित्तम् ॥ १६ ॥ कपिञ्जलाना-लभेत इत्यत्र यथा त्रित्वसंख्या गृह्यते एवमत्रापि सहस्राणामित्यस्य त्रयाणामित्यर्थः तथा च देवमानेन त्रिसहस्र वर्षपर्यन्तमित्यायाति मनुष्यमानेन च लक्षद्वादशकम् । यथोक्तं तीर्थेन मानुषाणां वत्सराणां लक्षद्वादशकं पुरा प्रचेतोभिरिय भूमिः पालिताऽव्याहतेन्द्रियैः' इति ॥ १७ ॥ अथ भोगान्ते अतो निरयात् अस्मात् संसारात् निर्विद्य मद्धामेत्यन्वयः । प्राग् जातया भक्त्यैव दग्धवासन आशयो येषां ते तत्संबुद्धौ । न तु भविष्यन्त्या भक्त्या इति व्याख्येयं तथा सति भगवद्दर्शनासंभवात् ॥ १८ ॥ कुशलं मत्सेवनमेव कर्म येषाम् । मद्वार्तया मत्कथया यातो व्यतीतः यामः कालो येषाम् ॥ १९ ॥

यत् यस्मात् कथाश्रवणात् ज्ञः सर्वज्ञोऽहं नूतनवत् श्रोतृणां हृत् अन्तःकरणम् अये प्राप्नोमि एतन्मत्प्राप्तिरेव वेदान्तिभिर्ब्रह्मसाक्षात्कार उच्यते । यतो गताः यं मां प्राप्ताः सन्तः न मुह्यन्तीत्यन्वयः ॥ २० ॥ एवं पुरुषार्थान् धर्मादिमोक्षान्तान् भाजयति प्रापयती तथा तम् अगृणन् अस्तुवन् ॥ २१ ॥ वेदैः निरूपिता उदारा अभीष्टदा गुणा आह्वया नामानि च यस्य । सर्वाक्षमार्गैः सर्वेन्द्रियवृत्तिभिः अगताध्वा अज्ञातमार्गो यस्येति वेदान्तिनामेव न तु भक्तानामित्यर्थः ॥ २२ ॥ स्वनिष्ठया स्वरूपस्थित्या शुद्धाय । मनसि निमित्ते सति अपार्थं व्यर्थं विलसत् स्फुरितं द्वैतं यस्मिन् तस्मै । गृहीता मायागुणैः विग्रहाः ब्रह्मादिमूर्तयो येन तस्मै॥२३॥ हरति संसारं मेधा ज्ञानं यस्य । सात्वतां भक्तानां प्रभवे पालकाय ॥२४॥

नमः कमलनाभाय नमः कमलमालिने । नमः कमलपादाय नमस्ते कमलेक्षण ॥२५॥
नमः कमलकिञ्जल्कपिशङ्गामलवाससे । सर्वभूतनिवासाय नमोऽयुङ्क्ष्महि साक्षिणे ॥२६॥
रूपं भगवता त्वेतदशेषक्लेशसंक्षयम् । आविष्कृतं न क्लिष्टानां किमन्यदनुकम्पितम् ॥२७॥
एतावत्त्वं हि प्रभुभिर्भाव्यं दीनेषु वत्सलैः । यदनुस्मर्यते काले स्वबुद्ध्याऽभद्ररन्धन ॥२८॥
येनोपशान्तिर्भूतानां क्षुल्लकानामपीहताम् । अन्तर्हितोऽन्तर्हृदये कस्मान्नो वेद नाशिषः ॥२९॥
असावेव बरोऽस्माकमीप्सितो जगतः पते । प्रसन्नो भगवान् येषामपवर्गगुरुर्गतिः ॥३०॥
वरं वृणीमहेऽथापि नाथ त्वत्परतः परात् । न ह्यन्तस्त्वद्विभूतीनां सोऽनन्त इति गीयसे ।३१।
पारिजातेऽञ्जसा लब्धे सारङ्गोऽन्यन्न सेवते । त्वदङ्घ्रिमूलमासाद्य साक्षात्किं किं वृणीमहि ३२
यावत्ते मायया स्पृष्टा भ्रमाम इह कर्मभिः । तावद्भवत्प्रसङ्गानां सङ्गः स्यान्नो भवे भवे ।३३।
तुलयाम लवेनापि न स्वर्गं नापुनर्भवम् । भगवत्सङ्गिसङ्गस्य मर्त्यानां किमुताशिषः ॥३४॥
यत्रेड्यन्ते कथा मृष्टास्तृष्णायाः प्रशमो यतः । निर्वैरं यत्र भूतेषु नोद्वेगो यत्र कश्चन ॥३५॥
यत्र नारायणः साक्षाद्भगवान्न्यासिनां गतिः । संस्तूयते सत्कथासु मुक्तसङ्गैः पुनः पुनः ॥३६॥
तेषां विचरतां पद्भ्यां तीर्थानां पावनेच्छया । भीतस्य किं न रोचेत तावकानां समागमः ३७

वयं तु साक्षाद्भगवन् भवस्य प्रियस्य सख्युः क्षणसङ्गमेन ।
सुदुश्चिकित्स्यस्य भवस्य मृत्योर्भिषक्तमं त्वाद्य गतिं गताः स्मः ॥३८॥
यन्नः स्वधीतं गुरवः प्रसादिता विप्राश्च वृद्धाश्च सदानुवृत्त्या ।
आर्या नताः सुहृदो भ्रातरश्च सर्वाणि भूतान्यनसूययैव ॥३९॥

॥ २५ ॥ किञ्जल्कवत् पीते वाससी यस्य । अयुङ्क्ष्महि कुर्मः ॥ २६ ॥ अनुकम्पितम् अनुकम्पा ॥२७॥ एतावदेव भाव्यं कार्यम् । स्वार्थे त्वप्रत्ययः यत्समये समये स्वीया एते इति बुद्ध्या अनुस्मर्यते । हे पाप दहन ! ॥ २८ ॥ येन त्वत्कर्तृकस्मरणेन । ईहतां सकामानामत एव तुच्छानामपि नः अन्तः हृदयमध्ये स्थितः कस्मात्सङ्कल्पान्न वेद अपि तु वेदैवेत्यन्वयः । कथंभूतः । अन्तः अन्तःकरणस्य हितं ज्ञानं शुद्धिर्वा यस्मात्सः ।२९। येषामस्माकं प्रसन्नः तेषाम् असौ भगवत्प्रसाद एवेप्सितो वरःनान्य इत्यन्वयः ।३०। परतः कारणात् परात् त्वत्तः एकमेव । यतस्त्वद्देयविभूतीनामन्तत्वात् त्वमप्यनन्त इत्युच्यसे अतस्त्वत्प्राप्त्यर्थं स वक्ष्यमाणः साधुसङ्ग एव देय इत्यन्वयः ॥ ३१ ॥ अञ्जसा सुखेन । अन्यत् वृक्षान्तरं यथा सारङ्गो भ्रमरः न सेवते तथा किं किं त्वच्चरणं विना न किञ्चित् । यद्वा किमपि अन्यत् तुच्छं किं किमर्थम् । यद्वा । यदि तर्हि किं किम् अनन्तत्वात् ॥३२॥ स्पृष्टा मोहिताः । इह संसारे । भवत्प्रसङ्गानां भक्तजनानाम् ॥ ३३ ॥ भगवत्सङ्गिनो भक्तास्तेषां सङ्गस्य लेशेनापि स्वर्गं मोक्षं च न तुल्यं मन्यामहे । आशिषो राज्यादिभोगान् न तुलयामेति किमुत वक्तव्यम् ॥३४॥ यत्र सत्सङ्गे । मृष्टाः पापशोधिकाः कथाः यतो याभ्यः कथाभ्यः ॥३५॥ यत्र यासु कथासु । न्यासिनां कर्मफलत्यागिनाम् । मुक्तसङ्गैः नारदाद्यैः ॥ ३६ ॥ संसारात् भीतस्य पुंसः किं न अपितु रोचतैवेत्यर्थः ॥ ३७ ॥ प्रियस्य तवेति शेषः । भवस्य जन्मनः मृत्योश्चेति रोगद्वयस्य निवर्तकं त्वां शरणं प्राप्ताः । स्मेत्याश्चर्ये ॥ ३८ ॥ यन्न इति युग्मकम् । नोऽस्माभिर्यत् सुष्ठु सम्यगधीतं तदेतत्सर्वं ते परितोषणाय अस्तु इति । वृद्धा

यन्नः सुतप्तं तप एतदीश निरन्धसां कालमदभ्रमप्सु ।
सर्वं तदेतत्पुरुषस्य भूम्नो वृणीमहे ते परितोषणाय ॥४०॥

मनुः स्वयम्भूर्भगवान् भवश्च येऽन्ये तपोज्ञानविशुद्धसत्त्वाः ।
अदृष्टपारा अपि यन्महिम्नः स्तुवन्त्यथो त्वाऽऽत्मसमं गृणीमः ॥४१॥

नमः समाय शुद्धाय पुरुषाय पराय च । वासुदेवाय सत्त्वाय तुभ्यं भगवते नमः ॥४२॥

मैत्रेय उवाच

इति प्रचेतोभिरभिष्टुतो हरिः प्रीतस्तथेत्याह शरण्यवत्सलः ।
अनिच्छतां यानमतृप्तचक्षुषां ययौ स्वधामाऽनपवर्गवीर्यः ॥४३॥

अथ निर्याय सलिलात्प्रचेतस उदन्वतः । वीक्ष्याकुप्यन् द्रुमैश्छन्नां गां गां रोद्धुमिवोच्छ्रितैः ॥

ततोऽग्निमारुतौ राजन्नमुञ्चन् मुखतो रुषा । महीं निर्वीरुधं कर्तुं संवर्तक इवात्यये ॥४५॥

भस्मसात्क्रियमाणांस्तान्द्रुमान् वीक्ष्य पितामहः । आगतः शमयामास पुत्रान् बर्हिष्मतो नयैः ४६

तत्रावशिष्टा ये वृक्षा भीता दुहितरं तदा । उज्जह्रुस्ते प्रचेतोभ्य उपदिष्टाः स्वम्भुवा ॥४७॥

ते च ब्रह्मण आदेशान्मारिषामुपयेमिरे । यस्यां महदवज्ञानादजन्यजनयोनिजः ॥४८॥

चाक्षुषे त्वन्तरे प्राप्ते प्राक्सर्गे कालविद्रुते । यः ससर्ज प्रजा इष्टाः स दक्षो दैवचोदितः ॥४९॥

यो जायमानः सर्वेषां तेजस्तेजस्विनां रुचा । स्वयोपादत्त दाक्ष्याच्च कर्मणां दक्षमब्रुवन् ॥५०॥

ज्ञानाधिकाः । आर्या भक्त्यधिकाः । अनसूयया शुद्धदृष्ट्यैव भावेन वा भूतानि प्रसादितानि ॥ ३९ ॥ अदभ्रं बहुकालं निरन्धसां निरन्नैर्नोऽस्माभिरप्सु येदेतत् तपः सुतप्तं सम्यक् कृतम् । तत् भूम्नः परिपूर्णस्य ॥ ४० ॥ मन्वादयः यस्य तव महिम्नोऽदृष्टपारा अपि यथा आत्मसमं स्वमत्यनुरूपम् । स्तुवन्ति अथोऽतः वयमपि त्वां तथैव स्तुमः । भव इति परस्परमुपास्योपासकभावसूचनार्थम् । सत्त्वमन्तःकरणम् ॥ ४१ ॥ सत्त्वाय शुद्धसत्त्वमूर्तये ॥ ४२ ॥ तथास्तु इति । स्वप्रयाणमनिच्छतामपि सतां स्वधाम वैकुण्ठम् । भक्तहृदयं चेति रूपद्वयेन एतदेव दर्शयन्नाह—अनपवर्गवीर्यः अनन्तप्रभावः ॥ ४३ ॥ अथ गमनानन्तरम् । उदन्वतः समुद्रस्य । गां स्वर्गं रोद्धुमिवोच्छ्रितैः द्रुमैश्छन्नां गां पृथ्वीं वीक्ष्य तेभ्योऽकुप्यन् ॥४४॥ निर्वीरुधं लतादिशून्याम् अत्यये प्रलये सवर्तकः कालाग्निरुद्रो यथा । यद्वा । संवर्तके कल्पान्ते अत्यये नाशे उपस्थिते सति यथा तथा ॥ ४५ ॥ नयैः युक्तिभिः ॥ ४६ ॥ तत्र देशे । तेषु शान्तेषु सत्सु वा । ये वृक्षाः तदधिष्ठातृदेवताः ते तेभ्य उज्जह्रुः समर्पयामासुः ॥ ४७ ॥ मारिषां नाम्नीं वृक्षकर्तृकपालनात् वार्क्षीमिति । विवाहितवन्तः । अजनेति ब्रह्मपुत्रोऽपि सन् दक्षः क्षत्रियजातौ यस्यां वार्क्ष्यां शिवापराधात् अजनि गर्भवासदुःखं प्राप । पूर्वं वीरभद्रहस्तात् पुनः कालतश्च मरणद्वयं प्रापेति ज्ञेयमत्र ॥ ४८ ॥ प्राक्सर्गे पूर्वदेहे कालेन नष्टे सति दैवेन प्रेरितः सन् चाक्षुषमन्वन्तरे यः प्रजाः ससर्ज स दक्षः अजनि ॥ ४९ ॥ य इति युग्मकम् । यः स्वया रुचा सर्वेषां तेज उपादत्त आच्छादितवान् यं च

तं प्रजासर्गरक्षायामनादिरभिषिच्य च । युयोज युयुजेऽन्यांश्च स वै सर्वप्रजापतीन् ॥५१॥

इति श्रीमद्भागवते महापुराणे पारमहस्यां संहितायां चतुर्थस्कन्धे त्रिंशोऽध्यायः ॥३०॥

अथैकत्रिंशोऽध्यायः

मैत्रेय उवाच

तत उत्पन्नविज्ञाना आश्वधोक्षजभाषितम् । स्मरन्त आत्मजे भार्यां विसृज्य प्राव्रजन् गृहात् ॥१॥

दीक्षिता ब्रह्मसत्रेण सर्वभूतात्ममेधसा । प्रतीच्यां दिशि वेलायां सिद्धोऽभूद्यत्र जाजलिः ॥२॥

तान्निर्जितप्राणमनोवचोदृशो जितासनान् शान्तसमानविग्रहान् ।
परेऽमले ब्रह्मणि योजितात्मनः सुरासुरेड्यो ददृशे स्म नारदः ॥३॥

तमागतं त उत्थाय प्रणिपत्याभिनन्द्य च । पूजयित्वा यथादेशं सुखासीनमथाऽब्रुवन् ॥४॥

प्रचेतस ऊचुः

स्वागतं ते सुरर्षेऽद्य दिष्ट्या नो दर्शनं गतः । तव चङ्क्रमणं ब्रह्मन्नभयाय यथा रवेः ॥५॥

यदादिष्टं भगवता शिवेनाधोक्षजेन च । तद् गृहेषु प्रसक्तानां प्रायशः क्षपितं प्रभो ॥६॥

तन्नः प्रद्योतयाध्यात्मज्ञानं तत्त्वार्थदर्शनम् । येनाञ्जसा तरिष्यामो दुस्तरं भवसागरम् ॥७॥

तथाऽब्रुवन् तं दक्षमभिषिच्य सर्गेरक्षायां च अनादिर्ब्रह्मा युयोज नियुक्तवान् स च दक्षोऽन्यान् मरीच्यादीन् युयुजे इत्यन्वयः ॥ ५०।५१ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे गूढार्थदीपिन्यां त्रिंशोऽध्यायः ।

एकत्रिंशे सुते न्यस्य राज्यभारं वने गताः ।
नारदोक्तेन मार्गेण मुक्तिमापुः प्रचेतसः ॥ १ ॥

ततो द्वादशलक्षकालात्परम् । दक्षाभिषेकानन्तरं वा । भाषितम् 'उपयास्यथ मद्धाम' इत्युक्तरूपं । स्मरन्त आशु प्राव्रजन्नित्यन्वयः ॥ १ ॥ यत्र जाजलिर्नाम मुनिस्तत्र वेलायां समुद्रतटे ब्रह्मसत्रेण दीक्षिताः ब्रह्मविचारेण कृतसङ्कल्पा बभूवुः । कीदृशेन । सर्वभूतात्मनि श्रीकृष्णे मेधा बुद्धिर्येन ॥२॥ नारदः ब्रह्मणि श्रीकृष्णे प्रवेशितचित्तान् तान् प्रचेतसो ददर्श । स्म साश्चर्यम् ॥ ३ ॥ ते प्रचेतसः तं नारदम् । उत्थाय प्रणिपत्य यथादेशं यथाविधि ॥ ४ ॥ नोऽस्माक दिष्ट्या भाग्येन त्वम् । चङ्क्रमणं पर्यटनम् ॥ ५ ॥ यत् तत्त्वमुपदिष्टं तत् क्षपितं विस्मृतम् इति भक्त्युत्थदैन्येनोक्तिः ॥ ६ ॥ आत्मनि यत् ज्ञानं तत् प्रकाशय । तत्त्वार्थः परमार्थरूपो हरिस्तं दर्शयतीति तथा । येन ज्ञानेन । अञ्जसा झटिति ॥ ७ ॥ प्रचेतसां प्रचेतोभिः । नृपान् प्रचेतसः ॥ ८ ॥ नृणां तदेव जन्मादिकं येन हरिः सेव्यते ॥ ९ ॥ किमिति

मैत्रेय उवाच

इति प्रचेतसां पृष्टो भगवान्नारदो मुनिः । भगवत्युत्तमश्लोक आविष्टात्माब्रवीन्नृपान् ॥८॥

नारद उवाच

तज्जन्म तानि कर्माणि तदायुस्तन्मनो वचः । नृणां येनेह विश्वात्मा सेव्यते हरिरीश्वरः ॥९॥

किं जन्मभिस्त्रिभिर्वेह शौक्लसावित्रयाज्ञिकैः । कर्मभिर्वा त्रयीप्रोक्तैः पुंसोऽपि विबुधायुषा ॥१०॥

श्रुतेन तपसा वा किं वचोभिश्चित्तवृत्तिभिः । बुद्ध्या वा किं निपुणया बलेनेन्द्रियराधसा ॥११॥

किं वा योगेन सांख्येन न्यासस्वाध्याययोरपि । किं वा श्रेयोभिरन्यैश्च न यत्रात्मप्रदो हरिः॥१२

श्रेयसामपि सर्वेषामात्मा ह्यवधिरर्थतः । सर्वेषामपि भूतानां हरिरात्माऽऽत्मदः प्रियः ॥१३॥

यथा तरोर्मूलनिषेचनेन तृप्यन्ति तत्स्कन्धभुजोपशाखाः ।
प्राणोपहाराच्च यथेन्द्रियाणां तथैव सर्वार्हणमच्युतेज्या ॥१४॥

यथैव सूर्यात्प्रभवन्ति वारः पुनश्च तस्मिन् प्रविशन्ति काले।
भूतानि भूमौ स्थिरजङ्गमानि तथा हरावेव गुणप्रवाहः ॥१५॥

एतत्पदं तज्जगदात्मनः परं सकृद्विभातं सवितुर्यथा प्रभा ।
यथाऽसवो जाग्रति सुप्तशक्तयो द्रव्यक्रियाज्ञानभिदाभ्रमात्ययः ॥१६॥

यथा नभस्यभ्रतमःप्रकाशा भवन्ति भूपा न भवन्त्यनुक्रमात् ।
एवं परे ब्रह्मणि शक्तयस्त्वमू रजस्तमःसत्त्वमिति प्रवाहः ॥१७॥

त्रिकम् । शुक्ले विशुद्धे वंशे जातं शौक्लम् । सावित्रमुपनयनेन । याज्ञिकं दीक्षया । ब्रह्मायुषाऽपि ॥१०॥ श्रुतेन वेदान्तादिश्रवणेन । वृत्तिभिः नानाशास्त्रावधारणरूपाभिः । राधसा सामर्थ्येन ॥ ११ ॥ श्रेयोभिः श्रेयःसाधनैः । यत्र जन्मादौ हरिः स्वरूपदर्शनप्रदो न स्यात् तज्जन्मादिना किं फलमित्यन्वयः ॥ १२ ॥ श्रेयसां सर्वफलानां मध्ये आत्मा कृष्णप्राप्तिरेव अर्थतो वस्तुतोऽवधिः मुख्यं फलमित्यर्थः । यतः स सर्वेषामात्मा आधारः नित्यसुखप्रदश्च ॥ १३ ॥ प्राणस्योपहारो भोजनं तस्मादेवेन्द्रियाणां तृप्तिः न तु तेषु पृथक्-पृथगन्नलेपनात् अन्यथाऽऽन्ध्यवाधिर्याद्युत्पत्तेः । इज्या पूजनम् ।। १४ ।। वारो जलानि वर्षाकाले प्रभवन्ति । पुनश्च काले ग्रीष्मकाले । अस्याऽप्रसिद्धत्वात्प्रसिद्धदृष्टान्तमाह-यथा सर्वाणि भूतानि देहा भूमेरुत्पद्यन्ते तत्रैव लीयन्ते च तथा गुणप्रवाहरूपः चेतनाचेतनात्मकः सर्वोऽपि प्रपञ्चः हरेरुत्पद्यते हरावेव तिष्ठति लीयते च अतस्तस्य सर्वकर्तृत्वेन सर्वाधारत्वेन च तत्तृप्त्या सर्वतृप्तिरिति फलितम् ॥१५॥ सवितुः प्रभेव अंशांशिरूपस्य आत्मनो जीवस्य ईश्वरस्य च परं मुख्यं पदं लीलास्थानम् एतत् जगत् तत् ततः पूर्वोक्तात् हरेः सकाशात् सकृत् क्वचित् सृष्टौ विभातं स्फुरितं क्वचित् प्रलये च न । यथाऽसवः इन्द्रियाणि जाग्रति जाग्रदवस्थायां स्फुरन्ति अजाग्रति सुषुप्तौ च न स्फुरन्ति किन्तु सुप्तशक्तयो लीना भवन्ति एवं द्रव्यादिनिमित्तभेदभ्रमस्य अत्यधिकम् अयः कर्मानुसारेणोदयः अत्ययस्तन्नाशश्च हरेः सकाशादेव भवतीत्यतः स एवाश्रयणीयो नान्य इति निर्भ्रान्तोऽर्थः । द्रव्यं भूतपञ्चकम् शरीरं वा । क्रियाज्ञानपदाभ्यामुभयेन्द्रियाणि ।। १६ ॥ यथा अभ्रादयो रजस्तमःसत्त्वस्थानीयाः सूर्यादेव भवन्ति तत्रैव

तेनैकमात्मानमशेषदेहिनां कालं प्रधानं पुरुषं परेशम् ।
स्वतेजसा ध्वस्तगुणप्रवाहमात्मैकभावेन भजध्वमद्धा ॥१८॥

दयया सर्वभूतेषु संतुष्ट्या येन केन वा । सर्वेन्द्रियोपशान्त्या च तुष्यत्याशु जनार्दनः ॥१९॥

अपहतसकलैषणामलात्मन्यविरतमेधितभावनोपहूतः ।
निजजनवशगत्वमात्मनोऽयन्न सरति छिद्रवदक्षरः सतां हि ॥२०॥

न भजति कुमनीषिणां स इज्यां हरिरधनात्मधनप्रियो रसज्ञः ।
श्रुतधनकुलकर्मणां मदैर्ये विदधति पापमकिंचनेषु सत्सु ॥ २१ ॥

श्रियमनुचरतीं तदर्थिनश्च द्विपदपतीन् विबुधांश्च यत्स्वपूर्णः ।
न भजति निजभृत्यवर्गतन्त्रः कथममुमुद्विसृजेत्पुमान् कृतज्ञः ॥ २२ ॥

मैत्रेय उवाच

इति प्रचेतसो राजन्नन्याश्च भगवत्कथाः । श्रावयित्वा ब्रह्मलोकं ययौ स्वायम्भुवो मुनिः ॥२३॥

तेऽपि तन्मुखनिर्यातं यशो लोकमलापहम् । हरेर्निशम्य तत्पादं ध्यायन्तस्तद्गतिं ययुः ॥२४॥

एतत्तेऽभिहितं क्षत्तर्यन्मां त्वं परिपृष्टवान् । प्रचेतसां नारदस्य संवादं हरिकीर्तनम् ॥२५॥

श्रीशुक उवाच

य एष उत्तानपदो मानवस्यानुवर्णितः । वंशः प्रियव्रतस्यापि निबोध नृपसत्तम ॥२६॥

यो नारदादात्मविद्यामधिगम्य पुनर्महीम् । भुक्त्वा विभज्य पुत्रेभ्य ऐश्वरं समगात्पदम् ॥२७॥

इमां तु कौषारविणोपवर्णितां क्षत्ता निशम्याजितवादसत्कथाम् ।
प्रवृद्धभावोऽश्रुकलाकुलो मुनेर्दधार मूर्ध्ना चरणं हृदा हरेः ॥ २८ ॥

लीयन्ते च एवं ब्रह्मणि भगवति रज आद्या शक्त्योऽपि । इत्येवं प्रकारेणायं जगत्प्रवाहः । हे भूपाः प्रचेतसः ॥१७॥ तेन सर्वकारणत्वेन हेतुना तमेकमेव आत्मानं श्रीकृष्णम् अद्धा साक्षात् भजध्वम् । केन । आत्मैकभावेन चित्तैकाग्र्येण । कथंभूतम् । कालादित्रितयस्वरूपकम् । प्रवाहः संसारः ॥ १८ ॥ येन केन प्रारब्धलब्धेनान्नादिना । उपशान्त्या निग्रहेण ॥ १९ ॥ निवृत्तसकलैषणे शुद्धे मनसि निरन्तरं प्रवृद्धभावनया आहूतोऽक्षरो हरिः छिद्रवत् तत्रत्याकाशवत् सतां हृदयान्नापसरति । किं कुर्वन् । आत्मनो निजभक्ताधीनत्वं यन् प्राप्नुवन् द्योतयन्नित्यर्थः ॥ २० ॥ ये श्रुतादीनां मदैः सत्सु भक्तेषु पापमवज्ञां कुर्वन्ति तेषाम् इज्यां पूजां न स्वीकरोति । यतोऽकिञ्चना भगवद्धनाश्च भक्ताः प्रिया यस्य । कुतः । तेषां प्रेमरसं जानातीति ॥ २१ ॥ यत् यस्मात् स्वपूर्णः स्वेनैव पूर्णकामः अतः श्रियं सकलामपि सम्पत्तिं तदर्थिनो नरेन्द्रान् देवांश्च न भजति तेषां परतन्त्रो न भवति किन्तु भक्ताधीनो भवति अमुं कृतज्ञ उत् क्षणमपि कथं परित्यजेत् न कथमपीत्यर्थः । श्रीपदेनान्तरंगशक्तिर्लक्ष्मीर्न व्याख्येया । त्रिष्वपि पुष्पिताग्रावृत्तम् ॥ २२ ॥ प्रचेतसः प्रति इति भगवन्माहात्म्यम् । ब्रह्मपुत्रो नारदः ॥ २३ ॥ तद्गतिं विष्णुलोकम् ॥ २४ ॥ हे क्षत्रः विदुर ! संवादरूपम् एतदाख्यानम् । हरेः कीर्तनं यत्र ॥ २५ ॥ मनुपुत्रस्य उत्तान पदः य एष सोऽनुवर्णितः । निबोध श्रृणु ॥ २६ ॥ यः प्रियव्रतः । भुक्त्वा परिपाल्य । ईश्वरस्य भगवत इदम् ॥ २७ ॥ अजितस्य श्रीकृष्णस्य वादो वर्णनं यस्यां तां सत्कथां कुषारवपुत्रमैत्रेयणो

विदुर उवाच

सोऽयमद्य महायोगिन् भवता करुणात्मना । दर्शितस्तमसः पारो यत्राकिंचनगो हरिः ॥२९॥

श्रीशुक उवाच

इत्यानम्य तमामन्त्र्य विदुरो गजसाह्वयम् । स्वानां दिदृक्षुः प्रययौ ज्ञातीनां निर्वृताशयः ॥३०॥

एतद्यः शृणुयाद्राजन् राज्ञां हर्यर्पितात्मनाम् । आयुर्धनं यशः स्वस्ति गतिमैश्वर्यमाप्नुयात् ॥३१॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायामष्टादशसाहस्र्यां संहितायां चतुर्थस्कन्धे प्रचेतउपाख्यानं नामैकत्रिंशोऽध्यायः ॥ ३१ ॥

इति चतुर्थः स्कन्धः समाप्तः

हरिः ॐ तत्सत्

पर्वणितां निशम्य विदुरः मुनेश्चरणं मूर्ध्ना हरेश्चरणं हृदा च दधारेत्यन्वयः । यद्वा । हृदा हरेर्दृष्ट्या मुनेश्चरणमित्यन्वयः । कला विन्दवः ॥ २८ ॥ यत्र पारे हरिर्वर्तते सोऽयं तमसः संसारस्य पारः पारप्राप्त्युपायो भक्तिमार्गो मह्यं दर्शितः । अकिञ्चनगो भक्तप्राप्यः ॥ २९ ॥ इति निर्वृताशयः प्रशन्नमना विदुरः तमामन्त्र्य मैत्रेयं पृष्ट्वा हास्तिनपुरं ययौ । स्वानां स्वान् ॥ ३० ॥ एतत् चरितम् । स्वस्ति मंगलम् । गतिं मुक्तिम् ॥ ३१ ॥

यत्कृपालवलेशेन तुर्यतुर्यपदाऽमृतम् ।
स्फीतं पीतं भजे तं श्रीशङ्करं शङ्करप्रियम् ॥ १ ॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे श्रीसनाढ्यवंशावतंस-पण्डितप्रवरश्रीराममूर्तिशास्त्रि-पौराणिकविरचितायां गूढार्थदीपिन्यामेकत्रिंशोऽध्यायः ।

समाप्तोऽयं चतुर्थस्कन्धः

श्रीकृष्णार्पणमस्तु

ॐ श्रीपरमात्मने नमः

अथ पञ्चम स्कन्धः

अथ प्रथमोऽध्यायः

राजोवाच

प्रियव्रतो भागवत आत्मारामः कथं मुने। गृहेऽरमत यन्मूलः कर्मबन्धः पराभवः॥ १॥
न नूनं मुक्तसङ्गानां तादृशानां द्विजर्षभ। गृहेष्वभिनिवेशोऽयं पुंसां भवितुमर्हति॥ २॥
महतां खलु विप्रर्षे उत्तमश्लोकपादयोः। छायानिर्वृतचित्तानां न कुटुम्बे स्पृहामतिः॥ ३॥
संशयोऽयं महान् ब्रह्मन् दारागारसुतादिषु। सक्तस्य यत्सिद्धिरभूत् कृष्णे च मतिरच्युता॥ ४॥

श्रीशुक उवाच

बाढमुक्तं भगवत उत्तमश्लोकस्य श्रीमच्चणारविन्दमकरन्दरस आवेशितचेतसो भागवतपरमहंसदयितकथां किंचिदन्तरायविहितां स्वां शिवतमां पदवीं न प्रायेण हिन्वन्ति॥५॥ यर्हि वाव ह राजन् स राजपुत्रः प्रियव्रतः परमभागवतो नारदस्य चरणोपसेवयाञ्जसावगतपरमार्थसतत्त्वो ब्रह्मसत्रेण दीक्षिष्यमाणोऽवनितलपरिपालनायाम्नातप्रवरगुणगणैकान्तभाजनतया स्वपित्रोपामन्त्रितो भगवति वासुदेव एवाव्यवधानसमाधियोगेन समावेशितसकलकारकक्रियाकलापो नैवाभ्यनन्दद्यद्यपि तदप्रत्याम्नातव्यं तदधिकरण आत्मनो-

---

श्रीमन्महागणाधिपतये नमः

भरतस्यावनं काल्या गूढतत्त्वं रहूगणे।
नारकीयातनाऽध्यक्षं धर्मराजमुपास्महे॥
प्रथमे मन्दरद्रोण्यां नारदाज्ज्ञानमाप्नुवन्।
नियुक्तो ब्रह्मणा राज्ये युक्तयुक्त्या प्रियव्रतः॥

[स्थानवर्णनम्]

कर्मभिर्बन्धः पराभवः स्वरूपविस्मृतिश्च यन्मूलः गृहहेतुकः भवति तत्र गृहे कथमरमतेत्यन्वयः॥ १॥ तादृशानां पुंसां गृहेषु अयमभिनिवेशोऽत्यन्तरागो भवितुं नार्हति॥ २॥ भगवत्पादयोः छायया स्मृत्या आनन्दितं चित्तं येषां तेषां भक्तानां स्पृहायुक्ता मतिर्न भवति। यद्वा। स्पृहैवाऽमतिः स्पृहारूपमज्ञानम्॥ ३॥ सक्तस्य कृष्णे मतिस्तयैव सिद्धिर्मुक्तिश्चेति यत् अयं महान् संशयः॥ ४॥ वाढं सत्यम्। मकरन्दरसे मधुरसे। भक्ता एव परमहंसास्तेषां प्रियस्य कृष्णस्य कथामेव स्वां पदवीं मुख्यं तत्प्राप्तिमार्गं न हिन्वन्ति[1] न त्यजन्ति भक्ताः। केनचिद् विघ्नेन विहतां विच्छिन्नामपि ताम्॥५॥ यर्हि वाव यदैव। ह प्रसिद्धः। अञ्जसा शीघ्रं ज्ञातभगवत्तत्त्वः ब्रह्मसत्रेण भगवद्विचार रूप यज्ञेन दीक्षिष्यमाणः सङ्कल्पं कर्तुमुद्यतः सङ्कल्पं ग्रहीष्यन् वा पालनाय स्वपित्रा उपामन्त्रितो नियुक्तः यद्यपि तत् पितृवचनम् नप्रत्याख्येयम् तथापि तन्नैवाभ्यनन्दत् नैव स्वीकृतवान्। कुतः। तदधिकरणे राज्याधिकारे आत्मनः स्वस्य पराभवं ज्ञानसङ्कोचमालोचयन्। कस्मात् असतः शत्रुभूतात् कामक्रोधादेः सकाशात्। यद्वा असतो मिथ्याभूतादपि राज्यप्रपंचात्। आत्मनः पराभवं यातायातलक्षणम्। किञ्च भगवति समर्पितः

---

१. 'हिवि' प्रीणने। 'हि गति वृद्धयोः' इत्यस्य स्वादेर्वा रूपम्। धातूनामनेकार्थत्वात् त्यागे वृत्तिः।

ऽन्यस्मादसतोऽपि पराभवमन्वीक्षमाणः ॥ ६ ॥ अथ ह भगवानादिदेव एतस्य गुणविसर्गस्य परिबृंहणानुध्यानव्यवसितसकलजगदभिप्राय आत्मयोनिरखिलनिगमनिजगणपरिवेष्टितः स्वभवनादवततार ॥ ७ ॥ स तत्र तत्र गगनतल उडुपतिरिव विमानावलिभिरनुपदममरपरिवृढैरभिपूज्यमानः पथि पथि च वरूथशः सिद्धगन्धर्वसाध्यचारणमुनिगणैरुपगीयमानो गन्धमादनद्रोणीमवभासयन्नुपससर्प ॥ ८ ॥ तत्र ह वा एनं देवर्षिर्हंसयानेन पितरं भगवन्तं हिरण्यगर्भमुपलभमानः सहसैवोत्थायार्हणेन सह पितापुत्राभ्यामवहिताञ्जलिरुपतस्थे ॥ ९ ॥ भगवानपि भारत तदुपनीतार्हणः सूक्तवाकेनातितरामुदितगुणगणावतारसुजयः प्रियव्रतमादिपुरुषस्तं सदयहासावलोक इति होवाच ॥ १० ॥

श्रीभगवानुवाच

निबोध तातेदमृतं ब्रवीमि मासूयितुं देवमर्हस्यप्रमेयम् ।
वयं भवस्ते तत एष महर्षिर्वहाम सर्वे विवशा यस्य दिष्टम् ॥ ११ ॥

न तस्य कश्चित्तपसा विद्यया वा न योगवीर्येण मनीषया वा ।
नैवार्थधर्मैः परतः स्वतो वा कृतं विहन्तुं तनुभृद्विभूयात् ॥ १२ ॥

भवाय नाशाय च कर्म कर्तुं शोकाय मोहाय सदाऽभयाय ।
सुखाय दुःखाय च देहयोगमव्यक्तदिष्टं जनताङ्ग धत्ते ॥ १३ ॥

सकलेन्द्रियव्यापार समूहोऽपि येन तथाभूतः ॥ ६ ॥ अथ ह तदैव आत्मयोनिः ब्रह्मा भूतलमवततार। गुणविसर्गस्य जगत्सृष्टेः परिवृंहणं वृद्धिः । व्यवसितो ज्ञातः । अखिलैर्निगमैं र्मूर्तिमद्भिर्वेदैः निजगणैर्मरीच्यादिभिश्च ॥ ७ ॥ स ब्रह्मा उडुपतिश्चन्द्र इव द्रोणीं पर्वतान्तरालभूमिम् अवभासयन् उपससर्प समीपं गतः । विमानावलिभिरुपलक्षितैर्देवश्रेष्ठैरिन्द्रादिभिः अनुपदं पदे पदे इति पाठः समीचीनः अन्यथा पथीत्यनेन पुनरुक्तिरिति प्राञ्चः ॥ ८ ॥ वै निश्चितम् । एवं पितरमुपलभमानः पश्यन् मनुप्रियव्रताभ्यां सह नारदः बद्धाञ्जलिः सन् तत्र ह तत्रैव सहसैवोत्थाय अर्हणेन सह पूजनपूर्वकं तुष्टाव । नारदस्तत्रोपदिशति मनुश्च तं नेतुमागतोऽस्तीति ज्ञातव्यमत्र ॥ ९ ॥ भगवान् ब्रह्माऽपि तं ह स्फुटम् इति वक्ष्यमाणमुवाच । तैर्नारदादिभिः उपनीतं समर्पितमर्हणमर्घ्यादि यस्मै । तैः कृतपूजनो वा । हिरण्यगर्भ इत्यादि वैदिकसूक्तेन । उदितो वर्णितोऽवतारः गुणगणविस्तारः सुजयः सर्वोत्कर्षः स्वागतमिति यावद् यस्य ॥ १० ॥ सर्वे वयं विवशाः सन्तो यस्य दिष्टमाज्ञां वहामः पालयामः तं देवं वासुदेवम् असूयितु दोषारोपेण द्रष्टुं नार्हसि अहम् ऋतं सत्यं ब्रवीमि त्वमिदं निबोध शृणु । हे तात प्रियपौत्र ! भव इति लीलासौन्दर्यार्थमुक्तम् । ते ततः पिता मनुः । वे विष्णोःवशा इत्यर्थः । 'विः पक्षिपरमात्मनोः' इति यादवः ॥ ११ ॥ कश्चिदपि तनुभृत् जीवः तस्य ईश्वरस्य कृतं विधानं तप आदिभिः विहन्तुम् उल्लङ्घयितुं न विभूयात् न समर्थो भवेत् ॥ १२ ॥ परतः बलवतः । स्वतः प्रभावेण । भवनाशौ पुनः पुनर्जन्ममृत्यू तदाद्यर्थम् अभयाय मुक्तये च अव्यक्तदिष्टम् ईश्वरदत्तं देहयोगं जनता बुभुक्षुमुमुक्षुजनसमूहः सदा धत्ते अतोऽव्यक्त एव यथासमयं भुक्तिं मुक्तिं च ददात्येव काऽत्र चिन्ता । अङ्ग हे प्रियव्रत ! ॥ १३ ॥

यद्वाचि तन्त्यां गुणकर्मदामभिः सुदुस्तरैर्वत्स वयं सुयोजिताः ।
सर्वे वहामो बलिमीश्वराय प्रोता नसीव द्विपदे चतुष्पदः ॥ १४ ॥
ईशाभिसृष्टं ह्यवरुन्ध्महेऽङ्ग दुःखं सुखं वा गुणकर्मसङ्गात् ।
आस्थाय तत्तद्यदयुङ्क्त नाथश्चक्षुष्मतान्धा इव नीयमानाः ॥ १५ ॥
मुक्तोऽपि तावद्बिभृयात्स्वदेहमारब्धमश्नन्नभिमानशून्यः ।
यथानुभूतं प्रतियातनिद्रः किं त्वन्यदेहाय गुणान्न वृङ्क्ते ॥ १६ ॥
भयं प्रमत्तस्य वनेष्वपि स्याद्यतः स आस्ते सहषट्सपत्नः ।
जितेन्द्रियस्यात्मरतेर्बुधस्य गृहाश्रमः किं नु करोत्यवद्यम् ॥ १७ ॥
यः षट्सपत्नान् विजिगीषमाणो गृहेषु निर्विश्य यतेत पूर्वम् ।
अत्येति दुर्गाश्रित ऊर्जितारीन् क्षीणेषु कामं विचरेद्विपश्चित् ॥ १८ ॥
त्वं त्वब्जनाभाङ्घ्रिसरोजकोशदुर्गाश्रितो निर्जितषट्सपत्नः ।
भुङ्क्ष्वेह भोगान् पुरुषातिदिष्टान् विमुक्तसङ्गः प्रकृतिं भजस्व ॥ १९ ॥

श्रीशुक उवाच

इति समभिहितो महाभागवतो भगवतस्त्रिभुवनगुरोरनुशासनमात्मनो लघुतयाऽवनतशिरोधरो बाढमिति सबहुमानमुवाह ॥ २० ॥ भगवानपि मनुना यथावदुपकल्पितापचितिः

यस्य भगवतो वाचि तन्त्यां वेदरूपायां दीर्घरज्वां गुणकर्मभिः सात्त्विकादिभेदेन विभिन्नकर्मरूपैर्दामभिः सुदृढै गौलरज्जुभिः सुयोजिता निबद्धाः सन्तः सर्वे वयं तस्मै बलिं वहामः तदादिष्टं कर्म कुर्मः । यथा नसि गले वा प्रोता बद्धा बलीवर्दाः द्विपदे कृषीवलाय बलिं वहन्ति तद्वत् ॥१४॥ अंग हे । ईष्टे इति ईट् तेन ईशा ईश्वरेण अभिसृष्टं दत्तमेव सुखं दुःखं च वयं प्राप्नुमः । किमाश्रित्य । नाथः स्वामी संगात् हेतोः यत् यद् शरीरमयुङ्क्त योजितवान् तत्तदास्थाय । यथा छायामातपं वा तेन प्राप्यमाणाः अन्धाः प्राप्नुवन्ति तद्वत् ॥ १५ ॥ जीवन्मुक्तोऽपि यावत्प्रारब्धं कर्म तावत् तत्फलमश्नन् देहाभिमानशून्य एव स्वदेहं बिभर्त्येव किन्तु अन्यदेहप्राप्तये गुणान् रागादिलक्षणकर्माणि न वृङ्क्ते न स्वीकरोति । तेषु न न सज्जते इत्यर्थः । यथा विगतनिद्रः स्वप्नेऽनुभूतं यत् तत्केवलं स्मरत्येव न च तत्र सज्जते तद्वदित्यर्थः । ॥ १६ ॥ अपीत्यनेन वनाद्वनान्तरं गच्छतोऽपि प्रमत्तस्य अजितेन्द्रियस्य भयं संसारः स्यादेव । षडिन्द्रियरूपशत्रुसहितः । आत्मरतेः आत्मारामस्य अवद्यं दोषं किन्तु करोति न करोत्येव ॥ १७ ॥ यः सः पूर्वं गृहेषु स्थित्वा तेषामत्यन्तं निरोधमकुर्वन् जेतुं यतेत यथा राजा दुर्गाश्रित एव बलिष्ठान् अरीन् अत्येति जयति । क्षीणेषु तेषु कामं यथेच्छं दुर्गेऽन्यत्र वा विचरति एवं विपश्चिदपि गृहे वने वा विचरेदित्यन्वयः ॥ १८ ॥ त्वं तु पूर्वं पुरुषातिदिष्टान् भगवद्दत्तान् भोगान् भुङ्क्ष्व पश्चात् प्रकृष्टा कृतिर्लीला यस्य तं जगत्कारणं श्रीकृष्णं भजस्व । स्वरूपं वा ॥ १९ ॥ सम्यक् अभिहित उक्तः । आत्मनः स्वस्य लघुतया कनिष्ठत्वेन । तत्पौत्रत्वात् । अकारच्छेदेन गौरवेण वा । बाढम् एवमेव करिष्यामीति जग्राह तदनुशासनम् ॥२०॥मनुना सन्तुष्टेन कृतपूजनः भगवान् ब्रह्मापि अकुटिलं यथा स्यात्तथा तयोर्निरीक्षमाणयोः सतोः क्षयं

चितिः प्रियव्रतनारदयोरविषममभिसमीक्षमाणयोरात्मसमवस्थानमवाङ्मनसं क्षयमव्यवहृतं प्रवर्तयन्नगमत् ॥ २१ ॥

मनुरपि परेणैवं प्रतिसंधितमनोरथः सुरर्षिवरानुमतेनात्मजमखिलधरामण्डलस्थितिगुप्तय आस्थाप्य स्वयमतिविषमविषयविषजलाशयाशाया उपरराम ॥ २२ ॥ इति ह वाव स जगतीपतिरीश्वरेच्छयाऽधिनिवेशितकर्माधिकारोऽखिलजगद्बन्धध्वंसनपरानुभावस्य भगवत आदिपुरुषस्याङ्घ्रियुगलानवरतध्यानानुभावेन परिरन्धितकषायाशयोऽवदातोऽपि मानवर्धनो महतां महीतलमनुशशास ॥ २३ ॥ अथ च दुहितरं प्रजापतेर्विश्वकर्मण उपयेमे बर्हिष्मतीं नाम तस्यामु ह वाव आत्मजानात्मसमानशीलगुणकर्मरूपवीर्योदारान्दश भावयाम्बभूव कन्यां च यवीयसीमूर्जस्वतीं नाम ॥२४॥ आग्नीध्रेध्मजिह्वयज्ञबाहुमहावीरहिरण्यरेतोघृतपृष्ठसवनमेधातिथिवीतिहोत्रकवय इति सर्व एवाग्निनामानः ॥२५॥ एतेषां कविर्महावीरः सवन इति त्रय आसन्नूर्ध्वरेतसस्त आत्मविद्यायामर्भभावादारभ्य कृतपरिचयाः पारमहंस्यमेवाश्रममभजन् ॥२६॥ तस्मिन्नु ह वाव उपशमशीलाः परमर्षयः सकलजीवनिकायावासस्य भगवतो वासुदेवस्य भीतानां शरणभूतस्य श्रीमच्चरणारविन्दाविरतस्मरणाविगलितपरमभक्तियोगानुभावेन परिभावितान्तर्हृदयाधिगते भगवति सर्वेषां भूतानामात्मभूते प्रत्यगात्मन्येवात्मनस्तादात्म्यमविशेषेण समीयुः ॥२७॥ अन्यस्यामपि जायायां त्रयः पुत्रा आसन्नुत्तमस्तामसो रैवत इति मन्वन्तराधिपतयः ॥२८॥

एवमुपशमायनेषु स्वतनयेष्वथ जगतीपतिर्जगतीमर्बुदान्येकादश परिवत्सराणामव्या-

---

स्वनिवासमगमत् । कीदृशम् । आत्मनः सम्यगाश्रयभूतं वाङ्मनसागोचरं च । किं कुर्वन् । अव्यवहृतं व्यवहारशून्यं प्रियव्रतं व्यवहारे प्रवर्तयन्निति भावः ॥ २१ ॥ परेण ब्रह्मणा एवं पूरितमनोरथः मनुरपि विषजलाशयो गृहं तत्राशाया भोगेच्छाया उपरतोऽभूत् । स्थिति गुप्तये मर्यादारक्षणाय ॥२२॥ इति ह वाव इत्थमेव हि । स प्रियव्रतः अधिनिवेशितः प्रापितः । परिरन्धिकषायः दग्धरागादिमल आशयोऽन्तःकरण यस्य । अवदातः शुद्धोऽपि । महतां ब्रह्मादीनामाज्ञापालनेन ॥ २३ ॥ अथ अतः राज्यहेतोः उपयेमे विवाहितवान् । उ विस्मये । ह वाव अतिप्रसिद्धान् । शीलादिभिरुदारान् दश आत्मजान् उत्पादयामास । यवीयसीं कनिष्ठाम् ॥ २४।२५॥

ऊर्ध्वरेतसः नैष्ठिकब्रह्मचारिणः । बाल्यादारभ्य कृतपरिचयाः कृताभ्यासाः । परमहंसाः शुद्धान्तःकरणा न तु केवलं वेषधारिणस्तैरनुष्ठेयं निवृत्तिमार्गमेव पारमहंस्य न तु मठादिकम् ॥ २६ ॥ तस्मिन्नु आश्रमे वर्तमानास्ते भगवति आत्मनस्तादात्म्यं लयं प्रापुः मुक्ता बभूवुरित्यर्थः । आत्मनस्त्वं पदार्थस्य तादात्म्यं तत्पदार्थेन सहैक्यमिति वा । केन । अविशेषेण पार्थिवदेहत्यागेन । कथंभूते भगवति शोधितान्तर्हृदयाविर्भूते । आत्मभूते अतिप्रिये । प्रत्यगात्मनि सर्वजीवाश्रये च । नानाविध जीव समूहा आवसन्त्यत्रेति उह वाव लोकविलक्षणा इत्यर्थः ॥ २७ ॥ अन्यस्यामपि प्रियव्रतस्येति शेषः ॥ २८ ॥ उपशमायनेषु भगवन्मग्नेषु सत्सु अथ प्रियव्रत एकादश अर्बुदानि एकादशकोटिवर्षाणि जगतीं बुभुजे

हताखिलपुरुषकारसारसम्भृतदोर्दण्डयुगलापीडितमौर्वीगुणस्तनितविरमितधर्मप्रतिपक्षो बर्हिष्मत्याश्चानुदिनमेधमानप्रमोदप्रसरणयौषिण्यव्रीडाप्रमुषितहासावलोकरुचिरक्ष्वेल्यादिभिः पराभूयमानविवेक इवानवबुध्यमान इव महामना बुभुजे ॥२९॥ यावदवभासयति सुरगिरिमनुपरिक्रामन् भगवानादित्यो वसुधातलमर्धेनैव प्रतपत्यर्धेनवच्छादयति तदा हि भगवदुपासनोपचितातिपुरुषप्रभावस्तदनभिनन्दन् समजवेन रथेन ज्योतिर्मयेन रजनीमपि दिनं करिष्यामीति सप्तकृत्वस्तरणिमनुपर्यक्रामद् द्वितीय इव पतङ्गः। एवं कुर्वाणं प्रियव्रतमागत्य चतुराननस्तवाधिकारो नास्तीति ? [पाठश्च्युतः इति सन्दर्भः] ॥३०॥ ये वा उ ह तद्रथचरणनेमिकृतपरिखातास्ते सप्त सिन्धव आसन् यत एव कृताः सप्त भुवो द्वीपाः ॥३१॥ जम्बूप्लक्षशाल्मलिकुशक्रौञ्चशाकपुष्करसंज्ञास्तेषां परिमाणं पूर्वस्मात्पूर्वस्मादुत्तर उत्तरो यथासंख्यं द्विगुणमानेन बहिः समन्तत उपक्लृप्ताः ॥३२॥ क्षारोदेक्षुरसोदसुरोदघृतोदक्षीरोददधिमण्डोदशुद्धोदाः सप्त जलधयः सप्त द्वीपपरिखा इवाभ्यन्तरद्वीपसमाना एकैकश्येन यथानुपूर्वं सप्तस्वपि बहिर्द्वीपेषु पृथक् परित उपकल्पितास्तेषु जम्ब्वादिषु बर्हिष्मतीपतिरनुव्रतानात्मजानाग्नीध्रेध्मजिह्वयज्ञबाहुहिरण्यरेतोघृतपृष्ठमेधातिथिवीतिहोत्रसंज्ञान् यथासंख्येनैकैकस्मिन्नेकमेवाधिपतिं विदधे ॥३३॥ दुहितरं चोर्जस्वतीं नामोशनसे प्रायच्छद्यस्यामासीद् देवयानी नाम काव्यसुता ॥

नैवंविधः पुरुषकार उरुक्रमस्य पुंसां तदङ्घ्रिरजसा जितषड्गुणानाम्।
चित्रं विदूरविगतः सकृदाददीत यन्नामधेयमधुना स जहाति बन्धम् ॥३४॥

स एवमपरिमितबलपराक्रम एकदा तु देवर्षिचरणानुशयनानुपतितगुणविसर्गसंसर्गेणा-

---

इत्यन्वयः। कथंभूतः। अखण्डितपौरुषादि यस्मात्तेन सारेण बलेन पूर्णयोर्भुजदण्डयोर्युगलेन आकृष्टगुणस्य धनुषः प्रत्यञ्चायाः टङ्कारेण पराजिता अधार्मिका येन सः। एधमानैः प्रमोदादिभिः प्रसरणम् अभ्युत्थानादि योषिण्यम् अपाङ्गचालनादि ततः प्रमुषिताः सङ्कुचितावलोकाः ततः क्ष्वेल्यादयः परिहासवाक्यादीनि तैः। अर्बुदमत्र कोटिपर्यायम्। 'अर्बुदं कोटिरित्याहुः' इति निबन्धात् ॥ २९ ॥ मेरुं प्रदक्षिणी कुर्वन् आदित्यः यावद्वसुधातलं लोकालोकपर्यन्तमवभासयति तत्रार्द्धावर्तेन प्रतपतीति दिवा भवति अपरार्द्धावर्तेन आच्छादयतीति तमसा रात्रिर्भवति। तदा हि प्रियव्रतसमये। उपचितः प्रवृद्धोऽमानुषप्रभावो यस्य स तत् अर्द्धेनाच्छादनम् अनुचित मन्वानः। तरणिमनु सूर्यस्य पृष्ठतः सप्तवारान् मेरुं प्रदक्षिणीकृतवान् पतङ्गः सूर्य इव ॥ ३० ॥ ये वै उह अतिप्रसिद्धास्तस्य रथचक्राक्रान्ता गर्ताः यतो येभ्यः सिन्धुभ्य एव हेतुभ्यः। अयं तु तेषां स्थौल्यमेव कृतवान् न तु सृष्टवान् इति ज्ञेयमत्र। पूर्वंसृष्टान् रथावृत्या स्थूलांश्चक्रे प्रियव्रतः। समुद्रांस्तेन तत्कर्तृत्याहुरेनं प्रियव्रतम्, इति तीर्थोक्तेः ॥ ३१ ॥ परिमाणं वदामीति शेषः। पूर्वस्मात् लक्षयोजनपरिमाणात् उत्तरोत्तरो द्विगुणमानेन बोध्य इत्येवं सिन्धुभ्यो बहिस्तेन ते रचिताः ॥ ३२ ॥ अभ्यन्तरेति। जम्बूद्वीपसमानो लवणोदधिः प्लक्षद्वीपसमान इक्षुरसोदधिरित्येवम् ॥ ३३ ॥ उशनसे श्रीशुकाय। काव्यः श्रीशुकः ॥ ३४ ॥ उरुक्रमस्य हरेः पुंसां भक्तानामेवंविधः

निर्वृतमिवात्मानं मन्यमान आत्मनिर्वेद इदमाह ॥३५॥ अहो असाध्वनुष्ठितं यदभिनिवेशितो-
ऽहमिन्द्रियैरविद्यारचितविषमविषयान्धकूपे तदलमलममुष्या वनिताया विनोदमृगं मां धिग्धि-
गिति गर्हयांचकार ॥३६॥ परदेवताप्रसादाधिगतात्मप्रत्यवमर्शेनानुप्रवृत्तेभ्यः पुत्रेभ्य इमां
यथादायं विभज्य भुक्तभोगां च महिषीं मृतकमिव सहमहाविभूतिमपहाय स्वयं निहितनिर्वेदो
हृदि गृहीतहरिविहारानुभावो भगवतो नारदस्य पदवीं पुनरेवानुससार ॥३७॥

तस्य ह वा एते श्लोकाः—

प्रियव्रतकृतं कर्म को नु कुर्याद्विनेश्वरम् । यो नेमिनिम्नैरकरोच्छायां घ्नन् सप्त वारिधीन् ३८
भूसंस्थानं कृतं येन सरिद्गिरिवनादिभिः । सीमा च भूतनिर्वृत्यै द्वीपे द्वीपे विभागशः ॥३९॥
भौमं दिव्यं मानुषं च महित्वं कर्मयोगजम् । यश्चक्रे निरयौपम्यं पुरुषानुजनप्रियः ॥४०॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां पञ्चमस्कन्धे प्रियव्रतविजये प्रथमोऽध्यायः ॥१॥

अथ द्वितीयोऽध्यायः

श्रीशुक उवाच

एवं पितरि सम्प्रवृत्ते तदनुशासने वर्तमान आग्नीध्रो जम्बूद्वीपौकसः प्रजा औरसवत्-

---

पुरुषार्थः चित्रमाश्चर्यं न भवति । यतोऽङ्घ्रिरजसा निषेवितेन जितेन्द्रियाणामतीवसमर्थानामित्यर्थः । किं वहुना विदूरविगतश्चाण्डालोऽपि एकवारं यन्नाम गृह्णीयात् सोऽपि शीघ्रमेव बन्धं संसारं जहाति मुक्तो भवति तस्योरुक्रमस्येत्यन्वयः । विप्राद्दूरः विदूरः शूद्रः पृषोदरादिः तस्मादपि विप्रकृष्टं दूरं गतः ॥ ३५ ॥ अनुशयनं सेवा तदनुपतितः राज्यादिप्रपञ्चः तत्संसर्गेण दुःखितमिव । आत्मनि मनसि निर्वेदः परितापो यस्य ॥ ३६ ॥ यत् यतोऽहं कूपेऽभिनिवेशितः पातितः तत् ततः विषयैरलमलम् । विनोदमृगं क्रीडामर्कटम् । गर्हयाञ्चकार निन्दितवान् ॥ ३७ ॥ परेति हिरिप्रसादंप्राप्तविवेकेन । अनुप्रवृत्तेभ्योऽनुकूलेभ्यः । निर्वेदो वैराग्यम् । यथादायं भागानुसारेण । पदवीं भक्तिमार्गम् ॥ ३८ ॥ ह वै प्रसिद्धाः । पूर्वैर्गीताः । को नु कर्म ॥ न कोऽपि । नेमिनिम्नै रथचक्राग्रकृतैः गर्तैः । छायां घ्नन् रात्रिं विलोपयन् ॥ ३९ ॥ भूसंस्थानं दीपविभागरूपम् । सरिदादिभिः सीमा च भूतसुखाय कृता ॥ ४० ॥ पातालजं स्वर्गजं मनुष्यलोकजं योगरूपकर्मजम् अणिमादिसिद्धिरूपं वैभवं नरकसदृशं चक्रे । पुरुषानुजा विष्णुभक्ताः नारदादयः तेषां प्रियः ॥ ४१ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे गूढार्थदीपिन्यां प्रथमोऽध्यायः ।

द्वितीये तपसाऽऽग्नीध्रः पूर्वचित्तिमवाप्तवान् ।
प्रलपन् कामजोद्वेगाद् जज्ञे तस्यां नवात्मजान् ॥ १ ॥

पितरि प्रियव्रते भजने सम्यक् प्रवृत्ते सति । द्वीपौकसो द्वीपवासिनीः । औरसवत् पुत्रवत् पालयामास ।

धर्मविक्षणः पर्यगोपायत् ॥१॥ स च कदाचित्पितृलोककामः सुरवरवनिताक्रीडाचलद्रोण्यां भगवन्तं विश्वसृजां पतिमाभृतपरिचर्योपकरण आत्मैकाग्र्येण तपस्व्याराधयाम्बभूव ॥२॥ तदुपलभ्य भगवानादिपुरुषः सदसि गायन्तीं पूर्वचित्तिं नामाप्सरसमभियापयामास ॥३॥ सा च तदाश्रमोपवनमतिरमणीयं विविधनिविडविटपिविटपनिकरसंश्लिष्टपुरटलतारूढस्थलविहङ्गममिथुनैः प्रोच्यमानश्रुतिभिः प्रतिबोध्यमानसलिलकुक्कुटकारण्डवकलहंसादिभिर्विचित्रमुपकूजितामलजलाशयकमलाकरमुपबभ्राम ॥४॥ तस्याः सुललितगमनपदविन्यासगतिविलासायाश्चानुपदं खणखणायमानरुचिरचरणाभरणस्वनमुपाकर्ण्य नरदेवकुमारः समाधियोगेनामीलितनयननलिनमुकुलयुगलमीषद्विकचय्य व्यचष्ट ॥५॥ तामेवाऽविदूरे मधुकरीमिव सुमनस उपजिघ्रन्तीं दिविजमनुजमनोनयनाह्लाददुघैर्गतिविहारव्रीडाविनयावलोकसुस्वराक्षरावयवैर्मनसि नृणां कुसुमायुधस्य विदधतीं विवरं निजमुखविगलितामृतासवसहासभाषणामोदमदान्धमधुकरनिकरोपरोधेन द्रुतपदविन्यासेन वल्गुस्पन्दनस्तनकलशकबरभाररशनां देवीं तदवलोकनेन विवृतावसरस्य भगवतो मकरध्वजस्य वशमुपनीतो जडवदिति होवाच—॥६॥

का त्वं चिकीर्षसि च किं मुनिवर्य शैले मायासि कापि भगवत्परदेवतायाः।
विज्ये बिभर्षि धनुषी सुहृदात्मनोऽर्थे किं वा मृगान् मृगयसे विपिने प्रमत्तान् ॥७॥

धर्मोऽपेक्षमाणो यस्य। धर्मे एव अवेक्षणं दृष्टिर्यस्येति धर्मावेक्षण इति प्राचीनः पाठः चक्रवर्तिसम्मतश्च ॥ १ ॥ पितृलोककामः पुत्रकामः। आक्रीडाचलो मन्दरः। पतिं ब्रह्माम्। आभृतेति। सम्पादितपूजासामग्रीकः। आत्मा चित्तम् ॥ २ ॥ तज्ज्ञात्वा ब्रह्मा भोगार्थम् अप्सरसं प्रेषयामास ॥ ३ ॥ सा च तदाश्रमोपवनमुपबभ्रामेत्यन्वयः। कथंभूतम् उपवनम्। विविधसघनवृक्षशाखासमूहालिङ्गितस्वर्णलतारूढैः स्थलपक्षिमयूरादिद्वन्द्वैरुच्चार्यमाणैः षड्जादिस्वरैः प्रतिबोध्याना ये सलिलकुक्कुटादयस्तैर्विचित्रं यथा स्यात्तथा नादिता अमलजलाशया वाप्यादयः कमलाकरास्तडागाश्च यस्मिन् तेषु यानि कमलानि तेषामाकरम् ॥ ४ ॥ सुललितगमने ये पदविन्यासास्तैर्गतियुक्तः विलासः शृङ्गाररसो यस्याः खणखणेति ध्वनिं कुर्वतो नूपुरादेः। नयन एव कमलकोशौ तयोर्युगलं किञ्चिदुन्मील्य तां व्यचष्ट ददर्श ॥५॥ तदवलोकनेन दत्तावसरस्य मकरध्वजस्य वशं प्राप्तः जडवत् सन् तामेव इति ह स्फुटमुवाचेत्यन्वयः। कीदृशीमिति तस्या विशेषणत्रयम्। अविदूरे समीपे एव भ्रमरीमिव पुष्पाणि जिघ्रन्तीम्। पुनः। देवादिमनोनयनानन्दजनकैर्गत्यादिभिः कामस्य विवरमन्तःप्रवेशद्वारं विदधतीम्। पुनः। निजमुखाद् विगलितम् अमृतवत्स्वादु आसववन्मादकं च यत्सहासं भाषणं च तस्माद् य आमोदो निश्वासगन्धस्तेन भ्रमर समूहानां यदावरणं तेन द्रुतपदविन्यासस्तेन च किञ्चिच्चलनं स्तनकलशयोः केशपाशे रशनायां च यस्यास्ताम्। अवयवाः नेत्रकपोलादयः:। हेत्यासक्त्या वा ॥ ६ ॥ जाड्यानुकरणादेव पुंस्त्वेन संबोधनम् हे मुनिवर्य। यद्वा। शीलमेव शैलं मुनिवरणीयं शैलं यस्यास्तत्संबुद्धौ। भगवान् विष्णुरेव परदेवता। भ्रुवौ धनुर्द्वेन कल्पयित्वाह हे सुहृद् सखे ! विज्ये प्रत्यश्चारहिते धनुषी बिभर्षि तत्किमर्थम् आत्मनोऽर्थे

बाणाविमौ भगवतः शतपत्रपत्रौ शान्तावपुङ्खरुचिरावतितिग्मदन्तौ ।
कस्मै युयुङ्क्षसि वने विचरन्न विद्मः क्षेमाय नो जडधियां तव विक्रमोऽस्तु ॥८॥

शिष्या इमे भगवतः परितः पठन्ति गायन्ति साम सरहस्यमजस्रमीशम् ।
युष्मच्छिखाविलुलिताः सुमनोऽभिवृष्टीः सर्वे भजन्त्यृषिगणा इव वेदशाखाः ॥९॥

वाचं परं चरणपञ्जरतित्तिरीणां ब्रह्मन्नरूपमुखरां शृणवाम तुभ्यम् ।
लब्धा कदम्बरुचिरङ्कविटङ्कबिम्बे यस्यामलातपरिधिः क्व च वल्कलं ते ॥१०॥

किं सम्भृतं रुचिरयोर्द्विज शृङ्गयोस्ते मध्ये कृशो वहसि यत्र दृशिः श्रिता मे ।
पङ्कोऽरुणः सुरभिरात्मविषाण ईदृग् येनाश्रमं सुभग मे सुरभीकरोषि ॥११॥

लोकं प्रदर्शय सुहृत्तम तावकं मे यत्रत्य इत्थमुरसावयवावपूर्वौ ।
अस्मद्विधस्य मनउन्नयनौ बिभर्ति बह्वद्भुतं सरसहाससुधादि वक्त्रे ॥१२॥

का वाऽऽत्मवृत्तिरदनाद्धविरङ्ग वाति विष्णोः कलास्यनिमिषोन्मकरौ च कर्णौ ।
उद्विग्नमीनयुगलं द्विजपङ्क्तिशोचिरासन्नभृङ्गनिकरं सर इन्मुखं ते ॥१३॥

स्वप्रयोजनाय किं वा मृगान् कामिनोऽस्मदादीन् अन्वेषयसि ॥ ७ ॥ कटाक्षौ बाणत्वेन कल्पयित्वाऽऽह-शतपत्रे नेत्रकमले एव पत्रे पिच्छे ययोस्तौ । पुंखाभ्यां दीर्घशलाकारूपाभ्यां विनाऽपि रुचिरौ अतितीक्ष्णाग्रभागौ च कस्मै प्रयोक्तुमिच्छसीति न विद्मः तव विक्रमोऽत्र प्रचारः नोऽस्माकं क्षेमाय इष्टसिद्धयर्थम् अस्तु । भगो योनिस्तद्वतः ॥ ८ ॥ भ्रमरान् शिष्यत्वेन कल्पयित्वाऽऽह सरहस्यं साङ्गं साम पठन्ति ईशं गायन्ति च । युष्मत्केशपाशच्युताः पुष्पवृष्टी, सर्वे भजन्ति गृह्णन्ति ॥ ९ ॥ नूपुरादीन् पञ्जरादित्वेन कल्पयित्वाऽऽह-तुभ्यं तव चरणस्थपञ्जरयोः नूपुरयोः तित्तिरीणामन्तर्गतरत्नानाम् अरूपामदृष्टमुखीं मुखरां प्रकटां च परं केवलं वाचं शृणुमः । पीतशाटिकां नितम्बकान्तित्वेन प्रकल्प्याह अङ्कविटङ्कबिम्बे नितम्बस्य सुन्दरमण्डले पीतरुचिः क्वः लब्धा । यस्यां रुचौ अलातपरिधिः ज्वलदङ्गारमण्डलरूपा मेखला वर्ततेऽतस्ते वस्त्रं च क्व, नैव वर्ततेऽतो नग्नत्वात् मया सह रमस्वेति व्यङ्ग्यार्थः ॥ १० ॥ ते स्तनयोः किं धृतं यतो मध्ये कृशोऽपि त्वं वहसि । यत्र मे दृष्टिः संलग्ना । किञ्च आत्मनस्तव विषाणे स्तनद्वये अरुणः सुरभिश्च ईदृक् अपूर्वः पङ्कोऽस्ति येन सुगन्धयुक्तं करोषि ॥ ११ ॥ त्वदीयं स्थानं प्रदर्शय यत्रत्यो जन इत्थमपूर्वौ अवयवौ स्तनलक्षणौ उरसा बिभर्ति । मनस उन्नयनौ क्षोभकौ हर्षकरौ वा । किञ्च वक्त्रेऽपि मधुरहाससहितम् अधरामृतादि बहु अद्भुतं बिभर्ति । हासेति पाठः प्रशस्तः तीर्थादिसम्मतश्च ॥ १२॥ अङ्ग हे मित्र ! आत्मनस्तव वृत्तिः आहारो वा का । यस्य अदनात् भक्षणात् हविर्वाति गन्ध आयाति एतच्च ताम्बूलाभिप्रायम् । किञ्च त्वं विष्णोः कलासि यतस्ते रत्ननेत्रत्वेन निमेषशून्यौ उत्कृष्टमकराऽऽकृतिकुण्डलयुक्तौ कर्णौ भवतः । किञ्च ते मुखं सर इत्[1] सर इव शोभते । कीदृशम् । उद्विग्नं चञ्चलं मीनयुगलमिव नेत्रद्वयं यस्मिन् । द्विजपङ्क्त्या हंसपङ्क्त्या दन्तपङ्क्त्या च शोचिः शोभा यस्मिन् ।

---

१. इत् इति इवार्थेऽव्ययम् ।

योऽसौ त्वया करसरोजहतः पतङ्गो दिक्षु भ्रमन् भ्रमत एजयतेऽक्षिणी मे ।
मुक्तं न ते स्मरसि वक्रजटावरूथं कष्टोऽनिलो हरति लम्पट एष नीवीम् ॥१४॥
रूपं तपोधन तपश्चरतां तपोघ्नं ह्येतत्तु केन तपसा भवतोपलब्धम् ।
चर्तुं तपोऽर्हसि मया सह मित्र मह्यं किं वा प्रसीदति स वै भवभावनो मे ॥१५॥
न त्वां त्यजामि दयितं द्विजदेवदत्तं यस्मिन्मनो दृगपि नो न वियाति लग्नम् ।
मां चारुशृङ्ग्यर्हसि नेतुमनुव्रतं ते चित्तं यतः प्रतिसरन्तु शिवाः सचिव्यः ॥१६॥

श्रीशुक उवाच

इति ललनानुनयातिविशारदो ग्राम्यवैदग्ध्यया परिभाषया तां विबुधवधूं विबुधमतिरधिसभाजयामास ॥ १७ ॥ सा च ततस्तस्य वीरयूथपतेर्बुद्धिशीलरूपवयःश्रियौदार्येण पराक्षिप्तमनास्तेन सहायुतायुतपरिवत्सरोपलक्षणं कालं जम्बूद्वीपपतिना भौमस्वर्गभोगान् बुभुजे ॥ १८ ॥ तस्यामु ह वा आत्मजान् स राजवर आग्नीध्रो नाभिकिम्पुरुषहरिवर्षेलावृतरम्यकहिरण्मयकुरुभद्राश्वकेतुमालसंज्ञान्नव पुत्रानजनयत् ॥ १९ ॥

सा सूत्वाथ सुतान्नवानुवत्सरं गृह एवापहाय पूर्वचित्तिर्भूय एवाजं देवमुपतस्थे ॥२०॥ आग्नीध्रसुतास्ते मातुरनुग्रहादौत्पत्तिकेनैव संहननबलोपेताः पित्रा विभक्ता आत्मतुल्यनामानि यथाभागं जम्बूद्वीपवर्षाणि बुभुजुः ॥ २१ ॥ आग्नीध्रो राजाऽतृप्तः कामानामप्सरसमेवानुदिनमधिमन्यमानस्तस्याः सलोकतां श्रुतिभिरवारुन्ध यत्र पितरो मादयन्ते ॥ २२ ॥ सम्परेते

आसन्नो गन्धलोभेन समीपगो भृङ्ग निकर इव अलकसमूहो यस्मिन् ॥१३॥ पतङ्गः कन्दुक भ्रमच्चित्तस्य मे एजतते भ्रमतस्तव एजयते इति तीर्थः । चालयति वा । मुक्तं वन्धरहितं कुटिलकेशसमूहं न स्मरसि न वध्नासि । कष्टो धूर्तः लम्पटः त्वय्यासक्त एष नीवीमधोवस्त्रं हरति आकर्षति एतच्च न स्मरसि किम् ॥ १४ ॥ चरतां कुर्वताम् । चर्तुं कर्तुम् । मह्यं मम हे मित्र ! भवभावनः विश्वस्रष्टा ब्रह्मा मेमांपूर्णमनोरथीकर्तुम् ॥ १५ ॥ द्विजदेवेन ब्रह्मणा । यस्मिन् त्वयि दृक् मनश्च लग्नं सत् न पृथक् भवति । यतः हे सुन्दरस्तनि ! यत्र ते चित्तं तत्रैव मां नेतुमर्हसि । तव शिवाः सचिव्यः परिचारिकाः सख्योऽपि मामनुसरन्तु ॥१६॥ हरिण्यो वा शिवा अनुकूलाः सत्यः प्रदक्षिणं गच्छन्ति अनुनयेऽनुकूलीकरणे । ग्राम्याणां स्त्रीलम्पटानामिव वैदग्ध्यं चातुर्यं यस्यां तयां वाचा । वधूम् अप्सरसं सादरं वशीचकार । ग्राम्ये विषयभोगकथायां पाटवं यस्या इति वा ॥ १७ ॥ श्रियेत्यत्र गालवमतेनेयङ् । पराक्षिप्तमाकृष्टम् । अयुतायुतं त्वर्वुदम् । भौमभोगान् नृपत्वे स्वर्गभोगांश्च देवत्वे ॥ १८ ॥ उ ह वै अतिप्रसिद्धान् । पुन्नाम्नो नरकात् त्रायन्ते इति व्युत्पत्त्या आत्मजविशेषणात्वान्न पौनरुक्त्यम् ॥ १९ ॥ प्रतिवत्सरमेकैकमिति कृत्वा नव । उपतस्थेऽसेवत ॥ २० ॥ औत्पत्तिकेन स्वभावत एव । संहननं देह पुष्टिः । बलं च । वर्षाणि खण्डानि । बुभुजुः पालयामासुः ॥ २१ ॥ तृतीयार्थे षष्ठी । कामैर्विषयैः कामानां भोगैर्वा । अधि . अधिकम् । श्रुतिभिर्वेदोक्तकर्मभिः समानलोकताम् अवारुन्ध प्राप्तवान् । यत्र लोके प्राप्तं पुरुषं पितरो हर्षयन्ति । एतेनाऽप्सरलोकः पितृलोक एव इति तीर्थः ॥ २२ ॥ पितरि

पितरि नव भ्रातरो मेरुदुहितॄर्मेरुदेवीं प्रतिरूपामुग्रदंष्ट्रीं लतां रम्यां श्यामां नारीं भद्रां देववीतिमितिसंज्ञा नवोदवहन् ॥ २३ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां पञ्चमस्कन्धे आग्नीध्रवर्णनं नाम द्वितीयोऽध्यायः ॥२॥

अथ तृतीयोऽध्यायः

श्रीशुक उवाच

नाभिरपत्यकामोऽप्रजया मेरुदेव्या भगवन्तं यज्ञपुरुषमवहितात्माऽयजत ॥१॥ तस्य ह वाव श्रद्धया विशुद्धभावेन यजतः प्रवर्ग्येषु प्रचरत्सु द्रव्यदेशकालमन्त्रर्त्विग्दक्षिणाविधानयोगोपपत्त्या दुरधिगमोऽपि भगवान् भागवतवात्सल्यतया सुप्रतीक आत्मानमपराजितं निजजनाभिप्रेतार्थविधित्सया गृहीतहृदयो हृदयङ्गमं मनोनयनानन्दनावयवाभिराममाविश्चकार ॥ २॥ अथ ह तमाविष्कृतभुजयुगलद्वयं हिरण्मयं पुरुषविशेषं कपिशकौशेयाम्बरधरमुरसि विलसच्छ्रीवत्सललामं दरवरवनरुहवनमालाच्छूर्यमृतमणिगदादिभिरुपलक्षितं स्फुटकिरणप्रवरमुकुटकुण्डलकटककटिसूत्रहारकेयूरनूपुराद्यङ्गभूषणविभूषितमृत्विक्सदस्यगृहपतयोऽधना इवोत्तमधनमुपलभ्य सबहुमानमर्हणेनावनतशीर्षाण उपतस्थुः ॥ ३ ॥

आग्नीध्रे सम्परेते मृते सति । मेरुसंज्ञक प्रजापतेः पुत्रीः । इति कथिताः संज्ञा नामानि यासां ता नव उदवहन्विवाहितवन्तः ॥ २३ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे गूढार्थदीपिन्यां द्वितीयोऽध्यायः ।

तृतीये नाभिरारेभे पुत्रार्थं यज्ञमुत्तमम् ।
तत्र प्रादुरभूत् साक्षात् पुत्रः सन्नृषमो हरिः ॥१॥

नाभिः आग्नीध्रपुत्रः । अप्रजया सन्ततिशून्यया भार्यया सह । अवहितात्मा सावधानचित्तः सन् ॥ १ ॥ यजतस्तस्य नाभेः प्रवर्ग्यसंज्ञकेषु कर्मसु प्रवर्तमानेषु सत्सु द्रव्यादिसप्तसाधनसम्पत्त्या दुर्ज्ञेयोऽपि सुप्रतीकः सुन्दरांगो भगवान् वात्सल्यतया आत्मानं प्रकटीचकार । अपराजितम् अभक्तैः स्वतन्त्रम् । गृहीतहृदय आकृष्टचित्तः आनन्दजनकैरवयवैः रतिरमणीयम् । ह वाव अपूर्वमेत्यर्थः ॥ २ ॥ अथ ऋत्विगादयस्तमुपलभ्य नतमस्तकाः सन्तः अर्हणेन अर्घ्येण सह उपतस्थुः तुष्टुवुः । युगलद्वयं चतुष्टयम् । हिरण्मयं प्रकालवहुलम् । पुरुषोत्तमम् । कपिशं पीतम् । श्रीवत्सो भृगुलता वा । ललामं चिह्नम् । शङ्खपद्मवनमालाचक्र कौस्तुभादिभिः । अत्तीति अत् शूरीणामत् इत्यच्छूरि । शूरशूरिश्च शूरे इति कोशात् । अमृतेन सहोद्भूतो मणिरभृतमणिः कौस्तुभः उत्तमधनं रत्नम् । गृहपतिर्यजमानः ॥ ३ ॥

ऋत्विज ऊचुः

अर्हसि मुहुरर्हत्तमार्हणमस्माकमनुपथानां नमो नम इत्येतावत्सदुपशिक्षितं कोऽर्हति पुमान् प्रकृतिगुणव्यतिकरमतिरनीश ईश्वरस्य परस्य प्रकृतिपुरुषयोरर्वाक्तनाभिर्नामरूपाकृतिभी रूपनिरूपणम् ॥४॥ सकलजननिकायवृजिननिरसनशिवतमप्रवरगुणगणैकदेशकथनादृते ॥५॥ परिजनानुरागविरचितशबलसंशब्दसलिलसितकिसलयतुलसिकादूर्वाङ्कुरैरपि सम्भृतया सपर्यया किल परम परितुष्यसि ॥६॥

अथाऽनयापि न भवत इज्ययोरुभारभरया समुचितमर्थमिहोपलभामहे ॥७॥ आत्मन एवानुसवनमञ्जसाऽव्यतिरेकेण बोभूयमानाशेषपुरुषार्थस्वरूपस्य किन्तु नाथाशिष आशासानानामेतदभिसंराधनमात्रं भवितुमर्हति ॥८॥ तद्यथा बालिशानां स्वयमात्मनः श्रेयः परमविदुषां परमपरमपुरुष प्रकर्षकरुणया स्वमहिमानं चापवर्गाख्यमुपकल्पयिष्यन् स्वयं नापचित एवेतरवदिहोपलक्षितः ॥९॥ अथायमेव वरो ह्यर्हत्तम यर्हि बर्हिषि राजर्षेर्वरदर्षभो भवान्निजपुरुषेक्षणविषय आसीत् ॥१०॥

असङ्गनिशितज्ञानानलविधूताशेषमलानां भवत्स्वभावानामात्मारामाणां मुनीनामनवरतपरिगुणितगुणगण परममङ्गलायनगुणगणकथनोऽसि ॥११॥ अथ कथंचित्स्खलनक्षुत्पतनजृम्भणदुरवस्थानादिषु विवशानां नः स्मरणाय ज्वरमरणदशायामपि सकलकश्मलनिरसनानि तव गुणकृतनामधेयानि वचनगोचराणि भवन्तु ॥१२॥

हे अर्हत्तम पूज्यतम ! अनुवर्तिनां भक्तानां नः अर्हणं स्वीकर्तुमर्हसि । किं तत् नमो नम इत्येतावदेव शिक्षितं नान्यत् किञ्चित् ॥ ४ ॥ यतः सकलदुःखनिवर्तकगुणगणैकदेशकथनं विना नामादिभिस्तव स्वरूपनिरूपणं कर्तुं कः पुमान् अर्हति न कोऽपीत्यन्वयः । नामादिभिरुपलक्षितो जीवो वा । गुणपरिणामरूपः संसारस्तत्र मतिर्यस्य अत एव अनीशो बद्धः ॥ ५ ॥ भक्तजनप्रेमकृतगद्गदाक्षरस्तुतिभिः सलिलादिभिश्च केवलं संपादितया पूजया त्वम् । सितकिसलयाः शुद्धपल्लवाः ॥ ६ ॥ अथ अन्यथा तु भक्तिं विना तु अनेकांगपूर्णयाऽपि अनया भवतोऽपेक्षितं प्रयोजनं नैव पश्यामः । कुतः । आत्मनः स्वत एव सर्वदा साक्षादेव अव्यतिरेकेण अविच्छेदेन समन्वयेन बोभूयमाना अतिशयेन आविर्भवन्तो येऽशेष पुरुषार्थास्तेषां स्वरूपस्य कारणस्य भवत इत्यन्तमेकवाक्यम् ॥ ७ ॥ किन्तु हे नाथ ! भोगानिच्छतामस्माकम् एतत् यजनं तवाभिसंराधनमात्रं केवलं त्वदनुग्रहे निमित्तमात्रम् ॥८॥ तत् तस्मात् यथा अज्ञानां समीपं कृपया तानुद्धर्तुं विज्ञ आयाति तथैव त्वमपि हे पुरुषोत्तम ! स्वमहिमानं स्वज्ञानं चकारात् अभीष्टं वस्तु च दास्यन् नापचितः अस्माभिः पूजापेक्षारहित एव इतरवत् सापेक्षवत् उपलक्षितः दृष्टोऽसि ॥९॥ यद्यपि त्वं वरान् दातुमायातोऽसि अथ तथाऽपि राजर्षेर्नाभेः बर्हिषि यज्ञे यर्हि भक्तानां दृष्टिविषय आसीत् तदाऽयमेव वरः सञ्जातः ॥१०॥ मुनीनां परममंगलायनं गुणगणकथनमेव न तु दर्शनं यस्य तथाभूतोऽसि अत एव तैर्निरन्तरमभ्यस्ता गुणगणा यस्येति संबोधनम् । असंगेन वैराग्येण तीक्ष्णं यज्ज्ञानं तदेवानलस्तेन विधूता मला येषां भवत इव शान्तः स्वभावो येषाम् ॥ ११ ॥ अथ अतः क्षुत् छिक्का ।

किञ्चायं राजर्षिरपत्यकामः प्रजां भवादृशीमाशासान ईश्वरमाशिषां स्वर्गापवर्गयोरपि भवन्तमुपधावति प्रजायामर्थप्रत्ययो धनदमिवाधनः फलीकरणम् ॥१३॥ को वा इह तेऽपराजितोऽपराजितया माययाऽनवसितपदव्यानावृतमतिर्विषयविषरयानावृतप्रकृतिरनुपासितमहच्चरणः ॥१४॥ यदु ह वाव तव पुनरदभ्रकर्तरिह समाहूतस्तत्रार्थधियां मन्दानां नस्तद्यद्देवहेलनं देवदेवार्हसि साम्येन सर्वान् प्रतिवोढुमविदुषाम् ॥१५॥

श्रीशुक उवाच

इति निगदेनाभिष्टूयमानो भगवाननिमिषर्षभो वर्षधराभिवादिताभिवन्दितचरणः सदयमिदमाह ॥१६॥

श्रीभगवानुवाच

अहो बताहमृषयो भवद्भिरवितथगीर्भिर्वरमसुलभमभियाचितो यदमुष्यात्मजो मया सदृशो भूयादिति ॥१७॥ ममाहमेवाभिरूपः कैवल्यादथापि ब्रह्मवादो न मृषा भवितुमर्हति ममैव हि मुखं यद् द्विजदेवकुलम् ॥१८॥ तत आग्नीध्रीयेंऽशकलयावतरिष्याम्यात्मतुल्यमनुपलभमानः ॥१९॥

श्रीशुक उवाच

इति निशामयन्त्या मेरुदेव्याः पतिमभिधायान्तर्दधे भगवान् ॥२०॥ बर्हिषि तस्मिन्नेव विष्णुदत्त भगवान् परमर्षिभिः प्रसादितो नाभेः प्रियचिकीर्षया तदवरोधायने मेरुदेव्यां धर्मान् दर्शयितुकामो वातरशनानां श्रमणानामृषीणामूर्ध्वमन्थिनां शुक्लया तनुवावततार ॥२१॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां पञ्चमस्कन्धे नाभिचरिते ऋषभावतारो नाम तृतीयोऽध्यायः ॥३॥

कश्मलं पापेऽपि पापनिवतकानि स्मरणाय विवशानां त्वां स्मर्तुमशक्तानां नः ॥ १२ ॥ प्रजां पुत्रम् । आशासान इच्छन् आशिषाम् ऐहिकभोगानां स्वर्गापवर्गयोश्च ईश्वरं दातारं त्वां भजति । यथा दरिद्रः क्षुद्रतण्डुलादिकमिच्छन् कुवेरमुपधावति तद्वत् । अर्थप्रत्ययः पुरुषार्थबुद्धिः ॥ १३ ॥ यदि अनुपासितमहच्चरणः तर्हि ते मायया कोऽपराजितः सर्वोऽपि पराजित एव । कश्च तयाऽनावृतमतिः सर्वोऽप्यावृतमतिः कश्च अनावृतप्रकृतिः सर्वोऽप्यावृतस्वभावः । अत एवैतादृशी वाञ्छा जागर्तीत्यर्थः । अनवसितपदव्या अलक्षितमार्गया ॥ १४ ॥ हे अदभ्रकर्तः बहुकार्यकर्तः ! अल्पीयसे प्रयोजनाय यत् यस्मादिह समाहूतः तत्र पुत्रेऽर्थधियां नः यत् देवस्य तव अवज्ञानं जातं तत् वोढुं क्षन्तुमर्हसि । सर्वान् प्रति साम्येन हेतुना । उह ग्लानौ । वाव प्रसिद्धे ॥ १५ ॥ निगदेन गद्यात्मकस्तोत्रेण । अनिमिषर्षभः देवश्रेष्ठो हरिः । वर्षधरो भारतवर्षाधिपो नाभिस्तेन अभिवादितैः ऋत्विग्भिः ॥ १६ ॥ हे ऋषयः । भूयादिति यत् तत् भवद्भिः दुर्लभं वरमभियाचितः अवितथगीर्भिः अमोघवाग्भिः । अभिरूपः सदृशः अहमेव कैवल्यात् अद्वितीयत्वात् । द्विजदेवा ब्राह्मणाः । अहो वत अत्याश्चर्ये ॥ १७ ॥ ततो द्विजदेवोक्तेः । आग्नीध्रीये नाभौ वंशे वा ॥ १८ ॥ निशामयन्त्याः श्रृण्वन्त्याः ॥ १९ ॥ हे विष्णुदत्त परीक्षित् । तस्मिन् बर्हिषि यज्ञे । तस्यावरोधायनेऽन्तः पुरे या मेरुदेवी भार्या तस्यामवततार । श्रमणानां तपस्विनाम् । ऊर्ध्वमन्थिनाम् ऊर्ध्वरेतसाम् ॥ २० ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे गूढार्थदीपिन्यां तृतीयोऽध्यायः ।

अथ चतुर्थोऽध्यायः

श्रीशुक उवाच

अथ ह तमुत्पत्त्यैवाभिव्यज्यमानभगवल्लक्षणं साम्योपशमवैराग्यैश्वर्यमहाविभूतिभिरनुदिनमेधमानानुभावं प्रकृतयः प्रजा ब्राह्मणा देवताश्चावनितलसमवनायातितरां जगृधुः ॥१॥ तस्य ह वा इत्थं वर्ष्मणा वरीयसा बृहच्छ्लोकेन चौजसा बलेन श्रिया यशसा वीर्यशौर्याभ्यां च पिता ऋषभ इतीदं नाम चकार ॥२॥ तस्य हीन्द्रः स्पर्धमानो भगवान् वर्षे न ववर्ष तदवधार्य भगवानृषभदेवो योगेश्वरः प्रहस्यात्मयोगमायया स्ववर्षमजनाभं नामाभ्यवर्षत् ॥३॥ नाभिस्तु यथाभिलषितं सुप्रजस्त्वमवरुध्यातिप्रमोदभरविह्वलो गद्गदाक्षरया गिरा स्वैरं गृहीतनरलोकसधर्मं भगवन्तं पुराणपुरुषं मायाविलसितमतिर्वत्स तातेति सानुरागमुपलालयन् परां निर्वृतिमुपगतः ॥४॥ विदितानुरागमापौरप्रकृति जनपदो राजा नाभिरात्मजं समयसेतुरक्षायामभिषिच्य ब्राह्मणेषूपनिधाय सह मेरुदेव्या विशालायां प्रसन्ननिपुणेन तपसा समाधियोगेन नरनारायणाख्यं भगवन्तं वासुदेवमुपासीनः कालेन तन्महिमानमवाप ॥५॥

यस्य ह पाण्डवेय श्लोकावुदाहरन्ति

तुर्ये राज्येऽभिषिक्तः सन् शतं पुत्रानजीजनत् ।
ऋषभः पालयन्पृथ्वीं प्रजा धर्मेष्वरीरमत् ॥१॥

अथ अवतारानन्तरं प्रकृतयोऽमात्यादयस्तं पृथ्वीपालनाय जगृधुः ऐच्छन् । ह हर्षेण । वर्धमानप्रभावम् ॥ १ ॥ ह वै लोक विलक्षणस्य तस्य जातस्य पुत्रस्य वर्ष्मणा देहेन ओज आदिभिश्च अतिश्रेष्ठत्वात् ऋषभ इति प्रसिद्धं नाम । बृहन्तः कवीनां श्लोका यस्मिंस्तेन । ओजस्तेजः । वीर्यं प्रभावः । शौर्यमुत्साहः ॥ २ ॥ स्पर्धमानः विरोधमाचरन् वर्षे खण्डे न ववर्षं तत् अवधार्यं ज्ञात्वा । मायया शक्त्या । अज ऋषभदेवः नाभिस्तत्पिता च तयोरेतद्वर्षस्वामित्वात् अजनाभ्योरिदमित्यणि अजनाभं भारतवर्षस्य प्राक्तनं नामैतत् । वृष्टियुक्तमकार्षीत् । संज्ञापूर्वकत्वाद् वृद्ध्यभावः ॥ ३ ॥ सुप्रजस्त्वं सत्पुत्रत्वं प्राप्य । स्वैरं स्वेच्छया गृहीतो नरलोकसमानो धर्मो मनुष्याकारो येन । माया पुत्रासक्तिस्तया विलसिता वशीकृता मतिर्यस्य । परां निर्वृतिं परमानन्दं प्राप्तः । हे तात प्रिय ! ॥ ४ ॥ जनाः पौरादय एव पदं पुत्राभिषेके प्रमाणं यस्य स राजा पौरान् प्रकृतीश्च अभिव्याप्य विदितोऽनुरागो यस्मिन् तमात्मजं वर्णाश्रमधर्ममर्यादारक्षायामभिषिच्य विशालायां बदरिकाश्रमे प्रसन्नेन सर्वसुखोत्पादकेन निपुणेन तीव्रेण तपोरूपेण निश्चलभक्तियोगेन तस्यैव महिमा यत्र तं वैकुण्ठम् । विशालाख्यनृपस्य तपोभूमित्वात् विशालेत्युच्यते इति वाराहे[1] ॥ ५ ॥ यस्य नाभेः ह प्रसिद्धौ । तत् प्रसिद्धं कर्म अनु तदनन्तरं को नु आचरेत् । कर्तुं शक्नुयात् न कोऽपीत्यर्थः । शुद्धं कर्म भक्ति-

---

१. विशालेन नृपतिना यतस्तप्तं पुरा तपः । अतो विशाला सा प्रोक्ता बदरीवनमेदिनी ।

को नु तत्कर्म राजर्षेर्नाभेरन्वाचरेत्पुमान् । अपत्यतामगाद्यस्य हरिः शुद्धेन कर्मणा ॥६॥
ब्रह्मण्योऽन्यः कुतो नाभेर्विप्रा मङ्गलपूजिताः । यस्य बर्हिषि यज्ञेशं दर्शयामासुरोजसा ॥७॥

अथ ह भगवानृषभदेवः स्ववर्षं कर्मक्षेत्रमनुमन्यमानः प्रदर्शितगुरुकुलवासो लब्धवरैर्गुरुभिरनुज्ञातो गृहमेधिनां धर्माननुशिक्षमाणो जयन्त्यामिन्द्रदत्तायामुभयलक्षणं कर्म समाम्नायाम्नातमभियुञ्जन्नात्मजानामात्मसमानानां शतं जनयामास ॥८॥ येषां खलु महायोगी भरतो ज्येष्ठः श्रेष्ठगुण आसीद्येनेदं वर्षं भारतमिति व्यपदिशन्ति ॥९॥ तमनु कुशावर्त इलावर्तो ब्रह्मावर्तो मलयः केतुर्भद्रसेन इन्द्रस्पृग्विदर्भः कीकट इति नव नवतिप्रधानाः ॥१०॥

कविर्हरिरन्तरिक्षः प्रबुद्धः पिप्पलायनः । आविर्होत्रोऽथ द्रुमिलश्चमसः करभाजनः

इति भागवतधर्मदर्शना नव महाभागवतास्तेषां सुचरितं भगवन्महिमोपबृंहितं वसुदेवनारदसंवादमुपशमायनमुपरिष्टाद्वर्णयिष्यामः ॥११॥ यवीयांस एकाशीतिर्जायन्तेयाः पितुरादेशकरा महाशालीना महाश्रोत्रिया यज्ञशीलाः कर्मविशुद्धा ब्राह्मणा बभूवुः ॥१२॥

भगवानृषभसंज्ञ आत्मतन्त्रः स्वयं नित्यनिवृत्तानर्थपरम्परः केवलानन्दानुभव ईश्वर एव विपरीतवत्कर्माण्यारभमाणः कालेनानुगतं धर्ममाचरणेनोपशिक्षयन्नतद्विदां सम उपशान्तो मैत्रः कारुणिको धर्मार्थयशः प्रजानन्दामृतावरोधेन गृहेषु लोकं न्यरमयत् ॥१३॥ यद्यच्छीर्षण्याचरितं तत्तदनुवर्तते लोकः ॥१४॥ यद्यपि स्वविदितं सकलधर्मं ब्राह्मं गुह्यं ब्राह्मणैर्दर्शितमार्गेण सामादिभिरुपायैर्जनतामनुशशास ॥१५॥ द्रव्यदेशकालवयःश्रद्धर्त्विग्विविधोद्देशोपचितैः सर्वैरपि क्रतुभिर्यथोपदेशं शतकृत्व इयाज ॥१६॥ भगवतर्षभेण परिरक्ष्यमाण एतस्मिन् वर्षे न कश्चन पुरुषो वाञ्छत्यविद्यमानमिवात्मनोऽन्यस्मात्कथंचन किमपि कर्हिचिदवेक्षते

योग एव ॥ ६ ॥ कुतः कः । प्रथमार्थे तसिः । यस्य बर्हिषि यज्ञे विप्रा ओजसा तपोबलेन यज्ञेशं श्रीविष्णुम् । मंगलं दक्षिणा ॥ ७ ॥ हेति यथावत् प्रदर्शितेति अन्येषां ग्रहणायेति शेषः । वरो दक्षिणा । अनुशिक्षमाणः अनुशिक्षयितुम् । सम्यक् आम्नायाम्नातं शास्त्रविहितम् । प्रवृत्तिनिवृत्तिलक्षणं कर्म अनुतिष्ठन् जयन्त्यां भार्यायाम् आत्मजानां शतम् ॥८॥ व्यपदिशन्ति व्यवहरन्ति ॥९॥ तं भरतमनु भरतस्य कनिष्ठा इत्यर्थः । नवतेः प्रधाना ज्येष्ठाः ॥ १० ॥ उपबृंहितं पूरितम् । तयोः संवादो यत्र । चित्त शान्तिहेतुकम् । उपरिष्टात् एकादशस्कन्धे ॥ ११ ॥ यवीयांसः कनिष्ठा जयन्तीपुत्राः महाशालीना गार्हस्थ्य धर्मप्रदर्शकाः । ब्राह्मणा युगान्तरे । तद्वत्प्रतीयमाना वा । तथैव शास्त्रपद्धतेः ॥ १२ ॥ आत्मतन्त्रः कर्मानधीनः अनर्थपरम्परा रागद्वेषादिरूपा । विपरीतवत् प्राकृतवत् । अनुगतं नष्टम् । तं धर्मं न जानतो जनान् कर्मणि षष्ठी । धर्मादीनामवरोधेन प्राप्तिहेतुना पूर्वं गृहाश्रमेषु लोकं न्यरमयत् नितरामरमयत् । इति प्राचीनतमः पाठः श्रीधरसम्मतश्च । प्रजानन्दः प्रजार्थो भोगः । अमृतं मोक्षः ॥ १३ ॥ शीर्षण्येन श्रेष्ठेन ॥ १४ ॥ सकला धर्मा यस्मिन् ब्राह्मं गुह्यं वेदरहस्यं यद्यपि स्वतोऽनुभूतं तथाऽपि ॥ १५ ॥ द्रव्यादिभिरुपचितैः पूर्णैर्यज्ञैः शतवारान् यथाविधि विष्णुम् इयाज । द्रव्यं व्रीह्यादि । देशः तीर्थादिः । कालो वसन्तादिः । वयो यौवनम् । उद्देशा देवतोद्देशाः ॥ १६ ॥ कश्चिदपि पुरुषोऽविद्यमानं

भर्तर्यनुसवनं विजृम्भितस्नेहातिशयमन्तरेण ॥१७॥ स कदाचिदटमानो भगवानृषभो ब्रह्मावर्तगतो ब्रह्मर्षिप्रवरसभायां प्रजानां निशामयन्तीनामात्मजानवहितात्मनः प्रश्रयप्रणयभरसुयन्त्रितानप्युपशिक्षयन्निति होवाच ॥१८॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां पञ्चमस्कन्धे चतुर्थोऽध्यायः ॥४॥

अथ पञ्चमोऽध्यायः

ऋषभ उवाच

नायं देहो देहभाजां नृलोके कष्टान् कामानर्हते विड्भुजां ये।
तपो दिव्यं पुत्रका येन सत्त्वं शुद्ध्येद्यस्माद् ब्रह्मसौख्यं त्वनन्तम् ॥१॥
महत्सेवां द्वारमाहुर्विमुक्तेस्तमोद्वारं योषितां सङ्गिसङ्गम्।
महान्तस्ते समचित्ताः प्रशान्ता विमन्यवः सुहृदः साधवो ये ॥२॥
ये वा मयीशे कृतसौहृदार्था जनेषु देहम्भरवार्तिकेषु।
गृहेषु जायात्मजरातिमत्सु न प्रीतियुक्ता यावदर्थाश्च लोके ॥३॥

खपुष्पमिव किमपि वस्तु आत्मनोऽर्थे अन्यस्मान्न वाञ्छति। केवलमन्तरेण अन्तरात्मना भर्तरि प्रतिक्षणं वर्धमानस्नेहातिशयमपेक्षते। यद्वा न वाञ्छति न च पश्यत्यपि खपुष्पमिव अन्तरेण विना ॥ १७ ॥ शानच् ताच्छील्ये। अटितुकामः प्रव्रजिष्यन्नित्यर्थः निशामयन्तीनां शृण्वन्तीनां सतीनाम्। अवहितात्मनः समाहितचित्तान्। प्रश्रयो नम्रता प्रणयः स्नेहस्तयोराधिक्येन वशीकृतानपि इति ह सुस्पष्टम् ॥ १८ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे गूढार्थदीपिन्यां चतुर्थोऽध्यायः।

पञ्चमे लोकशिक्षार्थं मोक्षधर्मानुपादिशत्।
नियुज्य भरतं राज्ये न्यासधर्ममथाचरत् ॥ १ ॥

ये विड्भुजां श्वशूकरादीनामपि सन्ति तान् कष्टप्रदान् कामान् भोक्तुमयं मनुष्यदेहो नार्हति किन्तु दिव्यं तपो भगवदाराधनं कर्तुमर्हति। येन तपसा सत्त्वमन्तःकरणम्। यस्मात् शुद्धसत्त्वात् अविनाशि कृष्णसंबन्धि सुखमेव नान्यत् दुःखादि। देहभाजां प्राणिनां मध्ये। शालिनीवृत्तम् ॥ १ ॥ महदिति युग्मकम्। योषितां सङ्गिभिः स्त्रीलम्पटैः सह सङ्गं तमोद्वारं संसारकारणं चाहुः। के महान्तः। ये समचित्तत्वादिगुणयुक्ताः ये च मयि कृतसौहृदार्थाः ये च जनेषु गृहेषु च न प्रीतियुक्ताः किं बहुना यावताऽर्थो देहनिर्वाहस्तावन्मात्रग्राहिणश्च ये ते महान्त इत्यन्वयः। देहम्भरा देहपोषणपरा विषयवार्तैव येषु इत्युभयोर्विशेषणम्। रातिर्मित्रं धनं वा ॥ २।३ ॥ यत् यदा इन्द्रियतृप्तये आपृणोति व्यापारासक्तो भवति तदा प्रमत्तः सन् नूनं विकर्म पापं कुरुते तदहं साधु न मन्ये। कुतः। यतः पापात्

नूनं प्रमत्तः कुरुते विकर्म यदिन्द्रियप्रीतय आपृणोति ।
न साधु मन्ये यत आत्मनोऽयमसन्नपि क्लेशद आस देहः ॥४॥
पराभवस्तावदबोधजातो यावन्न जिज्ञासत आत्मतत्त्वम् ।
यावत्क्रियास्तावदिदं मनो वै कर्मात्मकं येन शरीरबन्धः ॥५॥
एवं मनः कर्मवशं प्रयुङ्क्ते अविद्ययाऽऽत्मन्युपधीयमाने ।
प्रीतिर्न यावन्मयि वासुदेवे न मुच्यते देहयोगेन तावत् ॥६॥
यदा न पश्यत्ययथा गुणेहां स्वार्थे प्रमत्तः सहसा विपश्चित् ।
गतस्मृतिर्विन्दति तत्र तापानासाद्य मैथुन्यमगारमज्ञः ॥७॥
पुंसः स्त्रिया मिथुनीभावमेतं तयोर्मिथो हृदयग्रन्थिमाहुः ।
अतो गृहक्षेत्रसुताप्तवित्तैर्जनस्य मोहोऽयमहं ममेति ॥८॥
यदा मनोहृदयग्रन्थिरस्य कर्मानुबद्धो दृढ आश्लथेत ।
तदा जनः सम्परिवर्ततेऽस्मान्मुक्तः परं यात्यतिहाय हेतुम् ॥९॥
हंसे गुरौ मयि भक्त्यानुवृत्त्या वितृष्णया द्वन्द्वतितिक्षया च ।
सर्वत्र जन्तोर्व्यसनावगत्या जिज्ञासया तपसेहानिवृत्त्या ॥१०॥
मत्कर्मभिर्मत्कथया च नित्यं मद्देवसङ्गाद् गुणकीर्तनान्मे ।
निर्वैरसाम्योपशमेन पुत्रा जिहासया देहगेहात्मबुद्धेः ॥११॥

आत्मनो जीवस्य असन् मिथ्याभूतोऽपि अयं देहः क्लेशदो जातस्तस्य करणस्यानौचित्यादित्यर्थः । यद्वा । यत देह आस पुनः प्राप्तो भवेदित्यर्थः ॥ ४ ॥ यावत् आत्मतत्त्वं श्रीकृष्णस्वरूपं ज्ञातुं नेच्छति तावत् पराभवो वन्धलक्षणः । यावच्च पराभवस्तावत् क्रिया प्रवर्तन्ते यावच्च क्रियास्तावदिदं मनः कर्मोन्मुखमेव न तु ज्ञानोन्मुखं येन कर्मात्मकेन मनसा पुनरपि वन्धः भवति ॥५॥ एवमात्मनि जीवे अविद्यया आच्छाद्यमाने सति तं जीवं मनः प्रयुङ्क्ते विषयेषु प्रेरयति । कियन्तं कालं तत्राह—प्रीतिः भक्तिः यावत् मयि न । कर्माधीनं मनः ॥६॥ यदा विपश्चित् शास्त्रज्ञानवानपि गुणेहां विषयेषु प्रवृत्तिम् अयथा अनर्थरूपां न पश्यति तत्र तदा सोऽपि सहसा गतस्मृतिः सन् अज्ञो मूढः तापान् विन्दति । मैथुनप्रधानं गृहं प्राप्य । स्वार्थे मोक्षमार्गे ॥ ७ ॥ पुंसः स्त्रिया सह योऽयं मिथुनीभावस्तमेतं द्वयोरपि मिथः परस्परं हृदयग्रन्थिं मनोवन्धनपाशमाहुः । ममेयं स्त्रीत्येको ग्रन्थितदुपरि ममायं पतिरिति द्वितीयो ग्रन्थिः । अतो हृदयग्रन्थितः गृहादिभिरहं गृही मम गृहमित्येवं मोहो भवति ॥ ८ ॥ मनोरूपं मनः प्रधानं वा यत् हृदयमन्तः करणं तद्गतो ग्रन्थिःवासनालक्षणः कर्मभिरनुवद्धोऽपि यदा लीलाश्रवणादिभिः शिशिलो भवेत् तदा अस्मान्मिथुनीभावात् निवर्तते । ततश्च हेतुमहङ्कारं त्यक्त्वा परं ब्रह्म याति । यद्वां । हृदयग्रन्थिशब्दो वासनायां रूढः ॥ ९ ॥ तत्र साधनान्याह हंस इति चतुष्केण हंसवत्सारग्राहिणि गुरौ मयि च भक्त्येत्यादिभिः अहमाख्यं लिङ्गदेहं तदुपलक्षितं संसारं च व्यपोहेत् त्यजेदित्यन्वयः । अनुवृत्तिस्तत्परता । सर्वत्र लोकान्तरेपि दुःखानुसन्धानेन । ईहा काम्यं कर्म ॥ १० ॥ मदर्थैः कर्मभिः । अहमेव देव उपास्यो येषां तैर्भक्तैः

अध्यात्मयोगेन विविक्तसेवया प्राणेन्द्रियात्माभिजयेन सध्र्यक् ।
सच्छ्रद्धया ब्रह्मचर्येण शश्वदसम्प्रमादेन यमेन वाचाम् ॥१२॥
सर्वत्र मद्भावविचक्षणेन ज्ञानेन विज्ञानविराजितेन ।
योगेन धृत्युद्यमसत्त्वयुक्तो लिङ्गं व्यपोहेत्कुशलोऽहमाख्यम् ॥१३॥
कर्माशयं हृदयग्रन्थिबन्धमविद्ययाऽऽसादितमप्रमत्तः ।
अनेन योगेन यथोपदेशं सम्यग्व्यपोह्योपरमेत योगात् ॥१४॥
पुत्रांश्च शिष्यांश्च नृपो गुरुर्वा मल्लोककामो मदनुग्रहार्थः ।
इत्थं विमन्युरनुशिष्यादतज्ज्ञान्न योजयेत्कर्मसु कर्ममूढान् ॥१५॥
कं योजयन्मनुजोऽर्थं लभेत निपातयन्नष्टदृशं हि गर्ते ॥१६॥
लोकः स्वयं श्रेयसि नष्टदृष्टिर्योऽर्थान् समीहेत निकामकामः ।
अन्योन्यवैरं सुखलेशहेतोरनन्तदुःखं च न वेद मूढः ॥१७॥
कस्तं स्वयं तदभिज्ञो विपश्चिदविद्यायामन्तरे वर्तमानम् ।
दृष्ट्वा पुनस्तं सघृणः कुबुद्धिं प्रयोजयेदुत्पथगं यथान्धम् ॥१८॥
गुरुर्न स स्यात्स्वजनो न स स्यात्पिता न स स्याज्जननी न सा स्यात् ।
दैवं न तत्स्यान्न पतिश्च स स्यान्न मोचयेद्यः समुपेतमृत्युम् ॥१९॥
इदं शरीरं मम दुर्विभाव्यं सत्त्वं हि मे हृदयं यत्र धर्मः ।
पृष्ठे कृतो मे यदधर्म आरादतो हि मामृषभं प्राहुरार्याः ॥२०॥

सज्ञात् । हे पुत्राः ॥ ११ ॥ योगेन भागवतग्रन्थाभ्यासेन निविक्तसेवया एकान्तवासेन । आत्मा मनः सध्र्यक् सम्यक् । असम्प्रमादेन नियमात्यागेन यमेन मौनेन । विचक्षणेन मत्सत्तादर्शनेन । योगेन अष्टाङ्गेन सत्त्वमुत्साहः । कुशलः समर्थः सन् ॥ १२।१३ ॥ कर्माणि आशेरते यस्मिन् तं हृदयग्रन्थिं वासनालक्षण-मात्मनो वन्धमज्ञानेन प्राप्तम् अनेन उक्तोपायेन निरस्य योगात् साधनात् । युज्यते इति योगः संसार-स्तस्माद्व ॥ १४ ॥ पिता पुत्रान् । गुरुः शिष्यान् । नृपः प्रजाश्च । अनुशिक्षयेत् । अतज्ज्ञान् तत्त्वमजानतः मूढान् न योजयेत् कर्मसु न प्रवर्तयेत् ॥ १५ ॥

कमित्यर्द्धम् । नष्टदशमज्ञानिनं प्रवृत्तिकर्मणि योजयन् प्रेरयन् संसारगर्ते एव तं पातयतीति स मनुजः कमर्थं न कमपीत्यर्थः ॥ १६ ॥ अर्थान् भोग्यपदार्थान् इच्छति । निकाममतिशयेन कामो भोगेच्छा यस्य । हेतोः कर्मणः वैरं ततोऽनन्तदुःखं च न वेद । वैरमित्येव पाठः प्रशस्तः पूर्वाचार्यैं र्व्याख्यातश्चकार सङ्गतिश्च ॥ १७ ॥ अन्तरे काम्यकर्मणि वर्तमानं तमोदृशं कुबुद्धि दृष्ट्वा पुनस्तत्रैव तं कः प्रवर्तयेत् न कोऽपि । यथा कुमार्गेण गच्छन्तमन्धं तेनैव गच्छेदिति को ब्रूयात् । विपश्चित् ज्ञानी सघृणः दयालुश्चेत् ॥ तदभिज्ञः श्रेय.साधनाभिज्ञः ॥ १८ ॥ समुपेतमृत्युं प्राप्तसंसारं जनं यो न मोचयेत् स गुर्वादिर्न स्यात् प्रत्युत तं त्यजेदेवेत्यन्वयः । यथा वलिः शुक्राचार्यं गुरुम्, विभीषणः स्वजनं भ्रातरं, प्रह्लादः पितरं, भरतः कैकेयीं, खट्वांगः इन्द्रादिदैम् यज्ञपत्नीः पतिमिवेत्यर्थः ॥ १९ ॥ इदं मनुष्याकारं दुर्वितर्क्यम् । कुतः ॥

तस्माद्भवन्तो हृदयेन जाताः सर्वे महीयांसममुं सनाभम् ।
अक्लिष्टबुद्धया भरतं भजध्वं शुश्रूषणं तद्भरणं प्रजानाम् ॥२१॥
भूतेषु वीरुद्भ्य उदुत्तमा ये सरीसृपास्तेषु सबोधनिष्ठाः ।
ततो मनुष्याः प्रमथास्ततोऽपि गन्धर्वसिद्धा विबुधानुगा ये ॥२२॥
देवासुरेभ्यो मघवत्प्रधाना दक्षादयो ब्रह्मसुतास्तु तेषाम् ।
भवः परः सोऽथ विरिञ्चवीर्यः स मत्परोऽहं द्विजदेवदेवः ॥२३॥
न ब्राह्मणैस्तुलये भूतमन्यत्पश्यामि विप्राः किमतः परं तु ।
यस्मिन्नृभिः प्रहुतं श्रद्धयाऽश्नामि कामं न तथाग्निहोत्रे ॥२४॥
धृता तनूरुशती मे पुराणी येनेह सत्त्वं परमं पवित्रम् ।
शमो दमः सत्यमनुग्रहश्च तपस्तितिक्षानुभवश्च यत्र ॥२५॥
मत्तोऽप्यनन्तात्परतः परस्मात्स्वर्गापवर्गाधिपतेर्न किंचित् ।
येषां किमु स्यादितरेण तेषामकिंचनानां मयि भक्तिभाजाम् ॥२६॥
सर्वाणि मद्धिष्ण्यतया भवद्भिश्चराणि भूतानि सुता ध्रुवाणि ।
सम्भावितव्यानि पदे पदे वो विविक्तदृग्भिस्तदुहार्हणं मे ॥२७॥

सत्त्वं शुद्धसत्त्वात्मकं यद् ब्रह्म तदेव मूर्तिमज्जातमतः । हृदयमपि हि तथैव शुद्धसत्त्वात्मकमेव यत्र धर्मस्तिष्ठतीति । अधर्मश्च मे मया आरात् दूरादेव पृष्ठे कृतः यत् यस्मात् अतो माम् ऋषभं सर्वश्रेष्ठं प्राहुः आर्याः पित्रादयः । सन्दर्भस्तु तत्त्वमिति पाठं प्रकल्प्य यत्तत्त्वं तदेव । यत्रैव धर्मः तत्रैव मे हृदयं मन इत्याह ॥ २० ॥ हृदयेन शुद्धसत्त्वमयेन उरसा जाताः तस्मात् । पुत्रा औरसाः अत एव निर्मत्सराः सन्तः ज्येष्ठं सोदरं च भरतं भजध्वं तदेव मे शुश्रूषणं प्रजापालनं च नान्यथेत्यर्थः । अक्लिष्टबुद्धया निष्कपटभावेन ॥ २१ ॥ भूतेषु चेतनाचेतनेषु मध्ये वीरुधः स्थावराः उत् अतिशयेन उत्तमाः तेभ्योऽपि ये सरीसृपा जंगमास्ते उदुत्तमा इति सर्वत्रान्वेति । सबोधनिष्ठाः पश्वादयः । ततस्तेष्वपि । ये विबुधादयः किन्नरादयस्ते ॥ २२ ॥ तेभ्योऽसुराः तेभ्यो देवाः सन्धिरार्षः । ते देवा इन्द्रप्रधानाः तेभ्य इन्द्रः श्रेष्ठः । ततो दक्षादयः । तेषां मध्ये भवः परः श्रेष्ठः । स च विरिञ्चवीर्यः ब्रह्मपुत्रः ततो ब्रह्मा श्रेष्ठ इति लीलोक्तिर्न वस्तुतः । स ब्रह्मा मत्परः अहं परः श्रेष्ठो यस्य ब्रह्मणोऽप्यहं श्रेष्ठः । द्विजेषु देवाः पूज्या ब्राह्मणा देवाः पूज्या यस्य सोऽहं मत्तोऽपि ब्राह्मणाः श्रेष्ठा इति लोक संग्रहार्थम् ॥ २३ ॥ ब्राह्मणैरन्यत् भूतं न तुलये सममेव न पश्यामि अतस्तेभ्यः परमुत्कृष्टं किं कथं पश्यामि । तत्र हेतुः यस्मिन् ब्राह्मणमुखे प्रहुतं पापसादि कामं यथेच्छं यथा तथा नेत्यन्वयः । हे विप्राः ॥२४॥ येन ब्राह्मणेन इह लोके मे तनूर्मूर्तिः वेदरूपा धृता यत्र च सत्त्वादयोऽष्टौ गुणाः प्रतिष्ठिताः ततः परं किं पश्यामि न किमपीति योजना ॥ २५ ॥ येषां ब्राह्मणानां मत्तोऽपि किञ्चिन्न प्रार्थनीयं तेषामितरेण दात्रा तद्दत्तेन राज्यादिना वा किमु स्यात् न किमपि । नास्ति किञ्चन प्रार्थनीयं येषामथापि ओ वासुदेव एव किञ्चन सर्वस्वं येषामिति श्लेषः । परतः ब्रह्मारपि ॥२६॥ हे सुताः । ध्रुवाणि स्थावराणि चराणि जङ्गमानि च सर्वाण्यपि भूतानि मम निवासस्थानत्वेन भवद्भिः

मनोवचोदृक्करणेहितस्य साक्षात्कृतं मे परिबर्हणं हि।
विना पुमान् येन महाविमोहात्कृतान्तपाशान्न विमोक्तुमीशेत् ॥२८॥

श्रीशुक उवाच

एवमनुशास्यात्मजान् स्वयमनुशिष्टानपि लोकानुशासनार्थं महानुभावः परमसुहृद्भगवानृषभापदेश उपशमशीलानामुपरतकर्मणां महामुनीनां भक्तिज्ञानवैराग्यलक्षणं पारमहंस्यधर्ममुपशिक्षमाणः स्वतनयशतज्येष्ठं परमभागवतं भगवज्जनपरायणं भरतं धरणिपालनायाभिषिच्य स्वयं भवन एवोर्वरितशरीरमात्रपरिग्रह उन्मत्त इव गगनपरिधानः प्रकीर्णकेश आत्मन्यारोपिताहवनीयो ब्रह्मावर्तात्प्रवव्राज ॥२९॥ जडान्धमूकबधिरपिशाचोन्मादकवदवधूतवेषोऽभिभाष्यमाणोऽपि जनानां गृहीतमौनव्रतस्तूष्णीं बभूव ॥३०॥ तत्र तत्र पुरग्रामाकरखेटवाटखर्वटशिबिरव्रजघोषसार्थगिरिवनाश्रमादिष्वनुपथमवनिचरापसदैः परिभूयमानो मक्षिकाभिरिव वनगजस्तर्जनताडनावमेहनष्ठीवनग्रावशकृद्रजःप्रक्षेपपूतिवातदुरुक्तैस्तदविगणयन्नेवासत्संस्थान एतस्मिन् देहोपलक्षणे सदपदेश उभयानुभवस्वरूपेण स्वमहिमावस्थानेनासमारोपिताहंममाभिमानत्वादविखण्डितमनाः पृथिवीमेकचरः परिबभ्राम ॥३१॥ अतिसुकुमारकरचरणोरःस्थलविपुलबाह्वंसगलवदनाद्यवयवविन्यासः प्रकृतिसुन्दरस्वभावहाससुमुखो नवनलिनदलायमानशिशिरतारारुणायतनयनरुचिरः सदृशसुभगकपोलकर्णकण्ठनासो विगूढस्मितवदनमहोत्सवेन पुरवनितानां मनसि कुसुमशरासनमुप दधानः परागवलम्बमानकुटिलजटिलकपिशकेशभूरिभारोऽवधूतमलिननिजशरीरेण ग्रहगृहीत इवादृश्यत ॥३२॥

सम्माननीयानि पदे पदे प्रतिक्षणं तदुह तदेव वो युष्माभिः कृतं मे मम अर्हणं पूजनं भवति नान्यदित्यर्थः। यद्वा हे सुताः। युष्माभिः भवद्भिः समास्थजनैश्चेति केचित्। विविक्ता पूता ॥ २७ ॥ मनोवचोदृक्सहितानां करणानां श्रोत्रादीन्द्रियाणामीहितस्य व्यापारस्य साक्षात्कृतं दृष्टं फलं मदाराधनमेव। येन परिबर्हणेन विना कालपाशात् अज्ञानलक्षणसंसारात् आत्मानं विमोचयितुं नेशेत् न समर्थो भवेत् ॥ २८ ॥ स्वयमनुशिष्टान् स्वतः शिक्षितानपि अनुशास्य शिक्षयित्वा मुनीनां धर्ममुपशिक्षयिष्यन् भरतं चाभिषिच्य स्वयं भवने एव सर्वं परित्यज्येति शेषः ऋषभनामा स भगवान् ब्रह्मावर्ताद् प्रवव्राजेत्यन्वयः। उर्वरितोऽवशिष्टः। परिकरः गगनपरिधानो दिगम्बरः। प्रकीर्णा विक्षिप्ताः। आहवनीयो वैदिकोऽग्निः ॥ २९ ॥ जनानां मध्ये ॥ ३० ॥ तत्र पुरादिषु अनुपथं प्रतिमार्गम् अवनिचरापसदैर्दुर्जनैस्तर्जनादिभिः परिभूयमानोऽपि तदविगणयन्नेव एकाकी सन् पृथिवीं परिबभ्रामेत्यन्वयः। कथंभूतः। सदित्यपदेशो नाममात्रं यस्य वस्तुतः असत् नश्वरं संस्थानं रचना यस्य तस्मिन् देहोपलक्षणभूते एतस्मिन् जगति अनारोपिताभिमानत्वात् अविखण्डितमनाः। केन। नित्यानित्यानुभवद्वारा यत्स्वरूपावस्थानं तेन। आकरः खनिः खेटः कृषीवलग्रामः वाटः वाटिका खर्वटो निषादादिग्रामः शिबिरं सेनास्थानम्। व्रजो गवाम् घोषो गोपानाम्। सार्थो यात्रिकसमूहः। तर्जनं भर्त्सनम्। अवमेहनम् उपरि मूत्रणम्। ष्ठीवनं थूत्कारः। पाषाणविष्ठाधूलीनां प्रक्षेपः। पूतिवातोऽपानवायुः ॥ ३१ ॥ स्वभावसिद्धहासेन। अभिनवकमलदलवदा-

यर्हि वाव स भगवान् लोकमिमं योगस्याद्धा प्रतीपमिवाचक्षाणस्तत्प्रतिक्रियाकर्म बीभत्सितमिति व्रतमाजगरमास्थितः शयान एवाश्नाति पिबति खादत्यवमेहति हदति स्म चेष्टमान उच्चरित आदिग्धोद्देशः ॥३३॥ तस्य ह यः पुरीषसुरभिसौगन्ध्यवायुस्तं देशं दशयोजनं समन्तात्सुरभिं चकार ॥ ३४ ॥ एवं गोमृगकाकचर्यया व्रजंस्तिष्ठन्नासीनः शयानः काकमृगगोचरितः पिबति खादत्यवमेहति स्म ॥३५॥ इति नानायोगचर्याचरणो भगवान् कैवल्यपतिर्ऋषभोऽविरतपरममहानन्दानुभव आत्मनि सर्वेषां भूतानामात्मभूते भगवति वासुदेव आत्मनोऽव्यवधानानन्तरोदरभावेन सिद्धसमस्तार्थपरिपूर्णो नायोगैश्वर्याणि वैहायसमनोजवान्तर्धानपरकायप्रवेशदूरग्रहणादीनि यदृच्छयोपगतानि नाञ्जसा नृप हृदयेनाभ्यनन्दत् ॥३६॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां पञ्चमस्कन्धे ऋषभदेवानुचरिते पञ्चमोऽध्यायः ॥५॥

अथ षष्ठोऽध्यायः

राजोवाच

न नूनं भगव आत्मारामाणां योगसमीरितज्ञानावभर्जितकर्मबीजानामैश्वर्याणि पुनः क्लेशदानि भवितुमर्हन्ति यदृच्छयोपगतानि ॥१॥

चरन्ती शिशिरतारे तापहारिकनीनिके ययोस्ते तादृशे अरुणे दीर्घे च नयने ताभ्यां रुचिरः । उपदधानः काममुद्दीपयन् । पराक् अधः । महोत्सवेन सौन्दर्येण । कपिशाः कृष्णपीताः ॥३२॥ यर्हि वाव यदा तु स ऋषभः योगस्य अद्धा साक्षात् प्रतीपं नाशकमिव इमं लोकं जनवर्गं पश्यन् बभूव तदा तस्य प्रतिक्रियाकर्म बीभत्सितं निन्दितं भ्रष्टाचरणरूपमेव पश्यन् तथा सति स्वयमेव तन्निवृत्तेः । अजगरवदेकत्रैव स्थित्वा प्रारब्धभोगरूपमाश्रितः सन् । भोजनं करोति । खादति चर्वणं करोति । मूत्रयति । पुरीषमुत्सृजति । उच्चरिते पुरीषे चेष्टमानो विलुण्ठन् तेनैव लिप्ता देहावयवा यस्य तथाभूतः ॥ ३३ ॥ ह दिव्यः । सुरभिणा गन्धेन सौगन्ध्यं यस्य ॥ ३४ ॥ काकादीनामिव चरितं गमनशब्दादिरूपा चेष्टा यस्य ॥ ३५ ॥ चर्याः आचरतीति । अविरतोऽखण्डः । आत्मभूते आधारभूते परमात्मनि वासुदेवे आत्मनोऽभेदेन देहोपाधिशून्यतया यदृच्छया सहसा अञ्जसा साक्षात् प्राप्तानि ऐश्वर्याणि सिद्धीर्नाभ्यनन्दत् न स्वीचकार । अव्यवधानेन न विद्यतेऽन्तरा मध्ये य उदरभावो देहोपाधिभावस्तेन । वैहायसं खेचरत्वम् ॥ ३६ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे गूढार्थदीपिन्यां पञ्चमोऽध्यायः ।

षष्ठे न 'चित्तविश्वासो' जैनपाखण्डसंभवः ।
ऋषभस्येच्छयालीनो वनाग्नौ तस्य विग्रहः ॥ १ ॥

हे भगवन् । नलोप आर्षः । यद्वा । भगं मोक्षोपायं वाति जानातीति हे भगव भवितुं नार्हन्तीत्यतः कथं तानि नाभ्यनन्ददिति प्रश्नाशयः । समीरितमुद्दीपितं यज्ज्ञानं तेन दग्धानि कर्मबीजानि

ऋषिरुवाच

सत्यमुक्तं किन्त्विह वा एके न मनसोऽद्धा विस्रम्भमनवस्थानस्य शठकिरात इव संगच्छन्ते ॥२॥ तथा चोक्तम्—

न कुर्यात्कर्हिचित्सख्यं मनसि ह्यनवस्थिते । यद्विस्रम्भाच्चिराच्चीर्णं चस्कन्द तप ऐश्वरम् ॥३॥
नित्यं ददाति कामस्य च्छिद्रं तमनु येऽरयः । योगिनः कृतमैत्रस्य पत्युर्जायेव पुंश्चली ॥४॥
कामो मन्युर्मदो लोभः शोकमोहभयादयः । कर्मबन्धश्च यन्मूलः स्वीकुर्यात्को नु तद् बुधः ॥५॥

अथैवमखिललोकपालललामोऽपि विलक्षणैर्जडवदवधूतवेषभाषाचरितैरविलक्षितभगवत्प्रभावो योगिनां साम्परायविधिमनुशिक्षयन् स्वकलेवरं जिहासुरात्मन्यात्मानमसंव्यवहितमनर्थान्तरभावेनान्वीक्षमाण उपरतानुवृत्तिरुपरराम ॥६॥ तस्य ह वा एवं मुक्तलिङ्गस्य भगवत ऋषभस्य योगमायावासनया देह इमां जगतीमभिमानाभासेन संक्रममाणः कोङ्कवेङ्ककुटकान्दक्षिणकर्णाटकान् देशान् यदृच्छयोपगतः कुटकाचलोपवन आस्यकृताश्मकवल उन्माद इव मुक्तमूर्धजोऽसंवीत एव विचचार ॥७॥ अथ समीरवेगविधूतवेणुविकर्षणजातोग्रदावानलस्तद्वनमालेलिहानः सह तेन ददाह ॥८॥

यस्य किलानुचरितमुपाकर्ण्य कोङ्कवेङ्ककुटकानां राजार्हन्नामोपशिक्ष्य कलावधर्म उत्कृष्यमाणे भवितव्येन विमोहितः स्वधर्मपथमकुतोभयमपहाय कुपथपाखण्डमसमञ्जसं निज-

---

रागादीनि यैः ॥ १ ॥ इह भजनमार्गे एके सुधियः मनसो विश्वासं न कुर्वन्ति । कुतः । अनवस्थानस्य चञ्चलस्य । यथा शठकिराते धूर्ते व्याधे मृगा न इति शेषः ॥ २ ॥ अनवस्थिते चञ्चले । यस्य मनसो विश्वासात् ईश्वराणां समर्थानां सौभरिप्रभृतीनामपि इदं चिरकालसंचितं तपः चस्कन्द सुस्राव ॥ ३ ॥ कृतं मैत्रं मनोविश्वासो येन तस्य योगिनो मन इति शेषः । कामस्य छिद्रं तमनु येऽरयः मन्य्वादयस्तेषामपि छिद्रमवकाशं ददाति । यथा कृतविश्वासस्य पत्युः पुंश्चली भार्या जारस्य तदनुवर्तिनां च छिद्रं ददाति ॥४॥ यन्मूलो यन्निमित्तः तन्मनः को नु बुधः स्वाधीनमिति मन्येत न कोऽपि ॥ ५ ॥ अथ कदाचित् । ललामश्चूडामणिः । साम्परायविधिं मोक्षसाधनप्रकारम् । कलेवरप्राकट्यं तिरोहितुमिच्छुः । आत्मनि परमात्मनि आत्मानं स्वदेहम् असंव्यवहितं व्यवधानशून्यम् एकतां गतं पश्यन् स्वावतारलीलातः उपरराम । केन पश्यन् । अर्थान्तरभावेन अभेदेन । अनुवृत्तिः अवधूतत्वानुकरणम् ॥ ६ ॥ मुक्तलिङ्गस्य त्यक्तदेहाभिमानस्य मुक्तानामिव लिङ्गं चेष्टा यस्येति । योगेति अवधूतलीलेच्छासंस्कारेण । चङ्क्रममाणः पर्यटन् । कोङ्कादिदेशान् । आस्ये मुखे कृतः निक्षिप्तः पाषाणग्रासो येन । उन्मादः उन्मत्तः । यद्वा । उन्मादे सति यथा पुमान् तथा ह वै साश्चर्यं विचचार । असंवीतो नग्नः । मूर्धजाः केशाः । नागपुरतः पूर्वं नदीतरे कुटकाचलोऽस्ति ॥ ७ ॥ समीरो वायुः । विधूताः कम्पिताः । आलेलिहानो ग्रसमानः तेनाग्निना सह ऋषभदेहोऽपि ददाह प्रदीप्य अन्तरधात् न तु प्राकृतवत्तद्देहनाशो व्याख्येयः चिन्मयत्वात् ॥ ८ ॥ स्वयमुपशिक्ष्य आधिक्येन शिक्षित्वा । उत्कृष्यमाणे वर्धमाने । भवितव्येन दुर्भाग्येन पापफलेन वा ।

मनीषया मन्दः सम्प्रवर्तयिष्यते ॥९॥ येन ह वाव कलौ मनुजापसदा देवमायामोहिताः स्वविधिनियोगशौचचारित्रविहीना देवहेलनान्यपव्रतानि निजनिजेच्छया गृह्णाना अस्नानानाचमनाशौचकेशोल्लुञ्चनादीनि कलिनाधर्मबहुलेनोपहतधियो ब्रह्मब्राह्मणयज्ञपुरुषलोकविदूषकाः प्रायेण भविष्यन्ति ॥१०॥ ते च ह्यर्वाक्तनया निजलोकयात्रयाऽन्धपरम्परयाऽऽश्वस्तास्तमस्यन्धे स्वयमेव प्रपतिष्यन्ति ॥११॥

अयमवतारो रजसोपप्लुतकैवल्योपशिक्षणार्थः ॥१२॥ तस्यानुगुणान् श्लोकान् गायन्ति-

अहो भुवः सप्तसमुद्रवत्या द्वीपेषु वर्षेष्वधिपुण्यमेतत् ।
गायन्ति यत्रत्यजना मुरारेः कर्माणि भद्राण्यवतारवन्ति ॥१३॥
अहो नु वंशो यशसावदातः प्रैयव्रतो यत्र पुमान् पुराणः ।
कृतावतारः पुरुषः स आद्यश्चचार धर्मं यदकर्महेतुम् ॥१४॥
को न्वस्य काष्ठामपरोऽनुगच्छेन्मनोरथेनाप्यभवस्य योगी ।
यो योगमायाः स्पृहयत्युदस्ता ह्यसत्तया येन कृतप्रयत्नाः ॥१५॥

इति ह स्म सकलवेदलोकदेवब्राह्मणगवां परमगुरोर्भगवत ऋषभाख्यस्य विशुद्धाचरितमीरितं पुंसां समस्तदुश्चरिताभिहरणं परममहामङ्गलायनमिदमनुश्रद्धयोपचितयाऽनुशृणोत्याश्रावयति वाऽवहितो भगवति तस्मिन् वासुदेव एकान्ततो भक्तिरनयोरपि समनुवर्तते ॥१६॥

असमञ्जसमयोग्यं जैनमतं वेददूषकत्वात् । 'प्रिये योग्ये समञ्जसम्' इति कोशः ॥ ९ ॥ येन पाखण्ड प्रवर्तनेन । वाव एव । अपसदा अधमाः । स्वविधिना स्वकल्पितविधिना नियोगः कुव्रतादीनामाज्ञा यस्मिन् ग्रन्थे तेन हेतुना । यद्वा स्वविधिना शास्त्रविधिना नियोगो नियमः यस्मिन् तत् शौचचारित्र्यं समाहारे द्वन्द्वः तेन हीनाः देवानामवज्ञारूपाणि अस्नानादीनि कुव्रतानि गृह्णाना ह प्रख्याताः । ब्रह्म वेदः । लोका भक्ताः ॥१०॥ ते मनुजापसदाः नीचाः । चकारात् सः अर्हन्नामको राजा च । अर्वाक्तनया नवीनया यात्रया स्वमत्यनुरूपप्रवृत्त्या या मूर्खवंशावलिस्तया आश्वस्ताः कृतविश्वासाः । अन्धे तमसि नरके ॥११॥ उपप्लुतानां व्याप्तानां जनानाम् । उपप्लुतं कालेन विनष्टीकृतं यत्कैवल्यं ज्ञान योगेस्तस्येति वा । तस्य कैवल्यसाधनोपदेशस्य अनुरूपान् ॥ १२ ॥ भुवः सप्तसु द्वीपेषु तेषां वर्षेषु खण्डेषु च एतत् भारतवर्षमधिक पुण्यप्रदम् । कुतः यत्र भवा यत्रत्या जनाः मुरारेः अवतारयुक्तानि । अहो इत्यानन्दे ॥१३॥ यः आद्यः सर्वकारणभूतः पुराणः पुमान् स एव यत्र वंशे कृतावतारः पुरुषः ऋषभमूर्तिः सन् यत् यस्मात् मोक्षहेतुं पारमहंस्यं धर्मं चचार तस्मादवदातः शुद्ध इत्यन्वयः । प्रैयव्रतः प्रियव्रतस्य अयं संबन्धी ॥१४॥ अस्य ऋषभस्य काष्ठां दिशमपि अपरः को नु गच्छेत् न कोऽपि । कुतः । कृतप्रयत्नाः स्वतः सेवितुं प्रवृत्ता अपि योगसिद्धीः येन असत्तया तुच्छत्वेन उदस्ताः त्यक्ता यः स्पृहयति हि सः क इत्यन्वयः । अभवस्य संसारनिवर्तकस्य । मनोरथेनापि किमुत कर्मणा ॥ १५ ॥ ह प्रसिद्धं स्म लोकातीतं यत् विशुद्धाचरितम् ईरितं कथितं तत् समस्तदुश्चरितमभितो हरतीति तथाभूतं योऽवहितः सावधानः सन् शृणोति वक्तरि सति श्रावयति श्रोतरि सति वा तयोरनयोः द्वयोरपि भक्तिः समनुवर्तते सम्यक् प्रवर्तते । एकान्ततो

यस्यामेव कवय आत्मानमविरतं विविधवृजिनसंसारपरितापोपतप्यमानमनुसवनं स्नापयन्त-स्तयैव परया निर्वृत्या ह्यपवर्गमात्यन्तिकं परमपुरुषार्थमपि स्वयमासादितं नो एवाद्रियन्ते भगवदीयत्वेनैव परिसमाप्तसर्वार्थाः ॥१७॥

राजन् पतिर्गुरुरलं भवतां यदूनां दैवं प्रियः कुलपतिः क्व च किङ्करो वः ।
अस्त्वेवमङ्ग भगवान् भजतां मुकुन्दो मुक्तिं ददाति कर्हिचित्स्म न भक्तियोगम् ॥१८॥
नित्यानुभूतनिजलाभनिवृत्ततृष्णः श्रेयस्यतद्रचनया चिरसुप्तबुद्धेः ।
लोकस्य यः करुणयाभयमात्मलोकमाख्यान्नमो भगवते ऋषभाय तस्मै ॥१९॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां पञ्चमस्कन्धे ऋषभदेवानुचरिते षष्ठोऽध्यायः ॥६॥

अथ सप्तमोऽध्यायः

श्रीशुक उवाच

भरतस्तु महाभागवतो यदा भगवतावनितलपरिपालनाय संचिन्तितस्तदनुशासनपरः पञ्चजनीं विश्वरूपदुहितरमुपयेमे ॥१॥ तस्यामु ह वा आत्मजान् कार्त्स्न्येनानुरूपानात्मनः पञ्च जनयामास भूतादिरिव भूतसूक्ष्माणि ॥२॥ सुमतिं राष्ट्रभृतं सुदर्शनमावरणं धूम्रकेतुमिति । अजनाभं नामैतद्वर्षं भारतमिति यत आरभ्य व्यपदिशन्ति ॥३॥

एकान्ता अव्यभिचारिणी । उपचितया वृद्धिं गतया ॥१६॥ अविरतं निरन्तरमुपतप्यमानमात्मानं यस्यां भक्तिसुधानद्यामेव अनुक्षणं स्नापयन्तः परया निर्वृत्या परमानन्देन स्वयं प्राप्तमपि अपवर्गं नैवाद्रियन्ते । कुतः । भगवत्सेवका वयमिति भावेनैव परितः सम्यक् प्राप्ताः सर्वेऽर्था यैस्तं तु भगवत्त्वेनेत्यर्थः । विविधानि वृजिनानि पापानि यत्र ॥१७॥ अङ्ग हे राजन् । भवतां पाण्डवानां यदूनां च । सर्वं दत्त्वाऽपि भक्तिं न ददातीत्याश्चर्यं स्मशब्देन द्योत्यते ॥१८॥ यः करुणया लोकस्य अभयं भयनिवर्तकम् आत्मलोकं भक्तियोगमाख्यातवान् तस्मै नम इत्यन्वयः । अतद्रचनया देहाद्यर्थं चेष्टया श्रेयसि भगवदाराधने । चिरं सुप्ता लुप्ता बुद्धिः यस्य । आत्माऽऽलोक्यते दृश्यते येन मुक्तिसाधनम् आत्मस्वरूपं वा । निजलाभः स्वरूपानन्दः ॥१९॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे गूढार्थदीपिन्यां षष्ठोऽध्यायः ।

सप्तमे भरतो यज्ञैर्गृहे सम्पूजयन् हरिम् ।
उपतस्थे च सूर्यर्चा स्वान्ते तं गण्डकीतटे ॥ १ ॥

तु शब्दः कथावैशिष्ट्यार्थः । यद्वा । ऋषभो भगवान् तत्पुत्रस्तु भागवत इति तुशब्दार्थः । संचिन्तितः सङ्कल्पितः । अभिषिक्तो वा । 'सम्मन्त्रणे तु सञ्चिन्तावर्चायामभिषेचने' इत्युत्पलमालायाम् । उपयेमे विवाहितवान् ॥ १ ॥ उ संबोधने । ह वै प्रसिद्धान् । कार्त्स्न्येन साकल्येन । भूतादिः तामसाहङ्कारो यथा शब्दादीनिति सारूप्ये सन्ततिवृद्धौ च दृष्टान्तः ॥२॥ इति नामधारिणः । एतद्वर्षं पूर्वमजनाभं

स बहुविन्महीपतिः पितृपितामहवदुरुवत्सलतया स्वे स्वे कर्मणि वर्तमानाः प्रजाः स्वधर्ममनुवर्तमानः पर्यपालयत् ॥४॥ ईजे च भगवन्तं यज्ञक्रतुरूपं क्रतुभिरुच्चावचैः श्रद्धयाऽऽहृताग्निहोत्रदर्शपूर्णमासचातुर्मास्यपशुसोमानां प्रकृतिविकृतिभिरनुसवनं चातुर्होत्रविधिना ॥५॥ सम्प्रचरत्सु नानायागेषु विरचिताङ्गक्रियेष्वपूर्वं यत्तत्क्रियाफलं धर्माख्यं परे ब्रह्मणि यज्ञपुरुषे सर्वदेवतालिङ्गानां मन्त्राणामर्थनियामकतया साक्षात्कर्तरि परदेवतायां भगवति वासुदेव एव भावयमान आत्मनैपुण्यमृदितकषायो हविःष्वध्वर्युभिर्गृह्यमाणेसु स यजमानो यज्ञभाजो देवांस्तान् पुरुषावयवेष्वभ्यध्यायत् ॥६॥ एवं कर्मविशुद्धया विशुद्धसत्त्वस्यान्तर्हृदयाकाशशरीरे ब्रह्मणि भगवति वासुदेवे महापुरुषरूपोपलक्षणे श्रीवत्सकौस्तुभवनमालारिदरगदादिभिरूपलक्षिते निजपुरुषहृल्लिखितेनात्मनि पुरुषरूपेण विरोचमान उच्चैस्तरां भक्तिरनुदिनमेधमानरयाऽजायत ॥७॥

एवं वर्षायुतसहस्रपर्यन्तावसितकर्मनिर्वाणावसरोऽधिभुज्यमानं स्वतनयेभ्यो रिक्थं पितृपैतामहं यथादायं विभज्य स्वयं सकलसम्पन्निकेतात्स्व निकेतात् पुलहाश्रमं प्रवव्राज ॥८॥ यत्र ह वाव भगवान् हरिरद्यापि तत्रत्यानां निजजनानां वात्सल्येन संनिधाप्यत इच्छारूपेण॥९॥ यत्राश्रमपदान्युभयतोनाभिभिर्दृषच्चक्रैश्चक्रनदी नाम सरित्प्रवरा सर्वतः पवित्रीकरोति॥१०॥

प्रसिद्धमपि यतो भरतादारभ्य । व्यपदिशन्ति व्यवहरन्ति ॥ ३।४ ॥ यज्ञा अयूपाः क्रतवः सायूपास्तद्रूपं भगवन्तम् उच्चावचैः बृहद्भिः स्वल्पैश्च द्विविधैरपि क्रतुभिः श्रद्धया अनुसवनं त्रिकालमीजे च । द्विविधत्वमेवाह आहृताः स्वाधिकारप्राप्ता ये अग्निहोत्रादयः स्तेषां प्रकृतिविकृतिभिः । ये सकलाङ्गयुक्तास्ते प्रकृतयः ये विकलांगास्ते विकृतयः तद्द्विविधैरपि केन । चतुर्णां होतॄणामृत्विजां कर्म तद्विधिना । पशुभिरेव क्रियमाणा अश्वमेधादयः । सोमरसैरेव क्रियमाणाः सोमयागाः ॥५॥ विरचिता अंगक्रिया येषान्तेषु नानायागेषु प्रवर्तमानेषु अध्वर्युभिर्होमार्थं हविःषु गृह्यमाणेषु सत्सु धर्माख्यमपूर्वापरपर्यायं यत् क्रियाफलं तद्भगवति वासुदेवे एव भावयमानः समर्पयन् स यजमानो भरतः यज्ञभागाधिकारिणो ये देवास्तान् भगवदवयवेषु अभितो ध्यातवान् । कथंभूते भगवति । तत्तद्देवताप्रकाशकानां मन्त्राणां येऽर्था इन्द्रादयस्तेषां नियामकतया मुख्यकर्तरि । कथंभूतः । एवं भावनमेव आत्मनो नैपुण्यं कौशलं तेन मृदिताः क्षीणाः कषाया रागादयो यस्य ॥ ६ ॥ एवं भगवदर्पणेन कर्मणो विशुद्धिरवैगुण्यं तया विशुद्धं सत्त्वमन्तः करणं यस्य तस्य भरतस्य भगवति उच्चैस्तरां वर्धमानवेगा भक्तिरजापतेत्यन्वयः । कथंभूते । हृदये य आकाशः स एव शरीरं वासस्थानं यस्य । पुनः । लिखितेन सुस्थिरेण रूपेण आत्मनि मनसि विरोचमाने । अरिश्चक्रं दरः शंखः ॥ ७ ॥ एवमनया वृत्त्या वर्षायुतानां सहस्रावसाने अवसितो निश्चितः प्रारब्धकर्मणो निर्वाणावसरो नाशसमयो येन सः । पितृपितामहागतं रिक्थं धनं यथायोग्यं विभज्य निकेतात् आश्रयात् स्वगृहात् शालग्रामक्षेत्रं प्रति जगाम ॥ ८ ॥ ह वाव अति प्रसिद्धे यत्र क्षेत्रे । वात्सल्येन कर्त्रा हरिः सन्निहितः क्रियते । केन । भक्तानामपेक्षितरूपेण ॥ ९ ॥ यत्र क्षेत्रे चक्रवदी गण्डकी ऋषीणामाश्रमस्थानानि पवित्रीकरोतित्यन्वयः ।

तस्मिन् वाव किल स एकलः पुलहाश्रमोपवने विविधकुसुमकिसलयतुलसिकाम्बुभिः कन्दमूलफलोपहारैश्च समीहमानो भगवत आराधनं विविक्त उपरतविषयाभिलाष उपभृतोपशमः परां निर्वृतिमवाप ॥११॥ तयेत्थमविरतपुरुषपरिचर्यया भगवति प्रवर्धमानानुरागभरद्रुतहृदयशैथिल्यः प्रहर्षवेगेनात्मन्युद्भिद्यमानरोमपुलककुलक औत्कण्ठ्यप्रवृत्तप्रणयबाष्पनिरुद्धावलोकनयन एवं निजरमणारुणचरणारविन्दानुध्यानपरिचितभक्तियोगेन परिप्लुतपरमाह्लादगम्भीरहृदयह्रदावगाढधिषणस्तामपि क्रियमाणां भगवत्सपर्यां न सस्मार ॥१२॥ इत्थं धृतभगवद्व्रत ऐणेयाजिनवाससानुसवनाभिषेकार्द्रकपिशकुटिलजटाकलापेन च विरोचमानः सूर्यर्चा भगवन्तं हिरण्मयं पुरुषमुज्जिहाने सूर्यमण्डलेऽभ्युपतिष्ठन्नेतदु होवाच—॥१३॥

परोरजः सवितुर्जातवेदो देवस्य भर्गो मनसेदं जजान।
सुरेतसादः पुनराविश्य चष्टे हंसं गृध्राणं नृषद्रिङ्गिरामिमः ॥१४॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां पञ्चमस्कन्धे भरतचरिते भगवत्परिचर्यायां सप्तमोऽध्यायः ॥७॥

कैः। उभयत उपर्यधश्च नाभिश्चक्रं येषु तैः दृषच्चक्रैः शालग्रामशिलासमूहैः ॥ १० ॥ वाव प्रसिद्धे विविक्ते एकान्ते तस्मिन् उपवने स भरतः भगवत आराधनं सम्यक् कुर्वाणः परमानन्दमवापेत्यन्वयः। उपभृतः पूर्णं उपशमो भगवन्निष्ठा यस्य। किसलयानि नवपल्लवानि। विविक्तः शुद्धाहारो वा ॥ ११ ॥ पुरुषः श्रीकृष्णः। प्रेमभरेण आधिक्येन द्रवीभूते हृदये शैथिल्यं यस्य। आत्मनि देहे उद्भिद्यमानं जायमानं रोमपुलककुलं रोमाञ्चसमूहो यस्य। उद्भिद्यमानैः रोमभिः पुलकावलिर्यस्येति वा। प्रणयवाष्पेण प्रेमाश्रुणा। परिचितः प्रबुद्धः। परिप्लुतो व्याप्तः परमाह्लादो यस्मिन् तस्मिन् गम्भीरे हृदयरूपे ह्रदे निमग्ना बुद्धिर्यस्य ॥ १२ ॥ इत्थं स भरतः सूर्यमण्डले उज्जिदाने उदयति सति तत्र हिरण्मयं तेजोमयं श्रीविष्णुमभ्युपतिष्ठन् एतत् वक्ष्यमाणम् उ पुनः पुनः ह स्फुटमुवाचेत्यन्वयः। कथंभूतः। एण्या हरिण्या इदमजिनं चर्म ऐणेयं तदेव वासः वस्त्रं तेन। त्रिकालस्नानेन आर्द्रा या जटास्तासां मण्डलेन च विरोचमानः। कपिशाः कृष्णपीताः ॥ १३ ॥ भर्गः सान्तः। यत् मनसा सङ्कल्पमात्रेण इदं विश्वं ससर्ज यच्च पुनरन्तर्यामिरूपेण अदः विश्वमाविश्य ग्रध्राणं विषयसुखमिकाङ्क्षन्तं हंसं जीवं स्वरेतसा स्वप्रभावेण विचष्टे पश्यति पालयति तत् देवस्य वासुदेवस्य भर्गः तेजः वयमिमः शरणं व्रजामः। कीदृशं भर्गः। रजसः प्रकृतेः परमिति परोरजः। पृषोदरादित्वात्सुट्। पुनः। जातं वेदो धनं यस्मात् भक्तानामभीष्टदमित्यर्थः। पुनः। नृषु सीदति उपाधितया तिष्ठतीति नृषत् बुद्धिस्तस्या रिङ्गिं स्वस्मिन्नेव गतिं राति ददातीति तथाभूतम्। 'वा छन्दसि' इत्यमि पूर्वरूपत्वाभावः गायत्रीसहोदरोऽयं मन्त्रः अतो न च्छन्दोभङ्गदोषः ॥ १४ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे गूढार्थदीपिन्यां सप्तमोऽध्यायः।

अथाष्टमोऽध्यायः

श्रीशुक उवाच

एकदा तु महानद्यां कृताभिषेकनैयमिकावश्यको ब्रह्माक्षरमभिगृणानो मुहूर्तत्रयमुदकान्त उपविवेश ॥१॥ तत्र तदा राजन् हरिणी पिपासया जलाशयाभ्याशमेकैवोपजगाम ॥२॥ तया पेपीयमान उदके तावदेवाविदूरेण नदतो मृगपतेरुन्नादो लोकभयंकर उदपतत् ॥३॥ तमुपश्रुत्य सा मृगवधूः प्रकृतिविक्लवा चकितनिरीक्षणा सुतरामपि हरिभयाभिनिवेशव्यग्रहृदया पारिप्लवदृष्टिरगततृषा भयात्सहसैवोच्चक्राम ॥४॥

तस्या उत्पतन्त्या अन्तर्वत्न्या उरुभयावगलितो योनिनिर्गतो गर्भः स्रोतसि निपपात ॥५॥ तत्प्रसवोत्सर्पणभयखेदातुरा स्वगणेन वियुज्यमाना कस्याञ्चिद्दर्यां कृष्णसारती निपपाताथ च ममार ॥६॥

तं त्वेणकुणकं कृपणं स्रोतसानूह्यमानमभिवीक्ष्यापविद्धं बन्धुरिवानुकम्पया राजर्षिर्भरत आदाय मृतमातरमित्याश्रमपदमनयत् ॥७॥ तस्य ह वा एणकुणक उच्चैरेतस्मिन् कृतनिजाभिमानस्याहरहस्तत्पोषणपालनलालनप्रीणनानुध्यानेनात्मनियमाः सहयमाः पुरुष-

---

अष्टमे गण्डकीतीरे जपन्ब्रह्मैणसङ्गतः ।
मृगोऽभूद्भरतो ध्यानाज्जहौ देहमितीर्यते ॥ १ ॥

तु शब्दः कथावैशिष्ट्यार्थः । महानद्यां गण्डक्याम् । कृतोऽभिषेकः स्नानं नियमप्राप्तमावश्यकं सन्ध्यावन्दनादि च येन । ब्रह्माक्षरं गायत्रीम् । अक्षरात्मकं ब्रह्म प्रणवम् श्रीकृष्णमन्त्रं वा । अभिगृणानो जपन् ॥ १ ॥ तत्र तटे । तदा जपावसरे । जायतेऽस्मादिति जं लीयतेऽस्मिन्निति लं जं च लं च जलं श्रीनारायणतत्त्वम् आ समन्तात् शेते तिष्ठत्यस्यामिति जलाशया गण्डकी तस्याः समीपम् । जलाभ्यासमिति क्वचित्पाठ ॥ २ ॥ अविदूरेण समीपे । उदपतत् उत्थितोऽभूत् ॥ ३ ॥ तं नादमुपश्रुत्य सा हरिणी सहसा झटित्येव उच्चक्राम नदीमुल्ललङ्घ त्वन्वयः । कीदृशी । विक्लवा अधीरचित्ता । चकितं समीतम् । अपिस्त्वर्थे । सिंहभयोद्वेगेन व्यग्रं व्याकुलं हृदयं यस्याः । पारिप्लवा चञ्चला । तृषा पिपासा ॥ ४ ॥ उत्पतन्त्या नदीमुल्लङ्घयन्त्या अन्तर्वत्न्या गर्भिण्याः । उरु महत् । अवगलितः स्थानाच्चलित अत एव निर्गतः । स्रोतसि प्रवाहे ॥ ५ ॥ तत् तदा । प्रसवः गर्भपातः उत्सर्पणं नद्युल्लङ्घनं सिंहभयं च तैर्यः खेदस्तेन व्याकुला कृष्णमृगवधूः दर्यां कन्दरायाम् ॥ ६ ॥ एणकुणकं मृगबालकम् अपविद्धं बन्धुभिस्त्यक्तमभिवीक्ष्य बन्धुरिव भरतः अनुकम्पया तं तु अनयदित्यन्वयः । यथा बन्धुः पित्रादिर्बलं नयति तद्वत् । स्रोतसा प्रवाहेण उमानं नीयमानम् । 'एणो मृगे ज्ञानगत्योः' कुणको ध्वनिबालयोः' इति च निरुक्तिः ॥ ७ ॥ ह वै एवार्थे । उच्चैरतिशयेन एतस्मिन् मृगबालके एव कृतो निजः आत्मीयोऽयमित्यभिमानो येन तस्य भरतस्य यमैरहिंसादिभिः सहिता आत्मनियमाः शौचाचारादयः भगवत्पूजादयश्च सर्वे एव उदवसन् नष्टा त्यक्ता वा बभूवुः । केन । तत्पोषणपालनादिचिन्तनेन । लालनं

परिचर्यादय एकैकशः कतिपयेनाहर्गणेन वियुज्यमाना: किल सर्व एवोदवसन् ॥८॥ अहो बतायं हरिणकुणकः कृपण ईश्वररथचरणपरिभ्रमणरयेण स्वगणसुहृद्बन्धुभ्यः परिवर्जितः शरणं च मोपसादितो मामेव मातापितरौ भ्रातृज्ञातीन् यौथिकांश्चैवोपेयाय नान्यं कंचन वेद मय्यतिविस्रब्धश्चात एवं मया मत्परायणस्य पोषणपालनप्रीणनलालनमनसूयुनानुष्ठेयं शरण्योपेक्षादोषविदुषा ॥९॥ नूनं ह्यार्याः साधव उपशमशीलाः कृपणसुहृद एवंविधार्थे स्वार्थानपि गुरुतरानुपेक्षन्ते।१०।इति कृतानुषङ्ग आसनशयनाटनस्थानाशनादिषु सह मृगजहुना स्नेहानुबद्धहृदय आसीत् ॥११॥ कुशकुसुमसमित्पलाशफलमूलोदकान्याहरिष्यमाणो वृकसालावृकादिभ्यो भयमाशंसमानो यदा सह हरिणकुणकेन वनं समाविशति ॥१२॥पथिषु च मुग्धभावेन तत्र तत्र विषक्तमतिप्रणयभरहृदयः कार्पण्यात्स्कन्धेनोद्वहति ॥१३॥ एवमुत्सङ्ग उरसि चाधायोपलालयन्मुदं परमामवाप। १४॥ क्रियायां निर्वर्त्यमानायामन्तरालेऽप्युत्थायोत्थाय यदैनमभिचक्षीत तर्हि वाव स वर्षपतिः प्रकृतिस्थेन मनसा तस्मा आशिष आशास्ते स्वस्ति स्ताद्वत्स ते सर्वत इति ॥१ ॥

अन्यदा भृशमुद्विग्नमना नष्टद्रविण इव कृपणः सकरुणमतितर्षेण हरिणकुणकविरहविह्वलहृदयसंतापस्तमेवानुशोचन् किल कश्मलं महदभिरम्भित इति होवाच ॥१६॥ अपि बत स वै कृपण एणबालको मृतहरिणीसुतोऽहो ममानार्यस्य शठकिरातमतेरकृतसुकृतस्य कृतविस्रम्भ आत्मप्रत्ययेन तदविगणयन् सुजन इवागमिष्यति ॥१७॥ अपि क्षेमेणास्मिन्ना-

---

चुम्बनादिना । प्रीणनं कण्डूयनादिना ॥ ८ ॥ अहो आश्चर्ये । बत खेदे । ईश्वरस्य रथचरणः कालचक्रं तस्य भ्रमणवेगेन परिवर्जितो वियोजितः मोपसादितः मां प्रापितश्च मामेव यूथसंघातिनश्च मत्वा उपेयाय समीपमाजगाम च अतः शरणागतस्योपेक्षायां दोषं जानता मयाऽस्य पोषणादि अनुष्ठेयम् ॥ ९ ॥ एवं विधार्थे शरणागतरक्षणार्थे ॥ १० ॥ इत्येवं कृतासक्तिः । मृगजहुना मृगापत्येन । 'अल्पापत्ये जहुः प्रोक्तम् । इति तीर्थः ॥ ११ ॥ आहरिष्यमाण आनयिष्यन् भरतः यदा वृकादिभ्यो भयमाशङ्कमानो भवति तदा तेन सहैवेति योज्यम् । सालावृका वनश्वानः ॥ १२ ॥ यदा च मुग्धभावेन बाल्यभावेन औत्कण्ठ्येन वा तत्र तत्र कोमलतृणादौ आसक्तो भवति तदा तं विषक्तं स्कन्धयोरारोप्य गच्छति । अतिप्रेमपूर्णं हृदयं यस्य सः । विषक्तमतिः पृथक्पदं वा ॥ १३ ॥ एवं स्थितिसमये स्वाङ्के शयनसमये उरसि चेति योज्यम् ॥ १४ ॥ क्रियायां भगवत्पूजालक्षणायां क्रियमाणायां सत्याम् अन्तराले मध्येऽप्युत्थाय यदैनं पश्येत् तर्हि तदा वाव प्रसिद्धः स वर्षपतिः भरतखण्डाधिपतिः स्वस्थेन मनसा भरतः तस्मै मृगाय आशीर्वादान् ददातीत्यर्थः । ते तुभ्यं सर्वतः सर्वत्र देशे काले च कल्याणमस्तु इति ॥ १५ ॥ अन्यदा कदाचित्स्थानान्निर्गते सति । सकरुणं यथा स्यात्तथा अतितर्षेण तद्दर्शनातितृष्णया तमेवानुशोचन् महत् कश्मलं विषादं प्रापितः सन् इति ह सदुःखमुवाचेत्यन्वयः ॥ १६ ॥ शठकिरातयोरिव क्रूरा मतिर्यस्य तस्य अकृतसुकृतस्य भाग्यहीनस्य मम यन्निर्दयत्वादि तदविगणयन् आत्मप्रत्ययेन स्वसौहार्देनैव मयि विश्वस्तः सन् सुजन पुत्र इव अहो आगमिष्यति किम् । बत खेदे । अपि संभावनायाम् ॥ १७ ॥ अपि किम् । क्षेमेण सुखेन । शष्पाणि कोमलतृणानि । गुप्तं रक्षितम् ॥ १८ ॥

श्रमोपवने शष्पाणि चरन्तं देवगुप्तं द्रक्ष्यामि ॥१८॥ अपि च न वृकः सालावृकोऽन्यतमो वा नैकचर एकचरो वा भक्षयति ॥१९॥ निम्लोचति ह भगवान् सकलजगत्क्षेमोदयस्त्रय्यात्माद्यापि मम न मृगवधून्यास आगच्छति ॥२०॥ अपिस्विदकृतसुकृतमागत्य मां सुखयिष्यति हरिणराजकुमारो विविधरुचिरदर्शनीयनिजमृगदारकविनोदैरसंतोषं स्वानामपनुदन् ॥२१॥ क्ष्वेलिकायां मां मृषा समाधिनाऽऽमीलितदृशं प्रेमसंरम्भेण चकितचकित आगत्य पृषदपरुषविषाणाग्रेण लुठति ॥२२॥ आसादितहविषि बर्हिषि दूषिते मयोपालब्धो भीतभीतः सपद्युपरतरास ऋषिकुमारवदवहितकरणकलाप आस्ते ॥२३॥

किं वा अरे आचरितं तपस्तपस्विन्यानया यदियमवनिः सविनयकृष्णसारतनयतनुतरसुभगशिवतमाखरखुरपदपङ्क्तिभिर्द्रविणविधुरातुरस्य कृपणस्य मम द्रविणपदवीं सूचयन्त्यात्मानं च सर्वतः कृतकौतुकं द्विजानां स्वर्गापवर्गकामानां देवयजनं करोति ॥२४॥ अपिस्विदसौ भगवानुडुपतिरेनं मृगपतिभयान्मृतमातरं मृगबालकं स्वाश्रमपरिभ्रष्टमनुकम्पया कृपणजनवत्सलः परिपाति ॥२५॥ किं वाऽऽत्मजविश्लेषज्वरदवदहनशिखाभिरुपतप्यमानहृदयस्थलनलिनीकं मामुपसृतमृगीतनयं शिशिरशान्तानुरागगुणितनिजवदनसलिलामृतमयगभस्तिभिः सुधयतीति च ॥२६॥

सालावृकः वनश्वा नैकचरः सूकरादिः एकचर व्याघ्रादिर्न भक्षयति अपि किम् ॥ १९ ॥ निम्लोचति अस्तं गच्छति । ह दुःखे । सकलजगतामपि क्षेमो यस्मात् स उदयो यस्य सः । त्रय्यात्मा वेदमूर्तिः सूर्यः । न्यासः निक्षेपभूतः ॥ २० ॥ अपिस्वित् किंस्वित् । विनोदैर्लीलाविशेषैः खेदं दूरीकुर्वन् ॥ २१ ॥ क्ष्वेलिकायां कुत्रचित्क्रीडायाम् । प्रेमसंरम्भेण प्रणयकोपेनचकितचकितः अति क्षुभितः सन् । पृषद्वत् जलबिन्दुवत्कोमलश्रृङ्गाग्रेण मां लुठति संघट्टयति । लुठ' उपघाते धातुः ॥ २२ ॥ आसादितं संस्थापितं हवि र्यस्मिन् तस्मिन् बर्हिषि दर्भे दत्तस्पर्शेन दूषिते सति मया भर्त्सितः सन् उपरतरासः त्यक्तक्रीडः निश्चलीकृतेन्द्रियसमूह आस्ते ॥ २३ ॥ अरे अहो अनया पृथिव्या किं वा तपः कृतं यत् यस्मात् इयं पृथ्वी तत्र तत्राङ्किताभिः अतिविनीतकृष्णमृगबालस्य स्वल्पतमसुन्दरसुखदकोमलखुर युक्तपङ्क्तिभिर्मम द्रविणपदवीं मृगमार्गं सूचयन्ती सती आत्मानं च ताभिर्मण्डितत्वात् यज्ञस्वरूपेण कृतोत्सवं करोतीत्यर्थः । यत्र कृष्णो मृगस्तदेव पुण्यं यज्ञस्थलमिति स्मृतिः । कथंभूतस्य । द्रविणेन धनभूतेन मृगेण विधुरस्य रहितस्य अत एवातुरस्य ॥ २४ ॥ स्वित् वितर्के । असौ उडुपतिश्चन्द्रः अपि किम् एनं परिपातीत्यन्वयः ॥ २५ ॥ किं वा उडुपतिः स्वगभस्तिभिः किरणैः विरहतप्तं मां सुधयति सुधावन्तममृतप्लुतं करिष्यति । कथंभूतम् । आत्मजः मम पुत्रभूतो यो मृगस्तस्य वियोगेन यो ज्वरस्तापः स एव वनाग्निस्तस्य ज्वालाभिरुपतप्यमाना हृदयरूपा स्थलकमलिनी यस्य । जलस्थं पद्मं तापसहनसमर्थं मतःस्थलमित्युक्तम् । नलिनीति स्त्रीत्वेन सौकुमार्यंपि च व्यञ्जितम् । उपसृतः समीपं प्राप्त इति कल्पनयैव । शिशिरं शान्तं च मय्यनुरागेण गुणितं प्रवर्तित च यद्वदनसलिलं तदेवाऽमृतमयकिरणास्तैः । सुधयतीत्येव पाठः न तु वकारघटितः इति चक्रवर्ती ॥ २६ ॥

एवमघटमानमनोरथाकुलहृदयो मृगदारकाभासेन स्वारब्धकर्मणा योगारम्भणतो विभ्रंशितः स योगतापसो भगवदाराधनलक्षणाच्च कथमितरथा जात्यन्तर एणकुणक आसङ्गः साक्षान्निःश्रेयसप्रतिपक्षतया प्राक्परित्यक्तदुस्त्यजहृदयाभिजातस्य तस्यैवमन्तरायविहतयोगारम्भणस्य राजर्षेर्भरतस्य तावन्मृगार्भकपोषणपालनप्रीणनलालनानुषङ्गेणाविगणयत आत्मानमहिरिवाखुबिलं दुरतिक्रमः कालः करालरभस आपद्यत ॥२७॥ तदानीमपि पार्श्ववर्तिनमात्मजमिवानुशोचन्तमभिवीक्षमाणो मृग एवाभिनिवेशितमना विसृज्य लोकमिमं सह मृगेण कलेवरं मृतमनु नमृतजन्मानुस्मृतिरितरवन्मृगशरीरमवाप ॥२८॥ तत्रापि ह वा आत्मनो मृगत्वकारणं भगवदाराधनसमीहानुभावेनानुस्मृत्य भृशमनुतप्यमान आह ॥२९॥ अहो कष्टं भ्रष्टोऽहमात्मवतामनुपथाद्यद्विमुक्तसमस्तसङ्गस्य विविक्तपुण्यारण्यशरणस्यात्मवत आत्मनि सर्वेषामात्मनां भगवति वासुदेवे तदनुश्रवणमननसंकीर्तनाराधनानुस्मरणाभियोगेनाशून्यसकलयामेन कालेन समावेशितं समाहितं कार्त्स्न्येन मनस्तत्तु पुनर्ममाबुधस्यारान्मृगसुतमनु परिसुस्राव ॥३०॥इत्येवं निगूढनिर्वेदो विसृज्य मृगीं मातरं पुनर्भगवत्क्षेत्रमुपशमशीलमुनिगण-

---

एवमिति शुकोक्तिः। अघटमानैः दुःसम्पाद्यैः। मृगबालकस्य आभासेन निमित्तेन वस्तुतस्तु अन्तरायभूतेन प्रारब्धकर्मणैव योगारम्भणतः ज्ञानयोगात् आराधनलक्षणात् भक्तियोगाच्च स भरतो विभ्रंशितो ऽभूत्। इतरथा अन्यथा प्रारब्धकर्माभावे तस्य भिन्नजातौ एणकुणके साक्षात्स्वपुत्रवत् कथमासङ्गः स्यात् न कथमपि। कथंभूतस्य। निःश्रेयसस्य मोक्षस्य बाधकतया प्रागेव परित्यक्ताः दुस्त्यजाः पुत्रा येन। एवमनुषङ्गेण मृगपोषणाद्यासक्त्या आत्मानमविगणयतः आत्मचिन्तामकुर्वतः तस्य तावत् तत्क्षणमेव करालरभसः तीव्रवेग. कालः मृत्युसमयः प्राप्तोऽभूत। यथा मूषकबिलं प्रति सर्पस्तथा। यद्यपि भरतस्य प्रारब्धं कर्म नास्ति तथाऽपि भक्तोत्कर्षद्योतनार्थमत्र भगवदिच्छामयं ज्ञेयमिति ॥२७॥ तदानीमपि मरणसमयेऽपि आत्मजमिव अनुशोचन्तं मृगमभिवीक्षमाणो भरतः मृगेण सह इमं लोकं देहं विसृज्य इतरवत् प्राकृतवत् मृगशरीरमवाप। कथंभूतः। मृतमनु न मृता न विलुप्ता पूर्वजन्मानुस्मृतिर्यस्य ॥२८॥ तत्रापि मृगजन्मन्यपि ह वै याथातथ्येन कारणं तःदासक्तिरूपं समीहानुभावेन अनुष्ठानसामर्थ्येन अनुस्मृत्य। आह स्वमनस्येव इति शेषः ॥ २९ ॥ आत्मवतां भक्तानामनुपथात् मार्गादहं भ्रष्टः। यत् यस्मात् आत्मवतो जितेन्द्रियस्यापि रागात् हेतोः अबुधस्य मम कालेन भगवति समावेशितं समाहितं निश्चलं च यन्मनः तत्तु आरात् दूरादेव कार्त्स्न्येन सर्वांशेन सुस्राव अधः पपातेत्यहो कष्टमित्यन्वयः। कथंभूतस्य। विविक्तं निर्जनं पुण्यवनमेव शरणं गृहं यस्य। आत्मनां जीवानाम् आत्मनि प्रिये। तस्यानुश्रवणादिषु योऽभियोगोऽत्यन्तरागस्तेन अशून्याः सफलाः सकला प्रहरा यस्मिन् तेन ॥३०॥ निगूढनिर्वेदोऽन्तर्गत वैराग्यः। शालग्रामाख्यमाश्रमं गण्डकीतीरस्थं प्रति पुनराजगाम। कस्मात्। कालञ्जरात् स्वजन्म-

दयितं शालग्रामं पुलस्त्यपुलहाश्रमं कालञ्जरात्प्रत्याजगाम॥३१॥ तस्मिन्नपि कालं प्रतीक्षमाणः सङ्गाच्च भृशमुद्विग्न आत्मसहचरः शुष्कपर्णतृणवीरुधा वर्तमानो मृगत्वनिमित्तावसानमेव गणयन्मृगशरीरं तीर्थोदकक्लिन्नमुत्ससर्ज ॥३२॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां पञ्चमस्कन्धे भरतचरितेऽष्टमोऽध्यायः ॥८॥

अथ नवमोऽध्यायः

श्रीशुक उवाच

अथ कस्यचिद् द्विजवरस्याङ्गिरःप्रवरस्य शमदमतपःस्वाध्यायाध्ययनत्यागसंतोषतितिक्षाप्रश्रयविद्यानसूयात्मज्ञानानन्दयुक्तस्यात्मसदृशश्रुतशीलाचाररूपौदार्यगुणा नव सोदर्या अङ्गजा बभूवुर्मिथुनं च यवीयस्यां भार्यायाम् ॥१॥ यस्तु तत्र पुमांस्तं परमभागवतं राजर्षिप्रवरं भरतमुत्सृष्टमृगशरीरं चरमशरीरेण विप्रत्वं गतमाहुः ॥२॥ तत्रापि स्वजनसङ्गाच्च भृशमुद्विजमानो भगवतः कर्मबन्धविध्वंसनश्रवणस्मरणगुणविवरणचरणारविन्दयुगलं मनसा विदधदात्मनः प्रतिघातमाशङ्कमानो भगवदनुग्रहेणानुस्मृतस्वपूर्वजन्मावलिरात्मानमुन्मत्तजडान्धबधिरस्वरूपेण दर्शयामास लोकस्य ॥३॥ तस्यापि ह वा आत्मजस्य विप्रः पुत्रस्नेहानुबद्धमना आसमावर्तनात् संस्कारान् यथोपदेशं विदधान उपनीतस्य च पुनः शौचाचमनादीन्

स्थानीयपर्वतात् । दयितं प्रियम् ॥३१॥ तस्मिन् क्षेत्रे आत्मैव सहचरो यस्य एकाकी वर्तमानः देहनिर्वाहं कुर्वाणः । निमित्तस्य प्रारब्धस्य अवसानं गणयन् चिन्तयन् । क्लिन्नमार्द्रं तत्रैव स्थितत्वादित्यर्थः ॥३२॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे गूढार्थदीपिन्यामष्टमोऽध्यायः ।

अथ नवमोऽध्यायः

नवमे जडविप्रोऽभूत् भरतः संगदोषतः ।
तस्य कालीवलित्वेऽपि वर्ण्यते निर्विकारता ॥

अथ कस्यचिद् ब्राह्मणस्य ज्येष्ठायामिति शेषः नव सहोदरा पुत्रा बभूवुः कनिष्ठायां भार्यायां च तस्य मिथुनं पुत्रकन्यकायुग्मं च बभूवेत्यन्वयः । कथंभूतस्य । अङ्गिरसो गोत्रजानां प्रवरस्य । प्रश्रयो विनयः । अनसूया गुणेषु दोषानारोपः विद्या कर्मविद्या ॥ १ ॥ तत्र मिथुने यः पुमान् तं भरतमाहुरित्यन्वयः । चरमम् अन्त्यम् ॥ २ ॥ तत्रापि विप्रत्वेऽपि । चादन्यसङ्गाच्च आत्मनो भ्रंशं भक्तिप्रतिघातं वा आशङ्कमानः लोकमुन्मत्तादिरूपेणात्मानं दर्शयामास । किं कुर्वन् । कर्मबन्धविध्वंसनं श्रवणादि यस्य तस्य भगवतश्चरणारविन्दयुगलं मनसा विशेषेण चिन्तयन् । विवरणं कथनम् ॥ ३ ॥ तस्यापि जडस्वरूपस्यापि समावर्तनपर्यन्तान् उपनयनादीन् संस्कारान् यथाविधि कुर्वाणः । शौचादीनपि समशिक्षयत् । कुतः । पितुः सकाशात् पुत्रेण शिक्षितेन भवितव्यमिति हेतोः । ह वै निपातौ लोक-

कर्मनियमाननभिप्रेतानपि समशिक्षयदनुशिष्टेन हि भाव्यं पितुः पुत्रेणेति ॥४॥ स चापि तदु ह पितृसंनिधावेवासध्रीचीनमिव स्म करोति ॥५॥ छन्दांस्यध्यापयिष्यन् सह व्याहृतिभिः सप्रणवशिरस्त्रिपदीं सावित्रीं ग्रैष्मवासन्तिकान्मासानधीयानमप्यसमवेतरूपं ग्राहयामास ॥६॥

एवं स्वतनुज आत्मन्यनुरागावेशितचित्तः शौचाध्ययनव्रतनियमगुर्वनलशुश्रूषणाद्यौपकुर्वाणककर्माण्यनभियुक्तान्यपि समनुशिष्टेन भाव्यमित्यसदाग्रहः पुत्रमनुशास्य स्वयं तावदनधिगतमनोरथः कालेनाप्रमत्तेन स्वयं गृह एव प्रमत्त उपसंहृतः ॥७॥ अथ यवीयसी द्विजसती स्वगर्भजातं मिथुनं सपत्न्या उपनस्य स्वयमनुसंस्थया पतिलोकमगात् ॥८॥

पितर्युपरते भ्रातर एनमतत्प्रभावविदस्त्रय्यां विद्यायामेव पर्यवसितमतयो न परविद्यायां जडमतिरिति भ्रातुरनुशासननिरबन्धान्न्यवृत्सन्त ॥९॥ स च प्राकृतैर्द्विपदपशुभिरुन्मत्तजडबधिरेत्यभिभाष्यमाणो यदा तदनुरूपाणि प्रभाषते कर्माणि च स कार्यमाणः परेच्छया करोति विष्टितो वेतनतो वा याच्ञया यदृच्छया वोपसादितमल्पं बहु मिष्टं कदन्नं वाभ्यवहरति परं नेन्द्रियप्रीतिनिमित्तम् ॥१०॥ नित्यनिवृत्तनिमित्तस्वसिद्धविशुद्धानुभवानन्दस्वात्मलाभाधिगमः सुखदुःखयोर्द्वन्द्वनिमित्तयोरसम्भावितदेहाभिमानः ॥११॥ शीतोष्णवातवर्षेषु वृष इवानावृताङ्गः पीनः संहननाङ्गः स्थण्डिलसंवेशनानुन्मर्दनामज्जनरजसा महामणिरिवानभिव्यक्तब्रह्मवर्चसः कुपटावृतकटिरुपवीतेनोरुमषिणा द्विजातिरिति ब्रह्मबन्धुरिति संज्ञया अतज्ज्ञ-

---

विलक्षणत्वं द्योतयतः ॥ ४ ॥ स भरतः । तत् उपदिष्टं शौचादि असध्रीचीनं विपरीतमिव करोति स्म । पुरीषोत्सर्गादेः प्रागेव मृत्तिकाशौचादि करोति नत्वनन्तरमेवेत्यर्थः ॥ ५ ॥ व्याहृतिभिः भूरादिभिः सहितां शिरसा आदिना प्रणवेन च सहितां त्रिपदां गायत्रीं चैत्रादिचतुरो मासानधीयानमपि तम् असमवेतरूपं यथार्थरूपेण न पाठयामासेत्यर्थः । उह उपेक्षायाम् ॥ ६ ॥ आत्मनि प्रिये । औपकुर्वाणकस्य सावधिकब्रह्मचर्यवतः । अनभियुक्तानि पुत्रानभीष्टान्यपि पुत्रं प्रत्यनुशास्य उपदिश्य अनधिगतोऽप्राप्तः । उपसंहृतो मृतः ॥ ७ ॥ यवीयसी कनिष्ठा विप्रपत्नी । सपत्न्यै उपन्यस्य समर्प्य । अनुसंस्थया अनुमरणेन अग्निप्रवेशलक्षणेन ॥ ८ ॥ उपरते मृते सति भ्रातर एवं जडमतिरिति मत्वा तस्य अनुशासननिर्बन्धात् शिक्षाऽऽग्रहात् न्यवर्तिषत निवृत्ताः । मूले सन्नन्ताल्लुङि रूपमार्षमेव । त्रयी विद्या कर्मकाण्डरूपा । परविद्या वेदान्तविद्या । पर्यवसिता परिनिष्ठिता ॥९॥ स च भरतः प्राकृतैः नीचैः यदा अभिभाष्यमाणो भवति तदा उन्मत्ताद्यनुरूपाणि वचांसि । विष्टिः मूल्यं विना बलात्कर्मकारणम् उपसादितं प्रापितं यत् किञ्चित् तत् परं केवलं शरीररक्षार्थमभ्यवहरति भुङ्क्ते नत्विन्द्रियप्रीतये ॥ १० ॥ कुतः । नित्यनिवृत्तं सर्वदा निवृत्तं निमित्तं कर्म यस्मात्स एवंभूतः स्वतः सिद्धः स्वयंप्रकाशः विशुद्धानुभवानन्दरूपः यः स्वात्मा श्रीकृष्णः तस्य लाभाधिगमः प्राप्त्युत्कर्षो यस्य । द्वन्द्वानि मानापमानादीनि असंभावितोऽकृतः ॥ ११ ॥ अत एव शीतादिषु वृष इव नग्नः सन् विचचारेत्यन्वयः । कथंभूतः । पीनः स्थूलः । सहंननाङ्गः अतिबलिष्ठगात्रः । स्थण्डिलसंवेशनं भूमिशयनं तदादिभिर्यद् रजः मालिन्यं

जनावभतो विचचार ॥१२॥ यदा तु परत आहारं कर्मवेतनत ईहमानः स्वभ्रातृभिरपि केदारकर्मणि निरूपितस्तदपि करोति किन्तु न समं विषमं न्यूनमधिकमिति वेद कणपिण्याकफलीकरणकुल्माषस्थालीपुरीषादीन्यप्यमृतवदभ्यवहरति ॥१३॥

अथ कदाचित्कश्चिद् वृषलपतिर्भद्रकाल्यै पुरुषपशुमालभतापत्यकामः ॥१४॥ तस्य ह दैवमुक्तस्य पशोः पदवीं तदनुचराः परिधावन्तो निशि निशीथसमये तमसाऽऽवृतायामनधिगतपशव आकस्मिकेन विधिना केदारान् वीरासनेन मृगवराहादिभ्यः संरक्षमाणमङ्गिरःप्रवरसुतमपश्यन् ॥१५॥ अथ त एनमनवद्यलक्षणमवमृश्य भर्तृकर्मनिष्पत्तिं मन्यमाना बद्ध्वा रशनया चण्डिकागृहमुपनिन्युर्मुदा विकसितवदनाः ॥१६॥

अथ पणयस्तं स्वविधिनाऽभिषिच्याहतेन वाससाऽऽच्छाद्य भूषणालेपस्रक्तिलकादिभिरुपस्कृतं भुक्तवन्तं धूपदीपमाल्यलाजकिसलयाङ्कुरफलोपहारोपेतया वैशससंस्थया महता गीतस्तुतिमृदङ्गपणवघोषेण च पुरुषपशुं भद्रकाल्याः पुरत उपवेशयामासुः ॥१७॥ अथ वृषलराजपणिः पुरुषपशोरसृगासवेन देवीं भद्रकालीं यक्ष्यमाणस्तदभिमन्त्रितमसिमतिकरालनिशितमुपाददे ॥१८॥

इति तेषां वृषलानां रजस्तमःप्रकृतीनां धनमदरजउत्सिक्तमनसां भगवत्कलावीरकुलं कदर्थीकृत्योत्पथेन स्वैरं विहरतां हिंसाविहाराणां कर्मातिदारुणं यत् ब्रह्मभूतस्य साक्षाद्ब्रह्मर्षिसुतस्य

तेन अप्रकटं ब्रह्मतेजो यस्य । उरुमषिणा अतिमलिनेन । अतज्ज्ञैः तत्स्वरूपानभिज्ञैः जनैस्तिरस्कृतः सन् ॥१२॥ कर्ममूल्येनैव यदाऽऽहारमपेक्षमाणो भवति तदा केदारकर्मणि धान्यक्षेत्रे कर्दम विलोडन प्रक्षेपादिकर्मणि नियुक्तस्तदपि कर्म । कर्दम प्रक्षेपे क्षेत्रं समम् उद्धरणे च विषममित्यादि न वेद । कर्मवेतनतः दत्तान् कणादीनपि अमृतवत् भुङ्क्ते । कणाः चूर्णतण्डुलाः तिलकिट्टं (खरी) तुषाः कीट दष्टमाषाः स्थालीलग्नं दग्धान्नमिति क्रमेणार्थाः ॥ १३ ॥ अथ कथान्तरारम्भे । वृषलानां शूद्राणां पतिः चौरराजः । आलभत आलब्धुं प्रवृत्तः । पुरुषवलिं दातुं प्रवृत्त इत्यर्थः ॥ १४ ॥ यमालब्धुं प्रवृत्तस्तस्य दैवाद्वन्धनमुक्तस्य पलायितस्य पुरुषपशोः पदवीं प्रति परितो धावन्तोऽन्वेषमाणास्तदनुचरा अनधिगत पशवः तमप्राप्येत्यर्थः ह अहो सुतं जडभरतमपश्यन् । किं कुर्वाणम् । वीरासनेन मञ्चोपर्यवस्थानेन केदारान् धान्यक्षेत्राणि मृगादिभ्यः संरक्षमाणम् । चानश् । आकस्मिकेन दैवकृतेन ॥ १५ ॥

अथ तद्दर्शनानन्तरम् । ते एनं रज्ज्वा बद्ध्वा उपनिन्युः । अनवद्यलक्षणम् अविकलाङ्गम् अवमृश्य ज्ञात्वा । निष्पत्तिं सिद्धिम् ॥ १६ ॥ अथ नयनानन्तरम् । पणयः चौराणां पुरोहिताः स्वकल्पित विधिना । अहतेन नूतनेन । उपस्कृतमलङ्कृतम् । वैशससंस्थया हिंसाविधानेन । माल्यं पुष्पम् । किसलयो विल्वपत्रादि । अङ्कुरोऽत्र यवाङ्कुर एव न तु दूर्वाङ्कुरः 'दुर्गां नैव तु दूर्वया' इति पाठ्वात् । उपहारो नैवेद्यम् । च सहेति शेष. ॥१७॥ वृषलराजस्य पणिः मुख्यः पुरोहितः । असृगासवेन रक्ताख्यमद्येन । यक्ष्यमाणः तर्पयिष्यमाणः । कालीमन्त्राभिमन्त्रितं तीक्ष्णं खड्गं जग्राह ॥ १८ ॥ इति स्वैरं यथेच्छं विहरतां तेषां शूद्राणां यद् दारुणं कर्म तदुपलभ्य दृष्ट्वा सा देव्येव सहसा उच्चचाट प्रतिमातो

निर्वैरस्य सर्वभूतसुहृदः सूनायामप्यननुमतमालम्भनं तदुपलभ्य ब्रह्मतेजसातिदुर्विषहेण दन्दह्यमानेन वपुषा सहसोच्चचाट सैव देवी भद्रकाली ॥१९॥ भृशममर्षरोषावेशरभसविलसितभ्रुकुटिविटपकुटिलदंष्ट्रारुणेक्षणाटोपातिभयानकवदना हन्तुकामेवेदं महाट्टहासमतिसंरम्भेण विमुञ्चन्ती तत उत्पत्य पापीयसां दुष्टानां तेनैवासिना विवृक्णशीर्ष्णां गलात्स्रवन्तमसृगासवमत्युष्णं सह गणेन निपीयातिपानमदविह्वलोच्चैस्तरां स्वपार्षदैः सह जगौ ननर्त च विजहार च शिरःकन्दुकलीलया ॥२०॥ एवमेव खलु महदभिचारातिक्रमः कार्त्स्न्येनात्मने फलति ॥२१॥ न वा एतद्विष्णुदत्त महदद्भुतं यदसम्भ्रमः स्वशिरश्छेदन आपतितेऽपि विमुक्तदेहाद्यात्मभावसुदृढहृदयग्रन्थीनां सर्वसत्त्वसुहृदात्मनां निर्वैराणां साक्षाद्भगवतानिमिषारिवरायुधेनाप्रमत्तेन तैस्तैर्भावैः अभिरक्ष्यमाणानां तत्पादमूलमकुतश्चिद्भयमुपसृतानां भागवतपरमहंसानाम् ॥२२॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां पञ्चमस्कन्धे जडभरतचरिते नवमोऽध्यायः ॥९॥

वह्निर्निर्गता। कथंभूतं कर्म। आपत्काले स्वरक्षार्थं कथञ्चिदनुज्ञातायामपि सूनायां प्राणिहिंसायां तादृशस्य निर्वैरस्य अननुज्ञातं सर्वथैव निषिद्धमालम्भनं हिंसनरूपम्। उत्सिक्तमुच्छृङ्खलम्। भगवत्कलासु वेदेषु विशिष्टा ईरा गति र्येषां तेषां ब्राह्मणानां कुलं तुच्छीकृत्य। अननुमतम्। 'मनुष्यं नालभेद्व्यं ब्राह्मणं तु कदापि न' इत्यागमशास्त्रोक्तेः। यत्तु यजुर्वेदीयपुरुषमेधप्रकरणे 'ब्राह्मणे ब्राह्मणा क्षत्राय राजन्यम्' इत्युक्तस्य का गतिरिति चेत्तत्र ब्राह्मणस्य यूपसमीपे पर्यग्निमात्रं कृत्वा त्याग एव तत्स्थाने घृतहोमविधानादिति तत्रत्यश्रुतितद्भाष्याभ्यां निर्णीतत्वादिति संक्षेपः ॥ १९ ॥ इदं जगत् हन्तुकामेव सनादं हासं विमुञ्चन्ती सा देवी ततः स्थानादुत्पत्य तेनैवासिना छिन्नशिरस्कानां तेषां दुष्टानां गलात्स्रवन्तं रक्तरूपं मद्यं निपीय उच्चैस्तरां विजहार भरताग्रे इति शेषः उरसि कृत्वा तं च ररक्षेति द्वितीयचकारार्थः। कीदृशी सा देवी। अमर्षोऽपराधासहनं तद्धेतुकः कोपश्च तयोरावेशस्तस्य वेगेन उत्तम्भितो यो भ्रुकुटिरूपो विटपः शाखा कुटिला दंष्ट्राश्च अरुणे ईक्षणे च तेषामाटोपेन प्रतापेन अतिभयानकं मुखं यस्याः सा ॥ २० ॥ अभिचारः हिंसारूपः यः अतिक्रमोऽपराधः स साकल्येन आत्मने फलति अभिचारफलं ददाति स्वमेव मारयतीत्यर्थः ॥ २१ ॥ वै एवार्थे। हे विष्णुदत्त परीक्षित्। स्वशिरश्छेदने प्राप्तेऽपि अयमसंभ्रमो भयाभाव इति यत् एतत् अनन्यभक्तानांमत्यद्भुतं नैवेत्यन्वयः। कथंभूतानाम्। विमुक्तो देहादिषु आत्मभाव आत्माभिमानरूपः सुदृढो हृदयग्रन्थिर्यैः। सर्वसत्त्वानां स्वहन्तृजीवानामपि सुहृद्रूपाणाम्। अप्रमत्तेन भगवता कर्त्रा। निरालस्यचक्ररूपेण वरायुधेन करणेन तैस्तैः भावैः भद्रकाल्यादिसंज्ञैः अभितो रक्ष्यमाणानाम्। इत्येव पाठः न तु परीति श्रीधरसम्मतः तथाव्याख्यानात्। अनिमिषेति भगवद्विशेषणं वा। उपसृतानां प्राप्तानाम्। अत्र परमहंसशब्दो विरक्तपरः। अनिमिषः कालः स एव अरि चक्रं तेन वा ॥ २२ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे गूढार्थदीपिन्यां नवमोऽध्यायः।

अथ दशमोऽध्यायः

श्रीशुक उवाच

अथ सिन्धुसौवीरपते रहूगणस्य व्रजत इक्षुमत्यास्तटे तत्कुलपतिना शिबिकावाहपुरुषान्वेषणसमये दैवेनोपसादितः स द्विजवर उपलब्ध एष पीवा युवा संहननाङ्गो गोखरवद्धुरं वोढुमलमिति पूर्वविष्टिगृहीतैः सह गृहीतः प्रसभमतदर्ह उवाह शिबिकां स महानुभावः ॥१॥ यदा हि द्विजवरस्येषुमात्रावलोकानुगतेर्न समाहिता पुरुषगतिस्तदा विषमगतां स्वशिबिकां रहूगण उपधार्य पुरुषानधिवहत आह हे वोढारः साध्वतिक्रमत किमिति विषममुह्यते यानमिति ॥२॥

अथ त ईश्वरवचः सोपालम्भमुपाकर्ण्योपायतुरीयाच्छङ्कितमनसस्तं विज्ञापयाम्बभूवुः ॥३॥ न वयं नरदेव प्रमत्ता भवन्नियमानुपथाः साध्वेव वहामः । अयमधुनैव नियुक्तोऽपि न द्रुतं व्रजति नानेन सह वोढुमु ह वयं पारयाम इति ॥४॥

सांसर्गिको दोष एव नूनमेकस्यापि सर्वेषां सांसर्गिकाणां भवितुमर्हतीति निश्चित्य निशम्य कृपणवचो राजा रहूगण उपासितवृद्धोऽपि निसर्गेण बलात्कृत ईषदुत्थितमन्युरविस्पष्टब्रह्मतेजसं जातवेदसमिव रजसाऽऽवृतमतिराह ॥५॥ अहो कष्टं भ्रातर्व्यक्तमुरु परि-

---

दशमे भरतो राज्ञः शिविकां विष्टितो वहन् ।
तदाक्षेपोक्तिगूढार्थं वदन् तेन प्रसादितः ॥१॥

अथ कदाचिदर्थे तत्त्वजिज्ञासोः कपिलाश्रमं व्रजतः सतः सिन्धुसौवीरदेशयोः राज्ञः इक्षुमत्या नद्यास्तटे दैवेन समीपं प्रापितः स द्विजनरो भरतः तस्य राज्ञः कुलपतिना प्रधानपुरुषेण उपलब्धो दृष्टः दृष्ट्वा च एष भारं वोढुमलं समर्थ इति निश्चित्य प्रसभं बलात् गृहीतः सन् सोऽपि तैः सह शिविकामुवाहेत्यन्वयः कथंभूतः । अतदर्हः तद्वहनायोग्यः यतः महानुभावः ज्ञानिश्रेष्ठतमः ब्राह्मणश्च तेषां शिविकावाहानां कुलस्य नाथेन । पीवा स्थूलः । संहननाङ्ग अतिव्रलिष्ठगात्रश्च पूर्वं विष्टया निर्मूल्यकर्मकरणेन ये गृहीताः तैः सह ॥१॥

हिंसापरिहारार्थमिषुमात्रभूप्रदेशावलोकानन्तरमेव या गतिस्तस्याः हेतोर्यदा तेषां गतिः न समाहिता एकरूपा नाऽभूत् तदा उपधार्य ज्ञात्वा अधिवहतः वाहकानाह । हे वाहकाः साधु अतिक्रमत पदं निक्षिपत वहत वा । इति इत्थम् अतिविषमं यानं किं किमर्थमुह्यते चाल्यते इति ॥२॥ अथ तदानीम् ईश्वरस्य राज्ञः । सोपालम्भं साक्षेपम् तुरीयात् चतुर्थात् दण्डात् तं राजानम् । केचित्तु यानस्य विषमगति हेतुकं द्विजमित्याहुः ॥३॥ भवन्नियमानुपथा भवदाज्ञानुवर्तिनः न पारयामः न समर्थाः । उह अनादरे ॥४॥ सांसर्गिक इति शुकवाक्यम् । निर्सर्गेण राजसस्वभावेन बलात्परवशः कृतः यतो रजोगुणाच्छन्नमतिः अतः रजसा भस्मना आच्छादितमग्निमिव स्थितं तमाहेत्यन्वयः ॥५॥ अहो इति षडाक्षेपा विपरीतार्थकाः वेदितव्याः । व्यक्तं निश्चितम् उरु अधिकम् सुचिरं बहुकालेन त्वमेक एक ऊढिवान् प्रापितवान् ।

श्रान्तो दीर्घमध्वानमेक एव ऊहिवान् सुचिरं नातिपीवा न संहननाङ्गो जरसा चोपद्रुतो भवान् सखे नो एवापर एते संघट्टिन इति बहु विप्रलब्धोऽप्यविद्यया रचितद्रव्यगुणकर्माशयस्वचरमकलेवरेऽवस्तुनि संस्थानविशेषेऽहंममेत्यनध्यारोपितमिथ्याप्रत्ययो ब्रह्मभूतस्तूष्णीं शिबिकां पूर्ववदुवाह ॥६॥

अथ पुनः स्वशिबिकायां विषमगतायां प्रकुपित उवाच रहूगणः ॥७॥ किमिदमरे त्वं जीवन्मृतो मां कदर्थीकृत्य भर्तृशासनमतिचरसि प्रमत्तस्य च ते करोमि चिकित्सां दण्डपाणिरिव जनताया यथा प्रकृतिं स्वां भजिष्यस इति ॥८॥

एवं बह्वबद्धमपि भाषमाणं नरदेवाभिमानं रजसा तमसानुविद्धेन मदेन तिरस्कृताशेषभगवत्प्रियनिकेतं पण्डितमानिनं स भगवान् ब्राह्मणो ब्रह्मभूतः सर्वभूतसुहृदात्मा योगेश्वरचर्यायां नातिव्युत्पन्नमतिं स्मयमान इव विगतस्मय इदमाह—॥९॥

ब्राह्मण उवाच

त्वयोदितं व्यक्तमविप्रलब्धं भर्तुः स मे स्याद्यदि वीर भारः।
गन्तुर्यदि स्यादधिगम्यमध्वा पीवेति राशौ न विदां प्रवादः ॥१०॥
स्थौल्यं कार्श्यं व्याधय आधयश्च क्षुत्तृड्भयं कलिरिच्छा जरा च।
निद्रा रतिर्मन्युरहंमदः शुचो देहेन जातस्य हि मे न सन्ति ॥११॥
जीवन्मृतत्वं नियमेन राजन् आद्यन्तवद्यद्विकृतस्य दृष्टम्।
स्वस्वाम्यभावो ध्रुव ईड्य यत्र तर्ह्युच्यतेऽसौ विधिकृत्ययोगः ॥१२॥

न संहननाङ्गः न सुपुष्टावयवः। उपद्रुत आक्रान्तः। संघट्टिनः सहचराः विप्रलब्धोऽधिक्षिप्तोऽपि तूष्णीमुवाह तत्र हेतुः अविद्यया रचिता द्रव्यादयो यस्मिन् तस्मिन् स्वान्तिमकलेवरे। कीदृशे। मिथ्याभूते आकारविशेषे न आरोपितो मिथ्याप्रत्ययः देहोऽस्मीत्यादिमिथ्याज्ञानं येन। यतः ब्रह्मभूतः कृष्णसन्निधिं प्राप्तः इति यथाश्रुतार्थः। द्रव्याणि भूतानि गुणाः इन्द्रियाणि आशयोऽन्तः करणम् ॥६॥ अथ पुनः विषमं नीयमानायां सत्याम् ॥७॥ कदर्थीकृत्य तुच्छीकृत्य भर्त्तुर्मम आज्ञामतिक्रामसि। चिकित्सां दण्डं तथा करिष्यामि यथा प्रकृतिमप्रमत्ततां प्राप्स्यसि ॥८॥ एवमिति शुकवाक्यम्। अबद्धमनुचितं भाषमाणं नृपं प्रति स ब्राह्मणो भरतः विगतस्मयोऽहङ्कारशून्यः सन् हसन्निव इदमाहेत्यन्वयः। कथंभूतम्। अशेषः समस्तरूपो भगवान् तस्य प्रियनिवासो भक्तः स तिरस्कृतो येन तम्। अनुविद्धेन ग्रथितेन। भगवान् भगवत्तत्वज्ञः ब्रह्म श्रीकृष्णरूपं भूतमनुभूतं येन। चर्यायां जडादिवदाचरणे तज्जाने इत्यर्थः ॥९॥ ब्राह्मणो भरतः त्वया वक्रोक्त्या यदुक्तं श्रमादि नास्तीति तत् व्यक्तं सत्यमेव अविप्रलब्धं विरुद्धं नास्ति। कुतः। भर्तुः वोढुः देहस्य यो भारः स यदि मे स्यात् तदा विप्रलम्भः स्यात्। अहं देहाद्भिन्नो बोढैव न भवामि कुतो भारः कुतः श्रम इति एवमेव गन्तुः देहस्य प्राप्यं स्थानम् अध्वा वा स्यात् स च देहः मयि प्रसक्तः स्यात् तदा तन्निमित्तः मे श्रमः स्यात् न त्वेदस्ति। यच्चोक्तं पीवेत्यादि तदपि सत्यमेव पीवेति प्रवादः व्यवहारः विदुषां राशौ भूतसंघाते देहे एव नत्वात्मनीति नाहं देहः अतो नातिपीनेति सुष्ठूक्तम् ॥१०॥ केवलं पीवत्वमेव मे न अपि तु अन्येऽपि देहधर्माः मे न सन्तीत्याह स्थौल्यादयः षोडश धर्माः देहेन देहाभिमानेन जातस्यैव पुरुषस्य मम तु निरभिमानस्य न सन्ति। देहे जातेऽपि तत्र न जातस्य मम न सन्तीत्यन्वयो वा। कलिः कलहः अहमहङ्कारः मदो मोहः शुचो विविधशोकाः ॥११॥ यद् आद्यन्तवत् उत्पत्तिविनाश-

विशेषबुद्धेर्विवरं मनाक् च पश्याम यन्न व्यवहारतोऽन्यत् ।
क ईश्वरस्तत्र किमीशितव्यं तथापि राजन् करवाम किं ते ॥१३॥
उन्मत्तमत्तजडवत्स्वसंस्थां गतस्य मे वीर चिकित्सितेन ।
अर्थः कियान् भवता शिक्षितेन स्तब्धप्रमत्तस्य च पिष्टपेषः ॥१४॥

श्रीशुक उवाच

एतावदनुवादपरिभाषया प्रत्युदीर्य मुनिवर उपशमशील उपरतानात्म्यनिमित्त उपभोगेन कर्मारब्धं व्यपनयन् राजयानमपि तथोवाह ॥१५॥ स चापि पाण्डवेय सिन्धुसौवीरपतिस्तत्त्वजिज्ञासायां सम्यक् श्रद्धयाधिकृताधिकारस्तद्धृदयग्रन्थिमोचनं द्विजवच आश्रुत्य बहुयोगग्रन्थसम्मतं त्वरयावरुह्य शिरसा पादमूलमुपसृतः क्षमापयन् विगतनृपदेवस्मय उवाच ॥१६॥

कस्त्वं निगूढश्चरसि द्विजानां बिभर्षि सूत्रं कतमोऽवधूतः ।
कस्यासि कुत्रत्य इहापि कस्मात् क्षेमाय नश्चेदसि नोत शुक्लः ॥ १७ ॥
नाहं विशङ्के सुरराजवज्रान्न त्र्यक्षशूलान्न यमस्य दण्डात् ।
नाग्न्यर्कसोमानिलवित्तपास्त्राच्छङ्के भृशं ब्रह्मकुलावमानात् ॥ १८ ॥

शालि तस्य विकृतस्य देहस्यैव जीवन्मृतत्वं नियमेन दृष्टं नत्वात्मनो ममेत्यर्थः । किञ्च स्वस्वामिभावो यत्र ध्रुवो नियतः तह्येव विधिराज्ञा शासनं वा भृत्यकर्मंच तयोः संवन्ध उचितो भवति नान्यत्र तस्याध्रुवत्वादित्यर्थः उच् समवाये धातुः । हे ईडयेत्युपहासः जडं जीवन्मृतं स्मृतम् इति स्मृतेः । स्वं भृत्यत्वं स्वाम्यं स्वामित्वम् ॥१२॥ यत् यतः त्वं भृत्यः अहं स्वामीति वैषम्यबुद्धे विवरमवकाशं व्यवहारतः कथनमात्रादन्यत् मनाक् ईषदपि न पश्यामि । तत्र एवं सति मनुष्येषु क ईश्वरो नियन्ता न कोऽपि किं नियम्यं भूतादि न किमपि तथाऽपि हठिनस्ते किमित्यन्वयः । बुद्धेर्यद्विवरं तद्व्यवहारतोऽन्यन्न कुतोऽज्ञविषयत्वात्तस्येत्यन्वयो वा ॥१३॥ उन्मत्तादिवत्प्रतीयमानस्य वस्तुतः स्वे हरावेव सम्यक् स्थितिं प्राप्तस्य मे भवता कृतेन दण्डेन शिक्षितेन वा कियानर्थः न कोऽपि प्रत्युत एवंभूतस्य भगवन्निष्ठस्य मम दण्डादिकं पिष्टपेषणवत् व्यर्थमेवेत्यन्वयः । यतो लोकदृष्टयैव स्तब्धस्य अनम्रस्य । चकार इवार्थे वा स्तब्धप्रमत्तस्य विक्षिप्तस्य यथा तद्वत् ॥१४॥

उक्तस्य पुनर्वचनमनुवादपरिभाषास्तयाअनूद्य । प्रत्युदीर्य प्रत्युत्तरं दत्त्वा । उपरतं निवृत्तम् अनात्म्यस्य देहात्मभावस्य निमित्तमविद्या यस्य । व्ययनपन् क्षपयन् । तथा पूर्ववत् ॥१५॥ हे पाण्डवेय परीक्षित् सिन्धुसौवीरो देशौ । अधिकृतः प्राप्तः । हृदयग्रन्थिविमोचनम् अहङ्कारनिवर्तकम् । योगोऽत्र ज्ञानयोगः उपसृतः उपगतः । तं क्षमापयन् इति । स्मयोऽहङ्कारः ॥१६॥ द्विजानां दत्तात्रेयादीनां मध्ये कतमोऽवधूतः । यतः सूत्रम् । कस्य पुत्रः शिष्यो वाऽसि । कुत्र भवः । इहापि स्थाने कस्मात् हेतो प्राप्तः नोऽस्माकं क्षेमाय चेत्तर्हि शुक्लः कपिलो नासि किम् । उत वितर्के ॥१७॥ न विशङ्के न बिभेमि

तद् ब्रूह्यसङ्गो जडवन्निगूढविज्ञानवीर्यो विचरस्यपारः।
वचांसि योगग्रथितानि साधो न नः क्षमन्ते मनसापि भेत्तुम् ॥ १९ ॥

अहं च योगेश्वरमात्मतत्त्वविदां मुनीनां परमं गुरुं वै।
प्रष्टुं प्रवृत्तः किमिहारणं तत् साक्षाद्धरिं ज्ञानकलावतीर्णम् ॥२०॥

स वै भवाँल्लोकनिरीक्षणार्थमव्यक्तलिङ्गो विचरत्यपि स्वित्।
योगेश्वराणां गतिमन्धबुद्धिः कथं विचक्षीत गृहानुबन्धः ॥२१॥

दृष्टः श्रमः कर्मत आत्मनो वै भर्तुर्गन्तुर्भवतश्चानुमन्ये।
यथाऽसतोदानयनाद्यभावात् समूल इष्टो व्यवहारमार्गः ॥२२॥

स्थाल्यग्नितापात्पयसोऽभितापस्तत्तापतस्तण्डुलगर्भरन्धिः।
देहेन्द्रियास्वाशयसंनिकर्षात् तत्संसृतिः पुरुषस्यानुरोधात् ॥२३॥

शास्ताभिगोप्ता नृपतिः प्रजानां यः किङ्करो वै न पिनष्टि पिष्टम्।
स्वधर्ममाराधनमच्युतस्य यदीहमानो विजहात्यघौघम् ॥२४॥

सुरराज इन्द्रः त्र्यक्षः त्रिनेत्रः श्रीरुद्रः। वित्तपः कुवेरः ब्राह्मणकुलम् ॥१८॥ तत् तस्मात् कस्त्वं जडवत् विचरसीति ब्रूहि यतःते वचांसि नोऽस्माकं मनसापि भेत्तुं तात्पर्यविषयीकर्तुं न क्षमाणि न शक्यानीत्यर्थः। नोऽस्मान् भेत्तुं छिन्नसंशयीकर्तुं न क्षमन्ते न शक्नुवन्तीति वा। कथंभूतान्। मनसा सहितान् सावधानमनसोऽपि ॥१९॥ इह संसारे जीवानाम् यत् अरणं शरणं तत् किमति साक्षाद्धरिं श्रीकपिलं प्रति प्रष्टुमहंप्रवृत्तः। वै प्रसिद्धे त्वर्थे चकारः कला शक्तिः। कलायै बोधनाय वा ॥२०॥ स्वित् वितर्के स एव कपिल एव भवान् अपि किं गूढचिह्नः सन् विचरति गृहासक्तो मादृशोऽन्धबुद्धि भवतां गतिं स्वरूपं कथं विजानीयात् ॥२१॥ वै यथार्थे कर्मतः श्रमः सामान्यतः सर्वेषामेव दृष्टः। आत्मनो वै मम यथा एवं वोढुः गन्तुर्भवतोऽपिश्रम इत्यहमनुमिनोमि। नन्विदं व्यवहारमात्रं न तु सत्यं तत्राह–न हि असता मिथ्याघटादिना उदकानयनादि संभवति किन्तु सत्येनैव अतो व्यवहारमार्गः प्रपञ्चः समूलः सप्रमाणकः यथा यथावत् इष्टः सत्य एव न तु मिथ्येत्यर्थः ॥२२॥ स्थौल्यादयो मे न सन्तीति यदुक्तं तत्र तेषामौपाधिकत्वेऽपि किं न सत्यत्वं तत्राह–स्थाली ओदनादिपाचनपात्रं तस्या अग्निना तापात् तद्गतस्य क्षीरस्य तापः तत्तापतः तण्डुलगर्भपाको यथा भवति एवं देहादिभिः संबन्धात् तन्निमित्तकः संसारः सुखदुःखाद्यनुभवः पुरुषस्य जीवमात्रस्य भवत्येव। कुतः। अनुरोधात् उपाधिधर्मानुवृत्तेः। यथा ग्रीष्मतो देहे तप्ते इन्द्रियाणां तापः ततः प्राणस्य ततो मनसः ततः आत्मन इति। असवः प्राणाः आशयो मनः ॥२३॥ स्वस्वामिभावस्याऽध्रुवत्वेऽपि यो नृपतिः स दुष्टप्रजानां शास्ता शिष्टानां गोप्ता च भवत्येव। यच्चोक्तं स्तब्धादेः शिक्षा विफला तदपि नेत्याह–यो मद्विधः किङ्करः स वै निश्चितं पिष्टं न पिनष्टि निष्फलतां न प्राप्नोति। यत् यतः अच्युतस्याराधनरूपं स्ववर्णोचितं धर्मं निग्रहादिकमीहमानः

तन्मे भवान्नरदेवाभिमानमदेन तुच्छीकृतसत्तमस्य ।
कृषीष्ट मैत्रीदृशमार्तबन्धो यथा तरे सदवध्यानमंहः ॥२५॥
न विक्रिया विश्वसुहृत्सखस्य साम्येन वीताभिमतेस्तवापि ।
महद्विमानात् स्वकृताद्धि मादृङ् नङ्क्ष्यत्यदूरादपि शूलपाणिः ॥२६॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां पञ्चमस्कन्धे दशमोऽध्यायः ॥१०॥

अथैकादशोऽध्यायः

ब्राह्मण उवाच

अकोविदः कोविदवादवादान् वदस्यथो नातिविदां वरिष्ठः ।
न सूरयो हि व्यवहारमेनं तत्त्वावमर्शेन सहामनन्ति ॥१॥
तथैव राजन्नुरुगार्हमेधवितानविद्योरुविजृम्भितेषु ।
न वेदवादेषु हि तत्त्ववादः प्रायेण शुद्धो नु चकास्ति साधुः ॥२॥
न तस्य तत्त्वग्रहणाय साक्षाद्वरीयसीरपि वाचः समासन् ।
स्वप्ने निरुक्त्या गृहमेधिसौख्यं न यस्य हेयानुमितं स्वयं स्यात् ॥३॥

कुर्वन् अघोघं पापराशिं संसारं वा मुञ्चति मुक्तो भवतीत्यर्थः ॥२४॥ तत् तस्मात् मे ममोपरि भवान् मैत्रीदृशं तथा प्रेमदृष्टिं करोतु यथाऽहं सतामवज्ञारूपं पापं तरेयम् । तुच्छीकृताः अनादृताः सत्तमाः भवादृशा येन तस्य ॥२५॥ अपि यद्यपि तव विक्रिया मनसि विकारो नास्ति तथाऽपि स्वकृतात् महतां भवता भवमानात् मादृक् विनङ्क्ष्यति शूलपाणिरिवातिसमर्थोऽपि लुप्तोपमा अतो मैत्रीदृशमित्यन्वयः। अदूरात् शीघ्रम् । सुहृत् निरपेक्षहितकारी सखा मार्गदर्शी च तस्य तव ॥२६॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे गूढार्थदीपिन्या दशमोध्यायः ।

एकादशे परं ज्ञानं भूभृते बन्धमोक्षयोः ।
हेतुत्वे मनसो वृत्तीः प्रोच्य तद्रोध उच्यते ॥१॥

अकोविदोऽपि त्वं कोविदानां वादवत् उदाहरणवाक्यवत् वादान् वाक्यानि वदसि । अथोऽतः हि यतः यं त्वं सत्यमात्थ तमेनंव्यवहारं कोविदास्तु तत्त्वावमर्शेन सत्यस्वरूपविचारेण सह नामनन्ति न योजयन्ति । मिथ्या वदन्तीत्यर्थः ॥१॥ यथैव व्यवहारकर्मसु तथैव 'अक्षय्यं ह वै' इत्यादिवेदस्याथर्ववादेष्वपि यस्तत्त्ववादः नित्यत्वोद्घोषः स शुद्धः हिंसादिशून्यः साधुः रागादिशून्यश्च प्रायेण न प्रकाशते । नु निश्चतम् । कथंभूतेषु । बहुगृहस्थसंबन्धियज्ञविस्ताररूपया कर्मकाण्डविद्यया उरु अधिकं विलसितेषु । तेषामेव कर्मणामीश्वरार्पितत्वे तु मोक्षफलजनकत्वाच्छुद्धत्वमेवेति द्योतनाय प्रायग्रहणम् ॥२॥ गृहमेधिनः गृहस्थस्य ऐहिकाऽऽमुष्मिकसुखं यस्य हेयत्वेनानित्यत्वेनाऽनुमितं न स्यात् । स्वप्ने निरुक्त्या स्वप्नदृष्टान्तेन । तस्य कर्मिणः वरीयस्योऽपि वेदान्तवाच साक्षात् यथावत् तत्त्वज्ञानाय न समासन् न समर्था

यावन्मनो रजसा पूरुषस्य सत्त्वेन वा तमसा वाऽनुरुद्धम् ।
चेतोभिराकूतिभिरातनोति निरंकुशं कुशलं चेतरं वा ॥४॥
स वासनात्मा विषयोपरक्तो गुणप्रवाहो विकृतः षोडशात्मा ।
बिभ्रत्पृथङ् नामभि रूपभेदन्तर्बहिष्ट्वं च पुरैस्तनोति ॥५॥
दुःखं सुखं व्यतिरिक्तं च तीव्रं कालोपपन्नं फलमाव्यनक्ति ।
आलिङ्ग्य मायारचितान्तरात्मा स्वदेहिनं संसृतिचक्रकूटः ॥६॥
तावानयं व्यवहारः सदाविः क्षेत्रज्ञसाक्ष्यो भवति स्थूलसूक्ष्मः ।
तस्मान्मनो लिङ्गमदो वदन्ति गुणागुणत्वस्य परावरस्य ॥७॥
गुणानुरक्तं व्यसनाय जन्तोः क्षेमाय नैर्गुण्यमथो मनः स्यात् ।
यथा प्रदीपो घृतवर्तिमश्नन् शिखाः सधूमा भजति ह्यन्यदा स्वम् ।
पदं तथा गुणकर्मानुबद्धं वृत्तीर्मनः श्रयतेऽन्यत्र तत्त्वम् ॥८॥
एकादशासन्मनसो हि वृत्तय आकूतयः पञ्च धियोऽभिमानः ।
मात्राणि कर्माणि पुरं च तासां वदन्ति हैकादश वीर भूमीः ।
गन्धाकृतिस्पर्शरसश्रवांसि विसर्गरत्यर्त्यभिजल्पशिल्पाः ॥९॥

बभूवुः । कर्मफलं गृहमेधिसौख्यमनुपादेयम् अनित्यत्वात् स्वप्नधनवदित्यनुमानम् । स्वप्ने भोगानां या निरुक्तिरनित्यतोक्तिस्तयेति शब्दार्थः ॥३॥ यावत् अनुरुद्धं व्याप्तं तावत् निरङ्कुशमुच्छृङ्खलं सत् कुशलं पुण्यमितरं पापं वा करोति । कैः चेतोभिः ज्ञानेन्द्रियैः आकूतिभिः कर्मेन्द्रियैश्चेति चकारस्यान्वयः ॥४॥ वासनायुक्त आत्मा मनः उपरक्तः आसक्तः । गुणैश्चाल्यमानः विकृतः विकारवान् षोडषेषु भूतेन्द्रियेषु आत्मा मुख्यः । पृथक् नामभिः सह पृथग् रूपभेदं देवतिर्यगादिशरीरभेदं विभ्रत् उत्कृष्टत्वं निकृष्टत्वं च पुरैः तैरैव देहैः विस्तारयति॥५॥ स एव च स्वदेहिनं जीवमालिङ्ग्य् कालप्राप्तं दुःखादिकं च फलम् आसर्वतो व्यनक्ति प्रकटयति यतो मायया रचित अन्तरात्मा जीवोपाधिः । अत एव संसारचक्रे कूटयति तं भ्रामयति छलयतीति वा । व्यतिरिक्तं मोहम् तीव्रं क्रोधादिकं च ॥६॥ यावदेवं तावानयं प्रसिद्धः व्यवहारः संसारः आविः प्रकाशमानः सन् सदा क्षेत्रस्य जीवस्य साक्ष्यो दृश्यो भोग्यो भवतीत्यर्थः । जागरे स्थूलः स्वप्ने सूक्ष्मश्च । तस्मात् अदो मन एव गुणत्वस्य संसारस्य अगुणत्वस्य मोक्षस्य च उभयोरपि कारणं वदन्ति । कस्य । परावरस्य उत्कृष्टनिकृष्टजनसमूहस्य । निकृष्टस्य संसार उत्कृष्टस्य मोक्ष इति व्यूत्क्रमेण संबन्धः ॥७॥ गुणेति सार्द्धम् । गुणानुरक्तं विषयासक्तं मनः व्यसनाय संसाराय अथो यदि तु निर्गुणं निर्विषयं तर्हि तस्य क्षेमाय मोक्षाय । स्वार्थे ष्यञ् । घृतयुक्तां वर्तिम् । शिखा ज्वाला भजति प्राप्नोति । अन्यदा हि घृतवर्त्यभावे तु स्वं पदं निधूमरूपम् । तथा एवं गुणाय विषयाय कर्मासक्तं मनः मलिना वृत्तीः । अन्यत्र विषयत्यागे स्वं पदं भगवत्तत्त्वं श्रयते ॥८॥ आकूतयः कर्मेन्द्रियरूपाः पञ्च । धियो ज्ञानेन्द्रियरूपाः पञ्च एकोऽहङ्कारश्चेत्येवम् । तासां वृत्तीनां भूमीर्विषयानपि एकादशैव वदन्ति । मात्राणि गन्धादीनि पञ्च ज्ञानेन्द्रियाणाम् । कर्माणि विसर्गादीनि पञ्च कर्मेन्द्रियाणाम् । पुरं देहगेहरूपमभिमानस्येत्येवम् ॥ ९ ॥ मात्राणीत्यादेर्व्याख्या गन्धेति । आकृतिः रूपम् । श्रवः शब्दः । विसर्गो मलत्यागः ।

एकादशं स्वीकरणं ममेति शय्यामहं द्वादशमेक आहुः ॥१०॥
द्रव्यस्वभावाशयकर्मकालैरेकादशामी मनसो विकाराः ।
सहस्रशः शतशः कोटिशश्च क्षेत्रज्ञतो न मिथ्यो न स्वतः स्युः ॥११॥
क्षेत्रज्ञ एता मनसो विभूतीर्जीवस्य मायारचितस्य नित्याः ।
आविर्हिताः क्वापि तिरोहिताश्च शुद्धो विचष्टे ह्यविशुद्धकर्तुः ॥१२॥
क्षेत्रज्ञ आत्मा पुरुषः पुराणः साक्षात्स्वयंज्योतिरजः परेशः ।
नारायणो भगवान् वासुदेवः स्वमाययाऽऽत्मन्यवधीयमानः ॥१३॥
यथाऽनलः स्थावरजङ्गमानामात्मस्वरूपेण निविष्ट ईशेत् ।
एवं परो भगवान् वासुदेवः क्षेत्रज्ञ आत्मेदमनुप्रविष्टः ॥१४॥
न यावदेतां तनुभृन्नरेन्द्र विधूय मायां वयुनोदयेन ।
विमुक्तसङ्गो जितषट्सपत्नो वेदात्मतत्त्वं भ्रमतीह तावत् ॥१५॥
न यावदेतन्मन आत्मलिङ्गं संसारतापावपनं जनस्य ।
यच्छोकमोहामयरागलोभवैरानुबन्धं ममतां विधत्ते ॥१६॥

अर्तिर्गतिः । अभिजल्पो भाषणम् । शिल्पं चित्रकलादि हस्तविषयः । अभिमानस्य द्वैविध्यात् ममेति कृत्वा स्वीक्रियते यत् गेहादि तत् एकादशं शय्यांविषयम् । अहमिति कृत्वा स्वीक्रियते यच्छरीरं तत् द्वादशं विषयम् इत्येके आचार्या आहुः ॥ १० ॥ अमी विकाराः पूर्वोक्ता वृत्तयः द्रव्यादिभिर्निमित्तभूतैः प्रथमं शतशः ततश्च क्रमेणानन्ताः स्युः भवन्ति ताश्च न स्वतः न केवलान्मनसः करणत्वात् न च मिथः परस्परं मिलित्वा जडत्वात् अतः क्षेत्रज्ञतः परमेश्वरत एव सर्गवद्धयर्थं मनसि जायन्ते इति सिद्धान्तः । द्रव्याणि विषयाः । आशयो वासना । कर्म पुण्यादिकम् । कालः क्षोभकः ॥ ११ ॥ यदुक्तं तत्त्वं श्रूयते तदेवाह-मायया रचितस्य बद्धस्य अत एव अविशुद्धं भगवद्विमुखं कर्म करोतीति तथा तस्य जीवस्य संबन्धि यन्मनस्तस्य एता विभूतीः पूर्वोक्ता वृत्तीः शुद्धः यो विचष्टे केवलं पश्यति न तु भुङ्क्ते स भगवान् तत्त्वमित्यन्वयः । कीदृशीः विभूतीः । नित्या अनादिकालत एवानुगताः । क्वापि जाग्रत्स्वप्नयोराविर्भूताः क्वाऽपि च सुषुप्तिप्रलययोः तिरोहिताश्च । मायारचितस्य जगतः प्रवाहरूपेण नित्या इति वा ॥ १२ ॥ क्षेत्रस्य साकल्येन ज्ञाता स एव परमात्मा आत्मनि जीवे अवधीयमानः प्रेरकतया वर्तमानः । कया । स्वमायया स्वकृपया । 'माया दम्भे कृपायां च' इति विश्वः ॥ १३ ॥ यथाऽनिलो वायुः आत्मस्वरूपेण प्राणरूपेण स्थावरादीनामन्तर्निविष्टस्तानीष्टे प्रेरयति एवमिदं विश्वमनुप्रविष्टः भगवानपि तत् ईष्टे इत्यन्वयः । लडर्थे लिङ् ॥१४॥ तनुभृत् जीवः ज्ञानोदयेन विमुक्तसङ्गः सन् यावन्मायां निरस्य आत्मतत्त्वं न वेद तावत् इह संसारे एव भ्रमतीत्यन्वयः ॥ १५ ॥ यत् शोकाद्यनुबन्धं ममतां च विधत्ते तदेतन्मनः आत्मनो लिङ्गं जीवस्योपाधिभूतमत एव सर्वस्यापि जनस्य संसारतापानामावपनं क्षेत्रं कारणं चेति यावत् वेद तावद् न भ्रमतीति संबन्धः । अनुबन्धोऽनुवृत्तिः ॥ १६ ॥ तत् तस्मात् अदभ्रवीर्यं महाबलम् एनं मनोरूपं भ्रातृव्यं शत्रुं स्वयमप्रमत्तः सन् जहि घातय । यद्वा । उपेक्षयैव जहि

भ्रातृव्यमेनं तदद्भ्रवीर्यमुपेक्षयाऽध्येधितमप्रमत्तः।
गुरोर्हरेश्चरणोपासनास्त्रो जहि व्यलीकं स्वयमात्ममोषम् ॥१७॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां पञ्चमस्कन्धे ब्राह्मणरहूगणसंवादे एकादशोऽध्यायः ॥११॥

अथ द्वादशोऽध्यायः

रहूगण उवाच

नमो नमः कारणविग्रहाय स्वरूपतुच्छीकृतविग्रहाय।
नमोऽवधूत द्विजबन्धुलिङ्गनिगूढनित्यानुभवाय तुभ्यम् ॥१॥
ज्वरामयार्तस्य यथाऽगदं सत् निदाघदग्धस्य यथा हिमाम्भः।
कुदेहमानाहिविदष्टदृष्टेर्ब्रह्मन् वचस्तेऽमृतमौषधं मे ॥२॥
तस्माद्भवन्तं मम संशयार्थं प्रक्ष्यामि पश्चादधुना सुबोधम्।
अध्यात्मयोगग्रथितं तवोक्तमाख्याहि कौतूहलचेतसो मे ॥३॥
यदाह योगेश्वर दृश्यमानं क्रियाफलं सद्व्यवहारमूलम्।
न ह्यञ्जसा तत्त्वविमर्शनाय भवानमुष्मिन् भ्रमते मनो मे ॥४॥

निगृहाण। कथंभूतम्। अध्येधितं वर्द्धितम्। आत्मानं श्रीकृष्णधनं मुष्णातीति तथाभूतम्। गुरुरेव हरिस्तस्य चरणोपासनमेवाऽस्त्रं यस्य तथाभूतः सन्। 'भ्रातुर्व्यन्त्सपत्ने' इति पाणिनिः ॥ १७ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे गूढार्थदीपिन्यामेकादशोऽध्यायः।

द्वादशे सादरं पृष्टो मुनिः संशयनुत्तये।
सोपपत्ति समाधानं प्राह वृत्तं च पूर्वजम् ॥१॥

कारणेन लोकानुग्रहहेतुना विग्रहो देहो यस्य। लोकोद्धारार्थं विशिष्टं ज्ञानं वा यस्य। स्वरूपेण स्वरूपानुभवेन निरस्तः विग्रहो विरोधः कृतापराधेष्वपि येन। विग्रहाः शास्त्रकृतां विवादा वा येन। लिङ्गेन उन्मत्तवेषेण निगूढ आच्छादितो नित्यस्य भगवतोऽनुभवो येन। हे अवधूत! द्विजबन्धुर्ब्राह्मणाभासः। ॥ १ ॥ ज्वररोगपीड़ितस्य यथा सत् अगदं स्वादु औषधम्। क्वचित्तद्व्यभिचाराद् द्वितीयो दृष्टान्तः। ग्रीष्मतापेन तप्तस्य यथा शीतलजलम् एवं ते वचः मम अमृतमिव औषधमस्तीति लुप्तोपमा। कथंभूतस्य मे। कुत्सिते देहे योऽभिमानः स एव सर्पस्तेन लुप्ता विवेकलक्षणा दृष्टि र्यस्य ॥ २ ॥ तस्मान्मम संशयनिवृत्यर्थं भवन्तं पश्चात् प्रक्ष्यामि अधुना तु त्वयोक्तं ग्रथितं दुर्बोधं यद्वचः तत् सुबोधं यथा भवति तथा मे मम कृते व्याख्याहि। कौतूहलयुक्तम्। संशयार्थमित्यत्रार्थशब्दो निवृत्तिवाची मशकार्थो धूम इति वत् ॥ ३ ॥ क्रिया भारवहनादिरूपा तत्फलं श्रमादि प्रत्यक्षादिभिर्दृश्यमानमत एव सत् सत्यमपि भवान् व्यवहारमूलमसत्यं यदाह अमुष्मिन् वचसि मे मनो भ्रमति। हि यत एतत्

अयं जनो नाम चलन् पृथिव्यां यः पार्थिवः पार्थिव कस्य हेतोः ।
तस्यापि चाङ्घ्र्योरधिगुल्फजङ्घाजानूरुमध्योरशिरोधरांसाः ॥५॥
अंसेऽधि दार्वी शिबिका च यस्यां सौवीरराजेत्यपदेश आस्ते ।
यस्मिन् भवान् रूढनिजाभिमानो राजास्मि सिन्धुष्विति दुर्मदान्धः ॥६॥
शोच्यानिमांस्त्वमधिकष्टदीनान् विष्टचा निगृह्णन्निरनुग्रहोऽसि ।
जनस्य गोप्तास्मि विकत्थमानो न शोभसे वृद्धसभासु धृष्टः ॥७॥
यदा क्षितावेव चराचरस्य विदाम निष्ठां प्रभवं च नित्यम् ।
तन्नामतोऽन्यद् व्यवहारमूलं निरूप्यतां सत् क्रिययाऽनुमेयम् ॥८॥
एवं निरुक्तं क्षितिशब्दवृत्तमसन्निधानात्परमाणवो ये ।
अविद्यया मनसा कल्पितास्ते येषां समूहेन कृतो विशेषः ॥९॥
एवं कृशं स्थूलमणुर्बृहद्यदसच्च सज्जीवमजीवमन्यत् ।
द्रव्यस्वभावाशयकालकर्मनाम्नाजयाऽवेहि कृतं द्वितीयम् ॥१०॥

अञ्जसा झटिति तत्त्वविमर्शनाय संशयनिवृत्तये न भवति ॥ ४ ॥ ब्राह्मणो भरतः । यः पार्थिवः पृथिवीविकारः स एव कस्यचिद्धेतोः पृथिव्यां चलन् अयं भारवाहकः जनो नाम देहः प्रसिद्धः । तस्य जनस्य देहस्यापि अङ्घ्री पृथिव्या उपरिस्थौ अङ्घ्र्योरधि उपरि उपरि गुल्फादयः देहावयवाः पार्थिवा एव तेषां सर्वेषामेव जडत्वादात्मनश्च पृथक्त्वान्न भारो न श्रमश्चेत्यर्थः । मध्यं कटिभागः । उरो वक्षः । ग्रीवा स्कन्धौ च क्रमेण ॥५॥ अंसेऽधि स्कन्धो परि दार्वी दारुविकारः शिबिका । राजे अपदेशो नाममात्रं यस्य वस्तुतः पार्थिवो विकार एवाऽऽस्ते । यस्मिन् विकारे देहे रूढो बद्धमूल आत्माभिमानो यस्य स सिन्धुदेशेषु राजाऽस्मीति मन्यतेऽन्धः सन् ॥ ६ ॥ अधिरत्यर्थे । शोच्यान् निरपराधान् इमान् वाहकान् विष्टचा बलात्कारेण निगृह्णन्त्वं निर्दयः अथाऽपि गोप्ताऽस्मीति श्लाघमानस्त्वं विद्वत्समासु न शोभसे । यतो धृष्टोऽतीव निर्लज्जः ॥ ७ ॥ यदा चराचरस्य जगतः क्षितावेव निष्ठां स्थितिं प्रभवमुत्पत्तिं चात् लयं च विद्मः तत् तदा नामतः तत्तद्घटपटादिनाम्ना व्यवह्रियमाणात् क्षितिपदार्थादन्यत् यत् क्रियया उदकाद्याहरणरूपया सत् सत्यमित्यनुमेयं व्यवहारस्य कारणं किं वस्तु तन्निरूप्यतां युक्तिश्चेत् । एतेन यथाऽसतेत्युत्तरितम् ॥ ८ ॥ तर्हि क्षितेः सत्यता नेत्याह-क्षितिशब्दस्य वृत्तं वर्तनं वाच्यं यस्मिन् तत् तदपि एवं मिथ्यात्वेन निरुक्तम् निरूपितम् । कुतः । असत्सु सूक्ष्मेषु परमाणुषु स्वकारणभूतेषु निधनात् तल्लयात् । तर्हि परमाणवः सत्या नेत्याह—ये ते च मनसा कार्यानुपपत्त्या वादिभिरज्ञानेन कल्पिताः अतोऽसत्या एव । येषां परमाणूनां समूहेन विशेषः पृथिवीपदार्थः कृतः एवं च परमाणुव्यतिरेकेण क्षितिर्नास्ति ते चानित्या अतो न भारो न श्रमश्चेति सुष्ठूक्तम् ॥९॥ किं बहुना एवं क्षितिवत् अन्यदपि कृशत्वादिधर्मकं यत् द्वितीयं द्वैतं तत्सर्वं द्रव्यादिनाम्ना व्यवह्रिमाणया अजया मायया कृतं जानीहीत्यन्वयः । कृशं सूक्ष्मम् । अणुरतिसूक्ष्मम् । बृहत् अतिस्थूलम् । असत् कारणं सत्कार्यं सचेतनम् अचेतनम् द्रव्यं पृथिव्यादि । स्वभावस्तेषां परिणामः आशयो वासना । कालः क्षोभकः ॥१०॥

ज्ञानं विशुद्धं परमार्थमेकमनन्तरं त्वबहिर्ब्रह्म सत्यम् ।
प्रत्यक् प्रशान्तं भगवच्छब्दसंज्ञं यद्वासुदेवं कवयो वदन्ति ॥११॥
रहूगणैतत्तपसा न याति न चेज्यया निर्वपणाद् गृहाद्वा ।
न च्छन्दसा नैव जलाग्निसूर्यैर्विना महत्पादरजोऽभिषेकम् ॥१२॥
यत्रोत्तमश्लोकगुणानुवादः प्रस्तूयते ग्राम्यकथाविघातः ।
निषेव्यमाणोऽनुदिनं मुमुक्षोर्मतिं सतीं यच्छति वासुदेवे ॥१३॥
अहं पुरा भरतो नाम राजा विमुक्तदृष्टश्रुतसङ्गबन्धः ।
आराधनं भगवत ईहमानो मृगोऽभवं मृगसङ्गाद्धतार्थः ॥१४॥
सा मां स्मृतिर्मृगदेहेऽपि वीर कृष्णार्चनप्रभवा नो जहाति ।
अथो अहं जनसङ्गादसङ्गो विशङ्कमानोऽविवृतश्चरामि ॥१५॥
तस्मान्नरोऽसङ्गसुसङ्गजातज्ञानासिनेहैव विवृक्णमोहः ।
हरिं तदीहाकथनश्रुतिभ्यां लब्धस्मृतिर्यात्यतिपारमध्वनः ॥१६॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां पञ्चमस्कन्धे ब्राह्मणरहूगणसंवादे द्वादशोऽध्यायः ॥१२॥

कवयो यत् वासुदेवमिति वदन्ति तत्स्वरूपज्ञानमेव सत्यं नान्यदित्यन्वयः। तर्हि किं सत्यं। ज्ञानम् कीदृशम्। परमोऽर्थो मोक्षादिरूपो यस्मात् तत्। अनन्तरमबहिः बाह्याभ्यन्तरशून्यं व्यापकमित्यर्थः। प्रत्यक् सर्वान्तरम्। प्रत्यक् जीवः प्रशान्तो यस्मादिति वा ॥ ११ ॥ महतां भक्तानां पादरजोऽभिषेकं तच्चरणसेवां विना एतत् पूर्वोक्तं भगवज्ज्ञानं तप आदिभिः न याति न प्राप्नोतीत्यन्वयः। छन्दसा ब्रह्मचर्येण। गृहात् गार्हस्थ्येन। तपसा वानप्रस्थेन। निर्वपणात् सन्यासात्। इज्यया तत्र तत्र तत्तद्देवतोपासनया। तस्यामपि विशेषः उपासितैर्जलादिभिरिति सन्दर्भः॥ १२ ॥ निषेव्यमाणो यः भगवति सतीं निश्चलां मतिं भक्तिं वा ददाति स भगवद्गुणानुवादः यत्र येषु प्रस्तूयते निरन्तरं प्रचलति ते महान्त इत्यन्वयः। कथंभूतः विषयकथानां विघातो यस्मात् ॥ १३ ॥ दृष्ट-श्रुतेषु ऐहिकाऽऽमुष्मिभोगेषु सङ्गनिमित्तो बन्धो विमुक्तो येन सोऽहम् आराधनं कुर्वाणोऽपि सङ्गात् हतार्थः सन् मृगोऽभवम्। हतः अर्थो भगवत्प्राप्तिरूपः यस्य ॥१४॥ अर्चनात्प्रभव उत्पत्तिः यस्या सा स्मृतिः नो जहाति अधुनाऽपि वर्तते इत्यर्थः। अथो अतोऽहं सङ्गात् विशङ्कमानः असङ्ग एकाकी एव अविवृतोऽप्रकटः सन् विचरामि ॥१५॥ तस्मात् भक्तसङ्गोत्पन्नज्ञानखड्गेन छिन्नमोहः सन् नरः अध्वनः संसारमार्गस्य पारम् अति 'अतिक्रम्य। हरिं यायात् प्राप्नुयादित्यन्वयः। 'अतिरति क्रमणे च' इति द्वितीया कथंभूतः। तस्य हरेर्लीलानां कथनेन श्रुत्या श्रवणेन च लब्धा स्मृतिर्येन तथाभूतः। स्मृति पाठे स्मरणमित्यर्थः। ओ वासुदेवस्तत्र सङ्गो येषान्तेऽसङ्गाः भक्ताः ॥ १६ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे गूढार्थदीपिन्यां द्वादशोऽध्यायः।

अथ त्रयोदशोऽध्यायः

ब्राह्मण उवाच

दुरत्ययेऽध्वन्यजया निवेशितो रजस्तमःसत्त्वविभक्तकर्मदृक् ।
स एष सार्थोऽर्थपरः परिभ्रमन् भवाटवीं याति न शर्म विन्दति ।।१।।
यस्यामिमे षण्नरदेव दस्यवः सार्थं विलुम्पन्ति कुनायकं बलात् ।
गोमायवो यत्र हरन्ति सार्थिकं प्रमत्तमाविश्य यथोरणं वृकाः ।।२।।
प्रभूतवीरुत्तृगुल्मगह्वरे कठोरदंशैर्मशकैरुपद्रुतः ।
क्वचित्तु गन्धर्वपुरं प्रपश्यति क्वचित्क्वचिच्चाशुरयोल्मुकग्रहम् ।।३।।
निवासतोयद्रविणात्मबुद्धिस्ततस्ततो धावति भो अटव्याम् ।
क्वचिच्च वात्योत्थितपांसुधूम्रा दिशो न जानाति रजस्वलाक्षः ।।४।।
अदृश्यझिल्लीस्वनकर्णशूल उलूकवाग्भिर्व्यथितान्तरात्मा ।
अपुण्यवृक्षान् श्रयते क्षुधार्दितो मरीचितोयान्यभिधावति क्वचित् ।।५।।
क्वचिद्वितोयाः सरितोऽभियाति परस्परं चालषते निरन्धः ।
आसाद्य दावं क्वचिदग्नितप्तो निर्विद्यते क्व च यक्षैर्हृतासुः ।।६।।

त्रयोदशे विरक्त्यर्थं वर्णयित्वा भवाटवीम् ।
कृतार्थीकृत्य राजानं पूर्ववद्व्यचरन्मुनिः ।।१।।

दुस्तरे प्रवृत्तिमार्गेऽविद्यया प्रवेशितः स एष सार्थः वणिक्समूह इव जीवसमूहः । अर्थपरः विषयासक्तः सन् भवाटवीं याति शर्म सुखं च न लभते । तैर्विभक्तानि कर्माणि कार्यतया पश्यतीति तथाभूतः सार्थं इत्यत्र लुप्तोपमा । 'सार्थो वणिक्समूहे स्यात्' इति मेदिनी ।। १ ।। यस्यां भवाटव्याम् । इमे पञ्च ज्ञानेन्द्रियाणि मनश्चेति षट् चौराः सार्थं जीवसमूहं विलुम्पन्ति निर्धनं कुर्वन्ति । भक्तिविमुखं कुर्वन्तीत्यर्थः । कुत्सितो नायको बुद्धिर्यस्य । किञ्च यत्र गोमायवः सृगाला इव कौटुम्बिकाः लुप्तोपमा सार्थे स्थितमन्नवस्त्रादिकं हरन्ति अन्तःकरणे प्रविश्य । उरणं मेषम् । अजामिति तीर्थः ।। २ ।। वीरुदादिसदृशैर्नानाकर्मभिः गह्वरे गृहाश्रमे वर्तमानः दंशादितुल्यैर्दुर्जनैरुपद्रुतः पीडितो भवति । गन्धर्वपुरवदल्पकालस्थायि देहगेहादिकं प्रकर्षेण सत्यत्वेन पश्यति । क्वचिच्च आशुरयस्तीव्रवेगः उल्मुकग्रहः ज्वलदग्निमुखपिशाचः तद्वन्मृत्युहेतुभूतमपि सुवर्णमुपादेयत्वेन पश्यति । उल्मुकग्रहः अगियावेताल इति प्रसिद्धः पिशाचः ।। ३ ।। निवासादिषु आत्मनो ममेदमिति बुद्धि र्यस्य सः । तत्र तत्र भो राजन् । वात्या चक्राकारवायुतुल्या या स्त्री तया उत्थितैः पांसुभिः कामवेगैर्धूम्रा आच्छादिताः दिशो धर्ममर्यादा दिग्देवता वा न जानति । यतो रजःपिहितदृष्टिः ।। ४ ।। अदृश्यझिल्लीसदृशाः परोक्षं कटुभाषिणस्तेषां स्वनैः कर्णयोः शूलं व्यथा यस्य । उलूकसदृशाः प्रत्यक्षं कटुभाषिणस्तेषां वाग्भिः । अपुण्यवृक्षा विषादिवृक्षाः तत्सदृशान् अधार्मिकान् भिक्षार्थमाश्रयते । क्वचित् मरीचितोयसदृशान् निष्फलान् विषयान् ।। ५ ।। वितोयसरित्तुल्या दुःखदाः पाखण्डवृत्तीः । पाखण्डिगोष्ठीर्वा । निरन्धो निरन्नोऽप्यन्यतः अन्नादिकमालषते वाञ्छति । दावं वनाग्नितुल्यं दुःखदं गृहं प्राप्य शोकाग्निना सन्तप्तः भवति

शूरैर्हृतस्वः क्व च निर्विण्णचेताः शोचन् विमुह्यन्नुपयाति कश्मलम् ।
क्वचिच्च गन्धर्वपुरं प्रविष्टः प्रमोदते निर्वृतवन्मुहूर्तम् ॥७॥
चलन् क्वचित्कण्टशर्कराङ्घ्रिर्नगारुरुक्षुर्विमना इवास्ते ।
पदे पदेऽभ्यन्तरवह्निनार्दितः कौटुम्बिकः क्रुध्यति वै जनाय ॥८॥
क्वचिन्निगीर्णोऽजगराहिना जनो नावैति किंचिद्विपिनेऽपविद्धः ।
दष्टः स्म शेते क्व च दन्दशूकैरन्धोऽन्धकूपे पतितस्तमिस्रे ॥९॥
कर्हि स्म चित्क्षुद्ररसान् विचिन्वंस्तन्मक्षिकाभिर्व्यथितो विमानः ।
तत्रातिकृच्छ्रात्प्रतिलब्धमानो बलाद्विलुम्पन्त्यथ तांस्ततोऽन्ये ॥१०॥
क्वचिच्च शीतातपवातवर्षप्रतिक्रियां कर्तुमनीश आस्ते ।
क्वचिन्मिथो विपणन् यच्च किंचिद्विद्वेषमृच्छत्युत वित्तशाठ्यात् ॥११॥
क्वचित्क्वचित्क्षीणधनस्तु तस्मिन् शय्यासनस्थानविहारहीनः ।
याचन् परादप्रतिलब्धकामः पारक्यदृष्टिर्लभतेऽवमानम् ॥१२॥
अन्योन्यवित्तव्यतिषङ्गवृद्धवैरानुबन्धो विवहन्मियश्च ।
अध्वन्यमुष्मिन्नुरुकृच्छ्रवित्तबाधोपसर्गैर्विहरन् विपन्नः ॥१३॥

यक्षवद् दुर्निवार्यै राजभिर्हृतमसुवत् दुस्त्यजं धनं यस्य स निर्विद्यते खिद्यते ॥ ६ ॥ अन्यैरपि शूरैः । स्वं धनम् । निर्विण्णं दुःखितम् । कश्मलं मूर्च्छाम् । गन्धर्वपुरवदस्थिरं बन्धुवर्गं प्रविष्टः निर्वृतवत् सुखीव प्रमोदते ॥ ७ ॥ कण्टकादिविद्धाङ्घ्रिरिव विघ्नैराक्रान्तः नगं नगवत् दुर्लङ्घ्यं गहत्कर्म विवाहादि आरुरुक्षुः कर्तुमिच्छुः । पदे पदे प्रतिक्षणम् । वह्निना जाठराग्निना पीडितः ॥ ८ ॥ अजगराहितुल्यया निद्रया ग्रस्तः सन् किञ्चिन्न वेत्ति । वनेऽपविद्धः प्रक्षिप्तः शव इवेति लुप्तोपमा । दन्दशूकैः सर्पसदृशैर्दुर्जनैर्दष्टस्ताडितः तमिस्रे नरकवत् दुःखदे अन्धकूपे मोहगर्ते पतितः शेते मूर्च्छितो भवति । यतोऽन्धः विवेकहीनः । स्मेति प्रसिद्धे ॥ ९ ॥ क्षुद्ररसान् तत्तुल्यान् परदारादीन् विचिन्वन् अन्वेषयन् तन्मक्षिकाभिस्तत्स्वामिभिः विमानः तिरस्कृतः सन् व्यथितो भवति । तत्र तदा अतिक्लेशन वित्तव्ययादिना यदि लब्धमानः प्राप्तपरदारसंभोगो भवति तदा तान् दारान् अन्ये विलुम्पन्ति अपहरन्ति । अथ पुनः ततोऽप्यधिकवित्तव्ययेन अन्ये इत्येवं व्यथितो भवतीत्यन्वयः । अत्र तानित्येव पाठो बहुसम्मत उपयुक्तश्चेति ॥ १० ॥ प्रतिक्रियां निवारणं कर्तुमनीशः असमर्थः प्रावरणाद्यभावेनेति शेषः । मिथो विपणन् परस्परं क्रयविक्रयादिना व्यवहरन् यत् किञ्चित् अत्यल्पमपि अपहरन् धनवञ्चनात् हेतोः विद्वेषमेव ऋच्छति प्राप्नोति । चकारोऽनुक्तसमुच्चयार्थः । उत एवार्थे ॥ ११ ॥ तस्मिन् संसारवने । आसनं कम्बलादि । स्थानं गृहम् । विहारो यानादिः । परात् अन्यस्मात् याचमानोऽपि यदाऽलब्धधनो भवति तदा परकीये दृष्टिरभिलाषो यस्य सः अवमानं बन्धनताडनादिकं च ॥१२॥ इत्थं परस्परं वित्तस्य व्यतिषङ्गेण अध्वनि ग्रहणासक्त्या वृद्धो वैरानुबन्धो वैरपरम्परा यस्य तथाभूतोऽपि मिथो विवहन् विवाहादि कुर्वन् अस्मिन् वस्तुनि विहरन् भ्रमन् विपन्नो मृतप्रायो भवति । कैः । उरुकृच्छ्रैः नानाक्लेशैः वित्तनाशैः उपसर्गैः द्वेषादिभिश्च ॥ १३ ॥

तांस्तान् विपन्नान् स हि तत्र तत्र विहाय जातान् परिगृह्य सार्थः।
आवर्ततेऽद्यापि न कश्चिदत्र वीराध्वनः पारमुपैति योगम् ॥१४॥
मनस्विनो निर्जितदिग्गजेन्द्रा ममेति सर्वे भुवि बद्धवैराः।
मृधे शयीरन्न तु तद् व्रजन्ति यन्न्यस्तदण्डो गतवैरोऽभियाति ॥१५॥
प्रसज्जति क्वापि लताभुजाश्रयस्तदाश्रयाव्यक्तपदद्विजस्पृहः।
क्वचित्कदाचिद्धरिचक्रतस्त्रसन् सख्यं विधत्ते बककङ्कगृध्रैः ॥१६॥
तैर्वञ्चितो हंसकुलं समाविशन्न रोचयन् शीलमुपैति वानरान्।
तज्जातिरासेन सुनिर्वृतेन्द्रियः परस्परोद्वीक्षणविस्मृतावधिः ॥१७॥
द्रुमेषु रंस्यन् सुतदारवत्सलो व्यवायदीनो विवशः स्वबन्धने।
क्वचित्प्रमादात्गिरिकन्दरे पतन् वल्लीं गृहीत्वा गजभीत आस्थितः ॥१८॥
अतः कथंचित्स विमुक्त आपदः पुनश्च सार्थं प्रविशत्यरिन्दम।
अध्वन्यमुष्मिन्नजया निवेशितो भ्रमञ्जनोऽद्यापि न वेद कश्चन ॥१९॥
रहूगण त्वमपि ह्यध्वनोऽस्य संन्यस्तदण्डः कृतभूतमैत्रः।
असज्जितात्मा हरिसेवया शितं ज्ञानासिमादाय तरातिपारम् ॥२०॥

हे वीर स हि सार्थः जीवलोकः विपन्नान् मृतान् पित्रादीन् विहाय जातान् पुत्रादीन् आदाय अद्यापि अत्रैव भवाऽध्वनि आवर्तते भ्रमति। योगं भक्तियोगं तत्प्राप्यं हरिं च कश्चदपि न प्राप्नोति। कीदृशम्। अध्वनः पारप्रापकम्। अत्र सार्थमध्ये कश्चिदपि पारप्रापकं भक्तियोगं वेत्यन्वयः ॥ १४ ॥ ये मनस्विनः ये च बद्धवैरा राजानश्च ते सर्वे मृधे विवादे युद्धे च शयीरन् मृता एव नतु तत् हरिपदमव्रजन् यत् न्यस्तदण्डोऽभयदो भक्तो निर्भयं याति ॥ १५ ॥ क्वापि पुनरपि प्रसज्जति विषयासक्तिं करोति। लतावत्सुकुमाराः स्त्रीणां भुजास्तदाश्रयः सन्। तदाश्रया भुजलताश्रया अव्यक्तपदा अस्फुटाक्षराः स्त्रीपुंसाभ्यां जातत्वात् द्विजा बालकास्तेषु स्पृहा यस्य तादृशो भूत्वा। पक्षे द्विजाः पक्षिणश्च। हरिचक्रतः सिंहसंघतुल्यात् कालचक्रात् त्रसन् बिभ्यत् बकादिवत् वञ्चकैः क्रूरैश्च पाखण्डिभिः सह ॥१६॥ हंसवत्सारूपकृष्णग्राहि भक्तकुलम् तेषां शीलं भजनादिकमरोचयन् वानरानिव इन्द्रियचपलान् कामिनः। तज्जातिवत् रासेन अनुक्षणं स्त्रिया सह क्रीडयैव प्रसन्नमनाः सन्। परस्परेति रतिसमये। विस्मृतः अवधिः मरणकालः येन ॥ १७ ॥ द्रुमवत्केवलदृष्टफलेषु गृहेषु रंस्यन् विहरन्। व्यवायेन मैथुनेच्छया। प्राप्ते स्वबन्धने विवशः तन्निवारणाशक्त इत्यर्थः। गिरिकन्दरवदतिभयानके रोगादौ पतन् वर्तमानः तत्रत्यगजतुल्यात् मृत्योर्भीतः सन् वल्लीवत् देहधारकं प्राचीनं कर्म अवलम्ब्य अवस्थितो भवति ॥ १८ ॥ अतः संसाररूपाया आपदः कथञ्चित् सत्सङ्गादिना विमुक्तोऽपि पुनः सार्थं प्रवृत्तिमार्गिणं जनसमूहमाश्रयति न वेद श्रीकृष्णमिति शेषः। यद्वा। भवाध्वनि निवेशितोऽस्मीति न वेद ॥ १९ ॥ हे रहूगण! त्वमपि अध्वनि निवेशितः इत्यनुषङ्गः अतोऽस्य अध्वनः पारमतितर[1] गच्छ। शितं तीक्ष्णीकृतं ज्ञानखड्ग-

---

१. छन्दसि परेऽपि इत्यतेः परत्वम्।

राजोवाच

अहो नृजन्माखिलजन्मशोभनं किं जन्मभिस्त्वपरैरप्यमुष्मिन् ।
न यद् हृषीकेशयशःकृतात्मनां महात्मनां वः प्रचुरः समागमः ॥२१॥
न ह्यद्भुतं त्वच्चरणाब्जरेणुभिर्हतांहसो भक्तिरधोक्षजेऽमला ।
मौहूर्तिकाद्यस्य समागमाच्च मे दुस्तर्कमूलोऽपहतोऽविवेकः ॥२२॥
नमो महद्भ्योऽस्तु नमः शिशुभ्यो नमो युवभ्यो नम आवटुभ्यः ।
ये ब्राह्मणा गामवधूतलिङ्गाश्चरन्ति तेभ्यः शिवमस्तु राज्ञाम् ॥२३॥

श्रीशुक उवाच

इत्येवमुत्तरामातः स वै ब्रह्मर्षिसुतः सिन्धुपतय आत्मसतत्त्वं विगणयतः परानुभावः परमकारुणिकतयोपदिश्य रहूगणेन सकरुणमभिवन्दितचरण आपूर्णार्णव इव निभृतकरणोर्म्याशयो धरणिमिमां विचचार ॥ २४ ॥ सौवीरपतिरपि सुजनसमवगतपरमात्मसतत्त्व आत्मन्यविद्याध्यारोपितां च देहात्ममतिं विससर्ज । एवं हि नृप भगवदाश्रिताश्रितानुभावः ॥ २५ ॥

राजोवाच

यो ह वा इह बहुविदा महाभागवत त्वयाभिहितः परोक्षेण वचसा जीवलोकभवाध्वा स ह्यार्यमनीषया कल्पितविषयो नाञ्जसाऽव्युत्पन्नलोकसमधिगमः । अथ तदेवैतद् दुरवगमं समवेतानुकल्पेन निर्दिश्यतामिति ॥ २६ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां पञ्चमस्कन्धे त्रयोदशोऽध्यायः ॥ १३ ॥

मादाय असञ्जितात्मा विषयानासक्तचित्तः सन् । मैत्रं मित्रभावः ॥ २० ॥ अखिलजन्मसु । अमुष्मिन् स्वर्गेऽपि अपरैः देवादिजन्मभिः किं न किमपि फलं । यतो यत्र वो युष्माकं प्रचुरोऽधिकतरः समागमो न भवति । यशसा चरित्रेण गुणगानेन वा शोधितचित्तानाम् ॥ २१ ॥ उपासितैः रेणुभिर्हतपापस्य मे भगवति भक्तिरभूत् इत्येतद्भुतं नहि कुतः यस्य तव मुहूर्तमात्रभवात् सङ्गात् मेऽविवेको नष्ट इति प्रत्यक्षम् । दुस्तर्केण बद्धमूलोऽपि ॥ २२ ॥ किं बहुना बटवो ब्रह्मचारिणस्तानभिव्याप्य सर्वेभ्योऽपि नमः । ये गां पृथ्वीं विचरन्ति तेभ्यः शिवमेवाऽस्तु न निग्रह इति प्रार्थना ॥ २३ ॥ हे उत्तरामातः परीक्षित् । स सुतः श्रीभरतः विगणयते[1] न गणयते तिरस्कुर्वतेऽपि सिन्धुपतये रहूगणाय इत्येवम् आत्मनः सतत्त्वं स्वरूपमुपदिश्य इमां पृथ्वीं विचचारेत्यन्वयः । निभृताः शान्ताः करणादयो यस्य । करणानि इन्द्रियाणि । ऊर्मयो वासनाः । आशयो मनः । 'शीलं सतत्त्वं संसिद्धिः' इति स्वरूपनामसु हैमः ॥ २४ ॥ सौवीरो देशस्तस्य पती रहूगणः सुजनात् भरतात् सम्यक् ज्ञातं परमात्मस्वरूपं येन सः । आत्मनि स्वस्मिन् । भगवदाश्रितो भरतस्तदाश्रितो रहूगणस्तस्य प्रभावः सद्योऽहङ्कारत्यागलक्षणः ॥ २५ ॥ हे महाभागवत । बहुविदा त्वया यो ह वै प्रसिद्धः भवाध्वा परोक्षेण वणिग्रूपकेण कथितः स आर्यस्य अतिविदुष एव बुद्ध्या कल्पितविषयः गम्यज्ञानः न साक्षात् अल्पज्ञजनवेद्यो भवति अथ अतः दुरवगमं दुर्ज्ञेयं तदेव एतत् भवाध्वरूपकं समवेतानुकल्पेन समवेतेन समुचितेन मद्बुद्धिगम्येन अनुकल्पेन सरलतम व्याख्यानेन निर्दिश्यतां प्रतिपाद्यतामिति राजोवाचेत्यन्वयः ॥ २६ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे गूढार्थदीपिन्यां त्रयोदशोऽध्यायः ।

---

१. अत्र चतुर्थ्यन्तपाठः लेखकप्रमादादेकारश्च्युतः ।

अथ चतुर्दशोऽध्यायः

स होवाच

य एष देहात्ममानिनां सत्त्वादि गुणविशेषविकल्पितकुशलाकुशलसमवहारविनिर्मित-विविधदेहावलिभिर्वियोगसंयोगाद्यनादिसंसारानुभवस्य द्वारभूतेन षडिन्द्रियवर्गेण तस्मिन्दुर्गाध्ववदसुगमेऽध्वयन्यापातित ईश्वरस्य भगवतो विष्णोर्वशवर्तिन्या मायया जीवलोकोऽयं यथा वणिक्सार्थोऽर्थपरः स्वदेहनिष्पादितकर्मानुभवः श्मशानवदशिवतमायां संसाराटव्यां गतो नाद्यापि विफलबहुप्रतियोगेहस्तत्तापोपशमनीं हरिगुरुचरणारविन्दमधुकरानुपदवीमवरुन्धे यस्यामु ह वा एते षडिन्द्रियनामानः कर्मणा दस्यव एव ते ॥ १ ॥ तद्यथा पुरुषस्य धनं यत्किंचिद्धर्मौपयिकं बहुकृच्छ्राधिगतं साक्षात्परमपुरुषाराधनलक्षणो योऽसौ धर्मस्तं तु साम्परायं उदाहरन्ति । तद्धर्म्यं धनं दर्शनस्पर्शनश्रवणास्वादनावघ्राणसंकल्पव्यवसायगृहग्राम्योपभोगेन कुनाथस्याजितात्मनो यथा सार्थस्य विलुम्पन्ति ॥ २ ॥ अथ च यत्र कौटुम्बिका दारापत्यादयो नाम्ना कर्मणा वृकसृगाला एवानिच्छतोऽपि कदर्यस्य कुटुम्बिन उरणकवत्संरक्ष्यमाणं मिषतोऽपि हरन्ति ॥ ३ ॥ यथा ह्यनुवत्सरं कृष्यमाणमप्यदग्धबीजं क्षेत्रं पुनरेवावपनकाले गुल्मतृणवीरुद्भिर्गह्वरमिव भवत्येवमेव गृहाश्रमः कर्मक्षेत्रं यस्मिन्न हि कर्माण्युत्सीदन्ति यदयं कामकरण्ड एष आवसथः ॥ ४ ॥

चतुर्दशे भवाटव्या व्याख्यानं सारगर्भितम् ।
सर्वसाधारणार्थाय मूलतः क्रियते स्फुटम् ॥ १ ॥

यः परीक्षिता पृष्टः स शुकः ह स्पष्टमुवाचेति सूतोक्तिः । य एष प्रसिद्धः सार्थो वणिक्समूहः अर्थोपार्जनपरः सन् दुर्गाध्ववत् तस्मिन् असुगमेऽध्वनि गहने वनमार्गे यथा आपतितो भवति तथाऽयं जीवलोकः षडिन्द्रियवर्गेण द्वारभूतेन मायया हेतुभूतया संसाराटव्यां कर्ममार्गे गतः प्रविष्टः अद्यापि हरिरेव गुरुस्तस्य चरणकमले मधुकरा इव आसक्ता भक्तास्तेषां पदवीं भक्तिमार्गं नावरुन्धे न प्राप्नोतीत्यन्वयः । कस्य द्वारभूतेन सत्त्वादिभिर्विशेषेण विभक्तानि पुण्यपापतद्विमिश्राणि च कर्माणि तैर्विनिर्मिताभिः देहावलिभिः योऽवियोगादिलक्षणः अनादिः संसारस्तदनुभवस्य । कथंभूतः । कर्मणां फलद्वारेणानुभवो यस्य । निष्फला बहुविघ्नयुक्ता ईहा चेष्टा यस्य सः ॥१॥ यस्यामिमे इति व्याख्याति। उहं वै उपेक्षायाम् । योऽसौ धर्मस्तं तु साम्पराये परलोकनिमित्तमुदाहरन्ति विज्ञाः तत् तस्मात् बहुक्लेशेन प्राप्तं पुरुषस्य यत् किञ्चित् धनं तत् साक्षात् यथा यथावत् निर्विवादं धर्मोपयोगि एव अतस्तत्पूर्वोपात्तं धर्म्यं धनं कुबुद्धेरजितेन्द्रियस्य दर्शनस्पर्शनादिद्वारा गेहीयविषयभोगेन षड् दस्यवश्चौराः तथा विलुम्पन्ति अपहरन्ति तथा यथा सार्थस्य वणिक्समूहस्य असावधानचित्तस्य । सङ्कल्पो मनसः व्यवसायो बुद्धेश्च व्यापारः ॥३॥ गोमायव इत्येतद् व्याख्याति—अथ च अन्यच्च यत्र भवाटव्यां कदर्यस्य अति

तत्र गतो दंशमशकसमापसदैर्मनुजैः शलभशकुन्ततस्करमूषकादिभिरुपरुध्यमानबहिःप्राणः क्वचित्परिवर्तमानोऽस्मिन्नध्वन्यविद्याकामकर्मभिरुपरक्तमनसानुपपन्नार्थं नरलोकं गन्धर्वनगरमुपपन्नमिति मिथ्यादृष्टिरनुपश्यति ॥ ५ ॥ तत्र च क्वचिदातपोदकनिभान् विषयानुपधावति पानभोजनव्यवायादिव्यसनलोलुपः ॥ ६ ॥ क्वचिच्चशेषदोषनिषदनं पुरीषविशेषं तद्वर्णगुणनिर्मितमतिः सुवर्णमुपादित्सत्यग्निकामकातर इवोल्मुकपिशाचम् ॥ ७ ॥ अथ कदाचिन्निवासपानीयद्रविणाद्यनेकात्मोपजीवनाभिनिवेश एतस्यां संसाराटव्यामितस्ततः परिधावति ॥ ८ ॥ क्वचिच्च वात्यौपम्या प्रमदयाऽऽरोहमारोपितस्तत्कालरजसा रजनीभूत इवासाधुमर्यादो रजस्वलाक्षोऽपि दिग्देवता अतिरजस्वलमतिर्न विजानाति ॥ ९ ॥ क्वचित्सकृदवगतविषयवैतथ्यः स्वयं पराभिध्यानेन विभ्रंशितस्मृतिस्तयैव मरीचितोयप्रायांस्तानेवाभिधावति ॥ १० ॥ क्वचिदुलूकझिल्लीस्वनवदतिपरुषरभसाटोपं प्रत्यक्षं परोक्षं वा रिपुराजकुलनिर्भर्त्सितेनातिव्यथितकर्णमूलहृदयः ॥ ११ ॥ स यदा दुग्धपूर्वसुकृतस्तदा कारस्करकाकतुण्डाद्यपुण्यद्रुमलताविषोदपानवदुभयार्थशून्यद्रविणान् जीवन्मृतान् स्वयं जीवन्म्रियमाण

लोभिनः प्रयत्नेन संरक्ष्यमाणमपि धनं मिषतः पश्यतः एव दारापत्यादयोऽपहरन्ति यथा उरणकं मेषं वृकादयस्तद्वत् ॥ ४ ॥ प्रभूतेत्यादि व्याख्याति गद्यचतुष्टयेन । हलादिना कृष्यमाणमपि काले बीजवपनसमये नोत्सीदन्ति मूलतो न नश्यन्ति । यत् यस्मात् योऽयमावसथः स गृहाश्रमः एव कामानां करण्डः वासनापेटिकेत्यर्थः ॥ ५ ॥ तत्र गृहाश्रमे । दशादिसमापसदैः तत्तुल्यैर्नीचैः । बहिःप्राणो वित्तम् । 'वित्तं बहिश्चराः प्राणाः' इत्यभियुक्तोक्तेः । अस्मिन् अध्वनि परिभ्रमन् अविद्यादिभिरुपरक्तेन व्याप्तेन मनसा गन्धर्वनगरतुल्यम् अनुपपन्नार्थमनित्यमपि नरलोकमुपपन्नं नित्यमेव अनुपश्यति । यतो मिथ्येति ॥ ६ ॥ प्रशब्देनान्यार्थमपि सूचयति । तत्र च गन्धर्वपुरे । आतपोदकं मृगतृष्णाजलं तत्सदृशान् । व्यवायो मैथुनम् ॥ ७ ॥ निषदनं स्थानम् । पुरीषम् अग्नेर्विष्ठारूपं । सुवर्णमादातुमिच्छति तद्वर्णेन सुवर्णवर्णेन रजोगुणेन निर्मिता सुवर्णार्थं प्रवर्तिता मतिर्यस्य । ज्वलदग्निमुखपिशाचम् ॥८॥ निवासेत्यादि व्याख्याति द्वाभ्याम्—निवासादिषु अनेकेषु आत्मन उपजीव्येषु स्वजीवनसाधनेषु अभिनिवेशो रागो यस्य सः ॥९॥ वात्यया सह औपम्यं यस्यास्तया चाञ्चल्येन चक्रवायुतुल्यया । आरोहमङ्कम् । तत्काले यद्रजः रजस्तुल्यः कामवेगस्तेन रजस्वलाक्षः नष्टविवेकः अतोवरजोव्याप्तमतिश्च अत एव असाधुमर्यादः त्यक्तशास्त्रमर्यादः रजनीभूता इव अदृश्या दिग्देवताः सूर्याद्या न विजानाति । यथा धूलिव्याप्तनेत्रो दिशस्तद्वत् ॥ १० ॥ अदृश्येत्यादि पद्यं त्रिभिर्व्युत्क्रमेण व्याख्याति । क्वचित् स्वयमेकवारं ज्ञातविषयनैष्फल्यः तदपि पुनः पुनः तानेव विषयान् अभिधावति । पराभिध्यानेन देहचिन्तया विभ्रंशिता आत्मविषया स्मृतिर्यस्य सः ॥ ११ ॥ स्वनवत् अतिकठोरतीव्रकोपावेशपूर्वकं रिपूणां राजकुलस्य च भर्त्सितेन व्यथितं कर्णमूलं हृदयं च यस्य । प्रत्यक्षकटुवाक्यप्रयोक्तृ राजकुलमुलूकस्थानीयं परोक्षकटुवाक्यप्रयोक्तृ रिपुकुलं झिल्लीस्थानीयमिति विवेचनीयम् । स भवाटव्यां प्रविष्टः । दुग्धमुपभुक्तम् । कारस्करो विषतिन्दुकः कुचिला इति काकतुण्डः कौआठोड़ी इति तदादयो येऽपुण्यवृक्षा लताश्च

उपधावति ॥ १२ ॥ एकदाऽसत्प्रसङ्गान्निकृतमतिर्व्युदकस्रोतःस्खलनवदुभयतोऽपि दुःखदं पाखण्डमभियाति ॥ १३ ॥ यदा तु परबाधयान्ध आत्मने नोपनमति तदा हि पितृपुत्रबर्हिष्मतान् पितृपुत्रान् वा स खलु भक्षयति ॥ १४ ॥ क्वचिदासाद्य गृहं दाववत्प्रियार्थविधुरमसुखोदर्कं शोकाग्निना दह्यमानो भृशं निर्वेदमुपगच्छति ॥ १५ ॥ क्वचित्कालविषमितराजकुलरक्षसापहृतप्रियतमधनासुः प्रमृतक इव विगतजीवलक्षण आस्ते ॥१६॥ कदाचिन्मनोरथोपगतपितृपितामहाद्यसत्सदिति स्वप्ननिर्वृतिलक्षणमनुभवति ॥ १७ ॥ क्वचिद् गृहाश्रमकर्मचोदनातिभरगिरिमारुरुक्षमाणो लोकव्यसनकर्षितमनाः कण्टकशर्कराक्षेत्रं प्रविशन्निव सीदति ॥ १८ ॥ क्वचिच्च दुःसहेन कायाभ्यन्तरवह्निना गृहीतसारः स्वकुटुम्बाय क्रुध्यति ॥ १९ ॥ स एव पुनर्निद्राजगरगृहीतोऽन्धे तमसि मग्नः शून्यारण्य इव शेते नान्यत्किंचन वेद शव इवापविद्धः ॥ २० ॥

कदाचिद्भग्नमानदंष्ट्रो दुर्जनदन्दशूकैरलब्धनिद्राक्षणो व्यथितहृदयेनानुक्षीयमाणविज्ञानोऽन्धकूपेऽन्धवत्पतति ॥२१॥ कर्हि स्म चित्काममधुलवान् विचिन्वन् यदा परदारपरद्रव्याण्यवरुन्धानो राज्ञा स्वामिभिर्वा निहतः पतत्यपारे निरये ॥२२॥ अथ च तस्मादुभयथापि

विषकूपांश्च तत्तुल्यान् ऐहिकपारलौकिकप्रयोजनशून्यधनान् उपधावति द्रव्यार्थं सेवते। स्वयमपि जीवन्मृतः ॥ १२ ॥ क्वचिद्द्वितोया इति व्याख्याति—गद्यचतुष्टयेन। निकृतमतिभ्रष्टमतिः निकृतः स्याद्विप्रकृतः' इत्यमरात्। जलशून्यनदीपतनवत् तत्र पाते यथा पूर्वं शिरःस्फोटः पश्चाद्वेदना च एवमुभयत्रापि दुःखदं पाखण्डं पाखण्डिमार्गम् ॥ १३ ॥ परबाधया परपीडाप्रदजीविकयाऽपि अन्धोऽन्नं नोपनमति न मिलति। पितृपुत्रयोर्बर्हिपि क्षेत्रे भोग्यतया तिष्ठन्तीति तान् पितॄन् पुत्रांश्च स खलु भक्षयति तदाच्छिद्य पीडयतीत्यर्थः। बर्हिष्ठानिति पाठः प्राचीनतमः सुगमश्च। बर्हिष्मतः इति पाठे बर्हिः कुशस्तद्वत् अतितुच्छमपि वस्तु तद्वतः। शेषं पूर्ववत् ॥ १४ ॥ दाववत् वनाग्नितुल्यं गृहं प्राप्य। प्रियार्थैर्भोग्यपदार्थैः रहितं दुःखपरम्परायुक्तं च। निर्वेदं विषादं प्राप्नोति ॥ १५ ॥ कालेन विषमितं प्रतिकूलतां प्राप्तं यत् राजकुलं तदेव रक्षस्तेन अपहृताः प्रियतमधनरूपा असवः प्राणा यस्य। जीवलक्षणानि हर्षादीनि। प्रमृतकः जीवन्मृतक इव। प्रकर्षेण मृते मरणे एव कं सुखं यस्येति वा। अनेन शूरैर्ह्रस्व इत्यपि व्याख्यातम् ॥ १६ ॥ क्वचिच्च गन्धर्वेति व्याख्याति—असदेव सदिति मत्वा स्वप्ने यथा निर्वृतिरानन्दस्तल्लक्षणं सुखम्। पूर्वं तु गन्धर्वनगरवदघटमानं दर्शनमत्र तु तन्निमित्तसुखासक्तिरिति भेदः ॥ १७ ॥ चलन् क्वचिदिति व्याख्याति द्वाभ्याम्। गृहाश्रमे याः चोदना विधयो विवाहादयस्तासामतिविस्तारः स एव गिरिस्तमारुरुक्षन् तदन्तं प्राप्तुमिच्छन् सीदति क्लिश्यति। क्षेत्रं प्रविशन् नगमारुरुक्षुर्यथा तद्वत्। शर्कराः पाषाणकणाः ॥ १८ ॥ सारो बलं धैर्यं वा ॥ १९ ॥ क्वचिन्निगीर्ण इत्येतद्व्याख्याति द्वाभ्याम्। यो दिवसे नानाव्यापारवान् स एव रात्रौ। शून्यारण्य इव अन्धे तमसि महामोहे मग्नः शेते। यथा अपविद्धः स्वजनैस्त्यक्तः वने शवः शेते तद्वत् ॥ २० ॥ दुर्जनरूपैः सर्पैर्भग्ना अभिमानदंष्ट्रा यस्य सः अन्धकूपे दुःखगर्ते पतति। यथाऽन्धकूपेऽन्धः। क्षणोऽवसरः ॥ २१ ॥ कामो विषयोपभोगस्तेन मधुलवाः सुखलेशास्तान् अन्वेषयन् यदा परदारादीन् स्वीकुर्वाणो भवति तदा तैर्निहतः निरये इह कारागारे परत्र नरके च पतति ॥ २२ ॥ यस्मात्कर्मफलमवश्यं भुज्यते तस्माद्धेतोः। अथ

हि कर्मास्मिन्नात्मनः संसारापवनमुदाहरन्ति ॥२३॥ मुक्तस्ततो यदि बन्धाद्देवदत्त उपाच्छिनत्ति तस्मादपि विष्णुमित्र इत्यनवस्थितिः ॥२४॥ क्वचिच्च शीतवाताद्यनेकाधिदैविकभौतिकात्मीयानां दशानां प्रतिनिवारणेऽकल्पो दुरन्तचिन्तया विषण्ण आस्ते ॥२५॥ क्वचिन्मिथो व्यवहरन् यत्किंचिद्धनमन्येभ्यो वा काकिणिकामात्रमप्यपहरन् यत्किंचिद्वा विद्वेषमेति वित्तशाठ्यात् ॥२६॥ अध्वन्यमुष्मिन्निम उपसर्गास्तथा सुखदुःखरागद्वेषभयाभिमानप्रमादोन्मादशोकमोहलोभमात्सर्येर्ष्यावमानक्षुत्पिपासाधिव्याधिजन्मजरामरणादयः ॥२७॥ क्वापि देवमायया स्त्रिया भुजलतोपगूढः प्रस्कन्नविवेकविज्ञानो यद्विहारगृहारम्भाकुलहृदयस्तदाश्रयावसक्तसुतदुहितृकलत्रभाषितावलोकविचेष्टितापहृतहृदय आत्मानमजितात्माऽपारेऽन्धे तमसि प्रहिणोति ॥२८॥ कदाचिदीश्वरस्य भगवतो विष्णोश्चक्रात्परमाण्वादिद्विपरार्धापवर्गकालोपलक्षणात्परिवर्तितेन वयसा रंहसा हरत आब्रह्मतृणस्तम्बादीनां भूतानामनिमिषतो मिषतां वित्रस्तहृदयस्तमेवेश्वरं कालचक्रनिजायुधं साक्षाद्भगवन्तं यज्ञपुरुषमनादृत्य पाखण्डदेवताः कङ्कगृध्रबकवटप्राया आर्यसमयपरिहृताः साङ्केत्येनाभिधत्ते ॥२९॥ यदा पाखण्डिभिरात्मवञ्चितैस्तैरुरुवञ्चितो ब्रह्मकुलं समावसंस्तेषां शीलमुपनयनादिश्रौतस्मार्तकर्मानुष्ठानेन भगवतो

कर्मप्रवृत्यनन्तरमेव उभयथाऽपि पुण्यप्रकारेण पापप्रकारेण च अस्मिन् जगति आत्मनो जीवस्य कर्म संसारस्य आवपनं जन्मक्षेत्रमुदाहरन्ति मुनय इति शेषः ॥ २३ ॥ तत्रातिकृच्छ्रादिति व्याख्याति । यदि स्वामिदत्तबन्धादेर्मुक्तः सन् तद्दारान् भोक्तुं प्राप्नोति तदा स तस्मात् उपाच्छिनत्ति आहरति ॥२४॥ क्वचिच्च शीतेति व्याख्याति द्वाभ्याम् । शीतादयोऽनेका आधिदैविकाद्या या दशा दुःखावस्थास्तासाम् । अकल्पोऽसमर्थः । विषण्णः दुःखितः ॥ २५ ॥ यत्किञ्चिदपि धनं मिथो वाणिज्यादौ व्यवहरन् काकिणिका विंशतिकपर्दिकामात्रं ततोऽपि यत्किञ्चित् न्यूनं वा अन्येभ्योऽपहरन् विद्वेषं प्राप्नोति ॥ २६ ॥ अध्वनि संसारमार्गे इमे उरुकृच्छ्रवित्तबाधादयस्तथा सुखादयश्च उपसर्गाः सन्तीति शेषः । अत्र क्वचित्पुनरुक्तिर्विषयदार्ढ्यार्था ॥ २७ ॥ प्रसज्जतीत्यादि क्रमेण व्याख्याति । मायया मायारूपया । भुजलताभ्यामालिङ्गितः । प्रस्कन्न लुप्तम् । यत् यस्याः स्त्रियाः । तदाश्रये स्त्रीगृहे आसक्तसुतादीनां भाषितादिभिरपहृतं हृदयं यस्य सः । अन्धे तमसि दुःखगर्ते आत्मानं प्रक्षिपति । कलत्रं पुत्रवधूः ॥ २८ ॥ ईश्वरस्य चक्रात् वित्रस्तहृदयोऽथापि तमीश्वरमनादृत्य साङ्केत्येन पाखण्डसङ्केतशास्त्रेण पाखण्डदेवता नास्तिकशिरोमणीन् अभिधत्ते भजतीत्यन्वयः । कथंभूताः । कङ्कादिवद्वञ्चनपराः । पुनः । आर्यसमयात् वैदिकसिद्धान्तात् बहिष्कृताश्च । कथंभूतात् चक्रात् । परमाण्वादिर्द्विपरार्द्धपर्यन्तः यः कालः तेनोपलक्ष्यते तथा । पुनश्च । परिवर्तितेन वयसा बाल्यादिना ब्रह्मादितृणपर्यन्तानां भूतानां मिषतां पश्यतामपि तेषां रंहसाऽतिवेगेनायुर्हरतः । कर्मणि षष्ठ्यो वा । अनिमिषतः निमेषमप्यकुर्वतश्चक्रात् ॥ २९ ॥ आत्मना वञ्चितैः । स्वकल्पितकुपथगामित्वात् । आत्मा स्वात्मा वञ्चितो यैरिति वा । उरु अधिकम् । तेषां यच्छीलं भगवत आराधनमेव तदरोचयन् शूद्रवत् वर्तते । यस्य आचारे अशुद्धितः अधिकाराभावात् वानरजातेरिव केवलं मिथुनीभावः स्त्रीसंभोगः कुटुम्बभरणं च तच्छूद्रकुलं भजते इत्यन्वयः ॥ ३० ॥

यज्ञपुरुषस्याराधनमेव तदरोचयन् शूद्रकुलं भजते निगमाचारेऽशुद्धितो यस्य मिथुनीभावः कुटुम्बभरणं यथा वानरजातेः ॥३०॥ तत्रापि निरवरोधः स्वैरेण विहरन्नतिकृपणबुद्धिरन्योन्यमुखनिरीक्षणादिना ग्राम्यकर्मणैव विस्मृतकालावधिः ॥३१॥ क्वचिद् द्रुमवदैहिकार्थेषु गृहेषु रंस्यन् यथा वानरः सुतदारवत्सलो व्यवायक्षणः ॥३२॥

एवमध्वन्यवरुन्धानो मृत्युगजभयात्तमसि गिरिकन्दरप्राये ॥३३॥ क्वचिच्छीतवाताद्यनेकदैविकभौतिकात्मीयानां दुःखानां प्रतिनिवारणेऽकल्पो दुरन्तविषयविषण्ण आस्ते ॥३४॥ क्वचिन्मिथो व्यवहरन् यत्किंचिद्धनमुपयाति वित्तशाठ्येन ॥३५॥ क्वचित्क्षीणधनः शय्यासनाशनाद्युपभोगविहीनो यावदप्रतिलब्धमनोरथोपगतादानेऽवसितमतिस्ततस्ततोऽवमानादीनि जनादभिलभते ॥३६॥ एवं वित्तव्यतिषङ्गविवृद्धवैरानुबन्धोऽपि पूर्ववासनया मिथ उद्वहत्यथापवहति ॥३७॥ एतस्मिन् संसाराध्वनि नानाक्लेशोपसर्गबाधित आपन्नविपन्नो यत्र यस्तमु ह वावेतरस्तत्र विसृज्य जातं जातमुपादाय शोचन्मुह्यन् बिभ्यद्विवदन् क्रन्दन् संहृष्यन् गायन्नह्यमानः साधुवर्जितो नैवावर्ततेऽद्यापि यत आरब्ध एष नरलोकसार्थो यमध्वनः पारमुपदिशन्ति ॥३८॥ यदिदं योगानुशासनं न वा एतदवरुन्धते यन्न्यस्तदण्डा मुनय उपशमशीला उपरतात्मानः समवगच्छन्ति ॥३९॥ यदपि दिगिभजयिनो यज्विनो ये वै राजर्षयः किं तु परं मृधे शयीरन्नस्यामेव ममेयमिति कृतवैरानुबन्धायां विसृज्य स्वयमुपसंहृताः ॥४०॥ कर्मवल्लीमवलम्ब्य तत आपदः कथंचिन्नरकाद्विमुक्तः पुनरप्येवं संसाराध्वनि वर्तमानो नरलोकसार्थमुपयाति एवमुपरि गतोऽपि ॥४१॥

तत्रापि शूद्रकुलसङ्गतावपि निरवरोधः प्रतिबन्धरहितः स्वैरेण स्वेच्छया । ग्राम्यकर्मणा मैथुनेन विस्मृतमृत्युकालः ॥ ३१ ॥ ऐहिकार्थेषु गृहेषु रममाणः व्यवाये मैथुने एव क्षणोऽवसरो यस्य न सत्सङ्गादौ तथाभूतः ॥ ३२ ॥ अवरुन्धानः विविधदुःखानि प्राप्नुवन् तमसि रोगादिगर्ते पततीति शेषः ॥ ३३ ॥ अकल्पोऽसमर्थः । दुरन्तविषयचिन्तया विषण्णो दुःखितः ॥ ३४ ॥ शाठ्येन लोभेन धनमुपयाति परेभ्योऽपहरति ॥ ३५ ॥ अप्रतिलब्धमप्राप्तं यन्मनोरथेनोपगतं वाञ्छितं धनादि तस्यादाने सम्पादने निश्चितमतिः सन् । यावत्तावदवमानादीन्येव । अपरिवार्ये ॥ ३६ ॥ व्यतिषङ्गेण ऋणादानप्रत्यर्पणादिसंबन्धेन विवृद्धो वैरानुबन्धो वैरपरम्परा यस्य सः उद्वहति विवाहादिसंबन्धं करोति अथ पुनः वैरानुसन्धानेन च तमपवहति त्यजति च ॥ ३७ ॥ उपसर्गैः भूताद्युपद्रवैः । आपन्नविपन्नो आपद्ग्रस्तो मृतो वा यत्र यः तमु तं तु तत्र वाव तत्रैव ह दुःखेन इतरः विसृज्य जातं जातं पुत्रादिकमुपादाय नह्यमानः बध्यमानः यत आरब्धः प्रचलितोऽयमध्वा यं च अध्वनः पारं पारप्रापकं वदन्ति तं भगवन्तं प्रत्येष नैव आवर्तते इत्यन्वयः । कुतः । साधुवर्जितः भक्तसङ्गरहितः । नरलोके सार्थो जीवसमूहः ॥ ३८ ॥ यदिति युग्मकम् । यदिदं योगानुशासनं भक्तियोगोपदेशं यच्च तद्गम्यं परं पदं यत् मुनयः समवगच्छन्ति तदेतत् ते नवै नैव अवरुन्धते नैव प्राप्नुवन्ति । ते के । यद्यपि निर्जितदिग्गजेन्द्रा वै प्रसिद्धा ये राजर्षयः किन्तु तथापि यां भूमिं विसृज्य स्वयमुपसंहृता मृताः सन्तः परं केवलं मृधे युद्धभूमौ शयीरन् ते । एतेन मनस्विन इत्यादि व्याख्यातम् । उपरतः विषयेभ्यो निवृत्त आत्मा मनो येषां ॥३९।४०॥ वल्लीवत् लतावत् विस्तृतं प्राचीनं कर्माश्रित्य आपद्रूपान्नरकात् । आवर्तमानः भ्रमन् नरलोके सार्थं जीवसमूहमाश्रयति । एवमुपरि स्वर्गे गतोऽपि पुनरावर्तते ॥ ४१ ॥

तस्येदमुपगायन्ति—

आर्षभस्येह राजर्षेर्मनसापि महात्मनः। नानुवर्त्मार्हति नृपो मक्षिकेव गरुत्मतः ॥४२॥

यो दुस्त्यजान्दारसुतान् सुहृद्राज्यं हृदिस्पृशः। जहौ युवैव मलवदुत्तमश्लोकलालसः ॥४३॥

यो दुस्त्यजान् क्षितिसुतस्वजनार्थदारान् प्रार्थ्यां श्रियं सुरवरैः सदयावलोकाम्।
नैच्छन्नृपस्तदुचितं महतां मधुद्विट्सेवानुरक्तमनसामभवोऽपि फल्गुः ॥४४॥

यज्ञाय धर्मपतये विधिनैपुणाय योगाय सांख्यशिरसे प्रकृतीश्वराय।
नारायणाय हरये नम इत्युदारं हास्यन्मृगत्वमपि यः समुदाजहार ॥४५॥

य इदं भागवतसभाजितावदातगुणकर्मणो राजर्षेर्भरतस्यानुचरितं स्वस्त्ययनमायुष्यं धन्यं यशस्यं स्वर्ग्यापवर्ग्यं वानुशृणोत्याख्यास्यत्यभिनन्दति च सर्वा एवाशिष आत्मन आशास्ते न कांचन परत इति ॥४६॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां पञ्चमस्कन्धे भरतोपाख्याने पारोक्ष्यविवरणं नाम चतुर्दशोऽध्यायः ॥१४॥

तस्य भरतस्य इदं माहात्म्यं कवयः श्लोकैः। ऋषभपुत्रस्य भरतस्य अनुवर्त्म वर्त्म अनुसर्तुं नार्हति अन्यो नृपः मनसा मनोरथेनापि किमुत कर्मणा। यथा गरुडस्य वर्त्म अनुगन्तुं मक्षिका न तद्वत् ॥४२॥ यो हृदिस्पृशः मनःप्रियान् दारादीन् मलवत् विष्ठामिव जहौ तस्यार्षभस्येति संबन्धः। सुहृदिति द्वन्द्वैक्यम् ॥४३॥ यो नृपः क्षित्यादीन् सुरवरैः प्रार्थ्यां श्रियं च नैच्छत् तस्य तदुचितमेव यतो महतां भक्तानामभवः मोक्षोऽपि फल्गुः तुच्छ एव। सदयः सदये भरते वा अवलोको यस्याः ॥४४॥ विधेर्मन्त्रविधेर्निपुणता पूर्णता यस्मात्तस्मै। धर्मपतये यज्ञादिफलदात्रे यज्ञमूर्तये। कर्ममूर्तये इत्यर्थः। तथा सांख्यं शिरः प्रधानं यस्य तस्मै प्रकृतीश्वराय मायानियन्त्रे योगाय ज्ञानमूर्तये च। तथा नारस्य जीवसमूहस्य अयनाय आश्रयाय भक्तक्लेशहारित्वात् हरये भक्तिमूर्तये च ते नम इत्युदारं मङ्गलमयं सम्यक् उदाजहार उच्चारितवान् यस्तस्यानुवर्त्म नार्हतीति पूर्वेणैवान्वयः। किं कर्तुमिच्छन्। मृगत्वं मृगदेहमपि हास्यन् त्यक्तुमिच्छन् सन् अपि गर्ह्यांगर्हितमित्यर्थः ॥४५॥ य इदं भरतस्यानुचरितम् आख्यास्यति कथयति अभिनन्दति अनुमोदते वा स आत्मनः स्वत एव सर्वा आशिषः सर्वाभीष्टान् आशास्ते प्राप्नोति न काञ्चन परत अपेक्षते इत्यर्थः। भागवतैः सभाजिताः संस्तुता निर्मला गुणाः कर्माणि च यस्य। धन्यं धनप्रापकम् ॥४६॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे गूढार्थदीपिन्यां चतुर्दशोऽध्यायः।

अथ पञ्चदशोऽध्यायः

श्रीशुक उवाच

भरतस्यात्मजः सुमतिर्नामाभिहितो यमु ह वाव केचित्पाखण्डिन ऋषभपदवीमनुवर्तमानं चानार्या अवेदसमाम्नातां देवतां स्वमनीषया पापीयस्या कलौ कल्पयिष्यन्ति ॥१॥ तस्माद् वृद्धसेनायां देवताजिन्नाम पुत्रोऽभवत् ॥२॥ अथासुर्यां तत्तनयो देवद्युम्नस्ततो धेनुमत्यां सुतः परमेष्ठी तस्य सुवर्चायां प्रतीह उपजातः ॥३॥ य आत्मविद्यामाख्याय स्वयं संशुद्धो महापुरुषमनुसस्मार ॥४॥ प्रतीहात्सुवर्चलायां प्रतिहर्त्रादयस्त्रय आसन्निज्याकोविदाः सूनवः प्रतिहर्तुः स्तुत्यामजभूमानावजनिषाताम् ॥५॥ भूम्न ऋषिकुल्यायामुद्गीथस्ततः प्रस्तावो देवकुल्यायां प्रस्तावान्नियुत्सायां हृदयज असीद्विभुर्विभोरत्यां च पृथुषेणस्तस्मान्नक्त आकूत्यां जज्ञे नक्ताद् द्रुतिपुत्रो गयो राजर्षिप्रवर उदारश्रवा अजायत साक्षाद्भगवतो विष्णोर्जगद्रिरक्षिषया गृहीतसत्त्वस्य कलात्मवत्त्वादिलक्षणेन महापुरुषतां प्राः ॥६॥ स वै स्वधर्मेण प्रजापालनपोषणप्रीणनोपलालनानुशासनलक्षणेनेज्यादिना च भगवति महापुरुषे परावरे ब्रह्मणि सर्वात्मनार्पितपरमार्थलक्षणेन ब्रह्मविच्चरणानुसेवयाऽऽपादितभगवद्भक्तियोगेन चाभीक्ष्णशः परिभावितातिशुद्धमतिरुपरतानात्म्य आत्मनि स्वयमुपलभ्यमानब्रह्मात्मानुभवोऽपि निरभिमान एवावनिमजूगुपत् ॥७॥ तस्येमां गाथां पाण्डवेय पुराविद उपगायन्ति ॥८॥

अथ पञ्चदशे राजा गयोऽभूद्भरतान्वये ।
वंशं प्रैयव्रतं कीर्त्याऽलङ्करोद्विरजोऽन्तिमः ॥

अभिहितः कथितः उह त्वर्थे । अनुवर्तमानं यमुह यं तु सुमतिं केचिदनार्या अवेदसमाम्नातां वेदविरुद्धां बौद्धदेवतां कल्पयिष्यन्ति । वावेति निश्चतम् ॥१॥ तस्मात् सुमतेः । वृद्धसेनायां भार्यायाम् ॥२॥ अथ अनन्तरम् आसुर्यां भार्यायां तत्तनयो देवताजितः पुत्रः । ततो देवद्युम्नात् तस्य परमेष्ठिनः सुवर्चायां भार्यायां प्रतीहो नाम पुत्रः । अत्र सुवर्चलेति पाठो लेखकभ्रमादिति प्राञ्चः ॥३॥ यः प्रतीहः आख्याय बहुभ्य उपदिश्य स्वयं तेनैव अनु अनुक्षणम् प्रापे केचित् ॥४॥ अत्र सुवर्चलेति पाठ उपयुक्तो नामभेदात् प्रतिहर्ता प्रस्तोता उद्गातेति त्रयः सूनव आसन् । कोविदाःयज्ञकर्मकुशलाः । स्तुत्यां भार्यायाम् अजो भूमेति द्वौ जातौ ॥५॥ तत उद्गीथात् विभुर्नाम हृदयजः पुत्रः । नक्तो नाम द्रुत्यां जातः पुत्रो गयः । स च विष्णोः कला अंशभूतः सन् आत्मवत्वं भगवत्प्रेमत्वं तदादि लक्षणेन गुणेन परमभक्ततां प्राप्तः ॥६॥ वै प्रसिद्धः स गयः स्वधर्मेण अवनिमजूगुपत् पृथ्वीं पालयामासेत्यन्वयः । कथंभूतः सन् । प्रजापालनादिना इज्यादिना च द्विविधेनैव धर्मेण भगवति अर्पितफलेन अभीक्ष्णशः निरन्तरं सेवया च संपादितो यो भक्तियोगस्तेन परिभाविता संस्कृता अत एव अतिशुद्धा मतिर्यस्य तथाभूतः किञ्च उपरतं निवृत्तमनात्म्यं देहात्मभ्रमो यस्मात् तस्मिन् आत्मनि चित्ते उपलभ्यमानं यद् ब्रह्म श्रीकृष्णः तस्यानुभवो यस्य तथाभूतः सन्नपि । परे ब्रह्मादयोऽपि अवरे निकृष्टा यस्मात् । पालनं भयात् । पोषणमन्नादिना प्रीणनं तुष्टीकरणमभीष्टदानेन । उपलालनं पुत्रवत्प्रशंसनम् । अनुशासनं शिक्षणं च ॥७॥ हे पाण्डवेय परीक्षित् तस्य गयस्य ।

गयं नृपः कः प्रतियाति कर्मभिर्यज्वाभिमानी बहुविद्धर्मगोप्ता ।
समागतश्रीः सदसस्पतिः सतां सत्सेवकोऽन्यो भगवत्कलामृते ॥९॥
यमभ्यषिञ्चन् परया मुदा सतीः सत्याशिषो दक्षकन्याः सरिद्भिः ।
यस्य प्रजानां दुदुहे धराऽऽशिषो निराशिषो गुणवत्सस्नुतोधाः ॥१०॥
छन्दास्यकामस्य च यस्य कामान् दुदूहुराजह्रुरथो बलिं नृपाः ।
प्रत्यञ्चिता युधि धर्मेण विप्रा यदाशिषां षष्ठमंशं परेत्य ॥११॥
यस्याध्वरे भगवानध्वरात्मा मघोनि माद्यत्युरुसोमपीथे ।
श्रद्धाविशुद्धाचलभक्तियोगसमर्पितेज्याफलमाजहार ॥१२॥
यत्प्रीणनाद्बर्हिषि देवतिर्यङ्मनुष्यवीरुत्तृणमाविरिञ्चात् ।
प्रीयेत सद्यः स ह विश्वजीवः प्रीतः स्वयं प्रीतिमगाद् गयस्य ॥१३॥

गयाद् गयन्त्यां चित्ररथः सुगतिरवरोधन इति त्रयः पुत्रो बभूवुश्चित्ररथादूर्णायां सम्राडजनिष्ट ॥१४॥ तत उत्कलायां मरीचिर्मरीचेर्बिन्दुमत्यां बिन्दुमानुदपद्यत तस्मात्सरघायां मधुर्नामाभवन्मधोः सुमनसि वीरव्रतस्ततो भोजायां मन्थुप्रमन्थू जज्ञाते मन्थोः सत्यायां भौवनस्ततो दूषणायां त्वष्टा त्वष्टुर्विरोचनायां विरजो विरजस्य शतजित्प्रवरं पुत्रशतं कन्या च विषूच्यां किल जातम् ॥१५॥

तत्रायं श्लोकः—

प्रैयव्रतं वंशमिमं विरजश्चरमोद्भवः । अकरोदत्यलं कीर्त्या विष्णुः सुरगणं यथा ॥१६॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां पञ्चमस्कन्धे प्रियव्रतवंशानुकीर्तनं नाम पञ्चदशोऽध्यायः १५

इमा माहात्म्यसूचिकां कथाम् पुराविदः पुराणज्ञाः ॥८॥ भगवत्कलां विना यज्वादिरूपोऽपि अन्यः कः नृपः कर्मभिर्गयं प्रतियाति अनुकरोति न कोऽपीत्यन्वयः । समागता संप्राप्ता श्रीर्यम् । सतां सभायाः पतिः॥९॥ सतीः सत्यः दक्षकन्याः श्रद्धाप्रभृतयः । सरिज्जलैर्यमभ्यषिञ्चन् किञ्च निराशिषः निष्कामस्यापि यस्य प्रजानाम् आशिषः कामान् धरा दुदुहे पूरयामास तं गयं कः प्रतियातीति पूर्वेणैव संबन्धः । कथंभूताः कन्याः सत्या आशिषः आशीर्वादा यासां ताः । कथंभूता । धरा गयगुणा एव वत्सास्तैःस्नुतः स्रावयुक्तमूधः दुग्धाशयो यस्याः ॥१०॥ छन्दांसि च वेदा अपि यस्य कामान् अभीष्टान् दुदुहु पूरयामासुः अथो तथा युधि बाणैः प्रतिपूजिता नृपा यस्य बलिमाजह्रुः करमपयामासुः । किञ्च धर्मेण दक्षिणादिना प्रत्यञ्चिता विप्राश्च परेत्य लोकान्तरे आशिषां स्वधर्मफलानां षष्ठं भागं यत् यस्मै आजह्रुः तं गयमित्यन्वयः ॥११॥ किञ्च यस्य अध्वरे अध्वरात्मा यज्ञमूर्तिभगवान् श्रद्धया सहितेन विशुद्धाचलभक्तियोगेन समर्पितं यज्ञफलं स्वीचकार तं गयमित्यन्वयः । क्व सति । मघोनि इन्द्रेदंम प्राप्नुवति सति । कुतः उरुः बहुः सोमलतायाः पीथः पानं यस्य तस्मिन् ॥१२॥ यस्य प्रीणनात् प्रसादात् ओविरिञ्चात् ब्रह्माणमभिव्याप्य देवादितृणान्तं सर्वं जगत् सद्यः प्रीयेत प्रसन्नं भवेत् स भगवान् स्वयं प्रीतः प्रीतिरूप एव गयस्य बर्हिषी यज्ञे प्रीतिमगात् प्राप्तः । कथंभूतः । सहविश्वजीवः विश्वजीवैः सहितः । ह स्फुटमिति वा सर्वजीवनहेतु र्वा ॥१३॥ गयन्त्यां भार्यायाम् सम्राट् नाम ॥१४॥ ततः सम्राजः सुमनसि भार्यायाम् शतजित् प्रवरः ज्येष्ठो यस्मिन् तत् । कन्या च जाता विषूच्यां पत्न्याम् ॥१५॥ तत्र विरजविषये । चरमाणां शतजिदादीनामुद्भवो यस्मात् स विरज इमं वंशमतीव अलङ्कृतवान् । विष्णुःवामनः । चरमे अन्ते उद्भवो वा ॥१६॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे गूढार्थदीपिन्यां पञ्चदशोऽध्यायः ।

अथ षोडशोऽध्यायः

राजोवाच

उक्तस्त्वया भूमण्डलायामविशेषो यावदादित्यस्तपति यत्र चासौ ज्योतिषां गणैश्चन्द्रमा वा सह दृश्यते ॥१॥ तत्रापि प्रियव्रतरथचरणपरिखातैः सप्तभिः सप्त सिन्धव उपक्लृप्ता यत एतस्याः सप्तद्वीपविशेषविकल्पस्त्वया भगवन् खलु सूचित एतदेवाखिलमहं मानतो लक्षणतश्च सर्वं विजिज्ञासामि ॥२॥ भगवतो गुणमये स्थूलरूप आवेशितं मनो ह्यगुणेऽपि सूक्ष्मतम आत्मज्योतिषि परे ब्रह्मणि भगवति वासुदेवाख्ये क्षममावेशितुं तदु हैतद् गुरोऽर्हस्यनुवर्णयितुमिति ॥३॥

ऋषिरुवाच

न वै महाराज भगवतो मायागुणविभूतेः काष्ठां मनसा वचसा वाधिगन्तुमलं विबुधायुषापि पुरुषस्तस्मात्प्राधान्येनैव भूगोलकविशेषं नामरूपमानलक्षणतो व्याख्यास्यामः। ॥४॥ यो वायं द्वीपः कुवलयकमलकोशाभ्यन्तरकोशो नियुतयोजनविशालः समवर्तुलो यथा पुष्करपत्रम् ॥५॥ यस्मिन्नव वर्षाणि नवयोजनसहस्रायामान्यष्टभिर्मर्यादागिरिभिः सुविभक्तानि भवन्ति ॥६॥ एषां मध्ये इलावृतं नामाभ्यन्तरवर्षं यस्य नाभ्यामवस्थितः सर्वतः सौवर्णः कुलगिरिराजो मेरुर्द्वीपायामसमुन्नाहः कर्णिकाभूतः कुवलयकमलस्य मूर्धनि द्वात्रिंशत्सहस्रयोजनविततो मूले षोडशसहस्रं तावतान्तर्भूम्यां प्रविष्टः ॥७॥ उत्तरोत्तरेणेलावृतं नीलः श्वेतः शृङ्गवानिति त्रयो रम्यकहिरण्मयकुरूणां वर्षाणां मर्यादागिरयः

षोडशे द्वीपवर्षादिमानलक्षणभेदतः ।
सुमेरौ लोकपालानां पुर्योऽष्टौ वर्णिताः क्रमात् ॥

यावत् आदित्यस्तपति प्रकाशयति यत्र चासौ नक्षत्रगणैः सह चन्द्रमा वा दृश्यते तावत्पर्यन्तं भूमण्डलस्य आयामविशेषः विशालता त्वया प्रथमे उक्त इत्यन्वयः ॥ १ ॥ तत्रापि भूमण्डले सप्तभिः रथचरणस्य परितः खातैः गर्तैः सप्त सिन्धव उपकल्पिताः यतो येभ्यः सिन्धुभ्यः एतस्याः पृथिव्या ये द्वीपभेदास्तेषां यो विकल्प प्रभेदः खण्डादिरूपः। यत् सूचितं तदेतदेव अखिलमवशिष्टं यथा न भवति तथा सर्वमेव विज्ञातुमिच्छामि। मानं परिमाणम्। लक्षणं वर्तुलाकारादिः ॥ २ ॥ आवेशितुं स्थिरीकर्तुं क्षमं योग्यं भवति तत् तस्मात् एतत् उ ह एतदेव ॥ ३ ॥ विभूतेः विस्तारस्य काष्ठामन्तं मनसा ज्ञातुं वचसा वक्तुं वा नालं न समर्थः। प्राधान्येन मुख्यतया ॥ ४ ॥ कुवलयं भूमण्डलं तदेव कमलं तस्य कोशा इव सप्त द्वीपास्तेषु प्रथमो जम्बूद्वीपः नियुतयोजनेति[1] लक्षयोजनविस्तीर्णः समपरिमाणो गोलाकारश्च ॥ ५ ॥ यस्मिन् जम्बूद्वीपे आयामो विस्तारः ॥ ६ ॥ एषां वर्षाणाम्। समुन्नाह उच्छ्रायः। तावता षोडशसहस्रयोजनमानेन अन्तः बहिश्च चतुरशीतियोजनसहस्रमानेन एवं लक्षयोजनोन्नाहः ॥७॥ इलावृतस्योत्तरोत्तरतः क्रमेण स्थिता गिरयो वर्षविभाजकाः प्रागायताः पूर्वपश्चिमतो दीर्घा उभयतः

---

1. नियुतशब्दो दशलक्षवाचकोऽप्यत्र कथञ्चिदेकलक्षं वक्ति तत्सन्निहितत्वात्। इति सन्दर्भः

प्रागायता उभयतः क्षारोदावधयो द्विसहस्रपृथव एकैकशः पूर्वस्मात्पूर्वस्मादुत्तर उत्तरो दशांशाधिकांशेन दैर्घ्य एव ह्रसन्ति ॥८॥

एवं दक्षिणेनेलावृतं निषधो हेमकूटो हिमालय इति प्रागायता यथा नीलादयोऽयुतयोजनोत्सेधा हरिवर्षकिम्पुरुषभारतानां यथासंख्यम् ॥९॥ तथैवेलावृतमपरेण पूर्वेण च माल्यवद्गन्धमादनावानीलनिषधायतौ द्विसहस्रं पप्रथतुः केतुमालभद्राश्वयोः सीमानं विदधाते ॥१०॥ मन्दरो मेरुमन्दरः सुपार्श्वः कुमुद इत्ययुतयोजनविस्तारोन्नाहा मेरोश्चतुर्दिशमवष्टम्भगिरयः उपक्लृप्ताः ॥११॥ चतुर्ष्वेतेषु चूतजम्बूकदम्बन्यग्रोधाश्चत्वारः पादपप्रवराः पर्वतकेतव इवाधिसहस्रयोजनोन्नाहास्तावद्विटपविततयः शतयोजनपरिणाहाः ॥१२॥

ह्रदाश्चत्वारः पयोमध्विक्षुरसमृष्टजला यदुपस्पर्शिन उपदेवगणा योगैश्वर्याणि स्वाभाविकानि भरतर्षभ धारयन्ति ॥१३॥ देवोद्यानानि च भवन्ति चत्वारि नन्दनं चैत्ररथं वैभ्राजकं सर्वतोभद्रमिति ॥१४॥ येष्वमरपरिवृढाः सहसुरललामयूथपतयः उपदेवगणैरुपगीयमानमहिमानः किल विहरन्ति ॥१५॥

मन्दरोत्सङ्ग एकादशशतयोजनोत्तुङ्गदेवचूतशिरसो गिरिशिखरस्थूलानि फलान्यमृतकल्पानि पतन्ति ॥१६॥ तेषां विशीर्यमाणानामतिमधुरसुरभिसुगन्धिबहुलारुणरसोदेनारुणोदा नाम नदी मन्दरगिरिशिखरान्निपतन्ती पूर्वेणेलावृतमुपप्लावयति ॥१७॥ यदुपजोषणाद्भवान्या अनुचरीणां पुण्यजनवधूनामवयवस्पर्शसुगन्धवातो दशयोजनं समन्तादनुवासयति । ॥१८॥ एवं जम्बूफलानामत्युच्चनिपातविशीर्णानामनस्थिप्रायाणामिभकायनिभानां रसेन जम्बू नाम नदी मेरुमन्दरशिखरादयुतयोजनादवनितले निपतन्ती दक्षिणेनात्मानं यावदिलावृतमुपस्यन्दयति ॥१९॥ तावदुभयोरपि रोधसोर्या मृत्तिका तद्रसेनानुविध्यमाना वाय्वर्कसं-

---

समुद्रलग्नाः । पृथवो विस्तीर्णाः । ह्रसन्ति न्यूनीभवन्ति नतूच्चत्वे पृथत्वे वा ॥ ८ ॥ एवं नीलादिवत् । इलावृतस्य दक्षिणतः निषधादयः यथासंख्यं मर्यादागिरय इत्यन्वयः । उत्सेध उच्छ्रायः ॥ ९ ॥ अपरेण पश्चिमायां दिशि ।[1] आयतौ दीर्घौ । पप्रथतुः विस्तीर्णौ भवतः ॥ १० ॥ उन्नाह उच्छ्रायः । अवष्टम्भगिरय आधारगिरयः उपक्लृप्ता रचिताः सन्ति ॥ ११ ॥ अधिसहस्रम् एकादशशतानि उच्छ्रायो येषाम् । तावत्प्रमाणा शाखाविस्तारो येषाम् । परिणाहः सर्वतः स्थौल्यविस्तारः ॥ १२ ॥ पय आदीनि सन्ति येषु ते । मत्वर्थीयोऽच् प्रत्ययः । यदुपस्पर्शिन यत्सेविनः सिद्धादयः । भरतेति परीक्षित्सम्बोधनम् ॥१३॥ भवन्ति स्थिताः सन्ति ॥ १४ ॥ येषु उद्यानेषु । परिवृढाः स्वामिन इन्द्रादयः । सुरस्त्रीणां ललामभूता याः स्त्रियः तासां यूथस्य पतयः । ताभिः सह संभूय । उपदेवा गन्धर्वादयः ॥१५॥ चूत आम्रवृक्षः । गिरिशिखरवत् । कल्पानि सदृशानि मिष्टानीत्यर्थः ॥१६॥ तेषां फलानां विशीर्यमाणानां स्फुटितानाम् । भिद्यमानानाम् अतिमधुरश्चासौ स्वतः सुगन्धिश्च बहुलो घनीभूतोऽरुणरसश्च स एवोदकं तेन । पूर्वेण पूर्वदिशि । उपप्लावयति सिञ्चति ॥ १७ ॥ यस्य उपजोषणात् सेवनात् । अनुवासयति सुरभीकरोति पुण्यजना यक्षाः ॥ १८ ॥ दक्षिणेन दक्षिणस्यां दिशि यावत् इलावृत्तं तावदात्मानं वर्धयन्तीति शेषः । उपस्यन्दयति प्रवहति ! इभो गजः अस्थि बीजम् ॥ १९ ॥ यावत् उपस्यन्दयति तावत्पर्यन्तं सर्वतः ।

१—सप्तम्यर्थे एनप्प्रत्ययः । अव्ययत्वाद्विभक्तेर्लोपः ।

योगविपाकेन सदामरलोकाभरणं जाम्बूनदं नाम सुवर्णं भवति ॥२०॥ यदु ह वाव विबुधादयः सह युवतिभिर्मुकुटकटककटिसूत्राद्याभरणरूपेण खलु धारयन्ति ॥२१॥

यस्तु महाकदम्बः सुपार्श्वनिरूढो यास्तस्य कोटरेभ्यो विनिःसृताः पञ्चायामपरिणाहाः पञ्च मधुधाराः सुपार्श्वशिखरात्पतन्त्योऽपरेणात्मानमिलावृतमनुमोदयन्ति ॥२२॥ या ह्युपयुञ्जानानां मुखनिर्वासितो वायुः समन्ताच्छतयोजनमनुवासयति ॥२३॥

एवं कुमुदनिरूढो यः शतवल्शो नाम वटस्तस्य स्कन्धेभ्यो नीचीनाः पयोदधिमधुघृतगुडान्नाद्यम्बरशय्यासनाभरणादयः सर्व एव कामदुघा नदाः कुमुदाग्रात्पतन्तस्तमुत्तरेणेलावृतमुपयोजयन्ति ॥२४॥ यानुपजुषाणानां न कदाचिदपि प्रजानां वलीपलितक्लमस्वेददौर्गन्ध्यजरामयमृत्युशीतोष्णवैवर्ण्योपसर्गादयस्तापविशेषा भवन्ति यावज्जीवं सुखं निरतिशयमेव ॥२५॥

कुरङ्गकुररकुसुम्भवैकङ्कत्रिकूटशिशिरपतङ्गरुचकनिषधशिनीवासकपिलशङ्खवैदूर्यजारुधिहंसर्षभनागकालञ्जरनारदादयो विंशतिगिरयो मेरोः कर्णिकाया इव केसरभूता मूलदेशे परित उपक्लृप्ताः ॥२६॥ जठरदेवकूटौ मेरुं पूर्वेणाष्टादशयोजनसहस्रमुदगायतौ द्विसहस्रं पृथुतुङ्गौ भवतः। एवमपरेण पवनपारियात्रौ दक्षिणेन कैलासकरवीरौ प्रागायतावेवमुत्तरतस्त्रिशृङ्गमकरावष्टभिरेतैः परिस्तृतोऽग्निरिव परितश्चकास्ति काञ्चनगिरिः ॥२७॥ मेरोर्मूर्धनि भगवत आत्मयोनेर्मध्यत उपक्लृप्तां पुरीमयुतयोजनसाहस्रीं समचतुरस्रां शातकौम्भीं वदन्ति ॥२८॥ तामनु परितो लोकपालानामष्टानां यथादिशं यथारूपं तुरीयमानेन पुरोऽष्टावुपक्लृप्ताः ॥२९॥

रोधसोस्तटयोः। अनुविध्यमाना आर्द्रीक्रियमाणा। विपाकः परिणामः। आभरणं तदुपयोगि ॥ २० ॥ यत्सुवर्णम्। उह वावेति निपातद्वयं तद्रसमहिम्न आश्चर्यं द्योतयति ॥ २१ ॥ सुपार्श्वोऽवष्टम्भगिरिः पूर्वोक्तः। कोटरेभ्यो विवरेभ्यः। आयामो व्यामः। पञ्चभिर्व्यामैः परिमितः परिणाहः स्थौल्यं यासां ताः। सकरयोर्बाह्वोर्यत्तिर्यगन्तरं तत् व्यामः। अपरेण पश्चिमभागे इलावृतस्थम् आत्मानं प्राणिजातम् अनुमोदयन्ति हर्षयन्ति ॥ २२ ॥ या मधुधाराः। उपयुञ्जानानां सेवमानानाम्। अनुवासयति सुरभीकरोति ॥ २३ ॥ कुमुदोऽवष्टम्भगिरिः शतवल्शः शतस्कन्धः। नीचीना अधोमुखाः। उत्तरेण इलावृतस्य उत्तरभागं तत्रत्यजनम् उपयोजयन्ति भोजयन्ति ॥ २४॥ यान् नदान्। वली त्वक्शैथिल्यम्। पलितं केशशौक्ल्यम् क्लमः श्रमः। मृत्युः अपमृत्युः। उपसर्गो भूताद्युपद्रवः ॥ २५ ॥ आदिः एतन्नामकः पर्वतः तदैव विंशतिसंख्यापूर्तिः। उपक्लृप्ता रचिताः ॥ २६ ॥ पूर्वेण पूर्वस्यां दिशि। उदगायतौ दक्षिणोत्तरतो दीर्घौ भवतः तिष्ठतः प्रागायतौ पूर्वतो दीर्घौ। परिस्तृत आवृतः ॥ २७ ॥ आत्मयोनेः ब्रह्मणः। समाश्चत्वारोऽस्रयः कोणा यस्यास्ताम्। शातकौम्भी स्वर्णमयीं मनोवतीं नाम ॥ २८ ॥ तां ब्रह्मपुरीम्। द्विसहस्रमानेन सार्धद्विसहस्रयोजनविस्तारेण। पुरः[1] पुर्यः रचिताः सन्ति ॥ २९ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे गूढार्थदीपिन्यां षोडशोऽध्यायः ॥१६॥

१—मेरौ नव पुराणि स्युर्मनोवत्यमरावती तेजोवती संयमिनी तथा कृष्णाङ्गनापरा ॥१॥ श्रद्धावती गन्धवती तथा चान्या महोदया यशोवती च ब्रह्मेन्द्रवह्न्यादीनां यथाक्रमम् ॥२॥ ब्रह्मेन्द्राग्नियमनिर्ऋतिवरुणवायु कुवेरेशानसंज्ञकाना मष्टलोकपालानां क्रमेण ज्ञेयाः।

अथ सप्तदशोऽध्यायः

श्रीशुक उवाच

तत्र भगवतः साक्षाद्यज्ञलिङ्गस्य विष्णोर्विक्रमतो वामपादङ्गुष्ठनखनिर्भिन्नोर्ध्वाण्ड-कटाहविवरेणान्तः प्रविष्टा या वाह्यजलधारा तच्चरणपङ्कजावनेजनारुणकिञ्जल्कोपरञ्जिता-खिलजगदघमलापहोस्पर्शनामला साक्षाद्भगवत्पदीत्यनुपलक्षितवचोऽभिधीयमानाऽतिमहता कालेन युगसहस्रोपलक्षणेन दिवो मूर्धन्यवततार यत्ताद्विष्णुपदमाहुः ॥१॥ यत्र ह वाव वीरव्रत औत्तानपादिः परमभागवतोऽस्मत्कुलदेवताचरणारविन्दोदकमिति यामनुसवनमुत्कृष्यमाण-भगवद्भक्तियोगेन दृढं क्लिद्यमानान्तर्हृदय औत्कण्ठ्यविवशामीलितलोचनयुगलकुड्मलविगलि-तामलबाष्पकलयाऽभिव्यज्यमानरोमपुलककुलकोऽधुनापि परमादरेण शिरसा बिभर्ति ॥२॥

ततः सप्त ऋषयस्तात्प्रभावाभिज्ञा यां ननु तपस आत्यन्तिकी सिद्धिरेतावती भगवति सर्वात्मनि वासुदेवेऽनुपरतभक्तियोगलाभेनैवोपेक्षितान्यार्थात्मगतयो मुक्तिमिवागतां मुमुक्षव इव सबहुमानमद्यापि जटाजूटैरुद्वहन्ति ॥३॥ ततोऽनेकसहस्रकोटिविमानानीकसंकुलदेवयाने-नावतरन्त्यिन्दुमण्डलमावार्य ब्रह्मसदने निपतति ॥४॥

तत्र चतुर्धा भिद्यमाना चतुर्भिर्नामभिश्चतुर्दिशमभिस्यन्दन्तो नदनदीपतिमेवाभिनिवि-शति॥५॥ सीताऽलकनन्दा चक्षुर्भद्रेति सीता तु ब्रह्मसदनात्केसराचलादिगिरिशिखरेभ्योऽधोऽधः

गङ्गावतरणं सप्तदशे मेरोश्चतुर्दिशम् ।
इलावृते वसन् रुद्रश्चक्रे सङ्कर्षणस्तवम् ॥

तत्र वामनावतारसमये । विक्रमतःविष्णोःदक्षिणेन पदा भुवं क्रान्त्वा वामपादमुत्क्षिपतः वामनमूर्ते-र्भगवतः वामपादाङ्गुष्ठनखेन निर्भिन्नमूर्ध्वं यस्य तथाभूतोऽण्डकटाहस्तस्य विवरेणान्तः प्रविष्टा या चिन्मयी अमला जलधारा सा दिवो मूर्धनि ध्रुवलोकेऽवततारेत्यन्वयः । यत् विष्णुपदं तत् दिवो मूर्धा । कीदृशी । तस्य भगवतश्चरणप्रक्षालनेन तद्गतारुणकुङ्कुमोपरञ्जिता । अत एव अखिलजगतां पापमलापह-माचमनं स्नानं च यस्याः । पुनः भगवत्पदीति यत् अनुपलक्षितवचो भागीरथीत्यादिनामान्तररहितं नाम तेन । युगं पञ्चवर्णात्मकं ज्ञेयम् ॥ १ ॥ यत्र विष्णुपदे । ह प्रसिद्धः । वाव एवार्थे । वीरव्रतो दृढसङ्कल्प एव ध्रुवः इति हेतोः यां धारामधुनापि शिरसा बिभर्तीत्यन्वयः । उत्कृष्यमाणो वर्धमानः । क्लिद्यमानं प्रेमार्द्रम् । कथंभूतः । प्रेमौत्कण्ठ्येन विवशमामीलितं यत् नेत्रयुगलं तदेव कुड्मले कलिके ताभ्यां विगलितममलं भक्तिसिक्तमश्रु तस्य प्रवाहेण व्यक्तीभवत् रोमपुलकानां कुलं रोमावली यस्य सः । अनुसवनम् अनुक्षणम् ॥२॥ ततो ध्रुवादनन्तरम् । यां गङ्गां जटामण्डलैरुद्वहन्ति धारयन्तीत्यन्वयः । आत्यन्तिकी निरतिशया । उपेक्षिता अन्ये पुरुषार्था आत्मज्ञानं च यैः । अनुपरतोऽस्खलितः ॥३॥ ततः सप्तर्षिमण्डलात् । अनीकैः समूहैः सङ्कुलेन व्याप्तेन आकाशमार्गेण आवार्य आप्लाव्य मेरुमूर्धस्थे ब्रह्मसदने ॥४॥ तत्र सदने अभिस्यन्दन्ती अभितो गच्छन्ती ॥५॥ भद्राश्ववर्षमन्तरेण भद्राश्ववर्षमध्ये

प्रस्रवन्ती गन्धमादनमूर्धसु पतित्वान्तरेण भद्राश्ववर्षं प्राच्यां दिशि क्षारसमुद्रमभिप्रविशति ॥६॥ एवं माल्यवच्छिखरान्निष्पतन्ती ततोऽनुपरतवेगा केतुमालमभि चक्षुः प्रतीच्यां दिशि सरित्पतिं प्रविशति ॥७॥ भद्रा चोत्तरतो मेरुशिरसो निपतिता गिरिशिखराद्गिरिशिखरमतिहाय शृङ्गवतः शृङ्गादवस्यन्दना उत्तरांस्तु कुरूनभित उदीच्यां दिशि जलधिमभिप्रविशति ॥८॥ तथैवालकनन्दा दक्षिणेन ब्रह्मसदनाद्बहूनि गिरिकूटान्यतिक्रम्य हेमकूटाद्धैमकूटान्यतिरभसतररंहसा लुठयन्ती भारतमभिवर्षं दक्षिणस्यां दिशि जलधिमभिप्रविशति ॥९॥ यस्यां स्नानार्थं चागच्छतः पुंसः पदे पदेऽश्वमेधराजसूयादीनां फलं न दुर्लभमिति ॥१०॥ अन्ये च नदा नद्यश्च वर्षे वर्षे सन्ति बहुशो मेर्वादिगिरिदुहितरः शतशः ॥११॥

तत्रापि भारतमेव वर्षं कर्मक्षेत्रमन्यान्यष्ट वर्षाणि स्वर्गिणां पुण्यशेषोपभोगस्थानानि भौमानि स्वर्गपदानि व्यपदिशन्ति ॥१२॥ एषु पुरुषाणामयुतपुरुषायुर्वर्षाणां देवकल्पानां नागायुतप्राणानां वज्रसंहननबलवयोमोदप्रमुदितमहासौरतमिथुनव्यवायापवर्गवर्षधृतैकगर्भकलत्राणां अत्र तु त्रेतायुगसमः कालो वर्तते ॥१३॥ यत्र ह देवपतयः स्वैः स्वैर्गणनायकैर्विहितमहार्हणाः सर्वर्तुकुसुमस्तबकफलकिसलयश्रियाऽऽनम्यमानविटपलताविटपिभिरुपशुम्भमानरुचिरकाननाश्रमायतनवर्षगिरिद्रोणीषु तथा चामलजलाशयेषु विकचविविधनववनरुहामोदमुदितराजहंसजलकुक्कुटकारण्डवसारसचक्रवाकादिभिर्मधुकरनिकराकृतिभिरुपकूजितेषु जलक्रीडादिभिर्विचित्रविनोदैः सुललितसुरसुन्दरीणां कामकलिलविलासहासलीलावलोकाकृष्टमनोदृष्टयः स्वैरं विहरन्ति ॥१४॥

नवस्वपि वर्षेषु भगवान्नारायणो महापुरुषः पुरुषाणां तदनुग्रहायात्मतत्त्वव्यूहेनात्मनाद्यापि संनिधीयते ॥१५॥ इलावृते तु भगवान् भव एक एव पुमान्न ह्यन्यस्तत्रापरो निर्विशति

॥६॥ केतुमालाभिमुखं निष्पतन्ती चक्षुःसंज्ञा ॥७॥ उत्तरतः मेरोरुत्तरदिशि कुरूनभिलक्ष्य अवस्यन्दमाना प्रस्रवन्ती ॥८॥ दक्षिणेन दक्षिणस्यां दिशि अतिरभसतररंहसा तीव्रतरवेगेन लुठयन्ती भिन्दन्ती। भारतमभिगम्य ॥९।१०॥ अन्ये च अन्याश्च इत्यन्ये पुमान् स्त्रियां इत्येकशेषः ॥११॥ तत्रापि जम्बूद्वीपेऽपि पुण्यशेषस्य भुक्तावशिष्टस्य पुण्यकर्मणः भोगस्थानानि व्यपदिशन्ति कथयन्ति ॥१२॥ एषु वर्षेषु अयुतं दशसहस्रं पुरुषमानेन आयुर्वर्षाणि येषाम् । प्राणो बलम् वज्रवत्संहननं दृढं यच्छरीरं तस्मिन् ये बलवयोमोदास्तैः प्रमुदितानि प्रसन्नानि महासौरतमिथुनानि महासंभोगयुक्तस्त्रीपुरुषयुगलानि तेषां संभोगावसाने एकवर्षशेषे आयुषि धृतैकगर्भाणि कलत्राणि येषाम् । कालः सुखबहुलः अत्र तत्र तु इति पाठः सर्वथाऽनुपयुक्तोऽसम्बन्धात् ॥१३॥ यत्र ह येषु हि वर्षेषु देवपतय इन्द्रादयोऽपि स्त्रीभिः सह स्वैरं यथेच्छं विहरन्तीत्यन्वयः । केषु स्थानेषु । सर्वेषु ऋतुषु कुसुमादीनां श्रिया समृद्ध्या अत्यन्तं नम्यमाना विटपाः शाखा लताश्च येषां तै वृंक्षैः शोभमानानि रुचिराणि वनानि येषु तेषु आश्रमेषु आयतनेषु वर्षमध्यवर्तिगिरिद्रोणीषु तथा जलाशयेषु च । कथंभूतेषु विकचानि प्रफुल्लानि यानि अभिनवकमलानि तेषां दिव्यगन्धेन मुदितैः राजहंसादिभिस्तथा भ्रमराकृतिपक्षिविशेषैश्च उपकूजितेषु । कथंभूतास्ते । तासामुद्बुद्धो यः कामस्तेन कलिलैः संजातैर्विलासादिभिः आकृष्टं मनो दृष्टिश्च येषां त ॥१४॥ सचासौ वक्ष्यमाणोऽनुग्रहस्तदर्थम् । स्वमूर्तिव्यूहेन इदानीमपि सन्निहितो भवति ॥१५॥ यद् यस्मिन् तद् शापस्य

निर्विशति भवान्याः शापनिमित्तज्ञो यत्प्रवेक्ष्यतः स्त्रीभावस्तत्पश्चाद्वक्ष्यामि ॥१६॥ भवानी-
नाथैः स्त्रीगणार्बुदसहस्रैरवरुध्यमानो भगवतश्चतुर्मूर्तेर्महापुरुषस्य तुरीयां तामसीं मूर्ति
प्रकृतिमात्मनः संकर्षणसंज्ञामात्मसमाधिरूपेण संनिधाप्यैतदभिगृणन् भव उपधावति ॥१७॥

श्रीभगवानुवाच

ॐ नमो भगवते महापुरुषाय सर्वगुणसंख्यानायानन्तायाव्यक्ताय नम इति ॥१८॥

भजे भजन्यारणपादपङ्कजं भगस्य कृत्स्नस्य परं परायणम्।
भक्तेष्वलं भावितभूतभावनं भवापहं त्वा भवभावमीश्वरम् ॥१९॥
न यस्य मायागुणचित्तवृत्तिभिर्निरीक्षतो ह्यण्वपि दृष्टिरज्यते।
ईशे यथा नोऽजितमन्युरंहसां कस्तं न मन्येत जिगीषुरात्मनः ॥२०॥
असद्दृशो यः प्रतिभाति मायया क्षीबेव मध्वासवताम्रलोचनः।
न नागवध्वोऽर्हण ईशिरे ह्रिया यत्पादयोः स्पर्शनधर्षितेन्द्रियाः ॥२१॥
यमाहुरस्य स्थितिजन्मसंयमं त्रिभिर्विहीनं यमनन्तमृषयः।
न वेद सिद्धार्थमिव क्वचित् स्थितं भूमण्डलं मूर्धसहस्रधामसु ॥२२॥

कारणम्। पश्चात् नवमस्कन्धे। अपरोऽर्वाचीनः ॥१६॥ आत्मनः स्वस्य प्रकृतिं कारणभूतां तुरीयां मूर्तिं सन्निधाप्यहृदि संस्थाप्य। एतद् वक्ष्यमाणं वाक्यम् अभिगृणन भव उपधावति स्तौतीत्यन्वयः। उपास्ते वा कथंभूतः। भवानी नाथा स्वामिनी येषां तैः स्त्रीजनैः सेव्यमानः। आत्मसमाधिश्चित्तैकाग्र्यम् ॥१७॥ सर्वेषां गुणानां संख्यानं प्रकाशो यस्मात् ॥१८॥ भजनमर्हतीति हे भजन्य भजनीय त्वा त्वां परमीश्वरं परमेश्वरं भजे इत्यन्वयः "तदर्हति" इति यत्। अरण शरणं रक्षकं वा पादपङ्कजं यस्य। कृत्स्नस्य षड्विधैश्वर्यस्य मुख्यस्थानम्। पुनः भक्तेषु निमित्तेषु अलमत्यर्थं भावितं प्रकटितं भूतभावनं स्वरूपं येन। यद्वा। भावितं कृतं भूतानां भावनं जननं पालनं वा येन। भवः संसारस्तमपहन्ति निवर्तयतीति भक्तेषु योज्यम्, भावयति उत्पादयतीति अभक्तेषु योज्यम्। चक्रवर्ती तु भजे भजे इति पाठमाह। नितरामा सम्यगेव ॥१९॥ ईशनमीट् सम्पदादित्वाद्भावे क्विम्, तस्मै ईशे नियमनाय निरीक्षतोऽपि यस्य मायिक-विषयैः चित्तवृत्तिभिः रागद्वेषादिभिश्च यस्य दृष्टिः ईषदपि नाज्यते न लिप्यते यथा नोऽस्माकं तं को न मन्येत कोनाद्रियेत। मन्यु नजितंरंहः क्रोधवेगः यैं तेषाम्। आत्मन इन्द्रियाणि तदुपलक्षितसंसारं वा यद्वा। आत्मानं मनः कृद्योगे षष्ठी। इति तीर्थः ॥२०॥ यः असदृशः कुबुद्धीन् प्रति मायया अज्ञानेन क्षीवा मत्त इव ननु मत्तः प्रतीयते तं को न मन्येतेति पूर्वेणान्वयः। क्षीबृ-मदे औणादिके कनि प्रथमैकवचनान्तम्। मधु मदिरा आसवस्तालादिरसस्ताभ्यामरुणे लोचने यस्य। अत एव नागकन्या यस्य अर्हणे पूजने न ईशिरे न समर्था बभूवुः। स्पर्शनेन धर्षितं क्षुभितमिन्द्रियं मनो यासां ताः ॥२१॥ अस्य विश्वस्य स्थित्याद्यो यस्मात्तमाहुः। अत एव तैर्विहीनमनन्तं च यमाहुः [1]ऋकारो लक्ष्मीः अदितिर्वा ऋषयो वेदाश्चेति

१. ऋकारो देवमाता स्यात् इत्यभिधानात्।

यस्याद्य आसीद् गुणविग्रहो महान् विज्ञानधिष्ण्यो भगवानजः किल ।
यत्सम्भवोऽहं त्रिवृता स्वतेजसा वैकारिकं तामसमैन्द्रियं सृजे ॥२३॥
एते वयं यस्य वशे महात्मनः स्थिताः शकुन्ता इव सूत्रयन्त्रिताः ।
महानहं वैकृततामसेन्द्रियाः सृजाम सर्वे यदनुग्रहादिदम् ॥२४॥
यन्निर्मितां कर्ह्यपि कर्मपर्वणीं मायां जनोऽयं गुणसर्गमोहितः ।
न वेद निस्तारणयोगमञ्जसा तस्मै नमस्ते विलयोदयात्मने ॥२५॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां पञ्चमस्कन्धे सप्तदशोऽध्यायः ॥१७॥

अथाष्टादशोऽध्यायः

श्रीशुक उवाच

तथा च भद्रश्रवा नाम धर्मसुतस्तत्कुलपतयः पुरुषा भद्राश्ववर्षे साक्षाद्भगवतो वासुदेवस्य प्रियां तनुं धर्ममयीं हयशीर्षाभिधानां परमेण समाधिना संनिधाप्येदमभिगृणन्त उपधावन्ति ॥१॥

भद्रश्रवस ऊचुः

ॐ नमो भगवते धर्मायात्मविशोधनाय नम इति ॥२॥

सवर्णदीर्घः । किं च मूर्धसहस्रमेव धामानि स्थानानि तेषु क्वचिदेकदेशे स्थितं भूमण्डलं सर्षपमिव यो न वेद तस्मै नम इति चतुर्थेनान्वयः ॥२२॥ यस्य यस्मात् गुणनिमित्तो विग्रहो महान् महत्तत्त्वनामा आद्य आसीत् । स च विज्ञानधिष्ण्यः सत्त्वप्रधानः चित्तरूपत्वात् । स एव चित्ताधिष्ठाता अजो ब्रह्मा एतच्च वासुदेवस्याभेदविवक्षयोक्तम् । यत् यस्मात् ब्रह्मणः सकाशात् संभूतोऽहं रुद्रः त्रिवृता त्रिविधाहङ्कारेण वैकारिकं सात्त्विकं देवतावर्गं तामसं भूतवर्गं राजसम् इन्द्रियवर्गं च सृजामि ॥२३॥ किं च एते वयं महदादयः सर्वे यस्य अनुग्रहादिदं ब्रह्माण्डं सृजामः । कथंभूताः । पक्षिण इव सूत्रेण क्रियाशक्तिप्राणेन वद्धाः यस्य वशे स्थितास्तस्मै नमः । महान् महत्तत्त्वम् अहम् अहङ्कारः स च त्रिविधः सात्त्विकतामस राजसभेदेन ॥२४॥ येननिर्मितां मायामेव अयं जनो वेद किन्तु तन्निस्तारणोपायं कर्हिचिदपि अञ्जसा तत्त्वतो न वेद तस्मै ते नम इत्यन्वयः । कीदृशीम् कर्माण्येव पर्वाणि वन्धहेतुत्वाद् ग्रन्थयस्तानि नयति प्रापयतीति । गुणानां सर्गः देहपुत्रादिरूपस्तत्रासक्तः अहम्ममतया । विलयः मायाया भक्तेषु उदयोऽभक्तेषु यतस्तस्मै परमात्मने । यद्वा । विलीयतेऽस्मिन्निति विलय, उदेति अस्मादिति उदयः विलयश्चासौ उदयश्च आत्मा स्वरूपं यस्य तस्मै ते नमः ॥२५॥

इति श्रीमद्भागवत महापुराणे पञ्चमस्कन्धे गूढार्थदीपिन्यां सप्तदशोऽध्यायः ।

अष्टादशे तु वर्षेषु भद्राश्वादिषु षट्सु च ।
आराधनं कृतं सर्वैः स्वस्वदेवस्य भक्तितः ॥

यथा संकर्षणं रुद्र उपास्ते तथेत्यन्वयः अभिगृणन्तो जपन्त उपासते । भद्रश्रवा ए तद्वर्षपतिः तस्य राज्ञः पुत्राः तत्सेवकाश्च तदभिप्रायेण वहुवचनम् ॥१॥ ज्ञानं दत्वा आत्मानं जीवं विशोधयति मोचयतीति

अहो विचित्रं भगवद्विचेष्टितं घ्नन्तं जनोऽयं हि मिषन्न पश्यति ।
ध्यायन्नसद्यर्हि विकर्म सेवितुं निर्हृत्य पुत्रं पितरं जिजीविषुः ॥३॥
वदन्ति विश्वं कवयः स्म नश्वरं पश्यन्ति चाध्यात्मविदो विपश्चितः ।
तथापि मुह्यन्ति तवाज मायया सुविस्मितं कृत्यमजं नतोऽस्मि तम् ॥४॥
विश्वोद्भवस्थाननिरोधकर्म ते ह्यकर्तुरङ्गीकृतमप्यपावृतः ।
युक्तं न चित्रं त्वयि कार्यकारणे सर्वात्मनि व्यतिरिक्ते च वस्तुतः ॥५॥
वेदान् युगान्ते तमसा तिरस्कृतान् रसातलाद्यो नृतुरङ्गविग्रहः ।
प्रत्याददे वै कवयेऽभियाचते तस्मै नमस्तेऽवितथेहिताय इति ॥ ६ ॥

हरिवर्षे चापि भगवान्नरहरिरूपेणास्ते तद्रूपग्रहणनिमित्तमुत्तरत्राभिधास्ये तद्दयितं रूपं महापुरुषगुणभाजनो महाभागवतो दैत्यदानवकुलतीर्थीकरणशीलाचरितः प्रह्लादोऽव्यवधानानन्यभक्तियोगेन सह तद्वर्षपुरुषैरुपास्ते इदं चोदाहरति ॥ ७ ॥ ॐ नमो भगवते नरसिंहाय नमस्तेजस्तेजसे आविराविर्भव वज्रनख वज्रदंष्ट्र कर्माशयान् रन्धय रन्धय तमो ग्रस ग्रस ॐ स्वाहा अभयमभयमात्मनि भूयिष्ठा ॐ क्ष्रौम् ॥ ८ ॥

स्वस्त्यस्तु विश्वस्य खलः प्रसीदतां ध्यायन्तु भूतानि शिवं मिथो धिया ।
मनश्च भद्रं भजतादधोक्षजे आवेश्यतां नो मतिरप्यहैतुकी ॥९॥

तथा । नम इति द्विरुक्तिर्देहद्वयनिरासार्था ॥ २ ॥ विचित्रमतर्क्यम् । यतो घ्नन्तं मृत्युं मिषन् पश्यन्नपि न पश्यति स्वात्ममृत्युम् । अदर्शने हेतुं पुत्रं बालं पितरं वृद्धं निर्हृत्य दग्ध्वा स्वयं तद्धनैः जिजीविषुः जीवितुमिच्छुर्भवति । यतोऽसत् तुच्छं विषयसुखं सेवितुं विकर्म पापमेव ध्यायन् भवति चिन्तयतीत्यर्थः । अत्र जिजीविषुः जिजीविषन् इति पाठद्वयमपि छन्दोभङ्गाभावादतीव समीचीनम् ॥३॥ वदन्ति शास्त्रतः । पश्यन्ति समाधौ । विपश्चितो विवेकिनः । अतस्तं त्वां नतोऽस्मि कर्तरि क्तः बहुवचनोपक्रमेऽपि एकवचनं प्रत्येकाभिप्रायेण ॥४॥ अकर्तुस्ते विश्वस्य सृष्ट्यादि कर्म अङ्गीकृतं गीतं वेदेनेति शेषः । अकर्तृत्वे हेतुः । अपगता आवृत् मायावरणं यस्मात् तादृशस्यापि तस्य । त्वयि तत्कर्म । चित्रमसंभावितं न किन्तु युक्तमेव । यतो हि कार्यस्य जगतः कारणे त्वयि कर्तृत्वं युक्तम् । सर्वतोऽतिरिक्ते निरुपाधौ च अकर्तृत्वं च युक्तम् ॥५॥ युगान्ते प्रलये तमसा तमःप्रधानासुरेण मधुदैत्येन तिरस्कृतान् अपनीतान् वेदान् कवये ब्रह्मणे यः प्रत्याददे समर्पितवान् तस्मै ते नम इत्यन्वयः । ना च तुरङ्गश्च तयोरिव विग्रहो यस्य स हयग्रीवमूर्तिः । अवितथेहिताय सत्यसङ्कल्पाय ॥६॥ ग्रहणे निमित्तं कारणम् । उत्तरत्र सप्तमस्कन्धे वक्ष्यामि । दयितं प्रियंरूपमुपास्ते इदं वक्ष्यमाणम् उदाहरति जपति । अव्यवधानो निरन्तरः । तीर्थीकरणं पवित्रीकरणम् ॥ ७ ॥ तेजसामग्न्यादीनामपि तेजसे प्रकाशकाय । कर्माशयान् कर्मवासनाः । रन्धय निर्दह । तमोऽज्ञानम् ग्रस नाशय । स्वाहा कर्मसमर्पणे । ओंघटितं मन्त्रजपादिकं कर्म समर्पयामीत्यर्थः । आत्मनि मन्मनसि अभयम् अत्र परत्र च भूयिष्ठा भूयात् । तिङन्तप्रतिरूपकमव्ययम् । क्ष्रौम् इति नृसिंहबीजम् । बीजं देवस्य मूर्तिर्हि तत्स्मृतेः स प्रसीदसि इति तन्त्रसिद्धान्तः ॥ ८ ॥ प्रसीदतां खलतां त्यजतु । मिथः परस्परं शिवं मङ्गलमेव चिन्तयन्तु ।

मागारदारात्मजवित्तबन्धुषु सङ्गो यदि स्याद्भगवत्प्रियेषु नः ।
यः प्राणवृत्त्या परितुष्ट आत्मवान् सिद्ध्यत्यदूरान्न तथेन्द्रियप्रियः ॥१०॥
यत्सङ्गलब्धं निजवीर्यवैभवं तीर्थं मुहुः संस्पृशतां हि मानसम् ।
हरत्यजोऽन्तः श्रुतिभिर्गतोऽङ्गजं को वै न सेवेत मुकुन्दविक्रमम् ॥११॥
यस्यास्ति भक्तिर्भगवत्यकिंचना सर्वैर्गुणैस्तत्र समासते सुराः ।
हरावभक्तस्य कुतो महद्गुणा मनोरथेनासति धावतो बहिः ॥१२॥
हरिर्हि साक्षाद्भगवान् शरीरिणामात्मा झषाणामिव तोयमीप्सितम् ।
हित्वा महांस्तं यदि सज्जते गृहे तदा महत्त्वं वयसा दम्पतीनाम् ॥१३॥
तस्माद्रजोरागविषादमन्युमानस्पृहाभयदैन्याधिमूलम् ।
हित्वा गृहं संसृतिचक्रवालं नृसिंहपादं भजताकुतोभयम् इति ॥१४॥

केतुमालेऽपि भगवान् कामदेवस्वरूपेण लक्ष्म्याः प्रियचिकीर्षया प्रजापतेर्दुहितॄणां पुत्राणां तद्वर्षपतीनां पुरुषायुषाहोरात्रपरिसंख्यानां यासां गर्भा महापुरुषमहास्त्रतेजसोद्वेजितमनसां विध्वस्ता व्यसवः संवत्सरान्ते विनिपतन्ति ॥ १५ ॥ अतीव सुललितगतिविलासविलसितरुचिरहासलेशावलोकलीलया किंचिदुत्तम्भितसुन्दरभ्रूमण्डलसुभगवदनारविन्दश्रिया रमां

भद्रमुपशमं भजतु प्राप्नोतु । नोऽस्माकं मतिश्च त्वय्येव आवेश्यतां प्रविष्टा भवतु । अहैतुकी निष्कामा सती ॥ ९ ॥ नोऽस्माकं सङ्गः अगारादिषु मा स्यात् किन्तु भगवद्भक्तेष्वेव । यः भक्तसङ्गी प्राणवृत्त्या शरीरनिर्वाहमात्रेण तुष्टः सन् अदूरात् शीघ्रं यथा सिध्यति मुक्तो भवति तथा इन्द्रियप्रियो विषयासक्तो न । अगारं गृहम् ॥ १० ॥ येषां भगवद्भक्तानां सङ्गाल्लब्धं मुकुन्दचरित्रं श्रुतिभिः श्रवणेन्द्रियैः संस्पृशतां सेवमानानां पुंसाम् अन्तर्गतः हृद्गतोऽजः श्रीकृष्णः मानसं हरति आकर्षति श्लेषेण मानसं मल च हरति नाशयति । तीर्थं गङ्गादि तु अङ्गजं बहिर्मलं केवलं हरति न तु वासनाः । एतच्च भगवच्चरित्रस्य महत्त्व ख्यापनार्थं । तान् भगवद्भक्तान् तन्मुखरितं भगवच्चरितं चको न सेवेतेत्यन्वयः ॥ वै एवार्थं । कथंभूतम् । निजेति । असाधारण प्रभावम् । यद्वा । सत्त्वशोधकत्वात् तीर्थं मुकुन्दविक्रममित्यस्य विशेषण कार्यम् ॥ ११ ॥ अकिञ्चना निष्कामा । गुणैर्धर्मज्ञानादिभिः सह सुराः सम्यक् आसते नित्यं वसन्ति । महतां गुणा ज्ञानवैराग्यादयः । कथंभूतस्य । असति तुच्छे विषयसुखे बहिः संसारे धावतः कुतो गुणाः ॥ १२ ॥ झषाणां मीनानां तोयमिव हरिः शरीरिणामात्मा जीवनहेतुः तं हरिं हित्वा महान् पुत्रधनादिसमृद्धोऽपि यदि गृहे आसक्तो भवति तदा दम्पतीनां शूद्रादिषु प्रसिद्धं वयसैव केवल महत्त्वं स्यात् न तु ज्ञानादिभिः । महत्त्वं तु हरिभक्त्यैवेत्यर्थः ॥ १३ ॥ यस्मात् गृहे महत्त्वं नास्ति तस्माद्धेतोः रज आदीनां मूलं कारणं गृहं हित्वा नृसिंहपादं भजतेत्यन्वयः । तत्र रजस्तृष्णा । आधिर्मानसी व्यथा । कथंभूतम् गृहम् । संसृतीनां जन्ममरणादीनां चक्रवालं मण्डलमविच्छेदो यस्यात् । पादं च न कुतोऽपिभयं यस्तात् ॥१४॥ भगवान् लक्ष्म्याः तथा प्रजापते दुंहित्रादीनां तत्खण्डपतीनां च कथंभूतानाम् । पुरुषायुषा वर्षशते नयामि अहोरात्राणि तैः संख्या गणना येषाम् षट्त्रिंशत्सहस्रणाम् । प्रियचिकीर्षया कामदेव स्व-

रमयन्निन्द्रियाणि रमयते ॥ १६ ॥ तद्भगवतो मायामयं रूपं परमसमाधियोगेन रमा देवी संवत्सरस्य रात्रिषु प्रजापतेर्दुहितृभिरुपेताहःसु च तद्भर्तृभिरुपास्ते इदं चोदाहरति ॥ १७ ॥ ॐ ह्रां ह्रीं ह्रूं ॐ नमो भगवते हृषीकेशाय सर्वगुणविशेषैर्विलक्षितात्मने आकूतीनां चित्तीनां चेतसां विशेषाणां चाधिपतये षोडशकलायच्छन्दोमयायान्नमयायऽमृतमयाय सर्वमयाय सहसे ओजसे बलाय कान्ताय कामाय नमस्ते उभयत्र भूयात् ॥ १८ ॥

स्त्रियो व्रतैस्त्वा हृषिकेश्वरं स्वतो ह्याराध्य लोके पतिमाशासतेऽन्यम् ।
तासां न ते वै परिपान्त्यपत्यं प्रियं धनायूंषि यतोऽस्वतन्त्राः ॥ १९ ॥
स वै पतिः स्यादकुतोभयः स्वयं समन्ततः पाति भयातुरं जनम् ।
स एक एवेतरथा मिथो भयं नैवात्मलाभादधि मन्यते परम् ॥ २० ॥
या तस्य ते पादसरोरुहार्हणं निकामयेत्साखिलकामलम्पटा ।
तदेव रासीप्सितमीप्सितोऽर्चितो यद्भग्नयाञ्चा भगवन् प्रतप्यते ॥ २१ ॥
मत्प्राप्तयेऽजेशसुरासुरादयस्तप्यन्त उग्रं तप ऐन्द्रियेधियः ।
ऋते भवत्पादपरायणान्न मां विन्दन्त्यहं त्वद्धृदया यतोऽजित ॥ २२ ॥

रूपेणास्ते इत्यन्वयाः । यासां गर्भा क्षणलवाद्याः विनिपतन्ति । महास्त्रं कालचक्रं तस्य तेजसा उद्वेजितं भीतम् । तेनैव विध्वस्ता विगतप्राणाश्च । प्रजापतिः संवत्सरः तस्य पुत्र्यो रात्रिरूपाः । पुत्राश्च दिवसरूपाः ॥ १५ ॥ रमां रमयन स्वकीयानि इन्द्रियाणि रमयते आनन्दयति । कया । अतीव सुललितगत्या यो विलासो विहारस्तेन विकसितो रुचिरो हासलेशो मन्दस्मितं तत्पूर्विका अवलोकलीला अवलोकचातुर्यं तया किञ्चिदुत्तुङ्गितसुन्दरभ्रूमण्डलेन सुभगं यद्वदनारविन्दं तस्य सुषुमया ॥ १६ ॥ मायामयं कृपा प्रचुरं तद्रूपं रमा देवी रात्रिषु रात्र्यभिमानिदेवताभिः सहिता अहःसु च तद्भर्तृभि दिनाधिष्ठातृ देवैः सहिता उपास्ते इदं वक्ष्यमाणं जपति । कथंभूताभिः देवताभिः । प्रजापतेः संवत्सरस्य दुहितृभिः ॥१७॥ कामाय कान्ताय मत्पतये ते तुभ्यम् उभयत्र पुरस्तात् पृष्ठतश्च नमो भूयादित्यन्वयः । कथंभूताय । गुणविशेषैरसाधारणगुणैः सर्वेश्वरत्वादिभि र्लक्षित आत्मा स्वरूपं यस्य । पुनः क्रमेण मम आकूतीनां कर्मेन्द्रियाणां ज्ञानेन्द्रियाणाम् अन्तकरणचतुष्टयस्य तद्वृत्तीनां चाधिपतये नियन्त्रे । षोडशसु सूक्ष्मेषु शरीरेषु कला अंशो जीवो यस्य । सहैति मच्चित्तेन्द्रियदेहसामर्थ्यं प्रदात्रे ॥ १८ ॥ स्वयं हृषीकाणामीश्वरं पतिं सन्तं त्वामाराध्य याः स्त्रियोऽन्यं पतिं प्रार्थयन्ते तासामपत्यादीनि ते यतयो नैव पातुं शक्ताः यतस्तेऽस्वतन्त्राः कालग्रस्ताः । अन्यच्च प्रियं वस्तु ॥ १९ ॥ यः स्वयमकुतोभयः भयातुरं जन च पाति स एव वस्तुतः पतिः स च भवानेक एव नान्य इत्यन्वयः यतो भवान् आत्मलाभात् परमन्यत् अधिकं न मन्यते । इतरथा अन्यथा आत्मदर्शनाभावेन विषयासक्त्या मिथो जनानां भयं भवतीत्यर्थः ॥ २० ॥ या स्त्री तस्योत्तलक्षणस्य ते तव चरणकमलपूजामेव नितरां कामयेत् न फलान्तरं सा अखिलकामानां लम्पटा प्राप्तौ चतुरा । ईप्सितं पत्यपत्यादिकम् ईप्सितः प्राप्तुमपेक्षितः सन्नर्चितश्चेत्तर्हि तदेवैकं फलं रासि ददासि न नित्यम् । यत् यतः भग्नयाचितार्था सा प्रतप्यते दुःखं प्राप्नोतीत्यर्थः ॥२१॥ हे अजित अजो ब्रह्मा तदादयः कठोरं तपः कुर्वन्ति । कथंभूताः । ऐन्द्रिये विषयसुखे एव धीर्येषाम् । कण्ठे काल इतिवदलुक्समासः ।

स त्वं ममाप्यच्युत शीर्ष्णि वन्दितं कराम्बुजं यत्त्वदधायि सात्वताम् ।
बिभर्षि मां लक्ष्म वरेण्य मायया क ईश्वरस्येहितमूहितुं विभुः इति ॥ २३ ॥

रम्यके च भगवतः प्रियतमं मात्स्यमवताररूपं तद्वर्षपुरुषस्य मनोः प्राक् प्रदर्शितं स इदानीमपि महता भक्तियोगेनाराधयतीदं चोदाहरति ॥ २४ ॥ ॐ नमो भगवते मुख्यतमाय नमः सत्वाय प्राणायौजसे सहसे बलाय महामत्स्याय नम इति ॥ २५ ॥

अन्तर्बहिश्चाखिललोकपालकैरदृष्टरूपो विचरस्युरुस्वनः ।
स ईश्वरस्त्वं य इदं वशेऽनयन्नाम्ना यथा दारुमयीं नरः स्त्रियम् ॥ २६ ॥
यं लोकपालाः किल मत्सरज्वरा हित्वा यतन्तोऽपि पृथक् समेत्य च ।
पातुं न शेकुर्द्विपदश्चतुष्पदः सरीसृपं स्थाणु यदत्र दृश्यते ॥ २७ ॥
भवान् युगान्तार्णव ऊर्मिमालिनि क्षोणीमिमामोषधिवीरुधां निधिम् ।
मया सहोरु क्रमतेऽज ओजसा तस्मै जगत्प्राणगणात्मने नमः इति ॥ २८ ॥

हिरण्मयेऽपि भगवान् निवसति कूर्मतनुं बिभ्राणस्तस्य तत्प्रियतमां तनुमर्यमा सह वर्षपुरुषैः पितृगणाधिपतिरुपधावति मन्त्रमिमं चानुजपति ॥२९॥ ॐ नमो भगवते अकूपाराय सर्वसत्त्वगुणविशेषणायानुपलक्षितस्थानाय नमो वर्ष्मणे नमो भूम्ने नमो नमोऽवस्थानाय नमस्ते ॥ ३० ॥

ऋते विना अन्ये न विन्दन्ति मद्विभूतीर्न लभन्ते यतोऽहं त्वत्परायणा त्वदनुवर्तिनमेवावलोकयामि नान्यमित्यर्थः ॥ २२ ॥ त्वत् इति पञ्चमी तृतीयार्थे । त्वया यत् कराम्बुजं सात्वतां भक्तानां शीर्ष्णि व्यधायि तत् ममापि शीर्ष्णि निधेहीति शेषः । क ंभूतम् । वन्दितं सर्वैः संस्तुतम् । लक्ष्म लक्ष्मरूपां मां वक्षसि । लक्ष्म स्वर्णरेखारूपम् । ते ईहितमभिप्रायम् ईहितुं ज्ञातुं को विभुः कः समर्थः नकोऽपीत्यर्थः । अत्रेति शब्दः श्लोकात् पृथक् लेख्योऽन्यथा छन्दोभङ्गः स्यात् । मायया कृपया ॥ २३ ॥ पुरुषस्य स्वामिनः मनोः वैवस्वतस्य प्राक् प्रलये । स मनुः । इदं वक्ष्यमाणम् उदाहरति जपति ॥ २४ ॥ मुखे भवः मुख्यः, अतिशयेन मुख्यो मुख्यतमस्तस्मै प्रथमावताराय । ओज आद्याः क्रमेण इन्द्रियमनो देहशक्तयस्तासामधिष्ठात्रे । प्राणाय जीवयित्रे ॥ २५ ॥

यथा नरः सूत्रेण काष्ठपुत्तलिकां वशे नयति तथा यः नाम्ना विधिनिषेधाश्रयीभूतेन ब्राह्मणादिनाम्ना इदं विश्व वशेऽनयत् नियमितवान् स वेश्वरस्त्वमदृष्टरूपः सन् प्राणरूपेण सर्वस्यान्तः वायुरूपेण बहिश्च विचरसीत्यन्वयः । उरुर्महान् स्वनो वेदात्मको नादो यस्य सः ॥ २६ ॥ किल प्रसिद्धा इन्द्रादयः यं त्वां हित्वा पृथक् मिलित्वा वा यतन्तोऽपि अत्र जगति यत् किञ्चिद् दृश्यते द्विपदादि तत् किञ्चिदपि पातुं न शेकुः स त्वमेव प्राणरूपेण पालकः ईश्वरश्चेत्यनुषङ्गः । सरीसृपं जङ्गमम् । स्थाणुं स्थावरम् ॥ २७ ॥ यो भवान् अजः इमां क्षोणीं महीमयीं न त्वं मया सह धृत्वा ओजसा वेगेन उरु अधिकं यथा भवति तथा प्रलयार्णवे क्रमते विचरति तस्मै ते नमः । निधिमाश्रयभूताम् । ऊर्मिमालिनि भीषणतरङ्गान्विते । जगतो यः प्राणगणस्तस्य नियन्त्रे । क्षोणी पातुं क्रमते उत्सहते इति वा ॥ २८ ॥ अर्यमा नाम । सा चासौ प्रियतमा ताम् । उपधावति सेवते ॥ २९ ॥ न कूपे आरो गतिर्यस्य तस्मै

यद्रूपमेतन्निजमाययाऽर्पितमर्थस्वरूपं बहुरूपरूपितम् ।
संख्या न यस्यास्त्ययथोपलम्भनात्तस्मै नमस्तेऽव्यपदेशरूपिणे ॥ ३१ ॥
जरायुजं स्वेदजमण्डजोद्भिदं चराचरं देवर्षिपितृभूतमैन्द्रियम् ।
द्यौः खं क्षितिः शैलसरित्समुद्रद्वीपग्रहर्क्षेत्यभिधेय एकः ॥ ३२ ॥
यस्मिन्नसंख्येयविशेषनामरूपाकृतौ कविभिः कल्पितेयम् ।
संख्या यया तत्त्वदृशाऽपनीयते तस्मै नमः सांख्यनिदर्शनाय ते । इति ॥ ३३ ॥

उत्तरेषु च कुरुषु भगवान् यज्ञपुरुषः कृतवराहरूप आस्ते तं तु देवी हैषा भूः सह कुरुभिरस्खलितभक्तियोगेनोपधावति इमां च परमामुपनिषदमावर्तयति ॥ ३४ ॥ ॐ नमो भगवते मन्त्रतत्त्वलिङ्गाय यज्ञक्रतवे महाध्वरावयवाय महापुरुषाय नमः कर्मशुक्लाय त्रियुगाय नमस्ते ॥ ३५ ॥

यस्य स्वरूपं कवयो विपश्चितो गुणेषु दारुष्विव जातवेदसम् ।
मन्थन्ति मन्था मनसा दिदृक्षवो गूढं क्रियार्थैर्नम ईरितात्मने ॥ ३६ ॥

अकूपाराय कूर्मरूपाय । सर्वसत्त्वगुणः शुद्धसत्त्वं विशेषणमाकारो मूर्तिर्यस्य । वारिचरत्वात् नोपलक्षितेति । वर्ष्मणे गरीयसे । अकारपदच्छेदेन प्राकृतदेहरहिताय वा । शरीरं वर्ष्म विग्रहः । इत्यमरात् । अवस्थानाय आधाराय । नमस्त्रयं गुणत्रयनिवृत्तिं सूचयति । भूम्ने व्यापकाय ॥ ३० ॥ अर्थस्वरूपं दृश्यं पृथिव्यादि एतद्विश्वं यस्यैव रूपमस्ति । किञ्च अयथा मिथ्यैव उपलम्भनात् स्वप्नवत्प्रतीयमानत्वात् यस्य संख्या गणनापि नास्ति यः कश्चन पदार्थोऽभिधीयते तस्मै अव्यपदेशरूपिणे अनिर्वचनीयरूपाय ते नमः । व्यपदिश्यते वर्ण्यते इति व्यपदेशः अव्यपदेशं वक्तुमशक्यम् । अर्पितं प्रकाशितम् ॥ ३१ ॥ जरायुजादि ग्रहर्क्षमित्यन्तेषु तत्तत् नाम्नाऽभिधेय स्त्वमेक एव न त्वद्व्यतिरिक्तं किञ्चिदस्ति । 'सर्वं खल्विदं ब्रह्म इति श्रुते। ऐन्द्रियम् इन्द्रियवर्गः । द्यौः स्वर्गः । खमन्तरिक्षम् भुवर्लोकः । ग्रहाः सूर्यादयः ऋक्षाणि अश्विन्यादीनि । ग्रहर्क्ष मित्येव प्रशस्तः प्रचीन पाठः ॥ ३२ ॥ यस्मिन् त्वयि कपिलादिभिः विवेकाय कल्पिता इयं संख्या चतुर्विंशत्याख्या यया तत्त्वदृशा तत्त्वज्ञानेन अपनीयते तस्मै ते नम इत्यन्वयः । कथंभूताय । सांख्यनिदर्शनाय ज्ञानस्वरूपाय । कथंभूते त्वयि । असंख्येया अनन्ता विशेषा भेदा येषां तानि तथाभूतानि नामानि रूपाणि आकृतयश्च यस्य तस्मिन् ॥ ३३ ॥ कुरुषु बहुवचनम् अवान्तरदेशाभिप्रायेण । तं तु एषा भूः उपधावति सेवते । हेति हर्षे । इमाम् आवर्तयति पुनः पुनः जपति । उपनिषत्तु षट्कर्णागोचरे मन्त्रे । इति धरणिः ॥ ३४ ॥ मन्त्रैस्तत्त्वेन याथार्थ्यतो लिङ्ग्यते ज्ञायते । यज्ञा अयूपा क्रतवः सयूपाः । कर्मणा पृथिव्युद्धरणेन शुक्लाय देदीप्यमानाय । त्रीणि युगानि प्राकट्यस्थानानि यस्य कलौ छन्नत्वात् ॥ ३५ ॥

दिदृक्षवः कवयः यस्य स्वरूपं मनसा मथ्नन्ति विचिन्वन्ति पश्यन्तीत्यर्थः काष्ठेषु अग्निमिव । कथंभूतेन मथ्ना मन्थनदण्डरूपविवेकसाधनेन । कथंभूतं रूपम् । गुणेषु देहादिसंघातेषु क्रियार्थैः कर्मभिस्तत्फलैश्च गूढं तिरोहितम् । एवम् ईरितः मन्थनात् प्रकटित आत्मा स्वरूपं यस्य तस्मै नमः ॥ ३६ ॥

द्रव्यक्रियाहेत्वयनेशकर्तृभिर्मायागुणैर्वस्तुनिरीक्षितात्मने ।
अन्वीक्षयाऽङ्गातिशयात्मबुद्धिभिर्निरस्तमायाकृतये नमो नमः ॥ ३७ ॥
करोति विश्वस्थितिसंयमोदयं यस्येप्सितं नेप्सितमीक्षितुर्गुणैः ।
माया यथायो भ्रमते तदाश्रयं ग्राव्णो नमस्ते गुणकर्मसाक्षिणे ॥ ३८ ॥
प्रमथ्य दैत्यं प्रतिवारणं मृधे यो मां रसाया जगदादिसूकरः ।
कृत्वाग्रदंष्ट्रे निरगादुदन्वतः क्रीडन्निवेभः प्रणतास्मि तं विभुम् इति ॥ ३९॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां पञ्चमस्कन्धे भुवनकोशवर्णनं नामाष्टादशोऽध्यायः ॥१८॥

अथैकोनविंशोऽध्यायः

श्रीशुक उवाच

किंपुरुषे वर्षे भगवन्तमादिपुरुषं लक्ष्मणाग्रजं सीताभिरामं रामं तच्चरणसन्निकर्षाभिरतः परमभागवतो हनुमान् सह किम्पुरुषैरविरतभक्तिरुपास्ते ॥ १ ॥ आर्ष्टिषेणेन सह गन्धर्वैरनुगीयमानां परमकल्याणीं भर्तृभगवत्कथां समुपशृणोति स्वयं चेदं गायति ॥ २ ॥ ॐ नमो भगवते उत्तमश्लोकाय नम आर्यलक्षणशीलव्रताय नम उपशिक्षितात्मन उपासितलोकाय नमः साधुवादनिकषणाय नमो ब्रह्मण्यदेवाय महापुरुषाय महाराजाय नम इति ॥ ३ ॥

अङ्ग हे भगवन् ! अन्वीक्षया आत्मविचारेण । अतिशया अतिशयिता आत्मनिष्ठा बुद्धिर्येषां तैः पुरुषैः मायागुणैर्मायाकार्यैः एतैः द्रव्यादिभिर्वस्तुत्वेन निरीक्षितः जडानां प्रवर्तकत्वेन ज्ञात आत्मा स्वरूपं यस्य तस्मै ते नम इत्यन्वयः । कथंभूताय । निरस्ता मायाकृतिः मायाकार्यं मायिकप्रपञ्चो यस्मात्तस्मै । द्रव्यं विषयः । क्रिया इन्द्रियव्यापारः हेतुर्देवता अयनं देहः ईशः कालः कर्ता अहङ्कारस्तैः । यद्वा । अङ्गेत्येकं पदम् । अङ्गैः अष्टाङ्गैः ॥ ३७ ॥ ईक्षितुः साक्षिणः यस्य तव जीवार्थमीप्सितं स्वार्थं तु नेप्सितं विश्वस्थित्यादिकं गुणैः माया करोति तस्मै ते नम इत्यन्वयः । अत्र दृष्टान्तः । यथा अयो लोहं ग्राव्णः चुम्बकमणेः निमित्तात् तदाश्रयं तत्सम्मुखं सत् भ्रमते तथा जडा मायाऽपि त्वदीक्षणेन सक्रिया भवतीत्यर्थः । कथंभूताय ते । कर्मणां जीवादृष्टानां च ॥ ३८ ॥ यो भवान् जगतामादिः कारणभूतः सूकरः सन् रसायाः रसातलात्सकाशात् मां पृथ्वीं दंष्ट्राग्रे निधाय उदन्वतः समुद्रात् निरगात् तं विभुं प्रणतास्मीत्यन्वयः । कथंभूतः । तत्र मृधे असुरेण जाते संग्रामे प्रतिवारणं प्रतिगजतुल्यं दैत्यं हिरण्याक्षं प्रमथ्य हत्वा क्रीडन् सन् इभो गज इव यः स्थितः तं प्रणताऽस्मीत्यन्वयः ॥ ३९ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे गूढार्थदीपिन्यामष्टादशोऽध्यायः ।

ऊनविंशे किंपुरुषे भारते च यथाक्रमम् ।
उपास्योपासकत्वं च भारतश्रेष्ठतोच्यते ॥१॥

वर्षे खण्डे सीतयाऽभिरामः सुन्दरः । सीतामभितो रमयतीति वा । तस्य चरणयोः सन्निकर्षे सेवायां संल्लग्नः ॥ १ ॥ आर्ष्टिषेणो गन्धर्वराजः स एव राजर्षिरपि भारतोक्तः जाम्बवान् वा इत्येके । भर्ता चासौ भगवान् तस्य कथाम् ॥२॥ उत्तमैर्नारदादिभिः श्लोक्यते स्तूयते । उत्तमः श्लोको यशो वा यस्य

यत्तद्विशुद्धानुभवमात्रमेकं स्वतेजसा ध्वस्तगुणव्यवस्थम् ।
प्रत्यक् प्रशान्तं सुधियोपलम्भनं ह्यनामरूपं निरहं प्रपद्ये ॥ ४ ॥
मर्त्यावतारस्त्विह मर्त्यशिक्षणं रक्षोवधायैव न केवलं विभोः ।
कुतोऽन्यथा स्यू रमतः स्व आत्मनः सीताकृतानि व्यसनानीश्वरस्य ॥ ५ ॥
न वै स आत्माऽऽत्मवतां सुहृत्तमः सक्तस्त्रिलोक्यां भगवान् वासुदेवः ।
न स्त्रीकृतं कश्मलमश्नुवीत न लक्ष्मणं चापि विहातुमर्हति ॥ ६ ॥
न जन्म नूनं महतो न सौभगं न वाङ् न बुद्धिर्नाकृतिस्तोषहेतुः ।
तैर्यद्विसृष्टानपि नो वनौकसश्चकार सख्ये बत लक्ष्मणाग्रजः ॥ ७ ॥
सुरोऽसुरो वाप्यथ वानरो नरः सर्वात्मना यः सुकृतज्ञमुत्तमम् ।
भजेत रामं मनुजाकृतिं हरिं य उत्तराननयत्कोसलान्दिवम् इति ॥ ८ ॥

भारतेऽपि वर्षे भगवान् नरनारायणाख्य आकल्पान्तमुपचितधर्मज्ञानवैराग्यैश्वर्योपश-

---

यस्य । 'पद्ये यशसि च श्लोकः' इति कोशात् । आर्याणि सामुद्रोक्तानि लक्षणानि चरणतलगतध्वज-वज्रादीनि । उपशिक्षितो वशीकृत आत्मा मनो येन । उपासितोऽनुसृतः । साधुवादस्य साधुत्वस्य । निकषणाय निकषाश्मवत् (कसौटी) परीक्षणस्थानाय । इतोऽति रिक्ता साधुता नास्तीत्यर्थः ॥ ३ ॥ यदेकमद्वितीयं वेदान्तेषु प्रसिद्धं तत्त्वं तदहं प्रपद्ये शरणं व्रजामीत्यन्वयः । कथंभूतम् । अनुभव एव मात्रा स्वरूपं यस्य । प्रति अञ्चतीति प्रत्यक् सर्वजीवाभिमुखम् । यद्वा । प्रत्यक् जीवः प्रशान्तो यस्मात् स्मरणीयादित्येकं पदं वा । उपलभ्यते इत्युपलम्भनम् 'दृश्यते त्वग्र्यया बुद्ध्या' इति श्रुतेः । ध्वस्ता दूरतो निरस्ता गुणानां विविधा जाग्रदाद्या अवस्था यस्मात् । निरहं निरहङ्कारम् ॥ ४ ॥ विभोः श्रीरामस्य शिक्षणं शिक्षार्थं पित्राज्ञापालनादिरूपेण । अन्यथा शिक्षणत्वाभावे स्वस्वरूपे रममाणस्य परमात्मनो रामस्य व्यसनानि दुःखानि कुतः स्युः । कृतानि विरहजनितानि ॥ ५ ॥ भगवान् रामः क्वापि न सक्तः यत आत्मवतां ज्ञानिनामात्मा आत्मत्वेन प्रकाशकः । अतः सीतावियोगकृतं कश्मलं मोहजनितदुःखं नाश्नुवीत नैव प्राप्नुयात् । लक्ष्मणं चापि त्यक्तुं नार्हति । किन्तूभयं कृतम् नैतद् युज्येत । एवं हि कथा श्रूयते कदाचित् रामसमीपं मन्त्रणार्थमागतेन देवदूतेन विज्ञापितम् । आवयोर्मन्त्रणासमये यदि कोप्यगतः स त्वया वध्यस्तदैव द्वारि स्थितं लक्ष्मणमागतं दुर्वाससं विज्ञापयितुं प्रविष्टं रामो हन्तुमुद्यतः वसिष्ठवचनात् तत्याजेति एतच्च न घटेत ॥ ६ ॥ सत्कुलजन्मादि महतः श्रीरामस्य सन्तोष-हेतु र्न भवति यतस्तै र्विसृष्टानापि नो वनचरान् बत अहो रामः सखित्वे चकारेत्यन्वयः । सौभगं सौन्दर्यम् । वाक्चातुर्यम् । बुद्धिर्नैपुण्यम् । आकृतिर्जातिश्च क्रमेणार्थाः ॥७॥ अथ तस्मात् । सुरादीनां मध्ये यः कोऽपि स सर्वात्मना हरिं दुःखहरं श्रीराममेव भजेतेति लिङा विधिर्दर्शितः । कथंभूतः । यः उत्तरान् कोसलान् अयोध्यावासिनः सशरीरानेव दिवं वैकुण्ठमनयत् । सुकृतज्ञम् । भक्तानां सुकृतं भजनमेव जानाति न तु अपराधम् ॥ ८ ॥ भगवान् नारायणः आत्मवतां भक्तानामनुकम्पया हेतुना अव्यक्तगतिः तिरोहितरूपः सन् कल्पपर्यन्तं तपश्चरतीत्यन्वयः । किमर्थम् । तेषामनुग्रहायताननुग्रहीतुं तपसि

मोपरमात्मोपलम्भनमनुग्रहायात्मवतामनुकम्पया तपोऽव्यक्तगतिश्चरति ॥९॥ तं भगवान् नारदो वर्णाश्रमवतीभिर्भारतीभिः प्रजाभिर्भगवत्प्रोक्ताभ्यां सांख्ययोगाभ्यां भगवदनुभावोपवर्णनं सावर्णेरुपदेक्ष्यमाणः परमभक्तिभावेनोपसरति इदं चाभिगृणाति ॥ १० ॥ ॐ नमो भगवते उपशमशीलायोपरतानात्म्याय नमोऽकिंचनवित्ताय ऋषिऋषभाय नरनारायणाय परमहंसपरमगुरवे आत्मारामाधिपतये नमो नम इति ॥ ११ ॥

कर्तास्य सर्गादिषु यो न बध्यते न हन्यते देहगतोऽपि दैहिकैः ।
द्रष्टुर्न दृग्यस्य गुणैर्विदूष्यते तस्मै नमोऽसक्तविविक्तसाक्षिणे ॥ १२ ॥
इदं हि योगेश्वर योगनैपुणं हिरण्यगर्भो भगवान् जगाद यत् ।
यदन्तकाले त्वयि निर्गुणे मनो भक्त्या दधीतोज्झितदुष्कलेवरः ॥ १३ ॥
यथैहिकामुष्मिककामलम्पटः सुतेषु दारेषु धनेषु चिन्तयन् ।
शङ्केत विद्वान् कुकलेवरात्ययाद्यस्तस्य यत्नः श्रम एव केवलम् ॥ १४ ॥
तन्नः प्रभो त्वं कुकलेवरार्पितां त्वन्माययाहं ममतामधोक्षज ।
भिन्द्याम येनाशु वयं सुदुर्भिदां विधेहि योगं त्वयि नः स्वभावम् इति ॥१५॥

भारतेऽप्यस्मिन् वर्षे सरिच्छैलाः सन्ति बहवो मलयो मङ्गलप्रस्थो मैनाकस्त्रिकूट ऋषभः कूटकः कोळकः सह्यो देवगिरिर्ऋष्यमूकः श्रीशैलो वेङ्कटो महेन्द्रो वारिधारो विन्ध्यः

प्रवर्तयितुमित्यर्थः अतोऽनुकम्पाशब्देन न पौनरुक्त्यम् । कथंभूतं तपः । उपचितैर्वर्धितैः धर्मादिभिः आत्मा उपलभ्यते येन तत् । उपशम इन्द्रियसंयमः । उपरमो मनसः ॥ ९ ॥ भगवान् नारदः प्रजाभिः मुनिरूपाभिः सह तं भगवन्तमुपसरति सेवते इदं वक्ष्यमाणं च अभिगृणाति जपतीत्यन्वयः । किं करिष्यमाणः । सावर्णेः माविनः मनोः पञ्चरात्रम् उपदेक्ष्यमाणः उपदेशं कर्तुम् । शेषे षष्ठी । कथंभूतम् । ताभ्यां सह भगवदनुभाव उपवर्ण्यते येन तत् ॥ १० ॥ अनात्म्यं देहाध्यासलक्षणम् । अकिञ्चना भक्ताः । परमहंसा योगिनः । आत्मारामा ज्ञानिनः । ऋषमः श्रेष्ठः ॥ ११ ॥ अस्य विश्वस्य कर्ताऽपि यो न वध्यते दैहिकैः क्षुत्पिपासादिभिः यो न हन्यते नाभिभूयते । द्रष्टुः साक्षिणः यस्य दृष्टिः गुणैर्विपर्ययेन विक्रियते तस्मै नम इत्यन्वयः । कथंभूताय । असक्तश्चासौ विविक्तश्च साक्षी च तस्मै । उपरिपदेषु क्रमेण असक्तत्वं विविक्तत्वं पृथक्त्वं साक्षित्वं च बोध्यम् ॥ १२ ॥ हे योगेश्वर ब्रह्मा यत् योगकौशलं जगाद तत् इदमेव । किं तत् । अन्तकाले पुमान् भक्त्या त्वयि मनो दधती धारयेदिति यत् । कथंभूतः सन् । उज्झितेति वर्तमाने निष्ठा । त्यक्तदेहाभिमानः सन् । यद्वा । यदिति शत्रन्तम् । यत् गच्छत् चपलमित्यर्थः ॥ १३ ॥ ऐहिकाः पुत्रादयः आमुष्मिकाः स्वर्गादयः ये कामास्तेषु लम्पटः आसक्तः सन् सुतादिषु योगक्षमं चिन्तयन् कुत्सितस्य कलेवरस्य नाशात् अज्ञो यथा शङ्कते बिभेति तथा विद्वानपि शङ्केत तस्य यत्नः शास्त्राभ्यासादिरूपः श्रम एव निष्फल इत्यर्थः ॥ १४ ॥ तत् तस्मात् हे प्रभो त्वयि स्वभावसिद्धं प्रेमलक्षणं योगं नोऽस्माकं त्वमेव विधेहि सम्पादय । येन योगेन वयम् अहन्तां ममतां च भिन्द्याम त्यजेम । सुदुर्भिदां उपायान्तरैर्भेत्तु त्यक्तुमशक्याम् । अर्पितां निरूढाम् ॥ १५ ॥ इलावृतवत् अस्मिन्नपि वर्षे । मलयादारभ्य कामगिरिपर्यन्तं सप्तविंशतिः शैलाः । नितम्बाः तटप्रान्ताः ॥ १६ ॥

शुक्तिमानृक्षगिरिः पारियात्रो द्रोणश्चित्रकूटो गोवर्धनो रैवतकः ककुभो नीलो गोकामुख इन्द्रकीलः कामगिरिरिति चान्ये च शतसहस्रशः शैलास्तेषां नितम्बप्रभवा नदा नद्यश्च सन्त्यसंख्याताः ॥ १६ ॥ एतासामपो भारत्यः प्रजा नामभिरेव पुनन्तीनामात्मना चोपस्पृशन्ति ॥ १७ ॥ चन्द्रवशा ताम्रपर्णी अवटोदा कृतमाला वैहायसी कावेरी वेणी पयस्विनी शर्करावर्ता तुङ्गभद्रा कृष्णा वेण्या भीमरथी गोदावरी निर्विन्ध्या पयोष्णी तापी रेवा सुरसा नर्मदा चर्मण्वती सिन्धुरन्धः शोणश्च नदौ महानदी वेदस्मृतिर्ऋषिकुल्या त्रिसामा कौशिकी मन्दाकिनी यमुना सरस्वती दृषद्वती गोमती सरयू रोधस्वती सप्तवती सुषोमा शतद्रूश्चन्द्रभागा मरुद्वृधा वितस्ता असिक्नी विश्वेति महानद्यः ॥ १८ ॥ अस्मिन्नेव वर्षे पुरुषैर्लब्धजन्मभिः शुक्ललोहितकृष्णवर्णेन स्वारब्धेन कर्मणा दिव्यमानुषनारकगतयो बह्व्य आत्मन आनुपूर्व्येण सर्वा ह्येव सर्वेषां विधीयन्ते यथावर्णविधानमपवर्गश्चापि भवति ॥ १९ ॥ योऽसौ भगवति सर्वभूतात्मन्यनात्म्येऽनिरुक्तेऽनिलयने परमात्मनि वासुदेवेऽनन्यनिमित्तभक्तियोगलक्षणो नानागतिनिमित्ताऽविद्याग्रन्थिरन्धनद्वारेण यदा हि महापुरुषपुरुषप्रसंगः ॥ २० ॥

एतदेव हि देवा गायन्ति—

अहो अमीषां किमकारि शोभनं प्रसन्न एषां स्विदुत स्वयं हरिः।
यैर्जन्म लब्धं नृषु भारताजिरे मुकुन्दसेवौपयिकं स्पृहा हि नः॥ २१ ॥

किं दुष्करैर्नः क्रतुभिस्तपोव्रतैर्दानादिभिर्वा द्युजयेन फल्गुना।
न यत्र नारायणपादपङ्कजस्मृतिः प्रमुष्टाऽतिशयेन्द्रियोत्सवात् ॥ २२ ॥

कल्पायुषां स्थानजयात्पुनर्भवात् क्षणायुषां भारतभूजयो वरम्।
क्षणेन मर्त्येन कृतं मनस्विनः संन्यस्य संयान्त्यभयं पदं हरेः॥ २३ ॥

पुनन्तीनाम् एतासां नदीनाम्। आत्मना देहेन। उपस्पृशन्ति आचमनादिना ॥ १७ ॥ गद्येऽस्मिन् अन्ध शोणौ नदौ विहाय चन्द्रवशादिविश्वान्ता एकचत्वारिंशन्नद्यः। नर्मं सुखं ददातीति व्युत्पत्त्या नर्मदेति चर्मण्वत्या विशेषणं तेन रेवाशब्देन न पौनरुक्त्यम् ॥ १८ ॥ पुरुषैः स्पारब्धेन स्वानुष्ठितेन सात्त्विकादि कर्मणा आत्मनः स्वस्य बह्व्यः दिव्यादिगतयः आनुपूर्व्येण पर्यायेण विधीयन्ते सम्पाद्यन्ते वेदेनेति-शेषः ॥ १९ ॥ योऽसौ अपवर्गः स च वासुदेवे—अनन्यनिमित्तो निष्कामः भक्तियोगलक्षणः भक्तियोगप्राप्यः। 'भक्तिर्ज्ञानाय कल्पते ज्ञानान्मोक्ष इति सिद्धान्तात्। स च कथं भवति। यदा नानागतीनां निमित्तं कारणं योऽविद्याग्रन्थिस्तस्य छेदनद्वारेण विष्णुभक्तसङ्गो भवति तदा। कथंभूते वासुदेवे। आत्मनि देहे भवमात्म्यं रागद्वेषादि तद्रहिते। अनिरुक्ते अनिर्वचनीये। पुनश्च अनिलयने आधारान्तर-रहिते ॥ २० ॥ एतदेव भारतस्य श्रेष्ठत्वम्। अहो आश्चर्ये। अमीषाम् अमीभिः शेषे कर्तरि षष्ठी। शोभन पुण्यम्। उतस्वित् अथवा। नृषु मध्ये। भारतजिरे भारतखण्डे। औपयिकमुपयोगि। नोऽस्माकं स्पृहैव न तु तत्प्राप्तिः ।। २१ ॥ दुष्करैः दुःसाध्यैः क्रतुभिर्यज्ञादिभिः फल्गुना तुच्छेन द्युजयेन स्वर्गप्राप्त्या वा नोऽस्माकं किं न किञ्चित्फलम्। कुतः। यत्र स्मृतिर्नास्ति प्रत्युत सा अतिशयात् अत्याधिक्यात् विषयभोगात् प्रमुष्टा विलुप्ताऽभूत् ॥ २२ ॥ पुनर्भवात् पुनरावृत्तियुक्तात् कल्पायुषां ब्रह्मादीनामपि स्थानजयात् लोकप्राप्तेः सकाशात् भारतभूप्राप्तिः श्रेष्ठा। कुतः। यत्र मर्त्येनापि देहेन क्षणेनैव कालेन विवेकिनः हरौ कृतं संन्यस्य कर्म समर्प्य तस्य निर्भयं पदं वैकुण्ठं यान्ति ॥ २३ ॥

न यत्र वैकुण्ठकथासुधापगा न साधवो भागवतास्तदाश्रयाः ।
न यत्र यज्ञेशमखा महोत्सवाः सुरेशलोकोऽपि न वै स सेव्यताम् ॥ २४ ॥
प्राप्ता नृजातिं त्विह ये च जन्तवो ज्ञानक्रियाद्रव्यकलापसम्भृताम् ।
न वै यतेरन्नपुनर्भवाय ते भूयो वनौका इव यान्ति बन्धनम् ॥ २५ ॥
यैः श्रद्धया बर्हिषि भागशो हविर्निरुप्तमिष्टं विधिमन्त्रवस्तुतः ।
एकः पृथङ्नामभिराहुतो मुदा गृह्णाति पूर्णः स्वयमाशिषां प्रभुः ॥ २६ ॥
सत्यं दिशत्यर्थितमर्थितो नृणां नैवार्थदो यत्पुनरर्थिता यतः ।
स्वयं विधत्ते भजतामनिच्छतामिच्छापिधानं निजपादपल्लवम् ॥ २७ ॥
यद्यत्र नः स्वर्गसुखावशेषितं स्विष्टस्य सूक्तस्य कृतस्य शोभनम् ।
तेनाजनाभे स्मृतिमज्जन्म नः स्याद् वर्षे हरिर्यद्भजतां शं तनोति ॥ २८॥

श्रीशुक उवाच

जम्बूद्वीपस्य च राजन्नुपद्वीपानष्टौ हैक उपदिशन्ति सगरात्मजैरश्वान्वेषण इमां महीं परितो निखनद्भिरुपकल्पितान् ॥ २९ ॥ तद्यथा स्वर्णप्रस्थश्चन्द्रशुक्ल आवर्तनो रमणको मन्दहरिणः पाञ्चजन्यः सिंहलो लङ्केति ॥३०॥ एवं तव भारतोत्तम जम्बूद्वीपवर्षविभागो यथोपदेशमुपवर्णित इति ॥ ३१ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां पञ्चमस्कन्धे जम्बूद्वीपवर्णनं नामैकोनविंशोऽध्यायः॥१९॥

कथैव सुधापगाः अमृतनद्यो न भक्ता न यज्ञेशो विष्णुः तस्य पूजाश्च न सन्ति स ब्रह्मलोकोऽपि न वै नैव सेव्यतामित्यन्वयः ॥ २४ ॥ ये तु इह भारते नृजातिं मनुष्ययोनिं प्राप्य अपुनर्भवाय मोक्षाय न यतेरन् न यतन्ते ते वनौकाः[1] पक्षिण इव पुनः पुनः बन्धनं यान्तीत्यन्वयः । कथंभूताम् । श्रवणादिसर्वेन्द्रियैः परिपूर्णाम् । द्रव्यमधिभूतम् ॥ २५ ॥ बर्हिषि यज्ञे यैर्नृभिः भागशः अग्नये स्वाहा इन्द्रायस्वाहा इति भागं कृत्वा निरुप्तं पृथक् कृतं विधिपूर्वकमन्त्रेण वस्तुतश्चरुपुरोडाशादिभेदेन इष्टं दत्तं च यत् हविः तत् स्वयम् एक एव भगवान् मुदा गृह्णातीत्यन्वयः । कथंभूतः । पृथक् पृथक् इन्द्रादिनामभिः आहूतः । पुनश्च आशिषां सर्वफलानां प्रभुः दाता च तत्फलं च ददातीत्यर्थः ॥ २६ ॥ प्रार्थितः भगवान् नृणाम् अर्थितं प्रार्थितं ददातीति सत्यं नात्र सन्देहः किन्तु वस्तुतोऽर्थं न ददाति यत् यतः दत्तक्षयात् पुनरर्थिता याचकता भवति । अनिच्छतां भजतां निष्कामभक्तानां तु भगवान् स्वयमेव पादपल्लवं विधत्ते ददाति । कीदृशम् । इच्छायाः पिधानं निवारकम् । अन्तस्तृप्तिसद्भावादिच्छैव नोदेतीत्यर्थः॥२७॥ नोऽस्माकं स्वर्गसुखादुपभुक्तात् अवशेषितं यत् किञ्चित् शोभनं पुण्यं कर्माऽस्ति तेन पुण्येन नोऽस्माकं जन्म अजनाभे भारतवर्षे स्यात् । कीदृशम् । स्मृतिमत् हरिस्मृतियुक्तम् । यत् यस्मात् हरिः भक्तानां शं मोक्षसुखं तनोति । कथंभूतात् सुखात् । स्विष्टस्य यजनस्य सूक्तस्य प्रवचनस्य कृतस्य अन्यस्य कर्मणो वा जनितात् । अजनाभमिति भारतस्य प्राक्तनंनाम । अजः ऋषभः नाभिस्तत्पिता ताभ्यां रक्षितम् अजनाभम् । पाक्षिकत्वाद् वृद्धयभावः ॥ २८ ॥ ह स्फुटम् । एके पौराणिकाः । न ते प्रियव्रतरथनेमिकल्पिताः किन्तु तैरुपकल्पितास्तानुपदिशन्तीत्यन्वयः ॥ २९।३०॥ भारतेति परीक्षित्सम्बोधनम् । यथोपदेशं गुरूपदेशानुसारम् । तव पुरस्तात् ॥ ३१ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे गूढार्थदीपिन्यामेकोनविंशतितमोऽध्यायः ।

---

१. ये सान्तास्ते अदन्ता अपि मनश्च मनसा सह इति द्विरूपकोशात् ।

अथ विंशोऽध्यायः

श्रीशुक उवाच

अतः परं प्लक्षादीनां प्रमाणलक्षणसंस्थानतो वर्षविभाग उपवर्ण्यते ॥ १ ॥ जम्बूद्वीपोऽयं यावत्प्रमाणविस्तारस्तावता क्षारोदधिना परिवेष्टितो यथा मेरुर्जम्ब्वाख्येन ॥ २ ॥ लवणोदधिरपि ततो द्विगुणविशालेन प्लक्षाख्येन परिक्षितो यथा परिखा बाह्योपवनेन ॥ ३ ॥ प्लक्षो जम्बूप्रमाणो द्वीपाख्याकरो हिरण्मय उत्थितो यत्राग्निरुपास्ते सप्तजिह्वः ॥४॥ तस्याधिपतिः प्रियव्रतात्मज इध्मजिह्वः स्वं द्वीपं सप्तवर्षाणि विभज्य आत्मजेभ्य आकलय्य स्वयमात्मयोगेनोपरराम ॥ ५ ॥ शिवं यवसं सुभद्रं शान्तं क्षेममममृतमभयमिति वर्षाणि तेषु गिरयो नद्यश्च सप्तैवाऽभिज्ञाताः ॥ ६ ॥ मणिकूटो वज्रकूट इन्द्रसेनो ज्योतिष्मान् सुपर्णो हिरण्यष्ठीवो मेघमाल इति सेतुशैलाः ॥७॥अरुणा नृम्णाऽऽङ्गिरसी सावित्री सुप्रभाता ऋतम्भरा सत्यम्भरा इति महानद्यः ॥ ८ ॥ यासां जलोपस्पर्शनविधूतरजस्तमसो हंसपतङ्गोर्ध्वायनसत्याङ्गसंज्ञाश्चत्वारो वर्णाः सहस्रायुषो विबुधोपमसंदर्शनप्रजननाः स्वर्गद्वारं त्रय्या विद्यया भगवन्तं त्रयीमयं सूर्यमात्मानं यजन्ते ॥ ९ ॥ प्रत्नस्य विष्णो रूपं यत्सत्यस्यर्तस्य ब्रह्मणः । अमृतस्य च मृत्योश्च सूर्यमात्मानमीमहीति ॥ १० ॥

प्लक्षादिषु पञ्चसु पुरुषाणामायुरिन्द्रियमोजः सहो बलं बुद्धिर्विक्रम इति च सर्वेषामौत्पत्तिकी सिद्धिरविशेषेण वर्तते ॥ ११ ॥

विंशे प्लक्षादिषड्द्वीपनदीशैलाब्धिसंस्थितिः ।
लोकालोकाचलस्यान्तर्बहिर्मानादि वर्ण्यते ॥

अतो जम्बूद्वीपात् परं परत्र । प्रमाणं परिमाणम् । लक्षणं वर्तुलादि संस्थानं मण्डलाकारादि । वर्षो खण्डः ॥१॥ यावता लक्षयोजनेन । ततो जम्बूद्वीपात् द्विगुणविशालेन द्विलक्षयोजनविस्तारेण । परिक्षितो वेष्टितः ॥ ३ ॥ यत्र वृक्षमूले उपास्ते तिष्ठति सप्तजिह्वः सप्तशिखः । उत्थित उद्भूतः ॥ ४ ॥ द्वीपं प्रति । सप्तवर्षाणां नामान्येव नामानि येषां तेभ्यः । व्यधिकरणपदबहुव्रीहौ मध्यमपदलोपी समासः । आकलय्य समर्प्य । आत्मयोगेन ध्यानयोगेन उपरतः संसारान्मुक्तोऽभूदित्यर्थः ॥५॥ अभिज्ञाताः प्रसिद्धाः ॥६॥ सेतुशैलाः सीमागिरयः परिवृङ्क्ते पृथक् वर्तते वृजी वर्जने रुधादिः ॥७।८॥ उपस्पर्शेन स्नानपानादिना । विधूतं निरस्तम् । हंसादयो ब्राह्मणादिस्थानीयाः । विबुधोपमं देवोपमं स्वेदादिरहितं संदर्शनं रूप प्रजननं पुत्रोत्पादनं च येषां ते । सूर्यरूपम् आत्मानं परमात्मानम् ॥ ९ ॥ प्रत्नस्य विष्णोः पुराणपुरुषोत्तस्य भगवतः यत् रूपं प्रतिमास्थानीयम् तं सूर्यमीमहि शरणं व्रजेम । कथंभूतम् । सत्यादीनामात्मानम् अधिष्ठातारम् । सत्यस्य यथार्थफलदस्य ऋतस्य अनुष्ठीयमान—धर्मस्य । ब्रह्मणः तद्बोधकवेदस्य । अमृतमृत्यू शुभाशुभफले तयोश्च इति ॥ १० ॥ एषां आयुरादीनां सिद्धिराधिक्यम् औत्पत्तिकी स्वाभाविकी अविशेषेण समानरूपेण सर्वेषाम् । ओज आद्या इन्द्रियमनो

प्लक्षः स्वसमानेनेक्षुरसोदेनावृतो यथा तथा द्वीपोऽपि शाल्मलो द्विगुणविशालः समानेन सुरोदेनावृतः परिवृङ्क्ते ॥ १२ ॥ यत्र ह वै शाल्मली प्लक्षायामा यस्यां वाव किल निलयमाहुर्भगवतश्छन्दःस्तुतः पतत्त्रिराजस्य सा द्वीपहूतये उपलक्ष्यते ॥ १३ ॥ तद्द्वीपाधिपतिः प्रियव्रतात्मजो यज्ञबाहुः स्वसुतेभ्यः सप्तभ्यस्तन्नामानि सप्तवर्षाणि व्यभजत् ॥ १४ ॥ सुरोचनं सौमनस्यं रमणकं देववर्षं पारिभद्रमाप्यायनमविज्ञातमिति ॥१५॥ तेषु वर्षाद्रयो नद्यश्च सप्तैवाऽभिज्ञाताः ॥ १६ ॥ स्वरसः शतशृङ्गो वामदेवः कुन्दो मुकुन्दः पुष्पवर्षः सहस्रश्रुतिरिति ॥ १७ ॥ अनुमतिः सिनीवाली सरस्वती कुहू रजनी नन्दा राकेति ॥ १८ ॥ तद्वर्षपुरुषाः श्रुतधरवीर्यधरवसुन्धरेषन्धरसंज्ञा भगवन्तं वेदमयं सोममात्मानं वेदेन यजन्ते ॥ १९ ॥ स्वगोभिः पितृदेवेभ्यो विभजन् कृष्णशुक्लयोः । प्रजानां सर्वासां राजान्धः सोमो न आस्त्विति ॥ २० ॥

एवं सुरोदाद्बहिस्तद्द्विगुणः समानेनावृतो घृतोदेन यथा पूर्वः कुशद्वीप ॥२१॥ यस्मिन् कुशस्तम्बो देवकृतस्तद्द्वीपाख्याकरो ज्वलन इवापरः स्वशष्परोचिषा दिशो विराजयति । ॥ २२ ॥ तद्द्वीपपतिः प्रैयव्रतो राजन् हिरण्यरेतो नाम स्वं द्वीपं सप्तभ्यः स्वपुत्रेभ्यो यथाभागं विभज्य स्वयं तप आतिष्ठत ॥ २३ ॥ वसुवसुदानदृढरुचिनाभिगुप्तस्तुत्यव्रतविविक्तवामदेवनामभ्यः तेषां वर्षेषु सीमागिरयो नद्यश्चाभिज्ञाताः सप्त सप्तैव ॥ २४ ॥ चक्रश्चतुःशृङ्गः कपिलश्चित्रकूटो देवानीक ऊर्ध्वरोमा द्रविण इति ॥ २५ ॥ रसकुल्या मधुकुल्या मित्रविन्दा श्रुतविन्दा देवगर्भा घृतच्युता मन्त्रमालेति ॥ २६ ॥ यासां पयोभिः कुशद्वीपौकसः कुशलकोविदा-

---

देहशक्तयः ॥ ११ ॥ द्विगुणविशालः चतुर्लक्षयोजनविस्तृतः । परिवृङ्क्ते पृथक् वर्तते । 'वृजी वर्जने' रुधादिरुदात्तेत् ॥ १२ ॥ यत्र द्वीपे ह स्फुटतया वर्तमाना वै प्रसिद्धा । प्लक्षायामा एकादशशतयोजनोच्छ्रिता । वाव किलेति अतिप्रसिद्धार्थे निपातद्वयम् । गरुडस्य । निलयं स्थानम् । छन्दोभिर्वेदैः स्तूयते इति छन्दःस्तुत् तस्य । सा शाल्मली । हूतये व्यवहाराय ॥ १३ ॥ व्यभजत् विभज्य प्रादात् ॥ १४ ॥ सुरोचनादीनि वर्षपुत्रयोर्नामनि ॥ १५ ॥ अभिज्ञाताः प्रसिद्धाः ॥ १६ ॥ इति पर्वताः ॥ १७ ॥ इति नद्यः । तद्वर्षेषु शाल्मलीद्वीपवर्षेषु ब्राह्मणादयः । सोमं सोमरूपम् । यतः आत्मानं व्यापकम् ॥१९॥ यः स्वगोभिः स्वकिरणैः उभयोः पक्षयोः क्रमेण उभयेभ्य पितृदेवभ्यः अन्धोऽन्नं विभजन् वर्तते स राजा सोमः नोऽस्माकम् आ आभिमुख्येन अस्तु प्रत्यक्षीभवतु ॥२०॥ एवं सुरोदाद् बहिः घृतोदेनावृतः कुशद्वीप इत्यन्वयः । यथा पूर्वः शाल्मलीद्वीपः । तद् तस्मात् शाल्मलीद्वीपात् । द्विगुणः अष्टलक्षयोजनविस्तृतः ॥ २१ ॥ यस्मिन् द्वीपे । आख्याकरः नामनिर्वचनकरः । ज्वलनोऽग्निः । शष्पाणां कोमलतृणानां रोचिषा दीप्त्या । विराजयति प्रकाशयति ॥ २२ ॥ तपः कर्तुम् आतिष्ठत प्रतिज्ञातवान् । 'आङः प्रतिज्ञायाम्' इति तङ् ॥ २३ ॥ वस्वादयो वर्षपुत्रयोर्नामनि ॥ २४ ॥ चक्रादयो गिरयः ॥२५॥ रसकुल्याद्या नद्यः ॥ २६ ॥ कुशद्वीप एव ओको निवासस्थानं येषां ते । जातवेदा एव जातवेदसः 'प्रज्ञादित्वात्स्वार्थिकोऽण् प्रत्ययः स एव रूपं शरीरमस्यास्तीति तम् । कर्मकौशलेन क्रियानैपुण्येन ।

भियुक्तकुलकसंज्ञा भगवन्तं जातवेदसरूपिणं कर्मकौशलेन यजन्ते ॥ २७ ॥ परस्य ब्रह्मणः साक्षाज्जातवेदोऽसि हव्यवाट् । देवानां पुरुषाङ्गानां यज्ञेन पुरुषं यज इति ॥ २८ ॥

तथा घृतोदाद्बहिः क्रौञ्चद्वीपो द्विगुणः स्वमानेन क्षीरोदेन परित उपक्लृप्तो वृतो यथा कुशद्वीपो घृतोदेन ॥२९॥ यस्मिन् क्रौञ्चो नाम पर्वतराजो द्वीपनामनिर्वर्तक आस्ते ॥३०॥ योऽसौ गुहप्रहरणोन्मथितनितम्बकुञ्जोऽपि क्षीरोदेनासिच्यमानो भगवता वरुणेनाभिगुप्तो विभयो बभूव ॥ ३१ ॥ तस्मिन्नपि प्रैयव्रतो घृतपृष्ठो नामाधिपतिः स्वे द्वीपे वर्षाणि सप्त विभज्य तेषु पुत्रानामसु सप्त रिक्थादान् वर्षपान्निवेश्य स्वयं भगवान् भगवतः परमकल्याण-यशस आत्मभूतस्य हरेश्चरणारविन्दमुपजगाम ॥ ३२ ॥ आमो मधुरुहो मेघपृष्ठः सुधामा लोहितार्णो वनस्पतिरिति घृतपृष्ठसुतास्तेषां वर्षगिरयः सप्त सप्तैव नद्यश्चाभिख्याताः ॥ ३३ ॥ शुक्लो वर्धमानो भोजन उपबर्हणो नन्दो नन्दनः सर्वतोभद्र इति ॥ ३४ ॥ अभया अमृतौघा आर्यका तीर्थवती वृत्तिरूपवती पवित्रवती शुक्लेति ॥ ३५ ॥ यासामम्भः पवित्रममलमुप-युञ्जानाः पुरुषऋषभद्रविणदेवकसंज्ञा वर्षपुरुषा आपोमयं देवमपां पूर्णेनाञ्जलिना यजन्ते ॥ ३६ ॥ आपः पुरुषवीर्याः स्थ पुनन्तीर्भूर्भुवः स्वः । ता नः पुनीतामीवघ्नीः स्पृशतामात्मना भुव इति ॥ ३७ ॥

एवं पुरस्तात्क्षीरोदात्परित उपवेशितः शाकद्वीपो द्वात्रिंशल्लक्षयोजनायामः समानेन च दधिमण्डोदेन परीतः ॥ ३८ ॥ यस्मिन् शाको नाम महीरुहः स्वक्षेत्रव्यपदेशको यस्य ह महासुरभिगन्धस्तं द्वीपमनुवासयति ॥ ३९ ॥ तस्यापि प्रैयव्रत एवाधिपतिर्नाम्ना मेधा-

---

तच्च भगवति समर्पणमेव ॥ २७ ॥ हे जातवेदः हे अग्ने त्वं साक्षात् ब्रह्मणः हरेः हव्यं यज्ञियं वहति प्रापयतीति तथाभूतोऽसि । अतो देवानां यज्ञेन यजनेन तमेव हरिं यज आराधय । अङ्गेभ्यः समर्पितं हविरङ्गिने समर्पयेत्यर्थः । पुरुषस्य हरेः अङ्गभूतानाम् ॥ २८ ॥ बहिरग्रे । द्विगुणः षोडशलक्षयोजन-विस्तृतः । उपक्लृप्तः वेष्टितः । वृत इति घृतोदेनान्वेति । ॥२९॥ निर्वर्तयति साधयतीति तथा ॥३०॥ असौ क्रौञ्चः गुहस्य कार्तिकेयस्य शस्त्रेण उन्मथिता भग्नाः नितम्बास्तटानि कुञ्जानि च यस्य । विभयो निर्भयः ॥३१॥ तस्मिन् क्रौञ्चेऽपि । प्रैयव्रतः प्रियव्रतपुत्रः । पुत्राणां नामान्येव नामानि येषु तेषु वर्षेषु । कल्याणं मङ्गलरूपम् । आत्मभूतस्य स्वान्तरात्मनः भगवतः चरणाविन्दम् उपजगाम प्राप्तवान् मुक्तोऽभूदित्यर्थः । रिक्थादान् पुत्रान् । रिक्थं भागमाददते तथा । भगवान् ज्ञानवान् ॥३२।३३॥ इति सप्त पर्वताः॥३४॥इति सप्त नद्यः॥३५॥ यासां नदीनां जलम् उपयुञ्जानाः सेवमानाः देवं भगवन्तम् । अञ्जलिना अर्घ्यादिना पूजयन्ति । अत्र आपस् शब्दः सान्तो वैदिकः । पुरुषा ब्राह्मणादयः॥३६॥ हे आपः यूयं पुरुषस्य भगवतः वीर्याः शक्तिरूपाः स्थ भवथ । अत एव भूरादिलोकत्रयं पुनन्त्यः ता भवत्यः स्पृशतां नोऽस्माकं भुवः शरीराणि पुनीत पुनन्तु । यत आत्मना स्वरूपेणैव अमीवघ्नीः पापहन्त्र्यः स्थ । उभयत्र बाहुल-कात्पूर्वसवर्णदीर्घः ॥ ३७ ॥ एवं क्रौञ्चद्वीपवत् उपवेशितो रचितः । परीतो वेष्टितः । स्वक्षेत्रव्यपदेशकः द्वीपनामनिर्वर्तकः । ह निश्चितम् । अनुवासयति सुरभीकरोति ॥३९॥ प्रैयव्रतः प्रियव्रतपुत्रः ॥४०॥

तिथिः ॥४०॥ सोऽपि विभज्य सप्त वर्षाणि पुत्रनामानि तेषु स्वात्मजान् पुरोजवमनोजवपवमानधूम्रानीकचित्ररेफबहुरूपविश्वधारसंज्ञान्निधाप्याधिपतीन् स्वयं भगवत्यनन्त आवेशितमतिस्तपोवनं प्रविवेश ॥ ४१ ॥ एतेषां वर्षमर्यादागिरयो नद्यश्च सप्त सप्तैव ॥ ४२ ॥ ईशान उरुशृङ्गो बलभद्रः शतकेसरः सहस्रस्रोतो देवपालो महानस इति ॥ ४३ ॥ अनघा आयुर्दा उभयस्पृष्टिरपराजिता पञ्चपदी सहस्रस्रुतिर्निजधृतिरिति ॥ ४४ ॥ तद्वर्षपुरुषा ऋतव्रतसत्यव्रतदानव्रतानुव्रतनामानो भगवन्तं वाय्वात्मकं प्राणायामविधूतरजस्तमसः परमसमाधिना यजन्ते ॥ ४५ ॥ अन्तः प्रविश्य भूतानि यो बिभर्त्यात्मकेतुभिः। अन्तर्यामीश्वरः साक्षात्पातु नो यद्वशे स्फुटम् ॥ ४६ ॥

एवमेव दधिमण्डोदात्परतः पुष्करद्वीपस्ततो द्विगुणायामः समन्तत उपकल्पितः समानेन स्वादूदकेन समुद्रेण बहिरावृतः ॥ ४७ ॥ यस्मिन् बृहत्पुष्करं ज्वलनशिखामलकनकपत्रायुतायुतं भगवतः कमलासनस्यासनं परिकल्पितम् ॥ ४८ ॥ तद्द्वीपमध्ये मानसोत्तरनामैक एवार्वाचीनपराचीनवर्षयोर्मर्यादाचलोऽयुतयोजनोच्छ्रायायामो यत्र तु चतसृषु दिक्षु चत्वारि पुराणि लोकपालानामिन्द्रादीनाम् ॥ ४९ ॥ यदुपरिष्टात्सूर्यरथस्य मेरुं परिभ्रमतः संवत्सरात्मकं चक्रं देवानामहोरात्राभ्यां परिभ्रमति ॥ ५० ॥ एतद्द्वीपस्याप्यधिपतिः प्रैयव्रतो वीतिहोत्रो नामैतस्यात्मजौ रमणकधातकिनामानौ वर्षपती नियुज्य स स्वयं पूर्वजवद् भगवत्कर्मशील एवास्ते ॥५१॥ तद्वर्षपुरुषा भगवन्तं ब्रह्मरूपिणं सकर्मकेण कर्मणाऽऽराधयन्ति॥५२॥ इदं चोदाहरन्ति। यत्तत्कर्ममयं लिङ्गं ब्रह्मलिङ्गं जनोऽर्चयेत्। एकान्तमद्वयं शान्तं तस्मै भगवते नम इति ॥ ५३ ॥

निधाप्य स्थापयित्वा ॥ ४१ ॥ एतेषां पुरोजवादीनाम् ॥ ४२ ॥ ईशानादयः सप्त पर्वताः ॥ ४३ ॥ अनघाद्याः सप्त नद्यः ॥ ४४ ॥ पुरुषा ब्राह्मणादयः। विधूतं निवृत्तम् ॥ ४५ ॥ यो वायुरूपो भगवान् मुख्यप्राणरूपेण अन्तः प्रविश्य आत्मनः स्वस्य केतुभिर्वृत्तिभिः प्राणापानादिभि र्भूतानि प्राणिनः बिभर्ति पोषयति स ईश्वरः नोऽस्मान् पातु। यस्य वशे स्फुटं व्यक्तमिदं जगत् वर्तते ॥४६॥ ततः क्रौञ्चद्वीपात्। द्विगुणः चतुष्षष्टिलक्षयोजनविस्तृतः ॥ ४७ ॥ यस्मिन् पुष्करद्वीपे। ब्रह्मणः अध्यासनभूतं बृहत्कमलं कल्पितमित्यन्वयः। कथंभूतम्। अग्निशिखावत् प्रकाशमानानि कनकपत्राणि अयुतायुतानि बहुसंख्याकानि यस्मिन् ॥ ४८ ॥ तद्द्वीपस्य। अर्वाचीनेति। अन्तर्वर्तिबहिर्वर्तिनो वर्षयोः। अयुतयोजनानि उच्छ्राय औन्नत्यम् आयामो विस्तारश्च यस्य। यत्र मानसोत्तरे। आदिपदेन अग्निवरुणकुबेराणां ग्रहणम् ॥ ४९ ॥ यस्य गिरे उपरिष्टात् उपरि। अहोरात्राभ्याम् उत्तरायणदक्षिणायनाभ्याम् ॥ ५० ॥ एतत् एतस्य। नियुज्य कृत्वा। पूर्वजवत् मेधातिथिवत्। भगवत्कर्मणि भगवत्सेवायां शीलं तत्परता यस्य ॥ ५१ ॥ तत् तस्य पुष्करद्वीपस्य। सकर्मकेण सकामेन। ब्रह्मरूपिणं चतुर्मुखमूर्तिम् ॥ ५२ ॥ इदं वक्ष्यमाणम्। यत्तत् सृष्टिकर्तृत्वेन प्रसिद्धं लिङ्गं मूर्तिं जनोऽर्चयेत् अर्चयति तस्मै भगवते चतुर्मुखमूर्तये नम इत्यन्वयः। कथंभूतम्। ब्रह्मणा वेदेन लिङ्ग्यते ज्ञायते तथा। 'हिरण्यगर्भः समवर्तताग्रे। एकस्मिन् सृष्टिकर्मणि अन्तो

ऋषिरुवाच

ततः परस्ताल्लोकालोकनामाचलो लोकालोकयोरन्तराले परित उपक्षिप्तः ॥ ५४ ॥ यावन्मानसोत्तरमेर्वोरन्तरं तावती भूमिः काञ्चन्यन्याऽऽदर्शतलोपमा ॥ ५५ ॥ यस्यां प्रहितः पदार्थो न कथंचित्पुनः प्रत्युपलभ्यते तस्मात्सर्वसत्त्वपरिहृताऽऽसीत् ॥ ५६ ॥ लोकालोक इति समाख्या यदनेनाचलेन लोकालोकस्यान्तर्वर्तिनाऽवस्थाप्यते ॥ ५७ ॥ स लोकत्रयान्ते परित ईश्वरेण विहितो यस्मात्सूर्यादीनां ध्रुवापवर्गाणां ज्योतिर्गणानां गभस्तयोऽर्वाचीनांस्त्रींल्लोकानाऽऽवितन्वाना न कदाचित्पराचीना भवितुमुत्सहन्ते तावदुन्नहनायामः ॥ ५८ ॥

एतावाँल्लोकविन्यासो मानलक्षणसंस्थाभिर्विचिन्तितः कविभिः ॥ ५९ ॥ स तु पञ्चाशत्कोटिगणितस्य भूगोलस्य तुरीयभागोऽयं लोकालोकाचलः ॥ ६० ॥ तदुपरिष्टाच्चतसृष्वाशास्वात्मयोनिनाऽखिलजगद्गुरुणाऽधिनिवेशिता ये द्विरदपतय ऋषभः पुष्करचूडो वामनोऽपराजित इति सकललोकस्थितिहेतवः ॥ ६१ ॥ तेषां स्वविभूतीनां लोकपालानां च विविधवीर्योपबृंहणाय भगवान् परममहापुरुषो महाविभूतिपतिरन्तर्याम्यात्मनो विशुद्धसत्त्वं धर्मज्ञानवैराग्यैश्वर्याद्यष्टमहासिद्ध्युपलक्षणं विष्वक्सेनादिभिः स्वपार्षदप्रवरैः परिवारितो निजवरायुधोपशोभितैर्निजभुजदण्डैः संधारयमाणस्तस्मिन् गिरिवरे समन्तात्सकललोकस्वस्तय आस्ते ॥ ६२ ॥ आकल्पमेवं वेषं गत एष भगवानात्मयोगमायया विरचितविविधलोकयात्रा-

---

निष्ठा यस्य । अथाऽपि शान्तं निर्विकारम् । अद्वयम् अप्रतिमम् । कर्ममयं कर्मप्राप्यम् ॥५३॥ ततः शुद्धोदात् परस्तात् बहिः । लोकः सूर्याद्यालोकवान् प्रदेशः अलोकस्तद्रहितः तयोर्मध्ये तयोर्विभागार्थं परितः समन्तात् मण्डलाकारतया उपक्षिप्तः ॥ ५४ ॥ सर्वसत्त्वपरिहृता सर्वप्राणिवर्जिता आसीत् अस्ति एतच्च देवव्यतिरेकेषेति विज्ञेयम् ॥५५।५६।५७॥ यस्मात् प्रतिबन्धकीभूतपर्वतात् । गभस्तयः किरणाः अर्वाचीनान् अधस्तनान् भूरादीन् आवितन्वानाः समन्तात्प्रकाशयन्तः । पराचीना बहिः प्रकाशमानाः भवितुं पर्वताद्बहिः प्रकाशयितुं नोत्सहन्ते न शक्नुवन्ति । तावत्पर्यन्तमुन्नहनमौन्नत्यम् आयामो विस्तारश्च यस्य तथाभूतोऽस्ति ॥५८॥ लोकविन्यासः लोकविस्तारः एतावान् पञ्चाशत्कोटियोजनपरिमितः कविभिर्व्यासादिभिः विचिन्ततः विविच्य प्रत्यक्षीकृत्य निश्चितः नात्र संशयावसरः ॥५९॥ यो भूविन्यासो निश्चितस्तस्य भूगोलस्य तुरीयभागोऽयं सार्द्धद्वादशकोटियोजनः स प्रसिद्धः लोकालोकाचलः तुर्वैलक्षण्ये ॥६०॥ तत् तस्य अचलस्य उपरि । आशासु दिक्षु । मे दिग्गजाः स्थापितास्ते स्थितिहेतवः क्षेमहेतवः सन्तः आसते तिष्ठन्तीत्यन्वयः ॥ ६१ ॥ तेषां दिग्गजानां लोकपालानां च उपबृंहणाय अभिवृद्धये तस्मिन् गिरिवरे भगवान् एकयैव मूर्त्या समन्तात् आस्ते इत्यन्वयः । किं कुर्वन् । आत्मनो यत् विशुद्धसत्त्वात्मकं रूपं तत् संधारयमाणः प्रकटीकुर्वन् । धर्मादय उपलक्ष्यन्ते द्योत्यन्ते येन तत् । भुजदण्डैरुपलक्षितं रूपम् । उपलक्षितो भगवान् वा ॥ ६२ ॥ आकल्पं प्रलयपर्यन्तम् । यात्रा जीवनं तस्य गोपीथाय रक्षणाय ॥६३॥

गोपीथायेत्यर्थः ॥ ६३ ॥ योऽन्तर्विस्तार एतेन ह्यलोकपरिमाणं च व्याख्यातं यद्बहिर्लोकालोकाचलात् ॥ ६४ ॥ ततः परस्ताद्योगेश्वरगतिं विशुद्धामुदाहरन्ति ॥ ६५ ॥

अण्डमध्यगतः सूर्यो द्यावाभूम्योर्यदन्तरम् । सूर्याण्डगोलयोर्मध्ये कोट्यः स्युः पञ्चविंशतिः ॥ ६६ ॥

मृतेऽण्ड एष एतस्मिन् यदभूत्ततो मार्तण्ड इति व्यपदेशः ।
हिरण्यगर्भ इति यद्धिरण्याण्डसमुद्भवः ॥ ६७ ॥

सूर्येण हि विभज्यन्ते दिशः खं द्यौर्मही भिदा । स्वर्गापवर्गौ नरका रसौकांसि च सर्वशः ॥६८॥

देवतिर्यङ्मनुष्याणां सरीसृपसवीरुधाम् । सर्वजीवनिकायानां सूर्य आत्मा दृगीश्वरः ॥६९॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां पञ्चमस्कन्धे भुवनकोशवर्णने समुद्रवर्षसंनिवेशपरिमाणलक्षणो नाम विंशोऽध्यायः ॥ २० ॥

अथैकविंशोऽध्यायः

श्रीशुक उवाच

एतावानेव भूवलयस्य संनिवेशः प्रमाणलक्षणतो व्याख्यातः ॥ १ ॥ एतेन हि दिवो मण्डलमानं तद्विद उपदिशन्ति यथा द्विदलयोर्निष्पावादीनाम् ॥२॥ ते अन्तरेणान्तरिक्षं तदुभय-

---

विस्तारः लोकालोकपर्यन्त उक्तः । एतेन लोकालोकाचलात् बहिः यत् अलोकपरिमाणं तच्च व्याख्यातमित्यन्वयः ॥ ६४ ॥ विशुद्धां भागवतीं द्वितीयस्कन्धोक्ताम् द्विजपुत्रानयने श्रीकृष्णेन दर्शिताम् ॥ ६५ ॥ द्यावाभूम्योः पूर्वोत्तरकपालयो र्यदन्तरं सन्धानरूपं मध्यस्थानमन्तरिक्षं तदण्डमध्यं भवति तद्गतः सूर्योऽस्ति । सूर्याण्डगोलयोः सूर्याण्डमित्त्योर्मध्ये पञ्चविंशतिः कोट्य स्युः । सूर्यमवधीकृत्य अण्डभित्तिपर्यन्तमूर्ध्वमधस्तात्पार्श्वतश्च पञ्चविंशतिकोटियोजनानि भवन्तीत्यर्थः ॥ ६६ ॥ मृतेऽचेतने प्रकाशशून्ये एतस्मिन् अण्डे एष सूर्यः यतः प्रविष्टोऽभूत् ततो मार्तण्ड इति नाम । मृतं च तत् अण्डं मृतण्डं 'शकन्ध्वादित्वात्पररूपं तत्र भवो मार्तण्ड इति । हिरण्याण्डस्य गर्भभूतत्वात् तत्र प्रकाशकतया भवतीति तदपि नाम ॥६७॥ द्यौः स्वर्गः । भिदा अन्योऽपि विभागः । रसौकांसि अतलादीनि । किं बहुना सर्वशः सर्वेऽपि विभागाः सूर्येणैव विभज्यन्ते क्रियन्ते । अपवर्गो मोक्षस्थानम् ॥६८॥ न केवलं दिगादिविभाजकः किन्तु देवादीनां वीरुत्पर्यन्तानां सर्वेषां जीवसंघानां सूर्य एवात्मत्वेन उपास्यः यतो दृगीश्वरः नेत्राधिष्ठाता प्रकाशदातेत्यर्थः । सरीसृपाः सर्पादयः ॥ ६९ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे गूढार्थदीपिन्यां विंशतितमोऽध्यायः ।

●

एकविंशे रवेस्तत्तद्राशिषु भ्रमतः पृथक् ।
पूर्षु मन्दादिभेदेन गतिस्तन्मानमुच्यते ॥ १ ॥

भूवलयस्य भूमण्डलस्य संन्निवेशो रचनाविशेषः एतावान् पञ्चाशत्कोटियोजनपरिमितः कथितः ॥ १ ॥ एतेन भूमण्डलमानेन । तद्विदः ज्योतिर्विदः । यथा निष्पावादीनां द्विदलधान्यानां चणकादीनां द्वयोर्दलयोर्मध्ये एकस्य मानेन अपरस्य मानं स्वत एव ज्ञायते तथा भूगोलखगोलयोरपि ॥२॥ ते अन्तरेण

सन्धितम् ॥ ३ ॥ यन्मध्यगतो भगवांस्तपताम्पतिस्तपन आतपेन त्रिलोकीं प्रतपत्यवभासयत्यात्मभासा ॥ ४ ॥ स एष उदगयनदक्षिणायनवैषुवतसंज्ञाभिर्मान्द्यशैघ्र्यसमानाभिर्गतिभिरारोहणावरोहणसमानस्थानेषु यथासवनमभिपद्यमानो मकरादिषु राशिष्वहोरात्राणि दीर्घह्रस्वसमानानि विधत्ते ॥ ५ ॥ यदा मेषतुलयोर्वर्तते तदाऽहोरात्राणि समानानि भवन्ति ॥ ६ ॥ यदा वृषभादिषु पञ्चसु च राशिषु चरति तदाहान्येव वर्धन्ते ह्रसति च मासि मास्येकैका घटिका रात्रिषु ॥ ७ ॥ यदा वृश्चिकादिषु पञ्चसु वर्तते तदाहोरात्राणि विपर्ययाणि भवन्ति ॥ ८ ॥ यावद्दक्षिणायनमहानि वर्धन्ते यावदुदगयननं रात्रयः ॥ ९ ॥

एवं नवकोटय एकपञ्चाशल्लक्षाणि योजनानां मानसोत्तरगिरिपरिवर्तनस्योपदिशन्ति । तस्मिन्नैन्द्रीं पुरीं पूर्वस्मान्मेरोर्देवधानीं नाम दक्षिणतो याम्यां संयमनीं नाम पश्चाद्वारुणीं निम्लोचनीं नाम उत्तरतः सौम्यां विभावरीं नाम तासूदयमध्याह्नास्तमयनिशीथानीति भूतानां प्रवृत्तिनिवृत्तिनिमित्तानि समयविशेषेण मेरोश्चतुर्दिशम् ॥ १० ॥ तत्रत्यानां दिवसमध्यंगत एव सदाऽऽदित्यस्तपति सव्येनाचलं दक्षिणेन करोति । यत्रोदेति तस्य ह समानसूत्रनिपाते निम्लोचति यत्र क्वचन स्यन्देनाभितपति तस्य हैष समानसूत्रनिपाते प्रस्वापयति तत्र गतं न पश्यन्ति ये तं समुपश्येरन् ॥ ११ ॥

तयोर्मध्ये । विनादियोगे द्वितीया । अन्तरिक्षमुपदिशन्तीत्यनुषङ्गः । कथंभूतम् । ताभ्यां भूगोलद्युगोलाभ्याम् उपर्यधोभागे उभयतः संन्धितं संल्लग्नमस्तीति । सन्धानं संधा सा संजाता अस्येति अङ्न्तात्संधाशब्दादितच् ॥ ३ ॥ यस्य अन्तरिक्षस्य मध्यगतः सूर्यः आतपेन तापेन । अवभासयति प्रकाशयति ॥ ४ ॥ स एष सूर्यः । उत्तरायणदक्षिणायनसंङ्क्रान्ति संज्ञाभिः । मान्द्येति स्वार्थं ष्यञ् । समानं च तानि विद्यन्ते आसु ताभिः अर्शआद्यजन्तः । वैपुवतं मेषतुलयोः । सङ्क्रान्तिः । क्रियतुलाधरयोः विषुवत् स्मृतम् । इत्युक्तेः । यथासवनं यथाकालम् । अभिपद्यमानः चलन् । अयं भावः उत्तरायणनाम्न्या मन्दगत्या आरोहणस्थाने यथाकालममिपद्यमानश्चलन् मकरादिषु षट्सु राशिषु अहानि क्रमेण दीर्घानि रात्रीस्तु ह्रस्वा विधत्ते । दक्षिणायननाम्न्या क्षिप्रगत्या कर्कादिषु षट्सु राशिषु अहानि ह्रस्वानि रात्रीश्च दीर्घा विधत्ते । वैपुवतसंज्ञया उत्तरदक्षिणायनमध्यवर्तिन्या समानया गत्या मेषतुलयोः अहोरात्रान् समानान् विधत्ते इति ॥५॥ एतदेव दर्शयति यदेत्यादिना । स्पष्टम् ॥ ६ ।७ ॥ विपर्ययाणि । अहानि न्यूनानि रात्रयश्चाधिका भवन्तीत्यर्थः ॥ ८ ॥

यावत् उत्तरायणाद्दक्षिणायनपर्यन्तम् । दक्षिणायनादुत्तरायणपर्यन्तमित्यर्थः ॥ ९ ॥ मानसोत्तरगिरौ मण्डलाकारेण 'सूर्यो भ्रमति । तत्परिक्रमणमार्गस्येदं प्रमाणम् । नव कोट्यः एकपञ्चाशल्लक्षाणि योजनानि उपदिशन्ति वदन्ति । तस्मिन् गिरौ मेरोः पूर्वस्माव् । पूर्वस्यां दिशि ऐन्द्रीं पुरीमुपदिशन्तीत्यन्वयः । एवमग्रेऽपि योज्यम् । मेरोश्चतुर्दिशं वर्तमानासु तासु पुरीषु । तत्रोदयादीनि कर्मणः प्रवृत्तिनिमित्तानि अस्तमयादीनि कर्मणो निवृत्तिनिमित्तानि । समयविशेषण संङ्केतविशेषेण ॥ १० ॥ तत्रत्यानां मेरुस्थानाम् अचलं । मेरुं सव्येन स्वगत्या वामतः कुर्वन्नपि प्रदक्षिणावर्तप्रवहाख्यवायुवशात्

यदा चैन्द्र्याः पुर्याः प्रचलते पञ्चदशघटिकाभिर्याम्यां सपादकोटिद्वयं योजनानां सार्द्ध-द्वादशलक्षाणि साधिकानि चोपयाति एवं ततो वारुणीं सौम्यामैन्द्रीं च पुनस्तथा ॥ १२ ॥ अन्ये च ग्रहाः सोमादयो नक्षत्रैः सह ज्योतिश्चक्रे समभ्युद्यन्ति सह वा निम्लोचन्ति ॥ १३ ॥ एवं मुहूर्तेन चतुस्त्रिंशल्लक्षयोजनान्यष्टशताधिकानि सौरो रथस्त्रयी-ऽसौ चतसृषु परिवर्तते पुरीषु ॥ १४ ॥

यस्यैकं चक्रं द्वादशारं षण्नेमि त्रिणाभि संवत्सरात्मकं समामनन्ति ॥ १५ ॥ तस्याक्षो मेरोर्मूर्धनि कृतो मानसोत्तरे कृतेतरभागो यत्र प्रोतं रविरथचक्रं तैलयन्त्रचक्रवद् भ्रमन्मान-सोत्तरगिरौ परिभ्रमति ॥ १६ ॥ तस्मिन्नक्षे कृतमूलो द्वितीयोऽक्षस्तुर्यमानेन सम्मितस्तैल-यन्त्राक्षवद् ध्रुवे कृतोपरिभागः ॥ १७ ॥

रथनीडस्तु षट्त्रिंशल्लक्षयोजनायतस्तत्तुरीयभागविशालस्तावान् रविरथयुगो यत्र हयाश्छन्दोनामानः सप्तारुणयोजिता वहन्ति देवमादित्यम् ॥ १८ ॥ पुरस्तात्सवितुररुणः पश्चाच्च नियुक्तः सौत्ये कर्मणि किलास्ते ॥ १९ ॥ तथा बालखिल्या ऋषयोऽङ्गुष्ठपर्वमात्राः षष्टिसहस्राणि पुरतः सूर्यं सूक्तवाकाय नियुक्ताः संस्तुवन्ति ॥ २० ॥ तथान्ये च ऋषयो

प्रत्यहं दक्षिणतः करोति । एष सूर्यः यत्र यस्मिन् देशे पूर्वभागे उदेति तस्य ह तस्यैव समानसूत्रनिपाते पश्चिमभागे निम्लोचति अस्तं गच्छति । यत्र क्वचन आकाशमध्ये स्यन्दनेन स्वेदोद्गमेन अभितपति मध्याह्नं करोति तस्यैव समानसूत्रनिपाते जनान् प्रस्वापयति अर्द्धरात्रं करोति । ये उदयमस्तं च समनु-पश्येरन् ते जनास्तत्र अन्यत्र गतं सूर्यं न पश्यन्ति सूर्यस्तु सदा वर्तते एव । यद्वा ये अस्तं गतं समनुपश्येरन् ते एव तत्र स्थाने स्थितास्तं न पश्यन्ति ॥ ११ ॥ साधिकानि पञ्चविंशतिसहस्राधिकानि । यदा ऐन्द्र्याः पुर्याः सकाशात् प्रचलते तदा पञ्चदशघटिकाभिः याम्यां यमपुरीमुपयातीत्यन्वयः । किं कृत्वा । एतानि योजनानि अतिक्रम्येति शेषः । एवं ततो याम्यायाः वारुणीं प्रति ततः सौम्यां ततश्च ऐन्द्रीं गच्छति तदपि पञ्चदशघटिकाभिः तावन्ति योजनानि अतिक्रम्येति सर्वत्र सम्बन्धः । एवं षष्टिघटिकात्मकाहोरात्रेण पुरीचतुष्टयाक्रान्त्या मानसोत्तरपरिमण्डलमार्गः समाप्यते । पुनश्च दिनान्तरे तथैव प्रचलतीति योजना कार्या ॥ १२ ॥ नक्षत्रैः अश्विन्यादिभिः सह तथा सूर्यवत् इन्द्रादि पुरीषु उदयं प्राप्नुवन्ति सहैव अस्तं गच्छ-न्ति च ॥ १३ ॥ सौरः सूर्यसम्बन्धी । एतावन्ति योजनानि गच्छन् परिवर्तते परिभ्रमति । त्रयीमयः वेदत्रयीरूपेण उपास्यः ॥ १४ ॥ यस्य रथस्य । द्वादश मासा आरा यस्य । षड्ऋतवो नेमयो यस्य । त्रीणि चातुर्मास्यानि नाभयो यस्य । नेमिश्चक्रान्तभागः । नाभिस्तन्मध्यभागः । समामनन्ति वर्णयन्ति ॥ १५ ॥ तस्य सूर्यरथस्य । अक्षो धूः । मूर्धनि किञ्चिदधः प्रदेशे । उत्तरभागः प्रथमभागः ॥१६॥ कृत-मूलः निबद्धपूर्वभागः सम्मितः परिमितः । तस्मिन् अक्षे चक्रप्रान्ते । तुर्यमानेन सार्द्धसप्तत्रिंशत्सहस्रा-धिकैकोनचत्वारिंशल्लक्षमानेन ॥१७॥ रथनीड उपवेशस्थानम् । आयतो दीर्घः । तत्तुरीयमानेन नवलक्ष-योजनेन विस्तृतः । यत्र युगे अरुणेन सारथिना । वहन्ति गन्तव्यदेशं प्रापयन्तीत्यर्थः ॥ १८ ॥ किल प्रसिद्धः अरुणः सौत्ये सारथ्ये कर्मणि नियुक्तः सवितुः पुरस्तात् स्थितोऽपि पश्चाद् तत्संमुखमास्ते पश्चा-त्प्रदेन त्यङ्लक्ष्यते तच्च प्रत्यमिमुखयश्चति प्राप्नोतिति प्रत्यङ् संमुख इत्यर्थः ॥ १९ ॥ सूक्तवाकाय स्तुतिकरणार्थम् । पुरतो गच्छन्तः ॥ २० ॥ एकैकराशिचरेश द्वन्दशः सप्त गणाः सन्तः मासि मासि सूर्य-

गन्धर्वाप्सरसो नागा ग्रामण्यो यातुधाना देवा इत्येकैकशो गणाः सप्त चतुर्दश मासि मासि भगवन्तं सूर्यमात्मानं नानानामानं पृथङ्नानानामानः पृथक्कर्मभिर्द्वन्द्वश उपासते ॥ २१ ॥ लक्षोत्तरं सार्धनवकोटियोजनपरिमण्डलं भूवलयस्य क्षणेन सगव्यूत्युत्तरं द्विसहस्रयोजनानि स भुङ्क्ते ॥ २१ ॥

इति श्रीमद्भागवते महापुराणे परमहंस्यां संहितायां पञ्चमस्कन्धे ज्योतिश्चक्रसूर्यरथमण्डलवर्णनं नामेकविंशोऽध्यायः ॥ २१ ॥

अथ द्वाविंशोऽध्यायः

राजोवाच

यदेतद्भगवत आदित्यस्य मेरुं ध्रुवं च प्रदक्षिणेन परिक्रामतो राशीनामभिमुखं प्रचलितं चाप्रदक्षिणं भगवतोपवर्णितममुष्य वयं कथमनुमिमीमहीति ॥ १ ॥

स होवाच

यथा कुलालचक्रेण भ्रमता सह भ्रमतां तदाश्रयाणां पिपीलिकादीनां गतिरन्यैव प्रदेशान्तरेष्वप्युपलभ्यमानत्वादेवं नक्षत्रराशिभिरुपलक्षितेन कालचक्रेण ध्रुवं मेरुं च प्रदक्षिणेन परिधावता सह परिधावमानानां तदाश्रयाणां सूर्यादीनां ग्रहाणां गतिरन्यैव नक्षत्रान्तरे राश्यन्तरे चोपलभ्यमानत्वात् ॥ २ ॥ स एष भगवानादिपुरुष एव साक्षान्नारायणो लोकानां स्वस्तय आत्मानं त्रयीमयं कर्मविशुद्धिनिमित्तं कविभिरपि च वेदेन विजिज्ञास्यमानो द्वाद-

---

मुपासते इत्यन्वयः । ग्रामण्यो यक्षाः यातुधाना राक्षसाः ॥ २१ ॥ क्षणेन कति योजनानि गच्छतीत्याकाङ्क्षायामाह लक्षेति । नवकोट्येकपञ्चाशल्लक्षयोजनपरिमितं सूर्येण परिभ्राम्यमाणं यद्भूमण्डलं तस्य भूवलयस्य क्रोशद्वयाधिकद्विसहस्रयोजनानि स सूर्यः क्षणेन भुङ्क्ते परिक्रामतीत्यर्थः ॥ २२ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे गूढार्थदीपिन्यामेकविंशतितमोऽध्यायः ।

द्वाविंशे चन्द्रशुक्रादिग्रहाणामुत्तरोत्तरम् ।
स्थानं यथागति प्रोक्तमिष्टानिष्टफले नृणाम् ॥ १ ॥

प्रदक्षिणेन परिक्रामत इति प्रत्यहं दृश्यमानत्वात् । राशीनामभिमुखं तु अमुष्य भगवतः सूर्यस्य अप्रदक्षिणं प्रचलितं प्रचलनं यत् भगवतोपवर्णितम् एतद् वयं कथमनुमिमीमहि तर्केण जानीमः विरुद्धत्वादित्यर्थः ॥ १ ॥ स शुकः ह स्पष्टम् । अन्या नक्षत्राभिमुखतया भिन्ना उपपद्यते एव । चक्रवशात्स्वतश्च विरुद्धमपि गतिद्वयमविरुद्धमिति परिहारः ॥ २ ॥ स प्रसिद्धः एष कालरूपी सूर्यः । मासरूपेण द्वादशधा ऋतुरूपेण षोढा च आत्मानं विभज्य ऋतुगुणान् शीतोष्णादीन् विदधातीत्यन्वयः । कविभिरपि वेदेन विजिज्ञास्यमानः सतर्कं निश्चीयमानोऽयं नारायण एवेति । यद्वा जिज्ञासाविषयीक्रियमाणः । विशुद्धिः फलम् । यद्वा । विशुद्धेर्निमित्तं तदर्पणत्वेनेति शेषः । यथोपजोषं यथाक्रमम् ॥ ३ ॥

शधा विभज्य षट्सु वसन्तादिषु ऋतुषु यथोपजोषमृतुगुणान् विदधाति ॥३॥ तमेतमिह पुरुषास्त्रय्या विद्यया वर्णाश्रमाचारानुपथा उच्चावचैः कर्मभिराम्नातैर्योगवितानैश्च श्रद्धया यजन्तोऽञ्जसा श्रेयः समधिगच्छन्ति ॥ ४ ॥ अथ स एष आत्मा लोकानां द्यावापृथिव्योरन्तरेण नभोवलयस्य कालचक्रगतो द्वादश मासान् भुङ्क्ते राशिसंज्ञान् संवत्सरावयवान् ॥ ५ ॥ मासः पक्षद्वयं दिवा नक्तं चेति सपादर्क्षद्वयमुपदिशन्ति ॥ ६ ॥ यावता षष्ठमंशं भुञ्जीत स वै ऋतुरित्युपदिश्यते संवत्सरावयवः ॥ ७ ॥

अथ च यावतार्धेन नभोवीथ्यां प्रचरति तं कालमयनमाक्षते ॥ ८ ॥ अथ च यावन्नभोमण्डलं सह द्यावापृथिव्योर्मण्डलाभ्यां कार्त्स्न्येन स ह भुञ्जीत तं कालं संवत्सरं परिवत्सरमिडावत्सरमनुवत्सरं वत्सरमिति मानोर्मान्द्यशैघ्र्यसमगतिभिः समामनन्ति ॥९॥

एवं चन्द्रमा अर्कगभस्तिभ्य उपरिष्टाल्लक्षयोजनत उपलभ्यमानोऽर्कस्य संवत्सरभुक्तिं पक्षाभ्यां मासभुक्तिं सपादर्क्षाभ्यां दिनेनैव पक्षभुक्तिमग्रचारी द्रुततरगमनो भुङ्क्ते ॥ १० ॥ अथ चापूर्यमाणाभिश्च कलाभिरमराणां क्षीयमाणाभिश्च कलाभिः पितृणामहोरात्राणि पूर्वपक्षापरपक्षाभ्यां वितन्वानः सर्वजीवनिवहप्राणो जीवश्चैकमेकं नक्षत्रं त्रिंशता मुहूर्तैर्भुङ्क्ते ॥ ११ ॥ य एष षोडशकलः पुरुषो भगवान् मनोमयोऽन्नमयोऽमृतमयो देवपितृमनुष्यभूतपशुपक्षिसरीसृपवीरुधां प्राणाप्यायनशीलत्वात् सर्वमय इति वर्णयन्ति ॥ १२ ॥

तमेतं सूर्यम् । त्रय्या आम्नातैः प्रतिपादितैः उच्चावचैर्नानाविधैः कर्मभिः सन्ध्योपासनादिभिर्यजन्तः पुरुषाः श्रेयो मोक्षं समधिगच्छन्तीत्यन्वयः । अञ्जसा अनायासेन । योगवितानैः अष्टाङ्गयोगैः । वर्णाश्रमाचारमनुपथन्ति अनुसरन्तीति तथा । 'पथे गतौ' इत्यस्मात् ॥ ४ ॥ अथ मङ्गलमयः । अन्तरेण मध्ये यन्नभोवलयमन्तरिक्षं तस्य मध्ये यत्कालचक्रं तद्गतः सन् भुङ्क्ते अतिक्रामति राशिभिर्मेषादिभिः । यद्वा राशिः चित्रादिनक्षत्रसमूहः तैः संज्ञा येषां तान् चैत्रादिमासान् ॥५॥ पक्षद्वयं मास इति चान्द्रमानेन दिवानक्तमहोरात्रं पैत्र्येण । सपादनक्षत्रद्वयं सौरेण ॥ ६ ॥ यावता कालेन संवत्सरस्य षष्ठमंशं राशिद्वयम् । स वै तावान् कालः ॥ ७ ॥ अथ च अपि च । अर्द्धेन मासषट्केन । यावता कालेन मकरादिषट्कं भुङ्क्ते तं कालमुत्तरायणम् । यावता कर्कादिषट्कं तं कालं दक्षिणायनमिति विवेकः ॥ ८ ॥ अथ च अपि च । स ह स हि सूर्यः द्यावापृथिव्योर्मण्डलाभ्यां सह सन्धितं नभोमण्डलं साकल्येन यावत् भुञ्जीत तं कालं मानोर्मन्दादिगतिभिः संवत्सरपञ्चकं समामनन्ति कथयन्तीत्यन्वयः । मान्द्यमित्यादि स्वार्थे ष्यञ् ॥ ९ ॥ एवं सूर्यवत् चन्द्रादीनामपि स्थानं कार्यं च दर्शयति । अर्कगभस्तिभ्याः मण्डलरूपेभ्यः । भूतलात् द्विलक्षयोजनत इति योज्यम् । सपादर्क्षाभ्यां सपाददिनद्वयेन । नक्षत्राणामग्रणीत्वादग्रचारित्वम् ॥ १० ॥ सर्वेषां जीवसमूहानामन्नमयत्वात् प्राणः पोषकः । अमृतमयत्वाज्जीवनहेतुश्च सन् जीवः ॥ ११ ॥ य एष षोडशकलश्चन्द्रस्तं सर्वमय इति वर्णयन्तीत्यन्वयः । षोडश । दशेन्द्रियाणि पञ्च भूतानि एकं मनश्चेत्येवं षोडशसंघातप्रधानो मनोनियन्ता । पुरुषः सर्वतोऽग्रगामी । 'पुर अग्रगमने' धातुः । आप्यायन-

तत उपरिष्टात्त्रिलक्षयोजनतो नक्षत्राणि मेरुं दक्षिणेनैव कालायन ईश्वरयोजितानि सहाभिजिताष्टाविंशतिः ॥ १३ ॥ तत उपरिष्टादुशना द्विलक्षयोजनत उपलभ्यते पुरतः पश्चात्सहैव वार्कस्य शैघ्र्यमान्द्यसाम्याभिर्गतिभिरर्कवच्चरति लोकानां नित्यदाऽनुकूल एव प्रायेण वर्षयंश्चारेणानुमीयते स वृष्टिविष्टम्भग्रहोपशमनः ॥ १४ ॥

उशनसा बुधो व्याख्यातस्तत उपरिष्टाद् द्विलक्षयोजनतो बुध. सोमसुत उपलभ्यमानः प्रायेण शुभकृद्यदाऽर्काद् व्यतिरिच्येत तदातिवाताभ्रप्रायानावृष्ट्यादिभयमाशंसते ॥ १५ ॥ अत ऊर्ध्वमङ्गारकोऽपि योजनलक्षद्वितय उपलभ्यमानस्त्रिभिस्त्रिभिः पक्षैरेकैकशो राशीन् द्वादशानुभुङ्क्ते यदि न वक्रेणाभिवर्तते प्रायेणाशुभग्रहोऽघशंसः ॥ १६ ॥ तत उपरिष्टाद् द्विलक्षयोजनान्तरगतो भगवान् बृहस्पतिरेकैकस्मिन् राशौ परिवत्सरं परिवत्सरं चरति यदि न वक्रः स्यात्प्रायेणानुकूलो ब्राह्मणकुलस्य ॥ १७ ॥

तत उपरिष्टाद्योजनलक्षद्वयात्प्रतीयमानः शनैश्चर एकैकस्मिन् राशौ त्रिंशन्मासान् विलम्बमानः सर्वानेवानुपर्येति तावद्भिरनुवत्सरैः प्रायेण हि सर्वेषामशान्तिकरः ॥ १८ ॥ तत उत्तरस्मादृषय एकादशलक्षयोजनान्तर उपलभ्यन्ते य एव लोकानां शमनुभावयन्तो भगवतो विष्णोर्यत्परमं पदं प्रदक्षिणं प्रक्रमन्ति ॥ १९ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां पञ्चमस्कन्धे ज्योतिश्चक्रवर्णनने द्वाविंशोऽध्यायः ॥२२॥

शीलत्वात् तृप्तिकरत्वात् ॥ १२ ॥ ततः चन्द्रात् । त्रिलक्षेति । भूतलात्तु पञ्चलक्षयोजनतः । कालायने कालचक्रे ईश्वरप्रेरितानि अष्टाविंशतिर्नक्षत्राणि मेरुं दक्षिणेनैव गच्छन्तीत्यन्वयः ॥ १३ ॥ ततो नक्षत्रमण्डलात् । उशना शुक्रः । द्विलक्षेति । भूतलात्तु सप्तलक्षयोजनतः । प्रायेण वर्षयन् वृष्टिं कुर्वन् अनुकूल एवास्ते एतच्च चारेण क्रमस्थनक्षत्रादीनांमुल्लङ्घनेन अनुमीयते । वृष्टेः स्तम्भनं यस्मात्तं ग्रहमुपशमयतीति तथाभूतः अश्विनीतो भरणी गन्तव्या तामुल्लङ्घ्य कृत्तिकासु गमनमित्येवं रूपेण । 'बुधशुक्र समीपस्थः करोत्येकार्णवां महीम्' इत्युक्तेः ॥ १४ ॥ व्याख्यातः बुधोऽपि शुक्रवच्चरतीत्यर्थः । ततः उशनसः । द्विलक्षेति । भूतलात्तु नवलक्षयोजनतः । प्रायेणेत्युक्तेः कदाचिद् शुभमपि करोति तदाह यदेति । व्यतिरिच्येत पृथक् भवति । अभ्रप्रायम् अभ्राधिक्यम् । आशंसते सूचयति ॥ १५ ॥ ततो बुधात् । अङ्गारको भौमः । द्विलक्षयोजनेति । भूतलादेकादशलक्षयोजने । यदि वक्रः स्यात्तदा बहूनपि मासानेकत्र- तिष्ठतीत्यर्थः । अघशंसो दुःखसूचकः । प्रायेणेत्युक्त्या 'दशमेऽङ्गारको यस्य स भवेत्कुलदीपकः' इति सूचितम् ॥ १६ ॥ ततोऽङ्गारकात् । द्विलक्षेति । भूतलात् त्रयोदशलक्षे । वक्रत्वे तु परिवत्सरादधिकमपि भुङ्क्त इत्यर्थः । प्रायेणेत्युक्तेः स्थानविशेषाद् दुःखमपि ददातीत्यर्थः ॥ १७ ॥ ततो बृहस्पतेः । लक्षद्वयेति । भूतलात्तु पञ्चदशलक्षेति । सर्वानेव द्वादश राशीन् उपर्येति क्रमेण संचरति । तावद्भिः त्रिंशद्भिः । प्रायेणेत्युक्तेस्त्रिषडायगतः सन् शान्तिकरोऽपि स्यादित्यर्थः ॥ १८ ॥ ततः शनैश्चरात् । उत्तरस्मात् उत्तरदिशि । सप्तम्यर्थे पञ्चमी । एकादशेति । भूतलात्तु षड्विंशलक्षयोजनेति । ते के । ये शं कल्याणम् अनुभावयन्तो वाञ्छन्तः यत् परमं पदं ध्रुवस्थानं तत् प्रदक्षिणं यथा भवति तथा प्रक्रमन्ति परिभ्रमन्ति ॥ १९ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे गूढार्थदीपिन्यां द्वाविंशोऽध्यायः ।

अथ त्रयोविंशोऽध्यायः

श्रीशुक उवाच

अथ तस्मात्परतस्त्रयोदशलक्षयोजनान्तरतो यत्तद्विष्णोः परमं पदमभिवदन्ति यत्र ह महाभागवतो ध्रुव औत्तानपादिरग्निनेन्द्रेण प्रजापतिना कश्यपेन धर्मेण च समकालयुग्भिः सबहुमानं दक्षिणतः क्रियमाण इदानीमपि कल्पजीविनामाजीव्य उपास्ते तस्येहानुभाव उपवर्णितः ॥ १ ॥ स हि सर्वेषां ज्योतिर्गणानां ग्रहनक्षत्रादीनामनिमिषेणाव्यक्तरंहसा भगवता कालेन भ्राम्यमाणानां स्थाणुरिवावष्टम्भ ईश्वरेण विहितः शश्वदवभासते ॥ २ ॥ यथा मेढीस्तम्भ आक्रमणपशवः संयोजितास्त्रिभिस्त्रिभिः सवनैर्यथास्थानं मण्डलानि चरन्त्येवं भगणा ग्रहादय एतस्मिन्नन्तर्बहिर्योगेन कालचक्र आयोजिता ध्रुवमेवावलम्ब्य वायुनोदीर्यमाणा आकल्पान्तं परिचङ्क्रमन्ति नभसि यथा मेघाः श्येनादयो वायुवशाः कर्मसारथयः परिवर्तन्ते एवं ज्योतिर्गणाः प्रकृतिपुरुषसंयोगानुगृहीताः कर्मनिर्मितगतयो भुवि न पतन्ति ॥ ३ ॥

केचनैतज्ज्योतिरनीकं शिशुमारसंस्थानेन भगवतो वासुदेवस्य योगधारणायामनुवर्णयन्ति ॥ ४ ॥ यस्य पुच्छाग्रेऽवाक्शिरसः कुण्डलीभूतदेहस्य ध्रुव उपकल्पितः तस्य लाङ्गूले प्रजापतिरग्निरिन्द्रो धर्म इति पुच्छमूले धाता विधाता च कट्यां सप्तर्षयः। तस्य दक्षिणावर्तकुण्डलीभूतशरीरस्य यान्युदगयनानि दक्षिणपार्श्वे तु नक्षत्राण्युपकल्पयन्ति दक्षिणायनानि

त्रयोविंशे हरेः स्थानं ज्योतिश्चक्राश्रयं ध्रुवम्।
प्राह वैज्ञानिकं चक्रं शिशुमाराख्यमद्भुतम् ॥ १ ॥

अथेत्यारम्भे। तस्मात् ऋषिमण्डलात्। त्रयोदशलक्षेति। भूतलात्तु एकोनचत्वारिंशल्लक्षेति। यत्तद्विष्णोः परमं पदमभिवदन्ति तदस्ति यत्र ध्रुव उपास्ते तिष्ठति यस्य प्रभावः इह अत्रैव भागवते उपवर्णित इत्यन्वयः। ह प्रसिद्धः कथंभूतः। युज्यन्ते तैः समकालोद्भवैः नक्षत्ररूपैः अग्न्यादिपञ्चभिः। दक्षिणतः क्रियमाणः प्रदक्षिणीक्रियमाणः कल्पजीविनां भृग्वादीनामाजीव्य आश्रयभूतः सन् ध्रुव उपास्ते तिष्ठतीत्यन्वयः ॥ १ ॥ स हि ध्रुवः लोको वा सर्वेषां ग्रहनक्षत्रादीनां स्थाणुरिव अवष्टम्भ आधारभूतः सन् शश्वत् अवभासते इत्यन्वयः। अनिमिषेण विश्रान्तिरहितेन। अव्यक्तरंहसा अलक्षितवेगेन कालचक्रेण। विहितः स्थापितः भक्तोत्कर्षज्ञापनार्थमित्यर्थः ॥ २ ॥ खलमध्ये निखातस्तम्भो मेढी तत्र संयोजिताः कृषीवलेन बद्धाः पशवो यथा त्रिभिः सवनैः निकटमध्यदूरवर्तिभि विभागैर्मण्डलानि चरन्ति एवं एतस्मिन् कालचक्रे त्रिभिः सवनैः उत्तरदक्षिणवैषुवतैः समयैः अन्तर्बहिर्योगेन उपर्यधःस्थानविभागेन। उदीर्यमाणाः चाल्यमानाः। परिचङ्क्रमन्ति परितो भ्रमन्ति ॥ ३ ॥ कर्मसारथयः कर्मसहायाः। संयोगः सम्बन्धः तेनानुगृहीता आकृष्टाः निबद्धाः सन्तः न पतन्ति ॥ ४ ॥ केचन योगिनः एतत् ज्योतिरनीकं नक्षत्रमण्डलं भगवतः शिशुमाराकारेण कल्पनामयी या योगधारणा तस्यां स्थितं

तु सव्ये। यथा शिशुमारस्य कुण्डलाभोगसंनिवेशस्य पार्श्वयोरुभयोरप्यवयवाः समसंख्या भवन्ति। पृष्ठे त्वजवीथी आकाशगङ्गा चोदरतः ॥ ५ ॥ पुनर्वसुपुष्यौ दक्षिणवामयोः श्रोण्योरार्द्राश्लेषे च दक्षिणवामयोः पश्चिमयोः पादयोरभिजिदुत्तराषाढे दक्षिणवामयोः कर्णयोर्मघादीन्यष्ट नक्षत्राणि दक्षिणायनानि वामपार्श्ववङ्क्रिषु युञ्जीत तथैव मृगशीर्षादीन्युदगयनानि दक्षिणपार्श्ववङ्क्रिषु प्रातिलोम्येन प्रयुञ्जीत शतभिषाज्येष्ठे स्कन्धयोर्दक्षिणवामयोर्न्यसेत् ॥ ६ ॥ उत्तराहनावगस्तिरधराहनौ यमो मुखेषु चाङ्गारकः शनैश्चर उपस्थे बृहस्पतिः ककुदि वक्षस्यादित्यो हृदये नारायणो मनसि चन्द्रो नाभ्यामुशना स्तनयोरश्विनो बुधः प्राणापानयो राहुर्गले केतवः सर्वाङ्गेषु रोमसु सर्वे तारागणाः ॥ ७ ॥

एतदु हैव भगवतो विष्णोः सर्वदेवतामयं रूपमहरहः संध्यायां प्रयतो वाग्यतो निरीक्षमाण उपतिष्ठेत ॐ नमो ज्योतिर्लोकाय कालायनायानिमिषां पतये महापुरुषायाभिधीमहीति ॥८॥

ग्रहर्क्षताराममयमाधिदैविकं पापापहं मन्त्रकृतां त्रिकालम् ।
नमस्यतः स्मरतो वा त्रिकालं नश्येत तत्कालजमाशु पापम् ॥ ९ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां पञ्चमस्कन्धे शिशुमारसंस्थावर्णनं नाम त्रयोविंशोऽध्यायः ॥ २३ ॥

वदन्तीत्यन्वयः । शिशुमारः सूसाख्यो जलजन्तुः ॥ ५ ॥ अवाक् अवः शिरसः यस्य शिशुमारस्य । लाङ्गूले पुच्छाग्रादधोभागे । प्रजापत्यादयः तारारूपेण उपकल्पिता इत्यनुषङ्गः । सप्तर्षयः शकटाकारं सप्तर्षिमण्डलम् । तस्य दक्षिणपार्श्वे तु यानि उदगयनानि उत्तरायणनक्षत्राणि अभिजिदादीनि पुनर्वस्वन्तानि चतुर्दश तानि उपकल्पयन्तीति योज्यम् । दक्षिणायनानि दक्षिणायननक्षत्राणि पुष्पादीनि उत्तराषाढान्तानि चतुर्दश सव्ये वामपार्श्वे । यथा अवयवाः समसंख्या भवन्ति तथा तत्र नक्षत्राण्यपि समसंख्यया कल्पयन्तीत्यन्वयः । तस्य पृष्ठे तु अजवीथी दक्षिणमार्गस्य प्रथमो भागः 'मूलाषाढोत्तराषाढा अजवीथीति शब्दिता' इत्युक्तेः । उदरतः उदरे तान्येव विभज्य दर्शयति पुनरिति । श्रोण्योः नितम्बयोः । यथा संख्यं कल्पनीये । वङ्क्रिषु आस्थषु युञ्जीत कल्पयेत । प्रातिलोम्येन व्युत्क्रमेण मृगशिरा रोहिणी कृत्तिका भरणी इत्येवं रूपेण । अत्र वंक्रिषु इति पाठो लेखकप्रमादात् । 'नितम्बः श्रोणिराख्यातो वङ्क्रि प्रोक्तं तथास्थिनि' इति कोशात् ॥ ६ ॥ उत्तराहनौ उत्तरकपोलावयवे । अधराहनौ अधरकपोलावयवे । अगस्तियमनारायणाश्विनःस्तारारूपाः । सर्वे तारागणाः कल्पनीया इति शेषः । ककुदि गलपृष्ठे ॥ ७ ॥ उ विस्मये ह प्रसिद्धौ । एतदेव अद्भुतं प्रसिद्धं रूपम् उपतिष्ठेत् ध्यायेत् । महापुरुषाय नमोऽभिधीमहि नमः कुर्मं इति मन्त्रेण । ज्योतिषां लोकाय निवासस्थानाय कालायनाय कालचक्ररूपाय । न निमिषन्ति न निमीलनं कुर्वन्तीति अनिमिषो देवास्तेषां पतये । 'मिष-दर्शने' इत्यस्मात् क्विप् ॥ ८ ॥ देवं विष्णुमधिकृत्य वर्तते इति आधिदैविकं शिशुमाराख्यम् एतत् रूपं त्रिकालं नमस्यतः स्मरतो वा पुंसः तत्कालजं पापं नश्येत् नष्टं भवेत् । कथंभूतम् । मन्त्रं कुर्वन्ति वाग्विषयमिति मन्त्रकृतस्तेषां त्रिकालं मन्त्रं जपतां पापनिवर्तकम् । अतो न पौनरुक्त्यम् ॥ ९ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे गूढार्थदीपिन्यां त्रयोविंशतितमोऽध्यायः ।

अथ चतुर्विंशोऽध्यायः

श्रीशुक उवाच

अधस्तात्सवितुर्योजनायुते स्वर्भानुर्नक्षत्रवच्चरतीत्येके ।। १ ।। योऽसावमरत्वं ग्रहत्वं चालभत भगवदनुकम्पया स्वयमसुरापसदः सैंहिकेयो ह्यतदर्हः ।। २ ।। तस्य तात जन्मकर्माणि चोपरिष्टाद्वक्ष्यामः ।। ३ ।। यददस्तरणेर्मण्डलं प्रतपतस्तद्विस्तरतो योजनायुतमाचक्षते द्वादशसहस्रं सोमस्य त्रयोदशसहस्रं रोहार्यः पर्वणि ।: ४ ।। तद्व्यवधानकृद्वैरानुबंधः सूर्याचंद्रमसावभिधावति ।। ५ ।। तन्निश म्योभयत्रापि भगवता रक्षणाय प्रयुक्तं सुदर्शनं नाम भागवतं दयितमस्त्रं तत्तेजसा दुर्विषहं मुहुः परिवर्तमानमभ्यवस्थितो मुहूर्तमुद्विजमानश्चकितहृदय आरादेव निवर्तते ।। ६ ।। तदुपरागमिति वदन्ति लोकाः ।। ७ ।।

ततोऽधस्तात्सिद्धचारणविद्याधराणां सदनानि तावन्मात्र एव ।।८।। ततोऽधस्ताद्यक्षरक्षःपिशाचप्रेतभूतगणानां विहाराजिरमन्तरिक्षं यावद्वायुः प्रवाति यावन्मेघा उपलभ्यन्ते ।।९।। ततोऽधस्ताच्छतयोजनान्तर इयं पृथिवी यावद्धंसभासश्येनसुपर्णादयः पतत्त्रिप्रवरा उत्पतन्तीति ।।१०।। उपवर्णितं भूमेर्यथा सन्निवेशाव स्थानम् ।।११।। अवनेरप्यधस्तात्सप्त भूविवरा एकैकशो योजनायुतान्तरेणायामविस्तारेर्णोपक्लृप्ताः ।।१२।। अतलं वितलं सुतलं तलातलं महातलं रसातलं पातालमिति ।। १३ ।।

एतेषु हि बिलस्वर्गेषु स्वर्गादप्यधिककामभोगैश्वर्यानन्दविभूतिभिः सुसमृद्धभवनोद्यानाक्रीडविहारेषु दैत्यदानवकाद्रवेया नित्यप्रमुदितानुरक्तकलत्रापत्यबन्धुसुहृदनुचरा गृह-

---

चतुर्विंशे रवेरर्वाग् राह्वादीनां स्थितिः क्रमात् ।
अतलादिबिलस्वर्गाः भूगर्भे सप्त वर्णिताः ।। १ ।।

एके पौराणिका वदन्तीति शेषः । स्वर्भानुः राहुः ।।१।। सिंहिकायाः पुत्रः सैंहिकेयः योऽसौ राहुः । न तदमरत्वं ग्रहत्वं चार्हतीति अतदर्हः । अपसदोऽधमः ।। २ ।। जन्म षष्ठस्कन्धे । कर्म अष्टमस्कन्धे । उपरिष्टादग्रे ।। ३ ।। प्रतपतः सूर्यस्य यत् अदो मण्डलं तत् । आचक्षते ।। ४ ।। अमृतपानसमये मध्यप्रवेशेन तयोर्व्यवधानं करोति अत एव ताभ्यां सूचनेन शिरश्छेदनात् वैरमनुवध्नाति दृढीकरोतीति तथाभूतः सन् अभि अभिर्भावतुं धावतीत्यन्वयः ।। ५ ।। तत् तदभिधावनं निशाम्य दृष्ट्वा । दयितं प्रियम् । परिवर्तमानं परितो भ्रममाणं दृष्ट्वा मुहूर्तमभ्यवस्थितः तत्संमुखं स्थितः किन्तु तत्तेजसा उद्विजमानः कम्पमानः सन् आरात् दूरादेव निवर्तते ।। ६ ।। तत् अन्तरा तदवस्थानमेव उपरागं ग्रहणं लोका वदन्ति । तत्र च समविषमस्थितिभ्यां सर्वग्रासार्द्धग्रासौ प्रतीयेते न वस्तुतो ग्रासः दूरान्तरत्वात् ।। ७ ।। ततो राहोरधस्तात् तावन्मात्रे योजनायुते ।। ८ ।। ततः सिद्धादिसदनात् । विहाराजिरं विहारस्थानम् ।। ९ ।। ततो मेघावस्थानात् । इयं पृथ्वी भूर्लोको वर्तत इत्यर्थः । उत्पतन्ति उड्डीयन्ते । पतत्त्रिप्रवराः पक्षिप्रवराः हंसादयः ।। १०।११।। अन्तरमवधि ।।१२।१३।। एतेषु दैत्यादयो निवसन्ती-

पतय ईश्वरादप्यप्रतिहतकामा मायाविनोदा निवसन्ति ॥ १४ ॥ येषु महाराज मयेन माया-विना विनिर्मिताः पुरो नानामणिप्रवरप्रवेकविरचितविचित्रभवनप्राकारगोपुरसभाचैत्यचत्व-रायतनादिभिर्नागासुरमिथुनपारावतशुकसारिकाकीर्णकृत्रिमभूमिभिर्विवरेश्वरगृहोत्तमैः समलं-कृताश्चकासति ॥ १५ ॥ उद्यानानि चातितरां मनइन्द्रियानन्दिभिः कुसुमफलस्तबकसुभग-किसलयावनतरुचिरविटपविटपिनां लताङ्गालिङ्गितानां श्रीभिः समिथुनविविधविहङ्गमजला-शयानाममलजलपूर्णानां झषकुलोल्लङ्घनक्षुभितनीरनीरजकुमुदकुवलयकह्लारनीलोत्पललोहि-तशतपत्रादिवनेषु कृतनिकेतनानामेकविहाराकुलमधुरविविधस्वनादिभिरिन्द्रियोत्सवैरमरलो-कश्रियमतिशयितानि ॥ १६ ॥ यत्र ह वाव न भयमहोरात्रादिभिः कालविभागैरुपलक्ष्यते ॥ १७ ॥ यत्र हि महाहिप्रवरशिरोमणयः सर्वं तमः प्रबाधन्ते ॥ १८ ॥ न वा एतेषु वसतां दिव्यौषधिरसरसायनान्नपानस्नानादिभिराधयो व्याधयो वलीपलितजरादयश्च देहवैवर्ण्य-दौर्गन्ध्यस्वेदक्लमग्लानिरिति वयोऽवस्थाश्च भवन्ति ॥ १९ ॥ न हि तेषां कल्याणानां प्रभवति कुतश्चन मृत्युर्विना भगवत्तेजसश्चक्रापदेशात् ॥ २० ॥ यस्मिन् प्रविष्टेऽसुरवधूनां प्रायः पुंसवनानि भयादेव स्रवन्ति पतन्ति च ॥ २१ ॥

त्यन्वयः । अधिकैर्विषयभोगादिभिः सुसमृद्धा भवनादयो येषु । कथंभूताः । नित्यं प्रमुदिताः परस्पर-मनुरक्ताश्च कलत्रादयो येषां ते गृहपतयो गृहस्थधर्मावलम्बिनः । ईश्वरात् इन्द्रादपि । विहारो भ्रमण-स्थानम् । 'विहारो भ्रमणे' इति मेदिनी । दितिदनुकद्रूपुत्राः ॥ १४ ॥ हे महाराज येषु बिलस्वर्गेषु मयदानवेन निर्मिताः पुरः चकासतीत्यन्वयः । कथंभूता । नानामणिप्रवरेषु ये प्रवेकाः मुख्या मणयस्तै-र्विरचितैः विचित्रैर्भवनादिभिः तथा विवरेश्वराणां गृहोत्तमैश्च समलङ्कृताः । विवरेश्वराः पातालाधि-पतयः । कीदृशैः गृहोत्तमैः । नानास्वनैः मिथुनीभूतैः पारावतादिभिश्च आकीर्णा व्याप्ताः कृत्रिमा विविधरचनायुक्ताः भूमयो येषु तैः । गोपुरं पुरद्वारम् । समास्थानम् । चैत्यं देवालयः । आयतनं विश्राम-स्थानम् ॥ १५ ॥ अमरलोकश्रियमतिशयितानि अतिक्रम्य वर्तमानानि उद्यानानि च येषु अतितरां चकासति विलसन्तीत्यन्वयः । काभिः । कुसुमफलस्तवकैः शोभनपल्लवैश्च अवनताः रुचिराः विटपाः शाखा येषां तेषां वृक्षाणां श्रीभिः । तथा समिथुना मिथुनीभूताः विविधाः विहङ्गमाः येषु तथाभूताः ये जलाशयास्तेषां च श्रीभिः । पुनरपि कैः श्रियमतिशयितानि । झषकुलोल्लङ्घनेन क्षुभितं यज्जलाशयानां नीरं तस्मिन् नीरजानि तेषां वनेषु कृतनिवासानां पक्षिणामखण्डो यो विहारस्तेन आकुलाः मिश्रिताः मधुराश्च ये विविधाः स्वनास्तैर्ये इन्द्रियोत्सवास्तैः । नीरजं सामान्यकमलम् । कुमुदकुवलयौ सितवर्णौ रात्रिविकाशौ । कह्लारं सौगन्धिकम् ॥१६॥ यत्र अतलादिषु विभागैः अवयवभूतैः यद्भयं तन्नैव प्रतीयते । आयुषो भूयस्त्वात् सूर्याद्यभावाच्च । वाव एवार्थे ॥ १७ ॥ सर्वं कृत्स्नम् प्रबाधन्ते निरस्यन्ति ॥१८॥ एतेषु बिलस्वर्गेषु वसतामाध्यादयः तथा वयोऽवस्थाश्च न भवन्तीत्यन्वयः । द्विविधा वयोऽवस्था तत्र प्रथमा वलीप्रभृतयश्चरमा द्वितीया देहवैवर्ण्यादयोऽचरमा बली चर्मशैथिल्यम् । क्लमः श्रमः । ग्लानिः अनुत्साहः । पलितं केशशौक्ल्यम् । दिव्यौषधयः विशल्याद्याः । रसाः फलादीनां द्रवाः ॥ १९ ॥ भगवत्तेजोरूपात् सुदर्शनचक्रात् विना । कल्याणानां निरतिशयसुखासक्तानां ॥ २० ॥ यस्मिन् सुदर्शने ।

अथातले मयपुत्रोऽसुरो बलो निवसति ॥ २२ ॥ येन ह वा इह सृष्टाः षण्णवतिर्मायाः काश्चनाद्यापि मायाविनो धारयन्ति ॥२३॥ यस्य च जृम्भमाणस्य मुखतस्त्रयः स्त्रीगणा उदपद्यन्त ॥ २४ ॥ स्वैरिण्यः कामिन्यः पुंश्चल्य इति ॥ २५ ॥ या वै विलायनं प्रविष्टं पुरुषं रसेन हाटकाख्येन साधयित्वा स्वविलासावलोकनानुरागस्मितसंलापोपगूहनादिभिः स्वैरं किल रमयन्ति ॥ २६ ॥ यस्मिन्नुपयुक्ते पुरुष ईश्वरोऽहं सिद्धोऽहमित्ययुतमहागजबलमात्मानमभिन्यमानः कत्थते मदान्ध इव ॥ २७ ॥

ततोऽधस्ताद्वितले हरो भगवान् हाटकेश्वरः स्वपार्षदभूतगणावृतः प्रजापतिसर्गोपबृंहणाय भवो भवान्या सह मिथुनीभूय आस्ते ॥ २८ ॥ यतः प्रवृत्ता सरित्प्रवरा हाटकी नाम भवयोर्वीर्येण ॥ २९ ॥ यत्र चित्रभानुर्मातरिश्वना समिध्यमान ओजसा पिबति ॥ ३० ॥ तन्निष्ठ्यूतं हाटकाख्यं सुवर्णं भूषणेनासुरेन्द्रावरोधेषु पुरुषाः सह पुरुषीभिर्धारयन्ति ॥ ३१ ॥

ततोऽधस्तात्सुतले उदारश्रवाः पुण्यश्लोको विरोचनात्मजो बलिर्भगवता महेन्द्रस्य प्रियं चिकीर्षमाणेनादितेर्लब्धकायो भूत्वा वटुवामनरूपेण पराक्षिप्तलोकत्रयो भगवदनुकम्पयैव पुनः प्रवेशित इन्द्रादिष्वविद्यमानया सुसमृद्धया श्रियाभिजुष्टः स्वधर्मेणाराधयंस्तमेव भगवन्तमाराधनीयमपगतसाध्वस आस्तेऽधुनापि ॥ ३२ ॥ नो एवैतत्साक्षात्कारो भूमिदानस्य यत्तद्भगवत्यशेषजीवनिकायानां जीवभूतात्मभूते परमात्मनि वासुदेवे तीर्थतमे पात्र उपपन्ने परया

पुंसवनानि गर्भाः । 'आचतुर्थाद्भवेत्स्रावः पातः पञ्चमषष्ठयोः इति द्वयोर्भेदः । प्रायो बाहुल्येन । 'प्रायो बाहुल्यतुल्ययोः' इति मेदिनी ॥ २१ ॥ अथ आरम्भे बलो नाम ॥ २२ ॥ ह वा प्रसिद्धाः । इह लोके । षड्भिरधिका नवतिः षण्णवतिः । येन बलेन ॥ २३ ॥ यस्य बलस्य । उदपद्यन्त उत्पन्ना बभूवुः ॥२४॥ स्वेच्छाचारिण्यः । मदनाक्रान्ताः पुंसिः पुंसि भ्रममाणाः । इति क्रमेणार्थाः ॥२५॥ विलापनं बिलस्थानम् । साधयित्वा सम्भोगसमर्थं कृत्वा । वै एवार्थे प्रविष्टमेव । स्वविलासा हावभावादयस्तत्पूर्वकमवलोकनं सानुरागं स्मितं मिथोभाषणम् आलिङ्गनं च तदादिभिः । स्वैरं यथेच्छम् । किल निश्चये ॥ २६ ॥ यस्मिन् हाटकरसे उपयुक्ते सेविते सति अभि निर्भयं यथा स्यात्तथा आत्मानं कत्थते श्लाघते ॥ २७ ॥ ततोऽतलात् । उपबृंहणाय वृद्धये । मिथुनीभूय इति पाठः ॥ २८ ॥ यतो यत्र । भवयोः भवानीभवयोः । 'पुमान् स्त्रिया' इत्येकशेषः ॥ २९ ॥ यत्र हाटकाख्यनद्याम् । चित्रभानुः अग्निः वायुना प्रज्वलितः सन् बलेन तद्रसं पिबति संशोष्य कठिनीकरोति ॥ ३० ॥ तन्निष्ठ्यूतं फूत्कृत्य त्यक्तं सुवर्णं भूषणरूपेण । अवरोधेषु अन्तःपुरेषु ॥ ३१ ॥ ततो वितलात् । सुतले उदारश्रवाः विपुलकीर्तिः बलिः अधुनापि आस्ते इत्यन्वयः । कथंभूतः । महेन्द्रस्य प्रियं कर्तुमिच्छता भगवता वामनेन पराक्षिप्तमपहृतं लोकत्रयं यस्य सः । पुनर्भगवतोऽनुकम्पयैव तत्र प्रवेशितः । किं कुर्वन्नास्ते । अपगतसाध्वसो विगतभयो भूत्वा तमेव स्वधर्मेण आराधयन् । कीदृशेन भगवता । योऽदितेः सकाशात् भूत्वा वटुवामनरूपेण लब्धकायस्तेन ॥३२॥ यत् विलयनिलये सुतललोके ऐश्वर्यमाधिपत्यम् एतद्भूमिदानस्य फलं नो एव न भवत्येव । कुतः । यत् यस्मात् तत् तस्मिन् परमात्मनि वासुदेवे तीर्थतमे पात्रे उपपन्ने सति श्रद्धया संप्रतिपादितस्य

श्रद्धया परमादरसमाहितमनसा सम्प्रतिपादितस्य साक्षादपवर्गद्वारस्य यद्विलनिलयैश्वर्यम् ॥३३॥ यस्य ह वाव क्षुतपतनप्रस्खलनादिषु विवशः सकृन्नामाभिगृणन् पुरुषः कर्मबन्धनमञ्जसा विधुनोति ॥ ३४ ॥ यस्य हैव प्रतिबाधनं मुमुक्षवोऽन्यथैवोपलभन्ते ॥ ३५ ॥ तद्भक्तानामात्मवतां सर्वेषामात्मन्यात्मद आत्मतयैव ॥ ३६ ॥ न वै भगवान्नूनममुष्यानुजग्राह ॥ ३७ ॥ यदुत पुनरात्मानुस्मृतिमोषणं मायामयभोगैश्वर्यमेवातनुतेति ॥ ३८ ॥ यत्तद्भगवतानधिगतान्योपायेन याच्ञाच्छलेनापहृतस्वशरीरावशेषितलोकत्रयो वरुणपाशैश्च सम्प्रतिमुक्तो गिरिदर्यां चापविद्ध इति होवाच ॥ ३९ ॥ नूनं बतायं भगवानर्थेषु न निष्णातो योऽसाविन्द्रो यस्य सचिवो मन्त्राय वृत एकान्ततो बृहस्पतिस्तमतिहाय स्वयमुपेन्द्रेणात्मानमयाचतात्मनश्चाशिषो नो एव तद्दास्यमतिगम्भीरवयसः कालस्य मन्वन्तरपरिवृत्तं कियल्लोकत्रयमिदम् ॥ ४० ॥ यस्यानुदास्यमेवास्मत्पितामहः किल वव्रे न तु स्वपित्र्यं यदुताकुतोभयं पदं दीयमानं

सम्यक् अर्पितस्य अत एव साक्षात् अपवर्गसाधनीभूतस्य । निकायः समूहः तेषां जीवभूत जीवनरूपो य आत्मा अन्तर्यामी तद्रूपे परमात्मनि ॥ ३३ ॥ किञ्च यस्य नाम क्षुतादिषु च विवशोऽपि सकृदपि गृणन् उच्चारयन् पुरुष अञ्जसा अनायासेन कर्मबन्धनं विधुनोति निरस्यति । कथंभूतम् । यस्य हैव कर्मबन्धनस्यैव प्रतिबाधनं निरसनोपायं मुमुक्षवोऽन्यथैव प्रकारान्तरेण योगाभ्यासादिना उपलभन्ते जानन्ति तत्कर्मबन्धनमित्यन्वयः । क्षुतं धिक्का । अयं तान्तोऽदन्तश्च[1] । ह वावेति निपातद्वय शास्त्र प्रसिद्धि सूचयति॥३४।३५॥ तत् तस्मिन् भगवति आत्मतया आत्मभावेन समर्पितस्य भूमिदानस्य न तत्फलमिति पूर्वेणवान्वयः । कथंभूते । भक्तानाम् आत्मवतां ज्ञानिनां च यथाक्रमम् आत्मनि आत्मत्वेनाभिव्यज्यमाने आत्मदे ज्ञानप्रदे च ॥ ३६ ॥ भगवान् अमुष्य अमुम् इन्द्रं नवै नैव अनुजग्राह अनुगृहीतवान् । कर्मणः सम्बन्धमात्रविवक्षया षष्ठी ॥ ३७ ॥ यत् यस्मात् भगवत्स्मृतिविघातकं मिथ्याभूतं भोगैश्वर्यमेव अतनुत विस्तारितवान् दत्तवानित्यर्थः । उत आश्चर्ये ॥ ३८ ॥ यत् यस्मात् वलिः अतिमहत्त्वपूर्णमिदं वक्ष्यमाणं ह स्फुटमुवाच तत्तस्मात् असौ परमभक्त एवेति शेषेणान्वयः । कथंभूतः भगवता वामनेन याच्ञाव्याजेन अपहृतं शरीरमात्रावशेषितं लोकत्रयं यस्य सः पुनश्च वरुणपाशैः मन्त्रात्मकैः सम्प्रतिमुक्तो बद्धः प्रक्षिप्तश्च । कथंभूतेन भगवता । न अधिगतः प्राप्तः माच्ञेतरः अन्य उपायो येन ॥ ३९ ॥ बतेति खेदे । भगवान् विद्वानपि योऽसौ इन्द्रः सः अर्थेषु स्वार्थेषु न निष्णातः न निपुणः । मन्त्राय मन्त्रविचारार्थम् एकान्ततो मुख्यतया यः बृहस्पतिर्वृतः सोऽपि न निष्णातः इत्यन्वयः । कथंभूत । यस्य इन्द्रस्य सचिवः साहाय्यकर्ताऽपि सन् । कुतः । यतः स्वयं सर्वसमर्थम् उपेन्द्रं विहाय उपेन्द्रेण द्वारभूतेन आत्मान मां वलिम् आत्मन स्वस्य आशिषः लोकत्रयभोगान् अयाचत नो एव तद्दास्यमतो विद्वानपि मूर्ख इत्यर्थः । यतो हि कालवशवर्ति मन्वन्तर पर्यन्तस्थायि इदं लोकत्रयं कियत् अतितुच्छमित्यर्थः । अतिगम्भीरमनिवार्यं रंहो वेगो यस्य ॥ ४० ॥ यस्य भगवतः दास्यमेव वव्रे पितामहः प्रह्लादः स्वपितरि उपरते मृते सति स्वपित्र्यं पदं यदपि निष्कण्टकं भगवता दीयमानमपि न वव्रे । कुतः । भगवतः सकाशात् परमन्यत्

---

१. स्त्री क्षुत क्षुतं क्षवः पुंसि इत्यमरः । टुक्षु शब्दे इत्यस्माद् क्षवणं क्षुत सम्पादित्वात् क्विप् क्षुतं भावे क्तः ।

भगवतः परमिति भगवतोपरते खलु स्वपितरि ॥ ४१ ॥ तस्य महानुभावस्यानुपथममृजित-कषायः को वास्मद्विधः परिहीणभगवदनुग्रह उपजिगमिषतीति ॥ ४२ ॥ तस्यानुचरितमुपरिष्टाद्विस्तरिष्यते ॥ ४३ ॥ यस्य भगवान् स्वयमखिलजगद्गुरुर्नारायणो द्वारि गदापाणिरवतिष्ठते निजजनानुकम्पितहृदयो येनाङ्गुष्ठेन पदा दशकन्धरो योजनायुतायुतं दिग्विजय उच्चाटितः ॥ ४४ ॥

ततोऽधस्तात्तलातले मयो नाम दानवेन्द्रस्त्रिपुराधिपतिर्भगवता पुराणि त्रिलोकीशं चिकीर्षुणा निर्दग्धस्वपुरत्रयस्तत्प्रसादाल्लब्धपदो मायाविनामाचार्यो महादेवेन परिरक्षितो विगतसुदर्शनभयो महीयते ॥ ४५ ॥

ततोऽधस्तान्महातले काद्रवेयाणां सर्पाणां नैकशिरसां क्रोधवशो नाम गणः ॥ ४६ ॥ कुहकतक्षककालियसुषेणादिप्रधाना महाभोगवन्तः पतत्त्रिराजाधिपतेः पुरुषवाहादनवरतमुद्विजमानाः स्वकलत्रापत्यसुहृत्कुटुम्बसङ्गेन क्वचित्प्रमत्ता विहरन्ति ॥ ४७ ॥

ततोऽधस्ताद्रसातले दैतेया दानवाः पणयो नाम निवातकवचा कालेया हिरण्यपुरवासिन इति विबुधप्रत्यनीका उत्पत्त्या महौजसो महासाहसिनो भगवतः सकललोकानुभावस्य हरेरेव तेजसा प्रतिहतबलावलेपा बिलेशया इव वसन्ति ॥४८॥ ये वै सरमयेन्द्रदूत्या वाग्भिर्मन्त्रवर्णाभिरिन्द्राद् बिभ्यति ॥ ४९ ॥

ततोऽधस्तात्पाताले नागलोकपतयो वासुकिप्रमुखाः शंखकुलिकमहाशंखश्वेतधनञ्जयधृतराष्ट्रशङ्खचूडकम्बलाश्वतरदेवदत्तादयो महाभोगिनो महामर्षा निवसन्ति येषामु ह वै पञ्च-

---

इति हेतोः ॥ ४१ ॥ भगवदनुग्रहरहितः को वाऽस्मद्विधः तस्य पन्थानमनु उपगन्तुमिच्छति न कोऽपीत्यन्वयः । मक्षिकेव गरुत्मत इति शेषः । न मृजिताः न क्षीणाः कषाया रागादयो यस्य तथाभूतः ॥ ४२ ॥ उत्तरस्मादष्टमस्कन्धे । विस्तरेण कथयिष्यते ॥ ४३ ॥ यस्य बलेर्द्वारि । येन भगवता पदा तत्राप्यङ्गुष्ठेनैव दिग्विजयावसरे द्वारि विशन् रावणः उच्चाटितः प्रक्षिप्तः । अयुतायुतं कोटियोजनम् ॥४४॥ ततः सुतलात् । त्रिलोक्या शं सुखं कर्तुमिच्छता भगवता निर्दग्धं पुरत्रयं विमानरूपं यस्य । महीयते पूज्यते ॥ ४५ ॥ ततः तलातलात् । कद्रोरपत्यानि पुंभासः काद्रवेयाः तेषां क्रोधवशो नाम गणोऽस्ति ॥ ४६ ॥ तत्र प्रधानान् निर्दिशति-कुहकेति । महाभोगवन्तः दीर्घकायाः । पतत्त्रिराजा हंसादयस्तेषामधिपतेर्गरुडात् । उद्विजमाना भयकम्पिताः । क्वचित्प्रदेशेषु । प्रमत्ता विस्मृतभयत्वेन ॥४७॥ ततो महातलात् । पण्यादयो दैत्यगणभेदाः । विबुधप्रत्यनीकाः देवशत्रवः प्रतिहतः बलावलेपो वीर्यमदः येषां ते विलेशयाः सर्पा इव रसातले वसन्तीत्यन्वयः ॥ ४८ ॥ ये वै पणयः असुराः गामन्वेष्टुं प्रेषितया देवशुन्या सरमया प्रयुक्ताभिः वाग्भिः इन्द्रात् बिभ्यति भीता भवन्ति । एवं हि वैदिकमाख्यानम् । पणिभिरसुरैः निगूढां गामन्वेष्टुमिन्द्रेण देवशुनी सरमा प्रेषिता । सन्धिमिच्छन्तः पणयस्तामूचुः किमिच्छन्ती सरमे । इत्यादिना । सा च सन्धिमनिच्छन्ती परुषमाह 'हता इन्द्रेण पणयः शयध्वम्' ते च तच्छ्रुत्वा बिभ्यतीति ॥ ४९ ॥ ततो रसातलात् । शंखादयो दश । महाभोगिनो महाफणाः । रोचिष्णवः महा-

सप्तदशशतसहस्रशीर्षाणाम् ॥५०॥ फणासु विरचिता महामणयो रोचिष्णवः पातालविवरतिमिरनिकरं स्वरोचिषा विधमन्ति ॥ ५१ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां पञ्चमस्कन्धे राह्वादिस्थितिबिलस्वर्गमर्यादानिरूपणं नाम चतुर्विंशोऽध्यायः ॥ २४ ॥

अथ पञ्चविंशोऽध्यायः

श्रीशुक उवाच

तस्य मूलदेशे त्रिंशद्योजनसहस्रान्तर आस्ते या वै कला भगवतस्तामसी समाख्याताऽनन्त इति ॥१॥ सात्वतीया द्रष्टृदृश्ययोः संकर्षणमहमित्यभिमानलक्षणं यं संकर्षणमित्याचक्षते ॥२॥

यस्येदं क्षितिमण्डलं भगवतोऽनन्तमूर्तेः सहस्रशिरस एकस्मिन्नेव शीर्षणि ध्रियमाणं सिद्धार्थ इव लक्ष्यते ॥ ३ ॥ यस्य ह वा इदं कालेनोपसंजिहीर्षतोऽमर्षविरचितरुचिरभ्रमद्भ्रुवोरन्तरेण सांकर्षणो नाम रुद्र एकादशव्यूहस्त्र्यक्षस्त्रिशिखं शूलमुत्तम्भयन्नुदतिष्ठत् ॥ ४ ॥ यस्याङ्घ्रिकमलयुगलारुणविशदनखमणिषण्डलेष्वहिपतयः सह सात्वतर्षभैरेकान्तभक्तियोगेना-

---

प्रकाशनशीलाः । तिमिरनिकरम् अन्धकारसमूहम् । घोरान्धकारम् विधमन्ति नाशयन्ति उ विस्मये । ह वै प्रसिद्धौ ॥ ३६ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां पञ्चमस्कन्धे चतुर्विंशतितमोऽध्यायः ॥ ११ ॥

पञ्चविंशे तु पातालादधस्ताच्छेषसंस्थितिः ।
आविरासीद्यतो रुद्रो वर्ण्यन्ते तस्य सद्गुणाः ॥

तस्य पातालस्य । या वै प्रसिद्धा भगवतः कला मूर्तिः अनन्त इति समाख्याता सा आस्ते इत्यन्वयः । तामसी तमःकार्यसंहारप्रवर्तिका न तु तमोमयी 'मूर्ति नः' इत्यग्रिमग्रन्थविरोधात् । सात्वतीया पञ्चरात्रोपासका भक्ताः यमनन्तं सङ्कर्षणमिति कथयन्ति । कथंभूतम् । द्रष्टृदृश्ययोः भोक्तृभोग्ययोः सम्यक्कर्षणं यतः स सङ्कर्षणः । तच्च कर्षणमहमस्य भोक्ता इदं मे भोग्यमित्यभिमानलक्षणमेव ॥ १।२ ॥ यस्य एकस्मिन्नेव कस्मिंश्चित् शीर्षणि ध्रियमाणमिदं विश्वं सिद्धार्थः सर्षप इव लक्ष्यते स एष भगवाननन्त इति षष्ठेनान्वयः । सर्वत्र यच्छब्दानां स एष इति सप्तमेनान्वयः कार्यः॥३॥ ह स्फुटम् । वै प्रसिद्धः । कालेन प्रलयेन हेतुभूतेन इदं विश्वं संहर्तुमिच्छोर्यस्यभ्रुवोर्मध्यात् रुद्र उदतिष्ठत् प्रादुरभूत् लीलार्थमिति शेषः । उत्तम्भयन् ऊर्ध्वं चालयन् । व्यूहः गणः । अमर्षेण क्रोधेन विरचिते कुटिलीकृते अथापि भक्तानां रुचिरे ये भ्रुवौ तयोरन्तरेण मध्यात् । त्र्यक्षः त्रिनेत्रः ॥ ४ ॥ अहिपतयो नागराजा यस्य चरण-

वनमन्तः स्ववदनानि परिस्फुरत्कुण्डल प्रभामण्डलमण्डितगण्डस्थलान्यति मनोहराणि प्रमुदितमनसः खलु विलोकयन्ति ॥ ५ ॥ यस्यैव हि नागराजकुमार्य आशिष आशासानाश्चार्वङ्गवलयविलसितविशदविपुलधवलसुभगरुचिरभुजरजतस्तम्भेष्वगुरुचन्दनकुङ्कुमपङ्कानुलेनेनावलिम्पमानास्तदभिमर्शनोन्मथितहृदयमकरध्वजावेशरुचिरललितस्मितास्तदनुरागमदमुदितमदविघूर्णितारुणकरुणावलोकनयन वदनारविन्दं सव्रीडं किल विलोकयन्ति ॥ ६ ॥ स एव भगवाननन्तोऽनन्तगुणार्णव आदिदेव उपसंहृतामर्षरोषवेगो लोकानां स्वस्तय आस्ते ॥ ७ ॥

ध्यायमानः सुरासुरोरगसिद्धगन्धर्वविद्याधरमुनिगणैरनवरतमदमुदितविकृतविह्वललोचनः सुललितमुखरिकामृतेनाप्यायमानः स्वपार्षदविबुधयूथपतीनपरिम्लानरागनवतुलसिकामोदमध्वासवेन माद्यन्मधुकरव्रातमधुरगीतश्रियं वैजयन्तीं स्वां वनमालां नीलवासा एककुण्डलो हलककुदि कृतसुभगसुन्दरभुजो भगवान् माहेन्द्रो वारणेन्द्र इव काञ्चीं कक्ष्यामुदारलीलो बिभर्ति ॥ ८ ॥

य एष एवमनुश्रुतो ध्यानमानो मुमुक्षूणामनदिकालकर्मवासनाग्रथितमविद्यामयं हृदयं गत आशु निर्भिनत्ति ॥ ९ ॥ तस्यानुभावान् भगवान् स्वायम्भुवो नारदः सह तुम्बुरुणा सभायां ब्रह्मणः संश्लोकयामास ॥ १० ॥

कमलनखमणिमण्डलेषु प्रतिबिम्बितानि स्ववदनानि विलोकयन्तीत्यन्वयः। सात्वतश्रेष्ठैः सह तम् अवनमन्तः प्रणमन्तः। कथंभूतानि। परिस्फुरतां कुण्डलानां प्रभामण्डेन मण्डितानि गण्डस्थलानि येषु तानि। अङ्घ्रियुगले अरुणा विशदा नखा एव मणयस्तेषां षण्डः समूहः तस्य मण्डलेषु ॥५॥ नागराजकुमार्यः यस्य तदनुरागादिपूर्णं वदनारविन्दं सव्रीडं यथास्यात्तथा विलोकयन्तीत्यन्वयः। कथंभूताः कुमार्यः। आशिषो भोगान् आशासानाः अभिकाङ्क्षन्त्यः। पुनः कथंभूताः। यस्य चारुणि अङ्गवलये अङ्गमण्डले विलसितादिविशेषणविशिष्टा ये भुजरजतस्तम्भास्तेषु अगुर्वादिपङ्कएवानुलेपस्तेन अविलिम्पन्त्यः। पुनश्च। तदभिमर्शेन तदङ्गस्पर्शेन क्षुभिते हृदये यो मकरध्वजावेशस्तेन रुचिरं भावसूचकं ललितस्मितं यासां ताः। तस्य शेषस्य योऽनुरागमदः भक्तविषयकः तेन मुदिते मदविघूर्णितेईषदरुणे करुणावलोकविशिष्टे नयने यस्मिस्तत् वदनारविन्दम् ॥ ६ ॥ अमर्षो ऽसहिष्णुता तदुत्थो रोषवेगः स निरुद्धो येन सः ॥ ७ ॥ सुरादिभिः ध्यायमानः स एष भगवान् वैजयन्तीं मालां बिभर्तीत्यन्वयः। यथा वारणेन्द्र ऐरावतः स्वर्णमयीं कक्ष्याम् उदरबन्धनश्रृङ्खलां बिभर्ति तद्वत्। कथंभूतः। अनवरतं मदेन मुदितः प्रसन्नः विकृते विघूर्णिते विह्वले लोचने यस्य स चासौ स च। पुनः। नुललितेन मुखरिकामृतेन वचनामृतेन स्वपार्षदादीन् आप्यायमानः संहर्षयन्। तर्पयन्' वा। कीदृशीं मालाम्। न परिम्लानः रागः कान्तिर्यस्यास्तस्या नवतुलसिकाया सुरभिमधुररसेन माद्यतां मधुकरसमूहानां मधुरगीतेन श्रीर्यस्यास्ताम्। ककुदि पृष्ठे। कृतः न्यस्तः। कक्ष्येति यकारघटित एव पाठः 'कक्षे भवा कक्ष्या उदरबन्धनम् शरीरावयवाद्यत्' इति यत्प्रत्ययः। सुभगः कोमलः। उदारा चेताहरा ॥८॥ य एष विलक्षणप्रभावो भगवान् एवमनुश्रुतश्चेत्तर्हि मुमुक्षूणामन्तर्हृदयं गतः सन् आशु हृदयग्रन्थिमहङ्कारं निर्भिनत्ति नाशयन्ति ॥९॥ तस्यानुभावान् प्रभावान् अवतारसम्बन्धिनः नारदः संश्लोकयामास श्लोकैः वर्णयामासेत्यन्वयः। तुम्बुरुणा गन्धर्वेण सह ॥१०॥

उत्पत्तिस्थितिलयहेतवोऽस्य कल्पाः सत्त्वाद्याः प्रकृतिगुणा यदीक्षयाऽऽसन् ।
यद्रूपं ध्रुवमकृतं यदेकमात्मन्नानाधात्कथमु ह वेद तस्य वर्त्म ॥ ११ ॥

मूर्तिं नः पुरुकृपया बभार सत्त्वं संशुद्धं सदसदिदं विभाति यत्र ।
यल्लीलां मृगपतिराददेऽनवद्यामादातुं स्वजनमनांस्युदारवीर्यः ॥ १२ ॥

यन्नाम श्रुतमनुकीर्तयेदकस्मादार्तो वा यदि पतितः प्रलम्भनाद्वा ।
हन्त्यंहः सपदि नृणामशेषमन्यं कं शेषाद्भगवत आश्रयेन्मुमुक्षुः ॥ १३ ॥

मूर्धन्यर्पितमणुवत्सहस्रमूर्ध्नो भूगोलं सगिरिसरित्समुद्रसत्त्वम् ।
आनन्त्यादनिमितविक्रमस्य भूम्नः को वीर्याण्यधिगणयेत्सहस्रजिह्वः ॥ १४ ॥

एवंप्रभावो भगवाननन्तो दुरन्तवीर्योरुगुणानुभावः ।
मूले रसायाः स्थित आत्मतन्त्रो यो लीलया क्ष्मां स्थितये बिभर्ति ॥ १५ ॥

एता ह्येवेह नृभिरुपगन्तव्या गतयो यथाकर्म विनिर्मिता यथोपदेशमनुवर्णिताः कामान् कामयमानैः ॥ १६ ॥

अस्य जगतः उत्पत्त्यादिहेतवः प्रकृतिगुणाः यस्पेक्षया निरीक्षणेनैव कल्पाः स्वस्वकार्ये समर्था आसन् । यस्य तु रूपं ध्रुवमनन्तम् अकृतमनादि च । कुतः । यत् एकमेव सत् आत्मन् आत्मनि नाना कार्यप्रपञ्चमधात् दधार तस्य वर्त्म तत्त्वं तत्प्राप्तिमार्गं वा कथं वेद नैव वेदेत्यर्थः । उह वितर्के । इतः परं चतुर्षु प्रहर्षिणीवृत्तम् ॥ ११ ॥ यत्र इदं सदसत् स्थूलसूक्ष्मात्मकं विश्वं प्रतीयते स भगवान् नोऽस्माकमुपरि अतिशयकृपया सत्त्वं मूर्तिं शुद्धसत्त्वात्मकं विग्रहं दधारेत्यन्वयः । यत् यया मूर्त्या स्वजनानां मनांसि आदातुमाक्रष्टुं लीलाम् मृगपतिः सिंह इव आददे स्वीचकार । बालसिंहावलोकन, इत्युक्तेः । अनवद्यां शुद्धां मनःसंशोधनीम् । मृगपतिः सिंह इव उदारवीर्यो वा भगवान् । लुप्तोपमा । यद्वा । मृग्यन्ते जनैरिति मृगाः ब्रह्मादयस्तेषां पतिः मुख्यः तस्मादन्यं कं मुमुक्षुः आश्रयेदित्युत्तरेणान्वयः ॥ १२ ॥ यस्य गुर्वादितः श्रुतं नाम आर्तो रोगी पातकी वा अकस्मात् प्रलम्भनात् परिहासाद्वा यदि अनुकीर्तयेत् तर्हि सपद्येव अशेषमंहः पापे हन्ति नाशयति न केवलमात्मन एव किन्तु सर्वेषां नृणां तस्मात् शेषादन्यं कमाश्रयेदिति ॥ १३ ॥ सहस्रमूर्ध्नः यस्य शेषस्य एकस्मिन्नेव मूर्धनि अर्पितं स्थापितं गिर्यादिसहितमिदं भूगोलमणुवत् भासते तस्य अनन्तस्य भगवतः पराक्रमान् वीर्याणि आनन्त्यात् हेतोः सहस्रजिह्वोऽपि सन् को वा गणयेत् न कोऽपीत्यन्वयः । कथंभूतस्य । अनिमितविक्रमस्य अनन्तपराक्रमस्य । कुतः । भूम्नोऽपरिच्छिन्नस्य ॥१४॥ दुःशब्दो नञर्थकः । दुरन्तमनन्तं वीर्यं यस्य । उरवो बहवो गुणा भक्तवात्सल्यादयः अनुभावश्च यस्य स चासौ स च । रसायाः भूमेः । आत्मतन्त्रः स्वतन्त्रः । लीलया अनायासेन । क्ष्मां पृथिवीम् । स्थितये रक्षणाय ॥ १५ ॥ इह प्रवृत्तिमार्गे कामान् कामयमानैः नृभिः एता एव गतयः कर्मणां फलरूपा लोका उपगन्तव्याः प्राप्तव्याः भवन्ति । ताः यथाशास्त्रमनुवर्णिता इत्यन्वयः ॥ १६ ॥

एतावतीर्हि राजन् पुंसः प्रवृत्तिलक्षणस्य धर्मस्य विपाकगतय उच्चावचा विसदृशा यथाप्रश्नं व्याचख्ये किमन्यत्कथयाम इति ॥ १७ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां पञ्चमस्कन्धे भूविवरविध्युपवर्णनं नाम पञ्चविंशोऽध्यायः ॥ २५ ॥

अथ षडविंशोऽध्यायः

राजोवाच

महर्ष एतद्वैचित्र्यं लोकस्य कथमिति ॥ १ ॥

ऋषिरुवाच

त्रिगुणत्वात्कर्तुः श्रद्धया कर्मगतयः पृथग्विधाः सर्वा एव सर्वस्य तारतम्येन भवन्ति ॥ २ ॥ अथेदानीं प्रतिषिद्धलक्षणस्याधर्मस्य तथैव कर्तुः श्रद्धाया वैसादृश्यात्कर्मफलं विसदृशं भवति या ह्यनाद्यविद्यया कृतकामानां तत्परिणामलक्षणाः सृतयः सहस्रशः प्रवृत्तास्तासां प्राचुर्येणानुवर्णयिष्यामः ॥ ३ ॥

पुंसः सकामस्य धर्मस्य या विपाकगतयः फलरूपा गतयः ता एतावतीः व्याचख्ये व्याख्यातवानस्मि अन्यत् किं कथयाम तद् ब्रूहीति शेषेणान्वयः । कथंभूताः गतयः । उच्चाः स्वर्गादिरूपाः । अवचा नीचाः पातालादिरूपाः विसदृशाः विसदृश्यः मध्यमाः मर्त्यलोकादिरूपाः । सुखदुःखतारतम्येन व्यवस्थिताः । उच्चावचानामेकरूपत्वासंभवाद्विसदृशा इत्युक्तम् । बाहुलकाद् ङीवभावः । अत्र सूर्यादधस्ताद् भूमिपर्यन्तमेकलक्षयोजनानि, ततोऽधस्तात् पातालपर्यन्तं गर्भोदकसंज्ञं जलं तन्मध्येऽधस्तात्कूर्मस्तस्योपरि शेषः इत्येवं सूर्यादधोऽण्डकटाहपर्यन्तं पञ्चविंशतिकोटियोजनानि भवन्तीति ज्ञेयम् ॥ १७ ॥

इति श्रीमद्भागवत महापुराणे पञ्चमस्कन्धे गूढार्थदीपिन्यां पञ्चविंशतितमोऽध्यायः ।

भुवोऽधः सलिलादूर्ध्वं षड्विंशे नरकस्थितिः ।
पापिनो यत्र पीड्यन्ते यमदूतैर्दिवानिशम् ॥ १ ॥

कर्तुर्जीवस्य त्रिगुणत्वात् श्रद्धाया अपि त्रैविध्यम् अतः तत्तद्गुणानुरूपया श्रद्धया कर्मणां गतयः फलानि तारतम्येन न्यूनाधिकभावेन सर्वस्य सर्वा एव भवन्ति । नहि कश्चित् सर्वदैव सात्त्विकश्रद्धावानेव न च राजसतामसश्रद्धावानेव वा । अतः सात्त्विक्या श्रद्धया धर्मः ततः सुखं राजस्या धर्माधर्मौ ततः सुखदुःखे तामस्या अधर्म एव ततः दुःखमोहौ तत्रापि श्रद्धानां तारतम्यात्सुखादितारतम्यं सर्वेषामित्यर्थः ॥ २ ॥ अथ नरकारम्भे निषिद्धलक्षणस्य—'ब्राह्मणो न हन्तव्यः' 'आचारान्न प्रमदितव्यम्' इत्यादिनिषिद्धलक्षणस्य विरुद्धस्वरूपत्वात् विसदृशं विरुद्धं फलं भवति । अविद्यया अज्ञानेन कृतानां कामानां पापानां सहस्रशः सृतयो नरका विरचिताः सन्ति । तासां मध्ये याः मुख्याः ताः प्राचुर्येण

राजोवाच

नरका नाम भगवन् किं देशविशेषा अथवा बहिस्त्रिलोक्या आहोस्विदन्तराल इति॥ ४ ॥

ऋषिरुवाच

अन्तराल एव त्रिजगत्यास्तु दिशि दक्षिणस्यामधस्ताद्भूमेरुपरिष्टाच्च जलाद्यस्यामग्निष्वात्तादयः पितृगणा दिशि स्वानां गोत्राणां परमेण समाधिना सत्या एवाशिष आशासाना निवसन्ति ॥ ५ ॥ यत्र ह वाव भगवान् पितृराजो वैवस्वतः स्वविषयं प्रापितेषु स्वपुरुषैर्जन्तुषु सम्परेतेषु यथाकर्मावद्यं दोषमेवानुल्लङ्घितभगवच्छासनः सगणो दमं धारयति ॥ ६ ॥ तत्र हैके नरकानेकविंशतिं गणयन्ति । अथ तांस्ते राजन्नामरूपलक्षणतोऽनुक्रमिष्यामः ॥ ७ ॥ तामिस्रोऽन्धतामिस्रो रौरवो महारौरवः कुम्भीपाकः कालसूत्रमसिपत्रवनं सूकरमुखमन्धकूपः संदंशस्तप्तसूर्मिर्वज्रकण्टकशाल्मली वैतरणी पूयोदः प्राणरोधो विशसनं लालाभक्षः सारमेयादनमवीचिरयःपानमिति ॥८॥ किं च क्षारकर्दमो रक्षोगणभोजनः शूलप्रोतो दन्दशूकोऽवटनिरोधनः पर्यावर्तनः सूचीमुखमित्यष्टाविंशतिर्नरका विविधयातनाभूमयः ॥ ९ ॥

तत्र यस्तु परवित्तापत्यकलत्राण्यपहरति स हि कालपाशबद्धो यमपुरुषैरतिभयानकैस्तामिस्रे नरके बलान्निपात्यते ।। १० ॥ अनशनानुदपानदण्डताडनसंतर्जनादिभिर्यातनाभिर्यात्यमानो जन्तुर्यत्र कश्मलमासादित एकदैव मूर्च्छामुपयाति तामिस्रप्राये ॥ ११ ॥ एवमेवान्धतामिस्रे यस्तु वञ्चयित्वा पुरुषं दारादीनुपयुङ्क्ते ।। १२ ॥ यत्र शरीरी निपात्यमानो यातनास्थो वेदनया नष्टमतिर्नष्टदृष्टिश्च भवति यथा वनस्पतिर्वृश्च्यमानमूलस्तस्मादन्धतामिस्रं तमुपदिशन्ति ॥ १३ ॥

प्राधान्येनवर्णयिष्याम इत्यन्वयः ॥ ३ ॥ देशविशेषाः किं भूमावेव अन्तराले मध्ये वा ॥ ४ ॥ उपरिष्टाच्च नरका सन्ति द्वितीयदिशियस्यामित्यत्रान्वेति । गोत्राणां गोत्रजानां सत्याः सुखदाः आशिषः कामान् आशासानाः कामयाना निवसन्तीत्यन्वयः पाकं पचतीतिवन्निर्देशः । समाधिना भगद्ध्यानेन ॥५॥ यत्र येषु नरकेषु । वैवस्वतः सूर्यपुत्रो ह वाव प्रसिद्धः भगवान् यमः । संपरेतेषु मृतेषु अत एव यमदूतैः स्वविषयं यमलोकं प्रापितेषु प्राणिषु । अवद्यं निन्दितं कर्म कर्मावद्यं तदनतिक्रम्य वर्तते इति यथाकर्मावद्यं निन्दितकर्मानुसारेणैव दोषं पापं प्रतिदमं दण्डम् । 'बहुलग्रहणाद्विशेष्यस्य कर्मणः पूर्वनिपातः । अनुल्लङ्घितेति ॥६।७॥ तत्र दिशि । एके पौराणिकाः । ह स्फुटम् । अथ अतः । ते तुभ्यम् । यातनास्तीव्रवेदनास्तासां भूमयः स्थानानि ॥ ८।९ ॥ तत्र तेषु मध्ये । तमिस्राणां समूहः तामिस्रम् तद् विद्यते यस्मिन् ॥ १० ॥ अनशनं भोजनाभावः । पात्यमानः पीड्यमानः । कश्मलं महद् दुःखं प्रापितः उपयाति प्राप्नोति । एकदैव तत्क्षणमेव ॥ ११ ॥ वञ्चयित्वा इयं मे धर्मभगिनी इयं मे शिष्येत्यादिरूपेण । यः उपयुङ्क्ते भुङ्क्ते स एवमेवान्धतामिस्रे निपात्यते इति पूर्वेणान्वयः ॥ १२ ॥ भवति पततीत्यर्थः । यथा छिद्यमानमूलो वृक्षस्तद्वत् । नष्टदृष्टिः अन्धो भवति तस्मादन्धकारस्यान्धत्वापादकत्वात्तं नरकमन्धतामिस्रं वदन्ति ॥१३॥

यस्त्विह वा एतदहमिति ममेदमिति भूतद्रोहेण केवलं स्वकुटुम्बमेवानुदिनं प्रपुष्णाति स तदिह विहाय स्वयमेव तदशुभेन रौरवे निपतति ॥ १४ ॥ ये त्विह यथैवामुना विहिंसिता जन्तवः परत्र यमयातनामुपगतं त एव रुरवो भूत्वा तथा तमेव विहिंसन्ति तस्माद्रौरवमित्याहुः ॥ १५ ॥ रुरुरिति सर्पादतिक्रूरसत्त्वस्यापदेशः ॥ १६ ॥ एवमेव महारौरवो यत्र निपतितं पुरुषं क्रव्यादा नाम रुरवस्तं क्रव्येण घातन्ति यः केवलं देहम्भरः ॥ १७ ॥

यस्त्विह वा उग्रः पशून् पक्षिणो वा प्राणत उपरन्धयन्ति तमपकरुणं पुरुषादैरपि विगर्हितममुत्र यमानुचराः कुम्भीपाके तप्ततैले उपरन्धयन्ति ॥ १८ ॥ यस्त्विह पितृविप्रब्रह्मध्रुक् स कालसूत्रसंज्ञके नरके अयुतयोजनपरिमण्डले ताम्रमये तप्तखले उपर्यधस्तादग्न्यर्काभ्यामतितप्यमानेऽभिनिवेशितः क्षुत्पिपासाभ्यां च दह्यमानान्तर्बहिःशरीर आस्ते शेते चेष्टतेऽवतिष्ठति परिधावति च यावन्ति पशुरोमाणि तावद्वर्षसहस्राणि ॥ १९ ॥

यस्त्विह वै निजवेदपथादनापद्यपगतः पाखण्डं चोपगतस्तमसिपत्रवनं प्रवेश्य कशया प्रहरन्ति ॥२०॥ तत्र हासावितस्ततो धावमान उभयतोधारैस्तालवनासिपत्रैश्छिद्यमानसर्वाङ्गो हा हतोऽस्मीति परमया वेदनया मूर्च्छितः पदे पदे निपतति स्वधर्महा पाखण्डानुगतं फलं भुङ्क्ते ॥ २१ ॥

यस्त्विह वै राजा राजपुरुषो वा अदण्ड्ये दण्डं प्रणयति ब्राह्मणे वा शरीरदण्डं स पापीयान्नरकेऽमुत्र सूकरमुखे निपतति ॥ २२ ॥ तत्रातिबलैर्विनिष्पिष्यमाणावयवो यथैवेहेक्षुखण्ड आर्तस्वरेण स्वनयन् क्वचिन्मूर्च्छितः कश्मलमुपगतो यथैवेहादृष्टदोषा उपरुद्धाः ॥ २३ ॥

एतत् शरीरम् अहम् । इदमपत्यादिकं च ममैवेति । वै एवार्थे इह इत्यत्रान्वेति इहैव विहाय । तदुभयम् । तेन अशुभेन पापेन ॥१४॥ ये यथा विहिंसिताः ते तथैव तं विहिंसन्तीत्यन्वयः । रुरूणामयं रौरवः ॥१५॥ सत्त्वस्य जीवस्य । अपदेशो नामास्ति ॥ १६ ॥ क्रव्यादा मांसाशिनः । क्रव्येण निमित्तेन मांसार्थमित्यर्थः । उभयोः सामान्यविशेषयातनाभावाद्विशेषः ॥ १७ ॥ वै एवार्थे । उग्रः क्रूरप्रकृतिकः प्राणतः सजीवान् उपरन्धयति पचति । अपकरुणं निर्दयम् पुरुषादाः राक्षसाः । अमुत्र यमलोके । कुम्भीषु पच्यन्ते यत्र स कुम्भीपाकः । कुम्भी कटाहभेदः ॥ १८ ॥ ब्रह्म वेदः । यः पित्रादीनां द्रोहकर्ता स कालसूत्रे संप्रवेशितः दुःखितः सन् आस्ते उपविशति धावति च । सहस्राणि वर्षसहस्रपर्यन्तम् । तप्तखले तप्तगर्ते । कालः दुःखानुभवः कालः सूच्यते यस्मिंस्तत् नरकस्थानं कालसूत्रम् । खलं भूस्थानकल्केषु खलो गर्तेऽधमेऽम्बरे' इत्यभिधानात् । अग्न्यर्काभ्यामिति । यद्यपि तत्रार्को नास्ति तथापि पापिनां पीडार्थमन्य एव कल्पितोऽस्तीति ज्ञेयमत्र ॥ १९ ॥ अपगतः भ्रष्टः । पाखण्डं वेदविरुद्धमार्गं प्राप्तः । कशा कोडा इति ॥ २० ॥ तत्र वने । ह कष्टेन । अनुगतं पाखण्डानुरूपम् । असिसदृशानि पत्राणि येषां वृक्षाणां तेषां वनम् ॥२१॥ प्रणयति कारयति । अमुत्र यमलोके ॥ २२ ॥ तत्र नरके । अतिबलैः यमदूतैः । विनिष्पिष्यमाणाः चूर्णीक्रियमाणाः अवयवा अङ्गानि यस्य । इक्षुदण्डः यथा शब्दं करोति तथा स्वनयन् रुदन् । कश्मलं विकलतां-

यस्त्विह वै भूतानामीश्वरोपकल्पितवृत्तीनामविविक्तपरव्यथानां स्वयं पुरुषोपकल्पितवृत्तिर्विविक्तपरव्यथो व्यथामाचरति स परत्रान्धकूपे तदभिद्रोहेण निपतति ॥ २४ ॥ तत्र हासौ तैर्जन्तुभिः पशुमृगपक्षिसरीसृपैर्मशकयूकामत्कुणमक्षिकादिभिर्ये केचनाभिद्रुग्धास्तैः सर्वतोऽभिद्रुह्यमाणस्तमसि विहतनिद्रानिर्वृतिरलब्धावस्थानः परिक्रामति यथा कुशरीरे जीवः ॥ २५ ॥

यस्त्विह वा असंविभज्याश्नाति यत्किंचनोपनतमनिर्मितपञ्चयज्ञो वायससंस्तुतः स परत्र कृमिभोजने नरकाधमे निपतति ॥ २६ ॥ तत्र शतसहस्रयोजने कृमिकुण्डे कृमिभूतः स्वयं कृमिभिरेव भक्ष्यमाणः कृमिभोजनो यावत्तदप्रत्ताप्रहुतादोऽनिर्वेशमात्मानं यातयते ॥ २७ ॥ यस्त्विह वै स्तेयेन बलाद्वा हिरण्यरत्नादीनि ब्राह्मणस्य वापहरति वानापदि पुरुषस्तमअन्यस्यमुत्र राजन् यमपुरुषा अयस्मयैरग्निपिण्डैः संदंशैस्त्वचि निष्कुषन्ति ॥ २८ ॥ यस्त्विह वा अगम्यां स्त्रियमगम्यं वा पुरुषं योषिदभिगच्छति तावमुत्र कशया ताडयतस्तिग्मया सूर्म्या लोहमय्या पुरुषमालिङ्गयन्ति स्त्रियं च पुरुषरूपया सूर्म्या ॥ २९ ॥ यस्त्विह वै सर्वाभिगमस्तममुत्र निरये वर्तमानं वज्रकण्टकशाल्मलीमारोप्य निष्कर्षन्ति ॥ ३० ॥

ये त्विह वै राजन्या राजपुरुषा वा अपाखण्डा धर्मसेतून् भिन्दन्ति ते सम्परेत्य वैतरण्यां निपतन्ति भिन्नमर्यादाः ॥ ३१ ॥ तस्यां निरयपरिखाभूतायां नद्यां यादोगणैरितस्ततो

प्राप्तः मूर्च्छितो भवति। कथमिव। यथा पूर्वम् इह लोके अदृष्टदोषा दोषरहिताः तेन उपरुद्धाः पीडिताः सन्तः मूर्च्छिता भवन्ति तद्वत्। सूकरस्येव मुखं यस्मिन् सः सूकरमुखो नरकः इक्षुपीडनयन्त्राकारः ॥ २३ ॥ भूतानां मत्कुणमशकादीनाम्। वृत्तिः मनुष्यरक्तपानादिलक्षणा जीवनोपायः। न विविक्ता न ज्ञाता परव्यथा यैः[1]। द्रोहेण द्रोहजनितपापेन। अन्धकारावृतकूपो यस्मिन् सः। मध्यमपदलोपी समासः ॥ २४ ॥ अभिद्रुग्धाः हिंसिताः। अभिद्रुह्यमाणः सर्वतो विदीर्यमाणः। विहता निद्रानिर्वृतिः निद्रासुखं यस्य सः। परिक्रामति परिभ्रमति। कुशरीरे कुष्ठादिदूषितदेहे ॥ २५ ॥ यत् किञ्चिद् भक्ष्यादिकमुपनतं प्राप्तं भवति तत् असंविभज्य स्वयमश्नाति स अधमे निकृष्टनरके निपतति आत्मानं च यातयते पीडयतीत्यन्वयः। कथंभूतः। न निर्मिताः न कृताः पञ्च यज्ञाः येन सः। वायसतुल्यैर्भक्ष्याभक्ष्यविचारशून्यैर्जनैः संस्तुतः तत्तुल्य इत्यर्थः। पुनश्च। प्रकर्षेणादायीति प्रत्तं दत्तावशिष्टं प्रहुतं यज्ञावशिष्टं च ते न अत्तीति तथाभूतः। यद्वा। अप्रत्तमसंविभक्तम् अप्रहुतम् आहुतिवर्जितं चात्तीति तथाभूतः। कथंभूतमात्मानम्। यावत्तत् पापं तावत् अनिर्वेशम् अकृतप्रायश्चित्तम्। 'यावदवधारणे' इति समासः। कृमिभिर्भुज्यते कृमीन् भुङ्क्ते वा कृमिभोजनो नरकः ॥२६।२७॥ अन्यस्य वा अनापदि अपहरति तं पापिनं त्वचि विषये सन्देशैः निष्कुषन्ति छिन्दन्तीत्यन्वयः। सन्दशैः सन्दशन्ति यत्र स सन्दशाख्यो नरकः। संदशः संडासी इति। अग्निपिण्डवत्सन्तप्तैः ॥२८॥ वै अवधारणे। अगम्याम् अविवाहिताम्। अभिगच्छति संभोगं कुरुत इत्यर्थः। तिग्मया तप्तया सूर्म्या प्रतिमया। तप्ता सूर्मिर्यस्मिन् सः तप्तसूर्मिनाम नरकः ॥२९॥ सर्वाभिः स्त्रीभिः सह अभिगमो मैथुनं यस्य सः तं निष्कर्षन्ति ऊर्ध्वादधोभागे आकर्षन्ति। शाल्मली कण्टकवृक्षः। वज्रकण्टकशाल्मलिर्विद्यते यस्मिन् स नरकः ॥३०॥ अपाखण्डान् वैदिकान् धर्मसेतून् धर्ममर्यादाः भिन्दन्ति नाशयन्ति। संपरेत्य मृत्वा। यादोगणैः जलजन्तुभिः। आत्मना यातनादेहेन।

---

1. 'तिग्मे तीक्ष्णे च तप्ते च सूर्मी पुत्तलिका स्मृता' इत्यभिधानचिन्तामणिः।

भक्ष्यमाणा आत्मना न वियुज्यमानाश्चासुभिरुह्यमानाः स्वाघेन कर्मपाकमनुस्मरन्त उपतप्यन्ते ॥३२॥ विण्मूत्रपूयशोणितकेशनखास्थिमेदोमांसवसावाहिन्यामुपतप्यन्ते ॥३३॥ ये त्विह वै वृषलीपतयो नष्टशौचाचारनियमास्त्यक्तलज्जाः पशुचर्यां चरन्ति ते चापि प्रेत्य पूयविण्मूत्रश्लेष्ममलापूर्णार्णवे निपतन्ति तदेवातिबीभत्सितमश्नन्ति ॥ ३४ ॥ ये त्विह वै श्वगर्दभपतयो ब्राह्मणादयो मृगयाविहारा अतीर्थे च मृगान्निघ्नन्ति तानपि सम्परेतांल्लक्ष्यभूतान् यमपुरुषा इषुभिर्विध्यन्ति ॥ ३५ ॥

ये त्विह वै दाम्भिका दम्भयज्ञेषु पशून् विशसन्ति तानमुष्मिँल्लोके वैशसे नरके पतितान्निरयपतयो यातयित्वा विशसन्ति ॥ ३६ ॥ यस्त्विह वै सवर्णां भार्यां द्विजो रेतः पाययति काममोहितस्तं पापकृतममुत्र रेतःकुल्यायां पातयित्वा रेतः सम्पाययन्ति ॥ ३७ ॥ ये त्विह वै दस्यवोऽग्निदा गरदा ग्रामान् सार्थान् वा विलुम्पन्ति राजानो राजभटा वा तांश्चापि हि परेतान् यमदूता वज्रदंष्ट्राः श्वानः सप्तशतानि विंशतिश्च सरभसं खादन्ति ॥ ३८ ॥

यस्त्विह वा अनृतं वदति साक्ष्ये द्रव्यविनिमये दाने वा कथंचित्स वै प्रेत्य नरकेऽवीचिमत्यधःशिरा निरवकाशे योजनशतोच्छ्रायाद्गिरिमूर्ध्नः सम्पात्यते ॥ ३९ ॥ यत्र जलमिव

तत्र हेतुः । असुभिः असून् उह्यमानाः प्राप्यमाणाः । कर्मणः कर्तृत्वविवक्षायां तृतीया । ये धर्मसेतून् भिन्दन्ति ते स्वाघेन तज्जनितपापेन वैतरण्यां निपतन्ति उपतप्यन्ते क्लिश्यन्ति चेत्यन्वयः । कथंभूताः । यादोगणैः भक्ष्यमाणा इतस्तत उह्यमाना नीयमाना अपि आत्मना देहेन असुभिश्च न वियुज्यमाना न म्रियमाणाः । कर्मपाकं कर्मफलम् । कथंभूतायां नद्याम् । विण्मूत्रादीनां वाहः प्रवाह विद्यते यस्याम् । वसा हृन्मेदः । वितरणमत्र गोदानं तेन तीर्यते इति वैतरणी । नदीरूपोऽयं नरकः ॥३१।३२।३३॥ ये वृषलीपतयः पशुवत्स्वेच्छाचारं चरन्ति कुर्वन्ति ते चापि मृत्वा पूयोदसंज्ञके नरके निपतन्ति तथा तदेव पूयादिकमेव अतीवघृणितं वस्तु अश्नन्ति । वृषली शूद्रा । चरन्तीति पाकं पचतीतिवन्निर्देशः । पूयमुदकं यस्मिन् स नरकः । 'उदकस्योदः संज्ञायाम्' इति वचनादुदादेशः ॥ ३४ ॥ ये पतयः पालकाः तानपि सम्परेतान् मृतान् यमदूताः इषुभि र्बाणैः विध्यन्ति प्राणरोधं कुर्वन्ति । वेधनेन पीडाधिक्यात् प्राणानां निरोधो यस्मिन्निति तथाभूतोऽयं नरकः । अतीर्थं विहितात् यज्ञश्राद्धादेरन्यत्र । यद्यपि 'विधिरत्यन्तमप्राप्तौ' इति वचनात् तत्रापि विधिर्नास्ति तथापि उच्छृङ्खलप्रवृत्तिनिरोधार्थं परिसंख्यामुखेन तत्र सङ्कोच द्वारा निवृत्तौ तात्पर्यमित्यवधेयम् ॥ ३५ ॥ दाम्भिकाः धर्मध्वजिनः वयमपि यज्ञानुष्ठानपराः । विशसन्ति खण्डशः कुर्वन्ति । अमुष्मिन् यमलोके निरयपतयो यमदूताः । यातयित्वा पीडयित्वा । इत्येव पाठः । विशसन्ति हिंसन्ति पापिनो यस्मिन् तत् विशसनं नाम नरकस्थानम् ॥ ३६ ॥ सवर्णा स्वसमानवर्णजाताम् । पापं करोतीति पापकृत्तम् क्विबन्तोऽयम् । कुल्या नदी । लाला रेतः तस्य भक्षणं यस्मिन् सः लालाभक्षो नाम नरकः । लाला रेतसः पर्यायः ॥ ३७ ॥ दस्यवः तस्कराः । गरदा विषदाः ग्रामान् ग्रामस्थान् । सार्थान् वणिक्समूहान् विलुम्पन्ति तद्द्रव्यमपहरन्ति । भटाः सेवकाः । परेतान् परं परलोकम् इतान् गतान् । इत्येव पाठः । सरभसं सोत्साहं । सारमेयाः श्वानः तत्कर्तृकमदनं यस्मिंस्तत् सारमेयादनं नरकस्थानम् ॥३८॥ यस्तु साक्षी साक्षिणः कर्म साक्ष्यं तस्मिन् साक्षिणो वक्तव्ये । द्रव्यविनिमये क्रयविक्रयादिरूपवाणिज्ये अनृत वदति स कथञ्चित् अतिदुःखेन प्रेत्य मृत्वा अवीचिमति नरके पर्वत

स्थलमश्मपृष्ठमवभासते तदवीचिमत्तिलशो विशीर्यमाणशरीरो न म्रियमाणः पुनरारोपितो निपतति ॥ ४० ॥

यस्त्विह वै विप्रो राजन्यो वैश्यो वा सोमपीथस्तत्कलत्रं वा सुरां व्रतस्थोऽपि वा पिबति प्रमादतस्तेषां निरयं नीतानामुरसि पदाऽऽक्रम्यास्ये वह्निना द्रवमाणं कार्ष्णायसं निषिञ्चन्ति ॥ ४१ ॥ अथ च यस्त्विह वा आत्मसम्भावनेन स्वयमधमो जन्मतपोविद्याचारवर्णाश्रमवतो वरीयसो न बहु मन्येत स मृतक एव मृत्वा क्षारकर्दमे निरयेऽवाक्शिरा निपातितो दुरन्ता यातना ह्यश्नुशते ॥ ४२ ॥

ये त्विह वै पुरुषाः पुरुषमेधेन यजन्ते याश्च स्त्रियो नृपशून् खादन्ति तांश्च ते पशव इव निहता यमसदने यातयन्तो रक्षोगणाः सौनिका इव स्वधितिनाऽवदायासृक् पिबन्ति नृत्यन्ति च गायन्ति च हृष्यमाणा यथेह पुरुषादाः ॥ ४३ ॥ ये त्विह वा अनागसोऽरण्ये ग्रामे वा वैस्रम्भकैरुपसृतानुपविस्रम्भय्य जिजीविषून् शूलसूत्रादिषूपप्रोतान् क्रीडनकतया यातयन्ति तेऽपि च प्रेत्य यमयातनासु शूलादिषु प्रोतात्मानः क्षुत्तृड्भ्यां चाभिहताः कङ्कवटादिभिश्चेतस्ततस्तिग्मतुण्डैराहन्यमाना आत्मशमलं स्मरन्ति ॥ ४४ ॥

ये त्विह वै भूतान्युद्वेजयन्ति नरा उल्वणस्वभावा यथा दन्दशूकास्तेऽपि प्रेत्य नरके

शिखरात् अधः शिराः सन् संपात्यते इत्यन्वयः। यत्र नरके अश्मपृष्ठं पाषाणमयं स्थलं जलवत् प्रतीयते तत् अवीचिमन्नामको नरकः। वीचिस्तरङ्गः साऽस्यास्तीति वीचिमज्जलं तन्न विद्यते यस्मिन् स तथा भूतः। निरवकाशे निराधारे। तिलशः तिलप्रमाणतः ॥ ३९ ॥ ॥ ४० ॥ सोमस्य मद्यस्य पीथं पानं यस्य स एवंभूतो यो विप्रस्तत्कलत्रं सुरां पिबति अन्योऽपि व्रतस्थो यो राजन्यो वैश्यो वा तेषां सर्वेषामास्ये विदारितमुखं वह्निना द्रवीभूतमतीवसन्तापितं लोहं निषिञ्चन्ति। अयसो लोहस्य पानं यस्मिन् स तथा भूतो नरकः ॥ ४१ ॥ अथ चेति पौराणिकशैलीयम् अन्योऽपि नरक उच्यते इति शेषः। यस्तु स्वयं जात्या अधमोऽपि सन् आत्मनः स्वस्य सम्भावनेन उत्कृष्टताभिमानेन वरीयसः श्रेष्ठान् उच्चजातीन् न बहु मन्येत प्रत्युत अनाद्रियेत स जीवन्मृतक एव लवणपङ्कनिरये निपातितः अपारयातना अश्नुते प्राप्नोति। अवाक्शिराः अधोमुखः। क्षारः लवणात्मकः कर्दमो यस्मिन् स तथाभूतो नरकः ॥ ४२ ॥ पुरुष मेधेन हिंसया भद्रकाल्यायाः यजन्ते। ते च ताश्च तान्। पुमान् स्त्रिया इत्येकशेषः। ये इह निहताः ते पशवः रक्षोगणा भूत्वा सौनिका इव यातयन्तः पीडयन्तः स्वधितिना छुरिकया अवदाय तत्त्वचः विदार्य असृक् रक्तं पिबन्ति नृत्यन्ति च। यथा इह पूर्वम् अनृत्यन् तद्वत्। सूना वधस्थानं तत्र भवा सौनिकाः पशुघातिनः। 'द्व्यजृद्ब्राह्मणर्क्प्रथमाध्वरपुरश्चरणनामाख्याताट्ठक्' इति द्व्यच्त्वात् ठक्। रक्षोगणानामसृक् भोजनं यस्मिन् स तथाभूतोऽयं नरकः ॥ ४३ ॥ ये तु अनागसः निरपराधान् जन्तून् वैस्रम्भकैः विश्वासोपायैः उपविस्रम्भय्य विश्वासमुत्पाद्य उपसृतान् समीपमागतान् शूलादिषु उपप्रोतान् विद्धान् कृत्वा यातयन्ति पीडयन्ति ते चापि प्रेत्य मृत्वा आत्मशमलं स्वकीयं पापं स्मरन्तीत्यन्वयः। प्रोताः विद्धाः आत्मानो देहाः येषां तान्। तिग्मतुण्डैः तीक्ष्णचञ्चुभिः। शूले शूलादौ प्रोता भवन्ति पापिनो यस्मिन्निति तथाभूतोऽयं नरकः ॥ ४४ ॥ भूतानि प्राणिनः उद्वेजयन्ति भीषयन्ति। उल्वण-

दन्दशूकाख्ये निपतन्ति ॥ ४५ ॥ यत्र नृप दन्दशूकाः पञ्चमुखाः सप्तमुखा उपसृत्य ग्रसन्ति यथा बिलेशयान् ॥ ४६ ॥ ये त्विह वा अन्धावटकुसूलगुहादिषु भूतानि निरुन्धन्ति तथामुत्र तेष्वेवोपवेश्य सगरेण वह्निना धूमेन निरुन्धन्ति ॥ ४७ ॥ यस्त्विह वा अतिथीनभ्यागतान् वा गृहपतिरसकृदुपगतमन्युर्दिधक्षुरिव पापेन चक्षुषा निरीक्षते तस्य चापि निरये पापदृष्टेरक्षिणी वज्रतुण्डा गृध्राः कङ्ककाकवटादयः प्रसह्योरुबलादुत्पाटयन्ति ॥ ४८ ॥

यस्त्विह न्वा आढ्याभिमतिरहंकृतिस्तिर्यक्प्रेक्षणः सर्वतोऽभिविशङ्की अर्थव्ययनाशचिन्तया परिशुष्यमाणहृदयवदनो निर्वृतिमनवगतो ग्रह इवार्थमभिरक्षति स चापि प्रेत्य तदुत्पादनोत्कर्षणसंरक्षणशमलग्रहः सूचीमुखे नरके निपतति ॥ ४९ ॥ यत्र ह वित्तग्रहं पापपुरुषं धर्मराजपुरुषा वायका इव सर्वतोऽङ्गेषु सूत्रैः परिवयन्ति ॥ ५० ॥

एवंविधा नरका यमालये सन्ति शतशः सहस्रशस्तेषु सर्वेषु च सर्व एवाधर्मवर्तिनो ये केचिदिहोदिता अनुदिताश्चावनिपते पर्यायेण विशन्ति तथैव धर्मानुवर्तिन इतरत्र इह तु पुनर्भवे त उभयशेषाभ्यां निविशन्ति ।

निवृत्तिलक्षणमार्ग आदावेव व्याख्यातः ॥ ५१ ॥ एतावानेवाण्डकोशो यश्चतुर्दशधा पुराणेषु विकल्पित उपगीयते यत्तद्भगवतो नारायणस्य साक्षान्महापुरुषस्य स्थविष्ठं रूपमात्-

---

स्वभावा क्रूरस्वभावाः । उपसृत्य समीपमागत्य । बिलेशयान् मूषकान् । दन्दशूकः सर्पः सदा दंशनशीलः। दन्दशूकाः सन्ति अस्मिन्निति तथाभूतोऽयं नरकः। अर्श आदेराकृतिगणत्वान्मत्वर्थीयोऽच्प्रत्ययः ॥ ४५।४६ ॥ अन्धावटः निरुच्छ्वासभूगर्तः । कुसूलं धान्यगर्तः गुहा कन्दरा । भूतानि प्राणिनः । यथा निरुन्धन्ति तथा अमुत्र यमलोके उपवेश्य बलात् प्रवेशं कारयित्वा सगरेण सविषेण वह्निना जातेन धूमेन। अवटो भूगर्तः निरोधकरो यस्मिन्निति तथाभूतोऽयं नरकः 'गर्तावटौ भुवः श्वभ्रो' इत्यमरः ॥ ४७ ॥ अतीथीन अज्ञातपूर्वान् । अभ्यागतान् ज्ञातपूर्वान् । असकृत् पद पदे सञ्जातक्रोधः पापेन वक्रीकृतेन। प्रसह्यहठात् उरुबलात् बलपूर्वकम् । यद्वा बलं प्रदर्श्य ल्यब्लोपे पञ्चमी । अक्ष्णोः पर्यावर्तनमुत्पाटनं यस्मिन् तथाभूतोऽयं नरकः ॥ ४८ ॥ आढ्याभिमतिः धनगर्वितः । अहङ्कृतिः श्रेष्ठत्वाभिमानी । वक्रदृष्टिः। सर्वतः गुर्वादेरपि अभितः शङ्कते चोरयिष्यतीति । निर्वृतिं सुखमप्राप्तः । ग्रहः पिशाच इव अर्थं धनं रक्षति । प्रेत्य मृत्वा । तस्यार्थस्य उत्पादनादिभिः शमलं पापं गृह्णातीति तथा । उत्कर्षणं संवर्धनम् । ह स्फुटम् । वित्तग्रहं धनपिशाचम् । वायकाः वस्त्रसेवका दर्जीति ख्याताः । परिवयन्ति तस्यावयवान् विदार्य सूत्रप्रोतान् कुर्वन्तीत्यर्थः सूच्या सेवनं मुखं प्रधानं कार्यं यस्मिन् इति तथाभूतोऽयं नरकः। ॥ ४९ ॥ ५० ॥ हे अवनिपते राजन् । उदिताः कथिताः अनुदिताः अकथिताः । पर्यायेण कर्मक्रमेण। इतरत्र स्वर्गादौ । इह मर्त्यलोके पुनर्भवे पुनर्जन्मनिमित्तम् । मर्त्यलोकविशेषणं वा । उभयशेषाभ्यां धर्माधर्मशेषाभ्यांभुक्ताऽवशिष्टाभ्यामित्यर्थः । निविशन्ति जायन्ते । आदावेव द्वितीयस्कन्धे वैश्वानरं यातीत्यादिना ॥ ५१ ॥ चतुर्दशधा लोकरूपेण । विकल्पितः पृथक् पृथक् भेदेन रचितः पुराणेषु उपगीयते यदेतत् भगवतः स्थूलं रूपमनुवर्णितं तत् आदृतः सन् यः पठति सोऽग्राह्यं सूक्ष्मं रूपमपि वेद

मायागुणमयमनुवर्णितमादृतः पठति शृणोति श्रावयति स उपगेयं भगवतः परमात्मनोऽग्राह्य-
मपि श्रद्धाभक्तिविशुद्धबुद्धिर्वेद ॥ ५२ ॥

श्रुत्वा स्थूलं तथा सूक्ष्मं रूपं भगवतो यतिः।
स्थूले निर्जितमात्मानं शनैः सूक्ष्मं धिया नयेदिति ॥ ५३ ॥

भूद्वीपवर्षसरिदद्रिनभःसमुद्रपातालदिङ्नरकभागणलोकसंस्था ।
गीता मया तव नृपाद्भुतमीश्वरस्य स्थूलं वपुः सकलजीवनिकायधाम ॥ ५४ ॥

इति श्रीमद्भागवते महापुराणे वैयासिक्यामष्टादशसाहस्र्यां पारमहंस्यां संहितायां पञ्चमस्कन्धे
नरकानुवर्णनं नाम षड्विंशोऽध्यायः ॥ २६ ॥

इति पञ्चमः स्कन्धः समाप्तः

हरिः ॐ तत्सत्

जानातीत्यन्वयः। उपगेयम् उपनिषत्प्रतिपाद्यम् ॥ ५२ ॥ यतिः यत्नवान् साधकः स्थूले रूपे निर्जितं वशीकृतमात्मानं मनः सूक्ष्मं प्रति नयेदित्यन्वयः ॥ ५३ ॥ हे नृप मया तुभ्यं भूद्वीपादीनां संस्था रचना गीता कथिता तदिदं भगवतः स्थूलं वपुरस्तीत्यन्वयः। सकलजीवसमूहानां धाम आधारभूतम्। भानां गणः भगणः स एव भागणः नक्षत्रमण्डलः ॥ ५४ ॥

न चैष लोको न परश्च लोको न धर्मकर्मादि न चाश्रमादि।
नाऽस्पृश्यतेत्थं विपरीतबुद्धेः शुद्ध्यर्थमेते नरकाः प्रदिष्टाः ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां पञ्चमस्कन्धे श्रीसनाढ्यवंशावतंसपण्डित-
प्रवर—श्रीराममूर्तिशास्त्रिपौराणिकविरचितायां गूढार्थदीपिन्यां षड्विंशोऽध्यायः।

समाप्तोऽयं पञ्चमः स्कन्धः



ॐ श्रीपरमात्मने नमः

अथ षष्ठः स्कन्धः

अथ प्रथमोऽध्यायः

राजोवाच

निवृत्तिमार्गः कथित आदौ भगवता यथा। क्रमयोगोपलब्धेन ब्रह्मणा यदसंसृतिः ॥ १ ॥
प्रवृत्तिलक्षणश्चैव त्रैगुण्यविषयो मुने। योऽसावलीनप्रकृतेर्गुणसर्गः पुनः पुनः ॥ २ ॥
अधर्मलक्षणा नाना नरकाश्चानुवर्णिताः। मन्वन्तरश्च व्याख्यात आद्यः स्वायम्भुवो यतः॥३॥
प्रियव्रतोत्तानपदोर्वंशस्तच्चरितानि च। द्वीपवर्षसमुद्राद्रिनद्युद्यानवनस्पतीन् ॥ ४ ॥
धरामण्डलसंस्थानं भागलक्षणमानतः। ज्योतिषां विवराणां च यथेदमसृजद् विभुः ॥ ५ ॥
अधुनेह महाभाग यथैव नरकान्नरः। नानोग्रयातनान्नेयात्तन्मे व्याख्यातुमर्हसि ॥ ६ ॥

अथ षष्ठस्कन्धः

श्रीमन्महागणाधिपतये नमः।

॥ अत्र पोषणवर्णनम् ॥

अजामिलास्यनिर्यातं पापपुञ्जनिवर्तकम्।
भुक्तिमुक्तिप्रदं वन्दे नाम नारायणं हरेः॥

हितकरं भुवि नाम महौषधं सकलकल्मषमूलविशोषणम्।
भगवता तदनेन विमुक्तये कृतमजातमजामिलपोषणम्॥

प्रथमे नामसङ्कीर्ताद्विष्णुदूतैरजामिलः।
मोचितो यमदूतास्तत्पापपुञ्जमवर्णयन्॥

आदौ द्वितीयस्कन्धे। भगवता भवता। यथा यथावत्। क्रमेण अनुक्रमेण ये योगास्त्रयस्तैरुपलब्धेन ब्रह्मणा असंसृतिर्मुक्तिरिति यत् एष कथितः। यद्वा। योगः अर्चिरादिमार्गः ॥ १ ॥ त्रैगुण्यं स्वर्गादि सुखं तदेव विषयः फलं यस्य सः योऽसौ प्रवृत्तिलक्षणः सोऽपि कथित इत्यन्वयः। कथंभूतः। न लीना प्रकृतिर्यस्य तस्य पुंसः गुणसर्गो देहारम्भरूपः ॥ २ ॥ लक्षणाः तद्बोधकाः। यतो यस्मिन्। आद्यो मनुः ॥ ३ ॥ प्रियेत्यर्द्धम्। चेति व्याख्यातानि ॥ ४ ॥ द्वीपेति सार्द्धम्। द्वीपादीन् तथा ज्योतिषां सूर्यादीनां विवराणामधोलोकानां च संस्थानं रचनां विभुर्यथा असृजत् कृतवान् तथा व्याख्यातमित्यन्वयः। भागो विभागः। मानं परिमाणम् ॥ ५ ॥ न इयात् न गच्छेत्। नाना उग्रयातना येषु तान्। यातना तीव्रवेदना ॥ ६ ॥

श्रीशुक उवाच

न चेदिहैवापचितिं यथांहसः कृतस्य कुर्यान्मनउक्तिपाणिभिः ।
ध्रुवं स वै प्रेत्य नरकानुपैति ये कीर्तिता मे भवतस्तिग्मयातनाः ॥७॥

तस्मात्पुरैवाश्विह पापनिष्कृतौ यतेत मृत्योरविपद्यताऽऽत्मना ।
दोषस्य दृष्ट्वा गुरुलाघवं यथा भिषक् चिकित्सेत रुजां निदानवित् ॥८॥

राजोवाच

दृष्टश्रुताभ्यां यत्पापं जानन्नप्यात्मनोऽहितम् । करोति भूयो विवशः प्रायश्चित्तमथो कथम्॥९॥
क्वचिन्निवर्ततेऽभद्रात् क्वचिच्चरति तत्पुनः । प्रायश्चित्तमतोऽपार्थं मन्ये कुञ्जरशौचवत् ।१०॥

श्रीशुक उवाच

कर्मणा कर्मनिर्हारो न ह्यात्यन्तिक इष्यते । अविद्वदधिकारित्वात् प्रायश्चित्तं विमर्शनम् ॥११॥
नाश्नतः पथ्यमेवान्नं व्याधयोऽभिभवन्ति हि । एवं नियमकृद्राजन् शनैः क्षेमाय कल्पते ॥१२॥
तपसा ब्रह्मचर्येण शमेन च दमेन च । त्यागेन सत्यशौचाभ्यां यमेन नियमेन च ॥ १३॥
देहवाग्बुद्धिजं धीरा धर्मज्ञाः श्रद्धयान्विताः । क्षिपन्त्यघं महदपि वेणुगुल्ममिवानलः ॥ १४॥
केचित्केवलया भक्त्या वासुदेवपरायणाः । अघं धुन्वन्ति कार्त्स्न्येन नीहारमिव भास्करः ॥१५॥
न तथा ह्यघवान् राजन् पूयेत तपआदिभिः । यथा कृष्णार्पितप्राणस्तत्पूरुषनिषेवया ॥ १६॥

मनउक्तिपाणिभिर्मनोवाक्कायैः कृतस्य अंहसः पापस्य चेत् यदि इह जन्मनि अपचितिं प्रायश्चित्तं न कुर्यात् स वै स एव ध्रुवं नरकान् उपैति प्राप्नोति ये भवतः कीर्तितास्तान् । 'पाणिर्हस्त इति ख्यातः कदाचिद्देह उच्यते' इत्यभिधानात् पाणिशब्दोऽत्र देहवाची ॥७॥ यस्मादेवं तस्मात् पापनिष्कृतौ पापप्रायश्चित्तनिमित्तं यत्नं कुर्यात् । कदा । मृत्योः पुरैव । तत्रापि अविपद्यता रोगादिना अक्षीयमाणेन देहेन । तत्राप्याशु । अन्यथा [1]द्वैगुण्यापत्तेः । दोषस्य पापस्य वातपित्तादेश्च गुरुत्वं[2] लघुत्वं च विचार्य चिकित्सेत् इति विधिः । रुजां रोगाणां निदानकर्ता वैद्यः यद्वा । यावत् अविपत् तावत् संयतचित्तेन ॥८॥ दृष्टं राजदण्डादि । श्रुतं नरकपातादि ताभ्याम् यत् अहितकरं तत् जानन्नपि पुनः करोति ॥ ९ ॥ अभद्रात् पापात् । चरति करोति । शौचं शुद्धता स्नातोऽपि हस्ती यथा धूलिभिरात्मानं मलिनीकरोति तथा ॥१०॥ कर्मणः पापस्य निर्हारो नाशः । आत्यन्तिकः समूलः । अविद्वान् अधिकारी यस्मिन् प्रायश्चित्ते तस्य भावस्तत्त्वं तस्मात् । विमर्शनं ज्ञानम् विचारः । पापनिवर्तकत्वेन विमृश्यते विचार्यते इति ॥ ११ ॥ अश्नतः पुरुषान् नाभिभवन्ति नाक्रामन्ति । क्षेमाय पापनिवृत्तये ज्ञानाय च समर्थो भवति ॥ १२ ॥ तपसेति द्वयम् । शमो मनोनिग्रहः । दम इन्द्रियनिग्रहः । त्यागो दानम् । यमोऽहिंसादिः । नियमः शौचादिः । अघं पापं दहति । वेणुगुल्मं वंशसमूहम् ॥ १३।१४ ॥ कार्त्स्न्येन साकल्येन वासनया सहेत्यर्थः । धुन्वन्ति नाशयन्ति । नीहारं तज्जन्यं तमः ॥१५॥ पूयेत शुद्धयेत् अतस्तेन—प्रायश्चित्तानन्तरं पापं नैव कर्तव्यम् अन्यथा तस्य वैयर्थ्यं स्यात् कुञ्जरशौचवदिति । प्राण इन्द्रियगणः । तत्पूरुषा भगवद्भक्ताः ॥ १६ ॥

---

१. अतीव चिरकाले तु द्विगुणं व्रतमर्हति । इति वचनात् ।

२. भावप्रधानो निर्देशः ।

सध्रीचीनो ह्ययं लोके पन्थाः क्षेमोऽकुतोभयः । सुशीलाः साधवो यत्र नारायणपरायणाः ॥१७॥
प्रायश्चित्तानि चीर्णानि नारायणपराङ्मुखम् । न निष्पुनन्ति राजेन्द्र सुराकुम्भमिवापगाः॥१८॥
सकृन्मनः कृष्णपदारविन्दयोर्निवेशितं तद्गुणरागि यैरिह ।
न ते यमं पाशभृतश्च तद्भटान् स्वप्नेऽपि पश्यन्ति हि चीर्णनिष्कृताः ॥ १९ ॥
अत्र चोदाहरन्तीममितिहासं पुरातनम् । दूतानां विष्णुयमयोः संवादस्तं निबोध मे ॥ २० ॥
कान्यकुब्जे द्विजः कश्चिद् दासीपतिरजामिलः नाम्ना नष्टसदाचारो दास्याः संसर्गदूषितः॥२१॥
बन्द्यक्षकैतवैश्चौर्यैर्गर्हितां वृत्तिमास्थितः । बिभ्रत्कुटुम्बमशुचिर्यातयामास देहिनः ॥ २२ ॥
एवं निवसतस्तस्य लालयानस्य तत्सुतान् । कालोऽत्यगान्महान् राजन्नष्टाशीत्यायुषः समाः॥२३॥
तस्य प्रवयसः पुत्रा दश तेषां तु योऽवमः । बालो नारायणो नाम्ना पित्रोश्च दयितो भृशम्॥२४
स बद्धहृदयस्तस्मिन्नर्भके कलभाषिणि । निरीक्षमाणस्तल्लीलां मुमुदे जरठो भृशम् ॥ २५ ॥
भुञ्जानः प्रपिबन् खादन् बालकस्नेहयन्त्रितः । भोजयन् पाययन्मूढो न वेदागतमन्तकम् ॥२६॥
स एवं वर्तमानोऽज्ञो मृत्युकाल उपस्थिते । मतिं चकार तनये बाले नारायणाह्वये ॥ २७ ॥
स पाशहस्तांस्त्रीन् दृष्टवा पुरुषान् भृशदारुणान् । वक्रतुण्डानूर्ध्वरोम्ण आत्मानं नेतुमागतान्॥२८
दूरे क्रीडनकासक्तं पुत्रं नारायणाह्वयम् । प्लावितेन स्वरेणोच्चैराजुहावाकुलेन्द्रियः ॥ २९ ॥

सध्रीचीनः समीचीनः । क्षेमो निर्बाधः । पन्था भक्तिमार्गः ॥ १७ ॥ चीर्णानि कृतान्यपि । आपगा नद्यः ॥ १८ ॥ यैः सकृत् एकवारमपि मनो निवेशितं स्थापितं तस्य गुणेषु लीलासु रागि अनुरागयुक्तं च जातं ते यमं तद्दूतांश्च न पश्यन्तीत्यन्वयः । यतो हि चीर्णनिष्कृताः कृतप्रायश्चित्ताः । निष्कृतिः निष्कृतं भावे क्तः ॥ १९ ॥ यत्र संवादस्तं निबोध शृणु । मे मत्तः सकाशात् । इतिहासम्[1] ॥ २० ॥ कान्यकुब्जे देशे । सतामाचारः सन्ध्यावन्दनादिः । अजातुल्यया दास्या मिलति । अजं यमराजं न मिलति । अजं श्रीहरिम् आ समन्तात् मिलतीति वा नाम्ना अजामिलः अन्वर्थनामा । इगुपधलक्षणः कः ॥ २१ ॥ धनिकान् बन्दीकृत्य बलात् तेभ्यो धनग्रहणं बन्दी अक्षं द्यूतं कैतवं वञ्चनादि तैः गर्हितां निन्दितां वृत्तिम् आश्रित्य स्थितः । बिभ्रत् पुष्णन् । देहिनः प्राणिनः पीडयामास ॥ २२ ॥ तस्याः सुतान् लालयानस्य[2] लालन पालनं च कुर्वतः । तस्य आयुषः सम्बन्धी कालः अतिक्रान्तः । अष्टाशीत्या संख्यया युक्ताः समाः सम्वत्सराः ॥ २३ ॥ प्रकृष्टमधिकं प्रगतं गतप्रायं वा वयो यस्य तस्य प्रवयसः वृद्धस्य । अवमः कनिष्ठः । दयितः प्रियः ॥ २४ ॥ कलं मधुरम् । बद्धम् आसक्तम् । जरठो वृद्धः ॥३५॥ यन्त्रितः बद्धः । अन्तकं मृत्युम ॥ २६ ॥ आह्वयं नाम ॥२७॥ भृशमत्यन्तम् । तुण्डं मुखम् । कायिकादि-पापानां त्रैविध्यात् त्रयो दूताः नाम्नश्चतुरक्षरत्वात् चत्वारः पार्षदाश्चागता इत्यवधेयमत्र ॥ २८ ॥ प्लावितेन प्लुतत्वं नीतेन । पुत्रमाजुहाव आहूतवान् ॥ २९ ॥ भर्तुर्नाम पुत्रसंकेतजं ब्रुवतस्तस्य तदेव

१. ननु 'इतिहासः पुरावृत्तम्' इति कोशात्कथं पुरातनमिति चेच्छृणु विशिष्टवाचकानां पदानां सति विशेषणसमवधाने विशेष्यमात्रपरत्वमेवाङ्गीक्रियते । 'स कीचकैर्मारुतपूर्णरन्ध्रैः' इत्यादिवदवधेयम् ।
२. मुगभावः आर्षः ।

निशम्य म्रियमाणस्य ब्रुवतो हरिकीर्तनम् । भर्तुर्नाम महाराज पार्षदाः सहसाऽपतन् ॥ ३०॥
विकर्षतोऽन्तर्हृदयाद् दासीपतिमजामिलम् । यमप्रेष्यान् विष्णुदूता वारयामासुरोजसा ॥३१॥
ऊचुर्निषेधितास्तांस्ते वैवस्वतपुरः सराः । के यूयं प्रतिषेद्धारो धर्मराजस्य शासनम् ॥ ३२ ॥
कस्य वा कुत आयाताः कस्मादस्य निषेधथ । किं देवा उपदेवा वा यूयं किं सिद्धसत्तमाः ॥३३॥
सर्वे पद्मपलाशाक्षाः पीतकौशेयवाससः । किरीटिनः कुण्डलिनो लसत्पुष्करमालिनः ॥ ३४ ॥
सर्वे च नूत्नवयसः सर्वे चारुचतुर्भुजाः । धनुर्निषङ्गासिगदाशङ्खचक्राम्बुजश्रियः ॥ ३५ ॥
दिशो वितिमिरा लोकाः कुर्वन्तः स्वेन रोचिषा । किमर्थं धर्मपालस्य किङ्करान्नो निषेधथ ॥३६॥

श्रीशुक उवाच

इत्युक्ते यमदूतैस्तैर्वासुदेवोक्तकारिणः । तान् प्रत्यूचुः प्रहस्येदं मेघनिर्ह्रादया गिरा ॥ ३७ ॥

विष्णुदूता ऊचुः

यूयं वै धर्मराजस्य यदि निर्देशकारिणः । ब्रूत धर्मस्य नस्तत्त्वं यच्च धर्मस्य लक्षणम् ॥ ३८॥
कथंस्विद्ध्रियते दण्डः किं वास्य स्थानमीप्सितम् । दण्ड्याः किं कारिणः सर्वे आहोस्वित्कतिचिन्नृणाम्

यमदूता ऊचुः

वेदप्रणिहितो धर्मो ह्यधर्मस्तद्विपर्ययः । वेदो नारायणः साक्षात्स्वयम्भूरिति शुश्रुम ॥ ४० ॥
येन स्वधाम्न्यमी भावा रजःसत्त्वतमोमयाः । गुणनामक्रियारूपैर्विभाव्यन्ते यथातथम् ॥ ४१॥
सूर्योऽग्निः खं मरुद् गावः सोमः संध्याहनी दिशः । कं कुः काछो धर्म इति ह्येते दैह्यस्य साक्षिणः ४२

कीर्तनं निशम्य सहसा आपतन् झटिति आजग्मुरित्यन्वयः । यद्वा । हरिः कीर्त्यते आहूयते येन तत् इति नाम्नो विशेषणम् ॥ ३० ॥ तत्सम्बन्धि पुर्यष्टकम् विकर्षतः निःसारयतः यमप्रेष्यान् यमदूतान् । ओजसा बलात्कारेण ॥ ३१ ॥ वैवस्वतपुरःसरा यमानुगाः । बहुव्रीहिः । शासनं प्रतिषेद्धारः । 'न लोकेति तृन्नन्तयोगे षष्ठीप्रतिषेधः ॥ ३२ ॥ कस्य दूताः । अस्य नयनम् । उपदेवा गन्धर्वादयः ॥३३॥ सर्वे इति त्रयम् । पद्मपलाशवत् अक्षीणि येषां ते । पीते कौशेयवाससी येषां ते । लसन्त्यः पुष्करमालाः सन्ति येषां ते । नूत्नं नवं वयो येषां ते । धनुरादिभिः श्रीः शोभा येषां ते । निषङ्गः इषुधिः । विगतं तिमिरं तमो यस्मात् तथाभूतः प्रकाशो यासां ताः दिशः रोचिषा तेजसा । नोऽस्मान् । ३४।३५।३६ ॥ उक्तकारिणः आज्ञाकारिणः । निर्ह्रादया मेघवत् गम्भीरया ॥ ३७ ॥ तत्त्वं स्वरूपम् । लक्षणं प्रमाणम् । नोऽस्मान् प्रति ॥ ३८ ॥ कथंस्वित् केन प्रकारेण । स्थानं विषयः । कारिणः कर्मिणः ॥ ३९ ॥ प्रणिहितो विहितः । स्वयम्भूः स्वयं निःश्वासमात्रेण भवतीति ॥ ४० ॥ येन स्वधाम्नि स्वस्वरूपे अमी भावाः प्राणिनः यथायथं यथाकर्म विभाव्यन्ते सृज्यन्ते स नारायण इत्यन्वयः । क्रिया अध्ययनाद्याः ॥४१॥ गो शब्देन द्यौः ।[1] अहनी अहश्च रात्रिश्च । कं जलम् । कुः पृथ्वी । धर्मो विष्णुः । दैह्यस्य जीवस्य ।

---

१. नपुंसकमनपुंसकेन' इति नपुंसकशेषः ।

एतैरधर्मो विज्ञातः स्थानं दण्डस्य युज्यते । सर्वं कर्मानुरोधेन दण्डमर्हन्ति कारिणः ॥ ४३ ॥
सम्भवन्ति हि भद्राणि विपरीतानि चानघाः । कारिणां गुणसङ्गोऽस्ति देहवान्न ह्यकर्मकृत् ।४४
येन यावान् यथाऽधर्मो धर्मो वेह समीहितः । स एव तत्फलं भुङ्क्ते तथा तावदमुत्र वै ॥४५॥
यथेह देवप्रवरास्त्रैविध्यमुपलभ्यते । भूतेषु गुणवैचित्र्यात्तथाऽन्यत्रानुमीयते ॥ ४६ ॥
वर्तमानोऽन्ययोः कालो गुणाभिव्यापको यथा । एवं जन्मान्ययोरेतद्धर्माधर्मनिदर्शनम् ॥ ४७ ॥
मनसैव पुरे देवः पूर्वरूपं विपश्यति । अनुमीमांसतेऽपूर्वं मनसा भगवानजः ॥ ४८ ॥
यथाऽज्ञस्तमसा युक्त उपास्ते व्यक्तमेव हि । न वेद पूर्वमपरं नष्टजन्मस्मृतिस्तथा ॥ ४९ ॥
पञ्चभिः कुरुते स्वार्थान् पञ्च वेदाथ पञ्चभिः । एकस्तु षोडशेन त्रीन् स्वयं सप्तदशोऽश्नुते ।५०।
तदेतत् षोडशकलं लिङ्गं शक्तित्रयं महत् । धत्तेऽनुसंसृतिं पुंसि हर्षशोकभयार्तिदाम् ॥ ५१ ॥
देह्यज्ञोऽजितषड्वर्गो नेच्छन् कर्माणि कार्यते । कोशकार इवात्मानं कर्मणाऽऽच्छाद्य मुह्यति५२
न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत् । कार्यते ह्यवशः कर्म गुणैः स्वाभाविकैर्बलात् ।५३।
लब्ध्वा निमित्तमव्यक्तं व्यक्ताव्यक्तं भवत्युत । यथायोनि यथाबीजं स्वभावेन बलीयसा ।।५४।।
एष प्रकृतिसङ्गेन पुरुषस्य विपर्ययः । आसीत् स एव नचिरादीशसङ्गाद्विलीयते ॥ ५५ ॥

यद्वा देहस्य कर्म दैह्यं[1] कर्म । एते चतुर्दश ॥ ४२ ॥ एतैः निमित्तभूतैः ॥ ४३ ॥ भद्राणि पुण्यानि । विपरीतानि पापानि । गुणसंगो देहसम्बन्धः ॥ ४४ ॥ समीहितः कृतः । तत्फलं सुखदुःखादिकम् । अमुत्र परलोके ॥ ४५ ॥ हे देवप्रवराः । भूतेषु प्राणिषु त्रैविध्यं शान्तघोरविमूढत्वम् । वैचित्र्यात् तारतम्यात् । अन्यत्र जन्मान्तरेऽपि ॥ ४६ ॥ वर्तमानः वसन्तादिकालः अन्ययोर्भूतभाविनो वंसन्तयो कालगुणानुमापकः । एवमेतद् वर्तमानं जन्म । निदर्शनं ज्ञापकम्॥४७॥अजो धर्मराजः । पुरे स्थितः अन्तर्यामी वा सन् । पूर्वरूपं प्रक्तन जन्मसम्बन्धि पुण्यपापादिरूपम् । अनु अनन्तरम् अपूर्वं भाविरूपं च विचार्य अनुमिनोति ॥४८॥ अज्ञो जीवः व्यक्तं वर्तमानमेव देहमुपास्ते अहमिति मन्यते । भूतं भावि च न । यतो नष्टेति । यथा तमसा निद्रया युक्तः स्वप्नगतमेव देहं न तु जाग्रद्गतं तद्वत् ॥ ४९ ॥ पञ्चभिः कर्मेन्द्रिय स्वार्थान् आदानादीन् पञ्चभिः ज्ञानेन्द्रियैः पञ्च शब्दादीन् वेद । एवं पञ्चदश । षोडशेन मनसा सह सप्तदशः स्वयमेको जीवः त्रीन् ज्ञानकर्मेन्द्रियमनोविषयान् भुङ्क्ते ॥५०॥ तदेतद् लिङ्गशरीरम् । शक्तित्रयं गुणत्रयकार्यम् महत् दुर्निवारं पुंसि जीवे अनु-अनु संसृतिं नानायोनिं धत्ते योजयति जीवसंसृतौ निमित्तं भवतीत्यर्थः ॥५१॥ देही जीवः नेच्छन् अनिच्छन्नपि कर्माणि कार्यते लिङ्गदेहेनेति शेषः कोशकारः कीटविशेषः स यथा स्वमुखनिःसारितैः कोशं रचयति स्वनिर्गमाय द्वारमपि नावशेषयति तदा तस्मिन्नेव निरुद्धो मुह्यति म्रियते तथा जीवोऽपि ॥५२॥ जातु कदाचिदपि अकर्मकृत् सन् नहि तिष्ठति गुणैः रागादिभिः । स्वाभाविकैः प्राक्तनसंस्कारोद्भूतैः बलात् कार्यते ॥५३॥ अव्यक्तम् अदृष्टं प्राक्तनं कर्म लब्ध्वा । व्यक्तम् अव्यक्तं स्थूलं सूक्ष्मं च शरीरं भवति । तत्रापि क्वचित् यथायोनि मातृसदृशं स्त्रीरूपम् । क्वचित् यथावीजं पितृसदृशं पुरुषरूपम् । स्वभावेन वासनया ॥ ५४ ॥ य एष जीवस्य विपर्ययः संसारः प्रकृत्यध्यासेन आसीत् स एव ईशभजनात् विलीयते

---

१. ब्राह्मणादित्वात्कर्मणि ष्यञ् ।

अयं हि श्रुतसम्पन्नः शीलवृत्तगुणालयः। धृतव्रतो मृदुर्दान्तः सत्यवान्मन्त्रविच्छुचिः ॥ ५६ ॥
गुर्वग्न्यतिथिवृद्धानां शुश्रूषुर्निरहंकृतः। सर्वभूतसुहृत्साधुर्मितवागनसूयकः ॥ ५७ ॥
एकदासौ वनं यातः पितृसंदेशकृद् द्विजः आदाय तत आवृत्तः फलपुष्पसमित्कुशान् ॥ ५८ ॥
ददर्श कामिनं कंचिच्छूद्रं सह भुजिष्यया। पीत्वा च मधु मैरेयं मदाघूर्णितनेत्रया ॥ ५९ ॥
मत्तया विश्लथन्नीव्या व्यपेतं निरपत्रपम्। क्रीडन्तमनु गायन्तं हसन्तमनयान्तिके ॥ ६० ॥
दृष्ट्वा तां कामलिप्तेन बाहुना परिरम्भिताम्। जगाम हृच्छयवशं सहसैव विमोहितः ॥ ६१ ॥
स्तम्भयन्नात्मनाऽऽत्मानं यावत्सत्त्वं यथाश्रुतम्। न शशाक समाधातुं मनो मदनवेपितम् ॥ ६२ ॥
तन्निमित्तस्मरव्याजग्रहग्रस्तो विचेतनः। तामेव मनसा ध्यायन् स्वधर्माद्विराम ह ॥ ६३ ॥
तामेव तोषयामास पित्र्येणार्थेन यावता। ग्राम्यैर्मनोरमैः कामैः प्रसीदेत तथा तथा ॥ ६४ ॥
विप्रां स्वभार्यामप्रौढां कुले महति लम्भिताम्। विससर्जाचिरात्पापः स्वैरिण्यापाङ्गविद्धधीः ॥ ६५ ॥
यतस्ततश्चोपनिन्ये न्यायतोऽन्यायतो धनम्। बभारास्याः कुटुम्बिन्याः कुटुम्बं मन्दधरयम् ॥ ६६ ॥
यदसौ शास्त्रमुल्लङ्घ्य स्वैरचार्यविगर्हितः। अवर्तत चिरं कालमघायुरशुचिर्मलात् ॥ ६७ ॥
तत एनं दण्डपाणेः सकाशं कृतकिल्बिषम्। नेष्यामोऽकृतनिर्वेशं यत्र दण्डेन शुध्यति ॥ ६८ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां षष्ठस्कन्धेऽजामिलोपाख्याने प्रथमोऽध्यायः ॥ १ ॥

समूलं नश्यति ॥ ५५ ॥ अयम् अजामिलः। श्रुतं शास्त्रम्। वृत्तं सदाचारः ॥ ५६।५७॥ ततो वनात्। आवृत्तो निवृत्तः ॥५८॥ ददर्शेति-युग्मम्। अनया भुजिष्यया दास्या सह अन्तिके स्थितं कञ्चित् कामिनं शूद्रं ददर्शेत्यन्वयः। मधुमैरेयम् उत्कटमदिराम्। विश्लथन्ती स्रंसमाना नीविः कटिवस्त्रग्रन्थिर्यस्मास्तया भुजिष्यया दास्या सह क्रीडन्तम् व्यपेतम् आचारात् भ्रष्टम निर्लज्जं च ॥ ५९।६० ॥ कामेन कामोद्दीपकेन अगरुचन्दनादिना। परिरम्भिताम् आलिङ्गिताम्। सहसा झटित्येव ॥६१॥ आत्मना बुद्ध्या आत्मानं मनः निरोद्धुम्। सत्त्वं धैर्यम्। श्रुतमुपदेशः ॥६२॥ तद्दर्शनमेव निमित्तं कारणं यस्य तथाभूतः स्मरः स एव व्याजग्रहः पिशाचरूपस्तेन ग्रस्तः। ह खेदे ॥ ६३ ॥ ग्राम्यैः स्त्रीवशीकरणसाधनैः। कामैर्विषयैः ॥ ६४ ॥ अप्रौढां नवयौवनाम्। स्वैरिण्या कर्त्र्या अपाङ्गेन करणेन। लम्भितां परिणीताम् ॥६५॥ बभार पुपोष ॥ ६६ ॥ यत् यतः असौ अघायुः ततो हेतोः यमस्य समीपं नेष्यामः। स्वैरचारी स्वेच्छाचारी। निर्वेशः प्रायश्चित्तम्। अघमयमायुर्यस्य सः। यतो मलात् तदीयं मलमुच्छिष्टमत्तीति प्रथमैकवचनान्तम्।

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे गूढार्थदीपिन्यां प्रथमोऽध्यायः।

अथ द्वितीयोऽध्यायः

श्रीशुक उवाच

एवं ते भगवद्दूता यमदूताभिभाषितम् । उपधार्याथ तान् राजन् प्रत्याहुर्नयकोविदाः ॥ १ ॥

विष्णुदूता ऊचुः

अहो कष्टं धर्मदृशामधर्मः स्पृशते सभाम् । यत्रादण्डचेष्वपापेषु दण्डो यैर्ध्रियते वृथा ॥ २ ॥
प्रजानां पितरो ये च शास्तारः साधवः समाः । यदि स्यात्तेषु वैषम्यं कं यान्ति शरणं प्रजाः ३
यद्यदाचरति श्रेयानितरस्तत्तदीहते । स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ॥ ४ ॥
यस्याङ्के शिर आधाय लोकः स्वपिति निर्वृतः स्वयं धर्ममधर्मं वा न हि वेद यथा पशुः ॥५॥
स कथं न्यर्पितात्मानं कृतमैत्रमचेतनम् । विस्रम्भणीयो भूतानां सघृणो द्रोग्धुमर्हति ॥ ६ ॥
अयं हि कृतनिर्वेशो जन्मकोटचंहसामपि । यद् व्याजहार विवशो नाम स्वस्त्ययनं हरेः ॥७॥
एतेनैव ह्यघोनोऽस्य कृतं स्यादघनिष्कृतम् । यदा नारायणायेति जगाद चतुरक्षरम् ॥ ८ ॥
स्तेनः सुरापो मित्रध्रुक् ब्रह्महा गुरुतल्पगः । स्त्रीराजपितृगोहन्ता ये च पातकिनोऽपरे ॥ ९ ॥
सर्वेषामप्यघवतामिदमेव सुनिष्कृतम् । नामव्याहरणं विष्णोर्यतस्तद्विषया मतिः ॥ १० ॥

न निष्कृतैरुदितैर्ब्रह्मवादिभिस्तथा विशुद्धचत्यघवान् व्रतादिभिः ।
यथा हरेर्नामपदैरुदाहृतैस्तदुत्तमश्लोकगुणोपलम्भकम् ॥११॥
नैकान्तिकं तद्धि कृतेऽपि निष्कृते मनः पुनर्धावति चेदसत्पथे ।
तत्कर्मनिर्हारमभीप्सतां हरेर्गुणानुवादः खलु सत्त्वभावनः ॥ १२ ॥

द्वितीये नाममाहात्म्यं श्रुत्वा दूताः पलायिताः ।
अजामिलोऽपि तत्पाशान्मुक्तो विष्णुपदं गतः ॥ १ ॥

उपधार्य श्रुत्वा । नयः प्रायश्चित्तशास्त्रम् ॥ १।२ ॥ पितरः पालकाः ॥ ३ ॥ श्रेयान् महाजनः ॥ ४ ॥ अङ्के उत्सङ्गे । स्वामी पालनं हननं वा करिष्यतीति पशुः यथा न जानाति तद्वत् निर्वृतो निश्चिन्तः ॥५॥ प्राणिनां विश्वसनीयः यः स यमः सघृणो दयालुश्चेत् अचेतनमज्ञं जीवं कथं द्रोग्धुमर्हतीत्यन्वयः । मैत्रं विश्वासः ॥६॥ अयम् अजामिलः । जन्मकोटिभिरर्जितानां पापानाम् । निर्वेशः प्रायश्चित्तम् । व्याजहार उच्चारितवान् ॥७॥ हे नारायण ! आय आगच्छेति यत् जगाद एतेनैव । अघोनः अघवतः पापिनः निष्कृतं प्रायश्चित्तम् ॥८॥ स्तेन इति युग्मम् । स्तेनः स्वर्णचोरः । गुरुतल्पं[1] गुरुपत्नी । सुनिष्कृतं मुख्यं प्रायश्चित्तम् । व्याहरणं नामोच्चारणम् । तद्विषया भगवद्विषया पुरुषस्य । यद्वा । नामोच्चारकभक्तविषया विष्णोर्मतिर्भवति ॥ ९।१० ॥ ब्रह्मवादिभिर्मन्वादिभिः उक्तैर्व्रतादिभिर्निष्कृतैः प्रायश्चित्तैः पापी तथा न शुद्धयति यथा नामरूपैः पदैः शुद्धयतीत्यन्वयः । तत् उच्चारणम् । उपलम्भकं ज्ञापकं भवति ॥११॥ कृतेऽपि निष्कृते प्रायश्चित्ते पुनः पापमार्गे मनो धावति चेत्तत् नैकान्तिकं नाव्यभिचारि प्रायश्चित्तम् ।

१, तल्पं शय्याट्टदारेषु । इत्यमरः ।

अथैनं मापनयत कृताशेषाघनिष्कृतम् । यदसौ भगवन्नाम म्रियमाणः समग्रहीत् ॥ १३ ॥
सांकेत्यं पारिहास्यं वा स्तोभं हेलनमेव वा । वैकुण्ठनामग्रहणमशेषाघहरं विदुः ॥ १४ ॥
पतितः स्खलितो भग्नः संदष्टस्तप्त आहतः । हरिरित्यवशेनाह पुमान्नार्हति यातनाम् ॥ १५ ॥
गुरूणां च लघूनां च गुरूणि च लघूनि च । प्रायश्चित्तानि पापानां ज्ञात्वोक्तानि महर्षिभिः॥१६॥
तैस्तान्यघानि पूयन्ते तपोदानजपादिभिः । नाधर्मजं तद्धृदयं तदपीशाङ्घ्रिसेवया ॥ १७ ॥
अज्ञानादथवा ज्ञानादुत्तमश्लोकनाम यत् संकीर्तितमघं पुंसो दहेदेधो यथानलः ॥ १८ ॥
यथागदं वीर्यतममुपयुक्तं यदृच्छया । अजानतोऽप्यात्मगुणं कुर्यान्मन्त्रोऽप्युदाहृतः ॥ १९ ॥

श्रीशुक उवाच

त एवं सुविनिर्णीय धर्मं भागवतं नृप । तं याम्यपाशान्निर्मुच्य विप्रं मृत्योरमूमुचन् ॥ २० ॥
इति प्रत्युदिता याम्या दूता यात्वा यमान्तिके । यमराज्ञे यथा सर्वमाचचक्षुररिंदम ॥ २१ ॥
द्विजः पाशाद्विनिर्मुक्तो गतभीः प्रकृतिं गतः । ववन्दे शिरसा विष्णोः किङ्करान् दर्शनोत्सवः॥२२
तं विवक्षुमभिप्रेत्य महापुरुषकिङ्कराः । सहसा पश्यतस्तस्य तत्रान्तर्दधिरेऽनघ ॥ २३ ॥
अजामिलोऽप्यथाकर्ण्य दूतानां यमकृष्णयोः । धर्मं भागवतं शुद्धं त्रैविद्यं च गुणाश्रयम् ॥२४॥
भक्तिमान् भगवत्याशु माहात्म्यश्रवणाद्धरेः । अनुतापो महानासीत्स्मरतोऽशुभमात्मनः ॥२५॥
अहो मे परमं कष्टमभूदविजितात्मनः । येन विप्लावितं ब्रह्म वृषल्यां जायताऽऽत्मना ॥२६॥
धिङ्मां विगर्हितं सद्भिर्दुष्कृतं कुलकज्जलम् । हित्वा बालां सतीं योऽहं सुरापामसतीमगाम्॥२७
वृद्धावनाथौ पितरौ नान्यबन्धू तपस्विनौ । अहो मयाऽधुना त्यक्तावकृतज्ञेन नीचवत् ॥२८॥

तत् तस्मात् कर्मणां पापानां समूलनाशमिच्छतां गुणानुवाद[1] एव प्रायश्चित्तम् । यतः सोऽन्तःकरणशोधकः ॥ १२ ॥ अप अपमार्गेण ॥ १३ ॥ सांकेत्यमन्यसंकेतेन कृतम् । स्तोभं गीतालापकृतम् । हेलनमनादरेण किं विष्णुनेति ॥ १४ ॥ भग्नो भग्नगात्रः । सर्पेण ज्वरेण दण्डेन क्रमेणार्थाः ॥ १५ ॥ गुरूणां पापानामित्यत्रान्वेति ॥ १६ ॥ पूयन्ते नश्यन्ति । पूञ् विनाशे इति चक्रवर्ती । तेषां पापानां हृदयं सूक्ष्मं रूपं संस्काराख्यम् ॥ १७ ॥ एधः काष्ठम् ॥ १८ ॥ वीर्यतमं वीर्यवत्तमम् । मत्वर्थीयाजन्तात् तमप् । अगदमौषधम् ॥ १९ ॥ ते विष्णुदूताः । मृत्योर्देहत्यागलक्षणात् ॥ २० ॥ प्रत्युदिताः प्रत्याख्याताः । आचचक्षुः कथयामासुः ॥ २१ ॥ गतभीः निर्भयः । प्रकृतिं स्वस्थताम् ॥ २२ ॥ अजेति युग्मम् । उभयोः धर्ममाकर्ण्य भक्तिमान् आसीत् आत्मनः पापं च स्मरतस्तस्य पश्चात्तापश्चासीदिति द्वयोरन्वयः । तत्र कृष्णदूतानां शुद्धम् यमदूतानां च वेदत्रयीप्रतिपाद्यं गुणाश्रयमशुद्धं धर्मं च ॥ २५ ॥ येन मया शूद्रयाम् आत्मना पुत्ररूपेण जायमानेन ब्रह्म ब्राह्मणत्वं नाशितम् ॥ २६ ॥ दुष्कृतं पापकर्तारम् । कुलकलंकम् । अगाम् अगच्छम् ॥ २७ ॥ न विद्यतेऽन्यो बन्धुःपुत्रादिर्ययोस्तौ । तपस्विनौ[2] सततौ ।

---

१. गुणा अनूद्यन्ते येन स नामोच्चारणम् ।

२. तप् संतापे धातुः ।

सोऽहं व्यक्तं पतिष्यामि नरके भृशदारुणे । धर्मघ्नाः कामिनो यत्र विन्दन्ति यमयातनाः ॥२९॥
किमिदं स्वप्न आहोस्वित् साक्षाद् दृष्टमिहाद्भुतम् । क्व याता अद्य ते ये मां व्यकर्षन् पाशपाणयः
अथ ते क्व गताः सिद्धाश्चत्वारश्चारुदर्शनाः व्यमोचयन्नीयमानं बद्ध्वा पाशैरधो भुवः ॥३१॥
अथापि मे दुर्भगस्य विबुधोत्तमदर्शने । भवितव्यं मङ्गलेन येनात्मा मे प्रसीदति ॥३२॥
अन्यथा म्रियमाणस्य नाशुचेर्वृषलीपतेः । वैकुण्ठनाम ग्रहणं जिह्वा वक्तुमिहार्हति ॥३३॥
क्व चाहं कितवः पापो ब्रह्मघ्नो निरपत्रपः । क्व च नारायणेत्येतद्भगवन्नाम मङ्गलम् ॥३४॥
सोऽहं तथा यतिष्यामि यतचित्तेन्द्रियानिलः । यथा न भूय आत्मानमन्धे तमसि मज्जये ॥३५
विमुच्य तमिमं बन्धमविद्याकामकर्मजम् । सर्वभूतसुहृच्छान्तो मैत्रः करुण आत्मवान् ॥३६॥
मोचये ग्रस्तमात्मानं योषिन्मय्याऽऽत्ममायया । विक्रीडितो ययैवाहं क्रीडामृग इवाऽधमः ॥३७॥
ममाहमिति देहादौ हित्वा मिथ्यार्थधीर्मतिम् । धास्ये मनो भगवति शुद्धं तत्कीर्तनादिभिः ॥३८॥

श्रीशुक उवाच

इति जातसुनिर्वेदः क्षणसङ्गेन साधुषु । गङ्गाद्वारमुपेयाय मुक्तसर्वानुबन्धनः ॥३९॥
स तस्मिन्देवसदन आसीनो योगमाश्रितः । प्रत्याहृतेन्द्रियग्रामो युयोज मन आत्मनि ॥४०॥
ततो गुणेभ्य आत्मानं वियुज्यात्मसमाधिना । युयुजे भगवद्धाम्नि ब्रह्मण्यनुभवात्मनि ॥४१॥

यर्ह्युपारतधीस्तस्मिन्नद्राक्षीत्पुरुषान् पुरः । उपलभ्योपलब्धान् प्राग्ववन्दे शिरसा द्विजः ॥४२॥
हित्वा कलेवरं तीर्थे गङ्गायां दर्शनादनु । सद्यः स्वरूपं जगृहे भगवत्पार्श्ववर्तिनाम् ॥४३॥
साकं विहायसा विप्रो महापुरुषकिङ्करैः । हैमं विमानमारुह्य ययौ यत्र श्रियः पतिः ॥४४॥

अकृतज्ञेन कृतघ्नेन ॥ २८ ॥ व्यक्तं निश्चितम् ॥ २९ ॥ अद्भुतमाश्चर्यजनकमिदं किं स्वप्ने दृष्टमथवा प्रत्यक्षम् । ये मां व्यकर्षन् ते क्व गता इत्यन्वयः ॥ ३० ॥ अथ अधुनार्थे । भुवोऽधः नरकम् ॥ ३१ ॥ दर्शने निमित्ते सप्तमी । मङ्गलेन जन्मान्तरीयपुण्येन ॥ ३२ ॥ अन्यथा पुण्यं विना । ग्रहणं नाम्नो विशेषणम् । गृह्यते आकृष्यते वशीक्रियते भगवाननेनेति ॥ ३३ ॥ कितवो वञ्चकः । पापः पापी अर्श-आद्यजन्तः । ब्रह्म ब्राह्मणत्वम् ॥ ३४ ॥ यता निरुद्धाः चित्तादयो येन । तमसि संसारे नरके वा । मज्जये मग्नं न कुर्याम् ॥३५॥ विमुच्येति युग्मम् । बन्धं देहाद्यभिमानलक्षणम् । यथा स्त्रिया क्रीडामृगो वानर इवाधमोऽहं विक्रीडितः क्रीडनकविषयीकृतः । मैत्रः हितकारी । आत्मवान् स्थिरचित्तः सन् ॥ ३६।३७ ॥ मिथ्याभूता अमी अर्था इति धीर्यस्य । यद्वा अमिथ्याभूतेऽर्थे ब्रह्मणि धीर्यस्य तथाभूतः सन् । धास्ये धारयिष्यामि ॥ ३८ ॥ सुनिर्वेदः दृढवैराग्यः । गङ्गाद्वारं हरिद्वारं जगाम । अनुबन्धनं पुत्रादिस्नेहः ॥ ३९ ॥ प्रत्याहृतो वशीकृत इन्द्रियगणो येन । आत्मनि परमात्मनि । युयोज योक्तुमुद्यतोऽभूत् ॥ गुणेभ्यो देहादिभ्यः । ब्रह्मणि । युयुजे स्थिरीचकार ॥ ४१ ॥ उपारता निश्चला । प्रागुपलब्धान् दृष्टानेव उपलभ्य ॥ ४२ ॥ तीर्थे हरिद्वारे ॥ ४३ ॥ साकं राह । विहायसा आकाश-

एवं स विप्लावितसर्वधर्मा दास्याः पतिः पतितो गर्ह्यकर्मणा।
निपात्यमानो निरये हतव्रतः सद्यो विमुक्तो भगवन्नाम गृह्णन् ॥४५॥
नातः परं कर्मनिबन्धकृन्तनं मुमुक्षतां तीर्थपदानुकीर्तनात्।
न यत्पुनः कर्मसु सज्जते मनो रजस्तमोभ्यां कलिलं ततोऽन्यथा ॥४६॥
य एवं परमं गुह्यमितिहासमघापहम्। शृणुयाच्छ्रद्धया युक्तो यश्च भक्त्यानुकीर्तयेत् ॥४७॥
न वै स नरकं याति नेक्षितो यमकिङ्करैः। यद्यप्यमङ्गलो मर्त्यो विष्णुलोके महीयते ॥४८॥
म्रियमाणो हरेर्नाम गृणन् पुत्रोपचारितम्। अजामिलोऽप्यगाद्धाम किं पुनः श्रद्धया गृणन् ४९

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां षष्ठस्कन्धेऽजामिलोपाख्याने द्वितीयोऽध्यायः ॥२॥

अथ तृतीयोऽध्यायः

राजोवाच

निशम्य देवः स्वभटोपवर्णितं प्रत्याह किं तान् प्रति धर्मराजः।
एवं हताज्ञो विहतान्मुरारेर्नैदेशिकैर्यस्य वशे जनोऽयम् ॥ १ ॥
यमस्य देवस्य न दण्डभङ्गः कुतश्चनर्षे श्रुतपूर्व आसीत्।
एतन्मुने वृश्चति लोकसंशयं न हि त्वदन्य इति मे विनिश्चितम् ॥ २ ॥

मार्गेण ॥ ४४ ॥ सोऽजामिलः। विप्लाविताः त्यक्ताः सर्वे धर्मा वर्णाश्रमलक्षणा येन। दास्या पतिः इत्याक्रोशे षष्ठी। मुक्तो जीवन्मुक्तो बभूव ॥ ४५ ॥ कर्मनिबन्धस्य पापमूलस्य कृन्तनं छेदकमतः परं नास्ति। कस्मात्। तीर्थेति। तीर्थपदो भगवान्। यत् यतः कीर्तनात् कर्मसु पापाचरणेषु मनो न सज्जते। अन्यथा प्रायश्चित्तान्तरे तु कलिलं मलिनमेव तिष्ठत् कर्मसु सज्जते इत्यन्वयः ॥ ४६ ॥ य इति युग्मम्। नवै नैव। अमङ्गलः पापीयान्। तथापि महीयते आद्रियते ॥४७।४८॥ पुत्रे उपचारितं संकेतितः नाम। गृणन् उच्चारयन् ॥ ४९ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे गूढार्थदीपिन्यां द्वितीयोऽध्यायः।

स्वादेशोल्लङ्घनं श्रुत्वा तृतीये दूतवाक्यतः।
प्राह तत्त्वं यमः साक्षाद् वैष्णवोत्कर्षवर्णनैः ॥ १ ॥

एवं हताज्ञो धर्मराजः उपवर्णितं निशम्य तान् दूतान् प्रति किं प्रत्युत्तरमाहेत्यन्वयः। कथंभूतान्। मुरारे र्नैदेशिकैः[1] दूतैः निवारितान्। सर्वोऽपि जनः यस्य वशे वर्तते स धर्मराजः ॥ १ ॥ हे ऋषे। दण्डभंगः आज्ञाभंगः। कस्माच्चिदपि श्रुतपूर्वो नासीत्। एतद्दूतनिराकरणं चासीदिति संशयो वर्तते

१. निदेशे तिष्ठन्तीति नैदेशिकाः।

श्रीशुक उवाच

भगवत्पुरुषै राजन् याम्याः प्रतिहतोद्यमाः। पतिं विज्ञापयामासुर्यमं संयमनीपतिम् ॥ ३ ॥

यमदूता ऊचुः

कति सन्तीह शास्तारो जीवलोकस्य वै प्रभो। त्रैविध्यं कुर्वतः कर्म फलाभिव्यक्तिहेतवः ॥ ४॥
यदि स्युर्बहवो लोके शास्तारो दण्डधारिणः। कस्य स्यातां न वा कस्य मृत्युश्चामृतमेव वा।५।
किन्तु शास्तृबहुत्वे स्याद्बहूनामिह कर्मिणाम्। शास्तृत्वमुपचारो हि यथा मण्डलवर्तिनाम् ॥६॥
अतस्त्वमेको भूतानां सेश्वराणाधीश्वरः। शास्ता दण्डधरो नृणां शुभाशुभविवेचनः ॥ ७ ॥
तस्य ते विहतो दण्डो न लोके वर्ततेऽधुना। चतुर्भिरद्भुतैः सिद्धैराज्ञा ते विप्रलम्भिता ॥ ८ ॥
नीयमानं तवादेशादस्माभिर्यातनागृहान्। व्यमोचयन् पातकिनं छित्त्वा पाशान् प्रसह्य ते ॥९॥
तांस्ते वेदितुमिच्छामो यदि नो मन्यसे क्षमम्। नारायणेत्यभिहिते मा भैरित्याययुर्द्रुतम् ।१०।

श्रीशुक उवाच

इति देवः स आपृष्टः प्रजासंयमनो यमः। प्रीतः स्वदूतान् प्रत्याह स्मरन् पादाम्बुजं हरेः ।११।

यम उवाच

परो मदन्यो जगतस्तस्थुषश्च ओतं प्रोतं पटवद्यत्र विश्वम्।
यदंशतोऽस्य स्थितिजन्मनाशा नस्योतवद् यस्य वशे च लोकः ॥१२॥
यो नामभिर्वाचि जनान्निजायां बध्नाति तन्त्यामिव दामभिर्गाः।
यस्मै बलिं त इमे नामकर्मनिबन्धबद्धाश्चकिता वहन्ति ॥१३॥
अहं महेन्द्रो निर्ऋतिः प्रचेताः सोमोऽग्निरीशः पवनोऽर्को विरिञ्चः।
आदित्यविश्वे वसवोऽथ साध्या मरुद्गणा रुद्रगणाः ससिद्धाः ॥१४॥

तं त्वत्तः अन्यो न कश्चित् वृश्चति छेत्तुमर्हति अतः तं संशयं निवारयेति शेषः ॥ २ ॥ याम्या यमदूताः ॥ ३ ॥ त्रैविध्यं त्रिविधं स्वार्थे ष्यञ् पुण्यपापमिश्रात्मकम्। कर्मफलस्य अभिव्यक्तिहेतवो फलदातारः कति ॥ ४ ॥ मृत्युदुःखम्। अमृतं सुखम् ॥ ५ ॥ कर्मिणां कर्मकर्तॄणाम्। शास्तृत्वमुपचारोऽमुख्यं गौणम्। यथा चक्रवर्तिनः मुख्यम् अन्येषा राज्ञां गौणम् ॥ ६ ॥ शुभाशुभे पुण्यपापे तयोर्निर्णायकः एक एव ॥ ७ ॥ तस्य एवं प्रभावस्य ते। विप्रलम्भिता उल्लघङ्िता ॥ ८ ॥ प्रसह्य बलात्कारेण ॥ ९ ॥ ते त्वत्तः। नोऽस्माकं क्षमं हितमिच्छसि चेत् ॥ १० ॥ प्रजाः संयमयति शास्तीति। कर्तरि ल्युः ॥११॥ जगतो जङ्गमस्य स्थावरस्य च मत्तोऽन्यः परः सर्वेश्वरः कश्चनास्ति यत्र इदं विश्वम् ओतमूर्ध्वतन्तुषु प्रोतं तिर्यक्तन्तुषु। यथा पटः। यस्य अंशेभ्यो विष्णुब्रह्मरुद्रेभ्यः। नासिकायामोतवत् प्रोतबलीवर्दवत् लोकः यस्य वशे वर्तते ॥ १२ ॥ निजायां वाचि वेदलक्षणायां यो जनान् बध्नाति ब्राह्मणादिनामभिः। तन्त्यां दामभिर्गा[1] बलीवर्दानिव ते इमे जीवा यस्मै बलिं वहन्ति। तदाज्ञा पालयन्ति स मदन्यः मत्तोऽन्यः सर्वश्वरो स्तीति पूर्वेणान्वयः। नामकर्मरूपैः दृढबन्धनैर्बद्धाः सन्तः। चकिता भीताः ॥ १३ ॥ अहमिति द्वयम्।

---

१. तन्त्यां दीर्घरज्ज्वां दामभिः रज्जुखण्डैः।

अन्ये च ये विश्वसृजोऽमरेशा भृग्वादयोऽस्पृष्टरजस्तमस्काः।
यस्येहितं न विदुः स्पृष्टमायाः सत्त्वप्रधाना अपि किं ततोऽन्ये ॥१५॥
यं वै न गोभिर्मनसाऽसुभिर्वा हृदा गिरा वासुभृतो विचक्षते।
आत्मानमन्तर्हृदि सन्तमात्मनां चक्षुर्यथैवाकृतयस्ततः परम् ॥१६॥
तस्यात्मतन्त्रस्य हरेरधीशितुः परस्य मायाधिपतेर्महात्मनः।
प्रायेण दूता इह वै मनोहराश्चरन्ति तद्रूपगुणस्वभावाः ॥१७॥
भूतानि विष्णोः सुरपूजितानि दुर्दर्शलिङ्गानि महाद्भुतानि।
रक्षन्ति तद्भक्तिमतः परेभ्यो मत्तश्च मर्त्यानथ सर्वतश्च ॥१८॥
धर्मं तु साक्षाद्भगवत्प्रणीतं न वै विदुर्ऋषयो नापि देवाः।
न सिद्धमुख्या असुरा मनुष्याः कुतश्च विद्याधरचारणादयः ॥१९॥

स्वयम्भूर्नारदः शम्भुः कुमारः कपिलो मनुः। प्रह्लादो जनको भीष्मो बलिर्वैयासकिर्वयम् ॥२०
द्वादशैते विजानीमो धर्मं भागवतं भटाः। गुह्यं विशुद्धं दुर्बोधं यं ज्ञात्वाऽमृतमश्नुते ॥२१॥
एतावानेव लोकेऽस्मिन् पुंसां धर्मः परः स्मृतः। भक्तियोगो भगवति तन्नामग्रहणादिभिः ॥२२॥
नामोच्चारणमाहात्म्यं हरेः पश्यत पुत्रकाः। अजामिलोऽपि येनैव मृत्युपाशादमुच्यत ॥२३॥

एतावताऽलमघनिर्हरणाय पुंसां संकीर्तनं भगवतो गुणकर्मनाम्नाम्।
विक्रुश्य पुत्रमघवान् यदजामिलोऽपि नारायणेति म्रियमाण इयाय मुक्तिम् ॥२४॥
प्रायेण वेद तदिदं न महाजनोऽयं देव्या विमोहितमतिर्बत माययाऽलम्।
त्रय्यां जडीकृतमतिर्मधुपुष्पितायां वैतानिके महति कर्मणि युज्यमानः ॥२५॥

अहं यमराजः। निर्ऋतिः दिक्पालः। प्रचेता वरुणः। सत्त्वप्रधाना ऋषयो भृग्वादयोऽपि यस्येहितमभिप्रायं यदा न विदुस्तदा अन्ये स्पष्टमाया रजः प्रधाना असुरादयः कुतो विदुरित्यन्वयः। विश्वसृजो दक्षादयः। अमरेशाः बृहस्पत्यादयः ॥१५॥ गोभिः ज्ञानेन्द्रियैः असुभिः कर्मेन्द्रियैः हृदा चित्तेन। असुभृतो जीवा यं न वै नैव विचक्षते न जानन्ति स मदत्य इत्यन्वयः। आत्मनां जीवानामात्मानम् अन्तर्यामिणम्। आकृतयो रूपाणि यथा चक्षुःकर्मभूतं न पश्यन्ति। ततः परं आकृतीनां प्रकाशकम् ॥१६॥ तस्येव रूपादयो येषां ते ॥ १७ ॥ भूतानि दूताः। लिङ्गानि रूपाणि। तद्भक्तिमतो मर्त्यान्। परेभ्यः शत्रुभ्यः ॥ १८ ॥ तु शब्दात् धर्मस्य सूक्ष्मज्ञानं युष्माकं नास्ति ॥ १९॥ स्वयम्भूरिति युग्मम्। वयम् अहं यमः। 'अस्मदो द्वयोश्चेति बहुवचनमेकत्वे वेदितव्यम्। हे भटाः। यं धर्मम्। अमृतं मोक्षम् ॥२०।२१॥ भक्तियोगं इति यत् एतावानेव ॥ २२ ॥ हे पुत्रका। अनुकम्पायां कम् ॥ २३ ॥ संकीर्तनमिति यत् एतावन्मात्रेण नामामासेनापि अघनिर्हरणाय समूलपापनाशाय अलं पर्याप्तम्। यत् विक्रुश्य विवशतः आहूय न तु श्रद्धया ॥ २४ ॥ महाजनो मन्वादिः इदं नाममाहात्म्यं न वेद यतो विमोहितमतिः। अत एव वेदत्रय्यामेव अभिनिविष्टबुद्धिः। कथंभूतायाम्। मधुवत् कर्णप्रियैः फलशून्यैरर्थवादैः पुष्पितायाम्। महति यागादिकर्मणि युज्यमानः प्रेर्यमाणः। प्राचीनबर्हिवत् केचिज्जानन्तीत्यतः प्रायेणेत्युक्तम्

एवं विमृश्य सुधियो भगवत्यनन्ते सर्वात्मना विदधते खलु भावयोगम् ।
ते मे न दण्डमर्हन्त्यथ यद्यमीषां स्यात् पातकं तदपि हन्त्युरुगायवादः ॥२६॥
ते देवसिद्धपरिगीतपवित्रगाथा ये साधवः समदृशो भगवत्प्रपन्नाः ।
तान् नोपसीदत हरेर्गदयाऽभिगुप्तान् नैषां वयं न च वयः प्रभवाम दण्डे ॥२७॥
तानानयध्वमसतो विमुखान् मुकुन्दपादारविन्दमकरन्दरसादजस्रम् ।
निष्किञ्चनैः परमहंसकुलै रसज्ञैर्जुष्टाद् गृहे निरयवर्त्मनि बद्धतृष्णान् ॥२८॥
जिह्वा न वक्ति भगवद्गुणनामधेयं चेतश्च न स्मरति तच्चरणारविन्दम् ।
कृष्णाय नो नमति यच्छिर एकदापि तानानयध्वमसतोऽकृतविष्णुकृत्यान् ॥२९॥
तत् क्षम्यतां स भगवान् पुरुषः पुराणो नारायणः स्वपुरुषैर्यदसत्कृतं नः ।
स्वानामहो नविदुषां रचिताञ्जलीनां क्षान्तिर्गरीयसि नमः पुरुषाय भूम्ने ॥३०॥
तस्मात् संकीर्तनं विष्णोर्जगन्मङ्गलमंहसाम् । महतामपि कौरव्य विद्ध्यैकान्तिकनिष्कृतिम् ॥३१॥
शृण्वतां गृणतां वीर्याण्युद्दामानि हरेर्मुहुः । यथा सुजातया भक्त्या शुद्ध्येन्नात्मा व्रतादिभिः ॥
कृष्णाङ्घ्रिपद्ममधुलिण् न पुनर्विसृष्टमायागुणेषु रमते वृजिनावहेषु ।
अन्यस्तु कामहत आत्मरजः प्रमार्ष्टुमीहेत कर्म यत एव रजः पुनः स्यात् ॥३३॥
इत्थं स्वभर्तृगदितं भगवन्महित्वं संस्मृत्य विस्मितधियो यमकिङ्करास्ते ।
नैवाच्युताश्रयजनं प्रति शङ्कमाना द्रष्टुं च बिभ्यति ततः प्रभृति स्म राजन् ॥३४॥

॥ २५ ॥ भावयोगं भक्तियोगम् । यद्यपि पातकम् अथापि दण्डं नेत्यन्वयः । उरुगायवादो[1] भगवन्नामकीर्तनम् ॥ २६ ॥ ये साधवो भक्तास्ते देवादिभिः स्तुतकथाः सन्ति तान् नोपसीदत समीपमपि न गच्छतेत्यन्वयः । एषां दण्डे वयं न समर्था भवाम वयःकालोऽपि न प्रभवति ॥ २७ ॥ परमहंसैः ज्ञानिभिः जुष्टात् सेवितात् भक्तिरसात् ये विमुखास्तान् असतो नास्तिकान् आनयध्वमित्यन्वयः । कथंभूतान् । अजस्रं गृहे बद्धतृष्णान् निरयवर्त्मनि गृहे । निरयत्व धर्मकर्मशून्यत्वमेव । यद्वा । नरकद्वारे भार्यादौ ॥ २८॥ यत् येषाम् । एकदापि सकृदपि । न कृतं विष्णुकृत्यं यैस्तान् ॥ २९ ॥ नोऽस्माकं स्वीयैः पुरुषैः यत् असत् अन्याय्यं कृतं तत् क्षम्यता[2] क्षमां करोतु । नविदुषामज्ञानाम् । गरीयसि श्रेष्ठतमे भवति । भूम्ने व्यापकाय महापुरुषाय । यद्वा । सुष्ठु अपुरुषैः कुपुरुषैरित्यर्थ ॥ ३० ॥ तस्मादिति शुकोक्तिः । यतो विष्णुः सर्वतो महान् तस्माद्धेतोः । हे कौरव्य । परीक्षित् । अंहसां महतां पापानाम् एकान्तिकं मुख्यं प्रायश्चित्तं जानीहि ॥ ३१॥ उद्दामानि बन्धनिवर्तकानि वीर्याणि चरित्राणि गृणतां कथयतां भक्त्या यथा आत्मा शुद्ध्येत् तथा व्रतादिभिर्नेत्यन्वयः ॥३२॥ अङ्घ्रिपद्मयोर्यन्मधुतद् लेढि आस्वादयतीति तथा सः दुःखप्रदेषु त्यक्तमायिक विषयेषु न रमते । अन्यस्तु तदास्वादहीनः विषयासक्तः सन् आत्मनः पापं प्रक्षालयितुं प्रायश्चित्तमेव करोति यतः पुनः पापं स्यादेव ॥ ३३ ॥ ते विस्मितधियो नैव

१. बहुधा गीयमानस्यवादः
२. दिवादित्वात्कर्त्रर्थे सार्वधातुके श्यन् ।

इतिहासमिमं गुह्यं भगवान् कुम्भसम्भवः । कथयामास मलय आसीनो हरिमर्चयन् ॥३५॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां षष्ठस्कन्धे यमपुरुषसंवादे तृतीयोऽध्यायः ॥३॥

अथ चतुर्थोऽध्यायः

राजोवाच

देवासुरनृणां सर्गो नागानां मृगपक्षिणाम् । सामासिकस्त्वया प्रोक्तो यस्तु स्वायम्भुवेऽन्तरे ।१।

तस्यैव व्यासमिच्छामि ज्ञातुं ते भगवन् यथा । अनुसर्गं यया शक्त्या ससर्ज भगवान् परः।२।

सूत उवाच

इति सम्प्रश्नमाकर्ण्य राजर्षेर्बादरायणिः । प्रतिनन्द्य महायोगी जगाद मुनिसत्तमः ।।३।।

श्रीशुक उवाच

यदा प्रचेतसः पुत्रा दश प्राचीनबर्हिषः । अन्तःसमुद्रादुन्मग्ना ददृशुर्गां द्रुमैर्वृताम् ॥ ४ ॥

द्रुमेभ्यः क्रुध्यमानास्ते तपोदीपितमन्यवः । मुखतो वायुमग्निं च ससृजुस्तद्दिधक्षया ॥ ५ ॥

ताभ्यां निर्दह्यमानांस्तानुपलभ्य कुरूद्वह । राजोवाच महान् सोमो मन्युं प्रशमयन्निव ॥ ६ ॥

मा द्रुमेभ्यो महाभागा दीनेभ्यो द्रोग्धुमर्हथ । विवर्धयिषवो यूयं प्रजानां पतयः स्मृताः ॥ ७ ॥

अहो प्रजापतिपतिर्भगवान् हरिरव्ययः । वनस्पतीनोषधीश्च ससर्जोर्जमिषं विभुः ॥ ८ ॥

अन्नं चराणामचरा ह्यपदः पादचारिणाम् । अहस्ता हस्तयुक्तानां द्विपदां च चतुष्पदः ॥ ९ ॥

बभूवुः किन्तु तदुक्तं सत्यं मेनिरे । तत आरभ्य भक्तजनं द्रष्टुमपि बिम्यति ॥ ३४ ॥ कुम्भसंभवोऽगस्त्यः गुह्यं नामरहस्यात्मकमिमं मह्यं कथयामास । मलये पर्वते ।। ३५ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे गूढार्थदीपिन्यां तृतीयोऽध्यायः ।

●

चतुर्थे सृष्टिवृद्ध्यर्थं हंसगुह्यस्तवेन सा ।
स्तुतिर्दक्षकृता विष्णोरत्र सम्यगुदीर्यते ॥ १ ॥

अन्तरे मन्वन्तरे । सामासिकः संक्षिप्तः । देवेति सार्द्धम् । यस्तु प्रोक्तस्तृतीयस्कन्धे तस्यैव व्यासं विस्तारं ते त्वत्तः । अनुसर्गम् अवान्तरसर्गम् । परो ब्रह्मा ॥१।२॥ प्रतिनन्द्य संश्लाघ्य ॥ ३ ॥ उन्मग्ना निर्गताः । गां पृथ्वीम् यदा ददृशुस्तदा संसृजुरिति द्वयोरन्वयः ॥४।५॥ ताभ्यां वाय्वग्निभ्याम् । उपलभ्य दृष्ट्वा वनस्पतीनां राजा सोमः ॥ ६ ॥ वर्द्धयितुमिच्छवः ॥ ७ ॥ ओषधीः यवादिधान्यानि । ऊर्जं[1] वृक्षनिष्पन्नं फलादि वनस्पतिहेतुकम् । इषमोषधिहेतुकं व्रीह्यादि ॥८॥ चराणां पक्षिणाम् अचराः पुष्पफलाद्या अन्नम् । गवादीनाम् अपदः घासाद्याः । व्याघ्रादीनाम् अहस्ता मृगादयः । चतुष्पदः

---

१. ऊर्जति बलीम् भवति चेष्टतेऽनेनेति ऊर्जम् । 'ऊर्ज बलप्राणनयोः इत्यस्मात् अकर्तरि चेति घञ् । इष्यते क्षुन्निवृत्तये इति इषमन्नं गोधूमादि । घञर्थे क विधानम् ।

यूयं च पित्राऽन्वादिष्टा देवदेवेन चानघाः । प्रजासर्गाय हि कथं वृक्षान् निर्दग्धुमर्हथ ।।१०।।
आतिष्ठत सतां मार्गं कोपं यच्छत दीपितम् । पित्रा पितामहेनापि जुष्टं वः प्रपितामहैः ।।११।।
तोकानां पितरौ बन्धू दृशः पक्ष्म स्त्रियाः पतिः । पतिः प्रजानां भिक्षूणां गृह्यज्ञानां बुधः सुहृत्।१२
अन्तर्देहेषु भूतानामात्माऽऽस्ते हरिरीश्वरः । सर्वं तद्धिष्ण्यमीक्षध्वमेवं वस्तोषितो ह्यसौ ।।१३।।
यः समुत्पतितं देह आकाशान्मन्युमुल्बणम् । आत्मजिज्ञासया यच्छेत् स गुणानतिवर्तते।।१४।।
अलं दग्धैर्द्रुमैर्दीनैः खिलानां शिवमस्तु वः । वार्क्षी ह्येषा वरा कन्या पत्नीत्वे प्रतिगृह्यताम्।।१५।।
इत्यामन्त्र्य वरारोहां कन्यामाप्सरसीं नृप । सोमो राजा ययौ दत्त्वा ते धर्मेणोपयेमिरे ।१६।
तेभ्यस्तस्यां समभवद्दक्षः प्राचेतसः किल । यस्य प्रजाविसर्गेण लोका आपूरितास्त्रयः ।।१७।।
यथा ससर्ज भूतानि दक्षो दुहितृवत्सलः । रेतसा मनसा चैव तन्ममावहितः शृणु ।।१८।।
मनसैवाऽसृत्पूर्वं प्रजापतिरिमाः प्रजाः । देवासुरमनुष्यादीन् नभस्थलजलौकसः ।।१९।।
तमबृंहितमालोक्य प्रजासर्गं प्रजापतिः । विन्ध्यपादानुपव्रज्य सोऽचरद् दुष्करं तपः ।।२०।।
तत्राघमर्षणं नाम तीर्थं पापहरं परम् । उपस्पृश्यानुसवनं तपसाऽतोषयद्धरिम् ।।२१।।
अस्तौषीद्धंसगुह्येन भगवंतमधोक्षजम् । तुभ्यं तदभिधास्यामि कस्याऽतुष्यद् यतो हरिः ।२२।

प्रजापतिरुवाच

नमः पराया‌ऽवितथानुभूतये गुणत्रयाभासनिमित्तबन्धवे ।
अदृष्टधाम्ने गुणतत्वबुद्धिभिर्निवृत्तमानाय दधे स्वयम्भुवे ।।२३।।

वृपादयोऽन्नं । जीविकासाधनत्वात् ॥ ९ ॥ पित्रा प्राचीनर्बाहिषा । देवदेवेन महादेवेन च ॥ १० ॥ मार्गम् उपशमम् । यच्छत उपसंहरत । पितामहो हविर्धानः । प्रपितामहो विजिताश्वः । एतैर्जुष्टं सेवितं मार्गम् ॥ ११ ॥ तोकानां बालानाम् । बन्धुः रक्षक इति प्रत्येकमन्वेति । पतिः राजा । गृही गृहस्थः । बुधो ज्ञानी ॥ १२ ॥ भूतानां प्राणिनाम् । आत्मा अन्तर्यामी । धिष्ण्यं निवासस्थानम् । वो युष्माभिः ॥१३॥ देहे हृदयाकाशात् । उल्वणं दुःसहं क्रोधमुपशमयेत् ॥१४॥ खिलानामवशिष्टानां वृक्षाणां वो युष्माकं चवार्क्षी वृक्षपालिता । मारिषा नाम्नी ॥१५॥ आमन्त्र्य तान् सान्त्वयित्वा । आरोह ऊरुप्रदेशः । अप्सरसः प्रम्लोचायाः सुताम् । उपयेमिरे विवाहितवन्तः ॥ १६ ॥ तेभ्यः प्रचेतोभ्यः ॥ १७ ॥ अवहितः सावधानः सन् । मम मत्तः सकाशात् ॥ १८ ॥ ओकांसि स्थानानि ॥ १९ ॥ तं सर्गम् वृद्धिमप्राप्तम् । पादान् अवान्तरप्रदेशान् । दुष्करं कठोरम् ॥२०॥ तत्र विन्ध्ये । उपस्पृश्य[1] आचम्य स्नात्वा च । अनुसवनं त्रिकालम् ॥ २१ ॥ यतो येन कस्य दक्षस्य उपरि अतुष्यत् तत्स्तोत्रं तुभ्यं परीक्षितेऽपि ॥२२॥ पराय परमेश्वराय नमो दधे नमस्करोमि । कथंभूताय । अवितथा अमोघा अनुभूतिः ज्ञनिशक्तिर्यस्य । किञ्च गुणत्रयामासो जीवः निमित्त' माया च त योः बन्धवे प्रवर्तकाय । गुणेषु विषयेषु सत्य बुद्धिर्येषां तेः

---

१. उपस्पर्शः स्पर्शमात्रे स्नानाचमनयोरपि' इति मेदिनी ।

न यस्य सख्यं पुरुषोऽवैति सख्युः सखा वसन् संवसतः पुरेऽस्मिन् ।
गुणो यथा गुणिनो व्यक्तदृष्टेस्तस्मै महेशाय नमस्करोमि ॥२४॥

देहोऽसवोऽक्षा मनवो भूतमात्रा नात्मानमन्यं च विदुः परं यत् ।
सर्वं पुमान् वेद गुणांश्च तज्ज्ञो न वेद सर्वज्ञमनन्तमीडे ॥२५॥

यदोपरामो मनसो नामरूपरूपस्य दृष्टस्मृतिसम्प्रमोषात् ।
य ईयते केवलया स्वसंस्थया हंसाय तस्मै शुचिसद्मने नमः ॥२६॥

मनीषिणोऽन्तर्हृदि संनिवेशितं स्वशक्तिभिर्नवभिश्च त्रिवृद्भिः ।
वह्निं यथा दारुणि पाञ्चदश्यं मनीषया निष्कर्षन्ति गूढम् ॥२७॥

स वै ममाशेषविशेषमायानिषेधनिर्वाणसुखानुभूतिः ।
स सर्वनामा स च विश्वरूपः प्रसीदतामनिरुक्तात्मशक्तिः ॥२८॥

यद् यन्निरुक्तं वचसा निरूपितं धियाऽक्षभिर्वा मनसा वोत यस्य ।
मा भूत् स्वरूपं गुणरूपं हि तत्तत् स वै गुणापायविसर्गलक्षणः ॥२९॥

यस्मिन् यतो येन च यस्य यस्मै यद् यो यथा कुरुते कार्यते च ।
परावरेषां परमं प्राक् प्रसिद्धं तद् ब्रह्म तद्धेतुरनन्यदेकम् ॥३०॥

बहिर्मुखैर्न दृष्टं धाम स्वरूपं यस्य । कुतः चक्षुरादि प्रमाणातीताय स्वप्रकाशाय च ॥२३॥ पुरुषः सखा जीवः अस्मिन् पुरे देहे वसन्नपि अत्रैव संवसतः यस्य सख्युः सख्यम् इन्द्रियादिप्रवर्तकत्वं नावैति न जानाति तस्मै महेशं प्रसादयितुं नमस्करोमीत्यन्वयः । यथा गुणो रूपादिः विषियिगः इन्द्रियादेः प्रकाशकत्वं न जानाति तद्वत् । व्यक्तेति प्रथमान्तं वा तत्र प्रपंचदृष्टिः पुरुषः ॥२४॥ देहादयः आत्मानं दृश्यम् अन्यमिन्द्रियवर्गं तयोः परं यत् देवतावर्गं च न विदुः । पुमान् जीवस्तु तज्ज्ञः एतत् त्रयं विदन्नपि यं सर्वज्ञं न वेद तमीडे स्तौमीत्यन्वयः । अक्षा इन्द्रियाणि । मनवोऽन्तः करणानि ॥२५॥ नामरूपे निरूप्येते येन तस्य मनसो यदा उपरामो नैश्चल्यं भवेत् तदा केवलेन स्वरूपावस्थानेन यः प्रतीयते तस्मै नम इत्यन्वयः । हंसाय सूर्यरूपाय शुद्धाय शुचि शुद्धं मनः सद्म अभिव्यक्तिस्थानं यस्य तस्मै । उपरामे हेतु । दृष्टं दर्शनं तत्स्मृतिश्च तयोर्नाशात् ॥२६॥ यथा दारुणि गूढं [1]पाञ्चदश्यमग्निं वैदिका निष्कर्षन्ति उपायतः प्रत्यक्षं कुर्वन्ति तद्वत् मनीषिणः योगिनः त्रिवृद्भिः धारणाध्यानसमाधिभिरुपायैः मनीषया यं परमात्मानं निष्कर्षन्ति पृथक्कृत्य पश्यन्ति स मम प्रसीदतामित्यन्वयः । कथंभूतम् । नवभिः[2] स्वशक्तिभिः सह अन्तर्हृदि संस्थापितम् ॥२७॥ कथंभूतः । अशेषा विशेषा भेदा महदादयो यस्यास्तस्या मायाया निषेधेन नेति नेति निराकरणेन यत् निर्वाणं सुखं तस्मिन् अनुभूतिर्यस्य सः । अनिरुक्ता अनिर्वचनीया ॥२८॥ यत् यत् वचसा निरुक्तं धिया निश्चितम् [3]अक्षभिरिन्द्रियैर्गृहीतम् उत अपि मनसा सङ्कल्पितं तत् तत् यस्य स्वरूपं मा भूत् न भवति यतो गुमानामेव रूपम् तत्कार्यत्वात् । स तु गुणव्यतिरिक्तः अथ च अपायविसर्गाभ्यां प्रलयोत्पत्तिभ्यां यः लक्ष्यते प्रतीयते तथा तस्मै नमः इति तृतीयेनान्वयः ॥ २९ ॥ यस्मिन् अधिकरणे । यतोऽपादानात् । येन करणेन । यस्य सम्बन्धि यस्मै सम्प्रदानाय । यदीप्सिततम् ।

---

१. अमापूर्णिमयोः पञ्चदशीयदर्शपूर्णमासानुष्ठानसम्बन्धिनम् । २. श्रिया पुष्ट्या गिरा कान्त्या कीर्त्या तुष्ट्येलयोर्जया । विद्ययाऽविद्यया शक्त्या मायया च निषेवितम् । ३. 'छन्दस्यपि दृश्यते' इत्यक्ष्णोऽनङ् ।

यच्छक्तयो वदतां वादिनां वै विवादसंवादभुवो भवन्ति ।
कुर्वन्ति चैषां मुहुरात्ममोहं तस्मै नमोऽनन्तगुणाय भूम्ने ॥३१॥
अस्तीति नास्तीति च वस्तुनिष्ठयोरेकस्थयोर्भिन्नविरुद्धधर्मयोः ।
अवेक्षितं किञ्चन योगसांख्ययोः समं परं ह्यनुकूलं बृहत् तत् ॥३२॥
योऽनुग्रहार्थं भजतां पादमूलमनामरूपो भगवाननन्तः ।
नामानि रूपाणि च जन्मकर्मभिर्भेजे स मह्यं परमः प्रसीदतु ॥३३॥
यः प्राकृतैर्ज्ञानपथैर्जनानां यथाशयं देहगतो विभाति ।
यथानिलः पार्थिवमाश्रितो गुणं स ईश्वरो मे कुरुतान्मनोरथम् ॥३४॥

श्रीशुक उवाच

इति स्तुतः संस्तुवतः स तस्मिन्नघमर्षणे । आविरासीत्कुरुश्रेष्ठ भगवान् भक्तवत्सलः ॥३५॥
कृतपादः सुपर्णांसे प्रलम्बाष्टमहाभुजः । चक्रशङ्खासिचर्मेषुधनुःपाशगदाधरः ॥३६॥
पीतवासा घनश्यामः प्रसन्नवदनेक्षणः । वनमालानिवीताङ्गो लसच्छ्रीवत्सकौस्तुभः ॥३७॥
महाकिरीटकटकः स्फुरन्मकरकुण्डलः । काञ्च्यङ्गुलीयवलयनूपुराङ्गदभूषितः ॥३८॥
त्रैलोक्यमोहनं रूपं बिभ्रत् त्रिभुवनेश्वरः । वृतो नारदनन्दाद्यैः पार्षदैः सुरयूथपैः ॥३९॥
स्तूयमानोऽनुगायद्भिः सिद्धगन्धर्वचारणैः । रूपं तन्महदाश्चर्यं विचक्ष्याऽऽगतसाध्वसः ॥४०॥
ननाम दण्डवद् भूमौ प्रहृष्टात्मा प्रजापतिः । न किंचनोदरीरयितुमशकत् तीव्रया मुदा ।
आपूरितमनोद्वारैर्ह्लदिन्य इव निर्झरैः ॥ ४१ ॥
तं तथावनतं भक्तं प्रजाकामं प्रजापतिम् । चित्तज्ञः सर्वभूतानामिदमाह जनार्दनः ॥४२॥

यः कुरुते स्वतन्त्रः । कार्यते प्रयोज्यकर्त्रा तत्सर्वं ब्रह्मैव । कुतः । तद्धेतुः तेषां कारणम् । किं च परेषा मवरेषां हेतूनां ब्रह्मादीनां च परमं कारणम् । पुनश्च अनन्यत् विजातीयशून्यम् । एकं सजातीयशून्यं च तस्मै नम इत्युत्तरेणान्वयः ॥३०॥ यस्य शक्तयः मायाविद्याद्याः वादिनां पूर्वपक्षिणां विवादस्य पूर्वपक्षस्य वदतामुत्तरपक्षिणां संवादस्य सिद्धान्तपक्षस्य भुवः कारणानि भवन्ति तस्मै नमः । भूम्ने सर्वव्यापिने॥३१॥ योगो भक्तिशास्त्रं तत्र पादादि अस्तीति पातालमेतस्य हि पादमूलम्'इत्युक्ते' 'सांख्यं ज्ञानशास्त्रं तत्र नास्तीति 'अपाणिपादः' इत्युक्तेः अतो द्वयोः शास्त्रयोः यत् किञ्चन अवेक्षितं विचार्यं निश्चितं तत्सर्वं बृहत् ब्रह्मैव तस्मै नम इत्यन्वयः । कीदृक् समं वैषम्यरहितम् । अनुकूलं विवादापनोदकं च । वस्तुतस्तु प्राकृतानामेव निषेधः भगवद्विग्रहस्तु अप्राकृत अतो न विरोधः ॥ ३२ ॥ भजतां भक्तानां । भेजे प्रकटितवान् ॥ ३३ ॥ ज्ञानपथैरुपासनामार्गैः यथाशयं वासनारूपेण देहगतोऽन्तर्यामी तत्तद्देवतारूपेण यो विभाति । यथा वायुः पार्थिवं गुणं चम्पकादिगन्धमाश्रितो नानागन्धवान् भवति स मे मनोरथं कुरुतात् पूर्णं करोतु ॥ ३४ ॥ संस्तुवतः दक्षस्याग्रे अघमर्षणेतीर्थे॥३५॥ सुपर्णो गरुडः ॥३६॥श्रीवत्सो भृगुलता॥३७॥कटकः पादकटकः । वलयं कङ्कणं हस्तस्थम् ॥३८॥३९॥ साध्वस आनन्द्रोद्रेकः ॥४०॥ मुदा प्रेम्णा आपूरितैः मनोद्वारैः-

श्रीभगवानुवाच

प्राचेतस महाभाग संसिद्धस्तपसा भवान्। यच्छ्रद्धया मत्परया मयि भावं परं गतः ॥४३॥
प्रीतोऽहं ते प्रजानाथ यत्तेऽस्योद्बृंहणं तपः। ममैष कामो भूतानां यद् भूयासुर्विभूतयः ॥४४॥
ब्रह्मा भवो भवन्तश्च मनवो विबुधेश्वराः। विभूतयो मम ह्येता भूतानां भूतिहेतवः ॥४५॥
तपो मे हृदयं ब्रह्मंस्तनुर्विद्या क्रियाऽऽकृतिः। अङ्गानि क्रतवो जाता धर्म आत्माऽसवः सुराः ॥४६॥
अहमेवासमेवाग्रे नान्यत् किंचान्तरं बहिः। संज्ञानमात्रमव्यक्तं प्रसुप्तमिव विश्वतः ॥४७॥
मय्यनन्तगुणेऽनन्ते गुणतो गुणविग्रहः। यदाऽऽसीत्तत एवाद्यः स्वयम्भूः समभूदजः ॥४८॥
स वै यदा महादेवो मम वीर्योपबृंहितः। मेने खिलमिवात्मानमुद्यतः सर्गकर्मणि ॥४९॥
अथ मेऽभिहितो देवस्तपोऽतप्यत दारुणम्। नव विश्वसृजो युष्मान् येनादावसृजद्विभुः ॥५०॥
एषा पञ्चजनस्याङ्ग दुहिता वै प्रजापतेः। असिक्नी नाम पत्नीत्वे प्रजेश प्रतिगृह्यताम् ॥५१॥
मिथुनव्यवायधर्मस्त्वं प्रजासर्गमिमं पुनः। मिथुनव्यवायधर्मिण्यां भूरिशो भावयिष्यसि ॥५२॥
त्वत्तोऽधस्तात् प्रजाः सर्वा मिथुनीभूय मायया। मदीयया भविष्यन्ति हरिष्यन्ति च मे बलिम्

श्रीशुक उवाच

इत्युक्त्वा मिषतस्तस्य भगवान् विश्वभावनः। स्वप्नोपलब्धार्थं इव तत्रैवान्तर्दधे हरिः ॥५४॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां षष्ठस्कन्धे चतुर्थोऽध्यायः ॥ ४ ॥

चक्षुरादीन्द्रियैर्वक्तुं नाशकत् न समर्थोऽभूत्। ह्रदिन्यो नद्यः ॥ ४१।४२ ॥ हे प्राचेतस दक्ष। मत्परया मन्निष्ठया। भावं भक्तिं प्राप्तः ॥ ४३ ॥ यत् यस्मात् ते तपः अस्य विश्वस्य वृद्धिकरमासीत् अतस्ते। भूतानां प्रजानां विभूतयः समृद्धयः भूयासुरिति यत् एष ममैव काम इच्छा ॥ ४४ ॥ भूतिः समृद्धिः। ॥ ४५ ॥ तपो ध्यानम्। विद्या मन्त्रजपः। क्रिया नित्यनैमित्तिकी। जाताः सुनिष्पन्नाः। आत्मा मनः। असवः प्राणाः ॥४६॥ आन्तरं ग्राहकमन्तःकरणम्। बहिः ग्राह्यं वस्तु नासीत् केवलं संज्ञानं चैतन्यमात्रम्। अव्यक्तं प्रधानं च विश्वतः साकल्येन प्रसुप्तं प्रलीनमेवासीत् ॥४७॥ गुणतो मायातः गुणकार्यरूपो विग्रहो ब्रह्माण्डम्। ततः तत्र ॥४८॥ वीर्येण सङ्कल्पेन उपबृंहितः समर्थीकृतोऽपि खिलमसमर्थमिव मेने यदा अथ तदैवेत्युत्तरेण सम्बन्धः। मे मया प्रेरितः सन् तपः अकरोत्। येन तपसा ॥४९।५०॥ अङ्ग हे दक्ष ! पञ्चजनो नाम प्रजापतिः ॥ ५१ ॥ मिथुनस्य युग्मस्य यो व्यवायः संभोगः स एव धर्मो यस्य स त्वं भावयिष्यसि वर्धयिष्यसि ॥५२॥ मायया स्त्रिया सह प्रजाः पुत्रादिरूपेण जनिष्यन्ते बलिमाज्ञाम् पालयिष्यन्ति ॥ ५३ ॥ मिषतः पश्यतः सतः। भावयतीति भावनः सृष्ट्यादिकर्ता ॥ ५४ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे गूढार्थदीपिन्यां चतुर्थोऽध्यायः।

अथ पञ्चमोऽध्यायः

श्रीशुक उवाच

तस्यां स पाञ्चजन्यां वै विष्णुमायोपबृंहितः। हर्यश्वसंज्ञानयुतं पुत्रानजनयद् विभुः ॥१॥
अपृथग्धर्मशीलास्ते सर्वे दाक्षायणा नृप। पित्रा प्रोक्ताःप्रजासर्गे प्रतीचीं प्रययुर्दिशम् ॥२॥
तत्र नारायणसरस्तीर्थं सिन्धुसमुद्रयोः। सङ्गमो यत्र सुमहन्मुनिसिद्धनिषेवितम् ॥ ३ ॥
तदुपस्पर्शनादेव विनिर्धूतमलाशयाः। धर्मे पारमहंस्ये च प्रोत्पन्नमतयोऽप्युत ॥ ४ ॥
तेपिरे तप एवोग्रं पित्रादेशेन यंत्रिताः प्रजाविवृद्धये यत्तान् देवर्षिस्तान् ददर्श ह ॥ ५ ॥
उवाच चाथ हर्यश्वाः कथं स्रक्ष्यथ वै प्रजाः। अदृष्ट्वान्तं भुवो यूयं बालिशा बत पालकाः॥६॥
तथैकपुरुषं राष्ट्रं बिलं चादृष्टनिर्गमम्। बहुरूपां स्त्रियं चापि पुमांसं पुंश्चलीपतिम् ॥ ७ ॥
नदीमुभयतोवाहां पञ्चपञ्चाद्भुतं गृहम्। क्वचिद्धंसं चित्रकथं क्षौरपव्यं स्वयं भ्रमिम् ॥ ८ ॥
कथं स्वपितुरादेशमविद्वांसो विपश्चितः। अनुरूपमविज्ञाय अहो सर्गं करिष्यथ ॥ ९ ॥

श्रीशुक उवाच

तन्निशम्याथ हर्यश्वा औत्पत्तिकमनीषया। वाचःकूटं तु देवर्षेः स्वयं विममृशुर्धिया ॥१०॥
भूः क्षेत्रं जीवसंज्ञं यदनादिनिजबन्धनम्। अदृष्ट्वा तस्य निर्वाणं किमसत्कर्मभिर्भवेत् ॥११॥
एक एवेश्वरस्तुर्यो भगवान् स्वाश्रयः परः। तमदृष्टवा मवं पुंसः किमसत्कर्मभिर्भवेत् ॥१२॥
पुमान् नैवैति यद् गत्वा बिलस्वर्गं गतो यथा। प्रत्यग्धामाविद इह किमसत्कर्मभिर्भवेत् ॥१३॥

पञ्चमे नारदप्रोक्तैर्वाक्कूटैर्गेहनिर्गतान्।
पुत्रान् श्रुत्वाऽर्दितो दक्षस्तं शशापेति वर्ण्यते ॥ ११ ॥

स विभुः दक्षः। अयुतं दशसहस्रसंख्याकान्। उपबृंहितः लब्धसामर्थ्यः ॥ १ ॥ अपृथक् समानो धर्मः शीलं च येषां ते। प्रतीचीं पश्चिमाम्। यत्र सिन्धोर्नद्याः समुद्रस्य च संगमः तत्रस्थं नारायणसरो नाम तीर्थं प्रययुरिति पूर्वेणान्वयः ॥ ३ ॥ तदिति युग्मम्। उपस्पर्शनात् स्नानाचमनात्। विनिर्धूतो रागादिमलो यस्मात् स तथाभूत आशयोऽन्तःकरणं येषां ते। धर्मे निवृत्तिलक्षणे। यन्त्रिता बद्धाः। तेपुः चक्रुः। यत्तान् उद्यतान् ह खेदे ॥ ४।५ ॥ हे हर्यश्वाः। बत आश्चर्यं। भुवोऽन्तमित्यादिदशार्थान् अदृष्ट्वा तत्तात्पर्यं च अविज्ञाय कथं सर्गं करिष्यथेति चतुर्णामेकान्वयः। राष्ट्रं जगत्। निर्गमः निर्गमोपायः। स्त्रियं बुद्धिम्। पुमांसं जीवम्। पञ्चविंशतितत्त्वानां गृहं शरीरम्। हंसमीश्वरम्। क्षुरैः पविभिः वज्रैश्च निर्मितं क्षौरपव्यं कालचक्रम्। भ्रमिं भ्रमणस्वभावम्। विपश्चितः पितुः। अविद्वांसोऽजानन्तः कथं स्रक्ष्यथ सर्गं करिष्यथेति पुनरुक्तिर्निरुत्साहार्था ॥ ६।७।८।९ ॥ औत्पत्तिकी स्वाभाविकी मनीषा विचारशक्तिर्यस्यास्तया धिया विममृशुः विचारितवन्तः। कूटं गूढार्थवचनम् ॥१०॥ क्षेत्रं सूक्ष्मशरीरम्। निर्वाणं नाशम्। कर्मभिः सर्जनलक्षणैः ॥ ११ ॥ राष्ट्रशब्देन जगत् विवक्षितं तत्र पुरुष एक एव तं नित्यमुक्तम्। भवनिवर्तकं वा। कर्मभिर्यागादिभिः पशुहिंसालक्षणैः ॥१२॥ नैव एति नायाति।

नानारूपाऽऽत्मनो बुद्धिः स्वैरिणीव गुणान्विता । तन्निष्ठामगतस्येह किमसत्कर्मभिर्भवेत् ॥१४॥
तत्सङ्गभ्रंशितैश्वर्यं संसरन्तं कुभार्यवत् । तद्गतीरबुधस्येह किमसत्कर्मभिर्भवेत् ॥१५॥
सृष्टयप्ययकरीं मायां वेलाकूलान्तवेगिताम् । मत्तस्य तामविज्ञस्य किमसत्कर्मभिर्भवेत् ॥१६॥
पञ्चविंशतितत्त्वानां पुरुषोऽद्भुतदर्पणम् । अध्यात्ममबुधस्येह किमसत्कर्मभिर्भवेत् ॥१७॥
ऐश्वरं शास्त्रमुत्सृज्य बन्धमोक्षानुदर्शनम् । विविक्तपदमज्ञाय किमसत्कर्मभिर्भवेत् ॥१८॥
कालचक्रं भ्रमिस्तीक्ष्णं सर्वं निष्कर्षयज्जगत् । स्वतन्त्रमबुधस्येह किमसत्कर्मभिर्भवेत् ॥१९॥
शास्त्रस्य पितुरादेशं यो न वेद निवर्तकम् । कथं तदनुरूपाय गुणविस्रम्भ्युपक्रमेत् ॥२०॥
इति व्यवसिता राजन् हर्यश्वा एकचेतसः । प्रययुस्तं परिक्रम्य पन्थानमनिवर्तनम् ॥२१॥
स्वरब्रह्मणि निर्भातहृषीकेशपदाम्बुजे । अखण्डं चित्तमावेश्य लोकाननुचरन्मुनिः ॥२२॥
नाशं निशम्य पुत्राणां नारदाच्छीलशालिनाम् । अन्वतप्यत कः शोचन् सुप्रजस्त्वं शुचां पदम्
स भूयः पाञ्चजन्यायामजेन परिसान्त्वितः । पुत्रानजनयद् दक्षः शबलाश्वान् सहस्रशः ॥२४॥

तत् प्रत्यग्धाम वैकुण्ठलोकम् अविदः[1] अजानतः पुंसः कर्मभिः तत्प्रतिरोधकैः । यथा पातालं गतो नावर्तते तत्रैवासज्य तिष्ठति तद्वत् ॥ १३ ॥ आत्मनो जीवस्य बुद्धिरेव स्त्री । पुंश्चलीव कुत्सितविषयोन्मुखी। तस्या निष्ठामवसानं विवेकमप्राप्तस्य । कर्मभिः विषयित्वान्नरकहेतुभिः ॥ १४ ॥ तत् तस्या बुद्धेः। ऐश्वर्यं स्वातन्त्र्यम् । तस्या बुद्धेर्गतीः सुखदुःखलक्षणाः संसरन्तं प्राप्नुवन्तं जीवमबुधस्य । कर्मभिः तदध्यासानिवर्तकैः ॥ १५ ॥ सृष्टिप्रलयौ करोतीति उभयतः प्रवाहो दर्शितः । वेलाऽत्र[2] जलवाची कूलं तटवाची । नदीतटं प्रवाहपतितानां निर्गमस्थानं तपोविद्यादि तस्यान्ते समीपे कृतवेगां क्रोधाहङ्कारादिभिः निर्गमनावरोधाय । तामविज्ञस्य अविचारयतः । कर्मभिः मायिकैः ॥ १६ ॥ तत्त्वानां संघातरूपस्य देहस्य अन्तर्यामी पुरुषः आश्चर्यरूपः दर्पणवन्निर्मलश्च सर्वाधिष्ठाता च तमबुधस्य अजानतः असद्भिः देहाध्यासकृतैः ॥१७॥ हंसमित्यस्यार्थमाहुः । ऐश्वरम् ईश्वरप्रतिपादकम् । विविक्तानि विवेचितानि सुप्तिङन्तात्मकानि पदानि यत्र । यद्वा । विविक्तं सर्वतः सारभूतं वस्तु ब्रह्म पद्यते प्राप्नोति अनेन । हंसो यथा क्षीरमेव गृह्णातीति तद्वत् लुप्तोपमा । असद्भिः बहिर्मुखैः ॥१८॥ क्षुरपविभ्यां निर्वृत्तं क्षीरपव्यं कालचक्रम् । निष्कर्षयत् विनाशयत् । स्वतन्त्रं दुर्निवारम् । अबुधस्य अविचारयतः असद्भिस्तन्निवारणानर्हैः ॥१९॥ शास्त्रमेव मुख्यः पिता तस्यादेशं निवृत्तिपरकम् यो न वेद स तदनुरूपाय आदेशानुरूपं कर्तुं कथं प्रवर्तेत न कथमपि यतो गुणमये प्रवृत्तिमार्गे विस्रम्भी विश्वासवान् ॥२०॥ व्यवसिताः कृतनिश्चयाः । तं नारदम् ॥ २१ ॥ स्वरा[3] एव ब्रह्म गान्धर्वरूपं तस्मिन् आविर्भूतो यो हृषीकेशस्तस्य पदाम्बुजे । अखण्डमेकाग्रम् । अन्वचरत् ॥ २२ ॥ नाशमदर्शनम् । शीलेन मृदुस्वभावेन शालन्ते शोभन्ते तथा तेषाम् । सुप्रजस्त्वं सत्पुत्रवत्त्वं शुचां शोकानां स्थानं भवति तद्वियोगे ॥ २३ ॥ अजेन ब्रह्मणा । पञ्चजन-

---

१. तदर्हमिति ज्ञापकात् कृद्योगेऽपि कर्मणि द्वितीया ।

२. वेला स्यात्तीरनीरयोः । इत्यभिधानात् ।

३. स्वतो रञ्जयति श्रोतुश्चित्तं स स्वर उच्यते इति गानशास्त्रम् ।

तेऽपि पित्रा समादिष्टाः प्रजासर्गे धृतव्रताः । नारायणसरो जग्मुर्यत्र सिद्धाः स्वपूर्वजाः ।।२५।।
तदुपस्पर्शनादेव विनिर्धूतमलाशयाः । जपन्तो ब्रह्म परमं तेपुस्तेऽत्र महत् तपः ।।२६।।
अब्भक्षाःकतिचिन्मासान् कतिचिद्वायुभोजनाः । आराधयन् मन्त्रमिममभ्यस्यन्त इडस्पतिम्।२७।
ॐ नमो नारायणाय पुरुषाय महात्मने । विशुद्धसत्त्वधिष्ण्याय महाहंसाय धीमहि ।।२८।।
इति तानपि राजेन्द्र प्रतिसर्गधियो मुनिः । उपेत्य नारदः प्राह वाचःकूटानि पूर्ववत् ।।२९।।
दाक्षायणाः संशृणुत गदतो निगमं मम । अन्विच्छतानुपदवीं भ्रातॄणां भ्रातृवत्सलाः ।।३०।।
भ्रातॄणां प्रायणं भ्राता योऽनुतिष्ठति धर्मवित् । स पुण्यबन्धुः पुरुषो मरुद्भिः सह मोदते ।।३१।।
एतावदुक्त्वा प्रययौ नारदोऽमोघदर्शनः । तेऽपि चान्वगमन्मार्गं भ्रातॄणामेव मारिष ।।३२।।
सध्रीचीनं प्रतीचीनं परस्यानुपथं गताः । नाद्यापि ते निवर्तन्ते पश्चिमा यामिनीरिव ।।३३।।
एतस्मिन् काल उत्पातान् बहून् पश्यन् प्रजापतिः । पूर्ववन्नारदकृतं पुत्रनाशमुपाशृणोत्।।३४।।
चुक्रोध नारदायासौ पुत्रशोकविमूर्च्छितः । देवर्षिमुपलभ्याह रोषाद्विस्फुरिताधरः ।।३५।।

दक्ष उवाच

अहो असाधो साधूनां साधुलिङ्गेन नस्त्वया । असाध्वकार्यर्भकाणां भिक्षोर्मार्गः प्रदर्शितः।३६।
ऋणैस्त्रिभिरमुक्तानाममीमांसितकर्मणाम् । विघातः श्रेयसः पाप लोकयोरुभयोः कृतः ।।३७।।
एवं त्वं निरनुक्रोशो बालानां मतिभिद्धरेः । पार्षदमध्ये चरसि यशोहा निरपत्रपः ।।३८।।
ननु भागवता नित्यं भूतानुग्रहकातराः । ऋते त्वां सौहृदघ्नं वै वैरङ्करमवैरिणाम् ।।३९ ।।
नेत्थं पुंसां विरागः स्यात् त्वया केवलिना मृषा । मन्यसे यद्युपशमं स्नेहपाशनिकृन्तनम् ।।४०।

स्यापत्यं स्त्री पाञ्चजन्या अपत्यार्थे ण्यः प्रत्ययः ॥ २४ ॥ सिद्धाः सिद्धिं प्राप्ताः ॥ २५ ॥ तस्य तीर्थस्य स्नानाचमनात् विनिर्धूतो निरस्तो रागादिमलो यस्मात्तथाभूत आशयोऽन्तःकरणं येषां ते । ब्रह्म प्रणवं वक्ष्यमाणमन्त्रं वा । तेपुः चक्रुः ।। २६ ।। भोजनाः भुञ्जन्तीति कर्तरि ल्युः । इमं मन्त्रम् । 'इडस्पतिं श्रीविष्णुम् । आराधयन्[2] ॥ २७ ।। विशुद्धं सत्त्वमन्तःकरणं धिष्ण्यमभिव्यक्तिस्थानं यस्य तस्मै नमो धीमहि करवाम ।।२८।। प्रतिसर्गे प्रजासृष्टौ धीर्येषां तान् । दक्षाद्यैः रचितः सर्गः प्रतिसर्गः उदीरितः इति कालिकापुराणात्।।२९।। निगमम् उपदेशम्। नुपदवीं अनुगता पदवी अनुपदी ताम् 'कुगति प्रादयः' इति समास. मार्गानुसरणमेव कुरुत ॥३०॥ प्रायणमनुसरणं करोति स पुण्यबन्धुः पुण्यात्मा मरुद्भिः देवैः सह ॥३१॥ हे मारिष[3] आर्य ।।३२।। प्रतीचा अन्तर्वृत्तिमता लभ्यं प्रतीचीनम् । पश्चिमा व्यतीता यामिन्यः रात्रयो यथा न निवर्तन्ते तद्वत् ।।३३।३४।३५॥ असाधु अनुचितमकारि । यत् साधूनामर्भकाणाम् ।।३६।। विषयभोगत्यागादिह मोक्षानधिकारित्वाच्च परलोकेऽपि श्रेयसो विघातः ॥ ३७ ॥ निरनुक्रोशो निर्दयः । हरेः यशोहा त्वं पार्षद मध्ये कथं चरसि ॥ ३८ ॥ कातरा व्यग्राः ॥ ३९ ॥ कृन्तनं छेदकं यत् उपशमं वैराग्यं मन्यसे तदित्थं मतिचालने कृतेऽपि विरागो न स्यादित्यन्वयः । त्वया

१. इडाया वाण्याः पतिः ह्रस्वः पारस्करादित्वात्सुट् ।
२. आङ् पूर्वकराधयतेर्लङ् आङाटो सवर्णदीर्घः ।
३. मारिषः शाकमिद्यार्ये इति मेदिनी ।

नानुभूय न जानाति पुमान् विषयतीक्ष्णताम् । निर्विद्येत स्वयं तस्मान्न तथा भिन्नधीः परैः ॥४१
यन्नस्त्वं कर्मसंधानां साधूनां गृहमेधिनाम् । कृतवानसि दुर्मर्षं विप्रियं तव मर्षितम् ॥४२॥
तन्तुकृन्तन यन्नस्त्वमभद्रमचरः पुनः । तस्माल्लोकेषु ते मूढ न भवेद् भ्रमतः पदम् ॥४३॥

श्रीशुक उवाच

प्रतिजग्राह तद्बाढं नारदः साधुसम्मतः । एतवान् साधुवादो हि तितिक्षितेश्वरः स्वयम् ॥४४॥

इति श्रीमद्भागवते महापुराणे परमहंस्यां संहितायां षष्ठस्कन्धे नारदशापो नाम पञ्चमोऽध्यायः ॥५॥

अथ षष्ठोऽध्यायः

श्रीशुक उचाव

ततः प्राचेतसोऽसिक्न्यामनुनीतः स्वयम्भुवा । षष्टिं संजनयामास दुहितॄः पितृवत्सलाः ॥ १ ॥
दश धर्माय कायेन्दोर्द्विषट् त्रिणव दत्तवान् । भूताङ्गिरःकृशाश्वेभ्यो द्वे द्वे तार्क्ष्याय चापराः॥२॥
नामधेयान्यमूषां त्वं सापत्यानां च मे शृणु । यासां प्रसूतिप्रसवैर्लोका आपूरितास्त्रयः ॥ ३॥
भानुर्लम्बा ककुब्जामिर्विश्वा साध्या मरुत्वती । वसुर्मुहूर्ता संकल्पा धर्मपत्न्यः सुताञ् शृणु॥४॥
भानोस्तु देवऋषभ इन्द्रसेनस्ततो नृप । विद्योत आसील्लम्बायास्ततश्च स्तनयित्नवः ॥ ५ ॥
ककुभः सङ्कटस्तस्य कीकटस्तनयो यतः । भुवो दुर्गाणि जामेयः स्वर्गो नन्दिस्ततोऽभवत् ॥६॥

निमित्तभूतेन । मृषा केवलिना[1] मिथ्यादाम्भिकवेषेण ॥४०॥ नानुभूय अनुभवं विना । तीक्ष्णतां दुःखरूपताम् । तस्मात् दुःखहेतुत्वात् यथा विरज्येत तथा भिन्नधीः नेत्यन्वयः ॥४१॥ कर्मसन्धानां कर्मनिष्ठानां दुर्मर्षं दुःसहं विप्रियं प्रतिकूलं कृतवान् तत् मर्षितं सोढम् ॥ ४२ ॥ हे तन्तुकृन्तन ! वंशोच्छक । यत्पुनः अभद्रमनिष्टम् अचरः कृतवानसि तस्मात् भ्रमतस्ते पदं स्थानं न भवेत् ॥ ४३ ॥ ईश्वरः समर्थोऽपि सन् यत् तितिक्षेत सहनं कुर्यादिति यत् एतावानेव साधुशब्दार्थः बाढं तथाऽस्तु इति ॥ ४४ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे गूढार्थदीपिन्यां पञ्चमोऽध्यायः ।

षष्ठे तु दक्षकन्यानां वंशाः प्रोक्ताः पृथक् पृथक् ।
यत्राऽदितिसुतात् त्वष्टुर्विश्वरूपोऽभवत्सुतः ॥ १ ॥

ततः नारदशापानन्तरम् । प्राचेतसो दक्षः । असिक्न्यां पत्न्याम् । अनुनीतः सान्त्वितः ॥ १ ॥ काय कश्यपाय द्विषट्[2] त्रयोदश । इन्दोः सोमाय त्रिणव त्रिगुणिता नव सप्तविंशतिम् । अपरा अवशिष्टाश्चतस्त्रः तार्क्ष्याय कश्यपायैव दत्तवान् । 'तार्क्ष्यौ गरुडकश्यपौ इति कोशात् ॥२॥ मे मत्तः सकाशात् । प्रसूति प्रसवैः पुत्रपौत्रादिविस्तारैः ॥३॥ एवं धर्मपत्न्यः दश ॥४॥ ततो देवऋषभात् ॥५॥ यतः कीकटात् ।

---

१. केवलो जटाचिह्नादिरूपो मायिको वेषोऽस्यास्तीति तेन ।
२. द्विगुणिता षट् द्वादश यासु संख्यासु ताः त्रयोदश । त्रयोदश संख्यासु द्वादश संख्यायां अन्तर्भावात् । इह वैय्यधिकरण्ये मध्यमपदलोपी समासः ।

विश्वेदेवास्तु विश्वाया अप्रजांस्तान् प्रचक्षते । साध्यो गणस्तु साध्याया अर्थसिद्धिस्तु तत्सुतः ।७।
मरुत्वांश्च जयन्तश्च मरुत्वत्यां बभूवतुः । जयन्तो वासुदेवांश उपेन्द्र इति यं विदुः ॥ ८ ॥
मौहूर्तिका देवगणा मुहूर्तायाश्च जज्ञिरे । ये वै फलं प्रयच्छन्ति भूतानां स्वस्वकालजम् ॥ ९ ॥
संकल्पायाश्च संकल्पः कामः संकल्पजः स्मृतः । वसवोऽष्टौ वसोः पुत्रास्तेषां नामानि मे शृणु १०
द्रोणः प्राणो ध्रुवोऽर्कोऽग्निर्दोषो वसुर्विभावसुः द्रोणस्याभिमतेः पत्न्या हर्षशोकभयादयः ।११।
प्राणस्योर्जस्वती भार्या सह आयुः पुरोजवः । ध्रुवस्य भार्या धरणिरसूत विविधाः पुरः ॥१२॥
अर्कस्य वासना भार्या पुत्रास्तर्षादयः स्मृताः । अग्ने भार्या वसोर्धारा पुत्रा द्रविणकादयः ।१३।
स्कन्दश्च कृत्तिकापुत्रो ये विशाखादयस्ततः । दोषस्य शर्वरीपुत्रः शिशुमारो हरेः कला ॥१४॥
वसोराङ्गिरसीपुत्रो विश्वकर्माऽऽकृतीपतिः । ततो मनुश्चाक्षुषोऽभूद् विश्वे साध्या मनोः सुताः
विभावसोरसूतोषा व्युष्टं रोचिषमातपम् । पञ्चयामोऽथ भूतानि येन जाग्रति कर्मसु ॥१६॥
सरूपाऽसूत भूतस्य भार्या रुद्रांश्च कोटिशः । रैवतोऽजो भवो भीमो वाम उग्रो वृषाकपिः ॥१७।
अजैकपादहिर्बुध्न्यो बहुरूपो महानिति । रुद्रस्य पार्षदाश्चान्ये घोरा भूतविनायकाः ॥१८॥
प्रजापतेरङ्गिरसः स्वधा पत्नी पितॄनथ । अथर्वाङ्गिरसं वेदं पुत्रत्वे चाकरोत् सती ॥१९॥
कृशाश्वोऽर्चिषि भार्यायां धूम्रकेशमजीजनत् । धिषणायां वेदशिरो देवलं वयुनं मनुम् ॥२०॥
तार्क्ष्यस्य विनता कद्रूः पतङ्गी यामिनीति च । पतङ्ग्यसूत पतगान् यामिनी शलभानथ ॥२१॥
सुपर्णाऽसूत गरुडं साक्षाद् यज्ञेशवाहनम् । सूर्यसूतमनूरुं च कद्रूर्नागाननेकशः ॥२२॥
कृत्तिकादीनि नक्षत्राणीन्दोः पत्न्यस्तु भारत । दक्षशापात् सोऽनपत्यस्तासु यक्ष्मग्रहार्दितः॥
पुनः प्रसाद्य तं सोमः कला लेभे क्षये दिताः।२४।शृणु नामानि लोकानां मातॄणां शंकराणि च
अथ कश्यपपत्नीनां यत्प्रसूतमिदं जगत् ॥२५॥ अदितिर्दितिर्दनुः काष्ठा अरिष्टा सुरसा इला ।
मुनिः क्रोधवशा ताम्रा सुरभिः सरमा तिमिः ।२६।तिमेर्यादोगणा आसन् श्वापदाः सरमासुताः

दुर्गाणि दुर्गाभिमानिनो देवाः । जामेयः जाम्याः पुत्रः । ततः स्वर्गात् ॥ ६ ॥ तत्सुतः साध्यसुतः ॥ ७ ॥ उपेन्द्र इति कल्पभेदात् ॥८॥ भूतानाम् प्राणिनाम् । कालजं तत्तत् मुहूर्तजम् । वसोः धर्मपत्न्याः ॥१०॥ अभिमतिर्नाम पत्नी ॥ ११ ॥ सह आदयः त्रयः पुत्राः । पुरः पुराभिमानिनो देवाः ॥१२।१३॥ स्कन्दश्च अग्निपुत्रः । धात्रीत्वेन कृत्तिकापुत्रः मुख्यतस्तु शिवपुत्रः । कृत्तिका चाग्नेर्भार्या । ततः स्कन्दात् ॥१४॥ आकृतीपतिः शिल्पाचार्यः ॥ १५ ॥ अथ आतपात् पञ्चयामो दिवसः । प्रदोषप्रत्यूषयोर्दिवसावयवत्वात् अत एव रात्रिस्त्रियामा । जाग्रति कर्मसु प्रवर्तन्ते भूतानि प्राणिनः॥१६॥भूतस्य द्वे भार्ये तयोर्वंशमाह सरूपेति युग्मम् । अन्ये अन्यस्या जाताः । कोटिषु रैवतादयः ११ प्रधानाः॥१७॥स्वधा पत्नी पितॄन् पुत्रत्वेऽकरोत् । सती पत्नी च वेदं तदभिमानिनं पुरुषं च पुत्रत्वे ॥१९।२०॥ तार्क्ष्यस्य कश्यपस्य विनता सूतं सारथिम् ॥ २१॥ सुपर्णा विनतैव ॥२२॥ रोहिण्यामेव प्रेमातिशयेन अन्यासामुपेक्षणात् शापप्रवृत्तिः ॥२३॥ दिताः खण्डिताः ।'दोऽवखण्डने' इत्यस्मात्॥२४॥ तिमिरित्येवं त्रयोदश॥२५॥श्वापदा चतुष्पदाः व्याघ्रादयः॥२६॥

सुरभेर्महिषा गावो ये चान्ये द्विशफा नृप ।।२७।। ताम्रायाः श्येनगृध्राद्या मुनेरप्सरसां गणाः ।
दन्दशूकादयः सर्पा राजन् क्रोधवशात्मजाः ।।२८।। इलाया भूरुहाः सर्वे यातुधानाश्च सौरसाः
अरिष्टायाश्च गन्धर्वाः काष्ठाया द्विशफेतराः । सुता दनोरेकषष्टिस्तेषां प्राधानिकान् शृणु ॥
द्विमूर्धा शम्बरोऽरिष्टो हयग्रीवो विभावसुः । अयोमुखः शङ्कुशिराः स्वर्भानुः कपिलोऽरुणः।२९।
पुलोमा वृषपर्वा च एकचक्रोऽनुतापनः । धूम्रकेशो बिरूपाक्षो विप्रचित्तिश्च दुर्जयः ।।३०।।
स्वर्भानोः सुप्रभां कन्यामुवाह नमुचिः किल । वृषपर्वणस्तु शर्मिष्ठां ययातिर्नाहुषो बली ।।३१।।
वैश्वानरसुता याश्च चतस्रश्चारुदर्शनाः । उपदानवी हयशिरा पुलोमा कालका तथा ।।३२।।
उपदानवीं हिरण्याक्षः क्रतुर्हयशिरां नृप । पुलोमां कालकां च द्वे वैश्वानरसुते तु कः ।।३३।।
उपयेमेऽथ भगवान् कश्यपो ब्रह्मचोदितः । पौलोमाः कालकेयाश्च दानवा युद्धशालिनः ।।३४।।
तयोः षष्टिसहस्राणि यज्ञघ्नांस्ते पितुः पिता । जघान स्वर्गतो राजन्नेक इन्द्रप्रियंकरः ।।३५।।
विप्रचित्तिः सिंहिकायां शतं चैकमजीजनत् । राहुज्येष्ठं केतुशतं ग्रहत्वं य उपागतः ।।३६।।
अथातः श्रूयतां वंशो योऽदितेरनुपूर्वशः । यत्र नारायणो देवः स्वांशेनावतरद्विभुः ।।३७।।
विवस्वानर्यमा पूषा त्वष्टाथ सविता भगः । धाता विधाता वरुणो मित्रः शक्र उरुक्रमः ।।३८।।
विवस्वतः श्राद्धदेवं संज्ञाऽसूयत वै मनुम् । मिथुनं च महाभागा यमं देवं यमीं तथा ।
सैव भूत्वाथ वडवा नासत्यौ सुषुवे भुवि ।।३९।।
छाया शनैश्चरं लेभे सावर्णि च मनुं ततः । कन्यां च तपतीं या वै वव्रे संवरणं पतिम्।।४०।।
अर्यम्णो मातृका पत्नी तयोश्चर्षणयः सुताः । यत्र वै मानुषी जातिर्ब्रह्मणा चोपकल्पिता।४१।
पूषाऽनपत्यः पिष्टादो भग्नदन्तोऽभवत्पुरा । योऽसौ दक्षाय कुपितं जहास विवृतद्विजः ।।४२।।

द्विशफाः द्विखुराः ॥ २७ ॥ सौरसाः सुरसासुताः ॥ २८ ॥ द्विशफेतरा एकखुराः अश्वगर्दभादयः । प्राधानिकान् मुख्यानष्टादश ।। २९।३०।३१॥ नमुचिर्दैत्यः । नाहुषो नहुषपुत्रः ॥३२॥ वैश्वानरो दनोः पुत्रः तस्य सुताः ।।३३॥ कः कश्यपः उपयेमे विवाहितवान् इत्यन्वयः । उपदानवीमिति सार्द्धम् ॥ ३४ ॥ पौलोमा इति सार्द्धम् । तयोः पुलोमाकालकयोः निवातकवचसंज्ञकाः जातास्तान् ते पितामहोऽर्जुन एक एव जघान ॥ ३५ ॥ यो राहुः केतुभिः सहितो ग्रहत्वमुपागतः ॥ ३६ ॥ स्वांशेन वामनरूपेण ॥ ३७ ॥ विवस्वानित्यादयः द्वादशादित्याः ।।३८।।विवस्वत इति सार्द्धम् । यमीं यमुनाम् । [1]नासत्यौ अश्विनौकुमारौ सुषुवे॥ ३९।।छाया द्वितीया पत्नी लेभे सुषुवे । तपतीं कन्यां च या संवरणं राजानम् पतिम् ।।४०।।तयोरिति कर्तरि षष्ठी ताभ्यामित्यर्थः । [2]चर्षणयः दर्शनकर्तारः । यत्र येषु । परमात्मज्ञानोपयोगित्वेन मानुषी जातिः ब्राह्मणत्वादिवर्गकल्पना कृता । 'पुरुषत्वे चाविस्तरामात्मा' इति श्रुतेः ॥४१॥ पुरा दक्षयज्ञे । दक्षोपरि

१. न असत्यमायुर्वेदविषयकं ज्ञानं ययोस्तौ । नैकधावन्नशब्देन सह समासः ।

२. चर्षणिशब्दस्य कृताकृतज्ञानवत्त्ववाचकत्वेन कृताकृतयोश्च कर्ममोक्षार्थवाचित्वात् चर्षणिशब्दः दर्शनकर्तृत्वे पर्यवस्यति । कृषेरौणादिके 'कृषेश्च चः इति अनिप्रत्यये । ककारस्य चकारादेशे चायं शब्दः निष्पन्नो भवति ।

त्वष्टुर्दैत्यानुजा भार्या रचना नाम कन्यका। संनिवेशस्तयोर्जज्ञे विश्वरूपश्च वीर्यवान् ॥४३॥
तं वव्रिरे सुरगणा स्वस्रीयं द्विषतामपि। विमतेन परित्यक्ता गुरुणाऽऽङ्गिरसेन यत् ॥४४॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां षष्ठस्कन्धे षष्ठोऽध्यायः॥ ६ ॥

अथ सप्तमोऽध्यायः

राजोवाच

कस्य हेतोः परित्यक्ता आचार्येणात्मनः सुराः। एतदाचक्ष्व भगवञ्छिष्याणामक्रमं गुरौ ॥१॥

श्रीशुक उवाच

इन्द्रस्त्रिभुवनैश्वर्यमदोल्लङ्घितसत्पथः। मरुद्भिर्वसुभी रुद्रैरादित्यैर्ऋभुभिर्नृप ॥ २ ॥
विश्वेदेवैश्च साध्यैश्च नासत्याभ्यां परिश्रितः। सिद्धचारणगन्धर्वैर्मुनिभिर्ब्रह्मवादिभिः ॥ ३ ॥
विद्याधराप्सरोभिश्च किन्नरैः पतगोरगैः। निषेव्यमाणो मघवान् स्तूयमानश्च भारत ॥ ४ ॥
उपगीयमानो ललितमास्थानाध्यासनाश्रितः। पाण्डुरेणातपत्रेण चन्द्रमण्डलचारुणा ॥ ५ ॥
युक्तश्चान्यैः पारमेष्ठ्यैश्चामरव्यजनादिभिः। विराजमानः पौलोम्या सहार्धासनया भृशम् ॥६॥
स यदा परमाचार्यं देवानामात्मनश्च ह। नाभ्यनन्दत सम्प्राप्तं प्रत्युत्थानासनादिभिः ॥ ७ ॥
वाचस्पतिं मुनिवरं सुरासुरनमस्कृतम्। नोच्चचालासनादिन्द्रः पश्यन्नपि सभागतम् ॥ ८ ॥
ततो निर्गत्य सहसा कविराङ्गिरसः प्रभुः। आययौ स्वगृहं तूर्णीं विद्वान् श्रीमदविक्रियाम् ॥९॥
तर्ह्येव प्रतिबुध्येन्द्रो गुरुहेलनमात्मनः। गर्हयामास सदसि स्वयमात्मानमात्मना ॥१०॥

कुपितं हरं जहास। विवृतेति। अट्टहासपूर्वकं प्रकटितदन्तः सन् ॥ ४२ ॥ तयोः त्वष्टृरचनाम्यां पुत्रद्वयम् ॥४३॥ यत् यदा विगतेन अपमानितेन अङ्गिरसः पुत्रेण बृहस्पतिना परित्यक्ता तदा दौहित्रं भागिनेयमपि तं वव्रे गत्यन्तराभावात् ॥ ४४ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे गूढार्थदीपिन्यां षष्ठोऽध्यायः।

सप्तमे गुरुणा त्यक्ता सुराः दैत्यपराजिताः।
वव्रिरे ब्रह्मणो मन्त्रात् विश्वरूपं पुरोहितम् ॥ १ ॥

गुरौ अक्रमम् अपराधम्। एतदिति सामान्ये नपुंसकम्। आचक्ष्व कथय ॥ १ ॥ हे भारत परीक्षित्। स इन्द्रो यदा सम्प्राप्तं समागतमपि वाचस्पतिं पश्यन्नपि नाभ्यनन्दत् नाहतवान् तदा स सहसा झटिति ततो निर्गत्य तूर्णीं स्वगृहमाययावित्यष्टानामेकान्वयः। कथंभूतः इन्द्रः। त्रिभुवनस्य यत् ऐश्वर्यं तेन उल्लङ्घितः सतां पन्थाः शिष्टाचारादिर्येन सः। ऋभुभिः ऋभुसंज्ञकदेवैः ॥ २ ॥ परिश्रितः परिवेष्टितः ॥ ३ ॥ पतगाः पक्षिणः ॥ ४ ॥ आस्थानं सभा तत्र यत् सिंहासनं तत् आश्रित्य स्थितः। पाण्डुरेण श्वेतेन छत्रेण युक्तः। पारमेष्ठ्यैः महाराजचिह्नैः। अर्द्धमासनं यस्यास्तया। अर्धे वामभागे वा पौलोम्या इन्द्राण्या ॥ ५।६।७ ॥ श्रीनिमित्तो यो मदः तस्य विकारम् विद्वान् जानन्। हेत्याश्चर्ये। अहो ऐश्वर्यं सात्त्विकदेवानामपि बुद्धिं भ्रंशयति ॥ ८।९ ॥ आत्मनः स्वस्मात् हेलनमपमानम्। गर्हयामास

अहो बत ममाऽसाधु कृतं वै दभ्रबुद्धिना। यन्मयैश्वर्यमत्तेन गुरुः सदसि कात्कृतः ॥११॥
को गृध्येत् पण्डितो लक्ष्मीं त्रिविष्टपपतेरपि। ययाऽहमासुरं भावं नीतोऽद्य विबुधेश्वरः ॥१२॥
ये पारमेष्ठ्यं धिषणमधितिष्ठन् न कंचन। प्रत्युत्तिष्ठेदिति ब्रूयुर्धर्मं ते न परं विदुः ॥ १३ ॥
तेषां कुपथदेष्टॄणां पततां तमसि ह्यधः। ये श्रद्दध्युर्वचस्ते वै मज्जन्त्यश्मप्लवा इव ॥१४॥
अथाहममराचार्यमगाधधिषणं द्विजम्। प्रसादयिष्ये निशठः शीर्ष्णा तच्चरणं स्पृशन् ॥१५॥
एवं चिन्तयतस्तस्य मघोनो भगवान् गृहात्। बृहस्पतिर्गतोऽदृष्टां गतिमध्यात्ममायया ॥१६॥
गुरोर्नाधिगतः संज्ञां परीक्षन् भगवान् स्वराट्। ध्यायन् धिया सुरैर्युक्तः शर्म नालभतात्मनः१७
तच्छ्रुत्वैवासुराः सर्व आश्रित्यौशनसं मतम्। देवान् प्रत्युद्यमं चक्रुर्दुर्मदा आततायिनः ॥१८॥
तैर्विसृष्टेषुभिस्तीक्ष्णैर्निर्भिन्नाङ्गोरुबाहवः। ब्रह्माणं शरणं जग्मुः सहेन्द्रा नतकन्धराः ॥१९॥
तांस्तथाभ्यर्दितान् वीक्ष्य भगवानात्मभूरजः। कृपया परया देव उवाच परिसान्त्वयन् ॥२०॥

ब्रह्मोवाच

अहो बत सुरश्रेष्ठा ह्यभद्रं वः कृतं महत्। ब्रह्मिष्ठं ब्राह्मणं दान्तमैश्वर्यान्नाभ्यनन्दत ॥२१॥
तस्यायमनयस्यासीत् परेभ्यो वः पराभवः। प्रक्षीणेभ्यः स्ववैरिभ्यः समृद्धानां च यत्सुराः ॥२२॥
मघवन् द्विषतः पश्य प्रक्षीणान् गुर्वतिक्रमात्। सम्प्रत्युपचितान् भूयः काव्यमाराध्य भक्तितः।
आददीरन् निलयनं ममापि भृगुदेवताः ॥ २३ ॥
त्रिविष्टपं किं गणयन्त्यभेद्यमन्त्रा भृगूणामनुशिक्षितार्थाः।
न विप्रगोविन्दगवीश्वराणां भवन्त्यभद्राणि नरेश्वराणाम् ॥२४॥

निन्दितवान् ॥ १० ॥ मम कृतं कर्म असाधु अनुचितम्। यत् मया गुरुः कात्कृतः[1] तिरस्कृतः। दभ्रा अल्पा। कृतं निष्ठान्तं वा ॥ ११ ॥ गृध्येत् अभिकाङ्क्षेत। त्रिविष्टपं स्वर्गः। विबुधानां सात्त्विकानां देवानामधीश्वरोऽपि ॥१२॥ परमेष्ठिनोऽपि धिषणं आसनम्। परं श्रेष्ठम् ॥१३॥ कुपथं दिशन्ति उपदिशन्तीति तेषां वचः ये तेऽपि मज्जन्तीत्यन्वयः। अश्ममयः पाषाणमयः प्लवो नौका येषां ते यथा ॥१४॥ अगाधा गम्भीरा धिषणा बुद्धिर्यस्य तम्। निशठः निष्कपटः सन् ॥ १५ ॥ अदृश्यामन्तर्धानलक्षणाम्। मायया योगसामर्थ्येन ॥ १६ ॥ परीक्षन् परित ईक्षमाणोऽपि संज्ञां स्थानज्ञानं न प्राप्तः सन् शर्म सुखं नेत्यन्वयः ॥ १७ ॥ औशनसं शुक्राचार्यसम्मतिं। आततायिनो गृहीतशस्त्राः ॥ १८ ॥ विसृष्टेषुभिः प्रक्षिप्तबाणैर्निर्भिन्नानि छिन्नानि अङ्गानि शिरांसि ऊरवो बाहवश्च येषां ते। सहेन्द्रा देवाः ॥ १९ ॥ अभ्यर्दितान् पीडितान्। आत्मनः श्रीनारायणाद्भवतीति आत्मभूः ब्रह्मा ॥ २० ॥ बत खेदे। वो युष्माभिः महत् अभद्रं अनुचितं कृतम्। यत् यस्मात् दान्तं जितेन्द्रियम् ॥२१॥ हे सुराः। समृद्धानामपि वो युष्माकं परेभ्योऽन्येभ्य सकाशात् यत् यः पराभवः स एव तस्यैव अनयस्य गुरोरपमानस्य अयं विपाकः फलम् अस्ति। केभ्यः स्ववैरिभ्यः ॥ २२ ॥ पूर्वं प्रक्षीणानपि काव्यं शुक्राचार्यमाराध्य वृद्धिं गतान् द्विषतः पश्येत्यन्वयः। सम्प्रति ते ममापि निलयं गृह्णीयुः यतो भृगवः देवताः सहायका येषां ते ॥ २३ ॥ अभेद्यो मन्त्रो[2] मन्त्रणा येषां ते। कुतः।

---

१. कुत्सितः कृतः कत्कृतः स एव कात्कृतः पृषोदरादिः। २. 'षड् गुणा नीतिवेदिनाम्' इति वचनात्। षड् गुणाश्च सन्धिविग्रहयानासनद्वैधीभावसमाश्रयाख्याः ज्ञेयाः।

तद्विश्वरूपं भजताशु विप्रं तपस्विनं त्वाष्ट्रमथात्मवन्तम् ।
सभाजितोऽर्थान् स विधास्यते वो यदि क्षमिष्यध्वमुतास्य कर्म ॥२५॥

श्रीशुक उवाच

त एवमुदिता राजन् ब्रह्मणा विगतज्वराः । ऋषिं त्वाष्ट्रमुपव्रज्य परिष्वज्येदमब्रुवन् ॥२६॥

देवा ऊचुः

वयं तेऽतिथयः प्राप्ता आश्रमं भद्रमस्तु ते । कामः सम्पाद्यतां तात पितॄणां समयोचितः ॥२७॥
पुत्राणां हि परो धर्मः पितृशुश्रूषणं सताम् । अपि पुत्रवतां ब्रह्मन् किमुत ब्रह्मचारिणाम्॥२८॥
आचार्यो ब्रह्मणो मूर्तिः पिता मूर्तिः प्रजापतेः । भ्राता मरुत्पतेर्मूर्तिर्माता साक्षात् क्षितेस्तनुः॥
दयाया भगिनी मूर्तिर्धर्मस्यात्माऽतिथिः स्वयम् । अग्नेरभ्यागतो मूर्तिः सर्वभूतानि चात्मनः ३०
तस्मात् पितॄणामार्तानामार्ति परपराभवम् । तपसाऽपनयंस्तात संदेशं कर्तुमर्हसि ॥३१॥
वृणीमहे त्वोपाध्यायं ब्रह्मिष्ठं ब्राह्मणं गुरुम् । यथाञ्जसा विजेष्यामः सपत्नांस्तव तेजसा ॥३२॥
न गर्हयन्ति ह्यर्थेषु यविष्ठाङ्घ्र्यभिवादनम् । छन्दोभ्योऽन्यत्र न ब्रह्मन् वयो ज्यैष्ठ्यस्य कारणम्

ऋषिरुवाच

अभ्यर्थितः सुरगणैः पौरोहित्ये महातपाः । स विश्वरूपस्तानाह प्रसन्नः श्लक्ष्णया गिरा ॥३४॥

विश्वरूप उवाच

विगर्हितं धर्मशीलैर्ब्रह्मवर्चउपव्ययम् । कथं नु मद्विधो नाथा लोकेशैरभियाचितम् ।
प्रत्याख्यास्यति तच्छिष्यः स एव स्वार्थ उच्यते ॥३५॥

अनुशिक्षितः पाठितोऽर्थः नीतिशास्त्रं येषां तेषां शुक्राचार्याणां शिष्याः किं स्वर्गं गणयन्ति नैवेत्यन्वयः । यतस्तेषामभद्राणि पराजयादीनि न भवन्ति । कुतः । विप्रादयः ईश्वरा ईश्वरवत्पूज्या अनुग्राहकाश्च येषां तेषां तथाभूतानाम्॥२४॥तत्तस्मात् । अथ अविलम्बमेव । आत्मवन्तं जितेन्द्रियं समर्थं त्वष्टुः पुत्रं विश्वरूपं गुरुत्वेन भजत स्वीकुरुत । सभाजितः सत्कृतः स वो युष्माकम् अर्थान् मनोरथान् विधास्यते । यदि अस्य कर्म असुरपक्षपातरूपम् ॥२५॥एवमुक्ताः ते देवाः । विगतज्वरा निवृत्तसंतापाः॥२६॥कामः मनोरथः सम्पाद्यताम् । समये आपत्काले ॥२७॥पुत्रवतामपि सतां पुत्राणां धर्मः । ब्रह्मचारिणां पुत्राणा धर्म इति किमुत वक्तव्यमित्यर्थः ॥२८॥ ब्रह्मणो वेदस्य । मरुत्पतेरिन्द्रस्य । तनुः मूर्तिः ॥२९॥ आत्मा मूर्तिः । स्वयं साक्षात् ।[१] सर्वभूतानि स्थावरजङ्गमानि आत्मनः श्रीविष्णोः मूर्तयः । अग्ने. अभ्यागतः॥३०॥परामवरूपाम् आर्तिम् । अपनयन् दूरीकुर्वन् । संदेशं प्रार्थितम्॥३१॥त्वा त्वाम् । अञ्जसा सुखेन । सपत्नान् शत्रून् तव तेजसा॥३२॥ अर्थेषु प्रयोजननिमित्तम् यविष्ठानां कनिष्ठानामपि । यतो हि छन्दोभ्योऽन्यत्र वेदज्ञानं विना ज्येष्ठत्वस्य कारणं वयो न भवति किन्तु वेदज्ञत्वमेव॥३३॥श्लक्ष्णया मधुरया॥३४॥विगर्हितमिति सार्द्धम् । ब्रह्मवर्च[२]

---

१. अतिथिः अज्ञातपूर्वः । अभ्यागतो ज्ञातपूर्व इति भेदः ।
२. ब्रह्महस्तिभ्यां वर्चसः' इति समासान्ताभाव आर्षः ।

अकिंचनानां हि धनं शिलोञ्छनं तेनेह निर्वर्तितसाधुसत्क्रियः ।
कथं विगर्ह्यं नु करोम्यधीश्वराः पौरोधसं हृष्यति येन दुर्मतिः ॥३६॥
तथापि न प्रतिब्रूयां गुरुभिः प्रार्थितं कियत् । भवतां प्रार्थितं सर्वं प्राणैरर्थैश्च साधये ॥३७॥

श्रीशुक उवाच

तेभ्य एवं प्रतिश्रुत्य विश्वरूपो महातपाः । पौरोहित्यं वृतश्चक्रे परमेण समाधिना ॥३८॥
सुरद्विषां श्रियं गुप्तामौशनस्यापि विद्यया । आच्छिद्यादान्महेन्द्राय वैष्णव्या विद्यया विभुः॥३९॥
यया गुप्तः सहस्राक्षो जिग्येऽसुरचमूर्विभुः । तां प्राह स महेन्द्राय विश्वरूप उदारधीः ॥४०॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां षष्ठस्कन्धे सप्तमोऽध्यायः ॥ ७ ॥

अथाष्टमोऽध्यायः

राजोवाच

यया गुप्तः सहस्राक्षः सवाहान् रिपुसैनिकान् । क्रीडन्निव विनिर्जित्य त्रिलोक्या बुभुजे श्रियम्॥१॥
भगवंस्तन्ममाख्याहि वर्म नारायणात्मकम् । यथाऽऽततायिनः शत्रून् येन गुप्तोऽजयन्मृधे ॥२॥

श्रीशुक उवाच

वृतः पुरोहितस्त्वाष्ट्रो महेन्द्रायानुपृच्छते । नारायणाख्यं वर्माह तदिहैकमनाः शृणु ॥ ३ ॥

विश्वरूप उवाच

धौताङ्घ्रिपाणिराचम्य सपवित्र उदङ्मुखः । कृतस्वाङ्गकरन्यासो मन्त्राभ्यां वाग्यतः शुचिः॥

उपव्ययं ब्रह्मतेजोनाशकम् । मद्विधः तेषां भवतां शिष्यः शिक्षणार्हः सन् कथं नु प्रत्याख्यास्यति न कथमपि । यतः स एवं प्रत्याख्यानाभाव एव शिष्यस्य स्वार्थः मुख्यकर्तव्यम् अस्ति ॥३५॥ अकिञ्चनानां परिग्रहशून्यानाम् । इह गृहाश्रमे निर्वर्तिता सम्पादिता साधूनां सत्क्रिया सत्कारः साधु सम्यक् सत्क्रिया अग्निहोत्रादिलक्षणा वा येन सोऽहं निन्द्यं कर्म पौरोहित्यं कथं करोमि शिलेति क्षेत्रहट्टपतितान्नकणोपादानम् ॥३६॥यद्यपि सर्वथा निन्द्यमेतत् तथापि न प्रतिब्रूयां न प्रत्याख्यास्ये । कियदेतत् अत्यल्पमेतत्॥३७॥तेभ्यो देवेभ्यः प्रतिश्रुत्य प्रतिज्ञाय । समाधिना चित्तैकाग्र्येण ॥३८॥ उशनसि इयं विद्यमाना औशनसी तया गुप्तां श्रियं आच्छिद्य आकृष्य विद्या नारायणकवचरूपा तया॥३९॥यया जिग्ये तां प्राहेत्यन्वयः ॥४०॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे गूढार्थदीपिन्यां सप्तमोऽध्यायः ।

अष्टमे विश्वरूपात्तत्कवचं प्राप्य वासवः ।
जित्वा शत्रून् मृधे सर्वान् लेभे त्रैलोक्यसम्पदम् ॥

यया विद्यया ॥ १ ॥ आततायिनः हन्तुमिच्छून् । मृधे संग्रामे ॥ २ ॥ त्वाष्ट्रः त्वष्टुः पुत्रो विश्वरूपः ॥ ३ ॥ धौतेति सार्द्धम् । धौतौ प्रक्षालितौ अङ्घ्री पाणी च येन सः । पवित्राभ्यां कुशरचिताभ्यां सहितः । मन्त्राभ्याम् अष्टाक्षरद्वादशाक्षराभ्याम् । वाग्यतो मौनी । शुचिः कृतस्नानः ।

नारायणमयं वर्म सन्नह्येद् भय आगते ॥ ४ ॥ पादयोर्जानुनोरूर्वोरुदरे हृद्यथोरसि ।
मुखे शिरस्यानुपूर्व्यादोङ्कारादीनि विन्यसेत् ॥५॥ ॐ नमो नारायणायेति विपर्ययमथापि वा
करन्यासं ततः कुर्याद् द्वादशाक्षरविद्यया ॥ ६ ॥ प्रणवादियकारान्तमङ्गुल्यङ्गुष्ठपर्वसु ॥
न्यसेद् हृदय ओङ्कारं विकारमनु मूर्धनि । षकारं तु भ्रुवोर्मध्ये णकारं शिखया दिशेत् ॥
वेकारं नेत्रयोर्युञ्ज्यान्नकारं सर्वसंधिषु ॥ ७ ॥ मकारमस्त्रमुद्दिश्य मन्त्रमूर्तिर्भवेद् बुधः ॥
सविसर्गं फडन्तं तत् सर्वदिक्षु विनिर्दिशेत् । ॐ विष्णवे नम इति ॥ ८ ॥
आत्मानं परमं ध्यायेद् ध्येयं षट्शक्तिभिर्युतम् । विद्यातेजस्तपोमूर्तिमिमं मन्त्रमुदाहरेत् ॥९॥

ॐ हरिर्विदध्यान्मम सर्वरक्षां न्यस्ताङ्घ्रिपद्मः पतगेन्द्रपृष्ठे ।
दरारिचर्मासिगदेषुचापपाशान् दधानोऽष्टगुणोऽष्टबाहुः ॥ १० ॥
जलेषु मां रक्षतु मत्स्यमूर्तिर्यादोगणेभ्यो वरुणस्य पाशात् ।
स्थलेषु मायावटुवामनोऽव्यात् त्रिविक्रमः खेऽवतु विश्वरूपः ॥ ११ ॥

सन्नह्येत् बध्नीयात् जपेदित्यर्थः । [1]नारायणमयम् । कृतौ स्वाङ्गकरन्यासौ येन सः ॥४।५।६॥ न्यसेदिति सार्द्धद्वयम् । विनिर्दिशेत् दिग्बन्धं कुर्यात् ॥ ७।८ ॥ विपर्ययमथापि वा । उत्पत्तिन्यासं संहारन्यासं वा कुर्यादित्यर्थः । क्रमेणोत्पत्तिराख्याता संहारो व्युत्क्रमेण हि । व्युत्क्रमेण वैपरीत्येन ॥७।८॥ ध्येयं ध्यातुं योग्यं परमात्मानं ध्यायेत् । शक्तिभिः ऐश्वर्यादिभिः षड्भिः । विद्येति मन्त्रविशेषणम् । विद्यादीनां मूर्तिमाश्रयमधिष्ठानं तद्दातारमित्यर्थः । उदाहरेत् कण्ठीकृत्य पठेत् ॥९॥ सर्वदेशे सर्वकाले । पतगेन्द्रः पक्षिराजो गरुडः तस्य पृष्ठे न्यस्ते अङ्घ्रिपद्मे येन सः । दरः शंखः । अरि चक्रम् । अष्टौ गुणा अणिमादयो यस्य सः । चर्म (ढाल) इति ॥ १० ॥ यादांसि जलजन्तवः तेभ्यः पाशाच्च । यद्वा । यादोगणा एव पाशस्तस्मात् । मायया कृपया । त्रयो विक्रमाः पादविक्षेपा यस्य सः । विश्वरूपो विराड्रूपः ॥११॥

---

१. अष्टाक्षरन्यासो यथा—ॐ नमो नारायणाय ॐ ॐ ॐ पादयोः ॐ न ॐ जानुनोः । ॐ मो ॐ ऊर्वोः ॐ ना ॐ उदरे । ॐ रा॒ॐ हृदि । ॐ य ॐ उरसि । ॐ णा ॐ मुखे ॐ य ॐ शिरसि । इत्युत्पत्तिन्यासः । ॐ य ॐ शिरसि । ॐ णा ॐ मुखे । ॐ य ॐ उरसि । ॐ रा ॐ हृदि । ॐ ना ॐ उदरे । ॐ मो ॐ ऊर्वोः । ॐ न ॐ जानुनोः । ॐ ॐ ॐ पादयोः । इति संहारन्यासः । द्वादशाक्षरमन्त्रेण करन्यासो यथा—ॐ नमो भगवते वासुदेवाय । ॐ ॐ ॐ दक्षिणतर्जन्याम् ॐ न ॐ दक्षिणमध्यमायाम् ॐ मो ॐ दक्षिणानामिकायाम् । ॐ भ ॐ दक्षिणकनिष्ठायाम् । ॐ ग ॐ वामकनिष्ठायाम् । ॐ व ॐ वामानामिकायाम् । ॐ ते ॐ वाममध्यमायाम् । ॐ वा ॐ वाम तर्जन्याम् । ॐ सु ॐ दक्षिणाङ्गुष्ठोर्ध्वपर्वणि । ॐ दे ऊ दक्षिणाङ्गुष्ठाधःपर्वणि । ॐ वा ॐ वामाङ्गुष्ठोर्ध्वपर्वणि । ॐ य ॐ वामाङ्गुष्ठाधःपर्वणि । षडक्षरेऽपि प्रणवसम्पुटितमेव न्यसेत् । ॐ विष्णवे नमः । अनेन हृदयादिन्यासः—तथाहि ॐ ॐ ॐ हृदये । ॐ वि० ॐ मूर्धनि । ॐ ष ॐ भ्रुवोः । ॐ ण ॐ शिखायाम् । ॐ वे ॐ नेत्रयोः । ॐ न ॐ सर्वाङ्गुलिसन्धिषु । ॐ म ॐ सर्वदेहं भगवत्सन्निधानयुक्तं ध्यायेत् । ततो मः अस्त्राय फट् इति दिग्बन्धं कुर्यात् ।

---

१. तत आगत इत्यधिकारे मयट् ।

दुर्गेष्वटव्याजिमुखादिषु प्रभुः पायान्नृसिंहोऽसुरयूथपारिः ।
विमुञ्चतो यस्य महाट्टहासं दिशो विनेदुर्न्यपतंश्च गर्भाः ॥ १२ ॥
रक्षत्वसौ माध्वनि यज्ञकल्पः स्वदंष्ट्रयोन्नीतधरो वराहः ।
रामोऽद्रिकूटेष्वथ विप्रवासे सलक्ष्मणोऽव्याद् भरताग्रजोऽस्मान् ॥ १३ ॥
मामुग्रधर्मादखिलात् प्रमादान्नारायणः पातु नरश्च हासात् ।
दत्तस्त्वयोगादथ योगनाथः पायाद् गुणेशः कपिलः कर्मबन्धात् ॥ १४ ॥
सनत्कुमारोऽवतु कामदेवाद्धयशीर्षा मां पथि देवहेलनात् ।
देवर्षिवर्यः पुरुषार्चनान्तरात् कूर्मो हरिर्मां निरयादशेषात् ॥ १५ ॥
धन्वन्तरिर्भगवान् पात्वपथ्याद् द्वन्द्वाद् भयादृषभो निर्जितात्मा ।
यज्ञश्च लोकादवताज्जनान्ताद् बलो गणात् क्रोधवशादहीन्द्रः ॥ १६ ॥
द्वैपायनो भगवानप्रबोधाद् बुद्धस्तु पाखण्डगणात् प्रमादात् ।
कल्किः कलेः कालमलात्प्रपातु धर्मावनायोरुकृतावतारः ॥ १७ ॥
मां केशवो गदया प्रातरव्याद् गोविन्द आसङ्गवमात्तवेणुः ।
नारायणः प्राह्ण उदात्तशक्तिर्मध्यन्दिने विष्णुररीन्द्रपाणिः ॥ १८ ॥
देवोऽपराह्णे मधुहोग्रधन्वा सायं त्रिधामाऽवतु माधवो माम् ।
दोषे हृषीकेश उतार्धरात्रे निशीथ एकोऽवतु पद्मनाभः ॥ १९ ॥

दुर्गेषु दुर्गमस्थानेषु । अटवीषु वनेषु आजिमुखेषु युद्धाग्रभागेषु च । असुरयूथपो हिरण्यकशिपुः । विमुञ्चतः सतः गर्भा असुरस्त्रीणाम् ॥१२॥ असौ वराहः मा मां रक्षतु । यज्ञैः अवयवरूपैः कल्प्यते निरूप्यते इति । उन्नीता उद्धृता धरा येन सः । रामः परशुरामः विप्रवासे देशान्तरे । यज्ञाः कल्पाः फलदाने समर्थाः यस्माद्वा ॥ १३ ॥ उग्रधर्मात् अभिचारादिप्रयोगात् । प्रमादात् विहिताकरणात् । हासात् गर्वात् । अयोगात् योगविघ्नात् । गुणेशः गुणनियन्ता ॥ १४ ॥ हेलनात् अनादरात् । पुरुषार्चने विष्णुपूजने अन्तरात् छिद्रात् द्वात्रिंशदपराधात् । निरयात् नरकात् ॥१५॥ अपथ्यात् कुपथ्यात् । द्वन्द्वात् शीतोष्णादिजनितान् । यज्ञो यज्ञावतारः । लोकापवादात् । जनान्तात् नरसंहारात् । जननिमित्तो योऽन्तः उपघातः तस्मात् वा । बलभद्रः । गणात् क्रोधवशसंज्ञकसर्पाणाम् । अवतु अहीन्द्रः शेषः ॥१६॥ अप्रबोधात् अज्ञानात् । पाखण्डप्रवर्तकत्वात् स एव । कालमलात् पापपुंजात् । धर्मावनाय धर्मरक्षणाय उरवो बहवः कृता अवताराः येन सः । यद्वा । उरु प्रपातु भूयो भूयो रक्षत्वित्यर्थः ॥ १७ ॥ प्रातरारभ्य पञ्चभिः पञ्चभिर्घटिकाभिरहोरात्रविभागं कृत्वा तेषु एकैकां मूर्ति प्रकल्प्य रक्षाप्रार्थनम् । प्रातः दिनस्य पञ्चमघटिकापर्यन्तम् ।[1] आसङ्गवम् । षड्घटिकामारभ्य दशघटिकापर्यन्तम् । एवमग्रे सर्वत्र पञ्च पञ्च घटिका योजनीयाः । ११ घटिकामारभ्य १५ घटिकापर्यन्तं प्राह्णः । षोडशतः विंशतिपर्यन्तं मध्यन्दिनम् । अरीन्द्रयाणिः चक्रहस्तः ॥ १८ ॥ २१ घटिकातः २५ पर्यन्तमपराह्णः । तत्र मधुहा मधुसूदनः उग्रं धनुर्यस्य सः । २६ घटिकातः ३० घटिकापर्यन्तं सायं तत्र त्रिधामा सत् चित् आनन्दा

---

१. यद्वा । गोष्ठेभ्यो निर्गत्य यदैकत्र गावः संयुज्यन्ते स काल आसङ्गवः संगवमभिव्याप्य उदयानन्तरकालः ।

श्रीवत्सधामाऽपररात्र ईशः प्रत्यूष ईशोऽसिधरो जनार्दनः ।
दामोदरोऽव्यादनुसंध्यं प्रभाते विश्वेश्वरो भगवान् कालमूर्तिः ।। २० ।।
चक्रं युगान्तानलतिग्मनेमि भ्रमत् समन्ताद् भगवत्प्रयुक्तम् ।
दन्दग्धि दन्दग्ध्यरिसैन्यमाशु कक्षं यथा वातसखो हुताशः ।। २१ ।।
गदेऽशनिस्पर्शनविस्फुलिङ्गे निष्पिण्ढि निष्पिण्ढ्यजितप्रियासि ।
कूष्माण्डवैनायकयक्षरक्षोभूतग्रहांश्चूर्णय चूर्णयाऽरीन् ।। २२ ।।
त्वं यातुधानप्रमथप्रेतमातृपिशाचविप्रग्रहघोरदृष्टीन् ।
दरेन्द्र विद्रावय कृष्णपूरितो भीमस्वनोऽरेर्हृदयानि कम्पयन् ।। २३ ।।
त्वं तिग्मधारासिवरारिसैन्यमीशप्रयुक्तो मम छिन्धि छिन्धि ।
चक्षूंषि चर्मन् छतचन्द्र छादय द्विषामघोनां हर पापचक्षुषाम् ।। २४ ।।

यन्नो भयं ग्रहेभ्योऽभूत् केतुभ्यो नृभ्य एव च । सरीसृपेभ्यो दंष्ट्रिभ्यो भूतेभ्योंऽहोभ्य एव वा
सर्वाण्येतानि भगवन्नामरूपास्त्रकीर्तनात् । प्रयान्तु संक्षयं सद्यो ये नः श्रेयःप्रतीपकाः ।।२६।।
गरुडो भगवान् स्तोत्रस्तोभश्छन्दोमयः प्रभुः । रक्षत्वशेषकृच्छ्रेभ्यो विष्वक्सेनः स्वनामभिः २७
सर्वापद्भ्यो हरेर्नामरूपयानायुधानि नः । बुद्धीन्द्रियमनःप्राणान् पान्तु पार्षदभूषणाः ।।२८।।

धामानि स्वरूपाणि यस्य सः । एवमग्रेऽपि । यद्वा । दिनस्य रात्रेश्च षड्षड्भागेषु रक्षाप्रार्थनम् । प्रातः दिनस्य प्रथमभागः । आसङ्गवं द्वितीयभागः । प्राह्णः तृतीयभागः । मध्यन्दिनं चतुर्थभागः । अपराह्णः पञ्चमभागः । सायं षष्ठभागः । । रात्रौ प्रथमभागः प्रदोषस्तत्र हृषीकेशोऽवतु । उत अपि अर्धरात्रे द्वितीयभागे । निशीथे तृतीयभागे च एक एव अवतु ।। १९ ।। अपररात्रे चतुर्थभागे श्रीवत्सो भृगुलता धामनि वक्षःस्थले यस्य । प्रत्यूषे पञ्चमभागे जनानामविद्यामर्दयतीति जनार्दनः । प्रभाते षष्ठे भागे दामोदरः अव्यात् । अनुसन्ध्यं प्रतिसन्ध्यम् । कालभयनाशिका मूर्तिर्यस्य ।।२०।। युगान्तानलवत् प्रलयाग्निवत् तिग्मा तीक्ष्णा नेमिर्यस्य तत् हे समन्तात् भ्रमणशील ! त्वमेवंभूत चक्रमसि अतः प्रक्षिप्तं सत् अरिसैन्यं दन्दग्धि अतिशयेन भस्मीकुरु । यथा हुताशोऽग्निः कक्षं शुष्कतृणं दहति ।।२१।। अशनिवत् वज्रवत् स्पर्शो येषां ते तथाभूता अग्निकणा यस्यास्तत्सम्बुद्धौ हे गदे त्वं कूष्माण्डादीन् निष्पिण्ढि तथाऽन्यानपि अरीन् संचूर्णय ।।२२।। हे दरेन्द्र ! पाञ्चजन्य ! त्वं कृष्णेन वादितः सन् यातुधानादीन् तथाऽन्यस्यापि अरेर्हृदयानि कम्पयन् तानपि विद्रावयेत्यन्वयः । विप्रग्रहा ब्रह्मराक्षसाः ।। २३ ।। हे तीक्ष्णधार खड्गश्रेष्ठ । त्वमरिसैन्यं छिन्धि । हे शतचन्द्र चर्मन् ढालसंज्ञक अघवतां द्विषां चक्षूंषि छादय अन्धीकुरु । पापचक्षुषों च हर उत्पाटय ।।२४।। यदिति युग्मम् । केतुभ्यः उल्कापातादिभ्यः । दंष्ट्रिभ्यो व्याघ्रादिभ्यः । अंहोभ्यः पापेभ्यः । एतानि सर्वाणि भयानि अन्ये च नोऽस्माकं ये श्रेयोविघातकाः ते सर्वे नश्यन्तु इत्यन्वयः ।।२५।२६।।स्तोत्रैः बृहद्रथन्तरादिभिः स्तोभ्यते स्तूयते यः स गरुडः । विष्वक् सर्वत्र भक्तलक्षणासेना रक्षार्थं यस्य सः ।। २७ ।। यानानि वाहनानि । पार्षदान् भूषयन्तीति व्युत्पत्त्या पुंस्त्वोपपत्तिः । मुख्यपार्षदाः

यथा हि भगवानेव वस्तुतः सदसच्च यत् । सत्येनानेन नः सर्वे यान्तु नाशमुपद्रवाः ॥२९॥
यथैकात्म्यानुभावानां विकल्परहितः स्वयम् । भूषणायुधलिङ्गाख्या धत्ते शक्तीः स्वमायया॥३०
तेनैव सत्यमानेन सर्वज्ञो भगवान् हरिः । पातु सर्वैः स्वरूपैर्नः सदा सर्वत्र सर्वगः ॥ ३१॥

विदिक्षु दिक्षूर्ध्वमधः समन्तादन्तर्बहिर्भगवान् नारसिंहः ।
प्रहापयँल्लोकभयं स्वनेन स्वतेजसा ग्रस्तसमस्ततेजाः ॥३२॥

मघवन्निदमाख्यातं वर्म नारायणात्मकम् । विजेष्यस्यञ्जसा येन दंशितोऽसुरयूथपान् ॥३३॥
एतद् धारयमाणस्तु यं यं पश्यति चक्षुषा । पदा वा संस्पृशेत् सद्यः साध्वसात् स विमुच्यते३४
न कुतश्चिद्भयं तस्य विद्यां धारयतो भवेत् । राजदस्युग्रहादिभ्यो व्याघ्रादिभ्यश्च कर्हिचित्३५
इमां विद्यां पुरा कश्चित् कौशिको धारयन् द्विजः । योगधारणया स्वाङ्गं जहौ स मरुधन्वनि
तस्योपरि विमानेन गन्धर्वपतिरेकदा । ययौ चित्ररथः स्त्रीभिर्वृतो यत्र द्विजक्षयः ॥३७॥
गगनान्न्यपतत् सद्यः सविमानो ह्यवाक्शिराः॥३८॥स वालखिल्यवचनादस्थीन्यादाय विस्मितः
प्रास्य प्राचीसरस्वत्यां स्नात्वा धाम स्वमन्वगात् ॥ ३९ ॥

श्रीशुक उवाच

य इदं शृणुयात् काले यो धारयति चादृतः । तं नमस्यन्ति भूतानि मुच्यते सर्वतो भयात् ४०
एतां विद्यामधिगतो विश्वरूपाच्छतक्रतुः त्रैलोक्यलक्ष्मीं बुभुजे विनिर्जित्य मृधेऽसुरान् ॥४१॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां षष्ठस्कन्धे नारायणवर्मकथनं नामाष्टमोऽध्यायः ॥८॥

॥२८॥ यत् सत् असत् मूर्तामूर्तं च तत्सर्वं भगवानेव ॥ २९ ॥ यथेति युग्मम् । ऐकात्म्यस्य एकात्मनो अनुभावो भावना ध्यानं येषां तेषां भेदरहितोऽपि भेददर्शिनां कृते यथा शक्तीः धत्ते तथा तेनैव सत्यप्रमाणेन अस्मान् पात्वित्यन्वयः लिङ्गं मूर्तिः आख्याः नामानि ॥३०।३१॥ स्वेन गर्जनेन लोकभयं प्रहापयन् दूरीकुर्वन् नरसिंह एव भगवान् सर्वत्र नः पातु । नारसिंहः प्रह्लादो वा ॥ ३२ ॥ दंशितः कवचितः । अञ्जसा अनायासेन ॥ ३३ ॥ साध्वसात् भयात् ॥ ३४।३५ ॥ मरुधन्वनि मरुभूमौ निर्जलप्रदेशे ॥३६॥ यत्र द्विजक्षयः देहत्यागः तस्योपरि ॥३७॥ गगनादित्यर्द्धम् । अवाक्शिरा अधः शिराः सन् ॥ ३८ ॥ स्वंधाम गन्धर्वलोकम् । विस्मित इति अन्यथा गन्तुं नापारयिष्यदिति ॥ ३९ ॥ काले भयकाले । भूतानि प्राणिनः ॥ ४० ॥ अधिगतः प्राप्तः । मृधे संग्रामे ॥ ४१ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे गूढार्थदीपिन्यामष्टमोऽध्यायः

अथ नवमोऽध्यायः

श्रीशुक उवाच

तस्यासन् विश्वरूपस्य शिरांसि त्रीणि भारत। सोमपीथं सुरापीथमन्नादमिति शुश्रुम ॥ १ ॥
स वै बर्हिषि देवेभ्यो भागं प्रत्यक्षमुच्चकैः। अवदद् यस्य पितरो देवाः सप्रश्रयं नृप ॥ २ ॥
स एव हि ददौ भागं परोक्षमसुरान् प्रति। यजमानोऽवहद् भागं मातृस्नेहवशानुगः ॥ ३ ॥
तद् देवहेलनं तस्य धर्मालीकं सुरेश्वरः। आलक्ष्य तरसाभीतस्तच्छीर्षाण्यच्छिनद् रुषा ॥४॥
सोमपीथं तु यत्तस्य शिर आसीत् कपिञ्जलः। कलविङ्कः सुरापीथमन्नादं यत् स तित्तिरिः॥५
ब्रह्महत्यामञ्जलिना जग्राह यदपीश्वरः। संवत्सरान्ते तदघं भूतानां स विशुद्धये।
भूम्यम्बुद्रुमयोषिद्भ्यश्चतुर्धा व्यभजद्धरिः ॥ ६ ॥
भूमिस्तुरीयं जग्राह खातपूरवरेण वै। ईरिणं ब्रह्महत्याया रूपं भूमौ प्रदृश्यते ॥ ७ ॥
तुर्यं छेदविरोहेण वरेण जगृहुर्द्रुमाः। तेषां निर्यासरूपेण ब्रह्महत्या प्रदृश्यते ॥ ८ ॥
शश्वत् कामवरेणांहस्तुरीयं जगृहुः स्त्रियः। रजोरूपेण तास्वंहो मासि मासि प्रदृश्यते ॥ ९ ॥
द्रव्यभूयोवरेणापस्तुरीयं जगृहुर्मलम्। तासु बुद्बुदफेनाभ्यां दृष्टं तद्धरति क्षिपन् ॥१०॥
हतपुत्रस्ततस्त्वष्टा जुहावेन्द्राय शत्रवे। इन्द्रशत्रो विवर्धस्व मा चिरं जहि विद्विषम् ॥११॥
अथान्वाहार्यपचनादुत्थितो घोरदर्शनः। कृतान्त इव लोकानां युगान्तसमये यथा ॥१२॥
विष्वग्विवर्धमानं तमिषुमात्रं दिने दिने। दग्धशैलप्रतीकाशं संध्याभ्रानीकवर्चसम् ॥१३॥

विश्वरूपवधात् त्वष्ट्रा क्रुद्धेनोत्पादितोऽसुरः।
वृत्रो यस्य भयाद् देवास्तुष्टुवुर्नवमे हरिम् ॥

हे भारत ! परीक्षित्। तस्य विश्वरूपस्य। सोमस्य पीथं पानं यस्मिन् ॥ १ ॥ 'बर्हिषि यज्ञे। स विश्वरूपः। हविर्भागम् उच्चकैः उच्चस्वरेण अददत् इन्द्राय इदमिति। यतो देवाः पितृस्थानीयाः॥२॥ देवान् यजमानः पूजयन् सः परोक्षं गुप्तरूपेण असुरान् प्रति भागम् अवहत् प्रापयामास। मातुः रचनायाः ॥३॥ हेलनं वञ्चनारूपं धर्मेऽलीकं कपटम् ॥ ४ ॥ कपिञ्जलः कपोतः। कलविङ्कः चटकः ॥५॥ ब्रह्मोति सार्द्धम्। यदपि ईश्वरः समर्थस्तथापि भूतानां प्राणिनां मध्ये स्वविशुद्धये लोकापवादनिवृत्तये च चतुर्धा व्यभजत् स हरिः इन्द्रः ॥ ६ ॥ खातपूरः गर्तपूरणं स्वत एव भवतु इति वरेण। ईरिणभूषरम् ॥ ७ ॥ छेदे छिन्ने सत्यपि पुनर्वर्धनवरेण ॥८॥ शश्वत्कामवरेण आप्रसवात् संभोगक्षमतारूपवरेण जगृहुः। अंहः पापम् ॥ ९ ॥ द्रव्यशब्देनात्र द्रव एवोच्यते कृत्यप्रयोगात्। स्वार्थे तद्धिताद्वा। कूपादावुद्धृतस्यापि भूयस्त्वमाधिक्यमिति वरेण। तासु अप्सु तत् पापं दृष्टं भवति। अतो विवेकी बुद्बुदादि क्षिपन् दूरीकुर्वन्नेव अपो हरति गृह्णाति ॥१०॥ इन्द्राय इन्द्रं हन्तुं शत्रूत्पत्त्यै च जुहाव। माचिरं शीघ्रमेव। विद्विषमिन्द्रम् जहि इन्द्रशत्रो ! तत्र तत्पुरुषे वृत्रस्य हन्तृत्वम्। बहुव्रीहौ सतीन्द्रियस्य हन्तृत्वमायाति। स्वाभाविकपाठादिन्द्रोऽस्य हन्ता पश्चादाहार्यपाठादिन्द्रोऽपि अनेन हतो भविष्यति सवाहनस्याप्यनेन निगलिष्यमाणत्वात् ॥११॥ अन्वाहार्यपचनात् दक्षिणाग्नेः सकाशात् वृत्रासुर उत्थितः। युगान्ते प्रलयसमये क्षयाय कृतान्तः कालात्मा रुद्रो यथा तद्वत् ॥ १२ ॥ विष्वगिति सार्द्धं चतुष्कम्। तं वीक्ष्य सर्वे लोका वित्रस्ताः सन्तो

---

१. बर्हिर्यज्ञे नृपे देवे हस्तमात्रकुशेऽपि च इति धरणिः।

तप्तताम्रशिखाश्मश्रुं मध्याह्नार्कोग्रलोचनम् ॥ १४ ॥
देदीप्यमाने त्रिशिखे शूल आरोप्य रोदसी। नृत्यन्तमुदन्तं च चालयन्तं पदा महीम् ॥१५॥
दरीगम्भीरवक्त्रेण पिबता च नभस्तलम् । लिहता जिह्वयर्क्षाणि ग्रसता भुवनत्रयम् ॥१६॥
महता रौद्रदंष्ट्रेण जृम्भमाणं मुहुर्मुहुः । वित्रस्ता दुद्रुवुर्लोका वीक्ष्य सर्वे दिशो दश ॥१७॥
येनावृता इमे लोकास्तमसा त्वाष्ट्रमूर्तिना । स वै वृत्र इति प्रोक्तः पापः परमदारुणः ॥१८॥
तं निजघ्नुरभिद्रुत्य सगणा विबुधर्षभाः । स्वैः स्वैर्दिव्यास्त्रशस्त्रौघैः सोऽग्रसत् तानि कृत्स्नशः
ततस्ते विस्मिताः सर्वे विषण्णा ग्रस्ततेजसः । प्रत्यञ्चमादिपुरुषमुपतस्थुः समाहिताः ॥२०॥

देवा ऊचुः

वाय्ववम्बराग्न्यप्क्षितयस्त्रिलोका ब्रह्मादयो ये वयमुद्विजन्तः ।
हराम यस्मै बलिमन्तकोऽसौ बिभेति यस्मादरणं ततो नः ॥२१॥
अविस्मितं तं परिपूर्णकामं स्वेनैव लाभेन समं प्रशान्तम् ।
विनोपसर्पत्यपरं हि बालिशः श्वलाङ्गुलेनातितितर्ति सिंधुम् ॥२२॥
यस्योरुशृङ्गे जगतीं स्वनावं मनुर्यथाऽऽबध्य ततार दुर्गम् ।
स एव नस्त्वाष्ट्रभयाद् दुरन्तात् त्राताऽऽश्रितान् वारिचरोऽपि नूनम् ॥२३॥
पुरा स्वयंभूरपि संयमाम्भस्युदीर्णवातोर्मिरवैः कराले ।
एकोऽरविन्दात् पतितस्ततार तस्माद् भयाद् येन स नोऽस्तु पारः ॥२४॥

दश दिशो दुद्रुवुरिति पञ्चमेनान्वयः। विष्वक् समन्ततः । कथंभूतम् । दग्धेति कृष्णवर्णम् । संध्यामेघमण्डलवद्वर्चो दीप्तिर्यस्य तम्[1] इषुमात्रम् । तप्तताम्रवत् शिखाः श्मश्रूणि यस्य तम् । मध्याह्नार्कवत् उग्रे भीषणे लोचने यस्य तम् । पुनश्च शूले रोदसी आरोप्येव नृत्यन्तम् । वक्त्रेण मुहुर्मुहुः जृम्भमाणम् । कथंभूतेन वक्त्रा। नभस्थलं पिबतेव स्थितेन। लिहतेव ग्रसतेव ॥ १३।१४।१५।१६।१७ ॥ मूर्तिः त्वष्टुरपत्यस्तज्जन्येन तमसा आवृता अतः स एव त्वाष्ट्रो वृत्रः[2] ॥१८॥ अग्रसत् निगलितवान् ॥ १९ ॥ विषण्णाः खिन्नाः। प्रत्यञ्चमन्तर्यामिणं त्रिभुवनस्य दैत्याक्रान्तत्वादन्यत्र गमनासंभावात् तत्रैव स्थित्वा तुष्टुवुरित्यर्थः ॥२०॥ वाय्वादीनि २३ तत्त्वानि तैर्निमितास्त्रयो लोकाः तेषामधिपतयो ये ब्रह्मादयः ते सर्वे वयं च उद्विजन्तो भीताः सन्तः यस्मै कालाय वलिं हराम समर्पयामः आज्ञां कुर्मः सोऽसौ कालोऽपि यस्मात् बिभेति ततः तस्मात् परमेश्वरादेव नोऽस्माकं रक्षणमस्तु नान्यस्मात् ॥२१॥ यः परिपूर्णकाममीश्वरं विना विहाय अपरमुपसर्पति शरणं याति स बालिशो मूर्ख एव हि यतः स शुनो लाङ्गूलेन सिन्धुमतितर्तुमिच्छति।२२॥ यस्य विशालशृङ्गे पृथ्वीरूपां नावं वद्ध्वा मनुः सत्यव्रतः यथावत् दुर्गं संकटं ततार स एव वारिचरो मत्स्यमूर्तिर्भगवान् आश्रितान् नः नूनं त्राता रक्षिष्यति । त्वाष्ट्रो वृत्रासुरः ॥२३॥ संयमाम्भसि प्रलयोदके

---

१. इषीकात्र बुधैर्ज्ञेया इषुशब्देन नो शरः । मात्रं स्थूलमिह प्रोक्तं तन्मात्रं वर्धते दिने । इति ज्ञेयमन्यथा। जगन्नाथप्रसंगात् ।

२. दैत्यभेदे चान्धकारे वृत्रशब्दः प्रयुज्यते' इत्यभिधानात् ।

य एक ईशो निजमायया नः ससर्ज येनानुसृजाम विश्वम् ।
वयं न यस्यापि पुरः समीहतः पश्याम लिङ्गं पृथगीशमानिनः ॥२५॥
यो नः सपत्नैर्भृशमर्द्यमानान्देवर्षितिर्यङ्नृषु नित्य एव ।
कृतावतारस्तनुभिः स्वमायया कृत्वाऽऽत्मसात्पाति युगे युगे च ॥२६॥
तमेव देवं वयमात्मदैवतं परं प्रधानं पुरुषं विश्वमन्यम् ।
व्रजाम सर्वे शरणं शरण्यं स्वानां स नो धास्यति शं महात्मा ॥२७॥

श्रीशुक उवाच

इति तेषां महाराज सुराणामुपतिष्ठताम् । प्रतीच्यां दिश्यभूदाविः शङ्खचक्रगदाधरः ॥२८॥
आत्मतुल्यैः षोडशभिर्विना श्रीवत्सकौस्तुभौ । पर्युपासितमुन्निद्रशरदम्बुरुहेक्षणम् ॥२९॥
दृष्ट्वा तमवनौ सर्वे ईक्षणाह्लादविक्लवाः । दण्डवत् पतिता राजञ्छनैरुत्थाय तुष्टुवुः ॥३०॥

देवा ऊचुः

नमस्ते यज्ञवीर्याय वयसे उत ते नमः । नमस्ते ह्यस्तचक्राय नमः सुपुरुहूतये ॥३१॥
यत् ते गतीनां तिसृणामीशितुः परमं पदम् । नार्वाचीनो विसर्गस्य धातर्वेदितुमर्हति ॥३२॥

ॐ नमस्तेऽस्तु भगवन्नारायण वासुदेवादिपुरुष महापुरुष महानुभाव परममङ्गल परमकल्याण परमकारुणिक केवल जगदाधार लोकैकनाथ सर्वेश्वर लक्ष्मीनाथ परमहंसपरिव्राजकैः परमेणात्मयोगसमाधिना परिभावितपरिस्फुटपारमहंस्यधर्मेणोद्घाटितत‍मः कपा-

---

अरविन्दात् नाभिकमलात् पतितप्रायः एकोऽसहाय एव स्वयम्भूः ब्रह्मा येन हेतुभूतेन तस्मात् भयात् ततार स एव अस्माकं पारः पालको भवतु । पारयतीति पारः । कथंभूते अम्भसि । प्रचण्डवातैः ये तरङ्गास्तेषां रवैः शब्दैः कराले ॥ २४ ॥ यो नोऽस्मान् ससर्ज येनानुगृहीताः वयं सृष्टमेव विश्वं सृजामः तं वयं शरणं व्रजाम इति तृतीयेनान्वयः । किन्तु पुरः पूर्वमेव समीहतः विश्वमस्मांश्च सृजतोऽपि यस्य लिङ्गं स्वरूपं भगवतैव सर्वं सृष्टमिति न विदाम एवंभूता अज्ञा वयं यतः पृथगिति ॥ २५ ॥ यो देवादिषु वामनादितनुभिः कृतावतारः सन् शत्रुभिः पीड्यमानान् नः आत्मसात्कृत्वा स्वकीयान् मत्वा । पाति तमित्यन्वयः ॥ २६ ॥ तमेव दैवं वयं शरणं व्रजाम । कथंभूतम् । आत्मनां जीवानां दैवतमुपास्यम् । प्रकृति पुरुषं विश्वस्वरूपं परं कारणं च । ततोऽन्यं पृथग्भूतं च । स एव नः शं कल्याणं विधास्यति ॥ २७ ॥ उपतिष्ठतां स्तुवताम् ॥ २८ ॥ आत्मेति युग्मम् । सर्वे ते देवा अवनौ भूमौ दण्डवत् पतिताः सन्तः तुष्टुवुरित्यन्वयः । कथंभूतम् । षोडषभिः पार्षदैः सुनन्दादिभिः पर्युपासितम् । श्रीवत्सादि विना अन्यैश्चतुर्भुजत्वादिचिह्नैरात्मतुल्यैः विकसितशरदम्बुरुहे इव ईक्षणे यस्य तम् । विक्लवा विवशाः ॥२९।३०॥ वीर्याय फलदात्रे । उत वयसे तत्फलाभिव्यञ्जककालाय । तद्विघातकेषु दैत्येषु अस्तं प्रक्षिप्तं चक्रं येन । एवं सुशोभनाः सुपुरवो बहवो हूतयो नामानि यस्य ते नमः ॥ ३१ ॥ तिसृणां देवमनुष्यतिर्यग्गतीनामीशितुः प्रापकस्य ते यत्परमं पदं वैकुण्ठधाम तत् सृष्टेरर्वाचीनो मादृशो जनः वेदितुं नार्हति ॥ ३२ ॥ अपावृते आवरणशून्ये चित्तमन्दिरे आलोके सति यदुपलब्धमात्मसुखं तदनु-

ट्द्वारे चित्तेऽपावृत आत्मलोके स्वयमुपलब्धनिजसुखानुभवो भवान् ॥ ३३ ॥ दुरवबोध इव तवायं विहारयोगो यदशरणोऽशरीर इदमनवेक्षितास्मत्समवाय आत्मनैवाविक्रियमाणेन सगुणमगुणः सृजसि पासि हरसि ॥ ३४ ॥ अथ तत्र भवान् किं देवदत्तवदिह गुणविसर्गपतितः पारतन्त्र्येण स्वकृतकुशलाकुशलं फलमुपाददात्याहोस्विदात्माराम उपशमशीलः समञ्जसदर्शन उदास्त इति ह वाव न विदामः ॥ ३५ ॥ न हि विरोध उभयं भगवत्यपरिगणितगुणगणे ईश्वरेऽनवगाह्यमाहात्म्येऽर्वाचीनविकल्पवितर्कविचारप्रमाणाभासकुतर्कशास्त्रकलिलान्तःकरणाश्रयदुरवग्रहवादिनां विवादानवसर उपरतसमस्तमायामये केवल एवात्ममायामन्तर्धाय को न्वर्थो दुर्घट इव भवति स्वरूपद्वयाभावात् ॥ ३६ ॥ समविषममतीनां मतमनुसरसि यथा रज्जुखण्डः सर्पादिधियाम् ॥ ३७ ॥ स एव हि पुनः सर्ववस्तुनि वस्तुस्वरूपः सर्वेश्वरः सकलजगत्कारणकारणभूतः सर्वप्रत्यगात्मत्वात् सर्वगुणाभासोपलक्षित एक एव पर्यवशेषितः ॥ ३८ ॥ अथ ह वाव तव महिमामृतरससमुद्रविप्रुषा सकृदवलीढया स्वमनसि निष्यन्दमानानवरतसुखेन विस्मारितदृष्टश्रुतविषयसुखलेशाभासाः परमभागवता एकान्तिनो भगवति सर्वभूतप्रियसुहृदि सर्वात्मनि नितरां निरन्तरं निर्वृतमनसः कथमु ह वा एते मधुमथन पुनः स्वार्थकुशला ह्यात्मप्रियसुहृदः साधवस्त्वच्चरणाम्बुजानुसेवां विसृजन्ति न यत्र पुनरयं संसारपर्यावर्तः ॥ ३९ ॥ त्रिभुवनात्मभवन त्रिविक्रम त्रिलोकमनोहरानुभाव तवैव

भवरूपो भवान् वर्तते । कीदृशे चित्ते । योगेन अष्टाङ्गेन यः समाधिश्चित्तैकाग्र्यं तेन परिभावितः शोधितः परिस्फुरितश्च यो धर्मो भक्तिलक्षणस्तेनोत्सारितमज्ञानरूपं कपाटं यस्य तस्मिन् द्वारभूते ॥ ३३ ॥ इव एवार्थे । यत् यस्मात् त्वं निर्गुणः अशरणः निराश्रयश्च सन् स्वयमात्मनैव सगुणं जगत् सृजसि । कथंभूतः । नापेक्षितोऽस्माकं समवायः साहाय्यं येन सः ॥ ३४ ॥ अथ अर्थान्तरे । संशयान्तरमप्यस्तीत्यर्थः । स्वकृतयोः पुण्यपापयोः सुखदुःखात्मकं फलं पारतन्त्र्येणोपादत्ते अथवा उदास्ते उदासीनतया साक्षिरूपेण वर्तते इति ह वाव इत्यपि न विदामः ॥ ३५ ॥ भगवति ईश्वरे त्वयि एतदुभयं कर्तृत्वाकर्तृत्वं सुखित्वदुःखित्वादिकं च न विरोधः न विरुध्यत इत्यर्थः । कथंभूते । अर्वाचीना विकल्पादयः येषु तैः शास्त्रैः कलिलं मलिनं यदन्तःकरणं तदाश्रया ये दुरवग्रहास्तैर्वादैः कुविवादं कुर्वतां विवादानवसरे । एवंभूते त्वयि मायामन्तर्धाय मध्ये निधाय को नु अर्थः कर्तृत्वादिः दुर्घटोऽसंगत इव भाति न कोऽपि स्वरूपद्वयाभावात् संसारिजीववत् बद्धत्वमुक्तत्वावस्थाविशेषाभावात् । अनवगाह्यमतर्क्यम् ॥ ३६ ॥ समा यथार्था । विषमा भ्रान्ता ॥ ३७ ॥ सर्ववस्तुनि सर्वप्रपञ्चे वस्तुस्वरूपः परमार्थभूतः सर्वप्रत्यगात्मत्वात् सर्वजीवानामन्तर्यामित्वात् स एक एव भवान् नेति नेति श्रुतिभिः पर्यवशेषितः भवति । सर्वगुणानां बुद्धीन्द्रियाणां आभासैः प्रकाशैः ॥ ३८ ॥ अथ ह वा अत एव हे मधुमथन एते भागवताः तव चरणाम्बुजसेवां कथं विसृजन्तीत्यन्वयः । पर्यावर्तः जन्ममरणप्रवाहः । कथंभूताः । तव महिमैव अमृतरससमुद्रस्तस्य विप्रुषा बिन्दुमात्रेण सकृत् अवलीढया आस्वादितया निष्यन्दमानेन प्रस्रवमाणेन विस्मारिताः ऐहिकामुष्मिकसुखलेशाभासा येषां ते ॥ ३९ ॥ त्रिभुवनमात्मा स्वरूपं भवनं च यस्य

विभूतयो दितिजदनुजादयश्चापि तेषामनुपक्रमसमयोऽयमिति स्वात्ममयया सुरनरमृगमिश्रितजलराकृतिभिर्यथापराधं दण्डं दण्डधर दधर्थ एवमेनमपि भगवन्जहि त्वाष्ट्रमुत यदि मन्यसे ॥ ४० ॥ अस्माकं तावकानां तव नतानां तत ततामह तव चरणनलिनयुगलध्यानानुबद्धहृदयनिगडानां स्वलिङ्गविवरणेनात्मसात्कृतानामनुरञ्जितविशदरुचिरशिशिरस्मितावलोकेन विगलितमधुरमुखरसामृतकलया चान्तस्तापमनघार्हसि शमयितुम् ॥ ४१ ॥ अथ भगवंस्तवास्माभिरखिलजगदुत्पत्तिस्थितिलयनिमित्तायमानदिव्यमायाविनोदस्य सकलजीवनिकायानामन्तर्हृदयेषु बहिरपि च ब्रह्मप्रत्यगात्मस्वरूपेण प्रधानरूपेण च यथादेशकालदेहावस्थानविशेषं तदुपादानोपलम्भकतयानुभवतः सर्वप्रत्ययसाक्षिणः आकाशशरीरस्य साक्षात् परब्रह्मणः परमात्मनः कियानिह वा अर्थविशेषो विज्ञापनीयः स्याद् विस्फुलिङ्गादिभिरिव हिरण्यरेतसः ॥ ४२ ॥ अत एव स्वयं तदुपकल्पयास्माकं भगवतः परमगुरोस्तव चरणशतपलाशच्छायां विविधवृजिनसंसारपरिश्रमोपशमनीमुपसृतानां वयं यत्कामेनोपसादिताः ॥ ४३ ॥

अथो ईश जहि त्वाष्ट्रं ग्रसन्तं भुवनत्रयम् । ग्रस्तानि येन नः कृष्ण तेजांस्यस्त्रायुधानि च ॥४४॥

हंसाय दह्रनिलयाय निरीक्षकाय कृष्णाय मृष्टयशसे निरुपक्रमाय ।
सत्संग्रहाय भवपान्थनिजाश्रमाप्तावन्ते परीष्टगतये हरये नमस्ते ॥ ४५ ॥

तत्सम्बुद्धौ । तेषाम् अनुपक्रमसमयः अनुद्यमकालः । अतः पूर्वं तेषु यथा दण्डं दधर्थ धृतवानसि तथा अधुनापि एनं त्वाष्ट्रं वृत्रासुरं जहीत्यन्वयः । सुरेति वामनरामवराहनृसिंहमत्स्याकृतिभिः मन्यसे हन्तुमिच्छसि ॥ ४० ॥ हे तत । ततामह । हे पितः । पितामह । तव पादयोर्नतानां तावकानमस्माकम् अन्तः सन्तापं शमयितुं निवारयितुमर्हसीत्यन्वयः । केन । अनुकम्पया अनुरञ्जितम् अनुरागयुक्तं विशदं स्वच्छं स्वाभाविकं रुचिरं शिशिरं तापहरं यत् स्मितं तत्सहितेनावलोकेन । तथा च विगलितो निःसृतो यो मधुरमुखरसः प्रियवाणी सैव अमृतकला तया च । कथंभूतानाम् । तव चरणयुगलध्यानेनैव निबद्धः हृदये निगडः प्रेमश्रृङ्खला येषां तेषां स्वमूर्ति प्रकटनेन आत्मीयत्वेन स्वीकृतानाम् ॥४१॥अथ ह हे भगवन् सर्वज्ञस्य तव समक्षम् अस्माभिः कियान् वा कार्यविशेषः विज्ञापनीयः स्यात् यथा हिरण्यरेतसः अग्नेः प्रकाशः अग्निकणादिभिः न क्रियते तथा अस्माभिरपि । कथंभूतस्य तव । उत्पत्त्यादिषु निमित्तायमाना या माया तया विनोदः क्रीडा यस्य । पुनश्च सर्वेषां हृदयेषु ब्रह्मरूपेण अन्तर्यामिरूपेण बहिश्च प्रकृतिरूपेण स्थितस्य । किञ्च तेषामुपादानतया उपलम्भकतया प्रकाशकतया च तेषां देशकालाद्यवस्थाविशेषं चानुभवतः साक्षात्कृतवतः । शेषं स्पष्टम् ॥ ४२ ॥ अतः सर्वज्ञत्वादेव । तव चरणकमलच्छायां यत्कामेन वयमुपसादिताः प्रापिताः तदस्माकमुपकल्पय सम्पादयेत्यन्वयः । कीदृशीम् छायाम् । उपसृतानां शरणागतानां विविधदुःखादिशमनीम्॥४३॥अथो अतः त्वाष्ट्रं वृत्रासुरम् ॥४८॥ हंसाय शुद्धाय ते नमः । दह्रं हृदयाकाशः निलयो यस्य तस्मै । मृष्टं शुद्धम् । निर्गतः उपक्रमः उत्पत्तिर्यस्माद् तस्मै सद्भिः । संगृह्यते आश्रियते यः । सतां संग्रहो यत्रेति वा । भवपान्थः संसारपथिको भक्तः तस्य निजाश्रमाप्तौ स्वशरणप्राप्तौ सत्यां परीष्टा अभीष्टा उत्तमा गतिर्यस्मात्तस्मै । यद्वा । गम्यतेऽनया इति गतिः धामप्रापको यस्तस्मै॥४५॥

श्रीशुक उवाच

अथैवमीडितो राजन् सादरं त्रिदशैर्हरिः। स्वमुपस्थानमाकर्ण्य प्राह तानभिनन्दितः ॥४६॥

श्रीभगवानुवाच

प्रीतोऽहं वः सुरश्रेष्ठा मदुपस्थानविद्यया। आत्मैश्वर्यस्मृतिः पुंसां भक्तिश्चैव यया मयि॥४५।
किं दुरापं मयि प्रीते तथापि विबुधर्षभाः। मय्येकान्तमतिर्नान्यन्मत्तो वाञ्छति तत्त्ववित्॥४८।
न वेद कृपणः श्रेय आत्मनो गुणवस्तुदृक् तस्य तानिच्छतो यच्छेद् यदि सोऽपि तथाविधः॥४९।
स्वयं निःश्रेयसं विद्वान् न वक्त्यज्ञाय कर्म हि। न राति रोगिणोऽपथ्यं वाञ्छतोपि भिषक्तमः॥५०
मघवन् यात भद्रं वो दध्यञ्चमृषिसत्तमम्। विद्याव्रततपःसारं गात्रं याचत मा चिरम् ॥५१॥
सवा अधिगतो दध्यङ्ङश्विभ्यां ब्रह्म निष्कलम्। यद्वा अश्वशिरो नाम तयोरमरतां व्यधात्
दध्यङ्ङाथर्वणस्त्वष्ट्रे वर्माभेद्यं मदात्मकम्। विश्वरूपाय यत् प्रादात् त्वष्टा यत् त्वमधास्ततः॥५३
युष्मभ्यं याचितोऽश्विभ्यां धर्मज्ञोऽङ्गानि दास्यति। ततस्तैरायुधश्रेष्ठो विश्वकर्मविनिर्मितः।
येन वृत्रशिरो हर्ता मत्तेजउपबृंहितः ॥५४॥
तस्मिन् विनिहते यूयं तेजोऽस्त्रायुधसम्पदः। भूयः प्राप्स्यथ भद्रं वो न हिंसन्ति च मत्परान्॥५५॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां षष्ठस्कन्धे नवमोऽध्यायः ॥ ९ ॥

ईडितः स्तुतः अभिनन्दितः सन्तोषितश्च। उपस्थानं स्तोत्रम् ॥ ४६ ॥ विद्यया स्तुतिरूपया। यया विद्यया आत्मनो मम स्मृति र्भक्तिश्च भवेत् ॥ ४७ ॥ किं दुरापं दुर्लभं न किमपि अथापि तत्त्ववित् मत्तोऽन्यत् किमपि न वाञ्छति यतः एकनिष्ठमतिः ॥ ४८ ॥ गुणेषु विषयेषु वस्तुदृक् सत्यबुद्धिः श्रेयो न वेद। इच्छतः तस्य अज्ञस्य यदि तान् विषयान् दद्यात् सोऽपि तथाविधः अज्ञ एव ॥ ४९ ॥ निःश्रेयसं निवृत्तिमार्गं विद्वान् जानन्। कर्म प्रवृत्तिमार्गम्। न राति न ददाति ॥ ५० ॥ विद्यादिभिः सारं दृढं कार्यक्षमम्। दध्यञ्चं दधीचिनामानम् ॥५१॥ दध्यङ् ऋषिः[1] निष्कलं मायातीतं ब्रह्म अधिगतः ज्ञातवान्। ततः अश्विभ्यां प्रादात् उपदिदेशेत्पुत्ररेणान्वयः। कथंभूतं ब्रह्म। यत् अश्वशिरसा प्रोक्तत्वात् अश्वशिरो नाम प्रसिद्धम्। यत् तयोः वैद्ययोः अमरतां जीवन्मुक्ततां सम्पादितवान् ॥५२॥ मदात्मकं वर्म नारायणकवचं चाधिगतः। यत् त्वष्ट्रे प्रादात्। त्वष्टा स्वपुत्राय विश्वरूपाय प्रादात् यच्च ततो विश्वरूपात् त्वमधाः धृतवानसि। दधाति सर्वमिति दधि ब्रह्म तत् अञ्चति प्राप्नोति जानातीति वा दध्यङ् अथर्ववित्त्वादाथर्वणः स चासौ स च इति दध्यङ् शब्दो विवृतः॥५३॥युष्मभ्यमिति सार्द्धम्। अश्विभ्यां याचितः स युष्मभ्यम् अङ्गानि अस्थीनि दास्यति। ततो दानानन्तरं तैरस्थिभिः श्रेष्ठो वज्रो भविष्यति येन वृत्रशिरो-हरिष्यतीत्यन्वयः। उपबृंहितः संवर्द्धितः ॥५४॥ वृत्रासुरे हते सति। मत्परान् मद्भक्तान् केऽपि न हिंसन्तीति ॥५५॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे गूढार्थदीपिन्यां नवमोऽध्यायः

---

१. अत्रैवं कथा श्रूयते दधीचिर्मुनिर्ब्रह्मविद्याविशारद इति निशम्याश्विनौ तत्समीपमागत्योचतुः भगवन् नौ विद्यामुपदिशेति। तेनोक्तं सम्प्रत्यहं कर्मण्यासक्तः पुनर्वक्ष्यामीत्युक्तावश्विनौ जग्मतुः। तत इन्द्र आगत्य मुनिमुवाच अश्विभ्यां मा विद्यामुपदिश अन्यथा तव शिरश्छिन्द्याम्। इत्युक्त्वा इन्द्रे गते पुनरश्विनावागत्योचतुरुपदिशेति। मुनिनेन्द्रोक्तं सर्वं निवेदितम् एवं चेत्तर्हि पूर्वमेव तव शिरश्छित्वाऽश्वशिरः सन्धास्यावः। तेनैव विद्यामुपदिशेति। इन्द्रेण छिन्ने सति पुनर्गुरुदक्षिणारूपेण पूर्वशिरः सन्धास्याव इति।

अथ दशमोऽध्यायः

श्रीशुक उवाच

इन्द्रमेवं समादिश्य भगवान् विश्वभावनः । पश्यतामनिमेषाणां तत्रैवान्तर्दधे हरिः ॥ १ ॥
तथाभियाचितो देवैर्ऋषिराथर्वणो महान् । मोदमान उवाचेदं प्रहसन्निव भारत ॥ २ ॥
अपि वृन्दारका यूयं न जानीथ शरीरिणाम् । संस्थायां यस्त्वभिद्रोहो दुःसहश्चेतनापहः ॥ ३ ॥
जिजीविषूणां जीवानामात्मा प्रेष्ठ इहेप्सितः । क उत्सहेत तं दातुं भिक्षमाणाय विष्णवे ॥ ४॥

देवा ऊचुः

किं नु तद् दुस्त्यजं ब्रह्मन् पुंसां भूतानुकम्पिनाम् । भवद्विधानां महतां पुण्यश्लोकेड्यकर्मणाम्॥५॥
ननु स्वार्थपरो लोको न वेद परसङ्कटम् । यदि वेद न याचेत नेति नाह यदीश्वरः ॥ ६ ॥

ऋषिरुवाच

धर्मं वः श्रोतुकामेन यूयं मे प्रत्युदाहृताः । एष वः प्रियमात्मानं त्यजन्तं संत्यजाम्यहम् ॥ ७॥
योऽध्रुवेणात्मना नाथा न धर्मं न यशः पुमान् । ईहेत भूतदयया स शोच्यः स्थावरैरपि ॥८॥
एतावानव्ययो धर्मः पुण्यश्लोकैरुपासितः । यो भूतशोकहर्षाभ्यामात्मा शोचति हृष्यति ॥ ९ ॥
अहो दैन्यमहो कष्टं पारक्यैः क्षणभङ्गुरैः । यन्नोपकुर्यादस्वार्थैर्मर्त्यः स्वज्ञातिविग्रहैः ॥ १०॥

श्रीशुक उवाच

एवं कृतव्यवसितो दध्यङ्ङाथर्वणस्तनुम् । परे भगवति ब्रह्मण्यात्मानं संनयञ्जहौ ॥११॥
यताक्षासुमनोबुद्धिस्तत्त्वदृग् ध्वस्तबन्धनः । आस्थितः परमं योगं न देहं बुबुधे गतम् ॥१२॥
अथेन्द्रो वज्रमुद्यम्य निर्मितं विश्वकर्मणा । मुनेः शुक्तिभिरुत्सिक्तो भगवत्तेजसान्वितः ॥१३॥

दशमे तु दधीच्यस्थिनिर्मितं कुलिशं दधत् ।
वृत्रेण युयुधे शक्रः ससुरः सोऽपि सासुरः ॥१॥

भावनः पालकः अनिमिषाणां देवानाम् ॥१॥ यथादिष्टं तथा याचितः॥२॥ हे वृन्दारका देवाः । अपि किम् । संस्थायां मृत्यौ यो द्रोहो दुःखं तं किम् न जानीथ ॥३॥ प्रेष्ठः प्रियतमः । उत्सहेत समर्थो भवेत् । ॥ ४ ॥ पुण्यश्लोकैः यशस्विभिः ईड्यानि स्तुत्यानि कर्माणि येषां तेषां किं नु दुस्त्यजं न किमपि ॥ ५ ॥ यदि ईश्वरः समर्थश्चेत् तर्हि नेति नाह ॥ ६ ॥ वो युष्माकम् । प्रत्युदाहृताः प्रत्याख्याता । एषोऽहम् ॥ ७ ॥ आत्मानं देहमन्ते त्यजन्तम् । आत्मना देहेन । हे नाथाः । न ईहेत न सम्पादयेत् स शोच्यः निन्द्यः ॥८॥ य आत्मा भूतानां शोकादिना शोचति हृष्यति स एतावानेव अव्ययोऽक्षयः ॥ ९ ॥ यो मर्त्यः पारक्यैः श्वसृगालादिभक्ष्यैः नश्वरैः स्वादिभि धनपुत्र शरीरैः यत् नोपकुर्यात् तस्य तज्जीवनं कष्टं दुःखमयं व्यर्थमित्यर्थः । अस्वार्थैः परप्रयोजनैः ॥ १० ॥ कृतव्यवसितः कृतनिश्चयः । भगवति आत्मानं मनः सन्नयन् युञ्जन् तनु जहौ ॥ ११ ॥ यता निरुद्धा अक्षादयो येन सः । योगं समाधिलक्षणम् । गतं त्यक्तम् ॥ १२ ॥ अथेति युग्मम् । अथ इन्द्रः मुनेः शुक्तिभिरस्थिभिर्निर्मि तं वज्रमुद्यम्य गजेन्द्रोपरि

वृतो देवगणैः सर्वैर्गजेन्द्रोपर्यशोभत। स्तूयमानो मुनिगणैस्त्रैलोक्यं हर्षयन्निव ॥१४॥
वृत्रमभ्यद्रवच्छेत्तुमसुरानीकयूथपैः । पर्यस्तमोजसा राजन् क्रुद्धो रुद्र इवान्तकम् ॥१५॥
ततः सुराणामसुरै रणः परमदारुणः। त्रेतामुखे नर्मदायामभवत् प्रथमे युगे ॥१६॥
रुद्रैर्वसुभिरादित्यैरश्विभ्यां पितृवह्निभिः। मरुद्भिर्ऋभुभिः साध्यैर्विश्वेदेवैर्मरुत्पतिम् ॥१७॥
दृष्ट्वा वज्रधरं शक्रं रोचमानं स्वया श्रिया। नामृष्यन्नसुरा राजन् मृधे वृत्रपुरःसराः ॥१८॥
नमुचिः शम्बरोऽनर्वा द्विमूर्धा ऋषभोऽम्बरः। हयग्रीवः शंकुशिरा विप्रचित्तिरयोमुखः॥
पुलोमा वृषपर्वा च प्रहेतिर्हेतिरुत्कलः ॥१९॥ दैतेया दानवा यक्षा रक्षांसि च सहस्रशः।
इल्वलः वल्वलश्चैव दन्दशूको वृषध्वजः। कालनाभमहानाभौ भूतसंतापनो वृकः ॥२०॥
सुमालिमालिप्रमुखाः कार्तस्वरपरिच्छदाः। प्रतिषिध्येन्द्रसेनाग्र्यं मृत्योरपि दुरासदम्॥
अभ्यार्दयन्नसम्भ्रान्ताः सिंहनादेन दुर्मदाः ॥२१॥ गदाभिः परिघैर्बाणैः प्रासमुद्गरतोमरैः।
शूलैःपरश्वधैः खड्गैःशतघ्नीभिर्भुशुण्डिभिः। सर्वतोऽवाकिरन् शस्त्रैरस्त्रैश्च विबुधर्षभान् ॥२२॥
न तेऽदृश्यन्त संछन्नाः शरजालैः समन्ततः। पुङ्खानुपुङ्खपतितैर्ज्योतींषीव नभोघनैः ॥२३॥
न ते शस्त्रास्त्रवर्षौघा ह्यासेदुः सुरसैनिकान्। छिन्नाः सिद्धपथे देवैर्लघुहस्तैः सहस्रधा ॥२४॥
अथ क्षीणास्त्रशस्त्रौघा गिरिशृङ्गद्रुमोपलैः। अभ्यवर्षन् सुरबलं चिच्छिदुस्तांश्च पूर्ववत् ॥२५॥

तानक्षतान् स्वस्तिमतो निशाम्य शस्त्रास्त्रपूगैरथ वृत्रनाथाः।
द्रुमैर्दृषद्भिर्विविधाद्रिशृङ्गैरविक्षतांस्तत्रसुरिन्द्रसैनिकान् ॥२६॥

अशोभतेत्यन्वयः। उत्सिक्तः ऊर्जितः ॥ १४ ॥ पर्यस्तं वेष्टितम् वृत्रं छेत्तुं हन्तुम् ओजसा वेगेन अभ्यद्रवत्। अन्तंक यमम् ॥ १५ ॥ एतन्मन्वन्तरस्य प्रथमे चतुर्युगे त्रेतारम्भे नर्मदा[1]तटे ॥ १६ ॥ रुद्रैरिति युग्मम्। असुरा मृधे युद्धे रुद्रादिभिः परिवृतं शक्रं दृष्ट्वा नामृष्यन् नासहन्त ॥१७॥ वृत्रः पुरःसरो येषां ते ॥ १८ ॥ नमुचिरिति सार्द्धत्रयम्। नमुच्यादयः सिंहनादेन इन्द्रसेनापतिं प्रतिषिध्य निवार्य शस्त्रादिभिः तम् अभ्यार्दयन् पीडितवन्तः। कार्तस्वरपरिच्छदाः स्वर्णालङ्काराः। सेनाया अग्रे तिष्ठतीति सेनाग्र्यः। असम्भ्रान्ता निर्भयाः। दुरासदं दुष्प्रापम् ॥१९।२०।२१॥ गदाभिरिति सार्द्धम्। गदादिभि देवान् अवाकिरन् अभ्यवर्षन्। परिघो लोहदण्डः। प्रासः प्रक्षेपास्त्रम्। तोमरः गडांसा इति। परश्वधः परशुः। शतघ्नी तोप इति भुशुण्डी बन्दूक इति ॥ २२ ॥ ते देवाः। पुंखः शरस्य मूलप्रदेशः तमनु अपरस्य पुंखो यथा भवति तथा पतितैः शरसमूहैः। ज्योतींषि तारागणा न दृश्यन्ते तथा ॥ २३ ॥ न आसेदुः न प्रापुः। लघुहस्तैः हस्तकौशलैः सिद्धपथे आकाशे एव छिन्ना बभूवुः ॥ २४ ॥ उपलैः पाषाणैः। बलं सैन्यम् ॥२५॥ तानिन्द्रसैनिकान् शस्त्रसमूहैरक्षतान् द्रुमादिभिश्च अविक्षतान् स्वस्तिमतः सुखिनो निशाम्य दृष्ट्वा असुराः तत्रसुः भीता बभूवुरित्यन्वयः ॥ २६ ॥ प्रयासाः प्रहारलक्षणाः विमोघा निष्फलाः। यथा महत्सु क्षुद्रैः नीचैः प्रयुक्ताः रुश[2]त्योऽकल्याण्यः रूक्षवाचः

---

१. गङ्गायां घोष इति वत् तीरे लक्षणा।
२. रुशती वागकल्याणी। इत्यमरः।

सर्वे प्रयासा अभवन् विमोघाः कृताः कृता देवगणेषु दैत्यैः।
कृष्णानुकूलेषु यथा महत्सु क्षुद्रैः प्रयुक्ता रुशती रूक्षवाचः ॥२७॥
ते स्वप्रयासं वितथं निरीक्ष्य हरावभक्ता हतयुद्धदर्पाः।
पलायनायाऽऽजिमुखे विसृज्य पतिं मनस्ते दधुरात्तसाराः ॥२८॥
वृत्रोऽसुरांस्ताननुगान् मनस्वी प्रधावतः प्रेक्ष्य बभाष एतत्।
पलायितं प्रेक्ष्य बलं च भग्नं भयेन तीव्रेण विहस्य वीरः ॥२९॥
कालोपपन्नां रुचिरां मनस्विनामुवाच वाचं पुरुषप्रवीरः।
हे विप्रचित्ते नमुचे पुलोमन् मयानर्वन् शबर मे शृणुध्वम् ॥३०॥
जातस्य मृत्युर्ध्रुव एष सर्वतः प्रतिक्रिया यस्य न चेह क्लृप्ता।
लोको यशश्चाथ ततो यदि ह्यमुं को नाम मृत्युं न वृणीत युक्तम् ॥३१॥
द्वौ सम्मताविह मृत्यू दुरापौ यद् ब्रह्मसंधारणया जितासुः।
कलेवरं योगरतो विजह्याद् यदग्रणीर्वीरशयेऽनिवृत्तः ॥३२॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां षष्ठस्कन्धे इन्द्रवृत्रासुरयुद्धवर्णनं नाम-
दशमोऽध्यायः ॥१०॥

अथैकादशोऽध्यायः

श्रीशुक उवाच

त एवं शंसतो धर्म्यं वचः पत्युरचेतसः। नैवागृह्णन् भयत्रस्ताः पलायनपरा नृप ॥ १ ॥
विशीर्यमाणां पृतनामासुरीमसुरर्षभः। कालानुकूलैस्त्रिदशैः काल्यमानामनाथवत् ॥ २ ॥

क्षोमका न भवन्ति किन्तु विफला भवन्ति ॥ २७ ॥ आजिमुखे युद्धारम्भे ते प्रसिद्धास्ते दैत्या वितथं विफलं निरीक्ष्य पलायनं कर्तुं मनो दधुः चक्रुः। आत्तसारा निरस्तबलाः ॥ २८ ॥ मनस्वी वृत्रःभयेन प्रधावतो ऽसुरान् प्रेक्ष्य भग्नं बलं सैन्यं च प्रेक्ष्य एतत् बभाष इत्यन्वयः। विहस्य उपहासं कृत्वा ॥२९॥ कालोपपन्नां तत्कालोचिताम्। हे विप्रचित्यादयः मे वचः शृणुध्वम् ॥३०॥ जातस्य प्राणिमात्रस्य सर्वतः सर्वत्र। यस्य मृत्योः प्रतिक्रिया निवृत्युपायः न क्लृप्ता न कृता। अथ यदि ततो मृत्योर्दिव्यलोको यशश्च स्यातां तर्हि युक्तमुपयुक्तं मृत्युं को नाम न वृणीत न स्वीकुर्यात् ॥३१॥ सम्मतौ शास्त्रसम्मतौ। ब्रह्म-धारणया जितासुः सन् कलेवरं जह्यादिति यत् स एको मृत्युः। वीरशये रणाङ्गणे अग्रणीः अपराङ्मुखश्च सन् देहं जह्यादिति द्वितीयो मृत्युः ॥ ३२ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे गूढार्थदीपिन्यां दशमोऽध्यायः।

एकादशे तु संग्रामे वृत्रस्येन्द्राय सूक्तयः।
ज्ञानवैराग्यवीर्याप्ता भक्तिसिक्ताश्च काश्चन ॥ १ ॥

धर्म्यं धर्मादनपेतं शंसतः कथयतः पत्युर्वचः। अचेतसो निर्विचाराः ॥ १ ॥ विशीर्येति युग्मम्। त्रिदशैः देवैः विशीर्यमाणां पीड्यमानाम् अत एव अनाथवत् काल्यमानां विद्राव्यमाणाम् दृष्ट्वा अमर्षितः

दृष्ट्वाऽतप्यत संक्रुद्ध इन्द्रशत्रुरमर्षितः । तान्निवार्यौजसा राजन्निर्भर्त्स्येदमुवाच ह ॥ ३ ॥
किं व उच्चरितैर्मातुर्धावद्भिः पृष्ठतो हतैः । न हि भीतवधः श्लाघ्यो न स्वर्ग्यः शूरमानिनाम् ॥ ४ ॥
यदि वः प्रधने श्रद्धा सारं वा क्षुल्लका हृदि । अग्रे तिष्ठत मात्रं मे न चेद् ग्राम्यसुखे स्पृहा ॥ ५ ॥
एवं सुरगणान् क्रुद्धो भीषयन् वपुषा रिपून् । व्यनदत् सुमहाप्राणो येन लोका विचेतसः ॥ ६ ॥
तेन देवगणाः सर्वे वृत्रविस्फोटनेन वै । निपेतुर्मूर्च्छिता भूमौ यथैवाशनिना हताः ॥ ७ ॥

ममर्द पद्भ्यां सुरसैन्यमातुरं निमीलिताक्षं रणरङ्गदुर्मदः ।
गां कम्पयन्नुद्यतशूल ओजसा नालं वनं यूथपतिर्यथोन्मदः ॥ ८ ॥
विलोक्य तं वज्रधरोऽत्यमर्षितः स्वशत्रवेऽभिद्रवते महागदाम् ।
चिक्षेप तामापततीं सुदुःसहां जग्राह वामेन करेण लीलया ॥ ९ ॥
स इन्द्रशत्रुः कुपितो भृशं तया महेन्द्रवाहं गदयोग्रविक्रमः ।
जघान कुम्भस्थल उन्नदन् मृधे तत्कर्म सर्वे समपूजयन् नृप ॥ १० ॥
ऐरावतो वृत्रगदाभिमृष्टो विघूर्णितोऽद्रिः कुलिशाहतो यथा ।
अपासरद्भिन्नमुखः सहेन्द्रो मुञ्चन्नसृक् सप्तधनुर्भृशार्तः ॥ ११ ॥
न सन्नवाहाय विषण्णचेतसे प्रायुङ्क्त भूयः स गदां महात्मा ।
इन्द्रोऽमृतस्यन्दिकराभिमर्शवीतव्यथक्षतवाहोऽवतस्थे ॥ १२ ॥
स तं नृपेन्द्राहवकाम्यया रिपुं वज्रायुधं भ्रातृहणं विलोक्य ।
स्मरंश्च तत्कर्म नृशंसमंहः शोकेन मोहेन हसन् जगाद ॥ १३ ॥

असहमानः । ओजसा बलात्कारेण तान् देवान् उवाच हेत्यनादरे॥ २।३ ॥हे मातुरुच्चरिताः पुरीषवन्निर्गता हे देवाः । हतैः दैत्यैर्वः युष्माकं किं फलं न किञ्चिदित्यर्थः ॥४॥ हे [1]क्षुल्लकाः । तुच्छजातिका । प्रधने युद्धे । सारं धैर्यम् मात्रं क्षणमात्रम् । ग्राम्यसुखे विषयभोगे ॥ ५ ॥ सुमहाप्राणो महाबलः विचेतसः भ्रान्तचित्ताः ॥६॥ वै चार्थे । विस्फोटनेन ताडनेन अशनिना वज्रेण ॥७॥ रणरंगे रणभूमौ दुर्मदः उन्मत्तः । ओजसा बलेन गां पृथ्वीं कम्पयन् । नलानां कमलानामिदं नालं वनम् । नलः कमलेऽपि इति मेदिनी यूथपतिः गजराजः ॥८॥ तं वृत्रम् । अत्यमर्षितः असहमानः । स्वशत्रवे शत्रुं हन्तुम् । लीलया अनायासेन ॥९॥ स वृत्रः । तया गदया ऐरावतं कुम्भस्थले जघान । उन्नदन् गर्जन् सन् । सर्वेस्वपरसैनिकाः प्रशशंसुः ॥१०॥ अभिमृष्टः ताडितः भिन्नमुखश्च ऐरावतः असृक् रक्तं मुञ्चन् इन्द्रं वहन् सप्तधनुःप्रमाणमष्टाविंशतिहस्तमात्रं देशमपासरत् पृष्ठतो जगाम ॥११॥महात्मा धर्मात्मा स वृत्रः तस्मै इन्द्राय भूयो गदां न प्रायुङ्क्त न चिक्षेप । कथंभूताय । सन्नः विह्वलितो वाहो वाहनं यस्य तस्मै । अमृतस्राविणा करेण योऽभिमर्शः स्पर्शस्तेन वीता व्यथा क्षतं व्रणं च यस्य तथाभूतो वाहो । यस्य सः वाहनं यस्य सः॥१२॥ स वृत्रः आहवकाम्यया युद्धेच्छया अवस्थितं रिपुं विलोक्य अंहः पापरूपं तत् क्रूरं कर्म च स्मरन् उपहासं च कुर्वन् सन्

---

१. क्षुल्लस्तुच्छे बुभुक्षिते' इत्यभिधानात् । स्वार्थे कः ।

वृत्र उवाच

दिष्ट्या भवान् मे समवस्थितो रिपुर्यो ब्रह्महा गुरुहा भ्रातृहा च।
दिष्ट्याऽनृणोऽद्याहमसत्तम त्वया मच्छूलनिर्भिन्नदृषद्धृदाऽचिरात् ॥१४॥
यो नोऽग्रजस्यात्मविदो द्विजातेर्गुरोरपापस्य च दीक्षितस्य।
विस्रभ्य खड्गेन शिरांस्यवृश्चत् पशोरिवाकरुणः स्वर्गकामः ॥१५॥
ह्रीश्रीदयाकीर्तिभिरुज्झितं त्वां स्वकर्मणापुरुषादैश्च गर्ह्यम्।
कृच्छ्रेण मच्छूलविभिन्नदेहमस्पृष्टवह्निं समदन्ति गृध्राः ॥१६॥
अन्येऽनु ये त्वेह नृशंसमज्ञा ये ह्युद्यतास्त्राः प्रहरन्ति मह्यम्।
तैर्भूतनाथान् सगणान् निशातत्रिशूलनिर्भिन्नगलैर्यजामि ॥१७॥
अथो हरे मे कुलिशेन वीर हर्ता प्रमथ्यैव शिरो यदीह।
तत्राऽनृणो भूतबलिं विधाय मनस्विनां पादरजः प्रपत्स्ये ॥१८॥
सुरेश कस्मान्न हिनोषि वज्रं पुरः स्थिते वैरिणि मय्यमोघम्।
मा संशयिष्ठा न गदेव वज्रं स्यान्निष्फलं कृपणार्थेव याच्ञा ॥१९॥
नन्वेष वज्रस्तव शक्र तेजसा हरेर्दधीचेस्तपसा च तेजितः।
तेनैव शत्रुं जहि विष्णुयन्त्रितो यतो हरिर्विजयः श्रीर्गुणास्ततः ॥२०॥
अहं समाधाय मनो यथाऽऽह संकर्षणस्तच्चरणारविन्दे।
त्वद्वज्ररंहोलुलितग्राम्यपाशो गतिं मुनेर्याम्यपविद्धलोकः ॥२१॥

जगादेत्यन्वयः ॥ १३ ॥ ब्राह्मणादिघाती स भवान् मे अग्रे उपस्थितः एतत् दिष्ट्या शोभनं जातम्। किञ्च अद्य अहं त्वया निमित्तभूतेन अचिरात् शीघ्रमेव भ्रातुः अनृणः स्याम् एतदपि शोभनतरम्। कथंभूतेन। मच्छूलेन विदीर्णं पाषाणतुल्यं हृत् यस्य तेन ॥ १४ ॥ यो भवान् नोऽग्रजस्य विस्रभ्य विश्वस्य शिरांसि अवृश्चत् तं त्वां गृध्राः समदन्ति[1] इति द्वयोरन्वयः। गर्ह्यं निन्द्यम्। अस्पष्टवह्निम् अदग्धदेहम्। इत्यशेषनाशोऽसूचि ॥१५।१६॥ अन्येऽपि ये देवाः इह युद्धे त्वा त्वामनुवर्तमाना मह्यं प्रहरिष्यन्ति तैरपि भूतनाथान् भैरवादीन् यक्ष्यामीत्यन्वयः देवा। निशातेन तीक्ष्णेन शूलेन भिन्नो गलो येषां तैः ॥१७॥ अथो अथवा हे हरे इन्द्र। यदि कुलिशेन वज्रेण प्रमथ्य मे शिरो हर्ता हरिष्यति तदा तेनैव मृतेन देहेन बलिं विधाय अनृणः सन् पादरजः प्रपत्स्ये वीरगतिं स्वर्गं प्राप्स्यामि॥१८॥कस्मात् न हिनोषि न क्षिपसि। कृपणार्था कृपणविषया याच्ञा यथा व्यर्था भवति तथा वज्रं निष्फलं न स्यात् ॥ १९ ॥ हरेः तेजसा तपसा च तीक्ष्णीकृतः। यन्त्रितः प्रेरितः। यतो यत्र। ततः तत्रैव ॥ २० ॥ संकर्षणो यथा आह तथा तत्रैव मनः समाधाय स्थिरीकृत्य अपविद्धलोकः त्यक्तदेहः सन् मुनेर्गतिं श्रीविष्णुं प्राप्स्यामीत्यन्वयः तव वज्रवेगेन लुलितः छिन्नः ग्राम्यपाशो विषयासक्तिर्यस्य तथाभूतोऽहम् ॥ २१ ॥

१. अत्स्यन्ति। वर्तमाने सामीप्ये लट्। क्रोधादसंभवोक्तिरियम्।

पुंसां किलैकान्तधियां स्वकानां याः सम्पदो दिवि भूमौ रसायाम् ।
न राति यद् द्वेष उद्वेग आधिर्मद कलिर्व्यसनं सम्प्रयासः ॥२२॥
त्रैवर्गिकायासविघातमस्मत्पतिर्विधत्ते पुरुषस्य शक्र ।
ततोऽनुमेयो भगवत्प्रसादो यो दुर्लभोऽकिंचनगोचरोऽन्यैः ॥२३॥
अहं हरे तव पादैकमूलदासानुदासो भवितास्मि भूयः ।
मनः स्मरेतासुपतेर्गुणांस्ते गृणीत वाक् कर्म करोतु कायः ॥२४॥
न नाकपृष्ठं न च पारमेष्ठ्यं न सार्वभौमं न रसाधिपत्यम् ।
न योगसिद्धीरपुनर्भवं वा समञ्जस त्वा विरहय्य काङ्क्षे ॥२५॥
अजातपक्षा इव मातरं खगाः स्तन्यं यथा वत्सतराः क्षुधार्ताः ।
प्रियं प्रियेव व्युषितं विषण्णा मनोऽरविन्दाक्ष दिदृक्षते त्वाम् ॥२६॥
ममोत्तमश्लोकजनेषु सख्यं संसारचक्रे भ्रमतः स्वकर्मभिः ।
त्वन्माययाऽऽत्माऽऽत्मजदारगेहेष्वासक्तचित्तस्य न नाथ भूयात् ॥२७॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां षष्ठस्कन्धे वृत्रस्येन्द्रोपदेशो नामैकादशोऽध्यायः ॥ ११ ॥

एकान्तधियां भगवन्निष्ठवुद्धीनां पुंसां याः काश्चन सम्पदः ताः स न राति न ददाति । यद् याभ्यः सम्पद्भ्यः द्वेषादयो भवन्ति । आधिर्मानसी व्यथा कलिः कलहः । व्यसनं द्यूतस्त्रीमद्यरूपम् । संप्रयासः रक्षणाय प्रयत्नः । रसायां रसातले ॥२२॥ त्रैवर्गिको धर्मार्थकामविषयको य आयासस्तस्य विघातम् । ततो विघातात् । अकिञ्चनानां भक्तानां दृष्टिगोचरो भवति । अन्यैर्दुर्लभः ॥२३॥ तव पादावेव एकं मुख्यं मूलमाश्रयो येषां तेषाम् । भविताऽस्मि भवेयम् । असुपतेः प्राणेश्वरस्य तव गुणान् मनः स्मरेत् वाक् गृणीत तानेव कीर्तयेत् । कर्म सेवाम् ॥२४॥ हे समञ्जस प्रेमास्पदीभूत ! भगवन् । त्वां विरहय्य विहाय किमपि न काङ्क्षे इत्यन्वयः । किं तत् स्वर्गपदं ब्रह्मपदं चक्रवर्तिपदं पातालाधिपत्यं किं वहुना मोक्षं वा नेच्छामि क्रमेणार्थाः ॥२५॥ खगाः खगवालकाः यथा मातरम् वत्सतराः यथा स्तन्यं दुग्धं विषण्णा वियोगार्ता प्रिया भार्या यथा व्युषितं परदेशस्थं पतिं तथा तापत्रयपीडितं मे मनः त्वां द्रष्टुमिच्छति ॥ २६ ॥ स्वकर्मभिर्भ्रांतःममे जनेषु भक्तेषु सख्यं भूयात् । त्वन्मायया आत्मादिषु आसक्तचित्तस्य मे तेषु सख्यं न भूयादित्यन्वयः । आत्मा देहः ॥ २७ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे गूढार्थदीपिन्यामेकादशोऽध्यायः ।

अथ द्वादशोऽध्यायः

ऋषिरुवाच

एवं जिहासुर्नृप देहमाजौ मृत्युं वरं विजयान्मन्यमानः।
शूलं प्रगृह्याभ्यपतत् सुरेन्द्रं यथा महापुरुषं कैटभोऽप्सु ॥ १ ॥
ततो युगान्ताग्निकठोरजिह्वमाविध्य शूलं तरसाऽसुरेन्द्रः।
क्षिप्त्वा महेन्द्राय विनद्य वीरो हतोऽसि पापेति रुषा जगाद ॥ २ ॥
ख आपतत् तद् विचलद्ग्रहोल्कवन्निरीक्ष्य दुष्प्रेक्ष्यमजातविक्लवः।
वज्रेण वज्री शतपर्वणाच्छिनद् भुजं च तस्योरगराजभोगम् ॥ ३ ॥
छिन्नैकबाहुः परिघेण वृत्रः संरब्ध आसाद्य गृहीतवज्रम्।
हनौ तताडेन्द्रमथामरेभं वज्रं च हस्तान्न्यपतन्मघोनः ॥ ४ ॥
वृत्रस्य कर्मातिमहाद्भुतं तत् सुरासुराश्चारणसिद्धसङ्घाः।
अपूजयंस्तत् पुरुहूतसङ्कटं निरीक्ष्य हाहेति विचुक्रुशुर्भृशम् ॥ ५ ॥
इन्द्रो न वज्रं जगृहे विलज्जितश्च्युतं स्वहस्तादरिसंनिधौ पुनः।
तमाह वृत्रो हर आत्तवज्रो जहि स्वशत्रुं न विषादकालः ॥ ६ ॥
युयुत्सतां कुत्रचिदाततायिनां जयः सदैकत्र न वै परात्मनाम्।
विनैकमुत्पत्तिलयस्थितीश्वरं सर्वज्ञमाद्यं पुरुषं सनातनम् ॥ ७ ॥

द्वादशे शत्रुणा भीतो तद्वचःप्रेरितो बलात्।
इन्द्रो वज्रेण वृत्रस्य शिरश्चिच्छेद संगरे ॥

आजौ संग्रामे। जिहासुः त्यक्तुमिच्छुः। विजयादपि। अप्सु प्रलयोदके कैटभो दैत्यः यथा श्रीविष्णुम् अभ्यपतत् सम्मुखमागच्छत् तथा ॥ १ ॥ ततः स वीरः शूलमाविध्य भ्रामयित्वा तरसा वेगेन क्षिप्त्वा विनद्य च मया त्वं हतोऽसीति रुषा जगादेत्यन्वयः। 'हे पापिन्[1]! शूलं कीदृक्। प्रलयाग्निवत् कठोरा जिह्वा शिखा यस्य तत् ॥ २ ॥ वज्री इन्द्रः विचलत् परिभ्रमत् खे आपतत् तत् शूलं तस्य भुजं च वज्रेण अच्छिनदित्यन्वयः। ग्रहः सूर्यः उल्का अङ्गारश्च ज्वाला वा तयोर्द्वन्द्वाद्वतिः। अजातविक्लवः भयशून्यः। शतं पर्वाणि ग्रन्थयो यस्मिन् तत्। उरगराजो वासुकिस्तस्य भोगो देहस्तदाकारं तद्वत्पुष्टम् ॥ ३ ॥ संरब्धः क्रुद्धः वृत्रः इन्द्रमासाद्य परिघेण लोहदण्डेन तस्य हनौ चिबुकप्रान्ते तताड। अथ अनन्तरम् अमरेभं ऐरावतं च तताड[2] ॥ ४ ॥ अपूजयन् प्राशंसन्। विचुक्रुशुः चीत्कारं चक्रुः पुरुहूत इन्द्रः ॥ ५ ॥ हे हरे! इन्द्र! ॥ ६ ॥ आततायिनां शस्त्रधारिणां योद्धुमिच्छतां सदा जयो न किन्तु कुत्रचित् जयः एकत्र कुत्रचिन्नैव। कुतः। परात्मनां[3] पराधीनात्मनाम्। कं विना। एकं पुरुषं श्रीविष्णुं विना। तस्य तु सर्वत्र जय एव। ईश्वरं कर्तारम् ॥ ७ ॥

---

१. पापः अर्श आद्यजन्तः। २. अनित्यण्यन्ताश्चुरादयः' इति न णिच्।
३. परस्य आयत्तः अधीनः आत्मा येषामिति मध्यपदलोपी समासः।

लोकाः सपाला यस्येमे श्वसन्ति विवशा वशे । द्विजा इव शिचा बद्धाः स काल इह कारणम्
ओजः सहो बलं प्राणममृतं मृत्युमेव च । तमज्ञाय जनो हेतुमात्मानं मन्यते जडम् ॥ ९ ॥
यथा दारुमयी नारी यथा यन्त्रमयो मृगः । एवं भूतानि मघवन्नीशतन्त्राणि विद्धि भोः ॥१०॥
पुरुषः प्रकृतिर्व्यक्तमात्मा भूतेन्द्रियाशयाः । शक्नुवन्त्यस्य सर्गादौ न विना यदनुग्रहात् ॥११॥
अविद्वानेवमात्मानं मन्यतेऽनीशमीश्वरम् । भूतैः सृजति भूतानि ग्रसते तानि तैः स्वयम्॥१२॥
आयुः श्रीः कीर्तिरैश्वर्यमाशिषः पुरुषस्य याः । भवन्त्येव हि तत्काले यथानिच्छोर्विपर्ययाः॥१३
तस्मादकीर्तियशसोर्जयापजययोरपि । समः स्यात् सुखदुःखाभ्यां मृत्युजीवितयोस्तथा ॥१४॥
सत्त्वं रजस्तम इति प्रकृतेर्नात्मनो गुणाः । तत्र साक्षिणमात्मानं यो वेद न स बध्यते ॥१५॥
पश्य मां निर्जितं शक्र वृक्णायुधभुजं मृधे । घटमानं यथाशक्ति तव प्राणजिहीर्षया ॥१६॥
प्राणग्लहोऽयं समर इष्वक्षो वाहनासनः । अत्र न ज्ञायतेऽमुष्य जयोऽमुष्य पराजयः ॥१७॥

श्रीशुक उवाच

इन्द्रो वृत्रवचः श्रुत्वा गतालीकमपूजयत् । गृहीतवज्रः प्रहसंस्तमाह गतविस्मयः ॥१८॥

इन्द्र उवाच

अहो दानव सिद्धोऽसि यस्य ते मतिरीदृशी । भक्तः सर्वात्मनाऽऽत्मानं सुहृदं जगदीश्वरम् १९
भवानतार्षीन्मायां वै वैष्णवीं जनमोहिनीम् । यद् विहायासुरं भावं महापुरुषतां गतः ॥२०॥
खल्विदं महदाश्चर्यं यद् रजःप्रकृतेस्तव । वासुदेवे भगवति सत्त्वात्मनि दृढा मतिः ॥२१॥
यस्य भक्तिर्भगवति हरौ निःश्रेयसेश्वरे । विक्रीडतोऽमृताम्भोधौ किं क्षुद्रैःखातकोदकैः ॥२२॥

यस्य वशे स्थिता विवशाः सन्तः श्वसन्ति चेष्टन्ते । शिचा जालेन बद्धाः पक्षिणो यथा । इह जयादौ ॥८॥ ओज आदीन् प्रति कालं परमात्मानं हेतुमविज्ञाय जडम् आत्मानं देहमेव हेतुं मन्यते । क्रमादिन्द्रियमनोदेहशक्तयः । अमृतं जीवनं मोक्षः मृत्युः संसारश्च ॥९॥ दारुमयी काष्ठपुत्तलिका । तन्त्राणि अधीनानि॥१०॥ व्यक्तं महत्तत्त्वम् । आत्मा अहङ्कारः । अस्य विश्वस्य । न शक्नुवन्ति न समर्था भवन्ति ॥ ११ ॥ एवमविद्वान ईश्वरस्य स्वातन्त्र्यं जीवस्य पारतन्त्र्य मजानन् । अनीशमसमर्थमात्मानं जीवमीश्वरं स्वतन्त्रं मन्यते । भूतैः पित्रादिभिः व्याघ्रादिभिश्च । स्वयमीश्वरः ॥१२॥ या आशिषो नानाभोगाः ताः सर्वाः तत्काले अनुकूलकाले । यथा पराजयमनिच्छतोऽपि विपर्ययाः अपकीर्त्यादयो भवन्ति तद्वत् ॥ १३ ॥ सुखेति सप्तम्यर्थे तृतीया ॥ १४ ॥ स न बध्यते हर्षविषादिभिर्न लिप्यते ॥ १५ ॥ वृक्णं छिन्नमायुधं भुजश्च यस्य तम् । घटमानं चेष्टमानम् ॥ १६ ॥ समरे द्यूतलक्षणे । ग्लहः[1] पणः । इषवोऽक्षाः पाशका यस्मिन् । वाहनानि हस्त्यश्वादीनि इतस्ततश्चल्यमानानि आसनानि फलका यस्मिन् ॥ १७ ॥ गतालीकं निष्कपटम् । तं वृत्रम् गतविस्मयः प्राप्तविस्मयः ॥ १८ ॥ आत्मानं परमात्मानं भक्तः सेवितवानसि । 'आदिकर्मणि क्तः' कर्तरि चेति कर्तरि क्तः ॥ १९ ॥ महापुरुषतां भगवद्भावम् ॥ २० ॥ ईश्वरे मुक्तिप्रदे सत्त्वात्मनि सत्त्वमूर्तौ । यस्य भक्तिः तस्य आनन्दसमुद्रे विक्रीडतः तुच्छैः खातकोदकैः गर्तादिजलोपमैः स्वर्गादिभिः किं प्रयोजनं न किञ्चिदित्यर्थः ॥ २२ ॥

---

१. ग्लहो ग्राह्यपणे स्मृतः ।

श्रीशुक उवाच

इति ब्रुवाणावन्योन्यं धर्मजिज्ञासया नृप। युयुधाते महावीर्याविन्द्रवृत्रौ युधाम्पती ॥२३॥
आविध्य परिघं वृत्रः कार्ष्णायसमरिंदमः। इन्द्राय प्राहिणोद् घोरं वामहस्तेन मारिष ॥२४॥
स तु वृत्रस्य परिघं करं च करभोपमम्। चिच्छेद युगपद्देवो वज्रेण शतपर्वणा ॥२५॥
दोर्भ्यामुत्कृत्तमूलाभ्यां बभौ रक्तस्रवोऽसुरः छिन्नपक्षो यथा गोत्रः खाद् भ्रष्टो वज्रिणा हतः॥२६॥
कृत्वाऽधरां हनुं भूमौ दैत्यो दिव्युत्तरां हनुम् ॥२७॥ नभोगम्भीरवक्त्रेण लेलिहोल्बणजिह्वया।
दंष्ट्राभिः कालकल्पाभिर्ग्रसन्निव जगत्त्रयम् ॥२८॥ अतिमात्रमहाकाय आक्षिपंस्तरसा गिरीन्।
गिरिराट् पादचारीव पद्भ्यां निर्जरयन् महीम् ।२९। जग्रास स समासाद्य वज्रिणं सहवाहनम्
महाप्राणो महावीर्यो महासर्प इव द्विपम् ॥३०॥ वृत्रग्रस्तं तमालक्ष्य सप्रजापतयः सुराः।

हा कष्टमिति निर्विण्णाश्चुक्रुशुः समहर्षयः ॥ ३१॥

निगीर्णोऽप्यसुरेन्द्रेण न ममारोदरं गतः। महापुरुषसन्नद्धो योगमायाबलेन च ॥३२॥
भित्त्वा वज्रेण तत्कुक्षिं निष्क्रम्य बलभिद् विभुः। उच्चकर्त शिरः शत्रोर्गिरिशृङ्गमिवौजसा३३

वज्रस्तु तत्कन्धरमाशुवेगः कृन्तन् समन्तात् परिवर्तमानः।
न्यपातयत् तावदहर्गणेन यो ज्योतिषामयने वार्त्रहत्ये ॥३४॥

युध्यन्ते इति युधो योद्धारः तेषां पती मुख्यौ। युद्धकुशलौ वा युत् शब्दः युद्धवाच्यपि ॥२३॥ हे मारिष ![1] आर्य। कार्ष्णायसं लोहमयं परिघं दण्डम् इन्द्रं हन्तुं प्राहिणोत् चिक्षेप। आविध्य भ्रामयित्वा ॥ २४ ॥ स तु इन्द्रः करभोपमं गजशुण्डोपमम्। शतं पर्वाणि ग्रन्थयो यस्मिन् तेन ॥ २५ ॥ उत्कृत्तं छिन्नं मूलं ययोस्ताभ्याम्। वज्रिणा इन्द्रेण हतः खात् आकाशात् पतितः गोत्रः पर्वतो यथा भाति तथा ॥ २६ ॥ कृत्वेति सार्द्धत्रयम्। दैत्यः दैत्यपक्षपातित्वान्नतु दित्यपत्यत्वात्। अधरां हनुं चिबुकं भूमौ उत्तरां च दिवि मेघाश्रितमार्गे कृत्वा तरसा बलेन गिरीन् प्रक्षिपन् महीं जर्जरीकुर्वन् वज्रिणं समासाद्य तं सवाहनं जग्रास निगिलितवानित्यन्वयः। लेलिहः सर्पस्तद्वत्। उल्वणया भीषणया। अतिमात्रोऽतीवोच्चः। प्राणो बलम् वीर्यं प्रभावः। कल्पाभिः तुल्याभिः। महासर्पोऽजगरः ॥२८।२९।३०॥ निर्विण्णाः चिन्ताक्रान्ताः। चुक्रुशुः विलापं चक्रुः ॥३१॥ निगीर्णो निगिलितः। महापुरुषेण नारायणकवचेन सन्नद्धः बद्धः ॥३२॥ बलभित् इन्द्रः। ओजसा बलेन। उच्चकर्त चिच्छेद। कृती छेदने ॥ ३३ ॥ तत्कन्धरं वृत्रग्रीवां कृन्तन् छिन्दन् परिवर्तमानः सर्वतः परिभ्रमन् वज्रः वार्त्रहत्ये वृत्रहत्यायोग्ये काले भूमौ न्यपातयदित्यन्वयः। केन। ज्योतिषां सूर्यादीनामयने दक्षिणोत्तरगतिरूपे अयने [2]योऽहर्गणस्तेन ॥ ३४ ॥

---

१. मारिषः शाकमिद्यार्ये।

२. षष्ट्युत्तरशतत्रयलक्षणेन। यद्वा वृत्रहत्यैव वार्त्रहत्यं तस्मिन्। स्वार्थे तद्धितः। नैमित्तिकाधारसप्तमीयम्। वृत्रहननिमित्ते प्रवृत्तो वज्रः।

तदा च खे दुन्दुभयो विनेदुर्गन्धर्वसिद्धाः समहर्षिसङ्घाः ।
वार्त्रघ्नलिङ्गैस्तमभिष्टुवाना मन्त्रैर्मुदा कुसुमैरभ्यवर्षन् ॥३५॥

वृत्रस्य देहान्निष्क्रान्तमात्मज्योतिररिंदम । पश्यतां सर्वलोकानामलोकं समपद्यत ॥३६॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां षष्ठस्कन्धे वृत्रवधो नाम द्वादशोऽध्यायः ॥१२॥

अथ त्रयोदशोऽध्यायः

श्रीशुक उवाच

वृत्रे हते त्रयो लोका विना शक्रेण भूरिद । सपाला ह्यभवन् सद्यो विज्वरा निर्वृतेन्द्रियाः ॥१॥

देवर्षिपितृभूतानि दैत्या देवानुगाः स्वयम् । प्रतिजग्मुः स्वधिष्ण्यानि ब्रह्मेशेन्द्रादयस्ततः ।२।

राजोवाच

इन्द्रस्यानिर्वृतेर्हेतुं श्रोतुमिच्छामि भो मुने । येनासन् सुखिनो देवा हरेर्दुःखं कुतोऽभवत् ॥३॥

श्रीशुक उवाच

वृत्रविक्रमसंविग्नाः सर्वे देवाः सहर्षिभिः । तद्वधायार्थयन्निन्द्रं नैच्छद् भीतो बृहद्वधात् ।४।

इन्द्र उवाच

स्त्रीभूजलद्रुमैरेनो विश्वरूपवधोद्भवम् । विभक्तमनुगृह्णद्भिर्वृत्रहत्यां क्व माऽर्ज्म्यहम् ॥५॥

श्रीशुक उवाच

ऋषयस्तदुपाकर्ण्य महेन्द्रमिदमब्रुवन् । याजयिष्याम भद्रं ते हयमेधेन मा स्म भैः ॥६॥

खे आकाशे । वृत्रहन्तुरिन्द्रस्य लिङ्गैः वीर्यप्रकाशकैः मन्त्रैः । तम् अभिष्टुवानाः स्तुतिं कुर्वन्तः ॥ ३५ ॥ आत्मज्योतिः जीवसंज्ञकम् । अलोकं लोकातीतं भगवन्तं प्राप ॥ ३६ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे गूढार्थदीपिन्यां द्वादशोऽध्यायः ।

ब्रह्महत्याभयादिन्द्रः प्रविष्टो मानसं सरः ।
पापान्मुक्तोऽश्वमेधेन गतः स्वर्गं त्रयोदशे ॥ १ ॥

भूरि धनं ददाति । भूरीन् दुष्टान् द्यति खण्डयतीति वा हे भूरिद ! दोऽवखण्डने धातुः । विज्वराः सन्तापरहिताः । निर्वृतेन्द्रियाः स्वस्थमनसः ॥ १ ॥ ततो युद्धस्थलात् । धिष्ण्यानि स्वस्वस्थानानि । इन्द्रस्तु पश्चाद् गतो न तु समकालं ब्रह्महत्याभयान्मानससरोवरादागत्य अश्वमेधानन्तरमिति ज्ञेयमत्र ॥ २ ॥ अनिर्वृतेः अप्रसन्नतायाः । हरेः इन्द्रस्य । आर्थयन् प्रार्थयन्त[1] । बृहद्वधात् ब्राह्मणवधात् । संविग्ना भीताः ॥ ४ ॥ अनुगृह्णद्भिः मयि अनुग्रहं कुर्वद्भिः स्त्र्यादिभिः एनः पापं विभक्तं विभज्य

---

१. अर्थंप्रातिपदिकात्कृदन्ताद् 'तत्करोति' इति णिचि कृते रूपं सिध्यति ।

हयमेधेन पुरुषं परमात्मानमीश्वरम् । इष्ट्वा नारायणं देवं मोक्ष्यसेऽपि जगद्वधात् ॥ ७ ॥

ब्रह्महा पितृहा गोघ्नो मातृहाऽऽचार्यहाघवान्। श्वादः पुल्कसको वापि शुद्ध्येरन् यस्य कीर्तनात्

तमश्वमेधेन महामखेन श्रद्धान्वितोऽस्माभिरनुष्ठितेन ।
हत्वापि सब्रह्म चराचरं त्वं न लिप्यसे किं खलनिग्रहेण ॥ ९ ॥

श्रीशुक उवाच

एवं संचोदितो विप्रैर्मरुत्वानहनद् रिपुम् । ब्रह्महत्या हते तस्मिन्नाससाद वृषाकपिम् ॥१०॥
तयेन्द्रः स्माऽसहत् तापं निर्वृतिर्नामुमाविशत्।ह्रीमन्तं वाच्यतां प्राप्तं सुखयन्त्यपि नो गुणाः ।११।
तां ददर्शानुधावन्तीं चाण्डालीमिव रूपिणीं । जरया वेपमानाङ्गीं यक्ष्मग्रस्तामसृक्पटाम् १२
विकीर्य पलितान् केशांस्तिष्ठ तिष्ठेति भाषिणीम् । मीनगन्ध्यसुगन्धेन कुर्वतीं मार्गदूषणम् ।१३
नभो गतो दिशः सर्वाः सहस्राक्षो विशाम्पते । प्रागुदीचीं दिशं तूर्णं प्रविष्टो नृप मानसम् ।१४।

स आवसत् पुष्करनालतन्तूनलब्धभोगो यदिहाग्निदूतः ।
वर्षाणि साहस्रमलक्षितोऽन्तः स चिन्तयन् ब्रह्मवधाद्विमोक्षम् ॥१५॥
तावत् त्रिणाकं नहुषः शशास विद्यातपोयोगबलानुभावः ।
स सम्पदैश्वर्यमदान्धबुद्धिर्नीतस्तिरश्चां गतिमिन्द्रपत्न्या ॥१६॥

गृहीतम् । क्व मार्ज्मि क्व प्रक्षालयामि ॥ ५ ॥ मा स्म भैः मा भैषीः ॥ ६ ॥ जगद्वधात् वधजनित पापादपि किं पुनर्वृत्रवधात् ॥ ७ ॥ यस्य नारायणस्य । श्वादः श्वपाकः । पुल्कसः तत्समः पापजातिः (कसाई) ॥ ८ ॥ श्रद्धान्वितस्त्वं यज्ञेन तं नारायणम् इष्ट्वा सब्रह्म ब्राह्मणसहितं सर्वं जगत् हत्वापि यर्हि न लिप्यसे तर्हि खलनिग्रहेण किं कथमित्यन्वयः ॥९॥ मरुत्वान् इन्द्रः । वृषा[1]कपिमिन्द्रम् ॥ १० ॥ स्म एवार्थे इन्द्र एव नान्यः । निर्वृतिः सुखम् । ह्रीमन्तं लज्जया अधोमुखम् । कुतः । वाच्यतां निन्द्यतां प्राप्तम् ॥ ११ ॥ तामिति युग्मम् । इन्द्रः रूपिणीं मूर्तिमतीं तां ब्रह्महत्यां ददर्श दृष्ट्वा च पलायित इति शेषेणान्वयः । वेपमानं कम्पमानमङ्गं यस्याः । असृक्पटां रक्तरञ्जितवस्त्राम् । मीनस्येव गन्धो यस्य स चासौ असुः श्वासवायुस्तस्य गन्धेन । पलितान् श्वेतान् लम्बमानान् ॥ १२।१३ ॥ नभ आदिषु धावन् प्रागुदीचीम् ऐशानीं दिशं यातः सन् अन्यैर्दुष्प्रवेशं सरोवरं प्रविष्टः । विशां पते हे प्रजापते राजन् ॥ १४ ॥ स इन्द्रः अलक्षितः सर्वैरज्ञात एव सहस्रं वर्षाणि तन्तुषु आवसत् । अलब्धेति अग्नेर्जले प्रवेशासंभवात् । किं कुर्वन् । अन्तर्मनसि विमोक्षं चिन्तयन् ॥ १५ ॥ यावत् आवसत् तावत् नहुषो

---

1. 'वृषाकपिर्हरे शक्रे कृष्णे च जातवेदसि' इत्यभिधानात् ।

ततो गतो ब्रह्मगिरोपहूत ऋतम्भरध्याननिवारिताघः ।
पापस्तु दिग्देवतया हतौजास्तं नाभ्यभूदवितं विष्णुपत्न्या ॥१७॥

तं च ब्रह्मर्षयोऽभ्येत्य हयमेधेन भारत । यथावद् दीक्षयांचक्रुः पुरुषाराधनेन ह ॥१८॥
अथेज्यमाने पुरुषे सर्वदेवमयात्मनि । अश्वमेधे महेन्द्रेण वितते ब्रह्मवादिभिः ॥१९॥
स वै त्वाष्ट्रवधो भूयानपि पापचयो नृप । नीतस्तेनैव शून्याय नीहार इव भानुना ॥२०॥

स वाजिमेधेन यथोदितेन वितायमानेन मरीचिमिश्रैः ।
इष्ट्वाधियज्ञं पुरुषं पुराणमिन्द्रो महानास विधूतपापः ॥२१॥
इदं महाख्यानमशेषपाप्मनां प्रक्षालनं तीर्थपदानुकीर्तनम् ।
भक्त्युच्छ्रयं भक्तजनानुवर्णनं महेन्द्रमोक्षं विजयं मरुत्वतः ॥२२॥
पठेयुराख्यानमिदं सदा बुधाः शृण्वन्त्यथो पर्वणि पर्वणीन्द्रियम् ।
धन्यं यशस्यं निखिलाघमोचनं रिपुञ्जयं स्वस्त्ययनं तथाऽऽयुषम् ॥२३॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां षष्ठस्कन्धे इन्द्रविजयो नाम त्रयोदशोऽध्यायः ॥ १३॥

राजा त्रिणाकं स्वर्गम् शशास । विद्यादिभिः अनुभावः पालनसामर्थ्यं यस्य । तिरश्चां गतिम् [1]अजगरयोनिं प्रापितः ॥ १६ ॥ ततो नहुषपातानन्तरम् । ब्रह्मणो ब्राह्मणानां च गिरा आहूतः सन् इन्द्रः स्वर्गं गतः। कथंभूतः । ऋतम्भरो धर्मरक्षको हरिस्तस्य ध्यानेन निवारिमघं पापं यस्य सः । अत एव मूर्तिमान् पापोऽपि ब्रह्महत्यालक्षणो जीवः तमिन्द्रं न अभ्यभूत् नाक्रामत् । यतो हि दिग्देवतया श्रीरुद्रेण लक्ष्म्या च अवितं रक्षितम् तयैव हतमोजो बलं यस्य सः ॥ १७ ॥ पुरुषस्य विष्णोराराधनं यस्मिन् तेन हयमेधेन। ह सहर्षम् ॥ १८ ॥ अथेति युग्मम् । वितते अनुष्ठिते अश्वमेधे महेन्द्रेण पुरुषे श्रीविष्णौ इज्यमाने सति अथानन्तरमेव स भूयानपि पापचयः [2]शून्यतां नीतः साकल्येन विनाशित इत्यन्वयः । वधो वधजन्यः ॥ १९।२० ॥ मिश्रैः मुख्यैः वितायमानेन अनुष्ठीयमानेन यथोदितेन शास्त्रोक्तेन । इन्द्रः महान् आस सर्वपूज्यो बभूव ॥ २१ ॥ इदमिति युग्मम् । प्रक्षाल्यतेऽनेनेति प्रक्षालनं निवर्तकम् । तीर्थपदस्य भगवतोऽनुकीर्तनं यस्मिन् । भक्तेरुत्कर्षो यस्मिन् । महेन्द्रस्य मोक्षो यस्मिन् । मरुत्वत इन्द्रस्य विशेषेण जयो यस्मिन् । सदा अवकाशाभावे तु पर्वणि पर्वणि । पठेयुरिति लिङा विधिर्दर्शितः । शृण्वन्ति शृणुयुः । इन्द्रियं तच्छक्तिप्रदम् । आयुःशब्दो लक्षणया आयुर्वर्धकः ततः स्वार्थेऽण् । अघं पापवासना अतो न पौनरुक्त्यम् ॥ २२।२३ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे गूढार्थदीपिन्यां त्रयोदशोऽध्यायः

---

१. श्रूयते एकदा नहुष इन्द्राणीमुवाच मां भजस्वेति । तयाऽऽवेदितवृत्तान्तो बृहस्पतिस्तामुवाच । ब्राह्मणबाह्यशिबिकायामारुह्यागतं त्वां भजिष्यामीति । तया तथैवोक्तो नहुषः स्वारूढां शिबिकामगस्त्यादिभिर्वाहयामास । तदा शीघ्रं सर्प सर्पेति ब्रुवन् अगस्त्यं पदा पस्पर्श तेन शप्तः सर्पोऽभूदिति ।

२. 'शून्यं स्यान्निर्जने नाशे' इति धरणिः ।

अथ चतुर्दशोऽध्यायः

परीक्षिदुवाच

रजस्तमःस्वभावस्य ब्रह्मन् वृत्रस्य पाप्मनः । नारायणे भगवति कथमासीद् दृढा मतिः ॥१॥
देवानां शुद्धसत्त्वानामृषीणां चामलात्मनाम् । भक्तिर्मुकुन्दचरणे न प्रायेणोपजायते ॥ २ ॥
रजोभिः समसंख्याताः पार्थिवैरिह जन्तवः । तेषां ये केचनेहन्ते श्रेयो वै मनुजादयः ॥ ३ ॥
प्रायो मुमुक्षवस्तेषां केचनैव द्विजोत्तम । मुमुक्षूणां सहस्रेषु कश्चिन्मुच्येत सिध्यति ॥ ४ ॥
मुक्तानामपि सिद्धानां नारायणपरायणः । सुदुर्लभः प्रशान्तात्मा कोटिष्वपि महामुने ॥५॥
वृत्रस्तु स कथं पापः सर्वलोकोपतापनः । इत्थं दृढमतिः कृष्ण आसीत् संग्राम उल्बणे ॥ ६॥
अत्र नः संशयो भूयाञ्छ्रोतुं कौतूहलं प्रभो । यः पौरुषेण समरे सहस्राक्षमतोषयत् ॥ ७ ॥

सूत उवाच

परीक्षितोऽथ सम्प्रश्नं भगवान् बादरायणिः । निशम्य श्रद्दधानस्य प्रतिनन्द्य वचोऽब्रवीत् ॥८॥

श्रीशुक उवाच

शृणुष्वावहितो राजन्निितिहासमिमं यथा । श्रुतं द्वैपायनमुखान्नारदाद् देवलादपि ॥ ९ ॥
आसीद् राजा सार्वभौमः शूरसेनेषु वै नृप । चित्रकेतुरिति ख्यातो यस्यासीत् कामधुङ् मही ॥१०
तस्य भार्यासहस्राणां सहस्राणि दशाभवन् । सांतानिकश्चापि नृपो न लेभे तासु संततिम् ॥११॥
रूपौदार्यवयोजन्मविद्यैश्वर्यश्रियादिभिः । सम्पन्नस्य गुणैः सर्वैश्चिन्ता बन्ध्यापतेरभूत् ॥१२॥
न तस्य सम्पदः सर्वा महिष्यो वामलोचनाः । सार्वभौमस्य भूश्चेयमभवन् प्रीतिहेतवः ॥१३॥

चतुर्दशेऽङ्गिरःप्राप्ते चित्रकेतोः प्रिये सुते ।
मारिते च विषं दत्त्वा विलापस्तस्य वर्ण्यते ॥ १ ॥

दृढा निश्चला ॥१।२॥ रजोभिः परमाणुभिः समा अनन्ताः जीवाः सन्ति । तेषां मध्ये कपिपयें एव श्रेयो धर्मम् ईहन्ते कुर्वन्ति ॥ ३ ॥ मुच्येत जीवन्मुक्तो भवेत् सिध्यति परत्र मुक्तिं च लभते ॥ ४।५ ॥ पापः पापी 'अर्शआद्यन्तः । उल्वणे भीषणे ॥६॥ कौतूहलम् उत्कण्ठा ॥७॥ श्रद्दधानस्य श्रद्धालोः परीक्षितः । प्रतिनन्द्य संश्लाघ्य । वच उत्तरम् ॥८॥ अवहितः सावधानः सन् । यथा यथावत् ॥९॥ शूरसेनसंज्ञकदेशेषु । वै प्रसिद्धः । सार्वभौमः चक्रवर्ती कामान् अभिलषितपदार्थान् दोग्धि पूरयतीति तथा ॥१०॥ सहस्राणां दशसहस्राणि कोटिर्भार्याः आसन् । सान्तानिकः सन्तानोत्पादनक्षमोऽपि । सन्ततिं न लेभे सर्वासामेव बन्ध्यात्वयोगात्[1] ॥११॥ चिन्ता पुत्रं विना ॥१२॥ वामानि मनोहराणि लोचनानि यासां ताः ॥१३॥

---

१. अत्रेदमवधेयम् । वर्षर्तुकालिका रक्तवर्णबहुपादचित्रितोद्र्ध्वदेहाः पुञ्जीभूय चलन्तः कीटविशेषाः केनचिद् गजेन स्वपादेन एकदैव मारितास्ते च कीटाश्चित्रकेतुवनिताभावं प्राप्ताः स गजस्तत्पुत्रतां प्रापेति । ताः स्वपूर्वजन्मवैरेण तं मारयामासुः । तासां बन्ध्यात्वकारणं तु पुराणान्तरान्निश्चेयमिति वंशीधरी ।

तस्यैकदा तु भवनमङ्गिराभगवानृषिः । लोकाननुचरन्नेतानुपागच्छद् यदृच्छया ॥१४॥
तं पूजयित्वा विधिवत् प्रत्युत्थानार्हणादिभिः । कृतातिथ्यमुपासीदत् सुखासीनं समाहितः १५
महर्षिस्तमुपासीनं प्रश्रयावनतं क्षितौ । प्रतिपूज्य महाराज समाभाष्येदमब्रवीत् ॥१६॥

अङ्गिरा उवाच

अपि तेऽनामयं स्वस्ति प्रकृतिनां तथाऽऽत्मनः । यथा प्रकृतिभिर्गुप्तः पुमान् राजापि सप्तभिः१७
आत्मानं प्रकृतिष्वद्धा निधाय श्रेय आप्नुयात् । राज्ञा तथा प्रकृतयो नरदेवाहिताधयः॥१८॥
अपि दाराः प्रजामात्या भृत्याः श्रेण्योऽथ मन्त्रिणः । पौरा जानपदा भूपा आत्मजा वशवर्तिनः
यस्यात्मानुवशश्चेत् स्यात् सर्वे तद्वशगा इमे । लोकाः सपाला यच्छन्ति सर्वे बलिमतन्द्रिताः२०
आत्मनः प्रीयते नात्मा परतः स्वत एव वा । लक्षयेऽलब्धकामं त्वां चिन्तया शबलं मुखम् ।२१
एवं विकल्पितो राजन् विदुषा मुनिनापि सः । प्रश्रयावनतोऽभ्याह प्रजाकामस्ततो मुनिम् ।२२
भगवन् किं न विदितं तपोज्ञानसमाधिभिः । योगिनां ध्वस्तपापानां बहिरन्तःशरीरिषु ।२३
तथापि पृच्छतो ब्रूयां ब्रह्मन्नात्मनि चिन्तितम् । भवतो विदुषश्चापि चोदितस्त्वदनुज्ञया ॥२४॥
लोकपालैरपि प्रार्थ्याः साम्राज्यैश्वर्यसम्पदः । न नन्दयन्त्यप्रजं मां क्षुत्तृट्काममिवापरे ॥२५॥
ततः पाहि महाभाग पूर्वैः सह गतं तमः । यथा तरेम दुस्तारं प्रजया तद्विधेहि नः ॥२६॥
इत्यर्थितः स भगवान् कृपालुर्ब्रह्मणः सुतः । श्रपयित्वा चरुं त्वाष्ट्रं त्वष्टारमयजद्विभुः ॥२७॥

यदृच्छया दैवेच्छया ॥ १४ ॥ तं मुनिम् उपासीदत् समीपमुपविवेश ॥ १५ ॥ प्रतिपूज्य सत्कृत्य। समाभाष्य सम्बोध्य ॥ १६ ॥ अपि किं तवात्मनः तथा प्रकृतीनां च आरोग्यमस्ति । यथा पुमान् जीवः सप्तभिः[1] प्रकृतिभिःर्गुप्तः सन् स्वस्ति सुखं प्राप्नोति तथा राजाऽपि [2]स्वाम्यादिसप्तप्रकृतिभिर्गुप्तः स्वस्ति प्राप्नोतीत्यन्वयः ॥ १७ ॥ अद्धा साक्षात् । श्रेयो राज्यादिसुखम् । तथा प्रकृतयोऽपि राज्ञा आहृताधयः निवारितमनोव्यथाः श्रेयः प्राप्नुवन्ति ॥ १८ ॥ अपि किं वशवर्तिनः अनुकूला न वेति प्रश्नः । श्रेण्यः एकैकशिल्पोपजीविनः वणिग्जनाः तैलिकताम्बूलिकादयः । जानपदा अन्यदेशीयाः ॥ १९ ॥ आत्मा मनः । सर्वे दारापत्यादयः । बलिमुपायनं यच्छन्ति समर्पयन्ति । अतन्द्रिताः निरालस्याः सन्तः ॥ २० ॥ आत्मनस्तव आत्मा मनः न तुष्यति तत्किमर्थम् । परस्मात् स्वस्माद्वा अप्राप्तमनोरथं त्वां लक्षये । शबलं पीतम् ॥ २१ ॥ विकल्पितः विकल्पविषयीकृतः । प्रजा पुत्रः ॥ २२ ॥ शरीरिणां यत् बहिरन्तः तद् भवतां किं न विदितं सर्वं विदितमेवेत्यर्थः ॥ २३ ॥ भवत इति षष्ठी तृतीयार्थे । भवता चोदितोऽहं ब्रूयाम् । आत्मनि मनसि ॥२४॥ अप्रजम् अपुत्रम् । अपरे स्रक्चन्दनादयो न सुखयन्ति ॥२५॥ पूर्वैः पित्रादिभिः सह तमो गतं नरकं प्राप्तं माम् पाहि । तत् उपायम् । दुस्तारम् । स्वार्थणिजन्तात् तरतेः खल् प्रत्ययः ॥ २६ ॥ अर्थितः प्रार्थितः ब्रह्मणः सुतः अङ्गिराः । त्वाष्ट्रं त्वष्टृदेवताकं चरुं हविर्विशेषं

---

१. महदहङ्कारपञ्चतन्मात्राभिः देहरूपेण परिणताभिः ।
२. स्वाम्यमात्यौ जनपदो दुर्गं द्रविणसञ्चयः । दण्डो मन्त्री च तस्यैताः सप्त प्रकृतयो मताः । स्वामी गुरुः । बुद्धिसहायो मन्त्री कर्मसहायोऽमात्यः, इति भेदः ।

ज्येष्ठा श्रेष्ठा च या राज्ञी महिषीणां च भारत । नाम्ना कृतद्युतिस्तस्यै यज्ञोच्छिष्टमदाद् द्विजः
अथाह नृपतिं राजन् भवितैकस्तवात्मजः । हर्षशोकप्रदस्तुभ्यमिति ब्रह्मसुतो ययौ ॥२९॥
सापि तत्प्राशनादेव चित्रकेतोरधारयत् । गर्भं कृतद्युतिर्देवी कृत्तिकाग्नेरिवात्मजम् ॥३०॥
तस्या अनुदिनं गर्भः शुक्लपक्ष इवोडुपः । ववृधे शूरसेनेशतेजसा शनकैर्नृप ॥३१॥
अथ काल उपावृत्ते कुमारः समजायत । जनयन् शूरसेनानां शृण्वतां परमां मुदम् ॥३२॥
हृष्टो राजा कुमारस्य स्नातः शुचिरलंकृतः । वाचयित्वाऽऽशिषो विप्रैः कारयामास जातकम्
तेभ्यो हिरण्यं रजतं वासांस्याभरणानि च । ग्रामान् हयान् गजान् प्रादाद् धेनूनामर्बुदानि षट् ३४
ववर्ष काममन्येषां पर्जन्य इव देहिनाम् । धन्यं यशस्यमायुष्यं कुमारस्य महामनाः ॥३५॥
कृच्छ्रलब्धेऽथ राजर्षेस्तनयेऽनुदिनं पितुः । यथा निःस्वस्य कृच्छ्राप्ते धने स्नेहोऽन्ववर्धत ॥३६॥
मातुस्त्वतितरां पुत्रे स्नेहो मोहसमुद्भवः । कृतद्युतेः सपत्नीनां प्रजाकामज्वरोऽभवत् ॥३७॥
चित्रकेतोरतिप्रीतिर्यथा दारे प्रजावति । न तथान्येषु संजज्ञे बालं लालयतोऽन्वहम् ॥३८॥
ताः पर्यतप्यन्नात्मानं गर्हयन्त्योऽभ्यसूयया । आनपत्येन दुःखेन राज्ञोऽनादरणेन च ॥३९॥
धिगप्रजां स्त्रियं पापां पत्युश्चागृहसम्मताम् । सुप्रजाभिः सपत्नीभिर्दासीमिव तिरस्कृताम्॥४०॥
दासीनां को नु संतापः स्वामिनः परिचर्यया । अभीक्ष्णं लब्धमानानां दास्या दासीव दुर्भगाः ॥
एवं संदह्यमानानां सपत्न्याः पुत्रसम्पदा । राज्ञोऽसम्मतवृत्तीनां विद्वेषो बलवानभूत् ॥४२॥
विद्वेषनष्टमतयः स्त्रियो दारुणचेतसः । गरं ददुः कुमाराय दुर्मर्षा नृपतिं प्रति ॥४३॥
कृतद्युतिरजानन्ती सपत्नीनामघं महत् । सुप्त एवेति संचिन्त्य निरीक्ष्य व्यचरद् गृहे ॥४४॥
शयानं सुचिरं बालमुपधार्य मनीषिणी । पुत्रमानय मे भद्रे इति धात्रीमचोदयत् ॥४५॥
सा शयानमुपव्रज्य दृष्ट्वा चोत्तारलोचनम् । प्राणेन्द्रियात्मभिस्त्यक्तं हतास्मीत्यपतद् भुवि।४६।

श्रपयित्वा पाचयित्वा ॥ २७ ॥ यज्ञोच्छिष्टं यज्ञशेषम् । द्विजोऽङ्गिराः ॥ २८।२९ ॥ प्राशनात् भोजनात् आत्मजं स्कन्दम् ॥ ३० ॥ शूरसेनेशः चित्रकेतुस्तस्य तेजसा वीर्येण यो गर्भः स उडुपः चन्द्र-इवेत्यन्वयः ॥ ३१ ॥ उपावृत्ते प्राप्ते । शूरसेनदेशवासिनाम् ॥३२॥ आशिषः स्वस्तिवाचनं कारयित्वा । जातकं जातकर्मसंस्कारम् ॥ ३३ ॥ षट् [1]अर्बुदानि षष्टिकोट्यः । तेभ्यः ब्राह्मणेभ्यः ॥ ३४ ॥ धन्यमित्यादित्रयं क्रियाविशेषणम् । धन्यं धनकरम् । कुमारस्य धनादिवृद्धयर्थम् अन्येषामपि कामं ववर्ष मनोरथं पूरयामास ॥ ३५ ॥ अनुदिनं प्रतिदिनम् । निःस्वस्य निर्धनस्य ॥ ३६ ॥ मातुस्तु अतितरा-मन्ववर्धतेति पूर्वेणान्वयः । प्रजाकामः पुत्राभिलाषरूपः ज्वरः सन्तापः ॥३७॥ दारे दारेषु पुत्रवत्सु यथा प्रीतिस्तथाऽन्येषु नेत्यन्वयः । लालयतः लालनपालने कुर्वतः ॥ ३८ ॥ गर्हयन्त्यः निन्दयन्त्यः । अभ्यसूयया गुणेष्वपि दोषारोपेण । संतप्ता आसन् ॥३९॥ गृहे न संमताम् किन्तु अगृं ह वनम् तत्र सम्मतां । वनवास-योग्याम् ॥ ४० ॥ दुर्भगा दुर्भाग्या ॥ ४१ ॥ राज्ञः सकाशात् न सम्मता नानुकूला वृत्तिजीविका यासाम् ॥ ४२ ॥ गरं विषम् दुर्मर्षाः तद्व्यवहारमसहमानाः ॥ ४३ ॥ महदघं विषदानरूपं पापम् ॥४४॥ उपधार्य विज्ञाय धात्रीं स्तन्यदात्रीं प्रेरयामास ॥ ४५ ॥ उद्गते बहिर्निर्गते तारके कनीनिके ययोस्ते

१. संख्याया विंशको ह्यंशो ग्रहीतव्यः सदा बुधैः । इतिहासपुराणादावित्येवं नीलकण्ठवाक्' इति भारतदीपिकायां तदनुसारेण धेनूनां कोटित्रयं लभ्यते । धेनुशब्देन द्रव्यधेनुग्रहणेतु न काप्यनुपपत्तिः । एवमन्यत्रापि यत्र संख्याया असंभवत्वं प्रतीयेत तत्र समाधेयम् । यद्वा । वसुदेववत् तदा संकल्प्य पुनः शनैः शनैः ददाविति ।

तस्यास्तदाऽऽकर्ण्य भृशातुरं स्वरं घ्नन्त्याः कराभ्यामुर उच्चकैरपि।
प्रविश्य राज्ञी त्वरयाऽऽत्मजान्तिकं ददर्श बालं सहसा मृतं सुतम् ॥४७॥
पपात भूमौ परिवृद्धया शुचा मुमोह विभ्रष्टशिरोरुहाम्बरा ॥४८॥
ततो नृपान्तःपुरवर्तिनो जना नराश्च नार्यश्च निशम्य रोदनम्।
आगत्य तुल्यव्यसनाः सुदुःखितास्ताश्च व्यलीकं रुरुदुः कृतागसः ॥४९॥
श्रुत्वा मृतं पुत्रमलक्षितान्तकं विनष्टदृष्टिः प्रपतन् स्खलन् पथि।
स्नेहानुबन्धैधितया शुचा भृशं विमूर्च्छितोऽनुप्रकृतिर्द्विजैर्वृतः ॥५०॥
पपात बालस्य स पादमूले मृतस्य विस्रस्तशिरोरुहाम्बरः।
दीर्घं श्वसन् बाष्पकलोपरोधतो निरुद्धकण्ठो न शशाक भाषितुम् ॥५१॥
पतिं निरीक्ष्योरुशुचार्पितं तदा मृतं च बालं सुतमेकसंततिम्।
जनस्य राज्ञी प्रकृतेश्च हृद्रुजं सती दधाना विललाप चित्रधा ॥५२॥
स्तनद्वयं कुङ्कुमगन्धमण्डितं निषिञ्चती साञ्जनबाष्पबिन्दुभिः।
विकीर्य केशान् विगलत्स्रजः सुतं शुशोच चित्रं कुररीव सुस्वरम् ॥५३॥
अहो विधातस्त्वमतीव बालिशो यस्त्वात्मसृष्ट्यप्रतिरूपमीहसे।
परेऽनुजीवत्यपरस्य या मृतिर्विपर्ययश्चेत् त्वमसि ध्रुवः परः ॥५४॥
न हि क्रमश्चेदिह मृत्युजन्मनोः शरीरिणामस्तु तदात्मकर्मभिः।
यः स्नेहपाशो निजसर्गवृद्धये स्वयं कृतस्ते तमिमं विवृश्चसि ॥५५॥

तथाभूते लोचने यस्य तम्। आत्मना जीवेन च त्यक्तं मृतं दृष्ट्वा। हतास्मीत्युक्त्वा ॥४६॥ तस्या धात्र्याः आतुरं स्वनमाकर्ण्य तदा तत्क्षणमेव राज्ञी त्वरया आत्मजान्तिकं प्रविश्य मृतं सुतं ददर्शेत्यन्वयः। उरः वक्षःस्थलम् ॥ ४७ ॥ मुमोह मूर्च्छां प्राप। विभ्रष्टा विकीर्णाः केशाः अम्बरे च यस्याः ॥ ४८ ॥ हे नृप। नराः नार्यः तथा कृतागसः कृतापराधाः ताः सपत्न्योऽपि व्यलीकं मिथ्यैव रुरुदुः ॥ ४९ ॥ श्रुत्वेति युग्मम्। न लक्षितोऽन्तकः मृत्युहेतुर्यस्य तं पुत्रं मृतं श्रुत्वा भृशं शुचा शोकेन मूर्च्छितः सन् स चित्रकेतुः बालस्य पादमूले पपात भाषितुं च न शशाकेति द्वयोरन्वयः। कथंभूतः। अनुगताः पृष्ठतः संलग्नाः अमात्यादयो यस्य। बाष्पकलाभिः अश्रुबिन्दुभिर्यः उपरोधः आवरणं तस्मात् ॥ ५०।५१ ॥ जनस्य अन्तः पुरजनस्य प्रकृतेः अमात्यादेश्च हृद्रुजं हृदि क्लेशं शोकं दधाना वर्धमाना सती विललाप। उरुशुचा बहुशोकेन व्याकुलम् ॥ ५२ ॥ साञ्जनैः—अश्रुबिन्दुभिः निषिञ्चन्ती राज्ञी सुतमुद्दिश्य सुस्वरमुच्चस्वरेण शुशोच विललापेत्यर्थः। विगलन्त्यः स्रजो येभ्यस्तान् केशान् ॥ ५३ ॥ हे विधातः। यस्त्वम् आत्मसृष्टेः प्रतिकूलमाचरसि अतो बालिशो महामूर्खः। परे वृद्धे पितरि जीवति सति अपरस्य बालस्य या मृतिरिति यत्। यदि विपर्ययः विपरीतश्चेत् तर्हि त्वं जीवानां ध्रुवो नित्यः परः सहजशत्रुरसि न तु कृपालुः पितामहयोग्यः ॥५४॥ [1]मृत्युजन्मनो यः प्रचलितः क्रमः चेत् इह सृष्टौ न स्यात् तर्हि आत्म-

१. अत्र क्रमद्वयम्। उत्पत्तिक्रमो मृत्युक्रमश्च। आद्यः पूर्वं पिता जायते पश्चात्पुत्र इति। यथैव क्रमस्तथैव मृत्युक्रमोऽपि भाव्यः। उत्पत्त्यनुसारेण पूर्वं पिता म्रियेत पश्चात्पुत्र इति।

त्वं तात नार्हसि च मां कृपणामनाथां त्यक्तुं विचक्ष्व पितरं तव शोकतप्तम्।
अञ्जस्तरेम भवताऽप्रजदुस्तरं यद् ध्वान्तं न याह्यकरुणेन यमेन दूरम् ॥५६॥
उत्तिष्ठ तात त इमे शिशवो वयस्यास्त्वामाह्वयन्ति नृपनन्दन संविहर्तुम्।
सुप्तश्चिरं ह्यशनया च भवान् परीतो भुङ्क्ष्व स्तनं पिब शुचो हर नःस्वकानाम्॥५७
नाहं तनूज ददृशे हतमङ्गला ते मुग्धस्मितं मुदितवीक्षणमाननाब्जम्।
किं वा गतोऽस्यपुनरन्वयमन्यलोकं नीतोऽघृणेन न शृणोमि कला गिरस्ते ॥५८॥

श्रीशुक उवाच

विलपन्त्या मृतं पुत्रमिति चित्रविलापनैः। चित्रकेतुर्भृशं तप्तो मुक्तकण्ठो रुरोद ह ॥५९॥
तयोर्विलपतोः सर्वे दम्पत्योस्तदनुव्रताः। रुरुदुः स्म नरा नार्यः सर्वमासीदचेतनम् ॥६०॥
एवं कश्मलमापन्नं नष्टसंज्ञमनायकम्। ज्ञात्वाङ्गिरा नाम मुनिराजगाम सनारदः ॥६१॥
इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां षष्ठस्कन्धे चित्रकेतुविलापो नाम चतुर्दशोऽध्यायः॥१४॥

पञ्चदशोऽध्यायः

श्रीशुक उवाच

ऊचतुर्मृतकोपान्ते पतितं मृतकोपमम्। शोकाभिभूतं राजानं बोधयन्तौ सदुक्तिभिः ॥ १ ॥
कोऽयं स्यात् तव राजेन्द्र भवान् यमनुशोचति। त्वं चास्य कतमः सृष्टौ पुरेदानीमतः परम्॥२॥

कर्मभिरेव तज्जन्मादिकमस्तु किं त्वया कृत्यमस्ति। किञ्च ते त्वया स्वयं कृतः स्नेहपाशस्त्वं स्वयं छिनत्सि इत्यहो ते क्रूरता ॥ ५५ ॥ हे तात! विचक्ष्व पश्य। अप्रजानाम् अपुत्रवतां दुस्तरं यत् तमो नरकं तत् भवता हेतुभूतेन अञ्जोऽनायासेन तरेम अतो यमेन सह दूरं त्वं न याहीत्यन्वयः ॥ ५६ ॥ अशनया क्षुधया च परीतो व्याप्तः। स्तनं स्तन्यम् दुग्धं। शुचः शोकान्। हर अपनय ॥५७॥ हे तनूज! हे पुत्र। हतमङ्गला अहं ते [1]मुग्धस्मितम् आननाब्जं न ददृशे। अधुना ते कला मधुराः गिरोऽपि न शृणोमि! किं वा अघृणेन निर्दयेन यमेन नीतः अन्यलोकं गतोऽसि। कथंभूतम्। अपुनरन्वयं पुनरागमनशून्यम्॥ ५८ ॥ पुत्रमुद्दिश्य विलपन्त्या तया सह। मुक्तकण्ठः उच्चस्वरेण रुरोद हेति दुःखे ॥ ५९ ॥ तदनुव्रताः सर्वेऽपि रुरुदुः। एवं कश्मलं मोहमापन्नं सर्वमेव तत्रत्यप्राणिजातं अचेतनं मूर्च्छितमासीत्॥६०॥ नष्टसंज्ञं विवेकरहितम् अनायकं नायकस्तत्त्वोपदेष्टा तद्रहितम् ॥६१॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे गूढार्थदीपिन्यां चतुर्दशोऽध्यायः।

अथ पञ्चदशे राज्ञस्तत्त्वज्ञानोपदेशतः।
साङ्गिरोनारदेनास्य पुत्रशोको निवार्यते ॥ १ ॥

मृतकोपान्ते शवसमीपे। बोधयन्तौ नारदाङ्गिरसौ ॥ १ ॥ पुरा सृष्टौ पूर्वजन्मनि। इदानीमत्र जन्मनि भविष्यजन्मनि च अयं तव कः त्वं चास्य कतमः न कोऽपि सम्बन्धस्यानियतत्वात् ॥ २ ॥

---

१. 'मुग्धः सुन्दरमूढयोः' इति विश्वः।

यथा प्रयान्ति संयान्ति स्रोतोवेगेन वालुकाः। संयुज्यन्ते वियुज्यन्ते तथा कालेन देहिनः ॥३॥
यथा धानासु वै धाना भवन्ति न भवन्ति च। एवं भूतेषु भूतानि चोदितानीशमायया ॥ ४ ॥
वयं च त्वं च ये चेमे तुल्यकालाश्चराचराः। जन्ममृत्योर्यथा पश्चात् प्राङ् नेवमधुनापि भोः॥५॥
भूतैर्भुतानि भूतेशः सृजत्यवति हन्त्यजः। आत्मसृष्टैरस्वतन्त्रैरनपेक्षोऽपि बालवत् ॥ ६ ॥
देहेन देहिनो राजन् देहाद्देहोऽभिजायते। बीजादेव यथा बीजं देह्यर्थं इव शाश्वतः ॥ ७ ॥
देहदेहिविभागोऽयमविवेककृतः पुरा। जातिव्यक्तिविभागोऽयं यथा वस्तुनि कल्पितः ॥ ८ ॥

श्रीशुक उवाच

एवमाश्वासितो राजा चित्रकेतुर्द्विजोक्तिभिः। प्रमृज्य पाचिना वक्त्रमाधिम्लानमभाषत ॥९॥

राजोवाच

को युवां ज्ञानसम्पन्नौ महिष्ठौ च महीयसाम्। अवधूतेन वेषेण गूढाविह समागतौ ॥१०॥
चरन्ति ह्यवनौ कामं ब्राह्मणा भगवत्प्रियाः। मादृशां ग्राम्यबुद्धीनां बोधायोन्मत्तलिङ्गिनः॥११
कुमारो नारद ऋभुरङ्गिरा देवलोऽसितः। अपान्तरतमो व्यासो मार्कण्डेयोऽथ गौतमः॥१२॥
वसिष्ठो भगवान् रामः कपिलो वादरायणिः। दुर्वासा याज्ञवल्क्यश्च जातूकर्ण्यस्तथाऽऽरुणिः१३
रोमशश्च्यवनो दत्त आसुरिः सपतञ्जलिः। ऋषिर्वेदशिरा बोध्यो मुनिः पञ्चशिरास्तथा१४
हिरण्यनाभः कौसल्यः श्रुतदेव ऋतध्वजः। एते परे च सिद्धेशाश्चरन्ति ज्ञानहेतवः ॥१५॥
तस्माद् युवां ग्राम्यपशोर्मम मूढधियः प्रभू। अन्धे तमसि मग्नस्य ज्ञानदीप उदीर्यताम् ॥१६॥

अङ्गिरा उवाच

अहं ते पुत्रकामस्य पुत्रदोऽस्म्यङ्गिरा नृप। एष ब्रह्मसुतः साक्षान्नारदो भगवानृषिः ॥१७॥
इत्थं त्वां पुत्रशोकेन मग्नं तमसि दुस्तरे। अतदर्हमनुस्मृत्य महापुरुषगोचरम् ॥१८॥
अनुग्रहाय भवतः प्राप्तावावामिह प्रभो। ब्रह्मण्यो भगवद्भक्तो नावसीदितुमर्हति ॥१९॥

स्रोतोवेगेन प्रवाहवेगेन। प्रयान्ति वियुज्यन्ते। देहिनः पितापुत्रादयः॥ ३॥ धानासु बीजेषु धाना बीजान्तराणि। भूतानि पुत्रादीनि भूतेषु पित्रादिषु। मायाप्रेरितानामेव भवनमभवनं न वस्तुतः ॥४॥ जन्मनः प्राक् मृत्योः पश्चान्न सन्ति एवमधुना वर्तमानेऽपि ॥ ५ ॥ भूतेशः परमात्मा भूतैः पित्रादिभिः भूतानि पुत्रादीनि। यथा बालः क्रीडति तद्वत् लीलया करोति ॥६॥ देहेन पितुर्देहेन देहिनः पुत्रस्य देहः मातुर्देहादभिजायते। देही जीवस्तु शाश्वतो नित्यः। यथा अर्थः सुवर्णमृत्तिकादिः ॥ ७ ॥ पुरा पुरातनः अनादिः। वस्तुनि गवादिवस्तुनि जातिः सामान्यं गोत्वादिः। व्यक्तिर्विशेषः गवादिपिण्डः तयोर्विभागोऽज्ञानेन कल्पितः ॥ ८ ॥ प्रमृज्य संप्रोञ्छच। म्लानं मलिनम् ॥ ९ ॥ महीयसां पूज्यानां पूज्यतमौ। वेषेण धूलिधूसरितेन ॥१०॥ अवनौ भूमौ विचरन्ति। ग्राम्येषु विषयेषु। उन्मत्तस्येव लिङ्गं वेषो येषाम् ॥११॥ कुमार इति चतुष्कम्। अपान्तरतमः नारायणस्य वागवतारः सारस्वतनामा ब्रह्मर्षिः। ज्ञानहेतवः ज्ञानदातारः ॥ १२।१३।१४।१५॥ युवां प्रभू ज्ञानदाने समर्थौ अतः मम उदीर्यतां प्रकाश्यताम् ॥१६।१७॥ इत्थमिति युग्मम्। तमसि अज्ञानगर्ते। अतदर्हं शोकानर्हम्। गोचरं दृष्टिविषयम्। अवसीदितुं

तदैव ते परं ज्ञानं ददामि गृहमागतः । ज्ञात्वान्याऽभिनिवेशं ते पुत्रमेव ददावहम् ॥२०॥
अधुना पुत्रिणां तापो भवतैवानुभूयते ॥२१॥ एवं दारा गृहा रायो विविधैश्वर्यसम्पदः
शब्दादयश्च विषयाश्चला राज्यविभूतयः॥२२॥महा राज्यं बलं कोशो भृत्यामात्याः सुहृज्जनाः
सर्वेऽपि शूरसेनेमे शोकमोहभयार्तिदाः ॥२३॥ गन्धर्वनगरप्रख्याः स्वममायामनोरथाः
दृश्यमाना विनार्थेन न दृश्यन्ते मनोभवाः॥२४॥कर्मभिर्ध्यायतो नानाकर्माणि मनसोऽभवन् ।२५
अयं हि देहिनो देहो द्रव्यज्ञानक्रियात्मकः । देहिनो विविधक्लेशसंतापकृदुदाहृतः ॥२६॥
तस्मात् स्वस्थेन मनसा विमृश्य गतिमात्मनः । द्वैते ध्रुवार्थविस्रम्भं त्यजोपशममाविश ॥२७॥

नारद उवाच

एतां मन्त्रोपनिषदं प्रतीच्छ प्रयतो मम । यां धारयन् सप्तरात्राद् द्रष्टा संकर्षणं प्रभुम् ॥२८॥

यत्पादमूलमुपसृत्य नरेन्द्र पूर्वे शर्वादयो भ्रममिमं द्वितयं विसृज्य ।
सद्यस्तदीयमतुलानधिकं महित्वं प्रापुर्भवानपि परं न चिरादुपैति ॥२९॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां षष्ठस्कन्धे चित्रकेतुसांत्वनं नाम पञ्चदशोऽध्यायः ॥ १५ ॥

दुःखितुम् ॥ १८।१९ ॥ ददामि अदास्यम् । कालव्यत्ययात्लट् । अन्याभिनिवेशं पुत्राग्रहम् । तदैव यदा पूर्वमागतः ॥ २० ॥ अधुनेत्यर्द्धम् ॥ २१ ॥ एवमिति त्रयम् । शूरसेनो देशः । यथा स्वप्नादयस्तथा इमे सर्वेऽपि चलाः अस्थिरा गन्धर्वनगरतुल्याः मिथ्याभूता एवेत्यर्थः । रायो धनानि । गन्धर्वनगरं हि गन्धर्वेच्छया क्वचिदाकाशे प्रतीयते क्वचिन्नैव । अर्थेन वास्तविकस्वरूपेण विनैव क्वचित् दृश्यमाना भवन्ति क्वचिन्नैव अतो मनःकल्पिता एव ॥ २२।२३।२४ ॥ कर्मभिरित्यर्द्धम् । कर्मभिः कर्मवासनाभिः अर्थान् विषयान् ध्यायतः पुंसो मनसो निमित्तभूतात् कर्माणि अभवन् अतः कर्मणो मनोभवत्वात् तत्साध्या अर्था अपि तथैव मिथ्याभूता एव ॥२५॥ भूतादिसंघातरूपः देह एव देहिनो जीवस्य । उदाहृतः निरूपितः तत्त्वज्ञैः । ज्ञानक्रियापदेन उभयेन्द्रियाणि ॥२६॥ध्रुवोऽयमर्थं इति विश्वासम् । उपशमम् उपरामम् आश्रय । गतिं तत्त्वम् ॥२७॥ प्रयतः शुद्धः सन् त्वं मम मत्तः सकाशात् प्रतीच्छ गृहाण । सप्तरात्रात् सप्तरात्रमतिक्रम्य कतिपयदिनान्तरमेव द्रष्टा द्रक्ष्यति भवान् । उपनिषीदति परं श्रेयोऽस्यामिति उपनिषत् ॥ २८ ॥ हे नरेन्द्र ! शर्वः आदिर्येषान्ते एव मरीच्यादयः न तु शर्व इत्यतद्गुणसंविज्ञानो बहुव्रीहिः । द्वितयं द्वैतप्रपञ्चम् । अतुलं च तदनधिकं च समानाधिकशून्यं महत्त्वमैश्वर्यं प्रापुः । तत्परमैश्वर्यम् उपैति उपैष्यति ।

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे गूढार्थदीपिन्यां पञ्चदशोऽध्यायः ॥१५॥

अथ षोडशोऽध्यायः

श्रीशुक उवाच

अथ देवऋषी राजन् सम्परेतं नृपात्मजम् । दर्शयित्वेति होवाच ज्ञातीनामनुशोचताम्॥ १ ॥

नारद उवाच

जीवात्मन् पश्य भद्रं ते मातरं पितरं च ते । सुहृदो बान्धवास्तप्ताः शुचा त्वत्कृतया भृशम्॥२॥

कलेवरं स्वमाविश्य शेषमायुः सुहृद्वृतः । भुङ्क्ष्व भोगान् पितृप्रत्तानधितिष्ठ नृपासनम्॥३॥

जीव उवाच

कस्मिन् जन्मन्यमी मह्यं पितरो मातरोऽभवन् । कर्मभिर्भ्राम्यमाणस्य देवतिर्यङ्‌नृयोनिषु ॥ ४ ॥

बन्धुज्ञात्यरिमध्यस्थमित्रोदासीनविद्विषः । सर्व एव हि सर्वेषां भवन्ति क्रमशो मिथः ॥ ५ ॥

यथा वस्तूनि पण्यानि हेमादीनि ततस्ततः । पर्यटन्ति नरेष्वेवं जीवो योनिषु कर्तृषु ॥ ६ ॥

नित्यस्यार्थस्य सम्बन्धो ह्यनित्यो दृश्यते नृषु । यावद् यस्य हि सम्बन्धो ममत्वं तावदेव हि॥७

एवं योनिगतो जीवः स नित्यो निरहंकृतः । यावद् यत्रोपलभ्येत तावत् स्वत्वं हि तस्य तत्॥८

एष नित्योऽव्ययः सूक्ष्म एष सर्वाश्रयः स्वदृक् । आत्ममायागुणैर्विश्वमात्मानं सृजति प्रभुः ॥९॥

न ह्यस्यातिप्रियः कश्चिन्नाप्रियः स्वः परोऽपि वा । एकः सर्वधियां द्रष्टा कर्तॄणां गुणदोषयोः॥१०

नादत्त आत्मा हि गुणं न दोषं न क्रियाफलम् । उदासीनवदासीनः परावरदृगीश्वरः ॥११॥

श्रीशुकउवाच

इत्युदीर्य गतो जीवो ज्ञातयस्तस्य ते तदा ।विस्मिता मुमुचुः शोकं छित्त्वाऽऽत्मस्नेहशृङ्खलाम्

निर्हृत्य ज्ञातयो ज्ञातेर्देहं कृत्वोचिताः क्रियाः । तत्यजुर्दुस्त्यजं स्नेहं शोकमोहभयार्तिदम् ।१३।

षोडशे मृतमाहूय तदुक्त्या तं प्रबोधयन् ।
उवाचोपनिषद्विद्यां नारदः शेषदर्शिनीम् ।। १ ।।

सम्परेतं मृतम् । दर्शयित्वा योगबलेन । ज्ञातीनां कर्मणि षष्ठ्यौ ॥१॥ शुचा शोकेन तप्ताः ॥२॥ शेषमवशिष्टमायुरस्ति अपमृत्युना मृतत्वात् । अतः पित्रा प्रत्तान्[1] दत्तान् भोगान् भुङ्क्ष्व नृपासनम् अधितिष्ठ अलङ्कुरु ॥ ३ ॥ मह्यं मम ॥ ४।५ ।। पण्यानि क्रयविक्रययोग्यानि ततस्ततः सर्वत्र । नरेषु व्यवहर्तृषु । कर्तृषु पितृषु । योनिषु मातृषु ॥६॥ नित्यस्य जीवतोऽपि अर्थस्य पश्वादेः सम्बन्धः अनित्यः अस्थिरः । विक्रमादिना सम्बन्धनिवृत्तेः ॥ ७ ।। यत्र पित्रादौ । तस्य पित्रादेः तत् तस्मिन् स्वत्वं ममत्वम् ॥ ८ ॥ एष प्रभुः आत्मानमेव[2] विश्वं सृजते ॥ ९ ॥ स्वः परः स्वकीयः परकीयो वा । गुणदोषयोः धर्माधर्मयोः कर्तॄणां याः सर्वा धियस्तासां द्रष्टा ॥१० ॥ गुणं दोषं पुण्यं पापं च क्रियाफलं सुखदुःखादिकं च आत्मा परमात्मा नादत्ते । परावरे कारणकार्ये पश्यतीति तथा ॥ ११ ॥ उदीर्य उक्त्वा । यदा गतः तदा ते शोकं मुमुचुः । आत्मनः स्वस्य ॥१२॥देहं निर्हृत्य दग्ध्वा उचिताः श्राद्धादि

---

१. स्वरान्तोपसर्गाद्दातेस्तकारादेशे रूपं सिध्यति ।

२. तदात्मानं स्वयमकुरुत, इति श्रुतेः ।

बालघ्न्यो व्रीडितास्तत्र बालहत्याहतप्रभाः । बालहत्याव्रतं चेरुर्ब्राह्मणैर्यन्निरूपितम् ।
यमुनायां महाराज स्मरन्त्यो द्विजभाषितम् ॥ १४ ॥

स इत्थं प्रतिबुद्धात्मा चित्रकेतुर्द्विजोक्तिभिः । गृहान्धकूपान्निष्क्रान्तः सरःपङ्कादिव द्विपः ॥१५॥
कालिन्द्यां विधिवत्स्नात्वा कृतपुण्यजलक्रियः । मौनेन संयतप्राणो ब्रह्मपुत्राववन्दत ॥१६॥
अथ तस्मै प्रपन्नाय भक्ताय प्रयतात्मने । भगवान् नारदः प्रीतो विद्यामेतामुवाच ह ॥१७॥
ॐ नमस्तुभ्यं भगवते वासुदेवाय धीमहि । प्रद्युम्नायाऽनिरुद्धाय नमः संकर्षणाय च ॥१८॥
नमो विज्ञानमात्राय परमानन्दमूर्तये । आत्मारामाय शान्ताय निवृत्तद्वैतदृष्टये ॥१९॥
आत्मानन्दानुभूत्यैव न्यस्तशक्त्यूर्मये नमः । हृषीकेशाय महते नमस्ते विश्वमूर्तये ॥२०॥
वचस्युपरतेऽप्राप्य य एको मनसा सह । अनामरूपश्चिन्मात्रः सोऽव्यान्नः सदसत्परः ॥२१॥
यस्मिन्निदं यतश्चेदं तिष्ठत्यप्येति जायते । मृण्मयेष्विव मृज्जातिस्तस्मै ते ब्रह्मणे नमः ॥२२॥
यन्न स्पृशन्ति न विदुर्मनोबुद्धीन्द्रियासवः । अन्तर्बहिश्च विततं व्योमवत्तन्नतोऽस्म्यहम् ॥२३॥

देहेन्द्रियप्राणमनोधियोऽमी यदंशविद्धाः प्रचरन्ति कर्मसु ।
नैवान्यदा लोहमिवाप्रतप्तं स्थानेषु तद् द्रष्टृपदेशमेति ॥२४॥

ॐ नमो भगवते महापुरुषाय महानुभावाय महाविभूतिपतये सकलसात्वतपरिवृढ-निकरकरकमलकुड्मलोपलालितचरणारविन्दयुगल परम परमेष्ठिन् नमस्ते ॥२५॥

श्रीशुक उवाच

भक्तायैतां प्रपन्नाय विद्यामादिश्य नारदः । ययावङ्गिरसा साकं धाम स्वायम्भुवं प्रभो ॥२६॥

लक्षणाः ॥ १३ ॥ बालेति सार्द्धम् । तत्र तदा । द्विजेन अङ्गिरसा प्रोक्तं पुत्रादीनां दुःखहेतुत्वं तत् स्मरन्त्यः । तैरेव यदुपदिष्टं तत् व्रतं प्रायश्चित्तं चेरुः चक्रुः ॥ १४ ॥ द्विपः गजः ॥ १५ ॥ कृताः पुण्यजले क्रियाः तर्पणाद्या येन सः चित्रकेतुः । प्राणा इन्द्रियाणि ॥ १६ ॥ एतां वक्ष्यमाणाम् । ह हर्षेण । प्रयतात्मने एकाग्रचित्ताय ॥ १७ ॥ तुभ्यं चतुर्व्यूहमूर्तये नमः । धीमहि ध्यायेम च ॥ १८ ॥ निवृत्ता द्वैतदृष्टिर्यस्मात्तस्मै ॥ १९ ॥ न्यस्ताः निरस्ताः मायानिमित्ता ऊर्मयः रागद्वेषादयो येन तस्मै ॥ २० ॥ मनसा सह वचसि यम् अप्राप्य उपरते सति यः एकः हृदि प्रकाशते सोऽव्यात् रक्षेदित्यन्वयः ॥ २१ ॥ इदं सर्वं जगत् यतो जायते यस्मिन् तिष्ठति अप्येति लीयते च तस्मै नमः । मृन्मयेषु घरादिषु यथा मृज्जातिः सर्वत्रानुस्यूता ॥ २२ ॥ यत् ब्रह्म असवः प्राणाः क्रियाशक्त्या न स्पृशन्ति मन आदीनि च ज्ञानशक्त्या न विदुः तत् ब्रह्म नतोऽस्मीत्यन्वयः । विततं व्याप्तम् ॥ २३ ॥ अमी देहादयः यदंशेन चैतन्यांशेन युक्ताः सन्तः कर्मसु प्रचरन्ति चेष्टां कुर्वन्ति जाग्रत्स्वप्नयोः । अन्यदा सुषुप्तिमूर्च्छादौ नैव तं नतोऽस्मीति पूर्वेणान्वयः । यथाऽप्रतप्तं लोहं न दहति किन्तु तप्तमेव । स्थानेषु जाग्रदादिषु द्रष्टृपदेशं द्रष्टृसंज्ञां तद् ब्रह्मैव एति प्राप्नोति न च जीवः ॥२४॥ सकलभक्तेषु परिवृढाः श्रेष्ठा ये सनकादयस्तेषां निकरस्य ऋषिवृन्दस्य करकमलमुकुलैः सेवितं चरणयुगलं यस्य तत्सम्बुद्धौ ॥ २५ ॥ साकं सह । धाम

चित्रकेतुस्तु विद्यां तां यथा नारदभाषिताम् । धारयामास सप्ताहमब्भक्षः सुसमाहितः ॥२७॥
ततश्च सप्तरात्रान्ते विद्यया धार्यमाणया । विद्याधराधिपत्यं स लेभेऽप्रतिहतं नृप ॥२८॥
ततः कतिपयाहोभिर्विद्ययेद्धमनोगतिः । जगाम देवदेवस्य शेषस्य चरणान्तिकम् ॥२९॥

मृणालगौरं शितिवाससं स्फुरत्किरीटकेयूरकटित्रकङ्कणम् ।
प्रसन्नवक्त्रारुणलोचनं वृतं ददर्श सिद्धेश्वरमण्डलैः प्रभुम् ॥३०॥
तद्दर्शनध्वस्तसमस्तकिल्बिषः स्वच्छामलान्तःकरणोऽभ्ययान्मुनिः ।
प्रवृद्धभक्त्या प्रणयाश्रुलोचनः प्रहृष्टरोमाऽनमदादिपूरुषम् ॥३१॥
स उत्तमश्लोकपदाब्जविष्टरं प्रेमाश्रुलेशैरुपमेहयन् मुहुः ।
प्रेमोपरुद्धाखिलवर्णनिर्गमो नैवाशकत् तं प्रसमीडितुं चिरम् ॥३२॥
ततः समाधाय मनो मनीषया बभाष एतत् प्रतिलब्धवागसौ ।
नियम्य सर्वेन्द्रियबाह्यवर्तनं जगद्गुरुं सात्वतशास्त्रविग्रहम् ॥३३॥

चित्रकेतुरुवाच

अजित जितः सममतिभिः साधुभिर्भवान् जितात्मभिर्भवता ।
विजितास्तेऽपि च भजतामकामात्मनां य आत्मदोऽतिकरुणः ॥३४॥
तव विभवः खलु भगवन् जगदुदयस्थितिलयादीनि ।
विश्वसृजस्तेंऽशांशास्तत्र मृषा स्पर्धन्ते पृथगभिमत्या ॥३५॥

ब्रह्मलोकम् ॥ २६ ॥ धारयामास जजाप ॥ २७ ॥ अप्रतिहतम् अस्खलितम् ॥ २८ ॥ इद्धा तीव्रा मनोगतिर्यस्य सः ॥ २९ ॥ मृणालवत् पद्मतन्तुवत् । [1]शितिवाससं नीलाम्बरम् । स्फुरन्ति किरीटादीनि यस्य । प्रसन्नेति । बहुव्रीहिगर्भितकर्मधारयसमासः । किरीटं मुकुटम् । बाहुभूषणं कटिसूत्रं चेति क्रमेण ॥ ३० ॥ स्वच्छं कुतः अमलं निर्वासनं च अन्तःकरणं यस्य । प्रणयेन प्रेम्णा अश्रुपूर्णे लोचने यस्य सः । शेषं ददर्श दृष्ट्वा च तमनमत् इति द्वयोरन्वयः ॥ ३१ ॥ स चित्रकेतुः विष्टरं पादपीठम् अश्रुप्रवाहैः उपमेहयन् अभिषिञ्चन् तम् ईडितुं स्तोतुं नैव अशकत् न समर्थोऽभूत् । कुतः । प्रेम्णा अवरुद्धः वर्णनिर्गम उच्चारणं यस्य सः । निर्गममार्गः कण्ठो वा ॥ ३२ ॥ ततः असौ चित्रकेतुः मनः समाधाय स्थिरीकृत्य इन्द्रियाणां बाह्यव्यापारं च नियम्य अचोद्य एतद् वक्ष्यमाणं बभाषे इत्यन्वयः । प्रतिलब्धा भगवत्कृपया पुनः प्राप्ता वाक् येन सोऽसौ चित्रकेतुः । सात्वतशास्त्रं नारदपञ्चरात्रं तत्रोक्तः चिन्मयो विग्रहो यस्येति मध्यपदलोपी समासः । सात्वत शास्त्रं विग्रहवत् प्रियं यस्येति वा ॥ ३३ ॥ इतः परं चतुर्दशपद्येषु आर्यवृत्तम् । हे अजित । भक्तैः । भवान् जितः वशीकृतः । ते च भक्ता भवता जिताः वशीकृताः । उभयत्र हेतुद्वयम् । भक्तविषये जितेति समेति । भगवति अतिकरुणः आत्मदः मोक्षदश्चेति । केषाम् । अकात्मनां निष्कामानां भजताम् ॥ ३४ ॥ जगदुदयादीनि तवैव विभवः । ऐश्वर्यम् । विश्वसृजः ब्रह्मादयः पृथक् पृथक् अभिमत्या ईश्वरत्वाभिमानेन वृथैव तत्र उदयादिषु स्पर्धन्ते । सर्वेश्वरं

---

[1] शितिः स्यात्तीक्ष्णनीलयोः इति धरणिः ।

परमाणुपरममहतोस्त्वमाद्यन्तान्तरवर्ती त्रयविधुरः ।
आदावन्तेऽपि च सत्त्वानां यद् ध्रुवं तदेवान्तरालेऽपि ॥३६॥
क्षित्यादिभिरेष किलावृतः सप्तभिर्दशगुणोत्तरैराण्डकोशः ।
यत्र पतत्यणुकल्पः सहाण्डकोटिकोटिभिस्तदनन्तः ॥३७॥
विषयतृषो नरपशवो य उपासते विभूतीर्न परं त्वाम् ।
तेषामाशिष ईश तदनु विनश्यन्ति यथा राजकुलम् ॥३८॥

कामधियस्त्वयि रचिता न परम रोहन्ति यथा करम्भबीजानि ।
ज्ञानात्मन्यगुणमये गुणगणतोऽस्य द्वन्द्वजालानि ॥३९॥

जितमजित तदा भवता यदाऽऽह भागवतं धर्ममनवद्यम् ।
निष्किञ्चना ये मुनय आत्मारामा यमुपासतेऽपवर्गाय ॥४०॥
विषममतिर्न यत्र नृणां त्वमहमिति मम तवेति च यदन्यत्र ।
विषमधिया रचितो यः स ह्यविशुद्धः क्षयिष्णुरधर्मबहुलः ॥४१॥
कः क्षेमो निजपरयोः कियानर्थः स्वपरद्रुहा धर्मेण ।
स्वद्रोहात् तव कोपः परसम्पीडया च तथाधर्मः ॥४२॥
न व्यभिचरति तवेक्षा यया ह्यभिहितो भागवतो धर्मः ।
स्थिरचरसत्त्वकदम्बेष्वपृथग्धियो यमुपासते त्वार्याः ॥४३॥

त्वां विस्मृत्येति शेषः । अंशः पुरुषः ॥३५॥ परमाणुः सूक्ष्मं मूलकारणम् परमहत् अन्तिमं कार्यं तयोरादौ अन्ते मध्ये च वर्तसे त्वम् । एतत्त्रयेण आद्यन्तमध्येन विधुरः रहितश्च त्वम् । अतः सत्त्वानां कार्याणाम् आदौ अन्ते च यत् ध्रुवं नित्यं तदेव मध्येऽपि सुवर्णमृत्तिकादिवत् ॥३६॥ सप्तभिः क्षित्यादिभिः आवृतः एषोऽण्डकोशः ब्रह्माण्डः अन्यैरपि कोटिकोटिभिः सह यत्र त्वयि अणुतुल्यः सन् पतति भ्रमति तत् तस्मात्त्वम् अनन्तोऽसि । सप्तभिः भूताऽहङ्कारमहद्भिः उत्तरोत्तरं दशगुणाधिकैः ॥३७॥ ये परं पूर्णं त्वां विहाय इन्द्राद्या विभूतीः उपासते ते नराकाराः पशव एव । यतो विषयेषु तृट् तृष्णा येषां ते । तदनु उपास्यनाशानन्तरं तेषां भोगा विनश्यन्ति । यथा राजकुलनाशे सेवकानां भोगाः ॥ ३८ ॥ कामधियः कामवासना अपि त्वयि रचिताः कृताश्चेत् न रोहन्ति देहान्तरोत्पत्तये न भवन्ति यथा भर्जितबीजानि अङ्कुरोत्पत्तये न। यतोऽस्य जीवस्य द्वन्द्वसमूहा रागद्वेषादयः अहन्ताममतादयः गुणसंसर्गादेव । ते च निर्गुणे त्वयि कृताः मुक्तिफलदा भवन्तीत्यर्थः ॥ ३९ ॥ यदा अनवद्यं निर्दोषं भागवतं धर्ममाह तदा भवता जितं सर्वोत्कर्षेण स्थितं स्वप्राप्ति साधनं व्यक्तीकृतमित्यर्थः । मुनयो यं धर्ममुपासते ॥ ४० ॥ यत्र भागवतधर्मे त्वमहमित्यादि विषममतिर्नास्ति यत् यथा अन्यत्र काम्यधर्मे । विषमधिया शत्रुमरणादिकामनया विहितो यो धर्माभासः स च दोषत्रयग्रस्तत्वान्नाश्रयणीयः ॥४१॥ धर्मेण काम्यकर्मणा स्वस्य परस्य च द्रुहा धर्मेण कः क्षेमः कियानर्थः फलं न किञ्चिदित्यर्थः । स्वद्रोहात् कायक्लेशात् कोपः कर्षयन्त इति गीतोक्ते । परस्य पश्वादेश्च हिंसया । अधर्मो नरकहेतुः॥४२॥तव ईक्षा सङ्कल्परूपा दृष्टिः नव्यभिचरति परमार्थान्नापसरति

न हि भगवन्नघटितमिदं त्वद्दर्शनान्नृणामखिलपापक्षयः।
यन्नाम सकृच्छ्रवणात् पुल्कसकोऽपि विमुच्यते संसारात् ॥४४॥

अथ भगवन् वयमधुना त्वदवलोकपरिमृष्टाशयमलाः।
सुरऋषिणा यदुदितं तावकेन कथमन्यथा भवति ॥४५॥

विदितमनन्त समस्तं तव जगदात्मनो जनैरिहाचरितम्।
विज्ञाप्यं परमगुरोः कियदिव सवितुरिव खद्योतैः ॥४६॥

नमस्तुभ्यं भगवते सकलजगत्स्थितिलयोदयेशाय।
दुरवसितात्मगतये कुयोगिनां भिदा परमहंसाय ॥४७॥

यं वै श्वसन्तमनु विश्वसृजः श्वसन्ति यं चेकितानमनु चित्तय उच्चकन्ति।
भूमण्डलं सर्षपायति यस्य मूर्ध्नि तस्मै नमो भगवतेऽस्तु सहस्रमूर्ध्ने ॥४८॥

श्रीशुक उवाच

संस्तुतो भगवानेवमनन्तस्तमभाषत। विद्याधरपतिं प्रीतश्चित्रकेतुं कुरूद्वह ॥४९॥

श्रीभगवान् उवाच

यन्नारदाङ्गिरोभ्यां ते व्याहृतं मेऽनुशासनम्। संसिद्धोऽसि तया राजन् विद्यया दर्शनाच्च मे
अहं वै सर्वभूतानि भूतात्मा भूतभावनः। शब्दब्रह्म परं ब्रह्म ममोभे शाश्वती तनू ॥५१॥
लोके विततमात्मानं लोकं चात्मनि संततम्। उभयं च मया व्याप्तं मयि चैवोभयं कृतम्॥५२
यथा सुषुप्तः पुरुषो विश्वं पश्यति चात्मनि। आत्मानमेकदेशस्थं मन्यते स्वप्न उत्थितः॥५३॥

अत एव आर्या यं धर्ममुपासते। कथंभूताः स्थावरजङ्गमप्राणिकदम्बेषु वासुदेवधियः सन्तः॥४३॥ अघटितमसङ्गतं नास्ति। पुल्क सः चाण्डालोऽपि ॥ ४४ ॥ अथ अतः वयं कृतार्था जाता इति शेषः। परिमृष्टाः क्षालिता अन्तःकरणमला रागादयो येषां ते तत्। कथमन्यथा भवति न कथमपि ॥ ४५ ॥ हे अनन्त! इह जनैर्यत् आचरितं तत्सर्वं तव विदितमेव। कर्तरि षष्ठी। अतः परमगुरोस्तव समक्षं विज्ञापनीयं प्रकाशनीयं कियत् न किमपि। यथा सवितुरग्रे खद्योतैर्न किञ्चित् प्रकाशजीयमस्ति तद्वत् ॥ ४६ ॥ सकलस्य जगतः स्थित्यादीनाम् ईशाय कारणाय। कुयोगिनां विषयिणां दुरवसिता अविज्ञाता आत्मगतिः निजं तत्वं यस्य तस्मै। केन। भिदा भेददृष्ट्या ॥ ४७ ॥ श्वसन्तं चेष्टमानं यम् अनु विश्वसृजः ब्रह्मादयः कर्मेन्द्रियाणि च श्वसन्ति चेष्टन्ते। चेकितानं[1] पश्यन्तमनु चित्तयः सूर्यादयः ज्ञानेन्द्रियाणि उच्चकन्ति[2] स्वस्वविषयं प्रकाशयन्ति। सर्षपायति सर्षपवत् आचरति तस्मै नमः ॥ ४८ ॥ कुरुद्वहेति परीक्षित्सम्बोधनम् ॥ ४९ ॥ ते तुभ्यं मे मम अनुशासनं शिक्षावचनं यत् व्याहृतं निरूपितं तेन तथा दर्शनाच्च संसिद्धः कृतार्थोऽसि ॥ ५० ॥ अहं वै अहमेव। भूतानामात्मा। भोक्ताऽपि 'अहमेव'। भोक्तृभोग्यात्मकं जगत् मद्व्यतिरिक्तं नास्तीत्यर्थः। यतोऽहं भूतानां भावनः कारणम्। शाश्वती 'शाश्वत्यौ नित्ये तनू मूर्ती स्तः ॥ ५१ ॥ लोके भोग्यप्रपञ्चे भोक्तृत्वेन 'विततमनुगतमात्मानं आत्मनि 'च' संततं लोकं। उभयं च मया कारणात्मना व्याप्तं पश्येत्। यतो मय्येव आधारे सर्वं कल्पितम्॥५२॥ स्वप्ने विश्वं गिरिवनादिकम्

१. कित धातुर्दर्शनेऽपि यङन्ताच्छानचिरूपम्।
२. उपसर्गवशात् चकतृप्तौ इत्यस्यार्थान्तरम्। 'धात्वर्थं बाधते कश्चित्' इति नियमात्।

एवं जागरणादीनि जीवस्थानानि चात्मनः । मायामात्राणि विज्ञाय तद्द्रष्टारं परं स्मरेत् ५४।
येन प्रसुप्तः पुरुषः स्वापं वेदात्मनस्तदा सुखं च निर्गुणं ब्रह्म तमात्मानमवेहि माम् ॥५५॥
उभयं स्मरतः पुंसः प्रस्वापप्रतिबोधयोः । अन्वेति व्यतिरिच्येत तज्ज्ञानं ब्रह्म तत् परम्॥५६॥
यदेतद् विस्मृतं पुंसो मद्भावं भिन्नमात्मनः । ततः संसार एतस्य देहाद् देहो मृतेर्मृतिः ॥५७
लब्ध्वेह मानुषीं योनिं ज्ञानविज्ञानसम्भवाम् । आत्मानं यो न बुद्ध्येत न क्वचिच्छममाप्नुयात्
स्मृत्वेहायां परिक्लेशं ततः फलविपर्ययम् । अभयं चाप्यनीहायां संकल्पाद् विरमेत् कविः ५९
सुखाय दुःखमोक्षाय कुर्वाते दम्पती क्रियाः । ततोऽनिवृत्तिरप्राप्तिर्दुःखस्य च सुखस्य च ॥६०॥
एवं विपर्ययं बुद्ध्वा नृणां विज्ञाभिमानिनाम् ।आत्मनश्च गतिं सूक्ष्मां स्थानत्रयविलक्षणाम्६१
दृष्टश्रुताभिर्मात्राभिर्निर्मुक्तः स्वेन तेजसा । ज्ञानविज्ञानसंतुष्टो मद्भक्तः पुरुषो भवेत् ॥६२॥
एतावानेव मनुजैर्योगनैपुणबुद्धिभिः । स्वार्थः सर्वात्मना ज्ञेयो यत्परात्मैकदर्शनम् ॥६३॥
त्वमेतच्छ्रद्धया राजन्नप्रमत्तो वचो मम । ज्ञानविज्ञानसम्पन्नो धारयन्नाशु सिध्यसि ॥६४॥

श्रीशुक उवाच

आश्वास्य भगवानित्थं चित्रकेतुं धगद्गुरुः । पश्यतस्तस्य विश्वात्मा ततश्चान्तर्दधे हरिः॥६५॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां षष्ठस्कन्धे चित्रकेतोः परमात्मदर्शनं नाम षोडशोऽध्यायः ॥ १६ ॥

देशान्तरस्थमपि आत्मनि पश्यति । पुनः स्वप्ने एव उत्थितः आत्मानं शयनदेशे एव स्थितं पश्यति जाग्रदवस्थामनुभवति।।५३।।एवं जीवोपाधेर्बुद्धेरवस्थाभूतानि एतानि आत्मनः परमेश्वरस्य मायया कल्पितानीति विज्ञाय तासामवस्थानां द्रष्टारम् अत एव परं तदवस्थारहितं परमात्मानं स्मरेत् ॥ ५४ ॥ प्रसुप्तः पुरुषः तदा स्वप्ने येन हेतुभूतेन आत्मनः स्वापं स्वप्नसुखं सुषुप्तौ निर्गुणमतीन्द्रियं सुखं च वेद तमात्मानं ब्रह्म मामवेहीत्यन्वयः ॥ ५५ ॥ उभयं प्रस्वापं प्रतिबोधं च स्मरतः पुंस तयोः प्रस्वापप्रतिबोधयोः प्रकाशकत्वेन यदन्वेति ताभ्यां व्यतिरिक्तं च यत् भवति तद् ज्ञानं परं ब्रह्मैव मामवेहीत्यनुषङ्गः ॥५६॥ यत् यदि एतत् मद्भावं मत्स्वरूपं ब्रह्म विस्मृतं भवति तदा आत्मनः सकाशात् भिन्नं भवति । ततश्च भेददर्शनात् एतस्य पुंसः संसारो भवति । तत्स्वरूपमाह देहेति॥५७॥शं सुखम्॥५८॥ईहायां प्रवृत्तिमार्गे । अनीहायां निवृत्तिमार्गे तु अभयं मोक्षः । सङ्कल्पात् फलसङ्कल्पात् ॥५९॥ दम्पती स्त्रीपुरुषौ । ततः क्रियातः । दुःखस्य अनिवृत्तिः ॥ ६० ॥ एवमिति युग्मम् । विज्ञाः प्रवीणा वयमिति । विलक्षणां तुरीयाम् ॥६१॥ दृष्टश्रुताभिः मात्राभिः । ऐहिकपारलौकिकैः विषयैः । तेजसा विवेकबलेन मद्भक्तः मद्भजनतत्परः ॥ ६२ ॥ परात्मा भगवान् तस्य एकं केवलं दर्शनं साक्षात्कार इति यत् एतावानेव स्वार्थः परमपुरुषार्थो ज्ञेयः । योगे भक्तियोगसम्पादने नैपुण्यं चातुर्यं यस्यां सा बुद्धिर्येषां तैः ॥ ६३ ॥ वचो धारयन् आशु सिध्यसि मां प्राप्स्यसि । यत्र दृष्टस्ततस्तत्रैव अन्तर्दधे ॥ ६५ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे गूढार्थदीपिन्यां षोडशोऽध्यायः

अथ सप्तदशोऽध्यायः

श्रीशुक उवाच

यतश्चान्तर्हितोऽनन्तस्तस्यै कृत्वा दिशे नमः। विद्याधरश्चित्रकेतुश्चचार गगनेचरः ॥१॥

स लक्षं वर्षलक्षाणामव्याहतबलेन्द्रियः। स्तूयमानो महायोगी मुनिभिः सिद्धचारणैः ॥२॥

कुलाचलेन्द्रद्रोणीषु नानासंकल्पसिद्धिषु। रेमे विद्याधरस्त्रीभिर्गापयन् हरिमीश्वरम् ॥ ४॥

आलिङ्ग्याङ्कीकृतां देवीं बाहुना मुनिसंसदि। उवाच देव्याः शृण्वत्या जहासोच्चैस्तदन्तिके॥५

चित्रकेतुरुवाच

एष लोकगुरुः साक्षाद्धर्मं वक्ता शरीरिणाम्। आस्ते मुख्यः सभायां वै मिथुनीभूय भार्यया॥६॥

जटाधरस्तीव्रतपा ब्रह्मवादिसभापतिः। अङ्कीकृत्य स्त्रियं चास्ते गतह्रीः प्राकृतो यथा ॥७॥

प्रायशः प्राकृताश्चापि स्त्रियं रहसि बिभ्रति। अयं महाव्रतधरो बिभर्ति सदसि स्त्रियम् ॥८॥

श्रीशुक उवाच

भगवानपि तच्छ्रुत्वा प्रहस्यागाधधीर्नृप। तूष्णीं बभूव सदसि सभ्याश्च तदनुव्रताः ॥ ९॥

इत्यतद्वीर्यविदुषि ब्रुवाणे बह्वशोभनम्। रुषाऽऽह देवी धृष्टाय निर्जितात्माभिमानिने ॥१०॥

पार्वत्युवाच

अयं किमधुना लोके शास्ता दण्डधरः प्रभुः। अस्मद्विधानां दुष्टानां निर्लज्जानां च विप्रकृत्

न वेद धर्मं किल पद्मयोनिर्न ब्रह्मपुत्रा भृगुनारदाद्याः।
न वै कुमारः कपिलो मनुश्च ये नो निषेधन्त्यतिवर्तिनं हरम्॥१२॥

सिद्धिं सप्तदशे प्राप्य चित्रकेतुर्नभश्चरन्।
आक्षिपन् गिरिशं मोहाच्छापाद् वृत्तासुरोऽभवत् ॥ १ ॥

गगनेचरः आकाशचारी सन् इतस्ततो विचचार ॥ १ ॥ स इति युग्मम्। स चित्रकेतुः स्त्रीभिः सह हरिं गापयन् द्रोणीषु सुमेरुगुहासु रेमे इति द्वयोरन्वयः। लक्षं बहुकाल-पर्यन्तम्। अव्याहतमप्रतिहतं बलम् इन्द्रियपाटवं च यस्य सः ॥ २ ॥ ३ ॥ स चित्रकेतुः विमानेन गच्छन् मुनिसंसदि स्थितं गिरिशं ददर्शेत्यन्वयः। अंकीकृता देवी बाहुना आलिङ्ग्य स्थितम् ॥४।५॥ धर्मं वक्ता उपदिशति। आस्ते नोचितमेतत् ॥ ६ ॥ यथा गतह्रीः निर्लज्जः प्राकृतो निकृष्टो जनस्तथाऽयमीश्वरोऽपि ॥ ७ ॥ रहसि एकान्ते बिभ्रति स्वाङ्के निधापयन्ति ॥ ८ ॥ अगाधा निर्विकारा धीर्यस्य सः। तदनुवर्तिनः समासदोऽपि तूष्णीं बभूवुरिति क्रियाव्यत्ययेनान्वयः ॥ ९ ॥ न तस्य वीर्यं प्रभावम् अर्द्धनारीश्वरत्वं वेत्तीति तस्मिन् चित्रकेतौ इत्थं बहु अनुचितं ब्रुवाणे सति देवी आह। धृष्टाय[1] उच्छृङ्खलाय। अहं निर्जितात्मा इत्यभिमानशालिने ॥ १० ॥ अधुना किमयमेव नियुक्तः। विरुद्धं प्रकर्षेण करोतीति विप्रकृत् दमनकारी ॥ ११ ॥ पद्मयोनिः ब्रह्मा। अतिवर्तिनं शास्त्रमुल्लङ्घ्य वर्तमानं न निवारयन्ति ॥ १२ ॥ एषां

---

१. क्रुधद्रुह-इति चतुर्थी।

एषामनुध्येयपदाब्जयुग्मं जगद्गुरुं मङ्गलमङ्गलं स्वयम् ।
यः क्षत्रबन्धुः परिभूय सूरीन् प्रशास्ति धृष्टस्तदयं हि दण्डयः ॥१३॥

नायमर्हति वैकुण्ठपादमूलोपसर्पणम् । सम्भावितमतिः स्तब्धः साधुभिः पर्युपासितम् ॥१४॥

अतः पापीयसीं योनिमासुरीं याहि दुर्मते । यथेह भयो महतां न कर्ता पुत्र किल्बिषम् ॥१५॥

श्रीशुक उवाच

एवं शप्तश्चित्रकेतुर्विमानादवरुह्य सः । प्रसादयामास सतीं मूर्ध्ना नम्रेण भारत ॥१६॥

चित्रकेतुरुवाच

प्रतिगृह्णामि ते शापमात्मनोऽञ्जलिनाम्बिके । देवैर्मर्त्याय यत् प्रोक्तं पूर्वदिष्टं हि तस्य तत् ॥१७॥

संसारचक्र एतस्मिञ्जन्तुरज्ञानमोहितः । भ्राम्यन् सुखं च दुःखं च भुङ्क्ते सर्वत्र सर्वदा ॥१८॥

नैवात्मा न परश्चापि कर्ता स्यात् सुखदुःखयोः । कर्तारं मन्यतेऽप्राज्ञ आत्मानं परमेव च ॥१९॥

गुणप्रवाह एतस्मिन् कः शापः को न्वनुग्रहः । कः स्वर्गो नरकः को वा किं सुखं दुःखमेव वा ॥२०॥

एकः सृजति भूतानि भगवानात्ममायया । एषां बन्धं च मोक्षं च सुखं दुःखं च निष्कलः ॥२१॥

न तस्य कश्चिद्दयितः प्रतीपो न ज्ञातिबन्धुर्न परो न च स्वः ।
समस्य सर्वत्र निरञ्जनस्य सुखे न रागः कुत एव रोषः ॥२२॥

तथापि तच्छक्तिविसर्ग एषां सुखाय दुःखाय हिताहिताय ।
बन्धाय मोक्षाय च मृत्युजन्मनोः शरीरिणां संसृतयेऽवकल्पते ॥२३॥

अथ प्रसादये न त्वां शापमोक्षाय भामिनि । यन्मन्यसे असाधूक्तं मम तत् क्षम्यतां सति ॥२४॥

ब्रह्मादीनाम् । मंगला[1] नां कल्याण हेतूनां धर्माणां मङ्गलं रक्षकम् । क्षत्रबन्धुः क्षत्रियाधमः । सूरीन् ब्रह्मादीन् ॥ १३ ॥ पादमूले उपसर्पणं प्राप्तिम् । संभावितमतिः आत्मश्लाघी स्तब्धोऽनम्रः ॥ १४ ॥ यथा महतां किल्विषमपराधं न कर्ता न करिष्यति तथा याहीत्यन्वयः । अपुत्रेति अकारप्रश्लेशेन नैतत्पुत्रोचितं कार्यमस्ति । विरोधे नञ् ॥१५।१६॥ यत् प्रोक्तं सुखं दुःखं वा तत् पूर्वदिष्टं प्राचीनकर्मायत्तम् ॥ १७ ॥ सर्वत्र जन्मसु ॥१८॥ प्रकर्षेण अज्ञः प्राज्ञो मूर्खः । अप्राज्ञ इति वा छेदः ॥ १९ ॥ गुण प्रवाहे संसारे ॥ २० ॥ एकोऽसहाय एव भगवान् भूतानि प्राणिनः एषां बन्धादिकं च सृजतीत्यन्वयः । निष्कलो निरञ्जनः ॥ २१ ॥ दयितः प्रियः । प्रतीपः शत्रुः । ज्ञातिः सपिण्डः । बन्धुः वैवाहिकः । निरञ्जनस्य निरुपाधिकस्य ॥ २२ ॥

यद्यप्येवं तथापि तस्य शक्त्या मायया यो विसर्गः[2] पुण्यपापादिलक्षणं कर्म तदेव शरीरिणां सुखाद्यर्थम् अवकल्पते समर्थं भवति । संसृतये संसाराय । [3]मृत्युजन्मनोः ॥२३॥ हे भामिनि ! हे पूज्ये !

---

१. 'कल्याणे मङ्गलं प्रोक्तं सर्वतो रक्षकेऽपि च' इति हलधरः ।

२. 'विसर्गः कर्मसंज्ञितः' इति गीतोक्तेः ।

३. जन्ममृत्युभ्याम् । तादर्थ्यस्य सम्बन्धसामान्यत्वेन विवक्षया षष्ठी ।

श्रीशुक उवाच

इति प्रसाद्य गिरिशौ चित्रकेतुररिन्दम । जगाम स्वविमानेन पश्यतोः स्मयतोस्तयोः ॥२५॥

ततस्तु भगवान् रुद्रो रुद्राणीमिदमब्रवीत् । देवर्षिदैत्यसिद्धानां पार्षदानां च शृण्वताम् ॥२६॥

श्रीरुद्र उवाच

दृष्टवत्यसि सुश्रोणि हरेरद्भुतकर्मणः । माहात्म्यं भृत्यभृत्यानां निःस्पृहाणां महात्मनाम् ॥२७॥

नारायणपराः सर्वे न कुतश्चन बिभ्यति । स्वर्गापवर्गनरकेष्वपि तुल्यार्थदर्शिनः ॥२८॥

देहिनां देहसंयोगाद् द्वन्द्वानीश्वरलीलया । सुखं दुखं मृतिर्जन्म शापोऽनुग्रह एव च ॥२९॥

अविवेककृतः पुंसो ह्यर्थभेद इवात्मनि । गुणदोषविकल्पश्च भिदेव स्रजि सर्पवत् ॥३०॥

वासुदेवे भगवति भक्तिमुद्वहतां नृणाम् । ज्ञानवैराग्यवीर्याणां नेह कश्चिद् व्यपाश्रयः ॥३१॥

नाहं विरिञ्चो न कुमारनारदौ न ब्रह्मपुत्रा मुनयः सुरेशाः ।
विदाम यस्येहितमंशकांशका न तत्स्वरूपं पृथगीशमानिनः ॥३२॥

न ह्यस्यास्ति प्रियः कश्चिन्नाप्रियः स्वः परोऽपि वा । आत्मत्वात् सर्वभूतानां सर्वभूतप्रियो हरिः

तस्य चायं महाभागश्चित्रकेतुः प्रियोऽनुगः । सर्वत्र समदृक् शान्तो ह्यहं चैवाच्युतप्रियः ॥३४॥

तस्मान्न विस्मयः कार्यः पुरुषेषु महात्मसु । महापुरुषभक्तेषु शान्तेषु समदर्शिषु ॥३५॥

श्रीशुक उवाच

इति श्रुत्वा भगवतः शिवस्योमाभिभाषितम् । बभूव शान्तधी राजन् देवी विगतविस्मया ३६

इति भागवतो देव्याः प्रतिशप्तुमलन्तमः । मूर्ध्ना संजगृहे शापमेतावत् साधुलक्षणम् ॥३७॥

हे सति ! मातः । ममोक्तं यत् असाधु मन्यसे तत् क्षम्यताम् ॥२४॥ स्मयतोः विस्मयं कुर्वतोः सतोः । एतच्च लोकदृष्टयोक्तम् ॥२५।२६॥ भृत्यां नारदादयस्तेषां भृत्याः चित्रकेतुप्रभृतयः । श्रोणिः कटिभागः ॥२७।२८॥ लीलया मायया देहसंयोगात् देहिनां द्वन्द्वानि भवन्ति तेषु गुणदोषविकल्पश्चेत्युत्तरेणान्वयः सुखे गुणबुद्धि दुःखे दोषबुद्धि स चाविवेकेन कृतः अतो मिथ्या । अत्र दृष्टान्तद्वयम् । स्वप्ने आत्मनि अर्थभेदइव राजरङ्कादिरूपः जागरे स्रजि सर्पवत्[1] भिदा भेदः कृतः । भिदा टावन्तोऽयम् ॥ ३० ॥ उद्वहतां कुर्वताम् । भगवद्व्यतिरिक्तः कश्चिदपि अर्थः व्यपाश्रयः नाश्रयणीयः प्रेमास्पदीभूतो न भवति ॥३१॥ यस्येहितं चेष्टितं यदा वयं न विद्मः तदा अंशकांशका अंशकः पुरुषावतारः अन्ये सुरेशा इन्द्रादयः कथं विदुः न कथमपि यतः पृथक् आत्मानमीशं मन्यन्ते तथा । अहमिति लीलासौन्दर्यार्थम् यो वै रुद्रः स नारायण' इति श्रुतेस्तत्स्वरूपभूतत्वात् ॥ ३२ ॥ आत्मत्वात् अन्तरात्मत्वात् ॥ ३३ ॥ तस्य प्रियत्वान्न क्रोधविषयोऽयम् ॥ ३४।३५ ॥ उमा श्रुत्वा । स्मयः आश्चर्यम् ॥ ३६ ॥ अलन्तमः समर्थतमोऽपि । भक्तमाहात्म्यं द्योतयितुमतिशयोक्तिरियं नहि जगज्जननीमनादिशक्तिं शप्तुं चित्रकेतोः सामर्थ्यमस्ति निमेषमात्रेणैव जगत्संहारकर्तृत्वस्य श्रूयमाणत्वादत एवं व्याख्येयम् प्रतिशप्तुमत्र तमः क्रोधोऽलं[2] निरर्थकं स्यादतः शापं जगृहे । एतावता मम साधु मङ्गलं स्यात् लक्षणं[3] लोके नामापि स्यात् ।

---

१. अयमेव पाठः प्रशस्तः सुगमश्च । २. 'अलं भूषणपर्याप्तिवारणेषु निरर्थके' इति विश्वः ।
३. लक्षणं नाम्नि चिह्ने च' इति कोशात् ।

जज्ञे त्वष्टुर्दक्षिणाग्नौ दानवीं योनिमाश्रितः । वृत्र इत्यभिविख्यातो ज्ञानविज्ञानसंयुतः ।३८।
एतत् ते सर्वमाख्यातं यन्मां त्वं परिपृच्छसि । वृत्रस्यासुरजातेश्च कारणं भगवन्मतेः ॥३९॥
इतिहासमिमं पुण्यं चित्रकेतोर्महात्मनः । माहात्म्यं विष्णुभक्तानां श्रुत्वा बन्धाद्विमुच्यते ।४०।
य एतत् प्रातरुत्थाय श्रद्धया वाग्यतः पठेत् । इतिहासं हरिं स्मृत्वा स याति परमां गतिम् ४१

इति श्रीमद्भागवते महापुराणे परमहंस्यां संहितायां षष्ठस्कन्धे चित्रकेतुशापो नाम सप्तदशोऽध्यायः॥ १७॥

अथाष्टादशोऽध्यायः

श्रीशुक उवाच

पृश्निस्तु पत्नी सवितुः सावित्रीं व्याहृतिं त्रयीम् । अग्निहोत्रं पशुं सोमं चातुर्मास्यं महामखान्१
सिद्धिर्भगस्य भार्याङ्ग महिमानं विभुं प्रभुम् । आशिषं च वरारोहां कन्यां प्रासूत सुव्रताम् ।२।
धातुः कुहूः सिनीवाली राका चानुमतिस्था । सायं दर्शमथ प्रातः पूर्णमासमनुक्रमात् ॥ ३ ॥
अग्नीन् पुरीष्यानाधत्त क्रियायां समनन्तरः । चर्षणी वरुणस्यासीद् यस्यां जातो भृगुः पुनः।४।
वाल्मीकिश्च महायोगी वल्मीकादभवत् किल । अगस्त्यश्च वसिष्ठश्च मित्रावरुणयोर्ऋषी ।५।
रेतः सिषिचतुः कुम्भे उर्वश्याः संनिधौ द्रुतम् । रेवत्यां मित्र उत्सर्गमरिष्टं पिप्पलं व्यधात् ।६।

अन्यथा अऽमङ्गलं दुर्नामैव स्मात्॥ ३७॥ त्वष्टा द्वादशादित्येषु चतुर्थः तस्य सङ्कल्पात् । योनिं जातिम्॥ ३८॥ असुरजातेः कारणं महदपराधः भगवन्मतेः कारणं महदनुग्रहः ॥ ३९ ॥ माहात्म्यं माहात्म्यसूचकम् । बन्धात् संसारात् ॥ ४० ॥ एतत् एवम् । वाग्यतः संयतवाक् सन् ॥ ४१ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे गूढार्थदीपिन्यां सप्तदशोऽध्यायः ।

अष्टादशेऽदितेर्वंशा अवशिष्टा निरूपिताः ।
शक्रोऽच्छिनद्दितेर्गर्भं तस्माज्जातो मरुद्गणः ॥ १ ॥

अदितेः पञ्चमपुत्रस्य सवितुर्वंशमाह सावित्र्यादिकन्याः । अग्निहोत्रादीन् पुत्रांश्च प्रासूत उत्पादयामासेत्युत्तरेणान्वयः । महामखान् [1]पञ्चयज्ञान् । अत्र तदभिमानिनो देवा ज्ञेयाः ॥ १ ॥ अङ्ग हे राजन् । भगस्य षष्ठपुत्रस्य । महिमादिपुत्रत्रयम् । आशिषं कन्यां च ।।२।। धातुः सप्तमपुत्रस्य चतस्रः पत्न्यः अनुक्रमात् सायमादीन् चतुरः पुत्रान् प्रासूत । कुहूः[2] ॥३॥ अग्नीत्यर्द्धम् । समनन्तरो विधाता अष्टमपुत्रः क्रियायां पत्न्यां पुरीष्यसंज्ञकान् पुत्रान् आधत्त जनयामास ।।४।। वरुणः नवमपुत्रः चर्षणी भार्या । पूर्वं ब्रह्मपुत्रः सन्नपि पुनः वाल्मीकिरपि वरुणपुत्रः । जातमात्रस्य तस्योपरि वल्मीको जातस्तथैव तत्र तपः कुर्वन् कालेन ततो निःसृतो वाल्मीकिरभवत् । केचित्तु वरुणेन स्ववीर्यं वल्मीके क्षिप्तमतो वल्मीकजातत्वाद्वाल्मीकिरिति पुत्रस्तु भृगुरेक एवेत्याहुः ॥५॥ सार्द्धम् । एतौ ऋषी मित्रावरुणयोः पुत्रौ उर्वश्या दर्शनाद् द्रुतं स्कन्नं रेतः उभौ कुम्भे सिषिचतुः । मित्रः दशमपुत्रः त्रीन् पुत्रान् व्यधात् उत्पादयामास-

---

१. पाठो होमश्चातिथीनां सपर्या तर्पणं वलिः । एते पञ्च महायज्ञा ब्रह्मयज्ञादिनामकाः ।
२. सा दृष्टेन्दुः सिनीवाली सा नष्टेन्दुकला कुहूः । कलाहीने सानुमतिः पूर्णे राका निशाकरे

पौलोम्यामिन्द्र आधत्त त्रीन् पुत्रानिति नः श्रुतम् । जयन्तमृषभं तात तृतीयं मीढुषं प्रभुः ॥७॥
उरुक्रमस्य देवस्य मायावामनरूपिणः । कीर्तौ पत्न्यां बृहच्छ्लोकस्तस्यासन् सौभगादयः ॥८॥
तत्कर्मगुणवीर्याणि काश्यपस्य महात्मनः । पश्चाद् वक्ष्यामहेऽदित्यां यथैवावततार ह ॥९॥
अथ कश्यपदायादान् दैतेयान् कीर्तयामि ते । यत्र भागवतः श्रीमान् प्रह्लादो बलिरेव च ॥१०॥
दितेर्द्वावेव दायादौ दैत्यदानववन्दितौ । हिरण्यकशिपुर्नाम हिरण्याक्षश्च कीर्तितौ ॥११॥
हिरण्यकशिपोर्भार्या कयाधुर्नाम दानवी । जम्भस्य तनया दत्ता सुषुवे चतुरः सुतान् ॥१२॥
संह्लादं प्रागनुह्लादं ह्लादं प्रह्लादमेव च । तत्स्वसा सिंहिका नाम राहुं विप्रचितोऽग्रहीत् ॥१३॥
शिरोऽहरद्यस्य हरिश्चक्रेण पिबतोऽमृतम् । संह्लादस्य कृतिर्भार्यासूत पञ्चजनं ततः ॥१४॥
ह्लादस्य धमनिर्भार्यासूत वातापिमिल्वलम् । योऽगस्त्याय त्वतिथये पेचे वातापिमिल्वलः ॥१५॥
अनुह्लादस्य सूर्म्यायां बाष्कलो महिषस्तथा । विरोचनस्तु प्राह्लादिर्देव्यास्तस्याभवद् बलिः ॥१६॥
बाणज्येष्ठं पुत्रशतमशनायां ततोऽभवत् । तस्यानुभावः सुश्लोक्यः पश्चादेवाभिधास्यते ॥१७॥
बाण आराध्य गिरिशं लेभे तद्गणमुख्यताम् । यत्पार्श्वे भगवानास्ते ह्यद्यापि पुरपालकः ॥१८॥
मरुतश्च दितेः पुत्राश्चत्वारिंशन्नवाधिकाः । त आसन्नप्रजाः सर्वे नीता इन्द्रेण सात्मताम् ॥१९॥

राजोवाच

कथं त आसुरं भावमपोह्यौत्पत्तिकं गुरो । इन्द्रेण प्रापिताः सात्म्यं किं तत्साधु कृतं हि तैः ॥२०॥
इमे श्रद्दधते ब्रह्मन्नृषयो हि मया सह । परिज्ञानाय भगवंस्तन्नो व्याख्यातुमर्हसि ॥२१॥

रेवत्यां ॥६॥ प्रलोम्नः कन्यायां पौलोम्यां पत्न्याम् । त्रीन् आधत्त अजनयत् ॥७॥ माया कृपा । बृहच्छ्लोकः पुत्रः । उरुक्रमस्य द्वादशपुत्रस्य ॥ ८ ॥ पश्चात् अष्टमस्कन्धे ॥ ९ ॥ दायादान् पुत्रान् । दित्यां जातान् ॥ १०।११ ॥ हिरण्येति युग्मम् । तेनैव दत्ता । विप्रचितो विप्रचित्तेः दानवात् स्वभर्तुः सकाशात् राहुं पुत्रम् ॥१२।१३॥ यस्य राहोः । ततः संह्लादात् पञ्चजनं पुत्रम् ॥१४॥ वातापिम् इल्वलं पुत्रद्वयम् । यः इल्वलः प्रथमान्तः अगस्त्यं भोजयितुं मेषरूपं वातापिं पपाच ॥ १५ ॥ प्राह्लादिः प्रह्लादपुत्रः । तस्य विरोचनस्य दर्वीनाम्न्या भार्यायाः सकाशात् बलिः पुत्रः ॥ १६ ॥ ततो बलेः सकाशात् । सुश्लोक्यः श्लोकैर्वर्णनार्हः । पश्चात् अष्टमस्कन्धे कथ्यते ॥ १७।१८ ॥ अप्रजाः सन्ततिहीनाः सात्मतां देवत्वं प्रापिताः ॥ १९ ॥ ते मरुतः । अपोह्य त्याजयित्वा । औत्पत्तिकं उत्पत्त्या जातमौत्पत्तिकं जन्मसिद्धम् । सात्म्यं देवत्वम् ॥ २० ॥ इमे सर्वेऽपि ऋषयः परिज्ञानाय एतत् परिज्ञातुं श्रद्दधते

१. वातापे ब्रह्मवरोऽस्ति मेषरूपिणं त्वां भक्षितं यदि कश्चिदाह्वयेत्तदा त्वं भक्षितुरुदरं विदार्य स्वरूपेण बहिरास्यसीति महाभारते वर्णितमगस्त्योपाख्याने । तौ च इल्वलवातापी ब्राह्मणकुलहनने प्रवृत्तौ । महामुनिनाऽगस्त्येन तयोः वातापिर्भक्षयित्वा जीर्णतां नीतः । इल्वलश्च मुनिहनने प्रवृत्तो हुंकारेण भस्मसात्कृत इति वाल्मीकीयेऽपि वर्णितम् ।

२. 'श्रद्धाऽऽस्तिक्येऽभिलाषे च' इति हैमः ।

सूत उवाच

तद्विष्णुरातस्य स बादरायणिर्वचो निशम्याऽऽदृमल्पमर्थवत् ।
सभाजयन् संनिभृतेन चेतसा जगाद सत्रायण सर्वदर्शनः ॥२२॥

श्रीशुक उवाच

हतपुत्रा दितिः शक्रपार्ष्णिग्राहेण विष्णुना । मन्युना शोकदीप्तेन ज्वलन्ती पर्यचिन्तयत् ॥२३॥
कदा नु भ्रातृहन्तारमिन्द्रियाराममुल्बणम् । अक्लिन्नहृदयं पापं घातयित्वा शये सुखम् ॥२४॥
कृमिविड्भस्मसंज्ञाऽऽसीद्यस्येशाभिहितस्य च । भूतध्रुक् तत्कृते स्वार्थं किं वेद निरयो यतः॥२५॥
आशासानस्य तस्येदं ध्रुवमुन्नद्धचेतसः । मदशोषक इन्द्रस्य भूयाद् येन सुतो हि मे ॥२६॥
इति भावेन सा भर्तुराचचारासकृत्प्रियम् । शुश्रूषयानुरागेण प्रश्रयेण दमेन च ॥२७॥
भक्त्या परमया राजन् मनोज्ञैर्वल्गुभाषितैः । मनो जग्राह भावज्ञा सुस्मितापाङ्गवीक्षणैः ॥२८॥
एवं स्त्रिया जडीभूतो विद्वानपि विदग्धया । बाढमित्याह विवशो न तच्चित्रं हि योषिति ॥२९॥
विलोक्यैकान्तभूतानि भूतान्यादौ प्रजापतिः । स्त्रियं चक्रे स्वदेहार्धं यथा पुंसां मतिर्हृता॥३०॥
एवं शुश्रूषितस्तात भगवान् कश्यपः स्त्रिया । प्रहस्य परमप्रीतो दितिमाहाभिनन्द्य च ॥३१॥

कश्यप उवाच

वरं वरय वामोरु प्रीतस्तेऽहमनिन्दिते । स्त्रिया भर्तरि सुप्रीते कः काम इह चागमः ॥३२॥
पतिरेव हि नारीणां दैवतं परमं स्मृतम् । मानसः सर्वभूतानां वासुदेवः श्रियः पतिः ॥३३॥
स एव देवतालिङ्गैर्नामरूपविकल्पितैः । इज्यते भगवान् पुम्भिः स्त्रीभिश्च पतिरूपधृक् ॥३४॥
तस्मात् पतिव्रता नार्यः श्रेयस्कामाः सुमध्यमे । यजन्तेऽनन्यभावेन पतिमात्मानमीश्वरम् ॥३५॥

इच्छन्ति ॥ २१ ॥ सत्रं ज्ञानसत्रमयनमाश्रयो यस्य तत्सम्बुद्धौ हे सत्रायण हे शौनक ! स शुकः विष्णुरातस्य परीक्षितः तत्प्रश्नरूपं वचो निशम्य सन्निभृतेन प्रसन्नेन चेतसा सभाजयन् प्रशंसयन् जगादेत्यन्वयः । आदृतम् आदरयोग्यम् ॥ २२ ॥ शक्रस्य पार्ष्णिग्राहेण पृष्ठतः सहायकेन । पार्ष्णिं पक्षं गृह्णातीति वा ॥ २३ ॥ इन्द्रियारामं विषयासक्तम् । उल्वणं क्रूरम् । अक्लिन्नं पाषाणहृदयम् ॥२४॥ ईशाभिहितस्य नरदेवसंज्ञितस्य यस्य देहस्य मरणोत्तरं संज्ञात्रयमासीत् । तत्कृते देहार्थे । यतो भूतद्रोहात् ॥ २५ ॥ इदं देहादिकं ध्रुवं नित्यम् आशासानस्य मन्यमानस्य । इन्द्रस्य गर्वनाशकः येन भवेत् तेन भावेन अभिप्रायेण इति-इत्थं प्रियमाचचार ॥ २६।२७ ॥ वल्गुभाषितैः मधुरवचनैः । अपाङ्गवीक्षणैः कटाक्षपातैः । जग्राह वशीचकार ॥ २८ ॥ विदग्धया निपुणया जडीभूतः मोहितः । बाढं त्वत्कामं सम्पादये । चित्रमाश्चर्यं नास्ति ॥ २९ ॥ एकान्तभूतानि सङ्गरहितानि ॥ ३० ॥ हे तात ॥ ३१ ॥ इह परत्र च कः कामः अगम अप्राप्यः दुर्लभः इत्यर्थः ॥३२॥ पतिरित्यर्द्धम् ॥३३॥ यथा मानसः श्रियः पति पुम्भिः याज्ञिकैः देवतानां लिंगैः मूर्तिभिः यज्ञे इज्यते तथा स्त्रीभिश्च पतिरूपधृक् स एवेज्यते इत्यन्वयः । विविधं कल्पितैः ॥ ३४ ॥ ईश्वरम् ईश्वराभिन्नं स्वपतिं मत्वा यजन्ते

सोऽहं त्वयार्चितो भद्रे ईदृग्भावेन भक्तितः । तत्ते सम्पादये काममसतीनां सुदुर्लभम् ॥३६॥

दितिरुवाच

वरदो यदि मे ब्रह्मन् पुत्रमिन्द्रहणं वृणे । अमृत्युं मृतपुत्राहं येन मे घातितौ सुतौ ॥३७॥

निशम्य तद्वचो विप्रो विमनाः पर्यतप्यत । अहो अधर्मः सुमहानद्य मे समुपस्थितः ॥३८॥

अहो अद्येन्द्रियारामो योषिन्मय्येह मायया । गृहीतचेताः कृपणः पतिष्ये नरके ध्रुवम् ॥३९॥

कोऽतिक्रमोऽनुवर्तन्त्याः स्वभावमिह योषितः । धिङ् मां बताबुधं स्वार्थे यदहं त्वजितेन्द्रियः॥४०

शरत्पद्मोत्सवं वक्त्रं वचश्च श्रवणामृतम् । हृदयं क्षुरधाराभं स्त्रीणां को वेद चेष्टितम् ॥४१॥

न हि कश्चित् प्रियः स्त्रीणामञ्जसा स्वाशिषात्मनाम् । पतिं पुत्रं भ्रातरं वा घ्नन्त्यर्थे घातयन्ति च

प्रतिश्रुतं ददामीति वचस्तन्न मृषा भवेत् । वधं नार्हति चेन्द्रोऽपि तत्रेदमुपकल्पते ॥४३॥

इति संचिन्त्य भगवान् मारीचः कुरुनन्दन । उवाच किंचित्कुपित आत्मानं च विगर्हयन् ॥४४॥

कश्यप उवाच

पुत्रस्ते भविता भद्रे इन्द्रहा देवबान्धवः । संवत्सरव्रतमिदं यद्यञ्जो धारयिष्यसि ॥४५॥

दितिरुवाच

धारयिष्ये व्रतं ब्रह्मन् ब्रूहि कार्याणि यानि मे । यानि चेह निषिद्धानि न व्रतं घ्नन्ति यानि तु

कश्यप उवाच

न हिंस्याद् भूतजातानि न शपेन्नानृतं वदेत् । न छिन्द्यान्नखरोमाणि न स्पृशेद् यदमङ्गलम् ४७

नाप्सु स्नायान्न कुप्येत न सम्भाषेत दुर्जनैः । न वसीताधौतवासः स्रजं च विधृतां क्वचित् ४८

पूजयन्ति ॥ ३५ ॥ कामं वाञ्छितार्थम् ॥ ३६ ॥ इन्द्रहणम् इन्द्रहन्तारम् । मृत्युशून्यं च ॥ ३७ ॥ विमनाः खिन्नचित्तः ॥ ३८ ॥ इन्द्रियारामः विषयासक्तोऽहम् । कृपणः विवेकच्युतः ॥ ३९ ॥ स्वभावं जनमोहकत्वमनुसरन्त्या योषितः कोऽपराधः न कोऽपि स्वार्थे अबुधं मामेव धिक् ॥ ४० ॥ शरत्पद्मस्येव उत्सवो दर्शनोल्लासो यस्मात्तत् । श्रवणयोः कर्णयोः अमृततुल्यम् । क्षुरधाराया आभाउपमा यस्य तत् । को वेद न कोऽपि । यद्वा । को ब्रह्मा तासां कर्तैव कथंश्चित् वेद नान्यः ॥४१॥ स्वस्य आशिषा कामनयैव आत्मा यत्नो यासां तासाम् । अलुक्समासः टावन्तो वा । अञ्जसा साक्षात् अर्थे स्वार्थसिद्धये ॥ ४२ ॥ प्रतिश्रुतं प्रतिज्ञातम् तत्र उभयसिद्धौ । उपकल्पते उचितं भवति ॥४३॥ मारीचः कश्यपः । विगर्हयन् धिक्त्वंकुर्वन् ॥ ४४ ॥ हे अभ्रद्रे । यदि अञ्जः यथावत् धारपिष्यसि तर्हि इन्द्रहा अदेववान्धवः । वैगुण्ये तु इन्द्रानुगः देववान्धवश्च भविष्यति 'हन्' धातुर्गत्यर्थकोऽपि ॥ ४५ ॥ यानि कार्याणि आवश्यकानि । इह व्रते ॥ ४६ ॥ तत्रैकत्रिंशन्निषेधानाह-पञ्चभिः भूतजजातानि प्राणि समूहान् । न शपेत् नाक्रोशेत् । अमङ्गलम् अस्थ्यादि ॥ ४७ ॥ अप्सु प्रविश्येति शेषः । दुर्जनै[1] देवादिनिन्दकैः । न वसीत न बिभृयात् ॥ ४८ ॥

---

१. श्रुतिस्मृतिपुराणादिदेवब्राह्मणनिन्दकाः ।

नोच्छिष्टं चण्डिकान्नं च सामिषं वृषलाहृतम् । भुञ्जीतोदक्यया दृष्टं पिबेदञ्जलिना त्वपः ॥४९॥
नोच्छिष्टास्पृष्टसलिला संध्यायां मुक्तमूर्धजा अनर्चितासंयतवाङ् नासंवोता बहिश्चरेत् ॥५०॥
नाधौतपादाप्रयता नार्द्रपान्नो उदक्शिराः । शयीत नापराङ्नान्यैर्न नग्ना न च संध्ययोः ॥५१॥
धौतवासाः शुचिर्नित्यं सर्वमङ्गलसंयुता ।पूजयेत् प्रातराशात् प्राग् गोविप्रान् श्रियमच्युतम्५२
स्त्रियो वीरवतीश्चार्चेत् स्रग्गन्धबलिमण्डनैः । पतिं चार्च्योपतिष्ठेत ध्यायेत् कोष्ठगतं च तम्५३
सांवत्सरं पुंसवनं व्रतमेतदविप्लुतम् । धारयिष्यसि चेत् तुभ्यं शक्रहा भविता सुतः ॥५४॥
बाढमित्यभिप्रेत्याथ दिती राजन् महामनाः । काश्यपं गर्भमाधत्त व्रतं चाञ्जो दधार सा ।५५।
मातृष्वसुरभिप्रायमिन्द्र आज्ञाय मानद । शुश्रूषणेनाश्रमस्थां दितिं पर्यचरत् कविः ॥५६॥
नित्यं वनात् सुमनसः फलमूलसमित्कुशान् । पत्राङ्कुरमृदोऽपश्च काले काल उपाहरत्॥५७॥
एवं तस्या व्रतस्थाया व्रतछिचछद्रं हरिर्नृप । प्रेप्सुः पर्यचरज्जिह्मो मृगहेव मृगाकृतिः ॥५८॥
नाध्यगचछद् व्रतच्छिद्रं तत्परोऽथ महीपते । चिन्तां तीव्रां गतः शक्रः केन मे स्याच्छिवं त्विह
एकदा सा तु संध्यायामुच्छिष्टा व्रतकर्शिता । अस्पृष्टवार्यधौताङ्घ्रिः सुष्वाप विधिमोहिता६०
लब्ध्वा तदन्तरं शक्रो निद्रापहृतचेतसः । दितेः प्रविष्ट उदरं योगेशो योगमायया ॥६१॥
चकर्त सप्तधा गर्भं वज्रेण कनकप्रभम् । रुदन्तं सप्तधैकैकं मा रोदीरिति तान् पुनः ॥६२॥
ते तमूचुः पाट्यमानाः सर्वे प्राञ्जलयो नृप । नो जिघांससि किमिन्द्र भ्रातरो मरुतस्तव ॥६३॥

भोजने पञ्च निषेधानाह चण्डि[१] कान्न विपीलिकादिदूषितान्नम् । वृषलाहृतं शूद्रानीतम् । उदक्यथा रजस्वलया ॥४९॥ बहिर्गमने सप्त निषेधानाह-उच्छिष्टा उच्छिष्टमुखी । असंतीता अन्तर्वस्त्ररहिता बहिः न चरेत् ॥ ५० ॥ शयने ऽष्टौ निषेधानाह अप्रयता अशुचिः । अपराक्[२] पश्चिमशिराः । अन्यैः स्त्रीजनैः सह ॥ ५१ ॥ मङ्गलैः मङ्गलद्रव्यैः कुङ्कुमादिभिः । प्रातराशात् प्रातर्भोजनात् ॥ ५२ ॥ वीरवतीः जीवद्भर्तृकाः बलिभिः उपायनैः आर्च्य सम्पूज्य उपतिष्ठेत स्तुवीत । तं पतिमुदरगतं च ध्यायेत् ॥ ५३ ॥ पुमान् सूयतेऽनेनेति पुंसवनम् । सम्वत्सरसाध्यम् । अविप्लुतं निर्विघ्नम् ॥ ५४ ॥ बाढं[३] प्रतिज्ञापूर्वकम् इत्यभिप्रेत्य स्वीकृत्य । अञ्जः शीघ्रम् ॥ ५५ ॥ कविः कार्यकुशलः ॥ ५६ ॥ सुमनसः पुष्पाणि । उपाहरत् समर्पितवान् ॥ ५७ ॥ छिद्रं विघ्नावसरं प्राप्तुमिच्छुः तां पर्यचरत् । यथा मृगहा लुब्धकः मृगवञ्चनाय मृगवेशो भवति तथा ॥ ५८ ॥ ५९ ॥ न स्पृष्टं वारि आचमनं यया न धौते अंघ्री च यया सा च सा च सा ॥ ६० ॥ तदन्तरं तदवसरम् । मायया परकायप्रवेशसिद्धया ॥ ६१ ॥ चकर्त चिच्छेद । तान् पुनः एकैकं सप्तधा ॥ ६२ ॥ पाटचमानाः खण्डशः क्रियमाणाः ते गर्भं

---

१. चण्डिका स्यात् पिपीलिका' इत्यभिधानात् । मद्यमांसादिसक्तांश्च पिशुना दुर्जनाः स्मृताः इति संहितोक्तेः ।
२. अपरां पश्चिमदिशमञ्चति शिरसा प्राप्नोतीति अपराक् ।
३. भृशप्रतिज्ञयोर्बाढम्' इत्यमरः ।

मा भैष्ट भ्रातरो मह्यं यूयमित्याह कौशिकः । अनन्यभावान् पार्षदानात्मनो मरुतां गणान्।६४।
न ममार दितेर्गर्भः श्रीनिवासानुकम्पया । बहुधा कुलिशक्षुण्णो द्रौण्यस्त्रेण यथा भवान्।।६५।।
सकृदिष्ट्वाऽऽदिपुरुषं पुरुषो याति साम्यताम् । संवत्सरं किंचिदूनं दित्या यद्धरिरर्चितः ।।६६।।
सजूरिन्द्रेण पञ्चाशद् देवास्ते मरुतोऽभवन् । व्यपोह्य मातृदोषं ते हरिणा सोमपाः कृताः ६७
दितिरुत्थाय ददृशे कुमारानलप्रभान् । इन्द्रेण सहितान् देवी पर्यतुष्यदनिन्दिता ।।६९।।
एकः संकल्पितः पुत्रः सप्त सप्ताभवन् कथम् । यदि ते विदितं पुत्र सत्यं कथय मा मृषा ।।७०।।

इन्द्र उवाच

अम्ब तेऽहं व्यवसितमुपधार्यागतोऽन्तिकम् । लब्धान्तरोऽच्छिदं गर्भमर्थबुद्धिर्न धर्मवित् ।।७१।।
कृत्तो मे सप्तधा गर्भ आसन् सप्त कुमारकाः । तेऽपि चैकैकशो वृक्णाः सप्तधा नापि मम्रिरे ७२
ततस्तत् परमाश्चर्यं वीक्ष्याध्यवसितं मया । महापुरुषपूजायाः सिद्धिः काप्यनुषङ्गिणी ७३।
आराधनं भगवत ईहमाना निराशिषः । ये तु नेच्छन्त्यपि परं ते स्वार्थकुशलाः स्मृताः।।७४।।
आराध्यात्मप्रदं देवं स्वात्मानं जगदीश्वरम् । को वृणीते गुणस्पर्शं बुधः स्यान्नरकेऽपि यत्।।७५।।
तदिदं मम दौर्जन्यं बालिशस्य महीयसि । क्षन्तुमर्हसि मातस्त्वं दिष्ट्या गर्भो मृतोत्थितः ७६।

श्रीशुक उवाच

इन्द्रस्तयाभ्यनुज्ञातः शुद्धभावेन तुष्टया । मरुद्भिः सह तां नत्वा जगाम त्रिदिवं प्रभुः ।।७७।।
एवं ते सर्वमाख्यातं यन्मां त्वं परिपृच्छसि । मङ्गलं मरुतां जन्म किं भूयः कथयामि ते ।७८।

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां षष्ठस्कन्धे मरुदुत्पत्तिकथनं नामाष्टदशोऽध्यायः।।१८।।

जीवाः । नोऽस्मान् किं कथम् ।। ६३ ।। कौशिक इन्द्रः । क्वचित्कुशिकवंशे जातत्वात् कौशिक इन्द्र उच्यते । यदि मह्यं मम भ्रातरः तर्हि भयं मा कुरुत इति आत्मनः पार्षदानाहेत्यन्वयः ।। ६४ ।। कुलिशं वज्रं तेन छिन्नः ।। ६५ ।। सकृदिति युग्मम् । [1]साम्यतां समानरूपताम् । इन्द्रेण सजूः सह । दोषं दैत्यत्वम् अपोह्य दूरीकृत्य हरिणा इन्द्रेण सोमपा अमृपाः देवाः कृताः ।।६६।६७।६८।। हे तात ! अपत्यमिच्छन्ती व्रतमचरं कृतवती अस्मि ।। ६९ ।। सप्तगुणितं सप्त एकोनपञ्चाशत् ।। ७० ।। व्यवसितं निश्चितम् । उपधार्य ज्ञात्वा । लब्धान्तरः लब्धावसरः अर्थे स्वार्थे ।।७१।। कृत्तः छिन्नः वृक्णाः छिन्नाः 'ओवृश्चू' छेदने धातुः ।।७२।। तत् तेषां जीवने अनुषङ्गात् पूजासम्बद्धाज्जाता कापि आनुषङ्गिणी स्वभाव सिद्धा अनिर्वचनीया सिद्धिः इति मया अध्यवसितं निश्चितम् ।।७३।। निराशिषः निष्कामाः ये परं मोक्षमपि नेच्छन्ति ते । ईहमानाः कुर्वाणाः ।।७४।। आत्मप्रदं मोक्षप्रदम् । गुणस्पर्शं विषयभोगम् । नरके शूकरादियोनावपि ।। ७५ ।। हे महीयसि ! पूज्ये मातः । बालिशस्य अज्ञस्य । दौर्जन्यमपराधम् । मृतः सन् उत्थितः ।। ७६ ।। इन्द्र इति द्वयम् । अभ्यनुज्ञातः दत्ताज्ञः । त्रिदिवं स्वर्गम् ।। ७७।७८ ।।

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे गूढार्थदीपिन्यामष्टादशोऽध्यायः ।

---

१. समशब्दाच्चतुर्वर्णादित्वात् स्वार्थे ष्यञ्, तदन्तात्तल् ।

अथैकोनविंशोऽध्यायः

राजोवाच

व्रतं पुंसवनं ब्रह्मन् भवता यदुदीरितम् । तस्य वेदितुमिच्छामि येन विष्णुः प्रसीदति ॥ १ ॥

श्रीशुक उवाच

शुक्ले मार्गशिरे पक्षे योषिद् भर्तुरनुज्ञया । आरभेत व्रतमिदं सार्वकामिकमादितः ।
निशम्य मरुतां जन्म ब्राह्मणाननुमन्त्र्य च ॥ २ ॥ स्नात्वा शुक्लदती शुक्ले वसीतालंकृताम्बरे
पूजयेत् प्रातराशात् प्राग्भगवन्तं श्रिया सह ॥ ३ ॥
अलं ते निरपेक्षाय पूर्णकाम नमोऽस्तु ते । महाविभूतिपतये नमः सकलसिद्धये ॥ ४ ॥
यथा त्वं कृपया भूत्या तेजसा महिनौजसा । जुष्ट ईशगुणैः सर्वैस्ततोऽसि भगवान् प्रभुः ॥५॥
विष्णुपत्नि महामाये महापुरुषलक्षणे । प्रीयेथा मे महाभागे लोकमातर्नमोऽस्तु ते ॥ ६ ॥
ॐ नमो भगवते महापुरुषाय महानुभावाय महाविभूतिपतये सह महाविभूतिभिर्बलि-
मुपहराणीति ॥ ७ ॥ अनेनाहरहर्मन्त्रेण विष्णोरावाहनार्घ्यपाद्योपस्पर्शनस्नानवासउपवीतवि-
भूषणगन्धपुष्पधूपदीपोपहाराद्युपचारांश्च समाहित उपाहरेत् ॥ ८ ॥
हविःशेषं तु जुहुयादनले द्वादशाहुतीः ॥ ९ ॥
ॐ नमो भगवते महापुरुषाय महाविभूतिपतये स्वाहेति ॥१०॥
श्रियं विष्णुं च वरदावाशिषां प्रभवावुभौ । भक्त्या सम्पूजयेन्नित्यं यदीच्छेत् सर्वसम्पदः॥११॥
प्रणमेद् दण्डवद् भूमौ भक्तिप्रह्वेण चेतसा । दशवारं जपेन्मन्त्रं ततः स्तोत्रमुदीरयेत् । १२॥
युवां तु विश्वस्य विभू जगतः कारणं परम् । इयं हि प्रकृतिः सूक्ष्मा मायाशक्तिर्दुरत्यया १३

ऊनविंशे तु यत्प्रोक्तं दितेः पुंसवनं व्रतम् ।
साङ्गोपाङ्गं च तस्यैव विधानं सम्यगीर्यते ॥

तस्य प्रकारम् ॥ १ ॥ शुक्ले इति सार्द्धम् । आदितः प्रतिपदि । सार्वकामिकं सर्वकामप्रदम् । अनुमन्त्र्य पृष्ट्वा ॥२॥ शुक्लदती धौतदन्ता । अलङ्कृता सती अम्बरे नूतनयुगलवस्त्रे वसीत[1] धारयेत् । प्रातराशात् प्रातर्जलपानात् प्राक् ॥ ३ ॥ ते अलं पर्याप्तमेव न किञ्चिदपेक्षितम् । अतः तुभ्यं नमः ॥४॥ विभूतिः लक्ष्मीः । सकलाः सिद्धयोऽणिमाद्या यस्मात्तस्मै । यथावत् साकल्येन कृपादिना जुष्टः सेवितः ततः प्रभुः सर्वसमर्थः । महिना महिम्ना ॥ ४ ॥ ओजसा बलेन ॥५॥ लक्षणानि सौन्दर्यादीनि । प्रीयेथाः प्रसन्ना भव ॥ ६ ॥ उपहराणि समर्पयाणि ॥ ७ ॥ अहरहः प्रतिदिनम् । उपाहरेत् समर्पयेत् ॥ ८ ॥ हविरित्यर्द्धम् । हविःशेषं नैवेद्यावशिष्टम् ॥९।१०॥ आशिषां सर्वविधभोगानां प्रभवौ जनकौ ॥११॥ प्रह्वेण नम्रेण शिरसेति शेषः । चेतसा च ॥ १२ ॥ विभू[2] स्वामिनौ । इयं लक्ष्मी ॥ १३ ॥

---

१. 'वस्' आच्छादने धातुः ।
२. विभुश्च विभ्वी च विभू 'पुमान् स्त्रिया' इत्येकशेषः ।

तस्या अधीश्वरः साक्षात् त्वमेव पुरुषः परः । त्वं सर्वयज्ञ इज्येयं क्रियेयं फलभुग् भवान् ।१४।
गुणव्यक्तिरियं देवी व्यञ्जको गुणभुग् भवान् । त्वं हि सर्वशरीर्यात्मा श्रीः शरीरेन्द्रियाशया१५
नामरूपे भगवतो प्रत्ययस्त्वमपाश्रयः ॥ १६ ॥
यथा युवां त्रिलोकस्य वरदौ परमेष्ठिनौ । तथा म उत्तमश्लोक सन्तु सत्या महाशिषः ॥१७॥
इत्यभिष्टूय वरदं श्रीनिवासं श्रिया सह । तन्निःसार्योपहरणं दत्त्वाऽऽचमनमर्चयेत् ॥१८॥
ततः स्तुवीत स्तोत्रेण भक्तिप्रह्वेण चेतसा ॥१९॥ यज्ञोच्छिष्टमवघ्राय पुनरभ्यर्चयेद्धरिम् ।
पतिं च परया भक्त्या महापुरुषचेतसा ॥२०॥ प्रियैस्तैस्तैरुपनमेत् प्रेमशीलः स्वयं पतिः ।
बिभृयात् सर्वकर्माणि पत्न्या उच्चावचानि च ॥२१॥
कृतमेकतरेणापि दम्पत्योरुभयोरपि । पत्न्यां कुर्यादनर्हायां पतिरेतत् समाहितः ॥२२॥
विष्णोर्व्रतमिदं बिभ्रन्न विहन्यात् कथंचन । विप्रान् स्त्रियो वीरवतीः स्रग्गन्धबलिमण्डनैः ।२३।
अर्चेदहरहर्भक्त्या देवं नियममास्थितः ॥२४॥
उद्वास्य देवं स्वे धाम्नि तन्निवेदितमग्रतः । अद्यादात्मविशुद्ध्यर्थं सर्वकामर्द्धये तथा ॥२५॥
एतेन पूजाविधिना मासान् द्वादश हायनम् । नीत्वाथोपचरेत् साध्वी कार्तिके चरमेऽहनि ।२६।
श्वोभूतेऽप उपस्पृश्य कृष्णमभ्यर्च्य पूर्ववत् । पयःशृतेन जुहुयाच्चरुणा सह सर्पिषा ।
पाकयज्ञविधानेन द्वादशैवाहुतीः पतिः ॥ २७ ॥
आशिषः शिरसाऽऽदाय द्विजैः प्रीतैः समीरिताः । प्रणम्य शिरसा भक्त्या भुञ्जीत तदनुज्ञया ॥

सर्वयज्ञः यज्ञमूर्तिः इज्या तदङ्गभूता दीक्षणीया इष्टिः । क्रिया स्मार्तक्रिया लक्ष्मीः । फलभोक्ता भवान् भवदंशो जीवः ॥ १४ ॥ व्यक्तिः प्राकट्यकर्त्री वैषम्यावस्था इयम् । गुणानां व्यञ्जकः बोधकः गुणभुक् विषयभोक्ता च भवदंशो जीवः । सर्वशरीरधारी आत्मा व्यापकः । शरीरादिषु शक्तिरूपा इयम् ॥ १५ ॥ नामेत्यर्द्धम् । प्रत्ययः तयोः प्रकाशकः अपाश्रयः आधारश्च त्वमेव ॥ १६ ॥ परमेष्ठिनौ पितामहौ । महाशिषः महामनोरथाः । सत्याः पूर्णाः ॥ १७ ॥ तत् उपहरणं नैवेद्यं निःसार्य अपनीय ॥ १८।१९ ॥ पतिं च अभ्यर्चयेदित्यन्वयः ॥ २० ॥ किञ्च तैस्तैः प्रियवस्तुभिः तमुपनमेत सेवेत । पतिरपि तस्या उच्चावचानि विविधानि कर्माणि बिभृयात् पोषयेत् तेषु साहाय्यं कुर्यादित्यर्थः ॥२१॥ उभयोः फलदं स्यात् । तीर्थस्तु एकतरेणापि कृतं द्वयोः भवतीत्याह । अनर्हायां रजोदशायाम्॥२२॥ इदं व्रतं कथंचन केनाऽपि प्रकारेण न विहन्यात् भङ्गं न कुर्यात् । वीरवतीः पतिपुत्रवतीः स्त्रीः अर्चेदित्यनुषङ्गः ॥ २३ ॥ अहरहः प्रतिदिनम् ॥ २४ ॥ उद्वास्य विसर्ज्य । अग्रतः मूर्तिपुरोभागे निवेदितं यत् हविः तत् भुञ्जीत । ऋद्धये प्राप्त्यर्थम् ॥ २५ ॥ हायनं वर्षं व्यतीय । अथ व्रतोद्यापनारम्भे । चरमेऽहनि मार्गशीर्षकृष्णामायाम् । उपचरेत् उपवासं कुर्यात् ॥ २६ ॥ श्वोभूते इति सार्द्धम् । श्वोभूते शुक्लप्रतिपदि । उपस्पृश्य स्नानाचमनादिकं कृत्वा । पतिः भगवते द्वादश आहुती जुहुयात् दद्यात् । केन । घृतेन सह पयःपक्वेन चरुणा हव्येन । विधानेन गृह्यसूत्रोक्तेन ॥ २७ ॥ समीरिता दत्ताः

आचार्यमग्रत कृत्वा वाग्यतः सह बन्धुभिः दद्यात् पत्न्यै चरोः शेषं सुप्रजस्त्वं सुसौभगम् २९

एतच्चरित्वा विधिवद् व्रतं विभोरभीप्सितार्थं लभते पुमानिह ।
स्त्री त्वेतदास्थाय लभेत सौभगं श्रियं प्रजां जीवपतिं यशो गृहम् ॥३०॥
कन्या च विन्देत समग्रलक्षणं वरं त्ववीरा हतकिल्बिषा गतिम् ।
मृतप्रजा जीवसुता धनेश्वरी सुदुर्भगा सुभगा रूपमग्र्यम् ।
विन्देद् विरूपा विरुजा विमुच्यते य आमयावीन्द्रियकल्पदेहम् ॥३१॥
एतत् पठन्नभ्युदये च कर्मण्यनन्ततृप्तिः पितृदेवतानाम् ।
तुष्टाः प्रयच्छन्ति समस्तकामान् होमावसाने हुतभुक् श्रीर्हरिश्च ॥३२॥
राजन् महन्मरुतां जन्म पुण्यं दितेर्व्रतं चाभिहितं महत् ते ॥३३॥

इति श्रीमद्भागवते महापुराणे वैयासिक्यामष्टादसाहस्र्यां पारमहंस्यां संहितायां षष्ठस्कन्धे पुंसवनव्रतकथनं नामैकोनविंशोध्यायः ॥ १९ ॥

इति षष्ठः स्कन्धः समाप्तः

हरिः ॐ तत्सत्

आशिषः आशीर्वादान् ॥ २८ ॥ बन्धुभिः सह भुञ्जीतेति पूर्वेणान्वयः । दद्यादिति पृथक् वाक्यम् । चरोः शेषं हविःशेषं क्षीरान्नं पत्न्यै दद्यात् सत्पुत्रत्वं सौभाग्यं चास्तु इत्युक्त्वा ॥ २९ ॥ विभोः भगवतः सकाशात् । जीवपतिं दीर्घजीविनम् ॥ ३० ॥ कन्येति सार्द्धम् । अवीरा पुत्रहीना विधवा च गतिं सद्गतिम् । मृतपुत्रा धनेश्वरी भवति । विरूपा कुरूपा अग्र्यं श्रेष्ठं रूपं विन्देत । य आमयावी रोगी स विशिष्टया रुजा रोगेण विमुच्यते । इन्द्रियैः सहितं स्वस्थदेहम् ॥ ३१ ॥ अभ्युदये आभ्युदिकश्राद्धादौ । हुतभुक् अग्निः ॥ ३२ ॥ राजन्नित्यर्द्धम् । महत्पुण्यं जन्म । महद् व्रतं च अतो न पौनरुक्त्यम् ।

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे श्रीसनाढ्यवंशावतंसपण्डितप्रवरश्रीरामूर्तिशास्त्रिपौराणिकविरचितायां गूढार्थदीपिन्यामेकोनविंशोऽध्यायः ।

श्रीकृष्णार्पणमस्तु



ॐ श्रीपरमात्मने नमः

श्रीमद्भागवतम्

•••○◎○•••

अथ सप्तमः स्कन्धः

ऊतिवर्णनम्

•••○◎○•••

अथ प्रथमोऽध्यायः

राजोवाच

समः प्रियः सुहृद् ब्रह्मन् भूतानां भगवान् स्वयम् । इन्द्रस्यार्थे कथं दैत्यानवधीद् विषमो यथा

न ह्यस्यार्थः सुरगणैः साक्षान्निःश्रेयसात्मनः । नैवासुरेभ्यो विद्वेषो नोद्वेगश्चागुणस्य हि ।२।

इति नः सुमहाभाग नाराणगुणान् प्रति । संशयः सुमहाञ्जातस्तद् भवांश्छेत्तुमर्हति ॥ ३ ॥

श्रीशुक उवाच

साधु पृष्टं महाराज हरेश्चरितमद्भुतम् । यद् भागवतमाहात्म्यं भगवद्भक्तिवर्धनम् ॥ ४ ॥

गीयते परमं पुण्यमृषिभिर्नारदादिभिः । नत्वा कृष्णाय मुनये कथयिष्ये हरेः कथाम् ॥ ५ ॥

निर्गुणोपि ह्यजोऽव्यक्तो भगवान् प्रकृतेः परः । स्वमायागुणमाविश्य बाध्यबाधकतां गतः ।६।

अथ सप्तमस्कन्धः

प्रथमोऽध्यायः

हिरण्यकशिपुं हत्वा सर्वलोकैककण्टकम् ।
योऽपात् प्रह्लादमापद्भ्यस्तं नृसिंहमुपास्महे ॥
सप्तमे वासनारूपमूतिलक्षणमुच्यते ।
सतामनुहात्कोपात् वर्तते सा शुभाऽशुभा ॥
प्रथमे श्रीशुकः प्रौढ्या वैषम्यम् हरेः ।
शापात् त्रिष्वासुरीं योनिं प्राह तद्द्वारपालयोः ॥

भूतानां प्राणिनाम् । विषमः भेददर्शी ॥ १ ॥ अर्थः प्रयोजनम् । निःश्रेयसात्मनः मुक्तात्मनः ॥ २ ॥ गुणान् निग्रहानुग्रहादीन् । छेत्तुं निवारयितुम् ॥ ३ ॥ साध्विति युग्मम् । यत् यत्र चरिते ॥४॥ कृष्णाय कृष्णद्वैपायनं व्यासमभिमुखीकर्तुम् ॥ ५ ॥ कदाचित् लीलया असुरैर्बाध्यतां पराजयम् । कदाचित् तेषां बाधकतां जयं प्राप्तः । यद्वा । देवासुराणां या परस्परं बाध्यबाधकता तत्र हेतुर्जातः ॥ ६ ॥

सत्त्वं रजस्तम इति प्रकृतेर्नात्मनो गुणाः । न तेषां युगपद् राजन् ह्रास उल्लास एव वा ॥७॥
जयकाले तु सत्त्वस्य देवर्षीन् रजसोऽसुरान् । तमसो यक्षरक्षांसि तत्कालानुगुणोऽभजत् ॥८॥
ज्योतिरादिरिवाभाति सङ्घातान्न विविच्यते। विदन्त्यात्मानमात्मस्थं मथित्वा कवयोऽन्ततः॥९॥

यदा सिसृक्षुः पुर आत्मनः परो रजः सृजत्येष पृथक् स्वमायया ।
सत्त्वं विचित्रासु रिरंसुरीश्वरः शयिष्यमाणस्तम ईरयत्यसौ ॥१०॥
कालं चरन्तं सृजतीश आश्रयं प्रधानपुम्भ्यां नरदेव सत्यकृत् ।
य एष राजन्नपि काल ईशिता सत्त्वं सुरानीकमिवैधयत्यतः ।
तत्प्रत्यनीकानसुरान् सुरप्रियो रजस्तमस्कान् प्रमिणोत्युरुश्रवाः ॥११॥

अत्रैवोदाहृतः पूर्वमितिहासः सुरर्षिणा । प्रीत्या महाक्रतौ राजन् पृच्छतेऽजातशत्रवे ॥१२॥
दृष्ट्वा महाद्भुतं राजा राजसूये महाक्रतौ । वासुदेवे भगवति सायुज्यं चेदिभूभुजः ॥१३॥
तत्रासीनं सुरऋषिं राजा पाण्डुसुतः क्रतौ । पप्रच्छ विस्मितमना मुनीनां शृण्वतामिदम् ॥१४॥

युधिष्ठिर उवाच

अहो अत्यद्भुतं ह्येतद् दुर्लभैकान्तिनामपि । वासुदेवे परे तत्त्वे प्राप्तिश्चैद्यस्य विद्विषः ॥१५॥
एतद् वेदितुमिच्छामः सर्व एव वयं मुने । भगवन्निन्दया वेनो द्विजैस्तमसि पातितः ॥१६॥
दमघोषसुतः पाप आरभ्य कलभाषणात् । सम्प्रत्यमर्षी गोविन्दे दन्तवक्त्रश्च दुर्मतिः ॥१७॥

आत्मनो भगवतः । उल्लासो वृद्धिश्च युगपत् एककालावच्छेन न भवतः ॥ ७ ॥ जयकाले वृद्धिकाले देवादीन् अभजत् अवर्द्धयत् । अनुगुणः कालस्य अनुरूपः सन् ॥८॥ ज्योतिरग्निः यथा काष्ठादिषु तारतम्येन आभाति प्रतीयते तथा भगवानपि योनिषु नानारूपेण आभाति । काष्ठादिसंघातात् यथाऽग्निः न विविच्यते पृथक् न प्रतीयते तथा भगवानपि देहादिसंघातात् पृथक् न प्रतीयते किन्तु कवयः कर्मकुशलाः मथित्वा अरणिमन्थनं कृत्वा यज्ञे अग्निं विन्दन्ति प्रकटयन्ति एवं योगिनोऽपि मथित्वा ऊहापोहं कृत्वा अन्तन्तः अन्तेन नेति नेतीति सर्वापवादेन आत्मन्येव आत्मानमनुभवन्तीति सरलान्वयः । काष्ठदृष्टान्तेन यथाग्नेर्न वैषम्यमेवं भगवतोऽपि । आदिपदेन जलं यथा पात्रेषु आकाशो यथा घटादिषु इत्यादि योजनीयम् ॥ ९ ॥ यदा एष परः परमात्मा आत्मनो जीवस्य पुरः शरीराणि सिसृक्षुर्भवति तदा रजः पृथक् सृजति प्रवर्तयति । विचित्रासु तासु पूर्षु रिरंसुः सन् सत्त्वं प्रेरयति । शयिष्यमाणः संहरिष्यन् असौ तमः प्रेरयति । ॥१०॥ कालमिति सार्द्धम् । सत्यकृत् सत्यसंकल्प ईशः चरन्तं वर्तमानं कालं च स्वयं सृजतीत्यन्वयः । कथं भूतम् । प्रकृतिपुरुषयोः सहकारित्वेन आश्रयम् । य एष कालः यदा सत्त्वमेधयति वर्द्धयति अतो हेतो ईशिता ईश्वरोऽपि देवसमूहमेधयति तत्प्रत्यनीकान् सुरप्रतिपक्षान् प्रमिणोति हिनस्ति चेत्यन्वयः । उरु महत् श्रवो यस्य सः ॥११॥ उदाहृतः वर्णितः तं शृण्विति शेषः ॥१२॥ दृष्ट्वेति युग्मम् । चेदिभूभुजः शिशुपालस्य । सायुज्यम् ऐक्यम् ॥ १३।१४ ॥ एकान्तिनां भक्तानामपि । चैद्यस्य शिशुपालस्य प्राप्तिः सायुज्यमुक्तिरिति यत् एतत् ॥ १५ ॥ यतो वेनः तमसि नरके पातितः । अतस्तस्यापि नरकपातः स्यात् ॥ १६ ॥ सुतः शिशुपालः । पापः[1] पापी । कलमाषणं बाल्यावस्था तस्मात् । अधुनापि अमर्षी विद्वेषी ।

---

[1] अर्शं आद्यजन्तः ।

शपतोरसकृद् विष्णुं यद् ब्रह्म परमव्ययम्। श्वित्रं न जातं जिह्वायां नान्धं विविशतुस्तमः
कथं तस्मिन् भगवति दुरवग्राह्यधामनि। पश्यतां सर्वलोकानां लयमीयतुरञ्जसा ॥१९॥
एतद् भ्राम्यति मे बुद्धिर्दीपार्चिरिव वायुना। ब्रूह्येतदद्भुततमं भगवांस्तत्र कारणम् ॥२०॥

श्रीशुक उवाच

राज्ञस्तद् वच आकर्ण्य नारदो भगवानृषिः। तुष्टः प्राह तमाभाष्य शृण्वत्यास्तत्सदः कथाः२१

नारद उवाच

निन्दनस्तवसत्कारन्यक्कारार्थं कलेवरम्। प्रधानपरयो राजन्नविवेकेन कल्पितम् ॥२२॥
हिंसा तदभिमानेन दण्डपारुष्ययोर्यथा। वैषम्यमिह भूतानां ममाहमिति पार्थिव ॥२३॥
यन्निबद्धोऽभिमानोऽयं तद्वधात् प्राणिनां वधः। तथा न यस्य कैवल्यादभिमानोऽखिलात्मनः।
परस्य दमकर्तुर्हि हिंसा केनास्य कल्प्यते ॥२४॥
तस्माद् वैरानुबन्धेन निर्वैरेण भयेन वा। स्नेहात् कामेन वा युञ्ज्यात् कथंचिन्नेक्षते पृथक्२५
यथा वैरानुबन्धेन मर्त्यस्तन्मयतामियात्। न तथा भक्तियोगेन इति मे निश्चिता मतिः॥२६॥
कीटः पेशस्कृता रुद्धः कुड्यायां तमनुस्मरन्। संरम्भभययोगेन विन्दते तत्सरूपताम् ॥२७॥
एवं कृष्णे भगवति मायामनुज ईश्वरे। वैरेण पूतपाप्मानस्तमापुरनुचिन्तया ॥ २८॥
कामाद् द्वेषाद् भयात् स्नेहाद् यथा भक्त्येश्वरे मनः। आवेश्य तदघं हित्वा बहवस्तद्गतिं गताः
गोप्यःकामाद् भयात् कंसो द्वेषाच्चैद्यादयो नृपाः।सम्बन्धाद् वृष्णयःस्नेहाद् यूयं भक्त्या वयं विभो

असकृत् निरन्तरं शपतोः कुवाच्यं ब्रुवतोः श्वित्रं श्वेतकुष्ठं न जातं न च तौ नरकं विविशतुरित्याश्चर्यम् ॥ १७।१८ ॥ दुरवग्राह्यं दुर्ज्ञेयं धाम स्वरूपं यस्य तस्मिन्। अञ्जसा साक्षात् ॥ १९ ॥ एतत् सायुज्यं प्रति। दीपार्चिः दीपज्वाला। भगवान् सर्वज्ञस्त्वम् ॥२०॥ तस्याः सदः शृण्वत्याः सत्याः। आभाष्य राजानं सम्बोध्य ॥ २१ ॥ निन्दनादिसहनार्थमिदं कलेवरं प्रकृतिपुरुषयोः अविवेकेन अध्यासेन कल्पितं न वस्तुतः न्यक्कारः तिरस्कारः ॥ २२ ॥ हिंसेति सार्द्धम्। तदभिमानेन देहाभिमानेन ममाहमिति वैषम्यं भ्रमो भवति तथा दण्डे पारुष्ये निन्दायां च हिंसा भवति। सोऽभिमानो यस्मिन् देहे निबद्धः तस्य देहस्य वधात् प्राणिनां वधः व्यवह्रियते। अज्ञानिनां यथा तथा सोऽभिमानो यस्य भगवतो नास्ति अतोऽस्य हिंसा केन हेतुना कल्प्यते न केनापि। अखिलात्मत्वात् वैषम्याभावः कैवल्यादद्वितीयत्वादभिमानाभावः। किन्तु दैत्यानां हिंसनं च परस्य भगवद्विमुखस्य जीवस्य दमकर्तुः दण्डविधातुर्भगवतः शिक्षैव ॥ २३।२४ ॥ वैरस्य अनुबन्धो हठस्ते न दृढवैरेण भगवति मनो युञ्ज्यात् स्थिरीकुर्यात् ततः पृथक् नेक्षेत इति विधिः लिङर्थे लट् ॥ २५॥ इयात् प्राप्नुयात् ॥ २६ ॥ पेशस्कृता भृङ्गीति नाम्ना। कीटः श्यामाख्यः। सरम्भो द्वेषः ॥ २७॥ पूतपाप्मानः निवृत्तपापाः बहवस्तमीयुः प्रापुः ॥ २८ ॥ यथा गतिं गतास्तथा शृण्विति क्रियाशेषः ॥ २९॥ पञ्चानां मध्ये

कतमोऽपि न वेनः स्यात् पञ्चानां पुरुषं प्रति। तस्मात् केनाप्युपायेन मनः कृष्णे निवेशयेत्॥३१

मातृष्वसेयो वश्चैद्यो दन्तवक्त्रश्च पाण्डव। पार्षदप्रवरौ विष्णोर्विप्रशापात् पदाच्च्युतौ॥३२॥

युधिष्ठिर उवाच

कीदृशः कस्य वा शापो हरिदासाभिमर्शनः। अश्रद्धेय इवाभाति हरेरेकान्तिनां भवः॥३३॥

देहेन्द्रियासुहीनानां वैकुण्ठपुरवासिनाम्। देहसम्बन्धसम्बद्धमेतदाख्यातुमर्हसि॥३४॥

नारद उवाच

एकदा ब्रह्मणः पुत्रा विष्णोर्लोकं यदृच्छया। सनन्दनादयो जग्मुश्चरन्तो भुवनत्रयम्॥३५॥

पञ्चषड्ढायनार्भाभाः पूर्वेषामपि पूर्वजाः। दिग्वाससः शिशून् मत्वा द्वाःस्थौ तान् प्रत्यषेधताम्

अशपन् कुपिता एवं युवां वासं न चार्हथः। रजस्तमोभ्यां रहिते पादमूले मधुद्विषः।

पापिष्ठामासुरीं योनिं बालिशौ यातमाश्वतः॥३७॥

एवं शप्तौ स्वभवनात् पतन्तौ तैः कृपालुभिः। प्रोक्तौ पुनर्जन्मभिर्वां त्रिभिर्लोकाय कल्पताम्॥३८

जज्ञाते तौ दितेः पुत्रौ दैत्यदानववन्दितौ। हिरण्यकशिपुर्ज्येष्ठो हिरण्याक्षोऽनुजस्ततः॥३९॥

हतो हिरण्यकशिपुर्हरिणा सिंहरूपिणा। हिरण्याक्षो धरोद्धारे बिभ्रता सौकरं वपुः॥४०॥

हिरण्यकशिपुः पुत्रं प्रह्लादं केशवप्रियम्। जिघांसुरकरोन्नाना यातना मृत्युहेतवे॥४१॥

सर्वभूतात्मभूतं तं प्रशान्तं समदर्शनम्। भगवत्तेजसा स्पृष्टं नाशक्नोद्धन्तुमुद्यमैः॥४२॥

ततस्तौ राक्षसौ जातौ केशिन्यां विश्रवःसुतौ। रावणः कुम्भकर्णश्च सर्वलोकोपतापनौ॥४३॥

तत्रापि राघवो भूत्वा न्यहनच्छापमुक्तये। रामवीर्यं श्रोष्यसि त्वं मार्कण्डेयमुखात् प्रभो॥४४॥

तावेव क्षत्रियौ जातौ मातृष्वस्रात्मजौ तव। अधुना शापनिर्मुक्तौ कृष्णचक्रहतांहसौ॥४५॥

वैरानुबन्धतीव्रेण ध्यानेनाच्युतसात्मताम्। नीतौ पुनर्हरेः पार्श्वं जग्मतुर्विष्णुपार्षदौ॥४६॥

पुरुषं श्रीकृष्णं प्रति एकतमोऽपि न॥ ३०।३१॥ मातुः स्वसा श्रुतश्रवा नाम्नी तस्याः पुत्रः चैद्यः शिशुपालः॥ ३२॥ हरिदासौ पार्षदौ अभिमृशति पराभवतीति। एकान्तिनां पार्षदानाम्। भवः संसारः॥ ३३॥ प्राकृतदेहसम्बद्धेन निबद्धमेतदाख्यानम्॥ ३४॥ चरन्तः विचरन्तः॥ ३५॥ पञ्चेति। पञ्चषड्वर्षीयवालवत्प्रतीयमानाः। पूर्वेषां मरीच्यादीनाम्। दिग्वाससः नग्नान्॥ ३६॥ अशपन्निति सार्द्धम्। हे वालिशौ मूर्खौ! युवाम् अतः स्थानात् आशु आसुरीं योनिं यातं गच्छतम्॥३७॥ पुनर्लोकाय वैकुण्ठप्राप्तये स शापः त्रिभिर्जन्मभिः कल्प्यतां समाप्यताम्। समर्थो भवतु वा॥ ३८॥ तौ जयविजयौ॥ ३९॥ सिंहरूपिणा नृसिंहरूपेण॥ ४०॥ यातनाः तीव्रवेदनाः॥ ४१॥ सर्वभूतेषु आत्मा परमात्मेति भूतोऽनुभूतो येन तम्। तेजसा शक्त्या॥ ४२॥ ततो जन्मान्तरे। विश्रवसः पुत्रौ॥ ४३॥ तत्रापि राक्षसत्वेऽपि॥ ४४॥ राघवो भूत्वा न्यहनत्। हतम् अंहः पापमेव ययोस्तौ न तु तौ॥ ४५॥ वैरानुबन्धो दृढवैरः तेन। सात्मतां लयत्वम्। पुनः पार्षदौ भूत्वा॥४६॥

युधिष्ठिर उवाच

विद्वेषो दयिते पुत्रे कथमासीन्महात्मनि । ब्रूहि मे भगवन् येन प्रह्लादस्याच्युतात्मता ॥४७॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां सप्तमस्कन्धे प्रह्लादचरितोपक्रमे प्रथमोऽध्यायः॥ १ ॥

अथ द्वितीयोऽध्यायः

नारद उवाच

भ्रातर्येवं विनिहते हरिणा क्रोडमूर्तिना । हिरण्यकशिपू राजन् पर्यतप्यद् रुषा शुचा ॥ १ ॥

आह चेदं रुषा घूर्णः संदष्टदशनच्छदः । कोपोज्ज्वलद्भ्यां चक्षुर्भ्यां निरीक्षन् धूम्रमम्बरम्॥२॥

करालदंष्ट्रोग्रदृष्ट्या दुष्प्रेक्ष्यभ्रुकुटीमुखः । शूलमुद्यम्य सदसि दानवानिदमब्रवीत् ॥ ३ ॥

भो भो दानवदैतेया द्विमूर्धंस्त्र्यक्ष शम्बर । शतबाहो हयग्रीव नमुचे पाक इल्वल ॥ ४ ॥

विप्रचित्ते मम वचः पुलोमन् शकुनादयः । शृणुतानन्तरं सर्वे क्रियतामाशु मा चिरम् ॥ ५ ॥

सपत्नैर्घातितः क्षुद्रैर्भ्राता मे दयितः सुहृत् । पार्ष्णिग्राहेण हरिणा समेनाप्युपधावनैः ॥ ६ ॥

तस्य त्यक्तस्वभावस्य घृणेर्मायावनौकसः भजन्तं भजमानस्य बालस्येवास्थिरात्मनः ॥ ७ ॥

मच्छूलभिन्नग्रीवस्य भूरिणा रुधिरेण वै । रुधिरप्रियं तर्पयिष्ये भ्रातरं मे गतव्यथः ॥ ८ ॥

तस्मिन् कूटेऽहिते नष्टे कृत्तमूले वनस्पतौ । विटपा इव शुष्यन्ति विष्णुप्राणा दिवौकसः ॥ ९ ॥

तावद् यात भुवं यूयं विप्रक्षत्रसमेधिताम् । सूदयध्वं तपोयज्ञस्वाध्यायव्रतदानिनः ॥१०॥

विष्णुर्दिजक्रियामूलो यज्ञो धर्ममयः पुमान् । देवर्षिपितृभूतानां धर्मस्य च परायणम् ॥११॥

यत्र यत्र द्विजा गावो वेदा वर्णाश्रमाः क्रियाः । तं तं जनपदं यात संदीपयत वृश्चत ॥१२॥

इति ते भर्तृनिर्देशमादाय शिरसाऽऽदृताः । तथा प्रजानां कदनं विदधुः कदनप्रियाः ॥१३॥

कथं विद्वेषः अच्युतैकचित्तत्वं च कथम् एतद् द्वयं मे मह्यं ब्रूहीत्यन्वयः ॥ ४७ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे गूढार्थदीपिन्यां प्रथमोऽध्यायः ।

द्वितीयेऽनुजशोकार्तो दैत्यश्चक्रेऽरिमर्दनम् ।
बालरूपयमोक्तेन दित्यादीनां च सान्त्वनम् ॥ १ ॥

क्रोडमूर्तिना शूकरमूर्तिना । भ्रातरि हिरण्याक्षे ॥१॥ घूर्णः कम्पितगात्रः । सन्दष्टः दशनच्छदः ओष्ठो येन सः । ताभ्यां चक्षुर्भ्यां निर्गतेन धूमेनैव धूम्रं वर्णीकृतमाकाशम् ॥२॥ भ्रुकुटीयुक्तम् मुखं यस्य ॥ ३ ॥ सर्वे यूयं शृणुत ॥ ४।५ ॥ सपत्नैः शत्रुभिः कर्तृभिः । समेन समदृष्टिमताऽपि हरिणा उपधावनैः उपासनैर्निमित्तभूतैः पार्ष्णिग्राहेण पृष्ठ रक्षकेण ॥ ६ ॥ तस्येति युग्मम् । स्वभावः समत्वम् । [1]घृणेः शोच्यस्य सापराधस्य । वनौकसः पशुरूपस्य ॥ ७।८ ॥ कूटे कपटपूर्णे । कृत्तं छिन्नम् । विटपाः शाखा इव ॥ ९ ॥ तप आदीनि सन्ति येषां तान् सूदयध्वं घातयध्वम्॥ १०।११॥ सन्दीपयत अग्निना भस्मीकुरुत आयुधैः छेदयत ॥ १२ ॥ आदृताः सादराः । कदनं[2] मर्दनम् ॥ १३ ॥

---

१. घृणिः शोच्ये विघर्षणे इत्यभिधानात् । २. कदनं मर्दपापयोः ।

पुरग्रामव्रजोद्यानक्षेत्रारामाश्रमाकरान् । खेटखर्वटघोषांश्च ददहुः पत्तनानि च ॥१४॥
केचित् खनित्रैर्बिभिदुः सेतुप्राकारगोपुरान् । आजीव्यांश्छिच्छिदुर्वृक्षान् केचित् परशुपाणयः ।
प्रादहन् शरणान्यन्ये प्रजानां ज्वलितोल्मुकैः ॥ १५ ॥

एवं विप्रकृते लोके दैत्येन्द्रानुचरैर्मुहुः । दिवं देवाः परित्यज्य भुवि चेरुरलक्षिताः ॥१६॥
हिरण्यकशिपुर्भ्रातुः सम्परेतस्य दुःखितः । कृत्वा कटोदकादीनि भ्रातृपुत्रानसान्त्वयत् ॥१७॥
शकुनिं शम्बरं धृष्टं भूतसंतापनं वृकम् । कालनाभं महानाभं हरिश्मश्रुमथोत्कचम् ॥१८
तन्मातरं रुषाभानुं दितिं च जननीं गिरा । श्लक्ष्णया देशकालज्ञ इदमाह जनेश्वर ॥१९॥

हिरण्यकशिपुरुवाच

अम्बाम्ब हे वधूः पुत्रा वीरं मार्हथ शोचितुम् । रिपोरभिमुखे श्लाघ्यः शूराणां वध ईप्सितः२०
भूतानामिह संवासः प्रपायामिव सुव्रते । दैवेनैकत्र नीतानामुन्नीतानां स्वकर्मभिः ॥२१॥
नित्य आत्माऽव्ययः शुद्धः सर्वगः सर्ववित्परः । धत्तेऽसावात्मनो लिङ्गं मायया विसृजन् गुणान्
यथाम्भसा प्रचलता तरवोऽपि चला इव । चक्षुषा भ्राम्यमाणेन दृश्यते चलतीव भूः ॥२३॥
एवं गुणैर्भ्राम्यमाणे मनस्यविकलः पुमान् । याति तत्साम्यतां भद्रे ह्यलिङ्गो लिङ्गवानिव २४
एष आत्मविपर्यासो ह्यलिङ्गे लिङ्गभावना । एष प्रियाप्रियैर्योगो वियोगः कर्मसंसृतिः ॥२५॥
सम्भवश्च विनाशश्च शोकश्च विविधः स्मृतः । अविवेकश्च चिन्ता च विवेकास्मृतिरेव च
अत्राप्युदाहरन्तीममितिहासं पुरातनम् । यमस्य प्रेतबन्धूनां संवादं तं निबोधत ॥२७॥
उशीनरेष्वभूद् राजा सुयज्ञ इति विश्रुतः । सपत्नैर्निहतो युद्धे ज्ञातयस्तमुपासत ॥२८॥

आरामः क्रीडावनम् । आकरो रत्नस्थानम् । खेटः कर्षकग्रामः पर्वतीयग्रामः आभीरवासः क्रमेण । पत्तनं राजधानी ॥ १४ ॥ केचिदिति सार्द्धम् । खनित्रैः कुद्दालादिभिः । 'कुद्दालो भूविदारणे । गोपुरं नगरद्वारम् । आजीव्यान् जीविकावृक्षान् आम्रादीन् । शरणानि गृहान् । उल्मुकैः काष्ठैः ॥ १५ ॥ विप्रकृते उपद्रवग्रस्ते । चेरुः विचेरुः ॥ १६ ॥ सम्परेतस्य मृतस्य । कटोदकं प्रेतोदकम् ॥ १७ ॥ श्लक्ष्णया मधुरया । जनेश्वरः हिरण्यकशिपुः ॥ १९ ॥ शूराणां यो वधः स ईप्सितः अभीष्टः ॥२०॥ हे सुव्रते मातः । एकत्र नीतानां संयोजितानां पुनश्च वियोजितानां प्राणिनां सहवासः यथा प्रपायाम् अस्थिरः । तथा अत्र पुत्रादीनामपि संशब्दः सहार्थे ॥२१॥ परः देहादिव्यतिरिक्तः असौ आत्मा जीवः मायया अज्ञानेन गुणान् स्थूलदेहान् सृजन् पुनश्च विसृजन् त्यजन् लिङ्गं सूक्ष्मदेहं धत्ते कल्पयति । तन्निमित्त एव संसार इत्यर्थः ॥ २२।२३ ॥ भ्राम्यमाणे स्वरूपज्ञानात् चाल्यमाने सति अविकलः सुखरूपोऽपि अलिङ्गो देहभिन्नोऽपि पुमान् जीवः देहसाम्यतां देहोऽहमिति भावं याति प्राप्नोति । यथा लिङ्गवान् प्रसिद्धो देहवान् स्थूलोऽहं कृशोऽहमिति मन्यते तद्वत् ॥ २४ ॥ अलिङ्गे देहभिन्नेऽपि देहभावना इति एष आत्मनो विपर्यासो विपरीतभावः । हि यतः अस्मादेव एष योगो वियोगः कर्मभिः संसारः तथा संभवादयो जन्ममरणादयश्च भवन्ति ॥ २५।२६ ॥ निबोधत शृणुत ॥ २७ ॥ उपासत आवृत्य

विशीर्णरत्नकवचं विभ्रष्टाभरणस्रजम् । शरनिर्भिन्नहृदयं शयानमसृगाविलम् ॥२९॥
प्रकीर्णकेशं ध्वस्ताक्षं रभसा दष्टदच्छदम् । रजःकुण्ठमुखाम्भोजं छिन्नायुधभुजं मृधे ॥३०॥

उशीनरेन्द्रं विधिना तथा कृतं पतिं महिष्यः प्रसमीक्ष्य दुःखिताः ।
हताः स्म नाथेति करैरुरो भृशं घ्नन्त्यो मुहुस्तत्पदयोरुपापतन् ॥३१॥
रुदत्य उच्चैर्दयिताङ्घ्रिपङ्कजं सिञ्चन्त्य अस्रैः कुचकुङ्कुमारुणैः ।
विस्रस्तकेशाभरणाः शुचं नृणां सृजन्त्य आक्रन्दनया विलेपिरे ॥३२॥
अहो विधात्राऽकरुणेन नः प्रभो भवान् प्रणीतो दृगगोचरां दशाम् ।
उशीनराणामसि वृत्तिदः पुरा कृतोऽधुना येन शुचां विवर्धनः ॥३३॥
त्वया कृतज्ञेन वयं महीपते कथं विना स्याम सुहृत्तमेन ते ।
तत्राऽनुयानं तव वीर पादयोः शुश्रूषतीनां दिश यत्र यास्यसि ॥३४॥

एवं विलपतीनां वै परिगृह्य मृतं पतिम् । अनिच्छतीनां निर्हारमर्कोऽस्तं संन्यवर्तत ॥३५॥
तत्र ह प्रेतबन्धूनामश्रुत्य परिदेवितम् । आह तान् बालको भूत्वा यमः स्वयमुपागतः ॥३६॥

यम उवाच

अहो अमीषां वयसाधिकानां विपश्यतां लोकविधिं विमोहः ।
यत्रागतस्तत्र गतं मनुष्यं स्वयं सधर्मा अपि शोचन्त्यपार्थम् ॥३७॥
अहो वयं धन्यतमा यदत्र त्यक्ताः पितृभ्यां न विचिन्तयामः ।
अभक्ष्यमाणा अबला वृकादिभिः स रक्षिता रक्षति यो हि गर्भे ॥३८॥
य इच्छयेशः सृजतीदमव्ययो य एव रक्षत्यवलुम्पते च यः ।
तस्याबलाः क्रीडनमाहुरीशितुश्चराचरं निग्रहसंग्रहे प्रभुः ॥३९॥

स्थिताः ॥२८॥ विशीर्णेति युग्मम् । विशीर्णं त्रुटितं रत्नमयं कवचं यस्य तम् । विभ्रष्टानि आभरणादीनि यस्य तम् । असृजा रक्तेन लिप्तम् । मृधे शयानमित्यत्रान्वेति । ध्वस्ते अन्तर्गते अक्षिणी यस्य । रभसा क्रोधावेशेन । रजसा कुण्ठमावृतं मुखं यस्य । छिन्नमायुधं भुजश्च यस्य तम् उपासतेति योज्यम् ॥२९।३०॥ तथा कृतं पञ्चत्वं नीतम् । उप समीपे ॥ ३१ ॥ कुचगतकुङ्कुमेन अरुणैः अश्रुभिः । विस्रस्ता विभ्रष्टाः केशा आभरणानि च यासां ताः । शुचं शोकं सृजन्त्य उत्पादयन्त्यः । आक्रन्दनया विकलवाण्या ॥ ३२ ॥ येन विधात्रा उशीनरवासिनां नोऽस्माकं पुरा वृत्तिदः कृतः तेनैव अकरुणेन अधुना मृत्युदशां गमितः प्रापितः सन् शोकविवर्धनः कृतोऽसीत्यन्वयः ॥ ३३ ॥ हे महीपते । त्वया विना वयं कथं स्याम जीवेम । अतः हे वीर ! यत्र त्वं यास्यसि तत्र ते तवानुगमनम् अस्माकमपि दिश देहि । वयमपि म्रियामहे इत्यर्थः ॥ ३४ ॥ निर्हारं दाहम् । अस्तम् अस्ताचलं संन्यवर्तत संप्राप्तोऽभूत् ॥३५॥ हेति शोकाधिक्ये । परिदेवितं विलापम् ॥ ३६ ॥ लोकविधिं जन्ममरणादिलोकपरिपाटीं जानतामपि विमोहः । यत्र यतः आगतः तत्रैव गतं मनुष्यं अपार्थं व्यर्थमेव शोचन्ति स्वयं सधर्मा मरणशीला अपि अहो आश्चर्यम् ॥३७॥ अबला दुर्बला अपि अत्र वने त्यक्ता अपि वृकादिभिः अभक्ष्यमाणा एव सन्तः न विचिन्तयामः अतो वयं धन्यतमा इत्यन्वयः । हि यतः यो गर्भे सः अधुनापि रक्षिता रक्षिष्यति ॥३८॥ य ईशः इदं विश्वं सृजति

पथि च्युतं तिष्ठति दिष्टरक्षितं गृहे स्थितं तद्विहतं विनश्यति ।
जीवत्यनाथोऽपि तदीक्षितो वने गृहेऽपि गुप्तोऽस्य हतो न जीवति ॥४०॥
भूतानि तैस्तैर्निजयोनिकर्मभिर्भवन्ति काले न भवन्ति सर्वशः ।
न तत्र ह्यात्मा प्रकृतावपि स्थितस्तस्या गुणैरन्यतमो निबध्यते ॥४१॥
इदं शरीरं पुरुषस्य मोहजं यथा पृथग् भौतिकमीयते गृहम् ।
यथौदकैः पार्थिवतैजसैर्जनः कालेन जातो विकृतो विनश्यति ॥४२॥
यथानलो दारुषु भिन्न ईयते यथाऽनिलो देहगतः पृथक् स्थितः ।
यथा नभः सर्वगतं न सज्जते तथा पुमान् सर्वगुणाश्रयः परः ॥४३॥

सुयज्ञो नन्वयं शेते मूढा यमनुशोचथ । यः श्रोता योऽनुवक्तेह स न दृश्येत कर्हिचित् ॥४४॥
न श्रोता नानुवक्तायं मुख्योऽप्यत्र महानसुः । यस्त्विहेन्द्रियवानात्मा स चान्यः प्राणदेहयोः ॥४५
भूतेन्द्रियमनोलिङ्गान् देहानुच्चावचान् विभुः । भजत्युत्सृजति ह्यन्यस्तच्चापि स्वेन तेजसा ॥४६
यावल्लिङ्गान्वितो ह्यात्मा तावत् कर्मनिबन्धनम् । ततो विपर्ययः क्लेशो मायायोगोऽनुवर्तते ॥४७
वितथाभिनिवेशोऽयं यद् गुणेष्वर्थदृग्वचः । यथा मनोरथः स्वप्नः सर्वमैन्द्रियकं मृषा ॥४८॥

य एव अवलुम्पते संहरति तस्येशितुः नियन्तुः इदं चराचरं जगत् क्रीडासाधनमाहुः । स एव संहारे पालने च प्रभुः समर्थः ॥३९॥ दिष्टेन दैवेन ईश्वरेण । तत् तेन विहतमुपेक्षितम् । तेन ईक्षितः कृपादृष्टिविषयीकृतः । अस्य अनेन ॥ ४० ॥ भूतानि देहा एव निजयोनिः लिङ्गशरीरं तन्निमित्तैः कर्मभिः भवन्ति जायन्ते नश्यन्ति च । सर्वशः देवादिदेहा अपि तथाविधाः । तत्र ह तदा प्रकृतौ देहे स्थितोऽपि आत्मा तस्याः प्रकृतेर्गुणैः देहधर्मैर्जन्मादिभिर्न बध्यते यतो देहादन्यतमः ॥ ४१ ॥ मोहादविवेकादात्मत्वेन जातं वस्तुतस्तु पृथगेव यथा भौतिकं गृहम् ईयते प्रतीयते । यथा औदकैः जलबिन्दुभिर्जातो बुद्बुदादिः । पार्थिवैः मृत्पिण्डैः जातः घटादिः तैजसैः सुवर्णैर्जातः कटक कुण्डलादिर्विनश्यति तथा तैरेव त्रिविधैः परमाणुभिर्जातो जनो देह एव विकृतः परिणतः सन् विनश्यति नत्वात्मा ॥४२॥ यथा तत्र स्थितोऽपि दाहकत्वेन प्रकाशकत्वेन च भिन्न एव यथा अनिलः प्रतीयते । पृथक् स्थितः मुखनासिकादिषु । तथा पुमान् जीवः सर्वेषां गुणानां देहेन्द्रियादीनामाश्रयः तेषु आश्रितोऽपि धारकः तेभ्यः परः पृथगेव ॥४३॥ यम् अनुशोचथ स शेते एव । यश्च श्रोता स कर्हिचिदपि दृश्यो नासीत् ॥४४॥ अत्र शरीरे मुख्योऽसुः प्राणोऽपि श्रोता नास्ति अचेतनत्वात् चेष्टाहेतुत्वात् स महान् । यस्तु आत्मा स एव श्रोता वक्ता च स च प्राणादिभ्योऽन्यः पृथक् चेतनत्वात् ॥ ४५ ॥ विभुः जीवः हि यस्मादन्यः तस्माद्धेतोः उच्चावचान् उत्कृष्टनिकृष्टान् देहान् भजति प्राप्नोति त्यजति च । कथंभूतान् । भूतादिभिः लिङ्ग्यन्ते ज्ञायन्ते तथा तान् । कदाचिच्च तेजसा विवेकबलेन भगवत्कृपाबलेनच तच्चापि लिङ्गशरीरमपि त्यजति मुक्तो भवतीत्यर्थः ॥४६॥ यावत् आत्मा लिङ्गशरीरेण युक्तः तावत् कर्म बन्धनहेतुर्भवति ततो विपर्ययः देहादिधर्मवान् क्लेशश्च भवति इत्ययं मायायोगः प्रचलति न च निवर्तते ॥ ४७ ॥ गुणेषु गुणकार्येषु सुखदुःखादिषु अर्थदृक् सत्यत्वबुद्धिरिति वचः[1] वितथो मिथ्याभूतोऽभिमानः । यथा मनोरथोपनीतराज्यसुखादिः स्वाप्निकस्त्रीसंभोगादिः

---

१. 'अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति' इत्यादि ।

अथ नित्यमनित्यं वा नेह शोचन्ति तद्विदः । नान्यथा शक्यते कर्तुं स्वभावः शोचतामिति॥४९॥
लुब्धको विपिने कश्चित् पक्षिणां निर्मितोऽन्तकः । वितत्य जालं विदधे तत्र तत्र प्रलोभनम्॥५०॥
कुलिङ्गमिथुनं तत्र विचरत् समदृश्यत । तयोः कुलिङ्गी सहसा लुब्धकेन प्रलोभिता ॥५१॥
साऽसज्जत शिचस्तन्त्यां महिषी कालयन्त्रिता । कुलिङ्गस्तां तथाऽऽपन्नां निरीक्ष्य भृशदुःखितः ।

स्नेहादकल्पः कृपणः कृपणां पर्यदेवयत् ॥ ५२ ॥

अहो अकरुणो देवः स्त्रियाऽऽककरुणया विभुः । कृपणं मानुशोचन्त्या दीनया किं करिष्यति॥५३॥
कामं नयतु मां देवः किमर्धेनात्मनो हि मे । दीनेन जीवता दुःखमनेन विधुरायुषा ॥५४॥
कथं त्वजातपक्षांस्तान् मातृहीनान् बिभर्म्यहम् । मन्दभाग्याः प्रतीक्षन्ते नीडे मे मातरं प्रजाः ॥५५॥

एवं कुलिङ्गं विलपन्तमारात् प्रियावियोगातुरमश्रुकण्ठम् ।
स एव तं शाकुनिकः शरेण विव्याध कालप्रहितो निलीनः ॥५६॥

एवं यूयमपश्यन्त्य आत्मपायमबुद्धयः । नैनं प्राप्स्यथ शोचन्त्यः पतिं वर्षशतैरपि ॥५७॥

हिरण्यकशिपुरुवाच

बाल एवं प्रवदति सर्वे विस्मितचेतसः । ज्ञातयो मेनिरे सर्वमनित्यमयथोत्थितम् ॥५८॥
यम एतदुपाख्याय तत्रैवान्तरधीयत । ज्ञातयोऽपि सुयज्ञस्य चक्रुर्यत् साम्परायिकम् ॥५९॥
ततः शोचत मा यूयं परं चात्मानमेव च । क आत्मा कः परो वात्र स्वीयः पारक्य एव वा ।

स्वपराभिनिवेशेन विना ज्ञानेन देहिनाम् ॥६०॥

यथा मृषा एवमिन्द्रियग्राह्यं सर्वं जगत् मृषैवेत्यर्थः ॥ ४८ ॥ अथ तस्मात् तद्विदः तत्त्वज्ञाः नित्यमात्मानम् अनित्यं देहं वा नैव शोचन्ति । अथाऽपि शोचतां शोककर्तॄणां यः स्वभावः स च केनाऽपि अन्यथा कर्तुं न शक्यते शोचन्तु ते तेन किं स्यात् ॥ ४९ ॥ वितत्य प्रसार्य लुब्धको व्याधः । निर्मित ईश्वरेण । प्रलोभनं वञ्चनं विदधे ॥ ५० ॥ तत्र वने । कुलिङ्गः दीर्घतुण्डः पक्षी । प्रलोभिता वशीकृता ॥ ५१ ॥ सेत्यर्द्धम् । यन्त्रिता प्रेरिता सती । शिचो जालस्य तन्त्यां सूत्रे असज्जत बन्धनं प्राप ॥ ५२ ॥ आपन्नाम् आपद्ग्रस्ताम् । अकल्पः मोचयितुमसमर्थः । पर्यदेवयत् विललाप ॥ ५३ ॥ मा मां शोचन्त्या स्त्रिया किम् करिष्यति ॥५४॥ कामं यथेच्छम् । आत्मनो देहस्य अर्द्धभागेन पुरुषाख्येन अवशिष्टेन अनेन मे मम किं प्रयोजनम् । कथंभूतेन । दुःखं दुःखपूर्वकं जीवता । पुनश्च । विधुरं स्त्रीरहितमायुर्यस्य तेन तथाभूतेन ॥ ५५ ॥ नीडे स्थिता मे पुत्राः आहारार्थं मातरं प्रतीक्षन्ते तानहं कथं बिभर्मि पुष्णामीत्यन्वयः ॥ ५६ ॥ स एव शाकुनिकः पक्षिहन्ता एवं विलपन्तं तम् आरात् दूरादेव शरेण विव्याध ताडितवानित्यन्वयः । प्रहितः प्रेरितः निलीनः वृक्षमूले छन्नः सन् । अश्रुपूर्णः कण्ठो यस्य तम् ॥५७॥ हे अबुद्धयः ! मूर्खाः । आत्मापायं स्वमृत्युम् ॥ ५८ ॥ सर्वं दुःखादिकम् अनित्यं मेनिरे । यतः अयथा मिथ्यैव आत्मनि आरोपितम् ॥ ५९ ॥ सुयज्ञस्य साम्परायिकं पारलौकिकं यत्कृत्यं तच्चक्रुः ॥६०॥

१. अयं पाठः प्रशस्तः 'विपूर्वो धा करोत्यर्थे' इति वचनात् ।

नारद उवाच

इति दैत्यपतेर्वाक्यं दितिराकर्ण्य सस्नुषा । पुत्रशोकं क्षणात् त्यक्त्वा तत्त्वे चित्तमधारयत् ।६१

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां सप्तमस्कन्धे दितिशोकापनयनं नाम द्वितीयोऽध्यायः ॥ २ ॥

अथ तृतीयोऽध्यायः

नारद उवाच

हिरण्यकशिपू राजन्नजेयमजरामरम् । आत्मानमप्रतिद्वन्द्वमेकराजं व्यधित्सत ॥ १ ॥
स तेपे मन्दरद्रोण्यां तपः परमदारुणम् । ऊर्ध्वबाहुर्नभोदृष्टिः पादाङ्गुष्ठाश्रितावनिः ॥ २ ॥
जटादीधितिभी रेजे संवर्तार्क इवांशुभिः । तस्मिंस्तपस्तप्यमाने देवाः स्थानानि भेजिरे ॥ ३ ॥
तस्य मूर्ध्नः समुद्भूतः सधूमोऽग्निस्तपोमयः । तिर्यगूर्ध्वमधोलोकानतपद्विष्वगीरितः ॥ ४ ॥
चुक्षुभुर्नद्युदन्वन्तः सद्वीपाद्रिश्चचाल भूः । निपेतुः सग्रहास्तारा जज्वलुश्च दिशो दश ॥ ५ ॥
तेन तप्ता दिवं त्यक्त्वा ब्रह्मलोकं ययुः सुराः । धात्रे विज्ञापयामासुर्देवदेव जगत्पते ॥ ६ ॥
दैत्येन्द्रतपसा तप्ता दिवि स्थातुं न शक्नुमः । तस्य चोपशमं भूमन् विधेहि यदि मन्यसे ।
लोका न यावन्नङ्क्ष्यन्ति बलिहारास्तवाभिभूः ॥ ७ ॥
तस्यायं किल संकल्पश्चरतो दुश्चरं तपः । श्रूयतां किं न विदितस्तवाथापि निवेदितम् ॥ ८ ॥

तत् इत्यर्द्धम् ॥ ६१ ॥ स्वः पर इत्यभिनिवेशः आग्रहः अभिमानो वा स एवाज्ञानं तेन विना कः परः न कोऽपीत्यन्वयः ॥ ६२ ॥ स्नुषा पुत्रवधूः रुषाभानुः तया सहिता दितिः । तत्त्वे यमोदिष्टमार्गे ॥ ६३ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे गूढार्थदीपिन्यां द्वितीयोऽध्यायः ।

तृतीये दैत्यराजस्य तपसा तोषितो विधिः ।
आगतः संस्तुतस्तेन याचिता दुर्लभा वराः ॥

आत्मानम् एकमेव राजानं विधातुमैच्छत् । अप्रतिद्वन्द्वं प्रतिपक्षरहितम् ॥ १ ॥ तेपे चकार । पादाङ्गुष्ठेन आश्रिता स्पृष्टा पृथ्वी येन सः ॥ २ ॥ दीधितिभिः ज्वालाभिः । अंशुभिः किरणैः संवर्तार्कैः प्रलयार्कः । भेजिरे प्रापुः ॥ ३ ॥ विष्वक् समन्ततः प्रसृतः । अतपत् तापयामास ॥ ४ ॥ उदन्वन्तः समुद्राश्च । ग्रहैः शुक्रादिभिः । तारा नक्षत्राणि । दिशः तदधिष्ठातृदेवताः । जज्वलुः सन्तप्ता बभूवुः ॥ ५ ॥ तेन अग्निना ॥ ६ ॥ हे भूमन् ! अनन्तशक्ते । अत एव अभितो भवतीति हे अभिभूः[1] पराभवसमर्थ । उपशमं निवारणम् । बलिहारा हविर्भागप्रदाः ॥ ७ ॥ चरतः कुर्वतः तस्य । निवेदितंश्रूयता मित्यत्र निवेद्यते इति पाठः

---

१. 'भुवः संज्ञान्तरयोः' इति क्विप् । क्विन्तत्वेन धातुत्वानपायात् सम्बुद्धौ ह्रस्वाभावो घेर्लोपाभावश्चेति । अभिभोः इति पाठे भो भूमन् । अभि अभितः यावन्न नङ्क्ष्यतीति योज्यम् ।

सृष्ट्वा चराचरमिदं तपोयोगसमाधिना । अध्यास्ते सर्वधिष्ण्येभ्यः परमेष्ठी निजासनम् ॥ ९ ।
तदहं वर्धमानेन तपोयोगसमाधिना । कालात्मनोश्च नित्यत्वात् साधयिष्ये तथाऽऽत्मनः ॥१०॥
अन्यथेदं विधास्येऽहमयथापूर्वमोजसा । किमन्यैः कालनिर्धूतैः कल्पान्ते वैष्णवादिभिः ॥११॥
इति शुश्रुम निर्बन्धं तपः परमास्थितः । विधत्स्वानन्तरं युक्तं स्वयं त्रिभुवनेश्वर ॥१२॥
तवासनं द्विजगवां पारमेष्ठ्यं जगत्पते । भवाय श्रेयसे भूत्यै क्षेमाय विजयाय च ॥१३॥
इति विज्ञापितो देवैर्भगवानात्मभूर्नृप । परीतो भृगुदक्षाद्यैर्ययौ दैत्येश्वराश्रमम् ॥१४॥
न ददर्श प्रतिच्छन्नं वल्मीकतृणकीचकैः । पिपीलिकाभिराचीर्णमेदस्त्वङ्मांसशोणितम् ॥१५।
तपन्तं तपसा लोकान् यथाभ्रापिहितं रविम् । विलक्ष्य विस्मितः प्राह प्रहसन् हंसवाहनः ।१६।

ब्रह्मोवाच

उत्तिष्ठोत्तिष्ठ भद्रं ते तपःसिद्धोऽसि काश्यप । वरदोऽहमनुप्राप्तो व्रियतामीप्सितो वरः ॥१७॥
अद्राक्षमहमेतत् ते हृत्सारं महदद्भुतम् । दंशभक्षितदेहस्य प्राणाः ह्यस्थिषु शेरते ॥१८॥
नैतत् पूर्वर्षयश्चक्रुर्न करिष्यन्ति चापरे । निरम्बुर्धारयेत् प्राणान् को वै दिव्यसमाः शतम् १९
व्यवसायेन तेऽनेन दुष्करेण मनस्विनाम् । तपोनिष्ठेन भवता जितोऽहं दितिनन्दन ॥२०॥
ततस्त आशिषः सर्वा ददाम्यसुरपुङ्गव । मर्त्यस्य ते अमर्त्यस्य दर्शनं नाफलं मम ॥२१॥

नारद उवाच

इत्युक्त्वाऽऽदिभवो देवो भक्षिताङ्गं पिपीलिकैः । कमण्डलुजलेनौक्षद् दिव्येनामोघराधसा ॥२२
स तत्कीचकवल्मीकात् सहओजोबलान्वितः । सर्वावयवसम्पन्नो वज्रसंहननो युवा ।
उत्थितस्तप्तहेमाभो विभावसुरिवैधसः ॥ २३ ॥

धिष्ण्येभ्यः सर्वलोकेभ्यः श्रेष्ठं यत् निजासनं सत्यलोकमध्यास्ते अधितिष्ठति तदेव स्थानम् अहमपि आत्मनोऽर्थे साधयिष्ये इत्यन्वयः । देहस्य नाशेऽपि कालात्मनोश्च नित्यत्वात् बहुभिर्जन्मभिरित्यर्थः ॥९।१०॥ इदं विश्वम् अन्यथा प्रकारान्तरेण अयथापूर्वं विपरीतक्रमेण । यज्ञभागानसुरेभ्यः मद्यादिपानं सुरेभ्यः दास्यामि इत्यन्यथार्थः । पुण्यात्मनां नरकः पापिनां स्वर्ग इत्ययथार्थः । निर्धूतैः विनाशितैः अन्यैः तुच्छैः ध्रुवादिपदैः किं प्रयोजनमित्यासुरभावादुक्तम् ॥११॥ निर्बन्धं हठम् । अत्र यत् युक्तम् उचितं तदनन्तरं शीघ्रमेव कुरु ॥ १२ ॥ क्षेमाय लब्धरक्षणाय ॥ १३ ॥ आत्मनो नारायणाद् भवतीति आत्मभूः ब्रह्मा ॥१४॥ नेति युग्मम् । कीचकैः वेणुभिः । आचीर्णं समन्तात् भक्षितं मेद आदि यस्य तम् । एवं-भूतं प्रथमं न ददर्श पश्चात् कथंचित् विलक्ष्य तं प्राहेति द्वयोरन्वयः । मेदः चर्मान्तर्गतसारः अभ्रापिहितं मेघाच्छन्नम् ॥१५।१६॥ हे कश्यपात्मज ! वरः व्रियतां याच्यताम् ॥ १७ ॥ हृत्सारं धैर्यम् । दंशस्तु वनमक्षिका ॥ १८ ॥ अपरे अर्वाचीनाः । समा वर्षाणि ॥१९॥ ते अनेन व्यवसायेन दृढसङ्कल्पेन ॥२०॥ सर्वा आशिषः सर्वान् भोगान् ददामि । अफलं विफलं नास्ति॥२१॥ आदौ भवतीति आदिभवो ब्रह्मा आदि नारायणस्तस्माद्वा जलेन औक्षत् प्रोक्षितवान् । राधसा सिद्धिप्रदेन ॥२२॥ स इति सार्द्धम् तत् तस्मात्

स निरीक्ष्याम्बरे देवं हंसवाहमवस्थितम् । ननाम शिरसा भूमौ तद्दर्शनामहोत्सवः ॥२४॥
उत्थाय प्राञ्जलिः प्रह्व ईक्षमाणो दृशा विभुम् । हर्षाश्रुपुलकोद्भेदो गिरा गद्गदयागृणात् ॥२५

हिरण्यकशिपुरुवाच

कल्पान्ते कालसृष्टेन योऽन्धेन तमसाऽऽवृतम् । अभिव्यनग् जगदिदं स्वयंज्योतः स्वरोचिषा२६
आत्मना त्रिवृता चेदं सृजत्यवति लुम्पति । रजःसत्त्वतमोधाम्ने पराय महते नमः ॥२७॥
नम आद्याय बीजाय ज्ञानविज्ञानमूर्तये । प्राणेन्द्रियमनोबुद्धिविकारैर्व्यक्तिमीयुषे ॥२८॥

त्वमीशिषे जगतस्तस्थुषश्च प्राणेन मुख्येन पतिः प्रजानाम् ।
चित्तस्य चित्तेर्मनइन्द्रियाणां पतिर्महान् भूतगुणाशयेशः ॥२९॥
त्वं सप्ततन्तून् वितनोषि तन्वा त्रय्या चातुर्होत्रकविद्यया च ।
त्वमेक आत्माऽऽत्मवतमनादिरनन्तपारः कविरन्तरात्मा ॥३०॥
त्वमेक आत्माऽनिमिषो जनानामायुर्लवाद्यावयवैः क्षिणोषि ।
कूटस्थ आत्मा परमेष्ठ्यजो महांस्त्वं जीवलोकस्य च जीव आत्मा ॥३१॥

कीचकाच्छन्नमृत्तिकाचयात् उत्थितः । सह इति क्रमेण मनइन्द्रियदेहशक्तयः सन्ति । वज्रस्येव संहननम् अङ्गदाढर्यं यस्य सः । एधसः काष्ठात् अग्निरिव ॥२३॥ तस्य ब्रह्मणः दर्शनेन महान् उत्सवः हर्षोल्लासो यस्य सः ॥ २४ ॥ प्रह्वः नम्रः सन् अगृणात् अस्तौत् । हर्षेण अश्रूणि पुलकोद्भेदो रोमाञ्चश्च यस्य सः ॥ २५ ॥ कल्पान्त इति युग्मम् । कल्पान्ते प्रलये कालसृष्टेन कालप्रेरितेन अन्धेन तमसा आवृतम् इदं जगत् यः स्वरोचिषा स्वप्रकाशेन अभिव्यनक् अभिव्यक्तमकरोत् । किञ्च यश्च त्रिवृता[1] आत्मना त्रिगुणस्वरूपेण इदं जगत् सृजति अवति लुम्पति संहरति तस्मै महते ब्रह्मणे नमः इति द्वयोरन्वयः । धाम्ने आश्रयाय ॥२६।२७॥ बीजाय कारणाय । विकाराः भूम्यादयः तैर्व्यक्तिं कार्याकारम् ईयुषे प्राप्तवते ते नमः ॥२८॥ जगतः जङ्गमस्य स्थावरस्य च त्वम् ईशिषे नियन्तासि प्रवर्तकोऽसि । केन । मुख्येन नायकेन प्राणेन क्रियाशक्तिप्रधानेन । अत एव प्रजानां पतिरसि । तथा चित्तादीनां भूतादीनां च पतिः पालकः ईशः प्रवर्तकश्च महान् ब्रह्मा त्वमेवासि । चित्तिः बुद्धिः । आशयोऽन्तःकरणम् ॥ २९॥ त्वमेव सप्त ततून् अग्निष्टोमादियज्ञान्[2] वितनोषि विस्तारयसि । कथम् । त्रय्या वेदत्रयरूपेण । कथंभूतया । चत्वारो होतारो यत्र तच्चातुर्होत्रकं कर्म तद्विषयिणी या विद्या तया । किञ्च त्वमेक एव आत्मवतां प्राणिनामात्मा आधारः अन्तरात्मा अन्तर्यामी च । नास्ति अन्तः कालतः पारो देशतश्च यस्य तथाभूतोऽसि ॥ ३० ॥ अनिमिषः निमेषादिरहितत्वात्सदा मारणे जागरूकः । लवः [3]त्रुटिकालः । क्षिणोषि नाशयसि । परमे स्वस्वरूपे स्थातुं शीलं यस्येति । जीवयतीति जीवः जीवनहेतुः । आत्मा नियन्ता यतः

---

१. त्रीन् गुणान् वृणोति स्वीकरोतीति त्रिवृत् ।

२. आदिना अत्यग्निष्टोम-उक्थषोडशि-वाजपेय-आप्तोर्याम-अतिरात्राणां संग्रहः । होता उद्गाता अध्वर्युः ब्रह्मेति चत्वारो होतारः ।

३. 'सूच्या भिन्ने पद्मपत्रे त्रुटिरित्यभिधीयते' इति सूर्यसिद्धान्तात् ।

त्वत्तः परं नापरमप्यनेजदेजच्च किंचिद् व्यतिरिक्तमस्ति।
विद्याः कलास्ते तनवश्च सर्वा हिरण्यगर्भोऽसि बृहत् त्रिपृष्ठः ॥३२॥
व्यक्तं विभो स्थूलमिदं शरीरं येनेन्द्रियप्राणमनोगुणांस्त्वम्।
भुङ्क्षे स्थितो धामनि पारमेष्ठ्ये अव्यक्त आत्मा पुरुषः पुराणः ॥३३॥

अनन्ताव्यक्तरूपेण येनेदमखिलं ततम्। चिदचिच्छक्तियुक्ताय तस्मै भगवते नमः ॥३४॥
यदि दास्यस्यभिमतान् वरान् मे वरदोत्तम। भूतेभ्यस्त्वद्विसृष्टेभ्यो मृत्युर्मा भून्मम प्रभो ।३५।
नान्तर्बहिर्दिवा नक्तमन्यस्मादपि चायुधैः। न भूमौ नाम्बरे मृत्युर्न नरैर्न मृगैरपि ॥३६॥
व्यसुभिर्वासुमद्भिर्वा सुरासुरमहोरगैः। अप्रतिद्वन्द्वतां युद्धे ऐकपत्यं च देहिनाम् ॥३७॥
सर्वेषां लोकपालानां महिमानं यथात्मनः। तपोयोगप्रभावाणां यन्न रिष्यति कर्हिचित् ३८॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां सप्तमस्कन्धे हिरण्यकशिपोर्वरयाचनं नाम तृतीयोऽध्यायः॥३

अथ चतुर्थोऽध्यायः

नारद उवाच

एवं वृतः शतधृतिर्हिरण्यकशिपोरथ। प्रादात् तत्तपसा प्रीतो वरांस्तस्य सुदुर्लभान् ॥ १ ॥

ब्रह्मोवाच

तातेमे दुर्लभाः पुंसां यान् वृणीषे वरान् मम। तथापि वितराम्यङ्ग वरान् यदपि दुर्लभान्॥२।

आत्मा व्यापकः ॥३१॥ किं बहुना परं कारणं प्रकृत्यादि अपरं कार्यं महदादि तत्रापि अनेजत् स्थावरम् एजत् जङ्गमं च यत्किञ्चित् तत्सर्वं त्वत्तो व्यतिरिक्तं नास्ति। विद्या वेदाद्याः कलाः अङ्गानि व्याकरणादीनि च ते तनवः न तु त्वद्व्यतिरिक्ताः यतस्त्वं बृहत् ब्रह्मैवासि। हिरण्यं ब्रह्माण्डं गर्भे यस्य सः। त्रयाणां गुणानां पृष्ठः परतः स्थितः ॥३२॥ पारमेष्ठ्ये धामनि सत्यलोके स्थित एव त्वं येन इन्द्रियादीनां गुणान् विषयान् भुङ्क्षे तदिदं तव व्यक्तं वैराजाख्यं स्थूलं शरीरमस्ति वस्तुतस्तु त्वं पुराणः पुरुषः अव्यक्तः सूक्ष्मरूपश्च ॥ ३३ ॥ ततं व्याप्तम् ॥ ३४ ॥ त्वद्विसृष्टेभ्यः त्वन्निर्मितेभ्यः ॥ ३५ ॥ अन्यस्मात् त्वत्सदृशादपि ॥ ३६ ॥ व्यसुभिः पाषाणाद्यैः। असुमद्भिः ग्राहाद्यैः। युद्धे अप्रतिद्वन्द्वतां प्रतिपक्षराहित्यम् ॥ ३७ ॥ सर्वेषां मध्ये यथा आत्मनः तव महिमा तं देहि। तपआदिसम्पन्नानां योगिनां यत् अणिमाद्यैश्वर्यं न रिष्यति न नश्येत् तच्च देहीति। भूतेभ्य इत्यारभ्य महोरगैरित्यन्त एको वरः। अप्रतिद्वन्द्वतामिति द्वितीयः। एकाधिपत्यमिति तृतीयः। महिमानं देहीति चतुर्थः। न रिष्यतीति पञ्चमो वरः इति ॥ ३८ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे गूढार्थदीपिन्यां तृतीयोऽध्यायः।

तुर्ये प्राप्य वरान् दैत्यो जित्वा देवानपीडयत्।
प्रह्लादजन्म तद्भक्त्या गुणोत्कर्षश्च वर्ण्यते ॥१॥

हिरण्यकशिपोः तपसा प्रीतः शतधृतिः ब्रह्मा ॥ १ ॥ अङ्ग हे तात। वितरामि दद ॥ २ ॥

ततो जगाम भगवानमोघानुग्रहो विभुः । पूजितोऽसुरवर्येण स्तूयमानः प्रजेश्वरैः ॥ ३ ॥
एवं लब्धवरो दैत्यो बिभ्रद्धेममयं वपुः । भगवत्यकरोद् द्वेषं भ्रातुर्वधमनुस्मरन् ॥ ४ ॥
स विजित्य दिशः सर्वा लोकांश्च त्रीन् महासुरः । देवासुरमनुष्येन्द्रान् गन्धर्वगरुडोरगान् ॥५॥
सिद्धचारणविद्याध्रानृषीन् पितृपतीन् मनून् । यक्षरक्षःपिशाचेशान् प्रेतभूतपतीनथ ॥ ६ ॥
सर्वसत्त्वपतीञ्जित्वा वशमानीय विश्वजित् । जहार लोकपालानां स्थानानि सह तेजसा ॥ ७॥
देवोद्यानश्रिया जुष्टमध्यास्ते स्म त्रिविष्टपम् । महेन्द्रभवनं साक्षान्निर्मितं विश्वकर्मणा ॥
त्रैलोक्यलक्ष्म्यायतनमध्युवासाखिलर्द्धिमत् ॥ ८ ॥
यत्र विद्रुमसोपाना महामारकता भुवः । यत्र स्फाटिककुड्यानि वैदूर्यस्तम्भपङ्क्तयः ॥ ९ ॥
यत्र चित्रवितानानि पद्मरागासनानि च । पयःफेननिभाःशय्या मुक्तादामपरिच्छदाः ॥१०॥
कूजद्भिर्नूपुरैर्देव्यः शब्दयन्त्य इतस्ततः । रत्नस्थलीषु पश्यन्ति सुदतीः सुन्दरं मुखम् ॥११॥

तस्मिन् महेन्द्रभवने महाबलो महामना निर्जितलोक एकराट् ।
रेमेऽभिवन्द्याङ्घ्रियुगः सुरादिभिः प्रतापितैरूर्जितचण्डशासनः ॥१२॥
तमङ्ग मत्तं मधुनोरुगन्धिना विवृत्तताम्राक्षमशेषधिष्ण्यपाः ।
उपासतोपायनपाणिभिर्विना त्रिभिस्तपोयोगबलौजसां पदम् ॥१३॥
जगुर्महेन्द्रासनमोजसा स्थितं विश्वावसुस्तुम्बुरुनारदादयः ।
गन्धर्वसिद्धा ऋषयोऽस्तुवन् मुहुर्विद्याधरा अप्सरसश्च पाण्डव ॥१४॥

स एव वर्णाश्रमिभिः क्रतुभिर्भूरिदक्षिणैः । इज्यमानो हविर्भागानग्रहीत् स्वेन तेजसा ॥१५॥

अमोघः सफलोऽनुग्रहो यस्य सः विभुः ब्रह्मा प्रजेश्वरैः मरीच्यादिभिः ॥ ३ ॥ हेममयं तेजोमयम् ॥ ४ ॥
स इति त्रयम् । स महासुरः त्रीन् लोकान् सर्वा दिशः तत्पतींश्च विजित्य विश्वजित् विश्वविजयी सन्
लोकपालानां तेजसा सह स्थानानि जहार अपहृतवानिति त्रयाणामेकान्वयः । सत्त्वपतीन् सिंहादीन्
गरुडपदेन तज्जातिकाः पक्षिणो ग्राह्या न तु गरुडः ॥५।६।७॥ देवेति सार्द्धम् । तृतीयं विष्टपं लोकं
त्रिविष्टपं स्वर्गलोकम् । तत्रापि महेन्द्रभवनम् । कीदृक् । लक्ष्म्या आयतनं मुख्यस्थानम् । ऋद्धिसिद्धिपरिपूर्णं
च । अध्युवास अधिष्ठितवान् ॥ ८ ॥ यत्रेति चतुष्कम् । यत्र महामारकता इन्द्रनीलमणिमय्यः भुवः
पद्मरागासनानि दुग्धफेनवत् धवलशय्याः तथा देव्यः अप्सरसश्च सन्ति तस्मिन् महेन्द्रभवने रेमे इति
चतुर्थेनान्वयः । प्रतापितैः पराजितैः । ऊर्जितमत्यधिकं प्रचण्डं कठोरं शासनं यस्य सः ॥९।१०।११।१२॥
अङ्ग हे युधिष्ठिर ! अशेषलोकपालाः उपायनयुक्तैः पाणिभिः तं दैत्यमुपासतेत्यन्वयः । त्रिभिर्देवैः
विना । कथंभूतम् । उग्रगन्धेन मधुना मदिरया मत्तम् अतएव विवृत्ते विघूर्णिते ताम्रे अरुणे अक्षिणी यस्य
तम् । पुनश्च तप आदीनामाश्रयभूतम् ॥१३॥ ओजसा स्वपराक्रमेण आसनमास्थितं तं जगुः । सिद्धाः
प्रसिद्धाः । ऋषयः तुष्टुवुः शेषा जगुः तुष्टुवुश्चेति व्याख्येयम् । नारदादयः[1] ॥ १४ ॥ क्रतुभिः इज्यमानः स एव

---

१. अयमेव पाठः प्राक्तनः न तु अस्मदादयः । नारदो नाम कश्चिदन्यः गन्धर्वः अर्जुनजन्मकाले तस्य वर्णन महाभारते आयात ।

अकृष्टपच्या तस्यासीत् सप्तद्वीपवती मही । तथा कामदुघा द्यौस्तु नानाश्चर्यपदं नभः ॥१६॥
रत्नाकराश्च रत्नौघांस्तत्पत्न्यश्चोहुरूर्मिभिः । क्षारसीधुघृतक्षौद्रदधिक्षीरामृतोदकाः ॥१७॥
शैला द्रोणीभिराक्रीडं सर्वर्तुषु गुणान् द्रुमाः । दधार लोकपालानामेक एव पृथग्गुणान् ॥१८॥
स इत्थं निर्जितककुबेकराड् विषयान् प्रियान् । यथोपजोषं भुञ्जानो नातृप्यदजितेन्द्रियः ॥१९॥
एवमैश्वर्यमत्तस्य दृप्तस्योच्छास्त्रवर्तिनः । कालो महान् व्यतीयाय ब्रह्मशापमुपेयुषः ॥२०॥
तस्योग्रदण्डसंविग्नाः सर्वे लोकाः सपालकाः । अन्यत्रालब्धशरणाः शरणं ययुरच्युतम् २१॥
तस्यै नमोऽस्तु काष्ठायै यत्रात्मा हरिरीश्वरः । यद् गत्वा न निवर्तन्ते शान्ताः संन्यासिनोऽमला.२२
इति ते संयतात्मानः समाहितधियोऽमलाः । उपतस्थुर्हृषीकेशं विनिद्रा वायुभोजनाः ॥२३॥
तेषामाविरभूद्वाणी अरूपा मेघनिस्वना । संनादयन्ती ककुभः साधूनामभयङ्करी ॥२४॥
मा भैष्ट विबुधश्रेष्ठाः सर्वेषां भद्रमस्तु वः । मद्दर्शनं हि भूतानां सर्वश्रेयोपपत्तये ॥२५॥
ज्ञातमेतस्य दौरात्म्यं दैतेयापसदस्य च । तस्य शान्तिं करिष्यामि कालं तावत् प्रतीक्षत ॥२६
यदा देवेषु वेदेषु गोषु विप्रेषु साधुषु । धर्मे मयि च विद्वेषः स वा आशु विनश्यति ॥२७॥
निर्वैराय प्रशान्ताय स्वसुताय महात्मने । प्रह्लादाय यदा द्रुह्येद्धनिष्येऽपि वरोर्जितम् ॥२८॥

नारद उवाच

इत्युक्ता लोकगुरुणा तं प्रणम्य दिवौकसः । न्यवर्तन्त गतोद्वेगा मेनिरे चासुरं हतम् ॥२९॥
तस्य दैत्यपतेः पुत्राश्चत्वारः परमाद्भुताः । प्रह्लादोऽभून्महांस्तेषां गुणैर्महदुपासकः ॥३०॥
ब्रह्मण्यः शीलसम्पन्नः सत्यसंधो जितेन्द्रियः । आत्मवत् सर्वभूतानामेकः प्रियसुहृत्तमः ॥३१॥

तेजसा बलात्कारेण ॥ १५ ॥ अकृष्टपच्या । अकृष्टेन कर्षणं विनैव पच्या पक्वधान्योपेता । द्यौः स्वर्गदेवता । नभोऽन्तरिक्षदेवता । प्रदम् अद्भुतवस्तु[1]प्रदमासीत् ॥१६॥ रत्नाकराः समुद्राः तत्पत्न्यः नद्यश्च तरङ्गैः रत्नसमूहान् ऊहुः प्रापयामासुः । क्षारादिमयानि उदकानि येषां ते । सीधुः सुरा । क्षौद्रं मधु । अमृतं शुद्धम् ॥१७॥ द्रोणीभिः[2] कन्दरैः । आक्रीडं क्रीडास्थानम् ऊहुः । गुणान् पुष्पफलादीन् । गुणान् वर्षणादीन् दधार चकार॥१८॥निर्जिताः ककुभः दिग्देवता येन सः । यथोपजोषं यथासुखम् भुञ्जानोऽपि॥१९॥ उच्छास्त्रवर्तिनः शास्त्रमुल्लङ्घ्य वर्तमानस्य शापम् उपेयुषः प्राप्तवतः तस्य । व्यतीयाय व्यतीतः । महान् मन्वन्तरात्मकः एकसप्ततियुगानि किञ्चिदधिकानीति ज्ञेयम् ॥२०॥ हरेरन्यत्र न लब्धं शरणं रक्षको यैस्ते । यद्वा । अन्यत्र अन्यः प्रथमार्थे त्रल् ॥२१॥ यत्र यस्यां हरिः आस्ते किञ्च संन्यासिनः यत् यां गत्वा प्राप्य न निवर्तन्ते तस्यै काष्ठायै दिशे नमः ॥ २२ ॥ समाहिता एकाग्रा धीर्येषां ते ॥२३॥ अरूपा अशरीरिणी आकाशवाणी । ककुभः दिशः नादयन्ती ॥२४॥ सर्वेषां प्राणिनां श्रेयोपपत्तये चतुर्वर्गप्राप्तये भवति ॥२५॥ दौरात्म्यं दौर्जन्यम् । अपसदस्य अधमस्य ॥ २६।२७ ॥ वरैः ऊर्जितं समृद्धमपि ॥२८॥ गतोद्वेगा निर्भयाः सन्तः ॥ २९ ॥ गुणैः महान् । यतो महतामुपासकः ॥ ३० ॥ आत्मवत् आत्मदृष्टिः ॥ ३१ ॥

---

१. अयमेव पाठः न तु पदमिति ।

२. द्रोणी पर्वतकन्दरे इति धरणिः ।

दासवत्संनतार्याङ्घ्रिः पितृवद् दीनवत्सलः । भ्रातृवद् सदृशे स्निग्धो गुरुष्वीश्वरभावनः ।
विद्यार्थरूपजन्माढ्यो मानस्तम्भविवर्जितः ।। ३२ ।।

नोद्विग्नचित्तो व्यसनेषु निःस्पृहः श्रुतेषु दृष्टेषु गुणेष्ववस्तुदृक् ।
दान्तेन्द्रियप्राणशरीरधीः सदा प्रशान्तकामो रहितासुरोऽसुरः ।।३३।।

यस्मन् महद्गुणा राजन् गृह्यन्ते कविभिर्मुहुः । न तेऽधुनापिधीयन्ते यथा भगवतीश्वरे ।।३४।।
यं साधुगाथासदसि रिपवोऽपि सुरा नृप । प्रतिमानं प्रकुर्वन्ति किमुतान्ये भवादृशाः ।।३५।।
गुणैरलमसंख्येयैर्माहात्म्यं तस्य सूच्यते । वासुदेवे भगवति यस्य नैसर्गिकी रतिः ।।३६।।
न्यस्तक्रीडनको बालो जडवत् तन्मनस्तया । कृष्णग्रहगृहीतात्मा न वेद जगदीदृशम् ।।३७।।
आसीनः पर्यटन्नश्नन् शयानः प्रपिबन् ब्रुवन् । नानुसंधत्त एतानि गोविन्दपरिरम्भितः ।।३८।।
क्वचिद् रुदति वैकुण्ठचिन्ताशबलचेतनः क्वचिद्धसति तच्चिन्ताह्लाद उद्गायति क्वचित् ।३९।
नदति क्वचिदुत्कण्ठो विलज्जो नृत्यति क्वचित् । क्वचित् तद्भावनायुक्तस्तन्मयोऽनुचकार ह।४०
क्वचिदुत्पुलकस्तूष्णीमास्ते संस्पर्शनिर्वृतः । अस्पन्दप्रणयानन्दसलिलामीलितेक्षणः ।।४१।।

स उत्तमश्लोकपदारविन्दयोर्निषेवयाकिंचनसङ्गलब्धया ।
तन्वन् परां निर्वृतिमात्मनो मुहुर्दुःसङ्गदीनान्यमनःशमं व्यधात् ।।४२।।

तस्मिन् महाभागवते महाभागे महात्मनि । हिरण्यकशिपू राजन्नकरोदघमात्मजे ।।४३।।

युधिष्ठिर उवाच

देवर्ष एतदिच्छामो वेदितुं तव सुव्रत । यदात्मजाय शुद्धाय पिताऽदात् साधवे ह्यघम् ।।४४।।
पुत्रान् विप्रतिकूलान् स्वान् पितरः पुत्रवत्सलाः । उपालभन्ते शिक्षार्थं नैवाघमपरो यथा ४५।।

दासेति स्पष्टम् ॥ ३२ ॥ व्यसनेषु दुःखेषु । गुणेषु विषयेषु निःस्पृहः । यतः तेषु अवस्तुदृक् मिथ्यात्वबुद्धिः । श्रुतं स्वर्गादि दृष्टमैहिकं राज्यादि । दान्ता भगवन्निष्ठा इन्द्रियादयो यस्येति अतो जितेन्द्रियपदेन पूर्वोक्तेन न पौनरुक्त्यम् । रहित आसुरभावो मात्सर्यादिः यस्य सः ॥ ३३ ॥ यस्मिन् वर्तमाना गुणाः नापिधीयन्ते तिरोहिताः न भवन्ति ॥ ३४ ॥ साधुगाथासदसि भक्तगुणगाथाप्रसङ्गे यं प्रह्लादं प्रतिमानं दृष्टान्तं कुर्वन्ति रिपवोऽपि ॥ ३५ ॥ गुणैरलं पर्याप्तमेव न सर्वे गुणा वर्णयितुं शक्याः । सुष्ठु उच्यते वा । नैसर्गिकी स्वाभाविकी जन्मसिद्धेत्यर्थः ॥३६॥ न्यस्तेति त्यक्तक्रीडासाधनः । जडवत्प्रतीयमानोऽपि वस्तुतोऽजडवत् । ईदृशं व्यवहारमयं न वेद किन्तु भगवन्मयमेव ॥३७॥ एतानि आसनमार्गादीनि नानुसन्धत्ते न बुबुधे इत्यर्थ । लिडर्थे लट् । यतः परिरम्भितः आलिङ्गितः ॥३८॥ शबलचेतनः व्याकुलबुद्धिः ॥ ३९ ॥ उत्कण्ठः मुक्तकण्ठः । अनुचकार लीला अनुकृतवान् ॥ ४० ॥ उत्पुलकः जातरोमाञ्चः निर्वृत आनन्दितः । अस्पन्दप्रणयेन अचलप्रेम्णा यत् आनन्दाश्रु तेन ईषन्निमीलिते ईक्षणे यस्य सः ॥ ४१ ॥ पदारविन्दयोः निषेवया आत्मनः निर्वृतिं परमानन्दं वितन्वन् । दुःसङ्गेन दीनानामन्येषां दैत्यबालकानामपि मनः शान्तं भगवन्निष्ठं व्यधात् अकरोत् । अकिञ्चनसङ्गेन भक्तानां कृपया ॥ ४२ ॥ आत्मजे अघं द्रोहम् ॥ ४३ ॥ हे सुव्रत ! परोपकारनिरत ! यत् यस्मात् अघमदात् द्रोहमकरोत् ॥४४॥ पुत्रानिति सार्द्धम् । विशेषेण प्रतिकूलान् उपालभन्ते भर्त्सयन्ति

किमुतानुवशान् साधूंस्तादृशान् गुरुदेवतान् । एतत् कौतूहलं ब्रह्मन्नस्माकं विधम प्रभो ।
पितुः पुत्राय यद् द्वेषो मरणाय प्रयोजितः ॥ ४६ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां सप्तमस्कन्धे प्रह्लादचरिते चतुर्थोऽध्यायः ॥४॥

अथ पञ्चमोऽध्यायः

नारद उवाच

पौरोहित्याय भगवान् वृतः काव्यः किलासुरैः । शण्डामर्कौ सुतौ तस्य दैत्यराजगृहान्तिके ।१।
तौ राज्ञा प्रापितं बालं प्रह्लादं नयकोविदम् । पाठयामासतुः पाठ्यानन्यांश्चासुरबालकान् ।२।
यत्तत्र गुरुणा प्रोक्तं शुश्रुवेऽनु पपाठ च । न साधु मनसा मेने स्वपरासद्ग्रहाश्रयम् ॥३॥
एकदाऽसुरराट् पुत्रमङ्कमारोप्य पाण्डव । पप्रच्छ कथ्यतां वत्स मन्यते साधु यद् भवान् ॥४॥

प्रह्लाद उवाच

तत् साधु मन्येऽसुरवर्य देहिनां सदा समुद्विग्नधियामसद्ग्रहात् ।
हित्वाऽऽत्मपातं गृहमन्धकूपं वनं गतो यद्धरिमाश्रयेत ॥ ५ ॥

नारद उवाच

श्रुत्वा पुत्रगिरो दैत्यः परपक्षसमाहिताः । जहास बुद्धिर्बालानां भिद्यते परबुद्धिभिः ॥६॥
सम्यग् विधार्यतां बालो गुरुगेहे द्विजातिभिः । विष्णुपक्षैः प्रतिच्छन्नैर्न भिद्येतास्य धीर्यथा ॥७॥

नैव अघं द्रोहम् कुर्वन्ति । यथा अपरः शत्रुः । अनुवशान् अनुकूलान् न कुर्वन्तीति किमुत वक्तव्यम् ॥४५॥
कौतूहलं संदेहं विधम दूरीकुरु । पुत्राय पुत्रं हन्तु यो द्वेषः स पितुः मरणाय प्रवर्तितः ॥ ४६ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे गूढार्थदीपिन्यां चतुर्थोऽध्यायः ।

पञ्चमे साधु किं वत्स तेनोक्तं शरणं हरिः ।
कोपात्समुद्यतो हन्तुं नाशक्नोत्तं गजादिभिः ॥

काव्यः शुक्राचार्यः वृतः स्वीकृतः । शण्डो[1] मर्क इति वेदे श्रवणात् । गृहस्य अन्तिके अवसतामिति शेषः ॥१॥ तौ प्रह्लादम् अन्यांश्च पाठयामासतुः । पाठ्यान् नीतिशास्त्रादीन् [2]नयकोविदं नीतिनिपुणं विधातुमिति शेषः ॥२॥ तत्र गुरुकुले । यत् प्रोक्तं तत् साधु उत्तमं न मेने यतः स्वःपरः इति रागद्वेषरूपो योऽसद्ग्रहः मिथ्याभिनिवेशस्तम् आश्रयते तथा ॥३॥ पठितेषु यत् साधु सर्वोत्तमं मन्यते तत् कथ्यताम् ॥४॥ देहिनां तत् साधु मन्ये । किं तत् । आत्मनः पतनहेतुं गृहं हित्वा वनं गतः सन् हरिमाश्रयेदिति यत् । कथंभूतानाम् । असद्ग्रहात् देहाभिनिवेशात् हेतोः विचलितबुद्धीनाम् ॥ ५ ॥ परपक्षेण शत्रुपक्षेण समाहिताः सम्बन्धिताः । भिद्यतेऽन्यथाक्रियते ॥६॥ विधार्यतां रक्ष्यताम् । प्रतिच्छन्नैः असुरवेषाच्छन्नैः ॥७॥

१. आर्षत्वात् दीर्घः । २. क्रियाविशेषणं वा ।

गृहमानीतमाहूय प्रह्लादं दैत्ययाजकाः । प्रशस्य श्लक्ष्णया वाचा समपृच्छन्त सामभिः ॥८॥

वत्स प्रह्लाद भद्रं ते सत्यं कथय मा मृषा । बालानति कुतस्तुभ्यमेष बुद्धिविपर्ययः ॥९॥

बुद्धिभेदः परकृत उताहो ते स्वतोऽभवत् । भण्यतां श्रोतुकामानां गुरूणां कुलनन्दन ॥१०॥

प्रह्लाद उवाच

स्वः परश्चेत्यसद्ग्राहः पुंसां यन्मायया कृतः । विमोहितधियां दृष्टस्तस्मै भगवते नमः ॥११॥

स यदानुव्रतः पुंसां पशुबुद्धिर्विभिद्यते । अन्य एष तथान्योऽहमिति भेदगताऽसती ॥१२॥

स एष आत्मा स्वपरेत्यबुद्धिभिर्दुरत्ययानुक्रमणो निरूप्यते ।

मुह्यन्ति यद्वर्त्मनि वेदवादिनो ब्रह्मादयो ह्येष भिनत्ति मे मतिम् ॥१३॥

यथा भ्राम्यत्ययो ब्रह्मन् स्वयमाकर्षसंनिधौ । तथा मे भिद्यते चेतश्चक्रपाणेर्यदृच्छया ॥१४॥

नारद उवाच

एतावद् ब्राह्मणायोक्त्वा विरराम महामतिः । तं निर्भर्त्स्याह कुपितः स दीनो राजसेवकः॥१५

आनीयतामरे वेत्रमस्माकमयशस्करः । कुलाङ्गारस्य दुर्बुद्धेश्चतुर्थोऽस्योदितो दमः ॥१६॥

दैतेयचन्दनवने जातोऽयं कण्टकद्रुमः । यन्मूलोन्मूलपरशोर्विष्णोर्नालायितोऽर्भकः ॥१७॥

इति तं विविधोपायैर्भीषयंस्तर्जनादिभिः । प्रह्लादं ग्राहयामास त्रिवर्गस्योपपादनम् ॥१८॥

तत एनं गुरुर्ज्ञात्वा ज्ञातज्ञेयचतुष्टयम् । दैत्येन्द्रं दर्शयामास मातृमृष्टमलंकृतम् ॥१९॥

पादयोः पतितं बालं प्रतिनन्द्याशिषाऽसुरः । परिष्वज्य चिरं दोर्भ्यां परमामाप निर्वृतिम् ॥२०॥

आरोप्याऽङ्कमवघ्राय मूर्धन्यश्रुकलाम्बुभिः । आसिञ्चन् विकसद्वक्त्रमिदमाह युधिष्ठिर ॥२१॥

हिरण्यकशिपुरुवाच

प्रह्लादानूच्यतां तात स्वधीतं किंचिदुत्तमम् । कालेनैतावताऽऽयुष्मन् यदशिक्षद् गुरोर्भवान् २२

आनीतं प्रापितं तं श्लक्ष्णया मधुरया वाचा प्रशस्य सामभिः प्रियवचनैः सम्यक् पृष्टवन्तः ॥ ८ ॥ बालान् अतिक्रम्य तुभ्यं तव ॥ ९ ॥ उताहो आहोस्वित् ॥ १० ॥ असद्ग्राहः मिथ्याभिनिवेशः यन्मायया विमोहितधियां भवतामेव कृतः न तु मम तस्मै नम इत्यन्वयः ॥११॥ स एव भगवान् यदा अनुव्रतोऽनुकूलो भवति तदा पुंसां पशुबुद्धिः विभिद्यते निवर्तते इत्यन्वयः । इति भेदविषया असती मिथ्याभूता ॥ १२ ॥ स एष परमात्मैव स्वः पर इति कृत्वा अबुद्धिभिर्निरूप्यते । यतो यस्य वर्त्मनि ब्रह्मादयोऽपि मुह्यन्ति स एध भगवानेव मे मतिं भिनत्ति भवन्मतात् पृथक् करोतीत्यन्वयः । दुरत्ययं दुर्गमम् अनुक्रमणमनुचरितं वर्णनं च यस्य सः ॥१३॥ अयो लोहम् यथा अयस्कान्तसमीपे सक्रियं भवति ॥१४॥ निर्भर्त्स्याहेति पाठः॥१५॥दमः दण्डः । उदितः कथितः॥१६॥यस्य दैतेय चन्दन वनस्य मूलोन्मूलने परशुस्थानीयस्य विष्णोरयं नालवत् आचरितः दण्डस्थानीयो जातः ॥१७॥त्रिवर्गस्य उपपादनं प्रतिपादकं शास्त्रं पाठयामास ॥१८॥ ततः किञ्चित्कालानन्तरम् । ज्ञातं ज्ञेयं ज्ञातुं योग्यं सामाद्युपायचतुष्टयं येन तम् । मृष्टं स्नापितम् ॥१९॥ चिरं जीवेति आशिषा प्रतिनन्द्य संवर्द्धय निर्वृतिं परमानन्दम् प्राप्तवान् ॥२०॥ अश्रुकलाः प्रेमाश्रुबिन्दवः तासां जलैः । वक्त्रः इति प्रथमान्तं दैत्यविशेषणम्॥२१॥यत् अशिक्षित् तत्रापि यत् स्वधीतं तद्

प्रह्लाद उवाच

श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम् । अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् ॥२३॥

इति पुंसार्पिता विष्णौ भक्तिश्चेन्नवलक्षणा । क्रियते भगवत्यद्धा तन्मन्येऽधीतमुत्तमम् ॥२४॥

निशम्यैतत् सुतवचो हिरण्यकशिपुस्तदा । गुरुपुत्रमुवाचेदं रुषा प्रस्फुरिताधरः ॥२५॥

ब्रह्मबन्धो किमेतत् ते विपक्षं श्रयताऽसता । असारं ग्राहितो बालो मामनादृत्य दुर्मते ॥२६॥

सन्ति ह्यसाधवो लोके दुर्मैत्राश्छद्मवेषिणः । तेषामुदेत्यघं काले रोगः पातकिनामिव ॥२७॥

गुरुपुत्र उवाच

न मत्प्रणीतं न परप्रणीतं सुतो वदत्येष तवेन्द्रशत्रो ।

नैसर्गिकीयं मतिरस्य राजन् नियच्छ मन्युं कददाः स्म मा नः ॥२८॥

नारद उवाच

गुरुणैवं प्रतिप्रोक्तो भूय आहासुरः सुतम् । न चेद् गुरुमुखीयं ते कुतोऽभद्राऽसती मतिः ॥२९॥

प्रह्लाद उवाच

मतिर्न कृष्णे परतः स्वतो वा मिथोऽभिपद्येत गृहव्रतानाम् ।

अदान्तगोभिर्विशतां तमिस्रं पुनः पुनश्चर्वितचर्वणानाम् ॥३०॥

न ते विदुः स्वार्थगतिं हि विष्णुं दुराशया ये बहिरर्थमानिनः ।

अन्धा यथान्धैरुपनीयमाना वाचीशतन्त्यामुरुदाम्नि बद्धाः ॥३१॥

नैषां मतिस्तावदुरुक्रमाङ्घ्रिं स्पृशत्यनर्थापगमो यदर्थः ।

महीयसां पादरजोऽभिषेकं निष्किंचनानां न वृणीत यावत् ॥३२॥

इत्युक्त्वोपरतं पुत्रं हिरण्यकशिपू रुषा । अन्धीकृतात्मा स्वोत्सङ्गान्निरस्यत महीतले ॥३३॥

यच्च उत्तमं सुष्ठु अभ्यस्तीकृतं तत् ॥ २२ ॥ श्रवणमिति युग्मम् अद्धा साक्षात् ॥२३।२४॥ प्रस्फुरितः अधरः ओष्ठो यस्य सः ॥ २५ ॥ विपक्षं शत्रुपक्षं आश्रयता त्वया ॥ २६ ॥ दुष्टं कपटपूर्णं मैत्रं मित्रत्वं येषां ते । अघं दुर्मित्रत्वम् ॥ २७ ॥ मत्प्रणीतं मया पाठितम् । नैसर्गिकी स्वाभाविकी । नोऽस्मभ्यं कत् कुत्सितं दोषं मा अदाः न देहि ॥२८॥ हे अभद्र ! प्रतिप्रोक्तः दत्तोत्तरः । असती मतिः कुतः आयाता । स्मेत्याश्चर्ये ॥२९॥ गृहव्रतानां गृहासक्तानां भवादृशानां कृष्णे मतिः कस्माच्चिदपि न संपद्येत ते शोच्या एव । कथंभूतानाम् । अदान्तैः अवशीकृतैः गोभिः इन्द्रियैः तमिस्रं संसारं विशताम् । पुनश्च चर्वितस्यैव चर्वणं भुक्तस्यैव भोगो येषां तेषां पशुतुल्यानाम् ॥३०॥ ये दुराशयाः ते विष्णुं न विदुः यतः बहिरर्थाः बाह्यविषयास्तानेव मन्तुं स्वीकर्तुं शीलं येषां ते । स्वार्थस्य चतुर्विधपुरुषार्थस्य गतिं प्रापकम् । यथा अन्धाः पतन्ति तथा ईशतन्त्यां रज्ज्वां वेदलक्षणायां वाचि बद्धास्तेऽपि पतन्ति । उरूणि बहूनि दामानि ब्राह्मणादिनामानि यस्याम् ॥३१॥ एषां मतिम् उरुक्रमस्य भगवतोऽङ्घ्रिं न स्पृशति यावत् महीयसां पादरजोऽभिषेकं न वृणीत नाश्रयेत् । यस्याः मतेरर्थः प्रयोजनं अनर्थस्य दुःखपरम्पराया नाशकः ॥३२॥ निरस्यत चिक्षेप ।

आहामर्षरुषाविष्टः कषायीभूतलोचनः । वध्यतामाश्वयं वध्यो निःसारयत नैर्ऋताः ॥३४॥
अयं मे भ्रातृहा सोऽयं हित्वा स्वान् सुहृदोऽधमः। पितृव्यहन्तुर्यः पादौ विष्णोर्दासवदर्चति३५
विष्णोर्वा साध्वसौ किं नु करिष्यत्यसमञ्जसः । सौहृदं दुस्त्यजं पित्रोरहाद्यः पञ्चहायनः॥३६॥

परोऽप्यपत्यं हितकृद् यथौषधं स्वदेहजोऽप्यामयवत् सुतोऽहितः ।
छिन्द्यात् तदङ्गं यदुतात्मनोऽहितं शेषं सुखं जीवति यद्विवर्जनात्॥३७॥

सर्वैरुपायैर्हन्तव्यः सम्भोजशयनासनैः । सुहृल्लिङ्गधरः शत्रुर्मुनेर्दुष्टमिवेन्द्रियम् ॥३८॥
नैर्ऋतास्ते समादिष्टा भर्त्रा वै शूलपाणयः । तिग्मदंष्ट्रकरालास्यास्ताम्रश्मश्रुशिरोरुहाः॥३९॥
नदन्तो भैरवान् नादांश्छिन्धि भिन्धीति वादिनः ।आसीनं चाहनन् शूलैः प्रह्लादं सर्वमर्मसु॥४०॥
परे ब्रह्मण्यनिर्देश्ये भगवत्यखिलात्मनि । युक्तात्मन्यफला आसन्नपुण्यस्येव सत्क्रियाः ॥४१॥
प्रयासेऽपहते तस्मिन् दैत्येन्द्रः परिशङ्कितः चकार तद्वधोपायान् निर्बन्धेन युधिष्ठिर ॥४२॥
दिग्गजैर्दन्दशूकैश्च अभिचारावपातनैः । मायाभिः संनिरोधैश्च गरदानैरभोजनैः ॥४३॥
हिमवाय्वग्निसलिलैः पर्वताक्रमणैरपि । न शशाक यदा हन्तुमपापमसुरः सुतम् ।
चिन्तां दीर्घतमां प्राप्तस्तत् कर्तुं नाभ्यपद्यत ॥४४॥
एष मे बह्वसाधूक्तो वधोपायाश्च निर्मिताः । तैस्तैर्द्रोहैरसद्धर्मैर्मुक्तः स्वेनैव तेजसा ॥४५॥
वर्तमानोऽविदूरे वै बालोऽप्यजडधीरयम् । न विस्मरति मेऽनार्यं शुनःशेप इव प्रभुः ॥४६॥

हे नैर्ऋताः[1]। राक्षसाः । अमर्षरुषा असह्यक्रोधेन व्याप्तः । कषायीभूते अत्यरुणे लोचने यस्य सः । बहिर्निष्कासयत ॥३४॥ यो मे भ्रातृहा विष्णुः सोऽयमेव । यः स्वान् हित्वा विष्णोः पादौ दासवद् अर्चतीत्यन्वयः । अतोऽधमः ॥ ३५ ॥ असौ असमञ्जसः कृतघ्नः विष्णोरपि किं नु साधु उपकारं करिष्यति न किञ्चित् । यः सौहृदम् अहात् त्यक्तवान् ॥३६॥ परः शत्रुरपि हितकृत् चेत् अपत्यं पुत्र एव । सुतोऽपि अहितश्चेत् आमयवत् त्याज्य एव किं बहुना उत अपि आत्मनः अङ्गमपि यत् अहितं सर्पादिदष्टं चेत् तत् छिन्द्यादेव । शेषमङ्गम् ॥ ३७ ॥ यथा दुष्टं दूषितम् इन्द्रियं मनः मुनेः शत्रुः तथाऽयमपि अतो हन्तव्य इति । संभोगो विषाक्तभोजनम् । शयनादौ शिरश्छेदादिभिः ॥ ३८ ॥ नैर्ऋता इति युग्मम् । तिग्मा दंष्ट्रा येषां करालानि आस्यानि येषां ते च ते च । ताम्राणि श्मश्रूणि शिरोरुहाःकेशाश्च येषां ते ॥३९।४०॥ भगवति युक्तः संल्लग्न आत्मा देहो यस्य तस्मिन् प्रह्लादे प्रहारा अफला निष्फला आसन् ॥ ४१ ॥ निर्बन्धेन हठेन ॥ ४२ ॥ दिग्गजैरिति सार्द्धद्वयम् । अभिचारः कृत्याप्रयोगः अवपातनैः अधः पातनैः । हिमादीनां मध्ये निःक्षेपैः । यदा हन्तुं न शशाक तत् हननं कर्तुम् उपायान्तरञ्च नाभ्यगच्छत् तदा चिन्तां प्राप्तः इत्यन्वयः ॥४३।४४॥ असाधु कटुवचनं यथा स्यात्तथा । तेजसा प्रभावेण ॥ ४५ ॥ अजडधीः निर्भयचित्तः । अनार्यं दौर्जन्यम् । शुनःशेपो नाम अजीगर्तस्य मध्यमपुत्रः तेन विक्रीतोऽपि स्वपितुरपकारं यथा न स्मरति तद्वत् । शेपः पुच्छं स्वकुटिलतां यथा ॥ ४६ ॥

---

१. निर्गता ऋता कृपा येभ्यस्तादृशाः । 'ऋतिर्गतौ घृणायां च' इति रभसः ।

अप्रमेयानुभावोऽयमकुतश्चिद्भयोऽमरः। नूनमेतद्विरोधेन मृत्युर्मे भविता न वा ॥४७॥
इति तं चिन्तया किंचिन्म्लानश्रियमधोमुखम्। शण्डामर्कावौशनसौ विविक्त इति होचतुः ॥४८॥

जितं त्वयैकेन जगत्त्रयं भ्रुवोर्विजृम्भणत्रस्तसमस्तधिष्ण्यपम्।
न तस्य चिन्त्यं तव नाथ चक्ष्महे न वै शिशूनां गुणदोषयोः पदम् ॥४९॥
इमं तु पाशैर्वरुणस्य बद्ध्वा निधेहि भीतो न पलायते यथा।
बुद्धिश्च पुंसो वयसाऽऽर्यसेवया यावद् गुरुर्भार्गव आगमिष्यति ॥५०॥

तथेति गुरुपुत्रोक्तमनुज्ञायेदमब्रवीत्। धर्मो ह्यस्योपदेष्टव्यो राज्ञां यो गृहमेधिनाम् ॥५१॥
धर्ममर्थं च कामं च नितरां चानुपूर्वशः। प्रह्लादायोचतू राजन् प्रश्रितावनताय च ॥५२॥
यथा त्रिवर्गं गुरुभिरात्मने उपशिक्षितम्। न साधु मेने तच्छिक्षां द्वन्द्वारामोपवर्णिताम् ॥५३॥
यदाऽऽचार्यः परावृत्तो गृहमेधीयकर्मसु। वयस्यैर्बालकैस्तत्र सोपहूतः कृतक्षणैः ॥५४॥
अथ तान् श्लक्ष्णया वाचा प्रत्याहूय महाबुधः। उवाच विद्वांस्तन्निष्ठां कृपया प्रहसन्निव ॥५५॥
ते तु तद्गौरवात् सर्वे त्यक्तक्रीडापरिच्छदाः। बाला नदूषितधियो द्वन्द्वारामेरितेहितैः ॥५६॥
पर्युपासत राजेन्द्र तन्न्यस्तहृदयेक्षणाः। तानाह करुणो मैत्रो महाभागवतोऽसुरः ॥५७॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां सप्तमस्कन्धे प्रह्लादचरिते

पञ्चमोऽध्यायः ॥ ५ ॥

वा अन्यथा तु न भविता। अप्रमेयोऽसाधारणः प्रभावो यस्य सः अमरो मरणरहितः॥४७॥औशनसौ शुक्राचार्यपुत्रौ। विविक्ते एकान्ते॥४८॥ त्वया एकेन असहायेनैव जगत्त्रयं जितं तस्य तव चिन्त्यं चिन्तास्पदं न पश्यामः। न वै न च शिशूनामाचरितं गुणदोषयोः पदं विषयो निमित्तं वा भवति। भ्रुवोश्चालनमात्रेण त्रस्ताः समस्ता लोकपाला यस्मिन् तत् ॥ ४९ ॥ यावत् भार्गवः श्रीशुक्रः आगच्छेत तावत् इमं पाशैः नागपाशैर्बद्ध्वा तथा निधेहि स्थापय यथा भीतः सन् न पलायेत। बुद्धिश्च वयसा बाल्यातिक्रमेण सेवया आचार्योपदेशेन वा सुस्थिरा भवति ॥५०॥तथेति एवंविधम् अनुज्ञाय स्वीकृत्य। गृहमेधिनां राज्ञां ये धर्माः ते ॥ ५१ ॥ नितरां निरन्तरम्। अनुपूर्वशः क्रमेण ॥ ५२ ॥ आत्मने स्वस्मै। न मेने यतः द्वन्द्वारामैः रागद्वेषाक्रान्तैः गुरुभिः उपवर्णिताम्। तथाविधेभ्यः शिष्येभ्य एव उचिताम् ॥५३॥ यदा परावृत्तः गृहं गतः तत्रत्यकर्मसु प्रवृत्तः तदा बालकैरुपहूतः स प्रह्लादः तान् प्रत्याहूय सम्बोध्य प्रहसन्निव तन्निष्ठामुवाचेति द्वयोरन्वयः। तस्मिन् विष्णौ निष्ठां मनोयोगम्। कृतक्षणैः लब्धावसरैः। विद्वान् विवेकी॥५४।५५॥ ते इति युग्मम्। ते सर्वे बालाः तं पर्युपासत परितः उपविविशुः। कथंभूताः। तस्मिन् प्रह्लादे न्यस्तं संलग्नं हृदयम् ईक्षणं दृष्टिश्च यैस्ते। परिच्छदाः सामग्र्यः। द्वन्द्वारामौ रागद्वेषाक्रान्तौ शण्डामर्कौ तयोः ईरितैः उपदेशैः ईहितैः चेष्टितैश्च न दूषिता धीर्येषां ते। नञर्थेन न शब्देन समासः। मैत्रः हितैषी॥५७॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे गूढार्थदीपिन्यां पञ्चमोऽध्यायः।

अथ षष्ठोऽध्यायः

प्रह्लाद उवाच

कौमार आचरेत् प्राज्ञो धर्मान् भागवतानिह । दुर्लभं मानुषं जन्म तदप्यध्रुवमर्थदम् ॥ १ ॥

यथा हि पुरुषस्येह विष्णोः पादोपसर्पणम् । यदेष सर्वभूतानां प्रिय आत्मेश्वरः सुहृत् ॥ २ ॥

सुखमैन्द्रियकं दैत्या देहयोगेन देहिनाम् । सर्वत्र लभ्यते दैवाद् यथा दुःखमयत्नतः ॥ ३ ॥

तत्प्रयासो न कर्तव्यो यत आयुर्व्ययः परम् । न तथा विन्दते क्षेमं मुकुन्दचरणाम्बुजम् ॥ ४॥

ततो यतेत कुशलः क्षेमाय भयमाश्रितः । शरीरं पौरुषं यावन्न विपद्येत पुष्कलम् ॥ ५ ॥

पुंसो वर्षशतं ह्यायुस्तदर्धं चाजितात्मनः । निष्फलं यदसौ रात्र्यां शेतेऽन्धं प्रापितस्तमः ॥६॥

मुग्धस्य बाल्ये कौमारे क्रीडतो याति विंशतिः । जरया ग्रस्तदेहस्य यात्यकल्पस्य विंशतिः ॥७॥

दुरापूरेण कामेन मोहेन च बलीयसा । शेषं गृहेषु सक्तस्य प्रमत्तस्यापयाति हि ॥ ८ ॥

को गृहेषु पुमान् सक्तमात्मानमजितेन्द्रियः । स्नेहपाशैर्दृढैर्बद्धमुत्सहेत विमोचितुम् ॥ ९ ॥

कोन्वर्थतृष्णां विसृजेत् प्राणेभ्योऽपि य ईप्सितः । यं क्रीणात्यसुभिः प्रेष्ठैस्तस्करः सेवको वणिक्

कथं प्रियाया अनुकम्पितायाः सङ्गं रहस्यं रुचिरांश्च मन्त्रान् ।
सुहृत्सु च स्नेहसितः शिशूनां कलाक्षराणामनुरक्तचित्तः ॥ ११॥
पुत्रान् स्मरंस्ता दुहितॄर्हृदय्या भ्रातॄन् स्वसॄर्वा पितरौ च दीनौ ।
गृहान् मनोज्ञोरुपरिच्छदांश्च वृत्तीश्च कुल्याः पशुभृत्यवर्गान् ॥१२॥

षष्ठे गुरौ गृहं याते प्रह्लादो दैत्यबालकान् ।
भक्तिज्ञानयुतं धर्मं नारदोक्तमनूक्तवान् ॥१॥

अर्थदं मोक्षप्रदमपि मानुषं जन्म दुर्लभम् अध्रुवमनित्यं च तत् तस्मात् कौमारे[1] एव धर्मानाचरेदित्यन्वयः ॥ १ ॥ यथा येन प्रकारेण विष्णोः पादयोरुपसर्पणं प्राप्तिर्भवेत् तथा आचरेदित्यनुषङ्गः । यत् यस्मात् एष विष्णुः आत्मा ॥२॥ यथा अयत्नतः दुःखं लभ्यते तथा सर्वयोनिषु सुखमपि ॥३॥ तत् तदर्थः । यतः प्रयासात् । तथा तेन तादृशसुखप्रयासेन निरतिशयसुखरूपं चरणाम्बुजं न प्राप्नोति ॥४॥ भयमाश्रितः संसारं प्राप्तो जनः क्षेमाय मोक्षाय यतेत । यावत् पुष्कलं पुष्टं शरीरं न विपद्यते असमर्थं च न भवेत् तावत् ॥५॥ अजितात्मनः अजितेन्द्रियस्य । अन्धं गाढं तमः निद्रारूपम् ॥६॥ मुग्धस्य अबोधस्य विंशतिर्वर्षाणि । अकल्पस्य असमर्थस्य ॥ ७ ॥ दुरापूरेण दुःखेनापि पूरयितुमशक्येन । शेषमायुः अपयाति वृथा याति॥८॥ क उत्सहेत समर्थो भवेत् न कोऽपि ॥ ९ ॥ विसृजेत् त्यजेत् । योऽर्थः प्राणेभ्योऽपि ईप्सितः यमर्थं तस्करादिः असुभिः क्रीणाति तस्मिन्नर्थे तृष्णां को नु विसृजेत् न कोऽपीत्यन्वयः । सेवकः राजसैनिकः युद्धादिना । वणिक् सामुद्रिकयात्रया ॥ १० ॥ कथमिति त्रिकम् । प्रियायाः सङ्गादिकं स्मरन् पुनस्तं कथं त्यजेत् कथं च विरज्येतेति तृतीयेनान्वयः । रहस्यं मैथुनलक्षणम् । मन्त्रान् प्रेमालापान् । सितः बद्धः । शिशूनां सङ्गम् । हृदय्या हृदयङ्गमाः पुत्रीः । मनोज्ञा उरुपरिच्छदा बहुभोगसामग्र्यो येषु तान् ।

---

१. कौमारं पञ्चमाब्दान्तम् इत्युक्तेर्बाल्यादारभ्य ।

त्यजेत कोशस्कृदिवेहमानः कर्माणि लोभादवितृप्तकामः ।
औपस्थ्यजैह्व्यं बहु मन्यमानः कथं विरज्येत दुरन्तमोहः ॥१३॥
कुटुम्बपोषाय वियन्निजायुर्न बुध्यतेऽर्थं विहतं प्रमत्तः ।
सर्वत्र तापत्रयदुःखितात्मा निर्विद्यते न स्वकुटुम्बरामः ॥१४॥
वित्तेषु नित्याभिनिविष्टचेता विद्वांश्च दोषं परवित्तहर्तुः ।
प्रेत्येह चाथाप्यजितेन्द्रियस्तदशान्तकामो हरते कुटुम्बी ॥१५॥
विद्वानपीत्थं दनुजाः कुटुम्बं पुष्णन् स्वलोकाय न कल्पते वै ।
यः स्वीयपारक्यविभिन्नभावस्तमः प्रपद्येत यथा विमूढः ॥१६॥
यतो न कश्चित् क्व च कुत्रचिद् वा दीनः स्वमात्मानमलं समर्थः ।
विमोचितुं कामदृशां विहारक्रीडामृगो यन्निगडो विसर्गः ॥१७॥
ततो विदूरात् परिहृत्य दैत्या दैत्येषु सङ्गं विषयात्मकेषु ।
उपेत नारायणमादिदेवं स मुक्तसङ्गैरिषितोऽपवर्गः ॥१८॥

न ह्यच्युतं प्रीणयतो बह्वायासोऽसुरात्मजाः । आत्मत्वात् सर्वभूतानां सिद्धत्वादिह सर्वतः ॥१९॥
परावरेषु भूतेषु ब्रह्मान्तस्थावरादिषु । भौतिकेषु विकारेषु भूतेष्वथ महत्सु च ॥२०॥
गुणेषु गुणसाम्ये च गुणव्यतिकरे तथा । एक एव परो ह्यात्मा भगवानीश्वरोऽव्ययः ॥२१॥
प्रत्यगात्मस्वरूपेण दृश्यरूपेण च स्वयम् । व्याप्यव्यापकनिर्देश्यो ह्यनिर्देश्योऽविकल्पितः ॥२२॥

कुल्याः कुलपरम्परागता जीविकाः । कर्माणि ईहमानः कुर्वन् कोशकारी कीट इव बद्धः । औपस्थ्यं मैथुनसम्बन्धि जिह्वासम्बन्धि च सुखम् ॥११।१२।१३॥ वियत् क्षीयमाणमायुः विहतं नष्टम् अर्थं पुरुषार्थं च न बुध्यते । स्वकुटुम्ब एव रामः रमणस्थानं यस्य सः कुटुम्बे वा रतिर्यस्य स न निर्विद्यते न विरक्तो भवति ॥१४॥ परवित्तहर्तुः प्रेत्य इह च दोषं विद्वान् जानन्नपि तत्परवित्तं हरते यतो वित्तेष्विति योज्यम् । तत्र हेतुः । अजितेति । तत्रापि हेतुः । अशान्तकामः प्रवृद्धवासनः । इति ॥१५॥ हे दनुजाः ! इत्थं कुटुम्बं पुष्णन् विद्वानपि स्वलोकाय न कल्पते भगवत्प्राप्तये न समर्थो भवति किन्तु यथा विमूढः तथा तमः संसारं प्राप्नुयादित्यन्वयः । यतो विभिन्नो विनाशकरो भावो भावना यस्य सः ॥ १६ ॥ यतः कुटुम्बात् कश्चिदपि स्वमात्मानं विमोचयितुं न समर्थः क्व च काले देशे च । ततो अविदूरात् शीघ्रमेव नारायणमुपेत शरणं यातेत्युत्तरे णान्वयः । अलमत्यन्तं दीनो लम्पटः कामदृशां स्त्रीणां विहारे क्रीडामृगः विनोदप्रदः वानर इव । यासां विसर्गः पुत्रपौत्रादिरूपः निगडः बन्धनम् भवति मुक्तसंगैः परमहंसैः तच्छरणमेव अपवर्गः मोक्षस्वरूपो मतः ॥१७।१८॥ प्रीणयतः प्रसन्नं कुर्वतः । [1]सर्वत्र सिद्धत्वात् वर्तमानत्वात् तत्रापि आत्मत्वात् हृद्येव वर्तमानत्वात् अन्तर्यामित्वाच्च । हे असुरात्मजाः ॥१९॥ परेति चतुष्कम् । परावरेषु उत्कृष्टनिकृष्टेषु भूतेषु चेतनेषु । भौतिकेषु अचेतनेषुं घटादिषु । अथ आकाशादिषु गुणसाम्ये प्रकृतौ व्यतिकरे महत्तत्त्वादौ च किं बहुना सर्वत्रैव एक एव ईश्वरः ईयते प्रतीयते इति चतुर्थेनान्वयः । प्रत्यगात्मा द्रष्टा

1. सार्वविभक्तिकस्तसिः ।

केवलानुभवानन्दस्वरूपः परमेश्वरः । माययान्तर्हितैश्वर्यं ईयते गुणसर्गया ॥२३॥

तस्मात् सर्वेषु भूतेषु दयां कुरुत सौहृदम् । आसुरं भावमुन्मुच्य यथा तुष्यत्यधोक्षजः ॥२४॥

तुष्टे च तत्र किमलभ्यमनन्त आद्ये किं तैर्गुणव्यतिकरादिह ये स्वसिद्धाः ।
धर्मादयः किमगुणेन च काङ्क्षितेन सारंजुषां चरणयोरुपगायतां नः ॥२५॥

धर्मार्थकाम इति योऽभिहितस्त्रिवर्ग ईक्षा त्रयी नयदमौ विविधा च वार्ता ।
मन्ये तदेतदखिलं निगमस्य सत्यं स्वात्मार्पणं स्वसुहृदः परमस्य पुंसः ॥२६॥

ज्ञानं तदेतदमलं दुरवापमाह नारायणो नरसखः किल नारदाय ।
एकान्तिनां भगवतस्त दकिंचनानां पादारविन्दरजसाऽऽप्लुतदेहिनां स्यात् ॥२७॥

श्रुतमेतन्मया पूर्वं ज्ञानं विज्ञानसंयुतम् । धर्मं भागवतं शुद्धं नारदाद् देवदर्शनात् ॥२८॥

दैत्यपुत्रा ऊचुः

प्रह्लाद त्वं वयं चापि नर्तेऽन्यं विद्महे गुरुम् । एताभ्यां गुरुपुत्राभ्यां बालानामपि हीश्वरौ ॥२९॥

बालस्यान्तःपुरस्थस्य महत्सङ्गो दुरन्वयः । छिन्धि नःसंशयं सौम्य स्याच्चेद् विस्रम्भकारणम्

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां सप्तमस्कन्धे प्रह्लादानुचरिते षष्ठोऽध्यायः ॥ ६ ॥

भोक्ता जीवः तत्स्वरूपेण व्यापकतया । दृश्यं भोग्यं देहादि तद्रूपेण व्याप्यतया च निर्देश्यः । सृज्यते इति सर्गः कार्यं गुणः गुणात्मकः संसारः सर्गः कार्यं यस्यास्तया मायया ॥२०।२१।२२।२३॥ आसुरं द्वेषादिकम् ॥ २४ ॥ किमलभ्यं न किमपि । गुणव्यतिकरात् सत्त्वादिगुणपरिणामात् स्वतः सिद्धा ये धर्मादयः पुरुषार्थाः तैः किम् । अगुणेन मोक्षेणापि किम् । केषाम् । चरणयोः सारं भक्तिरसानन्दं जुषतामनुभवताम् तमुपगायतां च नोऽस्माकम् ॥ २५ ॥ धर्मादि वार्तान्तं यदेतत् अखिलं निगमस्य प्रतिपाद्यविषयत्वात् यदि [1]परमे पुंसि भगवति स्वात्मार्पणमात्मनिवेदनसाधनं स्यात् तत् अखिलं सत्यं सफलं मन्ये अन्यथा सर्वं व्यर्थमेवेत्यन्वयः । ईक्षा आत्मविद्या । दमो दण्डः । वार्ता कृष्याद्या ॥ २६ ॥ यदन्यैर्दुरवापं दुष्प्रापं तदेतत् ज्ञानं नारायणो नारदाय आहेत्यन्वयः । तच्च एकान्तिनां भक्तानां स्यादेव । आप्लुतानां स्नातानाम् । देहिनामित्युक्तेः सर्वेषामधिकारः ॥ २७ ॥ ज्ञानं शास्त्रीयम् । विज्ञानमनुभवः । एतत् ज्ञानं नारदात् श्रुतमित्यन्वयः । धर्मं धर्मरूपम् । भगवत्प्राप्तिसाधनं च । देववत् दर्शनं यस्य । देवं दर्शयतीति वा ॥ २८ ॥ हे प्रह्लाद । एताभ्यांमृते विना अन्यं गुरुं न विद्मः । हि यतः एतावेव बालानाम् अस्माकम् ईश्वरौ गुरू ॥ २९ ॥ महता नारदेन सङ्गः दुर्घटः असंभवः । चेत् यदि विश्वासस्य कारणं स्यात्तर्हि संशयं छिन्धि निवारय ॥ ३० ॥

---

१. मूले पुंस इति अधिकरणस्य शेषत्वविवक्षायां षष्ठी ।

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे गूढार्थदीपिन्यां षष्ठोऽध्यायः ।

अथ सप्तमोऽध्यायः

नारद उवाच

एवं दैत्यसुतैः पृष्टो महाभागवतोऽसुरः। उवाच स्मयमानस्तान् स्मरन् मदनुभाषितम् ॥ १॥

प्रह्लाद उवाच

पितरि प्रस्थितेऽस्माकं तपसे मन्दराचलम। युद्धोद्यमं परं चक्रुर्विबुधा दानवान् प्रति ॥ २ ॥

पिपीलिकैरहिरिव दिष्टया लोकोपतापनः। पापेन पापोऽभक्षीति वादिनो वासवादयः ॥ ३ ॥

तेषामतिबलोद्योगं निशम्यासुरयूथपाः। वध्यमानाः सुरैर्भीता दुद्रुवुः सर्वतोदिशम् ॥ ४ ॥

कलत्रपुत्रमित्राप्तान् गृहान् पशुपरिच्छदान्। नावेक्षमाणास्त्वरिताः सर्वे प्राणपरीप्सवः ॥ ५ ॥

व्यलुम्पन् राजशिबिरममरा जयकाङ्क्षिणः। इन्द्रस्तु राजमहिर्षी मातरं मम चाग्रहीत् ॥ ६ ॥

नीयमानां भयोद्विग्नां रुदतीं कुररीमिव। यदृच्छयाऽऽगतस्तत्र देवर्षिर्ददृशे पथि ॥ ७ ॥

प्राह मैनां सुरपते नेतुमर्हस्यनागसम्। मुञ्च मुञ्च महाभाग सतीं परपरिग्रहम् ॥ ८ ॥

इन्द्र उवाच

आस्तेऽस्या जठरे वीर्यमविषह्यं सुरद्विषः। आस्यतां यावत्प्रसवं मोक्ष्येऽर्थपदपदीं गतः ॥ ९॥

नारद उवाच

अयं निष्किल्बिषः साक्षान्महाभागवतो महान्। त्वया न प्राप्स्यते संस्थामनन्तानुचरो बली१०

इत्युक्तस्तां विहायेन्द्रो देवर्षेर्मानयन् वचः। अनन्तप्रियभक्त्यैनां परिक्रम्य दिवं ययौ ॥११॥

ततो नो मातरमृषिः समानीय निजाश्रमम्। आश्वास्येहोष्यतां वत्से यावत् ते भर्तुरागमः ।१२

सप्तमे मां समुद्दिश्य गर्भे यन्नारदेरितम्।
मात्रे पुनस्तत्प्रह्लादो बालविश्वस्तयेऽवदत् ॥१॥

स्मयमानः मन्दं हसन्। तान् बालान् ॥१॥ तपसे तपः कर्तुम्। परं परमम् ॥ २ ॥ अयं पापः पापी पिपीलकैः अभक्षि भक्षित इति वादिनः युद्धोद्यनं चक्रुरिति पूर्वेण योज्यम्। दिष्टया भद्रं जातम्॥३॥ वध्यमानाः हन्यमानाः। 'वध' हिंसायां धातुः। दुद्रुवुः पलायितवन्तः ॥ ४ ॥ नावेक्षमाणाः प्रतीक्षामकुर्वाणाः। परीप्सवः प्राणरक्षणेच्छवः। सर्वे दुद्रुवुः ॥५॥ व्यलुम्पन् अपहृतवन्तः। मातरं कयाधुम् ॥६॥ यदृच्छया दैवात्। कुररीं तन्नाम्नीं पक्षिणीम्॥७॥ अनागसं निरपराधां परपरिग्रहं[1] परपत्नीं नेतुं माऽर्हंसीत्यन्वयः ॥ ८ ॥ यावत्प्रसवं प्रसवपर्यन्तं मम वशे आस्यताम्। पश्चात् अर्थस्य पुत्रहननरूपकार्यस्य सिद्धिं गतः सन् त्यक्ष्यामि ॥ ९ ॥ स्वगुणैर्महान्। त्वया हेतुभूतेन संस्थां मृत्युम् न ॥ १० ॥ अनन्तस्य प्रियो भक्तोऽयमिति भावेन ॥ ११ ॥ नोऽस्माकम्। इह आश्रमे उष्यतां निवासः क्रियतामित्याहेति

1. आविष्टलिङ्गत्वात्पुंस्त्वम्। महिषी च सुतो भ्राता मातुलः श्यालकस्तथा। मन्त्री दूताश्च सेना च सर्वे एते परिग्रहाः ॥ इति वररुचिप्रोक्ताः परिग्रहपदार्थाः ज्ञेयाः।

तथेत्यवात्सीद् देवर्षेरन्ति साप्यकुतोभया । यावद् दैत्यपतिर्घोरात् तपसो न न्यवर्तत ॥ १३॥
ऋषिं पर्यचरत् तत्र भक्त्या परमया सती । अन्तर्वत्नी स्वगर्भस्य क्षेमायेच्छाप्रसूतये ॥१४॥
ऋषिः कारुणिकस्तस्याः प्रादादुभयमीश्वरः । धर्मस्य तत्त्वं ज्ञानं च मामप्युद्दिश्य निर्मलम्॥१५
तत् तु कालस्य दीर्घत्वात् स्त्रीत्वान्मातुस्तिरोदधे । ऋषिणानुगृहीतं मां नाधुनाप्यजहात् स्मृतिः
भवतामपि भूयान्मे यदि श्रद्दधते वचः । वैशारदी धीः श्रद्धातः स्त्रीबालानां च मे यथा ॥१७॥
जन्माद्याः षडिमे भावा दृष्टा देहस्य नात्मनः । फलानामिव वृक्षस्य कालेनेश्वरमूर्तिना ॥१८॥
आत्मा नित्योऽव्ययः शुद्ध एकः क्षेत्रज्ञ आश्रयः । अविक्रियः स्वदृग् हेतुर्व्यापकोऽसङ्ग्यनावृतः
एतैर्द्वादशभिर्विद्वानात्मनो लक्षणैः परैः । अहं ममेत्यसद्भावं देहादौ मोहजं त्यजेत् ॥२०॥

स्वर्णं यथा ग्रावसु हेमकारः क्षेत्रेषु योगैस्तदभिज्ञ आप्नुयात् ।
क्षेत्रेषु देहेषु तथाऽऽत्मयोगैरध्यात्मविद् ब्रह्मगतिं लभेत ॥२१॥

अष्टौ प्रकृतयः प्रोक्तास्त्रय एव हि तद्गुणाः । विकाराः षोडशाचार्यैः पुमानेकः समन्वयात्॥२२
देहस्तु सर्वसंघातो जगत् तस्थुरिति द्विधा । अत्रैव मृग्यः पुरुषो नेति नेतीत्यतत् त्यजन् ॥२३॥
अन्वयव्यतिरेकेण विवेकेनोशताऽऽत्मना । सर्गस्थानसमाम्नायैर्विमृशद्भिरसत्वरैः ॥२४॥
बुद्धेर्जागरणं स्वप्नः सुषुप्तिरिति वृत्तयः । ता येनैवानुभूयन्ते सोऽध्यक्षः पुरुषः परः ॥२५॥
एभिस्त्रिवर्णैः पर्यस्तैर्बुद्धिभेदैः क्रियोद्भवैः । स्वरूपमात्मनो बुध्येद् गन्धैर्वायुमिवान्वयात् ॥२६॥

शेषः ॥ १२ ॥ तथास्तु इत्यङ्गीकृत्य । अवात्सीत् न्यवसत् ॥ १३ ॥ अन्तर्वत्नी गर्भिणी । स्वेच्छया भर्तुरागमनानन्तरमेव ॥ १४ ॥ उभयं गर्भक्षेमम् इच्छाप्रसवं च । किञ्च तदैव धर्मस्य तत्त्वं भक्तिलक्षणम् ज्ञानं तत्साधनं चेत्युभयमपि ॥ १५ ॥ तत्तु तदुभयम् । तिरोदधे विस्मृतमभूत् । सा स्मृतिः मां तु न तत्याज ॥ १६ ॥ यदि वचः श्रद्दधते विश्वसन्ति तर्हि भवतामपि तदुभयं स्यात् । यतः वैशारदी भगवद्विषयिणी धीः स्त्रीबालानां च श्रद्धातः भवति । स्वार्थेऽण् ॥१७॥ जन्माद्याः । जायते अस्ति वर्धते विपरिणमते अपक्षीयते विनश्यति इति षड् विकाराः । यथा वृक्षे सत्येव फलानामेव जन्मादयः एवमात्मनि सति देहस्यैव विकाराः नत्वात्मनः । ईश्वरी विकारापादनसमर्था मूर्तिर्यस्य तेन ॥१८॥ आत्मेति स्पष्टम् ॥ १९ ॥ परैः श्रेष्ठैः विवेकसमर्थैः एतैर्लक्षणैः देहात् आत्मनः भेदं पृथग्भावं विद्वान् जानन् । असद्भावं मिथ्याबुद्धिं त्यजेत् ॥ २० ॥ तदभिज्ञः उपायज्ञः हेमकारः क्षेत्रेषु आकरेषु जायमानेषु ग्रावसु पाषाणेषु योगैर्धमनाद्युपायैः स्वर्णं यथा प्राप्नुयात् एवं देहरूपक्षेत्रेषु अध्यात्मवित् आत्मजिज्ञासुः आत्मयोगैः आत्मप्राप्त्युपायैः श्रवणमननादिभिः ब्रह्मगतिं ब्रह्मसाक्षात्कारं प्राप्नुयात् ॥ २१ ॥ प्रकृतयः महदहङ्कारौ पञ्चतन्मात्राणि चेत्यष्टौ । एकादशेन्द्रियाणि पञ्च महाभूतानि चेति षोडश विकाराः । पुमान् एकः प्रोक्तः आचार्यैः कपिलादिभिः । एकत्वे हेतुः । एषु साक्षित्वेनान्वयात् ॥२२॥ स च देहः जगत् जङ्गमः मनुष्यादिः तस्थुः स्थावरः वृक्षादिश्चेति द्विधा । अत्रैव देहे अतत् जडवर्गं त्यजन् त्यजद्भिः पुरुषः मृग्यः अन्वेष्टव्यः । आत्मा गन्धवान् न रसवान् न रूपवान् न इत्येवं नेति नेति कृत्वा॥२३॥मणिषु सूत्रमिव सर्वत्रानुस्यूतत्वेनान्वयः । मणिभ्य सूत्रस्य एकैकव्यतिरेकश्च तेन यो विवेकः तेन उशता शुद्धेन आत्मना मनसा, सृष्टिस्थितिसंहारैश्च इत्याद्यनुसन्धानेन विमृशद्भिः विचारयद्भिः असत्वरैः अव्यग्रैः पुरुषैः आत्मा मृग्यो भवतीत्यर्थः ॥ २४ ॥ विमर्शप्रकारमाह-बुद्धिरिति । सः अध्यक्षः ॥२५॥ बुद्धेरेवावस्थाविशेषैः

एतद्द्वारो हि संसारो गुणकर्मनिबन्धनः । अज्ञानमूलोऽपार्थोऽपि पुंसः स्वप्न इवेष्यते ॥२७॥
तस्माद्बुधैर्बुद्धेः कर्तव्यं कर्मणां त्रिगुणात्मनाम् । बीजनिर्हरणं योगः प्रवाहोपरमो धियः ॥२८॥
तत्रोपायसहस्राणामयं भगवतोदितः । यदीश्वरे भगवति यथा यैरञ्जसा रतिः ॥२९॥
गुरुशुश्रूषया भक्त्या सर्वलब्धार्पणेन च । सङ्गेन साधुभक्तानामीश्वराराधनेन च ॥३०॥
श्रद्धया तत्कथायां च कीर्तनैर्गुणकर्मणाम् । तत्पादाम्बुरुहध्यानात् तल्लिङ्गेक्षार्हणादिभिः ।३१।
हरिः सर्वेषु भूतेषु भगवानास्त ईश्वरः । इति भूतानि मनसा कामैस्तैः साधु मानयेत् ॥३२॥
एवं निर्जितषड्वर्गैः क्रियते भक्तिरीश्वरे । वासुदेवे भगवति यया संलभते रतिम् ॥३३॥

निशम्य कर्माणि गुणानतुल्यान् वीर्याणि लीलातनुभिः कृतानि ।
यदातिहर्षोत्पुलकाश्रुगद्गदं प्रोत्कण्ठ उद्गायति रौति नृत्यति ॥३४॥

यदा ग्रहग्रस्त इव क्वचिद्धसत्याक्रन्दते ध्यायति वन्दते जनम् ।
मुहुः श्वसन् वक्ति हरे जगत्पते नारायणेत्यात्ममतिर्गतत्रपः ॥३५॥
तदा पुमान् मुक्तसमस्तबन्धनस्तद्भावभावानुकृताशयाकृतिः ।
निर्दग्धबीजानुशयो महीयसा भक्तिप्रयोगेण समेत्यधोक्षजम् ॥३६॥

एभिर्जागरणादिभिः अन्वयात् सम्बन्धात् आत्मनो जीवात्मनः स्वरूपम् तद्व्यतिरेकाच्च परमात्मनः स्वरूपं बुध्येत् निश्चिनुयात् । यथा पुष्पादिगन्धैः सम्बन्धात् वायुर्गन्धवान् न स्वतः । एवमात्मापि बुद्धिधर्मान्वयात्तथाभाति न तत्त्वतः । त्रिवर्णैः त्रिगुणात्मकैः । क्रियोद्भवैः कर्मजन्यैः । पर्यस्तैः अस्थिरैः ॥२६॥ एतद्द्वारकः बुद्धिद्वारकः । गुणैः कर्मभिश्च निबध्यते । अपार्थः मिथ्याभूतोऽपि स्वप्न इव प्रतीयते ॥२७॥ बीजं संसारमूलमज्ञानं तस्य निर्हरणं दहनम् । किं तत् । योगः भक्तियोगः वक्ष्यमाणः । कथंभूतः । धियः बुद्धेः प्रवाहं जाग्रदादिरूपम् उपरमयति निवर्तयतीति तथा ॥ २८ ॥ यथा यथावदनुष्ठितैः यैर्धर्मैः भगवति अञ्जसा साक्षात् रतिरनुराग इति यत् अयमेव उपायः भगवता उक्तः गीतायाम्[1] ॥२९॥ गुर्विति युग्मम् । भक्त्या प्रेम्णेति उभयत्रान्वेति गुरोः सर्वेति च । तस्य भगवतो लिङ्गानां मूर्तीनां दर्शनं पूजनं वन्दनं तदादिभिः रति र्भवति । ॥३०।३१॥ कामैः अभिलषितपदार्थैः ॥३२॥ एवं साधनैः निर्जितः षड्वर्गः कामादीनामिन्द्रियाणां वा यैस्तैः । यया साधनभक्त्या रतिं प्रेमलक्षणाम् संलभते ॥३३॥निशम्येति त्रिकम् । कर्माणि दधिचौर्यादीनि । गुणान् वात्सल्यादीन् । वीर्याणि कालियदमनादीनि । अतिहर्षेण उत्पुलका उत्पन्नरोमाञ्चा अश्रूणि च तैर्गद्गदं यथा स्यात्तथा प्रोत्कण्ठः मुक्तकण्ठः सन् रौति नाम रटति । आक्रन्दते विलपति । श्वसन् श्वासान् मुञ्चन् । आत्मनि नारायणे मतिर्यस्य सः । तदा प्रारब्धक्षये पुमान् मुक्तबन्धनः सन् अधोक्षजं समेति प्राप्नोतीत्यन्वयः । कथंभूतः । तस्मिन् भगवति यो भावभावः प्रेमभावना तेन अनुकृते तदाकाराकारीकृते अन्तःकरणशरीरे यस्य सः । निर्दग्धं बीजमज्ञानमनुशयो वासना च यस्य सः

---

१. यत्करोषि यदश्नासि इत्यादिना ।

अधोक्षजालम्भमिहाशुभात्मनः शरीरिणः संसृतिचक्रशातनम् ।
तद् ब्रह्म निर्वाणसुखं विदुर्बुधास्ततो भजध्वं हृदये हृदीश्वरम् ॥३७॥
कोऽतिप्रयासोऽसुरबालका हरेरुपासने स्वे हृदि छिद्रवत् सतः ।
स्वस्यात्मनः सख्युरशेषदेहिनां सामान्यतः किं विषयोपपादनैः ॥३८॥
रायः कलत्रं पशवः सुतादयो गृहा मही कुञ्जरकोशभूतयः ।
सर्वेऽर्थकामाः क्षणभङ्गुरायुषः कुर्वन्ति मर्त्यस्य कियत् प्रियं चलाः ॥३९॥
एवं हि लोकाः क्रतुभिः कृता अमी क्षयिष्णवः सातिशया न निर्मलाः ।
तस्माददृष्टश्रुतदूषणं परं भक्त्यैकयेशं भजतात्मलब्धये ॥४०॥

यदध्यर्थ्येह कर्माणि विद्वन्मान्यसकृन्नरः । करोत्यतो विपर्यासममोघं विन्दते फलम् ॥४१॥
सुखाय दुःखमोक्षाय संकल्प इह कर्मिणः । सदाऽऽप्नोतीहया दुःखमनीहायाः सुखावृतः ॥४२॥
कामान् कामयते काम्यैर्यदर्थमिह पूरुषः । स वै देहस्तु पारक्यो भङ्गुरो यात्युपैति च ॥४३॥
किमु व्यवहितापत्यदारागारधनादयः । राज्यं कोशगजामात्यभृत्याप्ता ममतास्पदाः ॥४४॥
किमेतैरात्मनस्तुच्छैः सह देहेन नश्वरैः । अनर्थैरर्थसंकाशैर्नित्यानन्दमहोदधेः ॥४५॥

॥३४।३५।३६॥ अधोक्षजालम्भं भगवत्प्राप्तिं संसृतिचक्रस्य शातनं निवर्तकं विदुः तदेव ब्रह्मनिर्वाणं मोक्षसुखं च विदुः । ततोऽतः तं हृदये भजध्वम् किमिति बाह्याडम्बरेण । यतो हृदीश्वरम् अन्तर्यामिणम् । अशुभात्मनः रागादियुक्तस्य ॥ ३७ ॥ हे असुरबालका ! हरेः उपासने कः प्रयासः न कोऽपि यतः छिद्रवत् आकाशवत् स्वे हृदि सतः वर्तमानस्य । किञ्च स्वस्य सख्युः आत्मनः अन्तर्यामिणश्च अतः विषयोपार्जनैः किं प्रयोजनं न किमपि तेऽतितुच्छा एव । यतो हि विषयास्तु सर्वदेहिनां श्वशूकरादीनामपि सामान्यतः समानरूपेण सर्वत्र लभ्या एव ॥ ३८ ॥ एते पूर्वोक्ताः सर्वेऽपि अर्थकामाः काम्यपदार्थाः मर्त्यस्य कियत्परिमितं प्रियं कुर्वन्ति न किं यदपि यतः चला अस्थिराः । क्षणभङ्गुरं क्षत्रमात्रविनाशि आयुर्यस्य । भूतिः ऐश्वर्यम् । कोशः गजशाला[1] । कुञ्जरस्य पशुत्वेऽपि विशिष्टत्वाद् पृथक् निर्देशः॥३९॥ एवं मर्त्यलोकवत् क्रतुभिः सम्पादिताः अमी स्वर्गादिलोकाः अपि क्षयिष्णवः नाशशीलाः । पुण्यतारतम्येन सातिशया उत्कृष्टतमाः न च निर्मलाः स्पर्धादिदोषग्रस्ताश्च । तस्मात् एकया अनन्यया भक्त्या तमेव ईशं भजेत् । तस्यैव आत्मनः परमात्मनः लब्धये प्राप्तये । कथंभूतम् । न केनापि दृष्टं श्रुतं च दूषणं भक्तोपेक्षारूपं यस्मिन् तम् ॥ ४० ॥ यत् परलोकसुखम् अध्यर्थ्य संकल्प्य असकृद् कर्माणि करोति । अतः सङ्कल्पिताद् विपर्यासं विपरीतं दुःखरूपं फलम् अमोघम् अवश्य प्राप्नोति ॥ ४१ ॥ ईहया कर्मफलेच्छया दुःखं न तु सुखम् । अनीहायाः फलानिच्छाया हेतोः सुखेन पूर्णः ॥४२॥ काम्यैः कर्मभिः कामान् भोगान् यदर्थं कामयते स देहः परकीयः नश्वरश्च अपैति[2] नश्यति पुनरुपैति दुःखदानाय प्राप्नोति ॥ ४३ ॥ यदा देहः पारक्यः श्वसृगालादिभक्ष्यः तदा देहाद् व्यवहिता येऽपत्यादयस्ते पारक्या इति किमुत वक्तव्यम् ॥ ४४ ॥ महोदधेः भगवतः अंशभूतस्य आत्मनः जीवस्य एतैः तुच्छैः विषयैः किं

---

१. गजसान्निध्यात् धनकोशस्य राय इत्येननोक्तत्वात् । २. अपैत्युपैति इति पाठः ।

निरूप्यतामिह स्वार्थः कियान् देहभृतोऽसुराः । निषेकादिष्ववस्थासु क्लिश्यमानस्य कर्मभिः४६
कर्माण्यारभते देही देहेनात्मानुवर्तिना । कर्मभिस्तनुते देहमुभयं त्वविवेकतः ॥४७॥
तस्मादर्थाश्च कामाश्च धर्माश्च यदपाश्रयाः । भजतानीहयाऽऽत्मानमनीहं हरिमीश्वरम् ॥४८॥
सर्वेषामपि भूतानां हरिरात्मेश्वरः प्रियः । भूतैर्महद्भिः स्वकृतैः कृतानां जीवसंज्ञितः ॥४९॥
देवोऽसुरो मनुष्यो वा यक्षो गन्धर्व एव च। भजन् मुकुन्दचरणं स्वस्तिमान् स्याद् यथा वयम्
नालं द्विजत्वं देवत्वमृषित्वं वाऽसुरात्मजाः । प्रीणनाय मुकुन्दस्य न वृत्तं न बहुज्ञता ॥५१॥
न दानं न तपो नेज्या न शौचं न व्रतानि च । प्रीयतेऽमलया भक्त्या हरिरन्यद् विडम्बनम्५२
ततो हरौ भगवति भक्तिं कुरुत दानवाः । आत्मौपम्येन सर्वत्र सर्वभूतात्मनीश्वरे ॥५३॥
दैतेया यक्षरक्षांसि स्त्रियः शूद्रा व्रजौकसः । खगा मृगाः पापजीवाः सन्ति ह्यच्युततां गताः ५४
एतावानेव लोकेऽस्मिन् पुंसः स्वार्थः परः स्मृतः । एकान्तभक्तिर्गोविन्दे यत् सर्वत्र तदीक्षणम्

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां सप्तमस्कन्धे प्रह्लादानुचरिते दैत्यपुत्रानुशासनं नाम सप्तमोऽध्यायः ॥ ७ ॥

प्रयोजनं न किमपि ॥ ४५ ॥ हे असुराः ! कर्मभिः क्लिश्यमानस्य देहभृतो जीवस्य कियान् स्वार्थः आनन्दः तन्निरूप्यतामित्यन्वयः निषेको गर्भाधानम्[1] ॥ ४६ ॥ देही जीवः देहेन कर्माणि कुरुते कर्मभिः देहमारभते तेन पुनः कर्माणि तैश्च पुनर्देहमित्येवं बीजाङ्कुरवदियमावृत्तिः प्रचलति न च निवर्तते । एतदुभयं कर्मदेहयुगलमविवेकतस्तनुते । आत्मानुवर्तिना स्वाधीनेन ॥४७॥ अर्थादयो यदपाश्रयाः यदधीनाः तं हरिं यूयं भजत । अनीहया निष्काममभावेन ॥ ४८ ॥ स्वकृतैः स्वसृष्टैर्महाभूतैः कृतानां सृष्टानां भूतानां प्राणिनां मध्ये यः कश्चन जीवसंज्ञितः देवादिः स भजन् स्वस्तिमान् स्यादित्युत्तरेणान्वयः । यतः स एव सर्वेषामीश्वरः नियन्ता ॥४९।५०॥ नालमिति युग्मम् । नालं न समर्थम् । वृत्तम् आचार-निष्ठत्वम् । विडम्बनं लोकप्रदर्शनमात्रम् ॥५१।५२॥ हे दानवाः ! सर्वत्र सर्वभूतेषु आत्मौपम्येन सुखदुः-खादिदृष्ट्या ॥ ५३ ॥ यतो भक्त्यैव अच्युततां मोक्षत्वं प्राप्ताः ॥ ५४ ॥ सर्वत्र प्राणिषु तस्यैव ईक्षणं भगवद्दृष्ट्या सम्मानमिति यत् एतावानेव स्वार्थः ॥ ५५ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे गूढार्थदीपिन्यां सप्तमोऽध्यायः ।

---

१. निषेकगर्भजन्मानि बाल्यकौमारयौवनम् । वयोमध्यं जरा मृत्युरित्यवस्थास्तनोर्नव इत्येकादशोक्तेः ।

अथाष्टमोऽध्यायः

नारद उवाच

अथ दैत्यसुताः सर्वे श्रुत्वा तदनुर्गुणितम्। जगृहुर्निरवद्यत्वान्नैव गुर्वनुशिक्षितम् ॥ १ ॥
अथाचार्यसुतस्तेषां बुद्धिमेकान्तसंस्थिताम्। आलक्ष्य भीतस्त्वरितो राज्ञ आवेदयद् यथा॥२॥
श्रुत्वा तदप्रियं दैत्यो दुःसहं तनयानयम्। कोपावेशचलद्गात्रः पुत्रं हन्तुं मनो दधे ॥ ३ ॥
क्षिप्त्वा परुषया वाचा प्रह्लादमतदर्हणम्। आहेक्षमाणः पापेन तिरश्चीनेन चक्षुषा ॥ ४ ॥
प्रश्रयावनतं दान्तं बद्धाञ्जलिमवस्थितम्। सर्पः पदाहत इव श्वसन् प्रकृतिदारुणः ॥ ५ ॥
हे दुर्विनीत मन्दात्मन् कुलभेदकराधम। स्तब्धं मच्छासनोद्धृतं नेष्ये त्वाद्य यमक्षयम् ॥ ६॥
क्रुद्धस्य यस्य कम्पन्ते त्रयो लोकाः सहेश्वराः। तस्य मेऽभीतवन्मूढ शासनं किम्बलोऽत्यगाः॥७॥

प्रह्लाद उवाच

न केवलं मे भवतश्च राजन् स वै बलं बलिनां चापरेषाम्।
परेऽवरेऽमी स्थिरजङ्गमा ये ब्रह्मादयो येन वशं प्रणीताः ॥ ८ ॥
स ईश्वरः काल उरुक्रमोऽसावोजःसहःसत्त्वबलेन्द्रियात्मा।
स एव विश्वं परमः स्वशक्तिभिः सृजत्यवत्यत्ति गुणत्रयेशः ॥ ९ ॥
जह्यासुरं भावमिमं त्वमात्मनः समं मनो धत्स्व न सन्ति विद्विषः।
ऋतेऽजितादात्मन उत्पथस्थितात् तद्धि ह्यनन्तस्य महत् समर्हणम् ॥१०॥
दस्यून् पुरा षण्न विजित्य लुम्पतो मन्यन्त एके स्वजिता दिशो दश।
जितात्मनो ज्ञस्य समस्य देहिनां साधोः स्वमोहप्रभवाः कुतः परे ॥११॥

अष्टमे तनयं हन्तुं ताडितात्स्तम्भमध्यतः।
नृसिंहोऽभूत् स्तुतो देवैर्नखैर्दैत्यं व्यदारयत् ॥ १ ॥

तत् तेन प्रह्लादेन। निरवद्यत्वात् निर्दोषत्वात् ॥ १ ॥ एकान्तसंस्थितां भगवन्निष्ठाम्। यथा यथावत् ॥२॥ अनयं शत्रुपक्षाश्रयणम् ॥ ३ ॥ क्षिप्त्वेति युग्मम्। परुषया कठोरया वाचा क्षिप्त्वा भर्त्सयित्वा। अतदर्हणं भर्त्सनानर्हम्। सर्प इव श्वसन् तमाहेत्यन्वयः। पापेन क्रोधपूर्णेन वक्रेण ॥४।५॥ मच्छासनात् बहिर्भूतं स्तब्धम् अनम्रम्। त्वा त्वां यमक्षयं यमलोकं नेष्ये प्रापयिष्यामि। क्षि निवासे धातुः ॥६॥ अत्यगाः अतिक्रान्तवानसि ॥७॥ केवलं मे बलं न किन्तु भवदादीनां सर्वेषां स एव बलम्। परेऽवरे उच्चावचाः येन बलेन ॥ ८ ॥ स ईश्वरः मे बलमित्यन्वयः उरुक्रमः महापराक्रमः। ओजआदीनाम् आत्मा आधारः। ओज इन्द्रियशक्तिः सहो मनःशक्तिः सत्त्वं धैर्यं बलं देहशक्तिः। अत्ति संहरति। ईशः नियन्ता ॥ ९ ॥ समं भेदभावरहितं मनः धत्स्व कुरु। अजितात् आत्मनो मनसः ऋते विना शत्रवो न सन्ति किन्तु आत्मैव शत्रुः उत्पथस्थितात् कुमार्गस्थात्। तत् साम्येन मनोधारणमेव अनन्तस्य महत्समर्हणं श्रेष्ठं पूजनं भवति ॥ १० ॥ एके भवादृशाः लुम्पतः आयुर्धनमपहरतः षट् शत्रून् इन्द्रियलक्षणान् अविजित्य दिशः स्वेनैव जिता मन्यन्ते। ज्ञस्य सर्वं भगवन्मयमिति ज्ञानवतः साधोः समदृष्टेः

हिरण्यकशिपुरुवाच

व्यक्तं त्वं मर्तुकामोऽसि योऽतिमात्रं विकत्थसे । मुमूर्षूणां हि मन्दात्मन् ननु स्युर्विप्लवा गिरः ।
यस्त्वया मन्दभाग्योक्तो मदन्यो जगदीश्वरः । क्वासौ यदि स सर्वत्र कस्मात् स्तम्भे न दृश्यते
सोऽहं विकत्थमानस्य शिरः कायाद्धरामि ते । गोपायेत हरिस्त्वाद्य यस्ते शरणमीप्सितम् १४

एवं दुरुक्तैर्मुहुरर्दयन् रुषा सुतं महाभागवतं महासुरः ।
खड्गं प्रगृह्योत्पतितो वरासनात् स्तम्भं तताडातिबलःस्वमुष्टिना॥१५॥

तदैव तस्मिन् निनदोऽतिभीषणो बभूव येनाण्डकटाहमस्फुटत् ।
यं वै स्वधिष्ण्योपगतं त्वजादयःश्रुत्वा स्वधामाप्ययमङ्ग मेनिरे ॥१६॥

स विक्रमन् पुत्रवधेप्सुरोजसा निशम्य निर्ह्लादमपूर्वमद्भुतम् ।
अन्तः सभायां न ददर्श तत्पदं वितत्रसुर्येन सुरारियूथपाः ॥१७॥

सत्यं विधातुं निजभृत्यभाषितं व्याप्तिं च भूतेष्वखिलेषु चात्मनः।
अदृश्यतात्यद्भुतरूपमुद्वहन् स्तम्भे सभायां न मृगं न मानुषम् ॥१८॥

स सत्त्वमेनं परितोऽपि पश्यन् स्तम्भस्य मध्यादनु निर्जिहानम् ।
नायं मृगो नापि नरो विचित्रमहो किमेतन्नृमृगेन्द्ररूपम् ॥१९॥

मीमांसमानस्य समुत्थितोऽग्रतो नृसिंहरूपस्तदलं भयानकम् ।
प्रतप्तचामीकरचण्डलोचनं स्फुरत्सटाकेसरजृम्भिताननम् ॥२०॥

पुंसः परे शत्रवः कुतः स्युः न कुतोऽपि यतोऽज्ञानकल्पिताः॥११॥व्यक्तं निश्चितम् । अतिमात्रम् अतिमर्यादम् विकत्थसे श्लाघसे । विप्लवा[1] असम्बद्धाः ॥१२॥ हे मन्दभाग्य ! मत् मत्तः । क्वास्ति । प्रह्लाद आह सर्वत्रास्ति । कस्मात् स्तम्भे न । प्रह्लाद आह अस्ति मया दृश्यते ॥१३॥ हरामि पृथक् करोमि । शरणं रक्षकः ॥१४॥ दुरुक्तैः कटुवचनैः । अर्दयन् पीडयन् । उत्पतित उत्थितः । [2]तताड अनित्यो णिच् ॥१५॥ निनदो ध्वनिः । अण्डं ब्रह्माण्डम् । अस्फुटत् इवेति योज्यम् । स्वधिष्ण्योपगतं स्वलोकप्राप्तम् । अप्ययं नाशं मेनिरे । अङ्ग हे युधिष्ठिर ! ॥ १६ ॥ वधेप्सुः अत एव ओजसा बलेन विक्रमम् पराक्रमं कुर्वन् । तत्पदं ध्वनिकर्तारम् । वितत्रसुः उद्विग्ना बभूवुः ॥ १७ ॥ भृत्येन प्रह्लादेन । व्याप्तिं व्यापकतां च सत्यां कर्तुम् । उद्वहन् धारयन् । न मृगाकारं न मानुषाकारं किन्तु मिश्रितं नरसिंहरूपं स्तम्भेऽदृश्यतेत्यन्वयः । अत्र भृत्यपदेन ब्रह्मनारदसनकादीनामपि ग्रहणम् ॥ १८ ॥ स दैत्येन्द्रः एनं ध्वनिकर्तारं परितः विपश्यन् स्तम्भस्य मध्यात् अनु अनन्तरमेव निर्जिहानं[3] निर्गच्छत् विचित्रं सत्त्वं नरसिंहरूपं दृष्ट्वा अहो एतत् किमिति वितर्कितवानिति शेषः । तदेवाह-नायमिति ॥ १९ ॥ मीमांसेति सार्द्धत्रिकम् । एवमलमतिभयानकं नृमृगेन्द्ररूपं मीमांसमानस्य दैत्यस्य अग्रतः नृसिंहरूपो हरिः समुत्थितः प्रादुरभूत् । कथंभूतं रूपम् ।

---

१. प्लुङ् गतौ इत्यस्य रूपम् । विगतः प्लवोऽर्थो याभ्यस्ताः विप्लवाः अर्थशून्याः ।
२. स्तम्भे हरिरस्तीति प्रथमं रक्षकमेव ताडयामीति स्तम्भताडनम् ।
३. 'ओहाङ्' गतौ इत्यस्माच्छानच् ।

करालदंष्ट्रं करवालचञ्चलक्षुरान्तजिह्वं भ्रुकुटीमुखोल्वणम् ।
स्तब्धोर्ध्वकर्णं गिरिकन्दराद्भुतव्यात्तास्यनासं हनुभेदभीषणम् ॥२१॥
दिविस्पृशत्कायमदीर्घपीवरग्रीवोरुवक्षःस्थलमल्पमध्यमम् ।
चन्द्रांशुगौरैश्छुरितं तनूरुहैर्विष्वग्भुजानीकशतं नखायुधम् ॥२२॥
दुरासदं सर्वनिजेतरायुधप्रवेकविद्रावितदैत्यदानवम् ।
प्रायेण मेऽयं हरिणोरुमायिना वधः स्मृतोऽनेन समुद्यतेन किम् ॥२३॥
एवं ब्रुवंस्त्वभ्यपतद् गदायुधो नदन् नृसिंहं प्रति दैत्यकुञ्जरः ।
अलक्षितोऽग्नौ पतितः पतङ्गमो यथा नृसिंहौजसि सोऽसुरस्तदा ॥२४॥
न तद् विचित्रं खलु सत्त्वधामनि स्वतेजसा यो नु पुराऽपिबत् तमः।
ततोऽभिपद्याभ्यहनन्महासुरो रुषा नृसिंहं गदयोरुवेगया ॥२५॥
तं विक्रमन्तं सगदं गदाधरो महोरगं तार्क्ष्यसुतो यथाग्रहीत् ।
स तस्य हस्तोत्कलितस्तदासुरो विक्रीडतो यद्वदहिर्गरुत्मतः॥२६॥
असाध्वमन्यन्त हृतौकसोऽमरा घनच्छदा भारत सर्वधिष्ण्यपाः ।
तं मन्यमानो निजवीर्यशङ्कितं यद्धस्तमुक्तो नृहरिं महासुरः ।
पुनस्तमासज्जत खड्गचर्मणी प्रगृह्य वेगेन जितश्रमो मृधे ॥२७॥

प्रतप्तं यच्चामीकरं सुवर्णं तद्वत् पिशङ्गे पीते चण्डे अरुणे लोचने यस्मिन् तत् । स्फुरद्भिः सटाकेसरैः कण्ठरोमभिः जृम्भितं प्रसारितमाननं यस्मिन् । करवालो भ्रमत्खड्गः तद्वत् चञ्चला क्षुरान्तः क्षुरधारा तद्वत् तीक्ष्णा च जिह्वा यस्मिन् । भ्रुकुटीपर्यन्तप्रसारितमुखेन उल्वणं भयजनकम् । स्तब्धौ ऊर्ध्वौ कर्णौ यस्मिन् । गिरिकन्दरवत् अद्भुतं व्यात्तं प्रसृतमास्यं नासे च यस्मिन् । दिवि स्पृशन् अत्युच्चः कायो यस्मिन् । अदीर्घा ह्रस्वा पीवरा स्थूला च ग्रीवा यस्मिन् । उरु विशालं बहुविस्तीर्णं वक्षःस्थलं यस्मिन् तच्च तच्च तत् । अल्पं मध्यमम् उदरं यस्मिन् छुरितं व्याप्तम् । विष्वञ्चः सर्वतः प्रसृता भुजा एव अनीकशतं सेनासमूहो यस्मिन् । दुरासदं दुष्प्रापम् । निजानि सहजानि नखलक्षणानि इतराणि चक्रादीनि च तैः आयुधमुख्यैः विद्राविता दैत्यदानवा येन तत् एवंभूतं रूपं मीमांसमानस्य तस्य अग्रतः समुत्थित इति पूर्वेणान्वयः ॥२०।२१।२२॥ उरुमायिना महामायाविना मे वधः वधोपायः चिन्तितः तथापि अनेन समुद्यतेन प्रयासेन किं स्यात् न किञ्चित् ॥२३॥ नदन् गर्जन् सन् अभ्यपतत् योद्धुमागच्छत् । किन्तु नृसिंहस्य तेजोराशौ सः अलक्षितोऽभूत् यथा अग्नौ दीपशिखायां पतङ्गः । तदा पतनकाले॥२४॥ सत्त्वधामनि तेजोनिधौ भगवति तमोमयस्य दैत्यस्य यददर्शनं तदाश्चर्यं नास्ति। नु अहो यो हरिः पुरा प्रलयकालिकं तमोऽपिबत् तस्मिन् । अभिपत्य सम्मुखमागत्य ॥२५॥ विक्रमन्तं प्रहर्तुमुद्यन्तं तमग्रहीत् । तार्क्ष्यः कश्यपः तस्य सुतो गरुडः । तस्य नृसिंहस्य । उत्कलितः निसृतः । यद्वत् यथा विक्रीडतः गरुडस्य मुखादहिः॥२६॥ हे भारत युधिष्ठिर । असाधु अनुचितम् । धिष्ण्यपा लोकपालाः । हृतानि ओकांसि स्थानानि येषां ते । यस्य हस्तान्मुक्तः तं हरिं शङ्कितं भीतं मन्यमानः पुनस्तमासज्जत योद्धुं सन्नद्धोऽभूदित्यन्वयः । जितश्रमः

तं श्येनवेगं शतचन्द्रवर्त्मभिश्चरन्तमच्छिद्रमुपर्यधो हरिः ।
कृत्वाट्टहासं खरमुत्स्वनोल्वणं निमीलिताक्षं जगृहे महाजवः ॥२८॥
विष्वक् स्फुरन्तं ग्रहणातुरं हरिर्व्यालो यथाऽऽखुं कुलिशाक्षतत्वचम् ।
द्वार्यूरुमापात्य ददार लीलया नखैर्यथाहिं गरुडो महाविषम् ॥२९॥
संरम्भदुष्प्रेक्ष्यकराललोचनो व्यात्ताननान्तं विलिहन् स्वजिह्वया ।
असृग्लवाक्तारुणकेसराननो यथान्त्रमाली द्विपहत्यया हरिः ॥३०॥
नखाङ्कुशोत्पाटितहृत्सरोरुहं विसृज्य तस्यानुचरानुदायुधान् ।
अहन् समन्तान्नखशस्त्रपार्ष्णिभिर्दोर्दण्डयूथोऽनुपथान् सहस्रशः ॥३१॥
सटावधूता जलदाः परापतन् ग्रहाश्च तद्दृष्टिविमुष्टरोचिषः ।
अम्भोधयः श्वासहता विचुक्षुभुर्निर्ह्रादभीताः दिग्गिभा विचुक्रुशुः ॥३२॥
द्यौस्तत्सटोत्क्षिप्तविमानसंकुला प्रोत्सर्पत क्ष्मा च पदातिपीडिता ।
शैलाः समुत्पेतुरमुष्य रंहसा तत्तेजसा खं ककुभो न रेजिरे ॥३३॥

श्रमरहितः ।। २७ ॥ शतचन्द्र[1] वर्त्मभिः खड्गचर्ममार्गैः अच्छिद्रं निरवकाशं यथा स्यात्तथा उपर्यधः चरन्तं तम् अट्टहासं कृत्वा जगृहे इत्यन्वयः । कथंभूतम् । खरं[2] खलम् । क्रूरं वा । उत्स्वनेति हास-विशेषणम् । तेनैव निमीलिते अक्षिणी यस्य तम् ॥ २८ ॥ हरिः तं दैत्यं द्वारि तत्रापि ऊरुम् ऊरौ अङ्के निपात्य लीलया अनायासेन नखैर्विददारेत्यन्वयः[3] । अस्य ग्रहणे दृष्टान्तः व्यालः सर्पः यथा आखुं मूषकम् । विदारणे दृष्टान्तः गरुडो यथा अहिम् । विष्वक् सर्वतः स्फुरन्तं निःसरणाय चेष्टमानम् । आतुरं विवशम् । कुलिशेन वज्रेणापि न क्षता त्वगपि यस्य तम् ॥ २९ ॥ द्विपहत्यया यथा हरिः तद्वत्प्रतीयमानो भगवान् तस्य अनुचरान् नखैः शस्त्रैः पार्ष्णिभिश्च समन्तात् अहन्निति द्वयोरन्वयः । कथंभूतः । संरम्भेण क्रोधेन दुष्प्रेक्ष्ये कराले लोचने यस्य सः । पुनश्च । असृग्लवैः रक्तविन्दुभिः अक्ताः सिक्ताः केसरा आननं च यस्य सः । पुनश्च दोर्दण्डा भुजदण्डा एव यूथानि सेनासमूहो यस्य सः । किं कुर्वन् । व्यात्ताननस्य प्रसारितमुखस्य अन्तम् ओष्ठप्रान्तं विलिहन् । किं कृत्वा । मृतं दैत्यं विसृज्य त्यक्त्वा । कीदृशम् । नखाङ्कुशैः उत्पाटितं हृदयकमलं यस्य तम् । अत्र तीक्ष्णकोमलयोः नखाङ्कुरयोः सादृश्याभावात् तेन च हृदुत्पाटनस्याशक्यत्वात् कैश्चित्कृताया ईदृश्या उत्प्रेक्षायाश्चानौचित्यादङ्कुश एव पाठो युक्तो नत्वङ्कुर इति ॥३०।३१॥ सटाभिः कण्ठबालैः अवधूताः ताडिताः मेघाः परापतन् छिन्नभिन्ना बभूवुः । विमुष्टरोचिषः अपहृततेजस्काः विचुक्षुभुः सञ्चेलुः । निर्ह्रादेन भीषणनादेन । दिग्गजाः चीत्कारं चक्रुः ॥३२॥ तस्य सटाभिः उत्क्षिप्तैः विमानैः व्याप्ता[4] द्यौः

---

१. शतचन्द्रशब्दः खड्गचर्मणोर्वाची । उभयार्थकः । २. रलयोरभेदात् ।

३. अत्र द्वारीति 'नान्तर्नबहिः' इत्यस्य । ऊराविति 'न भूमौ नाम्बरे इत्यस्य । नखैरिति 'व्यसुभिरसुमद्भिर्वा' इत्यस्य । एवं न दिवा न नक्तम्' इत्यस्य प्रतीकाराय संध्यायामिति ज्ञातव्यम् । अत्र ऊरुम् ऊरु इति पाठद्वयम् । आद्ये सप्तम्यर्थे द्वितीया । द्वितीये उ अतिशयेन उरः वक्षःस्थलमित्यर्थो बोध्यः ।

४. द्यौस्तु स्वर्गविहायसोः ।

ततः सभायामुपविष्टमुत्तमे नृपासने सम्भृततेजसं विभुम् ।
अलक्षितद्वैरथमत्यमर्षणं प्रचण्डवक्त्रं न बभाज कश्चन ॥३४॥
निशम्य लोकत्रयमस्तकज्वरं तमादिदैत्यं हरिणा हतं मृधे ।
प्रहर्षवेगोत्कलिताननाः मुहुः प्रसूनवर्षैर्ववृषुः सुरस्त्रियः ॥३५॥
तदा विमानावलिभिर्नभस्तलं दिदृक्षतां संकुलमास नाकिनाम् ।
सुरानका दुन्दुभयोऽथ जघ्निरे गन्धर्वमुख्या ननृतुर्जगुः स्त्रियः ॥३६॥
तत्रोपव्रज्य विबुधा ब्रह्मेन्द्रगिरिशादयः । ऋषयः पितरः सिद्धा विद्याधरमहोरगाः ॥३७॥
मनवः प्रजानां पतयो गन्धर्वाप्सरचारणाः । यक्षाः किम्पुरुषास्तात वेतालाः सिद्धकिन्नराः ३८
ते विष्णुपार्षदाः सर्वे सुनन्दकुमुदादयः । मूर्ध्नि बद्धाञ्जलिपुटा आसीनं तीव्रतेजसम् ।
ईडिरे नरशार्दूलं नातिदूराः पृथक् ॥३९॥

ब्रह्मोवाच

नतोऽस्म्यनन्ताय दुरन्तशक्तये विचित्रवीर्याय पवित्रकर्मणे ।
विश्वस्य सर्गस्थितिसंयमान् गुणैः स्वलीलया संदधतेऽव्ययात्मने ॥४०॥

श्रीरुद्र उवाच

कोपकालो युगान्तस्ते हतोऽयमसुरोऽल्पकः । तत्सुतं पाह्युपसृतं भक्तं ते भक्तवत्सल ॥४१॥

इन्द्र उवाच

प्रत्यानीताः परम भवता त्रायता नः स्वभागा दैत्याक्रान्तं हृदयकमलं त्वद्गृहं प्रत्यबोधि ।
कालग्रस्तं कियदिदमहो नाथ शुश्रूषतां ते मुक्तिस्तेषां न हि बहु मता नारसिंहापरैः किम् ॥४२॥

ऋषय ऊचुः

त्वं नस्तपः परममात्थ यदात्मतेजो येनेदमादिपुरुषात्मगतं ससर्ज ।
तद् विप्रलुप्तममुनाद्य शरण्यपाल रक्षागृहीतवपुषा पुनरन्वमंस्थाः ॥४३॥

आकाशमण्डलम् । क्ष्मा पृथ्वी । प्रोत्सर्पत अकम्पत । रंहसा वेगेन । ककुभो दिशः ॥ ३३ ॥ कश्चिदपि तं न बभाज भयात् न सिषेवे । न लक्षितः प्रतियोद्धा येन तम् । अत्यमर्षणम् अतिक्रुद्धम् । संभृतं पूर्णम् ॥ ३४ ॥ प्रहर्षवेगेन उत्कलितानि विकसितानि आननानि यासां ताः ॥ ३५ ॥ दिदृक्षतां नाकिनां देवानां विमानेति योज्यम् । जघ्निरे तैर्वादिताः बभूवुः । आनकः ढोलकभेदः ॥ ३६ ॥ तत्रेति सार्द्धत्रयम् । तत्र ब्रह्मादयो विबुधा देवाः ऋष्यादयश्च तं नरशार्दूलं पृथक् पृथक् ईडिरे तुष्टुवुरित्यन्वयः । हे तात युधिष्ठिर ! ॥३७।३८।३९॥[1] गुणैः विश्वस्य सर्गादीन् सन्दधते सम्यक् कुर्वते अनन्ताय नतोऽस्मीत्यन्वयः । लीलया अनायासेन ॥ ४० ॥ युगान्तः प्रलय एव । उपसृतं शरणागतम् ॥ ४१ ॥ हे परम ! नोऽस्मान् त्रायता भवता यज्ञीयभागा प्रत्यानीताः प्रत्याहृताः । प्रत्यबोधि प्रफुल्लतां नीतम् । इदं स्वर्गादि सुखं कियत् अतितुच्छम् । यदा मुक्तिःन बहुमता तदा अपरैः पुरुषार्थैः किम् । नरश्च सिंहश्च नरसिंहौ ताभ्यामवयवाभ्यामाविर्भूतो नारसिंहः । आविर्भावार्थेऽण् प्रत्ययः । मन्दाक्रान्ता छन्दः ॥ ४२ ॥ हे आदिपुरुष ! त्वं नः यत् परमं ध्यानरूपं तप आत्थ उपदिष्टवान् येन ब्रह्मा इदं विश्वं ससर्ज तत्

---

१. ब्रह्मादयः कोपविमुक्तिकामाश्चरन्त ईशस्य न चातिदूरे ।
पृथक् पृथक् सप्तदशेष्टवृत्तैर्नृसिंहमत्युग्रमभिष्टुवन्ति ॥

पितर ऊचुः

श्राद्धानि नोऽधिबुभुजे प्रसभं तनूजैर्दत्तानि तीर्थसमयेऽप्यपिबत् तिलाम्बु ।
तस्योदरान्नखविदीर्णवपाद् य आर्च्छत् तस्मै नमो नृहरयेऽखिलधर्मगोप्त्रे ॥४४॥

सिद्धा ऊचुः

यो नो गतिं योगसिद्धामसाधुरहारषीद् योगतपोबलेन ।
नानादर्पं तं नखैर्निर्ददार तस्मै तुभ्यं प्रणताः स्मो नृसिंह ॥४५॥

विद्याधरा ऊचुः

विद्यां पृथग्धारणयानुराद्धां न्यषेधदज्ञो बलवीर्यदृप्तः ।
स येन संख्ये पशुवद्धतस्तं मायानृसिंहं प्रणताः स्म नित्यम् ॥४६॥

नागा ऊचुः

येन पापेन रत्नानि स्त्रीरत्नानि हृतानि नः । तद्वक्षःपाटनेनासां दत्तानन्द नमोऽस्तु ते ॥४७॥

मनव ऊचुः

मनवो वयं तव निदेशकारिणो दितिजेन देव परिभूतसेतवः ।
भवता खलः स उपसंहृतः प्रभो करवाम ते किमनुशाधि किङ्करान् ॥४८॥

प्रजापतय ऊचुः

प्रजेशा वयं ते परेशाभिसृष्टा न येन प्रजा वै सृजामो निषिद्धाः ।
स एष त्वया भिन्नवक्षा नु शेते जगन्मङ्गलं सत्त्वमूर्तेऽवतारः ॥४९॥

तपः अमुना दैत्येन विप्रलुप्तं विलोपितं किन्तु अद्य भवता पुनः अन्वमंस्थाः तपोऽनुमोदितवान् तस्मै ते नम इत्युत्तरेणान्वयः । आत्मनस्तव तेजः स्वरूपप्रकाशकम् । हे पाल रक्षक ! ॥४३॥ नोऽस्माकं तनूजैर्दत्तानि श्राद्धानि पिण्डादीनि प्रसभं बलात् बुभुजे तथा तिलाम्बु अपि यः अपिबत् तस्य उदरात् यः तानि आर्च्छत् आहृतवान् तस्मै नृहरये नम इत्यन्वयः । कथंभूतात् । नखैः विदीर्णा वपा यस्य तस्मात् ॥ ४४ ॥ योऽसाधुः नोऽस्माकं गतिमणिमादिसिद्धिमपहृतवान् तं यः विददार तस्मै तुभ्यं प्रणताः स्म इत्यन्वयः । कर्तरि क्तः । नानादर्पं नानाविधो दर्पो यस्य तम् । शालिनी छन्दोमञ्ज्ञः ॥ ४५ ॥ पृथक् पृथक् धारणया अनुराद्धां सम्प्राप्तां विद्यामन्तधार्नादिलक्षणां यो न्यषेधत् स दैत्यः येन संख्ये युद्धे हतः तं नताः स्म इत्यन्वयः । [1]मायया कृपया । इन्द्रवज्रा छन्दः ॥४६॥ येन नोऽस्माकं रत्नानि फणासु स्थितानि हृतानि तस्य वक्षोविदारणेन आसां स्त्रीणां दत्त आनन्दो येन तत्सम्बुद्धौ ते नमः ॥४७॥ निदेशकारिण आज्ञाकारिणः । किन्तु दितिजेन दैत्येन परिभूताः त्याजिताः सेतवो धर्ममर्यादा येषां ते तथाभूताः कृताः । स भवता उपसंहृतः हतः । अतोऽधुना वयं ते किं करवामेति नः किंकरान् अनुशाधि आज्ञापय । मञ्जुभाषिणी छन्दः ॥ ४८ ॥ हे परेश ! प्रजेशाः प्रजापतयः वयं त्वया सृष्टाः येन प्रजा मा सृजत इति

---

१. 'माया दम्भे कृपायां च' इति कोशात् ।

गन्धर्वा ऊचुः

वयं विभो ते नटनाट्यगायका येनात्मसाद् वीर्यबलौजसा कृताः ।
स एष नीतो भवता दशामिमां किमुत्पथस्थः कुशलाय कल्पते ॥५०॥

चारणा ऊचुः

हरे तवाङ्घ्रिपङ्कजं भवापवर्गमाश्रिताः । यदेष साधुहृच्छयस्त्वयाऽसुरः समापितः ॥५१॥

यक्षा ऊचुः

वयमनुचरमुख्याः कर्मभिस्ते मनोज्ञैस्त इह दितिसुतेन प्रापिता वाहकत्वम् ।
स तु जनपरितापं तत्कृतं जानता ते नरहर उपनीतः पञ्चतां पञ्चविंश ॥५२॥

किम्पुरुषा ऊचुः

वयं किंपुरुषास्त्वं तु महापुरुष ईश्वरः । अयं कुपुरुषो नष्टो धिक्कृतः साधुभिर्यदा ॥५३॥

वैतालिका ऊचुः

सभासु सत्रेषु तवामलं यशो गीत्वा सपर्यां महतीं लभामहे ।
यस्तां व्यनैषीद् भृशमेष दुर्जनो दिष्ट्या हतस्ते भगवन् यथाऽऽमयः ॥५४॥

किन्नरा ऊचुः

वयमीश किन्नरगणास्तवानुगा दितिजेन विष्टिममुना नुकारिताः ।
भवता हरे स वृजिनोऽवसादितो नरसिंह नाथ विभवाय नो भव ॥५५॥

निषिद्धाः । स त्वया भिन्नवक्षाः सन् मृत इव शेते अतः तेऽवतारः जगतो मङ्गलकारी । भुजङ्गप्रयातं छन्दः ॥ ४९ ॥ ते त्वदीयाः नटा नर्तका नाट्ये नृत्ये गायकाश्च । येन आत्मसात्कृताः स्वायत्तीकृताः । वीर्येति द्वन्द्वैक्यं करणे तृतीया । ओजः प्रभावः । दशां मरणावस्थां प्रापितः । उत्पथस्थः कुमार्गस्थः । वंशस्थं छन्दः ॥ ५० ॥ भवापवर्गं संसारनिवर्तकम् । यत् यस्मात् । साधूनां हृदि शेते तिष्ठति भयजनकत्वेनेति । समापितः मारितः । प्रमाणिका छन्दः ॥ ५१ ॥ हे [1]पञ्चविंश तत्त्वनियन्तः । कालस्वरूप वा । मनोज्ञैः कर्मभिः शुश्रूषणादिभिः वयं ते अनुचरेषु मुख्याः दैत्येन शिबिकावाहकत्वं प्रापिताः । स तु दैत्यः ते त्वया पञ्चत्वं नीतः प्रापितः । कथंभूतेन त्वया । तत्कृतं दैत्यकृतं जनपरितापं जानता । मालिनी छन्दः ॥५२॥ किंपुरुषाः तुच्छप्राणिनः । यदा धिक्कृतस्तदैव नष्टः ॥५३॥ सत्रेषु यज्ञेषु । महतीं सपर्यां पूजां विशिष्टं पुरस्कारम् लभामहे यस्तां व्यनैषीत् निवारितवान् स एष ते त्वया हतः यथा रोग एतत् दिष्ट्या भद्रं जातम् । भृशमत्यन्तं दुर्जनः ॥ ५४ ॥ हे ईश वयं तव अनुगा अमुना दितिजेन दैत्येन विष्टिं निर्मूल्यसेवामनु निरन्तरं कारिताः । स वृजिनः[2] पापात्मा अवसादितः नाशितः ।

---

१. यः कालः पञ्चविंशकः' इति तृतीयोक्तेः ।

२. वृजिनं पापं तद्वान् वृजिनः अर्श आद्यच् ।

विष्णुपार्षदा ऊचुः

अद्यैतद्धरिनररूपमद्भुतं ते दृष्टं नः शरणद सर्वलोकशर्म।
सोऽयं ते विधिकर ईश विप्रशप्तस्तस्येदं निधनमनुग्रहाय विद्मः ॥५६॥

इति श्रीमद्भागवते महापुराणे परमहंस्यां संहितायां सप्तमस्कन्धे प्रह्लादानुचरिते दैत्यराजवधे नृसिंहस्तवो नामाष्टमोऽध्यायः ॥ ८ ॥

अथ नवमोऽध्यायः

नारद उवाच

एवं सुरादयः सर्वे ब्रह्मरुद्रपुरःसराः। नोपैतुमशकन् मन्युसंरम्भं सुदुरासदम् ॥ १ ॥
साक्षाच्छ्रीः प्रेषिता देवैर्दृष्ट्वा तन्महदद्भुतम्। अदृष्टाश्रुतपूर्वत्वात् सा नोपेयाय शङ्किता ॥२॥
प्रह्लादं प्रेषयामास ब्रह्मावस्थितमन्तिके। तात प्रशमयोपेहि स्वपित्रे कुपितं प्रभुम् ॥ ३ ॥
तथेति शनकै राजन् महाभागवतोऽर्भकः। उपेत्य भुवि कायेन ननाम विधृताञ्जलिः ॥ ४ ॥

स्वपादमूले पतितं तमर्भकं विलोक्य देवः कृपया परिप्लुतः।
उत्थाप्य तच्छीर्ष्ण्यदधात् कराम्बुजं कालाहिवित्रस्तधियां कृताभयम् ॥५॥
स तत्करस्पर्शधुताखिलाशुभः सपद्यभिव्यक्तपरात्मदर्शनः।
तत्पादपद्मं हृदि निर्वृतो दधौ हृष्यत्तनुः क्लिन्नहृदश्रुलोचनः ॥ ६ ॥

नोऽस्माकं विभवाय सुखसमृद्धये मोक्षाय वा भव। मञ्जुभाषिणीछन्दः ॥ ५५ ॥ नोऽस्माकं शरणप्रद। अद्य एतत् अद्भुतं रूपं दृष्टं न तु पूर्वम्। कथंभूतम्। सर्वलोकानां शर्म मङ्गलकारि। सोऽयं ते विधिकरः किङ्करः विप्रैः सनकादिभिः शप्तः सन् दैत्यो जातः तस्येदं निधनम् अनुग्रहाय शापमुक्तये जानीमः। प्रहर्षिणी छन्दः ॥ ५६ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे गूढार्थदीपिन्यामष्टमोऽध्यायः।

नवमे ब्रह्मणाऽऽदिष्टः प्रह्लादः कोपशान्तये।
अस्तौन्नृसिंहमव्यग्रः सत्पद्यैरुग्रविग्रहम् ॥
ब्रह्मादयः कोपविमुक्तिकामाश्चरन्त ईशस्य नचाति दूरे।
पृथक् पृथक् सप्तदशेष्टवृत्तै नृसिंहमत्युग्रमभिष्टुवन्ति ॥

उपैतुं समीपे गन्तुम्। नाशक्नोत् न समर्थाबभूवुः। [1]मन्यौ दैत्ये संरम्भः क्रोधावेशो यस्य तम् दुरासदं सुखेन विषयीकर्तुमशक्यम् ॥ १ ॥ न उपेयाय समीपं न जगाम ॥ २ ॥ हे तात वत्स प्रशमय प्रसादय। उपेहि समीपं गच्छ ॥ ३ ॥ कायेन भुवि दण्डवत् ननामेत्यन्वयः। शिरसि बद्धाञ्जलिः सन् ॥ ४ ॥ उत्थाप्य अङ्के आरोप्य च शिरसि कराम्बुजम् अदधात्। कथंभूतम्। कालाहिना वित्रस्ता उद्विग्ना धीर्येषां तेषां कृतमभयदानं येन तत् ॥ ५ ॥ स निर्वृतः आनन्दितः सन् तत्पादपद्मं हृदि दधौ इत्यन्वयः। कथंभूतः। तस्य भगवतः करस्पर्शेन धुतं निवृत्तमशुभं वासनालक्षणं यस्य। सपदि

---

१. मन्युर्दैत्ये क्रतौ क्रुधि' इत्यभिधानात्।

अस्तौषीद्धरिमेकाग्रमनसा सुसमाहितः । प्रेमगद्गदया वाचा तन्न्यस्तहृदयेक्षणः ॥ ७ ॥

प्रह्लाद उवाच

ब्रह्मादयः सुरगणा मुनयोऽथ सिद्धाः सत्त्वैकतानमतयो वचसां प्रवाहैः ।
नाराधितुं पुरुगुणैरधुनापि पिप्रुः किं तोष्टुमर्हति स मे हरिरुग्रजातेः ॥ ८ ॥
मन्ये धनाभिजनरूपतपःश्रुतौजस्तेजःप्रभावबलपौरुषबुद्धियोगाः ।
नाराधनाय हि भवन्ति परस्य पुंसो भक्त्या तुतोष भगवान् गजयूथपाय ॥९॥
विप्राद् द्विषड्गुणयुतादरविन्दनाभपादारविन्दविमुखाच्छ्वपचं वरिष्ठम् ।
मन्ये तदर्पितमनोवचनेहितार्थप्राणं पुनाति स कुलं न तु भूरिमानः ॥१०॥
नैवात्मनः प्रभुरयं निजलाभपूर्णो मानं जनादविदुषः करुणो वृणीते ।
यद् यज्जनो भगवते विदधीत मानं तच्चात्मने प्रतिमुखस्य यथा मुखश्रीः ॥११॥
तस्मादहं विगतविक्लव ईश्वरस्य सर्वात्मना महि गृणामि यथामनीषम् ।
नीचोऽजया गुणविसर्गमनुप्रविष्टः पूयेत येन हि पुमाननुवर्णितेन ॥१२॥

तत्क्षणमेव अभिव्यक्तं परात्मदर्शनं परमात्मानुभवो यस्य । हृष्यन्ती रोमाञ्चिता तनुर्यस्य । क्लिन्नं प्रेमार्द्रं हृदयं यस्य । अश्रूणि लोचनयोर्यस्य तथाभूतः ॥ ६ ॥ तस्मिन्नेव भगवति न्यस्तं हृदयमीक्षणं च येन सः ॥ ७ ॥ अथ सिद्धाः कपिलादयश्च वचसां प्रवाहैः धाराप्रवाहस्तोत्रैः तथा पुरुगुणैः बहुभिः गुणैरपि यमाराधयितुं न पिप्रुः[1] न पूर्णा न समर्थाः स हरिः मे कथं तोषं प्राप्तुमर्हति न कथमपि । यतः उग्रा आसुरी जातिर्यस्य तस्य । कथंभूताः । सत्त्वे एव एकताना[2] अनन्यनिष्ठा मति र्येषां ते ॥ ८ ॥ एते धनादयो द्वादश परस्य पुंसः नाराधनाय सन्तोषाय न भवन्तीति मन्ये । यतो भगवान् गजेन्द्राय केवलं भक्त्यैव तुतोषेत्यन्वयः । अभिजनः सत्कुलजन्म । श्रुतं शास्त्रश्रवणम् । योगोऽष्टाङ्गः ॥ ९ ॥ द्विषट् द्वादश पूर्वोक्ता ये गुणास्तैर्युक्तात् विप्रात् श्वपचं वरिष्ठं मन्ये । कथंभूतात् पादारविन्दविमुखात् । कथंभूतं श्वपचम् । तस्मिन् भगवति अर्पिता मन आदयो येन तम् । ईहितं कर्म । प्राणं तदुपलक्षित शरीरम् । स एवंभूतः श्वपचः सर्वं कुलं पुनाति । भूरिर्मानो गर्वो यस्य स तु विप्रः आत्मानमेव न पुनाति कुतः कुलम् ॥ १० ॥ अयं प्रभुः अविदुषो जनात् मानं पूजादिकम् आत्मनोऽर्थे न वृणीते नेच्छति किन्तु करुणो दयालुः अतो भक्तार्थं वृणीते च । तदेवाह यत् यस्मात् यत् येन धनादिना भगवते मानं विदधीत तत् आत्मने प्रतिफलति । यथा मुखे कृता तिलकादिश्रीः प्रतिमुखस्य आत्मनः प्रतिबिम्बस्यैव भवति नान्यस्येत्यर्थः । प्रकृते च भगवान् बिम्बः जीवः प्रतिबिम्बः ॥ ११ ॥ यस्मात् भक्त्यैव तुष्यति तस्मात् अहं नीचो दैत्यजोऽपि विगतविक्लवः निःशङ्कः सन् ईश्वरस्य महि महिमानं वर्णयामि । येन वर्णितेन अयं पुमान् पूयेत शुद्धयेत् । कथंभूतः । अजया अविद्यया गुणविसर्गं संसारमनुप्रविष्टः ॥१२॥

---

१. 'एकतानोऽनन्यवृत्तिः' इत्यमरात् ।

२. अडभाव आर्षः । अपिप्रुरिति । पृधातोः लङः प्रथमपुरुषबहुवचने रूपमेतत् ।

सर्वे ह्यमी विधिकरास्तव सत्वधाम्नो ब्रह्मादयो वयमिवेश न चोद्विजन्तः ।
क्षेमाय भूतय उतात्मसुखाय चास्य विक्रीडितं भगवतो रुचिरावतारैः ॥१३॥
तद् यच्छ मन्युमसुरश्च हतस्त्वयाद्य मोदेत साधुरपि वृश्चिकसर्पहत्या ।
लोकाश्च निर्वृतिमिताःप्रतियन्ति सर्वे रूपं नृसिंह विभयाय जनाःस्मरन्ति॥१४॥
नाहं बिभेम्यजित तेऽतिभयानकास्यजिह्वार्कनेत्रभ्रुकुटीरभसोग्रदंष्ट्रात् ।
आन्त्रस्रजः क्षतजकेसरशङ्कुकर्णान्निर्ह्रादभीतदिगिभादरिभिन्नखाग्रात् ॥१५॥
त्रस्तोऽस्म्यहं कृपणवत्सल दुःसहोग्रसंसारचक्रकदनाद् ग्रसतां प्रणीतः ।
बद्धः स्वकर्मभिरुशत्तम तेऽङ्घ्रिमूलं प्रीतोऽपवर्गशरणं ह्वयसे कदा नु ॥१६॥
यस्मात् प्रियाप्रियवियोगसयोगजन्मशोकाग्निना सकलयोनिषु दह्यमानः ।
दुःखौषधं तदपि दुःखमतद्धियाहं भूमन् भ्रमामि वद मे तव दास्ययोगम्॥१७॥
सोऽहं प्रियस्य सुहृदः परदेवताया लीलाकथास्तव नृसिंह विरिञ्चगीताः ।
अञ्जस्तितर्म्यनुगृणन् गुणविप्रमुक्तो दुर्गाणि ते पदयुगालयहंससङ्गः ॥१८॥

हे ईश अमी उद्विजन्तः बिभ्यतः सर्वे ब्रह्मादयः सत्त्वमूर्तेस्तव विधिकरा भक्ता एव न च वयमिव वैरभावेन किन्तु श्रद्धया । अतः भगवतस्तव रुचिरावतारैः विक्रीडितं विविधलीला अस्य विश्वस्य क्षेमादिप्रयोजनार्थं भवति न तु भयोत्पादनार्थम् ॥ १३ ॥ तत् तस्मात् मन्युं क्रोधं नियच्छ उपसंहर । हत्या वधेन तृतीयान्तम् । निर्वृतिमानन्दम् इताः प्राप्ताः सन्तः प्रतियन्ति क्रोधनिवृत्तिं प्रतीक्षन्ते । विभयाय भयनिवृत्त्यै स्मरिष्यन्ति ॥ १४ ॥ अत्र रूपादिति विशेष्यमध्याहार्यम् । हे अजित ते अस्मात् रूपात् अहं न बिभेमीत्यन्वयः । कथंभूतात् । आस्यं च जिह्वा च अर्कसदृशे नेत्रे च भ्रुकुटीनां रभस आटोपश्च[1] उग्रा दंष्ट्राश्च एतानि अतिभयानकानि यस्मिन् तस्मात् । अन्त्रमय्यः स्रजो यस्मिन् । क्षतजा रुधिराक्ताः केसराः कण्ठरोमाणि यस्मिन् शंकुवदुन्नतौ कर्णौ यस्मिन् तच्च तच्च तस्मात् । निर्ह्रादेन गर्जनेन भीता दिगिभा दिग्गजा यस्मात् । अरीन् भिन्दन्तीति अरिभिन्दि नखाग्राणि यस्मिन् तस्मात्॥ १५॥ दुःसहं यत् उग्रं संसारचक्रे कदनं दुःखं तस्मादहं त्रस्तोऽस्मि । अतस्त्वं प्रीतः सन् तेऽङ्घ्रिमूलं[2] स्वचरण कमलं प्रति मां कदा नु आह्वयसीत्यन्वयः । कथंभूतोऽहम् । ग्रसतां हिंस्राणां दैत्यानां मध्ये स्वकर्मभिरेव बद्धः सन् प्रणीतः प्रक्षिप्तोऽस्मि । हे उशत्तम[3] उशन्ति इच्छन्ति दीनोद्धरणमिति उशन्तो दयालवस्तेष्वपि श्रेष्ठ ॥ १६ ॥ येन कर्मणा बद्धः तस्मात्कर्मणो निमित्तात् प्रियैरप्रियैश्च क्रमेण वियोगसंयोगौ ताभ्यां जन्म यस्य तेन शोकाग्निना दह्यमानोऽस्मि । दुःखस्य औषधं प्रतीकारात्मकं यत् कर्म तदपि सर्वं दुःखमेव । अतः तव दास्यरूपं योगमौषधं त्वमेव वद । अहं तु अतद्धिया तज्ज्ञानाभावेन भ्रमामि मुह्यामि । हे भूमन् महत्तम ॥ १७ ॥ भो नृसिंह त्वद्दासः सन् तव लीलाकथा अनुगृणन् गायन् अञ्जः अनायासेन दुर्गाणि

---

१. आटोपश्चोर्ध्वंचालनम्' इत्यभिधानात् ।
२. मूलं कन्जे निदाने भे' इति धरणि ।
३. 'वश कान्तौ इत्यस्माच्छत्रन्तात्तमप् ।

बालस्य नेह शरणं पितरौ नृसिंह नार्तस्य चागदमुदन्वति मज्जतो नौः ।
तप्तस्य तत्प्रतिविधिर्य इहाञ्जसेष्टस्तावद् विभो तनुभृतां त्वदुपेक्षितानाम् ॥१९॥
यस्मिन् यतो यर्हि येन च यस्य यस्माद् यस्मै यथा यदुत यस्त्वपरः परो वा ।
भावः करोति विकोति पृथक्स्वभावः संचोदितस्तदखिलं भवतः स्वरूपम् ॥२०॥
माया मनः सृजति कर्ममयं बलीयः कालेन चोदितगुणानुमतेन पुंसः ।
छन्दोमयं यदजयार्पितषोडशारं संसारचक्रमज कोऽतितरेत् त्वदन्यः ॥२१॥
स त्वं हि नित्यविजितात्मगुणः स्वधाम्ना कालो वशीकृतविसृज्यविसर्गशक्तिः ।
चक्रे विसृष्टमजयेश्वर षोडशारे निष्पीडयमानमुपकर्ष विभो प्रपन्नम् ॥२२॥
दृष्टा मया दिवि विभोऽखिलधिष्ण्यपानामायुः श्रियो विभव इच्छति याञ्जनोऽयम् ।
येऽस्मत्पितुः कुपितहासविजृम्भितभ्रूविस्फूर्जितेन लुलिताः स तु ते निरस्तः ॥२३॥
तस्मादमूस्तनुभृतामहमाशिषो ज्ञ आयुः श्रियं विभवमैन्द्रियमाविरिञ्च्यात् ।
नेच्छामि ते विलुलितानुरुविक्रमेण कालात्मनोपनय मां निजभृत्यपार्श्वम् ॥२४॥

सर्वदुःखानि [1]तितर्मि तरिष्यामीत्यन्वयः । तत्र हेतुः । गुणैः रागद्वेषादिभिः विशेषेण प्रमुक्तः सन् । तत्कुतः । ते पदयुगलमेव आलयौ येषां ते तथाभूता ये हंसाः ज्ञानिनः तैः सङ्गो यस्य सोऽहम् ॥ १८ ॥ शरणं रक्षकौ न पाल्यमानस्यापि दुःखदर्शनात् । आर्तस्य रोगिणः अगदमोषधं शरणं न । कृतेऽप्यौषधे मृत्युदर्शनात् । न च उदन्वति समुद्रे मज्जतः पुंसः नौः शरणं न तया सह मज्जनदर्शनात् त्वमेव शरणमित्यर्थः । अतस्तप्तस्य दुःखितस्य तत्प्रतिविधिः तत्प्रतीकारः इह लोके यस्तावदिष्टः सम्मतः स च त्वयोपेक्षितानां पुंसां किमञ्जसा साक्षादिष्टः नेष्ट इत्यर्थः ॥ १९ ॥ अपरोऽर्वाचीनः कुलालादिः परः प्राचीनः ब्रह्मादिर्वा यो भावः कर्ता येन सञ्चोदितः सन् कारकैर्यत् यत् करोति उत्पादयति विकरोति विनाशयति तत् अखिलं भवतः स्वरूपमस्तीत्यन्वयः । तदेवाह । यस्मिन् अधिष्ठाने स्थित्वा यतो मृदादेः यर्हि यस्मिन् काले येन चक्रसलिलादिना यस्य अदृष्टादेः सहायेन यस्मै जलानयनाद्यर्थं यत् ईप्सिततमं कर्म घटपटादि करोति यः कर्ता । कीदृशः पृथक्स्वभावः रज आदिस्वभाववान् ॥२०॥ हे अज माया कर्मप्रधानं मनः सृजति तन्मनोमूलमेव संसारचक्रं तत् त्वत्तोऽन्यः विमुखः कः पुमानतितरेत् न कोऽपीत्यन्वयः । केन सृजति । पुंसः प्रकृत्यधिष्ठातुः पुरुषस्य अनुमतेन निरीक्षणेन । कथंभूता माया । कालेन क्षोभितगुणा । कथंभूतं मनः । बलीयः दुर्जयम् । छन्दोमयं वासनामयम् । पुनश्च अजया भोगार्थम् अर्पिताः षोडश [2]अरा विकाराः यस्मिन् तत् ॥ २१ ॥ हे ईश्वर षोडशारे संसारचक्रे अजया मायया विसृष्टं पातितम् इक्षुदण्डवन्निष्पीड्यमानं यथा कथञ्चिद् प्रपन्नं शरणागतं च मां त्वमुपकर्ष संसारान्निःसारय । कथंभूतस्त्वम् । स्वधाम्ना चिच्छक्त्या नित्यं विजिता आत्मनो बुद्धेर्गुणा रागादयो येन सः । अत एव वशीकृता विसृज्यविसर्गाणां कार्यकारणानां शक्तयो येन सः ॥२२॥ अयं जनः यान् इच्छति ते आयुरादयः दिवि स्वर्गे लोकपानां दृष्टा एव । येऽस्मत्पितुः कुपितो ऽनिष्टकरो यो हासः तेन विजृम्भितेन विकृतेन भ्रूभङ्गमात्रेण लुलिता विनाशिताः स तु ते निरस्तः मारितः ॥ २३ ॥ यस्मादेवं तस्मात् तनुभृताममूः आशिषो भोगान् आयुरादीन् तथा आविरिञ्च्याव

---

१. तातर्मीति वक्तव्ये तितर्मीत्यार्षम् । २. एकादशेन्द्रियपञ्चमहाभूतात्मकाः ।

कुत्राशिषः श्रुतिसुखा मृगतृष्णिरूपाः क्वेदं कलेवरमशेषरुजां विरोहः ।
निर्विद्यते न तु जनो यदपीति विद्वान् कामानलं मधुलवैः शमयन् दुरापैः ॥२५॥
क्वाहं रज प्रभव ईश तमोऽधिकेऽस्मिन् जातः सुरेतरकुले क्व तवानुकम्पा ।
न ब्रह्मणो न तु भवस्य न वै रमाया यन्मेऽर्पितः शिरसि पद्मकरः प्रसादः ॥२६॥
नैषा परावरमतिर्भवतो ननु स्याज्जन्तोर्यथाऽऽत्मसुहृदो जगतस्तथापि ।
संसेवया सुरतरोरिव ते प्रसादः सेवानुरूपमुदयो न परावरत्वम् ॥२७॥
एवं जनं निपतितं प्रभवाहिकूपे कामाभिकाममनु यः प्रपतन् प्रसङ्गात् ।
कृत्वाऽऽत्मसात् सुरर्षिणा भगवन् गृहीतःसोऽहं कथं नु विसृजे तवभृत्यसेवाम्॥२८॥
मत्प्राणरक्षणमनन्त पितुर्वधश्च मन्ये स्वभृत्यऋषिवाक्यमृतं विधातुम् ।
खड्गं प्रगृह्य यदवोचदसद्विधित्सुस्त्वामीश्वरो मदपरोऽवतु कं हरामि ॥२९॥
एकस्त्वमेव जगदेतदमुष्य यत् त्वमाद्यन्तयोः पृथगवस्यसि मध्यतश्च ।
सृष्ट्वा गुणव्यतिकरं निजमाययेदं नानेव तैरवसितस्तदनुप्रविष्टः ॥३० ।
त्वं वा इदं सदसदीश भवांस्ततोऽन्यो माया यदात्मपरबुद्धिरियं ह्यपार्था ।
यद् यस्य जन्म निधनं स्थितिरीक्षणं च तद् वै तदेव वसुकालवदष्टितर्वोः॥३१॥

ब्रह्मलोकपर्यन्तम् इन्द्रियसुखम् उरुविक्रमेण अनन्तशक्तिमता कालमूर्तिना ते त्वया विलुलितान् विध्वस्तान् अणिमादीनपि किमपि नेच्छामि । कुतः । ज्ञः तत्परिणामं विद्वान् जानन् । अतो भृत्यपार्श्वम् भक्तसंगम् उपनय प्रापय ॥२४॥ श्रुतिसुखाः श्रवणमात्रेण सुखजनकाः आशिषो भोगाः क्व । अशेषरुजां नानारोगाणां विरोहः जन्मस्थानम् इदं शरीरं क्व इत्येवं यद्यपि विद्वान् वेत्ति तथापि न निर्विद्यते न विरज्यते । कुतः । दुरापैः दुःखलभ्यैः मधुलवैः विषयसुखलेशैः कामानलं शमयन् आस्ते ॥२५॥ रजसैव प्रभवो जन्म यस्य सोऽहं कुले जातः क्व । सप्तम्यन्तं कुलविशेषणं वा । यत् यया कृपया प्रसादः प्रसन्नताद्योतकः पद्मकरः मे शिरसि अर्पितः स ब्रह्मादीनां शिरसि नेत्यन्वयः ॥ २६ ॥ ब्रह्मा परः असुरः अवरः एषा परावरमतिः उत्कृष्टनिकृष्टबुद्धि भवतो न स्यात् यथा जन्तोः प्राकृतस्य भवति । कुतः जगतः आत्मनः सुहृदश्च । तथापि सुरतरोरिव सं सेवया ते प्रसादो भवति तदनुरूपम् उदयः फलंप्राप्तिश्च भवति । अत्र परावरत्व मुच्चनीचत्वं प्रसादकारणं नास्ति ॥ २७ ॥ एवं प्रभवः संसार एव अहिकूपस्तस्मिन् पतितं जनमनुसृत्य तत्प्रसङ्गात् प्रपतन् योऽहं नारदेन आत्मसात्कृत्व । आत्मीयं मत्वा गृहीतः सोऽहं भृत्यसेवां कथं नु विसृजेत्यक्ष्यामीत्यन्वयः । कथंभूतम् । कामान् विषयान् अभितः कामयते तम् ॥२८॥ भो अनन्त असत् मद्वधं विधित्सुः सन् मत्पिता खड्गं प्रगृह्य यत् यदा अवोचत् । किम् । मत् मत्तः अपर ईश्वरश्चेत् त्वाम् अवतु अहं ते कं शिरो हरामि छिनद्मि । तदा रक्षणं वधश्चेत्युभयं कार्यं सत्यं कर्तुं मन्ये इत्यन्वयः॥२९॥ एतत् दृश्यमानं जगत् त्वमेवासि । यत् यतः अमुष्य जगतः आद्यन्तयोः पृथक् अवस्यसि प्रतीयसे । अतो मध्यतः मध्येऽपि त्वमेव । कुतः । गुणव्यतिकरं गुणेपरिणामरूपमिदं जगत् सृष्ट्वा तत् तत्र अनुप्रविष्टस्त्वं तैरेव गुणैः नानेव अवसितः प्रतीतो भवसि । स्रष्टा इव पालकः इव हन्तेव ॥ ३० ॥ हे ईश इदं सदसत् कार्यकारणात्मकं जगत् त्वं वै त्वमेव । भवांस्तु ततो जगतोऽन्यः । यत् यस्मादेवमतः आत्मीयः परकीयः

न्यस्येदमात्मनि जगद् विलयाम्बुमध्ये शेषेत्मना निजसुखानुभवो निरीहः ।
योगेन मीलितदृगात्मनिपीतनिद्रस्तुर्ये स्थितो न तु तमो न गुणांश्च युङ्क्षे ॥३२॥
तस्यैव ते वपुरिदं निजकालशक्त्या संचोदितप्रकृतिधर्मण आत्मगूढम् ।
अम्भस्यनन्तशयनाद् विरमत्समाधेर्नाभेरभूत् स्वकणिकावटवन्महाब्जम् ॥३३॥
तत्सम्भवःकविरतोऽन्यदपश्यमानस्त्वां बीजमात्मनि ततं स्वबहिर्विचिन्वन्।
नाविन्ददब्दशतमप्सु निमज्जमानो जातेऽङ्कुरे कथमुहोपलभेत बीजम् ॥३४॥
स त्वात्मयोनिरतिविस्मित आस्थितोऽब्जं कालेन तीव्रतपसा परिशुद्धभावः।
त्वामात्मनीश भुवि गन्धमिवातिसूक्ष्मं भूतेन्द्रियाशयमये विततं ददर्श ॥३५॥
एवं सहस्रवदनाङ्घ्रिशिरः करोरुनासास्यकर्णनयनाभरणायुधाढ्यम् ।
मायामयं सदुपलक्षितसंनिवेशं दृष्ट्वा महापुरुषमाप मुदं विरिञ्चः ॥३६॥

इति या भेदबुद्धिः सा माया अविद्याकल्पिता अतोऽपार्था मिथ्याभूतैव । यत् यस्मात् कारणात् यस्य जन्म ईक्षणं प्रकाशः तथा यस्मिन् निधनं लयः स्थितिश्च तदेतद्भिन्नमपि कार्यं तदेव कारणाभिन्नमेव । अत्र दृष्टान्तः । अष्ठिः बीजं तरुः वृक्षः तयोः कारणकार्यरूपयोः बीजवृक्षयोः द्वयोरेव वसुत्वं भूतसूक्ष्म गन्धतन्मात्रत्वम् कालत्वं पृथ्वीरूपत्वं च तदुद्भवत्वेनाभिन्नत्वम् एवं सर्वमपि कारणकार्यात्मकं जगत् परमकारणपरमेश्वराभिन्नत्वेन तद्रूपमेवेति । ज्ञेयम् ॥३१॥ इदं दृश्यमानं जगत्मना आत्मना आत्मनि न्यस्य लीनीकृत्य प्रलयोदकमध्ये त्वं शेषे[1] स्वपिषि अतस्तदा न तमः प्रकृतिं युङ्क्षे स्वीकरोषि न च गुणान् विषयान् यतः तुर्ये स्थितः । कथंभूतः । निजेति । अत एव मीलितदृक् निरीहः मायिकलीलानिवृत्तश्च । आत्मना निपीता निद्रा येन सः ॥ ३२ ॥ यस्त्वम् अम्भसि शेषे तस्यैव ते इदं जगत् वपुः नान्यस्य । यतः आत्मनि त्वय्येव गूढं प्रलये लीनम् । पुनश्च सृष्ट्यारम्भे तव नाभेः सकाशात् महाब्जं लोकात्मकं पद्ममभूत् । स्वकणिकातः सूक्ष्मवटबीजात् महावट इव । कथंभूतस्य तव । शक्त्या सञ्चोदिताः संक्षोभिताः प्रकृते र्गुणा येन तस्य । अत एव शेषशय्यातः विरमन् शिथिलीभवन् समाधिर्यस्य तस्य ॥ ३२ ॥ तत्संभवः पद्मोद्भवः कविः ब्रह्मा अतः पद्मादन्यत् किमपि वस्तु न पश्यन् तद् बीजमुपादानकारणभूतं त्वाम् आत्मनि विततं व्याप्तं सन्तमपि नाविन्दत् कुतः । स्वबहिरेव विचिन्वन् अन्विष्यन् अब्दशतम् अप्सु निमज्जमानः निमग्नोऽपि । युक्तं चैतत् । उह अहो अङ्कुररूपेण बीजे परिणते सति पुनर्बीजं पृथक् कथमुपलभेत न कथमपि ॥ ३४ ॥ हे ईश ! स तु आत्मयोनिः ब्रह्मा अन्वेषणात् निवृत्य अब्जमास्थितः सन् त्वाम् आत्मनि स्वदेहे विततं व्याप्तं ददर्शेत्यन्वयः । कथंभूतः । कालेन मनुष्यमानेन शतवर्षपर्यन्तं यत् तपो ध्यानं तेन शुद्धान्तःकरणः सन् । कस्यां कमिव । भुवि अतिसूक्ष्मं गन्धमिव त्वाम् । कथंभूते आत्मनि । भूतेति योज्यम् ॥ ३५ ॥ विरिञ्चो ब्रह्मा एवं भूतं महापुरुषं त्वां दृष्ट्वा मुदमापेत्यन्वयः । कथंभूतम् । सहस्रमपरिमितानि यानि वदनादीनि तैराढ्यं परिपूर्णम् । पुनश्च । सता प्रपञ्चेन उपलक्षितः सन्निवेशः पादादिरचना यस्य । पुनः । मायया आमयम्

---

१. त्मना इत्यत्र 'मन्त्रेष्वाङ्यादेरात्मनः' इत्याकारलोपः ।

तस्मै भवान् हयशिरस्तनुवं च बिभ्रद् वेदद्रुहावतिबलौ मधुकैटभाख्यौ।
हत्वाऽनयच्छ्रुतिगणांस्तु रजस्तमश्च सत्त्वं तव प्रियतमां तनुमामनन्ति ॥३७॥
इत्थं नृतिर्यगृषिदेवझषावतारैर्लोकान् विभावयसि हंसि जगत्प्रतोपान्।
धर्मं महापुरुष पासि युगानुवृत्तं छन्नः कलौ यदभवस्त्रियुगोऽथ स त्वम् ॥३८॥
नैतन्मनस्तव कथासु विकुण्ठनाथ सम्प्रीयते दुरितदुष्टमसाधु तीव्रम्।
कामातुरं हर्षशोकभयैषणार्तं तस्मिन् कथं तव गतिं विमृशामि दीनः ॥३९॥
जिह्वैकतोऽच्युत विकर्षति मावितृप्ता शिश्नोऽन्यतस्त्वगुदरं श्रवणं कुतश्चित्।
घ्राणोऽन्यतश्चपलदृक् क्व च कर्मशक्तिर्बह्व्यः सपत्न्य इव गेहपतिं लुनन्ति ॥४०॥
एवं स्वकर्मपतितं भववैतरण्यामन्योजन्ममरणाशनभीतभीतम्।
पश्यञ्जनं स्वपरविग्रहवैरमैत्रं हन्तेति पारचर पीपृहि मूढमद्य ॥४१॥
को न्वत्र तेऽखिलगुरो भगवन् प्रयास उत्तारणेऽस्य भवसम्भवलोपहेतोः।
मूढेषु वै महदनुग्रह आर्तबन्धो किं तेन ते प्रियजनाननुसेवतां नः ॥४२॥

रोगरूपम्। [1]कृपाप्रचुरं वा। न चात्र वदनास्ययः पौनरुक्त्यं शंक्यम् आस्यशब्दस्यात्र [2]मुखान्तरालवाचित्वात् ॥ ३६ ॥ पुनः सृष्टिकाले भवान् तनुवं हयग्रीवमूर्तिं बिभ्रत् मधुकैटभौ हत्वा तस्यै ब्रह्मणे श्रुतिगणान् आनयत् आनीय समर्पितवानित्यन्वयः। सत्त्वं शुद्धसत्त्वात्मिकाम्। आमनन्ति कीर्तयन्ति ॥३७॥ इत्थं नराद्यवतारैः लोकान् धार्मिकान् पालयसि। प्रतीपान् प्रतिकूलान् अधार्मिकान् हंसि। युगानुगतं वर्णाश्रमादि धर्मं च पासि। कलौ तु यत् यस्मात् साक्षाद्रूपं पिधाय छन्नोऽभवः अथ अतः स त्वं त्रियुग[3] इत्युच्यते त्रिषु युगेष्वाविर्भावात्। कृष्णवराहपरशुरामवामनमत्स्यादिभिः क्रमेणार्थाः ॥ ३८ ॥ यदेतत् मनः तव कथासु न संप्रीयते न प्रसीदति। न लगति तस्मिन् मनसि तव तत्त्वं प्राप्तिमार्गं कथं विमृशामि विचारयामीत्यन्वयः। यतो दीनः व्यग्रः। कथंभूतं मनः। दुरितैः दुर्वासनाभिः दूषितम्। असाधु बहिर्मुखम्। तीव्रं चञ्चलम्। लोकवित्तपुत्रैषणात्रयेण आर्तं पीडितं च ॥ ३९ ॥ अत्र अवितृप्तेति पदं लिङ्ग व्यत्ययेन सर्वत्रान्वेति हे अच्युत जिह्वा एकतः रसं मा मां विकर्षति। अवितृप्तः शिश्नः मैथुनं प्रति। उदरम् आहारं प्रति। श्रवणं कुतश्चित् शब्दं प्रति। घ्राणोऽन्यतः गन्धं प्रति। चपला दृक् चक्षुः रूपं प्रति। कर्मशक्तिः[4] कर्मेन्द्रियाणां शक्तयः स्वस्वव्यापारं प्रति। बह्व्यः पत्न्यः हस्तपादाद्याकर्षणेन गेहपतिं यथा लुनन्ति त्रोटयन्ति तथा इमानि त्वद्विमुखं मां कुर्वन्तीत्यर्थः॥४०॥ [5]वैतरण्यां पतितं किंकर्तव्यमूढं जनं पश्यन् हे पारचर त्वं पारेचरसीति हेतोः हन्त कृपया पारं कृत्वा एनं पिपृहि पालय-पोषय चेत्यन्वयः। कथंभूतम्। जन्ममरणाभ्यां यत् अशनं कर्मभोगस्तेन अतिभीतम्। पुनश्च स्वेषां परेषां च विग्रहे विरोधे वैरं शत्रुती मैत्रं मित्रता च यस्य तम् ॥ ४१ ॥ हे आर्तबन्धो। अत्र सर्वजनोत्तारणे तव को नु प्रयासः न कोऽपि। यतः। अस्य विश्वस्य सृष्टिपालनसंहारकर्तुस्तव। महत-

---

१. प्राचुर्ये मयट्। २. मुखं मुखान्तरालं च द्वयमास्यमितीरितम्। इति शाश्वतः।
३. सत्यादित्रियुगे विष्णुः साक्षाद्रूपेण जायते गोविप्रसुरसाधूनां रक्षणाय कलौ तु सः ॥
स्वावेशमेव। कुरुते साक्षाद्रूपं पिधाय च द्विजातिष्वेव नान्यत्र त्रियुगत्वमतो हरेः इति वारतन्तविः ॥
४. जातावेकवचनम्। ५. वैतरण्यः पारे चारतीति।

नैवोद्विजे पर दुरत्ययवैतरण्यास्त्वद्वीर्यगायनमहामृतमग्नचित्तः।
शोचे ततो विमुखचेतस इन्द्रियार्थमायासुखाय भरमुद्वहतो विमूढान् ॥४३॥
प्रायेण देव मुनयः स्वविमुक्तिकामा मौनं चरन्ति विजने न परार्थनिष्ठाः।
नैतान् विहाय कृपणान् विमुमुक्ष एको नान्यं त्वदस्य शरणं भ्रमतोऽनुपश्ये॥४४॥
यन्मैथुनादि गृहमेधिसुखं हि तुच्छं कण्डूयनेन करयोरिव दुःखदुःखम्।
तृप्यन्ति नेह कृपणा बहुदुःखभाजः कण्डूतिवन्मनसिजं विषहेत धीरः॥४५॥
मौनव्रतश्रुततपोऽध्ययनस्वधर्मव्याख्यारहोजपसमाधय आपवर्ग्याः।
प्रायःपरं पुरुष ते त्वजितेन्द्रियाणां वार्ता भवन्त्युत न वात्र तु दाम्भिकानाम्॥४६॥
रूपे इमे सदसती तव वेदसृष्टे बीजाङ्कुराविव न चान्यदरूपकस्य।
युक्ताः समक्षमुभयत्र विचिन्वते त्वां योगेन वह्निमिव दारुषु नान्यतः स्यात्॥४७॥
त्वं वायुरग्निरवनिर्वियदम्बुमात्राः प्राणेन्द्रियाणि हृदयं चिदनुग्रहश्च।
सर्वं त्वमेव सगुणो विगुणश्च भूमन् नान्यत् त्वदस्त्यपि मनोवचसा निरुक्तम्॥४८॥
नैते गुणा न गुणिनो महदादयो ये सर्वे मनःप्रभृतयः सहदेवमर्त्याः।
आद्यन्तवन्त उरुगाय विदन्ति हि त्वामेवं विमृश्य सुधियो विरमन्ति शब्दात्॥४९॥

स्तव अनुग्रह एव उचितः। ते प्रियजनान् अनुसेवतां नः तेन त्वत्कर्तृत्तारणेन किम् वयं तु भक्त सेवयैव तरिष्यामः ॥ ४२ ॥ हे पर परिपूर्ण भववैतरण्या अहं नैव उद्विजे नैव बिभेमि। कुतः त्वद्गुणगायनमेव महामृतं परमानन्दः तत्र निमग्नं चित्तं यस्य सोऽहं। किन्तु ततो महामृतात् विमुखं चित्तं येषां तान् विमूढान् शोचामि प्रत्युत इन्द्रियार्थम् इन्द्रियतृप्त्यर्थं मायिकसुखाय भरं कुटुम्बादिभारम् उद्वहतः बिभ्रतः ॥ ४३ ॥ विजने एकान्ते मौनं मौनव्रतमाचरन्ति। परोपकारनिष्ठा न भवन्ति। न विमुमुक्षे मुक्तिं नेच्छामि। नानायोनिषु भ्रमतोऽस्य त्वत्तोऽन्यं शरणं रक्षकं न पश्यामि ॥ ४४ ॥ गृहमेधिनां गृहस्थानां यत् सुखं तत् तुच्छं क्षणिकम्। पाम्ना दूषितयोः करयोः संघर्षणेन दुःखं मनु दुःखमेव यस्मिन् तथाभूतम्। अथापि कृपणाः कामिनः न तृप्यन्ति तत्र अलं बुद्धिं न कुर्वन्ति। कश्चिदेव धीरः त्वत्कृपाभाजनः सन् कण्डूतिवत् कामं सहेत न सर्वे ॥४५॥ नापि मौनादिभिः मुक्तिः सुलभेत्याह हे पुरुष अन्तर्यामिन्। मौनादयो दश अपवर्ग हेतवः सन्ति किन्तु अजितेन्द्रियाणां कामुकानां प्रायः वार्ता जीवनोपाया भवन्ति। दाम्भिकानां तु वार्ता भवन्ति न वा भवन्ति दम्भस्याचिरस्थायित्वात्। रह एकान्तवासः ॥ ४६ ॥ बीजाङ्कुराविव प्रवाहापन्ने इमे सदसती कार्यकारणे ते रूपे वेदेन सृष्टे निरूपिते। न च त्वत्तोऽन्यत् किमपि। अरूपकस्य प्राकृतरूपरहितस्य तव। अतो युक्ताः विवेकिनः उभयत्र कार्ये कारणे च अनुगतं त्वां भक्त्या प्रत्यक्षं विचिन्वते अन्विष्य पश्यन्ति। दारुषु स्थितं वह्निं यथा मथनेन तद्वत् अन्यत् उपायान्तरेण त्वज्ज्ञानं न स्यात् ॥ ४७ ॥ हे भूमन् महत्तम। वाय्वादि विगुणपर्यन्तं सर्वं त्वमेवेत्यन्वयः। मात्राः तन्मात्राः। हृदयं मनः। चित् चित्तम्। अनुग्रहोऽहङ्कारः। सगुणः स्थूलः। विगुणः सूक्ष्मः। किं बहुना अन्यदपि यत् किञ्चित् निरुक्तं तत् त्वत्तोऽन्यत् नास्ति सर्वं त्वमेव ॥ ४८ ॥ गुणिनः गुणकार्यभूता महदादयः ये च मनः प्रभृतयः ते

तत् तेऽर्हत्तम नमःस्तुतिकर्मपूजाः कर्म स्मृतिश्चरणयोः श्रवणं कथायाम् ।
संसेवया त्वयि विनेति षडङ्गया किं भक्तिं जनः परमहंसगतौ लभेत ॥५०॥

नारद उवाच

एतावद्वर्णितगुणो भक्त्या भक्तेन निर्गुणः । प्रह्लादं प्रणतं प्रीतो यतमन्युरभाषत ॥५१॥

श्रीभगवानुवाच

प्रह्लाद भद्र भद्रं ते प्रीतोऽहं तेऽसुरोत्तम । वरं वृणीष्वाभिमतं कामपूरोऽस्म्यहं नृणाम् ॥५२॥
मामप्रीणत आयुष्मन् दर्शनं दुर्लभं हि मे । दृष्ट्वा मां न पुनर्जन्तुरात्मानं तप्तुमर्हति ॥५३॥
प्रीणन्ति ह्यथ मां धीराःसर्वभावेन साधवः । श्रेयस्कामा महाभागाः सर्वासामाशिषां पतिम्॥५४
एवं प्रलोभ्यमानोऽपि वरैर्लोकप्रलोभनैः । एकान्तित्वाद् भगवति नैच्छत् तानसुरोत्तमः ॥५५॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां सप्तमस्कन्धे प्रह्लादचरिते भगवत्स्तवो नाम नवमोऽध्यायः ॥ ९ ॥

अथ दशमोऽध्यायः

नारद उवाच

भक्तियोगस्य तत् सर्वमन्तरायतयाऽर्भकः । मन्यमानो हृषीकेशं स्मयमान उवाच ह ॥ १ ॥

प्रह्लाद उवाच

मा मां प्रलोभयोत्पत्त्याऽऽसक्तं कामेषु तैर्वरैः । तत्सङ्गभीतो निर्विण्णो मुमुक्षुस्त्वामुपाश्रितः॥२॥

सर्वे जडा आद्यन्तवन्तश्च त्वं न विदन्ति । कथंभूताः देवैः मर्त्यैश्च सहिताः । अतः सुधियः विवेकिनः भगवद्भक्त्यैव तत्त्वज्ञानमिति विमृश्य शास्त्राभ्यासात् विरमन्ति । हे उरुगाय ! उरुभिः शास्त्रैः गीयते इति ॥ ४९ ॥ [1]हे महत्तम ! नमश्च स्तुतिकर्म स्तुतिकरणं च पूजाश्च ताः । कर्म सेवाकर्म पादसंवाहनादि एवं षडङ्गया सेवया विना किं भक्तिं लभेत नैवेत्यन्वयः । परमहंसा ज्ञानिनः तेषां गतौ प्राप्ये ॥ ५० ॥ एतावन्मात्रं वर्णिता गुणा यस्य । तेषामानन्त्यं सूचितम् । यतमन्युः निरुद्धकोपः ॥ ५१ ॥ कामान् पूरयतीति कामपूरः ॥ ५२ ॥ अप्रीणयतः अप्रसादयतः पुंसः । तप्तुं शोचितुं नार्हतीत्यन्वयः । जन्तुः देही ॥ ५३ ॥ प्रीणयन्ति प्रसादयन्ति । आशिषां फलानां पतिं दातारम् । सर्वभावेन नवधा भक्त्या प्रीणयन्ति नोषयन्ति ॥ ५४ ॥ एकान्तित्वात् निष्कामत्वात् ॥ ५५ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे गूढार्थदीपिन्यां नवमोऽध्यायः

●

दशमे सद्वरान् दत्वा नृसिंहेऽन्तर्हिते सति ।
प्रह्लादस्याभिषेकोऽभूत् रुद्रदग्धं पुरत्रयम् ॥

तत्सर्वं वरसमूहम् । स्मयमानः । प्रभुः किं मां परीक्षते इति मन्दं हसन् । ह स्फुटम् ॥ १ ॥ तैर्वरैः मां मा प्रलोभय । यतः तेषु उत्पत्त्या जन्मनैव आसक्तम् । निर्विण्णः विरक्तः तान् मोक्तुमिच्छुः

---

१. अयमेव पाठः प्रशस्तः ।

भृत्यलक्षणजिज्ञासुर्भक्तं कामेष्वचोदयत् । भवान् संसारबीजेषु हृदयग्रन्थिषु प्रभो ॥ ३ ॥
नान्यथा तेऽखिलगुरो घटेत करुणात्मनः । यस्त आशिष आशास्ते न स भृत्यः स वै वणिक् ॥४॥
आशासानो न वै भृत्यःस्वामिन्याशिष आत्मनः।न स्वामी भृत्यतःस्वाम्यमिच्छन् यो राति चाशिषः
अहं त्वकामस्त्वद्भक्तस्त्वं च स्वाम्यनपाश्रयः । नान्यथेहावयोरर्थो राजसेवकयोरिव ॥ ६ ॥
यदि रासीश मे कामान् वरांस्त्वं वरदर्षभ । कामानां हृद्यसंरोहं भवतस्तु वृणे वरम् ॥ ७ ॥
इन्द्रियाणि मनः प्राण आत्मा धर्मो धृतिर्मतिः । ह्रीःश्रीस्तेजः स्मृतिःसत्यं यस्य नश्यन्ति जन्मना८
विमुञ्चति यदा कामान् मानवो मनसि स्थितान् । तर्ह्येव पुण्डरीकाक्ष भगवत्त्वाय कल्पते ॥९॥
नमो भगवते तुभ्यं पुरुषाय महात्मने । हरयेऽद्भुतसिंहाय ब्रह्मणे परमात्मने ॥१०॥

नृसिंह उवाच

नैकान्तिनो मे मयि जात्विहाशिष आशासतेऽमुत्र च ये भवद्विधाः ।
अथापि मन्वन्तरमेतदत्र दैत्येश्वराणामनुभुङ्क्ष्व भोगान् ॥११॥
कथा मदीया जुषमाणः प्रियास्त्वमावेश्य मामात्मपि सन्तमेकम् ।
सर्वेषु भूतेष्वधियज्ञमीशं यजस्व योगेन च कर्म हिन्वन् ॥१२॥
भोगेन पुण्यं कुशलेन पापं कलेवरं कालजवेन हित्वा ।
कीर्ति विशुद्धां सुरलोकगीतां विताय मामेष्यसि मुक्तबन्धः ॥१३॥

य एतत् कीर्तयेन्मह्यं त्वया गीतमिदं नरः । त्वां च च स्मरन् काले कर्मबन्धात्प्रमुच्यते ॥१४॥

प्रह्लाद उवाच

वरं वरय एतत् ते वरदेशान्महेश्वर । यदनिन्दत् पिता मे त्वामविद्वांस्तेज ऐश्वरम् ॥१५॥

सन् ॥ २ ॥ लक्षणं निष्कामत्वरूपम् । अन्यथा अनर्थसाधने प्रवर्तनं न घटेत । कथंभूतेषु बीजेषु कारणेषु । हृदयस्य ग्रन्थिव द्वन्धकेषु च ॥ ३ ॥ ते त्वत्तः आशिषः कामान् आशास्ते इच्छति ॥ ४ ॥ आत्मनः स्वकृते स्वामिनि वर्तमानो आशिषः कामान् आशासानः यः इच्छन् भवति स न भृत्यः । यश्च भृत्यतः स्वाम्यं स्वार्थमिच्छन् तस्मै ददाति सोऽपि न स्वामी वणिगेव ॥ ५ ॥ अनपाश्रयः अपेक्षारहितः । अतः आवयोरर्थः प्रयोजनम् राजसेवकयोरिव अन्यथा परस्परस्वार्थमूलो नास्ति ॥ ६ ॥ रासि ददासि तर्हि स्वहृदि कामाङ्कुराणाम् असंरोहम् अनुत्पत्ति भवतः सकाशात् वरं वृणे ॥ ७ ॥ यस्य कामाङ्कुरस्य जन्मना हृदि संरोहमात्रेण इन्द्रियादीनि सत्यान्तानि द्वादश नश्यन्तीत्यन्वयः । एषां भगपद्विमुखत्वेन कुपथगामित्वैव नाशः । आत्मा देहः ॥ ८ ॥ भगवत्त्वाय भगवत्पार्षदाय । कल्पते योग्यो भवति ॥ ९ ॥ ॐ नमः—स्पष्टम् ॥ १० ॥ ये भवद्विधा निष्कामाः ते इह परत्र च जातु कदाचिदपि आशिषः नाशासते न वाञ्छन्ति अथापि मदादेशेन भुङ्क्ष्वेत्यन्वयः । मन्वन्तरपर्यन्तम् ॥ ११ ॥ जुषमाणः सेवमानः । सर्वेषु भूतेषु सन्तमपि माम् आत्मनि स्वहृदये आवेश्य स्थिरीकृत्य यजस्वेत्यन्वयः । योगेन मय्यर्पणेन कर्म तत्फलं न तु कर्म हिन्वन् त्यजन् । अधियज्ञं यज्ञफलाध्यक्षम् ॥ १२ ॥ कुशलेन पुण्येन । विताय विस्तार्य ॥ १३ ॥ मह्यं मामुद्दिश्य गीतमिदं स्तोत्रं यः कीर्तयेत् सोऽपि मुच्यते इत्यन्वयः ॥१४॥ वरमिति त्रिकम् । ते त्वत्तः एतदपरं वरं वरये वृणे किं तत् । मे पिता त्वां यत् अनिन्दत् तस्मात्

विद्वामर्षाशयः साक्षात् सर्वलोकगुरुं प्रभुम् । भ्रातृहेति मृषादृष्टिस्त्वद्भक्ते मयि चाघवान् १६।
तस्मात् पिता मे पूयेत दुरन्ताद् दुस्तरादघात् । पूतस्तेऽपाङ्गसंदृष्टस्तदा कृपणवत्सल ॥१७॥

श्रीभगवानुवाच

त्रिसप्तभिः पिता पूतः पितृभिः सह तेऽनघ । यत् साधोऽस्य गृहे जातो भवान् वै कुलपावनः
यत्र यत्र च मद्भक्ताः प्रशान्ताः समदर्शिनः । साधवः समुदाचारास्ते पूयन्तेपि कीकटाः ॥१९॥
सर्वात्मना न हिंसन्ति भूतग्रामेषु किंचन । उच्चावचेषु दैत्येन्द्र मद्भावेन गतस्पृहाः ॥२०॥
भवन्ति पुरुषा लोके मद्भाक्तास्त्वामनुव्रता ।भवान् मे खलु भक्तानां सर्वेषां प्रतिरूपधृक् ॥२१॥
कुरु त्वं प्रेतकार्याणि पितुःपूतस्य सर्वशः । मदङ्गस्पर्शनेनाङ्ग लोकान् यास्यति सुप्रजाः ॥२२॥
पित्र्यं च स्थानमातिष्ठ यथोक्तं ब्रह्मवादिभिः । मय्यावेश्य मनस्तात कुरु कर्माणि मत्परः ॥२३॥

नारद उवाच

प्रह्लादोऽपि तथा चक्रे पितुर्यत्साम्परायिकम् ।यथाऽऽह भगवान् राजन्नभिषिक्तो द्विजोत्तमैः२४
प्रसादसुमुखं दृष्ट्वा ब्रह्मा नरहरिं हरिम् । स्तुत्वा वाग्भिः पवित्राभिःप्राह देवादिभिर्वृतः॥२५॥

ब्रह्मोवाच

देवदेवाखिलाध्यक्ष भूतभावन पूर्वज । दिष्टया ते निहतः पापो लोकसंतापनोऽसुरः ॥२६॥
योऽसौ लब्धवरो मत्तो न वध्यो मम सृष्टिभिः । तपोयोगबलोन्नद्धः समस्तनिगमानहन् ॥२७॥
दिष्टयास्य तनयः साधुर्महाभागवतोऽर्भकः । त्वया विमोचितो मृत्योर्दिष्टयां त्वां समितोऽधुना२८
एतद् वपुस्ते भगवन् ध्यायतः प्रयतात्मनः । सर्वतो गोप्तृ संत्रासान्मृत्योरपि जिघांसतः ॥२९

नृसिंह उवाच

मैवं वरोऽसुराणां ते प्रदेयः पद्मसम्भव । वरः क्रूरनिसर्गाणामहीनाममृतं यथा ॥३०॥

अघात् स पूयेत शुद्धयेदिति तृतीयेनान्वयः । ईश्वरस्य तव सम्बन्धि ऐश्वरं तेजः प्रभावम् अविद्वान् अजानन् सन्। यदा अपाङ्गेन दृष्ट स्तदैव पूतः तथापि श्रीमुखात् श्रोतुमिच्छामि । विद्धः अमर्षेण क्रोधेन आशयोऽन्तः-करणं यस्य सः ॥१५।१६।१७॥ हे साधो ! त्रिः सप्तभिः एकविंशतिपितृभिः सहितोऽपि यदि ते पिता स्यात्तदापि पूतो भवेत् तस्य तु कश्यपमरीचिब्रह्माणः त्रय एव पितरोऽभूवन् प्राक्कल्पीयानामधुना पितृत्वानुपपत्तेः जयविजययोरपरजन्माश्रवणाच्च ॥ १८ ॥ सम्यक् उत् उत्तम आचारो येषां ते समुदा-चाराः । कीकटाः अङ्गवङ्गादय । म्लेच्छदेशा वा । पूयन्तेऽपि इति पाठः ॥ १९ ॥ सर्वात्मना मनसा वाचा कर्मणा किमपि प्राणिजातम् ॥ २० ॥ अनुव्रता अनुयामिनः । प्रतिरूपम् उपमानं धृजतीति धृज्-धारणे क्विप् ॥ २१ ॥ अङ्ग हे वत्स ! मदङ्गस्पर्शनेन पूतस्य । यतः सुप्रजाः सत्पुत्रस्त्वम् ॥ २२ ॥ पित्र्यं पितृसम्बन्धि । ब्रह्मवादिभिः यथोक्तं तथैव कुर्वित्यन्वयः । हे तात ॥ २३ ॥ यत् साम्परायिकं पारलौकिकं कृत्यं तच्चक्रुः ॥ २४ ॥ पवित्राभिः वैदिकीभिः ॥ २५ ॥ भूतानि भावयति पालयति तथा । ते त्वया निहतः एतद् दिष्ट्या भद्रं जातम् ॥ २६ ॥ उन्नद्धः गर्वितः । निगमान् निगमोक्तधर्मान् अहन् हतवान् स हत इत्यन्वयः ॥२७॥ मृत्योः सकाशात् मोचितः त्वां समितः सम्यक् इतः शरणं प्राप्तः ॥२८॥ ध्यायतः पुंसः । सर्वतः संत्रासात् भयात् गोप्तृ रक्षकम्॥२९॥असुराणाम् असुरेभ्यः । शेषे षष्ठी ।

नारद उवाच

इत्युक्त्वा भगवान् राजंस्तत्रैवान्तर्दधे हरिः। अदृश्यः सर्वभूतानां पूजितः परमेष्ठिना ॥३१॥
ततः सम्पूज्य शिरसा ववन्दे परमेष्ठिनम्। भवं प्रजापतीन् देवान् प्रह्लादो भगवत्कलाः ॥३२॥
ततः काव्यादिभिः सार्धं मुनिभिःकमलासनः। दैत्यानां दानवानां च प्रह्लादमकरोत् पतिम् ॥३३॥
प्रतिनन्द्य ततो देवाः प्रयुज्य परमाशिषः। स्वधामानि ययू राजन् ब्रह्माद्याः प्रतिपूजिताः ३४
एवं तौ पार्षदौ विष्णोः पुत्रत्वं प्रापितौ दितेः। हृदि स्थितेन हरिणा वैर भावेन तौ हतौ ।३५
पुनश्च विप्रशापेन राक्षसौ तौ बभूवतुः। कुम्भकर्णदशग्रीवौ हतौ तौ रामविक्रमैः ॥३६॥
शयानौ युधि निर्भिन्नहृदयौ रामसायकैः। तच्चित्तौ जहतुर्देहं यथा प्राक्तनजन्मनि ॥३७॥
ताविहाथ पुनर्जातौ शिशुपालकरूषजौ। हरौ वैरानुबन्धेन पश्यतस्ते समीयतुः ॥३८॥
एनः पूर्वकृतं यत् तद् राजानः कृष्णवैरिणः। जहुस्त्वन्ते तदात्मानः कीटः पेशस्कृतो यथा३९
यथा यथा भगवतो भक्त्या परमयाऽभिदा। नृपाश्चैद्यादयः सात्म्यं हरेस्तच्चिन्तया ययुः ।४०।
आख्यातं सर्वमेतत् ते यन्मां त्वं परिपृष्टवान्। दमघोषसुतादीनां हरेः सात्म्यमपि द्विषाम् ।४१।
एषा ब्रह्मण्यदेवस्य कृष्णस्य च महात्मनः। अवतारकथा पुण्या वधो यत्रादिदैत्ययोः ॥४२॥
प्रह्लादस्यानुचरितं महाभागवतस्य च। भक्तिर्ज्ञानं विरक्तिश्च याथात्म्यं चास्य वै हरेः ॥४३॥
सर्गस्थित्यप्ययेशस्य गुणकर्मानुवर्णनम्। परावरेषां स्थानानां कालेन व्यत्ययो महान् ॥४४॥
धर्मो भागवतानां च भगवान् येन गम्यते। आख्यानेऽस्मिन् समाम्नातमाध्यात्मिकमशेषतः४५
य एतत् पुण्यमाख्यानं विष्णोर्वीर्योपबृंहितम्। कीर्तयेच्छ्रद्धया श्रुत्वा कर्मपाशैर्विमुच्यते ॥४६॥

एतद् य आदि पुरुषस्य मृगेन्द्रलीलां दैत्येन्द्रयूथपवधं प्रयतः पठेत।
दैत्यात्मजस्य च सतां प्रवरस्य पुण्यं श्रुत्वानुभावमकुतोभयमेति लोकम्॥४७॥

क्रूरेति उभयोर्विशेषणम्। अमृतं दुग्धम् ॥ ३० ॥ अत एव सर्वेषामदृश्योऽभूत् ॥ ३१ ॥ ततोऽन्तर्धानानन्तरम्। कला अंशभूतान् ॥ ३२ ॥ काव्यः शुक्राचार्यः ॥ ३३ ॥ परमाशिषः आशीर्वादान् प्रयुज्य दत्वा ॥ ३४ ॥ वैरभावेन हृदीति योज्यम् ॥ ३५ ॥ विप्रः सनकादिः। पुनश्च कालान्तरे ॥ ३६ ॥ निर्भिन्नं विदीर्णं हृदयं ययोस्तौ ॥ ३७ ॥ करूषजो दन्तवक्त्रः। वैरानुबन्धेन वैरभक्त्या। समी यतुः लयं प्रापतुः ॥ ३८ ॥ पूर्वकृतं यत् एनः पापं कृष्ण निन्दारूपं तद्ध्यानेनैव तदात्मानः सन्तः राजानो जहुरित्यन्वयः अन्ते प्रारब्धसमाप्तौ। यथा पेशस्कृतो भृङ्गीत्याख्यस्य ध्यानेन कीटः तदात्मा भवति तद्वत् ॥३९॥ यथा यथा भक्त्या अन्ये सात्म्यं सारूप्यं ययुः तथा चैद्यादयो पीत्यन्वयः। अभिदा व्यवधानशून्यया निरन्तरयेत्यर्थः ॥४०॥ दमघोषः शिशुपालपिता। सात्म्यं सारूप्यम् ॥४१॥ कथा आख्यातेति लिङ्गव्यत्येनान्वयः ॥४२॥ प्रह्लादस्यानुचरितमित्यादेः समाम्नातं कथितमिति तृतीयेनान्वयः। चो हेतौ यतः श्रोतृणां भक्त्यादित्रिकं भवति तथा अस्य हरेः याथात्म्यं स्वरूपज्ञानं च। सर्गादीनामीशस्य कर्तुः भगवतः परावरेषां देवदैत्यादीनां यानि स्थानानि तेषां व्यत्ययो विनाशश्च समाम्नातः। येन गम्यते प्राप्यतेभगवान् सधर्मोऽपि। अशेषतः साकल्येन न किमप्यवशिष्टमित्यर्थः॥४३।४४।४५॥पुण्यं पुण्यजनकम्। उपबृंहितं पूर्णम् ॥ ४६ ॥ एतत् एताम् प्रयतः शुचिः सन् सन्ध्यादिना। 'सन्ध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु

यूयं नृलोके बत भूरिभागा लोकं पुनाना मुनयोऽभियन्ति ।
येषां गृहानावसतीति साक्षाद् गूढं परं ब्रह्म मनुष्यलिङ्गम् ॥४८॥
स वा अयं ब्रह्म महद्विमृग्यकैवल्यनिर्वाणसुखानुभूतिः ।
प्रियः सुहृद् वः खलु मातुलेय आत्मार्हणीयो विधिकृद् गुरुश्च ॥४९॥
न यस्य साक्षाद् भवपद्मजादिभी रूपं धिया वस्तुतयोपवर्णितम् ।
मौनेन भक्त्योपशमेन पूजितः प्रसीदतामेष स सात्वतां पतिः ॥५०॥

स एष भगवान् राजन् व्यतनोद् विहतं यशः । पुरा रुद्रस्य देवस्य मयेनानन्तमायिना ॥५१॥

राजोवाच

कस्मिन् कर्मणि देवस्य मयोऽहञ्जगदीशितुः । यथा चोपचिता कीर्तिः कृष्णेनानेन कथ्यताम् ५२

नारद उवाच

निर्जिता असुरा देवैर्युध्यनेनोपबृंहितैः । मायिनां परमाचार्यं मयं शरणमाययुः ॥५३॥
स निर्माय पुरस्तिस्रो हैमीरौप्यायसीर्विभुः । दुर्लक्ष्यापायसंयोगा दुर्वितर्क्यपरिच्छदाः ॥५४॥
ताभिस्तेऽसुरसेनान्यो लोकांस्त्रीन् सेश्वरान् नृप । स्मरन्तो नाशयाञ्चक्रुः पूर्ववैरमलक्षिताः ५५
ततस्ते सेश्वरा लोका उपासाद्येश्वरं विभो । त्राहि नस्तावकान् देव विनष्टांस्त्रिपुरालयैः ॥५६॥

इति धर्मशास्त्रम् । अनुभावं प्रभावम् । लोकं वैकुण्ठमेति प्राप्नोति । अत्रैकदेशन्यायेन मृगेन्द्रशब्दो नृमृगेन्द्रं वक्ति । दैत्येन्द्र एव यूथपो हस्ती । यद्वा । दैत्येन्द्रस्य यूथपानां च ॥ ४७ ॥ बत[1] विस्मये । येषां गृहान् मुनयः अभियन्ति सर्वतः आयान्ति । कुतः । येषु गृहेषु नराकारं गूढं परं ब्रह्म श्रीकृष्णाख्यं साक्षात् वसतीति हेतोः ॥ ४८ ॥ सोऽयं ब्रह्मैव । कथंभूतः । महद्भिः विमृग्यं कैवल्यमनिर्वचनीयं यत् मोक्षसुखं तस्यानुभूतिरूपः । वो युष्माकं प्रियादिरूपो भवति । विधिकृत् आज्ञाकारी । आत्मा अभिन्नः ॥ ४९ ॥ यस्य रूपं भवादिभिरपि धिया स्वबुद्धया वस्तुतया इदमित्थमिति कृत्वा साक्षात् नोपवर्णितं स युष्माकं मातुलेयः अतो यूयमेव महाभागाः । अस्माकं तु मौनादिना यथा कथञ्चित् पूजितो भवति स एष प्रसीदतामित्यन्वयः । सात्वतां भक्तानाम् ॥ ५० ॥ स एष श्रीकृष्णः पुरा मयेन विहतं रुद्रस्यापि यशः व्यतनोत् विस्तारितवान् ॥ ५१ ॥ देवस्य रुद्रस्य यथा कीर्तिमहन् पुनश्च उपचिता वर्धिता तदेतत् कथ्यतामित्यन्वयः ॥ ५२ ॥ युधि संग्रामे अनेन श्रीकृष्णेन उपबृंहितैः संवर्द्धितैः । शरणं रक्षकम् ॥ ५३ ॥ स मयःपुरः निमर्याय तेभ्यो ददाविति क्रियाशेषः । हेम्नः रूप्यस्य अयसो लोहस्य च विकारः क्रमेण योज्यम् । त्रयाणां द्वन्द्वः । दुर्लक्ष्यौ अपायसंयोगौ गमनागमने यासां ताः । दुर्वितर्क्याः दुर्ज्ञेया युद्धसामग्र्यः यासु ॥ ५४ ॥ सेनान्यः सेनापतयः ताभिः पूर्भिः विमानरूपाभिः लोकान् नाशयाञ्चक्रुः वैरं स्मरन्तः तैरलक्षिता अदृश्यमानाश्च सन्तः ॥ ५५ ॥ सेश्वराः इन्द्रादिसहिता लोका देवा ईश्वरं श्रीरुद्रम् उपासाद्य समीपं गत्वा इदमूचुरिति क्रियाशेषेणान्वयः । किं तत् । नोऽस्मान् त्राहीति ॥५६॥

१, 'खेदानुकम्पासन्तोषविस्मयामन्त्रणे बत' इति कोशात् ।

अथानुगृह्य भगवान् मा भैष्टेति सुरान् विभुः । शरं धनुषि संधाय पुरेष्वस्त्रं व्यमुञ्चत ॥५७॥
ततोऽग्निवर्णा इषवः उत्पेतुः सूर्यमण्डलात् । यथा मयूखसंदोहा नादृश्यन्त पुरो यतः ॥५८॥
तैः स्पृष्टा व्यसवः सर्वे निपेतुः स्म पुरौकसः । ताननीय महायोगी मयः कूपरसेऽक्षिपत् ॥५९॥
सिद्धामृतरसस्पृष्टा वज्रसारा महौजसः । उत्तस्थुर्मेघदलना वैद्युता इव वह्नयः ॥६०॥
विलोक्य भग्नसंकल्पं विमनस्कं वृषध्वजम् । तदायं भगवान् विष्णुस्तत्रोपायमकल्पयत् ॥६१॥
वत्स आसीत्तदा ब्रह्मा स्वयं विष्णुरयं हि गौः । प्रविश्य त्रिपुरं काले रसकूपामृतं पपौ ॥६२॥
तेऽसुरा ह्यपि पश्यन्तो न न्यषेधन् विमोहिताः । तद् विज्ञाय महायोगी रसपालानिदं जगौ ॥६३
स्वयं विशोकः शोकार्तान् स्मरन् दैवगतिं च ताम् ।देवोऽसुरो नरोऽन्यो वा नेश्वरोऽस्तीह कश्चन
आत्मनोऽन्यस्य वा दिष्टं दैवेनापोहितुं द्वयोः । अथासौ शक्तिभिः स्वाभिः शम्भोः प्राधनिकं व्यधात्
धर्मज्ञानविरक्त्यृद्धितपोविद्याक्रियादिभिः । रथं सूतं ध्वजं वाहान् धनुर्वर्म शरादि यत् ॥६६॥
संनद्धो रथमास्थाय शरं धनुरुपाददे । शरं धनुषि संधाय मुहूर्तेऽभिजितीश्वरः ॥६७॥
ददाह तेन दुर्भेद्या हरोऽथ त्रिपुरो नृप । दिवि दुन्दुभयो नेदुर्विमानशतसंकुलाः ॥६८॥
देवर्षिपितृसिद्धेशा जयेति कुसुमोत्करैः । अवाकिरञ्जगुर्हृष्टा ननृतुश्चाप्सरोगणाः ॥६९॥
एवं दग्ध्वा पुरस्तिस्रो भगवान् पुरहा नृप । ब्रह्मादिभिः स्तूयमानः स्वधाम प्रत्यपद्यत ॥७०॥

अनुगृह्य आश्वास्य । शरं[1] नाशकमस्त्रं पाशुपतास्त्रम् ॥ ५७ ॥ ततः शरात् । मयूखसंदोहाः किरणसमूहाः यथा उत्पतन्ति तथा इषवो वाणा निर्जग्मुः यतः यैः शरैः आच्छन्नाः पुरः ॥ ५८ ॥ तैः शरैः स्पृष्टाः[2] उपतप्ताः । व्यसवः निर्गतप्राणाः । कूपरसे मृतसञ्जीवने । अक्षिपत् चिक्षेप ॥ ५९ ॥ तेऽसुराः महौजसः महाबलाः सन्तः तस्मात् कूपात् उत्तस्थुः बहिर्निर्जग्मुः । क इव । विद्युत्सम्बन्धिनः अग्नय इव । दलना भेदिनः । वज्रस्येव सारोऽङ्गदाढर्यं येषां ते ॥ ६० ॥ तत्र त्रिपुरभेदने ॥ ६१ ॥ काले मध्याह्नकाले । रसरूपं यत्कूपेऽमृतम् ॥ ६२ ॥ ते इत्यर्द्धम् । स्पष्टम् ॥ ६३ ॥ तदिति स्पष्टम् ॥ ६४ ॥ आत्मनो वा अन्यस्य वा द्वयोरपि वा दैवेन आदिष्टं प्रापित यत् सुखं दुखं वा तत् अपोहितुमन्यथाकर्तुं कश्चन कोऽपि देवादिषु अन्यतमः ईश्वरः समर्थो नास्ति ॥ ६५ ॥ अथेति सार्द्धम् । असौ श्रीकृष्णः । शम्भोः प्राधनिकं युद्धसाधनं रथादिकं सप्त स्वाभिः सप्तशक्तिभिः क्रमेण व्यधात् सम्पादितवान् । ताः शक्तयः धर्माद्याः ॥६६॥ सन्नद्धः इत्यर्द्धम् धृतकवचः ॥६७॥ ईश्वरः श्रीरुद्रः । अभिजिति मध्याह्ने त्रिपुरः तिस्रःपुरः ॥६८॥ देवादयः जयेति वदन्तः कुसुमोत्करैः पुष्पवर्षैः श्रीरुद्रम् अवाकिरन् आच्छादितवन्तः कथमताः । विमानशतानि सङ्कुलानि सङ्कीर्णानि येषां ते ॥ ६९ ॥ स्वधाम कैलासम् ॥७०॥

---

१. शृणातीति शरः । शॄ हिंसायाम् । ऋदोरप् ।

२. 'स्पृश उपतापे' इत्यस्मान्निष्ठा ।

एवंविधान्यस्य हरेः स्वमायया विडम्बमानस्य नृलोकमात्मनः।
वीर्याणि गीतान्यृषिभिर्जगद्गुरोर्लोकान् पुनानान्यपरं वदामि किम् ॥७१॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां सप्तमस्कन्धे नारदयुधिष्ठिरसंवादे त्रिपुरविजयो नाम दशमोऽध्यायः ॥ १० ॥

अथैकादशोऽध्यायः

श्रीशुक उवाच

श्रुत्वेहितं साधुसभासभाजितं महत्तमाग्रण्य उरुक्रमात्मनः।
युधिष्ठिरो दैत्यपतेर्मुदा युतः प्रप्रच्छ भूयस्तनयं स्वयम्भुवः ॥ १ ॥

युधिष्ठिर उवाच

भगवञ्छ्रोतुमिच्छामि नृणां धर्मं सनातनम्। वर्णाश्रमाचारयुतं यत् पुमान् विन्दते परम् ।२।
भवान् प्रजापतेः साक्षादात्मजः परमेष्ठिनः। सुतानां सम्मतो ब्रह्मंस्तपोयोगसमाधिभिः ॥३॥
नारायणपरा विप्रा धर्मं गुह्यं परं विदुः। करुणाः साधवः शान्तास्त्वद्विधा न तथापरे ॥४॥

नारद उवाच

नत्वा भगवतेऽजाय लोकानां धर्महेतवे। वक्ष्ये सनातनं धर्मं नारायणमुखाच्छ्रुतम् ॥ ५ ॥
योऽवतीर्यात्मनोंऽशेन दाक्षायण्यां तु धर्मतः। लोकानां स्वस्तयेऽध्यास्ते तपो बदरिकाश्रमे ।६।

जगद्गुरोः हरेः एवं विधानि वीर्याणि चरित्राणि बहूनि सन्ति तेषां मध्येऽत्र किञ्चिदुक्तम् अपरमन्यत् किं वदामीत्यन्वयः। कथंभूतस्य। स्वमायया लीलाशक्त्या आत्मनो नृलोकं विडम्बमानस्य अनुकुर्वतः। यद्वा। नृलोकं नृसिंहाकारम् एकदेशन्यायेन ॥ ७१ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे गूढार्थदीपिन्यां दशमोऽध्यायः।

एकादशे नृणां धर्मा वैशिष्ट्येन द्विजन्मनाम्।
नारीणां सङ्कराणां च संक्षेपेणात्र वर्णिताः ॥ १ ॥

दैत्यपतेः प्रह्लादस्य ईहितं चरितं श्रुत्वा युधिष्ठिरः भूयोऽपि ब्रह्मणः तनयं नारदं पप्रच्छेत्यन्वयः। कथंभूतस्य। महत्तमानां भक्तानामग्रण्यः[1] शिरोमणेः। यतः उरुक्रमे महापराक्रमे हरौ आत्मा मनो यस्य। कथंभूतम् ईहितम्। साधूनां सभासु प्रशंसितम् ॥ १ ॥ यत् यतो धर्मात् परं परमेश्वरं विन्दते प्राप्नोति ॥ २ ॥ परमेष्ठिनः ब्रह्मणः साक्षात् मुख्यः। तप आदिभिश्च सुतानां मध्ये सम्मतः प्रियतमश्च ॥ ३ ॥ त्वद्विधा धर्मंगुह्यं धर्मरहस्यं यथा विदुः तथा अपरे मन्वादयो नैव विदुरित्यन्वयः ॥ ४ ॥ अजाय अजं प्रसादयितुम्। धर्महेतवे धर्मप्रवर्तकाय ॥ ५ ॥ यो नारायणः धर्मतः सकाशात् दक्षपुत्र्यां मूर्तौ अंशेन

१. अग्रणीशब्दः तस्य षष्ठ्यन्तं रूपम्। 'एरनेकाचः' इति यण्।

धर्ममूलं हि भगवान् सर्ववेदमयो हरिः । स्मृतं च तद्विदां राजन् येन चात्मा प्रसीदति ॥ ७॥
सत्यं दया तपः शौचं तितिक्षेक्षा शमो दमः । अहिंसा ब्रह्मचर्यं च त्यागःस्वाध्याय आर्जवम्८
संतोषः समदृक्सेवा ग्राम्येहोपरमः शनैः । नृणां विपर्ययेहेक्षा मौनमात्मविमर्शनम् ॥ ९ ॥
अन्नाद्यादेः संविभागो भूतेभ्यश्च यथार्हतः । तेष्वात्मदेवताबुद्धिः सुतरां नृषु पाण्डव ॥१०॥
श्रवणं कीर्तनं चास्य स्मरणं महतां गतेः । सेवेज्यावनतिर्दास्यं सख्यमात्मसमर्पणम् ॥११॥
नृणामयं परो धर्मः सर्वेषां समुदाहृतः । त्रिंशल्लक्षणवान् राजन् सर्वात्मा येन तुष्यति ॥१२॥
संस्कारा यत्राविच्छिन्नाः स द्विजोऽजो जगाद यम् । इज्याध्ययनदानानि विहितानि द्विजन्मनाम्
जन्मकर्मावदातानां क्रियाश्चाश्रमचोदिताः ॥ १३ ॥
विप्रस्याध्ययनादीनि षडन्यस्याप्रतिग्रहः । राज्ञो वृत्तिः प्रजागोप्तुरविप्राद् वा करादिभिः॥१४॥
वैश्यस्तु वार्तावृत्तिश्च नित्यं ब्रह्मकुलानुगः । शूद्रस्य द्विजशुश्रूषा वृत्तिश्च स्वामिनो भवेत् ॥१५॥
वार्ता विचित्रा शालीनयायावरशिलोञ्छनम् । विप्रवृत्तिश्चतुर्धेयं श्रेयसी चोत्तरोत्तरा ॥१६॥
जघन्यो नोत्तमां वृत्तिमनापदि भजेन्नरः । ऋते राजन्यमापत्सु सर्वेषामपि सर्वशः ॥१७॥
ऋतामृताभ्यां जीवेत मृतेन प्रमृतेन वा । सत्यानृताभ्यां जीवेत न श्ववृत्त्या कथंचन ॥१८॥
ऋतमुञ्छशिलं प्रोक्तममृतं यदयाचितम् । मृतं तु नित्ययाच्ञा स्यात् प्रमृतं कर्षणं स्मृतम् ॥१९
सत्यानृतं तु वाणिज्यं श्ववृत्तिर्नीचसेवनम् । वर्जयेत् तां सदा विप्रो राजन्यश्च जुगुप्सिताम् ।
सर्ववेदमयो विप्रः सर्वदेवमयो नृपः ॥ २० ॥

नरेण सह अवतीर्य तपः अध्यास्ते करोति ॥ ६ ॥ मूलं प्रमाणं प्रवर्तकश्च भगवानेव । वेदविदां मन्वादीनां स्मृतिश्च धर्ममूलम् । येन धर्मेण ॥ ७ ॥ सत्यमिति पञ्चकम् । तपः उपवासः । ईक्षा आत्मानात्मविचारः । त्यागो दानम् । आर्जवम् अकौटिल्यम् ॥८॥ समदृशां महताम् सेवा । ग्राम्येहा विषयासक्तिः तस्या निवृत्तिः । विपर्ययेहा निषिद्धकर्मचेष्टा तस्या ईक्षणम् ॥९॥ भूतेभ्यः जीवमात्रेभ्यः अन्नं भक्ष्यं चणकादि । आद्यं भोज्यं संयावादि तदादेः । बुद्धिः भावना । सुतराम् अत्यन्तम् ॥१०॥ महतां भक्तानां गतेः अस्य भगवतः । इज्या पूजा ॥११॥ त्रिंशत्संख्याकः । समुदाहृतः निरूपितः ॥१२॥ संस्कारा इति सार्द्धम् । यत्र अविच्छिन्नाः संस्काराः यं च अजो ब्रह्मा वेदो वा जगाद स द्विज इत्यन्वयः । विप्रस्य षट् कर्माणि विहितानि । तत्र इज्यादीनि त्रीणि आवश्यक कर्माणि । याजनाध्यापनप्रतिग्रहाश्च जीविकाः । अन्यस्य क्षत्रियस्य प्रतिग्रहनिषेधः । प्रतिग्रहातिरिक्तपञ्चकर्माणि । किन्तु तस्य याजनमध्यापनमापद्येव नत्वनापदि । राज्ञः क्षत्रियस्य करादिभिः वृत्तिरित्यन्वयः । वा शब्दात् क्वचित् विप्रादपि ॥ १४ ॥ [1]वार्ता कृष्यादिरूपा । सा च चतुर्विधा । शुश्रूषा धर्मः स्वामिनो वृत्तिः जीविका च ॥१५॥ वार्ताजीविका विचित्रा अन्यापि चतुर्विधा । सा च शालीनमयाचितम् । यायावरं भिक्षाटनम् । शिलं [2]कणिशोपादानम् । उञ्छनम् आपणात्कणोपादानम् ॥ १६ ॥ जघन्यो नीचः नरः शूद्रः । न भजेत नाश्रयेत् । सर्वशः सर्वाः वृत्तयः किन्तु राजन्यं विना ॥ १७ ॥ ऋतेति अग्रिमपद्ये व्याख्यातम् ॥ १८॥ ऋतमिति सार्द्धम् । कर्षणं कृषिः ॥ १९ ॥ तां श्ववृत्तिम् । जुगुप्सितां निन्दिताम् ॥ २० ॥

---

१. कृषिवाणिज्यगोरक्षाकुसीदं तुर्यमुच्यते । वार्ता चतुर्विधा तत्र वयं गोवृत्तयोऽनिशम् । इति दशमोक्तेः ।
२. 'कणिशं सस्यमञ्जरी' इत्यमरः ।

शमो दमस्तपः शौचं संतोषः क्षान्तिरार्जवम् । ज्ञानं दयाऽच्युतात्मत्वं सत्यं च ब्रह्मलक्षणम् ।२१।
शौर्यं वीर्यं धृतिस्तेजस्त्याग आत्मजयः क्षमा । ब्रह्मण्यता प्रसादश्च रक्षा च क्षत्रलक्षणम् ।२२।
देवगुर्वच्युते भक्तिस्त्रिवर्गपरिपोषणम् । आस्तिक्यमुद्यमो नित्यं नैपुणं वैश्यलक्षणम् ॥२३॥
शूद्रस्य संनतिः शौचं सेवा स्वामिन्यमायया । अमन्त्रयज्ञो ह्यस्तेयं सत्यं गोविप्ररक्षणम् ।२४।
स्त्रीणां च पतिदेवानां तच्छुश्रूषानुकूलता । तद्बन्धुष्ववृत्तिश्च नित्यं तद्व्रतधारणम् ॥२५॥
सम्मार्जनोपलेपाभ्यां गृहमण्डलवर्तनैः । स्वयं च मण्डिता नित्यं परिमृष्टपरिच्छदा ।२६।
कामैरुच्चावचैः साध्वी प्रश्रयेण दमेन च । वाक्यैः सत्यैः प्रियैः प्रेम्णा काले काले भजेत् पतिम्
सन्तुष्टाऽलोलुपा दक्षा धर्मज्ञा प्रियसत्यवाक् । अप्रमत्ता शुचिः स्निग्धा पतिं त्वपतितं भजेत् ।२८।
या पतिं हरिभावेन भजेच्छ्रीरिव तत्परा । हर्यात्मना हरेर्लोके पत्या श्रीरिव मोदते ॥२९॥
वृत्तिः संकरजातीनां तत्तत्कुलकृता भवेत् । अचौराणामपापानामन्त्यजान्तेऽवसायिनाम् ॥३०॥
प्रायः स्वभावविहितो नृणां धर्मो युगे युगे । वेददृग्भिः स्मृतो राजन् प्रेत्य चेह च शर्मकृत् ।३१।
वृत्त्या स्वभावकृतया वर्तमानः स्वकर्मकृत् । हित्वा स्वभावजं कर्म शनैर्निर्गुणतामियात् ।३२।
उप्यमानं मुहुः क्षेत्रं स्वयं निर्वीर्यतामियात् । न कल्पते पुनः सूत्यै उप्तं बीजं च नश्यति ॥३३।
एवं कामाशयं चित्तं कामानामतिसेवया । विरज्येत तथा राजन्नाग्निवत् कामबिन्दुभिः ॥३४।
यस्य यल्लक्षणं प्रोक्तं पुंसो वर्णाभिव्यञ्जकम् । यदन्यत्रापि दृश्येत तत् तेनैव विनिर्दिशेत् ।३५।

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां सप्तमस्कन्धे युधिष्ठिरनारदसंवादे सदाचारनिर्णयो नामैकादशोऽध्यायः ॥ ११ ॥

ब्रह्मणो ब्राह्मणस्य । अच्युतात्मत्व विष्णुचित्रत्वम् ॥ २१ ॥ त्यागः उदारता । आत्मजयः मनोजयः । प्रसादः प्रसन्नता ॥ २२ ॥ नैपुण्यं चातुर्यम् ॥ २३ ॥ अमायया निष्कपटभावेन । अमन्त्रेण प्रणवरहितेन इन्द्राय नमः इति विधिना ॥ २४ ॥ तद्व्रतं पत्युर्नियमः तस्य धारणं निर्वाहः ॥ २५ ॥ संमार्जनेति द्वयम् । गृहस्य संमार्जनादिभिः पतिं भजेदित्युत्तरेणान्वयः । मण्डलवर्तनैः स्वस्तिकादिमण्डलकरणैः । परिमृष्टा निर्मलीकृताः परिच्छदा वस्त्रपात्रादयो यया सा । कामैः भोग्यपदार्थैः ॥२६।२७॥ अपतितं महापातक-रहितम् । दक्षा आलस्यरहिता ॥ २८ ॥ लोके वैकुण्ठे । हर्यात्मना हरिरूपेण पत्या सह मोदते ॥२९॥ संकरजातयः द्विविधाः अनुलोमजाः प्रतिलोमजाश्चेति । संकरजातीनामन्त्यजादीनां तत्परम्पराप्राप्ता वस्त्रनिर्णेजनादिरूपा वृत्तिर्भवेत् । अपापानां हिंसारहितानाम् ॥ ३० ॥ स्वभावेन सत्त्वादिप्रकृत्या । शर्मकृत् सुखहेतुः स्मृतः निरूपितः । वेदविद्भिः मन्वादिभिः ॥ ३१ ॥ स्वभावजं कर्म पुण्यपापलक्षणम् । निर्गुणतां गुणातीतावस्थां मुक्तिमित्यर्थः ॥ ३२ ॥ उप्यमानं बीजवपनं क्रियमाणम् । सूत्यै सस्योत्पत्त्यै न कल्पते न समर्थं भवति किं बहुना उप्तं ॥ ३३ ॥ कामा विषया आशेरते यस्मिन् तत् । विरज्येत शान्तं भवति यथा यथावत् न तु कामबिन्दुभिः स्वल्पभोगैः । यथा प्रदीप्तोऽग्निर्घृतबिन्दुभि न शाम्यति महता तु शाम्यत्येव तद्वत् ॥ ३४ ॥ वर्णाभिव्यञ्जकं ब्राह्मणत्वादिबोधकं शमादिलक्षणम् यत् यदि अन्यत्र वर्णान्तरेऽपि । तत् वर्णान्तरे । तेनैव ब्राह्मणादि शब्देनैव विनिर्दिशेत् आदरमात्रं विवक्षितं न त्वर्चनादिकमभिप्रेतमिति शास्त्रनियमात् ॥३५॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे गूढार्थदीपिन्यामेकादशोऽध्यायः ।

अथ द्वादशोऽध्यायः

नारद उवाच

ब्रह्मचारी गुरुकुले वसन् दान्तो गुरोर्हितम् । आचरन् दासवन्नीचो गुरौ सुदृढसौहृदः ॥ १ ॥
सायं प्रातरुपासीत गुर्वग्न्यर्कसुरोत्तमान् । उभे संध्ये च यतवाग् जपन् ब्रह्म समाहितः ॥२॥
छन्दांस्यधीयीत गुरोराहूतश्चेत् सुयन्त्रितः । उपक्रमेऽवसाने च चरणौ शिरसा नमेत् ॥ ३ ॥
मेखलाजिनवासांसि जटादण्डकमण्डलून् । बिभृयादु पवीतं च दर्भपाणिर्यथोदितम् ॥ ४ ॥
सायं प्रातश्चरेद्भैक्षं गुरवे तन्निवेदयेत् । भुञ्जीत यद्यनुज्ञातो नो चेदुपवसेत् क्वचित् ॥ ५ ॥
सुशीलो मितभुग् दक्षःश्रद्दधानो जितेन्द्रियः । यावदर्थं व्यवहरेत् स्त्रीषु स्त्रीनिर्जितेषु च ॥६॥
वर्जयेत् प्रमदागाथामगृहस्थो बृहद्व्रतः । इन्द्रियाणि प्रमाथीनि हरन्त्यपि यतेर्मनः ॥ ७ ॥
केशप्रसाधनोन्मर्दस्नपनाभ्यञ्जनादिकम् । गुरुस्त्रीभिर्युवतिभिः कारयेन्नात्मनो युवा ॥ ८ ॥
नन्वग्निः प्रमदा नाम घृतकुम्भसमः पुमान् । सुतामपि रहो जह्यादन्यदा यावदर्थकृत् ॥ ९ ॥
कल्पयित्वाऽऽत्मना यावदाभासमिदमीश्वरः । द्वैतम् तावन्न विरमेत् ततो ह्यस्यविपर्ययः॥१०॥
एतत् सर्वं गृहस्थस्य समाम्नातम् यतेरपि । गुरुवृत्तिर्विकल्पेन गृहस्थस्यर्तुगामिनः ॥११॥
अञ्जनाभ्यञ्जनोन्मर्दस्त्र्यवलेपामिषं मधु । स्रग्गन्धलेपालंकारांस्त्यजेयुर्ये धृतव्रताः ॥१२॥
उषित्वैवं गुरुकुले द्विजोऽधीत्यावबुध्य च । त्रयीं साङ्गोपनिषदं यावदर्थं यथाबलम् ॥१३॥

द्वादशे वर्ण्यते सम्यक् धर्मो वर्णिवनस्थयोः ।
आश्रमाणां च सामान्यो देहत्यागक्रमः स्वतः ॥१॥

ब्रह्मचारी गुरुकुले वसन् सायं प्रातः गुर्वादीन् उपासीत तथा यतवाक् मौनीभूय उभे सन्ध्ये चकारात् मध्याह्न संध्यां च उपासीतेति द्वयोरन्वयः । किं कुर्वन् । ब्रह्म गायत्रीं जपन् । नीचः विनम्रः । दान्तः जितेन्द्रियः । सुरोत्तमः विष्णुः शिवश्च तान् ॥१.२॥ सुयन्त्रितः सुस्थिरचित्रः सन् । उपक्रमे पाठारम्भे समाप्तौ च ॥३॥ यथोदितं यथोक्तम् ॥४॥ उपवसेत् उपवासं कुर्यात् ॥५॥ यावदर्थं यावत्प्रयोजनं भिक्षार्थमेव नाधिकम् । स्त्रीनिर्जितेषु स्त्रीलम्पटेषु च ॥६॥बृहद् नैष्ठिकम् । अगृहस्थ इत्युक्तेः गृहस्थभिन्नः सर्वोऽपि । प्रमाथीनि बलवन्ति । प्रसभं बलात् यतेरपि मनः । हरन्ति आकर्षन्ति ॥७॥ आत्मनः केशप्रसाधनादीनि युवतिभिः न कारयेदित्यन्वयः । प्रसाधनं संस्कारः । उन्मर्दः तैलादिना । स्नपनं स्नानम् । अभ्यञ्जनं नेत्रयोः॥८॥रह एकान्ते । अन्यदा जनसमाजेऽपि यावत्प्रयोजनं तावदेव स्थितिं करोतीति तथाभूतः स्यात् ॥९॥ असौ जीवः आत्मना सद्बुद्धचा इदं देहादिरूपं जगत् आभासमात्रं मिथ्याभूतं कल्पयित्वा निश्चित्य यावत् ईश्वरः स्वतन्त्रः मायामुक्तो न भवेत् तावद् द्वैतं स्त्रीपुमानिति भेदं न विरमेत् । ततो द्वैतात् अस्य विपर्ययः भोग्यताबुद्धिः स्यादतो जह्यादित्यन्वयः ॥ १० ॥ एतत् सुशील इत्यादि । पूर्वोक्तं समाम्नातं विहितम् । गुरुवृत्तिः गुरुसेवा । विकल्पेन सत्यवसरे कर्तव्या न वा कर्तव्या ॥११॥अभ्यञ्जमत्र त्र शिरसा तैलादिना । स्त्र्यवलेखा चित्रलेखनं तन्निरीक्षणं वा । आमिषं मांसम् । पर्युषितदग्धान्नमसूरादि । मधु मद्यम् । धृतव्रता ब्रह्मचारिणः॥१२॥उषित्वेति युग्मम् । त्रयीं वेदत्रयीम् अधीत्य

दत्त्वा वरमनुज्ञातो गुरोः कामं यदीश्वरः । गृहं वनं वा प्रविशेत् प्रव्रजेत् तत्र वा वसेत् ॥१४॥
अग्नौ गुरावात्मनि च सर्वभूतेष्वधोक्षजम् । भूतैः स्वधामभिः पश्येदप्रविष्टं प्रविष्टवत् ॥१५॥
एवंविधो ब्रह्मचारी वानप्रस्थो यतिर्गृही । चरन् विदितविज्ञानः परं ब्रह्माधिगच्छति ॥१६॥
वानप्रस्थस्य वक्ष्यामि नियमान् मुनिसम्मतान् । यानातिष्ठन् मुनिर्गच्छेदृषिलोकमिहाञ्जसा॥१७॥
न कृष्टपच्यमश्नीयादकृष्टं चाप्यकालतः । अग्निपक्वमथामं वा अर्कपक्वमुताहरेत् ॥१८॥
वन्यैश्चरुपुरोडाशान् निर्वपेत् कालचोदितान् । लब्धे नवेऽन्नाद्ये पुराणं तु परित्यजेत् ॥१९॥
अग्न्यर्थमेव शरणमुटजं वाद्रिकन्दराम् । श्रयेत हिमवाय्वग्निवर्षातपषाट् स्वयम् ॥२०॥
केशरोमनखश्मश्रुमलानि जटिलो दधत् । कमण्डल्वजिने दण्डवल्कलाग्निपरिच्छदाम् ॥२१॥
चरेद् वने द्वादशाब्दानष्टौ वा चतुरो मुनिः । द्वावेकं वा यथाबुद्धिर्न विपद्येत कृच्छ्रतः ॥२२॥
यदाऽकल्पःस्वक्रियायां व्याधिभिर्जरयाथवा । आन्वीक्षिक्यां वा विद्यायां कुर्यादनशनादिकम्२३
आत्मन्यग्नीन् समारोप्य संन्यस्याहंममात्मताम् । कारणेषु न्यसेत् सम्यक् संघातं तु यथार्हतः।
खे खानि वायौ निःश्वासांस्तेजस्यूष्माणमात्मवान् । अप्स्वसृक्श्लेष्मपूयानि क्षितौ शेषं यथोद्भवम्
वाचमग्नौ सवक्तव्यामिन्द्रे शिल्पं करावपि । पदानि गत्या वयसि रत्योपस्थं प्रजापतौ ॥२६॥

तदर्थं च अवबुद्धय यदि ईश्वरः समर्थश्चेत् गुरोः कामं वरं यथेच्छ दक्षिणां दत्त्वा गृहं प्रविशेत् गृहस्थो भवेत् वानप्रस्थो वा संन्यासी वा तत्र वा वसेत् नैष्ठिको वा भवेदिति योज्यम् ॥१३।१४॥ अग्न्यादिषु सर्वभूतेषु च कारणतया अप्रविष्टमपि अधोक्षजं भगवन्तं तन्नियन्तृत्वेन प्रविष्टमिव पश्येदित्यन्वयः । स्वधामभिः स्वाश्रयभूतैः पञ्चभूतैः जीवैश्च सह ॥१५॥ चरन् स्वस्वधर्मान् आचरन् । विज्ञानं विज्ञेयं वस्तु येन ॥१६॥ अञ्जसा सुखेन ऋषिलोकं महर्लोकम् ॥१७॥ कृष्टपच्यं कृष्णादिनिष्पन्नं धान्यादिकम् । अकृष्टम् अकृष्टपच्यमपि फलमूलादिकम् । अकालतः असमयतः पक्वम् । उत अपि आहरेत् अश्नीयात् ॥१८॥ वन्यैः व्रीह्यादिभिः फलादिभिर्वा चोदितान् विहितान् चरुपुरोडाशान्[1] हविर्भागान् निर्वपेत् समन्त्रं दद्यात् । अन्नं व्रीह्यादि आद्यं कन्दादि । पुराणं सञ्चितम् ॥१९॥ अग्निरक्षार्थम् उटजं पर्णशालां शरणं रक्षकं गृहम् आश्रयेत । स्वयं तु हिमादीन् सहते इति षाट् तथाभूतः ॥२०॥ जटिलः जटाधारी केशादीन् मलं च धारयन् । मलधारणम् घर्षणोद्वर्तनदिनाश्रृङ्गाराद्यभावे तात्पर्यम् । अग्नि परिच्छदाः दर्भसमिधादयः । स्रुक्स्रुवादयो वा तान् दधत् चरेदित्युत्तरेणान्वयः ॥२१॥ कृच्छ्रतः तपः क्लेशात् यथा बुद्धि र्न विपद्येत नोद्विजेत तथा मुनिः यथाशक्ति वर्षाणि वने विचरेत् नियमान् आचरेत् वा ॥२२॥ यदा अकल्पः असमर्थः स्यात् तदा अनशनं कुर्यात् । 'कण्ठकूपे क्षुत्पिपासानिवृत्तिः' । इति पातञ्जलोक्तेः खेचरीमुद्रां साधयेत् । यद्वा । मासे गते पक्षे गते दिवसं गते वा अश्नीयात् इति याज्ञवल्क्यः । आन्वाक्षिकी आत्मविद्या ॥२३॥ अनशनात् पूर्वकृत्यमाह = समारोप्य धारणया संघातं देहादिसमूहं न्यसेत् प्रविलापयेत् । यथार्हतः यथास्थानम् ॥ २४ ॥ खानि देहगतच्छिद्राणि निःश्वासान् प्राणादीन् । तां असृगादीनि । शेषं कठिनांशम् । यथोद्भवम् उत्पत्तिक्रमेण ॥ २५ ॥ वक्तव्यम् उक्तिस्तत्सहितां वाचं वागिन्द्रियम् अग्नौ

1. हव्यकव्ये चरुः पुमान् इत्यमरः 'पुरोडाशो हविर्भेदे' इति विश्वः । तण्डुलपिष्टनिर्मितकूर्माकारो वलिः पुरोडाशः' इति वंशीधरी ।

मृत्यौ पायुं विसर्गं च यथास्थानं विनिर्दिशेत् । दिक्षु श्रोत्रं सनादेन स्पर्शमध्यात्मनि त्वचम्२७
रूपाणि चक्षुषा राजन् ज्योतिष्यभिनिवेशयेत् । अप्सु प्रचेतसा जिह्वां घ्रेयैर्घ्राणं क्षितौ न्यसेत्
मनो मनोरथैश्चन्द्रे बुद्धिं बोध्यैः कवौ परे । कर्माण्यध्यात्मना रुद्रे यदहंममताक्रिया ।
सत्त्वेन चित्तं क्षेत्रज्ञे गुणैर्वैकारिकं परे ॥ २९ ॥
अप्सु क्षितिमपो ज्योतिष्यदो वायौ नभस्यमुम् । कूटस्थे तच्च महति तदव्यक्तेऽक्षरे च तत्३०
इत्यक्षरतयाऽऽत्मानं चिन्मात्रमवशेषितम् । ज्ञात्वाऽद्वयोऽथ विरमेद् दग्धयोनिरिवानलः॥३१॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां सप्तमस्कन्धे नारदयुधिष्ठिरसंवादे सदाचारनिर्णयो नाम द्वादशोऽध्यायः ॥ १२ ॥

अथ त्रयोदशोऽध्यायः

नारद उवाच

कल्पस्त्वेवं परिव्रज्य देहमात्रावशेषितः । ग्रामैकरात्रविधिना निरपेक्षश्चरेन्महीम् ॥ १ ॥
बिभृयाद् यद्यसौ वासः कौपीनाच्छादनं परम् । त्यक्तं न दण्डलिङ्गादेरन्यत् किंचिदनापदि ।२।

अधिदैवते विलापयेत् एवमग्रेऽपि गत्या विषयेण सह पादौ वयसि कालरूपे विष्णौ । रत्या सह उपस्थेन्द्रियम् प्रजापतौ ॥ २६ ॥ विसर्गः मलोत्सर्गः तत्सहितं पायुमिन्द्रियम् मृत्यौ । नादेन शब्देन सह श्रोत्रमिन्द्रियं दिक्षु देवतासु त्वचं त्वगिन्द्रियं स्पर्शं तद्विषयं च अध्यात्मनि वायौ ॥ २७ ॥ चक्षुषा इन्द्रियेण सह रूपाणि विषयान् ज्योतिषि सूर्ये । प्रचेताः अत्र मधुरादिरसः तेन सह जिह्वां रसनेन्द्रियम् अप्सु तदधिष्ठातरि वरुणे । घेयैः विविधगन्धैः सह घ्राणमिन्द्रियं क्षितौ अश्विनोः॥२८॥तद्देवतयोः मनः मनोरथैः सङ्कल्पैः सह बुद्धिः बोध्यैः बुद्धिविषयैः सह परे श्रेष्ठे चतुर्मुखे ब्रह्मणि । अध्यात्मना अहङ्कारेण सह तत्कर्माणि अभिमानरूपाणि रुद्रे न्यसेत् । यत् यस्मात् अहङ्कारात् । तन्मूलाः क्रियाः प्रवृत्तयश्च भवन्ति । चित्तं गुणैः विषयैः सह क्षेत्रज्ञे वासुदेवे । वैकारिकं सात्त्विकाहङ्कारं परे तत्कारणे महत्तत्त्वे न्यसेदित्यन्वयः । तच्च प्रकृतौ सा च ब्रह्मणि ॥२९॥ अदः ज्योतिः । अमुं वायुम् । तच्च नभः कूटस्थेऽहङ्कारे । तच्च कूटस्थम् अहंतत्त्वं महति महत्तत्त्वे । तत् महत्तत्त्वम् अव्यक्ते प्रकृतौ । तत् अव्यक्तम् अक्षरे ब्रह्मणि न्यसेदित्यन्वयः ॥ ३० ॥ इत्येवं सर्वोपाधिलयात् अवशेषितम् आत्मानम् अक्षरतया अविनाशतया ज्ञात्वा अद्वयः सन् वानप्रस्थकृत्यात् विरमेत् । यथा दग्धकाष्ठः अग्निः दाहात् विरमति तद्वत् ॥३१॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे गूढार्थदीपिन्यां द्वादशोऽध्यायः ।

त्रयोदशे निरूप्यन्ते धर्माः संन्यासिनां क्रमात् ।
दत्तात्रेयेतिहासेन परावस्था च कीर्त्यते ॥१॥

कल्पः समर्थश्चेत् । ग्रामे ग्रामे एकैकां रात्रिं नयेदिति विधिः ॥ १ ॥ कौपीनं[1] गुह्यप्रदेशम् आच्छाद्यते येन तावन्मात्रम् । अन्यत् किमपि न । आपदि तु त्यक्तमपि धारयेत् । लिङ्गं कमण्डल्वादि॥२॥

१. 'कौपीनं स्यादकार्ये च चीरगुह्यप्रदेशयोः' इति मेदिनी ।

एक एव चरेद् भिक्षुरात्मारामोऽनपाश्रयः । सर्वभूतसुहृच्छान्तो नारायणपरायणः ।। ३ ।।
पश्येदात्मन्यदो विश्वं परे सदसतोऽव्यये । आत्मानं च परं ब्रह्म सर्वत्र सदसन्मये ।। ४ ।।
सुप्तप्रबोधयोः संधावात्मनो गतिमात्मदृक् । पश्यन् बन्धं च मोक्षं च मायामात्रं न वस्तुतः।५।
नाभिनन्देद् ध्रुवं मृत्युमध्रुवं वास्य जीवितम् । कालं परं प्रतीक्षेत भूतानां प्रभवाप्ययम् ।।६।।
नासच्छास्त्रेषु सज्जेत नोपजीवेत जीविकाम् । वादवादांस्त्यजेत् तर्कान् पक्षं कं च न संश्रयेत्।७।
न शिष्याननुबध्नीत ग्रंथान्नैवाभ्यसेद् बहून् । न व्याख्यामुपयुञ्जीत नारम्भानारभेत् क्वचित्।८।
न यतेराश्रमः प्रायो धर्महेतुर्महात्मनः । शान्तस्य समचित्तस्य बिभृयादुत वा त्यजेत् ।। ९ ।।
अव्यक्तलिङ्गो व्यक्तार्थो मनीष्युन्मत्तबालवत् । कविर्मूकवदात्मानं स दृष्ट्या दर्शयेन्नृणाम् १०
अत्राप्युदाहरन्तीममितिहासं पुरातनम् । प्रह्लादस्य च संवादं मुनेराजगरस्य च ।।११।।
तं शयानं धरोपस्थे कावेर्यां सह्यसानुनि । रजस्वलैस्तनूदेशैर्निगूढामलतेजसम् ।।१२।।
ददर्श लोकान् विचरंल्लोकतत्त्वविवित्सया । वृतोऽमात्यैः कतिपयैः प्रह्लादो भगवत्प्रियः ।१३।
कर्मणाऽऽकृतिभिर्वाचा लिङ्गैर्वर्णाश्रमादिभिः।न विदन्ति जना यं वै सोऽसाविति न वेति च १४
तं नत्वाभ्यर्च्य विधिवत् पादयोःशिरसा स्पृशन् । विवित्सुरिदमप्राक्षीन्महाभागवतोऽसुरः।१५।
बिभर्षि कायं पीवानं सोद्यमो भोगवान् यथा । वित्तं चैवोद्यमवतां भोगो वित्तवतामिह ।
भोगिनां खलु देहोऽयं पीवा भवति नान्यथा ।। १६ ।।
न ते शयानस्य निरुद्यमस्य ब्रह्मन् नु हार्थो यत एव भोगः ।
अभोगिनोऽयं तव विप्र देहः पीवा यतस्तद्वद नः क्षमं चेत् ।।१७।।
कविः कल्पो निपुणदृक् चित्रप्रियकथः समः । लोकस्य कुर्वतः कर्म शेषे तद्वीक्षितापि वा ।।१८।।

अनपाश्रयः निराश्रयः ।। ३ ।। सहसतः कार्यकारणात् परे आत्मनि अदः विश्वमात्मानं च पश्येत् । सर्वत्र सदसन्मये जडचेतनमये जगति आत्मनि च परं ब्रह्म पश्येदित्यन्वयः ।। ४ ।। सन्धौ सायं प्रातश्च आत्महक् आत्मदिदृक्षुः आत्मनो गतिं तत्त्वं पश्यन् बन्धादिकं च मायामात्रं कल्पितं पश्यन् सर्वत्र परं ब्रह्म पश्येदिति पूर्वेणान्वयः ।। ५ ।। उभयमपि नाभिनन्देत् नेच्छेत् । परं केवलं कालं प्रतीक्षेत तदधीनमेव सर्वमित्यालोचयेत् । अस्य देहस्य प्रभवोऽप्ययश्च यस्मात्तं जन्ममरणहेतुभूतम् ।। ६ ।। असच्छास्त्रेषु आत्माप्रतिपादकेषु जीविकां जीविकाशास्त्रं ज्यौतिषादि । वादान् प्रतिवादान् । कं च कमपि ।। ७ ।। नानुबन्धीत बलात् । ग्रन्थान् अध्यात्मेतरान् । नोपयुञ्जीत न कुर्वीत । आरम्भान् मठादीन् ।। ८ ।। परमहंसस्य विशेषमाह धर्महेतुः धर्मद्योतको न भवति किन्तु मुक्तिप्रयोजनकः अतः दण्डादि धारयेत् त्यजेद्वा नास्य दोषः ।। ९ ।। मनीषी विद्वान् उन्मत्तवत् । कविः वाग्मी मूकवत् । एतच्च जनसंगपरिहारार्थमुक्तम् । लिङ्गम् 'आश्रमचिह्नादि ।। १० ।। आजगरस्य अजगरव्रतधारिणः ।। ११ ।। तमिति युग्मम् । धरोपस्थे धरोपरि शयानं तं ददर्शेत्यन्वयः । कावेरी नदी । सह्यपर्वतः । धूलिधूसरैः देहावयवैः निगूढममलं तेजो यस्य तम् ।।१२।१३।। सोऽसो ज्ञानी न वेति ।। १४ ।। विविदिषुः जिज्ञासुः सन् ।। १५ ।। विभर्षीति सार्द्धम् । पीवानं स्थूलम् ।।१६।। ते अर्थो धनं नास्ति यतः तत्कारणं पीवा वदेत्यन्वयः । क्षममुचितं चेत् ।। १७ ।। कर्म कुर्वतः सतः तद्वीक्षिता तत्सर्वं पश्यन्नपि त्वं शेषे

नारद उवाच

स इत्थं दैत्यपतिना परिपृष्टो महामुनिः । स्मयमानस्तमभ्याह तद्वागमृतयन्त्रितः ॥१९॥

ब्राह्मण उवाच

वेदेदमसुरश्रेष्ठ भवान् नन्वार्यसम्मतः । ईहोपरमयोर्नृणां पदान्यध्यात्मचक्षुषा ॥२०॥
यस्य नारायणो देवो भगवान् हृद्गतः सदा । भक्त्या केवलयाज्ञानं धुनोति ध्वान्तमर्कवत् ।२१
अथापि ब्रूमहे प्रश्नांस्तव राजन् यथाश्रुतम् । सम्भावनीयो हि भवानात्मनःशुद्धिमिच्छताम्२२
तृष्णया भववाहिन्या योग्यैः कामैरपूरया । कर्माणि कार्यमाणोऽहं नानायोनिषु योजितः ॥२३॥
यदृच्छया लोकमिमं प्रापितः कर्मभिर्भ्रमन् । स्वर्गापवर्गयोर्द्वारं तिरश्चां पुनरस्य च ॥२४॥
अत्रापि दम्पतीनां च सुखायान्यापनुत्तये । कर्माणि कुर्वतां दृष्ट्वा निवृत्तोऽस्मि विपर्ययम् ॥२५
सुखमस्यात्मनो रूपं सर्वेहोपरतिस्तनुः। मनःसंस्पर्शजान् दृष्ट्वा भोगान् स्वप्स्यामि संविशन्२६
इत्येतदात्मनः स्वार्थं सन्तं विस्मृत्य वै पुमान् । विचित्रामसति द्वैते घोरामाप्नोति संसृतिम्२७
जलं तदुद्भवैश्छन्नं हित्वाज्ञो जलकाम्यया । मृगतृष्णामुपाधावेद् यथान्यत्रार्थदृक् स्वतः ॥२८॥
देहादिभिर्दैवतन्त्रैरात्मनः सुखमीहतः । दुःखात्ययं चानीशस्य क्रिया मोघाः कृताः कृताः ।२९।
आध्यात्मिकादिभिर्दुःखैरविमुक्तस्य कर्हिचित् । मर्त्यस्य कृच्छ्रोपनतैरर्थैः कामैः क्रियेत किम्३०
पश्यामि धनिनां क्लेशं लुब्धानामजितात्मनाम् । भयादलब्धनिद्राणां सर्वतोऽभिविशङ्किनाम्३१

उदासीनोऽसि किं कारणामिति ॥ १८ ॥ सोऽवधूतः । तद्वागेव अमृतं तेन वशीकृतः ॥ १९ ॥ सम्मतो मान्यः । तथा ईहोपरमयोः प्रवृत्तिनिवृत्त्योः पदानि स्थानानि फलानि च । अध्यात्मचक्षुषा अन्तर्दृष्ट्या वेद ॥२०॥ धुनोति निवारयति अतस्तव किमविदितमस्तीति ॥२१॥ ब्रूमहे उत्तरयामि । इच्छताम् इच्छद्भिः संभावनीयः आदरणीयः ॥ २२ ॥ योग्यैः अभिलषितपदार्थैः । भववाहिन्या जन्मपरम्पराकारिण्या । कार्यमाणः कर्मसु प्रवर्त्यमानः सन् । योजितः प्रवेशितः ॥ २३ ॥ इमं लोकं नरदेहं प्रापितः तृष्णयेति शेषः । धर्मेण स्वर्गस्य । अधर्मेण तिरश्चाम् । मिश्राभ्यामस्य मनुष्यत्वस्य । सर्वतो निवृत्या अपवर्गस्य च द्वारमिति विवेकः ॥ २४ ॥ अत्रापि मनुष्यत्वेऽपि । अन्यापनुत्तये दुःखनिवृत्तये । विपर्ययं दुःखप्राप्तिरूपम् । निवृत्तोऽस्मि निरुद्यमोऽस्मि ॥ २५ ॥ सुखम् अस्य रूपं तस्य तनुः[1] अभिव्यक्तिः सर्वासामीहानां कर्मणां तन्मूलभूततृष्णानां च निवृत्तिरेव । संस्पर्शजान् प्रारब्धान् । संविशन् भुञ्जन् स्वपिमि ॥ २६ ॥ स्वार्थं स्वरूपभूतं सुखं स्वस्मिन् सन्तमपि विस्मृत्य मिथ्याभूते द्वैते जगति घोरां दुःखदां संसृतिं जन्ममरणादिलक्षणां प्राप्नोति ॥ २७ ॥ अज्ञो हरिणो यथा तदुद्भवैः तृणादिभिः छन्नं जलं हित्वा मृगतृष्णामुपाधावेत् तद्वत् [2]स्वतः वासुदेवात् अन्यत्र अर्थदृक् सुखं पश्यन् अज्ञ एव ॥ २८ ॥ दैवतन्त्रैः कर्माधीनैः सुखं दुःखनिवृत्तिं च [3]ईहतः इच्छतः पुंसः क्रिया मोघाः निष्फला भवन्ति । कुतः । अनीशस्य ईशात् विमुखस्य ॥२९॥ मर्त्यस्य मरणशीलस्य अर्थैः धनैः विषयैश्च किं कियत् सुखं प्राप्येत

१. तनोतीति तनुः । २. सुष्ठु सुन्दरो योऽकारो वासुदेवस्तस्मात् ।
३. कर्तरि षष्ठी इच्छता पुरुषेण ।

राजतश्चोरतः शत्रोः स्वजनात् पशुपक्षितः । अर्थिभ्यःकालतःस्वस्मान्नित्यं प्राणार्थवद्भयम्३२
शोकमोहभयक्रोधरागक्लैब्यश्रमादयः । यन्मूलाःस्युर्नृणां जह्यात् स्पृहां प्राणार्थयोर्बुधः ।।३३।।
मधुकारमहासर्पौ लोकेऽस्मिन्नो गुरुत्तमौ । वैराग्यं परितोषं च प्राप्ता यच्छिक्षया वयम् ।।३४।।
विरागःसर्वकामेभ्यःशिक्षितो मे मधुव्रतात् । कृच्छ्राप्तं मधुवद् वित्तं हत्वाप्यन्यो हरेत् पतिम्३५
अनीहः परितुष्टात्मा यदृच्छोपनताऽहम् । नो चेच्छये बह्वहानि महाहिरिव सत्त्वान् ।।३६।।
क्वचिदल्पं क्वचिद् भूरि भुञ्जेऽन्नं स्वाद्वस्वादु वा। क्वचिद् भूरि गुणोपेतं गुणहीनमुत क्वचित्
श्रद्धयोपाहृतं क्वापि कदाचिन्मानवर्जितम् । भुञ्जे भुक्त्वाथ कस्मिंश्चिद् दिवा नक्तं यदृच्छया
क्षौमं दुकूलमजिनं चीरं वल्कलमेव वा । वसेऽन्यदपि सम्प्राप्तं दिष्टभुक् तुष्टधीरहम् ।।३९।।
क्वचिच्छये धरोपस्थे तृणपर्णाश्मभस्मसु । क्वचित् प्रासादपर्यङ्के कशिपौ वा परेच्छया ४०।
क्वचित् स्नातोऽनुलिप्ताङ्गःसुवासाःस्रग्व्यलंकृतः। रथेभाश्वैश्चरे क्वापि दिग्वासा ग्रहवद्विभो
नाहं निन्दे न च स्तौमि स्वभावविषमं जनम् । एतेषां श्रेय आशासे उतैकात्म्यं महात्मनि ४२
विकल्पं जुहुयाच्चित्तौ तां मनस्यर्थविभ्रमे । मनो वैकारिके हुत्वा तन्मायायां जुहोत्यनु ।।४३।
आत्मानुभूतौ तां मायां जुहुयात् सत्यदृङ्मुनिः।ततो निरीहो विरमेत् स्वानुभूत्याऽऽत्मनि स्थितः
स्वात्मवृत्तं मयेत्थं ते सुगुप्तमपि वर्णितम् । व्यपेतं लोकशास्त्राभ्यां भवान् हि भगवत्परः।।४५।।

नारद उवाच

धर्मं पारमहंस्यं वै मुनेः श्रुत्वाऽसुरेश्वरः । पूजयित्वा ततः प्रीत आमन्त्र्य प्रययौ गृहम् ।।४६।।

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां सप्तमस्कन्धे नारदयुधिष्ठिरसंवादे यतिधर्मे त्रयोदशोऽध्यायः ॥ १३ ॥

न किमदपि । उपनतैः प्राप्तैः ॥ ३० ॥ सर्वतः पुत्रादिभ्योऽपि ॥ ३१ ॥ दानभोगयोराधिक्येन स्वस्मात् । प्राणवतां प्राणोपलक्षितदेहवताम् अर्थवतां च ॥ ३२ ॥ यन्मूलाः प्राणार्थमूलकाः स्युः तयोः । प्राणोऽत्र बलम् ॥ ३३ ॥ महासर्पोऽजगरः ॥ ३४ ॥ मधुव्रतात् मधुमक्षिकातः । मधुवत् सञ्चितं वित्तं तत्पतिं हत्वा अन्यो हरेत् इति दृष्ट्वा ॥ ३५ ॥ यदृच्छोपनतात् दैवाल्लब्धात् अन्नादेः । सत्त्ववान् धैर्यवान् । शये स्वपिमि ।। ३६।३७।। श्रद्धया उपानीतं भुक्त्वा कदाचित् मानवर्जितं भुञ्जे इत्यन्वयः । अथ च क्वापि दिवा क्वापि नक्तं वा ।। ३८ ।। क्षौमम् अतसीतन्तूत्थम् । दूकूलं कार्पासनिर्मितम् । चीरं वस्त्रखण्डम् । वसे परिदधे । दिष्टभुक् प्रारब्धभुक् ।। ३९ ।। प्रासादोपरि कशिपौ तूलिका विष्टरे ॥ ४० ॥ ग्रहवत् पिशाचवत् दिग्वासाः नग्नः सन् चरे विचरामि ॥ ४१ ॥ स्वभावतः गुणदोषतः विषमम् । श्रेयः ऐहिकम् । उत अपि परत्र ऐकात्म्यं भगवति सायुज्यम् ।। ४२ ।। एवंभूतस्थितावुपायमाह विकल्पं भेदव्यवहारं चित्तौ भेदग्राहकमनोवृत्तौ । तां चित्तिं मनसि । मनो वैकारिके अहङ्कारे । तम् अहङ्कारं महति । तच्च महत्तत्त्वं अनु पश्चात् मायायां मूलप्रकृतौ जुहुयात् प्रलीनं भावयेत् । अर्थानां देहादीनां विविधं भ्रमणं यस्मात्तस्मिन् मनसि ॥४३॥ आत्मानुभूतौ ब्रह्मणि । ततश्च सत्यं परमात्मानं पश्यतीति सत्यदृक् विरमेत् साधनादिति शेषः ॥ ४४ ॥ व्यपेतं रहितमिति मन्ददृष्ट्या न तु तत्त्वदृष्ट्या ॥४५॥ वै एवमर्थे । आमन्त्र्य पृष्ट्वा च ॥ ४६ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे गूढार्थदीपिन्यां त्रयोदशोऽध्यायः ।

अथ चतुर्दशोऽध्यायः

युधिष्ठिर उवाच

गृहस्थ एतां पदवीं विधिना येन चाञ्जसा। याति देवऋषे ब्रूहि मादृशो गृहमूढधीः ॥ १ ॥

नारद उवाच

गृहेष्ववस्थितो राजन् क्रियाःकुर्वन् गृहोचिताः। वासुदेवार्पणं साक्षादुपासीत महामुनीन् ॥२॥

शृण्वन् भगवतोऽभीक्ष्णमवतारकथामृतम्। श्रद्दधानो यथाकालमुपशान्तजनावृतः ॥ ३ ॥

सत्सङ्गाच्छनकैः सङ्गमात्मजायात्मजादिषु। विमुच्येन्मुच्यमानेषु स्वयं स्वप्नवदुत्थितः ॥ ४ ॥

यावदर्थमुपासीनो देहे गेहे च पण्डितः। विरक्तो रक्तवत् तत्र नृलोके नरतां न्यसेत् ॥ ५ ॥

ज्ञातयः पितरौ पुत्रा भ्रातरः सुहृदोऽपरे। यद् वदन्ति यदिच्छन्ति चानुमोदेत निर्ममः ॥ ६ ॥

दिव्यं भौमं चान्तरिक्षं वित्तमच्युतनिर्मितम्। तत् सर्वमुपभुञ्जान एतत् कुर्यात् स्वतो बुधः ॥७॥

यावद् भ्रियेत जठरं तावत् स्वत्वं हि देहिनाम्। अधिकं योऽभिमन्येत स स्तेनो दण्डमर्हति ॥८

मृगोष्ट्रखरमर्काखुसरीसृप्खगमक्षिकाः। आत्मनः पुत्रवत् पश्येत् तैरेषामन्तरं कियत् ॥ ९ ॥

त्रिवर्गं नातिकृच्छ्रेण भजेत गृहमेध्यपि। यथादेशं यथाकालं यावद्दैवोपपादितम् ॥१०॥

आश्वाघांतेऽवसायिभ्यःकामान् संविभजेद् यथा। अप्येककामात्मनो दारां नृणां स्वत्वग्रहो यतः

जह्याद् यदर्थे स्वप्राणान् हन्याद् वा पितरं गुरुम्। तस्यां स्वत्वं स्त्रियां जह्याद् यस्तेन ह्यजितो जितः

कृमिविड्भस्मनिष्ठान्तं क्वेदं तुच्छं कलेवरम्। क्व तदीयरतिर्भार्या क्वायमात्मा नभश्छदिः १३

चतुर्दशे गृहस्थस्य संग्रहः पुण्यकर्मणाम्।
देशकालादिना तेषां फलानन्त्यं च वर्ण्यते ॥ १ ॥

अत्र चकारोऽप्यर्थे। मादृशोऽपि। पदवीं मोक्षलक्षणाम्। अञ्जसा सुखेन। मूढा आसक्ताः ॥१॥ वासुदेवार्पणं यथा भवति तथा क्रियाः कुर्वन् ॥२॥ शृण्वन्निति युग्मम्। अभीक्ष्णं निरन्तरम्। आगमापायित्वेन स्वयं विमुच्यमानेषु। यथा उत्थितः प्रबुद्धः पुरुषः स्वप्नदृष्टेषु संगं विमुञ्चति तद्वत् ॥३।४॥ यावदर्थं यावत्प्रयोजनं भोग्यवस्तूनि उपासीनः स्वीकुर्वन्। पण्डितः उदासीनः सन्। रक्तवत् बहिस्त्वासक्तवत्। नरतां नरस्य भावं व्यवहारं न्यसेत् प्रवर्तयेत् ॥५।६॥ दिव्यं वृष्टिजातं धान्यादि। भौमं सुवर्णादि। आन्तरिक्षमकस्मादागतं तत्सर्वम् अच्युतनिर्मितं मत्वा एतत् प्रागुक्तं कर्मादि स्वतः स्वं वित्तं तेन कुर्यात् ॥ ७ ॥ भ्रियेत पूर्येत। स्तेनः चोरः ॥८॥ मर्को मर्कट। आखुः मूषकः। सरीसृप्[1] सर्पः। तैः पुत्रैः एषां च अन्तरं भेदः कियत् न किञ्चिदपि ॥९॥ गृहमेधी गृहस्थोऽपि अतिकृच्छ्रेण अतिप्रयासेन। त्रिवर्गं न भजेत न सेवेत ॥१०॥ श्वादीनभिव्याप्य सर्वेभ्यः कामान् अन्नादीन् विभज्य दद्यात्। किं बहुना यतः यत्र यस्यां स्वत्वाग्रहः तामात्मनो दारामपि अतिथिशुश्रूषणे नियुञ्जीत। अघः पतितः। अन्तेवसायी चाण्डालादिः ॥११॥ यदर्थे यन्निमित्तम्। अजितो भगवान् वशीकृतः ॥१२॥ कृम्यादिषु निष्ठा स्थितिः अन्ते यस्य तत्। तदीया देहार्या। स्वानन्देन नभोऽपि छादयतीति निर्लेपः आत्मा क्व किमुत तुच्छविषयसुखेषु ॥१३॥

---

१. यङन्तात् क्विप्।

सिद्धैर्यज्ञावशिष्टार्थैः कल्पयेद् वृत्तिमात्मनः । शेषे स्वत्वं त्यजन् प्राज्ञः पदवीं महतामियात्॥१४।
देवानृषीन् नृभूतानि पितृनात्मानमन्वहम् । स्ववृत्त्यागतवित्तेन यजेत पुरुषं पृथक् ॥१५॥
यर्ह्यात्मनोऽधिकाराद्याः सर्वाः स्युर्यज्ञसम्पदः । वैतानिकेन विधिना अग्निहोत्रादिना यजेत्॥१६
न ह्यग्निमुखतोऽयं वै भगवान् सर्वयज्ञभुक् । इज्येत हविषा राजन् यथा विप्रमुखे हुतैः ॥१७॥
तस्माद् ब्राह्मणदेवेषु मर्त्यादिषु यथार्हतः । तैस्तैः कामैर्यजस्वैनं क्षत्रज्ञं ब्राह्मणाननु ॥१८॥
कुर्यादापरपक्षीयं मासि प्रौष्ठपदे द्विजः । श्राद्धं पित्रोर्यथावित्तं तद्बन्धूनां च वित्तवान् ॥१९॥
अयने विषुवे कुर्याद् व्यतीपाते दिनक्षये । चन्द्रादित्योपरागे च द्वादशीश्रवणेषु च ॥२०॥
तृतीयायां शुक्लपक्षे नवम्यामथ कार्तिके । चतसृष्वप्यष्टकासु हेमन्ते शिशिरे तथा ॥२१॥
माघे च सितसप्तम्यां मघाराकासमागमे । राकया चानुमत्या वा मासर्क्षाणि युतान्यपि ॥२२॥
द्वादश्यामनुराधा स्याच्छ्रवणस्तिस्र उत्तराः । तिसृष्वेकादशी वाऽऽसुजन्मर्क्षश्रोणयोगयुक्॥२३॥
त एते श्रेयसः काला नृणां श्रेयोविवर्धनाः । कुर्यात् सर्वात्मनैतेषु श्रेयोऽमोघं तदायुषः ॥२४॥
एषु स्नानं जपो होमो व्रतं देवद्विजार्चनम् । पितृदेवनृभूतेभ्यो यद् दत्तं तद्ध्यनश्वरम् ॥२५॥
संस्कारकालो जायाया अपत्यस्यात्मनस्तथा । प्रेतसंस्था मृताहश्च कर्मण्यभ्युदये नृप ॥२६॥
अथ देशान् प्रवक्ष्यामि धर्मादिश्रेयआवहन् । स वै पुण्यतमो देशः सत्पात्रं यत्र लभ्यते ॥२७॥
बिम्बं भगवतो यत्र सर्वमेतच्चराचरम् । यत्र ह ब्राह्मणकुलं तपोविद्यादयान्वितम् ॥२८॥

यज्ञावशिष्टैः अर्थैः अन्नादिभिः । महतां संन्यासिनां पदवीम् इयात् ॥ १४ ॥ देवादीन् पञ्च यज्ञदेवताः अन्वहं प्रतिदिनं यजन् पुरुषमन्तर्यामिणमेव यजेत् ॥ १५ ॥ अधिकाराद्याः अधिकारप्राप्ताः स्युः वितानो यज्ञग्रन्थः श्रौतसूत्रादिः तत्र प्रोक्तेन ॥१६॥ विप्रमुखे हुतैः अन्नादिभिः भगवान् यथा इज्यते सन्तुष्यति तथा अग्निमुखतो हविषा नैव तुष्येदित्यन्वयः ॥ १७ ॥ तस्मात् ब्राह्मणाननु ब्राह्मणयजनानन्तरं मर्त्यादिषु वर्तमानं क्षेत्रमन्तर्यामिणं यथाशक्ति यजस्व । कामैः अन्नादिभिः ॥ १८ ॥ प्रौष्ठपदे भाद्रपदे । वस्तुतस्तु मासाः शुक्लादयो ग्राह्याः इति वचनात् आश्विने इत्यर्थः । आपरपक्षीयं कृष्णपक्षीयं श्राद्धं महालयाख्यम् ॥ १९ ॥ अयने इति चतुष्कम् । अयने मकर कर्क संक्रान्ती विषुवे मेष तुला सङ्क्रमणे । दिनं तिथिः । उपरागे ग्रहणे । मासि वैशाखे शुक्लपक्षे । अक्षयतृतीयायाम् । अथ च अक्षयनवम्यां । हेमन्तशिशिरयोश्चतुर्णामपरपक्षाणामष्टमी अष्टका' इत्याश्वलायनसूत्रात् । सितसप्तम्यां रथसप्तम्याम् । मघाराका माघी पूर्णिमा । मासनक्षत्राणि चित्रादीनि यदा राकया [1]अनुमत्या युतानि स्युः तदा । आसु तिसृषु उत्तरासु । एकादशी उपवासार्नैव दशमीविद्धा ग्राह्या । उपवासार्हायां तु श्राद्धनिषेधात् । जन्मनक्षत्रं श्रवणयुक्तं दिनं च यदा स्यात्तदापि कुर्यादित्यन्वयः ॥२०।२१।२२।२३॥ श्रेयसः पुण्यस्य । श्रेयः पुण्यकार्यम् । अमोघं साफल्यम् ॥ २४ ॥ अनश्वरम् अक्षयफलम् ॥ २५ ॥ संस्कारः पुंसवनादिः । अपत्यस्य जातकर्मादिः । आत्मनः यज्ञोपवीतादिः । प्रेतसंस्था दाहादिः । मृताहः सांवत्सरिकश्राद्धादिः । अभ्युदयार्थं वापी कूप तडागादि यत् कृतं तदनश्वरमित्यन्वयः ॥ २६ ॥ अथेत्यर्द्धम् । आवहान् पुण्यवृद्धिकरान् ॥ २७ ॥ स वै इति सार्द्धम् । यत्र भगवतो बिम्बं मूर्तिः भागवती संहिता तपोनिष्ठं कुलं च

१. 'कलाहीने सानुमतिः पूर्णे राका निशाकरे' इत्यमरात् ।

यत्र यत्र हरेरर्चा स देशः श्रेयसां पदम् । यत्र गङ्गादयो नद्यः पुराणेषु च विश्रुताः ॥२९॥
सरांसि पुष्करादीनि क्षेत्राण्यर्हाश्रितान्युत । कुरुक्षेत्रं गयशिरः प्रयागः पुलहाश्रमः ॥३०॥
नैमिषं फाल्गुनं सेतुः प्रभासोऽथ कुशस्थली । वाराणसी मधुपुरी पम्पा बिन्दुसरस्तथा ॥३१॥
नारायणाश्रमो नन्दा सीतारामाश्रमादयः । सर्वे कुलाचला राजन् महेन्द्रमलयादयः ॥३२॥
एते पुण्यतमा देशा हरेरर्चाश्रिताश्च ये । एतान् देशान् निषेवेत श्रेयस्कामो ह्यभीक्ष्णशः ॥
धर्मो ह्यत्रेहितः पुंसां सहस्राधिफलोदयः ॥३३॥
पात्रं त्वत्र निरुक्तं वै कविभिः पात्रवित्तमैः । हरिरेवैक उर्वीश यन्मयं वै चराचरम् ॥३४॥
देवर्ष्यर्हत्सु वै सत्सु तत्र ब्रह्मात्मजादिषु । राजन् यदग्रपूजायां मतः पात्रतयाऽच्युतः ॥३५॥
जीवराशिभिराकीर्ण आण्डकोशाङ्घ्रिपो महान् । तन्मूलत्वादच्युतेज्या सर्वजीवात्मतर्पणम् ॥३६
पुराण्यनेन सृष्टानि नृतिर्यगृषिदेवताः । शेते जीवेन रूपेण पुरेषु पुरुषो ह्यसौ ॥३७॥
तेष्वेषु भगवान् राजंस्तारतम्येन वर्तते । तस्मात् पात्रं हि पुरुषो यावानात्मा यथेयते ॥३८॥
दृष्ट्वा तेषां मिथो नृणामवज्ञानात्मतां नृप । त्रेतादिषु हरेरर्चा क्रियायै कविभिः कृता ॥३९॥
ततोऽर्चायां हरिं केचित् संश्रद्धाय सपर्यया । उपासत उपास्तापि नार्थदा पुरुषद्विषाम् ॥४०॥
पुरुषेष्वपि राजेन्द्र सुपात्रं ब्राह्मणं विदुः । तपसा विद्यया तुष्ट्या धत्ते वेदं हरेस्तनुम् ॥१४॥
नन्वस्य ब्राह्मणा राजन् कृष्णस्य जगदात्मनः । पुनन्तः पादरजसा त्रिलोकीं दैवतं महत् ४२॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां सप्तमस्कन्धे सदाचारनिर्णयोनाम चतुर्दशोऽध्यायः ॥१४॥

स देशः ॥ २८ ॥ अर्चा स्थिरप्रतिमा जगन्नाथादिरूपा ॥ २९ ॥ सरांसीति सार्द्धचतुष्कम् उत अथ । अर्हैः पूज्यैः वसिष्ठादिभिः आश्रितानि सेवितानि क्षेत्राणि पुरुषोत्तमादीनि । पुलहाश्रमः गण्डकीतीरस्थः । फाल्गुनं फल्गुनदीस्थम् । कुशस्थली द्वारका । कौ पृथिव्यां शेते इति कुशं जलं तदेव स्थलं यस्याः सा । 'कुशो दर्भे कुशं जलम्' । इति हैमः । पंपा तत्संज्ञकम् । नारायणाश्रमः वदरिकाश्रमः । नन्दा नदी । सीतेति चित्रकूटः । [1]कुलाचलाः । सहस्रगुणाधिकस्य फलस्योदयो यस्मात् । ईहितः अनुष्ठितः ॥३०।३१।३२।३३॥ हे उर्वीश भूपते । अत्र एको हरिरेव पात्रं निरुक्तं निर्णीतम् पात्रविद्भिः ॥ ३४ ॥ अर्हत्सु सिद्धेषु । आत्मजाः सनकादयः । तत्र राजसूये मतः सर्वसम्मतो जातः ॥ ३५ ॥ आकीर्णो व्याप्तः तस्य मूलत्वात् अच्युतस्य आराधनं सर्वेषाम् आत्मनश्च तृप्तिकरं च भवति अतः स एव मुख्यं पात्रमित्यन्वयः ॥ ३६ ॥ पुरि शयनात् पुरुष इति श्रुतेः ॥ ३७ ॥ तेषु पुरेषु तारतम्येन न्यूनाधिकभावेन । तत्रापि यावान् आत्मा ज्ञानांशः आधिक्येन यत्र यथा प्रतीयते तत्र तथाऽसौ पात्रम् ॥ ३८ ॥ अवज्ञानात्मतां तिरस्कारभावनाम् । अर्चा प्रतिमा । कृता कल्पिता ॥ ३९ ॥ संश्रद्धाय श्रद्धां कृत्वा । उपासितापि अर्थदा फलप्रदा न भवति ॥ ४० ॥ तनुं मूर्तिम् ॥ ४१ ॥ ननु अहो ब्राह्मणाः श्रीकृष्णस्यापि महत् दैवतमादरविषया अतस्तेषामेव पात्रत्वं सुस्थिरमित्यवधेयम् ॥ ४२ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे गूढार्थदीपिन्यां चतुर्दशोऽध्यायः ।

---

१. महेन्द्रो मलयः सह्यः शुक्तिमानृक्षवानपि । विन्ध्यश्च पारियात्रश्च सप्तैते कुलपर्वताः ।

अथ पञ्चदशोऽध्यायः

नारद उवाच

कर्मनिष्ठा द्विजाः केचित् तपोनिष्ठा नृपापरे। स्वाध्यायेऽन्ये प्रवचने ये केचिज्ज्ञानयोगयोः ॥१॥
ज्ञाननिष्ठाय देयानि कव्यान्यानन्त्यमिच्छता। दैवे च तदभावे स्यातिरेभ्यो यथार्हतः ॥२॥
द्वौ दैवे पितृकार्ये त्रीनेकैकमुभयत्र वा। भोजयेत् सुसमृद्धोऽपि श्राद्धे कुर्यान्न विस्तरम् ॥ ३ ॥
देशेकालोचितश्रद्धाद्रव्यपात्रार्हणानि च। सम्यग् भवन्ति नैतानि विस्तरात् स्वजनार्पणात् ४॥
देशे काले च सम्प्राप्ते मुन्यन्नं हरिदैवतं। श्रद्धया विधिवत् पात्रे न्यस्तं कामधुगक्षयम् ॥५॥
देवर्षिपितृभूतेभ्य आत्मने स्वजनाय च। अन्नं संविभजन् पश्येत् सर्वं तत् पुरुषात्मकम् ॥६॥
न दद्यादामिषं श्राद्धे न चाद्याद् धर्मतत्त्ववित्। मुन्यन्नैः स्यात् परा प्रीतिर्यथा न पशुहिंसया।
नैतादृशः परो धर्मो नृणां सद्धर्ममिच्छताम्। न्यासो दण्डस्य भूतेषु मनोवाक्कायजस्य यः ।८।
एके कर्ममयान् यज्ञान् ज्ञानिनो यज्ञवित्तमाः। आत्मसंयमनेऽनीहा जुह्वति ज्ञानदीपिते ॥ ९ ॥
द्रव्ययज्ञैर्यक्ष्यमाणं दृष्ट्वा भूतानि बिभ्यति। एष माकरुणो हन्यादतज्ज्ञो ह्यसुतृब् ध्रुवम् ॥१०॥
तस्माद् दैवोपपन्नेन मुन्यन्नेनापि धर्मवित्। संतुष्टोऽहरहः कुर्यान्नि नैमित्तिकीः क्रियाः ॥११॥
विधर्मः परधर्मश्च आभास उपमा छलः। अधर्मशाखाः पञ्चेमा धर्मज्ञोऽधर्मवत् त्यजेत् ॥१२॥
धर्मबाधो विधर्मःस्यात् परधर्मोऽन्यचोदितः। उपधर्मस्तु पाखण्डो दम्भो वा शब्दभिच्छलः१३

मोक्षसम्बन्धिधर्माणां सङ्ग्रहो गृहिणां कृते।
कृतः पञ्चदशेऽतीतं स्ववृत्तं मुनिनोच्यते ॥१॥

कर्मनिष्ठा गृहस्थाः। तपोनिष्ठा वानप्रस्थाः प्रवचने अध्यापने ब्रह्मचारिणः। शेषाः संन्यासिनः। कव्यं पितॄणामन्नम्। हव्यं देवानाम्। यथार्हतः 'यथायोग्यं' ज्ञानादितारतम्येन ॥ २ ॥ दैवे वैश्वदैविके द्वौ द्वौ चत्वारो जाताः। पितृकार्ये 'त्रीन्' त्रीनिति। षण्णां पितॄणामष्टादश जाताः। सर्वसङ्कलने द्वाविंशतिसंख्याका विप्राः समृद्धेन पार्वणे भोज्याः। स्वल्पवित्तवता अष्टौ भोज्याः उभयत्र एकैकग्रहणात् ॥ ३ ॥ अर्हणं विप्रपूजनम् ॥ ४ ॥ हरिदैवतं हरये निवेदितं मुन्यन्नं व्रीह्यादि। सत्पात्रे न्यस्तमर्पितं सत् ॥ ५ ॥ सर्वं प्राणिजातम्। पुरुषात्मकं भगवत्स्वरूपम् ॥६॥ मुन्यन्नैः यथा तृप्तिः तथा पशुहिंसया नेत्यन्वयः। परा पूर्णा ॥७॥ कोऽसौ धर्मं मनोवाक् कायजन्यस्य दण्डस्य हिंसायाः यः न्यासः त्यागः इति यत् स धर्मः ॥ ८ ॥ अनीह निष्कामा आत्मसंयमरूपज्ञानाग्नौ जुह्वति भस्मीकुर्वन्ति ॥ ९ ॥ भूतानि पश्वादीनि कर्तॄणि विभ्यति। एष निर्दयः मां ध्रुवं हन्यादिति। असुतृप् स्वप्राणपोषणपरः। अतज्ज्ञः मूर्खः ॥ १० ॥ अपि एवार्थे मुन्यन्नैव ॥११॥ उपमा उपधर्मः[1] ॥१२॥ धर्मबुद्ध्याऽपि यस्मिन् क्रियमाणे स्वधर्मबाधः स्यात् स विधर्मः वामाचारः शास्त्रविरुद्धत्वात्। यद्वा। अशक्तावस्थायां स्नानादिः। तप्तमुद्राधारणादिः। अन्यस्य विप्रस्य विहितो भिक्षाटनादिः क्षत्रियादेः परधर्मः। [2]पाखण्डः अवेद-

---

१. अशक्तेन शरीरेण स्नानं कुर्वन्ति ये बलात्। ब्रह्महत्या कृता तैस्तु तया ते नरकाय वै ॥ (इति स्मृतेः)

२. शंखचक्रे मृदा यस्तु कुर्यात्तप्तायसेन वा। स शूद्रवद् बहिष्कार्यः सर्वस्माद् द्विजकर्मणः ॥ इत्याश्वलायनोक्तेः
(वंशीधरी)

यस्त्विच्छया कृतः पुम्भिराभासो ह्याश्रमात् पृथक् । स्वभावविहितो धर्मः कस्य नेष्टः प्रशान्तये
धर्मार्थमपि नेहेत यात्रार्थं वाऽधनो धनम् । अनीहानीहमानस्य महाहेरिव वृत्तिदा ॥१५॥
संतुष्टस्य निरीहस्य स्वात्मारामस्य यत् सुखम् । कुतस्तत् कामलोभेन धावतोऽर्थेहया दिशः॥१६॥
सदा संतुष्टमनसः सर्वाः सुखमया दिशः । शर्कराकण्टकादिभ्यो यथोपानत्पदः शिवम् ॥१७॥
संतुष्टः केन वा राजन् न वर्तेतापि वारिणा । औपस्थ्यजैह्व्यकार्पण्याद् गृहपालायते जनः॥१८॥
असंतुष्टस्य विप्रस्य तेजो विद्या तपो यशः । स्रवन्तीन्द्रियलौल्येन ज्ञानं चैवावकीर्यते ॥१९॥
कामस्यान्तं च क्षुत्तृड्भ्यां क्रोधस्यैतत्फलोदयात् । जनो याति न लोभस्य जित्वा भुक्त्वा दिशो भुवः
पण्डिता बहवो राजन् बहुज्ञाः संशयच्छिदः । सदसस्पतयोऽप्येके असंतोषात् पतन्त्यधः ॥२१॥
असंकल्पाज्जयेत् कामं क्रोधं कामविवर्जनात् । अथानर्थेक्षया लोभं भयं तत्त्वावमर्शनात् ॥२२॥
आन्वीक्षिक्या शोकमोहौ दम्भं महदुपासया । योगान्तरायान् मौनेन हिंसां कायाद्यनीहया ॥२३॥
कृपया भूतजं दुःखं दैवं जह्यात् समाधिना । आत्मजं योगवीर्येण निद्रां सत्त्वनिषेवया ॥२४॥
रजस्तमश्च सत्त्वेन सत्त्वं चोपशमेन च । एतत् सर्वं गुरौ भक्त्या पुरुषो ह्यञ्जसा जयेत् ॥२५॥

मूलकः चैत्यवन्दनादिः । जनमोहनाय [1]जटाभस्मकपालधारणादिः शब्दस्य भित् भेदनं मुख्यार्थबाधनं छलः । यथा दशावरान् विप्रान् भोजयेदित्यत्र विवक्षितं [2]बहुव्रीहिं विहाय तत्पुरुषेण दशभ्योऽवरान् न्यूनान् नवाष्टादीनित्यर्थकरणम् ॥ १३ ॥ इच्छया कृतः कल्पितः शास्त्रासम्मतः अनाचारबहुलश्च मूर्खान् प्रति धर्म इव आभासते धर्माभासः न तु धर्मः । स्वभावेन ब्राह्मणत्वादिस्वभावेन । प्रशान्तये मोक्षाय । कस्य नेप्सितः सर्वस्यापीत्यर्थः ॥१४॥ अधनो निर्धनः । यात्रार्थं देहनिर्वाहार्थम् । अनीहमानस्य चेष्टामकुर्वतः अनीहा प्रारब्धमेव महाहेः अजगरस्य वृत्तिदा ॥१५॥ अर्थेच्छया धनेच्छया । कामाः विषयाः तेषाम् ॥ १६ ॥ उपानहौ पादयोर्यस्य तस्य पुंसः शिवं व्यथाभावः । शर्कराः पाषाणकणाः । सुखमयाः सुखमय्यः ॥ १७ ॥ सन्तुष्टः वारिणा अपि शब्दात् शाकादिना केन वा 'कं ब्रह्म इति श्रुतेः ब्रह्मणा वा न वर्तेत न जीवेत अपि तु जीवेतैवेत्यर्थः । असन्तुष्टस्तु गृहपालः श्वा तद्वत् आचरति । गृहे गृहे पत्रपुटं लेढीत्यर्थः ॥ १८ ॥ इन्द्रियलौल्येन विषयासक्त्या । स्रवन्ति क्षीयन्ते । अवकीर्यते नश्यति॥१९॥ क्षुत्तृड्भ्यामुत्पन्नाभ्याम् । एतत्फलं क्रोधफलं हिंसादि । दिशो जित्वापि भुवो भुक्त्वापि लोभस्यान्तं जनो नैव यातीत्यन्वयः ॥२०॥ अधो नरके ॥२१॥ असङ्कल्पात् स्त्र्यादिविषयकसङ्कल्पवर्जनात् । कामः हिंसेच्छा तस्य त्यागात् । अर्थे अनर्थेक्षयां अनर्थदृष्ट्या लोभं । भयम् अद्वैतानुसन्धानात् द्वितीयाद्वै भयं भवति इतिः श्रुतेः ॥२२॥ आन्वीक्षिक्या आत्मविद्यया आत्मानात्मविचारेण । महतां सात्त्विकपुरुषाणाम् । अन्तरायान् वादविवादान् । अनीहया चेष्टाराहित्येन ॥२३॥ भूतजम् आधिभौतिकम् । दैवम् आधिदैविकम् प्रारब्धजमिदमनिवार्यम् इति । मनः स्थैर्येण । आत्मजं देहजम् आध्यात्मिकम् योगेन प्राणायामेन । निद्रां सात्त्विकाहारेण॥२४॥ उपशमेन अनासक्त्या । एतत् सर्वं कामादिकम् । अञ्जसा सुखेन भक्त्या जयेत्॥२५॥

---

१. प्रतिपादितं चैतत्पृथूपाख्याने ४ स्कन्धे ।
२. बहुव्रीहौ तु दश अवरा अधिका येषु शतादिषु तान् दशोत्तर शतादीनिति मुख्योऽर्थः ।

यस्य साक्षाद् भगवति ज्ञानदीपप्रदे गुरौ । मर्त्यासद्धीः श्रुतं तस्य सर्वं कुञ्जरशौचवत् ॥२६॥
एष वै भगवान् साक्षा.त् प्रधानपुरुषेश्वरः । योगेश्वरैर्विमृग्याङ्घ्रिर्लोको यं मन्यते नरम् ॥२७॥
षड्वर्गसंयमैकान्ताः सर्वा नियमचोदनाः । तदन्ता यदि नो योगानावहेयुः श्रमावहाः ॥२८॥
यथा वार्तादयो ह्यर्था योगस्यार्थं न बिभ्रति । अनर्थाय भवेयुस्ते पूर्तमिष्टं तथाऽसतः ॥२९॥
यश्चित्तविजये यत्तः स्यान्निःसङ्गोऽपरिग्रहः । एको विविक्तशरणो भिक्षुर्भिक्षामिताशनः ॥३०॥
देशे शुचौ समे राजन् संस्थाप्यासनमात्मनः । स्थिरं समं सुखं तस्मिन्नासीतर्ज्वङ्ग ओमिति ३१
प्राणापानौ संनिरुन्ध्यात् पूरकुम्भकरेचकैः । यावन्मनस्त्यजेत् कामान् स्वनासाग्रनिरीक्षणः ३२
यतो यतो निःसरति मनः कामहतं भ्रमत् । ततस्तत उपाहृत्य हृदि रुन्ध्याच्छनैर्बुधः ॥३३॥
एवमभ्यसतश्चित्तं कालेनाल्पीयसा यतेः । अनिशं तस्य निर्वाणं यात्यनिन्धनवह्निवत् ॥३४॥
कामादिभिरनाविद्धं प्रशान्ताखिलवृत्ति यत् । चित्तं ब्रह्मसुखस्पृष्टं नैवोत्तिष्ठेत कर्हिचित् ॥३५॥
यः प्रव्रज्य गृहात् पूर्वं त्रिवर्गावपनात् पुनः । यदि सेवेत तान् भिक्षुः स वै वान्ताश्यपत्रपः ॥३६॥
यैः स्वदेहः स्मृतोऽनात्मा मर्त्यो विट्कृमिभस्मसात् । त एनमात्मसात्कृत्वा श्लाघयन्ति ह्यसत्तमाः
गृहस्थस्य क्रियात्यागो व्रतत्यागो वटोरपि । तपस्विनो ग्रामसेवा भिक्षोरिन्द्रियलोलता ॥३८॥
आश्रमापसदा ह्येते खल्वाश्रमविडम्बकाः । देवमायाविमूढांस्तानुपेक्षेतानुकम्पया ॥३९॥
आत्मानं चेद् विजानीयात् परं ज्ञानधुताशयः । किमिच्छन् कस्य वा हेतोर्देहं पुष्णाति लम्पटः ।

मर्त्योऽयमिति असद्धीः कुत्सितबुद्धिः तस्य श्रुतं शास्त्रश्रवणादिकं सर्वं शौचवन्निष्फलं तस्य भवति ॥२६॥ स्नानं धूलिप्रक्षेपेण एष कृष्णः भगवान् तथा गुरुरपि अयं लोकोऽज्ञोजनः नरं मन्यते तस्य दुर्भाग्यमेव ॥२७॥ नियमचोदना इष्टापूर्तादिविधयः षडिन्द्रियवर्गस्य निरोधैक पराः सन्ति । तदन्ताः तदेकपराः सत्योऽपि यदि योगान् मुक्त्युपायान् न साधयेयुः तर्हि श्रमावहाः श्रमजनका एव ॥ २८ ॥ यथा वार्ता कृष्यादयः अर्थं मोक्षं न बिभ्रति न साधयन्ति प्रत्युत अनर्थाय संसाराय भवन्ति तथा असतः हरिविमुखस्य स्मार्तं वैदिकं कर्माऽपि व्यर्थमेव ॥२९॥ यत्तः उद्युक्तः सन् स भिक्षुर्यतिः भवेत् । विविक्तशरणः एकान्तवासी । अत्र भैक्षेति पाठः । भिक्षया प्राप्तमिति स्वामिव्याख्यानात् । मितं परिमितमश्नातीति कर्तरि ल्युः ॥३०॥ ऋजु अवक्रमङ्गं यस्य सः तथाभूतः सन् तस्मिन् आसने आसीत् इत्यन्वयः । ओमित्युच्चारयन्निति शेषः ॥३१॥ कामान् विषयान् । स्वनासाग्रं भ्रूमध्यं निरीक्षते इति निरीक्षणः सन् त्यजेत् कर्तरि ल्युः ॥३२॥ यतः यं यं विषयं प्रति तत स्ततो विषयात् आकृष्य ॥ ३३ ॥ अनिशं निरन्तरमभ्यसतः तस्य यतेश्चित्तं निर्वाणं शान्तिं याति ॥३४॥ अनाविद्धम् अक्षुभितम् । यतः प्रशान्तेति । तत् कुतः ब्रह्मेति । अत एव नोत्तिष्ठति बहिर्वृत्तिकं न भवति ॥ ३५ ॥ पूर्वं प्रागेव प्रव्रज्य संन्यस्य पुनस्तान् सेवते स वान्ताशी वमनभोजी श्वेव ज्ञेयः निर्लज्जश्चे । त्रिवर्गो धर्मादिः आ समन्तात् उप्यते सम्पाद्यते यस्मिन् तस्मात् गृहाद् ॥३६॥ यैः स्वदेहः अनात्मा भौतिकः मर्त्योमरणानन्तरं च कृमिविट्भस्मरूपः स्मृतः चिन्तितः ते एव पुनः एवम् आत्माति मत्वा श्लाघयन्ति ते असत्तमाः मूर्खशिरोमणय एवं व्यर्थ साति: ॥३७॥ गृहेति युग्मम् । वटोः ब्रह्मचारिणः । लोलशब्दात् स्वार्थे ष्यञ् ततस्तल् । अपसदाः निकृष्टाः । विडम्बयन्ति केवलमनुकुर्वन्तीति दाम्भिका इत्यर्थः । उपेक्षेत कटूक्त्या नानु पीडयेत् नानुवर्तेत च ॥ ३८।३९ ॥ आत्मानं परं ब्रह्म चेत् विजानीयात् ज्ञातुं यतेत स यतिः

आहुः शरीरं रथमिन्द्रियाणि हयानभीषून् मन इन्द्रियेशम् ।
वर्त्मानि मात्रा धिषणां च सूतं सत्त्वं बृहद् बन्धुरमीशसृष्टम् ॥४१॥
अक्षं दशप्राणमधर्मधर्मौ चक्रेऽभिमानं रथिनं च जीवम् ।
धनुर्हि तस्य प्रणवं पठन्ति शरं तु जीवं परमेव लक्ष्यम् ॥४२॥

रागो द्वेषश्च लोभश्च शोकमोहौ भयं मदः । मानोऽवमानोऽसूया च माया हिंसा च मत्सरः॥४३॥
रजः प्रमादः क्षुन्निद्रा शत्रवस्त्वेवमादयः । रजस्तमःप्रकृतयः सत्वप्रकृतयः क्वचित् ॥४४॥

यावन्नृकायरथमात्मवशोपकल्पं धत्ते गरिष्ठचरणार्चनया निशातम् ।
ज्ञानासिमच्युतबलो दधदस्तशत्रुःस्वाराज्यतुष्ट उपशान्त इदं विजह्यात् ॥४५॥
नो चेत् प्रमत्तमसदिन्द्रियवाजिसूता नीत्वोत्पथं विषयदस्युषु निक्षिपन्ति ।
ते दस्यवः सहयसूतममुं तमोऽन्धे संसारकूप उरुमृत्युभये क्षिपन्ति ॥४६॥

प्रवृत्तं च निवृत्तं च द्विविधं कर्म वैदिकम् । आवर्तेत प्रवृत्तेन निवृत्तेनाश्नुतेऽमृतम् ॥४७॥
हिंस्रं द्रव्यमयं काम्यमग्निहोत्राद्यशान्तिदम् । दर्शश्च पूर्णमासश्च चातुर्मास्यं पशुः सुतः ॥४८॥
एतदिष्टं प्रवृत्ताख्यं हुतं प्रहुतमेव च । पूर्तं सुरालयारामकूपाजीव्यादिलक्षणम् ॥४९॥
द्रव्यसूक्ष्मविपाकश्च धूमो रात्रिरपक्षयः । अयनं दक्षिणं सोमो दर्श ओषधिवीरुधः ॥५०॥

किं सुखमिच्छन् देहं [1]पुष्णाति न पुष्णात्येव ॥ ४० ॥ आहुरिति युग्मम् । इन्द्रियेशं मनः अभीषून् रश्मीन् आहुः । मात्राः शब्दादीन् वर्त्मानि गन्तव्यदेशान् । धिषणां बुद्धिं सूतं सारथिम् । चित्तं च बृहत् बन्धुरं पूर्णं बन्धनमाहुः । कथंभूतम् । ईशेन अदृष्टेन सृष्टम् । अभितो देहादौ मानो यस्य तं जीवं साधनकौटिकं रथिनं मुक्ताभिमानं जीवं शरम् परं ब्रह्म[2]लक्ष्यमाहुः॥४१।४२॥राग इति युग्मम् । रागादयो निद्रान्ताः सप्तदश शत्रवो जेतव्याः । तत्र केचित् सत्त्वप्रकृतयोऽपि परोपकारादयः शत्रवः । भरतस्य मृगासक्त्या पतनहेतुत्वात् ॥४३।४४॥ यावत् नृकायरूपं रथं धत्ते आश्रयते तावदेव गरिष्ठस्य गुरोश्चरणार्चनया निशातं तीक्ष्णं ज्ञानखड्गं दधत् धारयन् सन् अस्तशत्रुः इदं शरीरादिकं विजह्यात् त्यजेत् मुक्तो भवेदित्यर्थः । कथंभूतं रथम् । आत्मवशेन स्वाधीनतया उपक्लृप्तं प्राप्तम् यद्वा स्ववशवर्तिकमेव । रचितमारोपितमित्येव पाठः । नतूपकल्पमिति तथार्थस्यासङ्गतत्वात् । स्वाराज्येन परमानन्देन तुष्टः सन् ॥४५॥ नोचेत् प्रमत्तमेनं रथिनं जीवम् असन्तः इन्द्रियाश्वाः बुद्धिसारथिनिबर्हिर्मुखाः उत्पथं प्रवृत्तिमार्गं नीत्वा विषयरूपेषु दस्युषु क्षिपन्ति । ते विषयाख्याः दस्यवः अमुं जीवं तमोऽन्धे तमो व्याप्ते संसारकूपे पातयन्ति । उरु महत् मृत्युमयं यस्मिन् ॥ ४६ ॥ प्रवृत्तेन कर्मणा । अमृतं मोक्षम् नावर्तते ॥४७॥ हिंस्रमिति युग्मम् पश्वादि हिंसात्मकम् । दर्शपूर्णमासादि हुतं प्रहुतं च तदेतत् सर्वं प्रवृत्ताख्यं कर्म इष्टं वैदिकमुच्यते । पूर्तं कर्म तु सुरालयादिलक्षणं ज्ञेयम् । आजीव्यं जीविकासाधनं वृक्षप्रपान्नक्षेत्रादि । पशुयागः । सुतः सोमयागः । हुतं वैश्वदेवम् । प्रहुतं बलिहरणम् ॥ ४८।४९ ॥ प्रवृत्तेन कर्मणा जीवस्य ऊर्ध्वाधोगमनप्रकारमाह द्रव्येति सार्द्धद्वयम् । द्रव्यव्रीह्यादेः सूक्ष्मपरिणामो देहस्तद्वान् सन् जीवः धूमादिशब्दैः तत्तदभिमानिनी या

---

१. सुखार्थी चेत्त्यजेद्विद्यां विद्यार्थी वा त्यजेत्सुखम् इति वचनात् ।
२. प्रणवो धनुः शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते । अप्रमत्तेन बोद्धव्यं शरवत्तन्मयो भवेत् ॥

अन्नं रेत इति क्ष्मेश पितृयानं पुनर्भवः। एकैकश्येनानुपूर्वं भूत्वा भूत्वेह जायते ॥५१॥
निषेकादिश्मशानान्तैः संस्कारैः संस्कृतो द्विजः। इन्द्रियेषु क्रियायज्ञान् ज्ञानदीपेषु जुह्वति।
इन्द्रियाणि मनस्यूर्मौ वाचि वैकारिकं मनः ।५२। वाचं वर्णसमाम्नाये तमोङ्कारे स्वरे न्यसेत्।
ओङ्कारं विन्दौ नादे तं तं तु प्राणे महत्यमुम् ॥ ५३ ॥
अग्निः सूर्यो दिवा प्राह्णः शुक्लो राकोत्तरं स्वराट्। विश्वश्च तैजसः प्राज्ञस्तुर्य आत्मा समन्वयात्
देवयानमिदं प्राहुर्भुत्वा भूत्वानुपूर्वशः। आत्मयाज्युपशान्तात्मा ह्यात्मस्थो न निवर्तते ॥५५॥
य एते पितृदेवानामयने वेदनिर्मिते। शास्त्रेण चक्षुषा वेद जनस्थोऽपि न मुह्यति ॥५६॥
आदावन्ते जनानां सद् बहिरन्तः परावरम्। ज्ञानं ज्ञेयं वचो वाच्यं तमो ज्योतिस्त्वयं स्वयम्
आबाधितोऽपि ह्याभासो यथा वस्तुतया स्मृतः। दुर्घटत्वादैन्द्रियकं तद्वदर्थविकल्पितम् ॥५८॥
क्षित्यादीनामिहार्थानां छाया न कतमापि हि। न संघातो विकारोऽपि न पृथङ् नान्वितो मृषा

या या देवता तां तां क्रमेण प्राप्नोति। ततः सोमः चन्द्रलोकः तं प्राप्य भोगान् भुङ्क्ते। ततो भोगान्ते पुनः अवोगमनमाह दर्शे अमावास्यायां यथा चन्द्रोऽदृश्यो भवति तथा विलीनदेहः सन् पुनः वृष्टिद्वारा ओषध्यादि प्राप्नोति। ततोऽन्नरूपेण पितरं प्रविश्य रेतोरूपेण मातरं च प्रविश्य पुनर्भवति जन्म गृह्णाति इति पितृयानं पितृयानसंज्ञकः प्रवृत्तिमार्गः उक्तो भवति। हे क्ष्मेश पृथ्वीपते। इत्थम् एकैकश्येन अनुपूर्वशः क्रमाद् तत्तद्रूपो भूत्वा इह भूमौ जायते। संस्कृतो द्विजः एतन्मार्गं प्राप्नोतीति शेषः ॥५०।५१॥ निवृत्तिकर्मनिष्ठस्य देवयानमार्गेण ब्रह्मलोकप्राप्तिमाह इन्द्रियेष्विति ज्ञानदीपेषु विषयप्रकाशकेषु इन्द्रियेषु चक्षुरादिषु क्रियायज्ञान् कर्मेन्द्रियव्यापारान् जुह्वति निपच्छन्ति ऊर्मौ सङ्कल्पादिरूपे मनसि। वैकारिकं विकारयुक्तम् मनः वाचि ॥५२॥ वर्णसमाम्नाये वर्णसमुदाये। स्वरे अकारत्रयात्मके ओङ्कारे। तं विन्दुम्। तं नादं प्राणे तत्सहचारिणि जीवे। अमुं जीवं महति ब्रह्मणि ॥ ५३ ॥ अधुना तस्य गति-हेतुभूतमर्चिरादिमार्गमाह-अग्निरिति। अग्न्यादिशब्दैस्तत्तदभिमानिन्यो देवता गृह्यन्ते तास्ताः प्राप्नोति। प्राह्णः तस्यैव भागः। अतः एकैव देवता ज्ञेया। शुक्लपक्षः। राका पूर्णिमा। स्वराट् ब्रह्मा एताः प्राप्नोति। एवं ब्रह्मलोकं गतस्य भोगावसाने तस्य मोक्षमाह विश्वश्चेति विश्वः स्थूलोपाधिः तं सूक्ष्मे विलाप्य सूक्ष्मस्तैजसो भवति सूक्ष्मं कारणे विलाप्य कारणरूपः प्राज्ञो भवति कारणं च सर्वसाक्षिणि महाकारणे समन्वयात् समन्वयं प्राप्य तुर्यो भवति मुच्यत इत्यर्थः ॥ ५४ ॥ स जनस्थः देहस्थोऽपि न मुह्यति विधिनिषेधातीतो भवतीत्यर्थः ॥५५॥५६॥ जनानां देहानामादौ कारणत्वेन अन्तेऽवधित्वेन च यत् सत् तथा बहिर्भोग्यं वस्तु अन्तर्भोक्तृ जीववृन्दं परमवरम् उच्चनीचम्। तमोऽविद्या ज्योतिर्विद्या वचो वाच्यं नाम रूपं च तत् सर्वम् अयं ज्ञानी स्वयमेव न तस्मात् व्यतिरिक्तं वस्तु किञ्चिदस्ति येन मुह्येत्। पश्ये मयि ब्रह्मणि कल्पितं परे नारदोक्तेः ॥ ५७ ॥ आबाधितः मिथ्याभूतोऽपि आभासः प्रतिबिम्बादिः यथा सत्यतया अज्ञैः स्मृतः प्रतीतो भवति तद्वत् ऐन्द्रियकं सर्वं वस्तुजातम् अर्थत्वेन सत्यत्वेन विविधं कल्पितमपि न वस्तुतः सत् दुर्घटत्वात् तस्मिन् आत्मत्वासम्भवादित्यर्थः ॥ ५८ ॥ अर्थानां पञ्चभूतानां छाया समूहो देहादिकं संघातारम्भपरिणामानां मध्ये कतमाऽपि नहि नैवास्ति। न तावत् भूतानां संघातो देहादिः। न विकारः तैरारब्धः अवयवी। अपि शब्दात् न परिणामोऽपि किञ्च

धातवोऽवयवित्वाच्च तन्मात्रावयवैर्विना । न स्युर्ह्यसत्यवयविन्यसन्नवयवोऽन्ततः ॥६०॥
स्यात् सादृश्यभ्रमस्तावद् विकल्पे सति वस्तुनः । जाग्रत्स्वापौ यथा स्वप्ने तथा विधिनिषेधता
भावाद्वैतं क्रियाद्वैतं द्रव्याद्वैतं तथात्मनः । वर्तयन् स्वानुभूत्येह त्रीन् स्वप्नान् धुनुते मुनिः॥६२॥
कार्यकारणवस्त्वैक्यमर्शनं पटतन्तुवत् । अवस्तुत्वाद् विकल्पस्य भावाद्वैतं तदुच्यते ॥६३॥
यद् ब्रह्मणि परे साक्षात् सर्वकर्मसमर्पणम् । मनोवाक्तनुभिः पार्थ क्रियाद्वैतं तदुच्यते ॥६४॥
आत्मजायासुतादीनामन्येषां सर्वदेहिनाम् । यत् स्वार्थकामयोरैक्यं द्रव्याद्वैतं तदुच्यते ॥६५॥
यद् यस्य वाऽनिषिद्धं स्याद् येन यत्र यतो नृप । स तेनेहेत कर्माणि नरो नान्यैरनापदि ॥६६॥
एतैरन्यैश्च वेदोक्तैर्वर्तमानः स्वकर्मभिः । गृहेऽप्यस्य गतिं यायाद् राजंस्तद्भक्तिभाङ् नरः ॥६७

यथा हि यूयं नृपदेव दुस्त्यजादापद्गणादुत्तरतात्मनः प्रभोः ।
यत्पादपङ्केरुहसेवया भवानहार्षीन्निर्जितदिग्गजः क्रतून् ॥६८॥

अहं पुराभवं कश्चिद् गन्धर्व उपबर्हणः । नाम्नातीते महाकल्पे गन्धर्वाणां सुसम्मतः ॥६९॥
रूपपेशलमाधुर्यसौगन्ध्यप्रियदर्शनः । स्त्रीणां प्रियतमो नित्यं मत्तस्तु पुरुलम्पटः ॥७०॥
एकदा देवसत्रे तु गन्धर्वाप्सरसां गणाः । उपहूता विश्वसृग्भिर्हरिगाथोपगायने ॥७१॥

न पृथक् न च तैरन्वितश्च अतो मृषैव । अतात्त्विकोऽन्यथाभावो विवर्त एवेत्यर्थः । आरम्भवादः कणभक्षपक्षः संघातवादस्तु भदन्तपक्षः । सांख्ययस्य पक्षः परिणामवादो वेदान्तपक्षस्तु विवर्तवादः इति वृद्धाः ॥ ५९ ॥ देहादीनां मिथ्यात्वमुक्त्वा तद्धेतूनां क्षित्यादीनामपि मिथ्यात्वमाह—धातवो भूतानि तन्मात्रैः सूक्ष्मैरवयवैः विना न स्युः । अवयविनि असति अन्ततो गत्वा अवयवोऽपि असन्नेवेत्यर्थः ॥ ६० ॥ वस्तुनः परमात्मनः विकल्पे भेदे असत्यपि पूर्वपूर्वारोपसादृश्यात् सोऽयं देवदत्त इति भ्रमः स्यात्स च तावदेव यावदविद्यानिवृत्तिः । सर्वमिथ्यात्वे शास्त्रस्य विधिनिषेधकता तु जाग्रत्स्वप्नव्यवस्थावत्स्यात् स्वप्नमध्ये यथा तौ मिथ्याभूतौ तथा मिथ्याभूते जगति साऽपि मिथ्याभूतेत्यर्थः ॥ ६१ ॥ इदानीमुक्तमेवाद्वैतं भावनात्रयेण दृढीकरोति—भावेति चतुर्भिः आत्मनो मनसि वर्तयन् विचारयन् आत्मनः त्रीन् स्वप्नान्[1] जाग्रदादीन् धुनोति निरस्यति ॥ ६२ ॥ मर्शनम् आलोचनम् । पटः कार्यं तन्तुः कारणं तयोरैक्यपर्यालोचनं तन्तुरेव पट इति । विकल्पस्य भेदस्य अवस्तुत्वात्॥६३॥ हे पार्थ युधिष्ठिर । साक्षात् फलाकाङ्क्षामन्तरेण समर्पणं सैव क्रियाभेदे अद्वैते हेतुः ॥६४॥ आत्मनः स्वस्य जायादीनां तथा अन्येषां सर्वेषां च स्वार्थस्य वित्तादेः कामस्य भोगस्य च ऐक्यबुद्ध्या सम्पादनात् द्रव्याद्वैतं भवति ॥६५॥ उक्ताना-श्रमधर्मान् संक्षिपति । यस्य कर्तुः यत् कार्यजातं येन द्रव्येण यत उपात्तं यस्मिन् देशे काले च अनिषिद्धं विहितं स नरः तेनैव कार्याणि पूजालक्षणानि ईहेत कुर्यात् । अन्यैः निषिद्धैनः ॥६६॥ गृहे वर्तमानोऽपि अस्य श्रीकृष्णस्य गतिं पदवीं याति प्राप्नोति । लडर्थे लिङ्।६७।हे नृपदेव । यद्वा । नृपैर्देवैश्च सहायभूतैरपि। दुस्त्यजात् उत्कर्षेण अतरत । यथा क्रतून् अहार्षीत् अकरोत् तथैव तद्भक्तिभाक् सन् अस्य गतिं यायादिति पूर्वेणान्वयः । दिग्गजोऽत्र दिक्पालोपलक्षणः ॥ ६८ ॥ नाम्ना उपवर्हणः ॥ ६९ ॥ रूपादिभिः प्रियमाकर्षकं दर्शनं यस्य । पेशलं चातुर्यम् । पुरुलम्पटः महास्त्रैणः ॥ ७० ॥ सत्रे यागे । गाथा

---

१. त्रिस्रोऽवस्थास्त्रयः स्वप्नाः ।

अहं च गायंस्तद्विद्वान् स्त्रीभिः परिवृतो गतः। ज्ञात्वा विश्वसृजस्तन्मे हेलनं शेपुरोजसा।
याहि त्वं शूद्रतामाशु नष्टश्रीः कृतेहेलनः॥७२॥

तावद्दास्यामहं जज्ञे तत्रापि ब्रह्मवादिनाम्। शुश्रूषयाऽनुषङ्गेण प्राप्तोऽहं ब्रह्मपुत्रताम्॥७३॥

धर्मस्ते गृहमेधीयो वर्णितः पापनाशनः। गृहस्थो येन पदवीमञ्जसा न्यासिनामियात्॥७४॥

यूयं नृलोके बत भूरिभागा लोकं पुनाना मुनयोऽभियन्ति।
येषां गृहानावसतीति साक्षाद् गूढं परं ब्रह्म मनुष्यलिङ्गम्॥७५॥

स वा अयं ब्रह्म महद्विमृग्यं कैवल्यनिर्वाणसुखानुभूतिः।
प्रियः सुहृद् वः खलु मातुलेय आत्मार्हणीयो विधिकृद् गुरुश्च॥७६॥

न यस्य साक्षाद् भवपद्मजादिभी रूपं धिया वस्तुतयोपवर्णितम्।
मौनेन भक्त्योपशमेन पूजितः प्रसीदतामेष स सात्वतां पतिः॥७७॥

श्रीशुक उवाच

इति देवर्षिणा प्रोक्तं निशम्य भरतर्षभः। पूजयामास सुप्रीतः कृष्णं च प्रेमविह्वलः॥७८॥

कृष्णपार्थावुपामन्त्र्य पूजितः प्रययौ मुनिः। श्रुत्वा कृष्णं परं ब्रह्म पार्थः परमविस्मितः॥७९॥

इति दाक्षायणीनां ते पृथग् वंशाः प्रकीर्तिताः। देवासुरमनुष्याद्या लोका यत्र चराचराः॥८०॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां सप्तमस्कन्धे प्रह्लादानुचरिते नारद युधिष्ठिर संवादे सदाचारनिर्णयो नाम पञ्चदशोऽध्यायः॥१५॥

इति सप्तमः स्कन्धः समाप्तः

हरि ॐ तत्सत्

चरित्रम्। विश्वसृग्भिः प्रजापतिभिः दक्षादिभिः॥ ७१॥ अहमिति सार्द्धम्। तत् आह्वानं विद्वान् जानन् उन्मत्तः सन् अहम् अश्लीलपदं गायन्नेव गतः। तत् हेलनम् अपराधम्। ओजसा तपोबलेन॥७२॥ तावत् तदानीमेव। अनुषङ्गेण[1] निरन्तरसेवया॥ ७३॥ गृहमेधीयः गृहस्थसम्बन्धी। पदवीं मोक्षम्। अञ्जसा सुखेन॥ ७४॥ यूयमित्यादि पद्यत्रयमस्मिन्नेव स्कन्धे दशमाध्याये॥ ४८।४९।५०॥ एतत्संख्याकं व्याख्यातं तत्रैवावलोकनीयम् अतो न व्याख्यायते। अत्रत्या संख्या॥७५।७६।७७॥ इति प्रोक्तं धर्मतत्त्वम्। भरतवंशे ऋषभः श्रेष्ठो युधिष्ठिरः चकारात् नारदं च॥ ७८॥ उपामन्त्र्य पृष्ट्वा॥ ७९॥ दाक्षायणीनां दक्षकन्यानाम्। ते तुभ्यम्। यत्र येषु वंशेषु। लोकाः प्राणिनो जाताः॥ ८०॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे श्रीसनाढ्यवंशावतंस-पण्डितप्रवरश्रीराममूर्तिशास्त्रि पौराणिक-विरिचितायां गूढार्थदीपिन्यां पञ्चदशोऽध्यायः।

॥ इति सप्तमः स्कन्धः समाप्त॥

१. 'तीव्रस्नेहोऽनुषङ्गोऽथ नैरन्तर्यानुसेवनम्'। इत्यभिधानात्।



ॐ श्रीपरमात्मने नमः

अष्टमः स्कन्धः

अथ प्रथमोऽध्यायः

राजोवाच

स्वायम्भुवस्येह गुरो वंशोऽयं विस्तराच्छ्रुतः । यत्र विश्वसृजां सर्गो मनूनन्यान् वदस्व नः ।१।
यत्र यत्र हरेर्जन्म कर्माणि च महीयसः । गृणन्ति कवयो ब्रह्मंस्तानि नो वद शृण्वताम् ।२।
यद् यस्मिन्नन्तरे ब्रह्मन् भगवान् विश्वभावनः । कृतवान् कुरुते कर्ता ह्यतीतेऽनागतेऽद्य वा ।३।

ऋषिरुवाच

मनवोऽस्मिन् व्यतीताः षट् कल्पे स्वायम्भुवादयः । आद्यस्ते कथितो यत्र देवादीनां च सम्भवः
आकूत्यां देवहूत्यां च दुहित्रोस्तस्य वै मनोः । धर्मज्ञानोपदेशार्थं भगवान् पुत्रतां गतः ॥ ५ ॥
कृतं पुरा भगवतः कपिलस्यानुवर्णितम् । आख्यास्ये भगवान् यज्ञो यच्चकार कुरूद्वह ॥ ६॥
विरक्तः कामभोगेषु शतरूपापतिः प्रभुः । विसृज्य राज्यं तपसे सभार्यो वनमाविशत् ॥ ७ ॥
सुनन्दायां वर्षशतं पदैकेन भुवं स्पृशन् । तप्यमानस्तपो घोरमिदमन्वाह भारत ॥ ८ ॥

मनुरुवाच

येन चेतयते विश्वं विश्वं चेतयते न यम् । यो जागर्ति शयानेऽस्मिन्नायं तं वेद वेद सः ॥ ९ ॥

॥ अत्र मन्वन्तरवर्णनम् ॥

भक्ताभीष्टप्रदातारमन्योन्याभिन्नविग्रहम् ।
नमामि शङ्कराश्लिष्टं मोहिनीरूपिणं हरिम् ॥१॥
गजेन्द्रमोक्षणं सिन्धोर्मन्थनं रत्नसञ्चयः ।
महीं नेतु बलेर्यज्ञे वामनैश्वर्यमीर्यते ॥२॥
प्रथमे वर्णिताः स्वायम्भुवः स्वारोचिषस्तथा ।
उत्तमस्तामसश्चैव चत्वारो मनवः क्रमात् ॥३॥

हे गुरो । विश्वसृजां मरीच्यादीनाम् । वदस्व यत्नेन । 'भासनोपसंभाषा' इति तङ् ॥ १ ॥ यत्र यत्र मन्वन्तरे । महीयसः पूज्यतमस्य हरेः यानि गृणन्ति तानिनोऽस्माकम् ।२। यस्मिन् अतीते यत्कृतवान् अनागते यत्करिष्यति अद्य वर्तमाने च यत् कुरुते तद्वदेति पूर्वेणान्वयः ॥ ३ ॥ अस्मिन् कल्पे श्वेतवाराहे ॥४॥ पुत्रतां क्रमेण यज्ञकपिलरूपाभ्याम् ॥५॥ कृतं चरितम् । हे कुरूद्वह परीक्षित् ।।६।। शतरूपापतिः स्वायम्भुवः । काम्यन्ते इति कामाः विषयाः । तपसे तपः कर्तुम् ॥७॥ सुनन्दानदीतीरे । तपः तप्यमानः कुर्वाणः । पाकं पचतीतिवत् निर्देशः । इदं वक्ष्यमाणम् । अन्वाह जजाप ॥ ८ ॥ येन परमात्मना विश्वं

आत्मावास्यमिदं विश्वं यत् किंचिज्जगत्यां जगत्। तेन त्यक्तेन भुञ्जीथा मा गृधःकस्य स्विद्धनम्
यं न प्रश्यति पश्यन्तं चक्षुर्यस्य न रिष्यति। तं भूतनिलयं देवं सुपर्णमुपधावत ॥११॥
न यस्याद्यन्तौ मध्यं च स्वःपरो नान्तरं बहिः। विश्वस्यामूनि यद् यस्माद् विश्वं च तदृतं महत्

स विश्वकायः पुरुहूत ईशः सत्यः स्वयंज्योतिरजः पुराणः।
धत्तेऽस्य जन्माद्यजयाऽऽत्मशक्त्या तां विद्ययोदस्य निरीह आस्ते ॥१३॥

अथाग्रे ऋषयः कर्मांणीहन्तेऽकर्महेतवे। ईहमानो हि पुरुषः प्रायोऽनीहां प्रपद्यते ॥१४॥
ईहते भगवानीशो न हि तत्र विषज्जते। आत्मलाभेन पूर्णार्थो नावसीदन्ति येऽनु तम् ॥१५॥

तमीहमानं निरहङ्कृतं बुधं निराशिषं पूर्णमनन्यचोदितम्।
नृञ्छिक्षयन्तं निजवर्त्मसंस्थितं प्रभुं प्रपद्येऽखिलधर्मभावनम् ॥१६॥

श्रीशुक उवाच

इति मन्त्रोपनिषदं व्याहरन्तं समाहितम्। दृष्ट्वासुरा यातुधाना जग्धुमभ्यद्रवन् क्षुधा ॥१७॥
तांस्तथावसितान् वीक्ष्य यज्ञः सर्वगतो हरिः। यामैः परिवृतो देवैर्हत्वाऽशासत् त्रिविष्टपम्॥१८॥
स्वारोचिषो द्वितीयस्तु मनुरग्नेः सुतोऽभवत्। द्युमत्सुषेणरोचिष्मत्प्रमुखास्तस्य चात्मजाः॥१९॥
तत्रेन्द्रो रोचनस्त्वसीद् देवाश्च तुषितादयः। ऊर्जस्तम्भादयः सप्त ऋषयो ब्रह्मवादिनः ॥२०॥

विश्ववर्ती जनः चेतयते प्रवृत्तिक्षमं भवति। विश्वं कर्तृ यं परमात्मानं न चेतयते स्वयं चिद्रूपत्वात्। उभयत्र हेतुमाह-शयाने देहादौ यः जागर्ति साक्षितया वर्तते अहो अयं जनः तं न वेद स तु इमं वेदेत्यन्वयः ॥ ९ ॥ जगत्यां लोके यत् किञ्चित् जगत् स्थावरजङ्गमात्मकं वस्तु वर्तते तत् सर्वम् आत्मना चैतन्येन आवास्यं व्याप्तम्। कर्मणि ण्यत्। तेन त्यक्तेन दत्तेन भुञ्जीथा भोगान् भुङ्क्ष्व। कस्यचिदपि धनं मा गृधः माभिकाङ्क्षीः ॥ १० ॥ यं जनः न पश्यति। चक्षुः ज्ञानमपि यस्य न रिष्यति न नश्यति नित्यत्वात् तं देवं यूयम् उपधावत भजत। रिष् हिंसायां धातुः। कथंभूतम्। सुष्ठु पर्णं पतनमवतारो यस्य। भूतानि प्राणिनः निलयः आवासो यस्य ॥ ११ ॥ यस्य आद्यन्तादीनि न सन्ति किन्तु विश्वस्य अमूनि यस्मात् सन्ति विश्वं च यद्रूपमेव तत् ऋतं सत्यं महत् ब्रह्म उपधावतेति पूर्वेणान्वयः। स्वः स्वकीयः ॥ १२ ॥ स ईशः अजया मायया अस्य विश्वस्य जन्मादि सृष्ट्यादि धत्ते करोति पुनश्च तामजाम् चिच्छक्त्या उदस्य त्यक्त्वा निरीहः सन् आस्ते तमुपधावतेति योज्यम्। विश्वकायः विश्वमूर्तिः। पुरूणि हूतानि नामानि यस्य। पुरुभिः नामभिः हूयतेऽभिधीयते वा ॥ १३ ॥ यतः निरीहः आस्ते अथ अतः ऋषयोऽपि अकर्महेतवे मोक्षार्थं कर्माणि भगवदर्पितबुद्ध्या ईहन्ते कुर्वन्ति। तुमर्थे तवे प्रत्ययः। ईहमानः कुर्वाणः। अनीहाम् अकर्मत्वम् ॥१४॥ तत्र कर्मसु न विषज्जते न लिप्तो भवति। तम् अनुवर्तन्ते ये तेऽपि नावसीदन्ति कर्मभिः न बध्यन्ते इत्यर्थः ॥ १५॥ ईहमानं सृष्ट्यादि कुर्वन्तं तं प्रभुं प्रपद्ये शरणं व्रजामीत्यन्वयः। कथंभूतम्। अखिला धर्मा यस्मिन् तं भक्तियोगम् आविर्भावयति प्रवर्तयतीति तथाभूतम्। निजवर्त्मनि वेदमार्गे। न अन्यैः चोदितं स्वतन्त्रम् ॥१६॥ उपनिषदं गोप्यविद्याम् उच्चारयन्तं समाहितचित्तम्। जग्धुम् अत्तुम् ॥ १७ ॥ अवसितान् हन्तु कृतनिश्चयान्। यज्ञो नाम हरेरवतारः यामसंज्ञकैः देवैः युक्तः। त्रिविष्टं स्वर्गम् अपालयत् ॥१८।१९॥ तत्र मन्वन्तरे। रोचनो नाम इन्द्रः॥२०॥

ऋषेस्तु वेदशिरसस्तुषिता नाम पत्न्यभूत् । तस्यां जज्ञे ततो देवो विभुरित्यभिविश्रुतः ॥२१॥
अष्टाशीतिसहस्राणि मुनयो ये धृतव्रताः । अन्वशिक्षन् व्रतं तस्य कौमारब्रह्मचारिणः ॥२२॥
तृतीय उत्तमो नाम प्रियव्रतसुतो मनुः । पवनः सृञ्जयो यज्ञहोत्राद्यास्तत्सुता नृप ॥२३॥
वसिष्ठतनयाः सप्त ऋषयः प्रमदादयः । सत्या वेदश्रुता भद्रा देवा इन्द्रस्तु सत्यजित् ॥२४॥
धर्मस्य सूनृतायां तु भगवान् पुरुषोत्तमः । सत्यसेन इति ख्यातो जातः सत्यव्रतैः सह ॥२५॥
सोऽनृतव्रतदुःशीलानसतो यक्षराक्षसान् । भूतद्रुहो भूतगणांस्त्ववधीत् सत्यजित्सखः ॥२६॥
चतुर्थ उत्तमभ्राता मनुर्नाम्ना च तामसः । पृथुः ख्यातिर्नरः केतुरित्याद्या दश तत्सुताः ॥२७॥
सत्यका हरयो वीरा देवास्त्रिशिख ईश्वरः । ज्योतिर्धामादयः सप्त ऋषयस्तामसेऽन्तरे ॥२८॥
देवा वैधृतयो नाम विधृतेस्तनया नृप । नष्टाः कालेन यैर्वेदा विधृताः स्वेन तेजसा ॥२९॥
तत्रापि जज्ञे भगवान् हरिण्यां हरिमेधसः । हरिरित्याहृतो येन गजेन्द्रो मोचितो ग्रहात् ॥३०॥

राजोवाच

बादरायण एतत् ते श्रोतुमिच्छामहे वयम् । हरिर्यथा गजपतिं ग्राहग्रस्तममूमुचत् ॥३१॥
तत्कथा सुमहत् पुण्यं धन्यं स्वस्त्ययनं शुभम् । यत्र यत्रोत्तमश्लोको भगवान् गीयते हरिः ३२।

सूत उवाच

परीक्षितैवं स तु बादरायणिः प्रायोपविष्टेन कथासु चोदितः ।
उवाच विप्राः प्रतिनन्द्य पार्थिवं मुदा मुनीनां सदसि स्म शृण्वताम् ॥३३॥

इति श्रीमद्भागवते महापुराणे परमहंस्यां संहितायां अष्टमस्कन्धे मन्वन्तारानुचरिते

प्रथमोऽध्यायः ॥१॥

विभुः हरेरवतारः ॥ २१ ॥ ब्रह्मचारिणः तस्य विभोः व्रतम् ॥२२।२३॥ सत्यजित् नाम इन्द्र आसीत् ॥ २४ ॥ सूनता भार्या । सत्यसेनो नाम हरेरवतारः । सत्यव्रतसंज्ञकैः देवैः सह जातः ॥ २५ ॥ स सत्यसेनः । अनृतं व्रतं येषां दुष्टं शीलं येषां ते च ते च तान् ॥ २६।२७॥ त्रिशिखो नाम ईश्वरः इन्द्रः । अन्तरे मन्वन्तरे ॥ २८ ॥ नष्टाः लुप्ताः अध्येतृपरम्पराभावात् । विधृताः रक्षिताः । अतोऽस्मिन् द्विविधा देवा आसन्निति ज्ञातव्यम् ॥२९॥ तत्रापि तामसमन्वन्तरे । हरिमेधसः प्रजापतेः भर्तुः सकाशात् हरिण्यां पत्न्यां हरिसंज्ञकः अवतारः येन । ग्रहात् ग्राहात् मोचितः 'ग्रहग्राहौ तोयजीवे' इति निरुक्तिः ॥३०॥ हे वादरायणे व्यासपुत्र ॥३१॥ यत्र यत्र कथायां हरिः गीयते तासु कथासु । यद्वा । तत्कथा सा कथैव सुमहत् पुण्यम् । अजहल्लिङ्गत्वात् स्त्रीत्वम् । उद्देश्यविधेयभावत्वात् लिङ्गान्तरविशेषणं न दोषवहमिति काव्यप्रकाशोक्तेः ॥३२॥ हे विप्राः शौनकादयः । एवं चोदितः प्रेरितः स प्रसिद्धः श्रीशुकः सदसि पार्थिवम् अभिनन्द्य उवाचेत्यन्वयः । स्म प्रसिद्धौ । प्रायम् आमरणानशनपूर्वकम् उपविष्टेन॥३३॥

इति श्रीमद्भागवते महापुराणेऽष्टमस्कन्धे गूढार्थदीपिन्यां प्रथमोऽध्यायः ॥१॥

अथ द्वितीयोऽध्यायः

श्रीशुक उवाच

आसीद् गिरिवरो राजंस्त्रिकूट इति विश्रुतः । क्षीरोदेनावृतः श्रीमान् योजनायुतमुच्छ्रितः ॥१॥
तावता विस्तृतः पर्यक्त्रिभिः शृङ्गैः पयोनिधिम् । दिशः खं रोचयन्नास्ते रौप्यायसहिरण्मयैः॥२
अन्यैश्च ककुभः सर्वा रत्नधातुविचित्रितैः । नानाद्रुमलतागुल्मैर्निर्घोषैर्निर्झराम्भसाम् ॥ ३ ॥
स चावनिज्यमानाङ्घ्रिः समन्तात् पयऊर्मिभिः । करोति श्यामलां भूमिं हरिन्मरकताश्मभिः
सिद्धचारणगन्धर्वविद्याधरमहोरगैः । किन्नरैरप्सरोभिश्च क्रीडद्भिर्जुष्टकन्दरः ॥ ५ ॥
यत्र संगीतसन्नादैर्नदद्‌गुहममर्षया । अभिगर्जन्ति हरयः श्लाघिनः परशङ्कया ॥ ६ ॥
नानारण्यपशुव्रातसंकुलद्रोण्यलंकृतः । चित्रद्रुमसुरोद्यानकलकण्ठविहङ्गमः ॥ ७ ॥
सरित्सरोभिरच्छोदैः पुलिनैर्मणिवालुकैः । देवस्त्रीमज्जनामोदसौरभाम्भोऽनिलैर्युतः ॥ ८ ॥
तस्य द्रोण्यां भगवतो वरुणस्य महात्मनः । उद्यानमृतुमन्नाम आक्रीडं सुरयोषिताम् ॥
सर्वतोऽलंकृतं दिव्यैर्नित्यं पुष्पफलद्रुमैः ॥ ९ ॥ मन्दारैः पारिजातैश्च पाटलाशोकचम्पकैः ।
चूतैः प्रियालैः पनसैराम्रैराम्रातकैरपि । १० ॥ क्रमुकैर्नालिकेरैश्च खर्जूरैर्बीजपूरकैः ।
मधुकैः सालतालैश्च तमालैरसनार्जुनैः ॥११॥ अरिष्टोदुम्बरप्लक्षैर्वटैः किंशुकचन्दनैः ।
पिचुमन्दैः कोविदारैः सरलैः सुरदारुभिः ॥१२॥ द्राक्षेक्षुरम्भाजम्बूभिर्बदर्यक्षाभयामलैः ।
बिल्वैः कपित्थैर्जम्बीरैर्वृतो भल्लातकादिभिः॥१३॥तस्मिन् सरः सुविपुलं लसत्काञ्चनपङ्कजम्

द्वितीये सरसि क्रीडन् गजेन्द्रः स्वकरेणुभिः ।
ग्राहस्याकर्षणात् युद्धे खिन्नः सन्नस्मरद्धरिम् ॥१॥

इति नाम्ना विख्यातः । उच्छ्रितः उन्नतः ॥ १ ॥ तावता योजनायुतेन पर्यक् परितः ॥२॥ अन्यैश्च शृङ्गैः नानाद्रुमादिभिः निर्घोषैश्च ककुभः दिशश्च रोचयन्नास्ते इत्यन्वयः ॥ ३ ॥ गुल्मः लतादिसमूहः (झाड़ी) ॥३॥ स त्रिकूटः । पयऊर्मिभिः जलतरङ्गैः अविनिज्यमाना प्रक्षाल्यमाना अङ्घ्रयः मूलभागा यस्य सः । हरिद्वर्णैः अश्मभिः मणिभिः । यद्वा । हरित्सु अष्टसु दिक्षु स्थितैः ॥ ४ ॥ जुष्टाः सेविताः कन्दरा गुहा यस्य सः ॥ ५ ॥ यत्र त्रिकूटे । किन्नरादीनां सङ्गीतनादैः नदद्गुहं प्रदेशमभिलक्ष्य हरयः सिंहाः शङ्कया जातया अमर्षया असहनेन हेतुना ॥ ६ ॥ अरण्यभवैः पशुसमूहैः व्याप्ताभिः द्रोणीभिः । विचित्रद्रुमेषु सुरोद्यानेषु कलकण्ठा मधुरस्वनाः पक्षिणो यस्मिन् स त्रिकूटः आस्ते इति योज्यम् ॥ ७ ॥ अच्छोदैः निर्मलजलैः । मज्जनेन यः आमोदः दिव्यगन्धः तस्मादुद्भूतं यत्सौरभं परिमललक्षणं तत्सम्पृक्तशीतलवायुभिः युतः पर्वतः ॥ ८ ॥ तस्येति सार्द्धम् महात्मनः लोकपालस्य । द्रोणी पर्वतद्वयमध्यस्था समतलभूमिः ॥९॥ ऋतवो सर्वर्तुपुष्पफलादि सम्पदः नित्यम् यस्मिन् तत् ऋतुमत् नाम उद्यानम् । 'नित्ययोगे मतुप् । पुनः गिरिं वर्णयति-चतुर्भिः । चूतैः अम्लैः । आम्रैः मधुरैः । प्रियालः चिरौंजी । पनसः कटहर । आम्रातकः अम्बाडा । क्रमुकैः पूगैः । बीजेति विजौरा नीबू । असनः पीतसालः ।

कुमुदोत्पलकह्लारशतपत्रश्रियोर्जितम् । मत्तषट्पदनिर्घुष्टं शकुन्तैश्च कलस्वनैः ॥१४॥
हंसकारण्डवाकीर्णं चक्राह्वैः सारसैरपि । जलकुक्कुटकोयष्टिदात्यूहकुलकूजितम् ॥१५॥
मत्स्यकच्छपसंचारचलत्पद्मरजःपयः । कदम्बवेतसनलनीपवञ्जुलकैर्वृतम् ॥१६॥
कुन्दैः कुरबकाशोकैः शिरीषैः कुटजेङ्गुदैः । कुब्जकैः स्वर्णयूथीभिर्नागपुन्नागजातिभिः ॥१७॥
मल्लिकाशतपत्रैश्च माधवीजालकादिभिः । शोभितं तीरजैश्चान्यैर्नित्यर्तुभिरलंद्रुमैः ॥१८॥

तत्रैकदा तद्गिरिकाननाश्रयः करेणुभिर्वारणयूथपश्चरन् ।
सकण्टकान् कीचकवेणुवेत्रवद्विशालगुल्मं प्ररुजन् वनस्पतीन् ॥१९॥
यद्गन्धमात्राद्धरयो गजेन्द्रा व्याघ्रादयोव्यालमृगाः सखड्गाः ।
महोरगाश्चापि भयाद् द्रवन्ति सगौरकृष्णाः शरभाश्चमर्यः ॥२०॥
वृका वराहा महिषर्क्षशल्या गोपुच्छशालावृकमर्कटाश्च ।
अन्यत्र क्षुद्रा हरिणाः शशादयश्चरन्त्यभीता यदनुग्रहेण ॥२१॥
स धर्मतप्तः करिभिः करेणुभिर्वृतो मदच्युत्कलभैरनुद्रुतः ।
गिरिं गरिम्णा परितः प्रकम्पयन् निषेव्यमाणोऽलिकुलैर्मदाशनैः ॥२२॥

अरिष्टो वृहत्पत्रो निम्बः । (रीठा) वा किंशुकः पलाशः । पिचुमन्दो निम्बः । सरलो जीरकवृक्षः गुग्गुलुर्वा । रम्भा कदली । अक्षो विभीतकः बहेड़ा । अभया हरीतकी । वृतमुद्यानविशेषणम् ॥१०।११।१२।१३॥ तस्मिन्निति सार्द्धपञ्चकम् । तस्मिन् उद्याने सरोऽस्ति । कीदृशम् । ऊर्जितं समृद्धम् । कुमुदं रात्रिविकासि कमलम् उत्पलं दिवाविकासि । निर्घुष्टं नादितम् । शकुन्तैः पक्षिभिः । कारण्डवः (वतख)इति । कोयष्टिरपि जलपक्षी । दात्यूहः चातकः । मत्स्यादीनां संचारेण चलत्पद्मानां रजोयुक्तं पयो यस्मिन् । नीपः कदम्वभेदः । वञ्जुलो झावुकः (झाऊ) वेत्रभेदो वा । कुरबकः अशोकः द्विविधः सितरक्तपुष्पभेदेन । (कटसरैया) वा । शिरीषं मौलिश्री । कुटजो गिरिमल्लिका । इङ्गुदः लिसोड़ा । कुब्जकः (हरसिंगार) सोनजूही । नागकेसरः । पुन्नागः तद्भेदः । माधवी लता । जालकं मोगरा । मुकुलितलता वा । नित्यम् ऋतवः सर्वर्तुपुष्पाणि येषु तैः । अलं पूर्णम् । अलेद्रुमो[1] वृक्षो वा ॥१४।१५।१६।१७।१८॥ तत्रेत्यव्ययम् एवं सतीत्यर्थे । तत्र उद्याने वा । एकदा वारणयूथपः गजेन्द्रः करेणुभिः हस्तिनीभिः सह विचरन् स्वयूथेन वृतः सरोवरसमीपमगादिति पञ्चमेनान्वयः । किं कुर्वन् । कीचकादिवेत्रवन्तं विशालं गुल्मं लतादिसमूहं वृक्षांश्च प्ररुजन् प्रभञ्जन् सन् ॥१९॥ कथंभूतः । यस्य गन्धमात्रात् हरयः सिंहाः गजेन्द्रादयश्च भयात् द्रवन्ति पलायन्ते स घर्मतप्तः गजेन्द्रः द्रुतमगादिति योज्यम् । व्यालाः [2]सर्पाकारा मृगाः । खड्गः गण्डकः गौरकृष्णाश्चमर्यः मृगभेदाः । शरभोऽष्टापदः सिंहहन्ता ॥२०॥ वृकः(भेड़िया)शल्यःश्वावित् लम्बायमानकण्टकाच्छन्नोजीवःगोपुच्छःलाङ्गूलः। शालावृकाःश्वानः। चरन्ति किन्तु अन्यत्र तद्दृष्टिपथं त्यक्त्वा॥२१॥पुनः कीदृशः । कलभैः गजार्भकैः अनुगतः। गरिम्णा शरीरस्थौल्येन । मदं

---

१. अलंद्रुमः स विज्ञेयो नित्यपुष्पफलोद्गमः ।
२. 'व्यालो दुष्टगजे सर्पे' इति मेदिनी ।

सरोऽनिलं पङ्कजरेणुरूषितं जिघ्रन् विदूरान्मदविह्वलेक्षणः ।
वृतः स्वयूथेन तृषार्दितेन तत्सरोवराभ्याशमथागमद् द्रुतम् ॥२३॥
विगाह्य तस्मिन्नमृताम्बु निर्मलं हेमारविन्दोत्पलरेणुवासितम् ।
पपौ निकामं निजपुष्करोद्धृतमात्मानमद्भिः स्नपयन् गतक्लमः ॥२४॥
स्वपुष्करेणोद्धृतशीकराम्बुभिर्निपाययन् संस्नपयन् यथा गृही ।
घृणी करेणूः कलभांश्च दुर्मदो नाचष्ट कृच्छ्रं कृपणोऽजमायया ॥२५॥
तं तत्र कश्चिन्नृप दैवचोदितो ग्राहो बलीयांश्चरणे रुषाऽग्रहीत् ।
यदृच्छयैवं व्यसनं गतो गजो यथाबलं सोऽतिबलो विचक्रमे ॥२६॥
तथाऽऽतुरं यूथपतिं करेणवो विकृष्यमाणं तरसा बलीयसा ।
विचुक्रुशुर्दीनधियोऽपरे गजाः पार्ष्णिग्रहास्तारयितुं न चाशकन् ॥२७॥
नियुध्यतोरेवमिभेन्द्रनक्रयोर्विकर्षतोरन्तरतो बहिर्मिथः ।
समाः सहस्रं व्यगमन् महीपते सप्राणयोश्चित्रममंसतामराः ॥२८॥
ततो गजेन्द्रस्य मनोबलौजसां कालेन दीर्घेण महानभूद् व्ययः ।
विकृष्यमाणस्य जलेऽवसीदतो विपर्ययोऽभूत् सकलं जलौकसः ॥२९॥
इत्थं गजेन्द्रः स यदाऽऽप संकटं प्राणस्य देही विवशो यदृच्छया ।
अपारयन्नात्मविमोक्षणे चिरं दध्याविमां बुद्धिमथाभ्यपद्यत ॥३०॥

गण्डस्थलवारि अश्नन्तीति तैः भ्रमरैः ॥२२॥ पुनश्च । रेणुभिः परागैः रूषितं वासितं सुगन्धितं सरःसम्बन्धिशीतलमन्दवायुं जिघ्रन् ॥ २३ ॥ तस्मिन् सरसि विगाह्य प्रविश्य शुण्डाग्रेण उद्धृतं कमलपरागवासितम् अमृतमिव स्वादु जलं निकामं यथेच्छं पपौ इत्यन्वयः । अद्भिः जलैः आत्मानं स्नपयन् स्नानं कारयन् गतश्रमश्च आसीत् ॥२४॥ घृणी सानुकम्पः स गजेन्द्रः शीकराम्बुभिः जलनिर्झरैः करेणूः हस्तिनीः कलभांश्च तच्छिशूंश्च स्नानं कारयन् पानं कारयंश्च कृच्छ्रं भाविसंकटं नाचष्ट न विचारितवान् । यतो हरेः मायया कृपणः तेषु आसक्तः । यथा गृहस्थः ॥ २५ ॥ तत्र सरसि तं गजेन्द्रं चरणे अग्रहीत् । एवं व्यसनं कष्टं गतः सोऽपि विचक्रमे पराक्रमं चकार ॥ २६ ॥ बलीयसा ग्राहेण तरसा[1] बलेन आकृष्यमाणमत एव आतुरं ग्राहग्रस्तं तं यूथपतिं गजेन्द्रं प्रति दीनधियः अत्यासक्ताः करेणवः हस्तिन्यः विचुक्रुशुः चीत्कारं चक्रुः । पार्ष्णिग्रहाः पृष्ठसहायका अन्ये गजा अपि तं मोचयितुं न च अशकन् न समर्थाः बभूवुः ॥ २७ ॥ एवं मिथः परस्परं नियुध्यतोः अन्तरतो बहिश्च विकर्षतोः तयोः सहस्रं समाः वर्षाणि व्यतीयुः । अमराः तच्चित्रमाश्चर्यम् अमंसत मेनिरे । सप्राणयोः समानबलयोः । जीवतोः सतोर्वा ॥२८॥ जले विकृष्यमाणस्य अत एव अवसीदतः खिद्यतः तस्य मनआदिशक्तीनां महान् व्ययः अतीवह्रासोऽभूत् । जलौकसः ग्राहस्य तु सकलं विपर्ययः विपरीतम् वृद्धिरभूदित्यर्थः । मन इति क्रमेण उत्साह शरीरेन्द्रियशक्तयः ॥ २९ ॥ इत्थं विवशः ग्राहपरवशः देही गजेन्द्रः यदा सङ्कटं प्राणभयं प्राप । विमोक्षणे

---

१. 'तरो बले च रोगे च' इति मेदिनी ।

न मामिमे ज्ञातय आतुरं गजाः कुतः करिण्यः प्रभवन्ति मोचितुम् ।
ग्राहेण पाशेन विधातुरावृतोऽप्यहं च तं यामि परं परायणम् ॥३१॥
यः कश्चनेशो बलिनोऽन्तकोरगात् प्रचण्डवेगादभिधावतो भृशम् ।
भीतं प्रपन्नं परिपाति यद्भयान्मृत्युः प्रधावत्यरणं तमीमहि ॥३२॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायामष्टमस्कन्धे मन्वन्तरानुवर्णने गजेन्द्रोपाख्याने द्वितीयोऽध्यायः ॥ २ ॥

अथ तृतीयोऽध्यायः

श्रीशुक उवाच

एवं व्यवसितो बुद्ध्या समाधाय मनो हृदि । जजाप परमं जाप्यं प्राग्जन्मन्यनुशिक्षितम् ॥१॥

गजेन्द्र उवाच

ॐ नमो भगवते तस्मै यत एतच्चिदात्मकम् । पुरुषायादिबीजाय परेशायाभिधीमहि ॥ २ ॥
यस्मिन्निदं यतश्चेदं येनेदं य इदं स्वयम् । योऽस्मात् परस्माच्च परस्तं प्रपद्ये स्वयम्भुवम् ३।

यः स्वात्मनीदं निजमाययार्पितं क्वचिद् विभातं क्व च तत् तिरोहितम् ।
अविद्धदृक् साक्ष्युभयं तदीक्षते स आत्ममूलोऽवतु मां परात्परः ॥ ४ ॥
कालेन पञ्चत्वमितेषु कृत्स्नशो लोकेषु पालेषु च सर्वहेतुषु ।
तमस्तदाऽऽसीद् गहनं गभीरं यस्तस्य पारेऽभिविराजते विभुः ॥ ५ ॥

अपारयन् असमर्थश्च सन् दध्यौ इमां वक्ष्यमाणां बुद्धिं भगवद्विषयिणीं च प्राप्तवान् ॥ ३० ॥ अहं च अहमपि परं मुख्यं परायणं रक्षकं नारायणं यामि शरणं व्रजामि ॥ ३१ ॥ यः कश्चन ईशः अन्तकोरगात् कालसर्पात् भृशं भीतं जनं परिपाति मृत्युश्च यद्भयात् धावति तमेव अरणं शरणम् ईमहि व्रजेम । ईङ् गतौ दिवादिः आर्षः श्यन्लुक् ॥३२॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे गूढार्थदीपिन्यां द्वितीयोऽध्यायः ॥२॥

तृतीये तु गजेन्द्रेण संस्तुतो भगवान् हरिः ।
मुक्तं त्रिपात्स्य तं ग्राहात् तं च शापादमूमुचत् ॥१॥

एवं व्यवसितं निश्चयो यस्य सः । समाधाय स्थिरीकृत्य प्राग्जन्मनि इन्द्रद्युम्नसंज्ञके जन्मनि । जप्यमेव जाप्यं स्तोत्रं स्वार्थेऽण् ॥१॥ यतः एतत् देहादि चेतनं भवति तस्मै पुरुषाय नमः अभिधीमहि नमस्कुर्मः ॥२॥यस्मिन् अधिष्ठाने यतः उपादानात् येन कर्त्रा यश्च स्वयमेव इदं विश्वं भवति तं प्रपद्ये इत्यन्वयः । कथंभूतो यः । अस्मात् कार्यात् परस्मात् कारणाच्च परः ॥ ३ ॥ स्वात्मनि स्वस्मिन्नेव मायया सङ्कल्पेन अर्पितं विरचितमिदं विश्वं क्वचित् सृष्टौ विभातम् अभिव्यक्तम् क्वचित् प्रलये लीनं च भवति तदुभयं यः साक्षी-सन् समीक्षते स माम् अवतु इत्यन्वयः । अविद्धदृक् अनावृतज्ञानः । आत्ममूलः कारणान्तर-रहितः ॥ ४ ॥ कालेन द्विपरार्द्धावसानेन कृत्स्नशः साकल्येन सर्वेषु पञ्चत्वमितेषु नाशं प्राप्तेषु सत्सु

न यस्य देवा ऋषयः पदं विदुर्जन्तुः पुनः कोऽर्हति गन्तुमीरितुम्।
यथा नटस्याकृतिभिर्विचेष्टतो दुरत्ययानुक्रमणः स मावतु ॥ ६ ॥
दिदृक्षवो यस्य पदं सुमङ्गलं विमुक्तसङ्गा मुनयः सुसाधवः।
चरन्त्यलोकव्रतमव्रणं वने भूतात्मभूताः सुहृदः स मे गतिः ॥ ७ ॥
न विद्यते यस्य च जन्म कर्म वा न नामरूपे गुणदोष एव वा।
तथापि लोकाप्ययसम्भवाय यः स्वमायया तान्यनुकालमृच्छति ॥ ८ ॥

तस्मै नमः परेशाय ब्रह्मणेऽनन्तशक्तये। अरूपायोरुरूपाय नम आश्चर्यकर्मणे ॥ ९ ॥
नम आत्मप्रदीपाय साक्षिणे परमात्मने। नमो गिरां विदूराय मनसश्चेतसामपि ॥१०॥
सत्त्वेन प्रतिलभ्याय नैष्कर्म्येण विपश्चिता। नमः कैवल्यनाथाय निर्वाणसुखसंविदे ॥११॥
नमः शान्ताय घोराय मूढाय गुणधर्मिणे। निर्विशेषाय साम्याय नमो ज्ञानघनाय च ॥१२॥
क्षेत्रज्ञाय नमस्तुभ्यं सर्वाध्यक्षाय साक्षिणे। पुरुषायात्ममूलाय मूलप्रकृतये नमः ॥१३॥
सर्वेन्द्रियगुणद्रष्ट्रे सर्वप्रत्ययहेतवे। असताच्छाययोक्ताय सदाभासाय ते नमः ॥१४॥

नमो नमस्तेऽखिलकारणाय निष्कारणायाद्भुतकारणाय।
सर्वागमाम्नायमहार्णवाय नमोऽपवर्गाय परायणाय ॥१५॥

तदा यत् तमः प्रलयकालिकं प्रकृत्याख्यमासीत् तस्य पारे यः विराजते स माम् अवतु इत्यनुषङ्गः सर्वं हेतुषु महदादिषु ॥ ५ ॥ देवादयोऽपि यस्य पदं स्वरूपं न विदुः तदा पुनः अन्यः अर्वाचीनः कः गन्तुं ज्ञातुमर्हति स माम् अवतु। अज्ञाने दृष्टान्तमाह-आकृतिभिः नानारूपभेदैः विविधचेष्टां कुर्वतः यथा नटस्य तत्त्वं न ज्ञायते तथा। दुरत्ययं दुर्ज्ञेयमनुक्रमणं चरित्रं वर्णनं च यस्य सः ॥६॥ यस्य पदं स्वरूपं दिदृक्षवः मुनयः अव्रणम् अखण्डितम् अलोकव्रतं ब्रह्मचर्यादि व्रतं चरन्ति कुर्वन्ति स मे गतिः रक्षको भवतु। भूतेषु आत्मभूता भगवद्दृष्टयः सन्तः। यद्वा। भूतानि आत्मभूतानि आत्मतुल्यानि येषां ते तथाभूताः। अलोकं लोकैः कर्तुमशक्यम् ॥७॥ यस्य जन्मादि न विद्यते तथापि तानि जन्मादीनि मायया लीलया अनुकालम् यथावसरम् ऋच्छति स्वीकरोति। किमर्थम्। लोकानाम् असाधूनां साधूनां च क्रमेण अप्ययाय विनाशाय संभवाय परित्राणाय च तस्मै नमः इत्युत्तरेणान्वयः। गुणदोष इत्यत्र सर्वोऽपि द्वन्द्वो विभाषया एकवद्भवति' इति नियमात् इतरेतरयोगेऽपि एकत्वम्। 'ऊकालोऽज्झ्रस्वदीर्घप्लुतः' इतिवत् ॥ ८ ॥ ब्रह्मणे अरूपाय अनन्तशक्तये उरुरूपाय ॥ ९ ॥ आत्मप्रदीपाय जीवस्वरूपबोधकाय। विदूराय अगोचराय। विपश्चिता कर्त्रा नैष्कर्म्येण निवृत्तिधर्मलब्धेन सत्त्वेन ज्ञानेन। नाथाय स्वामिने तद्दात्रे नमः। निर्वाणसुखस्य संवित् अनुभूतिः यस्मात् ॥ ११ ॥ गुणधर्मित्वात् क्रमेण सत्त्वादिगुणानुकारिणे। निर्विशेषाय गुणातीताय च ते नमः ॥ १२ ॥ आत्मनां जीवानां मूलाय अंशिने। प्रकृतेरपि मूलमिति मूलप्रकृतिस्तस्मै। राजदन्तादित्वात्परनिपातः ॥ १३ ॥ गुणा विषयाः। प्रत्यया इन्द्रियवृत्तयः हेतवो ज्ञापकाः यस्य। छायया कार्येण उक्ताय ज्ञापिताय कार्येण कारणानुमानात् ॥ १४ ॥ अद्भुतत्वं नाम उपादानकारणत्वेऽपि निर्विकारत्वरूपम्। आगमः तन्त्रशास्त्रम् आम्नायाः वेदाश्च तेषां पर्यवसानाय

गुणारणिच्छन्नचिदूष्मपाय तत्क्षोभविस्फूर्जितमानसाय ।
नैष्कर्म्यभावेन विवर्जितागमस्वयंप्रकाशाय नमस्करोमि ॥१६॥
मादृक्प्रपन्नपशुपाशविमोक्षणाय मुक्ताय भूरिकरुणाय नमोऽलयाय ।
स्वांशेन सर्वतनुभृन्मनसि प्रतीतप्रत्यग्दृशे भगवते बृहते नमस्ते ॥१७॥
आत्मात्मजाप्तगृहवित्तजनेषु सक्तैर्दुष्प्रापणाय गुणसङ्गविवर्जिताय ।
मुक्तात्मभिः स्वहृदये परिभाविताय ज्ञानात्मने भगवते नम ईश्वराय ॥१८॥
यं धर्मकामार्थविमुक्तिकामा भजन्त इष्टां गतिमाप्नुवन्ति ।
किं त्वाशिषो रात्यपि देहमव्ययं करोतु मेऽदभ्रदयो विमोक्षणम् ॥१९॥
एकान्तिनो यस्य न कंचनार्थं वाञ्छन्ति ये वै भगवत्प्रपन्नाः ।
अत्यद्भुतं तच्चरितं सुमङ्गलं गायन्त आनन्दसमुद्रमग्नाः ॥२०॥
तमक्षरं ब्रह्म परं परेशमव्यक्तमाध्यात्मिकयोगगम्यम् ।
अतीन्द्रियं सूक्ष्ममिवातिदूरमनन्तमाद्यं परिपूर्णमीडे ॥२१॥
यस्य ब्रह्मादयो देवा वेदा लोकाश्चराचराः । नामरूपविभेदेन फल्ग्व्या च कलया कृताः ॥२२॥
यथार्चिषोऽग्नेः सवितुर्गभस्तयो निर्यान्ति संयान्त्यसकृत् स्वरोचिषः ।
तथा यतोऽयं गुणसम्प्रवाहो बुद्धिर्मनः खानि शरीरसर्गाः ॥२३॥

अवधिरूपाय । परेषां भक्तानाम् आधाराय ॥१५॥ गुणा एव अरणिः काष्ठं तया छन्नः चिदूष्मा ज्ञानाग्निः तं पाति प्रकटयतीति तस्मै । यद्वा । गुणारणिः ज्ञानोत्पादिका भक्तिः तया छन्नं चिदूष्माणं जीवं पाति रक्षतीति तथा । अत एव गुणक्षोभेन भक्तविषयकस्नेहेन प्रमुदितं मानसं यस्य । नैष्कर्म्यं भक्तितत्त्वं तेन विवर्जिता आगमा भक्तिविरुद्धा यैस्तेषु स्वयमेव प्रकाशो यस्य तस्मै ॥ १६ ॥ मादृक् मद्विधश्चासौ पशुः तस्य पाशो ग्राहरूपः संसाररूपश्च तस्य विमोक्षणं यस्मात् । तत्र करुणायां नास्ति लयः आलस्यं यस्य तस्मै । किञ्च स्वांशेन [1]एकांशेन सर्वतनुभृतां जीवानां मनसि प्रतीतो यः प्रत्यग्दृक् अन्तर्यामी भगवान् तस्मै बृहते महते श्रीकृष्णाय नमः ॥ १७ ॥ आत्मा देहः । आप्तः इष्टवर्गः । मुक्तात्मभिः आत्मारामैः परिभाविताय चिन्तिताय । तैर्भावितं रूपमाह—ज्ञानेति ॥१८॥ यं भजन्त इत्यत्रान्वेति । न केवलं गतिमेव अपि तु अन्या अपि आशिषः भोगान् राति ददाति किं बहुना अनश्वरं देहं च राति स मे विमोक्षणं करोतु इत्यन्वयः । अदभ्रदयः अपारकरुणः ॥१९॥ ये एकान्तिनः अनन्यभक्ताः ते यस्य सकाशात् कञ्चन कमपि अर्थं मुक्तिमपि न वाञ्छन्ति किन्तु तच्चरितं गायन्तः आनन्दमग्नाः सन्तः ब्रह्मसुखमनुभवन्ति तं परेशमीडे स्तौमि इत्युत्तरेणान्वयः ॥ २० ॥ आत्मानं श्रीकृष्णमधिकृत्य यो योगस्तेन गम्यम् । यथा सूक्ष्मं तथा महान्तमपीति सूचनार्थमिव शब्दः । 'अणोरणीयान्' इति श्रुतेः ॥ २१ ॥ यस्य फल्ग्व्या स्वल्पया कलया अंशेनैव देवाः कृताः स जयतात् जयतु इत्युत्तरेणान्वयः ॥ २२ ॥ यथा अग्नेः अर्चिषः स्फुलिङ्गाः इति प्रवाहे गभस्तयः किरणा इत्यानन्त्ये च दृष्टान्तः । असकृत् मुहुर्मुहुः निर्यान्ति उद्भवन्ति संयान्ति

---

१. 'एकांशेन स्थितो जगत्' इति गीतोक्तेः

स वै न देवासुरमर्त्यतिर्यङ् न स्त्री न षण्ढो न पुमान् न जन्तुः ।
नायं गुणः कर्म न सन्न चासन् निषेधशेषो जयतादशेषः ॥२४॥
जिजीविषे नाहमिहामुया किमन्तर्बहिश्चावृतयेभयोन्या ।
इच्छामि कालेन न यस्य विप्लवस्तस्यात्मलोकावरणस्य मोक्षम् ॥२५॥
सोऽहं विश्वसृजं विश्वमविश्वं विश्ववेदनम् । विश्वात्मानमजं ब्रह्म प्रणतोऽस्मि परं पदम् ।२६।
योगरन्धितकर्माणो हृदि योगविभाविते । योगिनो यं प्रपश्यन्ति योगेशं तं नतोऽस्म्यहम् ।२७।

श्रीशुक उवाच

नमो नमस्तुभ्यमसह्यवेगशक्तित्रयायाखिलधीगुणाय ।
प्रपन्नपालाय दुरन्तशक्तये कदिन्द्रियाणामनवाप्यवर्त्मने ॥२८॥
नायं वेद स्वमात्मानं यच्छक्त्याहंधिया हतम् । तं दुरत्ययमाहात्म्यं भगवन्तमितोऽस्म्यहम्।२९
एवं गजेन्द्रमुपवर्णितनिर्विशेषं ब्रह्मादयो विविधलिङ्गभिदाभिमानाः ।
नैते यदोपससृपुर्निखिलात्मकत्वात् तत्राखिलामरमयो हरिराविरासीत् ॥३०॥
तं तद्वदार्तमुपलभ्य जगन्निवासःस्तोत्रं निशम्य दिविजैः सह संस्तुवद्भिः ।
छन्दोमयेन गरुडेन समुह्यमानश्चक्रायुधोऽभ्यगमदाशु यतो गजेन्द्रः ॥३१॥

लीयन्ते च तथा स्वरोचिषः स्वयंप्रकाशमानात् यतः गुणप्रवाहः गुणकार्यंरूपः प्रपञ्चो भवति स जयतादित्यन्वयः । तमेवाह-बुद्धिरिति एते बुद्धयादयः शरीरस्य समष्टिव्यष्टिदेहस्य सर्गाः हेतवः । खानि इन्द्रियाणि ॥२३॥ किञ्च देवादीनां मध्ये यः कतमोऽपि न स जयतात् मद्विमोक्षणेन स्वोत्कर्षमा विष्करोतु। कथंभूतः । सर्वस्य निषेधावधित्वेन यः शिष्यते सः । पुनश्च अशेषः सर्वरूपोऽपि- सर्वभिन्नत्वे सति सर्वाभिन्नरूपः सर्वात्मत्वादित्यर्थः ॥ २४ ॥ अहं न जिजीविषे जीवितुं नेच्छामि । यतः अन्तः बहिश्च आवृतया अज्ञानव्याप्तया गजयोन्या किं प्रयोजनं न किमपि अतः आत्मलोकस्य स्वरूपस्य आवरणकारणं यत् अज्ञानं लिङ्गशरीरं वा तस्यैव नाशमिच्छामि । यस्य लिङ्गस्य कालवि- क्रमेण स्वयं कथमपि विप्लवः नाशो नास्ति तस्य ज्ञानैकनिवर्त्यत्वादित्यर्थः ॥ २५ ॥ सोऽहं परं पदं परं प्राप्यं ब्रह्म प्रणतोऽस्मीत्यन्वयः । कथंभूतम् । विश्वं तद्रूपम् । तद्व्यतिरिक्तं च । विश्ववेदनं सर्वविदम् । इति पाठः । विश्वस्य आत्मानम् अन्तर्यामिणम् ॥ २६ ॥ रन्धितानि दग्धानि । भाविते शोधिते ॥२७॥ असह्यवेगं शक्तित्रयं गुणत्रयं यस्य । अखिलो धीगुणो ज्ञानयोगो यस्मात् तस्मै ।दुरन्ता अनन्ता । कदिन्द्रियाणां कुत्सितविषयासक्तानां दुर्ज्ञेयं वर्त्म यस्य तस्मै । अत्र 'बहुव्रीहौ कोः कदादेशाभावात् कदिति पृथगव्ययं कार्यं कुत्सितार्थे।।२८।।यस्य शक्त्या अविद्याशक्त्या देहादौ या अहंधीःतया हतमावृतं स्वस्वरूपमयं जनो न वेद तमितोऽस्मि शरणं गतोऽस्मि । दुरत्ययमनतिक्रमणीयं माहात्म्यं प्रभावो यस्य ॥ २९ ॥ उपवर्णितं निर्विशेषं मूर्तिभेदं विना निर्गुणं रूपं येन । लिङ्गभिदा मूर्तिभेदः तत्र अभिमानो येषां ते ब्रह्मादयः यदा न समीपं उपससृपुः नोपजग्मुः तत्र तदा हरिः स्वयम् आविरासीत्॥३०॥तद्वत् तथाकर्षणाकर्षणेन आर्तं तमुपलभ्य

---

१. 'कोः कत् तत्पुरुषेऽचि' इति नियमात् ।

सोऽन्तःसरस्युरुबलेन गृहीत आर्तो दृष्ट्वा गरुत्मति हरिं ख उपात्तचक्रम् ।
उत्क्षिप्य साम्बुजकरं गिरमाह कृच्छ्रान्नारायणाखिलगुरो भगवन् नमस्ते ॥३२॥
तं वीक्ष्य पीडितमजः सहसावतीर्य सग्राहमाशु सरसः कृपयोज्जहार ।
ग्राहाद् विपाटितमुखादरिणा गजेन्द्रं सम्पश्यतां हरिरमूमुचदुस्त्रियाणाम् ॥३३॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायामष्टमस्कन्धे गजेन्द्रमोक्षणे तृतीयोऽध्यायः ॥ ३ ॥

अथ चतुर्थोऽध्यायः

श्रीशुक उवाच

तदा देवर्षिगन्धर्वा ब्रह्मेशानपुरोगमाः । मुमुचुः कुसुमासारं शंसन्तः कर्म तद्धरेः ॥ १ ॥
नेदुर्दुन्दुभयो दिव्या गन्धर्वा ननृतुर्जगुः । ऋषयश्चारणाः सिद्धास्तुष्टुवुः पुरुषोत्तमम् ॥ २ ॥
योऽसौ ग्राहः स वै सद्यः परमाश्चर्यरूपधृक् । मुक्तो देवलशापेन हूहूर्गन्धर्वसत्तमः ॥ ३ ॥
प्रणम्य शिरसाधीशमुत्तमश्लोकमव्ययम् । अगायत यशोधाम कीर्तन्यगुणसत्कथम् ॥ ४ ॥
सोऽनुकम्पित ईशेन परिक्रम्य प्रणम्य तम् । लोकस्य पश्यतो लोकं स्वमगान्मुक्तकिल्बिषः ॥५॥
गजेन्द्रो भगवत्स्पर्शाद् विमुक्तोऽज्ञानबन्धनात् । प्राप्तो भगवतो रूपं पीतवासाश्चतुर्भुजः ॥६॥
स वै पूर्वमभूद् राजा पाण्ड्यो द्रविडसत्तमः । इन्द्रद्युम्न इति ख्यातो विष्णुव्रतपरायणः ॥ ७ ॥

दृष्ट्वा स्तोत्रं च निशम्य यत्र गजेन्द्रः तत्र भगवान् दिविजैः देवैः सह अभ्यगमदित्यन्वयः । कथंभूतः । छन्दोमयेन इच्छातुल्यवेगेन गरुडेन प्राप्यमाणः ॥३१॥ अन्तः सरसि महाबलेन ग्राहेण पदे गृहीतः अत एव आर्तः स गजेन्द्रः खे आकाशे हरिं दृष्ट्वा साम्बुजकरं शुण्डादण्डम् उत्थाप्य कृच्छ्रात् गिरमाह हे नारायण हे गुरो हे भगवन् ते नमः इति ॥३२॥ अजः हरिः तं वीक्ष्य गरुडात् अवतीर्य सरसः सकाशात् तम् उज्जहार-बहिर्निष्कासितवान् पुनश्च उस्त्रियाणां देवानां पश्यतां सतां तं गजेन्द्रं ग्राहात् अमूमुचत् । अरिणा चक्रेण विपाटितं विदारितं मुखं यस्य तस्मात् । अत्र उच्छ्रियेति चकारघटितोऽपपाठः 'उस्त्रिया विजया देवाः 'इत्यभिधानात् ॥ ३३ ॥

इति श्रीमद्भागवते महापुराणेऽष्टमस्कन्धे गूढार्थदीपिन्यां तृतीयोऽध्यायः ॥ ३ ॥

●

चतुर्थेऽवर्णयच्छापकारणम् गजनक्रयोः ।
प्राप गन्धर्वतां ग्राहः पार्षदत्वं हरेर्गजः ॥

कुसुमासारं धारासम्पातपुष्पवृष्टिम् । शंसन्तः प्रशंसन्तः ॥ १ ॥ २ ॥ सद्यः वै झटित्येव । शापस्तु सरसि देवलस्य पादाकर्षणात् । धृक् धृजेः क्विप् ॥३॥ कीर्तनीया गुणाः सती कथा च यस्य तम् ॥ ४ ॥ स्वं लोकं गन्धर्वलोकम् ॥ ५ ॥ रूपं सारूप्यम् ॥ ६ ॥ द्रविडदेशान्तर्गतपाण्ड्यदेशीयः ।

स एकदाऽऽराधनकाल आत्मवान् गृहीतमौनव्रत ईश्वरं हरिम्।
जटाधरस्तापस आप्लुतोऽच्युतं समर्चयामास कुलाचलाश्रमः ॥ ८ ॥
यदृच्छया तत्र महायशा मुनिः समागमच्छिष्यगणैः परिश्रितः।
तं वीक्ष्य तूष्णीमकृतार्हणादिकं रहस्युपासीनमृषिश्चुकोप ह ॥ ९ ॥
तस्मा इमं शापमदादसाधुरयं दुरात्माऽकृतबुद्धिरद्य।
विप्रावमन्ता विशतां तमोऽन्धं यथा गजः स्तब्धमतिः स एव ॥१०॥

श्रीशुक उवाच

एवं शप्त्वा गतोऽगस्त्यो भगवान् नृप सानुगः। इन्द्रद्युम्नोऽपि राजर्षिर्दिष्टं तदुपधारयन् ॥११॥
आपन्नः कौञ्जरीं योनिमात्मस्मृतिविनाशिनीम्। हर्यर्चनानुभावेन यद्‌ गजत्वेऽप्यनुस्मृतिः ॥१२॥

एवं विमोक्ष्य गजयूथपमब्जनाभस्तेनापि पार्षदगतिं गमितेन युक्तः
गन्धर्वसिद्धविबुधैरुपगीयमानकर्माद्भुतं स्वभवनं गरुडासनोऽगात् ॥१३॥
एतन्महाराज तवेरितो मया कृष्णानुभावो गजराजमोक्षणम्।
स्वर्ग्यं यशस्यं कलिकल्मषापहं दुःस्वप्ननाशं कुरुवर्य शृण्वताम् ॥१४॥

यथानुकीर्तयन्त्येतच्छ्रेयस्कामा द्विजातयः। शुचयः प्रातरुत्थाय दुःस्वप्नाद्युपशान्तये ॥१५॥
इदमाह हरिः प्रीतो गजेन्द्रं कुरुसत्तम। शृण्वतां सर्वभूतानां सर्वभूतमयो विभुः ॥१६॥

श्रीभगवानुवाच

ये मां त्वां च सरश्चेदं गिरिकन्दरकाननम्। वेत्रकीचकवेणूनां गुल्मानि सुरपादपान् ॥१७॥
शृङ्गाणीमानि धिष्ण्यानि ब्रह्मणो मे शिवस्य च। क्षीरोदं मे प्रियं धाम श्वेतद्वीपं च भास्वरम्
श्रीवत्सं कौस्तुभं मालां गदां कौमोदकीं मम। सुदर्शनं पाञ्चजन्यं सुपर्णं पतगेश्वरम् ॥१९॥
शेषं च मत्कलां सूक्ष्मां श्रियं देवीं मदाश्रयाम्। ब्रह्माणं नारदमृषिं भवं प्रह्लादमेव च ॥२०॥

पूर्वं पूर्वजन्मनि ॥ ७ ॥ कुलाचले मलयपर्वते। स इन्द्रद्युम्नः ॥ ८ ॥ तत्र मलये। महायशाः ऋषिः अगस्त्यः रहसि एकान्ते तूष्णीमासीनं तं वीक्ष्य चुकोपेत्यन्वयः। ह अनादरे। अर्हणम् अर्घ्यादिकम् ॥९॥ तस्मै शापम् अदात् अकृतबुद्धिः अशिक्षितबुद्धिः यथा गजः तथैव अयम् अतः स एव भवतु इति शापः। ॥ १० ॥ सानुगः सशिष्यः। दिष्टं प्रारब्धफलम् इति उपधारयन् निश्चिन्वन् ॥ ११ ॥ कौञ्जरीं गजसम्बन्धिनीम्। यत् यस्य ॥ १२ ॥ एवं तं विमोक्ष्य अब्जनाभः तेन गजेन्द्रेण युक्तः सन् स्वभवनम् अगादित्यन्वयः। पार्षदगतिं गमितेन प्रापितेन। उपगीयमानानि कर्माणि यस्य ॥ १३ ॥ गजमोक्षणरूपः प्रभावः तव तुभ्यं कथितः। एतत् चरित्रं शृण्वतां पुंसा स्वर्ग्यं स्वर्गादिसाधनं भवति। दुःस्वप्नस्य नाशो यस्मात् तथाभूतम्। नाशयतीति वा ॥ १४ ॥ अत एव एतत् यथा यथावत् अनुकीर्तयन्ति ॥ १५ ॥ ॥ १६ ॥ ये मामित्यष्टकम्। ये स्मरन्ति ते अखिलात् एनसः पापात् मुच्यन्ते इत्यष्टमेनान्वयः। गिर्यादीनां समाहारद्वन्द्वः। वेत्रादीनामितरेतरयोगः। गुल्मानि लतादिसमूहान् ॥१७॥ धिष्ण्यानि स्थानानि। क्षीरोदं क्षीरसागरम् ॥१८॥ सुपर्णं गरुडं पक्षिराजम् ॥१९॥ शेषं संकर्षणं मत्कलां मदंशभूतम्।

मत्स्यकूर्मवराहाद्यैरवतारैः कृतानि मे । कर्माण्यनन्तपुण्यानि सूर्यं सोमं हुताशनम् ॥२१॥
प्रणवं सत्यमव्यक्तं गोविप्रान् धर्ममव्ययम् । दाक्षायणीर्धर्मपत्नीः सोमकश्यपयोरपि ॥२२॥
गङ्गां सरस्वतीं नन्दां कालिन्दीं सितवारणम् । ध्रुवं ब्रह्मऋषीन् सप्त पुण्यश्लोकांश्च मानवान्
उत्थायापररात्रान्ते प्रयताः सुसमाहिताः । स्मरन्ति मम रूपाणि मुच्यन्ते ह्येनसोऽखिलात्२४।
ये मां स्तुवन्त्यनेनाङ्ग प्रतिबुध्य निशात्यये । तेषां प्राणात्यये चाहं ददामि विमलां मतिम्॥२५।

श्रीशुक उवाच

इत्यादिश्य हृषीकेशः प्रध्माय जलजोत्तमम् । हर्षयन् विबुधानीकमारुरोह खगाधिपम् ॥२६॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायामष्टमस्कन्धे गजेन्द्रमोक्षणं नाम चतुर्थोऽध्यायः ॥४॥

अथ पञ्चमोऽध्यायः

श्रीशुक उवाच

राजन्नुदितमेतत् ते हरेः कर्माघनाशनम् । गजेन्द्रमोक्षणं पुण्यं रैवतं त्वन्तरं शृणु ॥ १ ॥
पञ्चमो रैवतो नाम मनुस्तामससोदरः । बलिविन्ध्यादयस्तस्य सुता अर्जुनपूर्वकाः ॥ २ ॥
विभुरिन्द्रः सुरगणा राजन् भूतरयादयः । हिरण्यरोमा वेदशिरा ऊर्ध्वबाह्वादयो द्विजाः ।३।
पत्नी विकुण्ठा शुभ्रस्य वैकुण्ठैः सुरसत्तमैः । तयोः स्वकलया जज्ञे वैकुण्ठो भगवान् स्वयम् ।४।
वैकुण्ठः कल्पितो येन लोको लोकनमस्कृतः । रमया प्रार्थ्यमानेन देव्या तत्प्रियकाम्यया ॥ ५ ।
तस्यानुभावः कथितो गुणाश्च परमोदयाः।भौमान् रेणून् स विममे यो विष्णोर्वर्णयेद् गुणान्।६

मूतम् । सूक्ष्मां दुर्ज्ञेयाम् । यद्वा । मत्ज्ञानप्रवर्तकं भागवतद्वारा । 'कला ज्ञानप्रवोधनम् इत्युक्तेः ॥२०॥ ॥२१॥ सत्यं प्राणिहितम् । अव्यक्तं प्रधानं स्मरणं च तन्निवृत्यर्थम् । सनातनधर्मम् । दाक्षायणीः दक्षकन्याः अश्विन्याद्याः अदित्याद्याश्च । अग्रेऽपि पत्नीरिति योज्यम् ॥२२॥ सितवारणम् ऐरावतम् । पुण्यश्लोकान् धार्मिकान् नलादीन् ॥ २३ ॥ अपररात्रान्ते ब्रह्ममुहूर्ते ॥ २४ ॥ निशात्यये प्रभाते ॥ २५ ॥

इति श्रीमद्भागवते महापुराणेऽष्टमस्कन्धे गूढार्थदीपिन्यां चतुर्थोऽध्यायः ॥ ४ ॥

पञ्चमे रैवतो नाम चाक्षुषश्च मनुद्वयम् ।
देवा दुर्वाससः शापान्निःश्रीकास्तुष्टुवुर्हरिम् ॥

मोक्षणरूपं हरेः कर्म चरितम् उदितं कथितमित्यन्वयः । ते तुभ्यम् अन्तरं मन्वन्तरम् ॥ १ ॥ तामसस्य प्रियव्रतात्मजस्य सोदरः कनीयान् भ्राता रैवतः ॥ २ ॥ द्विजाः सप्तर्षयः ॥३॥ शुभ्रस्य नाम्नः भर्तुः । कलया अंशेन ॥४॥ कल्पितः प्रकटितः न तु रचितः सनातनत्वात् ॥५॥ प्रभावः कथितः तृतीयस्कन्धे । सनकादिशापेन स्वपार्षदाभ्यां युद्धादिलक्षणः । रेणून् परमाणून् विममे मानं करोति गणयतीत्यर्थः

षष्ठश्च चक्षुषः पुत्रश्चाक्षुषो नाम वै मनुः । पूरुपूरुषसुद्युम्नप्रमुखाश्चाक्षुषात्मजाः ॥ ७ ॥
इन्द्रो मन्त्रद्रुमस्तत्र देवा आप्यादयो गणाः । मुनयस्तत्र वै राजन् हविष्मद्वीरकादयः ॥ ८ ॥
तत्रापि देवः सम्भूत्यां वैराजस्याभवत् सुतः । अजितो नाम भगवानंशेन जगतः पतिः ॥९॥
पयोधिं येन निर्मथ्य सुराणां साधिता सुधा । भ्रममाणोऽम्भसि धृतः कूर्मरूपेण मन्दरः ॥१०॥

राजोवाच

यथा भगवता ब्रह्मन् मथितः क्षीरसागरः । यदर्थं वा यतश्चाद्रिं दधाराम्बुचरात्मना ॥११॥
यथामृतं सुरैः प्राप्तं किंचान्यदभवत् ततः । एतद् भगवतः कर्म वदस्व परमाद्भुतम् ॥१२॥
त्वया संकथ्यमानेन महिम्ना सात्वतां पतेः । नातितृप्यति मे चित्तं सुचिरं तापतापितम् ॥१३॥

सूत उवाच

सम्पृष्टो भगवानेवं द्वैपायनसुतो द्विजाः । अभिनन्द्य हरेर्वीर्यमभ्याचष्टुं प्रचक्रमे ॥१४॥

श्रीशुक उवाच

यदा युद्धेऽसुरैर्देवा बाध्यमानाः शितायुधैः । गतासवो निपतिता नोत्तिष्ठेरन् स्म भूयशः ॥१५॥
यदा दुर्वाससः शापात् सेन्द्रा लोकास्त्रयो नृप । निःश्रीकाश्चाभवंस्तत्र नेशुरिज्यादयः क्रियाः॥१६
निशाम्यैतत् सुरगणा महेन्द्रवरुणादयः । नाध्यगच्छन् स्वयं मन्त्रैर्मन्त्रयन्तो विनिश्चयम् ॥१७
ततो ब्रह्मसभां जग्मुर्मेरोर्मूर्धनि सर्वशः । सर्वं विज्ञापयांचक्रुः प्रणताः परमेष्ठिने ॥१८॥
स विलोक्येन्द्रवाय्वादीन् निःसत्त्वान् विगतप्रभान् । लोकानमङ्गलप्रायानसुरानयथा विभुः॥१९॥
समाहितेन मनसा संस्मरन् पुरुषं परम् । उवाचोत्फुल्लवदनो देवान् स भगवान् परः ॥२०॥

अहं भवो यूयमथोऽसुरादयो मनुष्यतिर्यग्द्रुमघर्मजातयः ।
यस्यावतारांशकलाविसर्जिता व्रजाम सर्वे शरणं तमव्ययम् ॥२१॥

॥ ६॥७ ॥ मुनयः सप्तर्षयः ॥ ८ ॥ तत्रापि चाक्षुषमन्वन्तरेऽपि । वैराजस्य भर्तुः संभूतिः भार्या तस्याम् ॥ ९ ॥ पयोधिम् । 'पयः स्यात् क्षीरनीरयोः' इत्यभिधानात् जलवाचकपय आदिशब्दानामपि दुग्धवाचित्वान्न पूर्वापरवाक्येषु विरोधः । 'सर्वे दुग्धार्थकाः शब्दा ज्ञेयाः पानीयवाचकाः' इति वंशीधरी च । धृतः पृष्ठे इति शेषः ॥ १० ॥ यतश्च हेतोः अम्बुचरात्मना कूर्मरूपेण ॥ ११ ॥ ततः तत्र मथनात् वा । वदस्व प्रकाशय । 'भासनोप इत्यात्मनेपदम् ॥१२॥ सात्वतां यदूनाम् ॥१३॥ हे द्विजाः वीर्यं चरितं वक्तुं प्रारेभे ॥ १४ ॥ शितैः तीक्ष्णैः । यदा शब्दयोः यदा नोत्तिष्ठेरन् यदा च निःश्रीका अभवन् तत्र नेशुरित्यनेनान्वयः । तत्र तदा । भूयश इति पुनरर्थेऽव्ययं निपातनाच्छ्रांसः । शापात् प्रसादरूपमालानादरात् । नोत्तिष्ठेरन् नोत्थिता बभूवुः ॥ १५।१६ ॥ विनिश्चयं लक्ष्मीप्राप्त्युपायं यदा नाध्यगच्छन् न प्रापुः । ततः तदा ब्रह्मसभां जग्मुरित्युत्तरेणान्वेति । सर्वं शापादिकारणम् ॥ १७ ॥ १८ ॥ स इति युग्मम् । स विभुः ब्रह्मा इन्द्रादीन् निःसत्त्वान् निर्बलान् असुरान् अयथा विपरीतान् सबलान् विलोक्य पुरुषं विष्णुं संस्मरन् संस्मरति ततश्च स परः ब्रह्मा देवान् उवाचेति वाक्यान्तरत्वात्स 'इत्यस्य न पौनरुक्त्यम् ॥१९॥२०॥ मनुष्यादयः क्रमेण जरायुज-

न यस्य वध्यो न च रक्षणीयो नोपेक्षणीयादरणीयपक्षः ।
अथापि सर्गस्थितिसंयमार्थं धत्ते रजःसत्त्वतमांसि काले ॥२२॥
अयं च तस्य स्थितिपालनक्षणः सत्त्वं जुषाणस्य भवाय देहिनाम् ।
तस्माद् व्रजामः शरणं जगद्गुरुं स्वानां स नो धास्यति शं सुरप्रियः ॥२३॥

श्रीशुक उवाच

इत्याभाष्य सुरान् वेधाः सह देवैररिंदम । अजितस्य पदं साक्षाज्जगाम तमसः परम् ॥२४॥
तत्रादृष्टस्वरूपाय श्रुतपूर्वाय वै विभो । स्तुतिमब्रूत दैवीभिर्गीर्भिस्त्ववहितेन्द्रियः ॥२५॥

ब्रह्मोवाच

अविक्रियं सत्यमनन्तमाद्यं गुहाशयं निष्कलमप्रतर्क्यम् ।
मनोऽग्रयानं वचसानिरुक्तं नमाम हे देववरं वरेण्यम् ॥२६॥
विपश्चितं प्राणमनोधियात्मनामर्थेन्द्रियाभासमनिद्रमव्रणम् ।
छायातपौ यत्र न गृध्रपक्षौ तमक्षरं खं त्रियुगं व्रजाम हे ॥२७॥
अजस्य चक्रं त्वजयेर्यमाणं मनोमयं पञ्चदशारमाशु ।
त्रिणाभि विद्युच्चलमष्टनेमि यदक्षमाहुस्तमृतं प्रपद्ये ॥२८॥

अण्डज-उद्भिज्ज-स्वेदजाः । अहं ब्रह्मा तदादयः धर्मजात्यन्ताः सर्वे वयं तं शरणं व्रजामेत्यन्वयः । कथंभूताः । यस्य अवतारः पुरुषः तस्य अंशकलया लेशमात्रेण विसर्जिता उत्पादिताः । यद्वा । अवतारः पुरुषः तस्य अंशो ब्रह्मा तस्य कला मरीच्यादयः ताभिः ॥ २१ ॥ यद्यपि यस्य वध्यादयः पक्षाः न सन्ति तथापि काले यथासमयं सर्गाद्यर्थं रज-आदि-गुणान् धत्ते बिभर्ति प्रवर्तयतीत्यर्थः ॥ २२ ॥ अयं च तस्य स्थितेर्मर्यादायाः पालनावसरः तस्मात् शरणं व्रजामः स नोऽस्माकं शं धास्यति कल्याणं करिष्यति यतः सुरप्रियः । भवाय पालनाय सत्वगुणं जुषमाणस्य सेवमानस्य॥२३॥अजितस्य मन्वन्तरावतारस्य पदं क्षीराब्धिस्थं श्वेतद्वीपम् । तमसः प्रकृतेः ।२४। तत्र स्थाने । अदृष्टरूपाय भगवते तं प्रसादयितुं स्तुतिमब्रूत अकरोत् । अवहितेन्द्रियः स्वस्थचित्तः सन् ॥ २५ ॥ हे देव वरं श्रेष्ठं वरणीयं त्वां नमाम लोडन्तम् । गुहायां हृदये शेते निष्कलं निरुपाधिम् । अनिरुक्तम् इदमित्थंतया ॥२६॥ हे नाथ यत्र गृध्रपक्षौ जीवपक्षपातिनौ छायातपौ अविद्याविधे न स्तः तं खम् आकाशवत् असङ्गं त्वां शरणं व्रजामेति लोडन्तम् । कथंभूतम् । प्राणादीनां विपश्चितं चेतयितारम् । अर्थो विषयः इन्द्रियाणि च तद्ग्राहकाणि तदुभयरूपेण आभासते । तैर्न भासते विषयीक्रियते इति वा । अनिद्रं द्रष्टारम् । अव्रणं प्राकृतदेहरहितम् । वृणोति आवृणोति जीवमिति व्युत्पत्तिः । त्रीणि युगलानि ऐश्वर्याणि यस्य ॥ २७ ॥ अजया मायया प्रेर्यमाणं जीवस्य संसारचक्रं यदक्षं यदाश्रयमाहुः तम् ऋतं सत्यस्वरूपं त्वां प्रपद्ये इत्यन्वयः । कीदृशं चक्रम् । दशेन्द्रियाणि पञ्च प्राणाश्च आरा यस्य । आशु शीघ्रगम् । त्रयो गुणा नाभिरिव मध्ये यस्य । अष्टौ प्रकृतयः[1]

---

१. भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च ।
अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा ॥

य एकवर्णं तमसः परं तदलोकमव्यक्तमनन्तपारम् ।
आसाञ्चकारोपसुपर्णमेनमुपासते योगरथेन धीराः ॥२९॥
न यस्य कश्चातितितर्ति मायां यया जनो मुह्यति वेद नार्थम् ।
तं निर्जितात्मात्मगुणं परेशं नमाम भूतेषु समं चरन्तम् ॥३०॥
इमे वयं यत्प्रिययैव तन्वा सत्त्वेन सृष्टा बहिरन्तराविः ।
गतिं न सूक्ष्मामृषयश्च विद्म हे कुतोऽसुराद्या इतरप्रधानाः ॥३१॥
पादौ महीयं स्वकृतैव यस्य चतुर्विधो यत्र हि भूतसर्गः ।
स वै महापूरुष आत्मतन्त्रः प्रसीदतां ब्रह्म महाविभूतिः ॥३२॥
अम्भस्तु यद्रेत उदारवीर्यं सिध्यन्ति जीवन्त्युत वर्धमानाः ।
लोकास्त्रयोऽथाखिललोकपालाः प्रसीदतां ब्रह्म महाविभूतिः ॥३३॥
सोमं मनो यस्य समामनन्ति दिवौकसां वै बलमन्ध आयुः ।
ईशो नगानां प्रजनः प्रजानां प्रसीदतान्नः स महाविभूतिः ॥३४॥
अग्निर्मुखं यस्य तु जातवेदा जातः क्रियाकाण्डनिमित्तजन्मा ।
अन्तःसमुद्रेऽनुपचन् स्वधातून् प्रसीदतान्नः स महाविभूतिः ॥३५॥
यच्चक्षुरासीत् तरणिर्देवयानं त्रयीमयो ब्रह्मण एष धिष्ण्यम् ।
द्वारं च मुक्तेरमृतं च मृत्युः प्रसीदतान्नः स महाविभूतिः ॥३६॥

गीतोक्ताः नेमय इव आवरणानि यस्य । यः परमात्मा अक्षः चक्राधारो धूर्यस्य ॥ २६ ॥ यः तमसः परं तत् प्रसिद्धं स्वधाम आस्ते स्म न केवलं तत्रैव किन्तु उपसुपर्णं जीवसमीपे च गरुडोपरि च आसाञ्चकार। किञ्च यमेनं योगरथेन धीरा उपासते तं त्वां नमामेति द्वयोरन्वयः । कीदृशं तत् । लोकातीतम् । एकवर्णम् एकरूपं नित्यमित्यर्थः । अथापि अनित्यप्रलापिभिः कैश्चित् अव्यक्तं तिरोहितम् । नास्ति अन्तः पारश्च कालतो देशतश्च यस्य । नातितितर्ति नातिक्रामति । आर्षं तातर्तीति भाव्यम् । निर्जित आत्मा आत्मशक्तिर्माया तद्गुणाश्च येन तम् ॥ २९ ॥ ३० ॥ इमे वयं देवा ऋषयश्च यस्य तन्वा सत्त्वेन सृष्टा अपि यस्य गतिं स्वरूपम् आविः सत्ताचैतन्याभ्यां प्रकटामपि न विद्मः[1] तर्हि असुराद्याः कुतो विदुः तं नमामेति योज्यम् । कथंभूतस्य । वहिः कालरूपेण अन्तः अन्तर्यामिरूपेण स्थितस्य । इतरप्रधानाः रजस्तमोमयाः असुराद्याः ॥३१॥ यत्र चतुर्विधः जरायुजादिरूपः भूतसर्गः सेयं स्वकृता मही यस्य पादौ वैप्रसिद्धः स महापुरुषः नः प्रसीदतामित्यन्वयः । कथंभूतः । ब्रह्मशब्दवाच्यः अतो पादादिमत्त्वेऽपि स्वतन्त्रः न परतन्त्रः यतो महाविभूतिः ॥३२॥ उदारवीर्यं महाशक्तिकम् अम्भः यस्य रेतः यतोऽम्भसः सकाशात् लोकादयः सिध्यन्ति जायन्ते उत अपि जीवन्ति वर्धन्ते च स प्रसीदतामित्यन्वयः ॥ ३३ ॥ यः दिवौकसामन्धः अन्नं यः बलमायुश्च यः नगानां वनस्पतीनामीशो राजा यश्च प्रजानां चराणां प्रजनः बुद्धिकर्ता उत्पादकश्च तं सोमं यस्य मनः समामनन्ति स नः प्रसीदतात् प्रसीदतु इत्यन्वयः स्वस्मिन् तोः तातङ्ङादेशः ॥३४॥ जातं प्राप्तं चरुपुरोडाशादिकम् इन्द्रादिभ्यः वेदयति प्रापयतीति तथा जातवेदाः अन्तः समुद्रमध्ये जठरमध्ये च

---

१. 'विदो लटो वा' इति मसो आदेशः । हे इति सम्बोधनं पृथक् पदम् ।

प्राणादभूद् यस्य चराचराणां प्राणः सहो बलमोजश्च वायुः ।
अन्वास्म सम्राजमिवानुगा वयं प्रसीदतान्नः स महाविभूतिः ॥३७॥
श्रोत्राद् दिशो यस्य हृदश्च खानि प्रजज्ञिरे खं पुरुषस्य नाभ्याः ।
प्राणेन्द्रियात्मासुशरीरकेतं प्रसीदतान्नः स महाविभूतिः ॥३८॥
बलान्महेन्द्रस्त्रिदशाः प्रसादान्मन्योर्गिरीशो धिषणाद्विरिञ्चः ।
खेभ्यश्च छन्दांस्यृषयो मेढ्रतः कः प्रसीदतान्नः स महाविभूतिः ॥३९॥
श्रीर्वक्षसः पितरश्छायाऽऽसन् धर्मः स्तनादितरः पृष्ठतोऽभूत् ।
द्यौर्यस्य शीर्ष्णोऽप्सरसो विहारात् प्रसीदतान्नः स महाविभूतिः ॥४०॥
विप्रो मुखाद् ब्रह्म च यस्य गुह्यं राजन्य आसीद् भुजयोर्बलं च ।
ऊर्वोर्विशोऽङ्घ्रेरभवंश्च शूद्राः प्रसीदतान्नः स महाविभूतिः ॥४१॥
लोभोऽधरात् प्रीतिरुपर्यभूद् द्युतिर्नस्तः पशव्यः स्पर्शेन कामः ।
भ्रुवोर्यमः पक्ष्मभवस्तु कालः प्रसीदतान्नः स महाविभूतिः ॥४२॥
द्रव्यं वयः कर्म गुणान् विशेषं यद्योगमायाविहितान् वदन्ति ।
यद् दुर्विभाव्यं प्रबुधापवादं प्रसीदतान्नः स महाविभूतिः ॥४३॥
नमोऽस्तु तस्मा उपशान्तशक्तये स्वाराज्यलाभप्रतिपूरितात्मने ।
गुणेषु मायारचितेषु वृत्तिभिर्न सज्जमानाय नभस्वदूतये ॥४४॥

स्वधातून् अन्नादीन् उदकानिच अनुपचति सोऽग्निःवाडवानलश्च यस्य मुखं स प्रसीदतादित्यन्वयः ॥३५॥ तरणिः सूर्यः यस्य चक्षुःआसीत् स प्रसीदतात् इत्यन्वयः । कथंभूतः । देवेति एतन्मार्गदेवता वेदत्रयी[2]प्रचुरः । धिष्ण्यम् उपासनास्थानम् । द्वारं देवयानत्वात् । अमृतं पुण्यलोकत्वात् । मृत्युः आयुर्व्ययकरत्वात् ॥३६॥ यस्य प्राणात् सर्वेषां प्राणः प्राणवायुः अभूत् यं प्राणमनु सर्वे वयम् अधिष्ठातृदेवता स्थिताः आस्म भृत्या सम्राजमिव स प्रसीदतु इत्यन्वयः । सह आद्याः तिस्रः मनोदेहेन्द्रियशक्तयः ॥३७॥ खानि देहगतच्छिद्राणि । किञ्च यस्य नाभ्याः खमन्तरिक्षमासीत् स प्रसादतात् इत्यन्वयः । 'नाभ्या आसीदन्तरिक्षम्' इति श्रुतेः । कीदृशम् । प्राणादीना केतमाश्रयभूतमवकाशदातृत्वेन । तत्र आत्मा अन्तःकरणम् । असवः उपप्राणाः [3]नागादयः ॥३८॥ धिषणायाः बुद्धेः सकाशात् । खेभ्यः विराट्शरीरच्छद्रेभ्यः गायत्र्यादीनि छन्दासि मेढ्रात् शिश्नात् कः प्रजापतिः॥ ३९॥ इतरोऽधर्मः । द्यौःस्वर्गः॥४०॥ ब्रह्म वेदश्च आसीत् । गुह्यं तत्त्वबोधकम् । भुजयोः भुजाभ्याम् । ऊर्वोः ऊरुभ्याम् । विशोऽङ्घ्रेरभवंश्च शूद्राः । इति पाठः समीचीनः सुगमश्च । राजन्यः क्षत्रियः । वलं प्रजापालनसामर्थ्यं चासीत् ॥ ४१ ॥ उपरि उत्तरोष्ठात् । नस्तः नासिकातः द्युतिः कान्तिः । स्पर्शेन गुणेन । पशूनां हितकरः पशव्यः ॥ ४२ ॥ द्रव्यादिगुणान्तान् यस्य मायया सृष्टान् वदन्ति यैश्च जायमानं विशेषं प्रपञ्चं वदन्ति स प्रसीदतादित्यन्वयः । कीदृशम् । प्रबुधानां वेदान्तिनाम् अपवादो निषेधो नेति नेतीति कृत्वा यत्र । अत एव यत् दुर्विभाव्यं दुर्वितर्क्यम् । द्रव्य २३ तत्त्ववर्गः । वयः कालः कर्म जीवादृष्टम् ॥ ४३ ॥ शक्तयः सत्त्वादयो गुणाः । स्वाराज्यं ब्रह्मानन्दः ।

---

१. प्रा० पाठः २. सैषा त्रय्येव विद्या तपति' इति श्रुतेः । ३. नागः कूर्मश्च कृकलो देवदत्तो धनञ्जयः ।

स त्वं नो दर्शयात्मानमस्मत्करणगोचरम् । प्रपन्नानां दिदृक्षूणां सस्मितं ते मुखाम्बुजम् ॥४५॥
तैस्तैः स्वेच्छाधृतै रूपैः काले काले स्वयं विभो । कर्म दुर्विषहं यन्नो भगवांस्तत् करोति हि॥
क्लेशभूर्य्यल्पसाराणि कर्माणि विफलानि च । देहिनां विषयार्तानां न तथैवार्पितं त्वयि ॥४७॥
नावमः कर्मकल्पोऽपि विफलायेश्वरार्पितः । कल्पते पुरुषस्यैष स ह्यात्मा दयितो हितः ॥४८॥
यथा हि स्कन्धशाखानां तरोर्मूलावसेचनम् । एवमाराधनं विष्णोः सर्वेषामात्मनश्च हि ॥४९॥
नमस्तुभ्यमनन्ताय दुर्वितर्क्यात्मकर्मणे । निर्गुणाय गुणेशाय सत्वस्थाय च साम्प्रतम् ॥५०॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायामष्टमस्कन्धेऽमृतमथने पञ्चमोऽध्यायः ॥ ५ ॥

अथ षष्ठोऽध्यायः

श्रीशुक उवाच

एवं स्तुतः सुरगणैर्भगवान् हरिरीश्वरः । तेषामाविरभूद् राजन् सहस्रार्कोदयद्युतिः ॥ १ ॥
तेनैव महसा सर्वे देवाः प्रतिहतेक्षणाः । नापश्यन् खं दिशः क्षोणिमात्मानं च कुतो विभुम् ॥२॥
विरिञ्चो भगवान् दृष्ट्वा सह शर्वेण तां तनुम् । स्वच्छां मरकतश्यामां कञ्जगर्भारुणेक्षणाम्॥३॥
तप्तहेमावदातेन लसत्कौशेयवाससा । प्रसन्नचारुसर्वाङ्गीं सुमुखीं सुन्दरभ्रुवम् ॥ ४ ॥
महामणिकिरीटेन केयूराभ्यां च भूषितम् । कर्णाभरणनिर्भातकपोलश्रीमुखाम्बुजाम् ॥ ५ ॥

गुणेषु कार्येषु । वृत्तिभिर्दर्शनादिभिः नभस्वतो वायोरिव अनासक्ता ऊतिः सृष्ट्यादिलीला यस्य तस्मै नमः ॥ ४४ ॥ ते मुखाम्वुजम् नोऽस्माकम् इन्द्रियगोचरं यथा भवतु तथा आत्मानं दर्शयेत्यन्वयः ॥४५॥ नोऽस्माकं दुर्विषहम् अशक्यं यत्कर्म तत्स्वयमेव करोति ॥४६॥ विषयिणां कर्माणि अल्पफलानि विफलानि च स्वर्गादेर्विनाशित्वात् । त्वयि अर्पितं भक्तानां कर्म तु न तथा स्वल्पश्रमसाध्यमपि भूरिफलदं मुक्तिदं चेत्यर्थः॥४७॥ अवमः अल्पोऽपि कर्माभासोऽपि अर्पितश्चेत् विफलाय न कल्पते किन्तु अभीष्टफलदाय । यतः स भगवान् जीवस्य दयितः प्रिय आत्मा हितकरश्च ॥४८॥ यथा मूलसेचनं स्कन्धादीनां वृद्धिकरं भवति एवं विष्णोराराधनं सर्वेषामिन्द्रादीनाम् आत्मनश्च तृप्तिकरं भवति ॥४९॥ तुभ्यं नम इत्येव साम्प्रतमुचित न चाऽतोऽधिकं कर्तुं शक्यमित्यर्थः । तर्कागोचराणि स्वभावतः क्रियमाणानि कर्माणि यस्य ॥५०॥

इति श्रीमद्भागवते महापुराणेऽष्टमस्कन्धे गूढार्थदीपिन्यां पञ्चमोऽध्यायः ॥ ५ ॥

●

आविर्भूते हरौ षष्ठे स्तुतिर्भूयस्तदाज्ञया ।
सन्धिं कृत्वाऽसुरैर्देवाः सुधाप्राप्त्यर्थमुद्यताः ॥ १ ॥

सहस्रेति अभूतोपमेयम् । उदये द्युतिरिव द्युतिः यस्य ॥ १ ॥ महसा तेजसा । ईक्षणं नेत्रम् । क्षोणि पृथ्वीं । तम् आत्मानं जातावेकवचनम् ॥ २ ॥ विरिञ्च इति सार्द्धपञ्चकम् । कञ्जं कमलं तस्य मध्यवत् अरुणे ईक्षणे यस्याः । हेमवत् अवदातेन[1] पीतेन वाससा युक्ताम् 'कर्णाभरणाभ्यां निर्भातौ यौ कपोलौ ताभ्यां श्रीमुखाम्वुजे यस्याः । कलापो भूषणम् । आभरणं गले यस्याः । लक्ष्मीं वक्षसि विभ्रतीम् । वनमाला अस्याम् अस्तीति ताम् । देवप्रवरः ब्रह्मा । साकं सह । अवनिं भूमिंगतैः ॥३।४।५॥

---

१. अवदातोऽरुणे पीते श्वेते श्यामे च कथ्यते' । इति कोशात् ।

काञ्चीकलापवलयहारनूपुरशोभिताम् । कौस्तुभाभरणां लक्ष्मीं बिभ्रतीं वनमालिनीम् ॥ ६ ॥

सुदर्शनादिभिः स्वास्त्रैर्मूर्तिमद्भिरुपासिताम् । तुष्टाव देवप्रवरः सशर्वः पुरुषं परम् ।
सर्वामरगणैः साकं सर्वाङ्गैरवनिं गतैः ॥ ७ ॥

ब्रह्मोवाच

अजातजन्मस्थितिसंयमायाऽगुणाय निर्वाणसुखार्णवाय ।
अणोरणिम्नेऽपरिगण्यधाम्ने महानुभावाय नमो नमस्ते ॥ ८ ॥

रूपं तवैतत् पुरुषर्षभेज्यं श्रेयोऽर्थिभिर्वैदिकतान्त्रिकेण ।
योगेन धातः सह नस्त्रिलोकान् पश्याम्यमुष्मिन् नु ह विश्वमूर्तौ ॥ ९ ॥

त्वय्यग्र आसीत् त्वयि मध्य आसीत् त्वय्यन्त आसीदिदमात्मतन्त्रे ।
त्वमादिरन्तो जगतोऽस्य मध्यं घटस्य मृत्स्नेव परःपरस्मात् ॥ १० ॥

त्वं माययाऽऽत्माश्रयया स्वयेदं निर्माय विश्वं तदनुप्रविष्टः ।
पश्यन्ति युक्ता मनसा मनीषिणो गुणव्यवायेऽप्यगुणं विपश्चितः ॥ ११ ॥

यथाग्निमेधस्यमृतं च गोषु भुव्यन्नमम्बूद्यमने च वृत्तिम् ।
योगैर्मनुष्या अधियन्ति हि त्वां गुणेषु बुद्ध्या कवयो वदन्ति ॥ १२ ॥

तं त्वां वयं नाथ समुज्जिहानं सरोजनाभातिचिरेप्सितार्थम् ।
दृष्ट्वा गता निर्वृतिमद्य सर्वे गजा दवार्ता इव गाङ्गमम्भः ॥ १३ ॥

॥ ६ ॥ ७ ॥ न जाताः जन्मादयो यस्य तस्मै । अपरिगण्यमियत्ताशून्यं धाम स्वरूपं यस्य तस्मै ॥ ८ ॥ हे पुरुषोत्तम हे धातः । तव एतत् रूपं तान्त्रिकेण योगेन तन्त्रोक्तसाधनेन ईज्यं पूज्यं भवति उह अहो अमुष्मिन्नेव रूपे नोऽस्मान् त्रिलोकांश्च सह युगपदेव पश्यामि । अत एतत् परिच्छिन्नमपि अपरिच्छिन्नमेवेत्यर्थः ॥ ९ ॥ घटस्य मृत्तिका यथा आदिः अन्तश्च मध्यं च अस्ति तथा त्वमपि अस्य जगतः । मृत्तिकादृष्टान्तेन प्रसक्तं परिणामं वारयति । परस्मात् प्रधानादपि परः । प्रधानमेव विश्वरूपेण परिणमति न त्वमिति भावः ॥ १० ॥ स्वया स्वाधीनया । अत एव गुणव्यवाये गुणपरिणामभूतेऽपि जगति अगुणं गुणसम्बन्धरहितमेव त्वां मनसा[1] बुद्ध्या युक्ता पश्यन्ति । 'दृश्यते त्वग्र्यया बुद्ध्या ।' मनीषिणः मननशीलाः । विपश्चितः सारासारविवेकिनः ॥ ११ ॥ एध आदिषु अग्न्यादीन् योगैः तत्तदुपायैः यथा अधियन्ति प्राप्नुवन्ति एवं गुणेषु गुणमये जगति बुद्ध्या विवेकेन त्वामित्यन्वयः । एधसि काष्ठे अग्निम् । गोषु अमृतं दुग्धम् । मन्थनेन । दोहनेन । कर्षणेन । खननेन क्रमेण योज्यम् उद्यमेन वृत्तिं जीविकाम् । ॥ १२ ॥ हे सरोजनाभ ! समुज्जिहानम् आविर्भवन्तम् तं त्वां दृष्ट्वा अद्य सर्वे वयं निर्वृतिं परमानन्दं प्राप्ताः इत्यन्वयः । कथंभूतम् । चिरकालादीप्सितमर्थं परमार्थरूपम् । अत्र दृष्टान्तः— दावाग्नितप्ता गजा यथा

---

१. 'मनश्चित्ते मनीषायाम् इति मेदिनी' ।

स त्वं विधत्स्वाखिललोकपाला वयं यदर्थास्तव पादमूलम् ।
समागतास्से बहिरन्तरात्मन् किं वान्यविज्ञाप्यमशेषसाक्षिणः ।।१४।।

अहं गिरित्रश्च सुरादयो ये दक्षादयोऽग्नेरिव केतवस्ते ।
किं वा विदामेश पृथग्विभाता विधत्स्व शं नो द्विजदेवमन्त्रम् ।।१५।।

श्रीशुक उवाच

एवं विरिञ्चादिभिरीडितस्तद् विज्ञाय तेषां हृदयं तथैव ।
जगाद जीमूतगभीरया गिरा बद्धाञ्जलीन् संवृतसर्वकारकान् ।।१६।।

एक एवेश्वरस्तस्मिन् सुरकार्ये सुरेश्वरः । विहर्तुकामस्तानाह समुद्रोन्मथनादिभिः ।।१७।।

श्रीभगवानुवाच

हन्त ब्रह्मन्नहो शम्भो हे देवा मम भाषितम् । शृणुतावहिताः सर्वे श्रेयो वःस्याद् यथा सुराः१८
यात दानवदैतेयैस्तावत् संधिर्विधीयताम् । कालेनानुगृहीतैस्तैर्यावद् वो भव आत्मनः ।।१९।।

अरयोऽपि हि संधेयाः सति कार्यार्थगौरवे । अहिमूषकवद् देवा ह्यर्थस्य पदवीं गतैः ।।२०।।
अमृतोत्पादने यत्नःक्रियतामविलम्बितम् । यस्य पीतस्य वै जन्तुर्मृत्युग्रस्तोऽमरो भवेत् ।।२१।।

क्षिप्त्वा क्षीरोदधौ सर्वा वीरुत्तृणलतौषधीः।मन्थानं मन्दरं कृत्वा नेत्रं कृत्वा तु वासुकिम् ।।२२।।
सहायेन मया देवा निर्मन्थध्वमतन्द्रिताः । क्लेशभाजो भविष्यन्ति दैत्या यूयं फलग्रहाः ।।२३।।

यूयं तदनुमोदध्वं यदिच्छन्त्यसुराः सुराः । न संरम्भेण सिध्यन्ति सर्वेऽर्थाःसान्त्वया यथा।२४
न भेतव्यं कालकूटाद् विषाज्जलधिसम्भवात् । लोभःकार्यो न वो जातु रोषःकामस्तु वस्तुषु२५

गङ्गाजलं प्राप्य ।। १३ ।। हे अन्तरात्मन् । यदर्थाः यत्प्रयोजनाः सन्तः वयं तव पादमूलं प्राप्ताः तत्प्रयोजनं विधत्स्व सम्पादय । अशेषसाक्षिणस्ते तव सर्वज्ञस्य बहिः अन्यैः किं वा विज्ञाप्यमस्ति न किमपीत्यन्वयः ।। १४ ।। ये सुरादयः ते सर्वे वयम् अग्नेः केतवः स्फुलिङ्गाः अग्निकणा इव ते त्वत्तः पृथक् विभाताः सन्तः आत्मनः शं सुखोपायं किं वा विदाम नैव विद्म अतः हे ईश त्वमेव हितकरं मन्त्रमुपायं विधत्स्वेत्यन्वयः । गिरित्रेति लीलासौकर्याय ।। १५ ।। यत् हृदयमभिप्रायं तत् यथावत् विज्ञाय भगवान् तान् जगादेत्यन्वयः । संवृतानि निरुद्धानि सर्वकारकाणि इन्द्रियाणि यैस्तान् । जीमोतो मेघस्तद्वत् गम्भीरया ।। १६ ।। यद्यपि सुखेन सुरेश्वरो भगवान् सुराणां कार्ये एक एव ईश्वरः समर्थः तथापि विहर्तुकामः सन् तानुपायमाहेत्यन्वयः ।। १७ ।। हे सुराः । वः युष्माकं यथा श्रेयः स्यात् तत् यूयं सर्वे शृणुत । अवहिता सावधानाः सन्तः । हे देवा देवयोनयः गन्धर्वादयः अतः सुरपदेन न पुनरुक्तिः । हन्तेति वाक्यारम्भे हर्षे वा ।। १८ ।। यातः यूयं गच्छत । वः युष्माकम् आत्मनः स्वत एव यावत् भवः वृद्धिः भवेत् तावत् तैः सह सन्धिः विधीयताम् अनुगृहीतैः अनुकूलतां प्राप्तैः । चक्रवर्ती तु इति पदच्छेदं कृत्वा अभवः सत्यभावो यावत् तावदेव तत्सत्यां तु विग्रह एव विधेय इति कूटनीतिः अभव ।। १९ ।। कर्तव्यार्थस्य कार्यस्य गुरुत्वे सति सन्धेयाः । अर्थस्य कार्यस्य सिद्धिं गतैः अहिमूषकवत् वध्यघातकभावेन वर्तितव्यमिति शेषः । पेटिकायां निरुद्धोऽहिः यथा पूर्वं मूषकेण सन्धिं विधत्ते पश्चात्तं भक्षयति ।। २० ।। यस्येति तृतीयार्थे षष्ठी । येन पीतेन ।।२१।। क्षिप्त्वेति सार्द्धम् । नेत्रं रज्जुम् । सहायकेन ।। २२ ।। फलग्रहाः अमृतपायिनो भविष्यथ ।। २३ ।। हे सुराः । संरम्भेन क्रोधेन । अर्थाः कार्याणि । 'सान्त्वं सामप्रयोगे स्यात् । स्त्रीत्वमार्षम् ।।२४।। कालः कूटो गुप्तो यस्मिन् ।

श्रीशुक उवाच

इति देवान् समादिश्य भगवान् पुरुषोत्तमः । तेषामन्तर्दधे राजन् स्वच्छन्दगतिरीश्वरः ॥२६॥
अथ तस्मै भगवते नमस्कृत्य पितामहः । भवश्च जग्मतुः स्वं स्वं धामोपेयुर्बलिं सुराः ॥२७॥
दृष्ट्वारीनप्यसंयत्ताञ्जातक्षोभान् स्वनायकान् । न्यषेधद् दैत्यराट् श्लोक्यः संधिविग्रहकालवित् २८
ते वैरोचनिमासीनं गुप्तं चासुरयूथपैः । श्रिया परमया जुष्टं जिताशेषमुपागमन् ॥२९॥
महेन्द्रः श्लक्ष्णया वाचा सान्त्वयित्वा महामतिः । अभ्यभाषत तत् सर्वं शिक्षितं पुरुषोत्तमात्॥
तदरोचत दैत्यस्य तत्रान्ये येऽसुराधिपाः । शम्बरोऽरिष्टनेमिश्च ये च त्रिपुरवासिनः ॥३१॥
ततो देवासुराः कृत्वा संविदं कृतसौहृदाः । उद्यमं परमं चक्रुरमृतार्थे परंतप ॥३२॥
ततस्ते मन्दरगिरिमोजसोत्पाट्य दुर्मदाः । नदन्त उदधिं निन्युः शक्ताः परिघबाहवः ॥३३॥
दूरभारोद्वहश्रान्ताः शक्रवैरोचनादयः । अपारयन्तस्तं वोढुं विवशा विजहुः पथि ॥३४॥
निपतन् स गिरिस्तत्र बहूनमरदानवान् । चूर्णयामास महता भारेण कनकाचलः ॥३५॥
तांस्तथा भग्नमनसो भग्नबाहूरुकन्धरान् । विज्ञाय भगवांस्तत्र बभूव गरुडध्वजः ॥३६॥
गिरिपातविनिष्पिष्टान् विलोक्यामरदानवान् । ईक्षया जीवयामास निर्जरान् निर्व्रणान् यथा
गिरिं चारोप्य गरुडे हस्तेनैकेन लीलया । आरुह्य प्रययावब्धिं सुरासुरगणैर्वृतः ॥३८॥
अवरोप्य गिरिं स्कन्धात् सुपर्णः पततां वरः। ययौ जलान्त उत्सृज्य हरिणा स विसर्जितः

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायामष्टमस्कन्धेऽमृतमथने मन्दराचलानयनं नाम षष्ठोऽध्यायः ॥ ६ ॥

कूटोऽस्त्री गुप्तदंभयोः इति कोशः । मथनादुद्भूतेषु वस्तुषु रत्नादिषु वः युष्माभिः जातु कदाचिदपि कामो लोभश्च न कार्यः असुरनीतेषु रोषश्च न कार्यः इत्यन्वयः ॥२५॥ स्वच्छन्देन भक्तेच्छया वा गतिर्यस्य ॥२६॥ उपेयुः उपजग्मुः ॥२७॥ अरीन् देवान् असंयत्तान् युद्धार्थम् अनुद्यतान् । नायकान् सेनापतीन् हन्तु मुद्यतान् श्लोक्यः यशस्वी ॥ २८ ॥ वैरोचनिं विरोचन पुत्रं बलिम् । अशेषं त्रैलोक्यम् ॥२९॥ श्लक्ष्णया मधुरया ॥ ३० ॥ दैत्यस्य बलेः । शेषे षष्ठी । तत्र सदसि येऽन्ये तेभ्योऽपि तत् इन्द्रोक्तम् ॥ ३१ ॥ संविदं प्रतिज्ञाम् । संवित् युद्धे प्रतिज्ञायाम् इति कोशः ॥ ३२ ॥ ओजसा बलेन । परिघा अर्गला इव लम्बाः बाहवो येषां ते । निन्युः नेतुमुद्यताः ॥३३॥ अपारयन्तः अशक्नुवन्तः विजहुः तत्यजुः ॥३४॥ ॥ ३५ ॥ भग्नमनसो नष्टोत्साहान् भग्ना बाह्वादयो येषान्तान् । बभूव आविर्भूर्बभूव ॥ ३६ ॥ ईक्षया अमृतदृष्ट्या । यथा यथावत् निर्जरान् निर्व्रणांश्च कृत्वेति शेषः । निर्जरानित्युक्तेरसुरांस्तु नेत्यर्थः ॥ ३७ ॥ ३८ ॥ पततां पक्षिणां वरः सुपर्णो गरुडः । जलान्ते जलमध्ये । गरुडे स्थिते वासुकेरागमना-संभवात् विसर्जित इत्युक्तम् ॥ ३९ ॥

इति श्रीमद्भागवते महापुराणेऽष्टमस्कन्धे गूढार्थदीपिन्यां षष्ठोऽध्यायः ॥ ६ ॥

अथ सप्तमोऽध्यायः

श्रीशुक उवाच

ते नागराजमामन्त्र्य फलभागेन वासुकिम्। परिवीय गिरौ तस्मिन् नेत्रमब्धिं मुदान्विताः॥१॥

आरेभिरे सुसंयत्ता अमृतार्थं कुरूद्वह। हरिः पुरस्ताज्जगृहे पूर्वं देवास्ततोऽभवन्॥२॥

तन्नैच्छन् दैत्यपतयो महापुरुषचेष्टितम्। न गृह्णीमो वयं पुच्छमहेरङ्गममङ्गलम्॥३॥

स्वाध्यायश्रुतसम्पन्नाः प्रख्याता जन्मकर्मभिः। इति तूष्णीं स्थितान् दैत्यान् विलोक्य पुरुषोत्तमः

स्मयमानो विसृज्याग्रं पुच्छं जग्राह सामरः॥४॥

कृतस्थानविभागास्त एवं कश्यपनन्दनाः। ममन्थुः परमायत्ता अमृतार्थं पयोनिधिम्॥५॥

मथ्यमानेऽर्णवे सोऽद्रिरनाधारो ह्यपोऽविशत्। ध्रियमाणोऽपि बलिभिर्गौरवात् पाण्डुनन्दन॥६॥

ते सुनिर्विण्णमनसः परिम्लानमुखश्रियः। आसन् स्वपौरुषे नष्टे दैवेनातिबलीयसा॥७॥

विलोक्य विघ्नेशविधिं तदेश्वरो दुरन्तवीर्योऽवितथाभिसंधिः।
कृत्वा वपुः काच्छपमद्भुतं महत् प्रविश्य तोयं गिरिमुज्जहार॥८॥
तमुत्थितं वीक्ष्य कुलाचलं पुनः समुत्थिता निर्मथितुं सुरासुराः।
दधार पृष्ठेन स लक्षयोजनप्रस्तारिणा द्वीप इवापरो महान्॥९॥
सुरासुरेन्द्रैर्भुजवीर्यवेपितं परिभ्रमन्तं गिरिमङ्ग पृष्ठतः।
बिभ्रत् तदावर्तनमादिकच्छपो मेनेऽङ्गकण्डूयनमप्रमेयः॥१०॥
तथासुरानाविशदासुरेण रूपेण तेषां बलवीर्यमीरयन्।
उद्दीपयन् देवगणांश्च विष्णुर्दैवेन नागेन्द्रमबोधरूपः॥११॥

सप्तमेऽधःस्थिते कूर्मे मन्थनान्तिर्गते विषे।
भीत्या देवैः स्तुतो रुद्रो रक्षार्थं तद्विषंयग्रो॥ १॥

ते इति सार्द्धम्। ते देवासुराः। अमृते तवापि भागो भविष्यतीति आमन्त्र्य सम्प्रार्थ्य नेत्रं रज्जुभूतं तं वासुकिं गिरौ संवेष्ट्य समुद्रं मथितुम् आरेभिरे। इत्यन्वयः॥ १॥ २॥ ३ ४॥ नन्दनाः पुत्राः देवासुराः॥ ५॥ बलिभिः बलवद्भिः॥ ६॥ सुनिर्विण्णमतिखिन्नं मनो येषां ते॥ ७॥ विघ्नेशस्य विघ्नकर्तुः गणेशस्य विधिं पूजनलक्षणं तदकरणात् तद्रचितं विघ्नं विलोक्य तदा मन्थनारम्भे गणेशं षोडशोपचारैः सम्पूज्य अवितथाभिसन्धिः प्राप्तसत्योपायः सन् महत् काच्छपं वपुः धृत्वा गिरिमुज्जहार उत्थापितवानित्यन्वयः। दुरन्तमनन्तम्॥ ८॥ अपरो द्वीप इव महान् विशालकायः स कूर्मः तं पृष्ठेन दधारेत्यन्वयः। प्रस्तारः विस्तारोऽस्यास्तीति तेन॥ ९॥ अङ्ग हे राजन्! वेपितं कम्पितं परितो भ्रमन्तं तं गिरिं [1]पृष्ठतः पृष्ठेन बिभ्रत् आदिकच्छपः तदावर्तनं तद्भ्रमणम् अङ्गकण्डूयनं मेने इत्यन्वयः॥ १०॥ आसुरेण राजसेन। दैवेन सात्त्विकेन शक्तिविशेषण। अबोधस्तु तामसः। अस्य

---

१. अत्र तृतीयार्थे तसिः।

उपर्यगेन्द्रं गिरिराडिवान्य आक्रम्य हस्तेन सहस्रबाहुः।
तस्थौ दिवि ब्रह्मभवेन्द्रमुख्यैरभिष्टुवद्भिः सुमनोऽभिवृष्टः ॥१२॥
उपर्यधश्चात्मनि गोत्रनेत्रयोः परेण ते प्राविशता समेधिताः।
ममन्थुरब्धिं तरसा मदोत्कटा महाद्रिणा क्षोभितनक्रचक्रम् ॥१३॥
अहीन्द्रसाहस्रकठोरदृङ्मुखश्वासाग्निधूमाहतवर्चसोऽसुराः ।
पौलोमकालेयबलील्वलादयो दावाग्निदग्धाः सरला इवाभवन् ॥१४॥
देवांश्च तच्छ्वासशिखाहतप्रभान् धूम्राम्बरस्रग्वरकञ्चुकाननान्।
समभ्यवर्षन् भगवद्वशा घना ववुः समुद्रोर्म्युपगूढवायवः ॥१५॥

मथ्यमानात् तदा सिन्धोर्देवासुरवरूथपैः : यदा सुधा न जायेत निर्ममन्थाजितःस्वयम् ॥१६॥
मेघश्यामः कनकपरिधिः कर्णविद्योतविद्युन्मूर्ध्नि भ्राजद्विलुलितकचः स्रग्धरो रक्तनेत्रः।
जैत्रैर्दोर्भिर्जगदभयदैर्दन्दशूकं गृहीत्वा मथ्नन् मथ्ना प्रतिगिरिरिवाशोभताथोद्धृताद्रिः ॥१७॥

निर्मथ्यमानादुदधेरभूद्विषं महोल्बणं हालहलाह्वमग्रतः।
सम्भ्रान्तमीनोन्मकराहिकच्छपात् तिमिद्विपग्राहतिमिङ्गिलाकुलात् ॥१८॥

पीडाबोधो माभूदित्येवंरूपः सन् नागेन्द्रमाविशत्। ईरयन् प्रवर्तयन्। उद्दीपयन् प्रवर्धयन ॥११॥ अगेन्द्रं हस्तेन आक्रम्य तदुपरि अन्यः गिरिराडिव तस्थौ इत्यन्वयः। दिवि स्थितैः ब्रह्मादिभिः सुमनोभिः पुष्पैः आच्छादितो बभूव ॥१२॥ मदोद्धताः देवासुराः तरसा बलेन अब्धिं ममन्थुरित्यन्वयः। कथंभूताः परेण हरिणा समेधिताः प्रोत्साहिताः कथंभूतेन। उपरि सहस्रबाहुरूपेण अधः कच्छपरूपेण आत्मनि दैत्यदेवसमूहे आसुरदैवरूपेण गोत्रे पर्वते दार्ढ्यरूपेण नेत्रे वासुकौ अबोधरूपेण अन्तः प्राविशता। चक्रं समूहः ॥ १३ ॥ अहीन्द्रस्य साहस्रमपरिमिताः ये दृगादयः तेभ्यो निर्गताभ्यामग्निधूमाभ्यामाहतं वर्चस्तेजः येषां ते तथाभूताः सरला देवदारुवृक्षा इव। बलिः इल्वलश्च ॥ १४ ॥ देवानुद्दिश्य मघवद्वशाः इन्द्राधीना मेघा सम्यक् अम्बुकणरूपेण अभ्यवर्षन् समुद्रोर्मिसिक्ताः शीतलमन्दसुगन्धवायवश्च ववुरित्यन्वयः। तस्य अहीन्द्रस्य श्वासाग्निशिखाभिः हता प्रभा येषाम्। धूम्राणि अम्बरादीनि येषाम्। कञ्चुकः[1] कवचम् ॥ १५ ॥ वरूथपैः सेनापतिभिः। अजितः श्रीकृष्णः। यदेत्यस्य साहचर्यात् तदेति पाठः न तु तथेति ॥ १६ ॥ मथ्ना मंथनसाधनेन गिरिणा मथ्नन् भगवान् अथो अनन्तरं प्रतिगिरिः प्रतिद्वन्द्वी पर्वत इव अशोभतेत्यन्वयः। कथंभूतः। कनकवत् परिधानं पीताम्बरं यस्य। विद्युदिति लुप्तोपमा भ्राजन्तः विलुलिता विकीर्णाः केशा यस्य। जैत्रैः विजयशीलैः दोर्भिः बाहुभिः दन्दशूकं वासुकिं गृहीत्वा मथ्नन्निति योज्यम्। कर्णयोः विद्योत प्रकाशः ययोस्ते कुण्डले ताभ्यां विद्योतते इति विद्युत्। 'भ्राजभास'—इति क्विप्। अत्र कर्णप्रयोगेण कुण्डलद्वयमुपलक्ष्यते (मन्दाक्रान्ता वृत्तम्) ॥१७॥ अग्रतः पूर्वम् उदधेः सकाशात् विषमभूदित्यन्वयः। महोल्बणम् अतीवदुःसहम्। कथंभूतात्। सम्भ्रान्ता मीनादयो यस्मिन्। तिम्या मत्स्यादयः तैः आकुलाच्च। उत् ऊर्ध्वमागताः मकरादयः अत्र द्विपपदेन तदाकारो जलजन्तु रेव ग्राह्यो न तु हस्ती तन्मध्य

---

१. 'कञ्चुकः कवचोऽपिच' इति मेदिनी।

तदुग्रवेगं दिशि दिश्युपर्यधो विसर्पदुत्सर्पदसह्यमप्रति ।
भीताः प्रजाः दुद्रुवुरङ्ग सेश्वरा अरक्ष्यमाणाः शरणं सदाशिवम् ॥१९॥
विलोक्य तं देववरं त्रिलोक्या भवाय देव्याभिमतं मुनीनाम् ।
आसीनमद्रावपवर्गहेतोस्तपो जुषाणं स्तुतिभिः प्रणेमुः ॥२०॥

प्रजापतय ऊचुः

देवदेव महादेव भूतात्मन् भूतभावन । त्राहि नः शरणापन्नांस्त्रैलोक्यदहनाद् विषात् ॥२१॥
त्वमेकः सर्वजगत ईश्वरो बन्धमोक्षयोः । तं त्वामर्चन्ति कुशलाः प्रपन्नार्तिहरं गुरुम् ॥२२॥
गुणमय्या स्वशक्त्यास्य सर्गस्थित्यप्ययान् विभो। धत्से यदा स्वदृग् भूमन् ब्रह्मविष्णुशिवाभिधाम्
त्वं ब्रह्म परमं गुह्यं सदसद्भावभावनः । नानाशक्तिभिराभातस्त्वमात्मा जगदीश्वरः ॥२४॥
त्वं शब्दयोनिर्जगदादिरात्मा प्राणेन्द्रियद्रव्यगुणस्वभावः ।
कालः क्रतुः सत्यमृतं च धर्मस्त्वय्यक्षरं यत् त्रिवृदामनन्ति ॥२५॥
अग्निर्मुखं तेऽखिलदेवतात्मा क्षितिं विदुर्लोकभवाङ्घ्रिपङ्कजम् ।
कालं गतिं तेऽखिलदेवतात्मनो दिशश्च कर्णौ रसनं जलेशम् ॥२६॥
नाभिर्नभस्ते श्वसनं नभस्वान् सूर्यश्च चक्षूंषि जलं स्म रेतः ।
परावरात्माश्रयणं तवात्मा सोमो मनो द्यौर्भगवञ्छिरस्ते ॥२७॥

पतितन्यायेनेति ज्ञेयमत्र । तिमिः शतयोजनो मत्स्यः ॥ १८ ॥ अङ्ग हे राजन् अप्रति अप्रतिमम् अनुपमम् । प्रतिक्रियाशून्यं वा । उपरि अधः सर्वत्र विसर्पत् प्रसरत् तद्विषं विलोक्य प्रजाः शिवं शरणं दुद्रुवुः शीघ्रं जग्मुरित्यन्वयः । प्रजाश्चात्र देवासुरा एव ग्राह्याः साधारणानां झटिति तत्र गमनासंभवात् । अत्र दिशि विसर्पत् उपरि उत्सर्पत् अधः अवसर्पच्चेति शेषो बोध्यः । सेश्वराः सदिक्पालाः ॥ १९ ॥ त्रिलोक्या भवाय कल्याणाय देव्या सह अद्रौ आसीनं शिवं विलोक्य प्रणेमुः स्तुतिभिः तुष्टुवुश्च । कथंभूतम् मुनीनामपवर्गार्थं तेषामभिमतं तपो[1] जुषाणं सेवमानं तच्छिक्षणार्थं कुर्वन्तमित्यर्थः ॥ २० ॥ भूतानि भावयसि पालयसि न केवलं संहरसि । यतस्तेषामात्मा ॥ २१ ॥ ईश्वरः व्यवस्थापकः । कुशला विवेकिनः ॥ २२ ॥ अस्य विश्वस्य सर्गादीन् यदा धत्से करोषि तदा ब्रह्मादिसंज्ञां धारयसि । स्वदृक् स्वप्रकाशचिद्रूपस्त्वम् ॥ २३ ॥ सदसद्भावान् देवतिर्यगादीन् भावयसि उत्पादयसि । शक्तिभिः सत्त्वादिभिः आभातः प्रतीयमानः प्रपञ्चः तस्य त्वं आत्मा ईश्वरः नियन्ता च त्वमेव ॥ २४ ॥ शब्दस्य वेदस्य योनिः कारणम् । आदिः कारणं महत्तत्त्वम् । आत्मा अहङ्कारश्च त्वम् । कथंभूतः । प्राणादीनां कारणभूता गुणा यस्य स राजसादित्रिविधः । स्वभावादयश्च त्वम् । स्वभावः परिणामहेतुः । कालः क्षोभकः । क्रतुः सङ्कल्पः । ऋतं सूनृता वाणी । त्रिवृत् त्रिगुणात्मकं यत् अक्षरं प्रधानं तत् त्वयि त्वदाश्रयं कथयन्ति ॥ २५ ॥ द्वितीयान्तानां विदुरित्यनेन सम्बन्धः । अग्निः[2] ते मुखं विदुः । हे लोकभव जगत्कर्तः । रसनं

---

१. आत्मविद्या तपो मूलम्' इति श्रुतेः ।
२. अग्निर्वै सर्वा देवता ।

कुक्षिः समुद्रा गिरयोऽस्थिसङ्घा रोमाणि सर्वौषधिवीरुधस्ते ।
छन्दांसि साक्षात् तव सप्त धातवस्त्रयीमयात्मन् हृदयं सर्वधर्मः ॥२८॥
मुखानि पञ्चोपनिषदस्तवेश यैस्त्रिंशदष्टोत्तरमन्त्रवर्गः ।
यत् तच्छिवाख्यं परमार्थतत्त्वं देव स्वयंज्योतिरवस्थितिस्ते ॥२९॥
छाया त्वधर्मोर्मिषु यैर्विसर्गो नेत्रत्रयं सत्त्वरजस्तमांसि ।
सांख्यात्मनः शास्त्रकृतस्तवेक्षा छन्दोमयो देव ऋषिः पुराणः ॥३०॥
न ते गिरित्राखिललोकपालविरिञ्चवैकुण्ठसुरेन्द्रगम्यम् ।
ज्योतिः परं यत्र रजस्तमश्च सत्त्वं न यद् ब्रह्म निरस्तभेदम् ॥३१॥
कामाध्वरत्रिपुरकालगराद्यनेकभूतद्रुहः क्षपयतः स्तुतये न तत् ते ।
यस्त्वन्तकाल इदमात्मकृतं स्वनेत्रवह्निस्फुलिङ्गशिखया भसितं न वेद ॥३२॥
ये त्वात्मरामगुरुभिर्हृदि चिन्तिताङ्घ्रिद्वन्द्वं चरन्तमुमया तपसाभितप्तम् ।
कत्थन्त उग्रपरुषं निरतं श्मशाने ते नूनमूतिमविदंस्तव हातलज्जाः ॥३३॥
तत् तस्य ते सदसतोः परतः परस्य नाञ्जः स्वरूपगमने प्रभवन्ति भूम्नः ।
ब्रह्मादयः किमुत संस्तवने वयं तु तत्सर्गसर्गविषया अपि शक्तिमात्रम् ॥३४॥

रसनेन्द्रियं विदुः ॥ २६ ॥ नभस्वान् वायुः तव श्वसनं श्वासः । परावरात्मनाम् उत्कृष्टनिकृष्टजीवानामाश्रयः तव आत्मा अहङ्कारः । द्यौ स्वर्गः तव शिरः ॥ २७ ॥ ओषधयः यवादयः वीरुधो लताश्च तव रोमाणि । छन्दांसि गायत्र्यादीनि सप्त धातवः । हे त्रयीमयात्मन् वेदमूर्ते ! सर्वोऽपि वैदिको धर्मः तव हृदयम् ॥ २८ ॥ पञ्च उपनिषदः । तत्पुरुष-अघोर-सद्योजात-वामदेव-इशानात्मकाः पञ्च अनुवाकाः । यैः मुखैः पदच्छेदेन ३८ मन्त्रा जायन्ते । शिवाख्यं यत् तत्त्वं तत् ते अवस्थितिः अवस्थानं स्वरूपावस्था ॥ २९ ॥ अधर्मस्य ऊर्मिषु दम्भलोमादिषु तव छाया प्रकाशाभावः । यैः ऊर्मिभिः विसर्गः संहारः । यद्वा । यैः गुणैः विसर्गः प्रपञ्च सृष्टिः भवति तानि सत्त्वादीनि नेत्रत्रयम् । हे देव छन्दोमयः गायत्र्यादिप्रचुरः ऋषिः[1] वेदः तव ईक्षा ईक्षणम् । कथंभूतस्य । सांख्यात्मनः ज्ञानरूपस्य । शास्त्रं वेदं करोति प्रकटयतीति तथा तस्य । षष्ठ्यन्तम् ॥ ३० ॥ हे गिरित्र गिरीश । ते परं ज्योतिः लोकपालादिगम्यं नास्ति । कुतः । यत्र रज आदि नास्ति । किं तत् ज्योतिः । यत् निरस्तभेदम् अद्वैतं ब्रह्म तत् । वैकुण्ठेत्युक्तेः परस्परोपास्यत्वं दर्शितम् ॥ ३१ ॥ कामादयो ये अनेके भूतद्रुहः तान् क्षपयतः संहरतः ते तत् विषोपशमनं कर्म स्तुतये न भवति अत्यल्पत्वात् । अत्र हेतुः । यस्तु भवान् स्वनेत्रवह्निकणज्वालया जगत् भस्मसाज्जातमित्यपि न वद । गरपानस्य अवश्यंभावित्वेन सिद्धवन्निर्देशः । कालगरौ दैत्यौ वा । अध्वरो दक्षयज्ञः । आत्मेति ब्रह्मणोऽभेदात् ॥ ३२ ॥ उमया सह चरन्तं त्वां ये नितरां रतं कामिनं कत्थन्ते प्रलपन्ति । श्मशाने चरन्तम् उग्रं क्रूरं परुषं हिंस्रं च कत्थन्ते ते नूनं तव ऊतिं लीलामविदन् नैव विदुरितिकाक्वा व्याख्येयम् । अतः त्वन्निन्दकाः हातलज्जाः निर्लज्जा नारका एवेत्यर्थः । यतो हि कथम् आत्मारामैः सेवितचरणयुगलस्य कामित्वं संभवति कथं वा तपसाभितप्तस्य शान्तस्य उग्रत्वं परुषत्वं च संभवति ॥ ३३ ॥ तत् तस्मात् तव स्वरूपस्य गमने ज्ञाने ब्रह्मादयोऽपि अञ्जसा साक्षात् न प्रभवन्ति न समर्था

---

१. 'ऋषिर्वेद वसिष्ठादौ' इति कोशात् ।

एतत् परं प्रपश्यामो न परं ते महेश्वर । मृडनाय हि लोकस्य व्यक्तिस्तेऽव्यक्तकर्मणः ॥३५॥

श्रीशुकउवाच

तद् वीक्ष्य व्यसनं तासां कृपया भृशपीडितः । सर्वभूतसुहृद् देव इदमाह सतीं प्रियाम् ॥३६॥

शिव उवाच

अहो बत भवान्येतत् प्रजानां पश्य वैशसम् । क्षीरोदमथनोद्भूतात् कालकूटादुपस्थितम् ॥३७॥

आसां प्राणपरीप्सूनां विधेयमभयं हि मे । एतावान् हि प्रभोरर्थो यद् दीनपरिपालनम् ॥३८॥

प्राणैः स्वैः प्राणिनः पान्ति साधवः क्षणभङ्गुरैः । बद्धवैरेषु भूतेषु मोहितेष्वात्ममायया ॥३९॥

पुंसः कृपयतो भद्रे सर्वात्मा प्रीयते हरिः । प्रीते हरौ भगवति प्रीयेऽहं सचराचरः ।

तस्मादिदं गरं भुंजे प्रजानां स्वस्तिरस्तु मे ॥४०॥

श्रीशुक उवाच

एवमामन्त्र्य भगवान् भवानीं विश्वभावनः । तद् विषं जग्धुमारेभे प्रभावज्ञान्वमोदत ॥४१॥

ततः करतलीकृत्य व्यापि हालाहलं विषम् । अभक्षयन्महादेवः कृपया भूतभावनः ॥४२॥

तस्यापि दर्शयामास स्ववीर्यं जलकल्मषः । यच्चकार गले नीलं तच्च साधोर्विभूषणम् ॥४३॥

तप्यन्ते लोकतापेन साधवः प्रायशो जनाः । परमाराधनं तद्धि पुरुषस्याखिलात्मनः ॥४४॥

निशम्य कर्म तच्छम्भोर्देवदेवस्य मीढुषः । प्रजा दाक्षायणी ब्रह्मा वैकुण्ठश्च शशंसिरे ॥४५॥

प्रस्कन्नं पिबतः पाणेर्यत् किंचिज्जगृहुःस्म तत् । वृश्चिकाहिविषौषध्यो दन्दशूकाश्च येऽपरे४६

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायामष्टमस्कन्धेऽमृतमथने सप्तमोऽध्यायः ॥७॥

भवन्ति संस्तवने तु कुतः शक्ताः स्युः तत्र वयं कथं प्रभवेम यतः तत्सर्गसर्गविषयाः अत्यन्तमर्वाचीनाः। तथापि । यदेतत् स्तवनं स्वशक्त्यनुरूमेव न यथोचितम् । तस्मात् ब्रह्मतः सर्गो येषां ते तत्सर्गा मरीच्यादयः तेषाम् । सदसतोः कार्यकारणयोः परतः प्रधानात् परस्य ॥ ३४॥ एतत् दृश्यमानं ते स्थूलं रूपं परं केवलम् अतः परं सूक्ष्मं न पश्यामः । अव्यक्तकर्मणः अव्यक्तरूपस्य ते व्यक्तिः प्राकट्यं मृडनाय सुखसम्पादनाय । मृड सुखने धातुः ॥ ३५॥ तासां प्रजानाम् ॥ ३६॥ बत कष्टम् । कूटसंज्ञकात् विषात् उपस्थितं प्राप्तं वैशसं दुखम् ॥ ३७ ॥ प्राणपरीप्सूनां प्राणरक्षणेच्छूनाम् । प्रभोः समर्थस्य अर्थः कर्तव्यम् ॥ ३८ ॥ मोहितेषु अत एव बद्धवैरेषु परस्परं जिघांसत्सु भूतेषु साधवः दयालवः तान् पान्तीत्यन्वयः ॥ ३९ ॥ पुंस इति सार्द्धम् । कृपयतः कृपां कुर्वतः । प्रीये प्रीतो भवामि । गरो विषम् । मे मत्तः सकाशात् ॥ ४० ॥ आमन्त्र्य अनुज्ञां गृहीत्वा । जग्धुमत्तुम् ॥ ४१ ॥ करेति । योगबलेन करपरिमितं कृत्वा । व्यापि सर्वतः प्रसृतम् । हलहलेन पुनः पुनश्चालनेन अर्थान्मन्थनेन जातं हालाहलम् । अणि पूर्वपद वृद्धिः उत्तरवर्ण दीर्घस्तु पृषोदरादित्वात् । 'हल' विलेखने धातुः ॥ ४२ ॥ कल्मषो दोषः बिषम् । वीर्यं प्रभावम् । गले श्वेते नीलं तच्च नैल्यं साधोः शिवस्य विशिष्टभूषणं जातम् उपकारव्यञ्जकत्वात् । साध्नोति धर्मं परकार्यं वा साधुरिति व्युत्पत्तेश्च ॥४३॥ तत् दुःखसहर्शनम् पुरुषस्य विष्णोः ॥ ४४ ॥ मीढुषः सेचनकर्तुः इच्छापूरकस्य । क्वसन्तो निपातः । 'मिह' सेचने धातुः । शशंसिरे प्रशशंसुः । दाक्षायणी सती ॥ ४५ ॥ पाणेः सकाशात् यत् किञ्चित् प्रस्कन्नं गलितं तत् विष ये च अपरे सृगालादयः ते च जगृहुरित्वन्वयः । विणौषध्यः लाङ्गलीप्रमृतयः । दन्दशूकाः सर्पाः ॥ ४६ ॥

इति श्रीमद्भागवते महापुराणे ऽष्टमस्कन्धे गूढार्थदीपिन्यां सप्तमोऽध्यायः ॥ ७ ॥

अथाष्टमोऽध्यायः

श्रीशुक उवाच

पीते गरे वृषाङ्केण प्रीतास्तेऽमरदानवाः । ममन्थुस्तरसा सिन्धुं हविर्धानी ततोऽभवत् ॥ १ ॥

तामग्निहोत्रीमृषयो जगृहुर्ब्रह्मवादिनः । यज्ञस्य देवयानस्य मेध्याय हविषे नृप ॥ २ ॥

तत उच्चैःश्रवा नाम हयोऽभूच्चन्द्रपाण्डुरः । तस्मिन् बलिः स्पृहां चक्रे नेन्द्र ईश्वरशिक्षया ।३।

तत ऐरावतो नाम वारणेन्द्रो विनिर्गतः । दन्तैश्चतुर्भिः श्वेताद्रेर्हरन् भगवतो महिम् ॥ ४ ॥

कौस्तुभाख्यमभूद् रत्नं पद्मरागो महोदधेः । तस्मिन् हरिः स्पृहां चक्रे वक्षोऽलंकरणे मणौ ।५।

ततोऽभवत् पारिजातः सुरलोकविभूषणम् । पूरयत्यर्थिनो योऽर्थैःशश्वद् भुवि यथा भवान् । ६॥

ततश्चाप्सरसो जाता निष्ककण्ठ्यः सुवाससः । रमण्यः स्वर्गिणां वल्गुगतिलीलावलोकनैः॥७॥

ततश्चाविरभूत् साक्षाच्छ्री रमा भगवत्परा । रञ्जयन्ती दिशः कान्त्या विद्युत् सौदामनी यथा

तस्यां चक्रुः स्पृहां सर्वे ससुरासुरमानवाः । रूपौदार्यवयोवर्णमहिमाक्षिप्तचेतसः ॥ ९ ॥

तस्या आसनमानिन्ये महेन्द्रो महदद्भुतम् । मूर्तिमत्यः सरिच्छ्रेष्ठा हेमकुम्भैर्जलं शुचि ॥१०॥

आभिषेचनिका भूमिराहरत् सकलौषधीः । गावः पञ्च पवित्राणि वसन्तो मधुमाधवौ ॥११॥

ऋषयः कल्पयाञ्चकुरभिषेकं यथाविधि । जगुर्भद्राणि गन्धर्वा नटयश्च ननृतुर्जगुः ॥१२॥

मेघा मृदङ्गपणवमुरजानकगोमुखान् । व्यनादयञ्छङ्खवेणुवीणास्तुमुलनिःस्वनान् ॥१३॥

अष्टमे मन्थनाल्लक्ष्म्या जातया श्रीहरौ वृते ।
धन्वन्तरेः सुधांकुम्मे हृतेऽभून्मोहिनी हरिः ॥

वृषाङ्केण शिवेन गरे विषे । तरसा वेगेन । हविः धृतं धीयते निधीयते, अस्यामिति हविर्धानी कामधेनुः । ततो मन्थनात् ॥१॥ अग्नौ हूयते स्रुवादिना दीयते इत्यग्निहोत्रं धृतं तदस्यामस्तीति आग्निहोत्रीति व्युत्पत्तेः । ज्योत्स्नादित्वादण् । वादिनः वैदिकाः । देवयानस्य ब्रह्मलोकप्रापकमार्गस्य यज्ञस्य सम्बन्धिने मेध्यायहविषे शुद्धधृताद्यर्थम् ॥२॥ पाण्डुरः धवलः । शिक्षया 'यूयं तदनुमो दध्वमित्युक्तया ॥३॥ श्वेताद्रेः कैलासस्य महिं महिमानं श्वेततां हरन्[1] तिरस्कुर्वन् अतिशयोक्तिः ॥४॥ महोदधेः सकाशात् । पद्मरागमणिवत्कान्तियुक्तम् । पुंस्त्वमजहल्लिङ्गत्वात् ॥ ५ ॥ पारिजातः कल्पवृक्षः । अर्थिनः याचकान् ॥ ६ ॥ निष्कं दीनारहारः कण्ठे यासां ताः । वल्गुभिः गत्यादिभिः स्वर्गिणां देवानां रमण्यः संभोगसुखदात्र्यः । वल्गुः सुन्दरः ॥ ७ ॥ भगवन्तं रमयतीति रमा अतः श्रीपदेन न पुनरुक्तिः । रञ्जयन्ती प्रकाशयन्ती । सुदामा नाम कश्चित् स्फटिकपर्वतः तस्यैकदेशे भवा सौदामनी ॥८॥ तस्यां सम्द्रूपायां न तु भगवत्प्रेयस्याम् अनौचित्यात् रूपादिभिःआक्षिप्तमाकृष्टं चेतो यासां ताः । महिमा वैभवम् ॥९॥ आनिन्ये समर्पितवान् । जलमभिषेकयोग्यं च आनिन्युरिति योज्यम्॥१०॥अभिवेचनि का अभिषेकोचिता ओषधीः आहरत् समर्पितवती । पवित्राणि गव्यानि[2] मधुमाधवौ चैत्रवैशाखोद्भवं फलपुष्पादिकम् ॥११।१२॥ मेघाः तदधिष्ठातृदेवताः

---

१. पयः काञ्चनवर्णाया नीलायाश्च धृतं तथा २. दधि च कृष्णवर्णायाः श्वेताया गोमयं तथा गोमूत्रं ताम्रवर्णाया इत्येतत्पञ्चगव्यकम् । इति स्मृतेः ।

ततोऽभिषिषिचुर्देवीं श्रियं पद्मकरां सतीम् । दिगिभाः पूर्णकलशैः सूक्तवाक्यैर्द्विजेरितैः ॥१४॥
समुद्रः पीतकौशेयवाससी समुपाहरत् । वरुणः स्रजं वैजयन्तीं मधुना मत्तषट्पदाम् ॥१५॥
भूषणानि विचित्राणि विश्वकर्मा प्रजापतिः । हारं सरस्वती पद्ममजो नागाश्च कुण्डले ॥१६॥

ततः कृतस्वस्त्ययनोत्पलस्रजं नदद्द्विरेफां परिगृह्य पाणिना ।
चचाल वक्त्रं सुकपोलकुण्डलं सव्रीडहासं दधती सुशोभनम् ॥१७॥
स्तनद्वयं चातिकृशोदरी समं निरन्तरं चन्दनकुङ्कुमोक्षितम् ।
ततस्ततो नूपुरवल्गुशिञ्जितैर्विसर्पती हेमलतेव सा बभौ ॥१८॥
विलोकयन्ती निरवद्यमात्मनः पदं ध्रुवं चाव्यभिचारिसद्गुणम् ।
गन्धर्वयक्षासुरसिद्धचारणत्रैविष्टपेयादिषु नान्वविन्दत ॥१९॥
नूनं तपो यस्य न मन्युनिर्जयो ज्ञानं क्वचित् तच्च न सङ्गवर्जितम् ।
कश्चिन्महांस्तस्य न कामनिर्जयः स ईश्वरः किं परतो व्यपाश्रयः ॥२०॥
धर्मः क्वचित् तत्र न भूतसौहृदं त्यागःक्वचित् तत्र न मुक्तिकारणम् ।
वीर्यं न पुंसोऽस्त्यजवेगनिष्कृतं न हि द्वितीयो गुणसङ्गवर्जितः ॥२१॥
क्वचिच्चिरायुर्न हि शीलमङ्गलं क्वचित् तदप्यस्ति न वेद्यमायुषः ।
यत्रोभयं कुत्र च सोऽप्यमङ्गलः सुमङ्गलः कश्च न काङ्क्षते हि माम् ॥२२॥

मृदङ्गादीन् व्यनादयन् वादितवन्तः । तुमुलो महान् निःस्वनो येषां तान् ॥१३॥ दिग्गजाः सूक्तवाक्यैः सह जलपूर्णकलशैः देवीमभिषिषिचुः ॥ १४ ॥ समुपाहरत् समर्पितवान् । वाससी वस्त्रयुगलम् मधुना पुष्परसेन हेतुना षट्पदा भ्रमरा यस्याम् वैजयन्ती[1] पञ्चवर्णपुष्पमाला ॥१५॥ कुण्डले च समुपाहरदिति योज्यम् ॥ १६ ॥ ततः लक्ष्मीः पाणिना उत्पलस्रजं परिगृह्य हरिं वरयितुं चचालेत्यन्वयः । कीदृशीम् । नदन्तो द्विरेफा भ्रमरा यस्याम् । कथंभूता । कृतं स्वस्त्ययनं स्वस्तिवाचनं यस्याः । पुनश्च सव्रीडहासं मुखं दधती ॥ १७ ॥ समं समानं निरन्तरं सघनं स्तनद्वयं च दधती सा हेमलतेव जंगमा स्वर्णवल्लीव बभौ इत्यन्वयः । वल्गुशिञ्जितैः मधुरध्वनिभिः विसर्पती गच्छन्ती । कुङ्कुमोक्षितं केसरलिप्तम् ॥१८॥ सा श्रीः आत्मनः निरवद्यं निर्दोषं पदं स्थानं पतिलक्षणं विलोकयन्ती विचिन्वती सती गन्धर्वादिषु नान्वविन्दत न प्रापेत्यन्वयः । कथंभूतम् । अव्यभिचारिणो नित्याः सद्गुणा यत्र तम् । त्रैविष्टपेया देवाः । ढक् आर्षः ॥१९॥ यस्य दुर्वाससःप्रभृतेः । ज्ञानं क्वचित् गुरु शुक्रादौ । सङ्गवर्जितं वैराग्यविशिष्टं नास्ति शिष्यापेक्षत्वात् । महान् ब्रह्मसोमादिः । यः परतो व्यपाश्रयः परापेक्षः स इन्द्रः ईश्वरः वरणयोग्यः किं नेत्यर्थः । यद्वा । परतः शत्रुतः हेतोः च्युतस्थानो भवति ॥ २० ॥ धर्मः क्वचित् परशुरामादिषु । त्यागः शिबिप्रभृतिषु । पुंसः कार्तवीर्यादेः वीर्यमस्ति किन्तु कालवेगेन निष्कृतं परिहृतं वर्जितं नास्ति । सङ्गवर्जितः भोगासक्तिरहितः सनकादिः न द्वितीयः वरणयोग्यः ॥२१॥ क्वचित् मार्कण्डेयादौ चिरायुष्यपि । शीलं स्त्रीयोग्यं मङ्गलं भोगादिन । क्वचित् हिरण्यकशिपुप्रभृतौ तदपि शीलमङ्गलमस्ति । किन्तु आयुषः न वेद्यं कदा म्रियेत भगवेद्द्वेषित्वात् । यत्र कुत्र च श्रीशिवे उभयं शीलमङ्गलमायुश्चाप्यस्ति किन्तु अमङ्गः श्मशान वासीत्युपहासः । सुमङ्गलः सर्वगुणसम्पन्नोऽपि मां न कांक्षते अतोऽयमेव वरणीयः कश्चेति लज्जया ॥२२॥

---

१. श्वेतैः पीतैस्तथा नीलैर्लोहितैर्हरितैस्तथा । पुष्पैर्विरचिता माला वैजयन्तीति कथ्यते ॥

एवं विमृश्याव्यभिचारिसद्गुणैर्वरं निजैकाश्रयतोऽगुणाश्रयम् ।
वव्रे वरं सर्वगुणैरपेक्षितं रमा मुकुन्दं निरपेक्षमीप्सितम् ॥२३॥
तस्यांसदेश उशतीं नवकञ्जमालां माद्यन्मधुव्रतवरूथगिरोपघुष्टाम् ।
तस्थौ निधाय निकटे तदुरः स्वधाम सव्रीडहासविकसन्नयनेन याता ॥२४॥
तस्याः श्रियस्त्रिजगतो जनको जनन्या वक्षो निवासमकरोत् परमं विभूतेः ।
श्रीः स्वाः प्रजाः सकरुणेन निरीक्षणेन यत्र स्थितैधयत साधिपतींस्त्रिलोकान् ।२५

शङ्खतूर्यमृदङ्गानां वादित्राणां पृथुः स्वनः । देवानुगानां सस्त्रीणां नृत्यतां गायतामभूत् ॥२६॥
ब्रह्मरुद्राङ्गिरोमुख्याः सर्वे विश्वसृजो विभुम् । ईडिरेऽवितथैर्मन्त्रैस्तल्लिङ्गैः पुष्पवर्षिणः ।२७
श्रिया विलोकिता देवाः सप्रजापतयः प्रजाः । शीलादिगुणसम्पन्ना लेभिरे निर्वृतिं पराम् ।२८।
निःसत्त्वा लोलुपा राजन् निरुद्योगा गतत्रपाः । यदा चोपेक्षिता लक्ष्म्या बभूवुर्दैत्यदानवाः।२९।
अथासीद् वारुणी देवी कन्या कमललोचना । असुरा जगृहुस्तां वै हरेरनुमतेन ते ॥३०॥
अथोदधेर्मथ्यमानात् काश्यपैरमृतार्थिभिः । उदतिष्ठन्महाराज पुरुषः परमाद्भुतः ॥३१॥
दीर्घपीवरदोर्दण्डः कम्बुग्रीवोऽरुणेक्षणः । श्यामलस्तरुणः स्रग्वी सर्वाभरणभूषितः ॥३२॥
पीतवासा महोरस्कः सुमृष्टमणिकुण्डलः । स्निग्धकुञ्चितकेशान्तः सुभगः सिंहविक्रमः ॥३३॥
अमृतापूर्णकलशं बिभ्रद् वलयभूषितः ॥३३॥ स वै भगवतः साक्षाद्विष्णोरंशांशसम्भवः ॥
धन्वन्तरिरिति ख्यात आयुर्वेददृगिज्यभाक् ॥३४॥ तमालोक्यासुराः सर्वे कलशं चामृताभृतम्

एवं विमृश्य रमा निजैकाश्रयतः[1] मुख्याश्रयत्वात् सेव्यत्वात् हेतोः निरपेक्षमपि मुकुन्दमेव वरं वव्रे इत्यन्वयः यतः स्वाभीप्सितम् । कथंभूतम् । अव्यभिचारिभिः स्वाभाविकैः नित्यैः सद्गुणैः धर्मादिभिः सर्वैः अणिमादिभिश्च अपेक्षितं कृतापेक्षम् । पुनश्च लीलायां गुणाश्रयम् । अन्यदा अगुणेति ॥२३॥ तस्य भगवतः असंदेशे स्कन्धे नवपङ्कमालां निधाय तस्य निकटे तूष्णीं तस्थौ इत्यन्वयः । कथंभूतां मालाम् । माद्यतो भ्रमरसमूहस्य ध्वनिना नादिताम् । कथंभूता श्रीः । विकसन्नयनेन प्रसन्नवदनेन स्वधाम तदुरः प्रति याता प्रतीक्षमाणा सती ॥ २४ ॥ भगवान् त्रिजगतो जनन्या विभूतिरूपायाः तस्याः श्रियः परमं सर्वश्रेष्ठं स्ववक्षः निवासस्थानम् अकरोत् । यत्र स्थिता सा श्रीः निरीक्षणेन स्वाः प्रजाः त्रिलोकांश्च दुर्वाससः शापात् निःश्रीकान् पुनः ऐधयत् अवर्द्धयत् सश्रीकान् चकारेत्यन्वयः ॥ २५ ॥ वादित्राणां वाद्यानाम् पृथुः महान् । 'पृथु स्यान्महति त्रिषु' इति मेदिनी ॥ २६ ॥ विश्वसृजः प्रजापतयः तल्लिङ्गैः विष्णुप्रतिपादकैः अवितथैः सत्यैः मन्त्रैः श्रीसूक्तैः ईडिरे तुष्टुवुः ॥ २७ ॥ निर्वृतिं परमानन्दम् ॥ २८ ॥ निःसत्त्वाः निर्बलाः । यदा उपेक्षिता तदेति योज्यम् ॥२९।३०॥ वारुणमन्नं यवादि तन्मयी तद्विकारप्राया वारुणी सुराधिष्ठात्री सुरा तु मलमन्नानाम्' इत्युक्तेः । अथेति सार्द्धम् काश्यपैः कश्यपपुत्रैः देवासुरैः । दीर्घौ पीवरौ दोर्दण्डौ भुजो यस्य । कम्बुः शंखः तद्वत् त्रिरेखाङ्किता ग्रीवा यस्य । सुमृष्टे अत्युज्ज्वले मणिमये कुण्डले यस्य । कुञ्चितः वक्रः सुभगः सुन्दरः ॥ ३१।३२।३३ ॥ दृक् प्रवर्तकः ।

1. अत्र लेखकभ्रमात् ओकारमात्रा च्युता ।

लिप्सन्तः सर्ववस्तूनि कलशं तरसाऽहरन् ॥३५॥ नीयमानेऽसुरैस्तस्मिन् कलशेऽमृतभाजने।
विषण्णमनसो देवा हरिं शरणमाययुः ॥३६॥ इति तद्दैन्यमालोक्य भगवान् भृत्यकामकृत्।
मा खिद्यत मिथोऽर्थं वः साधयिष्ये स्वमायया ॥३७॥
मिथः कलिरभूत्तेषां तदर्थे तर्षचेतसाम्। अहं पूर्वमहं पूर्वं न त्वं न त्वमिति प्रभो ॥३८॥
देवाः स्वं भागमर्हन्ति ये तुल्यायासहेतवः। सत्रयाग इवैतस्मिन्नेष धर्मः सनातनः ॥३९॥
इति स्वान् प्रत्यषेधन् वै दैतेया जातमत्सराः। दुर्बलाः प्रबलान् राजन् गृहीतकलशान् मुहुः ४०
एतस्मिन्नन्तरे विष्णुः सर्वोपायविदीश्वरः। योषिद्रूपमनिर्देश्यं दधार परमाद्भुतम् ॥४१॥
प्रेक्षणीयोत्पलश्यामं सर्वावयवसुन्दरम्। समानकर्णाभरणं सुकपोलोन्नसाननम् ॥४२॥
नवयौवननिर्वृत्तस्तनभारकृशोदरम्। मुखामोदानुरक्तालिझङ्कारोद्विग्नलोचनम् ॥४३॥
बिभ्रत् स्वकेशभारेण मालामुत्फुल्लमल्लिकाम्। सुग्रीवकण्ठाभरणं सुभुजाङ्गदभूषितम् ॥४४॥
विरजाम्बरसंवीतनितम्बद्वीपशोभया। काञ्च्या प्रविलसद्वल्गुचलच्चरणनूपुरम् ॥४५॥
सव्रीडस्मितविक्षिप्तभ्रूविलासावलोकनैः। दैत्ययूथपचेतःसु काममुद्दीपयन् मुहुः ॥४६॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायामष्टमस्कन्धे भगवन्मायोपलम्भनं नामाष्टमोऽध्यायः ॥ ८ ॥

इज्यभाक् यज्ञभागभोक्ता। विष्णोरंशः समुद्रः तत्संभवत्वेन तदंशांशो धन्वन्तरिः ॥३४॥ आभृतं परिपूर्णम्। तरसा बलेन ॥ ३५ ॥ विषण्णमनसः खिन्नचित्ताः ॥ ३६ ॥ मिथः परस्परं कलहोत्पादनेन वः युष्माकम् अर्थं कार्यम् ॥३७॥ तदर्थे अमृतार्थे। तर्षं तृष्णायुक्तम् चेतो येषाम्। कलिः कलहः। अहं पूर्वं पास्यामि त्वं न पास्यसीति कलहस्वरूपम् ॥ ३८ ॥ तुल्यायासेन समानपरिश्रमेण हेतवः अमृतसाधकाः। यथा सत्रयागे ये यजमानास्ते एव ऋत्विजः तेषां। समानं फलं भवति तद्वत् एतस्मिन् अमृते ॥ ३९।४० ॥ समानकर्णयोः आभरणे यस्मिन्। सुकपोलम् तदुन्नतनासिकमाननं च यस्मिन् ॥४ ॥ नवयौवनेन निर्वृत्तौ वर्तुलौ यौ स्तनौ तयोर्भारेण कृशमुदरं यस्मिन् तत्। मुखस्य आमोदेन सुगन्धेन अनुरक्तानां भृङ्गाणां झङ्कारेण उद्विग्ने चञ्चले लोचने यस्मिन् ॥ ४३ ॥ केशभारेण केशपाशेन। शोभनग्रीवायां कण्ठाभरणं यस्मिन्। सुभुजयोः अङ्गदाभ्यां भूषितम् ॥४४॥ विरजाम्बरेण निर्मलशाटिकया संवीतः आच्छादितः नितम्ब एव द्वीपः तत्र शोभा यस्यास्तया काञ्च्या प्रविलसत् वल्गु मन्दं मन्दं चलतोः चरणयोः नूपुरे यस्मिन् तत् ॥४५॥ सव्रीडस्मितेन विक्षिप्तैः चालितैः भ्रूविलासयुक्तैः अवलोकनैः कटाक्षपातैः कामम् उद्दीपयत्। रूपविशेषणम् ॥ ४६ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे गूढार्थदीपिन्यामष्टमोऽध्यायः ॥ ८ ॥

अथ नवमोऽध्यायः

श्रीशुक उवाच

तेऽन्योन्यतोऽसुराः पात्रं हरन्तस्त्यक्तसौहृदाः । क्षिपन्तो दस्युधर्माण आयान्तीं ददृशुः स्त्रियम् १
अहो रूपमहो धाम अहो अस्या नवं वयः । इति ते तामभिद्रुत्य पप्रच्छुर्जातहृच्छयाः ॥ २ ॥
का त्वं कञ्जपलाशाक्षि कुतो वा किं चिकीर्षसि । कस्यासि वद वामोरु मथ्नन्तीव मनांसि नः ।३।
न वयं त्वामरैर्दैत्यैः सिद्धगन्धर्वचारणैः । नास्पृष्टपूर्वां जानीमो लोकेशैश्च कुतो नृभिः ॥ ४ ॥
नूनं त्वं विधिना सुभ्रूः प्रेषितासि शरीरिणाम् । सर्वेन्द्रियमनःप्रीतिं विधातुं सघृणेन किम् ।५।
सा त्वं नः स्पर्धमानानामेकवस्तुनि मानिनि । ज्ञातीनां बद्धवैराणां शं विधत्स्व सुमध्यमे ।६।
वयं कश्यपदायादा भ्रातरः कृतपौरुषाः । विभजस्व यथान्यायं नैव भेदो यथा भवेत् ॥ ७ ॥
इत्युपामन्त्रितो दैत्यैर्मायायोषिद्वपुर्हरिः । प्रहस्य रुचिरापाङ्गैर्निरीक्षन्निदमब्रवीत् ॥ ८ ॥

श्रीभगवानुवाच

कथं कश्यपदायादाः पुंश्चल्यां मयि सङ्गताः । विश्वासं पण्डितो जातु कामिनीषु न याति हि ९
सालावृकाणां स्त्रीणां च स्वैरिणीनां सुरद्विषः । सख्यान्याहुरनित्यानि नूत्नं-नूत्नं विचिन्वताम् १०

श्रीशुक उवाच

इति ते क्ष्वेलितैस्तस्या आश्वस्तमनसोऽसुराः । जहसुर्भावगम्भीरं ददुश्चामृतभाजनम् ॥११॥
ततो गृहीत्वाऽमृतभाजनं हरिर्बभाष ईषत्स्मितशोभया गिरा ।
यद्यभ्युपेत क्व च साध्वसाधु वा कृतं मया वो विभजे सुधामिमाम् ॥१२॥

नवमे वञ्चयित्वाऽरीन् पाययित्वा सुरान् सुधाम् ।
छित्वा राहुशिरोऽस्त्रेण स्वं रूपं जगृहे हरिः ॥

अन्योन्यं पात्रं हरन्तः आक्षिपन्तश्च तेऽसुराः स्त्रियं ददृशुरित्यन्वयः । दस्युधर्मः अन्यायरूपः ॥१॥ धाम कान्तिः । वयः यौवनम् । हृच्छयः कामः ॥ २ ॥ कञ्जं कमलम् । नोऽस्माकम् । मथ्नन्ती क्षोभयन्तीव वर्तसे ॥ ३ ॥ त्वा त्वाम् अस्पृष्टरूपां न जानीम इति न अपि तु जानीम एव ॥ ४ ॥ सघृणेन दयालुना विधिना किं त्वं नन प्रेषितासीत्यन्वयः ॥ ५ ॥ एकवस्तुनि अमृते विवदमानानां नः शं शान्तिं कुरु ॥ ६ ॥ दायं भागम् आददते दायादाः पुत्राः । भेदो विरोधः यथा न भवेत् तथेत्यन्वयः ॥ ७ ॥ उपामन्त्रितः प्रार्थितः ॥ ८ ॥ पुंमांसो दैत्याश्चलन्ति कम्पन्ति यस्याः सा पुंश्चली विष्णुमूर्तिरिति वास्तवोऽर्थः । संगता विश्वस्ताः । जातु कदाचिदपि । कामिनी स्वेच्छाचारिणी ॥ ९ ॥ हे सुरद्विषः । 'सालावृकाः कपिक्रोष्टुश्वानः' इत्यमरः ॥ १० ॥ छद्मोक्तौ क्ष्वेलितं प्रोक्तम् । इति निरुक्तिः । भावेन कामाक्रान्तेन ॥ ११ ॥ स्मितेन ईषद्धास्येन शोभा यस्यास्तया गिरा । यद्वा ईषत् वभाषे इत्यत्रान्वेति । किं तत् । क्व च क्वापि विषये मया कृतं साधु उचितम् अनुचितं वा यदि अभ्युपेत स्वीकुरुत तदा विभजे इत्यन्वयः । अभ्युपिपूर्वकेण् धातोः लोट् मध्यमपुरुषबहुवचनम् । सानुस्वार

इत्यभिव्याहृतं तस्या आकर्ण्यासुरपुङ्गवाः। अप्रमाणविदस्तस्यास्तत् तथेत्यन्वमंसत ॥१३॥
अथोपोष्य कृतस्नाना हुत्वा च हविषाऽनलम्। दत्त्वा गोविप्रभूतेभ्यः कृतस्वस्त्ययना द्विजैः॥१४॥
यथोपजोषं वासांसि परिधायाऽहतानि ते। कुशेषु प्राविशन् सर्वे प्रागग्रेष्वभिभूषिताः॥१५॥
प्राङ्मुखेषूपविष्टेषु सुरेषु दितिजेषु च। धूपामोदितशालायां जुष्टायां माल्यदीपकैः॥१६॥

तस्यां नरेन्द्र करभोरुरुशद्दुकूलश्रोणीतटालसगतिर्मदविह्वलाक्षी।
सा कूजती कनकनूपुरशिञ्जितेन कुम्भस्तनी कलशपाणिरथाविवेश ॥ १७ ॥
तां श्रीसखीं कनककुण्डलचारुकर्णनासाकपोलवदनां परदेवताख्याम्।
संवीक्ष्य सम्मुमुहुरुत्स्मितवीक्षणेन देवासुरा विगलितस्तनपट्टिकान्ताम् ॥ १८ ॥

असुराणां सुधादानं सर्पाणामिव दुर्नयम्। मत्वा जातिनृशंसानां न तां व्यभजदच्युतः॥१९॥
कल्पयित्वा पृथक् पङ्क्तीरुभयेषां जगत्पतिः। तांश्चोपवेशयामास स्वेषु स्वेषु च पङ्क्तिषु॥२०॥
दैत्यान् गृहीतकलशो वञ्चयन्नुपसंचरैः। दूरस्थान् पाययामास जरामृत्युहरां सुधाम्॥२१॥
ते पालयन्तः समयमसुराः स्वकृतं नृप। तूष्णीमासन् कृतस्नेहाः स्त्रीविवादजुगुप्सया॥२२॥
तस्यां कृतातिप्रणयाः प्रणयापायकातराः। बहुमानेन चाबद्धा नोचुः किंचन विप्रियम्॥२३॥
देवलिङ्गप्रतिच्छन्नः स्वर्भानुर्देवसंसदि। प्रविष्टः सोममपिबच्चन्द्रार्काभ्यां च सूचितः॥२४॥
चक्रेण क्षुरधारेण जहार पिबतः शिरः। हरिस्तस्य कबन्धस्तु सुधयाऽप्लावितोऽपतत्॥२५॥

पाठो न श्रीधरसम्मतः ॥ १२ ॥ प्रमाणमियत्तां चिकीर्षितमित्यर्थः। यत्तया उक्तं तत्तथैवं अन्वमंसत स्वीचक्रुः ॥ १३ ॥ अथेति युग्मम्। उपोष्य उपवासं कृत्वा। अहतानि नूतनानि। प्राक् पूर्वम् अग्रभागो येषां तेषु कुशासनेषु प्राविशन् उपविविशुः। हविषा घृतादिना। भूतेभ्यः दीनेभ्यः दानानि दत्त्वा। स्वस्त्ययनं स्वस्तिवाचनम्। यथोपजोषं यथाप्रीति ॥ १४।१५ ॥ प्रागिति युग्मम्। अथ हे नरेन्द्र तस्यां शालायां सा कलशपाणिः आविवेश। कथंभूता। [1]करभसदृशौ सुवृत्तौ वर्तुलौ ऊरू यस्याः सा। पुनश्च उशत् कमनीयं दुकूलं यस्मिंस्तेन श्रोणीतटेन अलसा मन्दा गतिं यस्याः। शिञ्जितेन शब्देन कूजती ध्वनन्ती। आमोदितायां सुरभीकृतायाम् ॥१६।१७॥ देवासुराः तां श्रीसखीं मोहिनीं संवीक्ष्य संमुमुहुरित्यन्वयः। कथंभूताम्। कनकमये कुण्डले यस्याः चारवः कर्णादयो यस्याः सा च सा च ताम्। विगलितः विस्रस्तः स्तनपट्टिकायाः अन्तो यस्याः। पट्टिका कञ्चुकी (चोली) वीक्षणेन कटाक्षपातेन ॥ १८ ॥ सर्पाणां क्षीरपानमिव दुर्नयम् अनुचितम् ॥ १९ ॥ उभयेषां देवासुराणां पृथक् पृथक्। तासु पङ्क्तिषु स्वेषु स्वेषु सजातीयेषु ॥२०॥ उपसञ्चरैः समीपगमनादिनर्मव्यवहारैः। वञ्चयन् तलस्थ सारभागं सर्वतः श्रेष्ठं भवद्भ्यो दास्यामीति प्रतारयन् ॥ २१ ॥ स्वकृतं समयं प्रतिज्ञाम् विभजस्व यथान्यायम् इति। तीर्थस्तु कृतस्नेहा छिन्नस्नेहाः 'कृन् छेदने' धातुरित्याह। जुगुप्सा निन्दा ॥ २२ ॥ प्रणयः स्नेहः। कातरा भीताः बहुमानेन आदरवचनेन आबद्धाः वशीभूताः ॥ २३ ॥ लिङ्गेन वेषेण। स्वर्भानुः राहुः। सोमम् अमृतम् ॥ २४ ॥ क्षुरवत् तीक्ष्णधारेण। हरिः जहारेत्यत्रान्वेति। कबन्धः

---

१. मणिबन्धादाकनिष्ठं करस्य करभो बहिः इत्यमरः। २. 'वश' कान्तौ धातुः।

शिरस्त्वमरतां नीतमजो ग्रहमचीक्लृपत् । यस्तु पर्वणि चन्द्रार्कावभिधावति वैरधीः ॥२६॥
पीतप्रायेऽमृते देवैर्भगवाँल्लोकभावनः । पश्यतामसुरेन्द्राणां स्वं रूपं जगृहे हरिः ॥२७॥
एवं सुरासुरगणाः समदेशकालहेत्वर्थकर्ममतयोऽपि फले विकल्पाः ।
तत्रामृतं सुरगणाः फलमञ्जसाऽऽपुर्यत्पादपङ्कजरजःश्रयणान्न दैत्याः ॥ २८ ॥
यद् युज्यतेऽसुवसुकर्ममनोवचोभिर्देहात्मजादिषु नृभिस्तदसत् पृथक्त्वात् ।
तैरेव सद् भवति यत् क्रियतेऽपृथक्त्वात् सर्वस्य तद् भवति मूलनिषेचनं यत् ॥२९॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायामष्टमस्कन्धेऽमृतमथने नवमोऽध्यायः ॥९॥

अथ दशमोऽध्यायः

श्रीशुक उवाच

इति दानवदैतेया नाविन्दन्नमृतं नृप । युक्ताः कर्मणि यत्ताश्च वासुदेवपराङ्मुखाः ॥ १ ॥
साधयित्वाऽमृतं राजन् पाययित्वा स्वकान् सुरान् । पश्यतां सर्वभूतानां ययौ गरुडवाहनः ॥२॥
सपत्नानां परामृद्धिं दृष्ट्वा ते दितिनन्दनाः । अमृष्यमाणा उत्पेतुर्देवान् प्रत्युद्यतायुधाः ॥३॥
ततः सुरगणाः सर्वे सुधया पीतयैधिताः । प्रतिसंयुयुधुः शस्त्रैर्नारायणपदाश्रयाः ॥ ४ ॥
तत्र दैवासुरो नाम रणः परमदारुणः । रोधस्युदन्वतो राजंस्तुमुलो रोमहर्षणः ॥ ५ ॥
तत्रान्योन्यं सपत्नास्ते संरब्धमनसो रणे । समासाद्यासिभिर्बाणैर्निजघ्नुर्विविधायुधैः ॥ ६ ॥

शिरोहीनः । अप्लावितः अस्पृष्टः अपतत् मृतः अतः केतुस्तु तच्छायारूपो ग्रहः न तु कवन्धरूपः । 'राहुच्छाया स्मृतः केतु' इति भुवनदीपकोक्तेः ॥२५॥ अजो ब्रह्मा । अचीक्लृपत् अकरोत् । अभिधावति ग्रसते ॥ २६ ॥ भावनः पालकः रूपं पौरुषं ॥ २७ ॥ एवं समा देशादयो येषां ते तथाभूता अपि सुरादयः फले विकल्पा वैषम्यवन्तो बभूवुः । तत्र देवासुरमध्ये यत्पादसंश्रयणात् सेवनात् देवा अञ्जसा अनायासेन अमृतं फलं प्रापुः दैत्यास्तु तन्न प्रापुः अतः स एव सेव्यतामित्यन्वयः । देशः क्षीरसमुद्रः कालो मन्थनसमयः । हेतुः मन्थनसाधनमद्रिः अर्थः प्रयोजनममृतरूपम् । कर्म मन्थनम् । मतिः अनुकूला॥ पृथक्त्वात् अपृथक्त्वाच्चेति ल्यब्लोपे पञ्चम्मौ । असवः प्राणाः वसु धनम् । तथा च नृभिः पृथक्त्वमालोच्य भेददृष्ट्या प्राणादिभिः देहादिषु यत् युज्यते देहाद्यर्थं यत् प्रयुज्यते क्रियते तत् असत् विफलं भवति । अपृथक्त्वमालोच्य भगवदुद्देशेन तैरेव तेषु यत् क्रियते तत् सत् सफलं भवति । यत् तरोमूल निषेचनं तत् यथा स्कन्धशाखादेरपि भवति एवं भगवदाराधनं सर्वस्य देवमनुष्यादेरपि भवति ॥ २९ ॥

इति श्रीमद्भागवते महापुराणेऽष्टमस्कन्धे गूढार्थदीपिन्यां नवमोऽध्यायः ॥ ९ ॥

दशमे भीषणं युद्धं देवदानवयोरभूत् ।
तत्र मायार्दितान् देवानेत्य रक्षितवान् हरिः ॥

युक्ताः मन्थनकर्मणि संयुक्ताः । यत्ताः कृतप्रयत्नाश्च ॥ १।२ ॥ सपत्नानां शत्रूणाम् ऋद्धिं समृद्धिम् । अमृष्यमाणाः असहमानाः । उत्पेतुः सम्मुखमाजग्मुः ॥ ३ ॥ एधिता वर्द्धिता ॥ ४ ॥ तुमुलो घनघोरः । उदन्वतः समुद्रस्य रोधसि तटे ॥ ५ ॥ सपत्नाः शत्रवो देवासुराः अन्योन्यं समासाद्य

शङ्खतूर्यमृदङ्गानां भेरीडमरिणां महान्। हस्त्यश्वरथपत्तीनां नदतां निस्वनोऽभवत् ॥ ७ ॥
रथिनो रथिभिस्तत्र पत्तिभिः सह पत्तयः। हया हयैरिभाश्चेभैः समसज्जन्त संयुगे ॥ ८ ॥
उष्ट्रैः केचिदिभैः केचिदपरे युयुधुः खरैः। केचिद् गौरमृगैरृक्षैर्द्वीपिभिर्हरिभिर्भटाः ॥ ९ ॥
गृध्रैः कङ्कैर्बकैरन्ये श्येनभासैस्तिमिङ्गिलैः। शरभैर्महिषैः खड्गैर्गोवृषैर्गवयारुणैः ॥१०॥
शिवाभिराखुभिः केचित् कृकलासैः शशैर्नरैः। बस्तैरेके कृष्णसारैर्हंसैरन्ये च सूकरैः।
अन्ये जलस्थलखगैः सत्त्वैर्विकृतविग्रहैः ।११। सेनयोरुभयो राजन् विविशुस्तेऽग्रतोऽग्रतः ॥१२॥
चित्रध्वजपटै राजन्नातपत्रैः सितामलैः। महाधनैर्वज्रदण्डैर्व्यजनैर्बार्हचामरैः ॥१३॥
वातोद्धूतोत्तरोष्णीषैर्ध्वनद्भिर्वर्मभूषणैः। स्फुरद्भिर्विशदैः शस्त्रैः सुतरां सूर्यरश्मिभिः ॥१४॥
देवदानववीराणां ध्वजिन्यौ पाण्डुनन्दन। रेजतुर्वीरमालाभिर्यादोभिरिव सागरौ ॥१५॥
वैरोचनो बलिः संख्ये सोऽसुराणां चमूपतिः। यानं वैहायसं नाम कामगं मयनिर्मितम् ॥१६॥
सर्वसांग्रामिकोपेतं सर्वाश्चर्यमयं प्रभो। अप्रतर्क्यमनिर्देश्यं दृश्यमानमदर्शनम् ॥१७॥
आस्थितस्तद् विमानाग्र्यं सर्वानीकाधिपैर्वृतः। बालव्यजनछत्राग्र्यै रेजे चन्द्र इवोदये ॥१८॥
तस्यासन् सर्वतो यानैर्यूथानां पतयोऽसुराः नमुचिः शम्बरो बाणो विप्रचित्तिरयोमुखः ॥१९॥
द्विमूर्धा कालनाभोऽथ प्रहेतिर्हेतिरिल्वलः। शकुनिर्भूतसंतापो वज्रदंष्ट्रो विरोचनः ॥२०॥
हयग्रीवः शङ्कुशिराः कपिलो मेघदुन्दुभिः। तारकश्चक्रदृक्शुम्भो निशुम्भो जम्भ उत्कल ॥२१॥
अरिष्टोऽरिष्टनेमिश्च मयश्च त्रिपुराधिपः। अन्ये पौलोमकालेया निवातकवचादयः ॥२२॥

आयुधैः निजघ्नुरित्यन्वयः। संरब्धं क्षुब्धम् ॥ ६ ॥ डमडम इत्येवं रौतीति व्युत्पत्तेः डमरुः। डमरीत्यपि पाठः। पत्तयः पदातयः ॥ ७ ॥ हयेभशब्दौ तदारूढेलाक्षणिकौ 'तात्स्थ्यात्ताच्छब्द्यम्' इति न्यायात्। समसज्जन्त युयुधिरे ॥ ८ ॥ सार्द्धत्रिकम्। केचित् भटाः ते परस्परं वा युयुधुरित्यन्वयः। समस्ततृतीयान्तानामत्रैवान्वयः कार्यः। गौरमृगः श्यामेतरः। हरयो वानरा अश्वा वा। 'हरी कीशतुरङ्गमौ' इति केशवः। मृध्रादयो भासान्ताः पक्षिभेदाः। शरभऽष्टपदो व्याघ्रहन्ता। खड्गैः गण्डकैः। अरुणो मृगभेदः। आखुः मूषकः। वस्तैः छागैः। कृकलासः (गिरगिट) इति सत्त्वैः जीवैः ॥९।१०।११॥ ते उष्ट्रादयः ॥ १२ ॥ चित्रेति त्रिकम्। चित्रध्वजपटादिभिः वीराणां ध्वजिन्यौ सेने रेजतुरिति त्रयाणामेकान्वयः। महाधनैः वहुमूल्यैः वज्रदण्डैः हीरकखचितदण्डैः आतपत्रैः। वार्हचामरैः मयूरपिच्छ-चामरैः। उद्धूतै कम्पितैः उत्तरीयवस्त्रैः उष्णीषैश्च ध्वनद्भिः खणखणायमानैः। अर्चिभिरित्यत्र अयमेव पाठः प्रशस्तः। वर्म कवचम्। सूर्यरश्मिभिस्तु सुतरामत्यन्तं स्फुरद्भिः। यादोभिः जलजन्तुभिः। अयमेव पाठः श्रेयान् इति वंशीधरी ॥१३।१४।१५॥ संख्ये युद्धे तत् विमानश्रेष्ठमास्थितः बलिः उदयाचले स्थितः चन्द्र इव रेजे इति त्रयाणामेकान्वयः। सांग्रामिकैः संग्रामोपयोगिभिः अस्त्र-शस्त्रादिभिः। अप्रतर्क्यं तर्काविषयम् अदर्शनम् अदृश्यमानम्। विरोचनपुत्रः ॥१६।१७।१८॥ तस्य वले सर्वतः नमुचिरित्यादयः अन्ये पौलोमादयश्च आसन्निति चतुर्थेनान्वयः। यूथानाम् असुरयूथानां

अलब्धभागाः सोमस्य केवलं क्लेशभागिनः । सर्व एते रणमुखे बहुशो निर्जितामराः ।
सिंहनादान् विमुञ्चन्तःशङ्खान्दध्मुर्महारवान्॥२३॥दृष्ट्वा सपत्नानुत्सिक्तान्बलभित् कुपितो भृशम्
ऐरावतं दिक्करिणमारूढः शुशुभे स्वराट् । यथा स्रवत्प्रस्रवणमुदयाद्रिमहर्पतिः ॥२४॥
तस्यासन् सर्वतो देवा नानावाहध्वजायुधाः । लोकपालाः सह गणैर्वाय्वग्निवरुणादयः॥२५॥
तेऽन्योन्यमभिसंसृत्य क्षिपन्तो मर्मभिर्मिथः । आह्वयन्तो विशन्तोऽग्रे युयुधुर्द्वन्द्वयोधिनः ॥२६॥
युयोध बलिरिन्द्रेण तारकेण गुहोऽस्यत । वरुणो हेतिनायुध्यन्मित्रो राजन् प्रहेतिना ॥२७॥
यमस्तु कालनाभेन विश्वकर्मा मयेन वै । शम्बरो युयुधे त्वष्ट्रा सवित्रा तु विरोचनः ॥२८॥
अपराजितेन नमुचिरश्विनौ वृषपर्वणा । सूर्यो बलिसुतैर्देवो बाणज्येष्ठैः शतेन च ॥२९॥
राहुणा च तथा सोमः पुलोम्ना युयुधेऽनिलः । निशुम्भशुम्भयोर्देवी भद्रकाली तरस्विनी ॥३०॥
वृषाकपिस्तु जम्भेन महिषेण विभावसुः । इल्वलः सह वातापिर्ब्रह्मपुत्रैररिंदम ॥३१॥
कामदेवेन दुर्मर्ष उत्कलो मातृभिः सह । बृहस्पतिश्चोशनसा नरकेण शनैश्चरः ॥३२॥
मरुतो निवातकवचैः कालेयैर्वसवोऽमराः । विश्वेदेवास्तु पौलोमै रुद्राः क्रोधवशैः सह ॥३३॥

त एवमाजावसुराः सुरेन्द्रा द्वन्द्वेन संहत्य च युध्यमानाः ।
अन्योन्यमासाद्य निजघ्नुरोजसा जिगीषवस्तीक्ष्णशरासितोमरैः ॥ ३४ ॥

भुशुण्डिभिश्चक्रगदर्ष्टिपट्टिशैः शक्त्युल्मुकैः प्रासपरश्वधैरपि ।
निस्त्रिंशभल्लैः परिघैः समुद्गरैः सभिन्दिपालैश्च शिरांसि चिच्छिदुः ॥ ३५ ॥

गजास्तुरङ्गाः सरथाः पदातयः सारोहवाहा विविधा विखण्डिताः ।
निकृत्तबाहूरुशिरोधराङ्घ्रयश्छिन्नध्वजेष्वासतनुत्रभूषणाः ॥ ३६ ॥

सेनापतयः । त्रिपुरेति मयविशेषणम्॥१९।२०।२१।२२॥ अलब्धेति सार्द्धम् । सोमस्य अमृतस्य । बलभित् इन्द्रः ऐरावतमारूढः सन् शुशुभे इत्यन्वयः । यथा उदयाद्रिमारूढः अहर्पतिः सूर्यः शोभते तद्वत् । स्रवन्ति प्रस्रवणानि दानजलानि निर्झराश्च यस्मिन्निति उभयोर्विशेषणम् । उत्सिक्तान् बलगर्वितान्॥२४॥ नानावाहनादीनि येषां ते तथाभूताः देवाः स्वस्वगणैः सह आसन् आगताः ॥ २५ ॥ ते देवासुराः अभिसंसृत्य सम्मुखमागत्य अन्योऽन्यमाक्षिपन्तः आह्वयन्तः अग्रे अग्रे प्रविशन्तश्च मिथो युयुधुरित्यन्वयः ॥२६॥ गुहः कार्तिकेयः अस्यत् आस्यत् शस्त्राणि चिक्षेप । असु' क्षेपणे धातुः । मित्रः देवः॥२७॥ त्वष्टा द्वादशादित्येषु चतुर्थः । सविता पञ्चमश्च । विरोचनः बलेः पिता ॥ २८ ॥ शतेन शतसंख्याकैः ॥ २९॥ निशुम्भेति तृतीयार्थे षष्ठी ॥ ३० ॥ ब्रह्मपुत्रैः वसिष्ठादिभिः न तु सनकाद्यैः ॥ ३१ ॥ उशनाः शुक्राचार्यः ॥ ३२ ॥ मरुतो वायवः निवातसंज्ञकैरसुरैः । कालकेयैरसुरैः । पुलोम्नोऽपत्यैः ॥ ३३ ॥ एवमाजौ संग्रामे ते असुराः सुरेन्द्राश्च द्वन्द्वेन संहत्य मिलित्वा तीक्ष्णशरादिभिः अन्योऽन्यं निजघ्नुरित्यन्वयः । तोमरः (गड़ासा) ॥३४॥ ऋष्टिः उभयतोधारखड्गः । भिन्दिपालः (गोफणः) ॥३५॥ आरोहन्तीति आरोहाः योद्धारः तैः सहिताः अन्ये च वाहा वाहनानि । निकृत्ताः छिन्ना बाह्वादयो येषाम् ।

तेषां पदाघातरथाङ्गचूर्णितादायोधनादुल्बण उत्थितस्तदा ।
रेणुर्दिशः खं द्युमणिं च छादयन् न्यवर्ततासृक्स्रुतिभिः परिप्लुतात् ॥ ३७॥
शिरोभिरुद्धूतकिरीटकुण्डलैः संरम्भदृग्भिः परिदष्टदच्छदैः ।
महाभुजैः साभरणैः सहायुधैः सा प्रास्तृता भूः करभोरुभिर्बभौ ॥ ३८ ॥

कबन्धास्तत्र चोत्पेतुः पतितस्वशिरोऽक्षिभिः । उद्यतायुधदोर्दण्डैराधावन्तो भटान् मृधे ॥३९॥
बलिर्महेन्द्रं दशभिस्त्रिभिरैरावतं शरैः । चतुर्भिश्चतुरो वाहानेकेनारोहमार्च्छयत् ॥४०॥
स तानापततः शक्रस्तावद्भिः शीघ्रविक्रमः । चिच्छेद निशितैर्भल्लैरसम्प्राप्तान् हसन्निव ॥४१॥
तस्य कर्मोत्तमं वीक्ष्य दुर्मर्षः शक्तिमाददे । तां ज्वलन्तीं महोल्काभां हस्तस्थामच्छिनद्धरिः॥४२॥
ततः शूलं ततः प्रासं ततस्तोमरमृष्टयः । यद् यच्छस्त्रं समादद्यात् सर्वं तदच्छिनद् विभुः॥४३॥
ससर्जाथासुरीं मायामन्तर्धानगतोऽसुरः । ततः प्रादुरभूच्छैलः सुरानीकोपरि प्रभो ॥४४॥
ततो निपेतुस्तरवो दह्यमाना दवाग्निना । शिलाः सटङ्कशिखराश्चूर्णयन्त्यो द्विषद्बलम् ॥४५॥
महोरगाः समुत्पेतुर्दन्दशूकाः सवृश्चिकाः । सिंहव्याघ्रवराहाश्च मर्दयन्तो महागजान् ॥४६॥
यातुधान्यश्च शतशः शूलहस्ता विवाससः । छिन्धि भिन्धीति वादिन्यस्तथा रक्षोगणाः प्रभो॥४७॥
ततो महाघना व्योम्नि गम्भीरपरुषस्वनाः । अङ्गारान् मुमुचुर्वातैराहताः स्तनयित्नवः ॥४८॥
सृष्टो दैत्येन सुमहान् वह्निः श्वसनसारथिः । सांवर्तक इवात्युग्रो विबुधध्वजिनीमधाक् ॥४९॥
ततः समुद्र उद्वेलः सर्वतः प्रत्यदृश्यत । प्रचण्डवातैरुद्धूततरङ्गावर्तभीषणः ॥५०॥

छिन्ना ध्वजादयो येषां ते भुवि येतुरिति योज्यम् । इष्वासो धनुः । तनुत्रं कवचम् ॥ ३६॥ तेषां देवादीनां पदाघातैः रथचक्रैश्च चूर्णितात् युद्धस्थानात् उत्थितो रेणुः दिगादीन् छादयन् सन् पुनस्ततो न्यवर्ततेत्यन्वयः । कुतः । असृक्स्रुतिभिः रक्तक्षरणैः परितः संसिक्तात् द्युमणिं सूर्यम् ॥ ३७॥ शिरोभिः महाभुजैश्च करभसदृशैः ऊरुभिश्च आच्छादिता सा रणभूः बभौ इत्यन्वयः । कथंभूतैः शिरोभिः । उद्धूतानि उत्पतितानि कुण्डलादीनि येभ्यस्तैः । पुनश्च संरम्भयुक्ता क्रोधयुक्ता दृशो येषां तैः । परिदष्टा दच्छदा ओष्ठा येषु तैः ॥ ३८ ॥ कबन्धा शिरोहीना । पतिते स्वशिरोक्षिभि । उद्यतानि उत्थापितानि आयुधानि यैस्तैः भुजदण्डैः युक्ताः मृधे युद्धे भटान् प्रति योद्धुमुत्पेतुः आजग्मुः । अत्रैव राधेति नाम निर्दिष्टम् ॥ ३९ ॥ आरोहं गजयन्तारम् आर्च्छयत् विव्याध । तथा वाहान् ऐरावतपादरक्षकांश्च ॥४०॥ भल्लैः भल्लसंज्ञकैः वाणैः । तान् वाणान् चिच्छेद ॥ ४१ ॥ तस्य इन्द्रस्य । दुर्मर्षः असहमानो बलिः । हरिः इन्द्रः । उल्का स्यान्निर्गतज्वाला ॥४२॥ ऋष्टयः ऋष्टीः समादद्यात् गृहीतवान् । लङर्थे लिङ् । ॥४३॥ सुरानीकः सुरसैन्यम् ॥४४॥ [1]टंकवत्तीक्ष्णाग्रैः शिखरैः सहिताः शिलाः निपेतुः ॥४५॥ दन्दशूकाः दंशनस्वभावाः ॥ ४६ ॥ यातुधान्यः राक्षस्यः समुत्पेतुः विवास सो नग्नाः ॥ ४७ ॥ परुषः कठोरः । स्तनयित्नवः वज्रनिर्घोषाः मेघाः ॥४८॥ श्वसनः पवनः सहायो यस्य । सांवर्तिकः प्रलयकालिकः वह्निः विबुधध्वजिनीं देवसेनाम् अधाक्षीत् । मूले बाहुलकादपृक्तहल ईडऽभावः ॥४९॥ उद्वेलः लंघितमर्यादः

---

१. 'टंकः पाषाणदारणः' ।

एवं दैत्यैर्महामायैरलक्ष्यगतिभीषणैः । सृज्यमानासु मायासु विषेदुः सुरसैनिकाः ॥५१॥
न तत्प्रतिविधिं यत्र विदुरिन्द्रादयो नृप । ध्यातः प्रादुरभूत् तत्र भगवान् विश्वभावनः ॥५२॥

ततः सुपर्णांसकृताङ्घ्रिपल्लवः पिशङ्गवासा नवकञ्जलोचनः ।
अदृश्यताष्टायुधबाहुरुल्लसच्छ्रीकौस्तुभानर्घ्यकिरीटकुण्डलः ॥ ५३ ॥

तस्मिन् प्रविष्टेऽसुरकूटकर्मजा माया विनेशुर्महिना महीयसः ।
स्वप्नो यथा हि प्रतिबोध आगते हरिस्मृतिः सर्वविपद्विमोक्षणम् ॥ ५४ ॥

दृष्ट्वा मृधे गरुडवाहमिभारिवाह आविध्य शूलमहिनोदथ कालनेमिः ।
तल्लीलया गरुडमूर्ध्नि पतद् गृहीत्वा तेनाहनन्नृप सवाहमरिं त्र्यधीशः ॥ ५५ ॥

माली सुमाल्यतिबलौ युधि पेततुर्यच्चक्रेण कृत्तशिरसावथ माल्यवांस्तम् ।
आहत्य तिग्मगदयाहनदण्डजेन्द्रं तावच्छिरोऽच्छिनदरेर्नदतोऽरिणाऽऽद्यः ॥ ५६ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां अष्टमस्कन्धे देवासुरसंग्रामे दशमोऽध्यायः ॥१०॥

अथैकादशोऽध्यायः

श्रीशुक उवाच

अथो सुराः प्रत्युपलब्धचेतसः परस्य पुंसः परयानुकम्पया ।
जघ्नुर्भृशं शक्रसमीरणादयस्तांस्तान् रणे यैरभिसंहताः पुरा ॥ १ ॥
वैरोचनाय संरब्धो भगवान् पाकशासनः । उदयच्छद् यदा वज्रं प्रजा हा हेति चुक्रुशुः ॥२॥

उद्घूतैः कम्पितैः तरङ्गैः आवर्तैश्च भीषणः ॥ ५० ॥ अलक्ष्याभिः गतिभिः भीषणैः । विषेदुः दुःखिता बभूवु ॥ ५१ ॥ यत्र यदा तत्प्रतिविधिं मायाप्रतिक्रियां न विदु तत्र तदा भगवान् ध्यात सन् ॥ ५२॥ ततः पिशङ्गवासा स भगवान् देवैः दृश्यते त्यन्वयः । कथंभूतः । सुपर्णांसे गरुडस्कन्धे कृतौ चरणपल्लवौ येन सः । पुनश्च उल्लसन्ति श्रीकौस्तुभादीनि यस्मिन् । अनर्घ्यं बहुमूल्यम् । अष्ट बाहवो आयुधयुक्ता यस्य ॥५३॥ तस्मिन् हरौ प्रविष्टे सति महीयसः हरेः महिना तेजसा माया विनेशुः । प्रतिबोधे जागरणे आगते सति यथा स्वप्नो विनश्यति तथा । कूटकर्म मन्त्रप्रयोगः ॥५४॥ हे नृप ! गरुडवाहनं हरिं दृष्ट्वा कालनेमिः शूलम् आविध्य भ्रामयित्वा अहिनोत् चिक्षेप गरुडमूर्ध्नि आपतत् तत् त्रिशूलं भगवान् लीलयेव गृहीत्वा तेन सवाहनंमरिम् अहनदित्यन्वयः । इभारिवाहः सिंहवाहनः कालनेमि ते । मृधे युद्धे ॥५५॥ अतिबलौ तौ असुरौ यस्य चक्रेण युधि पेततुः तं भगवन्तं माल्यवान् असुर आहत्य प्राप्य अण्डजेन्द्रं गरुडं यावत् गदया अहनत् हन्तु मुद्यतोऽभूत् तावदेव आद्यो हरिनदतः गर्जतः तस्य शिर अरिणा चक्रेण अच्छिनत् ॥ ५६॥

इति श्रीमद्भागवते महापुराणेऽष्टमस्कन्धे गूढार्थदीपिन्यां दशमोऽध्याय ॥ १० ॥

●

एकादशे मृधे शक्रो बल्यादीनसुरानहन् ।
नारदोऽवारयत् देवान् शुक्रोऽजीवानजीवयत् ॥ १ ॥

अथो अथ च पुंसो हरेः अनुकम्पया प्रत्युपलब्धं पुनर्लब्धोत्साहं चेतो येषां ते मायानाक्रान्तचेतसः शक्रादयः तान् तान् असुरान् भृशं जघ्नुः यैः पुरा पूर्वं रणे अभिसंहताः आहताः । समीरणो वायुः ॥१॥ वैरोचनाय

वज्रपाणिस्तमाहेदं तिरस्कृत्य पुरःस्थितम् । मनस्विनं सुसम्पन्नं विचरन्तं महामृधे ॥ ३ ॥
नटवन्मूढ मायाभिर्मायेशान् नो जिगीषसि । जित्वा बालान् निबद्धाक्षान् नटो हरति तद्धनम् ॥४॥
आरुरुक्षन्ति मायाभिरुत्सिसृप्सन्ति ये दिवम् । तान् दस्यून् विधुनोम्यज्ञान पूर्वस्माच्च पदादधः ॥५॥
सोऽहं दुर्मायिनस्तेऽद्य वज्रेण शतपर्वणा । शिरो हरिष्ये मन्दात्मन् घटस्व ज्ञातिभिः सह ॥६॥

बलिरुवाच

संग्रामे वर्तमानानां कालचोदितकर्मणाम् । कीर्तिर्जयोऽजयो मृत्युः सर्वेषां स्युरनुक्रमात् ॥७॥
तदिदं कालरशनं जनाः पश्यन्ति सूरयः । न हृष्यन्ति न शोचन्ति तत्र यूयमपण्डिताः ॥८॥
न वयं मन्यमानानामात्मानं तत्र साधनम् । गिरो वः साधुशोच्यानां गृह्णीमो मर्मताडनाः ॥९॥

श्रीशुक उवाच

इत्याक्षिप्य विभुं वीरो नाराचैर्वीरमर्दनः । आकर्णपूर्णैरहनदाक्षेपैराहतं पुनः ॥१०॥
एवं निराकृतो देवो वैरिणा तथ्यवादिना । नामृष्यत् तदधिक्षेपं तोत्राहत इव द्विपः ॥११॥
प्राहरत् कुलिशं तस्मा अमोघं परमर्दनः । सयानो न्यपतद् भूमौ छिन्नपक्ष इवाचलः ॥१२॥
सखायं पतितं दृष्ट्वा जम्भो बलिसखः सुहृत् । अभ्ययात् सौहृदं सख्युर्हतस्यापि समाचरन् ॥१३॥
स सिंहवाह आसाद्य गदामुद्यम्य रंहसा । जत्रावताडयच्छक्रं गजं च सुमहाबलः ॥१४॥
गदाप्रहारव्यथितो भृशं विह्वलितो गजः । जानुभ्यां धरणीं स्पृष्ट्वा कश्मलं परमं ययौ ॥१५॥
ततो रथो मातलिना हरिभिर्दशशतैर्वृतः । आनीतो द्विपमुत्सृज्य रथमारुरुहे विभुः ॥१६॥
तस्य तत् पूजयन् कर्म यन्तुर्दानवसत्तमः । शूलेन ज्वलता तं तु स्मयमानोऽहनन्मृधे ॥१७॥

बलिं हन्तुं पाकशासन इन्द्रः यदा वज्रं उदयच्छत् उत्थापितवान् । चुक्रुशुः हाहाकारं चक्रुः । संरब्धः कुपितः ॥२॥ वज्रपाणिः इन्द्रः तं बलिम् । सुसम्पन्नं युद्धसाधनैः ॥३॥ यथा बालान् अज्ञान् निबद्धाक्षान् आवृतनेत्रान् कृत्वा मायिकमन्त्रैः॥४॥ये दिवम् आरोढुमिच्छन्ति ये च उल्लङ्घयितुमिच्छन्ति मोक्षमिच्छन्ति तान् पदात् रसातलादपि अधः विधुनोमि पातयामि ॥ ५ ॥ सोऽहम् इन्द्रः । घटस्व पराक्रमं कुरु । पर्व ग्रन्थिः 'ग्रन्थिनी पर्वपरुषी' इत्यमरः ॥ ६ ॥ कालेन चोदितमुद्बुद्धं शुभाशुभं कर्म येषाम् । अनुक्रमात् न तु सर्वदा एकस्यैवेत्यर्थः ॥ ७ ॥ तदिदं कीर्त्यादिकं कालरशनं कालाधीनम् इति अतो न शोचन्ति । तत्र उक्तार्थे यूयम् अपण्डिताः अनिपुणाः । काल एव रशना रज्जुर्यस्येति सन्दर्भः ॥८॥ तत्र कीर्त्यादौ आत्मानं साधनं कारणं मन्यमानानां वः युष्माकं गिरो न गृह्णीमः । यतो हि अज्ञा एते इति साधुभिः शोचितुं योग्यानाम् उपेक्ष्याणाम् ॥ ९ ॥ वीरो बलिः आक्षेपैः आहतमपि विभुमिन्द्रं पुनः नाराचैः बाणैः अहनदित्यन्वयः । कथंभूतैः । कर्णपर्यन्तं पूर्णतया आकृष्टैः ॥ १० ॥ वैरिणा बलिना निराकृतः तिरस्कृतः इन्द्रः न अमृष्यत नासहत । तोत्रमङ्कुशः । द्विपी हस्ती ॥११॥ परमर्दनः शत्रुमर्दनः इन्द्रः तस्मै बलये बलिं हन्तुं वज्रं प्राहरत् चिक्षेप तेन हतो न्यपतत् । सयानो वाहनसहितः ॥ १२ ॥ सौहृदं सौहार्दं भावप्रधानो निर्देशः । अभ्ययात् सम्मुखमभ्यगात् ॥ १३ ॥ स जम्भः रंहसा अतिवेगेन शक्रं जत्रौ कण्ठमूलास्थिदेशे ॥ १४ ॥ कश्मलं मूर्च्छाम् ॥ १५ ॥ हरिभिः अश्वैः वृतः रथः मातलिना सारथिना आनीतः स च विभुः इन्द्रः रथम् आरुरुहे ॥ १६ ॥ यन्तुः सारथेः तस्य मातलेः कर्म रथानयनरूपम् ।

सेहे रुजं सुदुर्मर्षां सत्त्वमालम्ब्य मातलिः । इन्द्रो जम्भस्य संक्रुद्धो वज्रेणापाहरच्छिरः ॥१८॥
जम्भं श्रुत्वा हतं तस्य ज्ञातयो नारदादृषेः । नमुचिश्च बलः पाकस्तत्रापेतुस्त्वरान्विताः ॥१९॥
वचोभिः परुषैरिन्द्रमर्दयन्तोऽस्य मर्मसु । शरैरवाकिरन् मेघा धाराभिरिव पर्वतम् ॥२०॥
हरीन् दशशतान्याजौ हर्यश्वस्य बलः शरैः । तावद्भिरर्दयामास युगपल्लघुहस्तवान् ॥२१॥
शताभ्यां मातलिं पाको रथं सावयवं पृथक् । सकृत्संधानमोक्षेण तदद्भुतमभूद् रणे ॥२२॥
नमुचिः पञ्चदशभिः स्वर्णपुङ्खैर्महेषुभिः । आहत्य व्यनदत् संख्ये सतोय इव तोयदः ॥२३॥
सर्वतः शरकूटेन शक्रं सरथसारथिम् । छादयामासुरसुराः प्रावृट्सूर्यमिवाम्बुदाः ॥२४॥

अलक्षयन्तस्तमतीव विह्वला विचुक्रुशुर्देवगणाः सहानुगाः ।
अनायकाः शत्रुबलेन निर्जिता वणिक्पथा भिन्ननवो यथार्णवे ॥२५॥
ततस्तुराषाडिषुबद्धपञ्जराद् विनिर्गतः साश्वरथध्वजाग्रणीः ।
बभौ दिशः खं पृथिवीं च रोचयन् स्वतेजसा सूर्य इव क्षपात्यये ॥२६॥

निरीक्ष्य पृतनां देवः परैरभ्यर्दितां रणे । उदयच्छद् रिपुं हन्तुं वज्रं वज्रधरो रुषा ॥२७॥
स तेनैवाष्टधारेण शिरसी बलपाकयोः । ज्ञातीनां पश्यतां राजञ्जहार जनयन् भयम् ॥२८॥
नमुचिस्तद्वधं दृष्ट्वा शोकामर्षरुषान्वितः । जिघांसुरिन्द्रं नृपते चकार परमोद्यमम् ॥२९॥
अश्मसारमयं शूलं घण्टावद्धेमभूषणम् । प्रगृह्याभ्यद्रवत् क्रुद्धो हतोऽसीति वितर्जयन् ।
प्राहिणोद् देवराजाय निनदन् मृगराडिव ॥ ३० ॥

तं सूतं शूलेन अहनत् ॥१७॥ सत्त्वं धैर्यमाश्रित्य सुदुः सहां रुजं पीडाम् सेहे । अपाहरत् चिच्छेद ॥१८॥ तत्र युद्धस्थले आपेतुः आजग्मुः ॥ १९ ॥ परुषैः कठोरैः इन्द्रं पीडयन्तः अवाकिरन् आच्छादयामासुः ॥२०॥ लघुहस्तवान् हस्तलाघवयुक्तः बलोऽसुरः आजौ संग्रामे हर्यश्वस्य इन्द्रस्य हरीन् अश्वान् तावद्भिः दशशतैः शरैः पीडयामास । युगपत् एकदैव ॥ २१ ॥ पाकोऽसुरः शताभ्यां शतद्वयेन शतेन शतेन मातलि सावयवं रथं च पृथक् पृथक् अवयवशः अर्दयामास । केन । सकृत् एकदेव शराणां सन्धानं मोक्षणं च तेन । तत् कर्म ॥ २२ ॥ इन्द्रम् आहत्य विद्ध्वा संख्ये युद्धे जलधरो मेघइव व्यनदत् अगर्जत् । पुंखो वाणमूलभागः ॥ २३ ॥ शरकूटेन वाणसमूहेन प्रावृट्सूर्यं वर्षाकालिकम् ॥ २४ ॥ तमिन्द्रम् अलक्षयन्तः देवगणाःअनायकाः सन्तः विचुक्रुशुरित्यन्वयः । अर्णवे भिन्ननौकाः वणिजः यथा विक्रोशन्ति तद्वत् ।कथम्भूताः । वणिक्पथा वाणिज्यवृत्तयः । बलेन सैन्येन ॥२५॥ ततः तुराषाट् इन्द्रः पञ्जरात् वाणजालात् विनिर्गतः सन् दिगादीन् प्रकाशयन् निशावसाने सूर्य इव बभौ इत्यन्वयः । कथंभूतः । अश्वादयः अग्रणीः सारथिश्च तैः सहितः । तुरं वेगवन्तं रिपुं साहयति अभिभवतीति व्युत्पत्त्या सहेः ण्यन्तात् क्विप् षत्वम् अन्येषामपि इति दीर्घः ॥ २६ ॥ वज्रधरः इन्द्रः अर्दितां पीडितां पृतनां सेनां निरीक्ष्य रिपुं हन्तुं वज्रम् उदयच्छत् उत्थापितवान् ॥ २७ ॥ स इन्द्रः अष्टधारेण वज्रेण । जहार चिच्छेद ॥ २८ ॥ तव तयोः बलपाकयोः वधम् । वधात् शोकः इन्द्रे अमर्षाऽसहनं ताभ्यां रुषा ॥२९॥ अश्मेति सार्द्धम् । नमुचिः क्रुद्धः सन् शूलं प्रगृह्य त्वं हतोऽसीति इन्द्रं तर्जयन् भर्त्सयन् अभ्यद्रवत् देवराजं हन्तुं सिंह इव गर्जन् सन् तव प्राहिणोत्

तदापतद् गगनतले महाजवं विचिच्छिदे हरिरिषुभिः सहस्रधा ।
तमाहनन्नृप कुलिशेन कन्धरे रुषान्वितस्त्रिदशपतिः शिरो हरन् ॥३१॥
न तस्य हि त्वचमपि वज्र ऊर्जितो बिभेद यः सुरपतिनौजसेरितः ।
तदद्भुतं परमतिवीर्यवृत्रभित् तिरस्कृतो नमुचिशिरोधरत्वचा ॥३२॥
तस्मादिन्द्रोऽबिभेच्छत्रोर्वज्रः प्रतिहतो यतः । किमिदं दैवयोगेन भूतं लोकविमोहनम् ॥३३॥
येन मे पूर्वमद्रीणां पक्षच्छेदः प्रजात्यये । कृतो निविशतां भारैः पतत्त्रैः पततां भुवि ॥३४॥
तपःसारमयं त्वाष्ट्रं वृत्रो येन विपाटितः । अन्ये चापि बलोपेताः सर्वास्त्रैरक्षतत्वचः ॥३५॥
सोऽयं प्रतिहतो वज्रो मया मुक्तोऽसुरेऽल्पके । नाहं तदाददे दण्डं ब्रह्मतेजोऽप्यकारणम् ॥३६॥
इति शक्रं विषीदन्तमाह वागशरीरिणी । नायं शुष्कैरथो नार्द्रैर्वधमर्हति दानवः ॥३७॥
मयास्मै यद् वरो दत्तो मृत्युर्नैवार्द्रशुष्कयोः । अतोऽन्यश्चिन्तनीयस्ते उपायो मघवन् रिपोः॥३८॥
तां दैवीं गिरमाकर्ण्य मघवान् सुसमाहितः । ध्यायन् फेनमथापश्यदुपायमुभयात्मकम् ॥३९॥
न शुष्केण न चार्द्रेण जहार नमुचेः शिरः । तं तुष्टुवुर्मुनिगणा माल्यैश्चावाकिरन् विभुम् ॥४०॥
गन्धर्वमुख्यौ जगतुर्विश्वावसुपरावसू । देवदुन्दुभयो नेदुर्नर्तक्यो ननृतुर्मुदा ॥४१॥
अन्येऽप्येवं प्रतिद्वन्द्वान् वाय्वग्निवरुणादयः । सूदयामासुरस्त्रौघैर्मृगान् केसरिणो यथा ॥ ४२॥
ब्रह्मणा प्रेषितो देवान् देवर्षिर्नारदो नृप । वारयामास विबुधान् दृष्ट्वा दानवसंक्षयम् ॥४३॥

चिक्षेप । अश्मसारमगं लोहमयं विजयप्रदघण्टायुक्तं च ॥३०॥ गगनतले आपतत् तत् त्रिशूलं हरिः इन्द्रः इषुभिः चिच्छिदे पुनश्च तस्य शिरो हरन् हर्तुं कुलिशेन वज्रेण तं कन्धरे ग्रीवायामाहनदित्यन्वयः ॥३१॥ इन्द्रेण ईरितः प्रक्षिप्तः यः वज्रः स तस्य नमुचेः त्वचपि न चकर्त पूर्वम् अतिवीर्यं वृत्रमपि अभिनत् यः सोऽपि वज्रः ग्रीवात्वचा तिरस्कृतः कुण्ठीकृत तन्महत् आश्चर्यमभूत् । ऊर्जितः अतिप्रभाववान् ॥३२॥ यतो वज्रः प्रतिहतः तस्माद् इन्द्रोऽपि अविभेत् भयं प्रापेत्यन्वयः । इदं किं भूतं जातम् । लोकं विमोहयतीति तथा ॥ ३३ ॥ येनेति यच्छब्दस्य सोऽयमिति तच्छब्देनान्वयः कार्यः । तथाहि येन मे मया अद्रीणां पक्षच्छेदः कृतः वृत्रः विपाटितः विनाशितः येन च अन्येऽपि बलोपेता वीरा विपाटिताः सोऽयं वज्रः अल्पके तुच्छे असुरे मुक्त सन् प्रतिहतः कुण्ठीभूतः अतो दण्डतुल्यमेनं नाददे[1] नादास्ये इति त्रयाणामेकान्वयः । यतो ब्रह्मणः दधीचेः तेजः तपोऽपि अकारणम् अकिञ्चित्करं निष्फलमेव जातमित्यहं मन्ये । कथंभूतानाम् अद्रीणाम् । भारैः भूतानां भारभूतैः पतत्रैः पक्षैः उड्डीय उड्डीय भुवि पतताम् । किञ्च प्रजात्यये प्रजानाशनिमित्तं निविशतांमितस्ततः प्रवेशं कुर्वताम् । कथंभूतो वृत्रः । त्वष्टुः सम्बन्धि सारमयं वीर्यातिशयं यत् तपः तद्रूपः ॥ ३४।३५।३६ ॥ विषीदन्तं खेदं प्राप्नुवन्तम् । अशरीरिणी आकाशवाणी ॥ ३७ ॥ उपायः वधोपायः । ते त्वया ॥ ३८ ॥ उभयात्मकम् आर्द्रशुष्कोभयात्मकम् । फेनं फेनजनितं फेनास्त्रम् अलौकिकम् । अपां फेनं न शुष्कं न चार्द्रम् ? इति श्रुतेः ॥३९॥ जहार चिच्छेद । तमिन्द्रं माल्यैः पुष्पैः अवाकिरन् आच्छादयामासुः ॥ ४० ॥ जगतुः गानं चक्रतुः । नर्तक्योऽप्सरसः ॥ ४१ ॥ प्रतिद्वन्द्वान् विपक्षीयान् सूदयामासुः जघ्नुः ॥ ४२।४३ ॥ समेधिताः वर्धिताः ।

---

१. दद दाने इत्यस्माल्लटि उत्तमपुरुषैकवचने रूपम् ।

नारद उवाच

भवद्भिरमृतं प्राप्तं नारायणभुजाश्रयैः । श्रिया समेधिताः सर्वं उपारमत विग्रहात् ॥४४॥

श्रीशुक उवाच

संयम्य मन्युसंरम्भं मानयन्तो मुनेर्वचः । उपगीयमानानुचरैर्ययुः सर्वे त्रिविष्टपम् ॥४५॥

येऽवशिष्टा रणे तस्मिन् नारदानुमतेन ते । बलिं विपन्नमादाय अस्तं गिरिमुपागमन् ॥४६॥

तत्राविनष्टावयवान् विद्यमानशिरोधरान् । उशना जीवयामास संजीविन्या स्वविद्यया ॥४७॥

बलिश्चोशनसा स्पृष्टः प्रत्यापन्नेन्द्रियस्मृतिः । पराजितोऽपि नाखिद्यल्लोकतत्त्वविचक्षणः ॥४८॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायामष्टमस्कन्धे देवासुरसंग्रामे एकादशोऽध्यायः ॥ ११ ॥

अथ द्वादशोऽध्यायः

श्रीबादरायणिरुवाच

वृषध्वजो निशम्येदं योषिद्रूपेण दानवान् । मोहयित्वा सुरगणान् हरिः सोममपाययत् ॥ १ ॥

वृषमारुह्य गिरिशः सर्वभूतगणैर्वृतः । सह देव्या ययौ द्रष्टुं यत्रास्ते मधुसूदनः ॥ २ ॥

सभाजितो भगवता सादरं सोमया भवः । सूपविष्ट उवाचेदं प्रतिपूज्य स्मयन् हरिम् ॥ ३ ॥

श्रीमहादेव उवाच

देवदेव जगद्व्यापिञ्जगदीश जगन्मय । सर्वेषामपि भवानां त्वमात्मा हेतुरीश्वरः ॥ ४ ॥

आद्यन्तावस्य यन्मध्यमिदमन्यदहं बहिः । यतोऽव्ययस्य नैतानि तत् सत्यं ब्रह्म चिद् भवान् ॥५॥

तवैव चरणाम्भोजं श्रेयस्कामा निराशिषः । विसृज्योभयतः सङ्गं मुनयः समुपासते ॥ ६ ॥

विग्रहात् युद्धात् ॥ ४४ ॥ मन्युसंरम्भं कोपावेशम् । उपगीयमानैः अनुचरैः सह त्रिविष्टमं स्वर्गम् ॥४५॥ येऽवशिष्टास्ते विपन्नं मृतम् । अस्तं गिरिम् अस्ताचलम् ॥ ४६ ॥ तत्र गिरौ । उशनाः शुक्राचार्यः । शिरोधरा ग्रीवा ॥ ४७ ॥ प्रत्यापन्नं पुनः प्राप्तमिन्द्रियम् इन्द्रियसामर्थ्यं स्मृतिश्च येन सः । लोकस्य तत्त्वे जयादेः देवाधीनत्वमिति विचारे ॥ ४८ ॥

इति श्रीमद्भागवते महापुराणेऽष्टमस्कन्धे गूढार्थदीपिन्यामेकादशोऽध्याय ॥११॥

द्वादशे श्रीमहादेवप्रार्थनेन हरिर्हसन् ।
प्रदर्श्य मोहिनीरूपं कामारिं चाप्यमोहयत् ॥ १ ॥

वृषेति युग्मम् । सोमम् अमृतम् । यत्र आस्ते तत्रेति योज्यम् ॥ १।२ ३ ॥ सभाजितः सत्कृतः । सः उमया इति छेदः । 'सोऽचि लोपे' इति सोलोपः सहार्थे गम्यमाने तृतीया ॥ ३ ॥ भावानां पदार्थानां स्थावरजंगमानाम् आत्मा उपादानं हेतुः निमित्तं च । आत्मा अन्तर्यामी वा अतस्त्वमेवेश्वरः ॥४॥ इदमहं चेतनरूपम् अन्यत् बहिः अचेतनरूपम् यत् जगत् तस्य अस्य जगतः यतः आद्यन्तानि भवन्ति स्वयं तु यस्य नैतानि सन्ति तत् ब्रह्म चिद्रूपो भवानित्यन्वयः । आद्यन्तौ सृष्टिप्रलयौ । मध्यं पालनं च ॥५॥ निराशिषः

त्वं ब्रह्म पूर्णममृतं विगुणं विशोकमानन्दमात्रमविकारमनन्यदन्यत् ।
विश्वस्य हेतुरुदयस्थितिसंयमानामात्मेश्वरश्च तदपेक्षतयाऽनपेक्षः ॥ ७ ॥
एकस्त्वमेव सदसद् द्वयमद्वयं च स्वर्णं कृताकृतमिवेह न वस्तुभेदः ।
अज्ञानतस्त्वयि जनैर्विहितो विकल्पो यस्माद् गुणैर्व्यतिकरो निरुपाधिकस्य॥८॥
त्वां ब्रह्म केचिदवयन्त्युत धर्ममेके एके परं सदसतोः पुरुषं परेशम् ।
अन्येऽवयन्ति नवशक्तियुतं परं त्वां केचिन्महापुरुषमव्ययमात्मतन्त्रम् ॥ ९ ॥
नाहं परायुर्ऋषयो न मरीचिमुख्या जानन्ति यद्विरचितं खलु सत्त्वसर्गाः ।
यन्मायया मुषितचेतस ईश दैत्यमर्त्यादयः किमुत शश्वदभद्रवृत्ताः ॥१०॥
स त्वं समीहितमदः स्थितजन्मनाशं भूतेहितं च जगतो भवबन्धमोक्षौ ।
वायुर्यथा विशति खं च चराचराख्यं सर्वं तदात्मकतयाऽवगमोऽवरुन्त्से ॥११॥
अवतारा मया दृष्टा रममाणस्य ते गुणैः । सोऽहं तद् द्रष्टुमिच्छामि यत् ते योषिद्वपुर्धृतम्॥१२॥
येन सम्मोहिता दैत्याः पायिताश्चामृतं सुराः । तद् दिदृक्षव आयाताः परं कौतूहलं हि नः॥१३॥

श्रीशुक उवाच

एवमभ्यर्थितो विष्णुर्भगवान् शूलपाणिना । प्रहस्य भावगम्भीरं गिरिशं प्रत्यभाषत ॥१४॥

निष्कामा । उभयतः इह अमुत्र च संगं भोगासक्तिम् ॥ ६ ॥ त्वं पूर्णं ब्रह्मासि । कथंभूतम् । अनन्यत् न विद्यतेऽन्यत् यस्मात् तत् सर्वाभिन्नम् । अन्यत् भिन्नं च कारणत्वात् । कथंभूतस्त्वम् उदयादीनां सृष्टिस्थितप्रलयानां हेतुः तदुपाधियुक्तजीवानां च आत्मा अन्तर्यामी । तदपेक्षतया जीवापेक्षतया तेषाम् ईश्वर फलदाता च स्वयं तु निरपेक्षः ॥७॥ सत् स्थूलम् असत् सूक्ष्मम् । द्वयं कार्यम् अद्वयं कारणं च त्वमेव । यथा कृतं कुण्डलादिरूपं द्वयं कार्यम् । अकृतं च अद्वयं कारणरूपं स्वर्णमेकमेव न तत्र भेदस्तथा । विकल्पो भेदः यस्मात् निरुपाधिकस्य तवायं व्यतिकरो भेदः । गुणैरेव न स्वतः ॥ ८ ॥ केचित् वेदान्तिनः ब्रह्म अवयन्ति मन्यन्ते । धर्मम् एके मीमांसकाः । एके सांख्याः सदसतोः प्रकृतिपुरुषयोः परं पुमांसम् । अन्ये पाञ्चरात्रा वैष्णवाः [1]नवशक्तियुतं परंपरमेश्वरम् । केचित् पातञ्जलाः महापुरुषम् । 'पुरुषविशेष ईश्वरः', इति सूत्रात् ॥ ९ ॥ अहं ब्रह्मा ऋषयश्च सत्त्वसर्गाः सत्त्वेन सृष्टा अपि यत् विरचितं विश्वमपि तत्त्वतो न जानन्ति तदा दैत्यादयो न जानन्तीति किमुत वक्तव्यम् इत्यन्वय । कथंभूता । अभद्रवृत्ता रजस्तमप्रकृतयः । मायया मुषितचेतसः अपहृतज्ञानाश्च विशेषणद्वयं दैत्यादीनामेव । यद्वा । विश्वमपि न जानन्ति किमुत त्वाम् । परायुः द्विपरार्द्धायुः ब्रह्मा ॥१०॥ वयं न जानीम त्वं तु जानासीत्याह ! अवगमः ज्ञानरूपः स त्वं सर्वमवरुन्त्से व्याप्नोषि जानासि च त्यन्वय । किं तत् सर्वम् । समीहितं स्वेन कृतम्[2] अद अमुष्य जगतः स्थित्यादि । भूतानां प्राणिमात्राणाम् ईहितं कर्म भवेन बन्धः ततो मोक्षं च । सर्वगतत्वे दृष्टान्तः । चराचराख्यं देहजातं खं प्रति च यथा वायुः आविशति तथा त्वम् । सम्यक् ईहितं चेष्टितं कृतमित्यर्थः[3] ॥११॥ ते त्वया यत् धृतंतद् द्रष्टुमित्यन्वयः ॥१२॥ नोऽस्माकं परं कौतूहलम् अत्युत्कण्ठा

---

१. विमलोत्कर्षिणी ज्ञाना क्रिया योगा ततः परम् । प्रह्वी सत्या तथेशानाऽनुग्रहा नव शक्तयः ।
२. अत्र स्वशब्दस्य समादेशः पृष्टोदरादित्वात् इति बंशीधरी । ३. अवगम्यते सर्वं मने नेति अवगमः ।

श्रीभगवानुवाच

कौतूहलाय दैत्यानां योषिद्वेषो मया कृतः। पश्यता सुरकार्याणि गते पीयूषभाजने ॥१५॥
तत्तेऽहं दर्शयिष्यामि दिदृक्षोः सुरसत्तम। कामिनां बहु मन्तव्यं संकल्पप्रभवोदयम् ॥१६॥

श्रीशुक उवाच

इति ब्रुवाणो भगवांस्तत्रैवान्तरधीयत। सर्वतश्चारयंश्चक्षुर्भव आस्ते सहोमया ॥१७॥

ततो ददर्शोपवने वरस्त्रियं विचित्रपुष्पारुणपल्लवद्रुमे।
विक्रीडतीं कन्दुकलीलया लसद्दुकूलपर्यस्तनितम्बमेखलाम् ॥१८॥
आवर्तनोद्वर्तनकम्पितस्तनप्रकृष्टहारोरुभरैः पदे पदे।
प्रभज्यमानामिव मध्यतश्चलत्पदप्रवालं नयतीं ततस्ततः ॥१९॥
दिक्षु भ्रमत्कन्दुकचापलैर्भृशं प्रोद्विग्नतारायतलोललोचनाम्।
स्वकर्णविभ्राजितकुण्डलोल्लसत्कपोलनीलालकमण्डिताननाम् ॥२०॥
श्लथद्दुकूलं कबरीं च विच्युतां सन्नह्यतीं वामकरेण वल्गुना।
विनिघ्नतीमन्यकरेण कन्दुकं विमोहयन्तीं जगदात्ममायया ॥२१॥
तां वीक्ष्य देव इति कन्दुकलीलयेषद्व्रीडास्फुटस्मितविसृष्टकटाक्षमुष्टः।
स्त्रीप्रेक्षणप्रतिसमीक्षणविह्वलात्मा नात्मानमन्तिक उमां स्वगणांश्च वेद ॥२२॥

भावः शिवमोहनात्मकः तेन गम्भीरमिति क्रियाविशेषणम् ॥१४॥ कौतूहलाय मोहनाय। 'मोहनकान्तिषु' इति कोशात्। योषिद्रूपेण सुरकार्माणि पश्यता मया ॥ १५ ॥ तत् रूपम्। मन्तव्यम् आदरणीयम्। संकल्पप्रभवः कामः तस्य उदयो यस्मात् ॥ १६ ॥ चारयन् चालयन्। तत्रैव वार्तास्थले अन्तरधीयत। 'धीङ् धारणे, इत्यस्मात् ॥ १७ ॥ ततः उपवने कन्दुकलीलया विक्रीडती वरस्त्रियं शिवो ददर्शेत्यन्वयः। कथंभूते। विचित्रपुष्पाणि अरुणपल्लवाश्च येषां ते तथाभूताद्रुमा यस्मिन्। स्त्रियं कीदृशीम्। लसता दुकूलेन शाटिकया वेष्टिते नितम्बे मेखला यस्यास्ताम् ॥१८॥ पुनः कीदृशीम्। कन्दुकस्य ताडनवशात् ये आवर्तनोद्वर्तनं नमनान्नमने ताभ्यां रत्नहाराणामधिकभारैश्च मध्यदेशे प्रभज्यमानामिव त्रुट्यमानामिव प्रतीयमानाम्। पुनश्च। प्रवालवत् अतीवकोमलं चलत्पदं नूपुरध्वनिं कुर्वत् पदम् इतस्ततो नयन्तीम् ॥१९॥ पुनश्च दिक्षु भ्रमतः प्रक्षिपतः कन्दुकस्य चाञ्चल्यैः अतीव उद्विग्नकनीनिके विशाले चञ्चले लोचने यस्यास्ताम्। पुनश्च। स्वकर्णयोः विभ्राजिताभ्यां कुण्डलाभ्याम् उल्लसन्तौ यौ कपोलौ ताभ्यां नीलैरलकैश्च मण्डितमाननं यस्यास्ताम् ॥ २० ॥ पुनः कीदृशीम्। वल्गुना अतीवकोमलेन करेण शिथिलीभवत् दुकूलं विच्युतां विकीर्णां कवरीं केशपाशं च सन्नह्यती बध्नतीम्। पुनश्च। मायया निरतिशयसौन्दर्येण विश्वं विमोहयन्तीम्। सर्वत्र द्वितीयान्तानां ददर्शेति क्रियया सम्बन्धः कार्यः विनिघ्नतीं ताडयन्तीम् ॥२१॥ देवो महादेवः इति इत्थं तां सुन्दरीं वीक्ष्य विह्वलात्मा कामासक्तः सन् अन्तिके स्थिताम् उमां गणान् नन्दीश्वरादींश्च न वेदेत्यन्वयः। कथंभूतः। ईषत् व्रीडा कश्चित् पुरुषो मां पश्यतीति तया यत् स्फुटस्मितं तेन सह विसृष्टः प्रक्षिप्तः यः कटाक्षः तेन मुष्टः आकृष्टः। पुनश्च। स्वयं शिवेन प्राक् यत् स्त्रियाः प्रेक्षणं पुनश्च तया च प्रतिसमीक्षणं ताभ्यां विह्वलः आत्मा यस्य तथाभूतः ॥ २२ ॥

तस्याः कराग्रात् स तु कन्दुको यदा गतो विदूरं तमनुव्रजत्स्त्रियाः।
वासः ससूत्रं लघु मारुतोऽहरद् भवस्य देवस्य किलानुपश्यतः ॥२३॥
एवं तां रुचिरापाङ्गीं दर्शनीयां मनोरमाम्। दृष्ट्वा तस्यां मनश्चक्रे विषज्जन्त्यां भवः किल॥२४॥
तयापहृतविज्ञानस्तत्कृतस्मरविह्वलः। भवान्या अपि पश्यन्त्या गतह्रीस्तत्पदं ययौ ॥२५॥
सा तमायान्तमालोक्य विवस्त्रा व्रीडिता भृशम्। निलीयमाना वृक्षेषु हसन्ती नान्वतिष्ठत॥२६॥
तामन्वगच्छद् भगवान् भवः प्रमुषितेन्द्रियः। कामस्य च वशं नीतः करेणुमिव यूथपः ॥२७॥
सोऽनुव्रज्यातिवेगेन गृहीत्वानिच्छतीं स्त्रियम्। केशबन्ध उपानीय बाहुभ्यां परिषस्वजे ॥२८॥
सोपगूढा भगवता करिणा करिणी यथा। इतस्ततः प्रसर्पन्ती विप्रकीर्णशिरोरुहा ॥२९॥
आत्मानं मोचयित्वाङ्ग सुरर्षभभुजान्तरात्। प्राद्रवत् सा पृथुश्रोणिः माया देवविनिर्मिता॥३०॥
तस्यासौ पदवीं रुद्रो विष्णोरद्भुतकर्मणः। प्रत्यपद्यत कामेन वैरिणेव विनिर्जितः ॥३१॥
तस्यानुधावतो रेतश्चस्कन्दामोघरेतसः। शुष्मिणो यूथपस्येव वासितामनु धावतः ॥३२॥
यत्र यत्रापतन् मह्यां रेतस्तस्य महात्मनः। तानि रूप्यस्य हेम्नश्च क्षेत्राण्यासन् महीपते ॥३३॥
सरित्सरस्सु शैलेषु वनेषूपवनेषु च। यत्र क्व चासन्नृषयस्तत्र संनिहितो हरः ॥३४॥
स्कन्ने रेतसि सोऽपश्यदात्मानं देवमायया। जडीकृतं नृपश्रेष्ठ संन्यवर्तत कश्मलाद् ॥३५॥

यदा दूरं गतः तदैव तं कन्दुकमनु पश्चात् व्रजन्त्याः स्त्रिया. लघु सूक्ष्मं वासः मारुतो जहार। कथंभूतम्। ससूत्र काञ्चीसहितं किलेत्याश्चये ॥ २३ ॥ विषज्जन्त्यां भवे स्वासक्ति द्योतयन्त्याम्। चक्रे आलिङ्गितु-मिति शेषः ॥ २४ ॥ गतह्रीः प्राप्तलज्जः। तत्पदं तस्याः समीपम् ॥२५॥ सा मोहिनी। तं शिवम्। एकत्र नान्वतिष्ठत् किन्तु दुद्रावैव ॥ २६ ॥ च इवार्थे नीत इव नतु नीतः प्रमुषितेन्द्रियः व्याकुलचित्तः। यूथपो गजेन्द्रः यथा हस्तिनीम् ॥ २७ ॥ केशपाशे गृहीत्वा उपानीय समीपमाकृष्य च परिषस्वजे यथेच्छमालिङ्गितवान् ॥ २८ ॥ सेति युग्मम्। अङ्ग हे राजन्। सा प्रसिद्धार्थे अतः सेत्यस्य न पौनरुक्त्यम्। उपगूढा आलिङ्गिता सा बाहुमध्यात् आत्मानं मोचयित्वा प्राद्रवत् यतो मायैव मोहिनी-मूर्तिः। शिरोरुहाः केशाः। सुरर्षभो महादेवः। श्रोणिः ह्रस्वान्तपाठः प्रशस्तः ॥२९।३०॥ असौ शिवः तस्य मोहिनीरूपस्य पदवीं मार्गं प्रत्यपद्यत अन्वधावत्। इवशब्देन न वस्तुतो जितः अपि तु लीलामात्रम् यद्वा इवेत्युत्प्रेक्षाद्योतकं मत्प्रियेणैव अहं निर्जितः इति सौभाग्यमस्माकम् ॥ ३१ ॥ तस्य शिवस्य रेतः चस्कन्द सुस्राव। '[1]वासितां हस्तिनीमनुधावतः शुष्मिणो मत्तस्य गजेन्द्रस्य रेत यथा स्रवति तथा। अमोघमव्यर्थम् ॥ ३२ ॥ क्षेत्राणि आकरान् (खान इति) ॥ ३३ ॥ यत्र क्वच यत्र क्वापि आसन् तत्र तेषां सन्निहितो निकटो बभूव। मद्दृष्टान्तेन निर्जितकामैरपि स्त्रीषु न विश्वसनीयमित्येतदर्थं तथा कृतमित्यवधेयम् ॥ ३४ ॥ कश्मलात् मोहिन्या-वेशात् जडीकृतमित्यत्र लुप्तोपमा ज्ञेया। किं कर्तव्यशून्यम् ॥३५॥ जगदात्मनो हरे ज्ञातमाहात्म्यः स शिव आत्मनः तत् मायया जडीकरणम् अद्भुतमाश्चर्यं न मेने इत्यन्वयः। उह वितर्के। कथंभूतस्य।

---

१. 'वासिता करिणीनार्यो इति मेदिनी।

अथावगतमाहात्म्य आत्मनो जगदात्मनः । अपरिज्ञेयवीर्यस्य न मेने तदुहाद्भुतम् ॥३६॥
तमविक्लवमव्रीडमालक्ष्य मधुसूदनः । उवाच परमप्रीतो बिभ्रत् स्वां पौरुषीं तनुम् ॥३७॥

श्रीभगवानुवाच

दिष्ट्या त्वं विबुधश्रेष्ठ स्वां निष्ठामात्मना स्थितः । यन्मे स्त्रीरूपया स्वैरं मोहितोऽप्यङ्ग मायया
को नु मेऽतितरेन्मायां विषक्तस्त्वदृते पुमान् । तांस्तान् विसृजतीं भावान् दुस्तरामकृतात्मभिः३९
सेयं गुणमयी माया न त्वामभिभविष्यति । मया समेता कालेन कालरूपेण भागशः ॥४०॥

श्रीशुक उवाच

एवं भगवता राजन् श्रीवत्साङ्केन सत्कृतः । आमन्त्र्य तं परिक्रम्य सगणः स्वालयं ययौ ॥४१॥
आत्मांशभूतां तां मायां भवानीं भगवान् भवः । शंसतामृषिमुख्यानां प्रीत्याऽऽचष्टाथ भारत४२

अपि व्यपश्यस्त्वमजस्य मायां परस्य पुंसः परदेवतायाः ।
अहं कलानामृषभो विमुह्ये ययाऽवशोऽन्ये किमुतास्वतन्त्राः ॥४३॥
यं मामपृच्छस्त्वमुपेत्य योगात् समासहस्रान्त उपारतं वै ।
स एष साक्षात् पुरुषः पुराणो न यत्र कालो विशते न वेदः ॥४४॥

श्रीशुक उवाच

इति तेऽभिहितस्तात विक्रमः शार्ङ्गधन्वनः । सिन्धोर्निर्मथने येन धृतः पृष्ठे महाचलः ॥४५॥

अपरिज्ञेयम् अपरिमेयं वीर्यं मोहनसामर्थ्यं यस्य ॥ ३६ ॥ अविक्लवं स्वस्थम् ॥ ३७ ॥ अङ्ग हे महादेव । यत् यस्मात् मन्महत्त्वं वर्धयितुं स्वैरं स्वेच्छया मोहितोऽपि त्वम् आत्मनः स्वत एव निष्ठां प्रकृतिं निर्विकारतां स्थितः एतत् दिष्ट्या भद्रं जातम् । मन्दस्वच्छयोः स्वैरः इत्यमरः ॥ ३८ ॥ त्वत् ऋते त्वां विना विषक्तः विषयासक्तः को नु पुमान् मे मायाम् अतितरेत् न कोऽपीत्यन्वयः । कथंभूताम् । तान् तान् कामोद्दीपकान् भावान् सृजन्तीम् । अत एव अकृतात्मभिः असंयतचित्तैः दुस्तराम् ॥ ३९ ॥ सा इयं त्रिगुणात्मिका माया भागशः केनाऽपि अंशेन त्वां न मोहयिष्यति । कुतः । कालेन सृष्ट्यादिनिमित्तेन कालपुरुषेण मया समेता[1] सम्यक्प्रेरिता । मदधीनेत्यर्थः ॥ ४० ॥ श्रीवत्सो वक्षसि अतो वक्षसा शिवमालिङ्गितवानिति सूचितम् । आमन्त्र्य पृष्ट्वा ॥ ४१ ॥ हे भारत परीक्षित् । भगवान् भवः आत्मनः विष्णोः अंशभूतां तां मोहिनीं तत्प्राबल्यं भवानीं प्रति आचष्ट उक्तवान् । आत्मानं शंसतां स्तुवताम् ऋषीणां मध्ये ॥ ४२ ॥ हे देवि अपि किं परस्य पुंसः परमेश्वरस्य मायां त्वं व्यपश्यः दृष्टवती असि । यया मायया अवशः स्वतन्त्रोऽपि अहं मुह्ये अन्ये अस्वतन्त्रा इन्द्रियपरतन्त्रा मुह्येयुरिति किमुत वक्तव्यम् । कलानामवताराणां मध्ये ऋषभः श्रेष्ठोऽपि परेति सर्वकारणरूपस्य अत एव अजस्य जन्मादिविकारशून्यस्य ॥ ४३ ॥ समासहस्रान्ते वर्षसहस्रान्ते योगात् समाधेः उपारतं निवृत्तं मामुपेत्य यं त्वम् अपृच्छः पृष्टवती असि स साक्षात् एष एवेत्यन्वयः किं बहुना वेदः श्रुतिरपि यं न वेद ॥ ४४ ॥ हे तात प्रिय अभिहितः

---

१. समाङ्पूर्वादिणः क्तप्रत्यये समेतेति रूपम् ।

एतन्मुहुः कीर्तयतोऽनुश्रृण्वतो न रिष्यते जातु समुद्यमः क्वचित् ।
यदुत्तमश्लोकगुणानुवर्णनं समस्तसंसारपरिश्रमापहम् ॥४६॥
असदविषयमङ्घ्रिं भावगम्यं प्रपन्नानमृतममरवर्यानाशयत् सिन्धुमथ्यम् ।
कपटयुवतिवेषो मोहयन् यः सुरारींस्तमहमुपसृतानां कामपूरं नतोऽस्मि ॥४७॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायामष्टमस्कन्धे शङ्करमोहनं नाम द्वादशोऽध्यायः ॥१२॥

अथ त्रयोदशोऽध्यायः

श्रीशुक उवाच

मनुर्विवस्वतः पुत्रः श्राद्धदेव इति श्रुतः । सप्तमो वर्तमानो यस्तदपत्यानि मे शृणु ॥ १ ॥
इक्ष्वाकुर्नभगश्चैव धृष्टः शर्यातिरेव च । नरिष्यन्तोऽथ नाभागः सप्तमो दिष्ट उच्यते ॥ २ ॥
करूषश्च पृषध्रश्च दशमो वसुमान् स्मृतः । मनोर्वैवस्वतस्यैते दश पुत्राः परंतप ॥ ३ ॥
आदित्या वसवो रुद्रा विश्वेदेवा मरुद्गणाः । अश्विनावृभवो राजन्निन्द्रस्तेषां पुरन्दरः ॥ ४ ॥
कश्यपोऽत्रिर्वसिष्ठश्च विश्वामित्रोऽथ गौतमः । जमदग्निर्भरद्वाज इति सप्तर्षयः स्मृताः ॥ ५ ॥
अत्रापि भगवज्जन्म कश्यपाददितेरभूत् । आदित्यानामवरजो विष्णुर्वामनरूपधृक् ॥ ६ ॥
संक्षेपतो मयोक्तानि सप्त मन्वन्तराणि ते । भविष्याण्यथ वक्ष्यामि विष्णोः शक्त्यान्वितानि च ॥ ७ ॥
विवस्वतश्च द्वे जाये विश्वकर्मसुते उभे । संज्ञा छाया च राजेन्द्र ये प्रागभिहिते तव ॥ ८ ॥

कथितः । महाचलः मन्दराचलः ॥ ४५ ॥ एतत् सिन्धुमथनादिचरितम् । समुद्यमः प्रयासः जातु कदाचिदपि न रिष्यते न नश्यति निष्फलो न भवति । यत् यस्मात् । परिश्रमः योनिषु परिभ्रमणं तमपहन्तीति तथाभूतम् ॥ ४६ ॥ कपटार्थं वञ्चनार्थं युवतिवेषो यस्य सः यः सुरारीन् मोहयन् अङ्घ्रिं प्रपन्नान् अमरवर्यान् सिन्धुमथ्यम् अमृतमाशयत् अपाययत् तं भगवन्तं नतोऽस्मीत्यन्वयः । कथंभूतम् । उपसृतानां शरणागतानां कामान् पूरयतीति तथा । कथंभूतम् अङ्घ्रिम् । असतां विषयिणामविषयम् अगोचरम् । भावेन गम्यं च । सिन्धोर्मथनं सिन्धुमथः तत्र जातम् आशयत् । 'अश भोजने' धातुः ण्यन्तात् लङ् । अशेः प्रत्यवसानार्थत्वात् अणिकर्तुः कर्मत्वम् अमरेति । पानस्यापि भोजने पर्यवसायित्वाद- पाययदित्यर्थः । मालिनीवृत्तम् ॥ ४७ ॥

इति श्रीमद्भागवते महापुराणेऽष्टमस्कन्धे गूढार्थदीपिन्यां द्वादशोऽध्यायः ।

त्रयोदशेऽवशिष्टानि षड्विधानि समासतः ।
मन्वन्तराणि वर्ण्यन्ते सप्तमाच्च यथाक्रमम् ॥ १ ॥

विवस्वतः सूर्यस्य । श्रुतः प्रसिद्धः मे मत्तः सकाशात् ॥१।२।३ ॥ अत्र आदित्यादयो देवा । पुरन्दरनामा इन्द्रः ॥ ४ । ५ ॥ अत्रापि मन्वन्तरे । अवरजः कनिष्ठः । धृक् । 'धृञ्' धारणे धातुः ॥ ६ ॥ ते तुभ्यम् । शक्त्या अवतारेण ॥ ७ ॥ प्राक् षष्ठस्कन्धे । तव त्वां प्रति कथिते ॥ ८ ॥

तृतीयां वडवामेके तासां संज्ञासुतास्त्रयः। यमो यमी श्राद्धदेवश्छायायाश्च सुताञ्छृणु॥ ९॥
सावर्णिस्तपती कन्या भार्या संवरणस्य या। शनैश्चरस्तृतीयोऽभूदश्विनौ वडवात्मजौ॥१०॥
अष्टमेऽन्तर आयाते सावर्णिर्भविता मनुः। निर्मोकविरजस्काद्याः सावर्णितनया नृप॥११॥
तत्र देवाः सुतपसो विरजा अमृतप्रभाः। तेषां विरोचनसुतो बलिरिन्द्रो भविष्यति॥१२॥
दत्त्वेमां याचमानाय विष्णवे यः पदत्रयम्। राद्धमिन्द्रपदं हित्वा ततः सिद्धिमवाप्स्यति॥१३॥
योऽसौ भगवता बद्धः प्रीतेन सुतले पुनः। निवेशितोऽधिके स्वर्गादधुनाऽऽस्ते स्वराडिव॥१४॥
गालवो दीप्तिमान् रामो द्रोणपुत्रः कृपस्तथा। ऋष्यशृङ्गः पितास्माकं भगवान् बादरायणः॥१५
इमे सप्तर्षयस्तत्र भविष्यन्ति स्वयोगतः। इदानीमासते राजन् स्वे स्व आश्रममण्डले॥१६॥
देवगुह्यात् सरस्वत्यां सार्वभौम इति प्रभुः। स्थानं पुरन्दराद्धृत्वा बलये दास्यतीश्वरः॥१७॥
नवमो दक्षसावर्णिर्मनुर्वरुणसम्भवः। भूतकेतुर्दीप्तकेतुरित्याद्यास्तत्सुता नृप॥१८॥
पारा मरीचिगर्भाद्या देवा इन्द्रोऽद्भुतः स्मृतः। द्युतिमत्प्रमुखास्तत्र भविष्यन्त्यृषयस्ततः॥१९॥
आयुष्मतोऽम्बुधारायामृषभो भगवत्कला। भविता येन संराद्धां त्रिलोकीं भोक्ष्यतेऽद्भुतः॥२०॥
दशमो ब्रह्मसावर्णिरुपश्लोकसुतो महान्। तत्सुता भूरिषेणाद्या हविष्मत्प्रमुखा द्विजाः॥२१॥
हविष्मान् सुकृतिः सत्यो जयो मूर्तिस्तदा द्विजाः। सुवासनविरुद्धाद्या देवाः शम्भुः सुरेश्वरः॥२२॥
विष्वक्सेनो विषूच्यां तु शम्भोः सख्यं करिष्यति। जातः स्वांशेन भगवान् गृहे विश्वसृजो विभुः॥२३
मनुर्वै धर्मसावर्णिरेकादशम आत्मवान्। अनागतास्तत्सुताश्च सत्यधर्मादयो दश॥ २४॥
विहङ्गमाः कामगमा निर्वाणरुचयः सुराः। इन्द्रश्च वैधृतस्तेषामृषयश्चारुणादयः॥ २५॥
आर्यकस्य सुतस्तत्र धर्मसेतुरिति स्मृतः। वैधृतायां हरेरंशस्त्रिलोकीं धारयिष्यति॥२६॥
भविता रुद्रसावर्णी राजन् द्वादशमो मनुः। देववानुपदेवश्च देवश्रेष्ठादयः सुताः॥२७॥
ऋतधामा च तत्रेन्द्रो देवाश्च हरितादयः। ऋषयश्च तपोमूर्तिस्तपस्व्याग्नीध्रकादयः॥२८॥

एके इति कल्पभेदेन अन्यथा सैव मूल्वाऽथ वडवा इति विरोधः स्यात्। सैव संज्ञैव। य मी यमुना तासां तिसृणांमध्ये सुतौ सुताचेत्येकशेषः॥ ९॥ सावर्णिः छायापुत्रः। तपती नाम्नी। संवरणस्य राज्ञः॥ १०॥ अन्तरे मन्वन्तरे॥ ११॥ तेषां देवानाम्॥ १२॥ यः बलिः सप्तमे। इमां महीम्। अष्टमे मन्वन्तरे राद्धं लब्धमिन्द्रपदं हित्वा सिद्धिम्॥ १३॥ स्वराट् इन्द्र इव॥ १४॥ योगतः योगप्रभावेण॥ १५॥ इदीनी त्वदीयकाले॥ १६॥ देवगुह्याद् सरस्वत्यां पत्न्यां। सार्वभौमनाम्ना अवतरिष्यति। स्थानं स्वर्गम्॥ १७। १८॥ अद्भुतनाम्ना इन्द्रः तत्र मन्वन्तरे॥ १९॥ अम्बुधारायां पत्न्याम् ऋभवो नाम। संराद्धां रक्षिताम्॥ २०॥ द्विजाः सप्तर्षयः॥ २१॥ शम्भुनामकः सुरेश्वरः इन्द्रः॥ २२॥ विष्वक्सेनो भगवान् विश्वसृजे गृहे विषूच्यां पत्न्यां जातोऽवतीर्णः सन् शम्भोः इन्द्रस्य सख्यं साहाय्यम्॥ २३॥ आत्मवान् प्रशस्तमनाः अनागता भविष्याः॥ २४॥ वैधृतिनामकः। ऋषयः सप्तर्षयः॥ २५॥ तत्र मन्वन्तरे वैधृतायां पत्न्यामवतीर्णः धर्मसेतुर्नाम। धारयिष्यति पालयिष्यति॥ २६। २७। २८॥

स्वधामाख्यो हरेरंशः साधयिष्यति तन्मनोः । अन्तरं सत्यसहसः सुनृतायाः सुतो विभुः ॥२९॥
मनुस्त्रयोदशो भाव्यो देवसावर्णिरात्मवान् । चित्रसेनविचित्राद्या देवसावर्णिदेहजाः ॥३०॥
देवाः सुकर्मसुत्रामसंज्ञा इन्द्रो दिवस्पतिः । निर्मोकतत्त्वदर्शाद्या भविष्यन्त्यृषयस्तदा ॥३१॥
देवहोत्रस्य तनय उपहर्ता दिवस्पतेः । योगेश्वरो हरेरंशो बृहत्यां सम्भविष्यति ॥३२॥
मनुर्वा इन्द्रसावर्णिश्चतुर्दशम एष्यति । उरुगम्भीरबुद्धयाद्या इन्द्रसावर्णिवीर्यजाः ॥३३॥
पवित्राश्चाक्षुषा देवाः शुचिरिन्द्रो भविष्यति । अग्निर्बाहुः शुचिः शुद्धो मागधाद्यास्तपस्विनः ॥३४॥
सत्रायणस्य तनयो बृहद्भानुस्तदा हरिः । वितानायां महाराज क्रियास्तून् वितायिता ॥३५॥
राजंश्चतुर्दशैतानि त्रिकालानुगतानि ते । प्रोक्तान्येभिर्मितः कल्पो युगसाहस्रपर्ययः ॥३६॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायामष्टमस्कन्धे मन्वन्तरानुवर्णनं नाम त्रयोदशोऽध्यायः॥१३॥

अथ चतुर्दशोऽध्यायः

राजोवाच

मन्वन्तरेषु भगवन् यथा मन्वादयस्त्विमे । यस्मिन् कर्मणि ये येन नियुक्तास्तद् वदस्व मे ॥१॥

ऋषिरुवाच

मनवो मनुपुत्राश्च मुनयश्च महीपते । इन्द्राः सुरगणाश्चैव सर्वे पुरुषशासनाः ॥ २ ॥
यज्ञादयो याः कथिताः पौरुष्यस्तनवो नृप । मन्वादयो जगद्यात्रां नयन्त्याभिः प्रचोदिताः॥३॥

सत्यसहसः सूनृता पत्नी तस्याः सुतः स्वधामा नाम स च हरेः अंशः अवतारः सन् मनोः अन्तरं मन्वन्तरं साधयिष्यति पालयिष्यति ॥ २९ ॥ देहजाः पुत्राः ॥ ३० । ३१ ॥ देवहोत्रस्य बृहत्यां पत्न्यां योगेश्वरो नाम हरेः अंशोऽवतारो भविष्यति । दिवस्पतेः इन्द्रस्य उपहर्ता उपकर्ता सन् ॥ ३२ ॥ एष्यति आगमिष्यति । वीर्यजाः पुत्राः ॥ ३३ ॥ शुचिनामकः । तपस्विनः सप्तर्षयः ॥ ३४ ॥ सत्रायणस्य वितानायां पत्न्यां बृहद्भानुसंज्ञकः तनयः सन् क्रियातन्तून् कर्मकाण्डप्रक्रियाः वितायिता विस्तारं कारयिता ॥ ३५ ॥ त्रिषु कालेषु भूतभविष्यद्वर्तमानेषु अनुगतानि प्राप्तानि एतानि ते तुभ्यं प्रोक्तानि । भूतानि षट् । वर्तमानमेकम् भविष्याणि सप्त इत्येवं चतुर्दश मन्वन्तराणि । एभिः चतुर्दशभिः मितः परिमितः कल्पो ब्रह्मैकदिवसो भवति । कथंभूतः । सहस्रमेव साहस्रं युगानां साहस्रवारं पर्ययः आवृत्तिः यस्मिन् तथाभूतः इति षड्विध[1]मन्वन्तरस्वरूपं यथा वत् कथितम् ॥ ३६ ॥

इति श्रीमद्भागवते महापुराणेऽष्टमस्कन्धे गूढार्थदीपिन्यां त्रयोदशोऽध्यायः ।

चतुर्दशेऽतिसंक्षेपान्मन्वादीनां पृथक् पृथक् ।
षण्णां कर्माणि वर्ण्यन्ते कल्पमानं च तत्पुनः ॥ १ ॥

इमे पूर्वोक्ताः येन यथा नियुक्ता तन्मे वदस्व यत्नेन । 'भासनोपसंभाषा' इति तङ् ॥ १ ॥ पुरुषेण तत्तदवतारेण शास्यन्ते नियुज्यन्ते तदधीना इत्यर्थः ॥ २ ॥ पुरुषस्य विष्णोः इमाः पौरुष्यः

---

१. मन्वन्तरं मनु[1]र्देवा[2] मनु[3]पुत्राः सुरेश्वरः[4] ।
ऋष[5]योऽशावताश्च[6] हरेः षड्विधमुच्यते ॥ (हरेः अंशावतारश्चेत्यत्रान्वेति ।)

चतुर्युगान्ते कालेन ग्रस्ताञ्छ्रुतिगणान् यथा । तपसा ऋषयोऽपश्यन् यतो धर्मः सनातनः ॥४॥
ततो धर्मं चतुष्पादं मनवो हरिणोदिताः । युक्ताः सञ्चारयन्त्यद्धा स्वे स्वे काले महीं नृप ॥५॥
पालयन्ति प्रजापाला यावदन्तं विभागशः । यज्ञभागभुजो देवा ये च तत्रान्विताश्च तैः ॥६॥
इन्द्रो भगवता दत्तां त्रैलोक्यश्रियमूर्जिताम् । भुञ्जानः पाति लोकांस्त्रीन् कामं लोके प्रवर्षति॥७॥
ज्ञानं चानुयुगं ब्रूते हरिः सिद्धस्वरूपधृक् । ऋषिरूपधरः कर्म योगं योगेशरूपधृक् ॥ ८ ॥
सर्गं प्रजेशरूपेण दस्यून् हन्यात् स्वराड्वपुः । कालरूपेण सर्वेषामभावाय पृथग्गुणः ॥ ९ ॥
स्तूयमानो जनैरेभिर्मायया नामरूपया । विमोहितात्मभिर्नानादर्शनैर्न च दृश्यते ॥१०॥
एतत् कल्पविकल्पस्य प्रमाणं परिकीर्तितम् । यत्र मन्वन्तराण्याहुश्चतुर्दश पुराविदः ॥११॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायामष्टमस्कन्धे चतुर्दशोऽध्यायः ॥ १४ ॥

अथ पञ्चदशोऽध्यायः

राजोवाच

बलेः पदत्रयं भूमेः कस्माद्धरिरयाचत । भूतेश्वरः कृपणवल्लब्धार्थोऽपि बबन्ध तम् ॥ १ ॥
एतद् वेदितुमिच्छामो महत् कौतूहलं हि नः । यज्ञेश्वरस्य पूर्णस्य बन्धनं चाप्यनागसः ॥ २ ॥

अवतारमूर्तयः आभिः मूर्तिभिः जगद्यात्रां जगत्पोषणं कुर्वन्ति ॥ ३ ॥ ऋष्यादीनां कृत्यमाह चतुर्भिः । चतुर्युगान्ते कृतयुगे कालेन शिक्षणाभावेन पूर्वं ग्रस्तान् विलुप्तान् यथा यथावत् अपश्यन् । यतो येभ्यः श्रुतिगणेभ्यः प्रवर्तते ॥ ४ ॥ ततः ऋष्युपदिष्टमार्गात् उदिताः प्रेरिता मनवः महीं प्रति धर्मं संचारयन्ति प्रवर्तयन्ति युक्ताः संयताः सन्तः ॥ ५ ॥ मनुपुत्रकृत्यमाह प्रजापाला मनुपुत्राः । तं धर्मं यावन्मन्वन्तरावसानं विभागशः पुत्रपौत्रादिक्रमेण । देवकर्माह ये च ऋष्यादयः यत्र कर्मणि अन्विताः तैः सह देवा यज्ञभागभुजो भवन्ति यत्रान्विताश्च तैरित्येव पाठः स्वामिसम्मतः ।६ ॥ इन्द्रस्य कर्माह ऊर्जितां प्रभूतां भुञ्जानः लोकान् पाति कामं यथेच्छ वर्षति च ॥ ७ ॥ अवतारकर्माह--सिद्धः कपिलादिः ज्ञानम् ऋषिः याज्ञवल्क्यादिः कर्म । दत्तात्रेयादिश्च योगं ब्रूते इत्यन्वयः ॥ ८ ॥ प्रजेशो मरीच्यादिः तेन रूपेण सर्गं करोति । स्वराड्वपुः राजविग्रहः सन् दस्यून् म्लेच्छचौरादीन् हन्ति । अभवाय विनाशाय । पृथग्विधा रज आदयो गुणाः यस्य सः ॥ ९ ॥ एभिः ऋष्यादिभिः स्तूयमानो दृश्यते । मायया मोहितचित्तैः जनैः कल्पितैः नानादर्शनैः अद्वैतप्रतिपादकैः न दृश्यते च शब्दात् द्वैतज्ञानेन भक्त्या दृश्यत एवेति निर्विवादम् ॥ १० ॥ कल्पे महाकल्पे यो विकल्पोऽवान्तरकल्पः एकदिवसात्मकः तस्य । यत्र अवान्तरकल्पे पुराविदः व्यासादयः ॥ ११ ॥

इति श्रीमद्भागवते महापुराणेऽष्टमस्कन्धे गूढार्थदीपिन्यां चतुर्दशोऽध्यायः ।

बलिर्विश्वजितो यज्ञात् वंश चक्रे जगत्त्रयम् ।
देवाः पलायिताः स्वार्गादिति पञ्चदशेऽदिशत् ॥ १ ॥

ईश्वरो भूत्वा कृपणवत् कथमयाचत । लब्धार्थोऽपि सन् तं बलिं कस्मात् बबन्धेत्यन्वयः ॥ १ ॥ पूर्णस्य याचनम् अनागसः निरपराधस्य बलेः बन्धनं च एतत् सर्वम् । यतो महत् कौतूहलम्

श्रीशुक उवाच

पराजितश्रीरसुभिश्च हापितो हीन्द्रेण राजन् भृगुभिः स जीवितः।
सर्वात्मना तानभजद् भृगून् बलिः शिष्यो महात्मार्थनिवेदनेन ॥ ३ ॥
तं ब्राह्मणा भृगवः प्रीयमाणा अयाजयन् विश्वजिता त्रिणाकम्।
जिगीषमाणं विधिनाभिषिच्य महाभिषेकेण महानुभावाः ॥ ४ ॥
ततो रथः काञ्चनपट्टनद्धो हयाश्च हर्यश्वतुरङ्गवर्णाः।
ध्वजश्च सिंहेन विराजमानो हुताशनादास हविर्भिरिष्टात् ॥ ५ ॥
धनुश्च दिव्यं पुरटोपनद्धं तूणावरिक्तौ कवचं च दिव्यम्।
पितामहस्तस्य ददौ च मालामम्लानपुष्पां जलजं च शुक्रः ॥ ६ ॥
एवं स विप्रार्जितयोधनार्थस्तैः कल्पितस्वस्त्ययनोऽथ विप्रान्।
प्रदक्षिणीकृत्य कृतप्रणामः प्रह्लादमामन्त्र्य नमश्चकार ॥ ७ ॥

अथारुह्य रथं दिव्यं भृगुदत्तं महारथः। सुस्रग्धरोऽथ संनह्य धन्वी खड्गी धृतेषुधिः ॥ ८ ॥
हेमाङ्गदलसद्बाहुः स्फुरन्मकरकुण्डलः। रराज रथमारूढो धिष्ण्यस्थ इव हव्यवाट् ॥ ९ ॥
तुल्यैश्वर्यबलश्रीभिः स्वयूथैर्दैत्ययूथपैः। पिबद्भिरिव खं दृग्भिर्दहद्भिः परिधीनिव ॥१०॥
वृतो विकर्षन् महतीमासुरीं ध्वजिनीं विभुः। ययाविन्द्रपुरीं स्वृद्धां कम्पयन्निव रोदसी ॥११॥
रम्यामुपवनोद्यानैः श्रीमद्भिर्नन्दनादिभिः। कूजद्विहङ्गमिथुनैर्गायन्मत्तमधुव्रतैः ॥१२॥

उत्कण्ठा ॥ २ ॥ युद्धे पराजिता श्रीः यस्य। असुभिश्च हापितः त्याजितः यः यतो भृगुभिः जीवितः अतः स बलिः तान् भृगूनेव सर्वात्मना अभजयित्यन्वयः। केन अर्थनिवेदनेन सर्वस्वार्पणेन महात्मा उदारचित्तः। 'उदारो दातृमहतोः' इति कोशात् ॥ ३ ॥ त्रिणाकं स्वर्गं जिगीषमाणं तं बलिं भृगवः विश्वजिता यागेन अयाजयन्नित्यन्वयः। किं कृत्वा विधिना अभिषिच्य। प्रीयमाणा प्रीतियुक्ताः ॥ ४ ॥ ततः हविर्भिः इष्टात् पूजितात् हुताशनात् अग्नेः सकाशात् रथ आस सिंहाङ्कितः ध्वज आस इन्द्राश्ववर्णा हरिता हयाश्च आसन् इति वचनव्यत्ययेनान्वयः। कथंभूतो रथः। स्वर्णपत्रेण वेष्टितः ॥ ५ ॥ किञ्च ततो धनुः आस कवचम् आस अरिक्तौ वाणपूर्णौ तूणौ इषुधी च आस्तामित्यन्वयः। पितामहः प्रह्लादः मालां शुक्रः शंखं च ददौ। तस्येति सम्बन्धसामान्यविवक्षया। षष्ठी ॥ ६ ॥ एवं विप्रैः अर्जितः सम्पादितः योधनार्थः युद्धसामग्री यस्य तैरेव कृतं स्वस्तिवाचनं च यस्य स बलिः कृतप्रणामः सन् तान् प्रदक्षिणीकृत्य प्रह्लादं नमश्चकार आमन्त्र्य पृष्ट्वा च इन्द्रपुरीं ययौ इति चतुर्थेनान्वयः ॥ ७ ॥ अथ च गमनसमये रथमारुह्य रराज कुण्डस्थोऽग्निरिव। सुस्रग्धरः विजयमालाधरः सन्नह्य कवचं धृत्वा ॥८॥ अङ्गदो बाहुभूषणम् ताभ्यां लसन्तौ बाहू यस्य। स्फुरती मकराकृती कुण्डले यस्य ॥९॥ तुल्यमैश्वर्यं नियन्तृत्वं बलं श्रीश्च येषां तैः स्वयूथैः स्वसैन्यैः दैत्यसेनापतिभिः वृतः परिधीन् दिशः ॥ १० ॥ ध्वजिनीं सेनाम्। रोदसी द्यावाभूमी स्वृद्धां समृद्धाम् ॥ ११ ॥ रम्यामिति सार्द्धम्। कूजन्ति विहङ्गमिथुनानि येषु। गायन्तो मत्ता मधुव्रता भ्रमरा येषु।

प्रवालफलपुष्पोरुभारशाखामरद्रुमैः ॥१२॥ हंससारसचक्राह्वकारण्डवकुलाकुलाः ।
नलिन्यो यत्र क्रीडन्ति प्रमदाः सुरसेविताः ॥ १३ ॥
आकाशगङ्गया देव्या वृतां परिखभूतया । प्राकारेणाग्निवर्णेन साट्टालेनोन्नतेन च ॥१४॥
रुक्मपट्टकपाटैश्च द्वारैः स्फटिकगोपुरैः । जुष्टां विभक्तप्रपथां विश्वकर्मविनिर्मिताम् ॥१५॥
सभाचत्वररथ्याढ्यां विमानैर्न्यर्बुदैर्युताम् । शृङ्गाटकैर्मणिमयैर्वज्रविद्रुमवेदिभिः ॥१६॥
यत्र नित्यवयोरूपाः श्यामा विरजवाससः । भ्राजन्ते रूपवन्नार्यो ह्यर्चिर्भिरिव वह्नयः ॥१७॥
सुरस्त्रीकेशविभ्रष्टनवसौगन्धिकस्रजाम् । यत्रामोदमुपादाय मार्ग आवाति मारुतः ॥१८॥
हेमजालाक्षनिर्गच्छद्धूमेनागुरुगन्धिना । पाण्डुरेण प्रतिच्छन्नमार्गे यान्ति सुरप्रियाः ॥१९॥
मुक्तावितानैर्मणिहेमकेतुभिर्नानापताकावलभीभिरावृताम् ।
शिखण्डिपारावतभृङ्गनादितां वैमानिकस्त्रीकलगीतमङ्गलाम् ॥ २० ॥
मृदङ्गशङ्खानकदुन्दुभिस्वनैः सतालवीणामुरजर्ष्टिवेणुभिः ।
नृत्यैः सवाद्यैरुपदेवगीतकैर्मनोरमां स्वप्रभया जितप्रभाम् ॥ २१ ॥
यां न व्रजन्त्यधर्मिष्ठाः खला भूतद्रुहः शठाः । मानिनः कामिनो लुब्धा एभिर्हीना व्रजन्ति यत्[1]॥२२॥
तां देवधानीं स वरूथिनीपतिर्बहिः समन्ताद् रुरुधे पृतन्यया ।
आचार्यदत्तं जलजं महास्वनं दध्मौ प्रयुञ्जन् भयमिन्द्रयोषिताम् ॥ २३ ॥

प्रवालादीनामुरुर्भारो यासु ताः शाखा येषां ते अमर द्रुमा येषु तैः नन्दनादिभिः रम्याम् उपवनं फलप्रधानम् । उद्यानं पुष्पप्रधानम् ॥१२॥ यत्र हंसादिकुलैः आकुलाः व्याप्ता नलिन्यः सरस्यः सन्ति यासु प्रमदाः क्रीडन्ति ॥१३॥ पुनः कीदृशीं पुरीम् । परिखाभूतया[1] देव्या गङ्गया प्राकारेण च वृतां वेष्टिताम् । अग्निवर्णेन स्वर्णमयेन । अट्टालः अट्टालिका (अटारी) ॥ १४ ॥ पुनश्च । रुक्मपट्टं स्वर्णपत्रं तज्जटितानि कपाटानि येषु तैः । गोपुरद्वारैः । प्रपथा राजमार्गाः ॥ १५ ॥ पुनश्च । चत्वराणि अङ्गणानि । रथ्याः उपमार्गाः । शृङ्गाटकाः चतुष्पथाः । वज्रं हीरकमणिः । न्यर्बुदं दशकोट्यः । उपलक्षणम् असंख्यैः ॥ १६ ॥ वयः तारुण्यम् रूपं सौकुमार्यम् । श्यामाः षोडशवर्षीयाः । रूपवन्नार्यः सुन्दरस्त्रियः ।[1]अर्चिभिः ज्वालाभिः यथा वह्नयः तथा ताः स्वांगकान्तिभिरित्यर्थः ॥१७॥ सुरस्त्रीणां केशेभ्यो गलितानां चम्पकस्रजां आमोदं गन्धमादाय वायुः आवाति वहति । आमोदो गन्धहर्षयोः इति मेदिनी ॥ १८ ॥ हेमगवाक्षेभ्यो निर्गच्छता धूमेन आच्छन्ने सुगन्धिते । सुरस्त्रियः अप्सरसः ॥ १९ ॥ पुनश्च । मुक्तावितानैः चन्द्रातपैः मणिजटितहेमध्वजैः । पताकाविलसितगृहपुरोभागैः (छज्जा) नादितां ध्वनिताम् देवाङ्गनानां कलगीतैः मगलं यस्याम् ॥ २० ॥ नगाड़े ढोल वीणा वंशी मजीरे झांझ इति आनकादीनां क्रमेणार्थाः । उपदेवाः यन्धर्वाः प्रभा तदधिष्ठत्री देवता जिता यया ॥ २१ ॥ एभिः उक्तदोषैः । यत् याम् इति । सामान्ये नपुंसकम् ॥ २२ ॥ स बलिः पृतन्यया सेनया देवधानीम् अमरावतीं । समन्तात् रुरुधे । योषितां भयं प्रयुञ्जन् उत्पादयितुं—जलजं शंखं च दध्मौ

---

१. 'ङ्यापोः' इति ह्रस्वः ।
२. 'स्थानादर्शनसङ्गेषु निलयः प्रलयेऽपि च इति निरुक्तेः ।

मघवांस्तमभिप्रेत्य बलेः परममुद्यमम् । सर्वदेवगणोपेतो गुरुमेतदुवाच ह ॥२४॥
भगवन्नुद्यमो भूयान् बलेर्नः पूर्ववैरिणः । अविषह्यमिमं मन्ये केनासीत्तेजसोर्जितः ॥
नैनं कश्चित् कुतो वापि प्रतिव्योढुमधीश्वरः ॥२५॥ पिबन्निव मुखेनेदं लिहन्निव दिशो दश ।
दहन्निव दिशो दृग्भिः संवर्ताग्निरिवोत्थितः ॥ २६ ॥
ब्रूहि कारणमेतस्य दुर्धर्षत्वस्य मद्रिपोः । ओजः सहो बलं तेजो यत एतत्समुद्यमः ॥२७॥

गुरुरुवाच

जानामि मघवञ्छत्रोरुन्नतेरस्य कारणम् । शिष्यायोपभृतं तेजो भृगुभिर्ब्रह्मवादिभिः ॥२८॥
भवद्विधो भवान् वापि वर्जयित्वेश्वरं हरिम् । नास्य शक्तःपुरःस्थातुं कृतान्तस्य यथा जनाः२९
तस्मान्निलयमुत्सृज्य यूयं सर्वे त्रिविष्टपम् । यात कालं प्रतीक्षन्तो यतः शत्रोर्विपर्ययः ॥३०॥
एष विप्रबलोदर्कः सम्प्रत्यूर्जितविक्रमः । तेषामेवापमानेन सानुबन्धो विनङ्क्ष्यति ॥३१॥
एवं सुमन्त्रितार्थास्ते गुरुणार्थानुदर्शिना । हित्वा त्रिविष्टपं जग्मुर्गीर्वाणाः कामरूपिणः ॥३२॥
देवेष्वथ निलीनेषु बलिर्वैरोचनः पुरीम् । देवधानीमधिष्ठाय वशं निन्ये जगत्त्रयम् ॥३३॥
तं विश्वजयिनं शिष्यं भृगवः शिष्यवत्सलाः । शतेन हयमेधानामनुव्रतमयाजयन् ॥३४॥
ततस्तदनुभावेन भुवनत्रयविश्रुताम् । कीर्ति दिक्षु वितन्वानः स रेज उडुराडिव ॥३५॥
बुभुजे च श्रियं स्वृद्धां द्विजदेवोपलम्भिताम् । कृतकृत्यमिवात्मानं मन्यमानो महामनाः ॥३६॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायामष्टमस्कन्धे पञ्चदशोऽध्यायः ॥ १५ ॥

वादितवानित्यन्वयः ॥ २३ ॥ अभिप्रेत्य ज्ञात्वा ह स्पष्टम् ॥ २४ ॥ मघवन्निति सार्द्धम् । नोऽस्माकम् । केन हेतुना एवं ऊर्जितः वर्द्धित आसीत् । एनं बलिं प्रतिव्योढु पराजेतुं न अधीश्वरः न समर्थः । कुतोऽपि उपायात् ॥ २५ ॥ इदं जगत् पिबन् ग्रासं कुर्वन्ति लिहन् आस्वादयन्निव । संवर्ताग्निरिव प्रलयाग्निरिव उत्थितः ॥२६॥ दुर्धर्षत्वम् औद्धत्यम् । यत इति पदमावृत्या योज्यम् । यतः ओज आदि यत ओज आदेः एतस्य बलेः समुद्यमः महोत्कर्षः तदेतस्य औद्धत्तस्य कारणम् । ओज आद्याः क्रमेण इन्द्रियमनोदेहशक्तयः ॥ २७ ॥ भृगुभिः शुक्राद्यैः स्वकीयं तेजः उपभृतं स्थापितम् । शिष्याय शिष्यं वर्धयितुम् ॥ २८ ॥ ईश्वरं हरिम् । कृतान्तस्य मृत्योः ॥ २९ ॥ त्रिविष्टमुत्सृज्य निलयमदर्शनं यात निलयं स्थानं वा यतः विपर्ययः पराभवः तं कालमिति योज्यम् ॥ ३० ॥ एष बलिः । विप्राणां बलेनैव उदर्कः उत्तरफलमुन्नतिर्यस्य । ऊर्जितः प्रचण्डः सानुबन्धः समृद्धिसहितः । विनङ्क्ष्यति पराभूतो भविष्यति ॥ ३१ ॥ अर्थानुदर्शिना परिणामदर्शिना । सुमन्त्रितार्थाः निर्णीतार्थाः गीर्वाणा देवाः जग्मुः यत्र कुत्र ॥ ३२ ॥ विरोचनपुत्रः । देवा धीयन्ते निधीयन्तेऽस्यामिति देवधानी अमरावती । अथ कार्त्स्न्येन ॥ ३३ ॥ अजाजयन् इन्द्रपदं स्थिरीकर्तुम् अनुव्रतम् अनुवर्तिनम् ॥ ३४ ॥ तदनुभावेन यज्ञप्रभावेण । विश्रुतां प्रसिद्धाम् । उडुराट् चन्द्रः ॥ ३५ ॥ उपलम्भितां प्रापिताम् । स्वृद्धां समृद्धाम् । इवशब्देन सर्वथा तदभावः सूचितः ॥ ३६ ॥

इति श्रीमद्भागवते महापुराणेऽष्टमस्कन्धे गूढार्थदीपिन्यां पञ्चदशोऽध्यायः

अथ षोडशोऽध्यायः

श्रीशुक उवाच

एवं पुत्रेषु नष्टेषु देवमातादितिस्तदा । हृते त्रिविष्टपे दैत्यैः पर्यतप्यदनाथवत् ॥ १ ॥
एकदा कश्यपस्तस्या आश्रमं भगवानगात् । निरुत्सवं निरानन्दं समाधेर्विरतश्चिरात् ॥ २ ॥
स पत्नीं दीनवदनां कृतासनपरिग्रहः । सभाजितो यथान्यायमिदमाह कुरूद्वह ॥ ३ ॥
अप्यभद्रं न विप्राणां भद्रे लोकेऽधुनाऽऽगतम् । न धर्मस्य न लोकस्य मृत्योश्छन्दानुवर्तिनः ॥ ४ ॥
अपि वा कुशलं किंचिद् गृहेषु गृहमेधिनि । धर्मस्यार्थस्य कामस्य यत्र योगो ह्ययोगिनाम् ॥५॥
अपि वातिथयोऽभ्येत्य कुटुम्बासक्तया त्वया । गृहादपूजिता याताः प्रत्युत्थानेन वा क्वचित् ॥६॥
गृहेषु येष्वतिथयो नार्चिताः सलिलैरपि । यदि निर्यान्ति ते नूनं फेरुराजगृहोपमाः ॥ ७ ॥
अप्यग्नयस्तु वेलायां न हुता हविषा सति । त्वयोद्विग्नधिया भद्रे प्रोषिते मयि कर्हिचित् ॥८॥
यत्पूजया कामदुघान् याति लोकान् गृहान्वितः । ब्राह्मणोऽग्निश्च वै विष्णोः सर्वदेवात्मनो मुखम्
अपि सर्वे कुशलिनस्तव पुत्रा मनस्विनि । लक्षयेऽस्वस्थमात्मानं भवत्या लक्षणैरहम् ॥१०॥

अदितिरुवाच

भद्रं द्विजगवां ब्रह्मन् धर्मस्यास्य जनस्य च । त्रिवर्गस्य परं क्षेत्रं गृहमेधिन् गृहा इमे ॥११॥
अग्नयोऽतिथयो भृत्या भिक्षवो ये च लिप्सवः । सर्वे भगवतो ब्रह्मन्ननुध्यानान्न रिष्यति ॥१२॥

षोडशे पुत्रदुःखेन शोचन्त्या भार्ययाऽर्थितः ।
कश्यपस्तद्विशोकार्थं प्राह दिव्यं पयोव्रतम् ॥

नष्टेषु निलीनत्वाददर्शनं गतेषु । 'णश् अदर्शने धातुः ॥ १ ॥ विरतो निवृत्तः सन् । भगवान् भगवत्तत्त्वज्ञः तस्या अदितेः ॥ २ ॥ स कश्यपः । कृतमासनपरिग्रहणं येन । सभाजितः सत्कृतः । यथान्यायं यथोचितम् ॥ ३ ॥ अपीति संभावनायाम् । विप्रादीनामभद्रम् अकुशलं नागतं न प्राप्तं किम् । मृत्योः छन्दानुवर्तिनः वशवर्तिनः लोकस्य अभद्रं नागतं किम् । छन्दमिच्छामनुवर्तते तथा । हे भद्रे ॥ ४ ॥ हे गृहस्वामिनि । धर्मादेः किञ्चित् अकुशलमिति काक्वा प्रश्नः । यत्र गृहेषु अयोगिनां संसारिणामेव योगः आसक्तिर्भवति न तु योगिनाम् ॥ ५ ॥ अपि किं वा अतिथयः गृहे अभ्येत्य त्वया अपूजिताः याता गताः किम् । वा अप्यर्थे प्रत्युत्थानेनापि न पूजिताः किमुत अन्नादिना ॥ ६ ॥ फेरुः शृगालः तद्बिलोपमाः धर्मकर्महीनत्वात् श्मशानतुल्या इत्यर्थः ॥ ७ ॥ हे भद्रे । मयि प्रोषिते परदेशं गते सति त्वया वेलाया होमसमयेऽपि अग्नयो न हुताः किम् । हविषा घृतादिना ॥ ८ ॥ यस्य अग्नेः ब्राह्मणस्य पूजया कामदुघान् पुण्यलोकान् याति । कामान् दुहन्ति पूरयन्तीति तथा तान् गृहान्वितो गृहस्थः । आत्मनः मूर्तेः ॥ ९ ॥ भवत्या आत्मानं मनः इत्यत्र योज्यम् । लक्षणैः मुखमालिन्यादिभिः ॥ १० ॥ हे गृहमेधिन् गृहस्वामिन् । द्विजादीनां भद्रमेव । किञ्च इमे त्वदीया गृहाः त्रिवर्गस्य परं क्षेत्रमुत्पत्तिस्थानम् अतः सोऽपि न हीयते किन्तु यथावत् वर्तते इत्यर्थः ॥ ११ ॥ अग्न्यादयोऽपि होमादिना सम्पूजिताः सन्ति । अतः किञ्चिदपि न रिष्यति न हीयते सर्वं सम्पद्येत ॥१२॥

को नु मे भगवान् कामो न सम्पद्येत मानसः । यस्या भवान् प्रजाध्यक्ष एवं धर्मान् प्रभाषते।१३।

तवैव मारीच मनःशरीरजाः प्रजा इमाः सत्त्वरजस्तमोजुषः ।
समो भवांस्तास्वसुरादिषु प्रभो तथापि भक्तं भजते महेश्वरः ॥१४॥

तस्मादीश भजन्त्या मे श्रेयश्चिन्तय सुव्रत । हृतश्रियो हृतस्थानान् सपत्नैः पाहि नः प्रभो॥१५॥
परैर्विवासिता साहं मग्ना व्यसनसागरे । ऐश्वर्यं श्रीर्यशः स्थानं हृतानि प्रबलैर्मम ॥१६॥
यथा तानि पुनः साधो प्रपद्येरन् ममात्मजाः । तथा विधेहि कल्याणं धिया कल्याणकृत्तम ।१७।

श्रीशुक उवाच

एवमभ्यर्थितोऽदित्या कस्तामाह स्मयन्निव । अहो मायाबलं विष्णोः स्नेहबद्धमिदं जगत् ॥१८॥
क्व देहो भौतिकोऽनात्मा क्व चात्मा प्रकृतेःपरः। कस्य के पतिपुत्राद्या मोह एव हि कारणम्।१९।
उपतिष्ठस्व पुरुषं भगवन्तं जनार्दनम् । सर्वभूतगुहावासं वासुदेवं जगद्गुरुम् ।२०॥
स विधास्यति ते कामान् हरिर्दीनानुकम्पनः । अमोघा भगवद्भक्तिर्नेतरेति मतिर्मम ॥२१॥

अदितिरुवाच

केनाहं विधिना ब्रह्मन्नुपस्थास्ये जगत्पतिम् । यथा मे सत्यसंकल्पो विदध्याच्च मनोरथम्।२२।
आदिश त्वं द्विजश्रेष्ठ विधिं तदुपधावनम् । आशु तुष्यति मे देवः सीदन्त्याःसह पुत्रकैः ॥२३॥

कश्यप उवाच

एतन्मे भगवान् पृष्टः प्रजाकामस्य पद्मजः । यदाह ते प्रवक्ष्यामि व्रतं केशवतोषणम् ॥२४॥
फाल्गुनस्यामले पक्षे द्वादशाहं पयोव्रतः । अर्चयेदरविन्दाक्षं भक्त्या परमयान्वितः ॥२५॥
सिनीवाल्यां मृदाऽऽलिप्य स्नायात् क्रोडविदीर्णया । यदि लभ्येत वै स्रोतस्येतं मन्त्रमुदीरयेत्२६

मानसः कामो मनोरथः । यस्याः मे । प्रभाषते उपदिशति ॥ १३ ॥ हे मारीच मरीचिपुत्र कश्यप। इमाः प्रजाः सत्त्वादिप्रधानाः तासु यद्यपि भवान् समः तथापि त्वं भक्तजनं भज कृपाविषयीकुरु यथा परमेश्वरः भजते अनुवर्तत तथा । सत्त्वादिगुणान् जुषन्ति आश्रयन्तीति तथा ॥ १४ ॥ सुष्ठु व्रतं भगवत्पूजालक्षणं यस्य तत्सम्बुद्धौ हे सुव्रत । सपत्नैः शत्रुभिः हृतस्थानान् नः पाहि । बहुवचनं पुत्राभिप्रायम् ॥ १५ ॥ परैः शत्रुभिः विवासिता निष्कासिता व्यसनं दुःखम् ॥१६॥ तानि ऐश्वर्यादीनि । कल्याणं शुभसाधनम् । प्रपद्येरन् प्राप्नुयुः ॥१७॥ कः प्रजापतिः कश्यपः । स्मयन् विस्मयन्निव ॥१८॥ अनात्मा आत्मभिन्नः जडः । परो भिन्नः । मोहो देहाध्यासलक्षणः ॥ १९ ॥ उपतिष्ठस्व भजस्व । गुहा अन्तःकरणं तत्र निवासो यस्य तम् ॥ २० ॥ स हरिः । अमोघा सफला । इतरा निष्फला । कामान् मनोरथान् ॥ २१ ॥ उपस्थास्ये भजेयम् ॥ २२ ॥ तस्य हरेः उपधावनं सेवाविषयकं विधिं प्रकारम् । आदिश उपदिश । सीदन्त्याः क्लिश्यन्त्याः । पुत्रकैः अनुकम्पायां कन् ॥ २३ ॥ पद्मजः ब्रह्मा मे मया पृष्टः सन् यत् आह तदेतदिति योज्यम् । ते तुभ्यम् अत्र यथेत्यपपाठः ॥ २४ ॥ अमले शुक्ले पक्षे प्रतिपदमारभ्य ॥ २५ ॥ सिनीवाली दृष्टचन्द्रा अमावास्या तस्याम् । क्रोडविदीर्णया वराहोत्खातया

त्वं देव्यादिवराहेण रसायाः स्थानमिच्छता । उद्धृतासि नमस्तुभ्यं पाप्मानं मे प्रणाशय ॥२७॥
निर्वर्तितात्मनियमो देवमर्चेत् समाहितः । अर्चायां स्थण्डिले सूर्ये जले वह्नौ गुरावपि ॥२८॥
नमस्तुभ्यं भगवते पुरुषाय महीयसे । सर्वभूतनिवासाय वासुदेवाय साक्षिणे ॥२९॥
नमोऽव्यक्ताय सूक्ष्माय प्रधानपुरुषाय च । चतुर्विंशद्गुणज्ञाय गुणसंख्यानहेतवे ॥३०॥
नमो द्विशीर्ष्णे त्रिपदे चतुःशृङ्गाय तन्तवे । सप्तहस्ताय यज्ञाय त्रयीविद्यात्मने नमः ॥३१॥
नमः शिवाय रुद्राय नमः शक्तिधराय च । सर्वविद्याधिपतये भूतानां पतये नमः ॥३२॥
नमो हिरण्यगर्भाय प्राणाय जगदात्मने । योगैश्वर्यशरीराय नमस्ते योगहेतवे ॥३३॥
नमस्त आदिदेवाय साक्षिभूताय ते नमः । नारायणाय ऋषये नराय हरये नमः ॥३४॥
नमो मरकतश्यामवपुषेऽधिगतश्रिये । केशवाय नमस्तुभ्यं नमस्ते पीतवाससे ॥३५॥
त्वं सर्ववरदः पुंसां वरेण्य वरदर्षभ । अतस्ते श्रेयसे धीराः पादरेणुमुपासते ॥३६॥
अन्ववर्तन्त यं देवाः श्रीश्च तत्पादपद्मयोः । स्पृहयन्त इवामोदं भगवान् मे प्रसीदताम् ॥३७॥
एतैर्मन्त्रैर्हृषीकेशमावाहनपुरस्कृतम् । अर्चयेच्छ्रद्धया युक्तः पाद्योपस्पर्शनादिभिः ॥३८॥

मृदा देहमालिप्य स्रोतसि स्नायात् इमं मन्त्रं च जपेदित्यन्वयः ॥२६॥ हे देवि रसायाः रसातलात् ॥ २७॥ निर्वर्तितः सम्पादितः नियमः नित्यनैमित्तिको येन सः। स्थण्डिले वालुकानिर्मितवेद्याम् ॥ २८ ॥ महीयसे ज्यायसे ॥ २९ ॥ गुणाः तत्त्वानि तेषां संख्यानं यत्र गुणसंख्यानं सांख्यशास्त्रं तस्य हेतवे प्रवर्तकाय ॥३०॥ वृषभरूपधर्माय नमः । त्रयीविद्यायामात्मा स्वरूपं यस्य तस्मै । तन्तवे फलविस्तारकाय

चत्वारि शृङ्गा वेदास्तु पादास्त्रिसवनानि च
प्रायणीयं शिरस्त्वेकमन्यच्चोदयनीयकम् ॥१॥

हस्तास्तु सप्तच्छन्दांसि तैर्गृह्णाति फलान्यसौ ।
मन्त्रब्राह्मणकल्पैस्तु त्रिधा बद्ध इतीर्यते ॥२॥

शस्त्रोद्गातृस्तुतिरवैः रोरवीत्यृत्विजो मुखात् ।
वृषभो महान् स्वधर्मत्वात् देवस्तु फलभावनात् ॥३१।१॥

॥३२॥ प्राणाय सूत्रात्मने । प्रकृतिमहत्तत्त्वयोर्मध्यावस्था सूत्रं क्रियाशक्तिप्रधानम् प्राणोऽपि तदेव प्राणस्य हि क्रियाशक्तिः इत्युक्तेः । महत्तत्त्वं च ज्ञानशक्तिप्रधानम् इत्यनयोर्भेदश्च ज्ञेय. ॥३३।३४॥ नीलमणिरिव श्यामं वपुर्यस्य तस्मै ॥ ३५ ॥ ते पादरेणुमित्यन्वयः ॥ ३६ ॥ पादपद्मयोः आमोदं गन्धं स्पृहयन्त इव देवादयः यम् असेवन्त स प्रसीदतामित्यन्वयः । मे मह्यम् ॥३७॥उपस्पर्शनमाचमनम् ॥ ३८॥

धर्मस्तु यज्ञरूपेण स्तूयतेऽनेन तत्त्वतः ।
तथा च श्रुति : चत्वारि—शृङ्गा त्रयो अस्य पादाः द्वे शीर्षे सप्तहस्तासो अस्य ।
त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यान् आविवेश ।

अर्चित्वा गन्धमाल्याद्यैः पयसा स्नापयेद् विभुम्। वस्त्रोपवीताभरणपाद्योपस्पर्शनैस्ततः।
गन्धधूपादिभिश्चार्चेद् द्वादशाक्षरविद्यया ॥३९॥
शृतं पयसि नैवेद्यं शाल्यन्नं विभवे सति। ससर्पिः सगुडं दत्त्वा जुहुयान्मूलविद्यया ॥४०॥
निवेदितं तद्भक्ताय दद्याद् भुञ्जीत वा स्वयम्। दत्त्वाऽऽचमनमर्चित्वा ताम्बूलं च निवेदयेत्॥४१॥
जपेदष्टोत्तरशतं स्तुवीत स्तुतिभिः प्रभुम्। कृत्वा प्रदक्षिणं भूमौ प्रणमेद् दण्डवन्मुदा ॥४२॥
कृत्वा शिरसि तच्छेषां देवमुद्वासयेत् ततः। द्व्यवरान् भोजयेद् विप्रान् पायसेन यथोचितम्॥४३॥
भुञ्जीत तैरनुज्ञातः शेषं सेष्टः सभाजितैः। ब्रह्मचार्यथ तद्रात्र्यां श्वोभूते प्रथमेऽहनि ॥४४॥
स्नातः शुचिर्यथोक्तेन विधिना सुसमाहितः। पयसा स्नापयित्वार्चेद् यावद्व्रतसमापनम् ॥४५॥
पयोभक्षो व्रतमिदं चरेद् विष्ण्वर्चनादृतः। पूर्ववज्जुहुयादग्निं ब्राह्मणांश्चापि भोजयेत् ॥४६॥
एवं त्वहरहः कुर्याद् द्वादशाहं पयोव्रतः। हरेराराधनं होममर्हणं द्विजतर्पणम् ॥४७॥
प्रतिपद्दिनमारभ्य यावच्छुक्लत्रयोदशी। ब्रह्मचर्यमधःस्वप्नं स्नानं त्रिषवणं चरेत् ॥४८॥
वर्जयेदसदालापं भोगानुच्चावचांस्तथा। अहिंस्रः सर्वभूतानां वासुदेवपरायणः ॥४९॥
त्रयोदश्यामथो विष्णोः स्नपनं पञ्चकैर्विभोः। कारयेच्छास्त्रदृष्टेन विधिना विधिकोविदैः।
पूजां च महतीं कुर्याद् वित्तशाठ्यविवर्जितः ॥५०॥ चरुं निरूप्य पयसि शिपिविष्टाय विष्णवे।
शृतेन तेन पुरुषं यजेत सुसमाहितः। नैवेद्यं चातिगुणवद् दद्यात् पुरुषतुष्टिदम् ॥५१॥
आचार्यं ज्ञानसम्पन्नं वस्त्राभरणधेनुभिः। तोषयेदृत्विजश्चैव तद् विद्ध्याराधनं हरेः ॥५२॥

अर्चित्वेति सार्द्धम्। माल्यं पुष्पम्। द्वादशाक्षर विद्यया मन्त्रेण। पयसा पञ्चामृतेन स्नापयेत् ततश्च अर्चेदित्यन्वयः ॥ ३९ ॥ विभवे धनिकत्वे सति पयसि शृतं दुग्धपक्वं शाल्यन्नं पायसं समर्प्य तेन जुहुयादित्यन्वयः। विद्यया उक्तमन्त्रेण ॥ ४० ॥ यत् निवेदितं तत् भक्ताय दद्यात् स्वयं च भुञ्जीतेत्यन्वयः। चार्थे वा शब्दः ॥ ४१ ॥ भूमौ दण्डवदित्यन्वयः ॥ ४२ ॥ शेषां निर्माल्यम्। उद्वासयेत् विसर्जयेत्। द्वौ अवरौ अधिकौ येषां तान्। द्वादश द्वाविंशतिः द्वात्रिंशदित्येवंरूपान्। यद्वा। द्वौ अवरौ न्यूनौ येषां तान् त्र्यादीन्। इति वंशीधरी। यथोचितं श्रद्धापूर्वकम् ॥४३॥ सभाजितैः पूजितैः तैः। शेषं शेषान्नम्। अथ च ब्रह्मचारी भूत्वा शयीतेति शेषः। इष्टैः बन्धुभिः सहितः। यस्मिन् दिने व्रतमारब्धं तद्रात्र्यां श्वोभूते प्रभाते सति प्रथमेऽहनि प्रतिपदि। पूर्ववत् कुर्यात् ॥ ४४ ॥ यथोक्तेन प्रथमदिनसदृशेन ॥ ४५ ॥ पयः गोक्षीरं भक्षो भोजनं यस्य 'व्रतं क्षीरादिगोभवम्' इति स्मृतेः। अर्चने आदृतः निष्ठावान् ॥४६।४७॥ त्रिषवणं त्रिकालम् ॥ ४८ ॥ अहिंस्रः मनसा वाचा च किमुत कर्मणा ॥ ४९ ॥ त्रयोदश्यामिति सार्द्धम्। पञ्चकैः पञ्चामृतैः पञ्च कानि घृतादीनि यस्मिन्।[1] कं जलं कं धृतं शिरः इति कोशात्। कोविदैः विधिज्ञैः ॥ ५० ॥ चरुमिति सार्द्धम्। चरन्ति भक्षन्ति देवा यमिति चरुः घृतं पयसि निरूप्य क्षीरे कृत्वा विष्णवे जुहुयादिति शेषः। शिपिविष्टः निरतिशयतेजोवान्। शिपिषु रश्मिषु पशुषु जीवेषु वा

---

१. गोदुग्धेनैव दध्ना गोघृतेन समन्वितम्। गङ्गाजलेन मधुना युक्तं पञ्चामृतं प्रियम् ॥ १ ॥

भोजयेत् तान् गुणवता सदन्नेन शुचिस्मिते । अन्यांश्च ब्राह्मणान् शक्त्या ये च तत्र समागताः॥५३
दक्षिणां गुरवे दद्यादृत्विग्भ्यश्च यथार्हतः । अन्नाद्येनाश्वपाकांश्च प्रीणयेत्समुपागतान् ॥५४॥
भुक्तवत्सु च सर्वेषु दीनान्धकृपणेषु च । विष्णोस्तत्प्रीणनं विद्वान् भुञ्जीत सह बन्धुभिः॥५५॥
नृत्यवादित्रगीतैश्च स्तुतिभिः स्वस्तिवाचकैः । कारयेत्तत्कथाभिश्च पूजां भगवतोऽन्वहम्॥५६॥
एतत्पयोव्रतं नाम पुरुषाराधनं परम् । पितामहेनाभिहितं मया ते समुदाहृतम् ॥५७॥
त्वं चानेन महाभागे सम्यक् चीर्णेन केशवम् । आत्मना शुद्धभावेन नियतात्मा भजाव्ययम्॥५८॥
अयं वै सर्वयज्ञाख्यः सर्वव्रतमिति स्मृतम् । तपःसारमिदं भद्रे दानं चेश्वरतर्पणम् ॥५९॥
त एव नियमाः साक्षात्त एव च यमोत्तमाः । तपो दानं व्रतं यज्ञो येन तुष्यत्यधोक्षजः ॥६०॥
तस्मादेतद् व्रतं भद्रे प्रयताऽऽश्रद्धया चर । भगवान् परितुष्टस्ते वरानाशु विधास्यति ॥६१॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायामष्टमस्कन्धेऽदितिपयोव्रतकथनं नाम षोडशोऽध्यायः

अथ सप्तदशोऽध्यायः

श्रीशुक उवाच

इत्युक्ता सादिती राजन् स्वभर्त्रा कश्यपेन वै । अन्वतिष्ठद् व्रतमिदं द्वादशाहमतन्द्रिता ॥१॥
चिन्तयन्त्येकया बुद्ध्या महापुरुषमीश्वरम् । प्रगृह्येन्द्रियदुष्टाश्वान् मनसा बुद्धिसारथिः ॥२॥
मनश्चैकाग्रया बुद्ध्या भगवत्यखिलात्मनि । वासुदेवे समाधाय चचार ह पयोव्रतम् ॥३॥
तस्याः प्रादुरभूत् तात भगवानादिपूरुषः । पीतवासाश्चतुर्बाहुः शङ्खचक्रगदाधरः ॥४॥

प्रविष्टः अन्तर्यामी ॥ ५१।५२ ॥ सदन्नेन पायसापूपसंयावादिना । गुणवता षड्रसयुक्तेन[1] । शुचि मन्दम् । ये च तत्र भोजनकाले समागताः तानपि भोजयेत् न तु तिरस्कुर्यादित्यर्थः ॥ ५३ ॥ श्वपाकान् चाण्डालादीनभिव्याप्य सर्वान् तर्पयेत् । अन्नमाद्यं भक्ष्यं भोज्यं च ॥ ५४ ॥ प्रीणनं तुष्टिकरं विद्वान् जानन् ॥ ५५ ॥ अन्वहं प्रतिदिनम् ॥ ५६ ॥ यत् अभिहितं कथितं तत् ते तुभ्यं समुदाहृतम् उपदिष्टम् ॥५७॥ चीर्णेन अनुष्ठितेन । आत्मना मनसा । नियतात्मा स्थिरचित्ता ॥ ५८ ॥ यज्ञाख्यः यज्ञफलदः व्रतं व्रतफलदम् । सारं श्रेष्ठं तपः सारं श्रेष्ठं दानं च। किञ्च ईश्वरं तर्पयति प्रीणयतीति तथा । एतेन यज्ञसारदानसारव्रतसारशब्दानामिदमेव वाच्यमिति द्योतितम् ॥ ५९ ॥ येन यैश्चेति येन । 'नपुंसकमनपुँसकेन' इत्येकशेषः ॥ ६० ॥ आचर कुरु । विधास्यति दास्यति । 'धात्वर्थं बाधते कश्चित् । इति नियमात् । विपूर्वो धा करोत्यर्थे ॥ ६१ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे गूढार्थदीपिन्यां षोडशोऽध्यायः ॥ १६ ॥

व्रते सप्तदशे पूर्णे हरिस्तत्कार्यसिद्धये
आविरासीत्ततोऽदित्यां ब्रह्मणा च तया स्तुतः ॥

अतन्द्रिता निरलसा ॥ १ ॥ चिन्तेति युग्मम् । बुद्धिरेव सारथिर्यस्याः सा अदितिः मनसा प्रग्रहरूपेण इन्द्रियाश्वान् वशीकृत्य ईश्वरं चिन्तयन्ती व्रतं चचारेत्यन्वयः । ह हर्षेण ॥२।३॥ तस्या अग्रे

---

१. सर्वरसाभ्यासो बलकराणाम् इति चरकः ।

तं नेत्रगोचरं वीक्ष्य सहसोत्थाय सादरम् । ननाम भुवि कायेन दण्डवत्‌ प्रीतिविह्वला ॥५॥

सोत्थाय बद्धाञ्जलिरीडितुं स्थिता नोत्सेह आनन्दजलाकुलेक्षणा ।
बभूव तूष्णीं पुलकाकुलाकृतिस्तद्दर्शनात्युत्सवगात्रवेपथुः ॥ ६ ॥
प्रीत्या शनैर्गद्गदया गिरा हरिं तुष्टाव सा देव्यदितिः कुरूद्वह ।
उद्वीक्षती सा पिबतीव चक्षुषा रमापतिं यज्ञपतिं जगत्पतिम् ॥ ७ ॥

अदितिरुवाच

यज्ञेश यज्ञपुरुषाच्युत तीर्थपाद तीर्थश्रवः श्रवणमङ्गलनामधेय ।
आपन्नलोकवृजिनोपशमोदयाद्य शं नः कृधीश भगवन्नसि दीननाथः ॥ ८ ॥
विश्वाय विश्वभवनस्थितिसंयमाय स्वैरं गृहीतपुरुशक्तिगुणाय भूम्ने ।
स्वस्थाय शश्वदुपबृंहितपूर्णबोधव्यापादितात्मतमसे हरये नमस्ते ॥ ९ ॥
आयुः परं वपुरभीष्टमतुल्यलक्ष्मीर्द्योभूरसाः सकलयोगगुणास्त्रिवर्गः ।
ज्ञानं च केवलमनन्त भवन्ति तुष्टात् त्वत्तो नृणां किमु सपत्नजयादिराशीः॥१०॥

श्रीशुक उवाच

अदित्यैवं स्तुतो राजन् भगवान् पुष्करेक्षणः । क्षेत्रज्ञः सर्वभूतानामिति होवाच भारत ॥११॥

श्रीभगवानुवाच

देवमातर्भवत्या मे विज्ञातं चिरकाङ्क्षितम् । यत् सपत्नैर्हृतश्रीणां च्यावितानां स्वधामतः॥१२॥

इति शेषः ॥ ४ ॥ गोचरं विषयम् ॥ ५ ॥ विह्वलत्वात् सा अदितिः उत्थाय केवलं स्थिता सती तूष्णीं बभूव ईडितुं स्तोतुं च न उत्सेहे न शशाकेत्यन्वयः । कथंभूता सा आनन्दाश्रुभिः आकुले व्याप्ते ईक्षणे यस्याः । पुनश्च । पुलकैः[१] रोमाञ्चैः आकुला आकृतिः देहो यस्याः । पुनश्च अत्युत्सवेन आनन्दाधिक्येन शरीरे कम्पा यस्याः सा ॥६॥ सा अदितिः शनैः तुष्टाव पुनश्च सा चक्षुषा पिबन्तीव अन्तःप्रवेशयन्तीव तम् उद्वीक्षमाणा बभूवेति क्रियाभेदात् सेत्यस्य न पुनरुक्तिः ॥ ७ ॥ हे आद्य ! त्वं दीननाथोऽसि अतः नोऽस्माकं शं कृधि सुखं कुरु । दशभिः सम्बोधनैः तवाशक्यं किमपि नास्तीति सूचितम् । आपन्नलोकस्य शरणागतजनस्य दुःखोपशमनाय उदयः प्राकट्यं यस्य तत्सम्बुद्धौ । हे आद्य । तीर्थं गङ्गा पादे यस्य । तीर्थमन्तःकरणशोधकं पावनं च श्रवः यशो यस्य ॥ ८ ॥ हे भगवन् । विश्वाय विश्वरूपाय ते नमः इत्यन्वयः । कथंभूताय । विश्वस्य सृष्ट्याद्यर्थं स्वेच्छया गृहीताः प्रकृतेः गुणाः येन तस्मै । किञ्च शश्वत् उपबृंहितो नित्योर्जितो यः पूर्णबोधः तेन व्यापादितं निरस्तम् आत्मनां जीवानां तमोऽज्ञानं येन तस्मै । भूम्नै व्यापकाय ॥९॥ हे अनन्त त्वत्तो नृणामायुरादयः यदा सुलभा भवन्ति तदा सपत्नजयादिरूपा आशीः सम्पत् सुलभा भवतीति किमुत वक्तव्यम् । परमायुः ब्रह्मायुः । द्यौः स्वर्गः रसा अधोलोकाः । योगगुणा अणिमादयः ॥ १० ॥ पुष्करं कमलम् । ह स्फुटम् ॥ ११ ॥ सपत्नैः स्वर्गात् च्यावितानां पुत्राणां सम्बन्धि यत् भवत्या चिरकांक्षितं स्वर्गलाभादि तन्मे मया विज्ञातमि-

---

१. पुलकः कृमिप्रभेदे रोमाञ्चे' इति मेदिनी ।

तान् विनिर्जित्य समरे दुर्मदानसुरर्षभान् । प्रतिलब्धजयश्रीभिः पुत्रैरिच्छस्युपासितुम् ॥१३॥
इन्द्रज्येष्ठैः स्वतनयैर्हतानां युधि विद्विषाम् । स्त्रियो रुदन्तीरासाद्य द्रष्टुमिच्छसि दुःखिताः॥१४॥
आत्मजान् सुसमृद्धांस्त्वं प्रत्याहृतयशःश्रियः । नाकपृष्ठमधिष्ठाय क्रीडतो द्रष्टुमिच्छसि ॥१५॥

प्रायोऽधुना तेऽसुरयूथनाथा अपारणीया इति देवि मे मतिः ।
यत्तेऽनुकूलेश्वरविप्रगुप्ता न विक्रमस्तत्र सुखं ददाति ॥१६॥

अथाप्युपायो मम देवि चिन्त्यः संतोषितस्य व्रतचर्यया ते ।
ममार्चनं नार्हति गन्तुमन्यथा श्रद्धानुरूपं फलहेतुकत्वात् ॥१७॥
त्वयार्चितश्चाहमपत्यगुप्तये पयोव्रतेनानुगुणं समीडितः ।
स्वांशेन पुत्रत्वमुपेत्य ते सुतान् गोप्तास्मि मारीचतपस्यधिष्ठितः ॥१८॥

उपधाव पतिं भद्रे प्रजापतिमकल्मषम् । मां च भावयती पत्यावेवंरूपमवस्थितम् ॥१९॥
नैतत् परस्मा आख्येयं पृष्टयापि कथंचन । सर्वं सम्पद्यते देवि देवगुह्यं सुसंवृतम् ॥२०॥

श्रीशुक उवाच

एतावदुक्त्वा भगवांस्तत्रैवान्तरधीयत । अदितिर्दुर्लभं लब्ध्वा हरेर्जन्मात्मनि प्रभोः ।
उपाधावत् पतिं भक्त्या परया कृतकृत्यवत् ॥२१॥ स वै समाधियोगेन कश्यपस्तदबुध्यत ।
प्रविष्टमात्मनि हरेरंशं ह्यवितथेक्षणः ॥२२॥ सोऽदित्यां वीर्यमाधत्त तपसा चिरसम्भृतम् ।
समाहितमना राजन् दारुण्यग्निं यथानिलः ॥२३॥
अदितेर्धिष्ठितं गर्भं भगवन्तं सनातनम् । हिरण्यगर्भो विज्ञाय समीडे गुह्यनामभिः ॥२४॥

त्यन्वयः ॥ १२ ॥ पुत्रैः सह उपासितुम् एकत्र स्थातुमिच्छसि । उप आधिक्येन । प्रतिलब्धः पुनः प्राप्तः जयः श्रीश्च यैस्तैः ॥ १३ ॥ आसाद्य मृतपतिसमीपम् प्राप्य रुदन्तीः स्त्रीः द्रष्टुम् ॥१४॥ प्रत्याहृतं पुनरानीतं यशः श्रीश्च यैस्तान् । नाकपृष्ठं स्वर्गम् ॥ १५॥ अपारणीयाः अनतिक्रमणीयाः अजेयाः । प्रायो झटिति यत् यतः ते । अनुकूलः ईश्वरः कालो येषां तैः विप्रैः गुप्ता । यद्वा । ईश्वरैः समर्थैः । यूथनाथाः सेनापतयः तत्र तेषु पराक्रमः । न सुखं न सुखहेतुः न स्यात् ॥१६॥ यद्यपि न विक्रमकालः अथापि । ममार्चनं अन्यथा गन्तुं विफलीभवितुम् नार्हति इच्छानुसारेण फलजनकत्वात् ॥१७॥अनुगुणं यथोचितम् । मारीचतपसि कश्यपतेजसि अधिष्ठितः सन् पुत्रत्वमुपेत्य ते सुतान् गोप्तास्मीत्यन्वयः ॥ १८ ॥ उपधाव भजस्व एवं रूपं सम्प्रति दर्शितरूपसदृशम् भावयती चिन्तयन्ती सती ॥१९॥ परस्मै कस्मैचिदपि शत्रवे वा । गुह्यं रहस्यं कार्यं सुसंवृतं गुप्तं सदेव सिध्यति ॥२०॥ एतावदिति सार्द्धम् । अन्तरधीयत अन्तर्हितवान् । 'धीङ्' धारणे धातुः दिवादिः । कृतकृत्यवन्मन्यमाना सा अदितिः तं पतिम् उपाधावत् अभजत् ॥ २१ ॥ तत् तदा । अवितथेक्षणः अमोघदृष्टिः हरेरंशमबुध्यत ॥ २२ ॥ वीर्यं भगवत्तेजः । यथा वायुः दारुणि काष्ठे संघर्षेण पूर्वसिद्धमेव अग्निमाधत्ते प्रकटीकरोति तथा आधत्तेति योज्यम् । एतेन शुक्रसम्बन्धो निरस्तः ॥ २३ ॥ गर्भं उदरे धिष्ठितम् अधिष्ठितं प्रविष्टम् गुह्यनामभिः वेदोक्तना-

ब्रह्मोवाच

जयोरुगाय भगवन्नुरुक्रम नमोऽस्तु ते । नमो ब्रह्मण्यदेवाय त्रिगुणाय नमो नमः ॥२५॥
नमस्ते पृश्निगर्भाय वेदगर्भाय वेधसे । त्रिनाभाय त्रिपृष्ठाय शिपिविष्टाय विष्णवे ॥२६॥

त्वमादिरन्तो भुवनस्य मध्यमनन्तशक्तिं पुरुषं यमाहुः ।
कालो भवानाक्षिपतीश विश्वं स्रोतो यथान्तःपतितं गभीरम् ॥२७॥
त्वं वै प्रजानां स्थिरजङ्गमानां प्रजापतीनामसि सम्भविष्णुः ।
दिवौकसां देव दिवश्च्युतानां परायणं नौरिह मज्जतोऽप्सु ॥२८॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायामष्टमस्कन्धे वामनप्रादुर्भावे सप्तदशोऽध्यायः ॥१७॥

अथाष्टादशोऽध्यायः

श्रीशुक उवाच

इत्थं विरिञ्चस्तुतकर्मवीर्यः प्रादुर्बभूवामृतभूरदित्याम् ।
चतुर्भुजः शङ्खगदाब्जचक्रः पिशङ्गवासा नलिनायतेक्षणः ॥ १ ॥
श्यामावदातो झषराजकुण्डलत्विषोल्लसच्छ्रीवदनाम्बुजः पुमान् ।
श्रीवत्सवक्षा बलयाङ्गदोल्लसत्किरीटकाञ्चीगुणचारुनूपुरः ॥ २ ॥

भिः ॥ २४ ॥ उरु बहुधा गीयते । उरुभिः महद्भिः गीयते उरवः क्रमाः पादविक्षेपाः यस्येति । भाविकर्मनिर्देशः त्रयो गुणाः प्रकृत्यधिष्ठातृत्वेन यस्य ॥ २५॥ पृश्निः पूर्वजन्मनि अदितिः तस्य गर्भाय पुत्राय । त्रयो लोका नाभौ यस्य । त्रयाणां पृष्ठे उपरि वैकुण्ठे स्थिताय । शिपिषु जीवेषु 'यज्ञो वै विष्णुः पशवः शिपिः' इति श्रुतेः ॥२६॥ गम्भीरं स्रोतः नदीप्रवाहः कर्तृ यथा स्वान्तःपतितं तृणादिकम् आक्षिपति तीरं प्रति आनयति तथा त्वं विश्वमाकर्षति । किञ्च त्वम् आदिरन्तो मध्यं चासि यं त्वां वेदा आदि पुरुषमाहुः ॥ २७ ॥ हे देव त्वं वै त्वमेव प्रजानां संभविष्णुः उत्पादनशीलोऽसि । अप्सु मज्जतां नौरिव देवानां च परायणं रक्षकोऽसि । अतस्तान् रक्षेति प्रार्थयते ॥ २८ ॥

इति श्रीमद्भागवते महापुराणेऽष्टमस्कन्धे गूढार्थदीपिन्यां सप्तदशोऽध्यायः ॥१७॥

●

अष्टादशे बलेर्यज्ञं वामनः सन् गतो हरिः ।
सर्वैः सुसत्कृतस्तेन प्रार्थितश्च वरान् वृणु ॥

इत्थं हरिः अदित्यां प्रादुर्बभूवेत्यन्वयः । कथंभूतः । हरिः ब्रह्मणा प्रशंसिते देवकार्यलक्षणं कर्म प्रभावश्च यस्य । पुनश्च । अमृतभूः । अमृतेन नित्यानन्दविग्रहेण भवतीति । यद्वा । अमृता दिव्या भूरुत्पत्तिर्यस्य । भवनं भूः न मृतभुवौ मृत्युजन्मनी यस्येति वा । शंखादीनि सन्ति अस्येति मत्वर्थीयोऽच्प्रत्ययः । नलिनं पद्मदलं तद्वत् विशाले ईक्षणे यस्य सः ॥१॥ पुनश्च श्यामश्चासौ अवदातः उज्ज्वलश्च । झषेति । मकराकृतिकुण्डलयोः त्विषा उल्लसन्ती श्रीर्वदनाम्बुजे यस्य । वलयादिभिः उल्लसन्ति किरीटादीनि

मधुव्रतव्रातविघुष्टया स्वया विराजितः श्रीवनमालया हरिः ।
प्रजापतेर्वेश्मतमः स्वरोचिषा विनाशयन् कण्ठनिविष्टकौस्तुभः ॥ ३ ॥
दिशः प्रसेदुः सलिलाशयास्तदा प्रजाः प्रहृष्टा ऋतवो गुणान्विताः ।
द्यौरन्तरिक्षं क्षितिरग्निजिह्वा गावो द्विजाः संजहृषुर्नगाश्च ॥ ४ ॥
श्रोणायां श्रवणद्वादश्यां मुहूर्तेऽभिजिति प्रभुः । सर्वे नक्षत्रताराद्याश्चक्रुस्तज्जन्म दक्षिणम् ॥५॥
द्वादश्यां सवितातिष्ठन्मध्यंदिनगतोऽहनि । विजया नाम सा प्रोक्ता यस्यां जन्म विदुर्हरेः ॥६॥
शङ्खदुन्दुभयो नेदुर्मृदङ्गपणवानकाः । चित्रवादित्रतूर्याणां निर्घोषस्तुमुलोऽभवत् ॥७॥
प्रीताश्चाप्सरसोऽनृत्यन् गन्धर्वप्रवरा जगुः । तुष्टुवुर्मुनयो देवा मनवः पितरोऽग्नयः ॥८॥
सिद्धविद्याधरगणाः सकिम्पुरुषकिन्नराः । चारणा यक्षरक्षांसि सुपर्णा भुजगोत्तमाः ॥९॥
गायन्तोऽतिप्रशंसन्तो नृत्यन्तो विबुधानुगाः । अदित्या ह्याश्रमपदं कुसुमैः समवाकिरन् ॥१०॥
दृष्ट्वादितिस्तं निजगर्भसम्भवं परं पुमांसं मुदमाप विस्मिता ।
गृहीतदेहं निजयोगमायया प्रजापतिश्चाह जयेति विस्मितः ॥११॥
यत् तद् वपुर्भाति विभूषणायुधैरव्यक्तचिद् व्यक्तमधारयद्धरिः ।
बभूव तेनैव स वामनो वटुः सम्पश्यतोर्दिव्यगतिर्यथा नटः ॥१२॥
तं वटुं वामनं दृष्ट्वा मोदमाना महर्षयः । कर्माणि कारयामासुः पुरस्कृत्य प्रजापतिम् ॥१३॥
तस्योपनीयमानस्य सावित्रीं सविताऽब्रवीत् । बृहस्पतिर्ब्रह्मसूत्रं मेखलां कश्यपोऽददात् ॥१४॥
ददौ कृष्णाजिनं भूमिर्दण्डं सोमो वनस्पतिः । कौपीनाच्छादनं माता द्यौश्छत्रं जगतः पतेः ॥१५॥
कमण्डलुं वेदगर्भः कुशान् सप्तर्षयो ददुः । अक्षमालां महाराज सरस्वत्यव्ययात्मनः ॥१६॥

यस्य । काञ्चीगुणो मेखला । श्रीवत्सो भृगुलता ॥२॥ पुनश्च । प्रजापतेः कश्यपस्य वेश्मतमः स्वरोचिषा विनाशयन् प्रादुर्बभूवेति त्रयाणामेकान्वयः । मधुव्रतानां भ्रमराणां समूहेन नादितया वनमालया विराजितः । कण्ठे निविष्टः धृतः कौस्तुभमणिः येन सः ॥३॥ तदा जन्मकाले सर्वे संजहृषुः हर्षयुक्ता बभूवुः । सलिलाशयाः ह्रदाः । गुणैः पुष्पफलादिभिः । द्विजाः पक्षिणः ब्राह्मणाश्च । द्यौः स्वर्गः । अग्निजिह्वा देवाः । नगाः पर्वताः ॥४॥ श्रोणायां श्रवणस्थे चन्द्रे अभिजिति मध्यन्दिने । दक्षिणं महत्त्वपूर्णम् ॥५॥ यदा सविता तिष्ठन् बभूव तदा जन्मेति योज्यम् ॥ ६ ॥ तुमुलो मिश्रितः रोमहर्षकरः वादित्रं वाद्यम् ॥ ७ ॥ गन्धर्वप्रवराः हा हा हू हू प्रभृतयः ॥ ८ ॥ समवाकिरन् आच्छन्नमकुर्वन् ॥ १० ॥ अदितिः विस्मिता सती मुदमाप प्रजापतिः कश्यपश्च विस्मितः सन् जयजयेत्याह' ॥११॥ अव्यक्तचिद्रूपं यत् वपुर्भाति तदेव भूषणैः आयुधैश्च व्यक्तं सत् प्रत्यक्षं रूपमधारयत् प्रकटितवान् तेनैव च स वामनो वटुः बभूवेत्यन्वयः । दिव्यगतिः कलाविशारदः ॥ १२ ॥ कर्माणि जातकर्मादीनि ॥ १३ ॥ उपनीयमानस्य उपनयनं प्राप्तस्य । ब्रह्मसूत्रम् उपवीतम् ॥ १४ ॥ ददाविति त्रिकम् । कृष्णाजिनं मृगचर्म । वनं वृक्षसमूहः तस्य पतिः सौमः दण्डम् । पारस्करादित्वात् सुट् । माता अदितिः । कौपीनं गुह्यप्रदेशआच्छाद्यतेऽनेनेति तच्चीरम् । कौपीनं चीरगुह्यप्रदेशयोः' इति मेदिनी । यद्वा । तच्च तच्च वस्त्रद्वयम् । द्यौः अधिष्ठात्री देवता । पतेः पतये ॥ १५ ॥ वेदगर्भो ब्रह्मा । अक्षमाला जपमाला । 'आदिक्षान्ताक्षर-

तस्मा इत्युपनीताय यक्षराट् पात्रिकामदात् । भिक्षां भगवती साक्षादुमादादम्बिका सती॥१७॥
स ब्रह्मवर्चसेनैवं सभां सम्भावितो वटुः । ब्रह्मर्षिगणसंजुष्टामत्यरोचत मारिषः ॥१८॥
समिद्धमाहितं वह्निं कृत्वा परिसमूहनम् । परिस्तीर्य समभ्यर्च्य समिद्भिरजुहोद् द्विजः ॥१९॥

श्रुत्वाश्वमेधैर्यजमानमूर्जितं बलिं भृगूणामुपकल्पितैस्ततः ।
जगाम तत्राखिलसारसम्भृतो भारेण गां सन्नमयन् पदे पदे ॥२०॥

तं नर्मदायास्तट उत्तरे बलेर्य ऋत्विजस्ते भृगुकच्छसंज्ञके ।
प्रवर्तयन्तो भृगवः क्रतूत्तमं व्यचक्षतारादुदितं यथा रविम् ॥२१॥

त ऋत्विजो यजमानः सदस्या हतत्विषो वामनतेजसा नृप ।
सूर्यः किलायात्युत वा विभावसुः सनत्कुमारोऽथ दिदृक्षया क्रतोः॥२२॥

इत्थं सशिष्येषु भृगुष्वनेकधा वितर्क्यमाणो भगवान् स वामनः ।
छत्रं सदण्डं सजलं कमण्डलुं विवेश बिभ्रद्धयमेधवाटम् ॥२३॥

मौञ्ज्या मेखलया वीतमुपवीताजिनोत्तरम् । जटिलं वामनं विप्रं मायामाणवकं हरिम् ।२४।
प्रविष्टं वीक्ष्य भृगवः सशिष्यास्ते सहाग्निभिः । प्रत्यगृह्णन् समुत्थाय संक्षिप्तास्तस्य तेजसा ।२५।
यजमानः प्रमुदितो दर्शनीयं मनोरमम् । रूपानुरूपावयवं तस्मा आसनमाहरत् ।२६॥
स्वागतेनाभिनन्द्याथ पादौ भगवतो बलिः । अवनिज्यार्चयामास मुक्तसङ्गमनोरमम् ॥२७॥

तत्पादशौचं जनकल्मषापहं स धर्मविन्मूर्ध्न्यदधात् सुमङ्गलम् ।
यद् देवदेवो गिरिशश्चन्द्रमौलिर्दधार मूर्ध्ना परया च भक्त्या ॥२८॥

मिता जपमालाक्षमालिका' इति मन्त्रकोशात् । अव्ययात्मनः निर्विकारस्य ॥ १६ ॥ यक्षराट् कुबेरः पात्रिकां भिक्षापात्रम् । उमा अन्नपूर्णा ॥ १७ ॥ एवं संभावितः पूजितः स मारिषः श्रेष्ठः वटुः ब्रह्मवर्चसेन स्वतेजसा सभामतिक्रम्य अरोचत् ॥१८॥ परिसमूहनं कुशैः भूमिसमूहनम् ऋजु कृत्वा आहितं स्थापितमग्निं परिस्तीर्य आग्नेयादीशान्तं प्रसार्य अभ्यर्च्य च अजुहोत् शेषहोममकरोत् । द्विजो वामनः॥१९॥ भृगुणां भृगुभिः कल्पितैः प्रवर्तितैः अश्वमेधैः यजमानं यजन्तं बलिं श्रुत्वा तत्र यज्ञे जगामेत्यन्वयः । किं कुर्वन् सन् । स्वभारेण गरिम्णा गां पृथ्वीं संनमयन् । सारेण विवेकधैर्यादिना संभृतः परिपूर्णः । ऊर्जितं धनादिभिः समृद्धम् ॥२०॥ भृगुकच्छसंज्ञके क्षेत्रे क्रतूत्तमं प्रवर्तयन्तः ये बले ऋत्विजः भृगवः भृगुवंशीयाः ते आरात् दूरात् तं वटुम् अचक्षत अपश्यन्नित्यन्वयः । कमिव । आरात् समीपे उदितं रविमिव । 'आरात् दूरसमीपयोः इत्यमरः ॥ २१ ॥ ते ऋत्विगादयः हतत्विषः सन्तः सूर्य आयाति उत अपि विभावसुर्वा इत्येवं तं वटुं व्यतर्कन्निति शेषः ॥२२॥ भृगुषु इति तृतीयार्थे सप्तमी । हयमेधवाटम् अश्वमेधमण्डपम् ॥२३॥ मौञ्ज्येति युग्मम् । वीतं निबद्धकटिम् । उपवीतवत् धृतमजिनमेवोत्तरीयं यस्य तम् । प्रत्यगृह्णन् अर्घ्यादिभिः सम्मानयामासुः । संक्षिप्ताः अभिभूताः सन्तः ॥२४।२५॥ तं दृष्ट्वा तस्मै आसनमाहरत् समर्पितवान् ॥ २६ ॥ पादौ अवनिज्य प्रक्षाल्य । मुक्तसंगानाम् आत्मारामाणामपि मनः आकृष्य रमयतीति तथा ॥२७॥ यत् गिरिशो दधार तत्पादशौचं बलिः मूर्ध्नि अदधात् धारयामासेत्यन्वयः ॥२८॥

बलिरुवाच

स्वागतं ते नमस्तुभ्यं ब्रह्मन् किं करवाम ते । ब्रह्मर्षीणां तपः साक्षान्मन्ये त्वाऽऽर्य वपुर्धरम् ।२९।
अद्य नः पितरस्तृप्ता अद्य नः पावितं कुलम् । अद्य स्विष्टः क्रतुरयं यद् भवानागतो गृहान् ।३०।

अद्याग्नयो मे सुहुता यथाविधि द्विजात्मज त्वच्चरणावनेजनैः ।
हतांहसो वार्भिरियं च भूरहो तथा पुनीता तनुभिः पदैस्तव ॥३१॥
यद् यद् वटो वाञ्छसि तत् प्रतीच्छ मे त्वामर्थिनं विप्रसुतानुतर्कये ।
गां काञ्चनं गुणवद् धाम मृष्टं तथान्नपेयमुत वा विप्र कन्याम् ।
ग्रामान् समृद्धांस्तुरगान् गजान् वा रथांस्तथार्हत्तम सम्प्रतीच्छ ॥३२॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायामष्टमस्कन्धे वामनप्रादुर्भावे बलिवामन-संवादेऽष्टादशोध्यायः ॥१८॥

अथैकोनविंशोऽध्यायः

श्रीशुक उवाच

इति वैरोचनेर्वाक्यं धर्मयुक्तं ससूनृतम् । निशम्य भगवान् प्रीतः प्रतिनन्द्येदमब्रवीत् ॥१॥

श्रीभगवानुवाच

वचस्तवैतज्जनदेव सूनृतं कुलोचितं धर्मयुतं यशस्करम् ।
यस्य प्रमाणं भृगवः साम्पराये पितामहः कुलवृद्धः प्रशान्तः ॥२॥

हे आर्य ! वपुर्धरं मूर्तिधारि साक्षात् प्रत्यक्षं तप एव त्वा त्वां मन्ये इत्यन्वयः ॥ २९ ॥ पावितं पवित्रं जातम् । स्विष्टः यथावत् अनुष्ठितः ॥ ३० ॥ ये अग्नय सुहुताः तर्पिताः । कथंभूतस्य । त्वच्चरण प्रक्षालितजलैः हतमंहः पापं यस्य तस्य मे । तनुभि अल्पैः कोमलैर्वाः पदैः ॥ ३१ ॥ यदिति सार्द्धम् । हे विप्र सुतगवादीनां मध्ये यत् यत् कामयसे तत् तत् सर्वं त्वं मे मत्तः सम्प्रतीच्छ गृहाणेत्यन्वयः । गुणवत् भोगोपकरणसहितम् धाम गृहम् । मृष्टं स्वादु । हे अर्हत्तम पूज्यतम ॥ ३२ ॥

इति श्रीमद्भागवते महापुराणेऽष्टमस्कन्धे गूढार्थदीपिन्यामष्टादशोऽध्यायः ॥१८॥

एकोनविंशके भूमिं पादत्रयमितां बलिः ।
विष्णवे याचमानाय दास्यन् शुक्रेण वारितः ॥

वैरोचनेः विरोचनपुत्रस्य बलेः [1]ससूनृतं सत्यं प्रियं च ॥ १ ॥ यस्य तव ऐहिके व्यवहारे भृगवः शुक्रादयः साम्पराये पारलौकिके धर्मे च प्रह्लादः प्रमाणं प्रवर्तकाः ॥ २ ॥ निःसत्त्वो निर्धनः

1. सूनृतं मंगलेऽपि स्यात् प्रियसत्ये वचस्यपि ।

न ह्येतस्मिन् कुले कश्चिन्निःसत्त्वः कृपणः पुमान् । प्रत्याख्याता प्रतिश्रुत्य यो वाऽदाता द्विजातये
न सन्ति तीर्थे युधि चार्थिनार्थिताः पराङ्मुखा ये त्वमनस्विनो नृपाः ।
युष्मत्कुले यद्यशसाऽमलेन प्रह्लाद उद्भाति यथोडुपः खे ॥४॥
यतो जातो हिरण्याक्षश्चरन्नेक इमां महीम् । प्रतिवीरं दिग्विजये नाविन्दत गदायुधः ॥५॥
यं विनिर्जित्य कृच्छ्रेण विष्णुः क्ष्मोद्धार आगतम् । नात्मानं जयिनं मेने तद्वीर्यं भूर्यनुस्मरन् ६
निशम्य तद्वधं भ्राता हिरण्यकशिपुः पुरा । हन्तुं भ्रातृहणं क्रुद्धो जगाम निलयं हरेः ॥७॥
तमायान्तं समालोक्य शूलपाणिं कृतान्तवत् । चिन्तयामास कालज्ञो विष्णुर्मायाविनां वरः ॥८॥
यतो यतोऽहं तत्रासौ मृत्युः प्राणभृतामिव । अतोऽहमस्य हृदयं प्रवेक्ष्यामि पराग्दृशः ॥९॥
एवं स निश्चित्य रिपोः शरीरमाधावतो निर्विविशेऽसुरेन्द्र ।
श्वासानिलान्तर्हितसूक्ष्मदेहस्तत्प्राणरन्ध्रेण विविग्नचेताः ॥१०॥
स तन्निकेतं परिमृश्य शून्यमपश्यमानः कुपितो ननाद ।
क्ष्मां द्यां दिशः खं विवरान् समुद्रान् विष्णुं विचिन्वन् न ददर्श वीरः॥११॥
अपश्यन्निति होवाच मयान्विष्टमिदं जगत् । भ्रातृहा मे गतो नूनं यतो नावर्तते पुमान् ॥१२॥
वैरानुबन्ध एतावानामृत्योरिह देहिनाम् । अज्ञानप्रभवो मन्युरहंमानोपबृंहितः ॥१३॥
पिता प्रह्लाद पुत्रस्ते तद्विद्वान् द्विजवत्सलः । स्वमायुर्द्विजलिङ्गेभ्यो देवेभ्योऽदात् स याचितः॥१४॥
भवानाचरितान् धर्मानास्थितो गृहमेधिभिः । ब्राह्मणैः पूर्वजैः शूरैरन्यैश्चोद्दामकीर्तिभिः ॥१५॥

तल्लक्षणं प्रत्याख्याता । कृपणलक्षणं प्रतिश्रुत्य द्विजातये योऽदाता । वा शब्दात् प्रत्याख्याता च ॥३॥ तीर्थे दानावसरे अर्थिना ब्राह्मणेन युधि च क्षत्रियेण अर्थिताः सन्तः ये विमुखाः ते युष्मत्कुले नैव सन्तीत्यन्वयः । यत् यस्मिन् कुले प्रह्लादः उद्भाति चकास्ति यथा खे आकाशे चन्द्रः । अमनस्विनः अनुदारचित्ताः नृपाः ॥४॥ यतो यत्र कुले । एकाकी एव विचरन् प्रतिवीरं प्रतियोद्धारं न लेभे ॥५॥ ना परमपुरुषः श्रीविष्णुः । कुर्वन्तीति कृतः कृतिनः श्रयते यत् तेन कृच्छ्रेण पराक्रमेणेति वास्तवोऽर्थः जयिनं न मेने तज्जन्मद्वयस्यावशिष्टत्वात् । तत् स्वीयं वीर्यम् । यथाश्रुतार्थस्तु स्पष्ट एवं ॥ ६ ॥ हन्तुमिव । ज्ञातुं वा । निलयं श्वेतद्वीपादिरूपम् । ७ ॥ कृतान्तवत् मृत्युमिव । कालज्ञः कालकर्तव्यवित् । मायाविनां ज्ञानिनाम् । माया स्यात् ज्ञानकृपयोः इति विश्वः ॥ ८ ॥ यतो यतो यत्र यत्र । प्राणभृतां जीवानाम् । पराग्दृशः बहिर्दृष्टेः । परं दूरमञ्चतीति पराक् दूरस्थं वस्तु पश्यतीति न निकटस्थं चक्षुरञ्जनमिव अतो हृदयमिति योज्यम् ॥ ९ ॥ हे असुरेन्द्र बले । तच्छ्वासानिलस्य अन्तर्हितः सूक्ष्मदेहो यस्य तथाभूतः सन् विष्णुः तस्य नासिकामार्गेण रिपोः शरीरं निर्विविशे । विगतं भयं यस्माद् तादृशं विविग्नं[1] निर्भयं चेतो यस्य सः ॥१०॥ क्ष्मां पृथ्वीं द्यां स्वर्गं विवरान् अधोलोकान् विचिन्वन् अन्विष्यन्नपि विष्णुं न ददर्श ॥११॥ मे भ्रातृहा यतो नावर्तते तद् ब्रह्मैव गतः ॥१२॥ अहंमानेन देहाभिमानेन प्रकटीकृतः मन्युः तन्मूलो वैरानुबन्धश्च आमृत्योः मरणपर्यन्त एव भवति ॥ १३ ॥ ते पिता विरोचनः तद्विद्वान् तान् देवान् जानन्नपि याचितः सन् आयुः प्रादात् ॥ १४ ॥ गृहमेधिभिः गृहस्थैः ब्राह्मणैः शुक्रादिभिः पूर्वजैः

---

१. 'ओविजी' भयचलनयोः' निष्ठान्तम् ।

तस्मात् त्वत्तो महीमीषद् वृणेऽहं वरदर्षभात् । पदानि त्रीणि दैत्येन्द्र सम्मितानि पदा मम।१६।
नान्यत्ते ते कामये राजन् वदान्याज्जगदीश्वरात् । नैनः प्राप्नोति वै विद्वान् यावदर्थप्रतिग्रहः

बलिरुवाच

अहो ब्राह्मणदायाद वाचस्ते वृद्धसम्मताः । त्वं बालो बालिशमतिः स्वार्थं प्रत्यबुधो यथा॥१८॥
मां वचोभिः समाराध्य लोकानामेकमीश्वरम् । पदत्रयं वृणीते योऽबुद्धिमान् द्वीपदाशुषम्॥१९॥
न पुमान् मामुपव्रज्य भूयो याचितुमर्हति । तस्माद् वृत्तिकरीं भूमिं वटो कामं प्रतीच्छ मे॥२०॥

श्रीभगवानुवाच

यावन्तो विषयाः प्रेष्ठास्त्रिलोक्यामजितेन्द्रियम् । न शक्नुवन्ति ते सर्वे प्रतिपूरयितुं नृप ॥२१॥
त्रिभिः क्रमैरसंतुष्टो द्वीपेनापि न पूर्यते । नववर्षसमेतेन सप्तद्वीपवरेच्छया ॥२२॥
सप्तद्वीपाधिपतयो नृपा वैन्यगयादयः । अर्थैः कामैर्गता नान्तं तृष्णाया इति नः श्रुतम्२३
यदृच्छयोपपन्नेन संतुष्टो वर्तते सुखम् । नासंतुष्टस्त्रिभिर्लोकैरजितात्मोपसादितैः ॥२४॥
पुंसोऽयं संसृतेर्हेतुरसंतोषोऽर्थकामयोः । यदृच्छयोपपन्नेन संतोषो मुक्तये स्मृतः॥ २५॥
यदृच्छालाभतुष्टस्य तेजो विप्रस्य वर्धते । तत् प्रशाम्यत्यसंतोषादम्भसेवाशुशुक्षणिः ॥२६॥
तस्मात् त्रीणि पदान्येव वृणे त्वद् वरदर्षभात् । एतावतैव सिद्धोऽहं वित्तं यावत्प्रयोजनम्॥२७॥

श्रीशुक उवाच

इत्युक्तः स हसन्नाह वाञ्छातः प्रतिगृह्यताम् । वामनाय महीं दातुं जग्राह जलभाजनम् ॥२८॥
विष्णवे क्ष्मां प्रदास्यन्तमुशना असुरेश्वरम् । जानंश्चिकीर्षितं विष्णोः शिष्यं प्राह विदां वरः२९

विरोचनादिभिः अन्यैः शूरैश्च आचरितान् धर्मांश्च भवानपि आस्थितः अनुष्ठितवान् । उद्दामा विपुला इति सर्वेषां विशेषणम् ॥ १५ ॥ मम पदा संमितानि परिमितानि भूमौ स्थितत्वात् तस्य पादौ महीयम् इत्युक्तैः विशालेन पदा अतो नानृतवादः ॥१६॥ वदान्यात् अत्युदारात् ते त्वत्तः अन्यत् अधिकं न कामये यावदर्थस्यपरिग्रहवान् एनः पापं न प्राप्नोति ॥ १७ ॥ हे ब्राह्मणदायाद पुत्र दायं भागमादत्ते गृह्णातीति । वस्तुतस्तु बाल इव अबालिशेति च्छेदः अबुधो नास्ति बुधो यस्मात् पूर्णज्ञानवान् यद्वा । वालयति चालयति सर्वान् वातादीनिति बालः ॥ १८ ॥ यो वृणीते सोऽबुद्धिमान् । वस्तुतः नाकारपदच्छेदः दाशुषं दातारम् ॥ १९ ॥ यस्मात् याचितु नार्हति तस्मात् मे मत्तः सकाशात् कामं यथेच्छं भूमिं प्रतीच्छ गृहाण ॥२०॥ प्रतिपूरयितुं सन्तोषयितुम् ॥२१॥ त्रिभिः पदैः नवखण्डसमेतेन द्वीपेनापि न पूर्यते कुतः सप्तद्वीपप्राप्तीच्छा जागर्त्येव । इच्छति शती सहस्रमिति असन्तुष्टः वचनात् ॥ २२ ॥ वैन्यः पृथुः । तृष्णाया अन्तं न गता इति योज्यम् । नोऽस्माभिः ॥ २३ ॥ सन्तुष्टो दैवलब्धेनैव । असन्तुष्टः उपलब्धैः त्रिभिर्लोकैरपि न ॥ २४ ॥ संसृतेः जन्ममरणादेः ॥ २५ ॥ तत् तेजः प्रशाम्यति नश्यति । अम्भसा जलेन आशुशुक्षणिः अग्निरिव ॥ २६ ॥ वित्तं सुखदं भवति । ऋषभात् श्रेष्ठात् ॥ २७ ॥ जलभाजनं कमण्डलुम् ॥ २८॥ उशनाः शुक्राचार्यः प्राह परोक्षे एव

शुक्र उवाच

एष वैरोचने साक्षाद् भगवान् विष्णुरव्ययः । कश्यपाददितेर्जातो देवानां कार्यसाधकः ॥३०॥
प्रतिश्रुतं त्वयैतस्मै यदनर्थमजानता । न साधु मन्ये दैत्यानां महानुपगतोऽनयः ॥३१॥
एष ते स्थानमैश्वर्यं श्रियं तेजो यशस्तुतम् । दास्यत्याच्छिद्य शक्राय मायामाणवको हरिः ३२
त्रिभिः क्रमैरिमाँल्लोकान् विश्वकायः क्रमिष्यति । सर्वस्वं विष्णवे दत्त्वा मूढ वर्तिष्यसे कथम् ३३
क्रमतो गां पदैकेन द्वितीयेन दिवं विभोः । खं च कायेन महता तार्तीयस्य कुतो गतिः ॥३४॥
निष्ठां ते नरके मन्ये ह्यप्रदातुः प्रतिश्रुतम् । प्रतिश्रुतस्य योऽनीशः प्रतिपादयितुं भवान् ॥३५॥
न तद् दानं प्रशंसन्ति येन वृत्तिर्विपद्यते । दानं यशस्तपः कर्म लोके वृत्तिमतो यतः ॥३६॥
धर्माय यशसेऽर्थाय कामाय स्वजनाय च । पञ्चधा विभजन् वित्तमिहामुत्र च मोदते ॥३७॥
अत्रापि बह्वृचैर्गीतं शृणु मेऽसुरसत्तम । सत्यमोमिति यत् प्रोक्तं यन्नेत्याहानृतं हि तत् ॥३८॥
सत्यं पुष्पफलं विद्यादात्मवृक्षस्य जीवतः । वृक्षेऽजीवति तन्न स्यादनृतं मूलमात्मनः ॥३९॥
तद् यथा वृक्ष उन्मूलः शुष्यत्युद्वर्ततेऽचिरात् । एवं नष्टानृतः सद्य आत्मा शुष्येन्न संशयः ॥४०॥
पराग् रिक्तमपूर्णं वा अक्षरं यत् तदोमिति । यत् किंचिदोमिति ब्रूयात् तेन रिच्येत वै पुमान् ।
भिक्षवे सर्वमोङ्कुर्वन्नालं कामेन चात्मने ॥४१॥
अथैतत् पूर्णमभ्यात्मं यच्च नेत्यनृतं वचः । सर्वं नेत्यनृतं ब्रूयात् स दुष्कीर्तिः श्वसन् मृतः ॥४२॥

यतो नीतिविदांवरः । क्ष्मो पृथ्वीम् ॥ २९ ॥ हे वैरोचने बले ॥ ३० ॥ एतस्मै यत् प्रतिज्ञातं तत् साधु न मन्ये । यतो महान् अनयः दुखावसरः प्राप्तः ॥ ३१ ॥ ते सर्वम् आच्छिद्य अपहृत्य । मायया वञ्चनेन हेतुना माणवकः ब्रह्मचारिवेषः वस्तुतः योगमायया ॥ ३२ ॥ क्रमैः पादविक्षेपैः । कथं वर्तिष्यसे जीविष्यसि ॥३३॥ एकेन गां पृथिवीं द्वितीयेन दिवं कायेन खमाकाशं क्रममाणस्य ते तृतीयस्य चरणस्य कुतो गतिः कुतः स्थानं नैवेत्यर्थः । स्वार्थेऽण् ॥३४॥ प्रतिश्रुतं प्रतिज्ञातं वस्तु अदातुस्ते नरके स्थितिं मन्ये यो भवान् प्रतिश्रुतं पूरयितुमनीशः असमर्थः तस्य ते नरके इति योज्यम् ॥३५॥ येनवृत्तिः जीविका विपद्यते विनश्यति । यतो लोके दानादीनि वृत्तिमतः जीविकाप्रदस्य भवन्ति ॥३६॥ अर्थाय कोशवृद्धये । अमुत्र परलोके च ॥३७॥ अत्रापि सत्यानृतव्यवस्थायाम् बह्वृचैः ऋग्वेदिभिः । मे मत्तः सकाशात्शृणु । ओमित्यङ्गीकारेण यत् प्रोक्तं तत् सत्यम् । नेति यदाह तदेवानृतम्[1] ॥३८॥ आत्मवृक्षस्य देहरूपवृक्षस्य पुष्पफलं नित्यमेव । अजीवति देहे च सत्यं पुष्पं फलं च न स्यात् अतः किञ्चिदनृतेन देहो रक्षणीयः यतः आत्मनो देहस्य मूलनृतमेव ॥३९॥ एतदेव दृष्टान्तेनाह—तत् तस्मात् यथा वृक्षः उत्पाटितमूलः अचिरात् शुष्यति उद्वर्तते पतति च एवं नष्टानृतः आत्मा देहोऽपि शुष्येत् ॥ ४० ॥ ओमिति यदक्षरं तत् अपूर्णं । कुतः । रिक्तं रिक्तकारित्वात् । तत्कुतः । परा दूरमञ्चति व्रजतीति अर्थमादाय पराक् इदमेव पुनः स्पष्टयति । ओमिति दास्यामीति ब्रूयात् तेन पुमान् रिच्येन रिक्तो भवेदेव ॥४१॥ यतो हि ओमिति दास्यामिति स्वीकुर्वन् आत्मार्थं कामेन भोगन नालं न पूर्णो भवति रहितो भवति धनाभावात् अथ अतः एतत् वचः पूर्णमर्थरक्षकम् अभ्यात्मम् आत्माभ्युदयहेतुकं च आत्मनोऽभिमुखमत्यस्यार्थं

---

१. तथा च श्रुतिः 'ओमिति सत्यं नेत्यनृतम्' ओमिति स्वीकारार्थेऽव्ययम्

स्त्रीषु नर्मविवाहे च वृत्त्यर्थे प्राणसंकटे । गोब्राह्मणार्थे हिंसायां नानृतं स्याज्जुगुप्सितम् ॥४३॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायामष्टमस्कन्धे वामनप्रादुर्भावे एकोनविंशोऽध्यायः ॥१९॥

अथ विंशोऽध्याय

श्रीशुक उवाच

बलिरेवं गृहपतिः कुलाचार्येण भाषितः । तूष्णीं भूत्वा क्षणं राजन्नुवाचावहितो गुरुम् ॥१॥

बलिरुवाच

सत्यं भगवता प्रोक्तं धर्मोऽयं गृहमेधिनाम् । अर्थं कामं यशो वृत्तिं यो न बाधेत कर्हिचित् ॥२॥

स चाहं वित्तलोभेन प्रत्याचक्षे कथं द्विजम् । प्रतिश्रुत्य ददामीति प्राह्लादिः कितवो यथा॥३॥

न ह्यसत्यात् परोऽधर्म इति होवाच भूरियम् । सर्वं सोढुमलं मन्ये ऋतेऽलीकपरं नरम् ॥४॥

नाहं बिभेमि निरयान्नाधन्यादसुखार्णवात् । न स्थानच्यवनान्मृत्योर्यथा विप्रप्रलम्भनात् ॥५॥

यद् यद्धास्यति लोकेऽस्मिन् सम्परेतं धनादिकम् । तस्य त्यागे निमित्तं किं विप्रस्तुष्येन्न तेन चेत्

श्रेयः कुर्वन्ति भूतानां साधवो दुस्त्यजासुभिः । दध्यङ्शिबिप्रभृतयः को विकल्पो धनादिषु॥७॥

यैरियं बुभुजे ब्रह्मन् दैत्येन्द्रैरनिवर्तिभिः । तेषां कालोऽग्रसील्लोकान् न यशोऽधिगतंभुवि॥८॥

माकर्षंतीति अभ्यात्मम् किं तत् । यच्च नेतीति ॥ ४२ ॥ सर्वथा नेति ब्रूयात् निषेधं कुर्यात् स तु जीवन्मृतः ॥४३॥ निष्कर्षमाह--एवमष्टसु स्थानेषु अनृतभाषणं जुगुप्सितं निन्दितं दोषावहं नास्तीति । नर्मणि परिहासे ॥ ४४ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे गूढार्थदीपिन्यामेकोनविंशोऽध्यायः ॥ ८ ॥

विंशे तु गुरुणा शप्तश्छद्म विष्णोर्विदन्नपि ।
बलिर्हर्षाद् ददौ भूमिं तद्रूपं द्रागवर्धत ॥ १ ॥

गृहपतिः यजमानः । अवहितः अविचलितः ॥१॥ गृहमेधिनां पुंसां गृहस्थानाम् योऽर्थादीन् न बाधेत स धर्म इति सत्यमेव ॥२॥ सोऽहं प्रह्लादपुत्रः ददामीति प्रतिज्ञाय द्विजं कथं प्रत्याचक्षे निराकरोमि । 'यश्चोक्त्वा न प्रकुर्वीत कितवः प्रोच्यते हि सः' इत्युक्ते ॥३॥ ह स्पष्टम् । अलीकपरं मिथ्यावादिनं बिना सोढुं समर्थमात्मानं मन्ये । वोढुं धर्तुमित्यपि पाठः ॥ ४ ॥ यथा विप्रवञ्चनात् तथा निरयादिभ्यो न बिभेमीत्यन्वयः । अधन्यात् दारिद्र्यात् । असुरवार्णवात् दुःखसमुद्रात् ॥५॥ यत् यत् धनादिकं वस्तु कर्तृ तत् । सं परेतं मृतं पुरुषं हास्यति त्यक्ष्यत्येव सर्वं । अतस्तेन दत्तेन चेत् यदि विप्रो न तुष्येत तर्हि तस्य अर्थस्य त्यागे दाने किं निमित्तं फलं न किञ्चित् विप्रसन्तोषाभावात् तद्दानं व्यर्थमेवेत्यर्थः ॥ ६ ॥ दध्यङ् दधीचिप्रभृतयः दुस्त्यजैः असुभिः प्राणैश्च भूतानां प्राणिनां श्रेयः उपकारं कुर्वन्ति तदा देयपदार्थेषु धरादिषु को विकल्पः तद्दाने कः संशयो विचारश्च ॥ ७ ॥ अनिवर्तिभिः युद्धादपराङ्मुखैः यैः इयं भूः उपभुक्ता तेषां लोकान् कालः अग्रसीत् नाशयाञ्चकार न च विस्तृतं यशः

सुलभा युधि विप्रर्षे ह्यनिवृत्तास्तनुत्यजः । न तथा तीर्थ आयाते श्रद्धया ये धनत्यजः ॥९॥
मनस्विनः कारुणिकस्य शोभनं यदर्थिकामोपनयेन दुर्गतिः ।
कुतः पुनर्ब्रह्मविदां भवादृशां ततो वटोरस्य ददामि वाञ्छितम् ॥१०॥
यजन्ति यज्ञक्रतुभिर्यमादृता भवन्त आम्नायविधानकोविदाः ।
स एव विष्णुर्वरदोऽस्तु वा परो दास्याम्यमुष्मै क्षितिमीप्सितां मुने ॥११॥
यद्यप्यसावधर्मेण मां बध्नीयादनागसम् । तथाप्येनं न हिंसिष्ये भीतं ब्रह्मतनुं रिपुम् ॥१२॥
एष वा उत्तमश्लोको न जिहासति यद् यशः । हत्वा मैनां हरेद् युद्धे शयीत निहतो मया ॥१३॥

श्रीशुक उवाच

एवमश्रद्धितं शिष्यमनादेशकरं गुरुः । शशाप दैवप्रहितः सत्यसंधं मनस्विनम् ॥१४॥
दृढं पण्डितमान्यज्ञः स्तब्धोऽस्यस्मदुपेक्षया । मच्छासनातिगो यस्त्वमचिरात् भ्रश्यसे श्रियः॥१५
एवं शप्तः स्वगुरुणा सत्यान्न चलितो महान् । वामनाय ददावेनामर्चित्वोदकपूर्वकम् ॥१६॥
विन्ध्यावलिस्तदाऽऽगत्य पत्नी जालकमालिनी । आनिन्ये कलशं हैममवनेजन्यपां भृतम्॥१७॥
यजमानः स्वयं तस्य श्रीमत् पादयुगं मुदा । अवनिज्यावहन्मूर्ध्नि तदपो विश्वपावनीः ॥१८॥

अतस्तदेवोपार्जितव्यम् ॥ ८ ॥ युधि तनुत्यजः सुलभाः तीर्थे सत्पात्रे प्राप्ते सति ये धनत्यजः ते न सुलभा इत्यन्वयः ॥९॥ यादृशतादृशानामपि अर्थिनां कामोपयने कामपूरणे मनस्विनः कामपूरकस्य दुर्गतिर्न भवति किन्तु शोभनं कल्याणमेव ततो भवादृशां कुतः किं पुनर्वक्तव्यम् । ततोऽस्प अस्मै ॥१०॥ निपुणाः अनुष्ठान कुशलाः यं यजन्ति स एव विष्णुः परः शत्रुर्वा अस्तु अहं क्षितिं दास्याम्येव । यज्ञाः ससोमाः क्रतव असोमा इति भेदः ॥ ११ ॥ यदपि यद्यपि अनागसं निरपराधम् भीतम् । अत्र हेतुः । ब्रह्मतनुम् ॥ १२ ॥ यत् यतः यशः न जिहासति त्युक्तुमिच्छति न विनाशयिष्यति तदर्थं युद्धे सति मा मां हत्वा एनां भूमि हरेत । मया हतोऽपि ताडितोऽपि मा शयीतेति योज्यं ब्रह्मतेजसो बलीयस्तात् ॥ १३ ॥ गुरुवचने अश्रद्धा संजाता अस्येति अश्रद्धितम् । इत प्रेरितः प्रत्ययान्तः सत्यसन्धं सत्यप्रतिज्ञम् । दैवेन भाविना ॥ १४ ॥ पण्डितानां माननीयः । नास्ति ज्ञो यस्मात् सः स्तब्धो नम्रः भयाभावात् । मच्छासनमतिक्रम्य विष्णुं गच्छसि तस्मात् न चिरात् अचिरस्थायिनः श्रियो भ्रश्यसे भगवद्दत्ताः नित्या श्रियस्तु प्राप्स्य सीति वास्तवोऽर्थं ॥ १५ ॥ महान् धैर्यवान् । उदकपूर्वकं[१] सङ्कल्पपूर्वकम् ॥ १६ ॥ तदा दानसमये हैमं स्वर्णकलशम् आनिन्ये । कथंभूतम् । अवनेजनीनां[२] शुचीनां—पादप्रक्षालनयोग्यानाम् अपाम् अद्भिः भृतं पूर्णम् । तृतीयार्थे षष्ठी । जालकं मुक्ताभरणं तेन मालते शोभते इति वंशीधरी ॥ १७ ॥ यजमानो वलिः । तस्य वामनस्य पादयुगम् अवनिज्य प्रक्षाल्य ताः अपः मूर्ध्नि अवहत् धारयामास ॥१८॥

---

१. संकल्पं तु सदा कुर्यात् स्नानदानव्रतादिके । अन्यथा पुण्यकर्माणि निष्फलानि न संशयः । इति मार्कण्डेयोक्तेः ।

२. अवनिज्यतेऽनेनेति अवनेजनम् अवपूर्वक'णिजिरशौचे' इत्यस्मात् करणे ल्युट् टित्वात् ङीप् अवनेजनी ।

तदाऽसुरेन्द्रं दिवि देवतागणा गन्धर्वविद्याधरसिद्धचारणाः ।
तत्कर्म सर्वेऽपि गृणन्त आर्जवं प्रसूनवर्षैर्ववृषुर्मुदान्विताः ॥१९॥
नेदुर्मुहुर्दुन्दुभयः सहस्रशो गन्धर्वकिम्पूरुषकिन्नरा जगुः ।
मनस्विनानेन कृतं सुदुष्करं विद्वानदाद् यद् रिपवे जगत्त्रयम् ॥२०॥
तद् वामनं रूपमवर्धताद्भुतं हरेरनन्तस्य गुणत्रयात्मकम् ।
भूः खं दिशो द्यौर्विवराः पयोधयस्तिर्यङ्नृदेवा ऋषयो यदासत ॥२१॥
काये बलिस्तस्य महाविभूतेः सहर्त्विगाचार्यदसस्य एतत् ।
ददर्श विश्वं त्रिगुणं गुणात्मके भूतेन्द्रियार्थाशयजीवयुक्तम् ॥२२॥
रसामचष्टाङ्घ्रितलेऽथ प दयोर्महीं महीध्रान् पुरुषस्य जङ्घयोः ।
पतत्त्रिणो जानुनि विश्वमूर्तेरूर्वोर्गणं मारुतमिन्द्रसेनः ॥२३॥
संध्यां विभोर्वाससि गुह्य ऐक्षत् प्रजापतीञ्जघने आत्ममुख्यान् ।
नाभ्यां नभः कुक्षिषु सप्तसिन्धूनुरुक्रमस्योरसि चर्क्षमालाम् ॥२४॥
हृद्यङ्ग धर्मं स्तनयोर्मुरारेर्ऋतं च सत्यं च मनस्यथेन्दुम् ।
श्रियं च वक्षस्यरविन्दहस्तां कण्ठे च सामानि समस्तरेफान् ॥२५॥
इन्द्रप्रधानानमरान् भुजेषु तत्कर्णयोः ककुभो द्योश्च मूर्ध्नि ।
केशेषु मेघाञ्छ्वसनं नासिकायामक्ष्णोश्च सूर्यं वदने च वह्निम् ॥२६॥

तदा दानकाले दिवि स्थिताः सर्वे देवगणाः अपि शब्दात् शत्रुभूता अपि पुष्पवर्षैः असुरेन्द्रं बलिं पुष्पवर्षैः ववृषुः आच्छादयामासुः । आर्जवं निश्छलं तत्कर्म गृणन्तः प्रशंसन्तः । एतेन भगवतः कर्म तु छलपूर्णं छलैरुक्तो मया धर्मः इत्युक्तेः ॥ १९ ॥ अनेन बलिना । यत् यस्मात् विद्वान् विष्णुं जानन्नपि जगत्त्रयं रिपवे अदात् ॥ २० ॥ अद्भुतमाश्चर्यजनक यथा स्यात्तथा तद्रूपम् अवर्धतेत्यन्वयः । कीदृक् । गुणत्रयं प्रधानं प्रकृतिः आत्मनि यस्य तत् । अत एव भ्वादयः यत् यत्र रूपे आसत स्थिता आसन् यद्वा गुणत्रयकार्यं जगत् । विवराः अधोलोकाः । हरे हरणशीलस्य ॥२१॥ ऋत्विगादिसहितो बलिः तस्य काये त्रिगुणात्मकम् एतत् विश्वं ददर्शेत्यन्वयः । कथंभूतम् । भूतादिभिः सहितम् । अर्थाः शब्दादयः आशयोऽन्तः करणम् । जीवः चिदाभासः । गुणात्मके सगुणे ॥ २२ ॥ इन्द्रसेनो बलि रसां रसातलादीन् अचष्ट अपश्यत् सर्वत्र द्वितीयान्तेन सम्बन्धः । महीध्रान् पर्वतान् । जानुनि पतत्त्रिणः । जातावेक-वचनम् । मारुतं गणं वायुसंघम् । इन्द्रस्य सेनेव सेना यस्य सः ॥ २३ ॥ विभोः विराजः वाससि वस्त्रे । गुह्ये गुह्यस्थाने मरीच्यादीन् । आत्मा स्वयं बलिः मुख्यो येषां तान् तत्प्रधानान् असुरान् । कुक्षिषु इति बहुवचनं समुद्रापेक्षया । उरुक्रमस्य भगवतः । ऋक्षमालां नक्षत्रपङ्क्तिम् ॥२४॥ अङ्ग सम्बोधने । ऋतं सूनृता वाणी । सामानि सामवेदीया ऋचः । रेफान् समस्तवर्णान् । रेफशब्दस्य सर्ववर्णोपरि विराजमानत्वात् तेन सर्वाक्षरग्रहणम् ॥ २५ ॥ ककुभो दिशः । द्यौ[1] द्यां स्वर्गम् । श्वसनं प्राणवायुम् । मारुतं

---

१. 'सुपां सुलुक्' इत्यमः सुः ।

वाण्यां च छन्दांसि रसे जलेशं भ्रुवोर्निषेधं च विधिं च पक्ष्मसु ।
अहश्च रात्रिं च परस्य पुंसो मन्युं ललाटेऽधर एव लोभम् ॥२७॥
स्पर्शे च कामं नृप रेतसोऽम्भः पृष्ठे त्वधर्मं क्रमणेषु यज्ञम् ।
छायासु मृत्युं हसिते च मायां तनूरुहेष्वोषधिजातयश्च ॥२८॥
नदीश्च नाडीषु शिला नखेषु बुद्धावजं देवगणानृषींश्च ।
प्राणेषु गात्रे स्थिरजङ्गमानि सर्वाणि भूतानि ददर्श वीरः ॥२९॥
सर्वात्मनीदं भुवनं निरीक्ष्य सर्वेऽसुराः कश्मलमापुरङ्ग ॥३०॥
सुदर्शनं चक्रमसह्यतेजो धनुश्च शार्ङ्गं स्तनयित्नुघोषम् ।
पर्जन्यघोषो जलजः पाञ्चजन्यः कौमोदकी विष्णुगदा तरस्विनी ॥३१॥
विद्याधरोऽसिः शतचन्द्रयुक्तस्तूणोत्तमावक्षयसायकौ च ।
सुनन्दमुख्या उपतस्थुरीशं पार्षदमुख्याः सहलोकपालाः ॥३२॥
स्फुरत्किरीटाङ्गदमीनकुण्डलःश्रीवत्सरत्नोत्तममेखलाम्बरैः ।
मधुव्रतस्रग्वनमालया वृतो रराज राजन् भगवानुरुक्रमः ॥३३॥
क्षितिं पदैकेन बलेर्विचक्रमे नभः शरीरेण दिशश्च बाहुभिः ।
पदं द्वितीयं क्रमतस्त्रिविष्टपं न वै तृतीयाय तदीयमण्वपि ।
उरुक्रमस्याङ्घ्रिरुपर्युपर्यथो महर्जनाभ्यां तपसः परं गतः ॥३४॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायामष्टमस्कन्धे विश्वरूपदर्शनं नाम विंशोऽध्यायः ॥२०॥

वाह्यवायुम् अतो न पुनरुक्तिः । सिकायां नासिकयोः ॥ २६ ॥ छन्दांसि गायत्र्यादीनि । रसे रसनेन्द्रिये ॥ २७ ॥ स्पर्शे त्वगिन्द्रिये । रेतसः रेतसि । क्रमणेषु पादन्यासेषु । या ओषधिजातयः ता इति योज्यम् ॥ २८ ॥ प्राणेषु इन्द्रियेषु देवगणान् ऋषींश्च । वीरो बलिः ॥ २९ ॥ सर्वेत्यर्द्धम् । सर्वात्मनि भगवति । कश्मलं भयम् । अङ्ग हे राजन् ॥ ३० ॥ सुदर्शनादयः ईशमुपतस्थुर्भेजुरिति द्वयोरन्वयः । जलजः शंखः । स्तनयित्नुः मेघः तद्वत् घोषो यस्य तरस्विनी वेगवती ॥३१॥ विद्याधरो नन्दकस्यैव नामान्तरम् । शतचन्द्राङ्कितकोशयुक्तः ॥३२॥ मीनकुण्डले मकराकृती कुण्डले । स्फुरन्ति किरीटादीनि यस्य सः । श्रीवत्सादिभिः मालया च वृतः भगवान् रराजेत्यन्वयः । रत्नोत्तमः कौस्तुभः । मधुव्रतानां भ्रमराणां स्रक् पङ्क्तिर्यस्यां तया ॥३३॥ क्षितिमिति सार्द्धम् । विचक्रमे आक्रान्तवान् तदीयं द्वितीयं पदं त्रिविष्टपं प्रति क्रमतः विक्षिपतः तस्य अङ्घ्रिः तपसः तपोलोकात् परं सत्यलोकं गतः अतः तृतीय-पादपूर्त्यै अणु अणुमात्रमपि स्थलं नावशिष्टमासीदित्यन्वयः । उरुक्रमो भगवान् महापराक्रमः ॥ ३४ ॥

इति श्रीमद्भागवते महापुराणेऽष्टमस्कन्धे गूढार्थदीपिन्यां विंशोऽध्यायः

अथैकविंशोऽध्यायः

श्रीशुक उवाच

सत्यं समीक्ष्याब्जभवो नखेन्दुभिर्हतस्वधामद्युतिरावृतोऽभ्यगात् ।
मरीचिमिश्रा ऋषयो बृहद्व्रताः सनन्दनाद्या नरदेव योगिनः ॥१॥
वेदोपवेदा नियमान्विता यमास्तर्केतिहासाङ्गपुराणसंहिताः ।
ये चापरे योगसमीरदीपितज्ञानाग्निना रन्धितकर्मकल्मषाः ।
ववन्दिरे यत्स्मरणानुभावतः स्वायम्भुवं धाम गता अकर्मकम् ॥२॥
अथाङ्घ्रये प्रोन्नमिताय विष्णोरुपाहरत् पद्मभवोऽर्हणोदकम् ।
समर्च्य भक्त्याऽभ्यगृणाच्छुचिश्रवा यन्नाभिपङ्केरुहसम्भवः स्वयम् ॥३॥
धातुः कमण्डलुजलं तदुरुक्रमस्य पादावनेजनपवित्रतया नरेन्द्र ।
स्वर्धुन्यभून्नभसि सा पतती निमार्ष्टि लोकत्रयं भगवतो विशदेव कीर्तिः ॥४॥

ब्रह्मादयो लोकनाथाः स्वनाथाय समादृताः । सानुगा बलिमाजह्रुः संक्षिप्तात्मविभूतये ॥५॥
तोयैः समर्हणैः स्रग्भिर्दिव्यगन्धानुलेपनैः । धूपैर्दीपैः सुरभिभिर्लाजाक्षतफलाङ्कुरैः ॥६॥
स्तवनैर्जयशब्दैश्च तद्वीर्यमहिमाङ्कितैः । नृत्यवादित्रगीतैश्च शङ्खदुन्दुभिनिःस्वनैः ॥७॥
जाम्बवानृक्षराजस्तु भेरीशब्दैर्मनोजवः । विजयं दिक्षु सर्वासु महोत्सवमघोषयत् ॥८॥

एकविंशे विराण्मूर्तेर्ब्रह्मणा पादपूजनम् ।
दैत्यानां वारणं युद्धात् बलेः पाशैश्च बन्धनम् ॥ १ ॥

सत्यमिति सार्द्धद्वयम् । यः परं सत्यं लोकं गतः तम् अब्जसंभवः ब्रह्मा समीक्ष्य तत्समीपमगात् । कथंभूतः । ये मरीच्यादयः मूर्तिमन्तो वेदादयश्च तैरावृतः । ये च अपरे धाम ब्रह्मलोकं गताः ते सर्वेऽपि तमङ्घ्रिं ववन्दिरे इति सम्बन्धः । अकर्मकं काम्यकर्मभिरप्राप्यम् । नरवा एव इन्दवः तैः हृताः तिरस्कृताः स्वधाम्नो द्युतिर्यस्य । योग एवं समीरो वायुः तेन उद्दीपितं ज्ञानमेवाऽग्निः तेन दग्धं कर्ममलं वासनालक्षणं येषां ते । उपवेदाः आयुर्वेदादयः । बृहद्व्रताः नैष्ठिकाः ॥ २ ॥ यस्य नाभिकमलसमुद्भवः तस्य विष्णोः प्रोन्नमिताय ऊर्ध्वं गताय अङ्घ्रये अर्हणोदकम् अर्घ्यम् आहरत् समर्पितवान् भक्त्या अभ्यगृणात् अस्तौच्चेत्यन्वय शुचिश्रवाः शुद्धकीर्त्तिः ॥ ३ ॥ यत् कमण्डलु जलं तदेव पादप्रक्षालनेन पवित्रतया स्वर्धुनी गङ्गा अभूत् । या आकाशे पतन्ती सती भगवतो विमला कीर्तिरेव लोकत्रयं निमार्ष्टि पवित्रं करोति ॥ ४ ॥ ब्रह्मेति त्रिकम् । ब्रह्मादयः आदृताः सादराः वामनाय समर्हणैः पूजासाधनैः तोयादिभिः बलिमाजह्रुः पूजां चक्रुरित्यन्वयः । कथंभूताय । संक्षिप्ता उपसंहृता आत्मविभूतिः देहविस्तारो येन तस्मै । सम्यक् अर्ह्यतेऽनेनेति करणे ल्युट् । अक्षतानां तु शालग्रामार्चने एव निषेधो नान्यत्र । अङ्कुरैः दूर्वाङ्कुरैः । अक्षतानि अखण्डितानि फलानि वा ॥ ५।६।७ ॥ विजयसूचकं महोत्सवमानन्दजनकं घोषमकारयत् । सर्वासु दिक्षु इत्यनेन प्रदक्षिणं लक्ष्यते प्रतिपादितं चैतद् बाल्मीकीये । जाम्बवताप्युक्तं

महीं सर्वां हृष्ट्वा त्रिपदव्याजयाच्ञया । ऊचुः स्वभर्तुरसुरा दीक्षितस्यात्यमर्षिताः ॥९॥
न वा अयं ब्रह्मबन्धुर्विष्णुर्मायाविनां वरः । द्विजरूपप्रतिच्छन्नो देवकार्यं चिकीर्षति ॥१०॥
अनेन याचमानेन शत्रुणा वटुरूपिणा । सर्वस्वं नो हृतं भर्तुर्न्यस्तदण्डस्य बर्हिषि ॥११॥
सत्यव्रतस्य सततं दीक्षितस्य विशेषतः । नानृतं भाषितुं शक्यं ब्रह्मण्यस्य दयावतः ॥१२॥
तस्मादस्य वधो धर्मो भर्तुः शुश्रूषणं च नः । इत्यायुधानि जगृहुर्बलेरनुचरासुराः ॥१३॥
ते सर्वे वामनं हन्तुं शूलपट्टिशपाणयः । अनिच्छतो बले राजन् प्राद्रवञ्जातमन्यवः ॥१४॥
तानभिद्रवतो दृष्ट्वा दितिजानीकपान् नृप । प्रहस्यानुचरा विष्णोः प्रत्यषेधन्नुदायुधाः ॥१५॥
नन्दः सुनन्दोऽथ जयो विजयः प्रबलो बलः । कुमुदः कुमुदाक्षश्च विष्वक्सेनः पतत्त्रिराट्॥१६॥
जयन्तः श्रुतदेवश्च पुष्पदन्तोऽथ सात्वतः । सर्वे नागायुतप्राणाश्चमूं ते जघ्नुरासुरम् ॥१७॥
हन्यमानान् स्वकान् दृष्ट्वा पुरुषानुचरैर्बलिः । वारयामास संरब्धान् काव्यशापमनुस्मरन्॥१८॥
हे विप्रचित्ते हे राहो हे नेमे श्रूयतां वचः । मा युध्यत निवर्तध्वं न नः कालोऽयमर्थकृत् ॥१९॥
यः प्रभुः सर्वभूतानां सुखदुःखोपपत्तये । तं नातिवर्तितुं दैत्याः पौरुषैरीश्वरः पुमान् ॥२०॥
यो नो भवाय प्रागासीदभवाय दिवौकसाम् । स एव भगवानद्य वर्तते तद्विपर्ययम् ॥२१॥
बलेन सचिवैर्बुद्ध्या दुर्गैर्मन्त्रौषधादिभिः । सामादिभिरुपायैश्च कालं नात्येति वै जनः॥२२॥
भवद्भिर्निर्जिता ह्येते बहुशोऽनुचरा हरेः । दैवेनर्द्धैस्त एवाद्य युधि जित्वा नदन्ति नः ॥२३॥
एतान् वयं विजेष्यामो यदि दैवं प्रसीदति । तस्मात् कालं प्रतीक्षध्वं यो नोऽर्थत्वाय कल्पते२४

श्रीशुक उवाच

पत्युर्निगदितं श्रुत्वा दैत्यदानवयूथपाः । रसां निविविशू राजन् विष्णुपार्षदताडिताः ॥२५॥

यूना मया विश्वरूपधारिणो भगवतः एकविंशति प्रदक्षिणाः कृता इति ॥ ८ ॥ स्वभर्तुः बले मही हृतां दृष्ट्वा असुराः परस्परमूचुरित्यन्वयः । अत्यमर्षिणः असहमानाः सन्तः । त्रिपदविषया या व्याज याच्ञा कपट याच्ञ्या ॥९॥ अयं ब्रह्मबन्धुः तयानेवं नैव किं स्वित् विष्णुः ॥१०॥ बर्हिषि यज्ञे न्यस्तः त्यक्तः दण्डो येन तस्य। नोऽस्माकम् । हृतमपहृतम् ॥११॥ सत्येति षष्ठयः तृतीयार्थे ॥१२॥ अनुचराश्च ते असुराः इति कर्मधारय ॥१३॥ पट्टिशो भल्लभेदः । प्राद्रवन् अभ्यधावन् । मन्युः क्रोधः॥१४॥ प्रत्यषेधन् निवारयामासुः ॥ १५ ॥ नन्द इति युग्यम् । सात्वतोऽपि पार्षदः । नागेति गजदशसहस्रस्य प्राणो बलं येषां ते ॥ १६।१७ ॥ संरब्धान् क्रुद्धान् । काव्यः शुक्राचार्यः ॥ १८ ॥ नोऽस्माकम् अर्थकृत् अनुकूलो नास्ति॥१९॥ उपपत्तये प्रदानाय प्रभुः समर्थः । तं कालरूपिणं प्रभुम् अतिवर्तितुं निराकर्तुं स्वकीयपुरुषार्थैः कोऽपि पुमान् नेशः न समर्थः ॥ २० ॥ नोऽस्माकं भवाय अभ्युदयाय । विपर्ययं प्रतिकूलम् ॥ २१ ॥ सचिवैः सहायैः । नात्येति नातिक्रामति ॥२२॥ दैवेन कालेन ऋद्धैः समृद्धैः भवद्भिः एते जिता ते एव । नोऽस्मान् जित्वा नदन्ति गर्जन्ति ॥ २३ ॥ अर्थत्वाय आनुकूल्याय ॥ २४ ॥ रसां रसातलम् ॥ २५ ॥ अथ रसातलप्रवेशोत्तरम् । विषु पक्षिषु राजते इति विराट् पक्षिराजः [1]ताक्ष्यसुतः कश्यपपुत्रो गरुडः ।

---

१. 'ताक्ष्यौं गरुडकश्यपौ' इति कोशात् ।

अथ तार्क्ष्यसुतो ज्ञात्वा विराट्प्रभुचिकीर्षितम् । बबन्ध वारुणैः पाशैर्बलिं सौत्येऽहनि क्रतौ ।२६।
हाहाकारो महानासीद् रोदस्योः सर्वतोदिशम् । गृह्यमाणेऽसुरपतौ विष्णुना प्रभविष्णुना ।।२७।।
तं बद्धं वारुणैः पाशैर्भगवानाह वामनः । नष्टश्रियं स्थिरप्रज्ञमुदारयशसं नृप ।।२८।।
पदानि त्रीणि दत्तानि भूमेर्मह्यं त्वयासुर । द्वाभ्यां क्रान्ता मही सर्वा तृतीयमुपकल्पय ।।२९।।
यावत् तपत्यसौ गोभिर्यावदिन्दुःसहोडुभिः । यावद् वर्षति पर्जन्यस्तावती भूरियं तव ।।३०।।
पदैकेन मया क्रान्तो भूर्लोकः खं दिशस्तनोः । स्वर्लोकस्तु द्वितीयेन पश्यतस्ते स्वमात्मना।।३१।।
प्रतिश्रुतमदातुस्ते निरये वास इष्यते । विश त्वं निरयं तस्माद् गुरुणा चानुमोदितः ।।३२।।
वृथा मनोरथस्तस्य दूरे स्वर्गः पतत्यधः । प्रतिश्रुतस्यादानेन योऽर्थिनं विप्रलम्भते ।।३३।।
विप्रलब्धो ददामीति त्वयाहं चाढ्यमानिना । तद्व्यलीकफलं भुङ्क्ष्व निरयं कतिचित् समाः ३४

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायामष्टमस्कन्धे वामनप्रादुर्भावे बलिनिग्रहो नामैकविंशोऽध्यायः ॥ २१ ॥

क्रतौ सौत्येऽहनि सोमपानदिवसे । वारुणैः नागपाशैः बबन्ध । सोमः सोमलतारूपी दिव्यौषधिः सद्वैद्यदृश्यो भवति ॥ २६ ॥ प्रभविष्णुना सर्वसमर्थेन । रोदस्यो द्यावापृथिव्योः । सर्वतो दिशं सर्वासु दिक्षु ॥ २७ ॥ वारुणैः नागपाशैः ।।२८।। उपकल्पय पूर्णं कुरु ।।२९।। यावत् असौ सूर्यः गोभिः किरणैः तपति । उडुभिः नक्षत्रैः प्रकाशते । पर्जन्यो मेघः तावती त्वत्सम्बन्धिनी ।।३०।। तनोः तन्वा । ते स्व सर्वस्वं ते पश्यतः सतः इत्यावृत्यापि योज्यम् आत्मनां व्यापकेन मया सर्वं गृहीतम् ।।३१।। प्रतिश्रुतं प्रतिज्ञातम् मदातुस्ते निरये नरके । यस्मात् त्वम् अदाता तस्मात् [1]निरयमिति योज्यम् । वस्तुतस्तु अकारो वासुदेवः तस्मै दातुस्ते निरये निलये वैकुण्ठे । रलयोरभेदात् ।।३२।। स्वर्गस्तु दूरे स च अधः पतति योऽर्थिनं विप्रलम्भते वञ्चयते तस्येत्यन्वयः । वस्तुतस्तु तस्य मद्भक्तस्य ते इन्द्रपदप्राप्तिरूपो मनोरथो वृथा यतो मत्स्थानयोग्यात् त्वत्तो दूरे अधः स्वर्गोऽस्ति । यो भवान् प्रतिश्रुतस्य प्रतिज्ञातस्य आ सम्यक् प्रदानेन मां लम्भते प्राप्स्यति द्वारपालरूपेण । हे विप्र विशेषेण प्रातीति विप्रः । 'प्रा पूर्तौ धातुः ॥३३॥ आढ्योऽहमित्यभिमानवता त्वया अहं वञ्चितः । व्यलीकफलम् अनृतफलम् समाः वर्षाणि भुङ्क्ष्व आढ्यैः भक्तिधनाढ्यैः मान्यते पूज्यते तेन त्वया विशेषेण प्रकृष्टतया अहं लब्धो यतः तस्मात् विगतमलीकं यस्मात् तस्य सत्यकर्मणः फलं सुतलवैभवं ददामि ततोऽष्टमे मन्वन्तरे त्वामिन्द्रं प्रापय्य वैकुण्ठं नेष्ये इति गूढाभिसन्धिः ॥ ३४ ॥

इति श्रीमद्भागवते महापुराणेऽष्टमस्कन्धे गूढार्थदीपिन्यामेकविंशोऽध्याय ।। ११ ।।

---

१. गुरुणा शुक्रेण अनुमोदितः समर्थितः च शब्दात् शप्तत्वाच्चेत्यर्थः। चो हेतौ । 'निष्ठां ते नरके मन्ये ह्यप्रदातुः प्रतिश्रुतम्' इति शुक्रवाक्यम् ।

अथ द्वाविंशोऽध्यायः

श्रीशुक उवाच

एवं विप्रकृतो राजन् बलिर्भगवताऽसुरः । भिद्यमानोऽप्यभिन्नात्मा प्रत्याहाऽविक्लवं वचः ॥१॥

बलिरुवाच

यद्युत्तमश्लोक भवान् ममेरितं वचो व्यलीकं सुरवर्य मन्यते ।
करोम्यृतं तन्न भवेत् प्रलम्भनं पदं तृतीयं कुरु शीर्ष्णि मे निजम् ॥२॥
बिभेमि नाहं निरयात् पदच्युतो न पाशबन्धाद् व्यसनाद् दुरत्ययात् ।
नैवार्थकृच्छ्राद् भवतो विनिग्रहादसाधुवादाद् भृशमुद्विजे यथा ॥ ३ ॥

पुंसां श्लाघ्यतमं मन्ये दण्डमर्हत्तमार्पितम् । यं न माता पिता भ्राता सुहृदश्चादिशन्ति हि॥ ४॥
त्वं नूनमसुराणां नः पारोक्ष्यः परमो गुरुः । यो नोऽनेकमदान्धानां विभ्रंशं चक्षुरादिशत्॥ ५ ॥
यस्मिन् वैरानुबन्धेन रूढेन विबुधेतराः । बहवो लेभिरे सिद्धिं यामु हैकान्तयोगिनः ॥ ६ ॥
तेनाहं निगृहीतोऽस्मि भवता भूरिकर्मणा । बद्धश्च वारुणैः पाशैर्नातिव्रीडे न च व्यथे ॥ ७ ॥

पितामहो मे भवदीयसम्मतः प्रह्लाद आविष्कृतसाधुवादः ।
भवद्विपक्षेण विचित्रवैशसं सम्प्रापितस्त्वत्परमः स्वपित्रा ॥ ८ ॥

द्वाविंशे तत्पदाऽऽपूर्तिः कृता देहसमर्पणात् ।
तुष्टस्तं सुतलं नीत्वा स्वयं तद्द्वारपोऽभवत् ॥ १ ॥

विप्रकृतः लोकदृष्ट्या अपकृतः । भिद्यमानोऽपि सत्याच्चाल्यमानोऽपि अभिन्नात्मा स्थिरचित्तः सन् अविक्लवमुदारम् ॥ १ ॥ हे उत्तमश्लोक मम ईरितमुक्तं वचः व्यलीकम् अनृतं नास्ति भवान् मन्यते चेत् अहम् ऋतं करोमि यथा प्रलम्भनं वञ्चनपरं न भवेत् तृतीयं पदं मे शीर्ष्णि कुरु । भूमिवत् मम शरीरं क्रामतु पादपूर्तिः स्यादेव सम्पत्त्यपेक्षया तत्स्वामिनोऽधिकत्वात् । 'स्यात् स्वामी द्विगुणोऽधिकः' इति वचनात् ॥ २ ॥ पदच्युतोऽपि अहं असाधुवादात् मिथ्याभाषणात् अपकीर्तेर्वा यथा उद्विजे तथा निरयादिभ्यो न बिभेमीत्यन्वयः । दुरत्ययात् दुरतिक्रमणीयात् । द्रव्योपार्जनकष्टात् पदच्युतः इति क्विन्तत्वात् पञ्चम्यन्तं वा व्यसनात्[1] विपदः ध्वंसाद्वा ॥ ३ ॥ अर्हत्तमैः पूज्यतमैः अर्पितं दण्डम् । पापनिवर्तकत्वात् कीर्तिहेतुत्वाच्च ॥४॥ पारोक्ष्यः परोक्षे हितकारी । यो भवान् विभ्रंशं मदभ्रंशरूपं चक्षुः ज्ञानम् ॥ ५ ॥ रूढेन दृढेन । यां योगिनो लभन्ते तां सिद्धिं मोक्षलक्षणां लेभिरे इत्यन्वयः । उहविस्मये । विबुधेतराः असुराः अनुबन्धः सम्बन्धः ॥६॥ भूरिकर्मणा भूरि अचिन्त्यम् । मन्निग्रहस्ते बहुकार्यार्थः । देवलोकैश्वर्यादि प्रापणार्थः ॥७॥ मे पितामहः प्रह्लादः भवद्विपक्षेण मत्पित्रा हिरण्यकशिपुना विचित्रवैशसं नानाविधपीडां प्रापितोऽपि भवत्पादपद्ममेव प्रपेदे अथ तस्मादहमपि दैवेन तस्यैव भाग्येन तवान्तिकं नीत इति चतुर्णामेकान्वयः कथंभूतः । आविष्कृतः साधुवादः सत्कीर्तिर्यस्य सः । पुनश्च त्वमेव परमः सेव्यः

१, 'व्यसनं विपदि ध्वंसे' इति कोशात् ।

किमात्मनानेन जहाति योऽन्ततः किं रिक्थहारैः स्वजनाख्यदस्युभिः ।
किं जायया संसृतिहेतुभूतया मर्त्यस्य गेहैः किमिहायुषो व्ययः ॥ ९ ॥
इत्थं स निश्चित्य पितामहो महानगाधबोधो भवतः पादपद्मम् ।
ध्रुवं प्रपेदे ह्यकुतोभयं जनाद् भीतः स्वपक्षक्षपणस्य सत्तमः ॥१०॥
अथाहमप्यात्मरिपोस्तवान्तिकं दैवेन नीतः प्रसभं त्याजितश्रीः ।
इदं कृतान्तान्तिकवर्ति जीवितं ययाऽध्रुवं स्तब्धमतिर्न बुध्यते ॥११॥

श्रीशुक उवाच

तस्येत्थं भाषमाणस्य प्रह्लादो भगवत्प्रियः । आजगाम कुरुश्रेष्ठ राकापतिरिवोत्थितः ॥१२॥
तमिन्द्रसेनः स्वपितामहं श्रिया विराजमानं नलिनायतेक्षणम् ।
प्रांशुं पिशङ्गाम्बरमञ्जनत्विषं प्रलम्बबाहुं सुभगं समैक्षत ॥१३॥
तस्मै बलिर्वारुणपाशयन्त्रितः समर्हणं नोपजहार पूर्ववत् ।
ननाम मूर्ध्नाश्रुविलोललोचनः सव्रीडनीचीनमुखो बभूव ह ॥१४॥
स तत्र हासीनमुदीक्ष्य सत्पतिं सुनन्दनन्दाद्यनुगैरुपासितम् ।
उपेत्य भूमौ शिरसा महामना ननाम मूर्ध्ना पुलकाश्रुविक्लवः ॥१५॥

प्रह्लाद उवाच

त्वयैव दत्तं पदमैन्द्रमूर्जितं हृतं तदेवाद्य तथैव शोभनम् ।
मन्ये महानस्य कृतो ह्यनुग्रहो विभ्रंशितो यच्छ्रिय आत्ममोहनात् ॥ १६॥
यया हि विद्वानपि मुह्यते यतस्तत् को विचष्टे गतिमात्मनो यथा ।
तस्मै नमस्ते जगदीश्वराय वै नारायणायाखिललोकसाक्षिणे ॥१७॥

आश्रयश्च यस्य ॥ ८ ॥ यः अन्ते जहाति तेन आत्मना देहेन किम् । दस्युरूपैः रिक्थहारैः दायादैः पुत्रैश्च किम् । जायया वा किम् गेहैरपि किम् यैः केवलमायुषो व्यय एव न किञ्चित्सुखम् ॥९॥ स्वपक्षं दैत्यकुलं क्षपयतीति तथाभूतस्यापि भवतः पादपद्ममिति योज्यम् । जनात् जनसंगात् भीतः सन् ॥ १० ॥ आत्मनो ममेति व्याजस्तुतिः । वस्तुतस्तु: आत्मनो देहद्वयस्य रिपोर्नाशकस्य मोक्ष प्रदस्येत्यर्थः यया श्रिया स्तब्धमतिः अपहृतविवेकः सन् इदं जीवितमध्रुवं न बुध्यते किन्तु नित्यमेव । कीदृक् कृतान्तस्य अन्तिके वर्तते मृत्योः सन्निहितम् ॥ ११ ॥ [1]राकापतिः पूर्णचन्द्र इव ॥ १२ ॥ इन्द्रसेनो बलिः आगतं तं स्वपितामहमैक्षतेत्यन्वयः । कथंभूतम् नलिनवत् कमलपलाशवत् आयते विशाले ईक्षणे नेत्रे यस्य तम् सुभग सुन्दरम् ॥१३॥ प्रांशुमुन्नतम् । यद्वा । प्रकृष्टा अंशवः तेजोरश्मयः यस्य तम् । वारुणपाशैः नागपाशैः यन्त्रितः बद्धः बलिः तस्मै प्रह्लादाय अर्घ्यादिकं नोपजहार न समर्पितवान् केवलं ननामेत्यन्वयः । सव्रीडं नीचीनं नम्रीभूतं च मुखं यस्य सः । विलोले चञ्चले ॥१४॥ स प्रह्लादः आसीनं तं वामनमुदीक्ष्य शिरसा नमन्नेव उपेत्य मूर्ध्ना भूमौ तं ननामेत्यन्वयः । पुलकैः रोमाञ्चैः अश्रुभिश्च विह्वलः । ह हर्षे ॥ १५ ॥ ऊर्जितं समृद्धम् । हृतमपहृतम् । श्रियः ततो यत् आत्ममोहनं बन्धनहेतुरहङ्कारस्तस्माच्च विभ्रंशित इति यत् अयमेव ॥ १६ ॥ यया श्रिया विद्वानपि यतः संयतोऽपि मुह्यति तत् तस्या

---

१. कलाहीने सानुमतिः पूर्णे राका निशा करे । राका पूर्णिमा ।

श्रीशुक उवाच

तस्यानुशृण्वतो राजन् प्रह्लादस्य कृताञ्जलेः । हिरण्यगर्भो भगवानुवाच मधुसूदनम् ।१८॥
बद्धं वीक्ष्य पतिं साध्वी तत्पत्नी भयविह्वला । प्राञ्जलिः प्रणतोपेन्द्रं बभाषेऽवाङ्मुखी नृप॥१९॥

विन्ध्यावलिरुवाच

क्रीडार्थमात्मन इदं त्रिजगत् कृतं ते स्वाम्यं तु तत्र कुधियोऽपर ईश कुर्युः ।
कर्तुः प्रभोस्तव किमस्यत आवहन्ति त्यक्तह्रियस्त्वदवरोपितकर्तृवादाः ॥२०॥

ब्रह्मोवाच

भूतभावन भूतेश देवदेव जगन्मय । मुञ्चैनं हृतसर्वस्वं नायमर्हति निग्रहम् ॥२१॥
कृत्स्ना तेऽनेन दत्ता भूर्लोकाः कर्मार्जिताश्च ये । निवेदितं च सर्वस्वमात्माऽविक्लवया धिया॥२२॥

यत्पादयोरशठधीः सलिलं प्रदाय दूर्वाङ्कुरैरपि विधाय सतीं सपर्याम् ।
अप्युत्तमां गतिमसौ भजते त्रिलोकीं दाश्वानविक्लवमनाः कथमार्तिमृच्छेत् ॥२३॥

श्रीभगवानुवाच

ब्रह्मन् यमनुगृह्णामि तद्विशो विधुनोम्यहम् । यन्मदः पुरुषः स्तब्धो लोकं मां चावमन्यते॥२४॥
यदा कदाचिज्जीवात्मा संसरन् निजकर्मभिः । नानायोनिष्वनीशोऽयं पौरुषीं गतिमाव्रजेत्॥२५॥
जन्मकर्मवयोरूपविद्यैश्वर्यधनादिभिः । यद्यस्य न भवेत् स्तम्भस्तत्रायं मदनुग्रहः ॥२६॥
मानस्तम्भनिमित्तानां जन्मादीनां समन्ततः । सर्वश्रेयःप्रतीपानां हन्त मुह्येन्न मत्परः ॥२७॥
एष दानवदैत्यानामग्रणीः कीर्तिवर्धनः । अजैषीदजयां मायां सीदन्नपि न मुह्यति ॥२८॥
क्षीणरिक्थश्च्युतःस्थानात् क्षिप्तो बद्धश्च शत्रुभिः । ज्ञातिभिश्च परित्यक्तो यातनामनुयापितः॥२९

सत्यां कोऽन्यः पुमान् आत्मनो गतिं तत्त्वं यथावत् विचष्टे तस्मै ते नमः । यत इति यम् उपरमे निष्ठान्तम् ॥१७॥ उवाच वक्तुम् उद्यतोऽभूत ॥१८॥ उपेन्द्रं वामनम् । अवाङ्मुखी अधोमुखी ॥१९॥ ते त्वया इदं क्रीडार्थं कृतम् स्वाम्यं स्वामित्वं ममेदमिति । तत्र हेतुः । त्वयैव अवतारितो निरस्तः कर्तृवादः कर्तृत्वाऽहङ्कारो येषां ते । अतः कर्तुः स्रष्टुः प्रभोः पालयितुः अस्यतः संहर्तुश्च किम् आवहन्ति किं समर्पयन्ति न किमपि स्वत्वाभावात् । चतुर्थ्यर्थे षष्ठ्यः ॥२०॥ निग्रहं बन्धनम् ॥२१॥ कृत्स्ना सम्पूर्णा । ये स्वर्गादिलोकाः ते च । अविक्लवया उदारया धिया आत्मा देहोऽपि दत्तः ॥२२॥ अशठधीः निष्कपटबुद्धिः । सपर्यां पूजाम् । गतिं वैकुण्ठमपि भजते प्राप्नोति । अविक्लवमनाः सन् असौ त्रिलोकीं दाश्वान् दत्तवान् अतः कथमार्तिं निग्रहं प्राप्नुयात् ॥ २३ ॥ विशो धनानि विधुनोमि अपहरोमि । यैः धनादिभिर्मदो यस्य सः स्तब्धोऽनम्रः सन् मां तिरस्करोति ॥२४ । अनीशः कर्म अवशः परतन्त्रः पौरुषीं गतिं मनुष्यजन्म ॥२५॥ स्तम्भो गर्वः । तत्र पुरुषे ॥२६॥ मानो गर्वः स्तम्भोऽनम्रता तयोर्निमित्तभूतानां श्रेयःप्रतीपानां पुरुषार्थविनाशकानां । तृतीयार्थे षष्ठी जन्मादिभिः मत्परः मद्भक्तः नैव मुह्येत् गर्वी न भवेत् । हन्त एवार्थे । अहं परो मुख्यो यस्येति ॥२७॥ सीदन् क्लिश्यन्नपि ॥२८॥ क्षीणरिक्थः क्षीणधनः क्षिप्तः

गुरुणा भर्त्सितः शप्तो जहौ सत्यं न सुव्रतः । छलैरुक्तो मया धर्मो नायं त्यजति सत्यवाक्।३०।
एष मे प्रापितः स्थानं दुष्प्रापममरैरपि । सावर्णेरन्तरस्यायं भवितेन्द्रो मदाश्रयः ॥३१॥
तावत् सुतलमध्यास्तां विश्वकर्मविनिर्मितम् । यन्नाधयो व्याधयश्च क्लमस्तन्द्रा पराभवः ।
नोपसर्गा निवसतां सम्भवन्ति ममेक्षया ॥ ३२ ॥
इन्द्रसेन महाराज याहि भो भद्रमस्तु ते । सुतलं स्वर्गिभिः प्रार्थ्यं ज्ञातिभिः परिवारितः॥३३॥
न त्वामभिभविष्यन्ति लोकेशाः किमुतापरे । त्वच्छासनातिगान् दैत्यांश्चक्रं मे सूदयिष्यति३४
रक्षिष्ये सर्वतोऽहं त्वां सानुगं सपरिच्छदम् । सदा संनिहितं वीर तत्र मां द्रक्ष्यते भवान्।३५।
तत्र दानवदैत्यानां सङ्गात् ते भाव आसुरः । दृष्ट्वा मदनुभावं वै सद्यः कुण्ठो विनङ्क्ष्यति३६

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायामष्टमस्कन्धे वामनप्रादुर्भावे बलिवामनसंवादो नाम द्वाविंशोऽध्यायः ॥ २२ ॥

अथ त्रयोविंशोऽध्यायः

श्रीशुक उवाच

इत्युक्तवन्तं पुरुषं पुरातनं महानुभावोऽखिलसाधुसम्मतः ।
बद्धाञ्जलिर्बाष्पकलाकुलेक्षणो भक्त्युद्गलो गद्गदया गिराऽब्रवीत् ॥ १ ॥

बलिरुवाच

अहो प्रणामाय कृतः समुद्यमः प्रपन्नभक्तार्थविधौ समाहितः ।
यल्लोकपालैस्त्वदनुग्रहोऽमरैरलब्धपूर्वोऽपसदेऽसुरेऽर्पितः ॥ २ ॥

आक्षिप्तः । यातनां तीव्रवेदनां प्रापितः । सत्यं न जहौ न त्यक्तवानित्यर्थः ॥ २९।३० ॥ अन्तरस्य मन्वन्तरस्य । मे मया ॥ ३१ ॥ तावदिति सार्द्धम् । यत् यत्र । क्लमः ग्लानिः । तन्द्रा अनवधानता । अन्ये उपद्रवाः ॥ ३२ ॥ इन्द्रसेन हे बले । सुतलं याहीत्यन्वयः ॥ ३३ ॥ त्वच्छासनमतिक्रम्य गच्छन्ति ये ते तान् सूदयिष्यति नाशयिष्यति ॥ ३४ ॥ सन्निहितं द्वार्यवस्थितम् ॥ ३५ ॥ यः आसुरो भावः स कुण्ठितः प्रतिहतः सन् ॥ ३६ ॥

इति श्रीमद्भागवते महापुराणेऽष्टमस्कन्धे गूढार्थदीपिन्यां द्वाविंशोऽध्यायः ॥ २२ ॥

त्रयोविंशे बलिर्यातः सुतलं सपितामहः ।
इन्द्रोऽप्युपेन्द्रसाहाय्यात् मुमुदे स्वर्गमावसन् ॥ १ ॥

इति उक्तवन्तं वामनं प्रति बलिः बद्धाञ्जलिः सन् गद्गदया गिरा अब्रवीदित्यन्वयः । सम्मतः आदृतः । वाष्पकलाभिः अश्रुबिन्दुभिः व्याप्ते ईक्षणे नेत्रे यस्य । भक्त्या उद्गतं वाष्पं गले यस्य सः॥१॥ अहो अद्भुतम् । प्रणामार्थं कृतः [1]समुद्योग एव शरणागतभक्तकार्यसम्पादने समाहितः तत्परो भवति । यत्

---

१. विष्णुरयमागत इति गुरुमुखात् श्रुत्वाऽपि प्रणामार्थमुद्यम एव कृतः गुरुभयात् न प्रणामः तस्यै तत्फलं किमुत प्रणामे ।

इत्युक्त्वा हरिमानम्य ब्रह्माणं सभवं ततः । विवेश सुतलं प्रीतो बलिर्मुक्तः सहासुरैः ॥ ३ ॥
एवमिन्द्राय भगवान् प्रत्यानीय त्रिविष्टपम् । पूरयित्वाऽदितेः काममशासत् सकलं जगत् ॥४॥
लब्धप्रसादं निर्मुक्तं पौत्रं वंशधरं बलिम् । निशाम्य भक्तिप्रवणः प्रह्लाद इदमब्रवीत् ॥ ५ ॥

प्रह्लाद उवाच

नेमं विरिञ्चो लभते प्रसादं न श्रीर्न शर्वः किमुतापरे ते ।
यन्नोऽसुराणामसि दुर्गपालो विश्वाभिवन्द्यैरपि वन्दिताङ्घ्रिः ॥ ६ ॥
यत्पादपद्ममकरन्दनिषेवणेन ब्रह्मादयः शरणदाश्नुवते विभूतीः ।
कस्माद् वयं कुसृतयः खलयोनयस्ते दाक्षिण्यदृष्टिपदवीं भवतः प्रणीताः ॥ ७ ॥
चित्रं तवेहितमहोऽमितयोगमायालीलाविसृष्टभुवनस्य विशारदस्य ।
सर्वात्मनः समदृशो विषमः स्वभावो भक्तप्रियो यदसि कल्पतरुस्वभावः ॥ ८ ॥

श्रीभगवानुवाच

वत्स प्रह्लाद भद्रं ते प्रयाहि सुतलालयम् । मोदमानः स्वपौत्रेण ज्ञातीनां सुखमावह ॥ ९ ॥
नित्यं द्रष्टासि मां तत्र गदापाणिमवस्थितम् । मद्दर्शनमहाह्लादध्वस्तकर्मनिबन्धनः ॥१०॥

श्रीशुक उवाच

आज्ञां भगवतो राजन् प्रह्लादो बलिना सह । बाढमित्यमलप्रज्ञो मूर्ध्न्याधाय कृताञ्जलिः ॥११॥
परिक्रम्यादिपुरुषं सर्वासुरचमूपतिः । प्रणतस्तदनुज्ञातः प्रविवेश महाबिलम् ॥१२॥
अथाहोशनसं राजन् हरिर्नारायणोऽन्तिके । आसीनमृत्विजां मध्ये सदसि ब्रह्मवादिनाम् ॥१३॥
ब्रह्मन् संतनु शिष्यस्य कर्म च्छिद्रं वितन्वतः । यत् तत् कर्मसु वैषम्यं ब्रह्मदृष्टं समं भवेत् ॥१४॥

येन उद्यमेन तव अनुग्रहः मयि अपसदे नीचे असुरे अर्पितः कृतः । कथंभूतः । लोकपालैरपि अलब्धपूर्वः तत्र मां तत्र द्रक्ष्यते; इत्युक्तरूपः ॥ २ ॥ स बलिः । ततो भूलोकात् । मुक्तः नागपाशेभ्यः विवेश प्रवेष्टुमुद्यतोऽभूत् ॥ ३ ॥ त्रिविष्टपं स्वर्गं प्रत्यानीय समर्प्य । कामं मनोरथम् । अशासत् अपालयत् । शप्लुगभावश्चार्षः ॥ ४ ॥ वंशधरं वंशवर्धनम् । निशाम्य दृष्ट्वा । प्रवणो नम्रः सन् ॥ ५ ॥ अपरे इन्द्रादयः किमुत । दुर्गपालः दुर्गेभ्यो दुःखेभ्यः पालयतीति । द्वारपालो वा । वन्द्यैः ब्रह्मादिभिः ॥६॥ हे शरणद आश्रयप्रद विभूतीः सम्पत्तीः अश्नुवते प्राप्नुवन्ति । एवंभूतस्य भवतः दाक्षिण्यदृष्टिपदवीं कृपादृष्टिविषयतां कुसृतयः दुश्चरित्राः ते वयं कथं प्रणीताः प्रापिताः । मकरन्दो भक्तिरसः ॥ ७ ॥ लोकदृष्ट्या विषमस्वभावोऽपि त्वं यथा कल्पतरुः आश्रितानेव भजते तथा त्वं भक्तानेव अतो न विषमस्वभाव इति यत् तव ईहितं चरित्रम् अहो चित्रमत्यद्भुतं विषमत्वेऽपि अविषमत्वमेवेत्यर्थः । कथंभूतस्य । अचिन्त्ययोगमायया सह या लीला क्रीडा तया रचितानि भुवनानि येन तस्य ॥८॥ आवह प्रापय ॥९॥ तत्र सुतले । मद्दर्शनेन यो महाह्लादः तेन ध्वस्तं कर्मनिबन्धनमज्ञानं यस्या सः कर्मभिः निबध्नातीति ॥१०॥ आज्ञामिति युग्मम् । प्रह्लादो बाढं तथास्तु इति आज्ञां मूर्ध्ना आधाय स्वीकृत्य परिक्रम्य च बलिना सह महाबिलं सुतलं प्रविवेशेति द्वयोरन्वयः । प्रणतः कृतप्रणामः तेन अनुज्ञातश्च ॥ ११।१२॥ अथ बलिगमनानन्तरम् । हरिः अन्तिके आसीनम् उशनसं शुक्राचार्यमाहेत्यन्वयः ॥ १३ ॥ यज्ञकर्म वितन्वतः शिष्यस्य

शुक्र उवाच

कुतस्तत्कर्मवैषम्यं यस्य कर्मेश्वरो भवान्। यज्ञेशो यज्ञपुरुषः सर्वभावेन पूजितः ॥१५॥
मन्त्रतस्तन्त्रतश्छिद्रं देशकालार्हवस्तुतः। सर्वं करोति निश्छिद्रं नामसंकीर्तनं तव ॥१६॥
तथापि वदतो भूमन् करिष्याम्यनुशासनम्। एतच्छ्रेयः परं पुंसां यत् तवाज्ञानुपालनम्॥१७॥

श्रीशुक उवाच

अभिनन्द्य हरेराज्ञामुशना भगवानिति। यज्ञच्छिद्रं समाधत्त बलेर्विप्रर्षिभिः सह ॥१८॥
एवं बलेर्महीं राजन् भिक्षित्वा वामनो हरिः। ददौ भ्रात्रे महेन्द्राय त्रिदिवं यत् परैर्हृतम्॥१९॥
प्रजापतिपतिर्ब्रह्मा देवर्षिपितृभूमिपैः। दक्षभृग्वङ्गिरोमुख्यैः कुमारेण भवेन च ॥२०॥
कश्यपस्यादितेः प्रीत्यै सर्वभूतभवाय च। लोकानां लोकपालानामकरोद् वामनं पतिम् ॥२१॥
वेदानां सर्वदेवानां धर्मस्य यशसः श्रियः। मङ्गलानां व्रतानां च कल्पं स्वर्गापवर्गयोः ॥२२॥
उपेन्द्रं कल्पयांचक्रे पतिं सर्वविभूतये। तदा सर्वाणि भूतानि भृशं मुमुदिरे नृप ॥२३॥
ततस्त्विन्द्रः पुरस्कृत्य देवयानेन वामनम्। लोकपालैर्दिवं निन्ये ब्रह्मणा चानुमोदितः ॥२४॥
प्राप्य त्रिभुवनं चेन्द्र उपेन्द्रभुजपालितः। श्रिया परमया जुष्टो मुमुदे गतसाध्वसः ॥२५॥
ब्रह्मा शर्वः कुमारश्च भृग्वाद्या मुनयो नृप। पितरः सर्वभूतानि सिद्धा वैमानिकाश्च ये ॥२६॥
सुमहत् कर्म तद् विष्णोर्गायन्तः परमाद्भुतम्। धिष्ण्यानि स्वानि ते जग्मुरदितिं च शशंसिरे२७
सर्वमेतन्मयाऽऽख्यातं भवतः कुलनन्दन। उरुक्रमस्य चरितं श्रोतॄणामघमोचनम् ॥२८॥

पारं महिम्न उरु विक्रमतो गृणानो यः पार्थिवानि विममे स रजांसि मर्त्यः।
किं जायमान उत जात उपैति मर्त्य इत्याह मन्त्रदृगृषिः पुरुषस्य यस्य ॥२९॥

बलेः यत् छिद्रं न्यूनत्वं जातं तत् सन्तनु पूरय। कथं तेन विनेति न शङ्क्यम् ब्रह्मदृष्टं समं पूर्णं भवेत्। 'समस्तुल्ये च पूर्णे च इति निरुक्तिः ॥ १४॥ यस्येति कर्तरि षष्ठी। येन बलिना सर्वभावेन देहगेहादिना भवान् पूजितः तस्य कर्मसु वैगुण्यं कुतः न कुतोऽपीत्यन्वयः। ईश्वरः प्रवर्तकः। यज्ञेशः फलदाता ॥१५॥ मन्त्रतः स्वरादिना। तन्त्रतः अनुष्ठानेन। देशकालातिक्रमेण अर्हतः पात्रतः। वस्तुतः दक्षिणादिना। यच्छिद्रं वैगुण्यं तत् निश्छिद्रं पूर्णं करोति ते कीर्तनम् ॥ १६ ॥ यद्यपि वैगुण्यं नास्ति तथापि वदतस्तव अनुशासनम् आदेशम् हे भूमन् हे अपरिच्छिन्नमहिमन् ॥ १७ ॥ छिद्रम् अवशिष्टं कर्म समाधत्त पूरितवान्। भगवान् भगवत्तत्त्वज्ञः ॥ १८ ॥ एवं बलेः सकाशात् महीं भिक्षित्वा याचित्वा परैः शत्रुभिः यत् हृतं तत् महेन्द्राय ददौ इत्यन्वयः ॥१९॥ प्रजेति युग्मम्। ब्रह्मा कश्यपादितिप्रीतये देवादिभिः सह वामनं पतिमकरोदिति द्वयोरन्वयः। भूमिपाः मनवः तत्पुत्राश्च ॥ २०।२१ ॥ षष्ठ्यन्तबोध्यानां वेदादीनां कल्पं रक्षणे प्रदाने च समर्थम् उपेन्द्रं वामनं पतिं कल्पयाञ्चक्रे अकरोत्। सर्वेषां विभूतये सुखसमृद्ध्यर्थम्। कल्पम् 'कृपू' सामर्थ्ये धातुः। कृपो रो लः ॥ २२।२३ ॥ देवयानेन विमानेन ॥ २४ ॥ गतसाध्वसः वीतभयः ॥ २५ ॥ ब्रह्मेति युग्मम्। ये च वैमानिका विमानारूढाः ते सर्वे तत्कर्म गायन्तः स्वानि स्थानानि जग्मुः अदितिं च शशंसिरे प्रशशंसुः ॥२६।२७॥ उरुर्महान् क्रमः पराक्रमो यस्य तस्य वामनस्य॥२८॥ उरु बहुधा विक्रमतः विष्णोः पारम् अवधिं यो मर्त्यः गृणानो ब्रुवाणो

य इदं देवदेवस्य हरेरद्भुतकर्मणः। अवतारानुचरितं शृण्वन् याति परां गतिम् ॥३०॥
क्रियमाणे कर्मणीदं दैवे पित्र्येऽथ मानुषे। यत्र यत्रानुकीर्त्येत तत् तेषां सुकृतं विदुः ॥३१॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायामष्टमस्कन्धे वामनावतारचरिते त्रयोविंशोऽध्यायः॥२३॥

अथ चतुर्विंशोऽध्यायः

राजोवाच

भगवन् श्रोतुमिच्छामि हरेरद्भुतकर्मणः। अवतारकथामाद्यां मायामत्स्यविडम्बनम् ॥ १ ॥
यदर्थमदधाद् रूपं मात्स्यं लोकजुगुप्सितम्। तमःप्रकृति दुर्मर्षं कर्मग्रस्त इवेश्वरः ॥ २ ॥
एतन्नो भगवन् सर्वं यथावद् वक्तुमर्हसि। उत्तमश्लोकचरितं सर्वलोकसुखावहम् ॥ ३ ॥

सूत उवाच

इत्युक्तो विष्णुरातेन भगवान् बादरायणिः। उवाच चरितं विष्णोर्मत्स्यरूपेण यत् कृतम् ॥४॥

श्रीशुक उवाच

गोविप्रसुरसाधूनां छन्दसामपि चेश्वरः। रक्षामिच्छंस्तनूर्धत्ते धर्मस्यार्थस्य चैव हि ॥ ५ ॥
उच्चावचेषु भूतेषु चरन् वायुरिवेश्वरः। नोच्चावचत्वं भजते निर्गुणत्वाद्धियो गुणैः ॥ ६ ॥

भवति स पार्थिवपरमाणूनपि विममे विशेषेण गणितवान्। यथा तद्गणनमशक्यं तथा गुणानां गणनमपि। जातः जायमानो जनिष्यमाणो वा मर्त्यः यस्य भगवतः पारमन्तं किमुपैति नैवोपैति इत्येवं मन्त्रद्रष्टा ऋषिः वसिष्ठादिराहेत्यन्वयः ॥ २९ ॥ यः शृण्वन् भवति स परां गतिं मुक्तिम् ॥ ३० ॥ दैवे यज्ञादौ। पित्र्ये श्राद्धादौ मानुषे विवाहादौ इदं वामनचरितम्। तत् कर्म सुष्ठु कृतं यथोक्तफलदं भवतीत्यर्थः ॥ ३१ ॥

इति श्रीमद्भागवते महापुराणेऽष्टमस्कन्धे गूढार्थदीपिन्यां त्रयोविंशोऽध्यायः ॥ २३ ॥

अथ चतुर्विंशोऽध्यायः

यत्र मायया लीलया मत्स्यानुकरणं कृतं तां कथामिति योज्यम्। कथायाः आद्यत्वं च तदवतारस्य प्राथम्यात्। अकस्मादस्य श्रवणेच्छा तु पुराणेषु मार्कण्डेयनामश्रवणात् वामनसादृश्याच्चेति ज्ञेयम् ॥ १ ॥ यदर्थमदधात् रूपं तदेतत् नोऽस्मभ्यं वक्तुमर्हसीति द्वयोरन्वयः। कर्मग्रस्तो जीवो यथा धत्ते तथा ईश्वरः। जुगुप्सितं निन्दितं तिर्यग्योनित्वात्। दुर्मर्षं दुःसहं परतन्त्रत्वात्। यतो हि भगवच्चरितं सर्वेषां श्रोतृवक्तृस्मर्तृजनानां सुखमावहति प्रापयतीति तथा। उद्गच्छति तमोऽज्ञानं यस्मात्स उत्तमः तथाभूतः श्लोको[1] यशो यस्येति ॥२।३॥ विष्णुना रातः रक्षितः प्राणदानात् इति विष्णुरातः परीक्षित्। रा दाने धातुः। बादरायणिः श्रीशुकः ॥ ४ ॥ ईश्वरः स्वतन्त्रोऽपि तनूः मूर्तीः धत्ते प्रकटयति। छन्दसां वेदानां च रक्षार्थम्॥५॥धियः प्रकृते गुणैः सत्त्वादिभिः रचितानि यानि भूतानि तेषु नियन्तृत्वेन वर्तमान-

---

१. 'पद्ये यशसि च श्लोकः इति कोशात् इति बालबोधिनी। उत्तमैः नारदाभिः श्लोक्यते स्तूयते वा।

आसीदतीतकल्पान्ते ब्राह्मो नैमित्तिको लयः। समुद्रोपप्लुतास्तत्र लोका भूरादयो नृप ॥ ७ ॥
कालेनाऽऽगतनिद्रस्य धातुः शिशयिषोर्बली। मुखतो निःसृतान् वेदान् हयग्रीवोऽन्तिकेऽहरत्॥८॥
ज्ञात्वा तद् दानवेन्द्रस्य हयग्रीवस्य चेष्टितम्। दधार शफरीरूपं भगवान् हरिरीश्वरः ॥ ९ ॥
तत्र राजऋषिः कश्चिन्नाम्ना सत्यव्रतो महान्। नारायणपरोऽतप्यत् तपः स सलिलाशनः॥१०॥
योऽसावस्मिन् महाकल्पे तनयः स विवस्वतः। श्राद्धदेव इति ख्यातो मनुत्वे हरिणार्पितः॥११॥
एकदा कृतमालायां कुर्वतो जलतर्पणम्। तस्याञ्जल्युदके काचिच्छफर्येकाभ्यपद्यत ॥१२॥
सत्यव्रतोऽञ्जलिगतां सह तोयेन भारत। उत्ससर्ज नदीतोये शफरीं द्रविडेश्वरः ॥१३॥
तमाह सातिकरुणं महाकारुणिकं नृपम्। यादोभ्यो ज्ञातिघातिभ्यो दीनां मां दीनवत्सल।
कथं विसृजसे राजन् भीतामस्मिन् सरिज्जले ॥ १४ ॥
तमात्मनोऽनुग्रहार्थं प्रीत्या मत्स्यवपुर्धरम्। अजानन् रक्षणार्थाय शफर्याः स मनो दधे ॥१५॥
तस्या दीनतरं वाक्यमाश्रुत्य स महीपतिः। कलशाप्सु निधायैनां दयालुर्निन्य आश्रमम् ॥१६॥
सा तु तत्रैकरात्रेण वर्धमाना कमण्डलौ। अलब्ध्वाऽऽत्मावकाशं वा इदमाह महीपतिम् ॥१७॥
नाहं कमण्डलावस्मिन् कृच्छ्रं वस्तुमिहोत्सहे। कल्पयौकः सुविपुलं यत्राहं निवसे सुखम् ॥१८॥
स एनां तत आदाय न्यधादौदञ्चनोदके। तत्र क्षिप्ता मुहूर्तेन हस्तत्रयमवर्धत ॥१९॥
न म एतदलं राजन् सुखं वस्तुमुदञ्चनम्। पृथु देहि पदं मह्यं यत् त्वाहं शरणं गता ॥२०॥
तत आदाय सा राज्ञा क्षिप्ता राजन् सरोवरे। तदाऽऽवृत्यात्मना तोयं महामीनोऽन्ववर्धत॥२१॥
नैतन्मे स्वस्तये राजन्नुदकं सलिलौकसः। निधेहि रक्षायोगेन ह्रदे मामविदासिनि ॥२२॥

त्वात् नोच्चावचत्वं न उत्कृष्टापकृष्टत्वं भजते प्राप्नोति निर्गुणत्वात् ॥ ६ ॥ ब्रह्मनिद्रां निमित्तीकृत्य यः प्रलयः स नैमित्तिक उच्यते। अयं तु न तथा किन्तु भगवदिच्छया आकस्मिको ज्ञेयः नैमित्तिक इति तु तत्सादृश्यादुपचारमात्रमिति। उपप्लुताः निमग्नाः। कालेन भगवदिच्छानुकूलेन। अन्तिके आगत्य अहरत्। शफरीरूपं मत्स्यरूपम्। अत्र 'प्रोष्ठी तु शफरी द्वयोः' इत्यमरादत्र स्त्रीपुंसप्रयोगे न विरोधः शंक्यः ॥९॥ अतप्यत् अकरोत्। पाकं पचतीतिवन्निर्देशः। सलिलाशनः अब्भक्षः सन् ॥ १० ॥ मनुत्वे मनोरधिकारे अर्पितः स्थापितः ॥ ११ ॥ कृतमाला तन्नाम्नी नदी। अभ्यपद्यत प्राप्ता अभूत् ॥ १२ ॥ उत्ससर्ज त्यक्तुमुद्यतः ॥ १३ ॥ तमिति सार्द्धम्। अतिकरुणं क्रियाविशेषणम्। दीनां माम् अस्मिन् जले कथं विसृजसे त्यजसीत्यन्वयः। कथंभूताम्। ज्ञातीन् घातयन्ति तेभ्यो यादोभ्यो जलजन्तुभ्यो भीताम् ॥१४॥ मत्स्यवपुर्धरं तं हरिम् अजानन् रक्षणार्थं मनो दधे अकरोत् ॥१५॥ कलशाप्सु कमण्डलुजले ॥ १६ ॥ सेति स्पष्टम् ॥ १७ ॥ वस्तुं वासं कर्तुम् नोत्सहे। ओकः स्थानम् ॥ १८ ॥ औदञ्चनोदके मणिकोदके न्यधात् स्थापितवान्। 'पात्रं हस्तत्रयव्यासमुदञ्चनमुदीरितम्' इति स्वामी। चक्रवर्ती तु कूपजले इत्याह—॥१९॥ एतत् उदञ्चनं मे मम अलं पर्याप्तं नास्ति। पृथु विपुलम् पदम्। यत् यस्मात् त्वा त्वाम् ॥ २० ॥ ततः उदञ्चनात् आदाय निष्कास्य सा मत्सी आत्मना देहेन तत् तोयं सरोवरजलम् आवृत्य सर्वमभिव्याप्य अन्ववर्धत ॥ २१ ॥ सलिलौकसः[1] मे सरसः सम्बन्धि एतत्

---

१. सलिलमेव ओकः विहारस्थानं यस्य तस्य।

इत्युक्तः सोऽनयन्मत्स्यं तत्र तत्राविदासिनि । जलाशये सम्मितं तं समुद्रे प्राक्षिपज्झषम् ॥२३॥
क्षिप्यमाणस्तमाहेदमिह मां मकरादयः । अदन्त्यतिबला वीर मां नेहोत्स्रष्टुमर्हसि ॥२४॥
एवं विमोहितस्तेन वदता वल्गुभारतीम् । तमाह को भवानस्मान् मत्स्यरूपेण मोहयन् ॥२५॥
नैवंवीर्यो जलचरो दृष्टोऽस्माभिः श्रुतोऽपि च । यो भवान् योजनशतमह्नाभिव्यानशे सरः २६
नूनं त्वं भगवान् साक्षाद्धरिर्नारायणोऽव्ययः । अनुग्रहाय भूतानां धत्से रूपं जलौकसाम् ॥२७॥
नमस्ते पुरुषश्रेष्ठ स्थित्युत्पत्त्यप्ययेश्वरः । भक्तानां नः प्रपन्नानां मुख्यो ह्यात्मगतिर्विभो॥ ८॥
सर्वे लीलावतारास्ते भूतानां भूतिहेतवः । ज्ञातुमिच्छाम्यदो रूपं यदर्थं भवता धृतम् ॥२९॥

न तेऽरविन्दाक्ष पदोपसर्पणं मृषा भवेत् सर्वसुहृत्प्रियात्मनः ।
यथेतरेषां पृथगात्मनां सतामदीदृशो यद्वपुरद्भुतं हि नः ॥३०॥

श्रीशुक उवाच

इति ब्रुवाणं नृपतिं जगत्पतिः सत्यव्रतं मत्स्यवपुर्युगक्षये ।
विहर्तुकामः प्रलयार्णवेऽब्रवीच्चिकीर्षुरेकान्तजनप्रियः प्रियम् ॥३१॥

श्रीभगवानुवाच

सप्तमेऽद्यतनादूर्ध्वमहन्येतदरिंदम । निमङ्क्ष्यत्यप्ययाम्भोधौ त्रैलोक्यं भूर्भुवादिकम् ॥३२॥
त्रिलोक्यां लीयमानायां संवर्ताम्भसि वै तदा । उपस्थास्यति नौः काचिद् विशाला त्वां मयेरिता
त्वं तावदोषधीः सर्वा बीजान्युच्चावचानि च । सप्तर्षिभिः परिवृतः सर्वसत्त्वोपबृंहितः ॥३४॥
आरुह्य बृहतीं नावं विचरिष्यस्यविक्लवः । एकार्णवे निरालोके ऋषीणामेव वर्चसा ॥३५॥

उदकं मे स्वस्तये सुखाय नास्ति अतो योगेन उपायेन अविदासिनि उपक्षयशून्ये अगाधे ह्रदे मां निधेहि स्थापय । 'दसु उपक्षये' धातुः ॥ २२ ॥ तत्र तत्र जलाशये । झषं मत्स्यम् ॥ २३ ॥ उत्स्रष्टुं त्यक्तुम् ॥ २४ ॥ वल्गुभारतीं मधुरवाणीं वदता तेन भगवता मोहितस्तमाहेत्यन्वयः ॥ २५ ॥ अह्ना अल्पीयसा कालेन अभिव्यानशे अभितो व्याप्तवान् । जलौकसां जलचराणाम् ॥ २७ ॥ स्थित्यादीनाम् ईश्वर कर्तः । मुख्यः प्रभुः आत्मा गतिश्च भवानेव ॥ २८ ॥ भूतानां प्राणिनां भूतिहेतवः अभ्युदयस्य हेतवः । अदो मात्स्यं रूपम् ॥ २९ ॥ हे अरविन्दाक्ष ! पृथगात्मनां देहाध्यासवताम् इतरेषां देवानां पदोपसर्पणं चरणोपासनं यथा मृषा व्यर्थं भवति तथा तव मृषा न भवतीत्यन्वयः । यत् यस्मात् सतां भक्तानां नोऽस्माकम् एतत् अद्भुतं वपुः अदीदृशः दर्शितवानसि । कथंभूतस्य । सर्वेषां सुहृत् प्रियः आत्मा च तस्य ॥ ३० ॥ एवं मत्स्यवपुः भगवान् युगक्षये प्रलयार्णवे विहर्तुकामः सन् मनुं सत्यव्रतमब्रवीदित्यन्वयः । कथंभूतः । तस्य प्रियं चिकीर्षुः । पुनश्च एकान्तजना भक्तजनाः प्रिया यस्य ॥ ३१ ॥ सप्तमेऽहनि एतत् त्रैलोक्यं निमङ्क्ष्यति निमग्नं भविष्यति । अप्ययाम्भोधौ प्रलयार्णवे ॥ ३२ ॥ संवर्ताम्भसि प्रलयोदके उपस्थिता भविष्यति ॥ ३३ ॥ त्वमिति युग्मम् । तावत् निश्चितम् त्वं सर्वाः औषधीः आदाय नावं च आरुह्य निरालोकेऽपि एकार्णवे ऋषीणामेव तेजसा विचरिष्यसीत्यन्वयः । सत्त्वैः मुख्यमुख्यप्राणिभिः उपबृंहितः पूरितः अविक्लवः निर्व्याकुलः ॥ ३४।३५ ॥

दोधूयमानां तां नावं समीरेण बलीयसा। उपस्थितस्य मे शृङ्गे निबध्नीहि महाहिना ॥३६॥
अहं त्वामृषिभिः साकं सहनावमुदन्वति। विकर्षन् विचरिष्यामि यावद् ब्राह्मी निशा प्रभो॥३७
मदीयं महिमानं च परं ब्रह्मेति शब्दितम्। वेत्स्यस्यनुगृहीतं मे सम्प्रश्नैर्विवृतं हृदि ॥३८॥
इत्थमादिश्य राजानं हरिरन्तरधीयत। सोऽन्ववैक्षत तं कालं यं हृषीकेश आदिशत् ॥३९॥
आस्तीर्य दर्भान् प्राक्कूलान् राजर्षिः प्रागुदङ्मुखः। निषसाद हरेः पादौ चिन्तयन् मत्स्यरूपिणः
ततः समुद्र उद्वेलः सर्वतः प्लावयन् महीम्। वर्धमानो महामेघैर्वर्षद्भिः समदृश्यत ॥४१॥
ध्यायन् भगवदादेशं ददृशे नावमागताम्। तामारुरोह विप्रेन्द्रैरादायौषधिवीरुधः ॥४२॥
तमूचुर्मुनयः प्रीता राजन् ध्यायस्व केशवम्। स वै नः संकटादस्मादविता शं विधास्यति॥४३॥
सोऽनुध्यातस्ततो राज्ञा प्रादुरासीन्महार्णवे। एकशृङ्गधरो मत्स्यो हैमो नियुतयोजनः ॥४४॥
निबध्य नावं तच्छृङ्गे यथोक्तो हरिणा पुरा। वरत्रेणाहिना तुष्टस्तुष्टाव मधुसूदनम् ॥४५॥

राजोवाच

अनाद्यविद्योपहतात्मसंविदस्तन्मूलसंसारपरिश्रमातुराः ।
यदृच्छयेहोपसृता यमाप्नुयुर्विमुक्तिदो नः परमो गुरुर्भवान् ॥४६॥
जनोऽबुधोऽयं निजकर्मबन्धनः सुखेच्छया कर्म समीहतेऽसुखम् ।
यत्सेवया तां विधुनोत्यसन्मतिं ग्रन्थिं स भिन्द्याद्धृदयं स नो गुरुः ॥४७॥

समीरेण प्रलयवायुना दोधूयमानां अत्यन्तं कम्प्यमानां नावम्। महाहिना वासुकिना ॥३६॥ अहं सहनावं त्वां विकर्षन् यावत् ब्राह्मी निशा तावत् उदन्वति समुद्रे विहरिष्यामीत्यन्वयः ॥३७॥ मे मया अनुगृहीतं प्रसादीकृतं मदीयं महिमानं स्वरूपं त्वं हृदि वेत्स्यसीत्यन्वयः। कथंभूतम्। त्वया कृतैः सम्प्रश्नैः मया दत्तोत्तरैः विवृतं स्पष्टीकृतं सन्तम् ॥ ३८ ॥ अन्तरधीयत। धीङ् आधारे धातुः दिवादिः। अन्ववैक्षत प्रतीक्षितवान् ॥ ३९ ॥ प्राक्कूलान् प्रागग्रभागान् दर्भान् दर्भोपलक्षितं कुशासनमास्तीर्य तत्र उपविष्टवान्। प्रागुदङ्मुखः प्रागुत्तरयोर्दिशोर्मध्ये ऐशान्यां मुखं यस्य सः ॥ ४० ॥ उद्वेलः त्यक्तमर्यादः समुद्रः महीं प्लावयन् निमज्जयन् समदृश्यत ॥ ४१ ॥ ओषधीः धान्यादिबीजानि आदाय विप्रेन्द्रैः ऋषिभिः सह तां नावमारुरोहेत्यन्वयः॥४२॥ स वै स एव नोऽस्मान् संकटात् अविता रक्षिष्यति शं सुखं च ॥४३॥ हैमाभः स्वर्णवत् देदीप्यमानः। नियुतयोजनः लक्षयोजनविस्तृतः ॥ ४४ ॥ यथा उक्तस्तथैव [1]वरत्रेण रज्जुरूपेण वासुकिना नावं निबध्य हरिं तुष्टावेत्यन्वयः॥४५॥अष्टभिः स्तौति--यस्य अनादिर्या अविद्या तया उपहता लुप्ता आत्मसंवित् जीवेश्वरज्ञानं येषां ते तथाभूताः अत एव अविद्यामूले संसारे यः परिश्रमः तापत्रयरूपःतेन व्याकुलाः इह संसारे यदृच्छया यदनुग्रहेणैव यमाश्रिताः सेवमानाः सन्तः यम् आप्नुयुः स भवानेव नोऽस्माकं गुरुः सन् हृदयग्रन्थिं भिन्द्यादित्युत्तरेणान्वयः। ग्रन्थिः अहन्ताममतालक्षणः ॥४६॥ अयं जनः सुखेच्छया वैषयिकम् असुखं दुःखोदकं कर्म समीहते कुरुते। किन्तु यस्य सेवया तां सुखेच्छां वासनांलक्षणां विधुनोति स ग्रन्थिं भिन्द्यादित्यन्वयः। यतो भवान् गुरुः। निजकर्मैव बन्धनं यस्य सः। असन्मतिं दुर्वासनां च॥४७॥

---

१. 'वरत्रा रज्जुकक्षयोः' इति मेदिनी। पुंस्त्वमार्षम्।

यत्सेवयाग्नेरिव रुद्ररोदनं पुमान् विजह्यान्मलमात्मनस्तमः ।
भजेत वर्णं निजमेष सोऽव्ययो भूयात् स ईशः परमो गुरोर्गुरुः ॥४८॥
न यत्प्रसादायुतभागलेशमन्ये च देवा गुरवो जनाः स्वयम् ।
कर्तुं समेताः प्रभवन्ति पुंसस्तमीश्वरं त्वां शरणं प्रपद्ये ॥४९॥
अचक्षुरन्धस्य यथाग्रणीः कृतस्तथा जनस्याविदुषोऽबुधो गुरुः ।
त्वमर्कदृक् सर्वदृशां समीक्षणो वृतो गुरुर्नः स्वगतिं बुभुत्सताम् ॥५०॥
जनो जनस्यादिशतेऽसतीं मतिं यया प्रपद्येत दुरत्ययं तमः ।
त्वं त्वव्ययं ज्ञानममोघमञ्जसा प्रपद्यते येन जनो निजं पदम् ॥५१॥
त्वं सर्वलोकस्य सुहृत् प्रियेश्वरो ह्यात्मा गुरुर्ज्ञानमभीष्टसिद्धिः ।
तथापि लोको न भवन्तमन्धधीर्जानाति सन्तं हृदि बद्धकामः ॥५२॥
तं त्वामहं देववरं वरेण्यं प्रपद्य ईशं प्रतिबोधनाय ।
छिन्ध्यर्थदीपैर्भगवन् वचोभिर्ग्रन्थीन् हृदय्यान् विवृणु स्वमोकः ॥५३॥

इत्युक्तवन्तं नृपतिं भगवानादिपूरुषः । मत्स्यरूपी महाम्भोधौ विहरंस्तत्त्वमब्रवीत् ॥५४॥
पुराणसंहितां दिव्यां सांख्ययोगक्रियावतीम् । सत्यव्रतस्य राजर्षेरात्मगुह्यमशेषतः ॥५५॥
अश्रौषीदृषिभिः साकमात्मतत्त्वमसंशयम् । नाव्यासीनो भगवता प्रोक्तं ब्रह्म सनातनम् ॥५६॥

यस्य सेवया पुमान् आत्मनः तमोमलम् अज्ञानलक्षणं विजह्यात् । यथा रुद्ररोदन[1] रजतं सुवर्णं च अग्नेः हेतुभूतात् मलं जहाति निजं वर्णं शुद्धरूपं च भजते प्राप्नोति स एष गुरोरपि परमः पूज्यः नोऽस्माकं गुरुः भूयात् ॥४८॥यस्य तव प्रसादस्य अयुतसंख्यानां भागानां मध्ये एकभागस्यापि लेशमात्रमपि पुंसः अन्योपासकस्य त्वद्विमुखस्य कर्तुं सम्पादयितुं न प्रभवः न समर्थाः तं त्वामित्यन्वयः । के । देवादयः ये च अन्ये ते सर्वे समेताः मिलिता अपि ॥४९॥ अन्धस्य यथा अचक्षुः अन्ध एव अग्रणीः पुरो नेता कृतः तथा अविदुषः अज्ञस्य अज्ञ एव गुरुः कृतश्चेत् 'अन्धेनैव नीयमाना इति न्यायेन उभौ पतिष्यतः त्वं तु न तथा किन्तु त्वम् अर्कदृक् सूर्यस्यापि प्रकाशकः किं बहुनां सर्वदृशां नेत्राणाम् इन्द्रियाणा सर्वविधज्ञानानां समीक्षणः प्रकाशकस्त्वम् अतः स्वगतिम् आत्मतत्त्वं बुभुत्सद्भिः नोऽस्माभिः भवानेव गुरुः वृतः । कर्तरि षष्ठी ॥ ५० ॥ जनोऽज्ञो जनः गुरुत्वाभिमानी असतीं विषयनिष्ठां मतिम् उपदिशति यया तमो नरकं प्रपद्यते प्राप्नोति । लडर्थे लिङ् । त्वं तु अमोघम् अविनाशि ज्ञानसाधनमुपदिशसि येन अञ्जसा सुखेन निजं पदं स्वरूपं प्राप्नोति ॥५१॥ज्ञानं ज्ञानदाता । सिद्धिःसिद्धिदाता च । तथापि भवन्तं न जानाति यतो हृदि बद्धकामः विषयासक्तः ॥५२॥ प्रतिबोधनाय तत्त्वज्ञानाय तं त्वामहं शरणं प्रपद्ये । अर्थदीपैः परमार्थप्रकाशकैः वचोभिः हृदय्यान् हृदि भवान् ग्रन्थीन् अहङ्कारादीन् छिन्धि स्वमोकः स्थानं स्वरूपं वा विवृणु प्रकाशय ॥५३॥ नृपतिं प्रति तत्त्वं तत्त्वप्रकाशकं पुराणमब्रवीत् ॥ ५४ ॥ राजर्षेर्ज्ञानाय अशेषतः साकल्येन आत्मनो गुह्यं रहस्यमब्रवीत् । किं तत् । दिव्यां संहिताम् । कीदृशीम् । ज्ञानभक्तिकर्मयोगप्रतिपादिकाम् ॥ ५५ ॥ तदेतत् आत्मतत्त्वं निःसंशयं यथास्यात्तथा भगवता प्रोक्तम् अश्रौषीत् एतच्च सनातनं ब्रह्मैव ॥ ५६ ॥

---

१. 'यदरोदीत्तद्रुद्रस्य रुद्रत्वम् । यदश्रवः व्यशीर्यन्त तद्रजतं हिरण्यं चाभवत्' इति श्रुतेः ।

अतीतप्रलयापाय उत्थिताय स वेधसे।
हत्वाऽसुरं हयग्रीवं वेदान् प्रत्याहरद्धरिः ॥५७॥
स तु सत्यव्रतो राजा ज्ञानविज्ञानसंयुतः।
विष्णोः प्रसादात्कल्पेऽस्मिन्नासीद्वैवस्वतो मनुः ॥५८॥
सत्यव्रतस्य राजर्षेर्मायामत्स्यस्य शार्ङ्गिणः।
संवादं महदाख्यानं श्रुत्वा मुच्येत किल्बिषात् ॥५९॥
अवतारो हरेर्योऽयं कीर्तयेदन्वहं नरः।
सङ्कल्पास्तस्य सिध्यन्ति स याति परमां गतिम् ॥६०॥

प्रलयपयसि धातुः सुप्तशक्तेर्मुखेभ्यः श्रुतिगणमपनीतं प्रत्युपादत्त हत्वा।
दितिजमकथयद् यो ब्रह्म सत्यव्रतानां तमहमखिलहेतुं जिह्ममीनं नतोऽस्मि ॥६१॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायामष्टमस्कन्धे चतुर्विंशोऽध्यायः ॥२४॥

स मत्स्यरूपो हरिः अतीतप्रलयापाये चाक्षुषमन्वन्तरे शयनादुत्थाय वेधसे ब्रह्मणे वेदान् प्रत्याहरत् समर्पितवान्। किं कृत्वा। हयग्रीवम् असुरं हत्वा। अतीतो व्यतीतः यः प्रलयः तस्य अपाये अवसाने सति ।५७। स तु राजा अस्मिन् कल्पे वैवस्वतः सूर्यपुत्रः श्राद्धदेवाख्यो मनुरासीत्। कथंभूतः। ज्ञानं शास्त्रीयं विज्ञानमनुभवः ताभ्यां संयुतः ॥५८॥ मायया कृपया मत्स्यस्य राजर्षेश्च संवादरूपं महत् महत्त्वपूर्णमाख्यानं श्रुत्वा किल्बिषात् पापात् मुच्येत मुच्यते। लडर्थे लिङ्। संवादपदम् अर्श आद्यजन्तम्। शृङ्गस्य विकारः शार्ङ्गं धनुः पापभयावहं तदस्यास्तीति। अत 'इनिठनौ' इति इनिः ।५९। योऽयं हरेः अवतारस्तं यो नरः अन्वहं प्रतिदिनं कीर्तयेत् तस्य संकल्पाः मनोरथाः सिध्यन्तीत्यन्वयः। गतिं मुक्तिम् ॥६०॥ यः प्रलयपयसि प्रलयार्णवे विहरन् सुप्तशक्तेः धातुः मुखेभ्यः अपनीतं निःसृतं श्रुतिगणं दितिजं दैत्यं हयग्रीवं हत्वा ब्रह्मणे प्रत्युपादत्त प्रत्याहृत्य ददौ, किञ्च सत्यव्रतानां सत्यव्रतसहितानाम् ऋषीणां ब्रह्म तत्प्रतिपादकं पुराणं च योऽकथयत् तं जिह्ममीनं नतोऽस्मीति सम्बन्धः। कर्तरि क्तः। चक्रवर्ती तु जिह्ममीनं कुटिलाकारं मत्स्यमित्याह जिह्मेषु कुटिलेषु मीनवत् प्रतीयमानं वस्तुतस्तु अखिलहेतुं सर्वकारणभूतम्। सुप्ता शक्तिः सृष्टिसामर्थ्यं यस्य। यद्वा। सुप्ता जाग्रदाख्या शक्तिर्यस्य। सत्यव्रतेति ऋषिसाहित्यादादरार्थे बहुवचनम्। लिङ्गसमवायन्यायेन वा[1]। पुराणं चात्र मत्स्याख्यम् ॥६१॥

इति श्रीमद्भागवते महापुराणेऽष्टमस्कन्धे श्रीसनाढ्यवंशावतंसपण्डितप्रवरश्रीराममूर्तिशास्त्रिपौराणिक
मालिनीवृत्तम्
विरचितायां गूढार्थदीपिन्यां चतुर्विंशोऽध्यायः ॥२४॥

॥ समाप्तोऽयमष्टमस्कन्धः ॥

---

१. लिंगस्य छत्रादिचिह्नस्य समवायः समुदाये प्रवेशस्तेन।



॥ श्रीकृष्णार्पणमस्तु ॥

श्रीमङ्गलमूर्तये नमः

श्रीमद्भागवतम्

नवमः स्कन्धः

अथ प्रथमोऽध्यायः

राजोवाच

मन्वन्तराणि सर्वाणि त्वयोक्तानि श्रुतानि मे । वीर्याण्यनन्तवीर्यस्य हरेस्तत्र कृतानि च ॥ १ ॥

योऽसौ सत्यव्रतो नाम राजर्षिर्द्रविडेश्वरः । ज्ञानं योऽतीतकल्पान्ते लेभे पुरुषसेवया ॥ २ ॥

स वै विवस्वतः पुत्रो मनुरासीदिति श्रुतम् । त्वत्तस्तस्य सुताश्चोक्ता इक्ष्वाकुप्रमुखा नृपाः ॥३॥

तेषां वंशं पृथग् ब्रह्मन् वंश्यानुचरितानि च । कीर्तयस्व महाभाग नित्यं शुश्रूषतां हि नः ॥४॥

ये भूता ये भविष्याश्च भवन्त्यद्यतनाश्च ये । तेषां नः पुण्यकीर्तीनां सर्वेषां वद विक्रमान् ॥५॥

सूत उवाच

एवं परीक्षिता राज्ञा सदसि ब्रह्मवादिनाम् । पृष्टः प्रोवाच भगवाञ्छुकः परमधर्मवित् ॥६॥

श्रीशुक उवाच

श्रूयतां मानवो वंशः प्राचुर्येण परंतप । न शक्यते विस्तरतो वक्तुं वर्षशतैरपि ॥७॥

परावरेषां भूतानामात्मा यः पुरुषः परः । स एवासीदिदं विश्वं कल्पान्तेऽन्यन्न किंचन ॥८॥

तस्य नाभेः समभवत् पद्मकोशो हिरण्मयः । तस्मिञ्जज्ञे महाराज स्वयम्भूश्चतुराननः ॥९॥

मरीचिर्मनसस्तस्य जज्ञे तस्यापि कश्यपः । दाक्षायण्यां ततोऽदित्यां विवस्वानभवत् सुतः ॥१०॥

सुद्युम्नस्याम्बरीषस्य सौभर्यादेश्च सत्कथा ।
गङ्गावतरणं भूमौ बहिरन्तः पुनातु माम् ॥ १ ॥
प्रथमेऽभून्मनोः कन्या सुद्युम्नः सन् वनं गतः ।
स्त्रीत्वं प्राप्य बुधात्पुत्रं लब्धवानिति वर्ण्यते ॥ २ ॥

सर्वाणि चतुर्दशापि । तत्र तेषु कृतानि यानि हरे वीर्याणि चरितानि तानि च मे मया श्रुतानि ॥ १ ॥ पुरुषस्य मत्स्यरूपिणः । कल्पान्ते मन्वन्तरावसाने ॥२॥॥३॥ वंश्या वंशजाः । नोऽस्माकम् ॥ ४ ॥ विक्रमान् चरितानि वद ॥ ५ ॥ भगवान् भगवत्तत्त्वज्ञः ॥ ६ ॥ प्राचुर्येण मुख्यतया ॥ ७ ॥ परावरेषामुच्चावचानाम् । आत्मा उपादानभूतः स एव विश्वं तद्रूपमासीत् । कल्पान्ते प्रलये ॥ ८ ॥ हिरण्मयः प्रकाशबहुलः ॥ ९ ॥ तस्य ब्रह्मणः । तस्यापि मरीचेः ततः कश्यपात् अदित्याम् ॥१०॥ ततः विवस्वतः संज्ञायां पत्न्याम् आत्मवान्

ततो मनुः श्राद्धदेवः संज्ञायामास भारत । श्रद्धायां जनयामास दश पुत्रान् स आत्मवान् ॥११॥
इक्ष्वाकुनृगशर्यातिदिष्टधृष्टपृष्टकरूषकान् । नरिष्यन्तं पृषध्रं च नभगं च कविं विभुः ॥१२॥
अप्रजस्य मनोः पूर्वं वसिष्ठो भगवान् किल । मित्रावरुणयोरिष्टिं प्रजार्थमकरोत् प्रभुः ॥१३॥
तत्र श्रद्धा मनोः पत्नी होतारं समयाचत । दुहित्रर्थमुपागम्य प्रणिपत्य पयोव्रता ॥१४॥
प्रेषितोऽध्वर्युणा होता ध्यायंस्तत् सुसमाहितः । हविषि व्यचरत् तेन वषट्कारं गृणन् द्विजः ॥१५॥
होतुस्तद्व्यभिचारेण कन्येला नाम साभवत् । तां विलोक्य मनुः प्राह नातिहृष्टमना गुरुम् ॥१६॥
भगवन् किमिदं जातं कर्म वो ब्रह्मवादिनाम् । विपर्ययमहो कष्टं मैवं स्याद् ब्रह्मविक्रिया ॥१७॥
यूयं मन्त्रविदो युक्तास्तपसा दग्धकिल्बिषाः । कुतः संकल्पवैषम्यमनृतं विबुधेष्विव ॥१८॥
तन्निशम्य वचस्तस्य भगवान् प्रपितामहः । होतुर्व्यतिक्रमं ज्ञात्वा बभाषे रविनन्दनम् ॥१९॥
एतत् संकल्पवैषम्यं होतुस्ते व्यभिचारतः । तथापि साधयिष्ये ते सुप्रजस्त्वं स्वतेजसा ॥२०॥
एवं व्यवसितो राजन् भगवान् स महायशाः । अस्तौषीदादिपुरुषमिलायाः पुंस्त्वकाम्यया ॥२१॥
तस्मै कामवरं तुष्टो भगवान् हरिरीश्वरः । ददाविलाऽभवत् तेन सुद्युम्नः पुरुषर्षभः ॥२२॥
स एकदा महाराज विचरन् मृगयां वने । वृतः कतिपयामात्यैरश्वमारुह्य सैन्धवम् ॥२३॥
प्रगृह्य रुचिरं चापं शरांश्च परमाद्भुतान् । दंशितोऽनुमृगं वीरो जगाम दिशमुत्तराम् ॥२४॥
स कुमारो वनं मेरोरधस्तात् प्रविवेश ह । यत्रास्ते भगवाञ्छर्वो रममाणः सहोमया ॥२५॥
तस्मिन् प्रविष्ट एवासौ सुद्युम्नः परवीरहा । अपश्यत् स्त्रियमात्मानमश्वं च वडवां नृप ॥२६॥
तथा तदनुगाः सर्वे आत्मलिङ्गविपर्ययम् । दृष्ट्वा विमनसोऽब्रुवन् वीक्षमाणाः परस्परम् ॥२७॥

धैर्यवान् ॥ ११ ॥ कविपर्यन्तान् दश पुत्रान् । नृग इति नभगस्य नामान्तरं कविरिति वसुमतश्च नामान्तर-मतोऽष्टमस्कन्धोक्तेनं विरोधः ॥ १२ ॥ पूर्वम् इक्ष्वादीनामुत्पत्तेः प्राक् मित्रावरुणदेवताकाम् इष्टिम् यागम् अकरोत् अकारयत् । प्यर्थः ॥१३॥ तत्र यागे श्रद्धा कन्यार्थं समयाचत प्रार्थिवती । व्रतमाहारनियमः ॥१४॥ प्रेषितः प्रेरितो होता हविषि गृहीते सति यत् तया राज्ञ्या प्रार्थितं तत् ध्यायन् वौषडिति मन्त्रमुच्चारयन् तेन हविषा अयजदित्यन्वयः ॥ १५ ॥ व्यभिचारेण विपरीतसंकल्पेन ॥ १६ ॥ वः युष्माकं युष्माभिः अनुष्ठितमिदं कर्मं विपर्ययं विपरीतफलं कथं जातम् । ब्रह्मणो वेदमन्त्रस्य विक्रिया अन्यथात्वम् एवं मा स्यात् मा भवितुमर्हति ॥१७॥ युक्ताः जितेन्द्रियाः । विबुधेषु देवेषु यथा अनृत न संभाव्यते ॥१८॥ ब्रह्मपुत्रत्वेन मरीचि भ्रातृत्वात् । मनोः पिता सूर्यः पितामहः कश्यपः प्रपितामहो मरीचिरिति क्रमेण तथात्वम् । व्यतिक्रमं संकल्पविपर्ययम् । रविनन्दनं श्राद्धदेवम् ॥ १९ ॥ वैषम्यं विपरीतफलम् । व्यभिचारतः दोषात् । सुप्रजस्तं सत्पुत्रत्वम् ॥२०॥ व्यवसितः कृतनिश्चयः ॥ २१ ॥ तस्मै वसिष्ठाय । कामवरम् इलायाः पुंस्त्वरूपम् । ऋषभः श्रेष्ठः ॥ २२ ॥ स सुद्युम्नः मृगयामुद्दिश्य वने विचरन् अनुमृगं मृगस्य पश्चात् उत्तरां दिशं जगामेति द्वयोरन्वयः । दंशितो धृतकवचः । सैन्धवं सिन्धुदेशजम् अश्वम् ॥ २३ ॥ २४ ॥ अधस्तात् इलावृतखण्डे । ह दुःखे ॥२५॥२६॥ आत्मलिङ्गस्य पुंस्त्वस्य विपर्ययं स्त्रीत्वम् । विमनसः खिन्नचित्ताः ॥ २७ ॥ समाचक्ष्व

राजोवाच

कथमेवंगुणो देशः केन वा भगवन् कृतः । प्रश्नमेनं समाचक्ष्व परं कौतूहलं हि नः ॥२८॥

श्रीशुक उवाच

एकदा गिरिशं द्रष्टुमृषयस्तत्र सुव्रताः । दिशो वितिमिराभासाः कुर्वन्तः समुपागमन् ॥२९॥

तान् विलोक्याम्बिका देवी विवासा व्रीडिता भृशम् । भर्तुरङ्कात् समुत्थाय नीवीमाश्वथ पर्यधात् ३०

ऋषयोऽपि तयोर्वीक्ष्य प्रसङ्गं रममाणयोः । निवृत्ताः प्रययुस्तस्मान्नरनारायणश्रमम् ॥३१॥

तदिदं भगवानाह प्रियायाः प्रियकाम्यया । स्थानं यः प्रविशेदेतत् स वै योषिद् भवेदिति ॥३२॥

तत ऊर्ध्वं वनं तद् वै पुरुषा वर्जयन्ति हि । सा चानुचरसंयुक्ता विचचार वनाद् वनम् ॥३३॥

अथ तामाश्रमाभ्याशे चरन्तीं प्रमदोत्तमाम् । स्त्रीभिः परिवृतां वीक्ष्य चकमे भगवान् बुधः॥३४॥

सापि तं चकमे सुभ्रूः सोमराजसुतं पतिम् । स तस्यां जनयामास पुरूरवसमात्मजम् ॥३५॥

एवं स्त्रीत्वमनुप्राप्तः सुद्युम्नो मानवो नृपः । सस्मार स्वकुलाचार्यं वसिष्ठमिति शुश्रुम ॥३६॥

स तस्य तां दशां दृष्ट्वा कृपया भृशपीडितः । सुद्युम्नस्याशयन् पुंस्त्वमुपाधावत शंकरम् ॥३७॥

तुष्टस्तस्मै स भगवानृषये प्रियमावहन् । स्वां च वाचमृतां कुर्वन्निदमाह विशाम्पते ॥३८॥

मासं पुमान् स भविता मासं स्त्री तव गोत्रजः । इत्थं व्यवस्थया कामं सुद्युम्नोऽवतु मेदिनीम् ।३९।

आचार्यानुग्रहात् कामं लब्ध्वा पुंस्त्वं व्यवस्थया । पालयामास जगतीं नाभ्यनन्दन् स्म तं प्रजाः ४०

तस्योत्कलो गयो राजन् विमलश्च सुतास्त्रयः । दक्षिणापथराजानो बभूवुर्धर्मवत्सलाः ॥४१॥

ततः परिणते काले प्रतिष्ठानपतिः प्रभुः । पुरूरवस उत्सृज्य गां पुत्राय गतो वनम् ॥४२॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां नवमस्कन्धे इलोपाख्याने प्रथमोऽध्यायः ॥ १ ॥

समाचक्ष्व । परं कौतूहलं श्रवणे अतीवोत्कण्ठा ॥ २८ ॥ सुव्रताः तपस्विनः । विगतः तिमिरस्य आभासो लेशोऽपि यासु ताः तथाभूताः दिशः ॥ २९ ॥ नीवीं कटिवस्त्रं पर्यधात् धृतवती ॥ ३० ॥ ३१ ॥ तत् तदा ॥३२॥ सा चेत्यर्द्धम् । तत ऊर्ध्वं शापानन्तरम् । पूर्वं येऽनुचराः पुमांसः तैः स्त्रीरूपैः संयुक्ता ॥ ३३ ॥ चकमे रन्तुमैच्छत् ॥३४॥ स बुधः ॥३५॥ मानवो मनुपुत्रः ॥३६॥ भृशमत्यन्तम् । पुंस्त्वम् आशयन्[1] इच्छन् उपाधावत् अस्तौत् ॥ ३७ ॥ तस्मै वसिष्ठाय । स शिवः । आवहन् कुर्वन् । हे विशांपते प्रजापते ॥ ३८ ॥ गोत्रजः[2] शिष्यः । व्यवस्थया अनया मर्यादया । मासमिति । अत्यन्तसंयोगे द्वितीया । कामं यथेच्छम् ॥३९॥ कामम् ईप्सितम् । प्रजाः नाभ्यनन्दन् स्त्रीत्वे निलीयावस्थानात् । स्म एवार्थे ॥४०॥ तस्य सुद्युम्नस्य दक्षिणापथो देशः समासान्तविधेरनित्यत्वात् राजानः इत्यत्र न टच् ॥४१॥ परिणते वृद्धत्वे । प्रतिष्ठानं राजधानी । केचित्तु प्रतिष्ठन्ति प्रजाः अस्मिन्निति प्रतिष्ठानं भूमण्डलमित्याहुः । अधिकरणे ल्युट् । प्रभुः सुद्युम्नः । गां भूमिम् उत्सृज्य दत्त्वा ॥ ४२ ॥

इति श्रीमद्भागवते महापुराणे नवस्कन्धे गूढार्थदीपिन्यां प्रथमोऽध्यायः ॥ १ ॥

---

१. आशाशब्दात् 'तत्करोति' इति णिच् ततः शतृप्रत्ययः ।

२. 'गोत्रं वंशे नाम्नि शिष्ये' इति निरुक्तिः ।

अथ द्वितीयोऽध्यायः

श्रीशुक उवाच

एवं गतेऽथ सुद्युम्ने मनुर्वैवस्वतः सुते । पुत्रकामस्तपस्तेपे यमुनायां शतं समाः ॥ १ ॥
ततोऽयजन्मनुर्देवमपत्यार्थं हरिं प्रभुम् । इक्ष्वाकुपूर्वजान् पुत्राँल्लेभे स्वसदृशान् दश ॥२॥
पृषध्रस्तु मनोः पुत्रो गोपालो गुरुणा कृतः । पालयामास गा यत्तो रात्र्यां वीरासनव्रतः ॥३॥
एकदा प्राविशद् गोष्ठं शार्दूलो निशि वर्षति । शयाना गाव उत्थाय भीतास्ता बभ्रमुर्व्रजे ॥४॥
एकां जग्राह बलवान् सा चुक्रोश भयातुरा । तस्यास्तत् क्रन्दितं श्रुत्वा पृषध्रोऽभिससार ह ॥५॥
खड्गमादाय तरसा प्रलीनोडुगणे निशि । अजानन्नहनद् बभ्रोः शिरः शार्दूलशङ्कया ॥६॥
व्याघ्रोऽपि वृक्णश्रवणो निस्त्रिंशाग्राहतस्ततः । निश्चक्राम भृशं भीतो रक्तं पथि समुत्सृजन् ॥७॥
मन्यमानो हतं व्याघ्रं पृषध्रः परवीरहा । अद्राक्षीत् स्वहतां बभ्रुं व्युष्टायां निशि दुःखितः ॥८॥
तं शशाप कुलाचार्यः कृतागसमकामतः । न क्षत्रबन्धुः शूद्रस्त्वं कर्मणा भवितामुना ॥९॥
एवं शप्तस्तु गुरुणा प्रत्यगृह्णात् कृताञ्जलिः । अधारयद् व्रतं वीर ऊर्ध्वरेता मुनिप्रियम् ॥१०॥
वासुदेवे भगवति सर्वात्मनि परेऽमले । एकान्तित्वं गतो भक्त्या सर्वभूतसुहृत् समः ॥११॥
विमुक्तसंगः शान्तात्मा संयताक्षोऽपरिग्रहः । यदृच्छयोपपन्नेन कल्पयन् वृत्तिमात्मनः ॥१२॥
आत्मन्यात्मानमाधाय ज्ञानतृप्तः समाहितः । विचचार महीमेतां जडान्धबधिराकृतिः ॥१३॥
एवंवृत्तो वनं गत्वा दृष्ट्वा दावाग्निमुत्थितम् । तेनोपयुक्तकरणो ब्रह्म प्राप परं मुनिः ॥१४॥

द्वितीये द्वौ मनोः पुत्रौ वंशहीनावरागतः ।
करूषप्रभृतीनां तु पञ्चानामाह वंशजान् ॥ १ ॥

वैवस्वतः श्राद्धदेवः । समा वर्षाणि । तेपे चक्रे । पाकं पचतीतिवन्निर्देशः ॥ १ ॥ इक्ष्वाकुः पूर्वजो येषां तानिति तद्गुणसंविज्ञानबहुव्रीहिः ॥ २ ॥ कृतः नियुक्तः । यत्तः सावधानः सन् । वीरासनं खड्गहस्तस्य तिष्ठतो जागरणम् ॥३॥ शार्दूलो व्याघ्रः ॥ ४ ॥ चक्रोश आक्रन्दितवती । तत् दीनं क्रन्दितं शब्दम् श्रुत्वा अभिससार अभ्यधावत् । हेति उद्वेगे ॥५॥ निशि अजानन् तरसा वेगेन बभ्रोः कपिलायाः गोः शिरः अहनत् चकर्त । प्रलीनाः उडुगणाः नक्षत्रगणाः यस्मिन् तस्मिन् समये घोरान्धकारे ॥६॥ वृक्णश्रवणः छिन्नकर्णः सन् ततो गोष्ठात् निश्चक्राम । निस्त्रिंशः खड्गः तस्यअग्रेण आहतः ॥ ७ ॥ व्युष्टायां व्यतीतायाम् । परेषां वीरान् हन्तीति ॥८॥ कुलाचार्यो वसिष्ठः अकामतः अज्ञानतः कृतमागः अपराधो येन तम् । क्षत्रबन्धुः क्षत्रियाधमोऽपि न किन्तु शूद्रः ॥ ९ ॥ व्रतं ब्रह्मचर्यम् । प्रत्यगृह्णात् शापम् ॥ १० ॥ एकान्तित्वम् अनन्यभावम् ॥ ११ ॥ संगः भोगासक्तिः । अक्षाणि इन्द्रियाणि । उपपन्नेन अन्नादिना । आत्मनो देहस्य वृत्तिं जीविकां सम्पादयन् आसीत् ॥१२॥ आत्मनि भगवति आत्मानं मनः आधाय स्थिरीकृत्य जडादीनामाकृतिरिव आकृतिः यस्य सः विचचार ॥ १३ ॥ एवंविधं वृत्तं वृत्तिर्यस्य स पृषध्रः तेन अग्निना उपयुक्तकरणः दग्धशरीरः ब्रह्म प्राप ॥१४॥ कनीयान्

कविः कनीयान् विषयेषु निःस्पृहो विसृज्य राज्यं सह बन्धुभिर्वनम् ।
निवेश्य चित्ते पुरुषं स्वरोचिषं विवेश कैशोरवयाः परं गतः ॥१५॥
करूषान्मानवादासन् कारूषाः क्षत्रजातयः । उत्तरापथगोप्तारो ब्रह्मण्या धर्मवत्सलाः ॥१६॥
धृष्टाद् धाष्टर्यमभूत् क्षत्रं ब्रह्मभूयं गतं क्षितौ । नृगस्य वंशः सुमतिर्भूतज्योतिस्ततो वसुः॥१७॥
वसोः प्रतीकस्तत्पुत्र ओघवानोघवत्पिता । कन्या चौघवती नाम सुदर्शन उवाह ताम् ॥१८॥
चित्रसेनो नरिष्यन्तादृक्षस्तस्य सुतोऽभवत् । तस्य मीढ्वांस्ततः कूर्च इन्द्रसेनस्तु तत्सुतः ॥१९॥
वीतिहोत्रस्त्विन्द्रसेनात् तस्य सत्यश्रवा अभूत् । उरुश्रवाः सुतस्तस्य देवदत्तस्ततोऽभवत् ॥२०॥
ततोऽग्निवेश्यो भगवानग्निः स्वयमभूत् सुतः । कानीन इति विख्यातो जातूकर्ण्यो महानृषिः॥२१॥
ततो ब्रह्मकुलं जातमाग्निवेश्यायनं नृप । नरिष्यन्तान्वयः प्रोक्तो दिष्टवंशमतः शृणु ॥२२॥
नाभागो दिष्टपुत्रोऽन्यः कर्मणा वैश्यतां गतः । भलन्दनः सुतस्तस्य वत्सप्रीतिर्भलन्दनात्॥२३॥
वत्सप्रीतेः सुतः प्रांशुस्तत्सुतं प्रमतिं विदुः । खनित्रः प्रमतेस्तस्माच्चाक्षुषोऽथ विविंशतिः॥२४॥
विविंशतिसुतो रम्भः खनिनेत्रोऽस्य धार्मिकः । करन्धमो महाराज तस्यासीदात्मजो नृपः॥२५॥
तस्यावीक्षित् सुतो यस्य मरुत्तश्चक्रवर्त्यभूत् । संवर्तोऽयाजयद् यं वै महायोग्यङ्गिरः सुतः ॥२६॥
मरुत्तस्य यथा यज्ञो न तथान्यस्य कश्चन । सर्वं हिरण्मयं त्वासीद् यत् किंचिच्चास्य शोभनम् २७
अमाद्यदिन्द्रः सोमेन दक्षिणाभिर्द्विजातयः । मरुतः परिवेष्टारो विश्वेदेवाः सभासदः ॥२८॥
मरुत्तस्य दमः पुत्रस्तस्यासीद् राज्यवर्धनः । सुधृतिस्तत्सुतो जज्ञे सौधृतेयो नरः सुतः ॥२९॥
तत्सुतः केवलस्तस्माद् बन्धुमान् वेगवांस्ततः । बन्धुस्तस्याभवद् यस्य तृणबिन्दुर्महीपतिः ॥३०॥
तं भेजेऽलम्बुषा देवी भजनीयगुणालयम् । वराप्सरा यतः पुत्राः कन्या चेडविडाऽभवत् ॥३१॥
तस्यामुत्पादयामास विश्रवा धनदं सुतम् । प्रादाय विद्यां परमामृषिर्योगेश्वरात् पितुः ॥३२॥

कनिष्ठ कविः मनुपुत्रः कैशोरवया एव राज्यं विसृज्य वनं विवेश तत्र चित्ते पुरुषं नारायणं निवेश्य परं ब्रह्म गतः प्राप्तोऽभूत् ॥ १५ ॥ मानवात् मनुपुत्रात् । उत्तरापथो देशः ॥ १६ ॥ धृष्टात् मनुपुत्रात् धाष्टर्यसंज्ञकं क्षत्रं क्षत्रियकुलमभूत् । ब्रह्मभूयं ब्रह्मभावं ब्राह्मणभक्तिमित्यर्थः । वंशः पुत्रः ॥ १७ ॥ १८ ॥ नरिष्यन्तात् मनुपुत्राद् ॥ १९ ॥ २० ॥ ततो देवदत्तात् अग्निवेश्यः स एव नामद्वयेन विख्यातः ॥ २१ ॥ ततोऽग्निवेश्यात् आग्निवेश्यायनसंज्ञकम् कुलम् । नडादित्वात् फक् ॥२२॥ दिष्टस्य मनुपुत्रस्य नाभागसंज्ञकः पुत्रः स च वक्ष्यमाणनाभागादन्यः । स च वाणिज्यादिना ॥ २३ ॥ २४ ॥ तस्य खनिनेत्रस्य करन्धमः ॥ २५ ॥ यस्य करन्धमस्य । यं मरुत्तं संवर्तोऽयाजयत् ॥ २६ ॥ यत् किञ्चित्पात्रादिकं तत्सर्वं हिरण्मयत्वात् शोभनमेव जातम् ॥२७॥ इन्द्रः सोमेन सोमलतारसेन अमाद्यत् अहृष्यत् । द्विजातयः दक्षिणादिभिः अमाद्यन् । परिवेष्टारः अन्नदातारः ॥ २८ ॥ सुधृतेः सुतो नरः ॥ २९ ॥ तत्सुतः नरस्य सुतः । यस्य बन्धोः ॥ ३० ॥ तं तृणबिन्दुं अलम्बुषा भेजे पतित्वेन स्वीकृतवती यतः यस्यां वक्ष्यमाणाः विशालादयः पुत्रा अभवन् इडविडा कन्या च ॥३१॥ विश्रवाः पुलस्त्यपुत्रः तस्यामिडविडायाम् । परमाम् अन्तर्धानलक्षणां विद्यामादाय गृहीत्वा सुतमुत्पादयामास

विशालः शून्यबन्धुश्च धूम्रकेतुश्च तत्सुताः । विशालो वंशकृद् राजा वैशालीं निर्ममे पुरीम् ॥३३॥
हेमचन्द्रः सुतस्तस्य धूम्राक्षस्तस्य चात्मजः । तत्पुत्रात् संयमादासीत् कृशाश्वः सहदेवजः ॥३४॥
कृशाश्वात् सोमदत्तोऽभूद् योऽश्वमेधैरिडस्पतिम् । इष्ट्वा पुरुषमापाग्र्यां गतिं योगेश्वराश्रितः ३५
सौमदत्तिस्तु सुमतिस्तत्सुतो जनमेजयः । एते वैशालभूपालास्तृणबिन्दोर्यशोधराः ॥३६॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां नवमस्कन्धे द्वितीयोऽध्यायः ॥ २ ॥

अथ तृतीयोऽध्यायः

श्रीशुक उवाच

शर्यातिर्मानवो राजा ब्रह्मिष्ठः स बभूव ह । यो वा अङ्गिरसां सत्रे द्वितीयमह ऊचिवान् ॥१॥
सुकन्या नाम तस्यासीत् कन्या कमललोचना । तया सार्धं वनगतो ह्यगमच्च्यवनाश्रमम् ॥२॥
सा सखीभिः परिवृता विचिन्वन्त्यङ्घ्रिपान् वने । वल्मीकरन्ध्रे ददृशे खद्योते इव ज्योतिषी ॥३॥
ते दैवचोदिता बाला ज्योतिषी कण्टकेन वै । अविध्यन्मुग्धभावेन सुस्रावासृक् ततो बहु ॥४॥
शकृन्मूत्रनिरोधोऽभूत् सैनिकानां च तत्क्षणात् । राजर्षिस्तमुपालक्ष्य पुरुषान् विस्मितोऽब्रवीत् ॥५॥
अप्यभद्रं न युष्माभिर्भार्गवस्य विचेष्टितम् । व्यक्तं केनापि नस्तस्य कृतमाश्रमदूषणम् ॥६॥
सुकन्या प्राह पितरं भीता किंचित् कृतं मया । द्वे ज्योतिषी अजानन्त्या निर्भिन्ने कण्टकेन वै ॥७॥
दुहितुस्तद्वचः श्रुत्वा शर्यातिर्जातसाध्वसः । मुनिं प्रसादयामास वल्मीकान्तर्हितं शनैः ॥८॥
तदभिप्रायमाज्ञाय प्रादाद् दुहितरं मुनेः । कृच्छ्रान्मुक्तस्तमामन्त्र्य पुरं प्रायात् समाहितः ॥९॥
सुकन्या च्यवनं प्राप्य पतिं परमकोपनम् । प्रीणयामास चित्तज्ञा अप्रमत्तानुवृत्तिभिः ॥१०॥

त्यन्वयः ॥ ३२ ॥ तत्सुताः तृणविन्दुसुताः । वंशकृत् वंशवर्धनः ॥३३॥ तस्य विशालस्य ॥३४॥ इडा पृथिवी तस्याः पतिः तम् । 'पारस्करादित्वात् सुट्। अग्र्यां श्रेष्ठां गतिं मुक्तिम् । योगेश्वराः नारदादयः ॥ ३५ ॥ वैशाला विशालवंशोद्भवाः यशोधराः कीर्तिविस्तारकाः ॥ ३६ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे गूढार्थदीपिन्यां द्वितीयोऽध्यायः ॥ २ ॥

तृतीये मनुपुत्रस्य शर्यातेर्वंशवर्णनम् ।
सुकन्याच्यवनाख्यानं रैवतं चात्र वर्ण्यते ॥ १ ॥

ब्रह्मिष्ठः वेदतत्त्वज्ञः । यो वै यस्तु द्वितीयमहः द्वितीयदिनकृत्यं ह स्फुटम् उवाच ॥१॥ तया सार्धं सह आश्रममगमत् ॥२॥ अङ्घ्रिपान् वृक्षान् विचिन्वती मृगयन्ती द्वे ज्योतिषी चक्षुषी ददर्श ॥३॥ ते ज्योतिषी मुग्धभावेन बालभावेन चाञ्चल्येनेत्यर्थः अविध्यत् अताडयत् असृक् रुधिरम् ॥४॥ अपि किम् अभद्रं[1] न विचेष्टितम् अपराधो न कृतः । नोऽस्माकं मध्ये व्यक्तं निश्चितं कृतम् ॥६॥७॥ जातमुत्पन्नं भयं यस्य सः ॥८॥ तदभिप्रायं विवाहविषयकम् । कृच्छ्रात् क्लेशात् । आमन्त्र्य पृष्ट्वा । समाहितः सावधानः सन् ॥९॥ अनुवृत्तिभिः सेवाभिः प्रीणयामास सन्तुष्ट-

---

१. अभद्रमपराधेऽपि ।

कस्यचित् त्वथ कालस्य नासत्यावाश्रमागतौ । तौ पूजयित्वा प्रोवाच वयो मे दत्तमीश्वरौ ॥११॥
ग्रहं ग्रहीष्ये सोमस्य यज्ञे वामप्यसोमपोः । क्रियतां मे वयो रूपं प्रमदानां यदीप्सितम् ॥१२॥
बाढमित्यूचतुर्विप्रमभिनन्द्य भिषक्तमौ । निमज्जतां भवानस्मिन् ह्रदे सिद्धविनिर्मिते ॥१३॥
इत्युक्त्वा जरया ग्रस्तदेहो धमनिसंततः । ह्रदं प्रवेशितोऽश्विभ्यां वलीपलितविप्रियः ॥१४॥
पुरुषास्त्रय उत्तस्थुरपीच्या वनिताप्रियाः । पद्मस्रजः कुण्डलिनस्तुल्यरूपाः सुवाससः ॥१५॥
तान् निरीक्ष्य वरारोहा सरूपान् सूर्यवर्चसः । अजानती पतिं साध्वी अश्विनौ शरणं ययौ ॥१६॥
दर्शयित्वा पतिं तस्यै पातिव्रत्येन तोषितौ । ऋषिमामन्त्र्य ययतुर्विमानेन त्रिविष्टपम् ॥१७॥
यक्ष्यमाणोऽथ शर्यातिश्च्यवनस्याश्रमं गतः । ददर्श दुहितुः पार्श्वे पुरुषं सूर्यवर्चसम् ॥१८॥
राजा दुहितरं प्राह कृतपादाभिवन्दनाम् । आशिषश्चाप्रयुञ्जानो नातिप्रीतमना इव ॥१९॥

चिकीर्षितं ते किमिदं पतिस्त्वया प्रलम्भितो लोकनमस्कृतो मुनिः ।
यत् त्वं जराग्रस्तमसत्यसम्मतं विहाय जारं भजसेऽमुमध्वगम् ॥ २० ॥
कथं मतिस्तेऽवगतान्यथा सतां कुलप्रसूते कुलदूषणं त्विदम् ।
बिभर्षि जारं यदपत्रपा कुलं पितुश्च भर्तुश्च नयस्यधस्तमः ॥ २१ ॥

एवं ब्रुवाणं पितरं स्मयमाना शुचिस्मिता । उवाच तात जामाता तवैष भृगुनन्दनः ॥२२॥
शशंस पित्रे तत् सर्वं वयोरूपाभिलम्भनम् । विस्मितः परमप्रीतस्तनयां परिषस्वजे ॥२३॥
सोमेन याजयन् वीरं ग्रहं सोमस्य चाग्रहीत् । असोमपोरप्यश्विनोश्च्यवनः स्वेन तेजसा ॥२४॥
हन्तुं तमाददे वज्रं सद्योमन्युरमर्षितः । सवज्रं स्तम्भयामास भुजमिन्द्रस्य भार्गवः ॥२५॥

मकरोत् ॥१०॥ नासत्यौ अश्विनौ । हे ईश्वरौ योवनदाने समर्थौ मे मह्यं वयः तारुण्यं दत्तं संपादयतम् ॥११॥ सोमपानरहितयोः वा युवयोः सोमस्य ग्रहं सोमपूर्णपात्रं ग्रहीष्ये दास्यामि । वयः तारुण्यं रूपंसौन्दर्यम् क्रियताम् ॥१२॥ वाढं तथास्तु इति तद्वचः अभिनन्द्य स्वीकृत्य च्यवनम् ऊचतुः ॥१३॥ धमनीभिः शिरानाडीभिः व्याप्तः । वलीभिः शिथिलचर्मभिः पलितैः श्वेतरोमभिश्च विप्रियः कुरूपः ॥१४॥ अपीच्याः अतिसुन्दराः षोडशवर्षीयाः सरूपान् समानरूपान् ॥१५॥ वरौ स्निग्धतमौ आरोहौ ऊरुप्रदेशौ यस्याः सा ॥१६॥ आमन्त्र्य पृष्ट्वा त्रिविष्टपं स्वर्गम् ॥ १७ ॥ यक्ष्यमाणः यागं करिष्यमाणः । पुरुषम् अन्यादृशम् ॥ १८ ॥ कृतं पादयोरभिवन्दनं यया । नातिप्रीतमनाः व्यभिचारशङ्कया । आशिषः आशीर्वादान् अप्रयुञ्जानः अददानः ॥१९॥ किं चिकीर्षितं किं कर्तुमिष्टम् । प्रलम्भितः वञ्चितः । हे असति दुश्चरित्रे ! असम्मतम् अनुपयुक्तं जारं भजसे तत् किम् । अध्वगं पान्थम् ॥२०॥ ते मतिः विपरीता सती कथमवगता नीचभावं प्राप्ता । यत् यस्मात् अपत्रपा निर्लज्जा सती त्वं जारं बिभर्षि कुलद्वयं च अधस्तमो नरकं नयसि ॥२१॥ स्मयमाना पातिव्रत्यगर्वं कुर्वाणा । शङ्कावाक्येन विस्मययुक्ता वा । शुचि आकर्षकं मोहकं च । हे तात पितः । भृगुनन्दनः भृगुपुत्रः च्यवनः ॥२२॥ वयोरूपयोः अभिलम्भनं प्राप्तिर्येन तत् कारणं शशंस कथयामास । परिषस्वजे हृदयीचकार ॥२३॥ सोमेन सोमयागेन वीरं शर्यातिम् । ग्रहं पात्रम् अग्राहयत् । अन्तर्भावितण्यर्थः । असोमपोः सोमभागशून्ययोः ॥२४॥ अमर्षितः असहमानः इन्द्रः । स्तम्भयामास निष्क्रियं चकार । भार्गवः च्यवनः ॥२५॥ भिषक्त्वात् यौ बहिष्कृतौ तयोः

अन्वजानंस्ततः सर्वे ग्रहं सोमस्य चाश्विनोः । भिषजाविति यत् पूर्वं सोमाहुत्या बहिष्कृतौ ॥२६॥
उत्तानबर्हिरानर्तो भूरिषेण इति त्रयः । शर्यातेरभवन् पुत्रा आनर्ताद् रेवतोऽभवत् ॥२७॥
सोऽन्तःसमुद्रे नगरीं विनिर्माय कुशस्थलीम् । आस्थितोऽभुङ्क्त विषयानानर्तादीनरिंदम ॥२८॥
तस्य पुत्रशतं जज्ञे ककुद्मिज्येष्ठमुत्तमम् । ककुद्मी रेवतीं कन्यां स्वामादाय विभुं गतः ॥२९॥
कन्यावरं परिप्रष्टुं ब्रह्मलोकमपावृतम् । आवर्तमाने गान्धर्वे स्थितोऽलब्धक्षणःक्षणम् ॥३०॥
तदन्त आद्यमानम्य स्वाभिप्रायं न्यवेदयत् । तच्छ्रुत्वा भगवान् ब्रह्मा प्रहस्य तमुवाच ह ॥३१॥
अहो राजन् निरुद्धास्ते कालेन हृदि ये कृताः । तत्पुत्रपौत्रनप्तॄणां गोत्राणि च न शृण्महे ॥३२॥
कालोऽभियातस्त्रिणवचतुर्युगविकल्पितः । तद् गच्छ देवदेवांशो बलदेवो महाबलः ॥३३॥
कन्यारत्नमिदं राजन् नररत्नाय देहि भोः । भुवो भारावताराय भगवान् भूतभावनः ॥३४॥
अवतीर्णो निजांशेन पुण्यश्रवणकीर्तनः । इत्यादिष्टोऽभिवन्द्याजं नृपः स्वपुरमागतः ।
त्यक्तं पुण्यजनत्रासाद् भ्रातृभिर्दिक्ष्ववस्थितैः ॥ ३५ ॥
सुतां दत्त्वानवद्याङ्गीं बलाय बलशालिने । बदर्याख्यं गतो राजा तप्तुं नारायणाश्रमम् ॥३६॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां नवमस्कन्धे तृतीयोऽध्यायः ॥ ३ ॥

अथ चतुर्थोऽध्यायः

श्रीशुक उवाच

नाभागो नभगापत्यं यं ततं भ्रातरः कविम् । यविष्ठं व्यभजन् दायं ब्रह्मचारिणमागतम् ॥ १ ॥

सर्वेऽपि ततः प्रभृति सोमस्य ग्रहं भागम् अन्वजानन् अनुज्ञातवन्तः ॥२६॥ उत्तानेति स्पष्टम् ॥२७॥ स रेवतः कुशस्थलीं द्वारकाम् । अन्तः समुद्रे समुद्रद्वीपे । तस्यामास्थितः अधिवसन् आनर्तसंज्ञकान् विषयान् देशान् अभुङ्क्त पालयामास ॥२८॥ प्रष्टुं विभुं ब्रह्माणं गतः ॥२९॥ अपावृतं प्रकाशबहुलम् । गान्धर्वे गाने प्रवर्तमाने सति क्षणं स्थितः । न लब्धः क्षणः प्रश्नावसरो येन सः । आद्यं ब्रह्माणम् ॥३०॥ ह स्पष्टम् । ये हृदि कृताः चिन्तिताः ते निरुद्धाः उपसंहृताः मृता इत्यर्थः ॥३१॥ नप्ता पौत्रपुत्रः । गोत्राणि[1] कुलानि नामानि च । त्रिणव सप्तविंशतिः चतुर्युगानि तैर्विभक्तः कालो व्यतीतः ॥३२॥ भो राजन् ॥३३॥ निजांशेन बलदेवेन सह । पुण्ये पुण्यप्रापके श्रवणकीर्तने यस्य सः ॥३४॥ नृपः ककुद्मी । पुण्यजनाः यक्षाः ॥३५॥ अनवद्याङ्गीं सुकुमाराङ्गीम् ॥३६॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे गूढार्थदीपिन्यां तृतीयोऽध्यायः ॥३॥

चतुर्थे नभगस्योक्ता साम्बरीशस्य सत्कथा ।
कृत्यानाशो मुनेर्यत्र चक्रात्तापश्च वर्ण्यते ॥ १ ॥

नभगो मनुपुत्रः तस्यापत्यं नाभागः तत्पुत्रोऽम्बरीष इति वक्ष्यन् तद्धेतुत्वेन वंशप्रवर्तकस्य नभगस्य चरितमाह न तु नाभागस्य । नभगो हि ब्रह्मचारी सन् अध्ययनार्थं गुरुकुलं गतः ततः प्रत्यावृत्य भ्रातॄन् स्वभागं याचितवान् तैरुक्तं पितैव ते भागः । तदेवाह नाभाग इति । यं नभगं यविष्ठं कनिष्ठं गुरुकुलादागतं भ्रातरः

---

१. 'गोत्रं कुलाख्ययोः' इति मेदिनी ।

'भ्रातरोऽभाक्त किं मह्यं भजाम पितरं तव । त्वां ममार्यास्तताभाङ्क्षुर्मा पुत्रक तदादृथाः ॥२॥
इमे आङ्गिरसः सत्रमासतेऽद्य सुमेधसः । षष्ठं षष्ठमुपेत्याहः कवे मुह्यन्ति कर्मणि ॥ ३ ॥
तांस्त्वं शंसय सूक्ते द्वे वैश्वदेवे महात्मनः । ते स्वर्यन्तो धनं सत्रपरिशेषितमात्मनः ॥ ४ ॥
दास्यन्ति तेऽथ तान् गच्छ तथा स कृतवान् यथा । तस्मै दत्त्वा ययुः स्वर्गं ते सत्रपरिशेषितम् ॥५॥
तं कश्चित् स्वीकरिष्यन्तं पुरुषः कृष्णदर्शनः । उवाचोत्तरतोऽभ्येत्य ममेदं वास्तुकं वसु ॥ ६ ॥
ममेदमृषिभिर्दत्तमिति तर्हि स्म मानवः । स्यान्नौ ते पितरि प्रश्नः पृष्टवान् पितरं तथा ॥७॥
यज्ञवास्तुगतं सर्वमुच्छिष्टमृषयः क्वचित् । चक्रुर्विभागं रुद्राय स देवः सर्वमर्हति ॥ ८ ॥
नभगस्तं प्रणम्याह तवेश किल वास्तुकम् । इत्याह मे पिता ब्रह्मञ्छिरसा त्वां प्रसादये ॥ ९ ॥
यत् ते पिताऽवदद् धर्मं त्वं च सत्यं प्रभाषसे । ददामि ते मन्त्रदृशे ज्ञानं ब्रह्म सनातनम् ॥१०॥
गृहाण द्रविणं दत्तं यत्सत्रे परिशेषितम् । इत्युक्त्वान्तर्हितो रुद्रो भगवान् सत्यवत्सलः ॥११॥
य एतत् संस्मरेत् प्रातः सायं च सुसमाहितः । कविर्भवति मन्त्रज्ञो गतिं चैव तथाऽऽत्मनः ॥१२॥

ततं पितरमेव दायं व्यभजन् भागत्वेन कल्पितवन्तः ॥१॥ एतदेव प्रश्नोत्तररूपेण स्पष्टयति—हे भ्रातरः मह्यं किम् अभाक्त व्यभजन्त ते ऊचुः पितरमिति । स च पितरं गत्वा आह हे तत तात । मम आर्या ज्येष्ठाः त्वाम् अभाङ्क्षुः भागं चक्रुः । एवमुक्तः पिता प्राह हे पुत्रक तैरुक्तं मा आदृथाः नाहं भोगसाधनमथापि ते जीवनोपायं वदामि ॥२॥ आङ्गिरसः एतद्गोत्रोत्पन्ना ब्राह्मणाः सत्रं द्वादशाख्यं यज्ञमासते अनुतिष्ठन्ति । हे कवे विद्वन् पुत्र ! षष्ठं षष्ठमहः तद्दिनसाध्यं कर्म उपेत्य प्राप्य मुह्यन्ति सूक्तविशेषाज्ञानात् ॥३॥ तान् महात्मनः ब्राह्मणान् प्रति त्वं विश्वेदेवदेवताप्रकाशके द्वे सूक्ते शंसय पाठय । 'इदमित्था रौद्रम्' इत्यादिकमेकम् । 'ये यज्ञेन दक्षिणया' इत्यादिकं च द्वितीयम्' । ततः सूक्तशंसनात् ते स्वर्गं गच्छन्तः आत्मनो धनं तुभ्यं दास्यन्तीत्युत्तरेणान्वयः । अथ अतः ततः तान् गच्छ स तथैव कृतवान् । ते तस्मै नभगाय सत्रधनं दत्त्वा स्वर्गं ययुः ॥५॥ तद्धनं स्वीकरिष्यन्तं तं नभगं पुरुषः श्रीरुद्रः उत्तरतः ईशानकोणतः आगत्य उवाचेत्यन्वयः । किम् । वास्तुकं यज्ञभूमिगतं सर्वं वसु धनं ममेदमस्तीति । शिवस्य कर्पूरगौरत्वेऽपि ईशानाधिष्ठातृत्वात्तस्य कृष्णदर्शनत्वं ज्ञेयम् । 'पुरुषं कृष्णपिङ्गलम्' इति श्रुतेः । वस्तुतस्तु रुद्रस्य संहारकर्तृत्वेन तमोगुणकार्यत्वात् तस्य च कृष्णवर्णत्वात् । तमोभावस्थितो[1] रुद्र इत्युक्तेश्च तथात्वेन निर्देशः ॥६॥ ममेदं दत्तमिति मानवः नभगः आह । आवयोः अस्मिन् विवादे ते पितरि प्रश्नः स्यादिति स च पृष्टवान् ॥ ६ ॥ यज्ञभूमिगतं सर्वमुच्छिष्टम् अनुपहृतमागम् ऋषयः रुद्राय चक्रुः । क्वचित् दक्षाध्वरे । अतः स सर्वमर्हति किमुत यज्ञावशिष्टम् ॥ ८ ॥ नभगः तं श्रीरुद्रमाह प्रसादये अपराधं क्षमस्वेति प्राह ॥९॥ यत् यस्मात् । तत् तस्मात् । मन्त्रदृशे सूक्तज्ञानवते ते तुभ्यंम् ब्रह्मात्मकं ज्ञानं ददामि तत्साक्षात्कारो भवितेत्यर्थः ॥ १० ॥ यत् मया दत्तं तत् गृहाण । सत्येन सत्यवचसा वत्सलः प्रसन्नः सन् रुद्रः ॥११॥ एतत् नभगस्य चरितं नतु नाभागस्य तस्य तु अम्बरीषोऽभूदित्येवात्र निर्दिष्टम् । गतिं सद्गतिं प्राप्नोति न पुनः संस-

---

१. रजोभावस्थितो ब्रह्मा सत्त्वभावस्थितो हरिः ।
तमोभावस्थितो रुद्रस्त्रयो देवास्त्रयो गुणाः ॥
२. 'उत्कृष्टं शिष्टमुच्छिष्टं सर्वोत्कृष्टम् इति निरुक्तिः' ।
उच्छेषणभागो वै रुद्रः इति श्रुतेः तद्विना यज्ञापूर्तेः ॥

नाभागादम्बरीषोऽभून्महाभागवतः कृती । नास्पृशद् ब्रह्मशापोऽपि यं न प्रतिहतः क्वचित् ॥१३॥

राजोवाच

भगवञ्छ्रोतुमिच्छामि राजर्षेस्तस्य धीमतः । न प्राभूद् यत्र निर्मुक्तो ब्रह्मदण्डो दुरत्ययः ॥१४॥

श्रीशुक उवाच

अम्बरीषो महाभागः सप्तद्वीपवतीं महीम् । अव्ययां च श्रियं लब्ध्वा विभवं चातुलं भुवि ॥१५॥
मेनेऽतिदुर्लभं पुंसां सर्वं तत् स्वप्नसंस्तुतम् । विद्वान् विभवनिर्वाणं तमो विशति यत् पुमान् ॥१६॥
वासुदेवे भगवति तद्भक्तेषु च साधुषु । प्राप्तो भावं परं विश्वं येनेदं लोष्ठवत् स्मृतम् ॥१७॥

स वै मनः कृष्णपदारविन्दयोर्वचांसि वैकुण्ठगुणानुवर्णने ।
करौ हरेर्मन्दिरमार्जनादिषु श्रुतिं चकाराच्युतसत्कथोदये ॥ १८ ॥

मुकुन्दलिङ्गालयदर्शने दृशौ तद्भृत्यगात्रस्पर्शेऽङ्गसङ्गमम् ।
घ्राणं च तत्पादसरोजसौरभे श्रीमत्तुलस्या रसनां तदर्पिते ॥ १९ ॥

पादौ हरेः क्षेत्रपदानुसर्पणे शिरो हृषीकेशपदाभिवन्दने ।
कामं च दास्ये न तु कामकाम्यया यथोत्तमश्लोकजनाश्रया रतिः ॥२०॥

एवं सदा कर्मकलापमात्मनः परेऽधियज्ञे भगवत्यधोक्षजे ।
सर्वात्मभावं विदधन्महीमिमां तन्निष्ठविप्राभिहितः शशास ह ॥२१॥

रतीत्यर्थः ॥ १३ ॥ कृती अपराधिष्वपि उपकारकर्ता । क्वापि न प्रतिहृतः अप्रतिहतः यम् अम्बरीषं नाऽस्पृशत् ॥१३॥ निर्मुक्तः प्रयुक्तः ब्रह्मशापः जटोत्पादितकृत्यानलरूपः । दुरतिक्रमोऽपि न प्राभूत् न समर्थोऽभूत् ॥ १४ ॥ अम्बरीष इति युग्मम् । अव्ययां चिरस्थायिनीम् । अतुलम् अनुपमम् । अम्बादिकं सर्वं रीषं नश्वरमिति ज्ञानमस्यास्तीति अम्बरीषः । 'रुष रिष हिंसायाम्' इत्यतो मत्वर्थीयोऽच्प्रत्ययः । अम्बरवत् ईषा इच्छा यस्येति वा आकाशवद्बहुलज्ञानः इति तीर्थः । एतत्सर्वं दुर्लभमपि स्वप्नतुल्यं मेने । विभवस्य निर्वाणं नाशं क्षणिकं विद्वान् जानन् । यत् विभवात् अन्धं तमो विशति ॥ १६ ॥ परं भावं भगवद्दृष्टिम् । लोष्ठवत् अतितुच्छम् । लोष्ठः पिण्डे मृदस्तुच्छे इति धरणिः ॥१७॥ सोऽम्बरीषः मनः पदारविन्दयोः वचांसि गुणानुवर्णने करौ मन्दिर मार्जनादिषु श्रुतिं च कथोदये भगवत्कथाश्रवणे चकारेत्यन्वयः । सर्वत्र द्वितीयान्तानां चकारेत्यनेनान्वयः कार्यः ॥१८॥ लिङ्गानां मूर्तीनां ये आलया मन्दिराणि तेषां दर्शने । अङ्गसङ्गमे स्पर्शे आलिङ्गने । घ्राणेन्द्रियं तुलस्याः चरणसम्पर्केण यत्सौरभं दिव्यसुगन्धः तस्मिन् । तदर्पिते महाप्रसादे रसनेन्द्रियं च चकारेत्यन्वयः ॥१९॥ क्षेत्रं मथुरादि पदं पीठादि तत्र तेषु पुनः पुनः गमने । दास्ये निमित्ते कामं संकल्पम् न तु विषयेच्छया । किं बहुना उत्तमश्लोकविषयिणी तद्भक्तविषयिणी च रतिः यथा स्यात् तथा चकारेति योज्यम् ॥ २० ॥ एवं भगवति आत्मनः सर्वं कर्मकलापं सर्वात्मभावं निरवच्छिन्नभक्तियोगं च विदधत् कुर्वन् महीं शशास पालयामासेत्यन्वयः । हेति सोत्साहम् । कथंभूतः । तन्निष्ठैः भगवन्निष्ठैः विप्रैः वसिष्ठादिभिः अभिहितः शिक्षितः उपदिष्टः सन् ॥२१॥ किञ्च असौ अम्बरीषः अश्वमेधैः ईशं श्रीविष्णुम् ईजे इत्यन्वयः । कुत्र । धन्वनि निरुदके धन्वदेशे

ईजेऽश्वमेधैरधियज्ञमीश्वरं महाविभूत्योपचिताङ्गदक्षिणैः ।
ततैर्वसिष्ठासितगौतमादिभिर्धन्वन्यभिस्रोतमसौ सरस्वतीम् ॥ २२ ॥

यस्य क्रतुषु गीर्वाणैः सदस्या ऋत्विजो जनाः । तुल्यरूपाश्चानिमिषा व्यदृश्यन्त सुवाससः ॥२३॥
स्वर्गो न प्रार्थितो यस्य मनुजैरमरप्रियः । शृण्वद्भिरुपगायद्भिरुत्तमश्लोकचेष्टितम् ॥२४॥
समर्द्धयन्ति तान् कामाः स्वाराज्यपरिभाविताः । दुर्लभा नापि सिद्धानां मुकुन्दं हृदि पश्यतः॥२५॥
स इत्थं भक्तियोगेन तपोयुक्तेन पार्थिवः । स्वधर्मेण हरिं प्रीणन् सङ्गान् सर्वाञ्छनैर्जहौ ॥२६॥

गृहेषु दारेषु सुतेषु बन्धुषु द्विपोत्तमस्यन्दनवाजिपत्तिषु ।
अक्षय्यरत्नाभरणायुधादिष्वनन्तकोशेष्वकरोदसन्मतिम् ॥२७॥

तस्मा अदाद्धरिश्चक्रं प्रत्यनीकभयावहम् । एकान्तभक्तिभावेन प्रीतो भृत्याभिरक्षणम् ॥२८॥
आरिराधयिषुः कृष्णं महिष्या तुल्यशीलया । युक्तः सांवत्सरं वीरो दधार द्वादशीव्रतम् ॥२९॥
व्रतान्ते कार्तिके मासि त्रिरात्रं समुपोषितः । स्नातः कदाचित् कालिन्द्यां हरिं मधुवनेऽर्चयत् ३०
महाभिषेकविधिना सर्वोपस्कररसम्पदा । अभिषिच्याम्बराकल्पैर्गन्धमाल्यार्हणादिभिः ॥३१॥
तद्गतान्तरभावेन पूजयामास केशवम् । ब्राह्मणांश्च महाभागान् सिद्धार्थानपि भक्तितः ॥३२॥

सरस्वतीमभिस्रोतः प्रवाहाभिमुखम् तत्तटे । कथंभूतैः यज्ञैः ।वसिष्ठादिभिः ततैः विस्तृतैः अनुष्ठितैः । तनु विस्तारे धातुः । कीदृशैः विप्रैः । महाविभूत्या राज्यसम्पत्त्यैव हेतुना उपचिता बहुदत्ता यज्ञाङ्गभूता दक्षिणा येषां तैः । अधियज्ञं यज्ञफलदातारम् । असितो व्यासः ॥२२॥ यस्य यज्ञेषु सदस्याः गीर्वाणैः देवैः सह तुल्यरूपा आश्चर्येण निमेषरहिताश्च व्यदृश्यन्त स इत्थमिति चतुर्थेनान्वयः ।२३। यस्य सम्बन्धिभिः मनुजैः । चेष्टितं चरित्रम् ।२४। सिद्धानामपि दुर्लभा ये कामा अणिमादयः ते तान् भक्तान् न समर्धयन्ति न हर्षयन्ति । कुतः । मुकुन्दं हृदि पश्यतः । अत एव स्वाराज्येन स्वरूपानन्देन परिभाविताः तिरस्कृतास्ते भवन्ति । 'ऋधु वृद्धौ' धातुः ॥ २५ ॥ प्रीणन् प्रसादयन् तपोयुक्तेन आलोचनात्मकनिर्णयेन स्वधर्मेणेत्यत्र योज्यम् । तप आलोचने धातुः । सङ्गः आसक्तिः विद्यते येषु तान् संगान् स्त्रीपुत्रराज्यादीन् । तेषु आसक्तिं तत्याजेत्यर्थः ॥ २६ ॥ तदेवाह-गृहादिषु असन्मतिं हेयत्वबुद्धिम् अकरोत् । द्विपोत्तमा गजश्रेष्ठाः वाजिनोऽश्वाः । पत्तयः पदातयः । शेषं स्पष्टम् ॥२७॥ प्रत्यनीकाः शत्रवः तेषां भयमावहति प्रापयतीति तथाभूतम् । तस्मै अम्बरीषाय । एकान्तोऽनन्यः । ॥२८॥ आराधयितुमिच्छुः । द्वादशीव्रतं द्वादशीमिलितैकादशीव्रतम् । एतेन दशमीवेधरहितैकादशी ग्राह्या । अन्यथा मुहूर्तार्धविशिष्टायामिति वक्ष्यमाणोक्तिरसङ्गता स्यादित्यवधेयम् ॥२९॥ दशम्यामेकभुक्तम् एकादश्यामुपवासः द्वादश्यां चैकभुक्तमिति त्रिरात्रं नवमीतः एकादशीपर्यन्तम् ॥३०॥ महेति युग्मम् । उपस्कराणां गन्धपुष्पधूपदीपानां सम्पत् समृद्धिः यस्मिन् तेन । महाभिषेकविधिना सहस्रकलशस्नापनविधिना । आकल्पैः भूषणैः माल्यैः पुष्पैः अर्हणैः अर्घ्योदकैः। तद्गतान्तरभावेन तदेकमनस्त्वेन । सिद्धार्थान् कृतकृत्यान् ॥३१॥३२॥ गवामिति सार्द्धम् । राजा साधुविप्रेभ्यः आचारसम्पन्नेभ्यः गवां षट् न्यर्बुदानि षष्टिकोटीः दत्त्वा तेषां गृहेषु

---

१. सदस्या विधिदर्शिनः ।

गवां रुक्मविषाणीनां रूप्याङ्घ्रीणां सुवाससान् । पयःशीलवयोरूपवत्सोपस्कारसम्पदाम् ।
प्राहिणोत् साधुविप्रेभ्यो गृहेषु न्यर्बुदानि षट् ॥३३॥
भोजयित्वा द्विजानग्रे स्वाद्वन्नं गुणवत्तमम् । लब्धकामैरनुज्ञातः पारणायोपचक्रमे ॥३४॥
तस्य तर्ह्यतिथिः साक्षाद् दुर्वासा भगवानभूत् ॥३५॥
तमानर्चातिथिं भूपः प्रत्युत्थानासनार्हणैः । ययाचेऽभ्यवहाराय पादमूलमुपागतः ॥३६॥
प्रतिनन्द्य स तद्याच्ञां कर्तुमावश्यकं गतः । निममज्ज बृहद् ध्यायन् कालिन्दीसलिले शुभे ॥३७॥
मुहूर्तार्धावशिष्टायां द्वादश्यां पारणं प्रति । चिन्तयामास धर्मज्ञो द्विजैस्तद्धर्मसंकटे ॥३८॥
ब्राह्मणातिक्रमे दोषो द्वादश्यां यदपारणे । यत् कृत्वा साधु मे भूयादधर्मो वा न मां स्पृशेत् ॥३९॥
अम्भसा केवलेनाथ करिष्ये व्रतपारणम् । प्राहुरब्भक्षणं विप्रा ह्यशितं नाशितं च तत् ॥४०॥
इत्यपः प्राश्य राजर्षिश्चिन्तयन् मनसाच्युतम् । प्रत्याचष्ट कुरुश्रेष्ठ द्विजागमनमेव सः ॥४१॥
दुर्वासा यमुनाकूलात् कृतावश्यक आगतः । राज्ञाभिनन्दितस्तस्य बुबुधे चेष्टितं धिया ॥४२॥
मन्युना प्रचलद्गात्रो भ्रुकुटीकुटिलाननः । बुभुक्षितश्च सुतरां कृताञ्जलिमभाषत ॥४३॥
अहो अस्य नृशंसस्य श्रियोन्मत्तस्य पश्यत । धर्मव्यतिक्रमं विष्णोरभक्तस्येशमानिनः ॥४४॥

प्राहिणोत् प्रेषयामासेत्यन्वयः । कथंभूतानाम् । स्वर्णाच्छादितशृङ्गाणाम् रजतखुराणाम् । पयःशीलादिसम्पदो यासाम् । उपस्कराणि घण्टाचामरदोहनपात्रादीनि ॥ ३३ ॥ स्वाद्वन्नं क्षीरान्नम्[1] गुणवत्तम् षड्रसोपेतम् । लब्धकामैः प्राप्तदक्षिणैः विप्रैः दत्ताज्ञः सन् पारणाय उपचक्रमे उद्यतोऽभूत्॥३४॥ तस्येत्यर्द्धम् । साक्षात् प्रत्यक्षोऽभूत् ॥ ३५ ॥ अभ्यवहाराय भोजनाय । अह्य तेऽनेनेति अर्हणं पूजनद्रव्यं पुष्पादि ॥३६॥ प्रतिनन्द्य स्वीकृत्य । आवश्यकं माध्याह्निकं कृत्यम् । बृहत् ब्रह्म अघमर्षणसूक्तम् निममज्ज स्नातवान् ॥ ३७ ॥ पारणं प्रति सङ्कटे[2] प्राप्ते सति तत् तदा द्विजैः धर्मशास्त्रिभिः सह विचारयामास ॥ ३८ ॥ सङ्कटमेवाह । यत् यतः ब्राह्मणातिक्रमे दोषोऽधर्मः द्वादश्यामपारणेऽपि दोषो व्रतवैगुण्यम् । यत् कृत्वा यस्मिन् कृते सति मे साधु श्रेयः स्यात् तच्चिन्तयामासेति पूर्वेणान्वयः ॥३९॥ तैः सह विचार्य स्वयं निश्चिनोति । अम्भसा भगवच्चरणोदकेन अशितं न अशितमिति भुक्तम् अभुक्तं चेति । हि इत्यर्थे । आहुः श्रुतय इति शेषः । हे विप्राः । तथा च श्रुतिः 'अपोऽश्नाति तन्नैवाशितं नैवानशितम्' इति । अश् भोजने धातुः ॥ ४० ॥ सः अम्बरीशः प्राश्य पीत्वा । प्रत्याचष्ट प्रतीक्षितवान् ॥ ४१ ॥ चेष्टितं पारणरूपम् । आवश्यकं माध्याह्निकम् ॥ ४२ ॥ प्रचलत् कम्पमानं गात्रं यस्य । भ्रुकुटीभ्यां कुटिलमाननं यस्य सः । सुतरामत्यन्तम् ॥ ४३ ॥ नृशंसस्य क्रूरस्य । धर्मव्यतिक्रमम् अन्यायम् । नृभिः शंसः स्तुतिर्यस्य । श्रियाऽपि उन्मत्तस्य मदमुल्लङ्घ्य वर्तमानस्य निर्मदस्येत्यर्थः । व्यतिक्रमं विगतः अतिक्रमोलङ्घनस्तं धर्मनिष्ठम् । न भक्तो यस्मात्तस्य । ईशं स्वेष्टदेवं मानयीति तस्येति वास्तवोऽर्थः

---

१. 'अमृतं क्षीरभोजनम्' इत्युक्तेः ।

२. एकादशीव्रतं कृत्वा द्वादश्यां यो न पारयेत् ।
व्रतं सांवत्सरं तस्य व्येति कन्दर्पपारणात् ॥ इति स्मृतेः ।
कन्दर्पः त्रयोदशी । व्येति नश्यति ।

यो मामतिथिमायातमातिथ्येन निमन्त्र्य च । अदत्त्वा भुक्तवांस्तस्य सद्यस्ते दर्शये फलम् ॥४५॥
एवं ब्रुवाण उत्कृत्य जटां रोषविदीपितः । तया स निर्ममे तस्मै कृत्यां कालानलोपमाम् ॥४६॥
प्राग्दिष्टं भृत्यरक्षायां पुरुषेण महात्मना । ददाह कृत्यां तां चक्रं क्रुद्धाहिमिव पावकः ॥४८॥
तदभिद्रवदुद्वीक्ष्य स्वप्रयासं च निष्फलम् । दुर्वासा दुद्रुवे भीतो दिक्षु प्राणपरीप्सया ॥४९॥

तमन्वधावद् भगवद्रथाङ्गं दावाग्निरुद्धूतशिखो यथाहिम् ।
तथानुषक्तं मुनिरीक्षमाणो गुहां विविक्षुः प्रससार मेरोः ॥५०॥
दिशो नभः क्ष्मां विवरान् समुद्राँल्लोकान् सपालांस्त्रिदिवं गतः सः ।
यतो यतो धावति तत्र तत्र सुदर्शनं दुष्प्रसहं ददर्श ॥५१॥
अलब्धनाथः स यदा कुतश्चित् संत्रस्तचित्तोऽरणमेषमाणः ।
देवं विरिञ्चं समगाद्विधातस्त्राह्यात्मयोनेऽजिततेजसो माम् ॥५२॥

ब्रह्मोवाच

स्थानं मदीयं सहविश्वमेतत् क्रीडावसाने द्विपरार्धसंज्ञे ।
भ्रूभङ्गमात्रेण हि संदिधक्षोः कालात्मनो यस्य तिरोभविष्यति॥५३॥
अहं भवो दक्षभृगुप्रधानाः प्रजेशभूतेशसुरेशमुख्याः ।
सर्वे वयं यन्नियमं प्रपन्ना मूर्ध्न्यर्पितं लोकहितं वहामः ॥५४॥

॥ ४४ ॥ अन्नम् अदत्त्वा ॥४५॥ उत्कृत्य उत्पाट्य । विदीपितः प्रज्वलितः । कृत्यां मारिकादेवीम् । कालानलः प्रलयाग्निः तत्तुल्याम् ॥४६॥ वेपयन्तीं कम्पयन्तीम् । पदात् स्वस्थानात् किञ्चिदपि ॥ ४७ ॥ दिष्टं नियुक्तं चक्रं कर्तृ अहिं सर्पम् ॥ ४८ ॥ उद्वीक्ष्येति पदमुभयत्रान्वेति । तत् चक्रमभिद्रवत् स्वाभिमुखम् आगच्छत् । परीप्सया प्राणान् प्राप्तुमिच्छया प्राणरक्षणेच्छया । दुद्रुवे पलायितवान् ॥ ४९ ॥ तं धावन्तं मुनिं रथाङ्गं चक्रमन्वधावत् । उद्धूतशिखो निर्गतज्वालो वनाग्निः यथा अहिम् अनुधावेत् तथाऽनुषक्तं पृष्ठतः संलग्नं चक्रं निरीक्षमाणः गुहां विविक्षुः सन् प्रससार दुद्राव ॥५०॥ क्ष्मां पृथ्वीम् विवरान् अधोलोकाम् । त्रिदिवं स्वर्गम् । यतो यतो यत्र यत्र । दुष्प्रसहं दुःखेनापि सोढुमशक्यम् ॥ ५१ ॥ यदा कुतोऽपि अलब्धशरणः तदा स दुर्वासाः अरणमेषमाणः शरणमिच्छन् ब्रह्माणं समगात् गत्वा च हे आत्मयोने[1] मां त्राहीति उवाचेत्यन्वयः । कस्मात् अजिततेजसः विष्णोश्चक्रात्॥५२॥ एतत् सर्वं दग्धुमिच्छोः यस्य भ्रूभङ्गमात्रेण मदीयं स्थानं तिरोभविष्यति लयमेष्यति तस्य तेजसः चक्रात् अहं त्रातुं न शक्त इति योज्यम् । कदा । क्रीडावसाने तत्रापि द्विपरार्द्धकाले- ॥५३॥ अहं ब्रह्मा तदादयःसर्वे वयं प्रपन्नाः सन्तः लोकहितं यथा भवति तथा यस्य नियमम् आज्ञां वहामः कुर्मः मूर्ध्नि[1] अर्पितं भारमिव तस्य तेजसः चक्रात् त्रातुं न शक्ता इति योज्यं यत्तदोर्नित्यसम्बन्धात् । प्रधानाः स्ववंश्यानाम् । प्रजेशा मरीच्यादयः भूतेशा एकादशरुद्रा सुरेशः इन्द्रश्च ते मुख्या येषां नियोज्यानो ते च ते सर्वेऽपि

---

१. आत्मा श्रीनारायणः योनिः कारणं यस्य सः तत्सम्बुद्धौ ।

प्रत्याख्यातो विरिञ्चेन विष्णुचक्रोपतापितः । दुर्वासाः शरणं यातः शर्वं कैलासवासिनम् ॥५५॥

श्रीरुद्र उवाच

वयं न तात प्रभवाम भूम्नि यस्मिन् परेऽन्येऽप्यजजीवकोशाः ।
भवन्ति काले न भवन्ति हीदृशाः सहस्रशो यत्र वयं भ्रमामः ॥५६॥

अहं सनत्कुमारश्च नारदो भगवानजः । कपिलोऽपान्तरतमो देवलो धर्म आसुरिः ॥५७॥
मरीचिप्रमुखाश्चान्ये सिद्धेशाः पारदर्शनाः । विदाम न वयं सर्वे यन्मायां माययाऽऽवृताः ॥५८॥
तस्य विश्वेश्वरस्येदं शस्त्रं दुर्विषहं हि नः । तमेव शरणं याहि हरिस्ते शं विधास्यति ॥५९॥
ततो निराशो दुर्वासाः पदं भगवतो ययौ । वैकुण्ठाख्यं यदध्यास्ते श्रीनिवासः श्रिया सह ॥६०॥

संदह्यमानोऽजितशस्त्रवह्निना तत्पादमूले पतितः सवेपथुः ।
आहाऽच्युतानन्त सदीप्सित प्रभो कृतागसं माऽव हि विश्वभावन ॥६१॥

अजानता ते परमानुभावं कृतं मयाघं भवतः प्रियाणाम् ।
विधेहि तस्यापचितिं विधातर्मुच्येत यन्नाम्न्युदिते नारकोऽपि ॥६२॥

श्रीभगवानुवाच

अहं भक्तपराधीनो ह्यस्वतन्त्र इव द्विज । साधुभिर्ग्रस्तहृदयो भक्तैर्भक्तजनप्रियः ॥६३॥
नाहमात्मानमाशासे मद्भक्तैः साधुभिर्विना । श्रियं चात्यन्तिकीं ब्रह्मन् येषां गतिरहं परा ॥६४॥
ये दारागारपुत्राप्तान् प्राणान् वित्तमिमं परम् । हित्वा मां शरणं याताः कथं तांस्त्यक्तुमुत्सहे ॥६५॥
मयि निर्वद्धहृदयाः साधवः समदर्शनाः । वशीकुर्वन्ति मां भक्त्या सत्स्त्रियः सत्पतिं यथा ॥६६॥

॥५४॥ शर्वं शिवम् ॥५५॥ हे तात वयं न प्रभवाम त्रातुं न समर्थाः । यतः यस्मिन् महत्तमे परे पुरुषे वयं भ्रमामः तथा एतद्ब्रह्माण्डात् अन्येऽपि अजजीवकोशाः ब्रह्माण्डविग्रहा ईदृशा एतद्ब्रह्माण्डतुल्याः काले सृष्टौ भवन्ति जायन्ते प्रलये लीयन्ते भ्रमन्ति च अतस्तमेव शरणं याहीति चतुर्थेनान्वयः ॥५६॥ अहमिति युग्मम् । अहं रुद्रः । अपान्तरतमो व्यासः सर्वे वयं यस्य मायामिच्छां न विदामः तमेव शरणं याहीत्युत्तरेणान्वयः ॥ ५७ ॥ ५८ ॥ नोऽस्माकम् । शं सुखम् ॥ ५९ ॥ पदं लोकम् ॥ ६० ॥ अजितशस्त्रं सुदर्शनचक्रं तस्य ज्वालया दह्यमानः सन् पादमूले पतितः आह चेत्यन्वयः । किम् । हे सतां भक्तानाम् ईप्सित प्रेमास्पद । हे विश्वपालक । माम् अव रक्षेति । कृतागसं कृतापराधम् । हि हेतौ ॥ ६१ ॥ प्रियाणां भक्तानाम् अघं कृतम् अपराधः कृतः तस्य अघस्य अपचितिं[2] प्रायश्चित्तं विधेहि । उदिते उच्चरिते सति नारको नरकस्थः नरकस्थानां तन्नामोच्चारणासंभवादत्र नारकपदेन नीचजातिः श्वपचादिर्गृह्यते ॥ ६२ ॥ ग्रस्तं वशीकृतम् ॥ ६३ ॥ येषामहं गतिः तैः भक्तैः विना आत्मानं श्रीविग्रहं तथा तत्प्रतिकूलाम् आत्यन्तिकीम् अवियोगिनीं श्रियमपि नाशासे नेच्छामीत्यन्वयः अन्यस्य का कथा ॥ ६४ ॥ दारान् स्त्रियः । प्राणान् जीवनहेतून् । इमं लोकं परं च लोकम् ॥ ६५ ॥ निर्वद्धं संलग्नम् ॥ ६६ ॥ प्रतीतं प्राप्तमपि । सालोक्यमादिर्यस्य तत् मुक्तिचतुष्टयम् ।[3] अन्यत् इन्द्रादिपदं

---

१. लुप्तोपमा । २. 'भवेदपचितिः पूजा व्ययनिष्कृति हानिषु । इति मेदिनी ।

३. सार्ष्टिसालोक्यसामीप्यसारूप्यैकत्वमप्युत ।
दीयमानं न गृह्णन्ति विना मत्सेवनं जना ॥

मत्सेवया प्रतीतं च सालोक्यादिचतुष्टयम् । नेच्छन्ति सेवया पूर्णाः कुतोऽन्यत् कालविद्रुतम् ॥६७॥
उपायं कथयिष्यामि तव विप्र शृणुष्व तत् । अयं ह्यात्माभिचारस्ते यतस्तं यातु वै भवान् ।
साधवो हृदयं मह्यं साधूनां हृदयं त्वहम् । मदन्यत्ते न जानन्ति नाहं तेभ्यो मनागपि ॥६८॥
साधुषु प्रहितं तेजः प्रहर्तुः कुरुतेऽशिवम् ॥६९॥
तपो विद्या च विप्राणां निःश्रेयसकरे उभे । ते एव दुर्विनीतस्य कल्पेते कर्तुरन्यथा ॥७०॥
ब्रह्मंस्तद् गच्छ भद्रं ते नाभागतनयं नृपम् । क्षमापय महाभागं ततः शान्तिर्भविष्यति ॥७१॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां नवमस्कन्धेऽम्बरीषचरिते चतुर्थोऽध्याय ॥४॥

अथ पञ्चमोऽध्यायः

श्रीशुक उवाच

एवं भगवताऽऽदिष्टो दुर्वासाश्चक्रतापितः । अम्बरीषमुपावृत्य तत्पादौ दुःखितोऽग्रहीत् ॥१॥
तस्य सोद्यमनं वीक्ष्य पादस्पर्शविलज्जितः । अस्तावीत् तद्धरेरस्त्रं कृपया पीडितो भृशम् ॥२॥

अम्बरीष उवाच

त्वमग्निर्भगवान् सूर्यस्त्वं सोमो ज्योतिषां पतिः । त्वमापस्त्वं क्षितिर्व्योम वायुर्मात्रेन्द्रियाणि च ॥३॥
सुदर्शन नमस्तुभ्यं सहस्राराच्युतप्रिय । सर्वास्त्रघातिन् विप्राय स्वस्ति भूया इडस्पते ॥४॥
त्वं धर्मस्त्वमृतं सत्यं त्वं यज्ञोऽखिलयज्ञभुक् । त्वं लोकपालः सर्वात्मा त्वं तेजः पौरुषं परम् ॥५॥
नमः सुनाभाखिलधर्मसेतवे ह्यधर्मशीलासुरधूमकेतवे ।
त्रैलोक्यगोपाय विशुद्धवर्चसे मनोजवायाद्भुतकर्मणे गृणे ॥६॥

कुतः । विद्रुतं नश्वरम् ॥ ६७ ॥ मह्यं मम हृदयम् अत्यन्तं प्रियाः । यतः ते मद् मत्तः अन्यत् किमपि न । अहमपि तेभ्योऽन्यत् मनाक् ईषदपि प्रियं वस्तु न जानामि ॥ ६८ ॥ यतः यस्मै ते त्वया आत्मना अहंकारेण अभिचारः कृत्याप्रयोगः कृतः तं वै तमेव यातु । अशिवम् अनिष्टम् ॥ ७० ॥ दुर्विनीतस्य निरपराधेषु अपराध-कर्तुः पुंसः अन्यथा कल्पेते अनर्थकरे भवतः ॥ ७१ ॥ क्षमापय । आपुक् आर्पः । यद्वा । क्षमामाप्नोतीति क्षमापः तादृशं कुरु । तत्करोतीति णिच् । शान्तिः कल्याणम् । 'शान्तिः कल्याणनाशयोः' इति निरुक्तिः ॥७२॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे गूढार्थदीपिन्यां चतुर्थोऽध्यायः ॥ ४ ॥

पञ्चमेऽङ्घ्री स्पृशन् राज्ञो दुर्वासाश्चक्रतापितः ।
चक्रं स्तुत्वाऽम्बरीषेण रक्षितो भोजितश्च सः ॥

तस्य दुर्वाससः । सोऽम्बरीषः उद्यमनं क्षमाप्राप्त्युद्योगम् । 'सोऽचिलोपे' इति सोर्लोपः । भृशमत्यन्तम् ॥१॥२॥ ज्योतिषां नक्षत्राणाम् । मात्राः शब्दादयः त्वमेव त्वच्छक्त्यैव अग्न्यादयः कार्यक्षमा भवन्तीत्यर्थः ॥३॥ हे सहस्रार । सहस्रमराणि पर्वाणि यस्य । यद्वा । सहस्रधार । इडा पृथ्वी तस्याः पते । पारस्करादित्वात् सुट् ह्रस्वश्च । विप्राय स्वस्ति प्रसन्नरूपः भूयाः भव ॥ ४ ॥ ऋतं च सूनता वाणी सत्यं च समदर्शनम् । पौरुषं वैष्णवं तेजश्च ॥ ५ ॥ हे सुनाभ सुदर्शन शोभना नाभिर्यस्य तत्सम्बुद्धौ । तुभ्यं केवलं नमो गृणे नमस्करोमि । सेतवे मर्यादारूपाय । धूमकेतवे अग्निरूपाय । त्रैलोक्यं गोपायतीति तथा । वर्चो दिव्यतेजः ॥६॥

त्वत्तेजसा धर्ममयेन संहृतं तमः प्रकाशश्च धृतो महात्मनाम् ।
दुरत्ययस्ते महिमा गिरां पते त्वद्रूपमेतत् सदसत् परावरम् ॥७॥
यदा विसृष्टस्त्वमनञ्जनेन वै बलं प्रविष्टोऽजित दैत्यदानवम् ।
बाहूदरोर्वङ्घ्रिशिरोधराणि वृश्चन्नजस्रं प्रधने विराजसे ॥८॥
स त्वं जगत्त्राण खलप्रहाणये निरूपितः सर्वसहो गदाभृता ।
विप्रस्य चास्मत्कुलदैवहेतवे विधेहि भद्रं तदनुग्रहो हि नः ॥९॥
यद्यस्ति दत्तमिष्टं वा स्वधर्मो वा स्वनुष्ठितः । कुलं नो विप्रदैवं चेद् द्विजो भवतु विज्वरः ॥१०॥
यदि नो भगवान् प्रीत एकः सर्वगुणाश्रयः । सर्वभूतात्मभावेन द्विजो भवतु विज्वरः ॥११॥

श्रीशुक उवाच

इति संस्तुवतो राज्ञो विष्णुचक्रं सुदर्शनम् । अशाम्यत् सर्वतो विप्रं प्रदहद् राजयाच्ञया ॥१२॥
स मुक्तोऽस्त्राग्नितापेन दुर्वासाः स्वस्तिमांस्ततः । प्रशशंस तमुर्वीशं युञ्जानः परमाशिषः ॥१३॥

दुर्वासा उवाच

अहो अनन्तदासानां महत्त्वं दृष्टमद्य मे । कृतागसोऽपि यद् राजन् मङ्गलानि समीहसे ॥१४॥
दुष्करं किं नु साधूनां दुस्त्यजं वा महात्मनाम् । यैः संगृहीतो भगवान् सात्वतामृषभो हरिः ॥१५॥
यन्नामश्रुतिमात्रेण पुमान् भवति निर्मलः । तस्य तीर्थपदः किं वा दासानामवशिष्यते ॥१६॥
राजन्ननुगृहीतोऽहं त्वयाऽतिकरुणात्मना । मदघं पृष्ठतः कृत्वा प्राणा यन्मेऽभिरक्षिताः ॥१७॥
राजा तमकृताहारः प्रत्यागनकाङ्क्षया । चरणावुपसंगृह्य प्रसाद्य समभोजयत् ॥१८॥

त्वत्तेजसा महात्मनां भक्तानां तमः आत्मावरकं संहृतं निरस्तम् स्वरूपप्रकाशश्च धृतः कृतः । सदसत् कार्यकाणात्मकं परावरमुच्चावचं च एतत् जगत् त्वयैव रूप्यते प्रकाश्यते तथाभूतम् । अत एव ते महिमा दुरत्ययोऽपारः ॥ ७ ॥ हे अजित यदा अनञ्जनेन निरुपाधिना भगवता विसृष्टः आदिष्टः तदा त्वं दानवानामिदं बलं सैन्यं प्रविष्टः सन् तेषा बाह्वादीन् वृश्चन् भिन्दन् प्रधने संग्रामे विराजसे । अज्यते लिप्यतेऽनेनेति अञ्जनमुपाधिः ॥ ८ ॥ स त्वं जगतः त्राणाय खलानां विनाशाय च भगवता त्वं निरूपितः अतः अस्मत्कुलस्य भाग्यलाभाय विप्रस्य भद्रं विधेहि तदेव ते नोऽस्माकमुपरि अनुग्रहः । सर्वान् शत्रून् अपराधान् वा सहसे तथाभूतस्त्वम् । जगत्त्राणेति सम्बोधनं वा ॥ ९ ॥ दत्तं दानम् । इष्टं यागादि । विप्रदैवं विप्रदेवताकम् ॥ १० ॥ सर्वभूतेषु यः आत्मभावः भगवद्दृष्टिः तेन । द्विजः विज्वरः सन्तापरहितो भवतु । ज्वर सन्तापे धातुः ॥ संस्तुवतः सतः विप्रं प्रदहत् चक्रमशाम्यत् ॥ १२ ॥ स्वस्तिमान् सन्तापरहितः । ततो हेतोः । आशिषः आशीर्वादान् प्रयुञ्जानः ददानः ॥ १३ ॥ कृतागसः कृतापराधस्यापि मम मंगलानि समीहसे वाञ्छसीति यत् तत् ॥ १४ ॥ संगृहीतो वशीकृतः सात्वतां भक्तानाम् ऋषभः पालकः ॥ १५ ॥ तीर्थं गंगा पादे यस्य तीर्थपाद भगवान् तस्य दासानां कि वा अलभ्यं वस्तु सर्वं सुलभमेव ॥ १६ ॥ यत् यस्मात् मदघं ममापराधं पृष्ठतः कृत्वा विस्मृत्येत्यर्थः ॥ १७ ॥ राजेत्यादि पद्यद्वयं शुकोक्तिः । उपसंगृह्य गृहीत्वा ॥ १८ ॥ स दुर्वासाः आहृतं सादरमानीतम् आतिथ्यम् अतिथियोग्यमन्नादिकम् अशित्वा भुक्त्वा । कथंभूतम् । सर्वे कामाः काम्यमानाः

सोऽशित्वाऽऽहृतमानीतमातिथ्यं सार्वकामिकम् । तृप्तात्मा नृपतिं प्राह भुज्यतामिति सादरम् ॥१९॥
प्रीतोऽस्म्यनुगृहीतोऽस्मि तव भागवतस्य वै । दर्शनस्पर्शनालापैरातिथ्येनात्ममेधसा ॥२०॥
कर्मावदातमेतत् ते गायन्ति स्वःस्त्रियो मुहुः । कीर्तिं परमपुण्यां च कीर्तयिष्यति भूरियम् ॥२१॥

श्रीशुक उवाच

एवं संकीर्त्य राजानं दुर्वासाः परितोषितः । ययौ विहायसाऽऽमन्त्र्य ब्रह्मलोकमहैतुकम् ॥२२॥
संवत्सरोऽत्यगात् तावद् यावता नागतो गतः । मुनिस्तद्दर्शनाकाङ्क्षी राजाब्भक्षो बभूव ह ॥२३॥

गते च दुर्वाससि सोऽम्बरीषो द्विजोपयोगातिपवित्रमाहरत् ।
ऋषेर्विमोक्षं व्यसनं च बुद्ध्वा मेने स्ववीर्यं च परानुभावम् ॥२४॥
एवंविधानेकगुणः स राजा परात्मनि ब्रह्मणि वासुदेवे ।
क्रियाकलापैः समुवाह भक्तिं ययाऽऽविरिञ्च्यान् निरयांश्चकार ॥२५॥
अथाम्बरीषस्तनयेषु राज्यं समानशीलेषु विसृज्य धीरः ।
वनं विवेशात्मनि वासुदेवे मनो दधद् ध्वस्तगुणप्रवाहः ॥२६॥

इत्येतत् पुण्यमाख्यानमम्बरीषस्य भूपतेः । संकीर्तयन्ननुध्यायन् भक्तो भगवतो भवेत् ॥२७॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां नवमस्कन्धेऽम्बरीषचरितं नाम पञ्चमोऽध्यायः ॥५॥

अथ षष्ठोऽध्यायः

श्रीशुक उवाच

विरूपः केतुमाञ्छम्भुरम्बरीषसुतास्त्रयः । विरूपात् पृषदश्वोऽभूत् तत्पुत्रस्तु रथीतरः ॥१॥

पङ्क्सा यस्मिन् ॥ १९ ॥ तव दर्शनादिभिः आत्ममेधसा भगवन्निष्ठबुद्धया च प्रीतोऽस्मि ॥२०॥ एतत् सुदर्शनात् मोक्षणरूपम् अवदातं विशुद्धं कर्म स्वःस्त्रियः अप्सरसः गास्यन्ति । इयं भूः भूमिष्ठो जनः मञ्चाः क्रोशन्तीति वत् । 'तात्स्थ्यात्ताच्छब्द्यम्' इति न्यायात् ॥ २१ ॥ आमन्त्र्य पृष्ट्वा । विहायसा आकाशमार्गेण । अहैतुकं कर्मालभ्यम् ॥ २२ ॥ चक्रभयात् गतो मुनिः यावता कालेन नागतः तावत् सम्वत्सरात्मकः कालः व्यतीयाय राजा तु तद्दर्शनेच्छुः सन् अप एव भक्षयन् स्थितः इति ह स्फुटम् धैर्यस्य पराकाष्ठा सूचिता ॥ २३ ॥ द्विजस्य मुनेः उपयोगेन भोजनेन अतिपवित्रमन्नम् आहरत् बुभुजे । ऋषेः व्यसनं चक्रजन्यं कष्टं तस्मात् विमोक्षं स्ववीर्यं च धैर्यादिलक्षणं च परस्य भगवत एव प्रभावं मेने नत्वात्मन इति ॥ २४ ॥ क्रियाकलापैः समर्पितैः भक्तिं समुवाह चकार । यया भक्त्या जातवैराग्येण ब्रह्मलोकपर्यन्तान् भोगान् नरकतुल्यान् चकार मेने इत्यर्थः ॥२५॥ अथ तनयेषु राज्यं समर्प्य आत्मनि परमात्मनि मनो दधत् धारयन् वनं विवेशेत्यन्वयः । एवं सति ध्वस्तः गुणप्रवाहः संसारो यस्य तथाभूतो जीवन्मुक्तो बभूवेत्यर्थः ॥ २६ ॥ पुण्यं पुण्यजनकम् । मत्वर्थीयोऽच्प्रत्यय ॥२७॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे गूढार्थदीपिन्यां पञ्चमोऽध्यायः ॥ ५ ॥

षष्ठे वंशोऽम्बरीषस्य पुनरिक्ष्वाकुभूपतेः ।
शशादात् यौवनाश्वान्तः सौभरेश्च कथोच्यते ॥ १ ॥

तत्पुत्रः पृषदश्वपुत्रः ॥१॥ तन्तवे सन्तानार्थम् । अर्थितः प्रार्थितः । ब्रह्मवर्चस्विनः ब्रह्मतेजस्विनः ॥२॥

रथीतरस्याप्रजस्य भार्यायां तन्तवेऽर्थितः । अङ्गिरा जनयामास ब्रह्मवर्चस्विनः सुतान् ॥२॥
एते क्षेत्रे प्रसूता वै पुनस्त्वाङ्गिरसाः स्मृताः । रथीतराणां प्रवराः क्षत्रोपेता द्विजातयः ॥३॥
क्षुवतस्तु मनोर्जज्ञे इक्ष्वाकुर्घ्राणतः सुतः । तस्य पुत्रशतज्येष्ठा विकुक्षिनिमिदण्डकाः ॥४॥
तेषां पुरस्तादभवन्नार्यावर्ते नृपा नृप । पञ्चविंशतिः पश्चाच्च त्रयो मध्ये परेऽन्यतः ॥५॥
स एकदाष्टकाश्राद्धे इक्ष्वाकुः सुतमादिशत् । मांसमानीयतां मेध्यं विकुक्षे गच्छ माचिरम् ॥६॥
तथेति स वनं गत्वा मृगान् हत्वा क्रियार्हणान् । श्रान्तो बुभुक्षितो वीरः शशं चाददपस्मृतिः ॥७॥
शेषं निवेदयामास पित्रे तेन च तद्गुरुः । चोदितः प्रोक्षणायाह दुष्टमेतदकर्मकम् ॥८॥
ज्ञात्वा पुत्रस्य तत् कर्म गुरुणाभिहितं नृपः । देशान्निःसारयामास सुतं त्यक्तविधिं रुषा ॥९॥
स तु विप्रेण संवादं ज्ञापकेन समाचरन् । त्यक्त्वा कलेवरं योगी स तेनावाप यत्परम् ॥१०॥
पितर्युपरतेऽभ्येत्य विकुक्षिः पृथिवीमिमाम् । शासदीजे हरिं यज्ञैः शशाद इति विश्रुतः ॥११॥
पुरञ्जयस्तस्य सुत इन्द्रवाह इतीरितः । ककुत्स्थ इति चाप्युक्तः शृणु नामानि कर्मभिः ॥१२॥
कृतान्त आसीत् समरो देवानां सह दानवैः । पार्ष्णिग्राहो वृतो वीरो देवैर्दैत्यपराजितैः ॥१३॥

एते रथीतरस्य क्षेत्रे भार्यायां प्रसूतत्वात् अङ्गिरसो वीर्यजातत्वात् रथीतराणां तत्सन्ततिजातानामन्येषां प्रवराः क्षत्रोपेता द्विजातयः द्वे जाती येषां ते तथाभूताः क्षत्रोपेता अन्वर्थसंज्ञका बभूवुः ।३। मनोर्ज्येष्ठपुत्रस्य विस्तृतमिक्ष्वाकोर्वंशमाह—क्षुतं छिक्कां कुर्वतः मनोर्घ्राणतः घ्राणाधिकरणनासिकातः इक्ष्वाकुःजज्ञे । तस्य इक्ष्वाकोः ।४। तेषां शतसंख्याकानां मध्ये आर्यावर्ते[1] पुरस्तात् पूर्वस्यां दिशि पञ्चविंशतिः । तत्संख्याक एव तस्य पश्चिमायां दिशि । मध्ये देशे त्रयः । अपरे अवशिष्टाः सप्तचत्वारिंशन्नृपाः अन्यतः दक्षिणोत्तरादिषु अभवन् इति योजना कार्या ॥५॥ हे विकुक्षे । मेध्यं श्राद्धार्हम् । अष्टकाश्राद्धे[2] ॥६॥ तथास्तु इति स्वीकृत्य । बुभुक्षितत्वात् अपगता स्मृतिर्यस्य सः विवेकरहितः । शशम् आदत्[3] अभक्षयत् ॥७॥ शेषं भुक्तावशिष्टम् । प्रोक्षणाय श्राद्धोचितसंस्काराय । तद्गुरुः वसिष्ठः । अकर्मकं कर्मानर्हम् । यतो दुष्टमुच्छिष्टं भुक्तत्वात् ॥८॥ विधिः आचारः ॥९॥ स तु इक्ष्वाकुः । ज्ञापयति तत्त्वं बोधयतीति ज्ञापको वसिष्ठः तेन ज्ञानदायिना सह संवादं तत्त्वविचारं समाचरन् कुर्वन् बभूव तेन स यत् परं ब्रह्म तत् अवाप अत सः इत्यस्य न पौनरुक्त्यं वाक्यभेदात् ॥१०॥ अत्र जकारघटितोऽपिपाठः उपरते मृते सति । अभ्येत्य राजभवनमागत्य पृथ्वीं शासत्[4] पालयन् सन् हरिमीजे इत्यन्वयः । शशभक्षणात् शशाद इत्यन्वर्थं तस्य नाम जातम् । 'अद् भक्षणे' धातुः । विश्रुतः विख्यातः ॥११॥ तस्य शशादस्य पुत्रः पुरञ्जयः तस्य कर्मभिः कृत्वा त्रीणि नामानि ॥१२॥ कृतानि सुरासुरशरीराणि अन्तयतीति । कृतोऽन्योन्यतोऽन्तो यस्मिन्निति वा । तत्र पार्ष्णिग्राहः पृष्ठरक्षकः वृतः स्वीकृतः सहायकत्वेन । पार्ष्णिं गृह्णातीति विग्रहः । सप्तम्यन्तपाठे कृतस्य युगस्य अन्ते त्रेतादौ इति वा ।१३। वृतेन राज्ञा उक्तं यदि इन्द्रो मम वाहनं स्यात्तदा दैत्यान् हनिष्यामीति

---

१. आर्यावर्तः पुण्यभूमिर्मध्यं विन्ध्यहिमालयाः ।
२. 'हेमन्तशिशिरयोश्चतुर्णामपरपक्षाणामष्टमी अष्टका' इत्याश्वलायनसूत्रम् ।
३. 'अदः सर्वेषाम्' इत्यपृक्तहलः आडागमः ।
४. जक्षादित्वात् शतरि नुमभावः ।

वचनाद् देवदेवस्य विष्णोर्विश्वात्मनः प्रभोः । वाहनत्वे वृतस्तस्य बभूवेन्द्रो महावृषः ॥१४॥
स संनद्धो धनुर्दिव्यमादाय विशिखाञ्छितान् । स्तूयमानः समारुह्य युयुत्सुः ककुदि स्थितः ॥१५॥
तेजसाऽऽप्यायितो विष्णोः पुरुषस्य परात्मनः । प्रतीच्यां दिशि दैत्यानां न्यरुणत् त्रिदशैः पुरम् ॥१६॥
तैस्तस्य चाभूत् प्रधनं तुमुलं लोमहर्षणम् । यमाय भल्लैरनयद् दैत्यान् येऽभिययुर्मृधे ॥१७॥
तस्येषुपाताभिमुखं युगान्ताग्निमिवोल्बणम् । विसृज्य दुद्रुवुर्दैत्या हन्यमानाः स्वमालयम् ॥१८॥
जित्वा पुरं धनं सर्वं सश्रीकं वज्रपाणये । प्रत्ययच्छत् स राजर्षिरिति नामभिराहृतः ॥१९॥
पुरञ्जयस्य पुत्रोऽभूदनेनास्तत्सुतः पृथुः । विश्वरन्धिस्ततश्चन्द्रो युवनाश्वश्च तत्सुतः ॥२०॥
शाबस्तस्तत्सुतो येन शाबस्ती निर्ममे पुरी । बृहदश्वस्तु शाबस्तिस्ततः कुवलयाश्वकः ॥२१॥
यः प्रियार्थमुतङ्कस्य धुन्धुनामासुरं बली । सुतानामेकविंशत्या सहस्रैरहनद् वृतः ॥२२॥
धुन्धुमार इति ख्यातस्तत्सुतास्ते च जज्वलुः । धुन्धोर्मुखाग्निना सर्वे त्रय एवावशेषिताः ।

दृढाश्वः कपिलाश्वश्च भद्राश्व इति भारत ॥२३॥

दृढाश्वपुत्रो हर्यश्वो निकुम्भस्तत्सुतः स्मृतः ॥२४॥

बर्हणाश्वो निकुम्भस्य कृशाश्वोऽथास्य सेनजित् । युवनाश्वोऽभवत् तस्य सोऽनपत्यो वनं गतः ॥२५॥
भार्याशतेन निर्विण्ण ऋषयोऽस्य कृपालवः । इष्टिं स्म वर्तयांचक्रुरैन्द्रीं ते सुसमाहिताः ॥२६॥
राजा तद् यज्ञसदनं प्रविष्टो निशि तर्षितः । दृष्ट्वा शयानान् विप्रांस्तान् पपौ मन्त्रजलं स्वयम् २७

हनिष्यामीति इन्द्रस्तदस्वीकुर्वन् विष्णोर्वचनात् महावृषो[1] बभूवेति ॥१४॥ स इति युग्मम् । स पुरञ्जयः युयुत्सुः योद्धुमिच्छुः सन् धनुः शितान् तीक्ष्णान् बाणांश्च आदाय वृषभं समारुह्य तस्य ककुदि स्थितः तेजसा आप्यायित वर्द्धितश्च दैत्यानां पुरं न्यरुणदिति द्वयोरन्वयः । कथंभूतः । संनद्धः धृतकवचः ॥१५॥१६॥ तस्य पुरञ्जयस्य तैः दैत्यैः सह तुमुलं भीषणं रोमाञ्चकारि प्रधनं युद्धमभूत् । मृधे संग्रामे ये अभ्याययुः सम्मुखमाजग्मुः तान् यमाय यमम् अनयत् मृत्युं प्रापयामास । 'गत्यर्थकर्मणि इति कर्मणि चतुर्थी । भल्लैः तत्संज्ञकबाणैः । 'अभिययुः' इत्यपि पाठः ॥१७॥ तस्य पुरञ्जयस्य युगान्ताग्निं प्रलयाग्निमिव उल्बणं दुःसहम् इषुपाताभिमुखं बाणप्रहारसांमुख्यं विसृज्य स्वमालयं पातालं प्रति दुद्रुवुः ॥१८॥ सश्रीकं सर्वसम्पत्परिपूर्णं पुरं धनं च जित्वा इन्द्राय प्रत्ययच्छत् प्रत्यार्पयत् इत्येतैः कर्मभिः त्रिभिः नामभिश्च व्याहृतः उदाहृतः । पुरंजयत्वात् पुरञ्जयः इन्द्रवाहनत्वात् इन्द्रवाहः ककुदि स्थितत्वात् ककुत्स्थ इति ॥१९॥ तत्सुतः अनेनसः पुत्रः । ततः पृथोः तत इत्युभयत्रान्वेति । ततो विश्वरन्धेः चन्द्रः । तत्सुतः चन्द्रसुतः ॥२०॥ तत्सुतो युवनाश्वसुतः । शावस्तिः शावस्तपुत्रः । ततो बृहदश्वात् ॥२१॥ यः बली कुवलयाश्वः उतङ्कस्य मुनेः प्रियार्थं सुतैः युक्तः धुन्धुनामकं दैत्यमहन् ॥२२॥ धुन्धुरिति सार्द्धम् । स्पष्टम् । हे भारत ॥२३॥२४॥ तस्य सेनजितः । स युवनाश्वः ॥२५॥ भार्याशतेन सह वनं ऋषीणामाश्रमं गतः । निर्विण्णः खिन्नचित्तः । ते च ऋषयः ऐन्द्रीम् इन्द्रदेवताकामिष्टिं पुत्रकामेष्टिं प्रवर्तयाञ्चक्रुः ॥२६॥ राजा तर्षितः पिपासुः सन् मन्त्राभिमन्त्रितं जलं पपौ ॥२७॥ ते मुनयः व्युदकं जल-

1. अवमानं पुरस्कृत्य मानं कृत्वा तु पृष्ठतः ।
स्वकार्यं साधयेद्धीमान् कार्यध्वंसो हि मूर्खता ॥ इति राजशास्त्रम् ।

उत्थितास्ते निशाम्याथ व्युदकं कलशं प्रभो । पप्रच्छुः कस्य कर्मेदं पीतं पुंसवनं जलम् ॥२८॥
राज्ञा पीतं विदित्वाथ ईश्वरप्रहितेन ते । ईश्वराय नमश्चक्रुरहो दैवबलं बलम् ॥२९॥
ततः काल उपावृत्ते कुक्षिं निर्भिद्य दक्षिणम् । युवनाश्वस्य तनयश्चक्रवर्ती जजान ह ॥३०॥
कं धास्यति कुमारोऽयं स्तन्यं रोरूयते भृशम् । मां धाता वत्स मा रोदीरितीन्द्रो देशिनीमदात् ॥३१॥
न ममार पिता तस्य विप्रदेवप्रसादतः । युवनाश्वोऽथ तत्रैव तपसा सिद्धिमन्वगात् ॥३२॥
त्रसद्दस्युरितीन्द्रोऽङ्ग विदधे नाम तस्य वै । यस्मात् त्रसन्ति ह्युद्विग्ना दस्यवो रावणादयः ॥३३॥
यौवनाश्वोऽथ मान्धाता चक्रवर्त्यवनीं प्रभुः । सप्तद्वीपवतीमेकः शशासाच्युततेजसा ॥३४॥
ईजे च यज्ञं क्रतुभिरात्मविद् भूरिदक्षिणैः । सर्वदेवमयं देवं सर्वात्मकमतीन्द्रियम् ॥३५॥
द्रव्यं मन्त्रो विधिर्यज्ञो यजमानस्तथर्त्विजः । धर्मो देशश्च कालश्च सर्वमेतद् यदात्मकम् ॥३६॥
यावत् सूर्य उदेति स्म यावच्च प्रतितिष्ठति । सर्वं तद्यौवनाश्वस्य मान्धातुः क्षेत्रमुच्यते ॥३७॥
शशबिन्दोर्दुहितरि बिन्दुमत्यामधान्नृपः । पुरुकुत्समम्बरीषं मुचुकुन्दं च योगिनम् ॥३८॥

तेषां स्वसारः पञ्चाशत् सौभरिं वव्रिरे पतिम् ॥३९॥

यमुनान्तर्जले मग्नस्तप्यमानः परं तपः । निर्वृतिं मीनराजस्य वीक्ष्य मैथुनधर्मिणः ॥

जातस्पृहो नृपं विप्रः कन्यामेकामयाचत ॥४०॥

सोऽप्याह गृह्यतां ब्रह्मन् कामं कन्या स्वयंवरे ॥४१॥

स विचिन्त्याप्रियं स्त्रीणां जरठोऽयमसम्मतः । वलीपलित एजत्क इत्यहं प्रत्युदाहृतः ॥४२॥

शून्यम् । पुमान् सूयतेऽनेनेति पुंसवनं पुत्रोत्पादकं जलं केन पीतम् ॥२८॥ दैव प्रहितेन प्रेरितेन राज्ञा पीतम् । दैव वलं मुख्यं बलम् ।२९। काले प्रसवकाले उपावृत्ते प्राप्ते सति जजान उत्पन्नोऽभूत् । जन जनने दिवादिः हर्षे ।३०। अयं रोरूयते भृशं रोदिति स्तन्यं दुग्धमुद्दिश्य कं धास्यति पास्यति । मां धाता पाता इत्युक्त्वा इन्द्रः तस्य मुखे अमृतस्राविणीं देशिनीं तर्जनीमदात् । अतस्तस्य मान्धाता नाम जातम् । धेट् पाने धातुः ॥३१॥ विप्राणां देवानां च प्रसादतः । विप्रा एव देवा इति वा । तत्रैव वने । सिद्धिं मुक्तिम् प्राप ॥३२॥ अङ्ग हे राजन् ! यस्मात् त्रसन्ति बिभ्यति तस्मात् तस्य मांधातुः त्रसद्दस्युरिति नाम विदधे चकार ॥३३॥ तेजसा युक्ताः यद्वा । अच्युतेन अप्रतिहतेन तेजसा पृथ्वीं शशास पालयामास ॥३४॥ आत्मविदपि क्रतुभिः यज्ञैः यज्ञं विष्णुम् ईजे । अतीन्द्रियम् इन्द्रियागोचरम् ॥३५॥ सर्वात्मकताह । द्रव्यं चरुपुरोडाशादि । यजमानः कर्ता । धर्मोऽपूर्वसंज्ञितः । कालो वसन्तादिः । किं वहुना एतत्सर्वं यदात्मकं तमीजे इत्यन्वयः ॥३६॥ प्रतितिष्ठति अस्तं गच्छति । युवनाश्वपुत्रस्य क्षेत्रं शासितस्थानम् ॥३७॥ विन्दुमत्यां पत्न्यां पुत्रत्रयमधात् उत्पादयामास ॥३८॥ तेषामि इत्यर्द्धम् । तेषां पुरुकुत्सादीनाम् ॥३९॥ यमुनेति सार्द्धम् । परमुत्कृष्टं तपः तप्यमानः कुर्वाणः निर्वृतिं मैथुन सुखम् ॥४०॥ कामं यथेच्छम् ॥४१॥ स सौभरिः स्त्रीणामप्रियं मां विचिन्त्य राज्ञा अहं प्रत्युदाहृतः प्रत्याख्यातः । यतोऽयं जरठः वलिभिर्युक्तः पलितः श्वेतकेश एजत्कः कम्पमानशिराश्चेति । एजृ कम्पने धातुः ॥४२॥

साधयिष्ये तथाऽऽत्मानं सुरस्त्रीणामपीप्सितम् । किं पुनर्मनुजेन्द्राणामिति व्यवसितः प्रभुः ॥४३॥
मुनिः प्रवेशितः क्षत्त्रा कन्यान्तःपुरमृद्धिमत् । वृतश्च राजकन्याभिरेकः पञ्चाशता वरः ॥४४॥
तासां कलिरभूत् भूयांस्तदर्थेऽपोह्य सौहृदम् । ममानुरूपो नायं व इति तद्गतचेतसाम् ॥४५॥

स बह्वृचस्ताभिरपारणीयतपःश्रियानर्घ्यपरिच्छदेषु ॥
गृहेषु नानोपवनामलाम्भःसरस्सु सौगन्धिककाननेषु ॥४६॥
महार्हशय्यासनवस्त्रभूषणस्नानानुलेपाभ्यवहारमाल्यकैः ।
स्वलंकृतस्त्रीपुरुषेषु नित्यदा रेमेऽनुगायद्द्विजभृङ्गवन्दिषु ॥४७॥

यद्गार्हस्थ्यं तु संवीक्ष्य सप्तद्वीपवतीपतिः । विस्मितः स्तम्भमजहात् सार्वभौमश्रियान्वितम् ४८
एवं गृहेष्वभिरतो विषयान् विविधैर्मुखैः । सेवमानो न चातुष्यदाज्यस्तोकैरिवानलः ॥४९॥
स कदाचिदुपासीन आत्मापह्नवमात्मनः । ददर्श बह्वृचाचार्यो मीनसङ्गसमुत्थितम् ॥५०॥

अहो इमं पश्यत मे विनाशं तपस्विनः सच्चरितव्रतस्य ।
अन्तर्जले वारिचरप्रसङ्गात् प्रच्यावितं ब्रह्म चिरं धृतं यत् ॥५१॥
सङ्गं त्यजेत मिथुनव्रतिनां मुमुक्षुः सर्वात्मना न विसृजेद् बहिरिन्द्रियाणि ।
एकश्चरन् रहसि चित्तमनन्त ईशे युञ्जीत तद्व्रतिषु साधुषु चेत् प्रसङ्गः ॥५२॥

इति व्यवसितः कृतनिश्चयः तथैव साधितवानिति शेषः ॥४३॥ क्षत्रा प्रतीहारेण[1] । ऋद्धिमत् सर्वसमृद्धियुक्तम् । सर्वाभिः ताभिः स एक एव वरो वृतः वरत्वेन स्वीकृतः ॥४४॥ तदर्थे वरनिमित्तं सौहृदं त्यक्त्वा तासां परस्परं कलिः कलहोऽभूत् । वः युष्माकं नायमनुरूप इति तन्निष्ठचेतसाम् ॥४५॥ स इति युग्मम् । बह्वृचः ऋग्वेदी स सौभरिः गृहेषु नानोपवनेषु निर्मलजलयुक्तसरोवरेषु ताभिः सह रेमे इति द्वयोरन्वयः । कीदृशेषु गृहेषु । अपारणीयं दुष्करं यत् तपः तस्य श्रिया अभिवृद्ध्या अनर्घ्या अमूल्याः परिच्छदा भोगसामग्र्यः येषु । पुनश्च स्वलंकृताः स्त्रीपुरुषाः येषु । पुनश्च अनुगायन्तः द्विजाः पक्षिणः भृङ्गा वन्दिनश्च येषु । सरःसु कीदृशेषु । सौगन्धिकानां[2] कमलानां काननानि येषु । स्वयं कीदृशः महार्हशय्यासनादिभिः परिपूर्णः । अभ्यवहारो भोजनम् । माल्यानि पुष्पाणि ॥ ४६ ॥ ४७ ॥ यत् यस्य सौभरेः अन्वितं परिपूर्णम् गार्हस्थ्यम् संवीक्ष्य । श्रिया स्तम्भं गर्वम् अजहात् तत्याज ॥ ४८ ॥ विविधैः मुखै[3] बहुमुखैः इन्द्रियैः विषयान् सेवमानोऽपि नातुष्यत् । आज्यस्तोकैः घृतबिन्दुभिः यथा अनल ॥ ४९ ॥ उपासीनः उपविष्टः आत्मनः मनसः हेतुभूतात् आत्मा[4]पह्नवं तपोनाशं ददर्श विचारितवान् । बह्वृचाचार्यः ऋग्वेदाचार्यः ॥ ५० ॥ सतामाचरितानि व्रतानि च येन तस्य मे चिरं धृतं यत् ब्रह्म तेजः तपो वा तत् प्रच्यावितं नष्टमभूत् ॥ ५१ ॥ मिथुनव्रतिनां स्त्रीलम्पटानां सङ्गं त्यजेत् । बहिर्विषयेषु इन्द्रियाणि न प्रवर्तयेत् । रहसि एकान्ते विचरन् ईशे चित्तं युञ्जीत स्थिरीकुर्यात् । प्रसङ्गश्चेत् तद्व्रतिषु भगवदुपासकेषु साधुषु कार्यं इति शेष ॥ ५२ ॥ प्रथमम् अम्भसि चरन् अहमेक एव

---

१. 'क्षत्ता शूद्राक्षत्रियजे प्रतीहारे च सारथौ' इति मेदिनी ।
२. सौगन्धकं मानसरोवरस्थं कमलम् । ३. अयमेव पाठः न तु सुखैरिति ।
४. 'ब्रह्मवेदस्तपस्तत्वम्' इत्यभिधानात् ।

एकस्तपस्व्यहमथाम्भसि मत्स्यसङ्गात् पञ्चाशदासमुत पञ्चसहस्रसर्गः ।
नान्तं व्रजाम्युभयकृत्यमनोरथानां मायागुणैर्हृतमतिर्विषयेऽर्थभावः ॥५३॥

एवं वसन् गृहे कालं विरक्तो न्यासमास्थितः । वनं जगामानुययुस्तत्पत्न्यः पतिदेवताः ॥५४॥

तत्र तप्त्वा तपस्तीक्ष्णमात्मकर्शनमात्मवान् । सहैवाग्निभिरात्मानं युयोज परमात्मनि ॥५५॥

ताः स्वपत्युर्महाराज निरीक्ष्याध्यात्मिकीं गतिम् । अन्वीयुस्तत्प्रभावेण अग्निं शान्तमिवार्चिषः ॥५६

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां नवमस्कन्धे सौभर्याख्याने षष्ठोऽध्यायः ॥ ६ ॥

अथ सप्तमोऽध्यायः

श्रीशुक उवाच

मान्धातुः पुत्रप्रवरो योऽम्बरीषः प्रकीर्तितः । पितामहेन प्रवृतो यौवनाश्वश्च तत्सुतः ।
हारीतस्तस्य पुत्रोऽभून्मान्धातृप्रवरा इमे ॥१॥

नर्मदा भ्रातृभिर्दत्ता पुरुकुत्साय योरगैः । तया रसातलं नीतो भुजगेन्द्रप्रयुक्तया ॥२॥

गन्धर्वानवधीत्तत्र वध्यान् वै विष्णुशक्तिधृक् । नागाल्लब्धवरः सर्पादभयं स्मरतामिदम् ॥३॥

त्रसद्दस्युः पौरुकुत्सो योऽनरण्यस्य देहकृत् । हर्यश्वस्तत्सुतस्तस्मादरुणोऽथ निबन्धनः ॥४॥

तपस्वी आसम् पश्चात् भार्याभिः सम्बन्धात् पञ्चाशत् । पुनस्तासु प्रत्येकं पुत्रशतोत्पादनात् पञ्चसहस्रसर्गः इति । अधुनापि ऐहिकाऽऽमुष्मिकवासनानामन्तं न व्रजामि । यतो गुणैः विषयैः हृतमतिः विषये परमार्थबुद्धिरिति ॥ ५३ ॥ एवमिति शुकोक्तिः । एवं वहुकालम् वसन् विरक्तः सन् न्यासं वानप्रस्थधर्ममाश्रितः तपः कर्तुं वनं जगाम तत्पत्न्योऽपि तमनु जग्मुः ॥ ५४ ॥ तत्र वनेऽपि आत्मवान् धैर्यवान् सन् तीक्ष्णं तपः तप्त्वा कृत्वा अग्निभिः सह अनिलाग्निधारणा[1] द्वारा देहं त्यक्त्वा आत्मानं जीवं परमात्मनि युयोज लीनीकृतवान् ॥ ५५ ॥ आध्यात्मिकीं लयात्मिकाम् । ताःस्त्रियोपि तत्सेवाप्रभावेण तमनुजग्मुः मुक्तिमवापुः ॥५६॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे गूढार्थदीपिन्यां षष्ठोऽध्यायः ॥ ६ ॥

सप्तमे वर्ण्यते वंशो मान्धातुर्यत्र सत्कथाः ।
त्रिशङ्कोः पुरुकुत्सस्य हरिश्चन्द्रस्य चाद्भुता ॥ १ ॥

मान्धातुः पुत्राणां पुरुकुत्सादीनां मध्ये प्रवरः स च पितामहेन युवनाश्वेन प्रवृत्तः पुत्रत्वेन स्वीकृतः । तत्सुतोऽम्बरीषसुतः । तस्य यौवनाश्वस्य हारीतः । प्रवराः श्रेष्ठपुत्रत्वेन तद्गोत्रप्रवर्तकाः जाताःअम्बरीषयौवनाश्वहारीता इति ॥१॥ मान्धातु पुत्रस्य पुरुकुत्सस्य वंशं वक्ष्यन् तस्य विवाहमाह-नर्मदेति । भ्रातृभिः उरगैः या कन्या दत्ता तया स पुरुकुत्सः रसातलं नीत इत्यन्वयः । भुजगेन्द्रो वासुकिः तेन प्रेरितया ॥२॥ तत्र रसातले स पुरुकुत्सः वध्यान् वधार्हान् गन्धर्वान् अवधीत् नागशत्रुत्वेन । स च पुरुकुत्सः नागात् लब्धवरोऽभूत् । वरमाह इदमाख्यानं स्मरतां पुंसां सर्पादभयं स्यादिति ॥३॥ यः त्रसद्दस्युः । देहकृत् पिता । त्रसद्दस्युपुत्रः अनरण्योऽभूदित्यर्थः । तत्सुतोऽनरण्यसुतः । तस्मात् हर्यश्वात् । अथ अरुणात् ॥४॥ तस्य निवन्धनस्य पुत्रः सत्यव्रतः स एव

---

१. 'दधार गात्रेष्वनिलाग्निधारणाम्' इत्युक्तेः ।

तस्य सत्यव्रतः पुत्रस्त्रिशंकुरिति विश्रुतः । प्राप्तश्चाण्डालतां शापाद् गुरोःकौशिकतेजसा ॥५॥

श्रीशुक उवाच

सशरीरो गतः स्वर्गमद्यापि दिवि दृश्यते । पातितोऽवाक्शिरा देवैस्तेनैव स्तम्भितो बलात् ॥६॥
त्रैशङ्कवो हरिश्चन्द्रो विश्वामित्रवसिष्ठयोः । यन्निमित्तमभूद् युद्धं पक्षिणोर्बहुवार्षिकम् ॥७॥
सोऽनपत्यो विषण्णात्मा नारदस्योपदेशतः । वरुणं शरणं यातः पुत्रो मे जायतां प्रभो ॥८॥
यदि वीरो महाराज तेनैव त्वां यजे इति । तथेति वरुणेनास्य पुत्रो जातस्तु रोहितः ॥९॥
जातः सुतो ह्यनेनाङ्ग मां यजस्वेति सोऽब्रवीत् । यदा पशुर्निर्दशः स्यादथ मेध्यो भवेदिति ॥१०॥
निर्दशे च स आगत्य यजस्वेत्याह सोऽब्रवीत् । दन्ताः पशोर्यज्जायेरन्नथ मेध्यो भवेदिति ॥११॥
जाता दन्ता यजस्वेति स प्रत्याहाथ सोऽब्रवीत् । यदा पतन्त्यस्य दन्ता अथ मेध्यो भवेदिति॥१२॥
पशोर्निपतिता दन्ता यजस्वेत्याह सोऽब्रवीत् । यदा पशोः पुनर्दन्ता जायन्तेऽथपशुः शुचिः ॥१३॥
पुनर्जाता यजस्वेति स प्रत्याहाथ सोऽब्रवीत् । सांन्नाहिको यदा राजन् राजन्योऽथ पशुःशुचिः॥१४॥
इति पुत्रानुरागेण स्नेहयन्त्रितचेतसा । कालं वञ्चयता तं तमुक्तो देवस्तमैक्षत ॥१५॥
रोहितस्तदभिज्ञाय पितुः कर्म चिकीर्षितम् । प्राणप्रेप्सुर्धनुष्पाणिररण्यं प्रत्यपद्यत॥१६॥
पितरं वरुणग्रस्तं श्रुत्वा जातमहोदरम् । रोहितो ग्राममेयाय तमिन्द्रः प्रत्यषेधत॥१७॥
भूमेः पर्यटनं पुण्यं तीर्थक्षेत्रनिषेवणैः । रोहितायादिशच्छक्रः सोऽप्यरण्येऽवसत् समाम्॥१८॥
एवं द्वितीये तृतीये चतुर्थे पञ्चमे तथा । अभ्येत्याभ्येत्य स्थविरो विप्रो भूत्वाऽऽह वृत्रहा ॥१९॥

दोषत्रयग्रस्तत्वात् त्रिशंकुरिति[1] । त्रयः शंकवः कीला[2] इव दुःखहेतवो दोषा यस्यासौ । विप्रकन्यापहरणात् पितुः शापाच्च । किन्तु विश्वामित्रस्य तेजसा प्रभावेण स्वर्गं गतः इत्युत्तरेणान्वेति ॥ ५ ॥ अवाक्शिरा अधः शिराः सन् तेनैव कौशिकेन स्तम्भितः निरुध्य स्थापितः । दृश्यते नक्षत्ररूपेण ॥ ६ ॥ त्रिशंकुपुत्रो हरिश्चन्द्रः । यन्निमित्तं हरिश्चन्द्रनिमित्तम् पक्षिणोः आडी बकयोः । आडी बलाका । युद्धं च परस्परशापात् हरिश्चन्द्रस्य सर्वस्वहरणात् कुपितेन वसिष्ठेनोक्तंत्व माडी भव तनोक्तं त्वं बको भवेति ॥७॥ स हरिश्चन्द्रः विषण्णात्मा खिन्नचित्तः सन् ॥ ८ ॥ वीरपुत्रो जायेत चेत्तर्हि तेनैव त्वां यजे इति । तथाऽस्तु इति वदता तेन निमित्तेन ॥ ९ ॥ अङ्ग हे राजन् । अनेन पुत्रेण । स राजा । निर्दशः निर्गतदशदिनः स्यात् तदा मेध्यः पवित्रः यागार्हः ॥ १० ॥ स वरुणः । स हरिश्चन्द्रः ॥ ११ ॥ १२ ॥ शुचिः यागार्हः ॥ १३ ॥ सान्निहिकः कवचधारणयोग्यः ॥ १४ ॥ यन्त्रितं बद्धम् । तं तं निर्दशादिरूपं कालं वञ्चयता यापयता । तं कालम् ऐक्षत प्रतीक्षितवान् ॥ १५ ॥ तत् निजबलिदानरूपम् । प्राणप्रेप्सुः प्राणान् प्राप्तुमिच्छुः ॥ १६ ॥ महोदरं जलोदरम् प्राप्त आगन्तुमुद्यतः । आङ्पूर्वकादिण्धातोर्लिट् । तं रोहितम् ॥ १७ ॥ तेनैव पुण्येन रोगं निवर्तय ग्रामं मा गा इत्युपादिशत् । समामेकवर्षम् ॥ १८ ॥ स्थविरो वृद्धो भूत्वा पूर्ववदाह । वृत्रहा इन्द्रः ॥ १९ ॥ तत्र वने चरित्वा व्यतीयउपव्रजन् आगच्छन् । अजीगर्तात् भार्गववंशजात् ऋषेः गोशतं दत्त्वा

---

१. पितुश्चापरितोषेण गुरोर्दोग्ध्रीवधेन च । अप्रोक्षितोपयोगाच्च त्रिविधस्ते व्यतिक्रमः । अक्षितमांसदानात् ॥१॥
२. शंकुः संख्याभिदि कीले । ३. 'वीरः पुत्रे रसे शूरे' इति निरुक्तिः ।

षष्ठं संवत्सरं तत्र चरित्वा रोहितः पुरीम् । उपव्रजन्नजीगर्तादक्रीणान्मध्यमं सुतम् ॥२०॥
शुनःशेपं पशुं पित्रे प्रदाय समवन्दत । ततः पुरुषमेधेन हरिश्चन्द्रो महायशाः
मुक्तोदरोऽयजद् देवान् वरुणादीन् महत्कथः ॥२१॥
विश्वामित्रोऽभवत् तस्मिन् होता चाध्वर्युरात्मवान् । जमदग्निरभूद्ब्रह्मा वसिष्ठोऽयास्यसामगः॥
तस्मै तुष्टो ददाविन्द्रः शातकौम्भमयं रथं । शुनःशेपस्य माहात्म्यमुपरिष्टात्प्रचक्ष्यते ॥२३॥
सत्यसारां धृतिं दृष्ट्वा सभार्यस्य च भूपतेः । विश्वामित्रो भृशं प्रीतो ददावविहतां गतिम् ॥२४
मनः पृथिव्यां तामद्भिस्तेजसापोऽनिलेन तत् । खे वायुं धारयंस्तच्च भूतादौ तं महात्मनि ।
तस्मिञ्ज्ञानकलां ध्यात्वा तयाज्ञानं विनिर्दहन् ॥२५॥
हित्वा तां स्वेन भावेन निर्वाणसुखसंविदा ॥
अनिर्देश्याऽप्रतर्क्येण तस्थौ विध्वस्तबन्धनः ॥२६॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां नवमस्कन्धे हरिश्चन्द्रोपाख्यानं नाम सप्तमोऽध्यायः ॥७॥

अष्टमोऽध्यायः

श्रीशुक उवाच

हरितो रोहितसुतश्चम्पस्तस्माद्विनिर्मिता । चम्पापुरी सुदेवोऽतो विजयो यस्य चात्मजः ॥ १॥
भरुकस्तत्सुतस्तस्माद् वृकस्तस्यापि बाहुकः । सोऽरिभिर्हृतभू राजा सभार्यो वनमाविशत् ॥२॥

सुतं क्रीतवान् ॥ २० ॥ शुन इति सार्द्धम् । क्वचित्फान्तं नाम । मुक्तोदरः जलोदररहितः । महत्सु कथा गुणगानं यस्य ॥२१॥ जमदग्निः अध्वर्युः आत्मवान् तत्त्वज्ञः । अयास्याख्यो मुनिः साम गायतीति सामगः सामगानकर्ता उद्गाता अभूत् । केचित् अयास्येत्यत्र अगस्त्यं पठन्ति ॥२२॥ तस्मै हरिश्चन्द्राय शातकौम्भमयं स्वर्णनिर्मितम् । माहात्म्यम् परिष्टात् षोडशाध्याये ॥२३॥ सत्यप्रतिज्ञत्वमेव सारो बलं यस्यास्तां धृतिं धैर्यपराकाष्ठाम् । अविहताम् अखण्डितां गतिमात्मविषयाम् ॥ २४ ॥ मन इति सार्द्धयुग्मम् । 'अन्नमयं हि सौम्य मनः' इति श्रुतेः मनः पृथिव्यां धारयन् एकीकुर्वन् तां पृथिवीमद्भिरेकीकुर्वन् अपस्तेजसा तत्तेजोऽनिलेन तं वायुं खे आकाशे तच्च भूतादौ अहङ्कारे तं च भूतादिं, महत्तत्त्वे तस्मिन् महत्तत्त्वे चित्तात्मके ज्ञानकलां ध्यात्वा तया आत्मावरकमज्ञानं विनिर्दहन् तां वृत्तिं च हित्वा । मुक्तबन्धनः देहाध्यासरहितः सन् स्वेन भावेन स्वस्वरूपेण तस्थौ जीवन्मुक्तोऽभूत् । कीदृशेन । निर्वाणसुखस्य मोक्षानन्दस्य संवित् अनुभूतिः यस्मिन् तेन । पुनश्चानिर्देशानर्हेण तर्कागोचरेण च ॥ २६ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे गूढार्थदीपिन्यां सप्तमोऽध्यायः ॥ ७ ॥

रोहितस्याष्टमे वंशे सगरो यस्य चात्मजाः ।
अश्वस्यान्वेषणे दग्धा अंशुमानश्वमानयत् ॥ १ ॥

तस्मात् हरितात् । येन चम्पेन । अतः चम्पात् सुदेवः यस्य सुदेवस्य ॥ १ ॥ तत्सुतः विजयसुतः । तस्मात् भरुकात् । तस्यापि वृकस्यापि । स बाहुकः हृतभूः हृतराज्यः ॥ २ ॥ पञ्चतां मरणं प्राप्तं तं बाहुकमनु

वृद्धं तं पञ्चतां प्राप्तं महिष्यनुमरिष्यती । और्वेण जानताऽऽत्मानं प्रजावन्तं निवारिता ॥३॥
आज्ञायास्यै सपत्नीभिर्गरो दत्तोऽन्धसा सह । सह तेनैव संजातः सगराख्यो महायशाः ॥४॥
सगरश्चक्रवर्त्यासीत् सागरो यत्सुतैः कृतः ॥५॥
यस्तालजंघान् यवनाच्छकान् हैहयबर्बरान् । नावधीद् गुरुवाक्येन चक्रे विकृतवेषिणः ।
मुण्डाञ्छ्मश्रुधरान् कांश्चिन्मुक्तकेशार्धमुण्डितान् अनन्तर्वाससः कांश्चिदबहिर्वाससोऽपरान् ।६॥
सोऽश्वमेधैरयजत सर्ववेदसुरात्मकम् । और्वोपदिष्टयोगेन हरिमात्मानमीश्वरम् ॥७॥
तस्योत्सृष्टं पशुं यज्ञे जहाराश्वं पुरंदरः ॥८॥
सुमत्यास्तनया दृप्ताः पितुरादेशकारिणः । हयमन्वेषमाणास्ते समन्तान्न्यखनन्महीम् ॥९॥
प्रागुदीच्यां दिशि हयं ददृशुः कपिलान्तिके ॥१०॥
एष वाजिहरश्चौर आस्ते मीलितलोचनः ।
हन्यतां हन्यतां पाप इति षष्टिसहस्रिणः । उदायुधा अभिययुरुन्मिमेष तदा मुनिः ॥११॥
स्वशरीराग्निना तावन्महेन्द्रहृतचेतसः । महद्व्यतिक्रमहता भस्मसादभवन् क्षणात् ॥१२॥
न साधुवादो मुनिकोपभर्जिता नृपेन्द्रपुत्रा इति सत्त्वधामनि ।
कथं तमो रोषमयं विभाव्यते जगत्पवित्रात्मनि खे रजो भुवः ॥१३॥
यस्येरिता सांख्यमयी दृढेह नौर्यया मुमुक्षुस्तरते दुरत्ययम् ।
भवार्णवं मृत्युपथं विपश्चितः परात्मभूतस्य कथं पृथङ्मतिः ॥१४॥

मरिष्यती मरणं कर्तुमिच्छन्ती और्वेण ऋषिणा सा निवारिता । कथंभूतेन । आत्मानं तद्देहं प्रजावन्तं पुत्रवन्तं जानता ॥ ३ ॥ अस्यै बाहुकपत्न्यै । अन्धसा अन्नेन सह गरो विषं दत्तः । तेन गरेण तहैव संजातः अतः सगरः इति ॥ ४ ॥ सगर इत्यर्द्धम् । यस्य स्यादाज्ञया पृथ्वी चक्रवर्ती स ईर्यते । य इति युग्मम् । तालजंघादयो म्लेच्छभेदाः । अनन्तर्वाससः मुक्तकच्छान् । अबहिर्वासः द्विकच्छकान् । यद्वा । न विद्यतेऽन्तरीयं वस्त्रं येषाम् । न विद्यते बहिः परिधानीयं येषां तान् तथाभूतान् चक्रे ॥ ५ ॥ ६ ॥ स च सगरः सर्वे देवाः सुराश्च आत्मा स्वरूपं यस्य तं हरिमभजत । उपदिष्टयोगेन अनुष्टानप्रकारेण ॥ ७ ॥ तस्येति अर्द्धम् । उत्सष्टं मुक्तम् ॥ ८ ॥ सगरस्य द्वे भार्ये सुमतिः केशिनी च । दृप्ताः बलगर्विताः ॥ ९ ॥ प्रागिति अर्द्धम् । प्रागुदीचीम् ऐशान्याम् ॥ १० ॥ एष इति सार्द्धम् । पापः पापात्मा । अर्शआद्यजन्तः । उदायुधा उद्यतशस्त्राः सन्तः अभिययुः हन्तुं जग्मुः । उन्मिमेष नेत्रोन्मीलनं चकार ॥ ११ ॥ महेन्द्रेण हृतं चेतो विवेकशक्तिः येषां ते महतः कपिलस्य व्यतिक्रमोऽपराधः स च चौरोऽयं हन्यतामित्युक्तलक्षणः ॥ १२ ॥ सगरपुत्राः मुनिकोपदग्धा इति न सतां वादः अपि तु स्वापराधादेव । यतो हि सत्त्वधामनि शुद्धसत्त्वमूर्तौ श्रीकपिले रोषात्मकं तमः अज्ञानं कथं संभाव्यते यथा भुवो रजः खे आकाशे न संभाव्यते । कथंभूते । जगत्पवित्रत्वकरः अज्ञाननिवृत्तिकरः आत्मा स्वभावो यस्य तस्मिन् । यद्वा । जगदपि पवित्रं यतो दर्शनादिना तथाभूतः

विशिखो द्विशिखश्चैव मुक्तकच्छो द्विकच्छकः ।
तावद्भवति चाण्डालो यावद् गंगां मज्जति ॥

योऽसमञ्जस इत्युक्तः स केशिन्या नृपात्मजः । तस्य पुत्रोंऽशुमान् नाम पितामहहिते रतः ॥१५॥
असमञ्जस आत्मानं दर्शयन्नसमञ्जसम् । जातिस्मरः पुरा सङ्गाद्योगी योगाद् विचालितः ॥१६॥
आचरन् गर्हितं लोके ज्ञातीनां कर्म विप्रियम् । सरय्वां क्रीडतो बालान् प्रास्यदुद्वेजयञ्जनम् ॥१७॥
एवंवृत्तः परित्यक्तः पित्रा स्नेहमपोह्य वै । योगैश्वर्येण बालांस्तान् दर्शयित्वा ततो ययौ ॥१८॥
अयोध्यावासिनः सर्वे बालकान् पुनरागतान् । दृष्ट्वा विसिस्मिरे राजन् राजा चाप्यन्वतप्यत १९
अंशुमांश्चोदितो राज्ञा तुरङ्गान्वेषणे ययौ । पितृव्यखातानुपथं भस्मान्ति ददृशे हयम् ॥२०॥
तत्रासीनं मुनिं वीक्ष्य कपिलाख्यमधोक्षजम् । अस्तौत् समाहितमनाः प्राञ्जलिः प्रणतो महान् २१

अंशुमानुवाच

न पश्यति त्वां परमात्मनोऽजनो न बुध्यतेऽद्यापि समाधियुक्तिभिः ।
कुतोऽपरे तस्य मनःशरीरधीविसर्गसृष्टा वयमप्रकाशाः ॥२२॥
ये देहभाजस्त्रिगुणप्रधाना गुणान् विपश्यन्त्युत वा तमश्च ।
यन्मायया मोहितचेतसस्ते विदुः स्वसंस्थं न बहिःप्रकाशाः ॥२३॥
तं त्वामहं ज्ञानघनं स्वभावप्रध्वस्तमायागुणभेदमोहैः ।
सनन्दनाद्यैर्मुनिभिर्विभाव्यं कथं हि मूढः परिभावयामि ॥२४॥

आत्मा देहो यस्य तस्मिन् ॥१३॥ यस्य येन कपिलेन ज्ञानमयी नौः प्रवर्तिता यया मुमुक्षुः भवार्णवं तरति तस्य विपश्चितः सर्वज्ञस्य पृथङ्मतिः भेदबुद्धिः शत्रुमित्रादिरूपा कथं घटेत । परात्मभूतस्य नारायणावतारस्य ॥१४॥ योऽसमञ्जसः न समञ्जसो योग्यो यस्मात् स सगरात्मजः केशिन्या जातः । हिते कार्ये रतः तत्परोऽभूत् ॥१५॥ असमञ्जसोऽयं पुरा पूर्वजन्मनि योगी दुःसंगात् हेतोः योगात् विचालितः भ्रष्टः इदानीं जातिस्मरः पूर्वजन्मस्मृतिमान् सन् क्रीडतो बालान् सरय्वां प्रास्यत् प्राक्षिपदित्यन्वयः । किं कुर्वन् । आत्मानम् असमञ्जसं प्रतिकूलं दर्शयन् दर्शयितु गर्हितं निन्दितमत एव ज्ञातीनामप्रियं कर्म कुर्वन् जनं च उद्वेजयन् भीषयन् ॥१६॥१७॥ एवंवृत्तः एवंचरित्रः अपोह्य त्यक्त्वा तान् प्रक्षिप्तान् बालान् प्रदर्श्य ततः अयोध्यातः निर्ययौ ॥१८॥ विसिस्मिरे आश्चर्यं प्राप्ता ॥१९॥ पितृव्यखातं गर्तमनु यः पंथा तमाश्रित्य ययौ । ततश्च भस्मसमीपे हयं ददर्श ॥ २० ॥ तत्र भस्मसमीपे । प्रणतः कृतप्रणामः सन् । महान् महतामादरकर्त्ता ॥२१॥ अजनो ब्रह्मा आत्मनः स्वस्मात् परं पूर्ववर्तिनं स्वजनकं त्वामद्यापि न पश्यति न च बुध्यते । कैः समाधियुक्तिभिः । दीर्घकालतः समाधिभिः अपरोक्षतया । युक्तिभिः तर्कैः परोक्षतया । ततोऽपरे अर्वाचीनास्तु कथं त्वां पश्येयुः । अतः मनआदिभिः ये विसर्गा देवादिसर्गाः तेष्वपि सृष्टाः अप्रकाशा अज्ञाः वयम् कुतो बुद्ध्यामहे ॥ २२ ॥ ये देहभाजः ते स्वस्थं स्वस्मिन् स्थितमपि त्वां न विदुः किन्तु गुणानेव विषयानेव पश्यन्ति जाग्रत्स्वप्नयोः उत अपि सुषुप्तौ तमोऽज्ञानमेव । यतः त्रिगुणप्रधाना गुणत्रयाधीनाः बहिप्रकाशाः बाह्यज्ञानाः । कुतः । मायया मोहितेति योज्यम् ॥ २३ ॥ तं त्वां ज्ञानघनं मूढोऽहं कथं परिभावयामि चिन्तयामि । कथंभूतम् । मुनिभिरेव केवलं विभाव्यम् आराध्यम् । हे कथंभूतैः । स्वभावत एव न तु साधनैः प्रध्वस्तौ निवारितौ मायागुणनियित्तौ भेदमोहौ येषां तैः ॥ २४ ॥

---

१. 'आत्मा देहें धृतौ जीवे स्वभावेशमतिष्वपि इति यादवः ।

प्रशान्तमायागुणकर्मलिङ्गमनामरूपं सदसद्विमुक्तम् ।
ज्ञानोपदेशाय गृहीतदेहं नमाम हे त्वां पुरुषं पुराणम् ॥२५॥
त्वन्मायारचिते लोके वस्तुबुद्ध्या गृहादिषु । भ्रमन्ति कामलोभेर्ष्यामोहविभ्रान्तचेतसः ॥२६॥
अद्य नः सर्वभूतात्मन् कामकर्मेन्द्रियाशयः । मोहपाशो दृढश्छिन्नो भगवंस्तव दर्शनात् ॥२७॥

श्रीशुक उवाच

इत्थंगीतानुभावस्तं भगवान् कपिलो मुनिः । अंशुमन्तमुवाचेदमनुगृह्य धिया नृप ॥२८॥

श्रीभगवानुवाच

अश्वोऽयं नीयतां वत्स पितामहपशुस्तव । इमे च पितरो दग्धा गङ्गाम्भोऽर्हन्ति नेतरत्[1]॥२९॥
तं परिक्रम्य शिरसा प्रसाद्य हयमानयत् । सगरस्तेन पशुना क्रतुशेषं समापयत् ॥३०॥
राज्यमंशुमति न्यस्य निस्पृहो मुक्तबन्धनः । और्वोपदिष्टमार्गेण लेभे गतिमनुत्तमाम् ॥३१॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां नवमस्कन्धे सगरोपाख्यानेऽष्टमोऽध्यायः ॥८॥

अथ नवमोऽध्यायः

श्रीशुक उवाच

अंशुमांश्च तपस्तेपे गङ्गानयनकाम्यया । कालं महान्तं नाशक्नोत् ततः कालेन संस्थितः ॥१॥
दिलीपस्तत्सुतस्तद्वदशक्तः कालमेयिवान् । भगीरथस्तस्य पुत्रस्तेपे स सुमहत् तपः ॥२॥

हे प्रशान्तमूर्ते तस्मात् त्वां पुराणं पुरुषं नमामेत्यन्वयः अत्र हेतुः । मायागुणाः कर्माणि सृष्ट्यादीनि लिङ्गानि मूर्तयश्च यस्य । यद्वा । हे प्रशान्तमाय ! हे अगुण ! कर्मभिः लिङ्गानि नानामूर्तयो यस्य गुणैः कर्मभिर्वा । यद्वा । प्रशान्ताः स्वप्रभावं कर्तुमशक्ता माया तद्गुणाः कर्मलिङ्गाः सुरासुरादयश्च यस्मिन् तम् । अनामेति प्राकृतनामरूपरहितम् । सदसद्भ्यां कार्यकारणाभ्याम् पुण्यपापाभ्यां वा ॥ २५ ॥ सर्वे इमे गृहादिषु वस्तुबुद्ध्या लोके भ्रमन्ति आसक्ता भवन्ति । कथंभूताः । कामादिभिः विभ्रान्तं चेतो येषां ते । ईर्ष्या अक्षमा ॥ २६ ॥ कामः विषयासक्तिः तदादीनामाशयः मूलभूतः पाशः छिन्नः । नोऽस्माकम् ॥ २७ ॥ गीतः संस्तुतः अनुभावः प्रभावो यस्य सः ॥ २८ ॥ पितामहः सगरः । पितरः पितृव्याः अर्हन्ति अपेक्षन्ते नेतरत्[1] इतरत् तरणसाधनं नास्तीत्यर्थः ॥ २९ ॥ तं श्रीकपिलम् । हयमश्वम् । तेन अंशुमता आनीतेन पशुना अश्वेन ॥ ३० ॥ और्वः ऋषिः । अनुत्तमां सर्वोत्तमां मुक्तिम् ॥ ३१ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे गूढार्थदीपिन्यामष्टमोऽध्यायः ॥८॥

नवमे चांशुमद्वंशः खट्वाङ्गान्तो निरूप्यते ।
सौदासो राक्षसः शापाद् भूमौ गङ्गाशुभागमः ॥ १ ॥

न अशक्नोत् गङ्गामानेतुमिति शेषः । संस्थितः मृतः ॥ १ ॥ तस्य दिलीपस्य । तेपे कृतवान् ॥ २ ॥

---

१. अपमृत्युमृतानां च गङ्गायामुदकक्रिया ।

दर्शयामास तं देवी प्रसन्ना वरदास्मि ते । इत्युक्तः स्वमभिप्रायं शशंसावनतो नृपः ॥३॥
को नु धारयिता वेगं पतन्त्या मे महीतले । अन्यथा भूतलं भित्त्वा नृप यास्ये रसातलम् ॥४॥
किं चाहं न भुवं यास्ये नरा मय्यामृजन्त्यघम् । मृजामि तदघं कुत्र राजंस्तत्र विचिन्त्यताम् ॥५॥

भगीरथ उवाच

साधवो न्यासिनः शान्ता ब्रह्मिष्ठा लोकपावनाः । हरन्त्यघं तेऽङ्गसङ्गात् तेष्वास्ते ह्यघभिद्धरिः६
धारयिष्यति ते वेगं रुद्रस्त्वात्मा शरीरिणाम् । यस्मिन्नोतमिदं प्रोतं विश्वं शाटीव तन्तुषु ॥७॥
इत्युक्त्वा स नृपो देवं तपसाऽतोषयच्छिवम् । कालेनाल्पीयसा राजंस्तस्येशः समतुष्यत ॥८॥
तथेति राज्ञाभिहितं सर्वलोकहितः शिवः । दधारावहितो गङ्गां पादपूतजलां हरेः ॥९॥
भगीरथः स राजर्षिर्निन्ये भुवनपावनीम् । यत्र स्वपितॄणां देहा भस्मीभूताः स्म शेरते ॥१०॥
रथेन वायुवेगेन प्रयान्तमनुधावती । देशान् पुनन्ती निर्दग्धानासिञ्चत् सगरात्मजान् ॥११॥
यज्जलस्पर्शमात्रेण ब्रह्मदण्डहता अपि । सगरात्मजा दिवं जग्मुः केवलं देहभस्मभिः ॥१२॥
भस्मीभूताङ्गसङ्गेन स्वर्याताः सगरात्मजाः । किं पुनः श्रद्धया देवीं ये सेवन्ते धृतव्रताः ॥१३॥
न ह्येतत् परमाश्चर्यं स्वर्धुन्या यदिहोदितम् । अनन्तचरणाम्भोजप्रसूताया भवच्छिदः ॥१४॥
संनिवेश्य मनो यस्मिञ्छ्रद्धया मुनयोऽमलाः । त्रैगुण्यं दुस्त्यजं हित्वा सद्यो यातास्तदात्मताम्१५
श्रुतो भगीरथाज्जज्ञे तस्य नाभोऽपरोऽभवत् । सिन्धुद्वीपस्ततस्तस्मादयुतायुस्ततोऽभवत् ॥१६॥
ऋतुपर्णो नलसखो योऽश्वविद्यामयान्नलात् । दत्त्वाक्षहृदयं चास्मै सर्वकामस्तु तत्सुतः १७॥

स्वम् अभिप्रायं पूर्वजोद्धरणं शशंस कथयामास ॥ ३ ॥ नु अहो को धारयिता धारयिष्यति । यद्वा । कः ब्रह्मापि न । अघम् आमृजन्ति क्षालयिष्यन्ति । मृजामि प्रक्षेप्स्यामि । तत्र उपायः ॥ ५ ॥ हरन्ति हरिष्यन्ति । लृडर्थे लट् ॥ ६ ॥ शरीरिणां शरीरवतां सर्वेषामात्मा आधारः ; यथा तन्तुषु शाटी[1] पटः तथा यस्मिन् श्रीरुद्रे इदं विश्वम् ओतप्रोतं ग्रथितमित्यर्थः । ओतमूर्ध्वतन्तुपु प्रोतं तिर्यक्तन्तुषु इति विवेकः ॥ ७ ॥ नृपो भगीरथः ॥ ८ ॥ राज्ञा अभिहितं तथास्तु इत्यङ्गीकृत्य गङ्गां शिरसि दधारेत्यन्वयः । अतीव दुर्लभमिदं पादाम्भः इतस्ततो मा गच्छेदिति अवहितः सावधानः सन् ॥ ९ ॥ यत्र देहाः शेरते पतितास्तत्र गगां निन्ये इत्यन्वयः । स्मेत्याश्चर्ये ॥ १० ॥ प्रयान्तं भगीरथमनुधावती पृष्ठतः आयान्ती सा गङ्गा निर्दग्धान् तानासिञ्चत् ॥ ११ ॥ ब्रह्मदण्डः मुन्यवज्ञारूपः ॥१२॥ ये श्रद्धया गङ्गां सेवन्तेते स्वर्गं यान्तीति किं पुनर्वक्तव्यमित्यर्थः ॥१३॥ स्वर्धुन्या गङ्गायाः यत् माहात्म्यम् उदितं कथितं तदाश्चर्यं नास्ति यतो अनन्तेति योज्यम् । भवच्छिदः संसारनिवर्तिकायाः ॥१४॥ यस्मिन् अनन्ते । त्रैगुण्यं त्रिगुणजन्यं देहसम्बन्धम् । दुस्त्यजं ज्ञानं विना त्यक्तुमशक्यम् । तदात्मताम्, अनन्तस्वरूपतां मुक्तिमित्यर्थः ॥ १५ ॥ तस्य श्रुतस्य नाभः अपरः मानवसुतादन्यः । ततो नाभात् । तस्मात् सिन्धुद्वीपात् । ततः अयुतायोः ऋतुपर्ण इत्यग्रिमेणान्वेति ॥ १६ ॥ यः ऋतुपर्णः अस्मै नलाय अक्षहृदयं द्यूतविद्यां दत्त्वा तस्मात् अश्वविद्यामयात् प्राप्तवान् । या प्रापणे लङ् । तत्सुतः ऋतुपर्णसुतः ॥ १७ ॥ ततः

---

२. पटे शाटी इति निरुक्तिः

ततः सुदासस्तत्पुत्रो मदयन्तीपतिर्नृप । आहुर्मित्रसहं यं वै कल्माषाङ्घ्रिमुत क्वचित् ।
वसिष्ठशापाद् रक्षोऽभूदनपत्यः स्वकर्मणा ॥१८॥

राजोवाच

किंनिमित्तो गुरोः शापः सौदासस्य महात्मनः । एतद् वेदितुमिच्छामः कथ्यतां न रहो यदि ॥१९॥

श्रीशुक उवाच

सौदासो मृगयां किंचिच्चरन् रक्षो जघान ह । मुमोच भ्रातरं सोऽथ गतः प्रतिचिकीर्षया ॥२०॥
स चिन्तयन्नघं राज्ञः सूदरूपधरो गृहे । गुरवे भोक्तुकामाय पक्त्वा निन्ये नरामिषम् ॥२१॥
परिवेक्ष्यमाणं भगवान् विलोक्याऽभक्ष्यमञ्जसा । राजानमशपत् क्रुद्धो रक्षो ह्येवं भविष्यसि २२
रक्षःकृतं तद्विदित्वा चक्रे द्वादशवार्षिकम् । सोऽप्यपोऽञ्जलिनाऽऽदाय गुरुं शप्तुं समुद्यतः ॥२३॥
वारितो मदयन्त्यापो रुषतीः पादयोर्जहौ । दिशः खमवनीं सर्वं पश्यञ्जीवमयं नृपः ॥२४॥
राक्षसं भावमापन्नः पादे कल्माषतां गतः । व्यवायकाले ददृशे वनौकोदम्पती द्विजौ ॥२५॥
क्षुधार्तो जगृहे विप्रं तत्पत्न्याहाकृतार्थवत् । न भवान् राक्षसः साक्षादिक्ष्वाकूणां महारथः ॥२६॥
मदयन्त्याः पतिर्वीर नाधर्मं कर्तुमर्हसि । देहि मेऽपत्यकामाया अकृतार्थं पतिं द्विजम् ॥२७॥
देहोऽयं मानुषो राजन् पुरुषस्याखिलार्थदः । तस्मादस्य वधो वीर सर्वार्थवध उच्यते ॥२८॥
एष हि ब्राह्मणो विद्वांस्तपःशीलगुणान्वितः । आरिराधयिषुर्ब्रह्म महापुरुषसंज्ञितम् ।
सर्वभूतात्मभावेन भूतेष्वन्तर्हितं गुणैः ॥ २९ ॥
सोऽयं ब्रह्मर्षिवर्यस्ते राजर्षिप्रवराद् विभो । कथमर्हति धर्मज्ञ वधं पितुरिवात्मजः ॥३०॥
तस्य साधोरपापस्य भ्रूणस्य ब्रह्मवादिनः । कथं वधं यथा बभ्रोर्मन्यते सन्मतो भवान् ॥३१॥

इति सार्द्धम् । ततः सर्वकामात् । तत्पुत्रः सुदासपुत्रः सौदासः उत अपि यं वै यं च । रक्षः राक्षसः । अनपत्यः औरसपुत्ररहितः । कर्मणा कर्मजनितशापेन ॥१८॥ यदि न रहो गोप्यं न चेत्तर्हि कथ्यताम् ॥१९॥ मृगयां चरन् कुर्वन् किञ्चित् किमपि । स भ्राता अथ अनन्तरं प्रतिचिकीर्षया प्रतीकारेच्छया तद्ग्रहं गतः । हेति कोपे ॥२०॥ अघम् अनिष्टम् । सूदः पाचकः । निन्ये पक्त्वा इति पाठक्रमः कुत्रचित् ॥ २१ ॥ परिवेक्ष्यमाणं पात्रे निक्षिप्यमाणम् । भगवान् भगवत्तत्त्वज्ञः वसिष्ठः । अञ्जसा झटिति ॥ २२ ॥ पाचकरूपधारिणा रक्षसा एतत् कृतमिति ज्ञात्वा द्वादशवार्षिकं चक्रे । सोऽसि सौदासोऽपि ॥ २३ ॥ मदयन्त्या तत्पत्न्या । रुषतीः हिंसयन्तीः । 'रुष रिष' हिंसायां धातुः । पादयोरित्यत्र हेतुः । सर्वं विश्वं जीवमयं पश्यन् इति ॥ २४ ॥ कल्माषतां विकृतवर्णताम् । मित्रस्य कलत्रस्यवचः सहनात् क्रमेण नामद्वयं जातम् । स च कदाचित् वनमोको निवासस्थानं ययोस्तौ च तौ दम्पती स्त्रीपुरुषौ ददृशे ॥ २४ ॥ क्षुधेति अर्द्धम् । अकृतार्थवत् दीनवत् ॥ २६ ॥ अधर्मं पापम् । अकृतार्थम् अकृतगर्भाधानम् ॥ २७ ॥ अखिलार्थदः चतुर्वर्गप्रदः ॥ २८ ॥ एष इति सार्द्धम् । सर्वभूतेषु आत्मभावनया ब्रह्म आराधयितुमिच्छुरस्ति । कथंभूतं ब्रह्म । गुणैः गुणकार्यैः अहङ्कारादिभिः भूतेषु अन्तर्हितमलक्ष्यम् ॥ २९ ॥ कथमर्हति न कथमपि । यथा पितुः सकाशात् आत्मजो वधं नर्हति तद्वत् ॥ ३० ॥ यथा भ्रूणस्य गर्भस्य यथा च बभ्रोः गोः तथा तस्य साधोः वधं भवान् कथं मन्यते इत्यन्वयः । सतां सम्मतः ॥ ३१ ॥ यदि

यद्ययं क्रियते भक्ष्यस्तर्हि मां खाद पूर्वतः । न जीविष्ये विना येन क्षणं च मृतकं यथा ॥३२॥
एवं करुणभाषिण्या विलपन्त्या अनाथवत् । व्याघ्रः पशुमिवाखादत् सौदासः शापमोहितः॥३३॥
ब्राह्मणी वीक्ष्य दिधिषुं पुरुषादेन भक्षितम् । शोचन्त्यात्मानमुर्वीशमशपत् कुपिता सती ॥३४॥
यस्मान्मे भक्षितः पाप कामार्तायाः पतिस्त्वया । तवापि मृत्युराधानादकृतप्रज्ञ दर्शितः ॥३५॥
एवं मित्रसहं शप्त्वा पतिलोकपरायणा । तदस्थीनि समिद्धेऽग्नौ प्रास्य भर्तुर्गतिं गता ॥३६॥
विशापो द्वादशाब्दान्ते मैथुनाय समुद्यतः । विज्ञाय ब्राह्मणीशापं महिष्या स निवारितः ॥३७॥
तत ऊर्ध्वं स तत्याज स्त्रीसुखं कर्मणाऽप्रजः । वसिष्ठस्तदनुज्ञातो मदयन्त्यां प्रजामधात् ॥३८॥
सा वै सप्त समा गर्भमबिभ्रन्न व्यजायत । जघ्नेऽश्मनोदरं तस्याः सोऽश्मकस्तेन कथ्यते ॥३९॥
अश्मकान्मूलको जज्ञे यः स्त्रीभिः परिरक्षितः । नारीकवच इत्युक्तो निःक्षत्रे मूलकोऽभवत्॥४०॥
ततो दशरथस्तस्मात् पुत्र ऐडविडस्ततः । राजा विश्वसहो यस्य खट्वाङ्गश्चक्रवर्त्यभूत् ॥४१॥
यो देवैरर्थितो दैत्यानवधीद् युधि दुर्जयः । मुहूर्तमायुर्ज्ञात्वैत्य स्वपुरं संदधे मनः ॥४२॥
न मे ब्रह्मकुलात् प्राणाः कुलदेवान्न चात्मजाः । न श्रियो न मही राज्यं न दाराश्चातिवल्लभाः ॥४३
न बाल्येऽपि मतिर्मह्यमधर्मे रमते क्वचित् । नापश्यमुत्तमश्लोकादन्यत् किंचन वस्त्वहम् ॥४४॥
देवैः कामवरो दत्तो मह्यं त्रिभुवनेश्वरैः । न वृणे तमहं कामं भूतभावनभावनः ॥४५॥
ये विक्षिप्तेन्द्रियधियो देवास्ते स्वहृदि स्थितम् । न विन्दन्ति प्रियं शश्वदात्मानं किमुतापरे ४६

अयं भक्ष्यः क्रियते । यकारघटितः पाठः साधुः पूर्वतः पूर्वं माम् । क्षणं च क्षणमपि । यथा मृतकं कुणपं जीवेन विना तद्वदहमपि ॥३२॥ विलपन्त्याः तामनादृत्य । अखादत् द्विजमिति शेषः ॥३३॥ दिधिषुं गर्भाधानकर्तारम् उर्वीशं भूपतिमशपत् ॥ ३४ ॥ हे अकृतप्रज्ञ कृतघ्न यस्मात् मे पतिः भक्षितः तस्मात् आधानात् मैथुनात् तवापि मृत्युः दर्शितः सूचितः मरणं भवितेत्यर्थः । हे पाप पापिन् । अर्श आद्यजन्तः । अकृता शिक्षाहीना प्रज्ञा यस्येति वा ।३७। मित्रसहं सौदासम् । पतिलोक एक परममनमाश्रयो यस्याः सा ब्राह्मणी समिद्धे प्रज्वलिते अग्नौ अस्थीनि प्रास्य प्रक्षिप्य तत्र देहं च निपात्य गतिं गता मृतेत्यर्थः ॥३६॥ विशापः शापमुक्तः सन् यदा मैथुनाय उद्यतस्तदा निवारित इति योज्यम् ॥३७॥ ततः उर्ध्वं तत आरम्य स्त्रीसुखं मैथुनम् । एवं कर्मणा कर्मजनितशापेन अप्रजः औरसपुत्रहीनो जातः तदा तेन राज्ञा अनुज्ञातः प्रार्थितः स वसिष्ठः प्रजां पुत्रमुद्दिश्य गर्भमधात् गर्भाधानमकरोत् योगबलेनेति व्याख्येयम् ॥ ३८ ॥ सा मदयन्ती सप्त समा वर्षाणि अबिभ्रत् दधार । तदपि पुत्रो न जातः तदा वसिष्ठः अश्मना पाषाणेन तदुदरं जघ्ने तेन निमित्तेन सोऽश्मको नाम जातः ॥ ३९ । परिरक्षितः परशुरामादिति शेषः । निःक्षत्रे क्षत्रोत्पाटने सति क्षत्रकुलस्य मूलत्वात् मूलको नाम अभवत् ॥ ४० ॥ ततो मूलकात् । तत एडविडात् । यस्य विश्वसहस्य ॥ ४१ ॥ यः खट्वांगः दुर्जयः जेतुमशक्यः अत एव देवैः मुहूर्तमात्रं स्वमायु र्ज्ञात्वा स्वपुरमागत्य भगवति सर्वं समर्प्य तत्रैव मनो दधे स्थिरीचकार मुक्तोऽभूदित्यर्थः ॥ ४२ ॥ कुलदैवात् कुलपूज्यात् ब्रह्मकुलात् मे प्राणादयो नातिवल्लभाः ॥ ४३ ॥ मह्यं मम अधर्मे आपद्यपि भगवतः अन्यत् वस्तु परमार्थभूतं नापश्यम् ।: ४४ ॥ कामवरोऽभीष्टवरो दत्तः तथापि तं काममभीष्टमपि न वृणुयाम् । कुतः । भूतानि पालयतीति भूतभावनो भगवान् तत्र भावना भक्तिः यस्य तथाभूतोऽहम् ॥ ४५ ॥ ये सात्त्विका देवा ते अपि हृदि स्थितमात्मानं न विदन्ति तदा राजसादिस्वभावा न विदन्तीति किमुत

अथेशमायारचितेषु सङ्गं गुणेषु गन्धर्वपुरोपमेषु ।
रूढं प्रकृत्याऽऽत्मनि विश्वकर्तुर्भावेन हित्वा तमहं प्रपद्ये ॥ ४७ ॥

इति व्यवसितो बुद्ध्या नारायणगृहीतया । हित्वान्यभावमज्ञानं ततः स्वं भावमाश्रितः ॥४८॥

यत् तद् ब्रह्म परं सूक्ष्ममशून्यं शून्यकल्पितम् । भगवान् वासुदेवेति यं गृणन्ति हि सात्वताः ।४९।

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां नवमस्कन्धे सूर्यवंशानुवर्णने नवमोऽध्यायः ॥ ९ ॥

अथ दशमोऽध्यायः

श्रीशुक उवाच

खट्वाङ्गाद् दीर्घबाहुश्च रघुस्तस्मात् पृथुश्रवाः । अजस्ततो महाराजस्तस्माद् दशरथोऽभवत् ॥१॥

तस्यापि भगवानेष साक्षाद् ब्रह्ममयो हरिः । अंशांशेन चतुर्धाऽगात् पुत्रत्वं प्रार्थितः सुरैः ।
रामलक्ष्मणभरतशत्रुघ्ना इति संज्ञया ॥ २ ॥

तस्यानुचरितं राजन्नृषिभिस्तत्त्वदर्शिभिः । श्रुतं हि वर्णितं भूरि त्वया सीतापतेर्मुहुः ॥ ३ ॥

गुर्वर्थे त्यक्तराज्यो व्यचरदनुवनं पद्मपद्भ्यां प्रियायाः
पाणिस्पर्शाऽक्षमाभ्यां मृजितपथरुजो यो हरीन्द्रानुजाभ्याम् ।
वैरूप्याच्छूर्पणख्याः प्रियविरहरुषाऽऽरोपितभ्रूविजृम्भ-
त्रस्ताब्धिर्बद्धसेतुः खलदवदहनः कोसलेन्द्रोऽवतान्नः ॥ ४ ॥

वक्तव्यमित्यर्थः । कथंभूता देवाः । विक्षिप्तानि विषयाकृष्टानि इन्द्रियाणि धीश्च येषां ते ॥४६॥ अथ तस्मात् गुणेषु विषयेषु तत्कार्येषु देहादिषु प्रकृत्या स्वभावेनैव रूढं दृढं सङ्गमासक्तिं हित्वा तमेव अहं शरणं प्रपद्ये प्राप्स्यामीत्यन्वयः । केन हित्वा आत्मनि मन्मनसि विश्वकर्तुः भगवतो यो भावः भक्तिस्तेन । कथंभूतेषु । मायारचितेषु अत एव गन्धर्वनगरतुल्येषु नश्वरेषु ॥ ४७ ॥ नारायणेन गृहीतया आत्मानं प्रति आकृष्टया बुद्ध्या इति कृतनिश्चयः सन् अन्यभावं देहाभिनिवेशरूपं हित्वा स्वं भावमात्मज्ञानलक्षणमाश्रितो भवामीति शेषः ॥ ४८ ॥ यत् परं ब्रह्म तत् आश्रितः । कीदृशं ब्रह्म । अनन्तगुणनिधानम् ! पुनश्च । शून्ये रागद्वेषादिरहिते हृदि कल्पितं किं च यम् एव वदन्ति त स्वं भावमित्यन्वयः । वासुदेवेति इत्यत्र सुप्सुपेति समासः ॥ ४९ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे गूढादिपिन्यां नवमोऽध्यायः ।

दशमे भगवान् रामः खट्वांगस्यान्वयेऽभवत् ।
तच्चरित्रामृतं सर्वं संक्षेपेणात्र वर्ण्यते ॥ १ ॥

पृथुश्रवाः विपुलकीर्तिः रघुः ॥ १ ॥ तस्येति सार्द्धम् । स्वयं परिपूर्णः लक्ष्मणादिषु पृथक् पृथगंशेन अंशेन स्वांशेन यत् आंशम् अंशसमूहः तेन सह ॥ २ ॥ यस्य रामस्य अनुचरितम् ऋषिभिः वाल्मीक्यादिभिः भूरि वर्णितं त्वया श्रुतं च तथापि पुनः संक्षेपेण श्रृणु इति शेषः ॥३॥ यः गुर्वर्थे पित्रर्थे त्यक्तराज्यः सन् प्रतिवनं पद्भ्यां व्यचरत् स कोसलेन्द्रो नोऽस्मान् अवतात् अवतु । कथंभूतः । हरीन्द्रः वानरेन्द्रः सुग्रीवः लक्ष्मणश्च ताभ्याम् अपनीता दूरीकृता[1] पथरुजा मार्गश्रमो यस्य सः । पुनश्च शूर्पणख्या वैरूप्यात् नासिकाच्छेदात् प्रियविरहेण

---

१. पथशब्दोऽदन्तोप्यस्ति 'वाटः पथश्च मार्गश्च' इति त्रिकाण्डशेषः ।

विश्वामित्राध्वरे येन मारीचाद्या निशाचराः । पश्यतो लक्ष्मणस्यैव हता नैर्ऋतपुङ्गवाः ॥ ५ ॥

यो लोकवीरसमितौ धनुरैशमुग्रं सीतास्वयंवरगृहे त्रिशतोपनीतम् ।
आदाय बालगजलील इवेक्षुयष्टिं सज्यीकृतं नृप विकृष्य बभञ्ज मध्ये ॥ ६ ॥
जित्वाऽनुरूपगुणशीलवयोऽङ्गरूपां सीताभिधां श्रियमुरस्यभिलब्धमानाम् ।
मार्गे व्रजन् भृगुपतेर्व्यनयत् प्ररूढं दर्पं महीमकृत यस्त्रिरराजबीजाम् ॥ ७ ॥
यः सत्यपाशपरिवीतपितुर्निदेशं स्त्रैणस्य चापि शिरसा जगृहे सभार्यः ।
राज्यं श्रियं प्रणयिनः सुहृदो निवासं त्यक्त्वा ययौ वनमसूनिव मुक्तसङ्गः ॥८॥
रक्षःस्वसुर्व्यकृत रूपमशुद्धबुद्धेस्तस्याः खरत्रिशिरदूषणमुख्यबन्धून् ।
जघ्ने चतुर्दशसहस्रमपारणीयकोदण्डपाणिरटमान उवास कृच्छ्रम् ॥ ९ ॥
सीताकथाश्रवणदीपितहृच्छयेन सृष्टं विलोक्य नृपते दशकन्धरेण ।
जघ्नेऽद्भुतैणवपुषाऽऽश्रमतोऽपकृष्टो मारीचमाशु विशिखेन यथा कमुग्रः ॥१०॥
रक्षोऽधमेन वृकवद् विपिनेऽसमक्षं वैदेहराजदुहितर्यपयापितायाम् ।
भ्रात्रा वने कृपणवत् प्रियया वियुक्तः स्त्रीसङ्गिनां गतिमिति प्रथयंश्चचार ॥११॥

जानकीवियोगेन या रुट् रोषः तया आरोपितयोः कुटुलीकृतयोः भ्रुवोः विजृम्भणेन चालनेन त्रस्तोऽब्धिर्यस्मात् अत एव बद्धसेतुः खलदवो राक्षसवनं तस्य दहनः दहनकर्ता च । पाणिना स्पर्शेऽपि नास्ति क्षमा सहनशीलता ययोस्ताभ्याम् पद्भ्याम् ॥४॥ अध्वरे यज्ञे येन रामेण नैर्ऋतपुङ्गवा राक्षसश्रेष्ठा हताः स अवतात् । एवमग्रेऽपि सर्वत्र यच्छब्दानामेनेनान्वयः कार्यः ॥ ५ ॥ यः सीतास्वयम्वरगृहे तत्रापि लोकवीराणां समितौ उग्रं गुरुतरं माहेशं धनुः इक्षुयष्टिमिव आदाय सज्यीकृत्य सत् विकृष्य मध्ये बभञ्ज भग्नमकरोत् सोऽवतादिति पूर्वेणान्वयः । कीदृशम् । वाहकानां त्रिभिः शतैः आनीतम् । स्रग्धरा वृत्तम् ॥ ६ ॥ किञ्च यः सीतासंज्ञां श्रियं लक्ष्मीं जित्वा प्राप्य मार्गे व्रजन् भृगुपतेः परशुरामस्य दर्पं च व्यनयत् अपनीतवान् सोऽवतादिति योज्यम् । यः परशुरामः त्रिःसप्तकृत्वः राजबीजशून्यां महीमकृत । कीदृशीं सीताम् । स्वानुरूपाणि गुणादीनि यस्याः । पूर्वम् उरसि[1] लब्धमानः आदरो यया । यदा समुद्रात् निर्गता तदा ॥ ७ ॥ किञ्च यः सत्यपाशेन प्रतिज्ञातवरद्वयेन वेष्टितस्य बद्धस्य पितुः आदेशं शिरसा जगृहे अथ च राज्यादीनि त्यक्त्वा सभार्यो वनं ययौ । त्यागे दृष्टान्तः । यथा मुक्तसंगः योगी सहर्षं प्राणान् त्यजति तद्वत् । स्त्रैणस्य तद्वश्यस्य । निवासमयोध्याम् ॥ ८ ॥ किञ्च अशुद्धबुद्धेः कामातुरायाः तस्या रावणभगिन्या रूपं व्यकृत विकृतमकरोत् कर्णनासिकाच्छेदेन । पुनश्च तस्याः चतुर्दशसहस्रसंख्याकान् खरादिबन्धून् जघ्ने एवं वने अटमानः भ्रमन् यः सकष्टमुवासेति लोकदृष्ट्योक्तम् । अपारणीयमसह्यं कोदण्डं धनुः पाणौ यस्य सः ॥९॥ हे नृपते किञ्च यः दशकन्धरेण सृष्टं प्रेषितं मारीचमालोक्य आशु विशिखेन बाणेन जघ्ने कथंभूतम् । स्वर्णहरिणमयवपुषा प्रतीयमानम् । तेनैव तथाभूतेन मारीचेन आश्रमतोऽपकृष्टो रामश्च दूरं नीतः यथा उग्रः रुद्रगणो वीरभद्रः कं दक्षं जघान तद्वत् । कथंभूतेन रावणेन । सीतासौन्दर्यश्रवणेन उद्दीपितः कामो यस्य तेन ॥ १० ॥ किञ्च राक्षसाधमेन वृको मेषमिव दुहितरि सीतायामपहृतायां सत्यां प्रियावियुक्तो यः भ्रात्रा सह वने कृपणवत् दीनवत् विचचार स इति योज्यम् । किं कुर्वन् सन् । स्त्रीसंगिनां गतिं दुःखोदर्कां

---

१. वक्षो निवासमकरोत् परमं विभूतेः इत्युक्तेः ।

दग्ध्वाऽऽत्मकृत्यहतकृत्यमहन् कबन्धं सख्यं विधाय कपिभिर्दयितागतिं तैः ।
बुद्ध्वाथ वालिनि हते प्लवगेन्द्रसैन्यैर्वेलामगात् स मनुजोऽजभवार्चिताङ्घ्रिः ॥१२॥
यद्रोषविभ्रमविवृत्तकटाक्षपातसम्भ्रान्तनक्रमकरो भयगीर्णघोषः ।
सिन्धुः शिरस्यर्हणं परिगृह्य रूपी पादारविन्दमुपगम्य बभाष एतत् ॥१३॥
न त्वां वयं जडधियो नु विदाम भूमन् कूटस्थमादिपुरुषं जगतामधीशम् ।
यत्सत्त्वतः सुरगणा रजसः प्रजेशा मन्योश्च भूतपतयः स भवान् गुणेशः ॥१४॥
कामं प्रयाहि जहि विश्रवसोऽवमेहं त्रैलोक्यरावणमवाप्नुहि वीर पत्नीम् ।
बध्नीहि सेतुमिह ते यशसो वितत्यै गायन्ति दिग्विजयिनो यमुपेत्य भूपाः ॥१५॥
बद्ध्वोदधौ रघुपतिर्विविधाद्रिकूटैः सेतुं कपीन्द्रकरकम्पितभूरुहाङ्गैः ।
सुग्रीवनीलहनुमत्प्रमुखैरनीकैर्लङ्कां विभीषणदृशाऽऽविशदग्रदग्धाम् ॥१६॥
सा वानरेन्द्रबलरुद्धविहारकोष्ठश्रीद्वारगोपुरसदोवलभीविटङ्का ।
निर्भज्यमानधिषणध्वजहेमकुम्भशृङ्गाटका गजकुलैर्ह्रदिनीव घूर्णा ॥१७॥
रक्षःपतिस्तदवलोक्य निकुम्भकुम्भधूम्राक्षदुर्मुखसुरान्तनरान्तकादीन् ।
पुत्रं प्रहस्तमतिकायविकम्पनादीन् सर्वानुगान् समहिनोदथ कुम्भकर्णम् ॥१८॥

मिति प्रथयन् प्रख्यापयन् ॥ ११ ॥ किञ्च यः जटायुषं दग्ध्वा कबन्धनामानं राक्षसमहन् ततः कपिभिः सख्यं विधाय वालिनि हते सति तैः कपिभिः दयितायाः सीताया गतिं बुद्ध्वा वानरसैन्यैः सह वेलां समुद्रतीरम् अगात् स मनुजः मनुजावतार इति योज्यम् । कथंभूतः । अजभवाभ्यामर्चितौ अङ्घ्री यस्य सः । कीदृशं जटायुषम् । आत्मनः स्वस्य कृत्यं यत् सीतानिर्मोचनरूपं तेन हतं कृत्यं पौरुषं यस्य तम् ॥१२॥ किञ्च यस्य भयेन निधाय । सिन्धुः रूपी मूर्तिमान् सन् उपगम्य समीपमागत्य एतत् बभाषे इत्यन्वयः । किं कृत्वा । अर्हणं पूजनद्रव्यं शिरसि कथंभूतः । रोषविभ्रमेण क्रोधलीलया विवृत्तस्य प्रस्फुरितस्य कटाक्षस्य पातेन संभ्रान्ता उद्विग्नाः नक्रा मकराश्च यस्मिन् सः । पुनश्च । भयेन गीर्णः स्तम्भितो गम्भीरो घोषो यस्य सः । मकरस्तदवान्तर्भेदः ॥१३॥ हे भूमन् हे अनन्तशक्ते । कूटस्थं निर्विकारं त्वां नु निश्चितं वयं न विदाम । यदिति लुप्तषष्ठ्यन्तं पृथक् पदम् । यत् यस्य तव सत्त्वादिभ्यः सुरगणादयो भवन्ति स गुणेशः गुणानां नियन्ता भवानेव । प्रजेशाः प्रजापतयः । मन्योः तमोगुणात् ॥१४॥ हे वीर कामं यथेच्छं जलमाक्रम्यापि विश्रवसः प्रजापतेः अवमेहं पुरीषतुल्यं नीचपुत्रं रावणं जहि । रावयति रोदयतीति रावणः । इह समुद्रे । वितत्यै विस्ताराय । यं सेतुं बद्ध्वा विभीषणदृशा तत्प्रदर्शितमार्गेण अनीकैः सैन्यैः सह लङ्कामाविशदित्यन्वयः । कथंभूतैः कूटैः । कपीन्द्राणां करैः कम्पितानि वृक्षाणामङ्गानि शाखादीनि येषु तैः । सुग्रीवादयो मुख्या येषु तैरित्यनीकविशेषणम् । अग्रे हनुमतैव ॥ १६ ॥ सा लङ्का गजकुलैः विलोडिता ह्रदिनी नदीव घूर्णा कम्पिताऽभूदिति शेषः । कथंभूता । वानरेन्द्राणां बलैः सैन्यैः रुद्धा विहारादयो यस्याः । पुनश्च निर्भज्यमाना निर्भिद्यमानाः धिषणादयो यस्याः । तत्र विहारस्थानम् । कोष्ठं धान्यागारादि । श्रीः कोषः गोपुरं पुरद्वारम् । सदः सभास्थानम् । वलभी छज्जा इति । विटंकः कपोतपालिका । धिषणं वेदिकादि । शृङ्गाटकं चतुष्पथम् ॥ १७ ॥ रक्षःपतिः रावणः तत् लङ्कामर्दनमवलोक्य निकुम्भादीन् पुत्रमिन्द्रजितं प्रहस्तं सेनापतिं तेषाम् अनुगान् सहायकान् अथ च सर्वेषां मरणानन्तरं कुम्भकर्णं च प्राहिणोत् प्रेषितवानित्यन्वयः

तां यातुधानपृतनामसिशूलचापप्रासर्ष्टिशक्तिशरतोमरखड्गदुर्गाम्।
सुग्रीवलक्ष्मणमरुत्सुतगन्धमादनीलाङ्गदर्क्षपनसादिभिरन्वितोऽगात् ॥१९॥
तेऽनीकपा रघुपतेरभिपत्य सर्वे द्वन्द्वं वरूथमिभपत्तिरथाश्वयोधैः।
जघ्नुर्द्रुमैर्गिरिगदेषुभिरङ्गदाद्याः सीताभिमर्शहतमङ्गलरावणेशान् ॥२०॥
रक्षःपतिः स्वबलनष्टिमवेक्ष्य रुष्ट आरुह्य यानकमथाभिससार रामम्।
स्वःस्यन्दने द्युमति मातलिनोपनीते विभ्राजमानमहनन्निशितैः क्षुरप्रैः ॥२१॥
रामस्तमाह पुरुषादपुरीष यन्नः कान्तासमक्षमसतापहृता श्ववत् ते।
त्यक्तत्रपस्य फलमद्य जुगुप्सितस्य यच्छामि काल इव कर्तुरलङ्घ्यवीर्यः ॥२२॥
एवं क्षिपन् धनुषि संधितमुत्ससर्ज बाणं स वज्रमिव तद्धृदयं बिभेद।
सोऽसृग् वमन् दशमुखैर्न्यपतद् विमानाद्धाहेति जल्पति जने सुकृतीव रिक्तः ॥२३॥
ततो निष्क्रम्य लङ्काया यातुधान्यः सहस्रशः। मन्दोदर्या समं तस्मिन् प्ररुदत्य उपाद्रवन् ॥२४॥
स्वान् स्वान् बन्धून् परिष्वज्य लक्ष्मणेषुभिरर्दितान्। रुरुदुः सुस्वरं दीना घ्नन्त्य आत्मानमात्मना
हा हताः स्म वयं नाथ लोकरावण रावण। कं यायाच्छरणं लङ्का त्वद्विहीना परार्दिता ॥२६॥
नैवं वेद महाभाग भवान् कामवशं गतः। तेजोऽनुभावं सीताया येन नीतो दशामिमाम् ॥२७॥
कृतैषा विधवा लङ्का वयं च कुलनन्दन। देहः कृतोऽन्नं गृध्राणामात्मा नरकहेतवे ॥२८॥

॥ १८ ॥ सुग्रीवादिभिः अन्वितः श्रीरामः तां यातुधानानां राक्षसानां पृतनां सेनाम् अगात् तत्संमुखं जगाम। कीदृशीम्। असिशूलादिभिः दुर्गां दुर्गमाम्। प्रासः प्रक्षेपास्त्रम्। ऋष्टिः उभयतोधारखड्गः। तोमरः (गड़ासा) मरुत्सुतो हनुमान्। ऋक्षो जाम्ववान्। पनस एतन्नामकः राक्षसः ॥१९॥ रामस्य ते सर्वे अनीकपाः सेनापतयः अङ्गदाद्या इभादिभिर्वरूथं यत् रावणसैन्यं तत्र द्वन्द्वं यथा भवति तथा अभिपत्य संगम्य राक्षसान् द्रुमादिभिर्जघ्नुरित्यन्वयः। कथंभूतान्। सीताया अभिमर्शः स्पर्शः तेन हृतं पुण्यं यस्य स चासौ यो रावणः स ईशो नायको येषां तान् ॥ २० ॥ रक्षःपतिः रावणः स्वसैन्यनाशमवेक्ष्य रुष्टः सन् विमानमारुह्य रामम् अभिससार योद्धुमाजगाम। अथ अनन्तरं च स्वःस्यन्दने इन्द्ररथे विभ्राजमानं श्रीरामं निशितैः तीक्ष्णैः क्षुरप्रैः अर्धचन्द्राकारैः बाणैः अहन्। 'अर्धचन्द्रः क्षुरप्रः स्यात्' इत्यभिधानात्। द्युमति प्रकाशबहुले। मातलिना इन्द्रसारथिना उपनीते समानीते ॥ २१ ॥ हे राक्षसपुरीषतुल्य राक्षसाधम ते त्वया नोऽस्माकमसमक्षं परोक्षं या कान्ता श्ववत् अपहृता तस्य निन्दितकर्मण फलं ते अद्यैव यच्छामीत्यन्वयः। यथा अधर्मकर्तुः पुंसः फलं कालो यमः यच्छति तद्वत्। त्यक्तत्रपस्य निर्लज्जस्य ॥ २२ ॥ एवं क्षिपन् तं धिक् कुर्वन् रामः धनुषि सन्धितमारोपितं बाणमुत्ससर्ज मुमोच स त्र वाणः तस्य हृदयं बिभेद विदीर्णमकरोत्। स च रावणः दश मुखैः रक्तमुद्गिरन् विमानात् पुष्पकात् भूमौ न्यपतदित्यन्वयः। यथा सुकृती पुण्यात्मा रिक्तः क्षीणपुण्यः सन् स्वर्गात् पतति तद्वत् ॥ २३ ॥ ततो रावणपतनानन्तरम् यातुधान्यः राक्षस्यः समं सह। तस्मिन् स्थाने उपाद्रवन् आजग्मुः॥२४॥ परिष्वज्य आलिङ्ग्य। अर्दितान् हतान्। आत्मना करेण आत्मानं वक्षः घ्नन्त्यः सुस्वरम् उच्चैः रुरुदुः ॥ २५ ॥ लोकं रावयति रोदयतीत्यतो रावण इत्यन्वर्थं नाम। लंका लंकास्थो जनः। परैः शत्रुभिः अर्दिता पीडिता ॥ २६ ॥ सीतायाः तेजःप्रभावं नैव वेद येन मरणदशां प्राप्तवानसि ॥ २७ ॥ वयमपि

श्रीशुक उवाच

स्वानां विभीषणश्चक्रे कोसलेन्द्रानुमोदितः। पितृमेधविधानेन यदुक्तं साम्परायिकम् ॥२९॥
ततो ददर्श भगवानशोकवनिकाश्रमे। क्षामां स्वविरहव्याधिं शिंशपामूलमास्थिताम् ॥३०॥
रामः प्रियतमां भार्यां दीनां वीक्ष्यान्वकम्पत। आत्मसंदर्शनाह्लादविकसन्मुखपङ्कजाम् ॥३१॥
आरोप्यारुरुहे यानं भ्रातृभ्यां हनुमद्युतः। विभीषणाय भगवान् दत्त्वा रक्षोगणेशताम्।
लङ्कामायुश्च कल्पान्तं ययौ चीर्णव्रतः पुरीम् ॥३२॥
अवकीर्यमाणः कुसुमैर्लोकपालार्पितैः पथि। उपगीयमानचरितः शतधृत्यादिभिर्मुदा ॥३३॥
गोमूत्रयावकं श्रुत्वा भ्रातरं वल्कलाम्बरम्। महाकारुणिकोऽतप्यज्जटिलं स्थण्डिलेशयम् ॥३४॥
भरतः प्राप्तमाकर्ण्य पौरामात्यपुरोहितैः। पादुके शिरसि न्यस्य रामं प्रत्युद्यतोऽग्रजम् ॥३५॥
नन्दिग्रामात् स्वशिबिराद् गीतवादित्रनिःस्वनैः। ब्रह्मघोषेण च मुहुः पठद्भिर्ब्रह्मवादिभिः ॥३६॥
स्वर्णकक्षपताकाभिर्हैमैश्चित्रध्वजै रथैः। सदश्वै रुक्मसन्नाहैर्भटैः पुरटवर्मभिः ॥३७॥
श्रेणीभिर्वारमुख्याभिर्भृत्यैश्चैव पदानुगैः। पारमेष्ठ्यान्युपादाय पण्यान्युच्चावचानि च ॥३८॥
पादयोर्न्यपतत् प्रेम्णा प्रक्लिन्नहृदयेक्षणः। पादुके न्यस्य पुरतः प्राञ्जलिर्बाष्पलोचनः ॥३९॥

विश्रवाः कृता इति वचनव्यत्ययेनान्वयः। अन्नं भक्ष्यः कृतः। आत्मा जीवस्तु नरकहेतवे नरकभोगाय कृतः॥२८॥ पितृमेधस्य पितृयागस्य विधानं शवदाहादारभ्य सपिण्डनान्तं तेन। साम्परायिकं पारलौकिकम्। कोसलेन्द्रो रामः ॥२९॥ ददर्श सीतामिति शेषः। स्वस्य रामस्य विरह एव व्याधिर्यस्यास्ताम्। क्षामां कृशाम्। शिंशपा स्निग्धपत्रो वृक्षः। क्रीडा यत्र वने स्त्रीभिरशोकवनिका तु सा ॥ ३० ॥ अन्वकम्पत कृपामकरोत्। आत्मदर्शनेन य आह्लादः तेन विकसत् प्रमुदितं मुखपङ्कजं यस्यास्ताम् ॥ ३१ ॥ आरोप्येति सार्द्धम्। तां सीतां यानं पुष्पकमारोप्य भ्रातृभ्यां लक्ष्मणसुग्रीवाभ्यां सह स्वयमपि यानम् आरुरुहे। चक्रवर्ती तु भ्रातृभ्यां रामलक्ष्मणाभ्यामारुरुहे हनुमता सह युतः साहित्यं प्राप्य 'यु मिश्रणे' भावक्विबलात् ल्यब्लोपे पञ्चमी इति व्याख्यातवान्। तन्मते कर्मणि लिट्। इदं व्याख्यानमुचितं सुग्रीवस्य भ्रातृत्वमौपचारिकं तन्न समीचीनं प्रतिभाति। कल्पपर्यन्तं लङ्कामायुश्च दत्त्वा तेनापि सहैव ययौ। चीर्णव्रतः समाप्तवनवासव्रतः। कल्पो ब्रह्मदिनम् ॥ ३२ ॥ लोकपालैः इन्द्रादिभिः कुसुमैः अवकीर्यमाणः आच्छाद्यमानः। शतधृतिः ब्रह्मा ॥ ३३ ॥ गोमूत्रयावकं गोमूत्रपक्वयवान्नमस्ति भोज्यत्वेनास्तीति मत्वर्थीयोऽच्प्रत्ययः ॥३४॥ भरत इति चतुष्कम्। भरतः अग्रजं रामं प्राप्तमाकर्ण्य पौरादिभिः सह नन्दिग्रामात् तं प्रति उद्यतः सम्मुखं ययौ इत्यन्वयः। कैः कैः सह। ब्रह्मघोषेण सस्वरेण वेदध्वनिना। ब्रह्म वेदं पठद्भिः वैदिकैः सह। पुनश्च। चतुर्विशेषणयुक्तैः रथैः सह। पुनश्च। पुरटवर्मभिः स्वर्णकवचैः भटैश्च सह। श्रेणीभिः एकशिल्पोपजीविभिः तैलिकताम्बूलिकादिभिः। पदानुगैः पादचारिभिः भृत्यैश्च सह ययौ। किं कृत्वा। पारमेष्ठ्यानि महाराजचिह्नानि छत्रचामरादीनि। पण्यानि नानाविधरत्नानि उपायनानि च आदाय तं प्रति उद्यत इति योज्यम्। सदश्वैः सन्तः श्रेष्ठा अश्वा येषु तैः। रुक्ममयाः स्वर्णमयाः सन्नाहाः आच्छादनानि येषु तैः ॥३५॥३६॥३७॥३८॥ नन्दिग्रामो हि अयोध्याप्रान्तवर्ती। शिबिरं सैनिकस्थानम्। प्रक्लिन्नमार्द्रीभूतं हृदयमीक्षणे नेत्रे च यस्य। प्राञ्जलिः सन् पुरतः तस्थौ इति शेषः ॥३९॥ लक्ष्मणसीताभ्यां

तमाश्लिष्य चिरं दोर्भ्यां स्नापयन् नेत्रजैर्जलैः ।

रामो लक्ष्मणसीताभ्यां विप्रेभ्यो येऽर्हसत्तमाः । तेभ्यः स्वयं नमश्चक्रे प्रजाभिश्च नमस्कृतः ॥४०॥

धुन्वन्त उत्तरासङ्गान् पतिं वीक्ष्य चिरागतम् । उत्तराः कोसला माल्यैः किरन्तो ननृतुर्मुदा ॥४१॥

पादुके भरतोऽगृह्णाच्चामरव्यजनोत्तमे । विभीषणः ससुग्रीवः श्वेतच्छत्रं मरुत्सुतः ॥४२॥

धनुर्निषङ्गान् शत्रुघ्नः सीता तीर्थकमण्डलुम् । अबिभ्रदङ्गदः खड्गं हैमं चर्मर्क्षराण्नृप ॥४३॥

पुष्पकस्थोऽन्वितः स्त्रीभिः स्तूयमानश्च वन्दिभिः । विरेजे भगवान् राजन् ग्रहैश्चन्द्र इवोदितः॥४४॥

भ्रातृभिर्नन्दितः सोऽपि सोत्सवां प्राविशत् पुरीम् ॥४५॥

प्रविश्य राजभवनं गुरुपत्नीः स्वमातरम् । गुरून् वयस्यावरजान् पूजितः प्रत्यपूजयत् ॥४६॥

वैदेही लक्ष्मणश्चैव यथावत् समुपेयतुः ॥४७॥

पुत्रान् स्वमातरस्तास्तु प्राणांस्तन्व इवोत्थिताः । आरोप्याङ्केऽभिषिञ्चन्त्यो बाष्पौघैर्विजहुः शुचः

जटा निर्मुच्य विधिवत् कुलवृद्धैः समं गुरुः । अभ्यषिञ्चद् यथैवेन्द्रं चतुःसिन्धुजलादिभिः ॥४९॥

एवं कृतशिरःस्नानः सुवासाः स्रग्व्यलंकृतः । स्वलंकृतैः सुवासोभिर्भ्रातृभिर्भार्यया बभौ ॥५०॥

अग्रहीदासनं भ्रात्रा प्रणिपत्य प्रसादितः ॥५१॥

प्रजाः स्वधर्मनिरता वर्णाश्रमगुणान्विताः । जुगोप पितृवद् रामो मेनिरे पितरं च तम् ॥५२॥

त्रेतायां वर्तमानायां कालः कृतसमोऽभवत् । रामे राजनि धर्मज्ञे सर्वभूतसुखावहे ॥५३॥

वनानि नद्यो गिरयो वर्षाणि द्वीपसिन्धवः । सर्वे कामदुघा आसन् प्रजानां भरतर्षभ ॥५४॥

सह ये अर्हसत्तमाः पूज्यतमाः कुलवृद्धाः तेभ्यः । प्रजाभिश्च स्वयं नमस्कृतो बभूवेति योज्यम् ॥४०॥ उत्तराः कोशलाः अयोध्यावासिनः उत्तरासंगान्[1] उत्तरीयवस्त्राणि धुन्वन्तः कम्पयन्तः नन्तुः । यद्वा । कण्ठगृहीतवाद्यं हस्ताभ्यां वादयन्तः । माल्यैः पुष्पैः किरन्तः आच्छादयन्तः ॥ ४१ ॥ चामरव्यजनोत्तमे अगृह्णाताम् । मरुत्सुतो हनुमान् ॥ ४२ ॥ निषङ्गं तूणीरम् । हैमं स्वर्णखचितं चर्म खेटम् (ढाल, इति) ऋक्षराट् जाम्बवान् ॥४३॥ स्त्रीभिः स्त्रिया सीतया । बहुवचनमादरार्थे । ग्रहैः गुरुशुक्रादिभिः वृतः ॥ ४४ ॥ भ्रातृभिरित्यर्द्धम् । भ्रातृभिः भरतादिभिः नन्दितः अनुमोदितः । सोऽपि रामोऽपि ॥ ४५ ॥ गुरुपत्नीः कैकेय्याद्याः । स्वमातरं कौशल्यां च । गुरून् वसिष्ठादीन् । वयस्यान् समानवयस्कान् । अवरजान् कनिष्ठांश्च ॥ ४६ ॥ वैदेहीत्यर्द्धम् । सम्यक् उपेयतुः राजभवनमिति शेषः ॥ ४७ ॥ प्राणान् प्राप्य तन्वः देहा यथा उत्थिता भवन्ति तथा । बाष्पौघैः अश्रुप्रवाहैः । शुचः विरहजन्यशोकान् जहुः तत्यजुः ॥ ४८ ॥ समं सह । गुरुः वसिष्ठः । निर्मुच्य मोचयित्वा नापितद्वारा । आदिना सर्वातिशायि गङ्गाजलम् । राज्ये अभिषिक्तवान् ॥ ४९ ॥ स्रग्वी मालाधारी ॥ ५० ॥ अग्रहीदित्यर्द्धम् भ्रात्रा भरतेन प्रसादितः प्रार्थितः सन् आसनं सिंहासनम् अग्रहीत ॥ ५१ ॥ रामः प्रजाः पितृवत् जुगोपेत्यन्वयः ॥ ५२ ॥ कृतसमः सत्ययुगतुल्यः चतुष्पाद्धर्मयुक्तत्वात् । सर्वभूतानां प्राणिनां सुखमावहति प्रापयतीति तथा ॥ ५३ ॥ कामदुघाः मनोरथपूरकाः ॥ ५४ ॥ प्रजानाम् आध्यादयो नासन् । किं

---

१. प्रावारमुत्तरासङ्गं वाद्यं यत्कण्ठलम्बितम् ।
चर्मावनद्धं हस्ताभ्यां वाद्यते मर्दलादि तत् ॥ ---इति कोशात् ।

नाधिव्याधिजराग्लानिदुःखशोकभयक्लमाः । मृत्युश्चानिच्छतां नासीद् रामे राजन्यधोक्षजे ॥५५॥
एकपत्नीव्रतधरो राजर्षिचरितः शुचिः । स्वधर्मं गृहमेधीयं शिक्षयन् स्वयमाचरत् ॥५६॥
प्रेम्णाऽनुवृत्त्या शीलेन प्रश्रयावनता सती । धिया ह्रिया च भावज्ञा भर्तुः सीताऽहरन्मनः ॥५७॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां नवमस्कन्धे रामचरिते दशमोऽध्यायः ॥ १० ॥

अथैकादशोऽध्यायः

श्रीशुक उवाच

भगवानात्मनाऽऽत्मानं राम उत्तमकल्पकैः । सर्वदेवमयं देवमीज आचार्यवान् मखैः ॥१॥
होत्रेऽददाद् दिशं प्राचीं ब्रह्मणे दक्षिणां प्रभुः । अध्वर्यवे प्रतीचीं च उदीचीं सामगाय सः ॥२॥
आचार्याय ददौ शेषां यावती भूस्तदन्तरा । मन्यमान इदं कृत्स्नं ब्राह्मणोऽर्हति निःस्पृहः ॥३॥
इत्ययं तदलंकारवासोभ्यामवशेषितः । तथा राज्ञ्यपि वैदेही सौमङ्गल्यावशेषिता ॥४॥
ते तु ब्रह्मण्यदेवस्य वात्सल्यं वीक्ष्य संस्तुतम् । प्रीताः क्लिन्नधियस्तस्मै प्रत्यर्प्येदं बभाषिरे ॥५॥
अप्रत्तं नस्त्वया किं नु भगवन् भुवनेश्वर । यन्नोऽन्तर्हृदयं विश्य तमो हंसि स्वरोचिषा ॥६॥
नमो ब्रह्मण्यदेवाय रामायाऽकुण्ठमेधसे । उत्तमश्लोकधुर्याय न्यस्तदण्डार्पिताङ्घ्रये ॥७॥

बहुना अनिच्छतां मृत्युरपि नासीत् असमयादिति योज्यम् । 'जातस्य हि ध्रुवो मृत्युः' इति भगवद्वचनात् । आधिः मानसी व्यथा । ग्लानिः हर्षक्षयः । क्लमः खेदः । अक्षेभ्यो जातमक्षजम् अधःकृतमक्षजमिन्द्रियजन्यं ज्ञानं येन यस्माद् वा अधोक्षजः ॥ ५५ ॥ गृहमेधीयं गृहस्थैरनुष्ठेयं धर्मं शिक्षयन् लोकान् शिक्षयितुम् । हेतौ शतृप्रत्ययः । स्वयमाचरत् । धरः पालकः ॥५६॥ प्रश्रयेण विनयेन अवनता सीता प्रेमादिभिः भर्तुः मनोऽहरत् वशीचकारेत्यन्वयः । अनुवृत्तिः सेवा । शीलमनुकूलाचरणम् । धीः सद्बुद्धिः । ह्रीः लज्जा असत्कृत्ये ॥ ५७ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे गूढार्थदीपिन्यां दशमोऽध्यायः ॥ १० ॥

एकादशे वसन् पुर्यां रामश्चक्रे महामखान् ।
दिग्जयो जानकीत्यागः प्रयाणं चास्य वर्ण्यते ॥ १ ॥

रामः आचार्यवान्[1] सन् आत्मना स्वयमेव आत्मानं मखैः यज्ञैः ईजे इत्यन्वयः यजनीयस्य स्वाभिन्नत्वात् । उत्तमाः कल्पकाः सामग्र्यो येषु तैः ॥ १ ॥ होत्रे इति युग्मम् । तासां दिशामन्तरा मध्ये यावती भूः अवशिष्टा तां सर्वाम् आचार्याय ददौ । यतः इदं सर्वं ब्राह्मण एव प्रतिग्रहीतुमर्हति इत्येवं मन्यमानश्च निस्पृहो रामः ॥ २ ॥ ३ ॥ तत् तदा । सौमङ्गल्यं सुमङ्गलतापादकं हरवलयादि उच्छिष्टत्वान्न ददौ अन्यत्सर्वम् ॥ ४ ॥ क्लिन्नधियः आर्द्रचित्ताः । वात्सल्यं वदान्यत्वम् प्रीतिं वा ॥५॥ नु अहो नोऽस्मभ्यं किम् अप्रत्तं किं न दत्तं सर्वमपि दत्तम् । यत् नोऽस्माकं हृदयं प्रविश्य तमोऽज्ञानं निवारयसि ॥६॥ ब्रह्मणि ब्रह्मकुले साधवो ब्रह्मण्याः तेषु देवः श्रेष्ठः तस्मै अकुण्ठा देशकालवस्त्वपरिच्छिन्ना मेधा ज्ञानं यस्य । न्यस्तदण्डेभ्यो निर्वैरभक्तेभ्यः समर्पितौ अङ्घ्री येन

---

1. 'आचार्यवान् पुरुषो वेद' इति श्रुतेः ।

कदाचिल्लोकजिज्ञासुर्गूढो रात्र्यामलक्षितः । चरन् वाचोऽशृणोद् रामो भार्यामुद्दिश्य कस्यचित् ८
नाहं बिभर्मि त्वां दुष्टामसतीं परवेश्मगाम् । स्त्रीलोभी बिभृयात् सीतां रामो नाहं भजे पुनः ।९।
इति लोकाद् बहुमुखाद् दुराराध्यादसंविदः । पत्या भीतेन सा त्यक्ता प्राप्ता प्राचेतसाश्रमम्।१०।
अन्तर्वत्न्यागते काले यमौ सा सुषुवे सुतौ । कुशो लव इति ख्यातौ तयोश्चक्रे क्रिया मुनिः ॥११।

अङ्गदश्चित्रकेतुश्च लक्ष्मणस्यात्मजौ स्मृतौ ।

तक्षः पुष्कल इत्यास्तं भरतस्य महीपते । सुबाहुः श्रुतसेनश्च शत्रुघ्नस्य बभूवतुः ॥१२॥
गन्धर्वान् कोटिशो जघ्ने भरतो विजये दिशाम् । तदीयं धनमानीय सर्वं राज्ञे न्यवेदयत् ॥१३॥
शत्रुघ्नश्च मधोः पुत्रं लवणं नाम राक्षसम् । हत्वा मधुवने चक्रे मथुरां नाम वै पुरीम् ॥१४॥
मुनौ निक्षिप्य तनयौ सीता भर्त्रा विवासिता । ध्यायन्ती रामचरणौ विवरं प्रविवेश ह ॥१५॥
तच्छ्रुत्वा भगवान् रामो रुन्धन्नपि धिया शुचः । स्मरंस्तस्या गुणांस्तांस्तान्नाशक्नोद् रोद्धुमीश्वरः
स्त्रीपुंप्रसङ्ग एतादृक् सर्वत्र त्रासमावहः । अपीश्वराणां किमुत ग्राम्यस्य गृहचेतसः ॥१७॥

तस्मै ॥ ७ ॥ जिज्ञासुः लोकः मद्विषये किं वदतीति ज्ञातुमिच्छुः । कस्यचित् रजकस्येति जैमिनीये । स्वभार्यामुद्दिश्य उच्यमानाः वाचः ॥ ८ ॥ परस्य पुरुषान्तरस्य वेश्मगतां[1] गृहगतां त्वां नाहं बिभर्मि यथा रामो बिभृयात् ॥ ९ ॥ असंविदः ज्ञानशून्यात् अत एव दुराराध्यात् प्रबोधयितुमपि अशक्यात् । बहवः कटुशब्दा मुखे यस्य तस्मात् लोकात् जनात् लोकापवादादित्यर्थः ।[1] प्रचेतसो वरुणस्यापत्यं प्राचेतसो वाल्मीकिः तस्य ॥ १० ॥ अन्तर्वत्नी गर्भवती सा सीताकाले प्रसवकाले [2]कुशो लव इति द्वयं सुषुवे जनयामास । क्रियाः जातकर्माद्याः । ॥ ११ ॥ अङ्गद इति सार्द्धम् । स्पष्टम् ॥ १२ ॥ १३ ॥ मधोरसुरस्य पुत्रम् ॥ १४ ॥ निक्षिप्य समर्प्य । विवासिता निष्कासिता विवरं प्रविवेश । ह खेदे । भूमिद्वारैव वैकुण्ठादागता विवरद्वारेण पुनस्तत्रैव गता ॥ १५ ॥ श्रुत्वा जातानि शुचः शोकाश्रूणि धिया विवेकेन रुन्धन्नपि तानि निरोद्धुं नाशक्नोत् । ॥ १६ ॥ भयमावहति प्रापयतीति ईश्वराणां समर्थानामपि देवादीनां किमुत ग्राम्यस्य विषयासक्तस्य । अत्र भयशब्दः शोकोपलक्षकः । प्रसंगः आसक्तिः ॥१७॥ ऊर्ध्वमारभ्य अखण्डितं निरवच्छिन्नम् । अजुहोत् स्वीचकार ।

---

१. नित्यं स्ववेश्म सन्त्यज्य परगेहं प्रयाति या ।
सा नारी सर्वथा त्याज्या प्रत्यब्दं पुत्रसूरपि ॥ —(इत्यादिपुराणात्)

२. एतन्नामद्वयस्यान्वर्थता तावदित्थं वाल्मीकीये उत्तरकाण्डे ।
कुशमुष्टिमुपादाय लवं चैव तु स द्विजः ।
वाल्मीकिः प्रददौ ताभ्यां रक्षां भूतविनाशिनीम् ॥ १ ॥
कुशानामग्रभागस्तु कुशमुष्टिरिहोच्यते ।
अधोभागः कुशानां तु लवः प्रोक्तो मनीषिभिः ॥ २ ॥
कुशमुष्ट्या मार्जितो यः स कुशः प्रोक्त आख्यया ।
लवेन मार्जितो यो वै स लवः परिकीर्तितः इति ॥ ३ ॥

तत ऊर्ध्वं ब्रह्मचर्यं धारयन्नजुहोत् प्रभुः। त्रयोदशाब्दसाहस्रमग्निहोत्रमखण्डितम् ॥१८॥
स्मरतां हृदि विन्यस्य विद्धं दण्डककण्टकैः। स्वपादपल्लवं राम आत्मज्योतिरगात् ततः ॥१९॥
नेदं यशो रघुपतेः सुरयाच्ञयाऽऽत्तलीलातनोरधिकसाम्यविमुक्तधाम्नः।
रक्षोवधो जलधिबन्धनमस्त्रपूगैः किं तस्य शत्रुहनने कपयः सहायाः ॥२०॥
यस्यामलं नृपसदस्सु यशोऽधुनापि गायन्त्यघघ्नमृषयो दिगिभेन्द्रपट्टम्।
तं नाकपालवसुपालकिरीटजुष्टपादाम्बुजं रघुपतिं शरणं प्रपद्ये ॥२१॥
स यैः स्पृष्टोऽभिदृष्टो वा संविष्टोऽनुगतोऽपि वा। कोसलास्ते ययुः स्थानं यत्र गच्छन्ति योगिनः।
पुरुषो रामचरितं श्रवणैरुपधारयन्। आनृशंस्यपरो राजन् कर्मबन्धैर्विमुच्यते ॥२३॥

राजोवाच

कथं स भगवान् रामो भ्रातॄन् ना स्वयमात्मनः। तस्मिन् वा तेऽन्ववर्तन्त प्रजाः पौराश्च ईश्वरे २४

श्रीशुक उवाच

अथादिशद् दिग्विजये भ्रातॄंस्त्रिभुवनेश्वरः। आत्मानं दर्शयन् स्वानां पुरीमैक्षत सानुगः ॥२५॥
आसिक्तमार्गां गन्धोदैः करिणां मदशीकरैः। स्वामिनं प्राप्तमालोक्य मत्तां वासितगामिव ॥२६॥

अत्र जुहोतेः आदानार्थकः। अतः दशवर्षसहस्राणि रामो राज्यमचीकरत् इत्यनेन न विरोधः तत्र पृथ्वीपालनकालस्य निर्देशात्। ततः परमग्निहोत्रं समञ्जसमेव। यद्वा। त्रयोदशेति पृथक् पदं सम्बोधनम्। तथाहि त्रयेण प्रभावोत्साहमन्त्ररूपेण शक्तित्रयेण उदश्नाति राज्यं भुङ्क्ते इति त्रयोदशो नृपः तत्संबुद्धौ हे राजन्! अब्दसहस्रमग्निहोत्रमजुहोत् ब्रह्मचर्यं धारयन्नित्यन्वयः। अतो यथोक्तसंख्ययापि न काप्यनुपपत्तिरिति ॥ १८ ॥ स्मरतां भक्तानां हृदि विन्यस्य निधिवत् निधाय ततोऽयोध्यायाः आत्मज्योतिः ज्योतिर्मयं स्वप्रकाशरूपं वैकुण्ठमगात् ॥ १९ ॥ रघुपतेः नेदं यशः किन्तु लोकशिक्षार्थं लीलामात्रम्। कथंभूतस्य। आत्ता आविष्कृता लीलामूर्तिर्येन। पुनश्च। अधिकसाम्याभ्यां विमुक्तं धाम प्रभावो यस्य। यत्तुल्यो यदधिकश्च कश्चिन्नास्ति तादृक्प्रभावसंपन्नस्य। एवंविशिष्टस्य किं कपयः सहाया नेत्यर्थः अतः रक्षोवधादि सर्वं लीलामात्रम् ॥ २० ॥ लीलाप्रयोजनमेव दर्शयन् प्रणमति यस्य अमलं यशः नृपसदःसु ऋषयः मार्कण्डेयादयः गायन्ति तं रघुपतिं शरणं प्रपद्ये इत्यन्वयः। कीदृशम्। अघघ्नं श्रोतॄणां श्रावयितॄणां च दुरितघ्नम्। पुनश्च दिग्गजानां पट्टवत् आभरणरूपम् पट्टवत् वेष्टनशीलत्वात् दिगन्तव्यापि। पुनश्च। नाकपाला इन्द्रादयः वसुपालाः धनपालाः कुबेरादयः तेषां किरीटैः सेवितं पादाम्बुजं यस्य तम् ॥ २१ ॥ स्पृष्टः नमनादिना। अभिदृष्टः चक्षुरादिना। संविष्टः सहोपविष्टः। अनुगतः पृष्ठतो यातो वा। कोशला अयोध्यावासिनः उपलक्षणं सर्वेऽपि ययुः ॥ २२ ॥ श्रवणैः उपधारयन् शृण्वन् भवति स आनृशंस्यपरः क्रौर्यादिदोषरहितः सन् मुच्यते इत्यन्वयः ॥ २३ ॥ स स्वयं कथम्। आत्मनो भ्रातॄन् प्रति कथम्। प्रजाः प्रति कथमवर्तत। ते भ्रात्रादयश्च तस्मिन् रामे कथमन्ववर्तन्तेति योजना कार्या ॥ २४ ॥ स्वानां पौरादीनाम्। सानुगः सानुचरः ॥ २५ ॥ पुरीं वर्णयति त्रिभिः—गन्धोदैः सुगन्धितजलैः तथा हस्तिनां मदबिन्दुभिश्च आसिक्ता मार्गा यस्यास्ताम्। पुनः कीदृशीम्। वासितगामिव कामोन्मत्तां गामिव। अयमेव पाठः प्रशस्तः उपमोपमेययोः सामञ्जस्यात् ॥ २६ ॥ पुनः

प्रासादगोपुरसभाचैत्यदेवगृहादिषु । विन्यस्तहेमकलशैः पताकाभिश्च मण्डिताम् ॥२७॥
पूगैः सवृन्तै रम्भाभिः पट्टिकाभिः सुवाससाम् । आदर्शैरंशुकैः स्रग्भिः कृतकौतुकतोरणाम् ॥२८॥
तमुपेयुस्तत्र तत्र पौरा अर्हणपाणयः । आशिषो युयुजुर्देव पाहीमां प्राक् त्वयोद्धृताम् ॥२९॥
ततः प्रजा वीक्ष्य पतिं चिरागतं दिदृक्षयोत्सृष्टगृहाः स्त्रियो नराः ।
आरुह्य हर्म्याण्यरविन्दलोचनमतृप्तनेत्राः कुसुमैरवाकिरन् ॥३०॥
अथ प्रविष्टः स्वगृहं जुष्टं स्वैः पूर्वराजभिः । अनन्ताखिलकोशाढ्यमनर्घ्योरुपरिच्छदम् ॥३१॥
विद्रुमोदुम्बरद्वारैर्वैदूर्यस्तम्भपङ्क्तिभिः । स्थलैर्मारकतैः स्वच्छैर्भ्राजत्स्फटिकभित्तिभिः ॥३२॥
चित्रस्रग्भिः पट्टिकाभिर्वासोमणिगणांशुकैः । मुक्ताफलैश्चिदुल्लासैः कान्तकामोपपत्तिभिः ॥३३॥
धूपदीपैः सुरभिभिर्मण्डितं पुष्पमण्डनैः । स्त्रीपुम्भिः सुरसंकाशैर्जुष्टं भूषणभूषणैः ॥३४॥
तस्मिन् स भगवान् रामः स्निग्धया प्रिययेष्टया । रेमे स्वाराममधीराणामृषभः सीतया किल ॥३५॥
बुभुजे च यथाकालं कामान् धर्ममपीडयन् । वर्षपूगान् बहून् नृणामभिध्याताङ्घ्रिपल्लवः ॥३६॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां नवमस्कन्धे श्रीरामोपाख्याने एकादशोऽध्यायः ॥११॥

कीदृशीम् । प्रासादादिषु विन्यस्तैः स्थापितैः स्वर्णकलशैः मण्डिताम् । प्रासादो राजभवनम् । गोपुरं नगरद्वारम् । चैत्यं बुद्धशालास्थलं वा ॥ २७ ॥ पुनश्च । सवृन्तैः[1] पुष्पफलगुच्छसहितैः पूगैः । सुवाससां पट्टिकात,भिः अल्पध्वजाः । यत्रतत्र विन्यस्तैः आदर्शैं दर्पणैः । कृतानि कौतुकाय उत्सवाय तोरणानि[2] वन्दनमालिका यस्याम् ॥ २८ ॥ तं रामम् उपेयुः उपजग्मु. । अर्ह्यते ऽनेनेति अर्हणं पूजासामग्री पाणौ येषां ते तथाभूताः सन्तः आशिषः आशीर्वादान् युयुजुः । प्राक् वराहावतारे इमां पृथ्वीम् ॥२९॥ ततः स्त्रियो नराश्च चिरागतं पतिं वीक्ष्य हर्म्याणि आरुह्य कुसुमैः तम् अवाकिरन् आच्छादयामासुरित्यन्वयः । उत्सृष्टाः त्यक्ता गृहाः तत्कार्याणि यामिस्ताः ॥ ३० ॥ पूर्वराजभिः इक्ष्वाकुप्रभृतिभिः जुष्टं सेवितम् । कोशाः रत्नादयः तैराढ्यं समृद्धम् । अनर्घ्या अमूल्या उरवो बहवः परिच्छदाः सामग्र्यो यस्मिन् तत् ॥३१॥ पुनश्च । विद्रुममया उदुम्बरा देहल्यो येषु तैः द्वारैः मण्डितमिति तृतीयान्तानामत्रैवान्वयः कार्यः । भ्राजन्तो ये स्फटिकाः तन्मयीभिः ॥ ३२ ॥ पट्टिकाभिः[3] वितानैः । अंशुकैः किरणैः । चिदित्यव्ययं क्वचिदर्थे । क्वचित् वैदूर्यस्तम्भादिषु उल्लासैः उज्ज्वलैः मुक्ताफलैः मौक्तिकैः मण्डितमिति योज्यम् । कान्ता कमनीयाः कामोपपत्तयः भोगसाधनानि ताभिः । मण्डनैः अलङ्कारैः भूषणानि भूषयन्तीति तैः स्त्रीपुंसैः जुष्टम्। संकाशैः तुल्यैः ॥३४॥ तस्मिन् स्वभवने । स्निग्धया स्नेहमूर्त्या तया सह रेमे इत्यन्वयः । स्वारामाः आत्मारामाः ते च ते धीराः ज्ञानिनः तेषाम् ऋषभः प्रियः ॥३५॥ धर्ममपीडयन् अत्यजन् कामान् विषयान् बुभुजे । नृभिः अभिध्यातौ अङ्घ्रिपल्लवौ यस्य सः ॥ पूगान् समूहान् ॥ ३६ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे गूढार्थदीपिन्यामेकादशोऽध्यायः ॥ २ ॥

---

१. अत्र वकारघटितः पाठः । 'वृन्तः प्रसववन्धनम्' इत्यमरात् ।
२. तोरणोऽस्त्री वहिर्द्वारं तथा वन्दनमालिका: ।
३. लाक्षयां च वितानेऽपि पट्टिकाल्पध्वजंऽशुके इति निरुक्तिः ।

अथ द्वादशोऽध्यायः

कुशस्य चातिथिस्तस्मान्निषधस्तत्सुतो नभः। पुण्डरीकोऽथ तत्पुत्रः क्षेमधन्वाऽभवत्ततः ॥१॥
देवानीकस्ततोऽनीहः परियात्रोऽथ तत्सुतः। ततो बलस्थलस्तस्माद्वज्रनाभोऽर्कसम्भवः ॥२॥
खगणस्तत्सुतस्तस्माद् विधृतिश्चाभवत् सुतः। ततो हिरण्यनाभोऽभूद्योगाचार्यस्तु जैमिनेः ॥३॥
शिष्यः कौसल्य आध्यात्मं याज्ञवल्क्योऽध्यगाद् यतः। योगं महोदयमृषिर्हृदयग्रन्थिभेदकम् ॥४॥
पुष्यो हिरण्यनाभस्य ध्रुवसंधिस्ततोऽभवत्। सुदर्शनोऽथाग्निवर्णः शीघ्रस्तस्य मरुः सुतः ॥५॥
योऽसावास्ते योगसिद्धः कलापग्राममाश्रितः। कलेरन्ते सूर्यवंशं नष्टं भावयिता पुनः ॥६॥
तस्मात् प्रसुश्रुतस्तस्य संधिस्तस्याप्यमर्षणः। महस्वांस्तत्सुतस्तस्माद् विश्वसाह्वोऽन्वजायत ॥७॥
ततः प्रसेनजित् तस्मात् तक्षको भविता पुनः। ततो बृहद्बलो यस्तु पित्रा ते समरे हतः ॥८॥
एते हीक्ष्वाकुभूपाला अतीताः शृण्वनागतान्। बृहद्बलस्य भविता पुत्रो नाम बृहद्रणः ॥९॥
उरुक्रियस्ततस्तस्य वत्सवृद्धो भविष्यति। प्रतिव्योमस्ततो भानुर्दिवाको वाहिनीपतिः ॥१०॥
सहदेवस्ततो वीरो बृहदश्वोऽथ भानुमान्। प्रतीकाश्वो भानुमतः सुप्रतीकोऽथ तत्सुतः ॥११॥
भविता मरुदेवोऽथ सुनक्षत्रोऽथ पुष्करः। तस्यान्तरिक्षस्तत्पुत्रः सुतपास्तदमित्रजित् ॥१२॥
बृहद्राजस्तु तस्यापि बर्हिस्तस्मात् कृतञ्जयः। रणञ्जयस्तस्य सुतः सञ्जयो भविता ततः॥१३॥
तस्माच्छाक्योऽथ शुद्धोदो लाङ्गलस्तत्सुतः स्मृतः। ततः प्रसेनजित् तस्मात् क्षुद्रको भविता ततः१४

द्वादशे कुशवंशस्तु सुमित्रान्तो निरूप्यते।
एवमिक्ष्वाकुपुत्रस्य विकुक्षेर्वंश ईरितः॥ १ ॥

रामपुत्रस्य कुशस्य अतिथिः पुत्रः। तस्य निषधः। तस्य नभः। तस्य पुण्डरीकः। तस्य च क्षेमधन्वा ॥१॥ तस्य देवानीकः। तस्य अनीहः। तस्य पारियात्रः। तस्य बलस्थलः। तस्य वज्रनाभः स च अर्कस्यांशात् संभवो जन्म यस्य सः तथाभूतः ॥२॥ तस्य खगणः। तस्य विधृतिः। तस्य हिरण्यनाभः स च जैमिनेः शिष्यः सन् योगाचार्योऽभूत। यतो हिरण्यनाभात् कोशलदेशवासी ऋषिः आध्यात्मं योगं प्राप्तवान्। महान् उदयो मोक्षलक्षणो यस्मात् तम्। ग्रन्थिः वासनालक्षणः ॥३॥४॥ हिरण्यनाभस्य पुत्रः ध्रुवसन्धिः। तस्य सुदर्शनः तस्य अग्निवर्णः। तस्य शीघ्रः तस्य पुत्रो मरुः ॥ ५ ॥ यो मरुः कलापग्रामं बदरिकाश्रमस्थम् आश्रितः आश्रित्य स्थितः सूर्यवंशं भावयिता प्रवर्तयिष्यते ॥६॥ मरोः प्रसुश्रुतः तस्य अधमर्षणः। तस्य महस्वान्। तस्य विश्वसाहः तस्य प्रसेनजित् तस्य तक्षकः ॥७॥ ततः तस्य इत्यर्द्धम्। तक्षकस्य पुत्रो बृहद्बलः। पित्रा अभिमन्युना ॥८॥ अनागतान् 'आगामिनः ॥९॥ तस्य बृहद्रणस्य पुत्रः उरुक्रियः तस्य वत्सवृद्धः तस्य प्रतिव्योमः। तस्य भानुः। तस्य दिवाकः स च सेनापतिः ॥ १० ॥ ततो दिवाकात् सहदेवः तस्य बृहदश्वः तस्य भानुमान् तस्य प्रतीकाश्वः तस्य सुप्रतीकः ॥११॥ अथ सुप्रतीकात् मरुदेवः तस्य सुनक्षत्रः तस्य पुष्करः तस्य अन्तरिक्षः तस्य सुतपाः तस्य अमित्रजित् ॥ १२ ॥ तस्य अमित्रजितः बृहद्राजः तस्य बर्हिः तस्य कृतञ्जयः तस्य रणञ्जयः तस्य संजयो भविता ॥ १३ ॥ तस्मादित्यर्द्धम्। तस्मात् संजयात् शाक्यः तस्य शुद्धोदः तस्य लाङ्गलः

रणको भविता तस्मात् सुरथस्तनयस्ततः । सुमित्रो नाम निष्ठान्त एते बार्हद्बलान्वयाः ॥१५॥
इक्ष्वाकूणामयं वंशः सुमित्रान्तो भविष्यति । यतस्तं प्राप्य राजानं संस्थां प्राप्स्यति वै कलौ ॥१६॥

इति श्रीमद्भागवते महापुराणे परमहंस्यां संहितायां नवमस्कन्धे इक्ष्वाकुवंशवर्णनं नाम द्वादशोऽध्यायः ॥१२॥

अथ त्रयोदशोऽध्यायः

श्रीशुक उवाच

निमिरिक्ष्वाकुतनयो वसिष्ठमवृतर्त्विजम् । आरभ्य सत्रं सोऽप्याह शक्रेण प्राग्वृतोऽस्मि भोः ॥१॥
तं निर्वर्त्यागमिष्यामि तावन्मां प्रतिपालय । तूष्णीमासीद् गृहपतिः सोऽपीन्द्रस्याकरोन्मखम् ॥२॥
निमिश्चलमिदं विद्वान् सत्रमारभतात्मवान् । ऋत्विग्भिरपरैस्तावन्नागमद् यावता गुरुः ॥३॥
शिष्यव्यतिक्रमं वीक्ष्य निर्वर्त्य गुरुरागतः । अशपत् पतताद् देहो निमेः पण्डितमानिनः ॥४॥
निमिः प्रतिददौ शापं गुरवेऽधर्मवर्तिने । तवापि पतताद् देहो लोभाद् धर्ममजानतः ॥५॥
इत्युत्ससर्ज स्वं देहं निमिरध्यात्मकोविदः । मित्रावरुणयोर्जज्ञे उर्वश्यां प्रपितामहः ॥६॥
गन्धवस्तुषु तद्देहं निधाय मुनिसत्तमाः । समाप्ते सत्रयागेऽथ देवानूचुः समागतान् ॥७॥
राज्ञो जीवतु देहोऽयं प्रसन्नाः प्रभवो यदि । तथेत्युक्ते निमिः प्राह मा भून्मे देहबन्धनम् ॥८॥
यस्य योगं न वाञ्छन्ति वियोगभयकातराः । भजन्ति चरणाम्भोजं मुनयो हरिमेधसः ॥९॥

॥ १४ ॥ तस्य प्रसेनजित् तस्य क्षुद्रकः तस्य रणकः तस्य सुरथः तस्य सुमित्रो भविता । स च निष्ठा वंशस्य स्थितिः तस्या अन्तोऽवधिभूतः । बृहद्बलवंशीयाः ॥ १५ ॥ संस्थां समाप्तिम् । तं सुमित्रम् प्राप्य ॥ १६ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे गूढार्थदीपिन्यां द्वादशोऽध्यायः ॥ १२ ॥

निमेरिक्ष्वाकुपुत्रस्य वंशमुक्त्वा त्रयोदशे ।
ब्रह्मज्ञांश्च नृपानन्ते सूर्यवंशः समाप्यते ॥

अवृत वव्रे । सोऽपि वसिष्ठोऽपि इन्द्रेण प्राक् अहं वृतोऽस्मीत्याह । भो निमे ॥ १ ॥ तम् इन्द्रमखं निर्वर्त्य समाप्य यावत् नागमिष्यामि तावत् मां प्रतिपालय प्रतीक्षस्व । गृहपतिः निमिः ॥ २ ॥ इदं जीवनं चलं नश्वरं विद्वान् जानन् अन्यैः वसिष्ठेतरैः सत्रमारब्धवान् । तावत् पूर्वमेव ॥ ३ ॥ व्यतिक्रमम् आज्ञोल्लङ्घनम् । निर्वर्त्य यज्ञं समाप्य । पतताद् पततु इति अशपत् ॥ ४ ॥ लोभात् इन्द्रात् मत्तश्च उभयतो दक्षिणारूपात् ॥ ५ ॥ उत्ससर्ज तत्याज । कोविदो निपुणः । वृद्धप्रपितामहो वसिष्ठः । उर्वशीदर्शनात् मित्रावरुणयोः स्खलितं रेतः ताभ्यां कुम्भे निषिक्तं तस्मादगस्त्यसहितो वसिष्ठो जज्ञे । तथा च श्रुतिः कुम्भे रेतः सिषिचतुः समानम्[२] ॥ ६ ॥ वस्तुषु गन्धवासिततैलादिषु । मुनिसत्तमा ऋत्विजः ॥ ७ ॥ यदि प्रभवः वरदाने समर्था यूयं तर्हि देहः जीवतु ॥ ८ ॥ मुनयो विवेकिनः योगं न वाञ्छन्ति किन्तु भजन्ति इति योज्यम् । यस्य देहस्य । हरौ मेधा बुद्धिः येषां ते मुनयः । यद्वा । हरति यद्विषयिणी मेधा, संसारमिति तस्य

---

१. वसिष्ठस्य शक्तिः तस्य पराशरः तस्य व्यासः तस्य शुकः पुत्रः इत्यनुक्रमात् वसिष्ठः शुकस्य वृद्धप्रपितामहो ज्ञेयः ।

२. समानं समकालम् ।

देहं नावरुरुत्सेऽहं दुःखशोकभयावहम् । सर्वत्रास्य यतो मृत्युर्मत्स्यानामुदके यथा ॥१०॥

देवा ऊचुः

विदेह उष्यतां कामं लोचनेषु शरीरिणाम् । उन्मेषणनिमेषाभ्यां लक्षितोऽध्यात्मसंस्थितः ॥११॥
अराजकभयं नृणां मन्यमाना महर्षयः । देहं ममन्थुः स्म निमेः कुमारः समजायत ॥१२॥
जन्मना जनकः सोऽभूद् वैदेहस्तु विदेहजः । मिथिलो मथनाज्जातो मिथिला येन निर्मिता ॥१३॥
तस्मादुदावसुस्तस्य पुत्रोऽभून्नन्दिवर्धनः । ततः सुकेतुस्तस्यापि देवरातो महीपते ॥१४॥
तस्माद् बृहद्रथस्तस्य महावीर्यः सुधृत्पिता । सुधृतेर्धृष्टकेतुर्वै हर्यश्वोऽथ मरुस्ततः ॥१५॥
मरोः प्रतीपकस्तस्माज्जातः कृतिरथो यतः । देवमीढस्तस्य सुतो विश्रुतोऽथ महाधृतिः ॥१६॥
कृतिरातस्ततस्तस्मान्महारोमाथ तत्सुतः । स्वर्णरोमा सुतस्तस्य ह्रस्वरोमा व्यजायत ॥१७॥
ततः सीरध्वजो जज्ञे यज्ञार्थं कर्षतो महीम् । सीता सीराग्रतो जाता तस्मात् सीरध्वजः स्मृतः १८
कुशध्वजस्तस्य पुत्रस्ततो धर्मध्वजो नृपः । धर्मध्वजस्य द्वौ पुत्रौ कृतध्वजमितध्वजौ ॥१९॥
कृतध्वजात् केशिध्वजः खाण्डिक्यस्तु मितध्वजात् । कृतध्वजसुतो राजन्नात्मविद्याविशारदः ॥२०॥
खाण्डिक्यःकर्मतत्त्वज्ञो भीतः केशिध्वजाद् द्रुतः । भानुमांस्तस्य पुत्रोऽभूच्छतद्युम्नस्तु तत्सुतः ।२१।
शुचिस्तत्तनयस्तस्मात् सनद्वाजस्ततोऽभवत् । ऊर्ध्वकेतुः सनद्वाजादजोऽथ पुरुजित्सुतः ॥२२॥
अरिष्टनेमिस्तस्यापि श्रुतायुस्तत्सुपार्श्वकः । ततश्चित्ररथो यस्य क्षेमधिर्मिथिलाधिपः ॥२३॥
तस्मात् समरथस्तस्य सुतः सत्यरथस्ततः । आसीदुपगुरुस्तस्मादुपगुप्तोऽग्निसम्भवः ॥२४॥
वस्वनन्तोऽथ तत्पुत्रो युयुधो यत्सुभाषणः । श्रुतस्ततो जयस्तस्माद् विजयोऽस्मादृतः सुतः ।२५।

टिप्पणीः ॥ ९ ॥ नावरुरुत्से ग्रहीतुं नेच्छामि । दुःखादीनि आवहति प्रापयतीति तथा । अस्य देहिनः । सर्वत्र जले महाजलचरात् स्थले जलाभावाच्च मृत्युः ॥१०॥ उष्यतां स्थीयताम् । अध्यात्मं चक्षुः तत्र संस्थितः सन् तत्प्रवर्तकत्वेन लक्षितो भविष्यति 'चक्षुरध्यात्मभुच्यते' इति महाभारतात् । सूक्ष्मशरीरं वा ॥११॥१२॥ जन्मना असाधारणेन जनयतीति जनकः । मथनेन जननमस्येति अस्मिन्नर्थे मिथिलेति निपातनम् । शवानां शयनमस्मिन् इति श्मशानमिति वत् ॥ १३ ॥ तस्मात् जनकात् ॥ १४ ॥ तस्मात् देवरातात् । तस्य बृहद्रथः । तस्य महावीर्यः यस्य सुधृतिः तस्य धृष्टिकेतुः तस्य हर्यश्वः तस्य मरुनामकः पुत्रः ॥ १५ ॥ तस्मात् प्रतीपकात् कृतिरथः तस्य देवमीढः तस्य विश्रुतः तस्य महाधृतिः पुत्रः ॥ १६ ॥ तस्य कृतिरातः तस्य महारोमा तस्य स्वर्णरोमा तस्य ह्रस्वरोमा ॥१७॥ तस्य सीरध्वजः । कर्षतः सतः यस्य सीराग्रतो लाङ्गलाग्रात् सीता जाता 'सोरा लाङ्गलपद्धतिः' इति कोशात् ॥ १८ ॥ तस्य सीरध्वजस्य कुशध्वजः ततो धर्मध्वजः तस्य पुत्रद्वयम् कृतेति ॥१९॥ सुतः केशिध्वजः ॥२०॥ द्रुतः पलायितः । तस्य केशिध्वजस्य भानुमान् तस्य शतद्युम्नोऽभूत् ॥ २१ ॥ तस्य शुचिः तस्य सनद्वाजः तस्य ऊर्ध्वकेतुः तस्य अजः तस्य पुरुजित् तस्य अरिष्टनेमिः तस्य सुपार्श्वकः तस्य चित्ररथः तस्य क्षेमधिः ॥ २२ ॥ २३ ॥ तस्य समरथः तस्य सत्यरथः तस्य उपगुरुः तस्य उपगुप्तः स च अग्नेरंशः ॥ २४ ॥ उपगुप्तस्य वस्वनन्तः तस्य युयुधानः तस्य सुभाषणः तस्य श्रुतः तस्य जयः तस्य विजयः तस्य ऋतनामकः पुत्रोऽभूत् ॥ २५ ॥ ऋतस्य शुनकः तस्य वीतहव्यः तस्य धृतिः तस्य बहुलाश्वः

शुनकस्तत्सुतो जज्ञे वीतहव्यो धृतिस्ततः । बहुलाश्वो धृतेस्तस्य कृतिरस्य महावशी ॥२६॥
एते वै मैथिला राजन्नात्मविद्याविशारदाः । योगेश्वरप्रसादेन द्वन्द्वैर्मुक्ता गृहेष्वपि ॥२७॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां नवमस्कन्धे निमिवंशानुवर्णनं नाम त्रयोदशोऽध्यायः ॥१३॥

अथ चतुर्दशोऽध्यायः

श्रीशुक उवाच

अथातः श्रूयतां राजन् वंशः सोमस्य पावनः । यस्मिन्नैलादयो भूपाः कीर्त्यन्ते पुण्यकीर्तयः ॥१॥
सहस्रशिरसः पुंसो नाभिह्लदसरोरुहात् । जातस्यासीत् सुतो धातुरत्रिः पितृसमो गुणैः ॥२॥
तस्य दृग्भ्योऽभवत् पुत्रः सोमोऽमृतमयः किल । विप्रौषध्युडुगणानां ब्रह्मणा कल्पितः पतिः ॥३॥
सोऽयजद् राजसूयेन विजित्य भुवनत्रयम् । पत्नीं बृहस्पतेर्दर्पात् तारां नामाऽरद्बलात् ॥४॥
यदा स देवगुरुणा याचितोऽभीक्ष्णशो मदात् । नात्यजत् तत्कृते जज्ञे सुरदानवविग्रहः ॥५॥
शुक्रो बृहस्पतेर्द्वेषादग्रहीत् सासुरोडुपम् । हरो गुरुसुतं स्नेहात् सर्वभूतगणावृतः ॥६॥
सर्वदेवगणोपेतो महेन्द्रो गुरुमन्वयात् । सुरासुरविनाशोऽभूत् समरस्तारकामयः ॥७॥

तस्य कृतिः तस्य च महावशी पुत्रः ॥ २६ ॥ एते पूर्वोक्ताः जनकादयः खाण्डिक्यं विना । आदिता पञ्चशिखासुर्यादयः । द्वन्द्वैः रागद्वेषादिभिः । गृहस्था अपि आत्मारामा जीवन्मुक्ता इत्यर्थः । योगेश्वरा याज्ञवल्क्यादयः ॥ २७ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे गूढार्थदीपिन्यां त्रयोदशोऽध्यायः ॥ १३ ॥

एवं त्रयोदशाध्यायैः सूर्यवंशो निरूपितः ।
वर्ण्यते चन्द्रवंशो हि शेषाध्यायैरतः परम् ॥ १ ॥
चतुर्दशे गुरोः पत्न्यां तारायां सोमजात् बुधात् ।
ऐलो जातः स उर्वश्यां षट् पुत्रान् समजीजनत् ॥ २ ॥

इतः परमासमाप्ति चन्द्रवंशो निरुप्यते । पुंसो नारायणस्य नाभिकमलात् जातस्य धातुः अत्रिरासीत् ॥ १ ॥ २ ॥ तस्य अत्रेः दृग्भ्यः आनन्दाश्रुभ्यः सोमोऽभूत् । सङ्गकाले आनन्दाश्रूणां निःसरणात् तथोक्तिः । न चैवं चन्द्रमा मनसो जातः इति श्रुतिविरोधः शंक्यः तस्यैवात्र जन्मान्तरकथनान्नानुपपत्तेः । पतिः पोषकः वृद्धिकरत्वात् । उडुगणा नक्षत्राणि ॥ ३ ॥ दर्पात् पतित्वगर्वात् । बलात् प्रसह्य भार्याहरणं च स्वज्येष्ठभ्रातुरुतथ्यस्य भार्यागमनादेव जातमिति ब्रह्मवैवर्ते ॥ ४ ॥ अभीक्ष्णशः पुनः पुनः । तत्कृते तन्निमित्तम् ॥ ५ ॥ सासुरः शुक्रः उडुपं चन्द्रम् । गुरोः अङ्गिरसः सुतं वृहस्पतिम् । हरस्तु सर्वविद्यानामादिगुरुः न चास्यान्यगुरुत्वं संघटते 'ईशानः सर्वविद्यानाम्' इत्युक्तेः अतो गृणाति उपदिशतीति लोकगुरुरिति व्याख्येयम्[1] ॥ ६ ॥ अन्वयात् अनुससार । तारैव तारका तस्या हेतोरागतः प्राप्तः तारकामयः 'मयट् च' इति हेतुवाचकादागत-

---

१. यद्वा । दक्षापमानात् सत्यामन्तर्हितायां तच्छोकेन शिवो लीलार्थं स्वज्ञानं विस्मृतवानिव प्रतीयते तदा कृष्णप्रेरितोऽङ्गिरास्तं बोधयामासेति ब्रह्मवैवर्तोक्तेर्यथाकथञ्चिदौपचारिकं तस्य गुरुत्वमायाति तदनुसारेणेयमुक्तिर्बोध्या न वस्तुतः सर्वलोकगुरुः शिवः । गुरुःमुख्यो महादेवः इति वचनात् ।

निवेदितोऽथाङ्गिरसा सोमं निर्भर्त्स्य विश्वकृत् । तारां स्वभर्त्रे प्रायच्छदन्तर्वत्नीमवैत् पतिः ॥८॥
त्यज त्यजाशु दुष्प्रज्ञे मत्क्षेत्रादाहितं परैः । नाहं त्वां भस्मसात् कुर्यां स्त्रियं सांतानिकः सति॥९॥
तत्याज व्रीडिता तारा कुमारं कनकप्रभम् । स्पृहामाङ्गिरसश्चक्रे कुमारे सोम एव च ॥१०॥
ममायं न तवेत्युच्चैस्तस्मिन् विवदमानयोः । पप्रच्छुर्ऋषयो देवा नैवोचे व्रीडिता तु सा ॥११॥
कुमारो मातरं प्राह कुपितोऽलीकलज्जया । किं न वोचस्यसद्वृत्ते आत्मावद्यं वदाशु मे ॥१२॥
ब्रह्मा तां रह आहूय समप्राक्षीच्च सान्त्वयन् । सोमस्येत्याह शनकैः सोमस्तं तावदग्रहीत् ॥१३॥
तस्यात्मयोनिरकृत बुध इत्यभिधां नृप । बुद्ध्या गम्भीरया येन पुत्रेणाऽऽपोडुराण्मुदम् ॥१४॥
ततः पुरूरवा जज्ञे इलायां य उदाहृतः । तस्य रूपगुणौदार्यशीलद्रविणविक्रमान् ॥१५॥
श्रुत्वोर्वशीन्द्रभवने गीयमानान् सुरर्षिणा । तदन्तिकमुपेयाय देवी स्मरशरार्दिता ॥१६॥
मित्रावरुणयोः शापादापन्ना नरलोकताम् । निशम्य पुरुषश्रेष्ठं कन्दर्पमिव रूपिणम् ।
धृतिं विष्टभ्य ललना उपतस्थे तदन्तिके ॥१७॥
स तां विलोक्य नृपतिर्हर्षेणोत्फुल्ललोचनः । उवाच श्लक्ष्णया वाचा देवीं हृष्टतनूरुहः ॥१८॥

राजोवाच

स्वागतं ते वरारोहे आस्यतां करवाम किम् । संरमस्व मया साकं रतिर्नौ शाश्वतीः समाः॥१९॥

उर्वश्युवाच

कस्यास्त्वयि न सज्जेत मनो दृष्टिश्च सुन्दर । यदङ्गान्तरमासाद्य च्यवते ह रिरंसया ॥२०॥
एतावुरणकौ राजन् न्यासौ रक्षस्व मानद । संरंस्ये भवता साकं श्लाघ्यः स्त्रीणां वरः स्मृतः॥२१॥

इत्यर्थे मयट् । यद्वा । तारका तारा एव आमयः नाशकरो रोगो यस्मिन् सः ॥ ७ ॥ निवेदितो विज्ञापितः विश्वकृत् ब्रह्मा स्वभर्त्रे बृहस्पतये प्रायच्छत् अदापयत् । पतिः बृहस्पतिः तां पत्नीम् अन्तर्वत्नीं गर्भवतीमवुध्यत ॥ ८ ॥ परैः शत्रुभिः आहितं स्थापितं गर्भं मत्क्षेत्रात् आशु त्यज । हे सति । स्त्रीत्वान्न ते दोषः । सान्तानिकः सन्तानार्थी ॥ ९ ॥ तस्मिन् पुत्रनिमित्ते विवदमानयोः गुरुचन्द्रयोः । सा तारा ॥ ११ ॥ अलीकं कुकर्म 'अलीकमप्रियेऽपि स्यात्' इति कोशात् । वोचसि । वुच् परिभाषणे भ्वादिः । आत्मावद्यं निजदोषम् । 'अवद्यं पापदोषयोः' इति निरुक्तिः ॥ १२ ॥ रह एकान्ते सान्त्वयन् आश्वासयन् । प्रसह्य बलात् परपुरुषसंगो न दोषावह इत्येवं रूपेण ॥ १३ ॥ आत्मयोनिः ब्रह्मा अभिधाम् अकृत नाम कृतवान् । गम्भीरया सूक्ष्मया उडुराट् चन्द्रः मुदम् आप प्राप्तवान् ॥ १४ ॥ तत इति युग्मम् । ततो बुधात् । उदाहृतः प्रथमाध्याये । तस्य पुरूरवसः रूपादीन् श्रुत्वा उर्वशी तदन्तिकमुपेयायेत्यन्वयः । स्मरार्दिता कामपीडिता ॥ १५ ॥ १६ ॥ ताभ्यां रत्यर्थं प्रार्थिता सा च नाङ्गीचकार तदा मनुष्यस्त्वां भोक्ष्यतीति सा शप्तेति पुराणान्तरे । नरलोकतां नरलोकम् आपन्ना प्राप्ता । धृतिं विष्टभ्य धैर्यमवलम्ब्य तदन्तिके उपतस्थे स्थितवती ॥१७॥ स पुरुरवाः । उत्फुल्ले विकसिते लोचने यस्य सः । श्लक्ष्णया मधुरया । हृष्टतनूरुहः रोमाञ्चितः ॥ १८ ॥ आस्यताम् उपविश्यताम् । साकं सह । शाश्वतीः समाः बहून् सम्वत्सरान् ॥१९॥ कस्याः स्त्रियः मनः न सज्जेत नासक्तं भवेत् सर्वस्या अपीत्यर्थः । यस्य अङ्गान्तर वक्षःस्थलं प्राप्य मनः च्यवते विकृतीभवति । ह हर्षे ॥२०॥

घृतं मे वीर भक्ष्यं स्यान्नेक्षे त्वान्यत्र मैथुनात् । विवाससं तत् तथेति प्रतिपेदे महामनाः ॥२२॥
अहो रूपमहो भावो नरलोकविमोहनम् । को न सेवेत मनुजो देवीं त्वां स्वयमागताम् ॥२३॥
तया स पुरुषश्रेष्ठो रमयन्त्या यथार्हतः । रेमे सुरविहारेषु कामं चैत्ररथादिषु ॥२४॥
रममाणस्तया देव्या पद्मकिञ्जल्कगन्धया । तन्मुखामोदमुषितो मुमुदेऽहर्गणान् बहून् ॥२५॥
अपश्यन्नुर्वशीमिन्द्रो गन्धर्वान् समचोदयत् । उर्वशीरहितं मह्यमास्थानं नातिशोभते ॥२६॥
ते उपेत्य महारात्रे तमसि प्रत्युपस्थिते । उर्वश्या उरणौ जह्रुर्न्यस्तौ राजनि जायया ॥२७॥
निशम्याऽऽक्रन्दितं देवी पुत्रयोर्नीयमानयोः । हतास्म्यहं कुनाथेन नपुंसा वीरमानिना ॥२८॥
यद्विस्रम्भादहं नष्टा हृतापत्या च दस्युभिः । यः शेते निशि संत्रस्तो यथा नारी दिवा पुमान् ॥२९॥
इति वाक्सायकैर्विद्धः प्रतोत्त्रैरिव कुञ्जरः । निशि निस्त्रिंशमादाय विवस्त्रोऽभ्यद्रवद् रुषा ॥३०॥
ते विसृज्योरणौ तत्र व्यद्योतन्त स्म विद्युतः । आदाय मेषावायान्तं नग्नमैक्षत सा पतिम् ॥३१॥
ऐलोऽपि शयने जायामपश्यन् विमना इव । तच्चित्तो विह्वलः शोचन् बभ्रामोन्मत्तवन्महीम् ॥३२॥
स तां वीक्ष्य कुरुक्षेत्रे सरस्वत्यां च तत्सखीः । पञ्च प्रहृष्टवदनाः प्राह सूक्तं पुरूरवाः ॥३३॥
अहो जाये तिष्ठ तिष्ठ घोरे न त्यक्तुमर्हसि । मां त्वमद्याप्यनिर्वृत्य वचांसि कृणवावहै ॥३४॥
सुदेहोऽयं पतत्यत्र देवि दूरं हृतस्त्वया । खादन्त्येनं वृका गृध्रास्त्वत्प्रसादस्य नास्पदम् ॥३५॥

उर्वश्युवाच

मा मृथाः पुरुषोऽसि त्वं मा स्म त्वाद्युर्वृका इमे । क्वापि सख्यं न वै स्त्रीणां वृकाणां हृदयं यथा ३६

उरणौ मेषौ । न्यासौ निक्षेपभूतौ । हे स्व आत्मीय ! संरस्ये रमणं करिष्ये यावदिमौ भवान् रक्षिता तावदेव । श्लाघ्यः रतिसमर्थत्वलक्षणः न जात्यादि ॥२१॥ मैथुनादन्यत्र त्वां विवाससं नग्नं नेक्षिष्ये तथा सति गमिष्यामीत्यर्थः । महामनाः पुरूरवा तत् कथनं तथास्तु इति कृत्वा प्रतिपेदे स्वीकृतवान् ॥२२॥ रूपं सौन्दर्यम् । भावः हावभावकटाक्षादिः । नरलोकं विमोहयति आकर्षयतीति तथा ॥२३॥ यथार्हतः प्रेमपूर्वकं रमयन्त्या क्रीडन्त्या तथा सह कामं यथेच्छं रेमे इत्यन्वयः ॥२४॥ किञ्जल्कस्य गन्ध इव देहगन्धो यस्यास्तया । तस्या मुखामोदेन निःश्वासगन्धेन मुषितः प्रलोभितः सन् अहर्गणान् एकषष्टिसहस्रवर्षपर्यन्तम् मुमुदे । विष्णुपुराणात् ॥ २५ ॥ समनोदयत् प्रेरयामास । मह्यं मम आस्थानं सभा ॥ २६ ॥ ते गन्धर्वाः महारात्रे मध्यरात्रे तमसि अन्धकारे प्राप्ते सति जायया न्यस्तौ निक्षेपभूतौ उरणौ जह्रुः अपहृतवन्तः ॥ २७ ॥ पुत्रयोः मेषयोः आक्रन्दितं रोदनम् । नपुंसा नपुंसकेन । अवीरमपि वीरं मन्यते तेन हतास्मि वञ्चितास्मि ॥ २८ ॥ यस्य विस्रम्भात् वीरोऽयमिति विश्वासात् । नष्टा नष्टेव जाता । पुमान् सन्नपि यथा नारी तथा निशि शेते सन्त्रस्तः सन् । वस्तुतः अयं दिवैव पुमान तु रात्रौ ॥ २९ ॥ सायकैः वाणै विद्धः ताडितः । प्रतोत्रैः अंकुशैः कुञ्जरो हस्तीव । निस्त्रिंशः खड्गः । विवस्त्रो नग्नः ॥३०॥ ते गन्धर्वाः मेषौ विसृज्य जग्मुरिति शेषः । तत्र तदैव विद्युतोऽपि व्यद्योतन्त प्रकाशं चक्रुः । पतिं नग्नमैक्षत अतो नियमभङ्गात् सा स्वर्लोकं गतेति ज्ञेयमत्र ॥ ३१ ॥ शयने शय्यायाम् । विमनाः खिन्नचित्तः ॥३२॥ स पुरूरवाः सरस्वतीतटे तामुर्वशीं पञ्च तत्सखीश्च वीक्ष्य सूक्तं प्राहेत्यन्वयः ॥३३॥ हे घोरे कठोरहृदये । माम् अनिर्वृत्य तृप्तमकृत्वा त्यक्तुं नार्हसि । आगच्छ अद्यापि इदानीमेव आवां वचांसि कृणवावहै । गुप्तवार्ता करवावहै ॥ ३४ ॥ अयं ममेति शेषः । दूरं हृतः दूरतस्त्यक्तः उपेक्षित इत्यर्थः । अत्रैव पतिष्यति

स्त्रियो ह्यकरुणाः क्रूरा दुर्मर्षाः प्रियसाहसाः। घ्नन्त्यल्पार्थेऽपि विस्रब्धं पतिं भ्रातरमप्युत ॥३७॥
विधायाऽलीकविस्रम्भमज्ञेषु त्यक्तसौहृदाः। नवं नवमभीप्सन्त्यः पुंश्चल्यः स्वैरवृत्तयः ॥३८॥
संवत्सरान्ते हि भवानेकरात्रं मयेश्वर। वत्स्यत्यपत्यानि च ते भविष्यन्त्यपराणि भोः ॥३९॥
अन्तर्वत्नीमुपालक्ष्य देवीं स प्रययौ पुरम्। पुनस्तत्र गतोऽब्दान्ते उर्वशीं वीरमातरम्।
उपलभ्य मुदा युक्तः समुवास तया निशाम् ॥४०॥
अथैनमुर्वशी प्राह कृपणं विरहातुरम्। गन्धर्वानुपधावेमांस्तुभ्यं दास्यन्ति मामिति ॥४१॥
तस्य संस्तुवतस्तुष्टा अग्निस्थालीं ददुर्नृप। उर्वशीं मन्यमानस्तां सोऽबुध्यत चरन् वने ॥४२॥
स्थालीं न्यस्य वने गत्वा गृहानाध्यायतो निशि। त्रेतायां सम्प्रवृत्तायां मनसि त्रय्यवर्तत ॥४३॥
स्थालीस्थानं गतोऽश्वत्थं शमीगर्भं विलक्ष्य सः। तेन द्वे अरणी कृत्वा उर्वशीलोककाम्यया ॥४४॥
उर्वशीं मन्त्रतो ध्यायन्नधरारणिमुत्तराम्। आत्मानमुभयोर्मध्ये यत् तत् प्रजननं प्रभुः ॥४५॥
तस्य निर्मन्थनाज्जातो जातवेदा विभावसुः। त्रय्या स विद्यया राज्ञा पुत्रत्वे कल्पितस्त्रिवृत् ४६
तेनाऽयजत यज्ञेशं भगवन्तमधोक्षजम्। उर्वशीलोकमन्विच्छन् सर्वदेवमयं हरिम् ॥४७॥
एक एव पुरा वेदः प्रणवः सर्ववाङ्मयः। देवो नारायणो नान्य एकोऽग्निर्वर्ण एव च ॥४८॥
पुरूरवस एवासीत् त्रयी त्रेतामुखे नृप। अग्निना प्रजया राजा लोकं गान्धर्वमेयिवान् ॥४९॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां नवमस्कन्धे ऐलोपाख्याने चतुर्दशोऽध्यायः ॥ १४ ॥

गृध्राश्च एवं खादिष्यन्ति त्वत्कृपाया आस्पदं विषयो न स्यात् ॥ ३५ ॥ मा मृथाः न म्रियस्व धैर्यमावह। वृका इन्द्रियलक्षणाः त्वां न अद्युः न भक्षयेयुः। यतस्त्वं पुरुषोऽसि संयमं कर्तुमर्हसीति भावः। यथा वृकाणां हृदयं क्रूरं तथा स्त्रीणामपीति योज्यम् ॥३६॥ दुर्मर्षाः असहनशीलाः प्रिये निमित्ते साहसं हठाचरणम् यासां ताः विस्रब्धं विश्वासप्राप्तम्। उत अप्यर्थे ॥३७॥ अलीकविस्रब्धं कपटविश्वासम्। स्वैरवृत्तयः स्वेच्छाचारिण्यः ॥ ३८ ॥ हे ईश्वर स्वामिन्। मया सह ॥३९॥ अन्तर्वत्नीमिति सार्द्धम्। अन्तर्वत्नीं गर्भवतीम् उपालभ्य ज्ञात्वा ययौ। पुनः तया सह समुवास सुरतसुखमनुभूतवान् ॥४०॥ एवं पुरूरवसम्। इमान् उपधाव आराधय ॥४१॥ तस्य पुरूरवसः तुष्टा गन्धर्वा अग्निस्थालीम् अग्न्याधारपात्रम्। कामान्धतया उर्वशीम् मन्यमानः किन्तु संगसमये नेयमुर्वशी किन्तु तत्प्राप्तिसाधनमित्यबुध्यतेति योज्यम् ॥४२॥ न्यस्य वने निधाय तामेव निशि ध्यायतः सतः तस्य मनसि त्रयी वेदत्रयी कर्मत्रोत्रिका अवर्तत प्रादुरभूत् ॥ ३३ ॥ शम्या गर्भे जातम् अश्वत्थं विलक्ष्य अस्मिन्नग्निरस्तीति ज्ञात्वा तेन द्वे अरणी मन्थनकाष्ठे कृत्वा अग्निं ममन्थेति शेषः ॥ ४४ ॥ अधरारणिमुर्वशीम् उत्तरारणिमात्मानम् उभयोर्मध्ये यत्काष्ठं तत् प्रजननं पुत्रं च ध्यायन् निर्ममन्थेति शेषः ॥ ४५ ॥ विभावसुः अग्निः त्रय्या विहितेन आधानसंस्कारेण स त्रिवृत्[1] त्रिरूपः सन् पुत्रत्वे कल्पितः पुण्यलोकप्रापकत्वात्। तस्य तेन ऐलेन। जातं वेदो धनं भोग्यं यस्मात् ॥ ४६ ॥ तेन त्रिवृदग्निना। यज्ञेशं यज्ञफलदातारम् ॥ ४७ ॥ पुरा कृतयुगे। सर्वासां वाचां बीजभूतः। ऊँकार एव सर्वा वाक् इति श्रुतेः। वर्णश्च एक एव हंसो नाम ॥४८॥ त्रेतामुखे आरम्भे प्रजया पुत्रभूतेन गन्धर्वलोकम् एयिवान् प्राप्तवान् ॥ ४९ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे गूढार्थदीपिन्यां चतुर्दशोऽध्यायः।

---

१. त्रिभिर्वर्तते इति त्रिवृत्। आहवनीयाग्निः गार्हपत्याग्निः दक्षिणाग्निरिति त्रयः।

अथ पञ्चदशोऽध्यायः

श्रीशुक उवाच

ऐलस्य चोर्वशीगर्भात् षडासन्नात्मजा नृप । आयुः श्रुतायुः सत्यायू रयोऽथ विजयो जयः ॥ १ ॥
श्रुतायोर्वसुमान् पुत्रः सत्यायोश्च श्रुतञ्जयः । रयस्य सुत एकश्च जयश्च तनयोऽमितः ॥२॥
भीमस्तु विजयस्याथ काञ्चनो होत्रकस्ततः । तस्य जह्नुः सुतो गङ्गां गण्डूषीकृत्य योऽपिबत् ।
जह्नोस्तु पूरुस्तत्पुत्रो बलकाश्चात्मजोऽजकः ॥३॥
ततः कुशः कुशस्यापि कुशाम्बुर्मूर्तयो वसुः । कुशनाभश्च चत्वारो गाधिरासीत् कुशाम्बुजः ॥४॥
तस्य सत्यवतीं कन्यामृचीकोऽयाचत द्विजः । वरं विसदृशं मत्वा गाधिर्भार्गवमब्रवीत् ॥५॥
एकतः श्यामकर्णानां हयानां चन्द्रवर्चसाम् । सहस्रं दीयतां शुल्कं कन्यायाः कुशिका वयम् ॥६॥
इत्युक्तस्तन्मतं ज्ञात्वा गतः स वरुणान्तिकम् । आनीय दत्त्वा तानश्वानुपयेमे वराननाम् ॥७॥
स ऋषिः प्रार्थितः पत्न्या श्वश्र्वा चापत्यकाम्यया । श्रपयित्वोभयैर्मन्त्रैश्चरुं स्नातुं गतो मुनिः ॥८॥
तावत् सत्यवती मात्रा स्वचरुं याचिता सती । श्रेष्ठं मत्वा तयायच्छन्मात्रे मातुरदत् स्वयम् ।९।
तद् विज्ञाय मुनिः प्राह पत्नीं कष्टमकारषीः । घोरो दण्डधरः पुत्रो भ्राता ते ब्रह्मवित्तमः ॥१०॥
प्रसादितः सत्यवत्या मैवं भूदिति भार्गवः । अथ तर्हि भवेत् पौत्रो जमदग्निस्ततोऽभवत् ॥११॥

ऐलवंशभवो गाधिर्यत्सुतासुतजो बली ।
रामोऽहन् हैहयं क्रोधादिति पञ्चदशे कथा ॥ १ ॥

ऐलस्य पुरूरवसः ॥ १ ॥ एकः एकसंज्ञकः । अमितः अमितसंज्ञकः ॥ २ ॥ अथ भीमस्य । तस्य होत्रकस्य । यो जह्नुः गण्डूषीकृत्य योगवलेन चुलकीत्य ॥ ३ ॥ जह्नोरिति सार्द्धम् । कुशस्यापि चत्वारः पुत्राः । कुशाम्बुपुत्रः गाधिरासीत् । कुशाम्बुना इन्द्रसदृशपुत्रप्राप्त्यर्थं तपः कृतं ततो मत्तुल्यो मद्राज्यं हरिष्यतीति शंकया स्वांशेन गाधिनाम्ना तत्पुत्रो जातः तस्मादेव इन्द्रः कौशिक इत्युक्तं हरिवंशे ॥ ४ ॥ तस्य गाधेः । ऋचीकनामा । विसदृशम् अमनुरूपम् । भार्गवम् ऋचीकम् ॥ ५ ॥ वर्चो दीप्तिः । शुल्कं वैवाहिकम् । कुशिकाः कौशिका महाकुलीना वयमतो नाल्पद्रव्येणेयं प्राप्या । एतच्च वरपरीक्षार्थमिति ज्ञेयम् ॥ ७ ॥ इति गाधिना उक्तः स ऋचीकः अश्वान् आनीय दत्त्वा च सत्यवतीम् उपयेमे विवाहितवान् ॥७॥ ऋषिः ऋचीकः पत्न्या श्वश्र्वा तन्मात्रा च उभयैः मन्त्रैः पत्न्यै ब्राह्मैः श्वश्र्वै क्षात्रैः श्रपयित्वा पाचयित्वा स्वयं तु गतः ।८। तया मात्रा याचिता सत्यवती श्रेष्ठं[1] स्वचरुं मात्रे अयच्छत् प्रादात् मातुश्चरुं[2] स्वयमदत् आदत् भक्षितवती ॥ ९ ॥ मुनिः ऋचीकः । कष्टम् अनुचितम् । घोरः क्रूरप्रकृतिकः । भ्राता विश्वामित्रः ॥ १० ॥ एवं मा भूदिति प्रसादितः

---

१. ब्राह्ममन्त्राभिमन्त्रितम् ।
२. क्षात्रमन्त्राभिमन्त्रितम् ।
३. इक्ष्वाकुपुत्रो रेणुश्च तत्सुता रेणुका स्मृता इति हरिवंशे ।

सा चाभूत् सुमहापुण्या कौशिकी लोकपावनी । रेणोः सुतां रेणुकां वै जमदग्निरुवाह याम् ॥१२॥

तस्यां वै भार्गवऋषेः सुता वसुमदादयः । यवीयाञ्जज्ञ एतेषां राम इत्यभिविश्रुतः ॥१३॥

यमाहुर्वासुदेवांशं हैहयानां कुलान्तकम् । त्रिःसप्तकृत्वो य इमां चक्रे निःक्षत्रियां महीम् ॥१४॥

दुष्टं क्षत्रं भुवो भारमब्रह्मण्यमनीनशत् । रजस्तमोवृतमहन् फल्गुन्यपि कृतेऽंहसि ॥१५॥

राजोवाच

किं तदंहो भगवतो राजन्यैरजितात्मभिः । कृतं येन कुलं नष्टं क्षत्रियाणामभीक्ष्णशः ॥१६॥

श्रीशुक उवाच

हैहयानामधिपतिरर्जुनः क्षत्रियर्षभः । दत्तं नारायणस्यांशमाराध्य परिकर्मभिः ॥१७॥

बाहून् दशशतं लेभे दुर्धर्षत्वमरातिषु । अव्याहतेन्द्रियौजःश्रीतेजोवीर्ययशोबलम् ॥१८॥

योगेश्वरत्वमैश्वर्यं गुणा यत्राणिमादयः । चचाराव्याहतगतिर्लोकेषु पवनो यथा ॥१९॥

स्त्रीरत्नैरावृतः क्रीडन् रेवाम्भसि मदोत्कटः । वैजयन्तीं स्रजं बिभ्रद् रुरोध सरितं भुजैः ॥२०॥

विप्लावितं स्वशिबिरं प्रतिस्रोतःसरिज्जलैः । नामृष्यत् तस्य तद्वीर्यं वीरमानी दशाननः ॥२१॥

गृहीतो लीलया स्त्रीणां समक्षं कृतकिल्बिषः । माहिष्मत्यां संनिरुद्धो मुक्तो येन कपिर्यथा ॥२२॥

स एकदा तु मृगयां विचरन् विपिने वने । यदृच्छयाऽऽश्रमपदं जमदग्नेरुपाविशत् ॥२३॥

तस्मै स नरदेवाय मुनिरर्हणमाहरत् । ससैन्यामात्यवाहाय हविष्मत्या तपोधनः ॥२४॥

स वीरस्तत्र तद् दृष्ट्वा आत्मैश्वर्यातिशायनम् । तन्नाद्रियताग्निहोत्र्यां साभिलाषः स हैहयः ।२५।

भार्गवः ऋचीकः । यद्येवं तर्हि पौत्रस्तथाविधो भविता इत्याह स च परशुरामः । ततः सत्यवत्याः पुत्रः जमदग्निः शान्तस्वभावः ॥ ११ ॥ सेति युग्मम् । सा सत्यवती रेणोः इक्ष्वाकुपुत्रस्य । उवाह उपयेमे ॥ १२ ॥ तस्यां रेणुकायां भार्गवऋषेः जमदग्नेः कनीयान् कनिष्ठः ॥ १३ ॥ हैहयानां कार्तवीर्यादीनाम् । यो रामः त्रिः सप्तकृत्वः एकविंशतिवारान् ॥१४॥ भारं भारभूतं क्षत्रं क्षत्रियजातिम् अनीनशत् नाशयामास । फल्गुनि स्वल्पेऽपि अंहसि अपराधे कृते सति । 'अंहः पापापराधयोः' इति धरणिः ॥ १५ ॥ अजितात्मभिः दुरात्मभिः । भगवतः परशुरामस्य । येन अपराधेन अभीक्ष्णशः पुनः पुनः ॥ १६ ॥ दत्तं दत्तात्रेयं परिकर्मभिः परिचर्याभिः ॥ १७ ॥ दशशतं सहस्रम् । अरातिषु शत्रुषु दुर्धर्षत्वम् अपराजितत्वम् । इन्द्रियादीनां बलान्तं समाहारद्वन्द्वः ततोऽव्याहतशब्देन कर्मधारयसमासः । इन्द्रियम् इन्द्रियपाटवम् । ओजो बुद्धिबलम् । तेजः कान्तिः । वीर्यं पराक्रमः । बलं शारीरम् ॥ १८ ॥ यत् ऐश्वर्यं तदपि लेभे । यत्र ऐश्वर्ये । चचार विचचार ॥ १९ ॥ रेवाम्भसि नर्मदाजले । वैजयन्ती पञ्चरत्नमयीम् ॥२०॥ तस्य कार्तवीर्यस्य तद्वीर्यं शिबिराप्लावनरूपम् । प्रति प्रतीपं विपरीतं स्रोतःप्रवाहो यस्या सा तस्याः सरितः जलैः विप्लावितमालक्ष्येति योज्यम् नामृष्यत् न सेहे योद्धुमागमच्च ॥ २१ ॥ लीलया अनायासेन गृहीतः निरुद्धः पुनः मुक्तश्च यथा कपिः क्रीडया गृह्यते मुच्यते च तद्वत् । माहिष्मत्यां स्वपुर्याम् ॥ २२ ॥ यदृच्छया दैवेच्छया स कार्तवीर्यः मृगयामुद्दिश्य वने विचरन् । वेपन्ति प्रवेष्टुमपि कम्पन्ति जना अस्मिन्निति वनविशेषणम् अतो न पुनरुक्तिः । विजन इत्यपि पाठः ॥ २३ ॥ स मुनिः सैन्यादिसहिताय तस्मै नरदेवाय हविष्मत्या अर्हणमातिथ्यमाहरत् अकरोत् । वाहो वाहनम् ॥२४॥ स कार्तवीर्यः तत्र आश्रमे । आत्मनः

हविर्धानीमृषेर्दर्पान्नरान् हर्तुमचोदयत् । ते च माहिष्मतीं निन्युः सवत्सां क्रन्दतीं बलात् ॥२६॥
अथ राजनि निर्याते राम आश्रम आगतः । श्रुत्वा तत् तस्य दौरात्म्यं चुक्रोधाऽहिरिवाहतः ॥२७॥
घोरमादाय परशुं सतूणं चर्म कार्मुकम् । अन्वधावत दुर्धर्षो मृगेन्द्र इव यूथपम् ॥२८॥

तमापतन्तं भृगुवर्यमोजसा धनुर्धरं बाणपरश्वधायुधम् ।
ऐणेयचर्माम्बरमर्कधामभिर्युतं जटाभिर्ददृशे पुरीं विशन् ॥२९॥
अचोदयद्धस्तिरथाश्वपत्तिभिर्गदासिबाणर्ष्टिशतघ्निशक्तिभिः ।
अक्षौहिणीः सप्तदशातिभीषणास्ता राम एको भगवानसूदयत् ॥३०॥
यतो यतोऽसौ प्रहरत्परश्वधो मनोऽनिलौजाः परचक्रसूदनः ।
ततस्ततश्छिन्नभुजोरुकन्धरा निपेतुरुर्व्यां हतसूतवाहनाः ॥३१॥
दृष्ट्वा स्वसैन्यं रुधिरौघकर्दमे रणाजिरे रामकुठारसायकैः ।
विवृक्णचर्मध्वजचापविग्रहं निपातितं हैहय आपतद् रुषा ॥३२॥
अथार्जुनः पञ्चशतेषु बाहुभिर्धनुःषु बाणान् युगपत् स संदधे ।
रामाय रामोऽस्त्रभृतां समग्रणीस्तान्येकधन्वेषुभिराच्छिनत् समम् ॥३३॥
पुनः स्वहस्तैरचलान् मृधेऽङ्घ्रिपानुत्क्षिप्य वेगादभिधावतो युधि ।
भुजान् कुठारेण कठोरनेमिना चिच्छेद रामः प्रसभं त्वहेरिव ॥३४॥

स्वस्य ऐश्वर्यमतिशेते अतिक्रामति तथा अधिकमित्यर्थः तत् मुनेरैश्वर्यम् आतिथ्यं वा नाद्रियत् तस्मिन्नातुष्यत् अग्निहोत्र्यां होमधेनौ साभिलाषः तां ग्रहीतुं हैहयैः स्वकुल्यैः सहितः ॥२५॥ ऋषेः सकाशात् । ते च भटाः । हविः घृतादिकं धीयतेऽस्यामिति हविर्धानीं तां बलात् पुरीं निन्युः । क्रन्दतीम् आक्रोशन्तीम् वत्सं विनैवेति महाभारते ।२६। दौरात्म्यं दौर्जन्यम् । आहतः ताडितः सर्प इव ॥२७॥ सतूणं सतूणीरम् । चर्म ढाल इति । दुर्धर्षः अनतिक्रमणीयः । यूथपं गजेन्द्रम् ॥२८॥ पुरीं विशन् स्वयमर्जुनः ओजसा वेगेन आपतन्तं पृष्ठतः आगच्छन्तं तं भृगुवर्यं रामं ददृशे इत्यन्वयः । कीदृशम् । बाणपरशू आयुधे यस्य । पुनश्च । एणी मृगी तस्याः सम्बन्धि ऐणेयं चर्म कृष्णाजिनं अम्बरं यस्य । अर्कवत् धाम दीप्तिः यासां ताभिः जटाभिः युतम् ॥ २९ ॥ ततोऽर्जुनः सप्तदश अक्षौहिणीः सेनाः अचोदयत् प्रेषयामास ताः सर्वाः एक एव रामः असूदयत् नाशयामासेत्यन्वयः । कीदृशीः । हस्त्यादिभिः गदादिभिश्च भीषणाः । ऋष्टिः उभयतोधारखड्गः ॥ ३० ॥ असौ रामः यत्र यत्र सैन्ये विचक्रमे तत्र तत्र उर्व्यां वीरा निपेतुरित्यन्वयः । कथंभूतो रामः । प्रहरन् परश्वधो यस्य । मनोवायुवत् ओजो वेगो यस्य । परचक्र[1] शत्रुसैन्यं सूदयति नाशयतीति तथा । कथंभूता वीराः । छिन्ना भुजादयो येषाम् । हताः सूतादयो येषां ते । कन्धरा ग्रीवा । सूतः सारथिः ॥ ३१ ॥ रणाङ्गणे रामेण निपातितं स्वसैन्यं दृष्ट्वा हैहयोऽर्जुनः रुषा आपतत् योद्धुमाजगामेत्यन्वयः । कथंभूतं सैन्यम् । रामकुठारेण परशुना विवृक्णाः छिन्नाः चर्मादयो यस्य तत् । चर्म ढालवाच्यम् । विग्रहो देहः ॥ ३२ ॥ अथ सैन्यपातानन्तरम् सोऽर्जुनः पञ्चशतेषु धनुःषु तत्संख्याकैः बाहुभिः तत्संख्याकान् बाणान् युगपत् एकदैव सन्दधे योजयामास । रामाय रामं हन्तुम् । एकधन्वा रामः तानि धनूंषि समं तत्क्षणमेव अच्छिनत् ॥ ३३ ॥ पुनश्च अर्जुनः मृधे साधनभूतान् अचलान्

---

१. चक्रं सैन्यरथाङ्गयोः इति मेदिनी ।

कृत्तबाहोः शिरस्तस्य गिरेः शृङ्गमिवाहरत्। हते पितरि तत्पुत्रा अयुतं दुद्रुवुर्भयात् ॥३५॥
अग्निहोत्रीमुपावर्त्य सवत्सां परवीरहा। समुपेत्याश्रमं पित्रे परिक्लिष्टां समार्पयत् ॥३६॥
स्वकर्म तत्कृतं रामः पित्रे भ्रातृभ्य एव च। वर्णयामास तच्छ्रुत्वा जमदग्निरभाषत ॥३७॥
राम राम महाबाहो भवान् पापमकारषीत्। अवधीन्नरदेवं यत् सर्वदेवमयं वृथा ॥३८॥
वयं हि ब्राह्मणास्तात क्षमयार्हणतां गताः। यया लोकगुरुर्देवः पारमेष्ठ्यमगात् पदम् ॥३९॥
क्षमया रोचते लक्ष्मीर्ब्राह्मी सौरी यथा प्रभा। क्षमिणामाशु भगवांस्तुष्यते हरिरीश्वरः ॥४०॥
राज्ञो मूर्धाभिषिक्तस्य वधो ब्रह्मवधाद् गुरुः। तीर्थसंसेवया चांहो जह्यङ्गाच्युतचेतनः ॥४१॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां नवमस्कन्धे पञ्चदशोऽध्यायः ॥१५॥

अथ षोडशोऽध्यायः

श्रीशुक उवाच

पित्रोपशिक्षितो रामस्तथेति कुरुनन्दन। संवत्सरं तीर्थयात्रां चरित्वाऽऽश्रममाव्रजत् ॥१॥
कदाचिद् रेणुका याता गङ्गायां पद्ममालिनम्। गन्धर्वराजं क्रीडन्तमप्सरोभिरपश्यत ॥२॥
विलोकयन्ती क्रीडन्तमुदकार्थं नदीं गता। होमवेलां न सस्मार किंचिच्चित्ररथस्पृहा ॥३॥
कालात्ययं तं विलोक्य मुनेः शापविशङ्किता। आगत्य कलशं तस्थौ पुरोधाय कृताञ्जलिः ॥४॥

वृक्षांश्च उत्क्षिप्य उत्थाप्य अभिधावतः तस्य भुजान् प्रसभं बलात् युधि चिच्छेदेत्यन्वयः। केन। कठोरनेमिना तीक्ष्णधारेण कुठारेण। अहेः फणा इव इति विशेष्यमध्याहार्यम् ॥३४॥ कृत्तबाहोः छिन्नबाहोः तस्य अर्जुनस्य शिरः आहरत् चकर्त। शृङ्गं शिखरमिव। दुद्रुवुः पलायाञ्चक्रिरे ॥३५॥ परेषां शत्रूणां वीरान् हन्तीति परवीरहा रामः उपावर्त्य निवर्त्य पित्रे गां सम्यक् आर्पयत्। कीदृशीम्। परिक्लिष्टाम् इतस्ततः आकर्षणादिना खिन्नाम् ॥३६॥ स्वकर्म अर्जुनवधादिकम् ॥३७॥३८॥ अर्हणतां पूज्यताम्। देवो ब्रह्मा। परमेष्ठिन इदं पारमेष्ठ्यं ब्रह्मपदम् अगात् प्राप्तवान् ॥ ३९ ॥ सौरी सूर्यस्य प्रभेव। ब्राह्मी ब्राह्मणकुलसम्बन्धिनी ॥४०॥ मूर्ध्नि मस्तके समन्त्रैः[1] तीर्थजलैः अभिषिक्तो यः स मूर्धाभिषिक्तः चक्रवर्ती। मूर्धाभिषिक्तो नृपतौ ब्राह्मणे चक्रवर्तिनि इति निरुक्तेः। गुरुः गरीयान्। अच्युतचेतनः भगवच्चित्तः सन् अंहः पापं जहि। तीर्थं गंगा। न गङ्गया समं तीर्थं न भूतं न भविष्यति इति पुराणान्तरात्।

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे गूढादीपिन्यां पञ्चदशोऽध्यायः ॥ १५ ॥

षोडशेऽर्जुनदुष्पुत्रैर्जमदग्नौ हतेऽकरोत्।
रामो निःक्षत्रियां पृथ्वीं विश्वामित्रान्वयस्तथा ॥ १ ॥

पित्रा जमदग्निना उपशिक्षितः आदिष्टः रामः तथाऽस्तु इत्यङ्गीकृत्य तीर्थयात्रां चरित्वा कृत्वा ॥१॥ अप्सरोभिः सह ॥२॥ गन्धर्वराजस्य किञ्चिच्चित्रमये रथे स्पृहा दर्शनेच्छा यस्याः सा अतः होमवेलां न सस्मार-विस्मृतवतीत्यन्वयः। किञ्चित् काचित् कौतुकमय्येव ननु काममयी चित्ररथे स्पृहा यस्याः सा इत्यत्र ब्रह्माण्डपुराणं प्रमाणम् ॥३॥ कालात्ययं कालातिक्रमम्। कलशं पुरोधाय अग्रे निधाय तस्थौ ॥४॥ व्यभिचारं[1] होमवेलायाः

---

१. अत्र पतिपरिचरणव्यत्यय एव व्यभिचारो ज्ञेयः।

व्यभिचारं मुनिर्ज्ञात्वा पत्न्याः प्रकुपितोऽब्रवीत् । घ्नतैनां पुत्रकाः पापामित्युक्तास्ते न चक्रिरे॥५॥
रामः संचोदितः पित्रा भ्रातॄन् मात्रा सहावधीत् । प्रभावज्ञो मुनेः सम्यक् समाधेस्तपसश्च सः॥६॥
वरेणच्छन्दयामास प्रीतः सत्यवतीसुतः । वव्रे हतानां रामोऽपि जीवितं चास्मृतिं वधे ॥७॥
उत्तस्थुस्ते कुशलिनो निद्रापाय इवाञ्जसा । पितुर्विद्वांस्तपोवीर्यं रामश्चक्रे सुहृद्वधम् ॥८॥
येऽर्जुनस्य सुता राजन् स्मरन्तः स्वपितुर्वधम् । रामवीर्यपराभूता लेभिरे शर्म न क्वचित् ॥९॥
एकदाऽऽश्रमतो रामे सभ्रातरि वनं गते । वैरं सिसाधयिषवो लब्धच्छिद्रा उपागमन् ॥१०॥
दृष्ट्वाग्न्यगार आसीनमावेशितधियं मुनिम् । भगवत्युत्तमश्लोके जघ्नुस्ते पापनिश्चयाः ॥११॥
याच्यमानाः कृपणया राममात्राऽतिदारुणाः । प्रसह्य शिर उत्कृत्य निन्युस्ते क्षत्रबन्धवः ॥१२॥
रेणुका दुःखशोकार्ता निघ्नन्त्यात्मानमात्मना । राम रामेहि तातेति विचुक्रोशोच्चकैः सती॥१३॥
तदुपश्रुत्य दूरस्थो हा रामेत्यार्तवत् स्वनम् । त्वरयाऽऽश्रममासाद्य ददृशे पितरं हतम् ॥१४॥
तद्दुःखरोषामर्षार्तिशोकवेगविमोहितः । हा तात साधो धर्मिष्ठ त्यक्त्वास्मान् स्वर्गतो भवान् ॥
विलप्यैवं पितुर्देहं निधाय भ्रातृषु स्वयम् । प्रगृह्य परशुं रामः क्षत्रान्ताय मनो दधे ॥१६॥
गत्वा माहिष्मतीं रामो ब्रह्मघ्नविहतश्रियम् । तेषां स शीर्षभी राजन् मध्ये चक्रे महागिरिम्
तद्रक्तेन नदीं घोरामब्रह्मण्यभयावहाम् ॥१७॥
हेतुं कृत्वा पितृवधं क्षत्रेऽमङ्गलकारिणि । त्रिःसप्तकृत्वः पृथिवीं कृत्वा निःक्षत्रियां प्रभुः ।
समन्तपञ्चके चक्रे शोणितोदान् ह्रदान् नृप ॥१८॥

प्रागेव जलमानेष्यामीति स्वचनस्य व्यतिक्रमम् । हे पुत्रकाः एनां पापिनीं घ्नत मारयत इत्युक्तास्ते न चक्रिरे तस्या हननमिति शेषः ॥ ५ ॥ मुनेः पितुः तपसः सम्यक् प्रभावज्ञः ॥ ६ ॥ सत्यवतीसुतः जमदग्निः वरेण छन्दयामास वरार्थं प्रेरयामास । अध्ययनेन वसतीति वत् हेत्वर्थे तृतीया । जीवितं पुनर्जीवनम् । तेषामात्मवधे मत्कृते हनने अस्मृतिं च वव्रे ॥ ७ ॥ ते भ्रातरः कुशलिनः पुनर्जीवन्तः सन्तः उत्तस्थुः यथा निद्रान्ते । अञ्जसा झटिति । विद्वान् जानन् ॥८॥ पराभूताः पराजिताः शर्म सुखम् ॥९॥ सिसाधयिषवः प्रतिचिकीर्षवः । लब्धच्छिद्राः प्राप्तावसराः ॥ १० ॥ अग्न्यगारे अग्निशालायाम् । मुनिवधस्तु निरपराधरेणुकावधादेव जात इति ज्ञेयमत्र ॥११॥ याच्यमाना मैनं मारयतेति । उत्कृत्य छित्त्वा । कृती छेदने धातुः । क्षत्रबन्धवः क्षत्रियाधमाः ॥ १२ ॥ आत्मना हस्तेन आत्मानं वक्षः निघ्नन्ती ताडयन्ती । एहि आगच्छ इति विचुक्रोश आजुहाव । आ इह स्थिते ओमाङोश्चेति पररूपे गुणः ॥१३॥ तत् मात्रुक्तम् ॥ १४ ॥ तदिति युग्मम् । तत् तदा । दुःखादीनां वेगेन विमोहितः मूर्च्छितः । दुखं मानसम् । अमर्षोऽक्षमा । आर्तिः दैन्यम् । मनो दधे सङ्कल्पं चकार ॥ १६ ॥ क्षत्रं क्षत्रियकुलम् ॥ १५ ॥ १६ ॥ गत्वेति सार्द्धम् । ब्रह्मघ्नैः विहता श्रीःयस्याः । शिरोभिः गिरिं चक्रे रक्तेन नदीं च । ब्रह्मद्वेषिणां भयभावहति प्रापयतीति तथा ॥१७॥ अत्र नृपेत्येव पाठः साम्प्रदायिकः साधुः न तु नवेति तत्र [1]पञ्चह्लदनिर्देशेन भारतविरोधापत्तेः । अमङ्गयम् अन्यायः। त्रिःसप्तकृत्वः एकविंशतिवारान् ॥ १८ ॥ बर्हिषि[2] यज्ञे शिरः आनीय कायेन सन्धाय संयोज्य आत्मानं बिष्णुमयजदित्यन्वयः

---

१. समन्तपञ्चके पञ्च चकार रौधिरान् ह्रदान् । २. 'स्याद्बर्हिर्दर्भयज्ञयोः' इति धरणिः ।

पितुः कायेन संधाय शिर आदाय बर्हिषि । सर्वदेवमयं देवमात्मानमयजन्मखैः ॥१९॥
ददौ प्राचीं दिशं होत्रे ब्रह्मणे दक्षिणां दिशम् । अध्वर्यवे प्रतीचीं वै उद्गात्रे उत्तरां दिशम् ॥२०॥
अन्येभ्योऽवान्तरदिशः कश्यपाय च मध्यमाम् । आर्यावर्तमुपद्रष्ट्रे सदस्येभ्यस्ततः परम् ॥२१॥
ततश्चावभृथस्नानविधूताशेषकिल्बिषः । सरस्वत्यां ब्रह्मनद्यां रेजे व्यभ्र इवांशुमान् ॥२२॥
स्वदेहं जमदग्निस्तु लब्ध्वा संज्ञानलक्षणम् । ऋषीणां मण्डले सोऽभूत् सप्तमो रामपूजितः ॥२३॥
जामदग्न्योऽपि भगवान् रामः कमललोचनः । आगामिन्यन्तरे राजन् वर्तयिष्यति वै बृहत् ॥२४॥
आस्तेऽद्यापि महेन्द्राद्रौ न्यस्तदण्डः प्रशान्तधीः । उपगीयमानचरितः सिद्धगन्धर्वचारणैः ॥२५॥
एवं भृगुषु विश्वात्मा भगवान् हरिरीश्वरः । अवतीर्य परं भारं भुवोऽहन् बहुशो नृपान् ॥२६॥
गाधेरभून्महातेजाः समिद्ध इव पावकः । तपसा क्षात्रमुत्सृज्य यो लेभे ब्रह्मवर्चसम् ॥२७॥
विश्वामित्रस्य चैवासन् पुत्रा एकशतं नृप । मध्यमस्तु मधुच्छन्दा मधुच्छन्दस एव ते ॥२८॥
पुत्रं कृत्वा शुनःशेपं देवरातं च भार्गवम् । आजीगर्तं सुतानाह ज्येष्ठ एष प्रकल्प्यताम् ॥२९॥
यो वै हरिश्चन्द्रमखे विक्रीतः पुरुषः पशुः । स्तुत्वा देवान् प्रजेशादीन् मुमुचे पाशबन्धनात् ॥३०॥
यो रातो देवयजने देवैर्गाधिषु तापसः । देवरात इति ख्यातः शुनःशेपः स भार्गवः ॥३१॥
ये मधुच्छन्दसो ज्येष्ठाः कुशलं मेनिरे न तत् । अशपत् तान् मुनिः क्रुद्धो म्लेच्छा भवत दुर्जनाः ३२
स होवाच मधुच्छन्दाः सार्धं पञ्चाशता ततः । यन्नो भवान् संजानीते तस्मिंस्तिष्ठामहे वयम् ॥३३॥

मखैः इष्टिभिः ॥१९॥ ददौ इति स्पष्टम् ॥२०॥ अन्येभ्य ऋत्विग्भ्यः अवान्तर दिशः आग्नेय्याद्याः । मध्यमां मध्यभूमिम् कश्यपाय । ततः परम् अवशिष्टदेशम् । सदस्या विधिदर्शिनः । उपद्रष्टा न्यूनातिरिक्तकर्मद्रष्टा ॥२१॥ यज्ञान्त स्नानेन निवृत्तमशेषं किल्विषं यस्मात् । ब्रह्मदैवत्याम् । व्यभ्रः मेघानाच्छन्नः सूर्य इव ॥२२॥ संज्ञानं चैतन्यम् । २३ ॥ अन्तरे सावर्णिमन्वन्तरे । बृहत् ब्रह्म वेदं प्रवर्तयिष्यति ॥ २४ ॥ न्यस्तदण्डः त्यक्तदण्डः वधरूपो येन सः । अद्यापि चिरजीवित्वात् ॥२५॥ पर विपुलम् । तमेवाह नृपानिति ॥२६॥ गाधिः कुशाम्बुपुत्रः तस्मात् समिद्धः प्रज्वलितः अग्निरिव विश्वामित्रः । ब्रह्मवर्चसं ब्रह्मर्षित्वम् ॥२७॥ मध्यमः मधुच्छन्दा नाम तस्य प्राधान्यात् ते सर्वेऽपि तथैव ॥ ४८ ॥ अजीगर्तस्य मध्यमपुत्रं भृगुवंशीयं शुनःशेपसंज्ञं देवैः रातत्वात् दत्तप्राणत्वान् देवरातं च पुत्रत्वेनाङ्गीकृत्य विश्वामित्र आह एष युष्माभिः ज्येष्ठभ्रातृत्वेनाङ्गीक्रियतामिति । अजीगर्तस्य त्रयः पुत्रा आसन् ज्येष्ठे पितुः कनिष्ठे च मातु स्नेहात् मध्यमपुत्रः शुनःशेपः हरिश्चद्रमखार्थं विक्रीतः स च रुदन् विश्वामित्रपादयो पतितःतेन देवप्रसादकरं मन्त्रमुपदिश्य मृत्योः मोचितः ज्येष्ठपुत्रत्वेन स्वीकृतश्चेति कथानुसन्धेया ॥ २९ ॥ मुमुचे अमुच्यत । कर्मकर्तरि प्रयोगः ॥ ३० ॥ देवयजने वरुणयज्ञे देवैः रातो दत्तप्राणो यः भार्गवोऽपि स शुनःशेपः गाधिवंशेषु प्रसिद्धः तापसोऽभूदित्यन्वयः ॥ ३१ ॥ तेषु ज्येष्ठा ये पञ्चाशत् ते तस्य तत् ज्येष्ठत्वं कुशलमुचितं न मेनिरे हे दुर्जनाः म्लेच्छा[1] भवतेति अशपत् ॥ ३२ ॥ पञ्चाशता

---

१. म्लेच्छत्वं च । गोमांसभक्षकोय श्च वेदबाह्यं च भाषते ।
सर्वाचारपरिभ्रष्टो म्लेच्छ इत्यभिधीयते ॥
इति पुराणान्तरम् ॥

ज्येष्ठं मन्त्रदृशं चक्रुस्त्वामन्वञ्चो वयं स्म हि । विश्वामित्रः सुतानाह वीरवन्तो भविष्यथ ।
ये मानं मेऽनुगृह्णन्तो वीरवन्तमकर्त माम् ।।३४।।

एष वः कुशिका वीरो देवरातस्तमन्वित । अन्ये चाष्टकहारीतजयक्रतुमदादयः ।।३५।।

एवं कौशिकगोत्रं तु वैश्वामित्रैः पृथग्विधम् । प्रवरान्तरमापन्नं तद्धि चैवं प्रकल्पितम् ।।३६।।

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां नवमस्कन्धे षोडशोऽध्यायः ।। १६ ।।

अथ सप्तदशोऽध्यायः

यः पुरूरवसः पुत्र आयुस्तस्याभवन् सुताः नहुषः क्षत्रवृद्धश्च रजी रम्भश्च वीर्यवान् ।
अनेना इति राजेन्द्र शृणु क्षत्रवृधोऽन्वयम् ।।१।।

क्षत्रवृद्धसुतस्यासन् सुहोत्रस्यात्मजास्त्रयः । काश्यः कुशो गृत्समद इति गृत्समदादभूत् ।
शुनकः शौनको यस्य बह्वृचप्रवरो मुनिः ।।२।।

काश्यस्य काशिस्तत्पुत्रो राष्ट्रो दीर्घतमः पिता । धन्वन्तरिर्दैर्घतम आयुर्वेदप्रवर्तकः ।
यज्ञभुग्वासुदेवांशः स्मृतमात्रार्तिनाशनः ।।३।।

तत्पुत्रः केतुमानस्य जज्ञे भीमरथस्ततः । दिवोदासो द्युमांस्तस्मात् प्रतर्दन इति स्मृतः ।।४।।

कनिष्ठैः सह स मध्यमो मधुच्छन्दा ह स्फुटमुवाच हे पितः भवात् नोऽस्मान् यञ्ज्येष्ठत्वं कनिष्ठत्वं वा संजानीते आदिशति तस्मिन् तवादेशे वयं तिष्ठामः प्रकाशनस्थेयाख्ययोश्च इत्यात्मनेपदम् । हे पृथक् पदम् वा ॥ ३३ ॥ ज्येष्ठमिति सार्द्धम् । ज्येष्ठं शुनःशेषं मन्त्रद्रष्टारं चक्रुः वयं सर्वे त्वामन्वञ्चः अनुगता कनिष्ठाः स्म ये भवन्तः मे मानमादेशरूपमनुगृह्णन्तः स्वीकुर्वन्तः मां वीरवन्तं पुत्रवन्तमकर्त अकुर्वत अथ तस्मात् यूयमपि वीरवन्तो भविष्यथेति आशीर्वादः अन्यथा शापे तु अहमपुत्र एवाभविष्यमिति भावः ॥ ३४ । हे कुशिकाः । मम एष देवरातः वः युष्मदीयः भ्राता कौशिक एव यतो वीरो मम पुत्रः अतस्तमन्वित अनुसरत । अन्येऽपि अस्य अष्टकादयः पुत्रा अभवन् ॥ ३५ ॥ एवं वैश्वामित्रैः तत्पुत्रैः गोत्रं नानाप्रकारकं जातम् । कुतः । हि यस्मात् देवरातज्येष्ठत्वेन तत् गोत्रं देवरातप्रवरत्वेन कल्पितं प्रसिद्धमित्यर्थः ।

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे गूढार्थदीपिन्यां षोडशोऽध्यायः ।

ऐलज्येष्ठात्मजस्यायोश्चतुर्णां पञ्चमध्यतः ।
क्षत्रवृद्धादिपुत्राणां प्रोक्तः सप्तदशेऽन्वयः ।।

य इति सार्द्धम् । आयुनमिकः । अनेना इत्यन्तं पञ्च पुत्रा आसन् । क्षत्रवृधः क्षत्रवृद्धस्य । हलन्तस्य षष्ठ्यन्तं रूपम् ॥ १ ॥ क्षत्रवृद्धेति सार्द्धम् । गृत्समदात् शुनकः अभूदिति योज्यम् । यस्य शुनकस्य पुत्रः शौनकः । बह्वृचः ऋग्वेदी ॥ २ ॥ काश्येति सार्द्धम् । राष्ट्रः स च दीर्घतमसः पिता अर्थात् राष्ट्रस्य पुत्रः दीर्घतमा इत्यर्थः । अयं धन्वन्तरिः समुद्रोद्भूतादन्यः ॥ ३ ॥ तत्पुत्र इति युग्मम् । तत्पुत्रः धन्वन्तरिपुत्रः । तस्मात् दिवोदासात् द्युमान् पुत्रो जातः स एव प्रतर्दनादिकुवलयाश्वपर्यन्तैः पञ्चभिर्नामभिः प्रोक्तो भवति । तथा च । तृद् हिंसायामनादरे च धातुः । दुष्टनाशकत्वात् प्रतर्दनः । लोकप्रियत्वात् वत्स इति । सत्यपरत्वात् ऋतध्वजः

स एव शत्रुजिद् वत्स ऋतध्वज इतीरितः । तथा कुवलयाश्वेति प्रोक्तोऽलर्कादयस्ततः ॥५॥
षष्टिवर्षसहस्राणि षष्टिवर्षशतानि च । नालर्कादपरो राजन् मेदिनीं बुभुजे युवा ॥६॥
अलर्कात् संततिस्तस्मात् सुनीथोऽथ सुकेतनः । धर्मकेतुः सुतस्तस्मात् सत्यकेतुरजायत ॥७॥
धृष्टकेतुः सुतस्तस्मात् सुकुमारः क्षितीश्वरः । वीतिहोत्रस्य भर्गोऽतो भार्गभूमिरभून्नृपः ॥८॥
इतीमे काशयो भूपाः क्षत्रवृद्धान्वयायिनः ॥९॥
रम्भस्य रभसः पुत्रो गम्भीरश्चाक्रियस्ततः । तस्य क्षेत्रे ब्रह्म जज्ञे शृणु वंशमनेनसः ॥१०॥
शुद्धस्ततः शुचिस्तस्मात् त्रिककुद् धर्मसारथिः । ततः शान्तरयो जज्ञे कृतकृत्यः स आत्मवान् ॥११॥
रजेः पञ्चशतान्यासन् पुत्राणाममितौजसाम् । देवैरभ्यर्थितो दैत्यान् हत्वेन्द्रायाऽददाद् दिवम् १२
इन्द्रस्तस्मै पुनर्दत्त्वा गृहीत्वा चरणौ रजेः । आत्मानमर्पयामास प्रह्लादाद्यरिशङ्कितः ॥१३॥
पितर्युपरते पुत्रा याचमानाय नो ददुः । त्रिविष्टपं महेन्द्राय यज्ञभागान् समाददुः ॥१४॥
गुरुणा हूयमानेऽग्नौ बलभित् तनयान् रजेः । अवधीद् भ्रंशितान् मार्गान्न कश्चिदवशेषितः ॥१५॥
कुशात् प्रतिः क्षात्रवृद्धात् सञ्जयस्तत्सुतो जयः । ततः कृतः कृतस्यापि जज्ञे हर्यवनो नृपः ॥१६॥
सहदेवस्ततो हीनो जयसेनस्तु तत्सुतः । संकृतिस्तस्य च जयः क्षत्रधर्मा महारथः ।
क्षत्रवृद्धान्वया भूपाः शृणु वंशं च नाहुषात् ॥१७॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां नवमस्कन्धे चन्द्रवंशानुवर्णने सप्तदशोऽध्यायः ॥१७॥

इति । कुवलयं भूमण्डलम् अश्नुते यशसा व्याप्नोति अश्नाति भुङ्क्ते वा कुवलयाश्वेति पञ्च । ततो द्युमतः अलर्कादयो नृपा जज्ञिरे ॥ ५ ॥ अपरोऽन्यो नृपः भूमिं न बुभुजे इत्यन्वयः ॥ ६ ॥ अथ सुनीथात् । सुकुमार नामकः । अतो भर्गात् भार्गभूमिः ॥ ८ ॥ इतीति अर्द्धम् । काशयः काशिवंशजाः । काशेः प्रपितामहस्य क्षत्रवृद्धस्य अन्वयं वंशमयन्ते प्राप्नुवन्तीति ॥ ९ ॥ आयोःचतुर्थपुत्रस्य रंभस्य वंशमाह-ततः रभसात् गम्भीरः ततः अक्रियः । अत्र तत इति आवृत्या योज्यम् । तस्य अक्रियस्य क्षेत्रे भार्यायां ब्रह्म ब्रह्मकुलं जज्ञे । अनेनसः आयोः पञ्चमपुत्रस्य ॥ १० ॥ ततो धर्मसारथिः । केचित् त्रिककुद्विशेषणमाहुः स च शान्तरयः कृतकृत्यः यतः आत्मवान् ज्ञानी अतस्तस्य वंशोः नाभूत् ॥११॥ आयोः तृतीयपुत्रस्य वंशमाहः । स च रजिः देवैः प्रार्थितः सन् अपहृतां दिवं स्वर्गम् इन्द्राय अदात् ओजसां महाबलवताम् ॥ १२ ॥ तस्मै राजये ॥ १३ ॥ प्रह्लादेत्यत्र अतद्गुणसंविज्ञानो बहुव्रीहिः ॥ १३ ॥ पितरि रजौ उपरते मृते सति त्रिविष्टयं स्वर्गः समाददुः स्वयमेव जगृहुः ॥१४॥ अभिचारविधानेन अग्नौ हूयमाने सति बलभित् इन्द्र रजेः तनयान् अवधीत् । कथंभूतान् । मार्गात् भ्रंशितान् नास्तिकमतप्रवर्तकस्वोक्तसूत्रोपदेशेनेति हरिवंशे सूचितम् ॥ १५ ॥ सिंहावलोकन्यायेनाह-कुशादिति । क्षात्रवद्धात् क्षत्रवृद्धपौत्रात् कुशात् प्रतिसंज्ञकः पुत्रः तस्य संजयः तस्य जयः तस्य कृतः तस्य हर्यवनः ॥१६॥ सहदेव इति सार्द्धम् । ततो हर्यवनात् सहदेवः तस्य अहीनः तस्य जयसेनः तस्य संस्कृतिः तस्य जयः तस्य विशेषणद्वयम् क्षत्रेत्यादि । एते पूर्वोक्ता नृपाः क्षत्रवृद्धस्य वंशे जाता ॥ १७ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे गूढार्थदीपिन्यां सप्तदशोऽध्यायः ॥ १७ ॥

अथाष्टादशोऽध्यायः

श्रीशुक उवाच

यतिर्ययातिः संयातिरायतिर्वियतिः कृतिः । षडिमे नहुषस्यासन्निन्द्रियाणीव देहिनः ॥१॥

राज्यं नैच्छद् यतिः पित्रा दत्तं तत्परिणामवित् । यत्र प्रविष्टः पुरुष आत्मानं नावबुध्यते ॥२॥

पितरि भ्रंशिते स्थानादिन्द्राण्या धर्षणाद् द्विजैः । प्रापितेऽजगरत्वं वै ययातिरभवन्नृपः ॥३॥

चतसृष्वादिशद् दिक्षु भ्रातॄन् भ्राता यवीयसः । कृतदारो जुगोपोर्वीं काव्यस्य वृषपर्वणः ॥४॥

राजोवाच

ब्रह्मर्षिर्भगवान् काव्यः क्षत्रबन्धुश्च नाहुषः । राजन्यविप्रयोः कस्माद् विवाहः प्रतिलोमकः ॥५॥

श्रीशुक उवाच

एकदा दानवेन्द्रस्य शर्मिष्ठा नाम कन्यका । सखीसहस्रसंयुक्ता गुरुपुत्र्या च भामिनी ॥६॥

देवयान्या पुरोद्याने पुष्पितद्रुमसंकुले । व्यचरत् कलगीतालिनलिनीपुलिनेऽबला ॥७॥

ता जलाशयमासाद्य कन्याः कमललोचनाः । तीरे न्यस्य दुकूलानि विजह्रुः सिञ्चतीर्मिथः ॥८॥

वीक्ष्य व्रजन्तं गिरिशं सह देव्या वृषस्थितम् । सहसोत्तीर्य वासांसि पर्यधुर्व्रीडिताः स्त्रियः ॥९॥

शर्मिष्ठाऽजानती वासो गुरुपुत्र्याः समव्ययत् । स्वीयं मत्वा प्रकुपिता देवयानीदमब्रवीत् ॥१०॥

अहो निरीक्ष्यतामस्या दास्याः कर्म ह्यसाम्प्रतम् । अस्मद्धार्यं धृतवती शुनीव हविरध्वरे ॥११॥

यैरिदं तपसा सृष्टं मुखं पुंसः परस्य ये । धार्यते यैरिह ज्योतिः शिवः पन्थाश्च दर्शितः ॥१२॥

देवयानी च शर्मिष्ठा द्वयोरष्टादशे कथा ।
ययातेर्यत्र वृद्धत्वं कनिष्ठः पूरुरग्रहीत् ॥

इमे षट् पुत्राः आसन् । देहिनः जीवस्य इन्द्रियाणीव वशवर्तिनः ॥ १ ॥ तस्य राजस्य परिणामम् अनर्थमूलत्वं वेत्तीति तथा । आत्मानं परमात्मानं विस्मरति ॥२॥ इन्द्राण्याः धर्षणात् मैथुनार्थं याचनात् । द्विजैः अगस्त्यादिभिः स्थानात् स्वर्गात् पितरि भ्रंशिते पातिते सति पितरि नहुषे ॥ ३ ॥ भ्राता ययातिः यवीयसः कनिष्ठान् भ्रातॄन् आदिशत् पालनार्थमिति शेषः । काव्यस्य शुक्राचार्यस्य वृषपर्वणो दानवेन्द्रस्य च कन्याभ्यां कृतदारः कृतविवाहः सन् उर्वीं पृथ्वी जुगोप । दारपदमत्र विवाहं लक्षयति ॥ ४ ॥ नाहुषः ययातिः क्षत्रबन्धुः क्षत्रियाधमः निम्नकोटिकः[1] । प्रतिलोमकः विपरीतः ॥५॥ एकदेति युग्मम् गुरुपुत्र्या देवयान्या च सह पुरोद्याने व्यचरदिति द्वयोरन्वयः । भामिनी अभिनवयौवना कथंभूते । संकुले व्याप्ते । पुनश्च । कलगीता मधुरस्वना अलयो भ्रमरा येषु तानि नलिनीपुलिनानि यत्र ॥ ६ ॥ ७ ॥ सिञ्चन्तीः सिञ्चन्त्याः मिथः परस्परं विजह्रुः विहारं चक्रुः ॥ ८ ॥ सहसा झटिति उत्तीर्य जलात् निर्गत्य । पर्यधुः धारयामासुः ॥ ९ ॥ वासः स्वीयं मत्वा समव्ययत् संवेष्टितवती । व्यय संवरणे धातुः । तदा इदमब्रवीत् ॥१०॥ असाम्प्रतमनुचितम् । अस्मद्धार्यं वासः । ब्राह्मणै ग्राह्यं हविः यथा शुनी । अध्वरे यज्ञे ॥११॥ यैः भृगुमरीच्यादिभिः इदं विश्वं सृष्टम् । ये च ब्राह्मणाः परस्य भगवतो मुखम् । यैः ज्योतिः ब्रह्म हृदि धार्यते । यैश्च पन्था वेदमार्गश्च दर्शितः ॥ १२ ॥ किञ्च याव

---

१. ब्राह्मणकन्याग्रहणात् ।

यान् वन्दन्त्युपतिष्ठन्ते लोकनाथाः सुरेश्वराः । भगवानपि विश्वात्मा पावनः श्रीनिकेतनः ॥१३॥
वयं तत्रापि भृगवः शिष्योऽस्या नः पिताऽसुरः । अस्मद्धार्यं धृतवती शूद्रो वेदमिवाऽसती ॥१४॥
एवं शपन्तीं शर्मिष्ठा गुरुपुत्रीमभाषत । रुषा श्वसन्त्युरङ्गीव धर्षिता दष्टदच्छदा ॥१५॥
आत्मवृत्तमविज्ञाय कत्थसे बहु भिक्षुकि । किं न प्रतीक्षसेऽस्माकं गृहान् बलिभुजो यथा ॥१६॥
एवंविधैः सुपरुषैः क्षिप्त्वाऽऽचार्यसुतां सतीम् । शर्मिष्ठा प्राक्षिपत् कूपे वास आदाय मन्युना ॥१७॥
तस्यां गतायां स्वगृहं ययातिर्मृगयां चरन् । प्राप्तो यदृच्छया कूपे जलार्थी तां ददर्श ह ॥१८॥
दत्त्वा स्वमुत्तरं वासस्तस्यै राजा विवाससे । गृहीत्वा पाणिना पाणिमुज्जहार दयापरः ॥१९॥
तं वीरमाहौशनसी प्रेमनिर्भरया गिरा । राजंस्त्वया गृहीतो मे पाणिः परपुरञ्जय ।
हस्तग्राहोऽपरो मा भूद् गृहीतायास्त्वया हि मे ॥२०॥
एष ईशकृतो वीर सम्बन्धो नौ न पौरुषः । यदिदं कूपलग्नाया भवतो दर्शनं मम ॥२१॥
न ब्राह्मणो मे भविता हस्तग्राहो महाभुज । कचस्य बार्हस्पत्यस्य शापाद् यमशपं पुरा ॥२२॥
ययातिरनभिप्रेतं दैवोपहृतमात्मनः । मनस्तु तद्गतं बुद्ध्वा प्रतिजग्राह तद्वचः ॥२३॥
गते राजनि सा वीरे तत्र स्म रुदती पितुः । न्यवेदयत् ततः सर्वमुक्तं शर्मिष्ठया कृतम् ॥२४॥
दुर्मना भगवान् काव्यः पौरोहित्यं विगर्हयन् । स्तुवन् वृत्तिं च कापोतीं दुहित्रा स ययौ पुरात् ॥२५॥
वृषपर्वा तमाज्ञाय प्रत्यनीकविवक्षितम् । गुरुं प्रसादयन् मूर्ध्ना पादयोः पतितः पथि ॥२६॥

वंदन्ति प्रणमन्ति उपतिष्ठन्ते स्तुवन्ति च भगवानपि तथैव करोति ॥ १३ ॥ तत्रापि पूज्येष्वपि पूज्या वयं भृगवः । अस्मद्धार्यं वस्त्रं धृतवती इयम् असती राक्षसी । तदनुचितम् ॥ १४॥ धर्षिता तिरस्कृता श्वसन्ती श्वासान् मुञ्चन्ती । दष्टो दच्छदः ओष्ठो यया ॥१५॥ आत्मवृत्तं भिक्षुकवृत्तित्वम् । कत्थसे आत्मानं श्लाघसे । बलिभुजः श्वान इव किमस्माकं गृहान् न प्रतीक्षसे ॥१६॥ सुपरुषैः अतिकठोरैः वचोभिः क्षिप्त्वा तिरस्कृत्य । वासः तत्परिधृतं वस्त्रमाच्छिद्य तां कूपे प्राक्षिपत् पातयामास ॥१७॥ चरन् कुर्वन् । तस्यां शर्मिष्ठायाम् । तां देवयानीं नग्नां ददर्श । हेत्याश्चर्ये ॥ १८ ॥ उत्तरम् उत्तरीयम् । तस्यै देवयान्यै विवाससे नग्नायै । कूपात् उज्जहार निःसारितवान् । तमिति सार्द्धम् । औशनसी शुक्रपुत्री तं ययातिमाह । निर्भरया पूर्णया । परेषां शत्रूणां पुराणि जयतीति सम्बोधनम् ॥२०॥ नौ आवयोः सम्बन्धः ईशकृतः अतो न प्रातिलोम्यदोषः ॥ २१ ॥ ब्राह्मणो न भविता बृहस्पतिपुत्रस्य कचस्य शापात् । कुतः । यं कचं पुरा अहम् अशपम् । अत्रेयं कथाऽनुसन्धेया बृहस्पतिपुत्रः कचः शुक्रात् सञ्जीवनीं विद्यामधीतवान् तदा देवयानी तं वरीतुमुद्यताऽभूत् स च गुरुपुत्री त्वं मम पूज्या इत्युक्त्वा न तामुदवहत् ततः सा कुपिता तं शशाप तव विद्या निष्फला भवतु इति । सोऽपि तां शशाप तव पतिः ब्राह्मणो न स्यादिति ॥२२॥ अनभिप्रेतम् अशास्त्रीयत्वात् किन्तु दैवेन उपहृतं प्रापितं बुद्ध्वा तद्वचः प्रतिजग्राह स्वीचकार तत्पितुरादेशेनेति ज्ञेयम् ॥२३॥ स्मेति भूतवृत्तमनुस्मृत्येत्यर्थः । पितुः समीपमेत्य यत् तया उक्तं यच्च कृतं तत्सर्वमेवेति योज्यम् ॥२४॥ दुर्मनाः खिन्नचित्तः काव्यः श्रीशुक्राचार्यः । कापोतीं कपोतवत्कणकणग्रहणरूपां उञ्छवृत्तिम् । दुहित्रा सह पुरात् ययौ निश्चक्राम ॥२५॥ प्रत्यनीका देवास्तेषां विवक्षितं साहाय्यकरणं यस्य तम् । पथि गच्छन्तं प्रसादयन् पादयोः पतितोऽभूत् ॥२६॥ भार्गवः शुक्रः व्याचष्ट उवाच । कामः मनोरथः ।

क्षणार्धमन्युर्भगवान् शिष्यं व्याचष्ट भार्गवः । कामोऽस्याः क्रियतां राजन् नैनां त्यक्तुमिहोत्सहे २७

तथेत्यवस्थिते प्राह देवयानी मनोगतम् । पित्रा दत्ता यतो यास्ये सानुगा यातु मामनु ॥२८॥

स्वानां तत् संकटं वीक्ष्य तदर्थस्य च गौरवम् । देवयानीं पर्यचरत् स्त्रीसहस्रेण दासवत् ॥२९॥

नाहुषाय सुतां दत्त्वा सह शर्मिष्ठयोशनाः । तमाह राजञ्छर्मिष्ठामाधास्तल्पे न कर्हिचित् ॥३०॥

विलोक्यौशनसीं राजञ्छर्मिष्ठा सप्रजां क्वचित् । तमेव वव्रे रहसि सख्याः पतिमृतौ सती ॥३१॥

राजपुत्र्यार्थितोऽपत्ये धर्मं चावेक्ष्य धर्मवित् । स्मरञ्छुक्रवचः काले दिष्टमेवाभ्यपद्यत ॥३२॥

यदुं च तुर्वसुं चैव देवयानी व्यजायत । द्रुह्युं चानुं च पूरुं च शर्मिष्ठा वार्षपर्वणी ॥३३॥

गर्भसम्भवमासुर्या भर्तुर्विज्ञाय मानिनी । देवयानी पितुर्गेहं ययौ क्रोधविमूर्च्छिता ॥३४॥

प्रियामनुगतः कामी वचोभिरुपमन्त्रयन् । न प्रसादयितुं शेके पादसंवाहनादिभिः ॥३५॥

शुक्रस्तमाह कुपितः स्त्रीकामाऽनृतपूरुष । त्वां जरा विशतां मन्द विरूपकरणी नृणाम् ॥३६॥

ययातिरुवाच

अतृप्तोऽस्म्यद्य कामानां ब्रह्मन् दुहितरि स्म ते । व्यत्यस्यतां यथाकामं वयसा योऽभिधास्यति

इति लब्धव्यवस्थानः पुत्रं ज्येष्ठमवोचत । यदो तात प्रतीच्छेमां जरां देहि निजं वयः ॥३८॥

मातामहकृतां वत्स न तृप्तो विषयेष्वहम् । वयसा भवदीयेन रंस्ये कतिपयाः समाः ॥३९॥

यदुरुवाच

नोत्सहे जरसा स्थातुमन्तरा प्राप्तया तव । अविदित्वा सुखं ग्राम्यं वैतृष्ण्यं नैति पूरुषः ॥४०॥

तुर्वसुश्चोदितः पित्रा द्रुह्युश्चानुश्च भारत । प्रत्याचख्युरधर्मज्ञा ह्यनित्ये नित्यबुद्धयः ॥४१॥

एनां मातृहीनाम् ॥ २७ ॥ अवस्थिते स्वीकृते सति । मनोगतं स्वामीष्टम् यतो यत्र यास्ये तत्र सा शर्मिष्ठा अनुगा दासी भूत्वा मामनुगच्छतु ॥ २८ ॥ तत् ततः शुक्रात् स्वानामसुराणाम् । तत् ततः प्रसन्नात् अर्थगौरवं कार्यसाफल्यं च वीक्ष्य शर्मिष्ठा दासीवत् तां पर्यचरत् सेवितवती सोऽपि तत्पिता दासवत् पर्यचरत् इत्यभिप्रेत्य पुंस्त्वेन निर्देशः ॥ २९ ॥ उशनाः शुक्राचार्यः । नहुषपुत्रो ययातिः तस्मै । तल्पे शय्यायामेनां न अधाः न स्थापय ॥ ३० ॥ औशनसीं शुक्रपुत्रीं देवयानीं सप्रजां पुत्रवतीं विलोक्य ऋतौ ऋतुकाले प्राप्ते सति सख्याः पतिं तमेव ययातिं वव्रे ॥ ३१ ॥ राजपुत्र्या शर्मिष्ठया: प्रार्थितः अपत्ये अपत्यनिमित्तम् । धर्मं कामनापूर्तिम् । काले ऋतुकाले दिष्टं दैवबलात् प्रापितं तत्सङ्गं प्राप्तवान् ॥ ३२ ॥ वृषपर्वणः पुत्री व्यजायत उत्पादयामास ॥ ३३ ॥ आसुर्याः शर्मिष्ठायाः । विमूर्च्छिता आक्रान्ता । भर्तुः सकाशात् ॥ ३४ ॥ कामी ययातिः प्रियां देवयानीम् उपमन्त्रयन् सान्त्वयन्नपि ॥ ३५॥ मन्दबुद्धे । विरूपं कुरूपं करोतीति ॥३६॥ कामानाम् । नाग्निस्तृप्यति काष्ठानामि तिवत् षष्ठी । यो जरामभिधास्यति धारयिष्यति तस्य तारुण्येन जराव्यत्ययं नीयताम् । कामं यथेच्छम् । स्मेति सत्यमेतत् ॥ ३७ ॥ इतीति युग्मम्—हे तात प्रिय ॥३८॥ मातामहः शुक्रः तेन कृतां जरामित्यत्रान्वेति । प्रतीच्छ गृहाण । समा वर्षाणि ॥ ३९ ॥ अन्तरा यौवनमध्य एव प्राप्तया तव जरया । ग्राम्यं विषयसम्बन्धि । अविदित्वा अननुभूय वैतृष्ण्यं वैराग्यं नैति न प्राप्नोति ॥ ४० ॥ प्रत्याचख्युः निषेधं चक्रुः । अनित्ये क्षणभंगुरे देहादौ स्थायीदमिति मतयः ॥४१॥ ऊनं कनिष्ठम् । प्रत्याख्यातुं निराकर्तुम् ॥४२॥

अपृच्छत् तनयं पूरुं वयसोनं गुणाधिकम् । न त्वमग्रजवद् वत्स मां प्रत्याख्यातुमर्हसि ॥४२॥

पूरुरुवाच

को नु लोके मनुष्येन्द्र पितुरात्मकृतः पुमान् । प्रतिकर्तुं क्षमो यस्य प्रसादाद् विन्दते परम् ॥४३॥
उत्तमश्चिन्तितं कुर्यात् प्रोक्तकारी तु मध्यमः । अधमोऽश्रद्धया कुर्यादकर्तोच्चरितं पितुः ॥४४॥
इति प्रमुदितः पूरुः प्रत्यगृह्णाज्जरां पितुः । सोऽपि तद्वयसा कामान् यथावज्जुजुषे नृप ॥४५॥
सप्तद्वीपपतिः सम्यक् पितृवत् पालयन् प्रजाः । यथोपजोषं विषयाञ्जुजुषेऽव्याहतेन्द्रियः ॥४६॥
देवयान्यप्यनुदिनं मनोवाग्देहवस्तुभिः । प्रेयसः परमां प्रीतिमुवाह प्रेयसी रहः ॥४७॥
अयजद् यज्ञपुरुषं क्रतुभिर्भूरिदक्षिणैः । सर्वदेवमयं देवं सर्ववेदमयं[1] हरिम् ॥४८॥
यस्मिन्निदं विरचितं व्योम्नीव जलदावलिः । नानेव भाति नाभाति स्वप्नमायामनोरथः ॥४९॥
तमेव हृदि विन्यस्य वासुदेवं गुहाशयम् । नारायणमणीयांसं निराशीरयजत् प्रभुम् ॥५०॥
एवं वर्षसहस्राणि मनःषष्ठैर्मनःसुखम् । विदधानोऽपि नातृप्यत् सार्वभौमः कदिन्द्रियैः ॥५१॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां नवमस्कन्धेऽष्टादशोऽध्यायः ॥ १८ ॥

अथैकोनविंशोऽध्यायः

श्रीशुक उवाच

स इत्थमाचरन् कामान् स्त्रैणोऽपह्नवमात्मनः । बुद्ध्वा प्रियायै निर्विण्णो गाथामेतामगायत ॥१॥

आत्मकृतः षष्ठ्यन्तं स्वदेहकर्तुः पितुः प्रतिकर्तुं प्रत्युपकारं कर्तुं को नु क्षमः समर्थः न कोऽपीत्यन्वयः । यस्य पितुः अनुग्रहात् परं मोक्षं विन्दते ॥४३॥ अश्रद्धयाऽपि अकर्ता उच्चरितं पुरीषतुल्यः 'उच्चरितं गुदनिर्गतम्' इति कोशः ॥४४॥ सोऽपि ययातिरपि । तद्वयसा पूरुवयसा । कामान् विषयान् जुजुषे सेवितवान् ॥४५॥ यथोपजोषं यथाप्रीति । अव्याहतानि भोगसमर्थानि इन्द्रियाणि यस्य सः ॥ ४६ ॥ प्रेयसी प्रियतमा देवयानी रह एकान्ते प्रेयसः पत्युः प्रीतिं प्रसन्नताम् उवाह प्रापयामास । मनआदिभिः साधनैः ॥ ४७ ॥ देवमयं देवरूपम् । हरिमयजत् ॥ ४८ ॥ यस्मिन् हरौ इदं जगत् आकाशे मेघपङ्क्तिरिव क्वचित् व्यवहारदशायां भाति सुषुप्तौ प्रलये च न आभाति तमयजदित्युत्तरेणान्वयः । अस्थैर्ये दृष्टान्तत्रयं स्वप्नेति । विभाषयैकवचनम् समाहारत्वेनाविवक्षितत्वाच्च न क्लीबत्वं च उकालोज्झ्रस्वदीर्घप्लुतः इति वत् ॥ ४९ ॥ गुहा अन्तः करणं तत्र शेते सन्तमपि विन्यस्य भक्त्या प्रकटीकृत्य अयजत् पूजयामास । निराशीः निष्कामः सन् । अणीयांसम् अतीवसूक्ष्मम् ॥ ५० ॥ मनःषष्ठैः मनः प्रधानैः कुत्सितैः विषयासक्तैः इन्द्रियैः मनःसुखं विषयसुखं भुञ्जानोऽपि ययातिः नातृप्यत् ॥ ५१ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे गूढार्थदीपिन्यामष्टादशोऽध्यायः ॥ १८ ॥

ऊनविंशे चरित्रं स्वं ययातिश्छागसंमितम् ।
पत्नीं संश्राव्य तौ सम्यक् विरक्तौ मुक्तिमापतुः ॥ १ ॥

स्त्रैणः स्त्रीलम्पटः स ययातिः कामान् विषयान् आचरन् उपभुञ्जानः आत्मनः अपह्नवम् विनाशं बुद्ध्वा निर्विण्णः भोगविरक्तः सन् प्रियामुद्दिश्य गाथामितिहासम् ॥ १ ॥ हे भार्गवि भृगुवंशजे । यस्य मद्विधस्य

---

१. सर्ववेदमयं ज्ञानघनम् । प्राचुर्ये मयट् ।

शृणु भार्गव्यमूं गाथां मद्विधाचरितां भुवि । धीरा यस्यानुशोचन्ति वने ग्रामनिवासिनः ॥२॥
बस्त एको वने कश्चिद् विचिन्वन् प्रियमात्मनः । ददर्श कूपे पतितां स्वकर्मवशगामजाम् ॥३॥
तस्या उद्धरणोपायं बस्तः कामी विचिन्तयन् । व्यधत्त तीर्थमुद्धृत्य विषाणाग्रेण रोधसी ॥४॥
सोत्तीर्य कूपात् सुश्रोणी तमेव चकमे किल । तया वृतं समुद्वीक्ष्य बह्व्योऽजाः कान्तकामिनीः
पीवानं श्मश्रुलं प्रेष्ठं मीढ्वांसं याभकोविदम् ॥५॥
स एकोऽजवृषस्तासां बह्वीनां रतिवर्धनः । रेमे कामग्रहग्रस्त आत्मानं नावबुध्यत ॥६॥
तमेव प्रेष्ठतमया रममाणमजाऽन्यया । विलोक्य कूपसंविग्ना नामृष्यद् बस्तकर्म तत् ॥७॥
तं दुर्हृदं सुहृद्रूपं कामिनं क्षणसौहृदम् । इन्द्रियाराममुत्सृज्य स्वामिनं दुःखिता ययौ ॥८॥
सोऽपि चानुगतः स्त्रैणः कृपणस्तां प्रसादितुम् । कुर्वन्निडविडाकारं नाशक्नोत् पथि संधितुम् ॥९॥
तस्य तत्र द्विजः कश्चिदजास्वाम्यच्छिनद् रुषा । लम्बन्तं वृषणं भूयः संदधेऽर्थाय योगवित् ॥१०॥
सम्बद्धवृषणः सोऽपि ह्यजया कूपलब्धया । कालं बहुतिथं भद्रे कामैर्नाद्यापि तुष्यति ॥११॥
तथाहं कृपणः सुभ्रु भवत्याः प्रेमयन्त्रितः । आत्मानं नाभिजानामि मोहितस्तव मायया ॥१२॥
यत् पृथिव्यां व्रीहियवं हिरण्यं पशवः स्त्रियः । न दुह्यन्ति मनःप्रीतिं पुंसः कामहतस्य ते ॥१३॥
न जातु कामः कामानामुपभोगेन शाम्यति । हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते ॥१४॥
यदा न कुरुते भावं सर्वभूतेष्वमङ्गलम् । समदृष्टेस्तदा पुंसः सर्वाः सुखमया दिशः ॥१५॥

लम्पटस्य ग्रामनिवासिनः गृहस्थस्य अर्थे वने स्थिता धीराः कृपालवः शोचन्ति कथमस्योद्धार इति । मद्विधस्य आचरितं यस्याम् ॥ २ ॥ बस्तः छागः प्रियं विषयसुखमन्वेषयन् ॥ ३ ॥ तस्या अजायाः । रोधसि कूपतीरे शृङ्गेण उद्धृत्य भूमि विदार्य तीर्थं निर्गमनमार्गं व्यधत्त कृतवान् ॥ ४ ॥ सेति सार्द्धम् । सा अजा उत्तीर्य निःसृत्य तमेव छागं चकमे वव्रे अन्या अपि कान्तं कामयितुं शीलं यासां ताः तथाभूता बभूवुः । कथंभूतम् । पीवानं पुष्टगात्रम् । मीढ्वांसं वीर्यसेक्तारं यतो याभे मैथुने कोविदम् ॥ ५ ॥ अजवृषः छागश्रेष्ठः काम एव ग्रहः पिशाचरूपः तेन ग्रस्तः ॥ ६ ॥ अन्यया रममाणं स्वपतिं विलोक्य तत्कर्म नामृष्यत् न असहत । कूपसंविग्ना भयभीता अजेति देवयानीसादृश्यम् ॥ ७ ॥ कामिनं छागं ययातिसादृश्यम् उत्सृज्य त्यक्त्वा स्वामिनं स्वपालकम् ययौ ॥८॥ सोऽपि छागोऽपि । इडविडेति अजजातिशब्दम् । सन्धितुम् अनुकूलयितुम् ॥९॥ अजायाः स्वामी कश्चन द्विजः । प्रकृते च द्विजः शुक्रः । तत्र तदा तस्य अजस्य वृषणं[1] शिश्नम् अच्छिनत् । भूयः अर्थाय कामोपभोगाय सन्दधे युयुजे च । यतः योगवित् उपायज्ञः । अत्र तस्य तदिति पाठः सुगमः इति वंशीधरी ॥१०॥ सोऽपि बहुतिथं अजोऽपि बहुकालपर्यन्तं कामैः भोगैः सेव्यमानैरपि न तृप्यति । हे भद्रे ॥११॥ हे सुभ्रूः यथा सोऽजः तथाऽहमपि यन्त्रितः बद्धः आत्मानं परमात्मानम् ॥ १२ ॥ व्रीहियवमित्येकवद्भावः । ये व्रीह्यादयः ते सर्वेऽपि पुंसः मनःप्रीतिं विषयासक्तिं न दुह्यन्ति न पूरयन्ति ॥ १३ ॥ जातु कदाचिदपि कामः तृष्णा । हविषा घृतेन कृष्णवर्त्मा यथा अग्निः वर्धते ॥१४॥ अमङ्गलं द्वेषादिकम् । सुखमयाः सुखमय्यः ॥१५॥

---

१. वृष्यते सिच्यते रेतोऽनेनेति व्युत्पत्तेः । वृषु सेचने धातुः इति वंशीधरी । 'शिश्ने शिश्नासने चैव वृषणं कामनाप्रदे' इति निरुक्तिः ।

या दुस्त्यजा दुर्मतिभिर्जीर्यतो या न जीर्यते । तां तृष्णां दुःखनिवहां शर्मकामो द्रुतं त्यजेत् ॥१६॥
मात्रा स्वस्रा दुहित्रा वा नाऽविविक्तासनो भवेत् । बलवानिन्द्रियग्रामो विद्वांसमपि कर्षति॥१७॥
पूर्णं वर्षसहस्रं मे विषयान् सेवतोऽसकृत् । तथापि चानुसवनं तृष्णा तेषूपजायते ॥१८॥
तस्मादेतामहं त्यक्त्वा ब्रह्मण्याधाय मानसम् । निर्द्वन्द्वो निरहंकारश्चरिष्यामि मृगैः सह ॥१९॥
दृष्टं श्रुतमसद् बुद्ध्वा नानुध्यायेन्न संविशेत् । संसृतिं चात्मनाशं च तत्र विद्वान् स आत्मदृक् ॥२०॥
इत्युक्त्वा नाहुषो जायां तदीयं पूरवे वयः । दत्त्वा स्वां जरसं तस्मादाददे विगतस्पृहः ॥२१॥
दिशि दक्षिण पूर्वस्यां द्रुह्युं दक्षिणतो यदुम् । प्रतीच्यां तुर्वसुं चक्र उदीच्यामनुमीश्वरम् ॥२२॥
भूमण्डलस्य सर्वस्य पूरुमर्हत्तमं विशाम् । अभिषिच्याग्रजांस्तस्य वशे स्थाप्य वनं ययौ ॥२३॥
आसेवितं वर्षपूगान् षड्वर्गं विषयेषु सः । क्षणेन मुमुचे नीडं जातपक्ष इव द्विजः ॥२४॥

स तत्र निर्मुक्तसमस्तसङ्ग आत्मानुभूत्या विधुतत्रिलिङ्गः ।
परेऽमले ब्रह्मणि वासुदेवे लेभे गतिं भागवतीं प्रतीतः ॥२५॥

श्रुत्वा गाथां देवयानी मेने प्रस्तोभमात्मनः । स्त्रीपुंसोः स्नेहवैक्लव्यात् परिहासमिवेरितम्॥२६॥
सा संनिवासं सुहृदां प्रपायामिव गच्छताम् । विज्ञायेश्वरतन्त्राणां मायाविरचितं प्रभोः ॥२७॥
सर्वत्र सङ्गमुत्सृज्य स्वप्नौपम्येन भार्गवी । कृष्णे मनः समावेश्य व्यधुनोल्लिङ्गमात्मनः ॥२८॥
नमस्तुभ्यं भगवते वासुदेवाय वेधसे । सर्वभूताधिवासाय शान्ताय बृहते नमः ॥२९॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां नवमस्कन्धे एकोनविंशोऽध्यायः ॥१९॥

जीर्यतोऽपि वृद्धत्वं प्राप्नुवतोऽपि या शर्मकामः कल्याणेच्छुः । शर्मं नित्यसुखं वा । दुःखानि नितरां वहति प्रापयतीति तथाभूताम् ॥१६॥ अविविक्तासनः एकशय्यासनो न भवेत् । ग्रामः समूहः । विद्वांसमपि किमुत अविद्वांसमिति कैमुत्यं सूचितम् ॥१७॥ असकृत् निरन्तरं सेवतोऽपि पूर्णं वर्षसहस्रमभूत् तथापि तेषु अनुकालं प्रतिक्षणं तृष्णा उपजायते ॥१८॥ यतस्तृष्णा विषयावहा तस्माद्धेतोः एतां तृष्णाम् त्यक्त्वा । आधाय स्थिरीकृत्य । मृगयन्ते इति मृगाः ज्ञानिनः तैः सह ॥ १९ ॥ दृष्टं राजादि श्रुतमिन्द्रादि तत् सर्वमसत् नश्वरं च बुद्ध्वा न चिन्तयेत् न संविशेत् नोपभुञ्जीत । यतो हि तत्र दृष्टश्रुतध्याने संसृतिम् आत्मघातं विस्मृतिं च विद्वान् जानन् यो भवति स आत्मदृक् आत्मानं पश्यतीत्यर्थः॥२०॥ नाहुषो नहुषपुत्रो ययातिः वयः यौवनं दत्त्वा तस्यात् जराम् आददे जग्राह ॥२१॥ दक्षिणेति परीक्षितं प्रति सम्बुद्धिः हे निपुण । यथाश्रुते तु एकस्य विदिशोऽन्येषां दिशां राज्यार्पणेन वैषम्यं स्यादिति वंशीधरी । अनुनामानम् ईश्वरमधिपतिं चक्रे ॥२२॥ विशां प्रजानाम् अर्हत्तमं श्रेष्ठतमं पुरुं कनिष्ठमपि चक्रवर्तिनं कृत्वा अभिषिच्य च वनं ययौ ॥ २३ ॥ स ययातिः वर्षसमूहान् विषयेषु आसेवितं षड्वर्गं षडिन्द्रियसुखं क्षणेन मुमुचे तत्याज । द्विजः पक्षी नीडं कुलायं यथा त्यजति तद्वत् ॥ २४ ॥ स ययातिः तत्र तदा वासुदेवे भागवतीं गतिं मुक्तिं लेभे इत्यन्वयः । कथंभूतः । आत्मानुभूत्या स्वरूपसाक्षात्कारेण विधुतः निरस्तः त्रिलिङ्गः त्रिगुणकार्यं लिङ्गशरीरं येन सः । प्रतीतः प्रख्यातचरितः हृष्टो वा । 'प्रतीतः हृष्टप्रख्यातयोरपि' इति मेदिनी ॥ २५ ॥ प्रस्तोभम् उपालम्भम् । निवृत्तिमार्गे प्रोत्साहनं वा । वैक्लव्यात् पारवश्यात् ॥ २५ ॥ स्वप्नौपम्येन स्वप्नदृष्टान्तेन भार्गवी देवयानी लिङ्गशरीरं व्यधुनोत् तत्याज पतिवत् सापि मुक्ता बभूवेत्यर्थः ॥ २८ ॥ नमस्तुभ्यमिति मन्त्रं जपित्वेति शेषः । वेधसे जगत्कारणाय । अधिवासाय अन्तर्यामिणे । बृहते ब्रह्मणे नमः इति ॥ २९ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे गूढार्थदीपिन्यां विंशोऽध्यायः ॥ २० ॥

अथ विंशोऽध्यायः

पूरोर्वंशं प्रवक्ष्यामि यत्र जातोऽसि भारत । यत्र राजर्षयो वंश्या ब्रह्मवंश्याश्च जज्ञिरे ॥१॥
जनमेजयो ह्यभूत् पूरोः प्रचिन्वांस्तत्सुतस्ततः । प्रवीरोऽथ नमस्युर्वै तस्माच्चारुपदोऽभवत् ॥२॥
तस्य सुद्युरभूत् पुत्रस्तस्माद् बहुगवस्ततः । संयातिस्तस्याहंयाती रौद्राश्वस्तत्सुतः स्मृतः॥३॥
ऋतेयुस्तस्य कुक्षेयुः स्थण्डिलेयुः कृतेयुकः । जलेयुः सन्ततेयुश्च धर्मसत्यव्रतेयवः ॥४॥
ऋतेयो रन्तिभारोऽभूत् त्रयस्तस्यात्मजा नृप । सुमतिर्ध्रुवोऽप्रतिरथः कण्वोऽप्रतिरथात्मजः॥६॥
तस्य मेधातिथिस्तस्मात् प्रस्कण्वाद्या द्विजातयः । पुत्रोऽभूत् सुमते रैभ्यो दुष्यन्तस्तत्सुतो मतः॥७॥
दुष्यन्तो मृगयां यातः कण्वाश्रमपदं गतः । तत्रासीनां स्वप्रभया मण्डयन्तीं रमामिव ॥८॥
विलोक्य सद्यो मुमुहे देवमायामिव स्त्रियम् । बभाषे तां वरारोहां भटैः कतिपयैर्वृतः ॥ ९ ॥
तद्दर्शनप्रमुदितः संनिवृत्तपरिश्रमः । पप्रच्छ कामसंतप्तः प्रहसञ्श्लक्ष्णया गिरा ॥१०॥
का त्वं कमलपत्राक्षि कस्यासि हृदयङ्गमे । किं वा चिकीर्षितं त्वत्र भवत्या निर्जने वने ॥११॥
व्यक्तं राजन्यतनयां वेद्म्यहं त्वां सुमध्यमे । न हि चेतः पौरवाणामधर्मे रमते क्वचित् ॥१२॥

शकुन्तलोवाच

विश्वामित्रात्मजैवाहं त्यक्ता मेनकया वने । वेदैतद् भगवान् कण्वो वीर किं करवाम ते ॥१३॥
आस्यतां ह्यरविन्दाक्ष गृह्यतामर्हणं च नः । भुज्यतां सन्ति नीवारा उष्यतां यदि रोचते ॥१४॥

विंशे पूरुकुले जातो दौष्यन्तिर्भरतो नृपः ।
यत्र शाकुन्तलाख्यानमद्भुतं च निरूप्यते ॥ १ ॥

हे भारत परीक्षित् यत्र त्वं जातोऽसि यत्र च ब्रह्मवंश्याश्च जज्ञिरे तं पूरुवंशं प्रवक्ष्यामीत्यन्वयः । ब्रह्म ब्राह्मणजातिःवंशे येषां ते तथोक्ताः ॥ १ ॥ तत्सुतः जन्मेजयसुतः । तस्य प्रवीरः तस्य नमस्युः तस्य चारुपदः ॥ २ ॥ तस्य सुद्युः । तस्य बहुगवः । तस्य संयातिः । तस्य रौद्राश्वस्य घृताच्याम् अप्सरसि[1] ऋतेयुप्रभृतयः दश पुत्रा अभवन् । कथंभूताः । जगतः आत्मनः आधारभूतस्य मुख्यस्य प्राणस्य तदाश्रितजीवस्य इन्द्रियाणीव । धर्मेत्यत्र इयुपदं त्रिभिरन्वेति[2], धर्मेयुः व्रतेयुः सत्येयुरिति । अवमः कनिष्ठः ॥ ३ ॥ ४ ॥ ५ ॥ ऋतेयुपुत्रः रन्तिभारः तस्य त्रयः ॥ ६ ॥ तस्य कण्वस्य मेधातिथिः । सुमतेः रन्तिभारज्येष्ठपुत्रस्य रैभ्यः पुत्रः तस्य दुष्यन्तोऽभूत् ॥७॥ दुष्यन्त इति सार्द्धम् । मृगयामुद्दिश्य यातः गच्छन् सन् आश्रमं गतः इति योज्यम् । तत्र आश्रमे । मण्डयन्तीं भूषयन्तीम् । मडि भूषयां धातुः । मुमुहे आसक्तोऽभूत् ॥८॥बभाषे इत्यर्द्धम् ॥९॥ श्लक्ष्णया मधुरया ॥१०॥ त्वं केति जातिगतप्रश्नः । कस्य सम्बन्धिनीति पित्रादिप्रश्नः किं चिकीर्षितं कर्तुमिष्टं तद्वदेति शेषः ॥ ११ ॥ सुष्ठु मध्यमः कटिभागो यस्याः तत्सम्बुद्धौ हे सुमध्यमे । व्यक्त निश्चितम् । पौरवाणां पूरुवंशजानाम् ॥ १२ ॥ मेनकया अप्सरसा । किं सेवाम् ॥ १३ ॥ आस्यताम् उपविश्यताम् । अर्हणं जलपानादिकम् । नीवाराः देवव्रीहयः तन्निर्मितमन्नमित्यर्थः । तर्हि उष्यतां निशि वासः क्रियताम् । 'वस निवासे धातुः'

---

१. मूले अप्सरसः इति षष्ठी सप्तम्यर्थे । २. 'द्वन्द्वान्ते श्रूयमाणं पदं प्रत्येकमपि सम्बध्यते' इति नियमात् ।

दुष्यन्त उवाच

उपपन्नमिदं सुभ्रु जातायाः कुशिकान्वये । स्वयं हि वृणते राज्ञां कन्यकाः सदृशं वरम् ॥१५॥
ओमित्युक्ते यथाधर्ममुपयेमे शकुन्तलाम् । गान्धर्वविधिना राजा देशकालविधानवित् ॥१६॥
अमोघवीर्यो राजर्षिर्महिष्यां वीर्यमादधे । श्वोभूते स्वपुरं यातः कालेनासूत सा सुतम् ॥१७॥
कण्वः कुमारस्य वने चक्रे समुचिताः क्रियाः । बद्ध्वा मृगेन्द्रांस्तरसा क्रीडति स्म स बालकः॥१८॥
तं दुरत्ययविक्रान्तमादाय प्रमदोत्तमा । हरेरंशांशसम्भूतं भर्तुरन्तिकमागमत् ॥१९॥
यदा न जगृहे राजा भार्यापुत्रावनिन्दितौ । शृण्वतां सर्वभूतानां खे वागाहाशरीरिणी ॥२०॥
माता भस्त्रा पितुः पुत्रो येन जातः स एव सः । भरस्व पुत्रं दुष्यन्त मावमंस्थाः शकुन्तलाम्॥२१॥
रेतोधाः पुत्रो नयति नरदेव यमक्षयात् । त्वं चास्य धाता गर्भस्य सत्यमाह शकुन्तला॥२२॥
पितर्युपरते सोऽपि चक्रवर्ती महायशाः । महिमा गीयते तस्य हरेरंशभुवो भुवि ॥२३॥
चक्रं दक्षिणहस्तेऽस्य पद्मकोशोऽस्य पादयोः ॥ २४ ॥
ईजे महाभिषेकेण सोऽभिषिक्तोऽधिराड् विभुः । पञ्चपञ्चाशता मेध्यैर्गङ्गायामनु वाजिभिः॥२५॥
मामतेयं पुरोधाय यमुनायामनु प्रभुः । अष्टसप्ततिमेध्याश्वान् बबन्ध प्रददद् वसु ॥२६॥
भरतस्य हि दौष्यन्तेरग्निः साचीगुणे चितः । सहस्रं बद्वशो यस्मिन् ब्राह्मणा गा विभेजिरे॥२७॥

॥ १४ ॥ हे सुभ्रु उपपन्नं युक्तियुक्तम् । स्वयं हि स्वयमेव ॥ १५ ॥ शकुन्तलया मौनेनैव ओमित्युक्ते सति । 'मौनं स्वीकारलक्षणम्' इति वचनात् । गान्धर्वेति[1] ॥१६॥ श्वोभूते प्रभाते । सुतम् असूत जनयामास ॥ १७ ॥ समुदिताः वेदोक्ता जातकर्मादिक्रियाः । स्म आश्चर्ये । तरसा बलेन ॥ १८ ॥ विक्रान्तम् अप्रतिहतपराक्रमम् । अंशः शक्तिसमावेशः इत्युक्तेः हरेरंशो दुष्यन्तः तस्य अंशेन ॥१९॥ खे आकाशे वाक् आकाशवाणी आह अश्रूयतेत्यर्थः ॥२०॥ भस्त्रा चर्ममयं यन्त्रं तद्वदाधारमात्रमेव । येन जातः स एव सः पितृरूप एव । भरस्व पोषय । अनेन भ्रियते इति भरत इति नामनिर्वचनम् । मावमंस्थाः मापमानं कुरु ॥२१॥ रेतोधाः रेतःसेक्ता वंशप्रवर्तकः पुत्रः यमक्षयात् यमलोकात् पितरं नयति उद्धरति दिव्यलोकान् प्रापयति । 'पुन्नाम्नो नरकात्' इत्युक्तेः । क्षि निवासे ॥२२॥ पितरि दुष्यन्ते उपरते मृते सति सोऽपि चक्रवर्ती बभूवेति शेषः ॥२३॥ चक्रमित्यर्द्धम् । चक्रं तदाकारा रेखा । अग्रेऽप्येवं रेखैव ॥२४॥ ईजे इति युग्मम् । महाभिषेकः चक्रवर्तिपदस्थापनकालिकः वेदविहितः । गङ्गायामनुलोमं गङ्गासागरसङ्गममारभ्य भरतखण्डमर्यादापर्यन्तं पञ्चपञ्चशता ५५ वाजिभिः अश्वैः अश्वमेधैः वसु धनं प्रकर्षेण ददत् हरिमीजे तथा यमुनायामनु प्रयागादारभ्य भरतखण्डमर्यादापर्यन्तमष्टाधिकसप्ततिमेध्याश्वान् ७८बबन्ध यज्ञार्थमिति शेषः । तावत्संख्याकैरश्वैः ईजे । ममताया अपत्यं मामतेयं दीर्घतमसं उतथ्योत्पन्नं पुरोधाय पुरोहितं कृत्वा ॥२५॥२६॥ साचीत्यव्ययं प्रकर्षे । प्रकृष्टगुणवति देशे अग्निः चितः अग्निस्थापनं कृतम् । यस्मिन् अग्निचयने सहस्रं ब्राह्मणाः बद्व[2]बद्वं (१३८४)गाः विभेजिरे विभज्य जगृहुः बकारोऽन्तस्थः ॥२७॥ पुनश्च यज्ञे १३३ अश्वान्

---

१. परस्परानुरोधेन कन्यायाश्च वरस्य च ।
गान्धर्वं इति सम्प्रोक्तो विवाहः संगमे सति । इति वचनात् ।

२. 'बद्वं चतुरशीत्यग्रसहस्राणि त्रयोदश' ।

त्रयस्त्रिंशच्छतं ह्यश्वान् बद्ध्वा विस्मापयन् नृपान् । दौष्यन्तिरत्यगान्मायां देवानां गुरुमाययौ ॥२८॥
मृगाञ्छुक्लदतः कृष्णान् हिरण्येन परीवृतान् । अदात् कर्मणि मष्णारे नियुतानि चतुर्दश ॥२९॥
भरतस्य महत् कर्म न पूर्वे नापरे नृपाः । नैवापुर्नैव प्राप्स्यन्ति बाहुभ्यां त्रिदिवं यथा ॥३०॥

किरातहूणान् यवनानन्ध्रान् कङ्कान् खशाञ्छकान् ।
अब्रह्मण्यान्नृपांश्चाहन् म्लेच्छान् दिग्विजयेऽखिलान् ॥३१॥

जित्वा पुराऽसुरा देवान् ये रसौकांसि भेजिरे । देवस्त्रियो रसां नीताः प्राणिभिः पुनराहरत् ॥३२॥
सर्वकामान् दुदुहतुः प्रजानां तस्य रोदसी । समास्त्रिणवसाहस्त्रीर्दिक्षु चक्रमवर्तयत् ॥३३॥
स सम्राड् लोकपालाख्यमैश्वर्यमधिराट्श्रियम् । चक्रं चास्खलितं प्राणान् मृषेत्युपरराम ह ॥३४॥
तस्यासन् नृप वैदर्भ्यः पत्न्यस्तिस्रः सुसम्मताः । जघ्नुस्त्यागभयात् पुत्रान् नानुरूपा इतीरिते ॥३५॥
तस्यैवं वितथे वंशे तदर्थं यजतः सुतम् । मरुत्सामेन मरुतो भरद्वाजमुपाददुः ॥३६॥
अन्तर्वत्न्यां भ्रातृपत्न्यां मैथुनाय बृहस्पतिः । प्रवृत्तो वारितो गर्भं शप्त्वा वीर्यमवासृजत् ॥३७॥
तं त्यक्तुकामां ममतां भर्तृत्यागविशङ्किताम् । नामनिर्वचनं तस्य श्लोकमेनं सुरा जगुः ॥३८॥
मूढे भर द्वाजमिमं भर द्वाजं बृहस्पते । यातौ यदुक्त्वा पितरौ भरद्वाजस्ततस्त्वयम् ॥३९॥

बद्ध्वा देवानामपि मायां वैभवमत्यगात् अतिक्रान्तवान् । अथ च जगद्गुरुं श्रीविष्णुमाययौ प्राप्तवान् ॥ २८ ॥ किञ्च मष्णारे व्रतसमाप्तिलक्षणे कर्मणि क्रियमाणे मृगान् श्रेष्ठगजान् नियुतानि चतुर्दशलक्षाणि अदात् । दतः दन्तान् । परीवृतान् भूषितान् ॥ २९ ॥ न पूर्वे चक्रुः न अपरे करिष्यन्ति । यद्वा नपूर्वे नहुषादयः नापरे अर्जुनादयः । यथा त्रिदिवं स्वर्गं न केऽपि प्रापुः न प्राप्स्यन्ति ॥ ३० ॥ किरातादयो निम्नजातयः । अब्रह्मण्यान् ब्राह्मणद्वेषिणः ॥ ३१ ॥ ये असुराः रसातलस्थानानि भेजिरे प्राप्ताः तैः देवस्त्रियोऽपि तत्र नीताः भरतः प्राणिभिः बलवद्भिः स्वसैनिकैः ता पुनः आहरत् आनीतवान् देवान् प्रापयामासेति योज्यम् ॥३२॥ तस्य भरतस्य रोदसी द्यावाभूमी प्रजानां सर्वमनोरथान् दुदुहतुः पूरयामासतुः । त्रिणवसाहस्त्रीः सप्तविंशतिसहस्रं सम्वत्सरान् व्याप्य चक्रं[1] सेनामाज्ञां वा प्रवर्तयामास ॥ ३३ ॥ स भरतः । लोकपालैः इन्द्रादिभिः आख्यायते स्तूयते तथा । अस्खलितमप्रतिहतं चक्रमाज्ञारूपं च प्राणान् प्राणवत् प्रियान् पुत्रादींश्च सर्वं मृषेति विचार्य उपरराम संसारात् उपरतोऽभूत् ॥ ३४ ॥ तस्य भरतस्य विदर्भराजपुत्र्यः । मे नानुरूपा इति भर्त्रा उक्ते सति पुत्रान् जघ्नुः । सुसम्मता अतीवप्रियाः ॥ ३५ ॥ वितथे नष्टे सति मरुतः मरुत्सोमयागेन यजतः तस्य भरद्वाजं सुतमुपाददुः अर्पयामासुः ॥३६॥ तदुत्पत्तिमाह-अन्तरिति । भ्रातुरुतथ्यस्य अन्तर्वत्न्यां गर्भिण्याम् गर्भस्थेन वारितोऽपि बृहस्पतिः मैथुनाय प्रवृत्तः अथापि त्वमन्धो भवेति गर्भं शप्त्वा वीर्यं न्यषिञ्चत् तेन दीर्घतमा अन्धो बभूव । तेन पाष्णिप्रहारेण तद्वीर्यं बहिर्निःसारितं तच्च भूमौ पतितं सत् कुमारोऽभवत् स च भरद्वाजः ॥ ३७ ॥ ३८ ॥ बृहस्पतिर्ममतामाह-एकस्य क्षेत्रे अन्यस्य वीर्यात् द्वाभ्यां जातमतस्तस्यापि पुत्रत्वात् त्वमिमं भर पोषय । तदा ममता आह हे बृहस्पते द्वाभ्यामावाभ्यामन्योन्यतो जातमतस्त्वं भर । यत् यस्मात् इत्युक्त्वा तौ यातौ पुत्रं त्यक्त्वा

---

१. 'चक्रं सैन्ये जलावर्ते चक्रमाज्ञारथाङ्गयोः' इति हलायुधः ।

चोद्यमाना सुरैरेवं मत्वा वितथमात्मजम् । व्यसृजन् मरुतोऽबिभ्रन् दत्तोऽयं वितथेऽन्वये ॥४०॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां नवमस्कन्धे रामचरिते विंशोऽध्यायः ॥ २० ॥

अथैकविंशोऽध्यायः

श्रीशुक उवाच

वितथस्य सुतो मन्युर्बृहत्क्षत्रो जयस्ततः । महावीर्यो नरो गर्गः संकृतिस्तु नरात्मजः ॥ १ ॥

गुरुश्च रन्तिदेवश्च संकृतेः पाण्डुनन्दन । रन्तिदेवस्य हि यश इहामुत्र च गीयते ॥ २ ॥

वियद्वित्तस्य ददतो लब्धं लब्धं बुभुक्षतः । निष्किंचनस्य धीरस्य सकुटुम्बस्य सीदतः ॥ ३ ॥

व्यतीयुरष्टचत्वारिंशदहान्यपिबतः किल । घृतपायससंयावं तोयं प्रातरुपस्थितम् ॥ ४ ॥

कृच्छ्रप्राप्तकुटुम्बस्य क्षुत्तृड्भ्यां जातवेपथोः । अतिथिर्ब्राह्मणः काले भोक्तुकामस्य चागमत् ॥५॥

तस्मै संव्यभजत् सोऽन्नमादृत्य श्रद्धयान्वितः । हरिं सर्वत्र सम्पश्यन् स भुक्त्वा प्रययौ द्विजः ॥६॥

अथान्यो भोक्ष्यमाणस्य विभक्तस्य महीपते । विभक्तं व्यभजत् तस्मै वृषलाय हरिं स्मरन् ॥७॥

याते शूद्रे तमन्योऽगादतिथिः श्वभिरावृतः । राजन् मे दीयतामन्नं सगणाय बुभुक्षते ॥ ८ ॥

स आतिथ्याऽवशिष्टं यद् बहुमानपुरस्कृतम् । तच्च दत्त्वा नमश्चक्रे श्वभ्यः श्वपतये विभुः ॥ ९ ॥

पानीयमात्रमुच्छेषं तच्चैकपरितर्पणम् । पास्यतः पुल्कसोऽभ्यागादपो देह्यशुभस्य मे ॥१०॥

तस्य तां करुणां वाचं निशम्य विपुलश्रमाम् । कृपया भृशसंतप्त इदमाहामृतं वचः ॥११॥

वन्तौ ततोऽयं भरद्वाजोऽभवत् ॥ ३९ ॥ सुरैरेवं चोद्यमाना प्रेर्यमाणापि ममता व्यभिचारजत्वात् तमात्मजं निरर्थकं मत्वा व्यसृजत् तत्याज । मरुतो देवाः तमबिभ्रन् । भरतस्य अन्वये वितथे उच्छिन्ने सति अयं भरद्वाजः तस्मै दत्तः एवं स वितथनामा बभूवेति शेषः ॥ ४० ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे गूढार्थदीपिन्यां विंशोऽध्यायः ॥ २० ॥

भरतस्यैकविंशे तु रन्तिदेवोऽन्वयेऽभवत् ।
यस्य सत्यागधैर्याभ्यां त्रयो देवा अतूतुषन् ॥

भरद्वाज एव वितथसंज्ञकः । ततो मन्योः बृहत्क्षत्रादयो गर्गान्ताः पञ्च पुत्रा अभवन् ॥१॥ संकृतेस्तु द्वौ पुत्रौ । गुरुसंज्ञकः रन्तिदेवश्च । अमुत्र परलोके च ॥२॥ वियदिति त्रयम् । वियद्वित्तस्य आकाशवृत्तेः भोक्तुमिच्छतोऽपि लब्धं लब्धं ददतः अपिबतः जलपानमपि अकुर्वतः अत एव सीदतः क्लिश्यतः तस्य एतानि ४८ दिनानि व्यतीयुरित्यन्वयः । निष्किञ्चनस्य परिग्रहशून्यस्य । घृतादीनां समाहारे द्वन्द्वैक्यम् । कृच्छ्रं क्लेशं प्राप्तः कुटुम्बो यस्य । जातवेपथोः कम्पितशरीरस्य तस्य काले भोजनकाले ॥ ३ ॥ ४ ॥ ५ ॥ स राजा तस्मै अतिथये अन्नं संव्यभजत् विभज्य दत्तवान् आदृत्य आदरं कृत्वा ॥ ६ ॥ विभक्तस्य भुक्तावशिष्टान्नं विभक्तवतः तस्य अन्योऽतिथिः । वृषलाय शूद्राय ॥ ७ ॥ ८ ॥ आदृत्येत्यत्र आतिथ्यावशिष्टमिति पाठः साधुः इति वीरराघवः अन्यथा बहुमानपदेन पुनरुक्तिः स्यात् ॥ ९ ॥ उच्छेषम् अवशिष्टम् तच्च एकमेव तर्पयतीति तथा । पुल्कसो म्लेच्छभेदः । अशुभस्य दानायोगस्य ॥ १० ॥ करुणां दैन्ययुक्ताम् । विपुलः पिपासाजन्यः श्रमो यस्याम् ।

न कामयेऽहं गतिमीश्वरात् परामष्टर्धियुक्तामपुनर्भवं वा ।
आर्ति प्रपद्येऽखिलदेहभाजामन्तःस्थितो येन भवन्त्यदुःखाः ॥ १२ ॥
क्षुत्तृट्श्रमो गात्रपरिश्रमश्च दैन्यं क्लमः शोकविषादमोहाः ।
सर्वे निवृत्ताः कृपणस्य जन्तोर्जिजीविषोर्जीवजलार्पणान्मे ॥१३॥

इति प्रभाष्य पानीयं म्रियमाणः पिपासया । पुल्कसायाऽददाद्धीरो निसर्गकरुणो नृपः ॥१४॥
तस्य त्रिभुवनाधीशाः फलदाः फलमिच्छताम् । आत्मानं दर्शयांचक्रुर्माया विष्णुविनिर्मिता ॥१५॥
स वै तेभ्यो नमस्कृत्य निःसङ्गो विगतस्पृहः । वासुदेवे भगवति भक्त्या चक्रे मनः परम् ॥१६॥
ईश्वरालम्बनं चित्तं कुर्वतोऽनन्यराधसः । माया गुणमयी राजन् स्वप्नवत् प्रत्यलीयत ॥१७॥
तत्प्रसङ्गानुभावेन रन्तिदेवानुवर्तिनः । अभवन् योगिनः सर्वे नारायणपरायणाः ॥१८॥
गर्गाच्छिनिस्ततो गार्ग्यः क्षत्राद् ब्रह्म ह्यवर्तत । दुरितक्ष्यो महावीर्यात् तस्य त्र्य्यारुणिः कविः
पुष्करारुणिरित्यत्र ये ब्राह्मणगतिं गताः ॥१९॥
बृहत्क्षत्रस्य पुत्रोऽभूद्धस्ती यद्धस्तिनापुरम् । अजमीढो द्विमीढश्च पुरुमीढश्च हस्तिनः ॥२०॥
अजमीढस्य वंश्याः स्युः प्रियमेधादयो द्विजाः । अजमीढाद् बृहदिषुस्तस्य पुत्रो बृहद्धनुः ॥२१॥
बृहत्कायस्ततस्तस्य पुत्र आसीज्जयद्रथः । तत्सुतो विशदस्तस्य सेनजित् समजायत ॥२२॥
रुचिराश्वो दृढहनुः काश्यो वत्सश्च तत्सुताः । रुचिराश्वसुतः पारः पृथुसेनस्तदात्मजः ॥२३॥
पारस्य तनयो नीपस्तस्य पुत्रशतं त्वभूत् । स कृत्व्यां शुककन्यायां ब्रह्मदत्तमजीजनत् ॥२४॥
स योगी गवि भार्यायां विष्वक्सेनमधात् सुतम् । जैगीषव्योपदेशेन योगतन्त्रं चकार ह ॥२५॥
उदक्स्वनस्ततस्तस्माद् भल्लादो बार्हदीषवः । यवीनरो द्विमीढस्य कृतिमांस्तत्सुतः स्मृतः ॥२६॥

अमृतमित्यत्र लुप्तोपमा ॥ ११ ॥ अहंमीश्वरात् अष्टसिद्धियुक्तां दिव्यगतिम् अपुनर्भवं मोक्षं वा न कामये । केवलम् अखिलप्राणिनामन्तःस्थितः सन् तेषामार्ति प्रपद्ये येन ते दुःखरहिता भवन्तु इति ॥१२॥ श्रमः मानस आयासः । क्लमः ग्लानिः जीवितुमिच्छोः कृपणस्य जीवनहेतोःजलस्य दानात् मे क्षुदादयः सर्वे निवृत्ताः ॥१३॥-॥१४॥ रन्तिदेवस्य त्यागधैर्यादिना तुष्टाः सन्तः ते देवा आत्मानं दर्शयाञ्चक्रुरित्यन्वयः । कथंभूताः । परीक्षार्थं विष्णुना निर्मिता मायारूपा एव ते ॥ १५ ॥ स राजा तेभ्यो ब्रह्मादिभ्यो नमस्कृत्य भगवति परं केवलं मनः चक्रे न तु किमपि याचितवान् । भक्त्या प्रेम्णा ॥ १६ ॥ ईश्वरालम्बनं नारायणविषयकम् । न अन्यत् भगवदतिरिक्तं राधः फलाकाङ्क्षा यस्य तस्य । स्वप्नवत् यथा स्वप्नः स्वत एव लीयते तद्वत् माया जीवन्मुक्तो बभूवेत्यर्थः गुणमयी संसाराख्या ॥ १७ ॥ तस्य अनुभावेन प्रभावेण सर्वे राजानः ॥ १८ ॥ गर्गात् मन्युपुत्रात् । क्षत्रात् क्षत्रियादपि तस्मात् गार्ग्यात् ब्रह्म ब्राह्मणकुलं प्रावर्तत । महावीर्यात् मन्युपुत्रात् । तस्य दुरितक्षयस्य त्रयः पुत्राः ॥ १९ ॥ बृहदित्यर्द्धम् । यत् येन निर्मितमिति शेषः ॥ २० ॥ हस्तिनः 'यः पुत्राः । वंश्या वंशजाः ब्राह्मणा बभूवुः ॥२१॥ तस्य बृहदिषोः बृहद्धनुः तस्य बृहत्कायः तस्य जयद्रथः ॥ २२ ॥ तस्य विशदः तस्य सेनजित् तस्य चत्वारः ॥ २३ ॥ २४ ॥ स नीप एव शुकः छायाशुकः तस्य कन्यायां कृत्वीसंज्ञायाम् । स योगी ब्रह्मदत्तः गवि भार्यायाम् । अधात् जनयामास ॥२५॥ स च विष्वक्सेनः तन्त्रं योगशास्त्रम् । जैगीषव्यः ऋषिः ।

नाम्ना सत्यधृतिर्यस्य दृढनेमिः सुपार्श्वकृत् ॥२७॥
सुपार्श्वात् सुमतिस्तस्य पुत्रः सन्नतिमांस्ततः ।
कृतिर्हिरण्यनाभाद् यो योगं प्राप्य जगौ स्म षट् । संहिताः प्राच्यसाम्नां वै नीपो ह्युग्रायुधस्ततः२८
तस्य क्षेम्यः सुवीरोऽथ सुवीरस्य रिपुञ्जयः ॥२९॥
ततो बहुरथो नाम पुरुमीढोऽप्रजोऽभवत् । नलिन्यामजमीढस्य नीलः शान्तिः सुतस्ततः ॥३०॥
शान्तेः सुशान्तिस्तत्पुत्रः पुरुजोऽर्कस्ततोऽभवत् । भर्म्याश्वस्तनयस्तस्य पञ्चासन्मुद्गलादयः ।
यवीनरो बृहदिषुः काम्पिल्यः संजयः सुताः ॥३१॥
भर्म्याश्वः प्राह पुत्रा मे पञ्चानां रक्षणाय हि । विषयाणामलमिमे इति पञ्चालसंज्ञिताः ॥३२॥
मुद्गलाद् ब्रह्म निर्वृत्तं गोत्रं मौद्गल्यसंज्ञितम् ॥३३॥
मिथुनं मुद्गलाद् भार्म्याद् दिवोदासः पुमानभूत् । अहल्या कन्यका यस्यां शतानन्दस्तु गौतमात्३४
तस्य सत्यधृतिः पुत्रो धनुर्वेदविशारदः । शरद्वांस्तत्सुतो यस्मादुर्वशीदर्शनात् किल ।
शरस्तम्बेऽपतद् रेतो मिथुनं तदभूच्छुभम् ॥३५॥
तद् दृष्ट्वा कृपयाऽगृह्णाच्छन्तनुर्मृगयां चरन् । कृपः कुमारः कन्या च द्रोणपत्न्यभवत् कृपी ॥३६॥
इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां नवमस्कन्धे सूर्यवंशानुवर्णने एकविंशोऽध्यायः ॥ २१ ॥

अथ द्वाविंशोऽध्यायः

श्रीशुक उवाच

मित्रेयुश्च दिवोदासाच्च्यवनस्तत्सुतो नृप । सुदासः सहदेवोऽथ सोमको जन्तुजन्मकृत् ॥१॥
तस्य पुत्रशतं तेषां यवीयान् पृषतः सुतः । द्रुपदो द्रौपदी तस्य धृष्टद्युम्नादयः सुताः ॥२॥

हेति सोत्साहम् । ततो विष्वक्सेनात् । एते बार्हंदीषवः बृहदिषोर्वंशजाः ॥२६॥ हस्तिपुत्रद्विमीढस्य वंशमाह । यवीनर इति ॥२७॥ सुपार्श्वादिति सार्द्धम् । यः कृती हिरण्यनाभात् योगविद्यां प्राप्य साम्नां षट् संहिता जगौ विभज्य अध्यापितवान् ततः कृतिनो नीपः तत उग्रायुधः ॥ २८॥ तस्येद्धम् । तस्य उग्रायुधस्य । अथ तस्मात् ॥२९॥ ततो रिपुञ्जयात् । हस्तिपुत्रः पुरुमीढः । पुनरजमीढस्य वंशमाह । नलिन्यां भार्यायाम् ॥ ३० ॥ शान्तेरिति सार्द्धम् । ततः पुरुजात् अर्कः तस्य भर्म्याश्वः । तस्य मुद्गलादयः पञ्च पुत्रा आसन् ॥३१॥ ये पुत्राः पञ्चानां विषयाणां देशानां रक्षणाय च अलं समर्थाः इति ॥ ३२ ॥ मुद्गलादित्यर्द्धम् । निर्वृत्तमुत्पन्नम् ॥३३॥ भार्म्यात् भर्म्याश्वपुत्रात् मुद्गलात् मिथुनमभूत् । गौतमात् भर्तुः ॥३४॥ तस्येति सार्द्धम् । तस्य शतानन्दस्य । तत्सुतः सत्यधृतिसुतः । यस्मात् शरद्वतः रेतोऽपतत् तच्च मिथुनमभूत् कन्याकुमाररूपम् । शुभं तेजोमयम् ॥ ३५ ॥ तत् मिथुनम् । कन्या कृपी अभवत् सा च द्रोणपत्नी अभूत् ॥ ३६ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे गूढार्थदीपिन्यामेकविंशोऽध्यायः ॥ २१ ॥

द्वाविंशे तु दिवोदासवंशेऽभूत् द्रौपदी सुता ।
ऋक्षवंशेऽभवन् वीराः पार्थदुर्योधनादय ॥ १ ॥

मित्रेयुः तस्य सुतः च्यवनः तस्य सुदासः तस्य सहदेवः अथ तस्मात् सोमकः तस्मात् जन्तुः पुत्रोऽभूत् । कथंभूतः । जन्तुं करोतीति जन्तुकृत् ॥ १ ॥ सोमकस्य न केवलं जन्तुरेव पुत्रः अपि तु तस्य पुत्रशतमभूत्

धृष्टद्युम्नाद् धृष्टकेतुर्भार्म्याः पञ्चालका इमे ॥३॥

योऽजमीढसुतो ह्यन्य ऋक्षः संवरणस्ततः । तपत्यां सूर्यकन्यायां कुरुक्षेत्रपतिः कुरुः ।
परीक्षित् सुधनुर्जह्नुर्निषधाश्वः कुरोः सुताः ॥४॥

सुहोत्रोऽभूत् सुधनुषश्च्यवनोऽथ ततः कृती । वसुस्तस्योपरिचरो बृहद्रथमुखास्ततः ।
कुशाम्बमत्स्यप्रत्यग्रचेदिपाद्याश्च चेदिपाः ॥५॥

बृहद्रथात् कुशाग्रोऽभूदृषभस्तस्य तत्सुतः । जज्ञे सत्यहितोऽपत्यं पुष्पवांस्तत्सुतो जहुः ।
अन्यस्यां चापि भार्यायां शकले द्वे बृहद्रथात् ॥६॥

ते मात्रा बहिरुत्सृष्टे जरया चाभिसंधिते । जीव जीवेति क्रीडन्त्या जरासंधोऽभवत् सुतः ॥७॥

ततश्च सहदेवोऽभूत् सोमापिर्यच्छ्रुतश्रवाः । परीक्षिदनपत्योऽभूत् सुरथो नाम जाह्नवः ॥८॥

ततो विदूरथस्तस्मात् सार्वभौमस्ततोऽभवत् । जयसेनस्तत्तनयो राधिकोऽतोऽयुतो ह्यभूत् ॥९॥

ततश्च क्रोधनस्तस्माद् देवातिथिरमुष्य च । ऋष्यस्तस्य दिलीपोऽभूत् प्रतीपस्तस्य चात्मजः ॥१०॥

देवापिः शन्तनुस्तस्य बाह्लीक इति चात्मजाः । पितृराज्यं परित्यज्य देवापिस्तु वनं गतः ॥११॥

अभवच्छन्तनू राजा प्राङ्महाभिषसंज्ञितः । यं यं कराभ्यां स्पृशति जीर्णं यौवनमेति सः ।
शान्तिमाप्नोति चैवाग्र्यां कर्मणा तेन शन्तनुः ॥१२॥

समा द्वादश तद्राज्ये न ववर्ष यदा विभुः । शन्तनुर्ब्राह्मणैरुक्तः परिवेत्तायमग्रभुक् ।
राज्यं देह्यग्रजायाशु पुरराष्ट्रविवृद्धये ॥१३॥

तत्र जन्तुः ज्येष्ठः पृषतः कनिष्ठः पृषतस्य द्रुपदः तस्य द्रौपदी सुता पुत्राश्च जाताः ॥२॥ धृष्टेत्यर्द्धम् । भार्म्याः भर्म्याश्ववंशीयाः तद्देशराजानः पञ्चालसंज्ञकाः ॥ ३ ॥ य इति सार्द्धम् । ऋक्षसंज्ञकः ततश्च तपत्यां कुरुः पुत्रो जातः । तस्य परीक्षिदादयः चत्वारः पुत्रा जाताः ॥ ४ ॥ सुहोत्र इति सार्द्धम् । ततः वसोः बृहत्प्रमुखा जज्ञिरे । ते पञ्चापि चेदिदेशराजानोः बभूवुः ॥ ५ ॥ बृहदिति सार्द्धम् । तस्यापत्यं पुत्रः पुष्पवान् । द्वे शकले द्वे खण्डे ॥ ६ ॥ उत्सृष्टे प्रक्षिप्ते । जरया राक्षस्या अभिसन्धिते योजिते । अङ्प्रत्ययान्तादभिसन्धाशब्दादितच् । जरया सन्धितत्वात् जरासन्धनामकः ॥ ७ ॥ ततो जरासन्धात् सहदेवः तस्य सोमापिः तस्य श्रुतश्रवाः । परीक्षित् कुरोः ज्येष्ठपुत्रः । जह्नोः पुत्रः जाह्नवः सुरथः ॥ ८ ॥ ततः सुरथात् अतो राधिकात् अयुतः पुत्रः ॥९॥ ततोऽयुतात् । शेषं स्पष्टम् ॥१०॥ तस्य प्रतीपस्य त्रयः पुत्राः । वनं गतः अतोऽप्रजः ॥११॥ अभवदिति सार्द्धम् । कनिष्ठः शन्तनुरेव प्राक् पूर्वजन्मनि महाभिष इति संज्ञा संजाताऽस्येति तथाभूत । यं यं जीर्णं वृद्धं स्पृशति सः । अग्र्यामनुत्तमां शान्तिमारोग्यम् च । शं यौवनसुखं तनोतीति शन्तनुः ॥ १२ ॥ समा इति सार्द्धम् । समा वर्षाणि । विभुः इन्द्रः । त्वं परिवेत्ता[1] अतो वृष्टिर्न भवति । भुवमग्रे भुनक्ति यः स परिवेत्ता । अग्रजाय देवापये ॥ १३ ॥ एवमिति सार्द्धम् । ज्येष्ठं भ्रातरं देवापिं छन्दयामास प्रार्थयामास ।

---

१. दाराग्निहोत्रसंयोगं कुरुते योऽग्रजे स्थिते ।
परिवेत्ता स विज्ञेयः परिवित्तिस्तु पूर्वजः ॥

एवमुक्तो द्विजैर्ज्येष्ठं छन्दयामास सोऽब्रवीत् । तन्मन्त्रिप्रहितैर्विप्रैर्वेदाद् विभ्रंशितो गिरा ।
वेदवादातिवादान् वै तदा देवो ववर्ष ह ॥१४॥
देवापिर्योगमास्थाय कलापग्राममाश्रितः । सोमवंशे कलौ नष्टे कृतादौ स्थापयिष्यति ॥१५॥
बाह्लीकात् सोमदत्तोऽभूद् भूरिर्भूरिश्रवास्ततः । शलश्च शन्तनोरासीद् गङ्गायां भीष्म आत्मवान्
सर्वधर्मविदां श्रेष्ठो महाभागवतः कविः । वीरयूथाग्रणीर्येन रामोऽपि युधि तोषितः ॥१७॥
शन्तनोर्दाशकन्यायां जज्ञे चित्राङ्गदः सुतः । विचित्रवीर्यश्चावरजो नाम्ना चित्राङ्गदो हतः ॥१८॥
यस्यां पराशरात् साक्षादवतीर्णो हरेः कला । वेदगुप्तो मुनिः कृष्णो यतोऽहमिदमध्यगाम् ॥
हित्वा स्वशिष्यान् पैलादीन् भगवान् बादरायणः । मह्यं पुत्राय शान्ताय परं गुह्यमिदं जगौ ॥२०॥
विचित्रवीर्योऽथोवाह काशिराजसुते बलात् । स्वयंवरादुपानीते अम्बिकाम्बालिके उभे ॥२१॥
तयोरासक्तहृदयो गृहीतो यक्ष्मणा मृतः ॥२२॥
क्षेत्रेऽप्रजस्य वै भ्रातुर्मात्रोक्तो बादरायणः । धृतराष्ट्रं च पाण्डुं च विदुरं चाप्यजीजनत् ॥२३॥
गान्धार्यां धृतराष्ट्रस्य जज्ञे पुत्रशतं नृप । तत्र दुर्योधनो ज्येष्ठो दुःशला चापि कन्यका ॥२४॥
शापान्मैथुनरुद्धस्य पाण्डोः कुन्त्यां महारथाः । जाता धर्मानिलेन्द्रेभ्यो युधिष्ठिरमुखास्त्रयः ॥२५॥
नकुलः सहदेवश्च माद्र्यां नासत्यदस्रयोः । द्रौपद्यां पञ्च पञ्चभ्यः पुत्रास्ते पितरोऽभवन् ॥२६॥
युधिष्ठिरात् प्रतिविन्ध्यः श्रुतसेनो वृकोदरात् । अर्जुनाच्छ्रुतकीर्तिस्तु शतानीकस्तु नाकुलिः ।
सहदेवसुतो राजन् श्रुतकर्मा तथापरे ॥२७॥

ततः पूर्वमेव अश्मरावसंज्ञकेन मन्त्रिणा प्रेषितैः विप्रैः देवापिं पाखण्डीकृत्य राज्यानर्हतां नीतः स च वेदस्य अतिवादान् निन्दावचनानि अब्रवीत् । यतस्तैः विप्रैः पाखण्डमतावलम्बिन्या गिरा वेदात् विभ्रंशितः विचालितः तदोक्तदोषाभावादिन्द्रो ववर्ष ॥ १४ ॥ कलापग्रामो वदरिकाश्रमस्थः । कृतस्य सत्ययुगस्य आदौ ॥१५॥ बाह्लीकात् प्रतीपपुत्रात् । ततः सोमदत्तात् त्रयः पुत्राः भूयदियः । शन्तनोः सकाशात् भीष्मो जातः गङ्गायां पत्न्याम् ॥ १६ ॥ कविः तत्त्वज्ञः । रामः परशुरामोऽपि ॥ १७ ॥ अवरजः कनिष्ठः विचित्रवीर्यश्च जज्ञे । हतः एतन्नाम्ना गन्धर्वेण । उपरिचरवसोर्वीर्येण मत्स्यगर्भादुत्पन्ना दाशैः कैवर्तैः पालिता अतो दाशकन्येति प्रसिद्धा सत्यवती ॥१८॥ यस्यां सत्यवत्यां शन्तनोः परिग्रहात्पूर्वमेव पराशरात् कृष्णद्वैपायनो व्यासोऽवतीर्णः । यतः इदं भागवतमहं शुकः अध्यगाम् अधीतवान् ॥ १९ ॥ वेदा गुप्ता शाखाविभागेन येन सः ॥ १९ ॥ हित्वा तेभ्योऽनुपदिश्य गुह्यं सारभूतम् जगौ उपदिष्टवान् ॥ २० ॥ उवाह उपयेमे । अथ भीष्मेण उपानीते आहृते ॥२१॥ तयोरित्यर्द्धम् । गृहीत आक्रान्तः ॥ २२ ॥ मात्रा सत्यवत्या उक्तो व्यासः विचित्रवीर्यस्य क्षेत्रे भार्याद्वये दास्यां च त्रीन् पुत्रान् योगबलेन जनयामास । तत्र अम्बिकायां धृतराष्ट्रम् । अम्बालिकायां पाण्डुम् । दास्यां विदुरं च जनया[1]मास ॥२३-२४॥ मृगरूपब्राह्मणीब्राह्मणयोः रममाणयोर्मध्ये ब्राह्मणं हतवतः पाण्डोर्ब्राह्मणीशापात् ॥२५॥ माद्र्यां पाण्डोः पत्न्यां नासत्यदस्राभ्यामश्विनीकुमाराभ्यम् । पञ्चभ्यः युधिष्ठिरादिभ्यः पञ्चभ्यः पञ्चपुत्राः अभवन् ते अपितरः न केषाञ्चित् पितरः अपुत्रा एव अश्वत्थाम्ना हताः ॥ २६ ॥ युधिष्ठिरादिति सार्द्धम् । नाकुलिः

---

१. अपतिरपत्यलिप्सुर्देवरात् गुरुप्रयुक्ता ऋतुमतीयात् इति धर्मशास्त्रम् ।

युधिष्ठिरात् तु पौरव्यां देवकोऽथ घटोत्कचः । भीमसेनाद्धिडिम्बायां काल्यां सर्वगतस्ततः ।
सहदेवात् सुहोत्रं तु विराजाऽसूत पार्वती ॥२८॥
करेणुमत्यां नकुलो निरमित्रं तथार्जुनः । इरावन्तमुलूप्यां वै सुतायां बभ्रुवाहनम् ॥२९॥
मणिपूरपतेः सोऽपि तत्पुत्रः पुत्रिकासुतः । तव तातः सुभद्रायामभिमन्युरजायत ।
सर्वातिरथजिद् वीर उत्तरायां ततो भवान् ॥३०॥
परीक्षीणेषु कुरुषु द्रौणेर्ब्रह्मास्त्रतेजसा । त्वं च कृष्णानुभावेन सजीवो मोचितोऽन्तकात् ॥३१॥
तवेमे तनयास्तात जनमेजयपूर्वकाः । श्रुतसेनो भीमसेन उग्रसेनश्च वीर्यवान् ॥३२॥
जनमेजयस्त्वां विदित्वा तक्षकान्निधनं गतम् । सर्पान् वै सर्पयागाग्नौ स होष्यति रुषान्वितः ॥३३॥
कावषेयं पुरोधाय पुरं तुरगमेधयाट् । समन्तात् पृथिवीं सर्वां जित्वा यक्ष्यति चाध्वरैः ॥३४॥
तस्य पुत्रः शतानीको याज्ञवल्क्यात् त्रयीं पठन् । अस्त्रज्ञानं कृपाचार्यात् शौनकात् परमेष्यति ॥३५
सहस्रानीकस्तत्पुत्रस्ततश्चैवाश्वमेधजः । असीमकृष्णस्तस्यापि नेमिचक्रस्तु तत्सुतः ॥३६॥
गजाह्वये हृते नद्या कौशाम्ब्यां साधु वत्स्यति । उक्तस्ततश्चित्ररथस्तस्मात् कविरथः सुतः ॥३७॥
तस्माच्च वृष्टिमांस्तस्य सुषेणोऽथ महीपतिः । सुनीथस्तस्य भविता नृचक्षुर्यत्सुखीनलः ॥३८॥
पारिप्लवः सुतस्तस्मान्मेधावी सुनयात्मजः । नृपञ्जयस्ततो दूर्वस्तिमिस्तस्माज्जनिष्यति ॥३९॥
तिमेर्बृहद्रथस्तस्माच्छतानीकः सुदासजः । शतानीकाद् दुर्दमनस्तस्यापत्यं वहीनरः ॥४०॥
दण्डपाणिर्निमिस्तस्य क्षेमको भविता नृपः ॥ ४१ ॥
ब्रह्मक्षत्रस्य वै प्रोक्तो वंशो देवर्षिसत्कृतः । क्षेमकं प्राप्य राजानं संस्थां प्राप्स्यति वै कलौ ॥४२॥
अथ मागधराजानो भवितारो वदामि ते ॥ ४३ ॥

नकुलपुत्रः । तथा अपरेऽपि पुत्राः अन्यासु जाताः ॥ २७ ॥ ततो भीमादेव अन्यस्यां काल्यां सर्वंगतः पुत्रः । पर्वतस्य पुत्री पर्वतदेशजाता वा विजया नाम सुहोत्रं पुत्रमसूत ॥ २८ ॥ वीरमित्रमिति पाठः । इरावन्तं पुत्रम् उलूप्यां नागकन्यायाम् । मणिपूरपतेः सुतायां चित्राङ्गदायां पुत्रिकाधर्मेण दत्तायां बभ्रुवाहनमसूत अतः तत्पुत्रः सन्नपि मातामहपुत्रो जातः ॥ २९ ॥ तव तातः पिता अभिमन्युः सुभद्रायामजायत । सर्वानतिरथान् जयतीति तथा । ततोऽभिमन्योः भवान् परीक्षित् ॥ ३० ॥ द्रौणेः अश्वत्थाम्नः तेजसा दग्धोऽपि अन्तकात् मृत्योः मोचितः सन् सजीवः कृतः ॥ ३१ ॥ हे तात ! जनमेजयेन सहिताः चत्वारः तनयाः । वीर्यवानिति सर्वेषां विशेषणम् ॥ ३२ ॥ होष्यति होमं करिष्यति ॥ ३३ ॥ कवषाया अपत्यं कावषेयं तुरं तुरनामानं पुरोधाय पुरोहितं कृत्वा अध्वरैः अश्वमेधैः यक्ष्यति ॥३४॥ तस्य जनमेजयस्य । त्रयीं वेदत्रयीम् । अस्त्रज्ञानं कृपाचार्यादित्येव पाठः इति श्रीधरी । परम् आत्मज्ञानम् ॥३५॥ तत्पुत्रः शतानीकपुत्रः ॥३६॥ स तु नेमिचक्रः कौशाम्ब्यां पुर्यां वत्स्यति गङ्गया गजाह्वये हस्तिनापुरे हृते प्लावते सति । ततो नेमिचक्रात् चित्ररथः उक्तः । अथ तस्य सुषेणः महीपतिः भविता । पारिप्लवात् सुनयः तस्यात्मजो मेधावी ॥ ३७ ॥ ३८ ॥ ३९ ॥ तस्य दुर्दमनस्य अपत्यम् अहीनरः बहीनर इत्यपि पाठः ॥ ४० ॥ दण्डेत्यर्द्धम् । तस्य अहीनरस्य दण्डपाणिः तस्य निमिः तस्य क्षेमकः ॥ ४१ ॥ ब्रह्मक्षत्रस्य ब्रह्मक्षत्रकुलयोः कारणभूतः वंशः प्रोक्तः । संस्थां समाप्तिम् ॥ ४२ ॥ अथेत्यर्द्धम् ॥ ४३ ॥

भविता सहदेवस्य मार्जारिर्यच्छ्रुतश्रवाः ॥ ४४ ॥
ततो युतायुस्तस्यापि निरमित्रोऽथ तत्सुतः । सुनक्षत्रः सुनक्षत्राद् बृहत्सेनोऽथ कर्मजित् ॥४५॥
ततः सृतञ्जयाद् विप्रः शुचिस्तस्य भविष्यति । क्षेमोऽथ सुव्रतस्तस्माद् धर्मसूत्रः शमस्ततः ॥४६॥
द्युमत्सेनोऽथ सुमतिः सुबलो जनिता ततः ॥ ४७ ॥
सुनीथः सत्यजिदथ विश्वजिद् यद् रिपुञ्जयः । बार्हद्रथाश्च भूपाला भाव्याः साहस्रवत्सरम् ॥४८॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां नवमस्कन्धे निमिवंशानुवर्णनं नाम द्वाविंशोऽध्यायः ॥२२॥

अथ त्रयोविंशोऽध्यायः

श्रीशुक उवाच

अनोः समानरश्चक्षुः परोक्षश्च त्रयः सुताः । सभानरात् कालनरः सृञ्जयस्तत्सुतस्ततः ॥ १ ॥
जनमेजयस्य पुत्रो महाशीलो महामनाः । उशीनरस्तितिक्षुश्च महामनस आत्मजौ ॥ २ ॥
शिविर्वनः शमिर्दक्षश्चत्वारोशीनरात्मजाः । वृषादर्भः सुवीरश्च भद्रः कैकेय आत्मजाः ॥ ३ ॥
शिवेश्चत्वार एवासंस्तितिक्षोश्च रुशद्रथः । ततो हेमोऽथ सुतपा बलिः सुतपसोऽभवत् ॥ ४ ॥
अङ्गवङ्गकलिङ्गाद्याः सुह्मपुण्ड्राण्ध्रसंज्ञिताः । जज्ञिरे दीर्घतमसो बलेः क्षेत्रे महीक्षितः ॥ ५ ॥
चक्रुः स्वनाम्ना विषयान् षडिमान् प्राच्यकांश्च ते । खनपानोऽङ्गतो जज्ञे तस्माद् दिविरथस्ततः॥६॥
सुतो धर्मरथो यस्य जज्ञे चित्ररथोऽप्रजाः । रोमपाद इति ख्यातस्तस्मै दशरथः सखा ॥७॥
शान्तां स्वकन्यां प्रायच्छद् ऋष्यशृङ्ग उवाह ताम् । देवेऽवर्षति यं रामा आनिन्युर्हरिणीसुतम् ।८।

भवितेत्यर्द्धम् । सहदेवस्य जराजन्धपुत्रस्य ॥ ४४ ॥ ततः श्रुतश्रवसः । अथ तस्मात् ॥ ४५ ॥ ततः कर्मजितः । विप्रो नाम । ततः धर्मसूत्रात् शमः ॥ ४६ ॥ अथ शमात् ॥ ४७ ॥ सुबलस्य सुनीथः । बार्हद्रथाः बृहद्रथवंशीयाः भाव्या भविष्याः । सहस्रेति स्वार्थिकोऽण् । अत्यन्तसंयोगे द्वितीया । सहस्रवर्षमिते काले एते भविष्यन्तीत्यर्थः ॥ ४८ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे गूढार्थदीपिन्यां द्वाविंशोऽध्यायः ॥ २२ ॥

अनोर्द्रुह्योस्तथा राज्ञस्तुर्वसोश्च यथाक्रमम् ।
ज्यामघान्तस्त्रयोविंशे यदोर्वंशो निरूप्यते ॥ १ ॥

अनोरिति सार्द्धम् । ययातेश्चतुर्थपुत्रस्य वंशमनुक्रामति—अनोरिति महाशीलस्य महामनाः पुत्रः ॥१॥२॥३॥ तत इत्यर्द्धम् । ततो रुषद्रथात् ॥४॥ बलेः क्षेत्रे भार्यायां दीर्घतमस उतथ्यपुत्रात् अङ्गाद्याः षट् पुत्रा जज्ञिरे ॥ ५ ॥ ते च अङ्गाद्याः प्राच्यकान् पूर्वदिग्वर्तिनः षट् विषयान् देशान् स्वस्वनाम्ना चक्रुः । यस्य धर्मरथस्य चित्ररथः स च अपुत्रः ॥६॥ स एव रोमपादः । प्रायच्छत् पुत्रीत्वेन ददौ । ताम् उवाह उपयेमे ॥ ७ ॥ रोमपादराज्ये देवे इन्द्रे अवर्षति सति रामा गणिका यम् ऋष्यशृङ्गं विभाण्डकपुत्रं विभ्रमादिभिः आनिन्युः । हरिणीसुतम् । अप्सरोदर्शनात् विभाण्डकमुनेर्जलच्युतवीर्यस्य पानात् हरिणीतो जातम् । विभ्रमः कटाक्षादिः अर्हणं मोदकादि ॥ ८ ॥ स तु ऋष्यशृङ्गः अनपत्यस्य रोमपादस्य प्रजामदात् मरुद्देवताकामिष्टि

नाट्यसङ्गीतवादित्रैर्विभ्रमालिङ्गनार्हणैः । स तु राज्ञोऽनपत्यस्य निरूप्येष्टिं मरुत्वतः ॥ ९ ॥
प्रजामदाद् दशरथो येन लेभेऽप्रजाः प्रजाः । चतुरङ्गो रोमपादात् पृथुलाक्षस्तु तत्सुतः ॥१०॥
बृहद्रथो बृहत्कर्मा बृहद्भानुश्च तत्सुताः । आद्याद् बृहन्मनास्तस्माज्जयद्रथ उदाहृतः ॥११॥
विजयस्तस्य सम्भूत्यां ततो धृतिरजायत । ततो धृतव्रतस्तस्य सत्कर्माधिरथस्ततः ॥१२॥
योऽसौ गङ्गातटे क्रीडन् मञ्जूषान्तर्गतं शिशुम् । कुन्त्याऽपविद्धं कानीनमनपत्योऽकरोत् सुतम् १३।
वृषसेनः सुतस्तस्य कर्णस्य जगतीपतेः । द्रुह्योश्च तनयो बभ्रुः सेतुस्तस्यात्मजस्ततः ॥१४॥
आरब्धस्तस्य गान्धारस्तस्य धर्मस्ततो धृतः । धृतस्य दुर्मनास्तस्मात् प्रचेताः प्राचेतसाः शतम् ॥
म्लेच्छाधिपतयोऽभूवन्नुदीचीं दिशमाश्रिताः । तुर्वसोश्च सुतो वह्निर्वह्नेर्भर्गोऽथ भानुमान् ॥१६॥
त्रिभानुस्तत्सुतोऽस्यापि करन्धम उदारधीः । मरुतस्तत्सुतोऽपुत्रः पुत्रं पौरवमन्वभूत् ॥१७॥
दुष्यन्तः स पुनर्भेजे स्वं वंशं राज्यकामुकः । ययातेर्ज्येष्ठपुत्रस्य यदोर्वंशं नरर्षभ ॥१८॥
वर्णयामि महापुण्यं सर्वपापहरं नृणाम् । यदोर्वंशं नरः श्रुत्वा सर्वपापैः प्रमुच्यते ॥१९॥
यत्रावतीर्णो भगवान् परमात्मा नराकृतिः । यदोः सहस्रजित् क्रोष्टा नलो रिपुरिति श्रुताः॥२०॥
चत्वारः सूनवस्तत्र शतजित् प्रथमात्मजः । महाहयो वेणुहयो हैहयश्चेति तत्सुताः ॥२१॥
धर्मस्तु हैहयसुतो नेत्रः कुन्तेः पिता ततः । सोहञ्जिरभवत् कुन्तेर्महिष्मान् भद्रसेनकः ॥२२॥
दुर्मदो भद्रसेनस्य धनकः कृतवीर्यसूः । कृताग्निः कृतवर्मा च कृतौजा धनकात्मजाः ॥२३॥
अर्जुनः कृतवीर्यस्य सप्तद्वीपेश्वरोऽभवत् । दत्तात्रेयाद्धरेरंशात् प्राप्तयोगमहागुणः ॥२४॥
न नूनं कार्तवीर्यस्य गतिं यास्यन्ति पार्थिवाः । यज्ञदानतपोयोगश्रुतवीर्यजयादिभिः ॥२५॥
पञ्चाशीतिसहस्राणि ह्यव्याहतबलः समाः । अनष्टवित्तस्मरणो बुभुजेऽक्षय्यषड्वसु ॥२६॥

निरूप्य । येन दशरथोऽपि प्रजा लेभे ॥ ९ ॥ तत्सुताः पृथुलाक्षसुताः त्रयः ॥ १० ॥ आद्याद् बृहद्रथात् । ततो विजयात् सम्भूत्यां पत्न्यां धृतिः पुत्रः ॥ ११ ॥ ततः सत्कर्मणः । योऽसौ अधिरथोऽनपत्यः कुन्त्या अपविद्धं लज्जया त्यक्तं शिशुं स्वसुतमकरोत् । कानीनं कन्यातो जातं कर्णम् ॥ १२ ॥ १३ ॥ द्रुह्योः ययातेः तृतीयपुत्रस्य । धर्मसुतः तस्य धृतः पुत्रः ॥ १४ ॥ प्राचेतसाः प्रचेतसः पुत्रास्तु शतं जाताः ॥ १५ ॥ तुर्वसोः ययातेः द्वितीयपुत्रस्य । अस्य त्रिभानोः उदारबुद्धिः करन्धमः ॥ १६ ॥ तस्य सुतः मरुतः पौरवं पूरुवंशीयं दुष्यन्तं पुत्रमन्वभूत् अङ्गीकृतवान् । स्ववंशं पूरुवंशमेव भेजे अन्वर्तत । तेषामेव राज्याधिकारात् ॥ १७ ॥ १८ ॥ १९ ॥ प्रथमस्य सहस्रजित आत्मजः शतजित् ॥ २० ॥ तत्सुताः शतजित्सुताः । ततो धर्मात् नेत्रः नेत्रात् कुन्तिरित्यर्थः ॥२१॥ तस्य महिष्मान् तस्य भद्रसेनः स्वार्थे कन् । तस्य धनकः तस्यः चत्वारः पुत्रा इति । उत्तरेणान्वयः । प्रथमपुत्रः कृतवीर्यः । कृतवीर्यं सूते उत्पादयतीति तथा । कृतवार्यसूः इति नाम न मन्तव्यम् ॥ २२ ॥ कृताग्निरिति सार्द्धम् । प्राप्तो योगः योगशक्तिः गुणा अष्टसिद्धयश्च येन सः ॥ २३ ॥ गतिं समताम् ॥ २४ ॥ समा वर्षाणि अक्षय्यं षड् वसु षडिन्द्रियविषयं बुभुजे सेवितवान् । कथंभूतः । न नष्टं भवति वित्तं स्मरणात् यस्य । अव्याहतमक्षीणम् ॥ २५ ॥ परशुरामेण सह मृधे युद्धे उर्वरिता अवशिष्टाः ॥ २६ ॥ यत् क्षत्रं क्षत्रिय

तस्य पुत्रसहस्रेषु पञ्चैवोर्वरिता मृधे । जयध्वजः शूरसेनो वृषभो मधुरूर्जितः ॥२७॥
जयध्वजात् तालजङ्घस्तस्य पुत्रशतं त्वभूत् । क्षत्रं यत् तालजङ्घाख्यमौर्वतेजोपसंहृतम् ॥२८॥
तेषां ज्येष्ठो वीतिहोत्रो वृष्णिः पुत्रो मधोःस्मृतः । तस्य पुत्रशतं त्वासीद् वृष्णिज्येष्ठं यतः कुलम् ॥
माधवा वृष्णयो राजन् यादवाश्चेति संज्ञिताः । यदुपुत्रस्य च क्रोष्टोः पुत्रो वृजिनवांस्ततः॥३०॥
श्वाहिस्ततो रुशेकुर्वै तस्य चित्ररथस्ततः । शशबिन्दुर्महायोगी महाभोजो महानभूत् ॥३१॥
चतुर्दशमहारत्नश्चक्रवर्त्यपराजितः । तस्य पत्नीसहस्राणां दशानां सुमहायशाः ॥३२॥
दशलक्षसहस्राणि पुत्राणां तास्वजीजनत् । तेषां तु षट्प्रधानानां पृथुश्रवस आत्मजः ॥३३॥
धर्मो नामोशना तस्य हयमेधशतस्य याट् । तत्सुतो रुचकस्तस्य पञ्चासन्नात्मजाः शृणु ॥३४॥
पुरुजिद्रुक्मरुक्मेषुपृथुज्यामघसंज्ञिताः । ज्यामघस्त्वप्रजोऽप्यन्यां भार्यां शैब्यापतिर्भयात् ॥३५॥
नाविन्दच्छत्रुभवनाद् भोज्यां कन्यामहारषीत् । रथस्यां तां निरीक्ष्याह शैब्या पतिममर्षिता ।३६।
केयं कुहक मत्स्थानं रथमारोपितेति वै । स्नुषा तवेत्यभिहिते स्मयन्ती पतिमब्रवीत् ॥३७॥
अहं वन्ध्याऽसपत्नी च स्नुषा मे युज्यते कथम् । जनयिष्यसि यं राज्ञि तस्येयमुपयुज्यते ॥३८॥
अन्वमोदन्त तद्विश्वेदेवाः पितर एव च । शैब्या गर्भमधात् काले कुमारं सुषुवे शुभम् ।
स विदर्भ इति प्रोक्त उपयेमे स्नुषां सतीम् ॥३९॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां नवमस्कन्धे यदुवंशानुवर्णने त्रयोविंशोऽध्यायः ॥ २३ ॥

जातिकं पुत्रशतं तत्तु और्वस्य गुरोस्तेजसा उपसंहृतं सगरेण नाशितम् ॥ २७ ॥ तेषामित्यर्द्धम् । तेषां तालजङ्घपुत्राणाम् । मधोः पुत्रः वृष्णिः ॥२८॥ तस्य मधोः पुत्रशतमासीत् किन्तु वृष्णिर्ज्येष्ठो यस्मिन् तथाभूतम् । यतो येभ्यः मधुवृष्णियदुभ्यः इदं कुलं प्रवृत्तम् ॥ २९॥ ततो वृजिनवतः स्वाहिः तस्य रुशेकुः तस्य चित्ररथः॥३०॥ ततः शशबिन्दुः । महान् भोजो भोगो यस्य । रत्नानि[1] तत्तज्जातिश्रेष्ठानि यस्य ॥ ३१ ॥ तस्य शशबिन्दोः अयुतपत्नीनां प्रत्येक लक्षं लक्षमित्येवं रीत्या पुत्राणां दशलक्षसहस्राणि शतकोटिपरिमितानि जनयामास ॥३२॥ तेषां दशलक्षणसहस्राणां शतकोटीनामिति यावत् । पृथुश्रवाः पृथुकीर्तिः पृथुयशा इत्यादयः षट् प्रधानानि श्रेष्ठा येषां तेषां मध्ये पृथुश्रवस आत्मजो धर्मो नाम स च याट् यष्टा ॥ ३३ ॥ तत्सुतः उशनस्सुतः रुचकः तस्य पञ्च आसन् तान् शृणु ॥ ३४ ॥ शैब्यापतिर्ज्यामघ इत्यत्रान्वेति । भयात् भार्याभयात् । शत्रून् विजित्य तेषां भवनात् बलात् भोज्यां नाम कन्यामहार्षीत् ॥३५॥ तां कन्याम् । अमर्षिता असहमाना । हे कुहक वञ्चक । मत्स्थानं वाममार्गे इयं का आरोपितेति ॥ ३६ ॥ तव स्नुषा पुत्रवधूः भविष्यति इत्युक्ते सति सा स्मयन्ती हसन्ती पतिमाह । मम सपत्नी नास्ति तस्याः पुत्रोऽपि मत्पुत्रःस्यात्तदाऽपि स्नुषा भवेत् न त्वेदस्ति अतः कथमुपयुज्यते इति योज्यम् ॥ ३७ ॥ यं पुत्रं त्वम् । तत् वचनम् आराधिता देवाः पितरश्च अन्वमोदन्त ॥ ३८ ॥ शैब्या तत्पत्नी । सुषुवे जनयामास । भोज्यां कन्याम् यां पूर्वं स्नुषेत्यभिहिताम् ।

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे गूढार्थदीपिन्यां त्रयोविंशोऽध्यायः ॥ २३ ॥

---

१. गजवाजिरथस्त्रीषुनिधिमाल्याम्बरद्रुमाः ।
शक्तिपाशमणिच्छत्रविमानानि चतुर्दश ॥ (मार्कण्डेय पुराणे)

अथ चतुर्विंशोऽध्यायः

तस्यां विदर्भोऽजनयत् पुत्रौ नाम्ना कुशक्रथौ । तृतीयं रोमपादं च विदर्भकुलनन्दनम् ॥१॥
रोमपादसुतो बभ्रुर्बभ्रोः कृतिरजायत । उशिकस्तत्सुतस्तस्माच्चेदिश्चैद्यादयो नृप ॥२॥
क्रथस्य कुन्तिः पुत्रोऽभूद् धृष्टिस्तस्याथ निर्वृतिः । ततो दशार्हो नाम्नाऽभूत्तस्य व्योमा सुतस्ततः ॥३॥
जीमूतो विकृतिस्तस्य यस्य भीमरथः सुतः । ततो नवरथः पुत्रो जातो दशरथस्ततः ॥४॥
करम्भिः शकुनेः पुत्रो देवरातस्तदात्मजः । देवक्षत्रस्ततस्तस्य मधुः कुरुवशादनुः ॥५॥
पुरुहोत्रस्त्वनोः पुत्रस्तस्यायुः सात्वतस्ततः । भजमानो भजिर्दिव्यो वृष्णिर्देवावृधोऽन्धकः ।
सात्वतस्य सुताः सप्त महाभोजश्च मारिष ॥६॥
भजमानस्य निम्लोचिः किङ्किणो धृष्टिरेव च । एकस्यामात्मजाः पत्न्यामन्यस्यां च त्रयः सुताः ।
शताजिच्च सहस्राजिदयुताजिदिति प्रभो ॥७॥
बभ्रुर्देवावृधसुतस्तयोः श्लोकौ पठन्त्यमू ॥८॥
यथैव शृणुमो दूरात् सम्पश्यामस्तथान्तिकात् । बभ्रुः श्रेष्ठो मनुष्याणां देवैर्देवावृधः समः ॥९॥
पुरुषाः पञ्चषष्टिश्च षट् सहस्राणि चाष्ट च । येऽमृतत्वमनुप्राप्ता बभ्रोर्देवावृधादपि ॥१०॥
महाभोजोऽपि धर्मात्मा भोजा आसंस्तदन्वये । वृष्णेः सुमित्रः पुत्रोऽभूद् युधाजिच्च परंतप ॥११॥
शिनिस्तस्यानमित्रश्च निम्नोऽभूदनमित्रतः । सत्राजितः प्रसेनश्च निम्नस्याप्यासतुः सुतौ ॥१२॥
अनमित्रसुतो योऽन्यः शिनिस्तस्याथ सत्यकः । युयुधानः सात्यकिर्वै जयस्तस्य कुणिस्ततः ॥१३॥
युगन्धरोऽनमित्रस्य वृष्णिः पुत्रोऽपरस्ततः । श्वफल्कश्चित्ररथश्च गान्दिन्यां च श्वफल्कतः ।
अक्रूरप्रमुखा आसन् पुत्रा द्वादश विश्रुताः ॥१४॥

चतुर्विंशे यदोर्वंशे विदर्भात्मजविस्तृते ।
देवकीप्रमुखा आसन् यत्र जातः स्वयं हरिः ॥ १ ॥

तस्यां भोज्यायाम् । विदर्भकुलं नन्दयतीति तथाभूतम् ॥१॥ तस्मात् उशिकात् । क्वचित्कुशिक इति । पाठः । ततः चेदेः चैद्यादयः दमघोषादयः ॥२॥ ततो व्योम्नः जीमूतः । नान्तमिदमिति वंशीधरी । हरिवंशेऽपि । दशार्हस्य सुतो व्योमा व्योम्नो जीमूत उच्यते इति ॥३॥ तस्य जीमूतस्य । शेषं स्पष्टम् ॥ ४ ॥ ततो दशरथात् शकुनिः । मधोः कुरुवशः ततोऽनुसंज्ञकः ॥ ५ ॥ पुरुरिति सार्द्धम् । आयुसंज्ञकः । सात्वतस्य तु भजमानादयः सप्त सुता बभूवुः । हे मारिष आर्य ॥ ६ ॥ एकस्यां भार्यायां त्रयः । अन्यस्यां च त्रयः ॥ ७ ॥ ८ ॥ अन्तिकात् अन्तिकेऽपि ॥ ९ ॥ उभयोरनु पश्चात् ते तद्वंशजाः १४०६५ नृपास्ते तत्सम्पर्काः सन्तः अमृतत्वं मुक्तिं प्राप्ताः ॥ १० ॥ भोजा भोजसंज्ञकाः । वृष्णेः सात्त्वतपुत्रस्य पुत्रद्वयम् ॥ ११ ॥ तस्य युधाजितः पुत्रद्वयम् ॥ १२ ॥ सत्यकस्यापत्यं सात्यकिः स एव युयुधानः । तस्य सात्यकेः ॥ १३ ॥ युगमिति सार्द्धम् । युगन्धरः कुणेः पुत्रः । अपरः तृतीयः पुत्रः वृष्णिः तस्य पुत्रद्वयं श्वफल्केति । श्वफल्कात् गान्दिन्यां भार्यायाम् अक्रूरातिरिक्ता द्वादश पुत्रा आसन् । अक्रूरः प्रमुखः आदिर्येषां ते एव न तु अक्रूर इत्यतद्गुणसंविज्ञानो बहुव्रीहिः । दृष्टसागरमानयेति-

आसङ्गः सारमेयश्च मृदुरो मृदुविद् गिरिः। धर्मवृद्धः सुकर्मा च क्षेत्रोपेक्षोऽरिमर्दनः।
शत्रुघ्नो गन्धमादश्च प्रतिबाहुश्च द्वादश ॥१५॥

तेषां स्वसा सुचीराख्या द्वावक्रूरसुतावपि। देववानुपदेवश्च तथा चित्ररथात्मजाः ॥१६॥
पृथुर्विदूरथाद्याश्च बहवो वृष्णिनन्दनाः। कुकुरो भजमानश्च शुचिः कम्बलबर्हिषः ॥१७॥
कुकुरस्य सुतो वह्निर्विलोमा तनयस्ततः। कपोतरोमा तस्यानुः सखा यस्य च तुम्बुरुः ॥१८॥
अन्धको दुन्दुभिस्तस्मादरिद्योतः पुनर्वसुः। तस्याहुकश्चाहुकी च कन्या चैवाहुकात्मजौ ॥१९॥
देवकश्चोग्रसेनश्च चत्वारो देवकात्मजाः। देववानुपदेवश्च सुदेवो देववर्धनः ॥२०॥
तेषां स्वसारः सप्तासन् धृतदेवादयो नृप ॥२१॥

शान्तिदेवोपदेवा च श्रीदेवा देवरक्षिता। सहदेवा देवकी च वसुदेव उवाह ताः ॥२२॥
कंसः सुनामा न्यग्रोधः कङ्कः शंकुः सुहूस्तथा। राष्ट्रपालोऽथ सृष्टिश्च तुष्टिमानौग्रसेनयः ॥२३॥
कंसा कंसवती कङ्का शूरभू राष्ट्रपालिका। उग्रसेनदुहितरो वसुदेवानुजस्त्रियः ॥२४॥
शूरो विदूरथादासीद् भजमानः सुतस्ततः। शिनिस्तस्मात् स्वयम्भोजो हृदीकस्तत्सुतो मतः ।२५।
देवबाहुः शतधनुः कृतवर्मेति तत्सुताः। देवमीढस्य शूरस्य मारिषा नाम पत्न्यभूत् ॥२६॥
तस्यां स जनयामास दश पुत्रानकल्मषान्। वसुदेवं देवभागं देवश्रवसमानकम्।
सृञ्जयं श्यामकं कङ्कं शमीकं वत्सकं वृकम् ॥२७॥

देवदुन्दुभयो नेदुरानका यस्य जन्मनि। वसुदेवं हरेः स्थानं वदन्त्यानकदुन्दुभिम् ॥२८॥
पृथा च श्रुतदेवा च श्रुतकीर्तिः श्रुतश्रवाः। राजाधिदेवी चैतेषां भगिन्यः पञ्च कन्यकाः ॥२९॥
कुन्तेः सख्युः पिता शूरो ह्यपुत्रस्य पृथामदात् ॥३०॥

वत् ॥ १४ ॥ आसङ्ग इति सार्द्धम्। गिरिरपि पञ्चमः पुत्रः ॥ १५ ॥ तेषामिति द्वयम्। तेषामासङ्गादीनां स्वसा भगिनी। चित्ररथस्य श्वफल्कभ्रातुः पुत्राः पृथुरेकः विदूरथाद्या अन्ये च बभूवुः। कुकुरादयश्चत्वारोऽन्धकस्य सात्वतपुत्रस्य पुत्राः पराशरवचनादिति ज्ञेयम् ॥ १७ ॥ ततो वह्नेः। यस्य अनोः सखा तुम्बुरुः गन्धर्वः ॥ १८ ॥ अन्धक इति युग्मम्। अनोः पुत्रः अन्धकः। तस्य पुनर्वसोः आहुकः पुत्रः आहुकी कन्या च। आहुकात्मजौ देवकः उग्रसेनश्च ॥२०॥ तेषामित्यर्द्धम्। ताः सप्तापि वसुदेवः उवाह विवाहितवान् ॥ २२ ॥ कंसादयो नव उग्रसेनस्य पुत्राः। उग्रसेनस्य अपत्यानि पुमांसः औग्रसेनयः ॥ २३ ॥ कंसाद्याः पञ्च अनुजानां देवभागादीनां भार्याः ॥२४॥ चित्ररथात्मजात् विदूरथात् शूरः आसीत्। तत्सुतः स्वयम्भोजसुतः हृदीकः ॥२५॥ तत्सुताः हृदीकसुताः त्रयः। देवमीढो हृदीकस्यैव पुत्रः तस्य शूरः ॥२६॥ तस्यामिति सार्द्धम्। स शूरःअकल्मषान् निष्पापान् दश सत्यवादिन इत्यर्थः ॥ २७ ॥ एतेषां वसुदेवादीनां पञ्च भगिन्यः ॥ २९ ॥ कुन्तेरित्यर्द्धम्। पृथायाः पिता शूरः स्वसख्ये कुन्तिनामकाय पुत्रीत्वेन पृथामदात् अतोऽस्याः कुन्तीति[1] नामान्तरम्। अत्र चतुर्थ्यर्थे

---

१. यथोक्तं हरिवंशे—शूरः पूज्याय वृद्धाय कुन्तिभोजाय तां ददौ।
तस्मात्कुन्तीति विख्याता कुन्तिभोजात्मजा पृथा ॥

साऽऽप दुर्वाससो विद्यां देवहूतिं प्रतोषितात् । तस्या वीर्यपरीक्षार्थमाजुहाव रविं शुचिः ॥३१॥
तदैवोपागतं देवं वीक्ष्य विस्मितमानसा । प्रत्ययार्थं प्रयुक्ता मे याहि देव क्षमस्व मे ॥३२॥
अमोघं दर्शनं देवि आधित्से त्वयि चात्मजम् । योनिर्यथा न दुष्येत कर्ताऽहं ते सुमध्यमे ॥३३॥
इति तस्यां स आधाय गर्भं सूर्यो दिवं गतः । सद्यः कुमारः संजज्ञे द्वितीय इव भास्करः ॥३४॥
तं साऽत्यजन्नदीतोये कृच्छ्राल्लोकस्य बिभ्यती । प्रपितामहस्तामुवाह पाण्डुर्वै सत्यविक्रमः ॥३५॥
श्रुतदेवां तु कारूषो वृद्धशर्मा समग्रहीत् । यस्यामभूद् दन्तवक्त्र ऋषिशप्तो दितेः सुतः ॥३६॥
कैकेयो धृष्टकेतुश्च श्रुतकीर्तिमविन्दत । संतर्दनादयस्तस्य पञ्चासन् कैकयाः सुताः ॥३७॥
राजाधिदेव्यामावन्त्यौ जयसेनोऽजनिष्ट ह । दमघोषश्चेदिराजः श्रुतश्रवसमग्रहीत् ॥३८॥
शिशुपालः सुतस्तस्याः कथितस्तस्य सम्भवः ॥३९॥

देवभागस्य कंसायां चित्रकेतुबृहद्बलौ । कंसवत्यां देवश्रवसः सुवीर इषुमांस्तथा ।
कङ्कायामानकाज्जातः सत्यजित् पुरुजित्तथा ॥४०॥

सृञ्जयो राष्ट्रपाल्यां च वृषदुर्मर्षणादिकान् । हरिकेशहिरण्याक्षौ शूरभूम्यां च श्यामकः ॥४१॥
मिश्रकेश्यामप्सरसि वृकादीन् वत्सकस्तथा । तक्षपुष्करशालादीन् दुर्वाक्ष्यां वृक आदधे ॥४२॥
सुमित्रार्जुनपालादीन्शमीकात्तु सुदामिनी । कङ्कश्च कर्णिकायां वै ऋतधामजयावपि ॥४३॥
पौरवी रोहिणी भद्रा मदिरा रोचना इला । देवकीप्रमुखा आसन् पत्न्य आनकदुन्दुभेः ॥४४॥

षष्ट्यः ॥ ३० ॥ सा पृथा दुर्वाससः विद्याम् आप प्राप । देवा हूयन्ते आहूयन्ते यया सा तां देवहूतिम् । शुचिः ऋतुस्नाता ॥ ३१ ॥ उपागतं प्राप्तम् । प्रत्ययार्थं विश्वासार्थम् मया प्रयुक्ता प्रयोजिता विद्या अतः क्षमस्व । मे अपराधम् ॥ ३२ ॥ अमोघं सफलम् आधित्से[1] उत्पादयितुमिच्छामि । न दुष्येत न क्षता भवेत् तथा कर्ता करिष्यामि । हे सुमध्यमे सुष्ठु मध्यमः कटिभागो यस्यास्तत्सम्बुद्धौ ॥३३॥ ३४ ॥ तं बालम् नदीतोये पेटिकायां संस्थाप्येति शेषः । लोकस्य कृच्छ्रात् लोकापवादात् बिभ्यती । ते प्रपितामहः पाण्डुः तां पृथामुवाह परिणीतवान् अत्र परीक्षितः पिता अभिमन्युः पितामहोऽर्जुनः प्रपितामहः पाण्डुरिति क्रमः । सत्ये धर्मे एव विक्रमः प्रयत्नो यस्य सः ॥३५॥ कारूषः करूषदेशाधिपतिः वृद्धशर्मा श्रुतदेवां वसुदेवभगिनीम् । ऋषिभिः सनकादिभिः शप्तः दन्तवक्त्रोऽभूत् । यः पूर्वजन्मनि दितेः सुतः हिरण्याक्षः आसीत् ॥ ३६ ॥ कैकेयः एतद्देशाधिपतिः श्रुतकीर्ति वसुदेवभगिनीम् । तस्यां सन्तर्दनादयः पञ्च सुताः ॥ ३७ ॥ राजाधिदेवी वसुदेवभगिनी तस्यां जयसेनः आवन्त्यौ उज्जयिन्या राजानौ विन्दानुविन्दौ द्वौ पुत्रौ जनयामास । ह प्रसिद्धौ । श्रुतश्रवसं वसुदेवभगिनीं चेदिदेशाधिपतिः दमघोषः॥३८॥तस्य संभवो जन्म कथितः सप्तमस्कन्धे।॥३९॥वसुदेवभ्रातॄणां पत्नीं पुत्रांश्चाह देवेति सार्द्धम् । स्पष्टम् ॥४०॥ सृञ्जयो वसुदेवभ्राता । स्यामकः वसुदेवभ्राता ॥४१॥ वत्सकः वसुदेवभ्राता वृकः वसुदेवभ्राता । आदधे जनयामास ॥४२॥ शमीकात् वसुदेवभ्रातुः सुमित्रः अर्जुनपालश्च तदादीन् । कंकः वसुदेवभ्राता पुत्रद्वयम् ॥४३॥ आनकदुन्दुभेः वसुदेवस्य पत्न्यः ॥ ४४ ॥ बलादीन् कृतादींश्च जनयामास ॥ ४५ ॥ पौरवी वसुदेवभार्या

---

१. आधत्से इति तु अपपाठः रूपासिद्धेः इति वीरराघवः ।

बलं गदं सारणं च दुर्मदं विपुलं ध्रुवम् । वसुदेवस्तु रोहिण्यां कृतादीनुदपादयत् ॥४५॥
सुभद्रो भद्रबाहुश्च दुर्मदो भद्र एव च । पौरव्यास्तनया ह्येते भूताद्या द्वादशाऽभवन् ॥४६॥
नन्दोपनन्दकृतकशूराद्या मदिरात्मजाः । कौसल्या केशिनं त्वेकमसूत कुलनन्दनम् ॥४७॥
रोचनायामतो जाता हस्तहेमाङ्गदादयः । इलायामुरुवल्कादीन् यदुमुख्यानजीजनत् ॥४८॥
विपृष्ठो धृतदेवायामेक आनकदुन्दुभेः । शान्तिदेवात्मजा राजन्प्रशमप्रतिश्रुतादयः ॥४९॥
राजानः कल्पवर्षाद्या उपदेवासुता दश । वसुहंससुवंशाद्याः श्रीदेवायास्तु षट् सुताः ॥५०॥
देवरक्षितया लब्धा नव चात्र गदादयः । वसुदेवः सुतानष्टावादधे सहदेवया ॥
पुरुविश्रुतमुख्यांस्तु साक्षाद् धर्मो वसूनिव ॥ ५१ ॥
वसुदेवस्तु देवक्यामष्ट पुत्रानजीजनत् । कीर्तिमन्तं सुषेणं च भद्रसेनमुदारधीः ॥
ऋजुं सम्मर्दनं भद्रं संकर्षमणहीश्वरम् ॥ ५२ ॥
अष्टमस्तु तयोरासीत् स्वयमेव हरिः किल । सुभद्रा च महाभागा तव राजन् पितामही ॥५३॥
यदा यदेह धर्मस्य क्षयो वृद्धिश्च पाप्मनः । तदा तु भगवानीश आत्मानं सृजते हरिः ॥५४॥
न ह्यस्य जन्मनो हेतुः कर्मणो वा महीपते । आत्ममायां विनेशस्य परस्य द्रष्टुरात्मनः ॥५५॥
यन्मायाचेष्टितं पुंसः स्थित्युत्पत्त्यप्ययाय हि । अनुग्रहस्तन्निवृत्तेरात्मलाभाय चेष्यते ॥५६॥
अक्षौहिणीनां पतिभिरसुरैर्नृपलाञ्छनैः । भुव आक्रम्यमाणाया अभाराय कृतोद्यमः॥५७॥
कर्माण्यपरिमेयानि मनसापि सुरेश्वरैः । सहसंकर्षणश्चक्रे भगवान् मधुसूदनः ॥५८॥
कलौ जनिष्यमाणानां दुःखशोकतमोनुदम् । अनुग्रहाय भक्तानां सुपुण्यं व्यतनोद् यशः ॥५९॥
यस्मिन् सत्कर्णपीयूषे यशस्तीर्थवरे सकृत् । श्रोत्राञ्जलिरुपस्पृश्य धुनुते कर्मवासनाम् ॥६०॥

तस्याः ॥ ४६ ॥ आदिशब्देन आद्यशब्देन च अन्येऽपि ग्राह्यास्तदैव संख्यापूर्तिः । मदिरा वसुदेवभार्या । कौशल्या वसुदेवभार्या केशिनं पुत्रम् ॥ ४७ ॥ अतो वसुदेवात् हेमाङ्गदः एकं नाम उरुवल्क इत्येकं नाम ॥ ४८ ॥ विपृष्ठो नाम एक एव पुत्रः ॥ ४९ ॥ ५० ॥ देवेति सार्द्धम् । नव पुत्राः लब्धा प्रसूताः । सहदेवया भार्यया हेतुभूतया अष्ट पुत्रान् आदधे जनयामास । पुरुविश्रुत इत्येकं नाम । यथा अष्टौ वसून् द्रोणादीन् ॥ ५१ ॥ वसुदेव इति सार्द्धम् अहीश्वरमिति विशेषणम् ॥ ५२ ॥ सुभद्रा एका कन्या च तव पितामही अर्जुनभार्यात्वात् ॥ ५३ ॥ पाप्मनः पापस्य । सृजते अवतारयति ॥ ५४ ॥ आत्मसु जीवेषु मायां कृपां विना अस्य आत्मनः परमात्मनः जन्मनः कर्मणो वा अन्यो हेतुर्नास्तीत्यर्थः । परस्य असङ्गस्य द्रष्टुः साक्षिणः यद्वा । आत्मनो जीवान् संसारबन्धौ पतितान् द्रष्टुः ॥ ५५ ॥ यस्य अनुग्रहस्तु तस्य स्थित्यादेर्निवृत्तये आत्मलाभाय मोक्षाय च इष्टो भवति ॥ ५६ ॥ असुरैः आक्रम्यमाणायाः पीड्यमानाया भुवः भारनिवृत्तये कृतः उद्यमः प्रादुर्भावः येन सः तथाभूतः सन् ॥ ५७ ॥ सुरेश्वरैः इन्द्रादिभिः मनसाऽपि सङ्कल्पयितुमशक्यानि कर्माणि भगवान् चक्रे ॥ ५८ ॥ दुःखादीनि अपनुदति नाशयतीति इगुपधलक्षणः कः । यशः व्यतनोत् विस्तारितवान् ॥ ५९ ॥ सतां कर्णयोः पीयूषतुल्ये यशोरूपे तीर्थे श्रोत्रमेवाञ्जलिः पानसाधनं यस्य सः पुरुषः उपस्पृश्य आचम्य आचमनवत् किञ्चिदपि सकृदपि श्रुत्वा कर्मवासनां धुनुते क्षपयतीत्यर्थः ॥ ६० ॥

भोजवृष्ण्यन्धकमधुशूरसेनदशार्हकैः । श्लाघनीयेहितः शश्वत् कुरुसृञ्जयपाण्डुभिः ॥६१॥
स्निग्धस्मितेक्षितोदारैर्वाक्यैर्विक्रमलीलया । नृलोकं रमयामास मूर्त्या सर्वाङ्गरम्यया ॥६२॥
यस्याननं मकरकुण्डलचारुकर्णभ्राजत्कपोलसुभगं सविलासहासम् ।
नित्योत्सवं न ततृपुर्दृशिभिः पिबन्त्यो नार्यो नराश्च मुदिताः कुपिता निमेश्च ॥६३॥
जातो गतः पितृगृहाद् व्रजमेधितार्थो हत्वा रिपून् सुतशतानि कृतोरुदारः ।
उत्पाद्य तेषु पुरुषः क्रतुभिः समीजे आत्मानमात्मनिगमं प्रथयञ्जनेषु ॥६४॥
पृथ्व्याः स वै गुरुभरं क्षपयन् कुरूणामन्तःसमुत्थकलिना युधि भूपचम्वः ।
दृष्टया विधूय विजये जयमुद्विघोष्य प्रोच्योद्धवाय च परं समगात् स्वधाम ॥६५॥

इति श्रीमद्भागवते महापुराणे वैयासिक्यामष्टादशसाहस्र्यां पारमहंस्यां संहितायां नवमस्कन्धे श्रीसूर्यसोमवंशानुकीर्तने यदुवंशानुकीर्तनं नाम चतुर्विंशोऽध्यायः ॥ २४ ॥

इति नवमः स्कन्धः समाप्तः

हरिः ॐ तत्सत्

भोजेति युग्मम् । भगवान् श्रीकृष्णः वाक्यैः विक्रमलीलया सर्वाङ्गैः रम्यया मूर्त्या च नृलोकं रमयामास आनन्दितं चकारेति द्वयोरन्वयः । कथंभूतः । भोजादिभिः कुर्वादिभिश्च शश्वत् श्लाघनीयमीहितं चरित्रं यस्य सः । कथंभूतैः वाक्यैः । स्निग्धानि सानुरागाणि यानि स्मितेक्षितानि सहासनिरीक्षणानि तैरुदारैः गम्भीरैः वचोभिः ॥ ६१ ॥ ६२ ॥ भगवन्मूर्तेः सर्वाङ्गरम्यत्वं सूचयितुं स्थालीपुलाकन्यायेन तावत् मुखशोभामाह-यस्येति । यस्य भगवतः आननं दृशिभिः पिबन्त्यो नार्यः नराश्च न ततृपुः न तृप्ताः प्रत्युत नेत्रयोः निमेषोन्मेषव्यवधानपि असहमानाः तत्कर्तुः निमेरपि कुपिता बभूवुरित्यन्वयः । कथंभूतम् । मकराकृतिकुण्डलाभ्यां चारुकर्णौ भ्राजन्तौ कपोलौ च तैः सुन्दरम् । विलासः चमत्कृतिजनकः उत्सवः शोभातिशयः ॥ ६३ ॥ पुरुषः श्रीकृष्णः जातः सन् गृहात् कारागारात् व्रजं गोकुलं गतः तत्र व्रजवासिनामेधिताः साधिता अर्थाः कार्याणि येन सः कृतोरुदारः कृतबहुविवाहः सन् तेषु दारेषु पुत्रान् कन्याश्च उत्पाद्य क्रतुभिः आत्मानं देवसमूहमीजे च पूजितवान् । किं कुर्वन् सन् । जनेषु आत्मनिगमं वेदमार्गं प्रथयन् प्रचारयन् सन् ॥ ६४ ॥ स वै स एव श्रीकृष्णः अन्तः परस्परं समुत्थेन कलिना कलहेन निमित्तेन पृथ्व्या बहु भारं क्षपयन् युधि या भूपचम्वः राजसेनाः ता दृष्ट्यैव विधूय संहृत्य विजये अर्जुनजयम् उद्घोष्य डिण्डिमं वादयित्वा स्वधाम वैकुण्ठं समगात् । किं कृत्वा । परं तत्त्वं प्रोच्य उपदिश्य ॥ ६५ ॥

सूर्यसोमकुलोत्पन्ना ये नृपाः पुण्यकीर्तयः ।
तेषां चरित्रश्रवणादिहाऽमुत्र च मङ्गलम् ॥ १ ॥
मङ्गलं भगवान् कृष्णो मङ्गलं तत्कथामृतम् ।
मङ्गलं चास्य वक्तारः श्रोतारश्चापि मङ्गलम् ॥ २ ॥
मङ्गलं मङ्गलं जाग्रत् मङ्गलं मङ्गलं स्वपन् ।
एवं जपन्नवाप्नोति मङ्गलायतनं हरिम् ॥ ३ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे सनाढ्यवंशावतंसपण्डितप्रवरश्रीराममूर्तिशास्त्रिपौराणिकविरचितायां गूढार्थदीपिन्यां चतुर्विंशोऽध्यायः ।

इति नवमः स्कन्धः समाप्तः

[मननीयम्]

मनुजदेहमवाप्य सुदुर्लभं यदि न भागवते सुरुचिः कृता ।
भवति तस्य हि जन्म निरर्थकं पुनरयं न सुयोनिमवाप्नुयात् ॥

भगवता कृपया निजलब्धये कृतमिदं भुवि मानवजन्म यत् ।
तद्विचिन्त्य नरान् विषयोन्मुखान् कलिरयं निरयं प्रति नेष्यति ॥

इति धियां सुविविच्य पदे पदे निखिलदृश्यमिदं क्षणभङ्गुरम् ।
श्रृणुत भागवतं भुवि मुक्तिदं पठत पाठयतार्थपुरःसरम् ॥

[आचरणीयम्]

चौखम्बा विद्याभवन
वाराणसी